CC-0: In Public Domain, Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

5083

अथ लघुपाराशरी प्रारम्भः ॥

श्री ५ को सरकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल·पा· श्रीशिवाय नमः ॥ कृपाजलनिधी दत्ताखिलनमद्दुरधिर्जनुर्जरामृतिमयामयोन्मथितजीवदिव्यौषधिः तुषारगिरिवंशवा
१ रिधिकलानिधिं कोप्यसौ विभाति विनमद्विधिर्निरवधिर्नमत्सेवधिः १ श्रीमद्गोविंदरामाभिधविबुधशिरोरत्नसंशोधितो
यं ग्रंथो वाग्विभ्वमुद्रांकितभवन· पदख्यातसंज्ञे मनोज्ञे मुद्रागारे विशाले विविदिषुसुमनःप्रीतये मुद्रितो वाग्विभ्वेंद्रस्या
ज्ञया संजनितबुधमुदो वीरसिंहस्य काम्यां १ इति प्रथमावृत्तिः अतः परं श्रीधरगौडेन ॥ ॐ ॥
श्रीगणेशाय नमः श्रीलक्ष्मीरमणं गणेशमभयं श्रीमद्गुरुं शारदां सूर्यादिग्रहमंडलं सविनयं नत्वा विदां प्रीतये ज्योतिः
॥ॐ॥ श्रीमत्पाराशरीहोरानुसारी विदुषां मुदे अमृद्योतयुतः सोयमुडुदायप्रदीपकः १
शास्त्रकलाकुतूहलरतिः सत्तत्त्वसंधानहृद्वीक्ष्योद्योतमिमं ॥ तनोमि श्रीशादंदायप्रदीपेऽमलं १ परमसुखमुदारं ज्ञात
सच्छास्त्रसारं विजितभवविकारं व्यक्तमुक्तिप्रकारं कृतिनयनविचारं भूरिशिष्यप्रचारं गुरुमवनिपहारं दृष्टपारं स्मराम
रकाहं मंदमतिः क्व शास्त्रधिषणासाध्यं सतां संमतं ज्योतिःशास्त्रविविक्तदिष्टजफलं क्वासौ तदर्थोद्यमः तानेव स्मृति
गोचरान् गुरुकृपापीयूषधाराधरानन्ये हार्दकुबोधवह्निबहुलज्वालैकनिर्वापकान् ३ वार्त्तिकः अथतावत्पौर्वदे॥ राम·
हिकधर्माधर्माधीनजन्मनो जीवजातस्यानागतधर्माऽधर्म्मफलविवक्षया नानाजातकशास्त्राणि परमर्षयः ॥ ॐ ॥ १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पणिसुस्तत्र परमकारुणिको भगवान् पराशरः प्रारब्धस्य फलानुमेयत पाफलव्यभिचारेऽनुमानव्यभिचारात्पूर्वाचार्यो
पाख्येष्वनुमानानास्थत्वमालोचयन् जातकविशेषं प्रणिनायतमेव जातकविशेषं कलौ पाराशरी स्मृतिरिति न्यायसाम
न्यात् प्रभिचरितफलत्वात्सिद्धांतमन्यमान आचार्य उडुदायप्रदीपाख्यं ग्रंथञ्चिकीर्षुस्तत्समाप्तिप्रत्यादिप्रतिबंधकप्रत्या
हव्यूहविहतये मंगलमाचरति स्म सिद्धांतमित्यादि सिद्धः शास्त्रतो निर्णीतः अंतो निश्चयो यस्य स तथा तं वयमुपास्महे इ
ष्टाधिगमहेतु मानसः प्रत्ययप्रवाह उपासनात्तद्विषयीकुर्मः इत्यर्थः ननु शास्त्रबहुत्वाद्बहवः सिद्धांतास्तत्र कतमः सिद्धांत
उपास्यत इत्यत आह औपनिषदमिति वेदांतवाक्यान्युपनिषदस्तत्प्रतिपाद्यमित्यर्थः ब्रम्हस्वरूपमिति भावः ननु निर्विशे
षं ब्रम्ह वेदांतप्रतिपाद्यं तत्कथमुपासनीयम विषयत्वादित्यत आह शुद्धांत परमेष्ठिन इति परमेष्ठिनः शुद्धांतमिति योज
ना जगत्स्रष्टा परमेष्ठी तस्य शुद्धांतमंतःपुरम् वाणीरूपमित्यर्थः शुद्धांतश्चावरोधश्चेत्यमरः ननु पूर्वविशेषणविशिष्ट
वाक्यसंदर्भरूपवाण्युपास्यतेऽतास्त्याकारविशेष इत्यत आह शोणाधरमिति शोण आरक्तोऽधरो यस्य अधरशब्देन
लक्षणया धरौष्ठबोधको नत्वोष्ठरूढः उत्तरोष्ठाधरोष्ठयोरित्यादावोष्ठपदवैयर्थ्यात् तेन शोणौ रक्तावोष्ठौ यस्येति कस्यचि
द्विवरणपरास्तं तदनेन साकारत्वादर्शिता नन्वेवं प्राकृतत्वात्पत्तिरत आह मह इति तेजोरूपमित्यर्थः ननु ज्वलनादिः स्या
दत आह किंचिदिति अनिर्वचनीयमित्यर्थः नन्वात्मानमुपासीतेत्यादिश्रुतेरात्मन उपासनमुचितं मोक्षहेतुत्वात्तत्किं वा

ल॰पा तदुपासनेनेत्यत आह वीणाधरमिति मोक्षप्रयोजकनादहेतुवाद्यविशेषो वीणा तस्याः धरं धारकमित्यर्थः वीणाधारणक्रियाक
१ र्तृत्वेनास्मत्तात् तदुपासनं कृतिसिद्धमिति भावः वीणाशब्देन स्वरतालादिकमुपलक्ष्यते तेन तद्रसिकत्वोक्त्या मोक्षप्रदत्वं व्यज्यते
वीणावादनतत्त्वज्ञः स्वरजातिविशारदः तालज्ञश्चाप्रयासेन मोक्षमार्गं निगच्छतीति याज्ञवल्क्योक्तेः वीणां दधातीति तु न विग्र
हः कर्मण्युपपदे वीणाधारमित्यापत्तेः एतेन वीणां दधातीति कस्यचित् व्याख्यानमपास्तं १ अथ चिकीर्षितस्य ग्रन्थस्य नाम निर्दि
शन् चिकीर्षितं प्रतिजानीते वयमिति बहुवचनमस्मदो द्वयोश्चेत्यत्र चकारेणैकस्मिन्नपीत्यस्यानुकर्षणात् पाराशरीं पराश

श्रीगणेशाय नमः सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः शोणाधरं महः किञ्चिद्वी
णाधरमुपास्महे १ वयं पाराशरीं होरामनुसृत्य यथामतिः ॥

रेण प्रोक्तां पाराशरीं तां होरां लग्नं शास्त्रं लग्नस्यार्द्धं भवेद्धोरेत्युक्ते होराशब्दस्य लग्नार्द्धवाचित्वेऽपि लग्नशास्त्रलक्षकत्वात् त
था च पराशरोक्तं शास्त्रमनुसृत्य पर्यालोच्य यथामतिः अध्ययनभावनाभ्यां परिनिष्पन्नां बुद्धिमनतिक्रम्य उडुदायप्रदीपाख्यं
उडवो नक्षत्राणि तेषां दायाः फलानि देयभागस्य दायपदार्थत्वात् तेषां प्रकाशकत्वात् प्रदीप इवोडुदायप्रदीपः स आख्या यस्य ल॰म॰
तं कुर्मो विरचयामः कस्मै प्रयोजनायेत्यत आह दैवविदां मुदे इति प्रारब्धं कर्म दैवं तद्विदन्तीति दैवविदस्तेषां मुदे हर्षायेति २ २

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ नक्षत्रप्रयोज्यफलप्रकाशकत्वं ग्रंथनामनिर्वचनव्याजेन प्रतिज्ञातं तत देवविदां दीकरोति फलानीत्यादिना प्रारब्धवशाद्वश्यं भावीनि सुखदुःखफलानि तद्धेतुभूतानि राज्यस्त्रीपुत्रधनादीनि च विवृण्महे विवेचयामः विविच्य प्रकाशयाम इति यावत् केन प्रकारेणेत्यत आह नक्षत्रदशाप्रकारेणेति नक्षत्राधीशा नक्षत्रदशा तस्याः प्रकारो भेदस्तेनेत्यर्थः ननु दशा द्विविधा विंशोत्तरी अष्टोत्तरी च तत्र कादशाया ग्राह्येत्यत आह दशा विंशोत्तरीत्यादि स्पष्टोऽर्थः अथ कस्यैव योगिनीदशायाः फलं ब्रूयात्तत्र तिषेधार्थमाह नाष्टोत्तरीति अष्टोत्तरीदशा न कालेन ग्राह्या फलव्यभिचारादिति भावः विंशोत्तरीदशा च ग्रंथांतरे तनुनयसितजापातोपिधनु

उडुदायप्रदीपाख्यं कुर्मो दैवविदां मुदे ॥ २ ॥ फलानि नक्षत्रदशाप्रकारेण विवृण्महे

न्यासदासानखद्वतिगदितासभास्करादिक्रमेणेति अत्र कादिनवटादिनवपादिपंचयाद्यष्टाविति वर्गचतुष्टयं शिवतांडवादिपुस्तकं तदनुसरणात् तनुशब्देन षट् ६ नयशब्देन दश १० सितशब्देन सप्त ७ जापाशब्देनाष्टादश १८ तोपिशब्देन षोडश १६ धन्याशब्देनोनविंशतिः १९ सगशब्देन सप्तदश १७ साशब्दे न सप्त ७ नखशब्देन विंशतिः २० एते क्रमेण भास्करादीनां दशावर्षा भवंति भास्करादयश्च रविश्चंद्रः कुजो राहुर्गुरुर्मंदो बुधस्तथा केतुर्भृगुस्तत्राऽपि दशाधीशा अमी क्रमादिति ग्रंथांतरोक्ताः अत्रास्मदीयः श्लोकः रस ६ दश १० द्रि ७ पुराण १८ महीभृतो १६ विधुविहीननखा १९ अगभूमयः १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज. पा. गिरि ७ नखा २० रविचंद्रकुजागुरुसुगुरुशनिज्ञकेतुसिताब्दका इति दशाज्ञानप्रकारस्तु ग्रंथांतरे नयनोनजनुर्भतोंऽकदस्रकमशोऽर्के

३ न्दुकुजागुरुसूरयः शनिचंद्रजकेतुर्भार्गवाः परिशेषास्तु दशाधिपाः स्मृता इति अयमर्थः नयनाभ्यां द्वाभ्यां ऊनं यज्जन्तुभं जन्म

नक्षत्रं तत्र नवभिर्हरणं कर्तव्यं क्रमेणेत्यर्थः अर्थात्कृत्तिकामारभ्य गणनायां क्रमादिक्रमप्राप्तो यो जन्मनक्षत्रे ग्र

हस्तस्यैव दशा जन्मदशा भवति तथा च कृत्तिकोत्तराफाल्गुन्युत्तराषाढासु जन्म चेत्तदा रवेर्दशा षड्वर्षभोग्या भवति तदुत्त

षु नक्षत्रेषु चंद्रमसो दशा वर्षभोग्या भवतीत्यादि रीत्या दशा ज्ञातव्या अत्राप्यस्मदीयः श्लोकः कृत्तिकादिनवकत्रिके त्र मा

॥ दशा विंशोत्तरी चात्र ग्राह्या नाष्टोत्तरी मता ३

सूर्यचंद्रकुजराहुमंत्रिणः सौरिसोमसुतकेतुभार्गवाः प्रवर्तितदशाब्दनायका इति तत्र भुक्ताया दशायाः प्रयोजनाभावा

द्भोक्तव्यायाः फलं वाच्यं तदुक्तं लघुजातकाभरणे निजजन्मनि आदिमा दशा जनिभस्यैतघटीसमाहता सकलर्क्षघटीविभाजि

ता जनिभुक्तादिदशा मता ततः अवशिष्टदशाफलं वदेत्सपरिशेषेषु यथोक्तवर्षकैरिति अयमर्थः स्वस्य जन्मनो या प्रथमा

दशा षड्वर्षादिरूपा सा जन्मनक्षत्रगतघटीभिर्गुणनीया तत्र जन्मनक्षत्रसकलघटीभिर्भागतो यल्लब्धं तदेव भुक्तदशा भ

वति यदवशिष्टं सा भोक्तव्या भवति भुक्तवर्षे दशावर्षेषु भोग्यसपरिशिष्टेषु सर्वेषु फलं वाच्यं अयं भुक्तभोग्यविचारो नदेशादि ३

भुक्तभोग्यज्ञानाभावे दशामात्रफलवचनसंभवेप्यंतर्दशाफलवचनासंभवात् अतः सूक्ष्मज्ञानार्थमंतर्दशाद्यानयनमावश्यकं।।
तत्प्रकारस्तु ग्रंथांतरे स्वदशा रामगुणिता तद्दशागुणिता पुनः स्वरामभागतो लब्धं वर्षमासादिकं भवेदिति यद्दशामध्येंतर्दशास
मानेया तद्दशा स्वा भवति सा त्रिगुणिता यः पिंडो भवति तेषु क्षेपकत्वात् तद्दशाभिर्गुणयेत् तत्र च त्रिंशता भागे लब्धे तेषु लब्धं तद्वर्षा
दिकं बोध्यं यथा सूर्यदशायां सूर्यांतर्दशामानेयात्र सूर्यदशा त्रिगुणिता १८ अष्टादशरूपा अयमेव पिंडः सूर्यदशाव
र्षैः षड्भिर्गुणितोष्टोत्तरशतं १०८ तत्र त्रिंशता भागे लब्धास्त्रयस्ते मासा भवंति अवशिष्टा अष्टादश शातानि दिनानि भवंति
तथा चाष्टादशदिनाधिकास्त्रयो मासाः रवेरंतर्दशा भवति एवमष्टादशदिनात्मकः पिंडो यदि चंद्रदशा षड्गुण्यते तदा षट्
मासाश्चंद्रमसोंतर्दशा भवति अनया रीत्या चत्वारो मासाः षट्दिनानि भौमस्य दश मासाश्चतुर्विंशति दिनानि राहोः नव मासा
अष्टादशदिनानि गुरोः एकादश मासा द्वादश दिनानि शनेः दश मासाः षट् दिनानि बुधस्य चत्वारो मासाः षट् दिनानि के
तोः वर्षमेकं शुक्रस्येति इति रविदशामध्ये रव्याद्यंतर्दशानिरूपणं एवमेव चंद्रादिदशामध्ये चंद्राद्यंतर्दशानयनं प्र
कारांतरं च रामैर्हीना अष्टार्कसुखग्रहाणां दशाब्दकास्ते दिवसा भवंति दशासमानां खलु षष्ठभागः शुक्रस्य भुक्तिः सकलग्र
हेषु १ दशेश्वरदिनैर्हीना शुक्रभुक्तिर्भवेच्छनेः सैव हीना दशानाथदिनैश्चागोः स्मृता हि सा २ रहिता चैव सा ज्ञेया चंद्रज
स्य तु तैर्दिनैः एवं हीना च सा ज्ञेया दशानाथदिनैर्गुरोः ३ अंगोल्विभागं रविभुक्तिमाहुः शुक्रस्य चाब्दं हिमनो भवेत्सा।।

ल॰ पा॰ पुत्ताद्दशानाथदिनै रवेस्तु भुक्तिर्भवेच्चैव कुजस्य केतोः ४ एवं समस्तं ग्रहभुक्तपस्तु कार्यादिनेशादि खगेश्वराणां
४ ५ अयमर्थः सकलग्रहाणां दशादेः षष्ठांशः भुक्त्यन्तर्दशादिः अयं दशेश्वरदिनैर्हीनः शनेः सोपि दशेश्व
रदिनैर्हीनः राहोः अयमपि तैरेव हीनो बुधस्य बुधस्यापि तैर्दिनैर्हीनो गुरोः राहोस्तु तीयांशः सूर्यस्य दशे ।
श्वरदिनैर्युक्तोयं भौमस्यायमेव केतोरिति अत्रापि सूक्ष्मा कासाया विदशानयनं कथं कर्तव्यं तत्प्रकारो ग्रंथांत
रे भृगोर्नखांशो विदशा विधेयारीत्यो रुयोवेर विज्ञादिकानां भृगोस्तु षष्ठांशमुशन्ति तज्ज्ञास्त्रिहोस्त्रिभागं रविभुक्ति
रेवं १ अर्धं भृगोस्याद्रजनीकरस्य कुजस्य केतोश्च पुरेव साध्येति अयं भावः ग्रहाणामन्तर्दशादेः षष्ठांशो भृगो
र्विदशा एषान खांशैर्हीना शनेरित्यादि पूर्ववत् अस्मत् गुरुचरणास्तु उक्तेषु प्रयासगौरवं क्रमत्यासं च मत्वा
सुगमं प्रकारमाहुः तथाहि स्वे स्वे दशाब्दे गुणितं दशादि वर्षादिकं विंशतियुक् शतेन भजेत् लब्धं तु निजान्तः
रान्तर्दशादिमानं कथितं ग्रहाणामिति अयमर्थः यस्य दशायामन्तर्दशानेया तद्दशा वर्षादिकमानेयग्रहदशाव
र्षादिभिर्गुणयेत् यथा रविदशायां रवेरन्तर्दशानेया तत्र रविदशाब्दै रविदशाब्दगुणे षट्त्रिंशत् ३६ तेषां महा
दशाब्देर्भागानहेत्वाद्वादशभिर्गुणयेत् द्वात्रिंशदुत्तरं चतुःशतं ४३२ तत्र विंशत्युत्तरशतेन भागे लब्धास्त्रयस्ते राम॰
मासा भवन्ति शिष्टा द्वासप्ततिस्तास्त्रिंशता गुणयित्वा महादशाब्दैर्भागे लब्धा अष्टादश १८ ते दिवसाः एतावती सूर्य दशायां सूर्य ४

र	२	१८
च	६	०
कु	४	६
रा	१०	२४
गु	९	१८
श	११	१२
बु	१०	६
के	४	६
शु	१२	०
०	मा	दि

CC-0. In Public Domain. Digitization by eGangotri

सांतर्दशाभवति एवं सूर्यदशावर्षात् चंद्र दशावर्षैर्गुणयेत् पूर्ववद्भागादिक्रमेण चंद्रमसोंतर्दशाभवति तथाभौमादीनामपिति
भागयोग्यत्वार्थं वर्षाणि द्वादशभिर्गुणयेन्मासाभवंति मासास्त्रिंशतागुणयेद्दिनानिभवंति तान्यपिषष्ट्यागुणयेत् घटिकाभ
वंति एवमग्रेपितत्रहिदमाहुः दशाचांतर्दशाचैवत्रिदशोपदशातथा प्राणास्माच्चफलंतासांवदेच्छास्त्रानुसारतइति ३।
अथास्मिन् शास्त्रेयत्रविशेषोनोपदिश्यतेतत्सर्वंसामान्यशास्त्रतोज्ञातव्यमित्याह बुधैरितिज्योतिःशास्त्रविज्ञैरित्यर्थः भावा
दयः भावाआदयोयेषांतेभावादयः भावाश्च तनुधनसहजसुखसुतारिजायामृत्युधर्मकर्मायव्ययाख्याः आदिशब्दाद्रा
शयः तेचमेषवृषमिथुनकर्कसिंहकन्यातुलावृश्चिकधन्विमकरकुंभमीनाख्याः एषांस्वभावाश्चसर्वेइति अत्रानुक्ता
विचारोपयुक्ताः सर्वेपदार्थाः सामान्यशास्त्रतः यवनाचार्यादिकृतजातकशास्त्रात्ज्ञेयाः ज्ञातव्याः ग्रहाश्च ग्रहाणांस्वभाव
स्तत्फलानिचेत्यर्थः तत्ररव्यादयः ग्रहाः तेषांस्वभावादीप्तादयस्तदुक्तं मूढेदीप्तस्स्वस्थः प्रमुदितः शांतोदीनोतिदुःखि
तः विकलश्चखलः कोपीनवधाखेचरोभवेत् उच्चस्थः खेचरोदीप्तः स्वस्थः स्वपतिमित्रभेमुदितोमित्रभेशांतस्स्वसमभेदी
नउच्यतेशत्रुभेदुःखितोतीवविकलः पापसंयुतः खलः खलग्रहोज्ञेयः कोपीस्यादर्कसंयुतः पृथक्पृथक्फलंतेषांद
शापाकेविशेषतः उत्तमा   पुनुरोधनकलयोकेवदंतिहि इत्यादिफलंत्वग्रेवक्ष्यामः एतच्छास्त्रानुसारेणेति अस्मिन्प्रा
पाराशरेशास्त्रेकाचित्संज्ञासामान्यशास्त्रीयसंज्ञापेक्षयाभिन्नास्तितांविशेषतः विशेषरूपेणब्रूमः अनुपदेवक्ष्यामइत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰प॰ वर्त्तमानसामीप्ये वर्त्तमानवद्वेति सूत्रबलाद्वर्त्तमानवत्प्रत्ययो द्रष्टव्यः ४ अथैतच्छास्त्रेषो विशेषस्तमाह पश्यंतीति सर्वे खेच
५ रयो ग्रहाः सप्तमं पश्यंति स्वाधिष्ठितस्थानात्सप्तमं स्थानं तत्संस्थग्रहं च पश्यंति यद्यपि सामान्यशास्त्रादिदमपि ज्ञातुं शक्यं
तथापि चरणदृष्टिप्रतिषेधार्थमिदं पूर्णदृष्टिं ज्ञात्वैव दृष्टिफलं वाच्यं न तु चरणदृष्ट्यापीति भावः विशेषांतरमाह शनिजीव
कुजा इति पुनरिति त्वर्थे शनिजीवकुजास्तु क्रमेण त्रिदशत्रिकोणचतुरस्रमान् चोप्यर्थे अपि पश्यंति अयमर्थः शनि
स्तावत्त्रिदशं तृतीयं दशमं चकारात्सप्तमं स्थानं पूर्णमेव पश्यति जीवः त्रिकोणपदवाच्यं पंचमं नवमं सप्तमं च पूर्णं पश्य

बुधैर्भावादयः सर्वे ज्ञेयाः सामान्यशास्त्रतः एतच्छास्त्रानुसारेण संज्ञां ब्रूमो विशेषतः ४
पश्यंति सप्तमं सर्वे शनिजीवकुजाः पुनः विशेषतश्च त्रिदशत्रिकोणचतुरस्रमाने ५

ति कुजश्चतुर्थमष्टमं सप्तमं च पूर्णमेव पश्यति इदमपि चरणदृष्टिप्रतिषेधार्थं अन्यथा सामान्यशास्त्रत एव दृष्टिलाभे पु
नर्दृष्टिविधानवैयर्थ्यं स्यात् त्रिदशं च त्रिकोणं च चतुरस्रं चेति विग्रहः तेन शनिजीवकुजानां क्रमेणान्वयः यद्यपि त्रयश्च द
श चेति विग्रहकरणात् यथासंख्यासंभवेन सर्वत्रैव शनिजीवकुजानामन्वयः संभवति तथापि अविवक्षितत्वान्न तथान्व रा॰
यः इति संप्रदायविदः ५ इत्युडुदायप्रदीपोद्योते दृष्टिनिर्णयः संपूर्णः ॥ २ ॥ छ ॥ ५

अथशुभग्रहाणांशुभफलप्रदत्वमशुभग्रहाणामशुभफलप्रदत्वमितिसकलशास्त्रसिद्धं तत्रबुधगुरुशुक्राअक्षीणचंद्र
श्चशुभग्रहाः रविकुजमंदाराहुकेतुक्षीणचंद्रश्चाशुभग्रहाइतिसामान्यशास्त्रंतस्यापवादार्थमाह सर्वेइतिनवमपंचमयो
स्त्रिकोणसंज्ञा तत्रनवमपंचमराश्योर्नेतारोधीश्वराग्रहास्तेसर्वेशुभफलदायकाभवंति त्रिकोणाधीशत्वेनसप्तानामेवग्रहा
णांशुभत्वसेवं तयोराहुकेत्वोर्ग्रहयोराश्यनधीशत्वान्नग्रहणं तेननवग्रहाइतिकस्यचिद्व्याख्यानमपास्तं अशुभग्रहाअपि
त्रिकोणनेतृत्वेनससितेन शुभग्रहाभवंति शुभग्रहास्तुकैमुतिकन्यायेनशुभतराइतिभावः यदितुसएवग्रहास्त्रिषडाया

सर्वेत्रिकोणनेतारोग्रहाः शुभफलप्रदाः पतयस्त्रिषडायानां यदिपापफलप्रदाः ६ ॥ ५ ॥

नांतृतीयषष्ठैकादशानांपतयःस्युस्तदापापफलप्रदाएवत्रिषडायपतित्वेननिमित्तेनशुभग्रहाअपिपापग्रहाएवभवं
तीकिमुतपापग्रहाइतिभावः अत्रत्रिकोणनेतारोयदित्रिषडायानांपतयइतियोजनांकेचिद्वर्णयंति तन्नत्रिकोणेतु
स्त्रिषडायनेतृत्वासंभवात् संभवेवासकलफलविरोधादविवक्षितत्वात् राश्याधीशास्तुग्रंथांतरेमे षवृश्चिकयोर्भौमः
शुक्रोवृषतुलाधिपः बुधःकन्यामिथुनयोः कर्काधीशस्तुचंद्रमाः धनुर्मीनाधिपोजीवः शनिर्मकरकुंभयोः सिंहस्या
धिपतिः सूर्योराश्यधीशाइमेस्मृताइति ६ अथापरंविशेषमाहनदिशंतीतिसौम्याः शुभग्रहाः चंद्रबुधगुरुशु क्रं

ल॰ पा॰ यदि केंद्राधिपतयः लग्नचतुर्थसप्तमदशमराशिपतयः स्युस्तदा शुभं शुभफलं न दिशंति न प्रयच्छंति शुभा अपि केंद्राधि
६ पतित्वेन निमित्तेन अशुभमेव कुर्वंतीत्यर्थः क्रूराश्चेदिति चेद्यदि क्रूरा अशुभत्वेन ख्याताः सूर्यभौमशनयः केंद्रप
तयः स्युस्तदा अशुभं न दिशंति अशुभा अपि केंद्राधिपतित्वेन निमित्तेन शुभमेव दिशंतीति भावः अथैषां बलाब
लमाह एत इति एते त्रिकोणपतयस्त्रिषडायपतयः केंद्रपतयश्च उत्तरोत्तरं प्रबलाबलवंतो भवंति पंचमेशान्नवमे
शयोर्मध्ये नवमेशः प्रबलः तथा तृतीयेशात्षष्ठेशः प्रबलः षष्ठेशादेकादशेशः प्रबलः एवं लग्नेशाच्चतुर्थेशः प्रबल

न दिशंति शुभं नृणां सौम्याः केंद्राधिपा यदि । क्रूराश्चेदशुभं ह्येते प्रबलाश्चोत्तरोत्तराः ॥ ७ ॥ लग्नाद्व्य
यद्द्वितीयेशौ परेषां साहचर्यतः

श्चतुर्थेशात्सप्तमेशः प्रबलः सप्तमेशाद्दशमेशः प्रबल इति बोध्यं तथा च योग्र
ह उक्तरीत्या बलवांस्तस्यैव फलं वाच्यं नान्यस्येति भावः अत्र त्रिकोणाधिपत्रिषडायाधिपतयोर्मध्ये त्रिषडायाधिप
एव प्रबलस्ततोपि केंद्राधिपः प्रबलः कथनक्रमे उत्तरत्वादिति विवेकः ७ अथ संबंधवशादपि ग्रहाणां शुभाशुभ
फलप्रदत्वमाह लग्नादिति लग्नं प्रसिद्धं जन्मलग्नमारभ्य गणनया व्ययद्वितीयेशौ द्वादशद्वितीयराशिस्वामिनौ राम॰
परेषामन्येषां ग्रहाणां साहचर्यतः सहावस्थानात् अयमर्थः शुभग्रहसाह चर्ये सति द्वितीयद्वादशेशयोः ॥ ६

CC-0. In Public Domain. Digitization by eGangotri

शुभफलत्वं अशुभग्रहसाहचर्येण शुभफलप्रदत्वं इदमपि शुभाशुभफलप्रदत्वं यस्मिन्भावे तावुभौ तिष्ठतः तत्सद्भावद्वारैव द
दतइत्याह स्थानांतरानुगुण्येनेति अन्यत्स्थानं स्थानांतरं तस्य आनुगुण्यं शुभत्वादितेनत्वयंभावः मित्रादिस्थानस्थत्वे मि
त्रादिद्वारा शुभफलप्रदत्वं शत्रुभावस्थत्वे शत्रुद्वारैवाशुभप्रदत्वं एवंग्रहांतरस्य दीप्तत्वादिगुणयोगाच्छुभाशुभफल
प्रदत्वमिति दीप्तत्वादिप्रयुक्तफलमुक्तं ग्रंथांतरे पाके प्रदीप्तस्य धराधिपत्यमुत्साहशौर्यंधनवाहनेचस्त्रीपुत्रलाभंप्रशु
भवंधुपूज्यं क्षितीश्वरान्मानमुपैति विद्यां १ स्वस्थस्य खेटस्य दशाविपाके स्वस्थानृपाल्लब्धधनादिसौख्यं विद्यायशः

स्थानांतरानुगुण्येन भवतः फलदायको ८ भाग्यव्ययाधिपत्येन रंध्रेशो न शुभप्रदः

प्रीतिमहत्त्वमाराद्द्वाराऽर्थभूस्यादिजधर्ममेति २ मुदान्वितस्यापि दशाविपाके वस्त्रादिभूगंधसुतार्थधैर्यं पुराणधर्मश्र
वणादिलाभं वस्त्रादियानावरभूषणाप्तिं ३ दशाविपाके सुखधैर्यमेति शांतस्य भूपुत्रकलत्रयानं विद्याविनादान्वितध
र्मपास्त्रंबव्हर्थदेशाधिपपूज्यतांच स्थानच्युतिर्वंधुविरोधताच दीनस्य खेटस्य दशाविपाके जीवत्यसौ कुत्सितहीनवृ
त्त्यात्यक्तो जनै रोगप्रपीडितस्यात् ५ दुःखार्दितस्यापि दशाविपाके नानाविधं दुःखमुपैति नित्यं विदेशगो वंधुजनैर्विही
नश्चौराग्निभूपैर्भयमातनोति ६ कैवल्यखेटस्य दशाविपाके विकल्पमायातिमनोविकारं मित्रादिकानां मरणे विशेषात

स्त्रीपुत्रपानांवरंहीनपीडा ७ दशाविपाकेकलहंवियोगंखलस्यखेदस्यपितुर्वियोगंशत्रोर्जनानांधनभूमिनाशमुपेतिनित्यंस्वज
नैश्चनिंदां ८ कोपान्वितस्यापिदशाविपाकेपापाःसमायांतिवहुप्रकारैःविघातनस्त्रीसुतवंधुनाशं पुत्रादिकंच्छुलय
नेत्ररोगमिति ९ एवस्थानांतरानुगुण्येनव्ययद्वितीयेशयोःफलंवक्तव्यं ८ अथस्वजन्मलग्नादष्टमेशस्यशुभाशुभत्व
माह भाग्येतिभाग्याद्व्ययोभाग्यव्ययःनवमात्द्वादशः अर्थादष्टमस्तस्याधिपत्यंस्वामित्वंतेननिमित्तेन रंध्रेशोऽष्ट
मेशःनशुभप्रदोभवति भाग्यव्ययपयोराधिपत्येनेतितुनव्याख्येय अष्टमेशस्यव्ययेशत्वासंभवात् केचित्तु अष्टमादष्टम

स एव शुभसंधाताल्लग्नाधीशोपिचेत्स्वयं ९

स्यापिरंध्रत्वादिदेशात्तृतीयेशोपिरंध्रेशः सचपुनर्व्ययेशः संभवति कर्कस्यलग्नत्वेवुधःमकरस्यलग्नत्वे गुरुःसोयंभाग्यव्य
याधिपत्येनाशुभइत्यर्थः यथात्वष्टमेशस्यनिमित्तवशादशुभत्वमुच्यते तथात्तृतीयेशस्याप्यशुभत्वेनिमित्तंवाच्यं तदेवा
मेनोच्यते यदितत्रनोच्येततर्हींहापिनवाच्यंरंध्रेशोनेशुभप्रदइत्येतावतैवतत्सिद्धेरितिप्राहुः सएवेतिरंध्रेश एव स्वयंलग्ना
धीशोपिचेतदाशुभसंधाताशुभस्यैवकारकोभवति अष्टमेशत्वेदोषस्तस्यनास्तीभावः ९ अथकेंद्रेशत्वमशुभ
त्वंसौम्यग्रहाणांमुक्तंतत्रगुरुशुक्रयोर्विशेषमाह ॥ ॥ ॥ ॥

केंद्राधिपत्येतिलग्नचतुर्थसप्तमदशमेशत्वंप्रयुक्तोदोषोगुरुशुक्रयोरेवबलवान् गुरुशुक्रौकेंद्राधिपतीचेत्तत्तदानदिशंतिशुभंनृणामित्यादिनोक्तोदोषोबलवान् अतिशयेनबलिष्ठोभवतिअत्रापिविशेषमाह मारकत्वेपीति तयोःकेंद्राधिपतित्वविशिष्टयोर्गुरुशुक्रयोर्मारकस्थानसंस्थितिर्लग्नात्सप्तमद्वितीयस्थानसंस्थितिमारकत्वेबलवती अन्यापेक्षयातयोरेवमारकत्वमितिभावः सप्तमद्वितीययोर्मारकस्थानत्वंवक्ष्यति १० अथबुधचंद्रयोःकेंद्राधिपत्यदोषोनास्तीतिपूर्वश्लोकस्यतुशब्देनज्ञापितंतत्रविशेषमाह तदनुतस्मात्शुक्रादनंतरंबुधस्तद्विधःकेंद्राधिपत्यदोषवान्गुरुशु

केंद्राधिपसदोषस्तु बलवान्गुरुशुक्रयोः मारकत्वेपितयोर्मारकस्थानसंस्थितिः १० ॥

क्रापेक्षयाकिंचिन्न्यूनदोषवान् तदनुबुधादप्यनंतरंचंद्रोपितद्विधःकेंद्राधिपत्यदोषवान् बुधापेक्षयान्यूनदोषवान् मारकस्थानसंस्थितिरपिगुरुशुक्रापेक्षयाबुधस्यदुर्बलाबुधापेक्षयाचंद्रस्यदुर्बला ॥इतिचबोध्यं अथभाग्यव्ययाधिपत्यप्रयुक्तोरंध्रेशस्यदोषउक्तस्तत्रापवादमाह नरंध्रेशत्वेति सूर्याचंद्रमसोरंध्रेशत्वेदोषस्तुनभवेत् सूर्याचंद्रमसौजन्मलग्नादष्टमाधीशौभवतस्तदातयोरष्टमेशत्वदोषोनभवतीत्यर्थः ११ अथक्रूराणांकेंद्राधिपतित्वेनशुभकारित्वंपूर्वमुक्तंतत्रभौमविषयेविशेषमाह कुजस्येतिकुजस्यभौमस्यकर्मनेतृत्वप्रयुक्तो शुभकारितातदास्याद्यदि

CC-0. In Public Domain. Digitization by eGangotri

ल॰पा॰ त्रिकोणनेतृत्वांऽभावेतुकर्मनेतृत्वमात्रेणनशुभकारित्वं कर्मेल्लग्नेयस्यजन्मतस्यायंयोगःवृश्चिकस्यपंचमलेनमेषस्यदश
८ मलेनभौमस्यतदीशत्वादिति एवंसर्वेत्रिकोणनेतारइत्यारभ्यसमस्तानांग्रहाणांशुभाशुभत्वमुक्तंतत्रमेषादिभावेषुजन्मव
तांमस्यग्रहस्यपापत्वंयस्यवाशुभत्वंयस्यचयोगकारत्वंतत्सर्वंसंगृहीतंपाराशरीये मंदसौम्यसिताःपापाःशुभौगुरुदि
दिवाकरौ नशुभंयोगमात्रेणप्रभवेत्कुजजीवयोः परतंत्रेणजीवस्यपापेकर्मापिनिश्चितं कविःसाक्षान्निहंतास्यान्मार
कत्वेनलक्षितःसंगात्तयोर्निहंतारोभवेयुःपापिनोग्रहाःशुभाशुभफलान्येवंज्ञातव्यानिक्रियोद्भवः इतिमेषजन्मनः

॥ ९ ॥ बुधस्तदनुचंद्रोपिभवेत्तदनुतद्विधः नरंध्रेशत्वदोषस्तु सूर्याचंद्रमसोर्भवेत् ११॥

फलं अथास्तेवृषस्यजीवशुक्रेंदवःपापाःशुभौशनिशशीसुतौ राज्ययोगकरःसाक्षादेकएवरवेःसुतः जीवादयोग्र
हाःपापाःसंतिमारकलक्षणाः बुधोस्तत्रफलान्येवंज्ञेयानिवृषजन्मनः इतिवृषलग्नजातफलंभौमजीवारुणाःपापा
एकएवकविःशुभःशनैश्चरेणजीवस्ययोगोमेषभवोयथा नायंशशीनिहंतास्यादुन्मिषत् पापनिष्फलं ज्ञातव्यानि
दिनेशस्यफलान्येतानिसूरिभिः इतिमिथुनभावफलं भार्गवेंदुसुतौपापौभूसुतांगिरसौशुभौ एकएवग्रहःसा राम॰
क्षात् भूसुतोयोगकारकः निहंतारविजीन्येतुमासिनोमारकाव्हयाः कुलीरसंभवस्यैवंफलान्युक्तानिसूरिभिः ॥ ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिकर्कजन्मनः फलं शे हि येयसितौपापौकुज एव शुभग्रहः प्रभवेद्योगमात्रेणन शुभं कुज शुक्रयोः घ्नंतिसौम्यादयः पापाः
मारकत्वेनलक्षिताः एवं फलानिवेद्यानि सिंहे यस्यजनुर्भवेत् इतिसिंहजन्मनः फलंकुजे जीवेंदवः पापा एक एव भृगुः शु
भः भार्गवेंदुसु तावेवभवेतां योगकारकौ निहंता कविरन्येतुमारकास्तुकुजादयः प्रतीक्षेत्त फलान्युक्तान्येवं कन्याः
वोबुधैः इतिकन्याजन्मफलं जीवार्कमहिजाः पापाः शनैश्चरबुधौशुभौ भवेतांराजयोगस्यकारकौचंद्रतत्सुतौ कुजौ
निहंतिकापापापरेमारकलक्षणाः निहंतारः फलान्येवंकाव्यानतुतुलाभुवः इतितुलाजन्मफलं सौम्यभौमासिताःपापाः

कुजस्यकर्मनेतृत्वप्रयुक्ताशुभकारिता

शुभौगुरुनिशाकरौ सूर्याचंद्रमसावेवभवेतांयोगकारकौ जीवोनिहंतासौम्याद्याहंतारोमारकाह्वयाः तत्तत्फलानिवि
शेषान्येवंवृश्चिकजन्मनः इतिवृश्चिकजन्मफलं एक एवकविः पापाः शुभौसौम्यदिवाकरौ योगोभास्करसौम्याभ्यांनि
हंताभास्वतः स्मृतः घ्नंतिशुक्रादयःपापाःमारकत्वेनलक्षिताः ज्ञातव्यानिफलान्येवं चापजस्यमनीषिभिः इतिधनु
र्जन्मजातफलंकुजजीवेंदवः पापाः शुभौभार्गवचंद्रजौ स्वपंचेवनिहंतास्याश्मदोभौमादयः परे तत्तल्लक्षणान्निहंतारः
कविरेकः सुयोगकृत् ज्ञातव्यानिफलान्येवंविबुधैर्मृगजन्मनः इतिमकरजन्मफलं जीवचंद्रकुजाःपापाएकोदैत्यगुरुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰पा शुभः राजयोगकरोभौमः कविश्चैववृहस्पतिः निहंताघ्नंतिभौमाद्यामारक त्वेनलक्षिताः एवमेवफलान्यूह्यान्येतानि घटज
९ न्मनः इतिकुंभजन्मफलं मंदशुक्रौशवः सौम्याः पापा भौमविधूशुभौ महीसुतगुरोर्योगेकारणेनैवभूसुतः मारकाःकार
कावीक्ष्यमंदज्ञौघ्नंति पापिनः इत्यूह्यानिफलान्येवंबुधैस्तुमीनजन्मनः इतिमीनलग्नजफलं १२ अथराहुकेत्वोराश्यधी
शत्वाभावात्कुत्रस्थितयोः किंफलंकथंवाशुभाशुभत्वं ज्ञातव्यमित्याकांक्षायामाह यद्यदितितमौग्रहौराहुकेतू यद्य
द्भावगतौ अपियद्यद्भा वेशसंयुतौ वास्यातांतत्तत्फलानिप्रवलावतिशयेनप्रदिशेतांददतः अयमर्थः यस्ययस्यग्रह

॥ ९ ॥ यद्यद्भावगतौवापियद्यद्भावेशसंयुतौ तत्तत्फलानिप्रवलौप्रदिशेतांतमोग्रहौ १३

स्ययोयोभावः स्यात्तंसग्रहोयत्फलंददातितत्फलमेवप्रदिशेतांप्रकर्षेणैवददतः यतः प्रवलौप्रकर्षेणवलवंतौस्वा
भाविकवलवत्त्वंतयोः प्रकर्षस्तद्भावेशग्रहापेक्षयातयोर्वलवत्वात् अथवायद्भावेशसंयुतौस्यातांसचभावेशस्वस्य
यथाफलंदिशतितत् थैवतत्स्वभावस्यफलंप्रकर्षेणदिशेतांसंयुताविति संवंधश्चतुर्विधइतिवक्ष्यते १३ इतिश्रीभै
रवदत्तविरचितेउडुदायप्रदीपोद्योतेसंज्ञाध्यायः १ अथयोगाध्यायः तत्रसामान्ययोगानाह केंद्रत्रिकोणपत राम:
यइति केंद्रपतयस्त्रिकोणपतयश्चपरस्परमन्योन्यसंवंधेनेति संवंधश्चतुर्विधः अन्योऽन्यराशिस्थितत्वंप्रथमः ॥ ९

यथामेषवृश्चिकेवासूर्यःभौमस्तुसिंहेस्तिनदासूर्य भौमयोः संवंधः परस्परदृष्टिसंवंधोद्वितीयः यथामेषेभौमस्तुलायांसूर्य
स्तौपरस्परंपश्यतः अन्यतरदृष्टिसंवंधस्तृतीयः यथासिंहेभौमः मीनेसंस्थितंसूर्यंपश्यतिभौमंतुसूर्योनपश्यति चतुर्थस्त
सहावस्थानलक्षणः यथाभौमसूर्यौवृषराशौस्थितौइति अत्रपूर्वः पूर्वः संवंधोवलवान् वोध्यः तथाचकेंद्रत्रिकोण
पत्योःपरस्परमुक्तसंवंधसद्भावेविशेषफलदायकोयोगोभवति परंतुत्रिषडायपतीनांसंवंधोनापेक्षितस्तदेवाह इ
तरैरितिइतरैस्त्रिषडायाष्टमपतयस्तैरप्रसक्ताअसंवंधाश्चेत् तेषांसंवंधसत्वेतुनयोगोनभवतीतिभावः १४ अथकेंद्रेश

इत्युडुदायप्रदीपेसंज्ञाध्यायःप्रथमः १ केंद्रत्रिकोणपतयःसंवंधेनपरस्परं इतरैरप्रसक्ताश्चेद्विशेष
फलदायकाः १४ केंद्रत्रिकोणनेतारौदोषयुक्तावपिस्वयं

त्रिकोणेशयोर्दोषयुक्तत्वेतिनयोगहानिरित्याह
केंद्रेतिकेंद्रत्रिकोणाधिपतीस्वयंदोषयुक्तावपि संवंधमात्राद्बलिनोप्रोक्त लक्षणसंवंधादेववलिनौसंतौयोगकारकौ
विशेषफलदायकयोगकारकौभवतएवेतिभावः एतत्संगृहीतंपाराशरीयेपंचमंनवमंचैवविशेषधनमुच्यते चतुर्थं
दशमंचैवविशेषंसुखमुच्यते चंद्रभानूविनासर्वेमारकामारकाधिपाः षष्ठाष्टमव्ययेशास्तुराहुःकेतुस्तथैवच स्व
पाद्रेष्काणपाश्चैवतथावैनाशिकाधिपाः विपन्नाराप्रत्यरीशोवधभेशस्तथैवच आयांत्यपूर्वकश्चैवचंद्राक्रांतगृहाधिप

ल·प जातकेमारकाः प्रोक्ताः कालविद्भिर्मनीषिभिः दशाक्षिप्तेषु कालेषु मारकोमरणप्रदः अन्यस्मिन्योगदे पीतिकालविद्भिर्नि
१० रूपितेइति अत्रत्रिकोणयोर्धनत्वाच्चतुर्थदशमयोः सुखलाभ्दनसुखेशयोः संबंधेयोगोभवतीतिश्लोकोद्वयार्थः इतरप्र
संगस्त्रयोगनाशकस्तत्रकेतावदितरेइत्याकांक्षायामष्टमेत्यासषः स्थानमित्यादिश्लोकपंचकमितिबोध्यं इतिसामान्य
योगनिरूपणं १५ अथप्रबलराजयोगानाह निवसेतामितितावुभावितिकेंद्रत्रिकोणनेतारौ धर्मकर्मणोरितिकथ
नाद्धर्मकर्मनेतारौप्रस्येतेतौद्वावपिव्यत्ययेननिवसेतांधर्मेशः कर्मणिकर्मेशोधर्मेइत्ययमेकोयोगः योगांतरमाह एक

संबंधमात्राद्वलिनौभवेतांयोगकारकौ १५ निवसेतांव्यत्ययेनतावुभौधर्मकर्मणोः एकत्रा
न्यतरोवापिवसेच्चेद्योगकारकौ १६ त्रिकोणाधिपयोर्मध्येसंबधोयेनकेनचित् ॥

नितिधर्मस्थानेउभौनिवसेतामित्येकोयोगः कर्मस्थानेउभौनिवसेतामित्यपरोयोगः उभयोर्मध्येएकएववानिजस्था
नेनिवसेत्तदापिराजयोगकारकौभवतः १६ राजयोगांतरमाह त्रिकोणाधिपत्ययोरितिपंचमनवमेशयोर्मध्येयेनके
नचित् पंचमेशेनवनवमेशेनवासार्द्धं वलिनः केंद्रनाथस्यदशमाधिपस्यअन्यकेंद्रस्वामिस्यर्थबलिनइत्युक्तं त राम·
स्यसंबंधः पूर्वोक्तलक्षणोयदिभवेत्तदासुयोगकृत् राजयोगकारकइत्यर्थः १७ ॥ ॥ १०

CC-0. In Public Domain. Digitization by eGangotri

प्रकारांतरेणयोगांतरमाह दशास्वपीतियोगकारिणोराजयोगकारिणोः केंद्रत्रिकोणयोर्दशाद्वयी धर्मेशादशाकर्मेशदशा
चेतिदशाद्वयसमाहारोदशाद्वयीतस्यामध्यगतः तदयुक्तेशुभकारिणांतच्छब्देनयोगकारकपरामर्शः योगकारकसंबं
धरहितानामपिग्रहेणांदशास्वपिप्रायशोबाहुल्येनराजयोगोभवेत् धर्मेशकर्मेशयोर्दशायामंतरभोक्तारोयेग्रहास्त
त्संबंधरहितास्तेषांदशास्वपिकदाचिद्योगोभवतिसएवराजयोगकारकइतिभावः १८ शुभग्रहाणामुक्तापापिनां

केंद्रनाथस्यवलिनोभवेद्यदिस्रयोगकृत् १७ दशास्वपिभवेद्योगः प्रायशोयोगकारिणोः
दशाद्वयीमध्यगतस्तदयुक्शुभकारिणां १८ योगकारकसंबंधात्पापिनोपिग्रहाः
स्वतः तत्तद्भुक्त्यनुसारेणदिशेयुर्योगजंफलं १९ केंद्रत्रिकोणाधिपयोरेकत्वेयोगकारको

मपियोगकारकत्वमाह योगकारकसंबंधादितिस्वतास्वभावात्पापिनोपिग्रहाः योगकारकस्यग्रहस्यसंबंधादुक्तं
संबंधान्यतमसंबंधात् तत्तद्भुक्त्यनुसारेणयोगकारकग्रहसंबंधविशिष्टग्रहस्यपाभुक्तिस्तामनुसृत्यतत्तद्ग्रहभोगका
लावच्छेदेनराजयोगकारितफलंदद्युरितिभावः १९ राजयोगांतरमाह केंद्रत्रिकोणाधिपयोरितिएकत्वेइतिएक
एवकेंद्राधिपः एकएवत्रिकोणाधिपश्चयदिसंबंधविशिष्टस्तदातावुभौराजयोगकारकौभवतः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यदिपुनरन्येन द्वितीयेनापि त्रिकोणपतिनासंबंधास्तदा किं परमं ततः श्रेष्ठे किन्न किंचिदित्यर्थः अयंतु सर्वोत्तमराजयो
गइत्याभिप्रायः २० एतावता प्रबंधेन भावेशत्वयुक्तानां राजयोगकारकत्वमुक्तमधुनाभावेशत्वहीनयोरपि राहुकेत्वोरा
जयोगकारकत्वमाह यदिकेंद्रेति तमोग्रहौ राहुकेतू यदि केंद्रे यद्वा त्रिकोणे निवसेतां तत्र चान्यतरस्य केंद्रस्य त्रिको
णस्य वा नाथेन स्वामिना संबंधादुक्तलक्षणा योगकारकौ भवतः यदा तौ केंद्रस्थौ तदा त्रिकोणनाथेन संबंधः यदा त्रिकोणे
स्यातां तदा केंद्रनाथेन संबंधश्चेत्तदा योगकारकौ भवेतामित्याहुः एते च एते योगाख्यातः पाराशरीये अयातः

अन्यत्रिकोणपतिनासंबंधो यदि किंपरं २० यदिकेंद्रेत्रिकोणेवानिवसेतांतमोग्रहो ॥

संप्रवक्ष्यामि राजयोगादिकं परं गुह्यकस्याद भेदेन राशिदृष्टे दशाफलं तपःस्थानाधिपो मंत्री मंत्राधीशो विशेषतः उभावन्यो
न्यसंदृष्टौ जातश्चेदिह राज्यभाक् यत्र कुत्रापि संयुक्तौ गौ वापि समसप्तमौ राजवंशोद्भवो बालो राजा भवति निश्चयः॥
वाहनेशस्तथा माने मानेशो वाहने स्थितः राजधर्माधिपाभ्यां तु दृष्टौ चेदिह राज्यभाक् कृते शाकर्मेशा कृत्वे शाल्यनाथा
यदा धर्मपसंयुता श्चेत् नृपोतरश्चेदिह वारणाद्यस्व तेजसाव्याप्त दिगंतरालः कृत्वकर्माधिपौ चेव मंत्रिनाथेन संयुतौ
धर्मेशनाथवा युक्तो जातश्चेदिह राज्यभाक् कृते स्वरो धर्मपसंयुतश्चेल्लग्ने श्वरेणापि युतो विलग्ने कृखे यवा मानगृहे ११

CC-0. In Public Domain. Digitization by eGangotri

धर्मस्थाने गुरुक्षेत्रेस्वगृहे भृगुसंयुते पंचमाधिपसंयुक्ते जातश्चेदिह राज्यभाक् इति राजयोगफलं अथप्रसंगाद्धनयोगफलं अ
तः परं प्रवक्ष्यामि धनयोगं विशेषतः पंचमेतु भृगुक्षेत्रे तस्मिंशुक्रेण संयुते लाभे शनैश्चरयुते बहुद्रव्यस्य नायकः पंचमे सो
मज्ञक्षेत्रे तस्मिं सौम्ययुते यदि लाभेच चंद्रभौमौ तु बहुद्रव्यस्य नायकः पंचमे तु शनिक्षेत्रे तस्मिन्सूर्ययुते यदि लाभे सोम
सौमजस्थे वा बहुद्रव्यस्य नायकः पंचमे तु रविक्षेत्रे तस्मिन् रवियुते यदि लाभे रवेंद्र पूज्यस्थे बहुद्रव्यस्य नायकः पंचमे तु
शनिक्षेत्रे तस्मिन् शनियुते यदि लाभे भौमेन संयुक्ते बहुद्रव्यस्य नायकः पंचमे तु गुरुक्षेत्रे तस्मिन्गुरुयुते यदि लाभे तु चं

नायेनान्यतरेणापि संबंधायोगकारको २१ धर्मकर्माधिपेनेतारौ रंध्रेलाभाधिपो यदि

द्रभौमौ वे बहुद्रव्यस्य नायकः भानुक्षेत्रगते तस्मिन् लग्ने भानुस्थितो यदि भौमेन गुरुणा युक्तो दृष्टो वा स्यात् युतो धनिः चं
द्रक्षेत्रगते लग्ने तस्मिन् चंद्रयुते यदि जीवभौमयुतो यस्तु दृष्टे जातो धनी भवेत् भौमक्षेत्रगते लग्ने तस्मिन् भौमयुते य
दि सौम्यशुक्रार्कजैर्युक्ते दृष्टे श्रीमान्नरो भवेत् गुरुक्षेत्रगते लग्ने तस्मिन् गुरुयुते यदि सौम्यभौमायुते दृष्टे जातो यस्तु ध
नी नरः बुधक्षेत्रगते लग्ने तस्मिन् सौम्ययुते यदि शनिशुक्रयुते दृष्टे जातो यस्तु धनी नरः भृगुक्षेत्रगते लग्ने तस्मिन्भृगु
युते यदि शनिसौम्ययुते दृष्टे जातो यस्तु धनी नरः इति धनयोगाः अथ प्रसंगाद्दारिद्र्ययोगाः अथातः संप्रवक्ष्यामि दारि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल॰पा॰ लग्नाधिपेरिपु गतेरिःफे ऽऽल्लग्नमागते मारकेशायुतेदृष्टेजातस्यान्निर्धनोनरः लग्नाधिपेशात्नुगृहं गतेवाषष्टेभ्वेरेलग्नगतेपिवा
१२ चेत् विलग्नपेमारकनाथदृष्टेजातोभवेन्निर्धनकोपिवैश्यः लग्नेंदुकेतुयुक्तोवालग्नेशोनिधनंगते मारकेशायुतेदृष्टेजातोवै
निर्धनोभवेत् षष्टाष्टमव्ययगतेलग्नेशेपापसंयुते मारकेशायुतेदृष्टेराजवंश्योपिनिर्धनः विलग्ननाथे रविनाशरिःफना
थेनयुक्तेयदिपापदृष्टे संजातमजेनाययुतेपिदृष्टेशुभैर्नदृष्टे सभवेद्दरिद्रः मंत्रेशोधर्मनाथश्चषष्टेकर्मस्थितोक्रमात् दृ
ष्टोचेन्मारकेशेनजातःस्यान्निर्धनोनरः पापग्रहेलग्नगतेराज्यधर्माधिपौविना मारकेशयुतेदृष्टेजातःस्यान्निर्द्धनोनरः

॥ तयोसंबंधमात्रेणनयोगंलभतेनरः २२इतिराजयोगाध्यायः॥

यद्भावेशोरंध्ररिःसंस्थोयद्भावस्थारंध्ररिःफारिभेशाः पापैर्दृष्टोमंदृदृष्टोथवाचेदुःखाक्रांतश्चंचलोनिर्धनःस्यात् चंद्राक्रांत
नवांशेशो मारकेशयुतो यदि मारकस्थानगोवापिजातोसौनिर्द्धनोनरः विलग्नेशनवांशेशोरिःफषष्ठाष्टगोयदि मारके
शायुतोदृष्टोजातोसौनिर्धनोनरः इतिदारिद्र्ययोगः २१ प्रकृतमनुसरामः इतिराजयोगमाह धर्मकर्माधीति नवमद
शमभावेशौक्रमेणाष्टमैकादशभावे शौयदि तदाराजयोगभगः अयमर्थः नवमेभावेशोयः सएवाष्टमभावेशश्चेत्तदारा स्म॰
जयोगोनस्यात् दशमभावस्वामीयोग्रहः सएवलाभस्वामीयदितदापिराजयोगोनस्यात् एवंनवमेशोऽष्टमेशोनसंबं १२

CC-0. In Public Domain. Digitization by eGangotri

दशमे शोलाभे शेनसंबंधंकरोति चेत्तदापि राजयोगंलभत इत्यर्थः इति राजयोगभंगः इति भैरवदत्तदैवज्ञविरचिते उडुदायप्रदीपोद्योते राजयोगाध्यायः अथायुर्दायाध्यायो व्याख्यायते अष्टममिति जन्मलग्नादष्टमस्थानमायुःस्थानमित्युच्यते अष्टमस्थानादप्यष्टमं अर्थाज्जन्मलग्नात्तृतीयं तदप्यायुःस्थानमित्युच्यते मारकस्थानमाह तयोरपीति तयोरायुःस्थानयोरष्टमतृतीययोरपि व्ययस्थानं अष्टमस्य व्ययस्थानं सप्तमं तृतीयस्य व्ययस्थानं द्वितीयं तेन सप्तमं द्वितीयं च स्थानं मारकस्थानमिति २३ अथ सप्तमापेक्षया द्वितीयस्य बलवत्त्वमित्याह तत्रापीति तत्र सप्तमद्वितीयोर्मध्ये आद्यव्ययस्थानात् अष्टमापेक्षया व्ययस्थानभूतात्सप्तमात् उत्तरं तृतीयापेक्षया व्ययस्थानरूपं द्वितीयं बलवत्तरं अतिशयेन बलवत् सप्तमं मारकस्थानं बलवत् द्वितीयं तु तदपेक्षयापि बलवत्तरं इत्यर्थः तेन जन्मलग्नद्वितीयराशीशस्य दशायां मरणं वाच्यमित्युक्तं भवति तदेवाह तदीशितुरिति तच्छब्देनाव्यवहितपूर्वापरस्थितस्य द्वितीयस्य परामर्शः तेन द्वितीयस्थानेशस्य दशाविपाके सम्भवेत्सति नृणां निधनं स्यादित्युत्तरश्लोकार्थेन संबंधः

अष्टमं ह्यायुषः स्थानमष्टमादष्टमं च यत् ।
तयोरपि व्ययस्थानं मारकस्थानमुच्यते ॥ २३ ॥
तत्राप्याद्यव्ययस्थानाद्द्वितीयं बलवत्तरं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रु॰पा अथवातत्रगताद्वितीयस्थानगतायेपापिनस्त्रिषडायेशास्तेनमारकेशेनयुक्तास्तेषांदशाविपाकेषुसंभवेसतिनिधनंमर
१३ णंवाच्यमित्यर्थः मरणकालज्ञानार्थमाह तेषामिति मारकेशसंबंधविशिष्टाः मारकेशस्थानस्थितायेपापग्रहास्तेषां
मित्यर्थः दशाविपाकेषुदशाः पूर्वमुक्तास्तेषांविपाका अंतर्दशादिप्रमाणदशांताः परिणामास्तेषुमरणं स्यादित्यर्थः
संभवे इति कथनात्संभवाभावे तद्दशाविपाकेपिमरणंस्यादितिसूच्यते संभवलक्षणंतूक्तंग्रंथांतरे त्रिविधश्चायुषां
योगः स्वल्पायुर्मध्यमुत्तरं द्वात्रिंशात्पूर्वमल्पंतुतदूर्ध्वंमध्यमंभवेत् आसप्ततिस्तदूर्ध्वंतद्दीर्घायुरितिसंमत उत्तमायुः

नदीशितुस्तत्रगताः पापिनस्तेनसंयुताः २४ तेषांदशाविपाकेषुसंभवेनिधनंनृणां

शतादूर्ध्वंमुनीशाः संतितद्विधाः अल्पायुर्लग्नपेभानोः शत्रौमध्यंतुमध्यमे मित्रेलग्नेश्वरेतस्यदीर्घमायुरुदाहृतं
अल्पायुर्योगजातस्यविपत्तारेमृतिंवदेत् जातस्यमध्यमेयोगे प्रत्यरौतुमृतिंवदेत् दीर्घायुर्योगजातस्यवधभेतुमृति
र्भवेत् त्रिषुयोगेषुसर्वेषुप्रत्येकंत्रिविधंभवेत् अल्पायुरल्पमध्यंतुपूर्णायुस्त्रिविधंमतंमध्यमादल्पमध्यंतुपूर्णायु
स्त्रिविधंभवेत् दीर्घायुषोल्पमध्यंतुपूर्णायुस्त्रिविधंभवेत् एवंनवविधंप्रोक्तमायुषांतुविनिर्णयमितिसर्वार्थचिंताम
णौ एवंप्रथमायुर्निश्चयः कर्तव्यः अल्पायुर्वामध्यायुर्वा ॥ ॥ दीर्घायुर्वेति अल्पायुर्निश्चयेतन्मध्येचेन्मारकेशदशा १२

मारकस्यानस्थितपापग्रहदशा वा मारकेशेन संबंधकर्तृदशा वा तत्र मरणं वाच्यं एवं मध्यमायुर्निश्चये मध्यमायुर्मध्ये मारकेशा दीनां त्रयाणां दशाविपाकेषु मरणं वाच्यं एवं दीर्घायुर्निश्चये तन्मध्ये मारकेशादीनां दशाविपाकेषु मरणं वाच्यमिति प्रकारांतरे णाप्यायुर्निश्चयः तथा च जैमिनिसूत्रं प्रथमयोरुत्तरयोर्वा दीर्घमिति अयमर्थः चरराश्योर्यदि लग्ने शाष्टमेशौ भवतस्तदा दीर्घमायुः स्थिरद्विस्वभावयोर्वा लग्नेशाष्टमेशौ यदि तदापि दीर्घमायुर्मध्यमायुराह प्रथमद्वितीययोरंत्ययोर्वा मध्यमिति चरस्थिरयोर्यदि लग्नेशाष्टमेशौ तदा मध्यमायुः द्विस्वभावयोर्वा लग्नेशाष्टमेशौ यदि तदापि मध्यमायुरित्यर्थः अल्पायुराह

तेषामसंभवे साक्षाद्व्ययाधीशदशास्वपि २५॥

मध्ययोराद्यंतयोर्वा हीनमिति स्थिरयोर्यदि लग्नेशाष्टमेशौ तदाप्यल्पमायुरिति एवं मंदचंद्राभ्यां लग्नहोराभ्यां वा निश्च यमिति अथोक्तरीत्याल्पायुर्निश्चिते मारकेशदशाविपाकस्तु नास्ति तदानीं तदा कथं वाच्यमित्याशंकायामाह ते षामसंभवे इति पूर्वोक्तानामसंभवाभावे साक्षाद्व्ययाधीशस्य जन्मलग्नाद्द्वादशस्वामिनो दशास्तु दशांतर्दशादिषु मरणं वाच्यं अपिशब्दाद्व्ययाधीशसंबंधिनां पापिनां दशास्वपि मरणं वाच्यमित्यर्थः २५ यदा तु व्ययेशादेरपि दशादिकं तत्र न लभ्यते वयस्त्वल्पमेव निर्णीतं तदा कथं वाच्यमित्यत आह अलाभ इति पुनस्त्वर्थे एतेषां व्ययेशव्ययस्थानगतव्ययेशस

ल॰पा॰ अलाभे व्ययेशितुर्द्वादशेशस्य संबंधेन सहावस्थानादिलक्षणे न शुभानामेव ग्रहाणां दशाविपाकेषु निधनं वाच्यमिति संबंध
१४ व्ययेशसंबंधिनां शुभानामप्यलाभे त्वाह क्वचिदिति भिन्नक्रमः क्वचिदष्टमेशादशास्विति योजना चोप्यर्थे लग्नापेक्षया
योष्टमेशस्तद्दशास्वपि निधनं वाच्यमित्यर्थः २६ अथ पूर्वोक्तानां सर्वेषामसंभवे दर्शने भावादलाभे सति केवलानां मार
कसंबंधेनापि रहितानां पापानां पापग्रहाणां त्रिषडायेशानां दशासु बुधैर्दैवतत्त्वविद्भिः क्वचित् कदाचित् निधनं कल्प
नीयं चंद्रभानू विना मारकस्थानाधिपो मारकेशः षष्ठाष्टमव्ययेशा राहुकेतुश्च एषां मध्ये य आयनवांशपतिः स ग्रहो मा

अलाभे पुनरेतेषां संबंधेन व्ययेशितुः क्वचिच्छुभानां च दशास्वष्टमेशदशासु च २६ केवला
नां च पापानां दशासु निधनं क्वचित् कल्पनीयं बुधैर्नॄणां मारकाणामदर्शने २७ मारकैः सह सं
बंधान्निहंता पापकृच्छनिः

रकः तथा चंद्रार्क्रांतनवांशपतिर्मारकः पापषड्वर्गेशानुग्रहास्तनीचवर्गादिषु षड्वर्गेश
त्वेन लग्नवांशस्य द्रेष्काणस्य द्वादशांशस्य त्रिंशांशगृह्यं ते पापग्रहकृते योगे मृत्युः शुभग्रहकृते योगे पीडामात्रमित्यादि क
ल्पनीयमिति २७ अथ विशेषतः शनेर्मारकयोगमाह मारकैरिति पापकृत् त्रिषडायेशत्वप्रयुक्तपापलक्षणाक्रांतत्वा राम॰
त् पापकर्त्ता शनिः मारकैः मारकस्थानेशादिभिः सह संबंधात् सहावस्थानपरस्परदृष्ट्यादिलक्षणासंबंधात् एतोः ॥ १४

CC-0. In Public Domain. Digitization by eGangotri

इतरान् सर्वान् मारकानतिक्रम्य मारको भवत्येव एवकारो भिन्नक्रमः शनिरित्यस्यांतरं द्रष्टव्यः तथा चान्यमारकापेक्षया शनिरेव
मारक इत्यर्थः न संदेह इति संदेहोऽत्र न कर्तव्यः पापकृत्वमात्रेण शनेर्मारकत्वं यदा तु शनिरेव मारकेशः स्यात्तदा किं वक्तव्यमित्यर्थः
अतः शनेः प्राबल्यमिति सिद्धं दशाचात्र विंशोत्तरी ग्राह्येत्युक्तं प्राक् तत्फलमिदानीमुच्यते पाराशरीये अथ वक्ष्ये खगेशा
नां भुक्तिं पंचविधामहं दशा चांतर्दशा चैव तत्तदंतर्दशा तथा सूक्ष्मभुक्तिः प्राणदशाप्येवं पंचदशाः स्मृताः लग्नेशे स्वनवां
शस्थिते तस्य भुक्तिः शुभावहा स्वदशा भागते लग्ननाथे स्वस्य द्रेक्काणगे तस्य भुक्तिं शुभामाहुर्यमनाथाविशेषतः स्वत्रिंशांशे य
वा मित्रे त्रिंशांशे वा स्थितो यदि तस्य भुक्तिः शुभा प्रोक्ता कालविद्भिर्मनीषिभिः बुद्धिस्थेऽत्र नवांशस्थे पुनर्द्विरस भांशपे मित्र
अतिक्रम्येतरान् सर्वान् भवत्येव न संशयः २८
द्रेष्काणगे वापि तस्य भुक्तिः शुभा
वहा तपोराशिनवांशस्थे धर्मद्विरसभां
शपे । गुरुद्रेष्काणगे वापि तस्य भुक्तिः शुभावहा सुखराशिनवांशस्थे वाहनद्विरसांशके सुखद्रेष्काणगे वापि तस्य भुक्तिः
शुभावहा विलग्ननाथस्थितभांशनाथे मित्रांशगे मित्रगृहेण दृष्टे सुहृद्दृकाणस्वनवांशके वा तद्दंशभुक्तिं शुभदां वदंति
इति शुभदशा अथ वक्ष्ये विशेषेण दशाकष्टफलप्रदा षष्ठाष्टमव्ययेशानां दशा कष्टप्रदायिनी एतद्भुक्तिषु कष्टं स्यान्मा
रकस्य दशा यदा मारकेशास्तु षष्ठेशा युक्ता लग्नाधिपो यदि तस्य भुक्तौ ज्वरप्राप्तिमाहुः कालविदो जनाः सरोगत्वशरीरे शास

स·प· षड्वर्गसंस्थितःजलदोषाज्वरस्यभुक्तौस्यादजीर्णंनसंशयः षष्ठेशयुतलग्नेशोबुधःषड्वर्गसंस्थितःकफस्तस्यभवेद्भुक्तौवातो
१५ वादेहजाड्यकृत् शनिनाथोविलग्नेशोगुरुःषड्वर्गगोपिचेत् तस्यभुक्तौभवेद्रोगः पीडावाब्रम्हणेनतु नक्षत्रेशोविल
ग्नेशोभृगुषड्वर्गगोयदि तस्यभुक्तौभवेद्वातःसन्निपातोयुवानृणां लग्नेशरोगेशसंयुताश्चेत्स्युश्चेत्तमंदात्मजराहुकेतवः
तदासुहिक्कास्वविसूचिकादिरोगेनराणामयतस्यभुक्तौ एवंभ्रात्रादिभावानांनाथकोयत्रसंस्थितः तस्यषड्वर्गयोगेनतत्
तद्भावफलंवदेत् इतिकष्टदशा अथविदशा लग्नेशरोगनाथौचनिधनेशेनसंयुतौ मारकेशयुतौदृष्टौरोगनाथांश
गोयदि तस्यभुक्तौविजानीयाद्यथाशास्त्रेणवैनृणां शुभयोगेनवाधःस्यात्पापयोगेनमृत्युकृत् जीवांशेजीववर्गेणमू
लांशेमूलवर्गतः रोगादिप्रवदेत्तत्रतेषांभुक्तिवशात्फलं विलग्ननाथस्यनवांशनाथोरंध्राशयस्याधिपतिश्चभुक्तौ
मेषस्यषड्वर्गगतौयदातौभुक्तौतयोर्जंबुकभीतितोवधः वृषवर्गगतौतौचेद्वृश्चिकाद्भयमादिशेत् युग्मवर्गगतौभीतिः
कपिजानात्रसंशयः कुलीरवर्गगौतौचेद्रासभाद्भीतिमादिशेत् सिंहवर्गगतौतौचेद्भुक्तौस्यात्व्याघ्रजंभयं कन्यावर्गग
तौतौचेदृक्षकाद्भयमंजसा वणिग्वर्गगतौतौचेत्भुक्तौस्याद्द्विजाद्भयंअलिवर्गगतौयेषांतेषांस्याद्गजतोभयं यदिकार्मुक
वर्गस्थौभुक्तौस्यादश्वजंभयं मृगवर्गगतौतौचेत् भुक्तौकरभजंभयं कुंभवर्गगतौतौचेद्गोलांगूलाद्भयंभवेत् मीनवर्ग एम·
गतौभुक्तौतेषांस्याद्ग्राहजंभयं एवंदेहादिभावानांषड्वर्गगतिभिः फलं सम्यग्विचार्यमतिमान्प्रवदेत्कालवित्तमः ॥ १५

इतिविदशा अथसूक्ष्मदशा लग्नेश्वरोरंध्रपतिश्चयुक्तोवृषेवृषांशेवृषभद्रेक्काणेस्थितोभवेत्तांयदितौवृषेणघातान्निमित्तोम
रणस्यवेद्यो वृषेयुग्मांशगोतौचेद्दल्लकेनमृतिर्नृणां वृषेकर्कांश गोतौचेन्नक्रादथजलेमृतिः वृषेसिंहांशगोतौचेद्व्याघ्राद्या
घाततोमृतिः वृषेकन्यांशगोतौचेत्कपिनानात्रसंशयः वृषेतुलांशगोतौचेद्व्याघ्राद्गीतिंवदेन्नदा वृषेकौर्प्यांशगोतौचेद्दुक्तो
चिंताभयोभवेत् वृषेचापांशगोतौचेन्महिषेणमृतिंवदेत् वृषेकुंभांशगोतौचेद्दूतव्यापारतोभयं वृषेमृगांशगोतौचेन्म
हिषेणमृतिंवदेत् वृषेकुंभांशगोतौचे द्गोलांगूलात्मृतिंवदेत् वृषेवृषांशगोतौचेद्जवस्त्राद्भयंभवेत् एवंसंचित्यमति
मान्भावादीनांमृतिंवदेत्। इतिसूक्ष्मदशा अथप्राणदशा शरीरनाथोमरणाधिपेनयुक्तोमृगेंद्रेणमृगाधिपांशेतयोर्विपा
केभयमाखुतोमृतिंसर्पात्तदाप्राहुरुदारचित्ताः सिंहेकन्यांशगोतौचेत्कफकंपादितोमृतिः मृगराजेतुलांसंस्थितयोर्भुक्तोमृ
तिंवदेत् अल्पांशगोमृगेंद्रेवातयोर्दायेसरीसृपात् चापांशगोमृगेंद्रेतुतद्दुर्गांच्चमृतिंवदेत् मृगांशगोतौसिंहेचतयोर्दायेख
रान्मृतिः कुंभांशगोयदातौचमृगराजन्नृपाद्भयं मीनांशकगतौसिंहेसारंगाद्भयमादिशेत् सिंहेमेषांशगोतौचेद्ग्रामायोर्भयमा
दिशेत् वृषांशगोतौसूर्यर्क्षेतयोर्दायेशुनोमृतिः युग्मांशगोतौसूर्यर्क्षेगोलांगूलाद्भयंभवेत् कर्कांशगोतुसिंहेतुदायेग्राहान्मृ
तिंवदेत् एवंभ्रात्रादिभावानांतद्युक्तोफलंवदेत् देहाधिपोमृत्युपतिश्चयुक्तौचापांशगोकार्मुकराशिगोचेत् दायेतयोर्वाजि
कृतेचमृत्युंवदंतितत्कालविदोमहांतः चापेमृगांश गोतौचेत्सारंगाद्भयमादिशेत् हयेकुंभांशगोतौचेद्व्राहाद्भयमादि ॥

ल·पा शेत् हयेमीनांशगोतौ चेत्याकेन काङ्क्षयंतयोः मेषांशगोतौ चापेतुतयोर्दाये   सुनो मृतिः हयेवृषांशगोतौ चेद्दासभाङ्गयमा
१६ दिशेत् द्युतिप्राणदशा अस्मिन् ग्रंथे पंचम ५ नवम ९ योर्धनसंतादशमचतुर्थयो १०।४ स्सुखसंज्ञा द्वितीयसप्तमयो २।
७। मारकस्थानसंज्ञा षष्ठाष्टव्यया ६।८।१२ नेष्टस्थानानि प्रथमतृतीयैकादशानि १।३।११ समस्थानानि वोद्धव्यानि इ
ति श्रीभैरवदत्तदैवज्ञकृते उडुदायप्रदीपोद्योते आयुर्दाध्यायस्तृतीयः ३ अथ न स्वदशाप्रकारेणापि फलदातृत्वं ग्रहा
णामेवेति तेषां फलदानकालं ज्ञानार्थमाह नदिशेयुरिति ग्रहाः सूर्यादयः सर्वे सकला अपि स्वदशासु षडब्दादिरूपासु

न दिशेयुर्ग्रहाः सर्वे स्वदशासु स्वभुक्तिषु   शुभाशुभफलं नृणामात्मभावानुरूपतः २९

स्वभुक्तिषु स्वदशामध्यगतान्तर्दशासु ऋष्टाद्वादिनाधिकमासत्रयादि भुक्तिरूपासु च नृणां मनुष्याणां शुभाशुभ°
फलं शुभमशुभं वा यथाप्राप्तं फलं आत्मभावानुरूपतः आत्मनो यो भावः सूर्यस्य सिंह इत्यादिस्तदनुरूपतस्तदनु
सारेण मेषादीनां यत्फलं तन्न दिशेयुर्न प्रदद्युरित्यर्थः स्वभावएवैष ग्रहाणामिति भावः नृणामित्युक्ते रथाश्वादीनां
दिशन्तीत्युक्तं भवति २९ एवं तर्हि कदा दिशन्तीत्यपेक्षायामाह आत्मसंबंधिन इति ये ग्रहा आत्मसंबंधिनः आत्म राम·
नः संहावस्थानादि संबंधचतुष्टयेन युक्ताः अथवा ये ग्रहाः निजसधर्मिणः निजेन स्वेन समानधर्माणः॥ ९ ॥ १६

CC-0. In Public Domain. Digitization by eGangotri

आत्मसंबंधरहितत्वेपि शुभाशुभाधिपतित्वेन सदृशास्तेषामंतर्दशास्त्वेव स्वदशाफलं स्वस्वदशाविचारागते दिशंति नान्यथेत्यर्थः
स्वयं शुभः शुभभावाधीशोपथा नथा तथैवान्योपि शुभः शुभभावाधीशश्चेत्तदा तदंतर्दशायां शुभमेव फलं प्रदिशेत स्वयमशु
भः अशुभभावाधीशश्च यथा तथान्योपि अशुभोशुभभावाधीशश्चेत्तदा तदंतर्दशायामशुभमेव फलं प्रदिशेदिति भावः
२९ अथ यथात्मसंबंधिनो ग्रहा न तथा तेनाप्यत्मसधर्मिणो ग्रहास्तदा कथं वाच्यमित्याकांक्षायामाह इतरेषामिति इत
रेषां स्वसंबंधस्य समानधर्म रहितानां दशानाथविरुद्धफलदायिनां वर्तमानायां दशात्स्वायो नाथः स्वामीतस्य विरुद्धं

आत्मसंबंधिनो येच येवा निजसधर्मिणः तेषामंतर्दशास्वेव दिशंति स्वदशा
फलं ३० इतरेषां दशानाथविरुद्धफलदायिनां ॥ तत्तत्फलानुगुण्येन फलान्यूह्या

यत्फलं दशानाथफलं विरुद्धं फलं तद्दातुं शीलं येषां ग्रहाः तेषां भुक्तिषु नचतत्फलानुगुण्येव तत्तदंतर्दशानाथफलानुगुण्ये
न फलानि दशानाथफलानि ऊह्यानि कल्पनीयानि अयमर्थः यदि दशानाथः शुभफलप्रदः इतरे तु न शुभफलप्रदास्तेषाम
तर्दशायामशुभफलमागतं तत्तदनुगुणमेव फलं दशानाथोपि ददाति न तु स्वदशाफलं शुभं यदा दशानाथो शुभफलद इ
तरस्तु शुभप्रदस्तदा तदंतर्दशायां दशानाथोपि शुभमेव ददाति न तु स्वदशाफलमशुभमिति भावः ३० ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथकेंद्रेत्रात्रिकोणेशयोरपीदंप्रसक्तंतत्रविशेषमाह स्वदशायामिति केंद्रपतिः स्वदशायांस्वीयदशायांवर्त्तमानायांत्रिकोणेश
भुक्तौ त्रिकोणपतेरंतर्दशायां शुभंफलंदिशेद्द्यात् संबंधे सतीतियोजनीयं असंबंधेपापफलस्यवक्ष्यमाणत्वात् एवंत्रिको
णेशोपिस्वदशायांकेंद्रेशांतर्दशायांशुभमेवदद्यात् नोचेत्संबंधोनचेदित्यर्थः असंबंधेनसंबंधविरहेणहेतुनापापकृदशुभ
फलेवस्यात् इत्यर्थः अत्रात्मभावानुरूपतः फलान्युक्तानिपाराशरीये देहाधिपः पापयुतोष्टमस्थोव्ययारिगोवागसुखं
निहंति सर्वत्रभावेष्वुचयोजनीयमेवंबुधैर्भाववशात्फलंहि एवंतृतीयेपिचसप्तमेपिफलंविमृश्यकृतिभिः प्रयत्नात् त

स्वदशायांत्रिकोणेशभुक्तौकेंद्रपतिः शुभं दिशेत्सोपितथानोचेदसंबंधेनपापकृत् ३२

थाव्ययेमित्रगृहेरिपौस्वतेस्थितेविलग्नाधिपतौफलंस्यात् २ पापोविलग्नाधिपतिर्विलग्नेचंद्रस्यलग्नेयदिवाष्टवेस्यात् त
दात्तिरोगंसहिकेंद्रसंस्थस्त्रिकोणलाभेषुगदंनिहंति ३ बलोन्नतामेवतुपापवत्तामेतस्यवित्तंफलमानुरूप्यात् नीचारिस्थ
र्येस्यगृहेषुतिष्ठस्वर्क्षविनर्यादिगृहत्रयेच ४ देहाधिपश्चंद्रगृहाधिपोवातृतीयरिप्फारिगतोवलःस्यात् नीचास्तगश्चि
त्रगृहेस्थितोवाकार्श्यंशरीरेतिगदंकरोति इतिप्रथमभावफलं अथद्वितीयस्य शुक्रेणयुक्तोयदिनेत्रनाथः शुक्रस्यवाक्षी
दिगृहत्रयस्थः संबंध्यपिस्याद्यदिदेहयेननेत्रंविधत्तेविपरीतभावं १ तत्रस्थितौचंद्ररवीनिशांध्यंजात्यंधतांनेत्रपदेहपाकाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पैत्रर्क्षनाथेन युतास्तदाध्यं कुर्वंति मात्रादिफलं तथैव क्र २ दोषकृन्न च सर्वत्र स्वोच्च स्वर्क्षगतो ग्रहः षडादित्रयसंस्थाश्चेत्तद्वि
नाद्दोषकृच्छुभः ३ वागीशवाग्गृहाधीशौ षडादित्रयसंस्थितौ मूकतां कुरुतो ह्येवं पितृमातृगृहाधिपाः ४ वागीशवाग्गृहा
धीशाभ्युतास्तत्र यसंस्थितौ कुर्वंति ते षां मूकत्वमेव मूढत्वं मनीषिभिः ५ कुटुंबकारकात्केंद्र त्रिकोणे शुभगताग्रहाः सकुटुंबक
लत्रेशाः कलत्रं वा कुटुंबकं ६ पश्यंति चेद्वह्यस्थावापावत्तावत्प्रमाणकं कलत्रं निर्दिशेत्प्राज्ञो यवा तेषां च नो वदेत् ७ विद्याधि
पौ नीचबुधाव विद्यामरित्रयस्थौ कुरुतो यतो चेत् केंद्रत्रिकोणस्थगृहोच्चसंस्थौ मयच्छतां द्वागनवद्यविद्यां ८ एवं बुधस्यांगि
रसः षडादित्रयस्थितौ नीचगृहारिनाथः केंद्रत्रिकोणस्वगृहोच्चसंस्थौ धनाभिवृद्धिं कुरुतस्तदेव ९ इति द्वितीयभावफलं अथ
तृतीयस्य सभौमो भ्रातृभावेशः षडादित्रयसंस्थितः भ्रातृक्षेत्रगतो वापि भ्रातृभावं विनिर्दिशेत् १ तौ पापयोगतः पापक्षे
त्रयोगेन वा पुनः उत्साहसहजान् सद्योनिहंता शास्त्रनिश्चयात् २ स्त्रीग्रहो भ्रातृभावेशः स्त्रीगृहो भ्रातृगोपि वा भगिनीस्या
त्तदा भ्राता पुंग्रहः पुंग्रहो यदि ३ मिश्रे मिश्रफलं चात्र बलाबलविनिर्णयः ४ इति तृतीयभावफलं अथ चतुर्थस्य गेहाधिनाथे
न युते तु गेहे गेहाधिपेनापि गृहाभिलब्धिः युते षडाद्यौ तु विपर्ययः स्यात् गृहाधिपे देहपतौ च तद्वत् १ केंद्रत्रिकोणे शुभभग्र
हेण युते समीचीनगृहाभिलब्धिः क्षेत्रस्य चिंता सदनाधिपेन जीवन चिंता तु सुखस्य कार्या २ दिव्यांगनां वाहनवस्त्रभूषा विं
द्यानुक्रार्या भृगुणा बुधेंदुः तमः शनिभ्यामभिचिंत्यमायुरर्केणतातः शशिनात्र माता ३ बुधेन बुद्धिः स ॥ ५ ॥९

ल॰पा॰ दनर्क्षसंस्थांगतेनसमेतेज्ञायुतेनचस्यात् केंद्रत्रिकोणेषुगतेनसम्यक्पञ्चयतावापिसतुंगगेन ४ इतिचतुर्थभावफलं अथप
१८ चमस्यषडादित्रयसंस्थेतुसुताधीशोस्यपुत्रता केंद्रत्रिकोणसंस्थेतुपुत्रलाभाभिसंभवः १ सत्पुत्रलाभः सुतपेसुरेज्ये
शुभेषुगेहेषुगतेचभानौ एकः स्थिरः स्यात्सुत एकएवस्थितःशुभः केंद्रनवात्मजस्थे २ पितापिचिंत्योनवमेसुतस्ते
एवंविधश्चिंतनमूहनीयं क्षेत्रस्यकारकोभौमःकर्मस्थानेप्ययंविधिः ३ अस्तंगतेपंचमेशेपापाक्रांतेचदुर्बले षष्ठेनीचेसुता
धीशेकाकवंध्याविशेषतः षष्ठस्थानेसुताधीशोलग्नेशोकुजवेश्मनि म्रियतेप्रथमापत्यंकाकवंध्यालमाप्नुयात् ४ सुताधी
शोहिनीचस्थः षडादित्रयसंस्थितः काकवंध्याभवेन्नारीसुतेकेतुबुधोयदि ५ सुतेशोनीचगोयत्रसुतस्थानंनपश्यति त
त्रसौरिबुधौस्यातांकाकवंध्यात्वमाप्नुयात् ६ भाग्येशोमूर्तिवर्तीचसुतेशोनीचगोयदि सुतेकेतुबुधौस्यातांसुतकष्टंहि
निर्दिशेत् ७ षडादित्रयसंस्थेपि नीचोवाप्यरिक्षस्थितः पापाक्रांतेसुतस्थाने पुत्रंकष्टाद्विनिर्दिशेत् ९ इति पंचमभावफ
लं षष्ठाधिपोपिपापश्चेद्देहेवाप्यष्टमेस्थितः तदाव्रणोभवेद्देहे कर्मस्थानप्ययंविधिः १ एवं पित्रादिभावेशास्तत्तत्कारक सं
युताः व्रणाधिपयुताश्चापिषष्ठाष्टमयुतायदि २ तेषामपिव्रणं वाच्यमादित्येनशिरोव्रणं इंदुनाचमुखेकंठे भौमेनजंघेन
नाभिषु ३ गुरुणा नासिकायांच भृगुणानयनेपदे शनिनाराहुणाकुक्षौकेतुनाचतथाभवेत् ४ लग्नाधिपः कुजः क्षेत्रेबुध राम॰
सायदिसंस्थितः यत्रकुत्रस्थितज्ञेनवीक्षितौमुखरुक्प्रदः ५ लग्नाधिपौकुजबुधौचंद्रेणयदिसंस्थितौ राहुर्वाशनिनासार्द्धं १८

CC-0. In Public Domain. Digitization by eGangotri

कुष्टंतत्रविनिर्दिशेत् लग्नाधिपंविनालग्ने स्थितश्चेत्तमसाराशौ श्वेतकुष्टंतदाख्याकुष्टचन्द्रानिनासहकुजेनरक्तकुष्टस्यात्तत
द्वेवंविचारयेत् लग्नेषष्ठाष्टमाधीशौरविणायदिसंस्थितौ ज्वरगंडुःकुजेग्रंथिःशस्त्रव्रणमथापिवा बुधेनपित्तंगुरुणारोगाभा
वंविनिर्दिशेत् स्त्रीभिःशुक्रेणशनिनावायुनासंयुतोयदि गंडश्चांडालतोराभ्यां तमःकेत्वोरहेभयं चंद्रेणगंडसलिलैःक
फश्लेष्मादिनाभवेत् एवंपित्रादिभावानांत तत्कारकयोगतः गंडस्तेषांभवेदेवमूह्यमत्रमनीषिभिः इतिषष्ठभावफलं॥
अथसप्तमस्य कलत्रयोविनाशःस्यात्षडादित्रयसंस्थितः रोगिणींकुरुतेनारींतथातुंगादिकंविनास्त्रीपुत्रयात्राफलचिंतना
निकार्याण्यनेनापिसहाधिपेन शुभेनकार्यंशुभमं थैवपापेनपापंफलमूहनीयं सप्तमेतुस्थितेशुक्रेतीवकामीभवेन्न
रः यत्रकुत्रस्थितेपापयुतेस्त्रीमरणंभवेत् इतिसप्तमभावफलं अथाष्टमस्य आयुःस्थानाधिपः पापैःसहैवयदिसं
स्थितः करोत्यल्पायुषंजातंलग्नेशोप्यत्रसंस्थितः एवंहिशनिनाचिंताकार्यानर्कविचक्षणैः कर्माधिपेनचतथाचिंतनंका
र्यमायुषःषष्ठेव्ययेपिषष्ठेशोव्ययाधीशोरिपोव्यये लग्नेष्टमेस्थितौवापिदीर्घमायुःप्रयच्छति स्वस्थानेस्वांशकेवापिमित्रां
शेमित्रमंदिरे दीर्घायुषंकरोत्येवलग्नेशोष्टमपःपुनः लग्नाष्टमपकर्मेशामंदाःकेंद्रत्रिकोणयोःलाभेवासंस्थितास्तद्वत्स्थि
रोयुर्दीर्घमायुषं येषुयोवलवान्स्यात्तुसारादायुरादिशेत् इत्यष्टमभावफलं अथनवमस्य भाग्याधिनाथोपिचभा
ग्यकर्ताशुक्रोपिपापैःसहचेत्त्रिषुस्यात् त्रिषडादिभावेषुचभाग्यहीनं केंद्रत्रिकोणायगतोतिभाग्यं अनेनधर्मःपरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·भा कल्पनीयः पितातु वित्तं निजमातुलस्य शुभे शुभस्थानगते शुभं स्याद्विपर्ययेतत्र विपर्ययः स्यात् इति नवमभावफलं अ
१९ थदशमस्य कर्माधिपो बलीन श्चेत्कर्म वैकल्यमादिशेत् स हि केंद्रत्रिकोणस्थो ज्योतिष्टोमादियागकृत् अत्रायुषश्चिंतनं च
कार्यं स्यात्कर्मणस्तथा शत्रुनीचगृहं त्यक्त्वा षष्ठाष्टमगृहं तथा इति दशमभावफलं अथैकादशस्य लाभाधिपो यदा ला
भे तिष्ठेत्केंद्रत्रिकोणयोः बहुलाभं तदा कुर्यादुच्चः सूर्यांशगोपि वा इत्येकादशभावफलं अथ द्वादशस्य चंद्रो व्ययाधिपो ध
र्मे लाभमंत्रेषु संस्थितः स्वोच्च स्वर्क्षे निजांशे वा लाभधर्मात्मजांशके दिव्यागारादिपर्यंको दिव्यगंधैकभोगवान् परार्घ्यर
मणो दिव्यवस्त्रमाल्यादिभूषणः परार्थसंयतो वित्तो दिनानि नयति प्रभुः एवं स्वशत्रुनीचांशे अस्तांशे वाष्टमे रिपौ संस्थितः
कुरुते जातं कांतासुखविवर्जितं व्याधिक्यपरिक्रांतं दिव्यभोगनिराकृतं स हि केंद्रत्रिकोणस्थः स्वल्पिपालकृतः स्वयं भ
एवं भ्रात्रादिभावेषु तत्तत्सर्वं विचारयेत् इति द्वादशभावफलं अथ भावसमुच्चयस्य बली धनेशो धनकारकोत यावुधेज्य
कौ केंद्रस्वर्क्षभाग्यगौ लाभे निजांशे पदि वा निजालये स्थितौ धनाढ्यं कुरुतो नरं सदा विक्रमेशो बलाढ्यश्चेत् भ्रातृकारके
विचरः केंद्रत्रिकोणलाभोच्चस्वर्क्षस्वांशेषु संस्थितः दद्याच्च भ्रातरं तत्र सत्त्वशौर्यादिचिंतनं बली ग्रहेशः सुखकारको बली
प्रपच्छति ग्रामवहुभोगमंदिरं अनेन सद्वाहनवेश्मबंधुमात्रादिचिंता परिकल्पनीया इति पराशरमुनिविरचिते केरलसा एम·
रे द्वादशभावविचारः ईदृशं भावफलं ग्रहाः स्वदशासु नदिशंति स्व संबंधिनां स्वसमानधर्मिणां चांतर्दशासु दिशंतीत्युक्तं श्लोक १९

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चतुष्टयेननदिशंतिग्रहाः सर्वेइत्यादिना अन्यदपिचिंतनमुक्तं ग्रंथांतरे लग्नाच्चित्यंमूर्तिकीर्तिसांगोपांगनिरूपणं स्थितिःस्त्र स्त्रसंपत्तिर्जन्मलग्नगतेफलं धनंस्त्रस्वंचभुक्तिश्चसत्यंचवृद्धभाषणं सव्यनेत्रालयहारश्चधनस्थानाद्विचिंतयेत् भ्रातृकंधैर्य क्रमश्चस्तधाभरणपात्रवान् भ्रातृस्थानफलं नामतत्रनामफलंदिशेत् वाहनंबहुमातृश्चसिंहासनस्त्रखेग्रहाः बंधुमित्र मिदंनामचतुर्थस्थानमुच्यते पुत्रोबुद्धिश्चमंत्रश्चदेवताभक्तिरेवच ॥ ह्रदयंमातुलश्चैवस्तनस्थानाद्विचिंतयेत् ग रिपुकांतिवलरोगउदारंवानुरेवच षष्टस्थानमिदंनाम तत्तन्नामफलंदिशेत् कलत्रंकामुकत्वंचदंतानाभिश्चरोगवान् गुदं

आरंभोराजयोगस्यभवेन्मारकभुक्तिषु प्रथयंतितमारभ्यक्रमशःपापभुक्तयः ३२॥

संकटकश्चैव आयुःस्थानाद्विचिंतयेत् भाग्यंचतीर्थंधर्मंचपितृस्थानमितिक्रमात् मानराज्यंत्यक्तकीर्तिः कर्मव्यापारमेव च लाभंचज्येष्ठभ्रातृ श्वकर्णजंघामितिक्रमात् रिष्फव्ययंपितृधनंवादयोवादिनामचेतिभावनामानि अथराजयोगार भकालेयादशातत्रराजयोगस्यफलमाह आरंभइतिमारकोद्वितीयसप्तमेशास्तस्यभुक्तिषु अंतर्दशासुराजयोगस्यय द्यारंभोभवेत् तदापापभुक्तयःपापग्रहाणामंतर्दशास्तंराजयोगारंभकालमारभ्यसजयंतिप्रथयंतिराजायामंतिप्रथम न्नमुक्तंकुर्वंति राजयोगप्रभावाद्राजेतिप्रसिद्धिस्तुभवति मारकग्रहभुक्तिवशात्तुराज्यसुखादिनेजीवलस्थादिकंकिम

ल·पा· क्रमश इतिकथनाद्दिनेदिनेप्रथारस्थिरिति ज्ञाप्यते ३२ पापग्रहाणामंतर्दशास्वराजयोगारंभस्य फलमुक्त्वाशुभग्रहाणामं
२० तर्दशासुराजयोगारंभफलमाह तत्संबंधिशुभानामिति तत्पदेनराजयोगकारकग्रहः तस्यसंबंधिनः सहावस्थानाद्यन्य
तमसंबंधविशिष्टाशुभाशुभग्रहास्तेषांभुक्तिषुराजयोगारंभेसति तथाक्रमशः प्रथयंतितमारभ्यराज्यस्यखतेजोबला
दीनांदिनेदिनेविवृद्धिंकुर्वंति यद्यप्युत्कर्षबोधकंपदंनास्तिनपापसंयुजांशुभानांतुसमत्वेनेतिवक्ष्यमाणात्तादृशोत्क
र्षत्वेनेति विवक्षितपूर्वंतु अपकृष्टत्वेनेतिबोध्यंसमयोगफलमेवाह पुनरसंयुजामिति नसंयुज्यंतइत्यसंयुजः सं

तत्संबंधिशुभानांचतथापुनरसंयुजां शुभानांतुसमत्वेनसंयोगोयोगकारिणां ३३

बंधसामान्यरहितास्तेषांयोगकारिणांशुभानांग्रहाणांतु अंतर्दशायांयदिराजयोगारंभइतिपूर्ववदेवसंबंधः अत्रयोगेस
मत्वेनप्रथयंतिनास्यापकर्षोनाप्युत्कर्षइतिसाम्यमेव राजसुखतेजोबलवृद्ध्यादौभवतीत्यर्थः अयंश्लोकद्वयार्थः राजयो
गस्यफलंराज्यप्राप्त्यादितत्त्रिविधं उत्कृष्टमध्यमनीचंचतत्रपापभुक्तिषुराजयोगारंभेनीचमुत्कर्षादिहीनमेवफलंप्रथम
माप्नोति शुभभुक्तिषु तदारंभेराजयोगकारकसंबंधेसति उत्कृष्टमेवफलंभवति असंबंधिनांशुभानांभुक्तिषु तदारं रा
भेमध्यममेवफलंप्रथितंस्यादिति ३३ अथराजयोगकारकस्यैवदशायांविशेषमाह शुभस्येति अस्ययोगकारकस्यशु २०

शुभग्रहस्य प्रसक्तस्य संबंधविशिष्टस्य दशायां योगकारकग्रहाः स्वभुक्तिषु स्वस्वांतर्दशासु कुत्रचित् कदाचित् योगजं राजयोगसमुद्भवं फलं प्रयच्छंति राजयोगकारकग्रहदशायां यदा योगकारकग्रहस्यांत र्दशा समायाति तदा फलं भवतीत्यर्थः ३४ राहुकेतुविषयविशेषमाह तमोग्रहाविति तमोग्रहौ राहुकेतू शुभारूढौ केंद्रत्रिकोणान्यतमस्थानगतौ यदि भवेतां तदा अंतर्दशानुसारेण योगकारकग्रहस्य यदांतर्दशा भवति तदा योगकारकौ भवेतां योगजं फलं

शुभस्यास्य प्रसक्तस्य दशायां योगकारकाः स्वभुक्तिषु प्रयच्छंति कुत्रचिद्योगजं फलं
३४ तमोग्रहौ शुभारूढावसंबंधेन केनचित् अंतर्दशानुसारेण भवेतां योगकारकौ ॥
३५ पापा यदि दशानाथाः शुभानां तदसंयुजा भुक्तयः पापफलदास्तत्संयुक्शुभभुक्तयः

दिशेतामित्यर्थः अयं भावः योगकारकग्रहसंबंधरहितत्वेपि शुभस्थानारूढत्वमात्रेण राहुकेतू राजयोगफलं दिशतः परंतु राजयोगकारकस्य ग्रहस्य यदांतर्दशा भवति तत्रापि शुभस्यांतर्दशा चेदुत्कृष्टं अशुभस्यांतर्दशा चेदुत्कृष्ट अशुभस्यांतर्दशायां हीनमित्यादि पूर्ववदूहनीयं ३५ अथ पापानां दशानां भुक्तिविशेषात्फलविशेषमाह पापा यदीति दशानाथाः पापाः पापा अशुभग्रहाः स्युः तदा तदसंयुजां दशानाथसंबंधरहितानां शुभानां ग्रहाणामंतर्दशासु भुक्तयः योगकारिणा

ज॰ पा॰ पापफलदा भवंति संबंधसहितानां तु प्राह — तत्संयुक्त शुभभुक्तय इति दशानाथसंबंधिशुभग्रहभुक्तयस्तु मिश्रफलदा भ
२१ वंतीत्यग्रिमश्लोकस्थेन संबंधः योगकारिणां पापिनां दशानाथसंबंधरहितानां तु भुक्तयोऽत्यंतपापफलदा अशुभफलदायि
न्यो भवंति पापापदिदशानाथाद्युक्तस्य सर्वत्रान्वयो वेदितव्यः ३६ भवंतीति पूर्वश्लोकेन सहास्यार्थ उक्तः अयं श्लोक
स्यार्थः पापग्रहदशायां पापिनो दशाधीशस्यासंबंधीयः शुभग्रहस्तस्यांतर्दशायां न शुभं फलं भवति पापिनो दशाना
थस्य संबंधीयः शुभग्रहस्तस्यांतर्दशायामप्यशुभफलं भवति पापिनो दशानाथस्य यः संबंधी पापग्रहस्तस्यांतर्दशायां

भवंति मिश्रफलदा भुक्तयो योगकारिणां अत्यंतपापफलदा भवंति तदसंयु
जां ३७ सत्यपि स्वेन संबंधे न हंति शुभभुक्तिषु हंति सत्यपि संबंधे मारकः पापभु

त्यंतमशुभं इति ३७ अथ मारकस्य भुक्तिवशान्मारकत्वात् मारकत्वमुपदिशति सत्यपीति स्वेन संबंधे परस्पराश्रया
दिलक्षणे सत्यपि शुभभुक्तिषु शुभग्रहांतर्दशायां न हंति न मारयति असत्यपि स्वेन संबंधे पापभुक्तिषु हंति सत्यप्य
संबंधे इत्यस्या संबंधेपि सतीत्यन्वयः अयं भावः मारकग्रहदशायां यदि शुभग्रहस्यांतर्दशा भवति तदा न मारयति संब राम॰
धस्तत्र न प्रयोजकः यदि तु पापग्रहस्यांतर्दशा भवति तदा मारयत्येव न संबंधमपेक्षित इति ३८ अथ शनि ॥ २१

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भार्गवयोर्भुक्तिव्यत्ययेन शुभाशुभफलप्रदत्वमाह परस्परेति सूर्यजभार्गवौ शनिशुक्रौ परस्परदशायां शनिः शुक्रदशायां शुक्रः शनिदशायां शनि स्वदशायामित्यादिस्तनार्थः स्वदशायाः परस्परदशात्वविरहात् तथा च शनिः शुक्रदशायां स्वभुक्तौ स्वीयां तद्दशाकाले व्यत्ययेन वैपरीत्येन अर्थात् शुक्रस्यैव शुभमशुभं वा फलं ददाति एवं शुक्रः शनिदशायां स्वांतर्दशाकाले शनेरेव शुभमशुभं वा फलं ददाति इदमपि विशेषेण विशेषरूपेण न तु सामान्यरूपेणेति ३९ अथ विख्यातिकारकं राजयोगमाह कर्मलग्नाधीति कर्मलग्नाधिनेतारौ दशमेशजन्मलग्नेशौ अन्योन्याश्रयसंस्थितौ अन्योन्यस्य परस्परस्य आश्रयः स्थानं तत्र संस्थितौ कर्मेशो लग्नस्थाने लग्नेशः कर्मस्थाने स्थितो यदि स्यात् तदा राजयोगाविति राजयोगकारकौ स्त इत्यर्थः ततः किमित्यत आह विख्यात इति अस्मिन् योगे जात इत्यध्याहारः विख्यातः विशिष्टख्यातिमान् विजयी संग्रामविवादादिषु जयशाली स्यादिति ४० अथ राजयोगांतरमाह धर्मकर्मेति धर्मकर्माधिनेतारौ नवमदशमभावेशौ अन्योन्याश्रयसंस्थितौ धर्मेशः कर्मभावे कर्मेशो धर्मभाव इत्येवं यदि स्यातदा तौ राजयोगकारकाविति प्रोक्तं शास्त्रे कथितं अस्मिन्नपि योगे पूर्वोक्तमेव फलमित्याह विख्यातो विजयी भवेदिति ४१

परस्परदशायां स्वभुक्तौ सूर्यजभार्गवौ व्यत्ययेन विशेषेण प्रदिशेतां शुभाशुभं ३९ कर्मलग्नाधिनेतारावन्योन्याश्रयसंस्थितौ ॥

Tribhuvan University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीर्यवान् विजयीभवेदितिकचित्पाठः स्पष्टार्थः ४१ समाप्तोयंग्रंथस्तत्रग्रहस्वभावाद्दृश्यानिफलान्युच्यंते राज्यविद्रुमरक्त व
स्त्रमाणिक्यराजवनपर्वतक्षेत्रपितृकारकोरविः १ मातृमनःपुष्टिगंधरसेक्षुगोधूमक्षारकुह्विजराक्तिकार्यसस्यरजतादि
स्तादिकारकश्चंद्रः २ सत्वसत्वभूमिपुत्रशीलचौर्यरोगब्रह्मभ्रातृपराक्रमाग्निसाहसराजशत्रुकारकारकःकुजः ३ ज्यो
तिर्विद्यामातुलगणितकार्यनर्त्तनवैद्यहासभोः श्रीशिल्पविद्यादिकारकोबुधः स्वकर्मयजनदेवब्राह्मणधनगृहकांचनव
स्त्रपुत्रमित्रान्दोलनादिकारकोगुरुः ५ कलत्रकार्मुकस्रग्गीतशास्त्रकाव्यपुष्पस्त्रकुमारयौवनाभरणरजतयानगर्वलो

राजयोगावितिप्रोक्तं विख्यातो विजयीभवेत् ४० धर्मकर्माधिनेतारावन्योन्याश्रयसं
स्थितौ राजयोगावितिप्रोक्तं विख्यातो विजयीभवेत् ४१ इतिश्रीउडुदायप्रदीयेंतर्द
शाध्यायः संपूर्णः ॥ ९ ॥

कमौक्तिकविभवकवितारसादिकारकःशुक्रःमहिषहयगजतैलवस्त्रशृंगार
प्रयाणसर्वराज्यदारुआयुधगृहसुखसंचारशूद्रनीलमणिविप्रकेशशल्यमूलरोगदासदासीजनायुष्यकारकःशनिः ८
७प्रयाणसमयसर्पराज्यिस्त्रकलत्रसत्रार्थकर्त्तापूतकारकोराहुः ८ व्रणरोगचर्मार्तिशूलस्फोटक्षुधार्तिकारकःकेतुरिति ९
अथग्रहशांतिः माणिक्यगोधूमसवत्सधेनुकौसुंभवस्त्रंघृतहेमताम्रं आरक्तचोलेनघृतंधनंवावदंतिदानानिविरव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रांखंसपात्रंसितचामरंचकर्पूरंमुक्ताफलशुभ्रवस्त्रं युगोपयुक्तंवृषभंचरौप्यं चंद्रायदद्यात्घृतपूर्णकुंभं २ प्रवालगोधूमम
सूरकाश्वद्वषोरुणो व्याद्ककास्कवर्णं आरक्तवस्त्रंकरवीरपुष्पंताम्रंचभौतायवदंतिदानं ३ नीलंचचेलंफलधौतकां
स्यमुद्गाज्यगारुत्मकसर्वपुष्पंदासीचदंतोद्विरदस्यनूनंवदंतिदानंविधुनंदनाय ४ शर्कराचरजनीतुरंगमः पीतधान्यम
पिपीतमंबरं पुष्परागनवरत्नकांचनंप्रीतयेसुरगुरोःप्रदीयतां ५ चित्रांबरंशुभ्रतरस्तुरंगोधेनुश्चवज्रंरजतंसुवर्णं सतंडुल
ञ्चात्तमगंधयुक्तंवदंतिदानंभृगुनंदनाय ६ माषाश्चतैलंविमलेंद्रनीलंतिलाः कुलित्थामहिषीचलोहं गौश्चासितेविप्रवदं।
तिदानंकृष्णाचदद्याद्रविनंदनाय ७ गोमेदरत्नंचतुरंगमश्चसनीलचेलादिसकंबलश्च तिलाश्चतैलंखलुलोहमु
क्तंस्वर्भानवेदानमिदंवदंति ८ वैडूर्यरत्नंसतिलंसतैलंसकंबलंचापिमदोमृगस्य शस्तंहिकेतोःपरितोषवीजमु
[illegible]तंदानमिदंमुनींद्रैः ९ जपहोमग्रहोपास्तिदेवद्विजगवार्चनैः तत्र्यस्तमंगलंसर्वंकुदशाग्रहसंभवं इतियद्व
शोनहि मूढतामुपगतोनापंडितोनाधनोनोदीनोनचदुःखितोनतपसाहीनोनवादुर्बलाः नापूज्योनचराजस
नविधुरोनासंततिर्नो मतिः सोयंसूरिपराशरोमुनिवरोवर्वर्तिसर्वोपरि १ तदन्वयेशुभ्रमतिःसनान्यः सदासनाथ्यो
धिषणाधनास्यः पांडेयनामागिरिधारिलालोवृंदावनोद्विशालसज्जशैल्यां २ तस्यात्मजःकुंदनरामशर्मातदात्मजोभू
धरिरामशर्मा तदात्मजःस्वांतनिविश्रामःसिद्धांतविद्भिर्वदत्तसूरिः ३ अकारिवेनाथसुडुप्रदीपोयोतोगुरुक्तिप्रति

ल॰ पा॰
२३

पितृदोषः विद्वज्जनानांगुणसद्मनानांभवेदनायासविलासहेतुः ४ अभूद्व्रेखसूक्तीनां लिपिक

धरणीधरः महाभारतनिर्माणेव्याससेव गणेश्वरः ५ इतिश्रीलघुपाराशरीसंपूर्णा ॥ यह पोथीश

हरवनारसदिवाकरछापाखानेमेलघुपाराशरीसिवचरनकेइहांछपीसाकीनमुहल्लेमदैनोका

लीमहलके पास वाःदुर्गामिसिरबोछापनेवालेवदलावोसोधनेवालेवज्रपंडित सम्वत१९३८

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०४४

॥श्रीकाशीविश्वनाथपुरीमेढुंढिराजगणेशकेपाशदाऊअग्निहोत्रीकेय
हांसिद्धविनायकयंत्रमेजातकालंकारटीकासहितछापागयादुवरी
छापनेवालेसेलिखाविशेसरउपाध्या जिसेलेनाहोयउसेढुंढिराजग
णेशपरदाऊपोथीवालेकीदुकानमेमिलेगी संवत् १९२६ शाके १७९१
अधिकवैशाषसुक्ल ४ भृगुवासरे॥ सुभम्भूयात् ॥ ॥श्रीरस्तु॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ॰लं॰ ॥ श्रीगणेशायनमः॥ ॥वस्त्वर्णब्रह्मविद्यापरिचयचतुरं श्रीशुकं व्यासपुत्रं नत्वाचार्यं मुनीनां हरिपदकमलेप्रेमविश्रामभाजं ॥०
१ स्विष्टं स्वेष्टदेवं स्तुतिसमधिगतं माधवं भावयित्वा भावैरुद्राव्यतेऽसौ प्रवरमतिमुदे जातकालंकृतश्रीः॥१॥ अथ ज्योतिर्वित्ति
लकच्छन्दोलंकृतिकाव्यरचनानिपुणः श्रीगणेशकविः श्रीशुकजानकानुरोधि जातकालंकारनामकं ग्रंथं चिकीर्षुस्तदा।
दौ निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारक्रमगतं भगवद्विभूतिभूतगुरुगणेशभारतीकर्मप्रणिपातपुरःसरं विघ्नमुनिर्देशात्मकं
मंगलमाचरति द्वाभ्यां शार्दूलविक्रीडिताभ्यां सानंदमिति सद्भावाकलितमिति च गणेशकृतिनागणेशनाम्नाग्रंथकरणकुश

सानंदं प्रणिपत्य सिद्धिसदनं लंबोदरं भारतीं सूर्यादिग्रहमंडलं निजगुरुं भक्त्या हृदब्जे स्थितम् ॥

येषामंघ्रिसरोरुहस्मरणतो नानाविधाः सिद्धयः सिद्धिं यांति लघु प्रयांति विलयं प्रत्यूहशैलव्रजाः॥ १॥

लेन मया तज्जातकं तत्स्रग्धरया स्रग्धरएतैः प्रव्यक्तं क्रियते स्पष्टार्थं यथास्यात्तथा विधीयत इत्यर्थः किं कृत्वा भक्त्या तान् सिद्धिसदनं नत्वा
नमस्कृत्य तान् किंविधान् येषामंघ्रिसरोरुहस्मरणतः नानाविधाः अनेकविधाः सिद्धयः कार्यसिद्धयः सिद्धिं पूर्णतां यांति प्रत्यूह राम॰
शैलव्रजाः विघ्नपर्वतसमूहाः विघ्नोंतरायः प्रत्यूह इत्यमरः व्रजो गोष्ठाध्ववृंदेष्वित्यमरः लघु शीघ्रं विलयं यांति नश्यंति लघु क्षि १
प्रमरं द्रुतमित्यमरः॥लघ्विति पदं शीघ्रता वाचकं देहलीदीपकन्यायेनोभयत्रान्वेति तान्कान् तदाह सिद्धिसदनं सिद्धिर्लक्ष्मीः॥०
तस्याः सदनं गृहं निवासस्थानमिति यावत् श्रीनिवासमित्यर्थः त्वं सिद्धिस्त्वं स्वधा स्वाहेत्यादि लक्ष्मीस्तुत्यारंभे सिद्धिशब्दस्य ल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्म्यां प्रयुक्तत्वात्सिद्धिर्लक्ष्मीरिति निखिलस्यार्थः कीदृशं सिद्धिसदनं सानंदं आनंदेन सहितं ब्रह्मण आनंदः आनंदं ब्रह्मणो विद्वानिति श्रुतेः सानंदमिति विशेषणपदं भगवतोन्यत्र नोपपद्यते हृदब्जे स्थितं हृदयकमलवासिनं सर्वस्य चाहं हृदि सन्निविष्ट इति भगवद्वचनात् भक्त्या प्रीतिपूर्वकानुस्मृत्या निजगुरुं श्रीमच्छिवाख्यं लंबोदरं विनायकं भारतीं सरस्वतीं सूर्यादिग्रह मंडलं रव्यादीनां ग्रहाणां मंडलं समूहं च प्रणिपत्य नमस्कृत्य शुकास्यगलितं शुकमुनिमुखादुद्गतं गाथोक्तिः गाथानां श्लोकविधुराणां गिरां उक्तिर्व्यवहारः यस्मिन् तथाभूतं कथं व्यक्तं क्रियते यथा शुकास्यात् गलितं श्रीमद्भागवतं महापुराणं श्रीधरस्वामिना

सद्भावाकलितं पदार्थललितं योगांगलीलांचितं श्रीमद्भागवतं शुकास्यगलितं यच्छ्रीधरस्वामिना सुव्य
क्तं क्रियते गणेशकविना गाथोक्तिजातकं वृत्तस्रग्धरयाजनादिसुफलं ज्योतिर्विदां जीवनम् २ ॥

व्यक्तं क्रियत इत्यध्याहारः कथंभूतं भागवतं जातकं च सद्भावाकलितं सत् प्रशस्तो भावो विष्णुभक्तिः तेनाकलितं विशिष्टं जातकपक्षे सद्भावैः लग्नादिद्वादशभावैः स्तात्पर्यैर्वा विशिष्टं पदार्थललितं पदार्थैः परमात्मसुहृद्योतकैः श्रवणकीर्तनादिभिः ललितं रुचिरं जातकपक्षे पदार्थैः सानंदवदनादिभिर्मनोहरं योगांगलीलांचितं योगो भक्तियोगस्तस्यांगानि यमनियमासनप्राणायामध्यानधारणासमाधयः तेषां लीला उपदेशविशेषास्ताभिरंचितं महितं जातकपक्षे योगांगानि ग्रहभावादीनि तेषां लीला योग्यत्वेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰लं॰ घटनविशेषास्ताभिर्महितंप्रशस्तमित्यर्थः ज्योतिर्विदांजीवनंज्योतिः परमात्मानारायणः परोज्योतिरितिश्रुतेः तद्विदांब्रह्म
२ विदांजीवनकालक्षेपयोग्यंजातकपक्षेज्योतिर्विदांगणकानांजीविकाप्रदत्वाज्जीवनमित्यर्थः वृत्तस्रग्धरायास्रग्धरावृत्तेरि
त्यर्थः ॥ जात्यभिप्रायेणैकवचनोक्तिः तस्यलक्षणंचत्वारोयत्रवर्णाःप्रथममित्यादि ॥ १ ॥ २ ॥ ननुश्रीधरस्वामीवद्भव
त्तापिशुकजातकव्याख्यानेकर्तव्यग्रंथारंभोनोचितस्तत्राह यत्पूर्वमिति गणेशनामाऽहंश्रीमच्छिवानुज्ञयावेदशास्त्रसंप
न्नशिवनाम्नःगुरोराज्ञयातत्रोत्यर्थमितिभावः पूर्वभवकाले शुकास्यगलितंछंदोरहितत्वात् फक्किकारूपंगूढतमं अतिश

यत्पूर्वंपरमंशुकास्यगलितंसज्ज्ञातकंफक्किकारूपंगूढतमंतदेवविशदंकुर्वेगणेशोऽस्म्यहम् ॥
दैवज्ञःसुतरांयशःसुखमतिःश्रीहर्षदंस्रग्धरावृत्तैश्चारुरुचांशुभायनपदंश्रीमच्छिवानुज्ञया ३

येनगहनंनतुविशदं परमंसारार्थनिरूपणेनोत्कृष्टं यज्ज्ञातकं तदेवस्रग्धरावृत्तैश्चारुरुचिरंविशदंकुर्वे फक्किकारूपस्यगूढतमः
स्यविशदीकरणंश्लोकैरेवोचितमित्याशयः कथंभूतोगणेशः दैवज्ञोऽदृष्टवेत्ता कर्तव्यग्रंथभाविवार्तादर्शीनिगूढभावः। एम॰
सुतरांयशःसुखमतिः अतिशयितकीर्तिजन्यसुखेमतिर्यस्यसः प्रयोजनगर्भमिदंविशेषणं यशोऽन्यस्यार्थमितिभावः ॥ २
कीदृशंतत् श्रीहर्षदंश्रियंहर्षंचददातितत् शुभायनपदं शुभायनानांशुभजातकानांआनंदसिद्धिसदनादीनांपदंस्था

CC-0. In Public Domain. Digitization by eGangotri

ननु सत्कवीनां हर्षप्रदं जातकं तस्मादत आह भूयांस इति भूमौ यद्यपि काव्यगुंफे गद्यपद्यरचनायां निजमतिरचनाशालिनः॥
निजधिया या काव्यरचना तया शालंते ॥ ते भूयांसः निपुणाः संख्यावंतः कवयः संति तथापि प्रचुरपरगुणानंदलीलां भ
जंते प्रकृष्टपरगुणानुभवजन्यानंदलीलां भजंते उद्दहंतीति नोपेक्षं तदुरसर्थः परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि वि
कसंतः संति संतः किं यत इत्युक्तत्वात्कृत्सानुपरगुणानुभवजन्यप्रमोदे एतेषां लीलेति भावः उक्तमर्थमर्थांतरन्यासेन द्र
ढयति चंचद्गांभीर्यं च पद्मा च विबुधविटपिनश्च चंचद्गांभीर्यपद्मा विबुधविटपिनः चंचंतो द्योतमानाः गांभीर्यादयश्च ए

भूयांसः संति भूमौ निजमतिरचनाशालिनः काव्यगुंफे संख्यावंतस्तथापि प्रचुरपरगुणानंदलीलां भजं

ते। चंचद्गांभीर्यपद्माविबुधविटपिनां जन्मसंप्राप्तिनूनं मर्यादां न स्वकीयां त्यजति किल महान्रत्नधा

तेषां जन्मसंप्राप्तिः आश्रयोपि रत्नधामापि रत्नगृहमपि सरस्वान्समुद्रः स्वकीयां ११ मा सरस्वान् ४ ॥
मर्यादां स्थितिं न त्यजति किं तथैव कवयोपि प्रमोदे रज्यंतीति भावः॥ गांभीर्यं निश्चलता पद्मा लक्ष्मीः विबुधविटपी पारि॥
जातः अत्र रत्नधामेति पदं चिन्त्यं धामशब्दस्य नपुंसकलिंगत्वात् अत्र तत्पुरुषसमासे परवल्लिंगं द्वंद्वतत्पुरुषयोरित्य
नुशासनेन रत्नधामेति नपुंसकांतत्वस्यादंतत्वात् अतो रत्नधामांबुदत्त्वानिति पाठः समीचीनः॥ ४ ॥ ॥ ४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्या०लं० अथतन्वादीनांसामान्यविशेषसंज्ञाः कथयतेयावदध्यायं आदौतावल्लग्नादीनांदेहादिसंज्ञाः तेषांसर्वेषांभावसंज्ञांचशार्दू
३ लविक्रीडितेनाह देहोद्रव्यपराक्रमाविति लग्नतः ल्यप्लोपेपंचमी। लग्नमारभ्यक्रमेणदेहादयोद्वादशभावाः गदिताः उक्तास्त
त्रलग्नंदेहोदेहभावः द्वितीयतृतीयौद्रव्यपराक्रमौ द्रव्यपराक्रमभावौ चतुर्थपंचमौभावौ सुखसुतौ षष्ठःशत्रुः सप्तमभावः
कलत्रं अष्टमोमृतिः नवमोभाग्यः दशमंराज्यपदं एकादशद्वादशौलाभव्ययौलाभव्ययनामकौतत्रतेषुदेहिनांदेहः सौख्य
शरणंसुखाश्रयः मतः अतोबुधैः ज्योतिर्विद्भिस्तस्माद्देहादेवलग्नभावादेवशुभाशुभाख्यफलजोनिर्णयोवक्ष्यमाणप्रका

देहोद्रव्यपराक्रमौसुखसुतौशत्रुःकलत्रंमृतिर्भाग्यंराज्यपदंक्रमेणगदितालाभव्ययौलग्नतः भावाद्वादश।
तत्रसौख्यशरणंदेहोमतिर्देहिनांतस्मादेवशुभाशुभाख्यफलजःकार्योबुधैर्निर्णयः ५ लग्नंमूर्तिस्तथांगंत
नूदयवपुःकल्यमाद्यंततःस्वंकोशार्थाख्यं कुटुंबंधनमथसहजंभ्रातृदुश्चिक्यसंज्ञं अंबापातालतुर्यं।
हिबुकगृहसुहृद्वाहनंयानसंज्ञंबध्वाख्यंचांबुनीरंजलमथतनयंबुद्धिविद्यात्मजाख्यम् ६ ॥ रेणकार्यः ५ लग्न राम०

मिति लग्नंमूर्त्यादिशब्दवाच्यमितिमुनयःऊचुरितितृतीयेनान्वयः मूर्तिः अंगंतनुरुदयः वपुः कल्यमितिसमाहारःउदयः॥ ३
वपुःकल्यमाद्यंतन्वादयोलग्नपर्यायाः इतिप्रथमभावः ततोनंतरं धनंस्वंकोशार्थाख्यंकोशश्चार्थश्चकोशार्थौ आख्याय।
स्यसतथातं धनंस्वादिसंज्ञमूचुरित्यन्वयः एवमग्रेपि सहजंभ्रातृदुश्चिक्यसंज्ञंतृतीयभावः अंबापातालतुर्यंहिबुकगृह

सुहृद्वाहनं यानसंज्ञं याननामकम् एवं बंधुवर्गं बंधुसंज्ञं अंबु नीरं जलं एते चतुर्थभावस्य पर्यायाः इति भावः अथ तनयं बुद्धिवि
द्यात्मजाख्यं वाक्स्थानं पंचममित्यग्रिमेण संबंधः स्यात् पंचमभावस्यैते पर्यायाः ॥ ६ ॥ वाक्स्थानमिति अथ षष्ठं रिपुद्वेषवैरिक्ष
ताख्यमूचुः रिपुद्वेषवैरिक्षतनामकमित्यर्थः अथ सप्तमं जामित्रमस्तं स्मरमदनमदद्यूनकाभिधानमूचुः सप्तमं जामित्रास्तं
स्मरमदनादिनामकमित्यर्थः अथाष्टमं रंध्रमायुश्छिद्रं निधनलयपदं मृत्युं अष्टमं रंध्रादिनामकमित्यूचुः अतो नवममिह शा

वाक्स्थानं पंचमं स्यात्तनुजमथ रिपुद्वेषवैरिक्षताख्यं षष्ठं जामित्रमस्तं स्मरमदनमदद्यूनकामाभिधानं
रंध्रमायुश्छिद्रयाम्यं निधनलयपदं चाष्टमं मृत्युरन्यद्दुर्वाख्यं धर्मसंज्ञं नवममिह शुभं स्यात्तपोमार्गसंज्ञं ७ =
तातान्नामानकर्मास्पदगगननभोव्योममेषूरणाख्यं मध्यं व्यापारमूचुर्दशममथ भवं चागमं प्राप्तिमायं
इत्थं प्राप्त्यांतिमाख्यं सुनयद्दहनतो द्वादशं रिःफमाहुर्गर्भाद्यं बुध्वा प्रवीणैर्यदधिकममुतः संज्ञया तस्य

स्तेगुर्वाख्यो नर्मसंज्ञं शुभं तपोमार्गसंज्ञमूचुः ॥ ७ ॥ तातेति अथ तनोर्दशमं तातादिनामकमूचुरिति आज्ञामानं आज्ञानामकं कर्म आ
स्पदं गगनं नभो व्योम मेषूरणम् मध्यम व्यापारमूचुरिति स्फुटा व्यक्तिः अथ भवं एकादशं आगमं प्राप्तिं आयमूचुः इत्थमुक्तं तनो द्वाद
शं प्राप्त्यांतिमाख्यं अंत्यनामकं अंतिमं रिःफं चाहुः यदमुतः प्रोक्तात्पर्यायसमुदायात् अधिकं दृश्येत तस्य तस्य यत्नालाभोक्तं नाम
संज्ञया पर्यायं बुध्वा तत्तुल्यार्थं शुद्धं प्रवीणैर्गर्भाद्यं यथा वित्तशब्देन तुल्यार्थं धनं सहोत्थेन सहजभावो गम्यत्वमिति ॥ ८ ॥ ८ ॥

CC-0. In Public Domain. Digitization by eGangotri

जा०लं० आद्यमिति इह शास्त्रे बुधैः आद्यं चतुर्थं सप्तमं दशमं केंद्रमुक्तं परतः कंटकाख्यं चतुष्टयं च स्यात् चतुष्टयमेव चातुष्टयं पंचमं न
४ वमं त्रिकोणमुक्तं मत्सुलाभात्मजार्थं अष्टममेकादशं पंचमं द्वितीयं पणफरमुक्तं नवमं द्वादशं षष्ठं सहजं आपोक्लिमसंज्ञं उदितं वै
रिरिःफाष्टमाख्यं षष्ठद्वादशाष्टमं त्रिकमुक्तं ९॥ अथ मित्रशत्रूनेकेन शार्दूलविक्रीडितेनाह चन्द्रेति चंद्रेज्यक्षितिजादयः अ
र्कादेः सुहृदः बुधादयः समाः अन्ये वैरिणः मताः मुनिभिरिति शेषः सूर्यस्य चन्द्रेज्यक्षितिजाः सुहृदः मित्राणि बुधः समः।

आद्यं तुर्यं कलत्रं दशममिह बुधैः केन्द्रमुक्तं त्रिकोणं पुत्रं धर्माख्यमुक्तं पणफरमुदितं मत्सुलाभात्मजार्थं ॥
धर्मं चापोक्लिमाख्यं व्ययरिपुसहजं कंटकाख्यं हि केन्द्रं चैतच्चातुष्टयं स्यात्त्रिकमिह गदितं वैरिरिःफान्तका॰
ख्यं ॥९॥ चन्द्रेज्यक्षितिजा रवीन्दुतनयौ गुर्विन्दुसूर्याः क्रमाच्छुक्रार्कौ रविचंद्रभूमितनया ज्ञार्कौ सितज्ञौ
मताः॥ अर्कादेः सुहृदः समा अथ बुधः सर्वे च शुक्रार्कजौ भौमाचार्ययमा यमः कुजगुरू पूज्यः परे वैरि

शुक्रशनी शत्रू रविबुधौ चन्द्रस्य मित्रे सर्वे अन्ये समाः गुर्विन्दुसूर्याः भौमस्य मित्राणि शुक्रशनी समौ बुधः शत्रुः शुक्रसूर्यौ ॥ राम०
बुधस्य मित्रे भौमगुरुशनयः समाः चंद्रः शत्रुः रविचन्द्रभौमाः गुरोर्मित्राणि शनिः समः बुधशुक्रौ शत्रू बुधशनी शुक्रस्य मित्रे॰ ४
कुजगुरू समौ रविचन्द्रौ शत्रू सितज्ञौ शनेर्मित्रे गुरुः समः रवीन्दुभौमाः शत्रवः ॥ १० ॥ ॥१०॥ ॥१०॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ दृष्टीः दृष्टीर्वृत्तेनाह ॥ तृतीयेति ॥ ग्रहस्तृतीयदशमादिषु चरणवृद्धितः पश्यति तत्र तृतीयदशमे चरणदृष्ट्या पश्यति नवमपं
चमे हि चरणदृष्ट्या पश्यति अष्टांबुनि अष्टमचतुर्थे चरणदृष्ट्या पश्यति स्मरगृहं सप्तमं चतुश्चरणदृष्ट्या पूर्णं पश्यतीत्यर्थः तृती
यदशमे शनिः नवमपंचमे गुरुः चतुर्थाष्टमे भौमः पूर्णदृष्ट्या पश्यतीति जातकांतरे सविशेषो ज्ञेयः इमे कुजादयो मेषतः मेष
मारभ्य भवनपाः राशीशाः मित्रस्य कुज इत्यादि ॥ ११ ॥ अध्यायं समापयन्नित्याशालिन्याह हृद्यैरिति श्रीगणेशेन विहिताउत्त।

तृतीयदशमे ग्रहो नवमपंचमे ष्टांबुनि क्रमाच्चरणवृद्धितः स्मरगृहं ततः पश्यति कुजः सितबुधौ शशी र
विबुधौ सितक्ष्मासुतौ गुरुर्यमशनी गुरुर्भवनपा इमे मेषतः ११ हृद्यैः पद्यैर्गुंफिते सूरितोषे लंकाराख्ये =
जातके मंजुलेऽस्मिन् संज्ञाध्यायः श्रीगणेशेन वर्यैर्वृत्तैर्दिग्भिः संयुतोयं प्रणीतः १२ इति जातकालं =
कारे प्रथमाध्यायः १ शुकाननसरोरुहाद्गलितमत्र भूमीतले फलं परमसुंदरं सकलमाकलय्याधु =

श्रीविशिष्टेन गणेशेन अलंकाराख्ये अलंकारनामके मंजुले रुचिरे हृद्यैः पद्यैर्गुंफिते मनोहरैः श्लोकैः रचितेऽस्मिन्नंथे वर्यैः श्रेष्ठैः।
दिग्भिः दशभिः श्लोकैः अयं आदिमः प्रथमः संज्ञाध्यायः प्रणीतः उक्तः रचित इत्यर्थः १२ इति श्रीजातकालंकारटीकायां प्रथमो।
ध्यायः १ ॥ अथ भावाध्यायो व्याख्यायते ॥ कविः स्वविनयं विशदयन् भावफलं वक्तुं दृष्टो वृत्तेन प्रतिजानीते ॥ शुकेति ॥ १
शुकाननसरोरुहाद्गलितः अहं तत् अनुभावतः ततः आरभ्य तत्फलं जातकफलं अधुना ब्रवीमि हे बुधाः पंडिताः अत्र वचने मम प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰लं॰ किमपिचापलंस्यात्तद्यूयंक्षमध्वं इतिप्रार्थना किंकृत्वा ब्रवीमि अत्रभूमितलेशुकाननसरोरुहात् शुकमुखाग्विंदाद्गलितं·
५ शिष्यप्रशिष्यद्वाराप्राप्तंपरमसुंदरंसकलंफलं आकलय्यविचार्य कथंभूतंफलं प्रवरदैवविदांसतां परं उत्कृष्टज्योतिर्विदा
नंददं अन्यत्रोक्तमन्यतोग्राह्यमितिन्यायेनप्रथमंग्रहभावस्पष्टतातेषांवलंचज्ञातव्यं ततोभावसामान्यफलांतरं शुभपापता
मित्रग्रहदृष्टियोगादिकंभावषड्वर्गाः भावेशास्तोदयास्तादिकंज्ञातव्यं तदुक्तं पृथुयशसा योयोभावःस्वामिदृष्टोयुतोवासौम्यै।
र्वास्यात्तस्यतस्यास्तिवृद्धिः पापैरेवंतस्यभावस्यहानिर्निर्दिष्टव्याप्रसूतितोजन्मतोवा तत्रविशेषोगर्गजातके नीचस्थोरिपुगेह।
स्थोग्रहोभावविनाशकृत्॥उदासीनोग्रहोमध्येमित्रंस्वक्षेत्रकोणगः॥स्वोच्चस्थश्चग्रहोप्येवंभाववृद्धिकरःस्मृतः व्ययाष्टषष्ठभा

॥ब्रवीमितनुभावतःप्रवरदैववित्तोषदंयदत्रममचापलंकिमपितत्क्षमध्वंबुधाः १॥

वेषुविपरीतफलमाह उशनाचार्यः सौम्याःपुष्टिंपापाविपर्ययसंश्रिताग्रहाःकुर्युः मूर्त्यादिषुनिधनांत्यरिपुभावेषुतत्क्रमात्फलदाः॥ राम॰
अन्यच्च॰ सौम्यवर्गाश्रिताभावाःशुभतांप्राप्नुवंतिहि पापवर्गाधिकानेष्टास्तत्वाद्यानात्रसंशयः लग्नलग्नादिपोस्यातांवलाधिकतरौ ५
यदि तत्फलानांप्रवृद्धिःस्याद्धीनोहानिकरःस्मृतः एवंभावेषुसर्वेषुभावभावेशयोर्वलात् ततोजनुषिवक्ष्याहानिर्वृद्धिश्चको
विदैरिति सर्वार्थचिन्तामणौ लग्नादिभावाद्रिपुरंध्ररिःफेपापग्रहास्तद्भवनाद्विनाशः सौम्यास्तुतेपुष्कलफलप्रदाःस्युस्तत्वादिकानां

फलमेवमाहुः यद्भावनाथौ रिपुरंध्ररिःफे दुःस्थानयो पद्भवनस्थितो वा तद्भावनाशं कथयंति तज्ज्ञाः शुभेक्षिते तद्भवनस्य सौख्यमु॰
तत्तद्भावात्रिकोणे वसुखमदनभे चास्य देसौम्ययुक्ते पापानां दृष्टिहीने भवनपसहिते पापखेटैरयुक्ते भावानां पुष्टिमाहुः स्तथच
शुभकरीमन्यथात्वे प्रणाशं मिश्रैर्मिश्रैर्गृहेन्द्रैः सकलमपि तथा मूर्तिभावादिकानामिति १ अथ त्रिभिः श्लोकैस्तनुभावविपर्ययमा
ह देहाधीशेति देहाधीशः लग्नस्वामी क्रूरस्तनः पापग्रहेण युक्तः व्ययरिपुमृतिगः द्वादशषष्ठाष्टमान्यतमस्थानगतश्चेत्तदा ज्ञा
तस्य देहसौख्यं न स्यात् अस्य योगस्य धनादिभावे विचार्यत्वाद्योतनाय प्रथममुक्तिरिति गम्यते यद्भावनाथे रिपुरंध्ररिःफे तद्भावना

देहाधीशः सपापो व्ययरिपुमृतिगश्चेत्तदा देहसौख्यं न स्यात् जंतोर्निजर्क्षे व्ययरिपुमृतिपस्तत्फल
स्यैव कर्ता ॥ मूर्तौ चेत् क्रूरखेटस्तनुतनुपतिः स्वीयवीर्येण हीनो नानातंकाकुलः सन् व्रजति हि मनु

शंकथयंति तज्ज्ञाः इति माकुलिखितत्वात् अन्यदाह व्ययेशो व्यये षष्ठेशः षष्ठे ग्र ॥ जोव्याधिमाधिमकोपं २ ॥
ष्टमाधीशोष्टमे च तत्फलस्यैव कर्ता देहसौख्याभावकर्ता स्यात् अयमर्थोपि वनमतेन विरुद्धो यथा वृहज्जातके रिपुभवनपे रिपु।
स्थेनारुग्वैरी सुखी कृपणः निधनपतौ निधनस्थे व्यवसायी व्याधिवर्जितोऽप्युदितः विरोधशमनाय अयमर्थो बोध्यः देहा
धीशे व्ययरिपुमृतिगे सति तद्भवनगे पितत्रस्थे शुभफलं स्यादिति न वाच्यं पूर्वोक्तयोगे सति व्ययरिपुमृतिपः स्वभवनगतश्चेत्तत्फल
स्यैव कर्तेति वाच्यम्॰ योगानामचिंत्यफलत्वादिति अथान्ययोगमाह मूर्ताविति मूर्तौ लग्ने तनुपतिः क्रूरग्रहः क्रूरखेटः लग्नेशः॥

CC-0. In Public Domain. Digitization by eGangotri

जा० लं० स्वीयवीर्येण हीनः स्वकीयबलरहितश्चेत्तदा जातो मनुजः नानातंकाकुलः अनेकरोगाकुलः व्याधिं रोगं आधिं मकोपं चिंताव्याप्तत्वं
६ व्रजति प्राप्नोति निर्बलत्वं रिपुगृहं नीचास्ता दिभिर्ज्ञेयं तदुक्तं जातकाम्भोजे स्वोच्चं मूलत्रिकोणं स्वगृहमधिसुहृद्गेहकं मित्रकं
स्यादौदासीनं स्वमसौरिपुभवनमधिरिपोर्भं च नीचाभिधानं पूर्वे पूर्वे बलीयः परमपरमिदं हीनसत्त्वं तदस्मादित्यादि वित्यपद्धति
प्रकारमतेन उत्तमबलत्वं समत्वं हीनबलत्वं च ज्ञेयं अस्तेबले हीनबल इति पद्धतिवचनात् ॥ २॥ ॥ अथ शुभयोगानाह ॥
अंगाधीशः लग्नेशो लग्ने चेद्दिस्थे कोयोगः ॥ बुधगुरुकविभिर्युक्तो लग्नेशः केन्द्रग इति द्वितीयः स्वीये तुंगे स्वोच्चे अजवृष

अंगाधीशः स्वगेहे बुधगुरुकविभिः संयुतः केन्द्रगो वा स्वीये तुंगे स्वमित्रे यदि शुभभवने वीक्षितः
सत्वरूपैः स्यान्नूनं पुण्यशीलः सकलजनमतः सर्वसंपन्निधानं ज्ञानी मंत्री च भूपः सुरुचिरनयनो
मानवो मानवानाम् ३ ॥ ११ मम्कगंगनाकुलीराझषवणिजोचदिवाकरादितुंगा इत्याद्युक्तेः स्वभिन्ने स्वमित्रगृहे राम०
अथवा शुभभवने शुभगृहे शुभग्रहैः वीक्षितः लग्ने श इति तृतीयः एषमन्यतमयोगे जातो मानवः मानवानां मध्ये भूपादिकः ६
स्यात् भूपः भूपालः मंत्री अमात्यः सर्वसंपन्निधानं सर्वसंपदाश्रयः ज्ञानी भूपत्वाद्युपयुक्त ज्ञानवान् सत्वरूपः सत्वगु
णानुरूपः अतस्य पुण्यशीलः सुकृती रुचिरनयनः सुंदरनयनादि शरीरः सकलजनमतः सर्वजनमान्यः पुण्यशीलशब्दे
न सत्यार्जवादि द्योत्यते तदुक्तं जातकरहस्ये यः सात्विकस्तस्य दया स्थिरत्वं सत्यार्जवं ब्राह्मणदेवभक्तिरिति ० ॥ ३ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथानिष्टयोगत्रयं श्लोकेनाह मेषादिकृते लग्ने क्रूरग्रहराशौ लग्नेशः स्थितः अयं एको योगः पुष्पवंतौ रवींदू क्रूरयोर्ग्रहयोर्मध्यस्थौ०
क्रूरमध्यस्थौ क्रूरमध्यत्वं एतयं शापेक्षणा वाज्ञेयं संकोचे प्रमाणाभावात् अयं द्वितीयो योगः अथ दिनपनिशानाथयोः सूर्यचन्द्रमसोः
द्यूनयायी सप्तमगः भौमः बुधः पश्चादुदयं अधिगतः पश्चोदयराशौ स्थित इति तृतीयो योगः अत्र जातः पुरुषः मनस्वी प्रशस्तम
नाडूस्यर्यः अंधः दुष्टकर्मा परभवनरतः परगृहवासरतः परस्त्रीरतो वा स्यात् ॥ क्षीणकायः क्षीणशरीरः मनस्वित्वं कालग
तचंद्रस्य वलत्वे वोध्यं एवं तनुभावस्य शुभाशुभयोगाः उक्ताः नतु क्वचिच्छुभयोगेपि शुभफलं नोपलभ्यते तथा अशुभयोगे·

लग्ने क्रूरे यथा पातेरवलस्वचरगृहे लग्ननाथे रवींदू क्रूरांतस्थान संस्था वथ दिनपनिशानाथयो

र्द्यूनयायी ॥ भूमीपुत्रस्तु पश्चादुदयमधिगतश्चन्द्रजश्चेन्मनस्वी स्यादंधो दुष्टकर्मा परभवन

रतः पुरुषः क्षीणकायः ॥ ४ ॥ ॥ ४ ॥ ॥ ११ शुभफलमिति ॥ तत्र कोविशेष इति चेत्सत्यम् ॥ क्रूरग्रह
दृष्टयुतत्वादियोगेनायं भावः ॥ शुभयोगकारकग्रहा परिक्रूरदृष्टास्तत्राश्रनिष्टप्राप्तं फलं नोपलभ्यते ॥ अशुभयोगके तरिग्र
होपरि शुभदृष्ट्या शुभं फलं नोपलभ्यते ॥ ताजिककारैरित्थं शालस्य दृष्टिप्रयुक्तमणऊं योगेन भंजतं कृतमुक्तम् ॥ दृहज्जातक
कारेण न शुभाउदिता योगा यथा भवंति शुभेक्षिताइत्युक्तम् ॥ इति तनुभावः ॥ ॥ ४ ॥ ॥ ः ॥ ॥ ४ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा॰लं॰ ॥ अथ धनभावफलं श्लोकद्वयेन ब्रुवन् प्रथमेन योगचतुष्टयमाह कोशाधीश इति   कोशाधीशः धनेशः गुरुयुतः स्वराशौ स्वभावे
७ केंद्रे वा चेत्तदा जातः स सर्वसंपत्प्रदः स्यात् अथानंतरमन्ययोग उच्यते इत्यर्थः गुरुयुतो धनाधीशः त्रिकेषु षष्ठाष्टमद्वादशेषु अन्य
तमे चेज्जातो मनुजः क्लेशभाक् द्रव्यहीनश्च स्यात् सगुरुः धनाधीशः षष्ठे चेदयं योगः शिथिलो ज्ञेयः तं प्रति चाल्पधनयोगस्य ।
द्भावात् धनाधीशस्य शुभत्वेन मध्यमधनयोगसद्भावात् तदुक्तं बृहज्जातके लग्नादतीव वसुमान् शशांकात्सौम्यग्रहैरुपचय

कोशाधीशः स्वराशौ सुरगुरुसहितः सर्वसंपत्प्रदः स्यात्केंद्रे वाथ त्रिके चेद्भवति हि मनुजः क्ले
शभाक् द्रव्यहीनः ॥ स्वांत्याधीशौ त्रिकस्थौ कवितनुपयुतौ स्यात्तदा नेत्रहीनश्चन्द्रः पापेन युक्तो
धनभवनगतः शुक्रयुक् नेत्रहीनः ॥ ५ ॥ शुक्रः सेन्दुस्त्रिकस्थो जनुषि निशि नरः प्राप्नुयाद् धक
त्वं जन्मांधः सार्कशुक्रस्तनुभवनपतिः स्यात्तदानीं मनुष्यः ॥   ॥ ९ गतैः द्वाभ्यां समोल्पवसुमान्यत्तदूनतायां राम॰

अन्येषु सत्स्वपि फलेष्विदमुत्कटेन अथान्ययोगः स्वांत्याधीशौ द्वितीयद्वादशाधीशौ शुक्रलग्नेशयुक्तौ चेत्तदा जातः नेत्रहीनः ७
अंधः स्यात् अथान्ययोगः शुक्रपापाभ्यां युक्तश्चन्द्रो धनस्थश्चेत्तदा जातो नेत्रहीन इति ॥ ५ ॥ अन्ययोगत्रयं तत्र द्वितीययोगस्य तात्ता
दिघनिदेशं चाह जनुषि जन्मसमये सेंदुः सचंद्रः शुक्रः त्रिकस्थः षष्ठाष्टमद्वादशेषु अन्यतमे चेत्तदा जातो मनुजः निशि अंधकत्वं
प्राप्नुयात् निशांधः स्यात् सार्कशुक्रः सूर्यशुक्रयुतो तनुभवनपतिः लग्नेशः त्रिकस्थ इत्यनुषंगः तदानीं जातो मनुजः जन्मान्धः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जन्मनैवांधः स्यादिति तातादीनांस्थाननाथाः एवंपूर्वोक्तप्रकारेणसार्केंदुशुक्रा अन्विकस्याश्चेत्तदानीतेषांतातादीनां अंधकत्वंप्रवरम
तिपुत्रैरादेश्यंवक्तव्यं तत्रतातःपिता अनुजःकनिष्ठभ्राता अंबामाता निजगृहिणीभार्याप्रवरमतिशब्देनतातादीनांजन्मन्यपि अंध
योगेज्ञानलंसस्यते इतिधनभावः॥ ६॥ अथभ्रातृसंभवंतत्सुखादियोगानाह भ्रातृस्थानेशभौमौतृतीयाधिपतिभौमौव्ययरिपुनि
धनस्थानगौ १२।६।८ त्रिकस्थौयदितदाजातःवंधुहीनः सामान्यशब्दनिर्देशेनसहोदरबंधवोविवक्षितास्तैरहितइत्यर्थः सहजभ
एवंतातानुजांबासुतनिजगृहिणीस्थाननाथाःस्थिताश्चेदादेश्यंतत्रतेषांप्रवरमतिपुत्रैरंधकत्वं
तदानीं॥६॥भ्रातृस्थानेशभौमौव्ययरिपुनिधनस्थानगौबंधुहीनःस्वक्षेत्रेसौम्यदृष्टेसहजभवन
पेमानवःस्याच्चेत्तद्वान्॥केन्द्रस्थेबंधुसौख्यंशुभविहगयुतेस्याददभ्रंनराणांपापैश्चेदन्यथेतत्तदनु
निजधियाज्ञेयमित्थंसमस्तम्॥७॥ ॥ एवमेपेसहजाधिपेस्वक्षेत्रेस्वगृहेसौम्यदृष्टेशुभगृहदृष्टेस्तिमानवः।
तद्वान्बंधुवान्स्यात् सहजाधिपेशुभग्रहयुतेकेन्द्रस्थे अदभ्रंबहुबंधुसौख्यंस्यात् केंद्रस्थेसहजभवनपेपापग्रहैर्युतश्चेद।
न्यथाबंधुसौख्यंनस्यात् युतेदृष्टेइत्युपलक्षणंइत्थं अमुनाप्रकारेणबुद्धिमद्भिर्निजधियास्वबुद्ध्यासमस्तंभावफलंतदनुयोगो
विचारानन्तरंज्ञेयं अयमर्थः योगेसत्यपिवागकर्तृशुभूयसीपापदृष्टिःपापयोगःयोगकर्तॄणांनीचास्तादियोगेप्राग्युक्तंलक्षणंनस्या

CC-0. In Public Domain. Digitization by eGangotri

अथ चतुर्थभावफलं वदन् योगचतुष्टयमाह॰ पातालेशः चतुर्थेशः स्वराशौ शुभखचरयुतः शुभगेहयुक्तः सन्भाग्यपेन भाग्यस्वा
मिना युक्तश्चेज्जातः सामंतः स्यात् मांडलिकः स्यात् ततो योगानंतरं लग्नस्थः वाहनेशो गुरुणा पूर्णदृष्ट्या दृष्टश्चेत्तदा जातः राजपू
ज्यः राजकृतसन्मानभाजनं स्यात् तद्वद् गुरुदृष्टः सुखेशः लाभगश्चेत् यद्वा गुरुदृष्टः सुखेशः यानं पश्यन्भवति तदा नराणाम
भिमतं वाहनानां निवहं समूहं प्रदत्ते इदं योगद्वयं वाशब्दप्रयोजकेपि ज्ञेयं अन्ययोगलाभाच्चतुर्थदृष्टिविरहात् योगप्रभावम

पातालेशः स्वराशौ शुभखचरयुतो भाग्यनाथेन युक्तः सामंतः स्यात्तनुश्चेत्सुरपतिगुरुणा वाहनेशः स्तनुस्थः
संदृष्टो राजपूज्यः स्तदनु च हिबुकाधीश्वरो लाभसंस्थो यानं पश्यन्नराणां निवहमभिमतं वाहनानां प्रदत्ते॥

८॥ स्वक्षेत्रे तुर्यनाथस्तनुपतिसहितः स्यादकस्माद्गृहाप्तिः सौहार्दं वा सुहृद्भिस्तदितरगृहगश्चेद्गृहाल
भ्ययोगः॥ यावंतः पापखेटा धनदशमगृहप्रांत्यपैश्चेत्त्रिकस्थास्तावत्प्रमाणाज्ज्वलनवशगताः।
संगात्॥ ८॥ अथ गृहप्राप्त्यादियोगानाह॰ लग्नेशसहितश्चतुर्थभावनाथः॥ स्वक्षेत्रे ११ क्लेशदाः सुगृहास्तनुः ८ ॥:
चतुर्थभवने चेत्तदा जातस्य अकस्मात् अप्रयत्नतो गृहाप्तिः गृहलाभः स्यात्॥ तथा सुहृद्भिः हितकारकैर्जनैः सौहार्दं प्रीतिमज्जन
युक्तं गृहादि स्यादित्यर्थः तनुपतियुक्तः चतुर्थनाथः॥ तदितरगृहगः चतुर्थभवनादन्यभवनस्थश्चेत्तदा गृहालभ्ययोगः गृहप्राप्त्य
भावः यावंतः क्रूरग्रहाः द्वितीयदशमचतुर्थेद्वादशनाथैः सहिताः त्रिकस्थाः तावंतो गृहाः जातस्य तु नरस्य वह्निवशगता द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्धाः अतएव क्लेशदाः स्युः अत्र धनेशादीनां चतुर्णां समुदितानामेकोयोगोनविवक्षितः त्रिकभवने योवाप्रांसस्तद्भावेसावकाशत्वात् ॥ ९ ॥ अथवाहनविरामयोगोतच्छांतिकरणं चाह क्रूर इत्यनुषंगः यावंतः पापग्रहाः वाहनस्थाः चतुर्थ स्थाः शुभविहगदृशंगोचरानोभवेयुः शुभग्रहदृष्टान्स्युः तावंतः नृणां परमगुणवत्तां प्ररूष्टगुणयुक्तानां वाहनानां विरामाः विनाशाः स्युः अथ द्वादशाष्टमगताः क्रूराः यावंत इत्यनुषंगः चतुर्थं पश्यंति चेत्तदा पंडितैस्तद्दैवदृष्टिक्रूरग्रहसंख्याप्रायत्त्वं वाहनानां विरामाः स्युरि

यावंतोवाहनस्थाः शुभविहगदृशांगोचरानोभवेयुस्तावंतोवाविरामाः परमगुणवत्तां वाहनानां

नृणां स्युः ॥ क्रूराः पश्यंति यानं व्ययनिधनगताश्चेत्तदानद्दैवप्राज्ञैरादेश्यमेषां खलु शुभकरणं

शांतिकं वाहनानां ॥ १० ॥ विद्यास्थानाधिपोवाबुधगुरुसहितश्चेत्त्रिके वर्तमानो विद्याहीनोनरः स्यात्

दथनवमनिजक्षेत्रकेंद्रेषु विद्वान् ॥ ॥ ११ स्यार्थः ॥ तत्रवाहनानां शुभकरणं शांतिकं प्राज्ञैः आदेश्यं विधेयमिति

विशेषः इति चतुर्थभावः ॥ १० ॥ अथ पंचमभावफलं निरूपयन्विद्याबुद्धियोगानाह ॥ ॥ विद्यास्थानाधिपः पंचमेशः केवलोवाबुधगुरुसहितोवात्रिके वर्तमानश्चेत्तदाजातोविद्याहीनः त्रिकस्थपंचमेशेबुधगुरुयोगेविद्यायाअनुकूलोनास्तीतिवाशब्देनद्योतितं अथ पंचमेशः पंचमनवमकेंद्रेषु स्थितश्चेत्तदाजातः विद्यावान् बुधगुरुयोगेविद्यावत्त्वं किमु तवक्तव्यमितिगम्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰लं॰ ९ अथजन्मकालेप्रश्नयोगकर्तृणांगगनसद्मग्रहाणांवालत्वंदृढतावायदितदाजातानांप्रश्नामांद्यं अल्पबुद्धिःस्यात् यदिवा
लोहढोवाग्नहःस्वदेनगः तदादोषहृत् प्रश्नामांद्यत्वप्रयोजकदोषंदूरीकुर्यादित्यर्थः ॥ ११ ॥ अथ मूकत्वसंतानाभावयो
गानाह वाक्स्थानेशःपंचमेशोगुरुर्वाव्ययरिपुविलयस्थानगः त्रिकस्थश्चेत्तदावाग्विहीनःमूकःस्यात् अथपित्रादिमूकता
योगमाह ॥ एवंप्रकारेणपित्रादिभावानांदशमभावादिराशीनांपतयस्ताभ्यांपंचमेशगुरुयुताः त्रिकेतिष्ठंतिचेत्तदापि

बालत्वंदृढतावायदिगगनसदांजन्मकालेतदास्यात्प्रज्ञामांद्यंनराणामथयदिविहगःस्वर्क्षगो
दोषहृत्स्यात् ॥ ११ ॥ वाक्स्थानेशोगुरुर्वाव्ययरिपुविलयस्थानगोवाग्विहीनश्चैवंपित्रादिकानांप
तयइहयुतामूकतास्यात्सुताभ्यां ॥ वागीशात्पंचमेशस्त्रिकभवनगतःपुत्रधर्मांगनाथारंध्रेद्वे ।
ष्यांतिमस्थायदिजनुषिनृणामात्मजानामभावः ॥ १२ ॥ ॥१२॥ ॥ १२ ॥ ॥ः॰ः॥

त्रादीनांमूकत्वंस्यात् आदिशब्दात् अनुजादयोज्ञेयाः ॥ अथजन्मनिजीवात्जीवाधिष्ठितराशेः पंचमेशः त्रिकस्थःपुत्रधर्मांग राम॰
नाथाः पंचमनवमलग्नेशाःजन्मलग्नात्त्रिकस्थाःयदिस्युः तदापुत्राणामभावोवाच्यः ॥ ॥१२॥ ॥ श्रीरामाय ॥ ९

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ संतानयोगमाह ॥ ते पुत्रधर्माङ्गनाथाः शुभखगसहिताश्चेत्तदा संतानोत्पत्तौ किंचित्कालं विलंबः स्यात् शुभग्रहमहादशान्तर्दशाव
लापेक्षया विलंब इति भावः अथ कर्कराशौ पंचमभावे चंद्रश्चेत्तदा कन्याप्रजावान् अथवाप्रमिततनयवान् स्वल्पापत्यः स्यात् अथ
देवेन्द्रपूज्यात् जीवात्पंचमस्थः क्रूरश्चेत् जीवोपि लग्नात्पंचमगस्तदापत्यहीनः संतानरहितः स्यात् यदि स्वगेहात्स्वराशितः पंचमे छा
यापुत्रः शनिश्चेत्तदा एकपुत्रः स्यात् अत्र संपूर्णदृष्ट्या शुभकृत्तस्य शनेः स्वराशेः पुत्रभवने दृष्ट्यानेकपुत्रयोगस्तदा रविभौमयोः स्वगे।

किंचित्कालं विलंबः शुभखगसहितास्तेथ कर्के सुतर्क्षे चंद्रे कन्याप्रजावानमिततनयवांश्चाथ देवेन्द्रपूज्यात् ॥
क्रूरश्चेत्पंचमस्थः सुतभवनगतः स्यात्तदापत्यहीनश्छायापुत्रः स्वगेहाद्यदि भवति सुते स्यात्तु रेकस्तदानीं १३ ॥
कुंभे चेत्पंच पुत्रास्तदनु च मकरे नंदनेप्यात्मजाः स्युस्तिस्रो भौमः सुतानां त्रितयमथ सुतादायको रौहिणेयः
इत्थं काव्यः शशांको जनुषि च गुरुणा केवलेनैव पुत्राः पंच स्युः केतुराह्वोः क्रियवृषभवने कर्कटे नो विलंबः १४

हात्पंचमस्थयोरेकपुत्रत्वं किमु सुतवत्क्ष्यमिति गूढोभिप्रायः १३ अथान्ययोगानाह नंदने पंचमे भावे कुंभे छायासूनुस्स्यादनुषंगः यदि
तदा पंच पुत्राः स्युः मकरे आत्मजाः तिस्रः मकरस्य स्त्रीराशित्वादिति भावः भौमे मकरे चेदित्यनुषंगः सुतानां त्रयं स्यात् अथ रौहिणेयः
बुधः पंचमे सुतादायकः कन्याप्रदः इत्थं शुक्रश्चन्द्रोपि पंचमे सुतादायकः एवं केवलेनान्यग्रहयोगरहितेन पंचमस्थेन गुरुणा पंच पुत्राः।
स्युः पंचमे मेषवृषे कर्के वा केतुराह्वोरेकतरे सति नो विलंबः संतानोत्पत्तौ प्रतिबंधो न भवतीत्यर्थः नो विलंब इत्यनेन सूचितं मकरकुंभादि

CC-0. In Public Domain. Digitization by eGangotri

जा॰लं॰ रिःफराशौपंचमेशनौमकरमंतरेणतत्रस्थेभौमेकर्क्यादिराशीन्विहायपंचमेराहौवाकेतौसंततेर्विलंबएवेति॥१४॥ननुकतिवर्षा॥
१० णिविलंबइत्याह पापग्रहोजीवोवाचतुर्थस्थःपंचमेषष्ठेवाचंद्रःभवतितर्हित्रिखगुणमितसमातुल्यःत्रिंशद्वर्षमितःप्रबंधःसंततेरित्य
नुषंगःप्रकृष्टोबंधः शुभग्रहदृष्ट्याविमुक्ताः यावंतःपंचमस्थाःक्रूरग्रहाःस्युःबलाधीनफलाःखगाइत्युक्तप्रकारैःस्थानदिग्गादिबल
रूपकैःकिंतद्दिति ध्येयंतावद्वर्षप्रमाणःसंततेर्निश्चयेनविलंबःस्यादित्यर्थः १५ अथप्रतिबंधकभंजकसंतानोपायमाह॥तत्प्राप्तिः

पापोवावासवेज्यःसुखभवनगतःपंचमेवाष्टमेवाशीतांशुःसंततेःस्यात्त्रिखगुणमितसमातुल्यएवप्रबंधः॥या
वंतःपापखेटास्तनयगृहगताःसौम्यदृष्ट्याविमुक्तास्तावद्वर्षप्रमाणोनियतमिहभवेत्संततेर्वाविलंबः १५ तत्प्रा
प्तिर्धर्ममूलातदनुबुधकवीशंकरस्याभिषेकाच्चंद्रश्चेत्तद्देवत्रिदिवपतिगुरुर्मंत्रयंत्रौषधीनां॥सिद्ध्यामंदार
सूर्यायदिशिखितमसीतत्रवंशेशपूजाकार्याम्नायोक्तरीत्याबुधगुरुनवपाःक्षिप्रमेवात्रसिद्धिः १६॥ १६॥

संततिप्राप्तिःधर्ममूलाश्रुतिस्मृतिविधिगतोधर्मःमूलंहेतुर्यस्याःसातथा आदित्यसप्तमीव्रतशंकराराधनसंतानगोपालमंत्रजप राम॰
हरिवंशश्रवणादिविहितधर्ममूलेतिभावः अत्रविशेषः तदनुतत्पश्चाद्बुधकवीविलंबप्रयोजकौचेत्शंकरस्याभिषेकाद्रुद्राध्या १०
योक्तमंत्रकरणाकाभिषेकात्तत्प्राप्तिरित्यनुषंगः चंद्रश्चेत्पूर्ववत्तत्रैवं गुरुश्चेत्तथातद्यंत्रौषधीनांसिद्ध्या सिद्धिशब्दःयंत्रादिभिः
प्रत्येकंसंबध्यते यंत्रसिध्याऔषधसिध्येतिमंत्राचरणेनयंत्रगंयोक्तानिमंत्राणिसंतानगोपालमस्युंजपादीनि औषध्यःलक्ष्मणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यास्तासां सिद्धिः विधिवदनुष्ठानसाध्यफलेत्यर्थः शनिभौमसूर्यराहूणां मध्ये कस्यचित्प्रतिबंधकत्वे तत्तद्वंशेशपूजा कुलदेवतापूजनं आम्ना
योक्तरीत्या कार्या आम्नायशब्दः वेदस्मृतिपुराणाद्युपलक्षणः तत्रापि विशेषः बुधगुरुनवमस्थानपाः प्रतिबंधकाश्चेदुमानुष्ठानात्तु शी
घ्रमेव सिद्धिः स्यादिति इति पंचमभावः १६ अथ रिपुभावफलं वक्तुकामस्तावत्त्व्रणरोगानाह पापग्रहयुते षष्ठेशे लग्नाष्टमगते सति
तुः मनुजस्य शरीरे व्रणाः स्युः इत्थमुक्तप्रकारेण जनित्र्यादिभावानामीशे पापयुक्ते तनुनिधनगते ते तेषां व्रणाः स्युः इत्यादेश्यं वक्तव्यं अंग

षष्ठेशे पापयुक्ते तनुनिधनगते तुः शरीरे व्रणाः स्यु स्त्वादेश्यं तज्जनित्रीजनकसुतवधूबंधुमित्रादिकानां इत्थं त
त्स्थानगामी शिरसि दिनमणिश्चानने शीतभानुः कंठे भूमीतनूजो हृदि शशितनयो वाक्पतिर्नाभिमूले १७ नेत्रे पृष्ठे
च शुक्रो दिनकरतनयः स्यात्पदे चाधरे वेत्केतुर्वासैंहिकेयस्तदनु तनुपतिर्भौमवित्स्वक्षेत्रसंस्थः आभ्यामालोकि
तः सन्नभवति हि कति चित्स्थानगो वा तदानीं नेत्ररोगी नरः स्यात्प्रवरमतियुतैर्होरिकैर्ज्ञेयमेवम् १८ ॥ १८ ॥

विशेषव्रणानाह तत्स्थानगामी तनुनिधनगतः षष्ठेशो दिनमणिः सूर्यश्चेत् शिरसि व्रणाः चंद्रश्चेन्मुखे भौमश्चेत्कंठे बुधश्चेत् हृदये वाक्प
तिश्चेन्नाभिमूले व्रणाः स्युः १७ शुक्रश्चेन्नेत्रमूले पृष्ठे च शनिश्चेत्पदे चरणे राहुः केतुर्वा अधरे व्रणाः स्युः इत्यग्रिमश्लोकेनान्वयः अथ
नेत्रव्याधियोगः तदनु भौमराशिस्थो लग्नेशः भौमबुधदृष्टः कतिचित्स्थानगोपि वा यत्र कुत्र वा स्यात्तदानीं जातः नेत्ररोगी स्यात् ०

ज्यो॰लं॰ अथान्ययोगः षष्ठभावाधिपे लग्नस्थे जातः शत्रुहंता स्यात् धनस्थे षष्ठेशे पुत्रात्तार्थः पुत्रेणात्तः गृहीतः अर्थो धनं यस्य स पुत्रहृतधनइ
११ त्यर्थः अतिदुष्टश्च स्यात् सहजभवनगे ग्रामस्य दुःखकरः नाभौ रोगी च स्यात् लग्नाष्टमपती षष्ठस्थौ ना पुरुषः नेत्ररोगी स्यात् अग्ने
वामेतरशब्दोपादानात् अत्र वामदृगिति गम्यते शुक्रः षष्ठे ष्टमे दृग्तरे दक्षिणनेत्रे रोगी शनिः षष्ठे चरणरोगी स्यात् १८ अथान्ययोगः रा
हुकेतू शत्रुभावे चेद्दंते दंतच्छदे ओष्ठे वा रोगी स्यात्॰ भौमबुधराशिस्थितो लग्नेशः स्वेन स्वशत्रुणा पूर्णदृष्टः यत्र कुत्रापि स्यात्तदा
षष्ठेशे लग्नयाते भवति हि मनुजो वैरिहंता धनस्थे पुत्रात्तार्थो तिदुष्टः सहजभवनगे ग्रामदुःखाकरः स्या १९
त्॥ नाभिस्थाने च रोगी तनुनिधनपती शत्रुभावस्थितौ ना नेत्रे वामेतरे स्याद सुरकुलगुरुः सूर्यजस्त्वंघ्रिरो
गी १८ दंते दंतच्छदे वा कुमुदपतिरिपुः संस्थितः षष्ठभावे केतुर्वा लग्ननाथः कुजबुधभवने संस्थितः
क्वापि दृष्टः॥ स्वेन प्रत्यर्थिना वा भवति जनुषि चेद्रासनार्धे स रोगस्तौ भूमी सूर्यपुत्रौ यदि रिपुगृहगौ तद्रु
आसनार्धे गुदसमीपे अर्धांगे वा रोगी स्यात्॰ यदि तौ भूमिसूर्यपुत्रौ भौमशनी रिपुगृहगौ षष्ठभावसंस्थौ चेत्तदा तद्भवः नुः ण्म॰
पुरुषस्य गदो रोगः स्यात् भूमिपुत्रे रुधिरविकारः शनौ वित्तरविकारः स्यादित्यर्थः॥ २०॥ ॥तथा पालेयांशोश्चंद्रे स्खलखग ११
सहिते पापग्रहयुक्ते शत्रुभावस्थे सति रोगवान् स्यात् क्रूरैर्निष्पीडिते शनिप्रभृतिभिः क्रूरग्रहैर्योगेन दृष्ट्या वा पीडितः तनुसद्मगतः

CC-0. In Public Domain. Digitization by eGangotri

लग्नगः तस्मिन् शीतकरस्थं दृष्टेत्तद्वान् रोगी स्यात् शुभग्रहदृष्टियुक्तः केन्द्रगः क्रूरश्चेद्रोगवान्स्यात् तस्मिन् क्रूरे शुक्रराशिसंस्थे कुजशुक्रगुरुभिर्न दृष्टे तद्वदेव रोगवानेव स्यात् अत्र यद्यपि विशेषो नोक्तस्तथापि योगकारकग्रहस्वामिकफवातपित्तादिकोप जन्यो विशेषरोगो ज्ञेयः ॥ २१ ॥ ॥ षष्ठेशे पुंराशिलग्ने स्वोच्चे वा पापग्रहेर्दृष्टे सति नराणाम् जातानाम् अंगे शरीरे अरिज

प्रालेयांशो रिपुस्थे खलखगसहिते मानवो रोगवान्स्यात्क्रूरैर्निःपीडितश्चेत्तनुसदनगतः शीतरश्मिस्तदा
नी॥ क्रूरे केन्द्रालयस्थे यदि शुभविहगैर्नेक्षिते रोगवान्स्यात्तस्मिन्काव्यालयस्थे कुजगुरुकविभिर्नेक्षिते त **टि० ११**
द्वदेव २१ पुंलग्ने स्वीयतुंगे रिपुभवनपतौ वीक्षिते सन्नभोगैरंगे नूनं नराणामरिजनवशतः स्याद्व्रणो गू
ढरूपः॥ रिःफस्थाने स्थिते चेद्रिपुसदनपतौ सिंहिकापुत्रयुक्ते किंवा सप्ताश्वयुक्ते परगृहवसतिर्नीचवृत्तिः

नवशत्रुः शत्रुजनकारितः गूढरूपः प्रच्छन्नः गदो रोगः स्यात् अत्र ग्रहतुंगराशीनां प्रायः स्त्रीराशित्वात् पुंलग्ने वा शब्दप्रयोगे भिन्न एव योगो ज्ञायते षष्ठेशे राहुयुक्ते यद्वा सूर्ययुक्तः द्वादशे वा स्थितः तदा जातः नरः परगृहवासी नीचवृत्तिश्च स्यात् ॥ २२ ॥ अथ सप्तमभावफलं निरूपयिष्यन् विवाहयोगमाह॥ यावंतो धिकृवलाग्रहाः सप्तमस्याः सप्तमेशेन दृष्टाः तावंतो विवाहाः नु :

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुरुषस्य ज्ञेयाः सुमतिमता जन्मलग्नाभिज्ञेन दैवज्ञेन एवमुक्तप्रकारेण कुटुंबे जनकभ्रात्रादौ ज्ञेयं होराग्रमज्ञैर्जातकशास्त्रविद्भिरधिक
बलवत्तां ग्रहाणां बलयोगाद्विचारः कार्यः तत्राधिकबलं रविविधुकुजबुधा रविस्सूर्य चंद्रभौमानां अंगदिकुशैलसंख्यमादेश्यं सूर्यस्य
षड्रूपाणि चंद्रस्य दशरूपाणि भौमस्य सप्तरूपाणि ग्रस्येषां षड्रूपाण्येव ग्रंगरूपाधिकोबलीति पद्धतिवचनात् ॥ २३ ॥ गृहिणीकार
काः सप्तमभावे शुभग्रहाः शुक्रेंदुजीवशशिजैः सकलैस्त्रिभिर्वाद्वाभ्यां कलत्रभवने च तथैकेकेन एषां गृहेपि च गणोपि विलोकि
यावंतो वा विहंगा मदनसदनगास्तेन्निजाधीशदृष्टास्तावंतो नुर्विवाहास्त्वथ सुमतिमता ज्ञेयमित्थं कु
टुंबे ॥ कार्यो होराग्रमज्ञैरधिकबलवत्तां खेचराणां हि योगादादेश्यं तत्र वीर्यं रविविधुकुजवा मंगदिकुशै
लसंख्यं २३ केंद्रस्था वा त्रिकोणे यदि खलु गृहिणीकारकाख्यान भोगाः कामार्थेशो निजर्क्षे परिणयन विधिः
स्यात्तदानीं तुरेकः ॥ जायाधीशः कुटुंबाधिपतिरपि सुतस्थे त्रिके गर्हितारव्येर्यावद्भिः शुक्रयुक्तो नियतमिह भ
त्तेवाः संति स्त्रियो मदनभावपतिस्वभावा इति कल्याणवर्मवचनात् ॥ ११ केंद्रादृत्तीनां विरामः ॥ ॥ २४ ॥ ॥
एतेकेंद्रस्थाः वा स्त्रिकोणेसु तथा सप्तम द्वितीयपतीस्वभवने स्यातां तदा जातस्य नुः पुरुषस्य परिणयनविधिः ॥ विवाह एक
कः स्यात् सप्तमभावाधीशः द्वितीयाधिपो वा शुक्रयुक्तः यावद्भिः क्रूरग्रहैर्दृष्टः सहितः त्रिके स्यात् तावतीनां स्त्रीणां वि

॥ अथगर्भाभावयोगानाह ॥ सप्तसप्तौ स्वर्क्षे लग्नस्थे शनौ सप्तमस्थे एको योगः अथ स्वर्क्षे शनौ सप्तमे गुरुदृष्टिरहिते तस्मिंश्चन्द्रे दशमे दू
ति द्वितीयो योगः ॥ अत्र नारी नो प्रसूते द्वेष्येशः शत्रुभवनस्वामी तथा मित्रं मंदो रविशनी च द्विषि षष्ठे बुधेन दृष्टः सितकिरणश्चं
द्रोऽस्तेऽस्तमने अयं तृतीयो योगः अत्र नारी नो प्रसूते कुजशनी षष्ठे चतुर्थे यदि तदा जातस्य नारी गर्भिणी न स्यादिति चतुर्थो यो

लग्नस्थे सप्तसप्तौ दिनमणितनये कामगे वार्कमंदौ द्यूने चंद्रे नभस्थे न च यदि गुरुणालोकिते नो प्र
सूते ॥ द्वेष्येशो मित्रमंदौ द्विषि सितकिरणेऽस्ते बुधेनेक्षिते नो सूते द्वेष्ये जलर्क्षे यदि कुजरविजौ
गर्भिणी स्यान्न नारी ॥ २५ ॥ रंध्रस्थानस्थिता वा स्थिरभवनगता शुक्रवागीशसौम्याः कृच्छ्राणां क
र्मणां ना भवति हि नियतं कारकः स्तब्धभावः ॥ बाल्ये दुःखी नरः स्यान्निधनगृहपतौ लाभयाते सु
खी स्यात्पश्चात्पापेऽल्पमायुः शुभखगसहिते दीर्घमायुर्नराणाम् ॥ २६ ॥ ॥ २६ ॥ ॥

गः इति सप्तमभावः ॥ २५ ॥ अथाष्टमभावः ॥ कष्टकर्मकरादियोगमाह शुक्रगुरुबुधाः अष्टमस्थाः स्थिरराशिगता वा तदा जातो
ना पुरुषः नियतं नियमेन कष्टकर्मणां कर्ता स्यात् स्तब्धभावः कठिनचित्तश्च स्यात् अष्टमभावेशे लाभगे बाल्ये बाल्यावस्थायां दुः
खी पश्चात्सुखी स्यात् लाभगेऽष्टमेशे पापे अल्पायुः स्यात् ॥ तस्मिन्नेव शुभग्रहयुक्ते जातानां दीर्घमायुः स्यात् ॥ २६ ॥ २६ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा०लं० आयुर्देहेशः अष्टमपतिः क्रूरयुक्तः षष्ठद्वादशगतः तदाऽल्पमायुः कुर्यात् अष्टमपतिः लग्नेशयुक्तः अरिमांत्यसंस्थः दुःस्थस्तु यंगः
१३ तदा स्वल्पमायुः प्रदत्ते अष्टमेशः रंध्रस्थो वा चिरायुः प्रदत्ते अष्टमेशः तदनुर विभुर्वो वा तत्राष्टमे तद्भूत् चिरायुः प्रदत्ते लग्नेशः
अष्टमेशः कोशस्थानस्थितः द्वितीये स्थितस्त्वेत्तदा तस्करो वैरियुक्तश्च स्यात् २७ प्रसूतौ जन्मसमये ॥ आयुर्देहाधिनाथौ ॥
अष्टमलग्नपती हीनवीर्यौ अष्टमषष्ठगतौ तदा संग्रामे कीर्तिशेषं प्राप्नोति संग्रामाभिमुखो युद्धं विहाय पंचत्वं प्राप्नो

कुर्यादायुर्देहेशः खलखगयुग रिःफांत्यसंस्थोऽल्पमायुश्चेल्लग्नाधीशयुक्तो निधनभवनपः स्वल्प
मायुः प्रदत्ते ॥ रंध्रस्थो वा चिरायुस्तदनु रविभुवस्तत्र तद्वल्लयेशः कोशस्थानस्थितश्चेज्जनुषि हि
मनुजो वैरियुक् तस्करः स्यात् २७ आयुर्देहाधिनाथौ निधनरिपुगतौ हीनवीर्यौ प्रसूतौ सं
ग्रामे कीर्तिशेषं व्रजति वलयुतौ तौ तदा तज्जयाप्तिं ॥ शुक्रेणांदोलिका यास्तनुपविधुसुतो वाहनस्थान
नाथो मूर्तौ दंतावलेंद्रैरथ गुरुसहितः स्याज्जयो वाजिवाहैः ॥ २८ ॥ ॐ ॥ ११ तौ स्वर्थः ॥ तावेवा युर्देहाधिना ॥ राम०

योसबलौ चेद्विजयी भवति चतुर्थेशः शुक्रेण युतश्चेत् आंदोलिकायाः शिविकायाः जयः शिविकारूढो जयतीत्यर्थः ॥ चतुर्थे १३
शः लग्ने लग्नेशेन चंद्रेण च युतः ॥ मूर्तौ लग्ने स्थितश्चेत्तदा दंतावलेन्द्रैः महागजैः जयः स्यात् अथ चतुर्थेशो गुरुयुतः लग्ने चेत्तदा वा
जिवाहैः वाजिराजैः गजेन्द्रैः अस्य सहजयः स्यात् इत्यष्टमभावः २८ ॥ ॥ २८ ॥ ॥ २८ ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥अथनवमभावः॥शुभयोगमाह॥ नवमभावेशोगुरुदृष्टःलग्नस्थश्चेत्तत्रजातोराजवंद्यःराजमान्यःस्यात् भाग्येशः नवमाधिपः लग्नस्थः
चतुर्थनवमपतीस्वभवनंचतुर्थपतिः चतुर्थनवमपतिर्नवमंपूर्णदृष्ट्या पश्यतश्चेत्तदासर्वासांधनधान्यसुवर्णादिसंपदांआस्पदं आ
श्रयःमनुजःस्यात् वाहनेशःअष्टमस्थस्तदामनुजः भाग्यराहित्यंव्रजति होराविद्भिरेवंप्रकारेणभाग्यराहित्यंनुः हीनानांशुभलक्ष
णवयोबलादिरहितानांवाहनानांप्राप्तिस्तद्वच्चपलतास्थिरताचजेमेस्वग्निमेणसंबंधः ॥ २९ ॥ अथनवमेशोलाभगेराजमान्यः
भाग्येशोमूर्त्तिवर्त्तीसुरपतिगुरुणालोकितोभूपवंद्योलग्नस्थोवाहनेशोनवमपतिरुभौपश्यतश्चेत्स्वगे
हं॥सर्वासामास्पदंस्यान्मनुजइहतदासंपदांवाहनेंद्रोरंध्रस्थानस्थितश्चेत्तद्व्रजतिहिमनुजोभा॥
ग्यराहित्यमेव॥२९॥हीनानांवाहनानांतद्वच्चपलताप्राप्तिरेवंनराणांज्ञेयाहोरागमज्ञैरथनवम
पतौलाभगेराजवंद्यः॥दीर्घायुर्धर्मशीलस्तद्वधनवपुर्वाहनेशाः स्वगेहे धर्मेशोलग्नवर्त्तीजनु
दीर्घायुर्धर्मशीलश्चस्यात् तद्वजनुषिधनवपुर्वाहनेशाः द्वितीयलग्न यदिगजस्वामिसिंहासनानां
चतुर्थपतयः स्वगेहे लग्नेशोलग्ने धनेशो धने वाहनेशोवाहनेशश्चतुर्थभवने इत्यर्थः॥ धर्मेशोलग्नगतोयदितदागजस्वा
मिसिंहासनानांप्राप्तिरित्यनुषंगः तत्रगजाः हस्तिनः स्वामिसिंहासनानाराजाधिष्ठेयसिंहासनंराजकार्येशुभद्रासनंतेषांप्राप्तिः

जा०लं०
१४

अमीषामुक्तवक्ष्यमाणानांयोगानांयोधिपः योगकर्त्तायोग्रह अधिकवलयुतस्तस्यदशायांअंतर्दशायांलब्धियोगफललाभःस्यात्॥
अथगुरुशुक्रौवाहनेशयुतौसंतौकेन्द्रेअयानेआगमेएकादश इत्यर्थः त्रिकोणेस्यातामिसेकोयोगः अथगुरुशुक्रयुतोभाग्याधीशः
भाग्येचतुर्थेवास्यात्तदाहित्तीयोयोगः अत्रयोगद्वयेजातःवाहनव्यूहानांसमुदायानांनाथः ईशोनरपतिःस्यात्॥ ३१॥अथचिंतायोग
भौमेकर्मस्थेक्षेत्रचिंत्ताकर्षणवीजवापक्षेत्रसंस्कारादिमकारकक्षेत्रचिंताइत्यर्थः त्रिकभवनगतेषष्ठाष्टमद्वादशेमहीजेसौख्यचिं

योगानांस्यादमीषांप्रचुरवलयुतोयोधिपस्तद्दशायांलब्धिश्चांतर्दशायामथगुरुभृगुजौवाहना
धीशयुक्तौ॥केन्द्रेयानेत्रिकोणेत्वथगुरुकवियुग्वाहनस्थानगोवाभाग्याधीशःस्वराशेभवतिनरपति
र्वाहनव्यूहनाथः॥३१॥कर्मस्थेक्षेत्रचिंतात्रिकभवनगतेसौख्यचिंतामहीजेवागीशेयानभूषावसन
हयभवाचामरच्छत्रचिंता॥प्रालेयांशौस्थितेस्यादथमदनगतेवाक्पतौपुत्रचिंतासंतानस्थानयातेहि
मकरत्तनयेबुद्धिजायत्रिकोणे॥ ३२॥ ॥ ३२॥ ॥ऽऽ ११ तासकलविषयप्रयुक्तसौख्यचिंतास्यादित्यर्थः॥

वागीशेत्रिकस्थेवाहनभूषणवस्त्राश्वभवाचिंतास्यात् चंद्रेस्थितेवात्रिकस्थेचामरच्छत्रचिंतातत्सापौरक्षणेचचिंतास्यात् अथवा
क्पतौगुरौसप्तमस्थेपुत्रचिंतापुत्रविषयकयोगादिक्षेमादिचिंतेत्यर्थः॥बुधेपंचमेबुद्धिजाचिंता सूर्येत्रिकोणस्थेपितुर्बांधवस्यच
चिंता शुक्रेसुतनवमसप्तमगेयात्राचिंता॥ अथगुरौनवमपंचमेपुत्रजापुत्रभवाचिंतास्यात् चिंताभामयेषांजनानांक्षेत्रादिसंभवस्तेषां

शुभावस्थ्सौख्यंसुतलाभकरं समानाः॥ ३३॥
॥ इति नवमसमाप्तः॥ ३६॥
राम०
१४

अथदशमभावफलमर्धेनाह जनुषिकर्मभावेशोविवीर्योनिर्वलश्चेत्तदाजातःसर्वकर्मास्पदंसर्वकर्मणामास्पदंस्थानंनोभवति सर्व
कर्मसाधकोनस्यात् अर्थात्जनुषिकर्माधीशोवलीचेत्सर्वाणिकर्माणिसाधयेदित्यर्थः यदाशुभग्रहयुतोदशमाधीशःस्वीयगे
हेदशमेचेत्तदाजातोमानवोमानशीलोमानीभवेत् ॥३३॥ अथदीर्घमध्यायुर्योगानाह यदानृणांजन्मसमयेलग्नाष्टमदशमेशाः
लाभेकेंद्रेत्रिकोणेचस्थितास्तेदीर्घायुःस्यात् पापग्रहाःपणफरचतुर्थेतनीयस्थिताःमध्यमायुःस्यात् एतेपूर्वोक्ताआपोक्लिमस्था

मार्तंडेतातनवंधोरथसुतनवमद्यूनगेदानवेज्येयात्राचिंतानराणामथनवमसुतेपुत्रजावासवेज्ये ॥

कर्माधीशोविवीर्योयदिजनुषितदासर्वकर्मास्पदंनोगेहेस्वीयेयदासोशुभविहगयुतोमानवोमान

शीलः ३३ लाभेकेन्द्रेत्रिकोणेतनुनिधननभस्थानपाःसंस्थिताश्चेद्दीर्घायुःपापखेटाःपणफरहिबुक

त्रिस्थितामध्यमायुः॥ हीनायुःप्रोक्तमेतेयदिजनुषिनृणांस्युस्तदापोक्लिमस्थारंध्रस्थानस्थितानांतनु

पतिगगनस्वामिसूर्यात्मजानां॥ ३४॥ ३४ ॥ ९श्चेदल्पायुःस्यात्० द्वात्रिंशद्वर्षादर्वाक्हीनायुः ततोमध्या
युःचतुःषष्ट्यनंतरंदीर्घायुर्ज्ञेयम् लग्नेशदशमेशशनीनांअष्टमस्थानस्थितानांमध्येयोहीनःहीनवलस्तस्यदशापर्यंतमा
युःस्यादित्युत्तरेणसंवंधः॥ ३४॥ अथधर्मकर्मात्मजेशाः नवमदशमपंचमेशाःस्वभवनेनवमादिकेस्युस्तदातेषांयोधिकव
लस्तस्यदशायांजातस्यधर्मवृद्धिःस्यात्० अन्यथापरभवनेयदातेषांयोधिकवलस्तद्दशायांधर्महानिःस्यादित्यर्थः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

जा॰लं॰ लग्नाष्टमपतौ यदि शनिराहुकेतूनामन्यतमेन युतो षष्ठस्थो तद्दशायां तनुनिधनपयोरधिकबलस्य दशायां व्रणाः स्युः ॥ ३५ ॥:

१५ चतुर्थेशस्तत्र षष्ठभावे चेत्तदा यानहेतुर्मृतिः स्यात् चौराच्छस्त्रेण च मृतिः तत्रेति भरिभावपरामर्शेन यानेशस्य शन्यादियोगे

वस्यते अयमर्थः शनियोगे यानहेतोर्मृतिः राहुयोगे चौरान्मृतिः केतुयोगे शस्त्रेण च मृतिः अथ संक्षेपाद् क्रमाज्ञवमादि

भावानां सामान्यचिंतालंबनं उच्यते नवमभावतो भाग्यचिंता विधेया अयं भावः भाग्ये योग्रहः भाग्येशो योग्रहः भाग्यभवनस्थो

योहीनस्तद्दशायुस्त्वथ निजभवने धर्मकर्मात्मजेशास्त्वेत्स्युस्तेषां दशायां बहुलबलवशाद्धर्मबुद्धिर्नरा

णां ॥ हानिः स्यादन्यथा रौ तनुनिधनपतौ भानुपुत्रेण युक्तौ स्यातां स्वर्भानुना चेत्तदनु च शिखिना तद्दशायां

व्रणाः स्युः ॥ ३५ ॥ यानेशस्तत्र संस्थो यदि भवति तदा यानहेतुर्मृतिः स्याच्चौराच्छस्त्रेण चिंता नवमभवनतो

भाग्यजाता विधेया ॥ व्योम्नो भूपालभूषावसनहयमहत्कर्मणां प्राप्तिचिंता लाभस्थाने खिलानां व्ययपति

योराशिः तद्द्वारः केन्द्रग्रहभाग्यभवने शुभाशुभवर्गविवेकः भाग्यभा॰ धनगृहात्कल्मषाणां विधेया ॥ ३६ ॥४

न्येशबलाबलत्वमित्यादि विचार्य जातकशास्त्रविचारं परिभूय बुद्ध्या फलं वक्तव्यं तथाभिहितं कल्याणवर्मणा भाग्यर्क्षपतिः क राम॰

स्मिन्कोवा भाग्यर्क्षमाश्रितो विहगः बलवान्मध्ये बलो वा दुःस्यादि तत्रान्यत्र भाग्ये बलिष्ठे यदि मेषराशौ चतुःपदोऽस्यं प्रकरोति धर्मं १५

दृष्टे बलिष्ठे बहुधेनुदायी युग्मे तथा ब्राह्मणभोज्यदाता स्यात् कर्कटे तीर्थपरस्य सिंहे जातो मनुष्यः परधर्मनिष्ठः यदृष्टिधर्माभनुजो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वादशभावाधिपे लग्नस्थे सति मानवः सुवचनः सुबाहुः माधुर्यो रूपवान्वा भवति तथास्व र्क्षे स्वगृहे सति कृपणबुद्धिः अनेकपशु।
सुक्तो ग्रामयुक्त श्च ग्रामाधिकारसुक्त श्च स्यात् तथाधर्मे नवमे सति तीर्थावलोकी तीर्थयात्रावान् बहुल वृषमतिः अस्वंतधर्मबु
द्धिश्च स्यात् तथा पापग्रहयुक्ते सति पापी मिथ्या कोशांतकृत् वृथा संचितद्रव्यनाश श्च स्यात् अस्माद्योगान्नियतं फलं ज्ञेयं॥
॥ ॥३१॥ ॥अस्तिह धर्मे निरतो ष्टमे भवश्चापे तु शास्त्रे विहगः स्वधर्मा मृगे विरज्येत सुधर्मतो ना कुंभे तु पापाहि मवोहि धर्मः १
मीने वलिष्ठे शुभभावजातस्तडागवापीभवधर्मनिष्ठः भाग्येशे लग्नगे भूपकर्मकारी धने धनं वंधुप्रियो भ्रातृभावे चतुर्थे पितृभक्तिमा

लग्नस्थे रिःफनाथे भवति सुवचनो मानवो रूपवान्वा स्वर्क्षे कार्पण्य बुद्धिर्वहुतर पशुमान्ग्रामसुक्तः स
दास्यात्॥ धर्मे तीर्थावलोकी बहुल वृषमतिः क्रूरसुक्ते च पापी मिथ्या कोशांतकृत्स्यान्नियतमिदमि
ति ज्ञेयमेवं सुधीभिः ॥ ३१ ॥ ॥ एतत् ॥२॥ क्रूरो तु पंचमे षष्ठे जातो विकलकारकः सप्तमे सुभगस्त्रीवान् खंडःपा

पाष्टमे स्थिते ॥स्वभे दाता देवभक्तो दशमे नृपकार्यकृत् ॥ लाभे दीर्घायुरखिलो व्यये देशांतरस्थितिः स्वस्वामि दृष्टयुक्तं चेत्स्वदे
शफलदायकः मुनिभिरुक्तं होरागमश्च वलवान्नेषां जे श्रेष्ठमानवाः होरासारे भाग्येवलाः स्वगृहगाः शुभदृष्टियुता यदि सौभाग्यसौ
ख्ययुक्तस्य जन्मविद्याच्च भूपतेः ३ क्रूरानीचारिभांशस्था भाग्येशे नवर्वाक्षिताः सर्वदा भाग्यहीनस्य जन्मविद्यान्नसंशयः ४ लग्नगे
भांतरेश शेषे महाभाग्यो हि भाग्यतः एकेन मध्यभाग्यः स्यादभावे हीनभाग्यवान् ५ गर्गजातके० हंति पुण्यं स्वभाग्यं च कर्मपुण्यगतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰लं॰ रणं तुंगे स्वर्क्षे सहस्रांशुः पुष्कलं धर्ममादिशेत् ६ भाग्यभाग्ये भवेद्यस्य पितृपक्षपरायणः धर्मे पूर्णो निशानाथः क्षीणः सर्व-
१६ विनाशकृत् ७ कुजे रक्तपदानंदी भवेत्सत्युपतिर्व्रती भाग्यहीनश्च सततं नरः पुण्यगृहं गते: ८ मंदभाग्यो बुधे पापे शुभे सौम्ये तु
धार्मिकः महाभाग्यः शुभे जीवे तथा शुक्रे बलीयसि ॥ ९ ॥ इदं मंदो वक्रगते नवमस्थे शनैश्चरे स्वर्क्षोच्चगते शनौ भाग्ये राजा भवति
धार्मिकः १० राहो धर्मगते जातः सत्यशौचविवर्जितः अन्यच्च भाग्याधिपश्चेद्यदि केन्द्रवर्ती भादोवयस्य सुखी मनुष्यः ॥
त्रिकोणगः स्वोच्चगतोथवा स्यान्मध्ये वयस्यल्पफलप्रदः स्यात् भाग्यस्य नाथे स्वगृहेथ मित्रगृहे यदा स्यात्स्वनवत्रिभागे
भाग्योदयं तस्य वदंति तज्ज्ञाः शुभग्रहैर्युक्तेक्षिते च नीचस्थो वा शत्रुगेहस्थितो वा भाग्यस्वामी रिःफरंध्रारिगो वा पापैः खेटैः सं-
युक्तो वाथ दृष्टो भाग्यहीनः स्याद्दरिद्रो सदैव ३ नवमभावपती रिपुरंध्रगो नवमभं रिपुदृष्टयुतं तथा ॥ यदि तदानच धर्मरतो नरः शुभ
खगैरथ धर्मरतो नरः ॥ ४ ॥ भवलेपि शुभे खेटे भाग्यस्थे धार्मिको नरः शुभवर्गयुते भाग्ये शुभकर्मा यथा तथा इत्यादि चिंता विधे-
या तत्राह जातकतारावलीकारः होरेंद्रोर्बलयोगाद्यो दशमस्तत्स्वभावजं कर्म तस्याधिपतेश्च तथा वृद्धिर्ज्ञेयान्यथा हानिः १०
दशमे नक्षत्रपतिर्लग्नात्पुरुषस्य संभवति सर्वारंभे भवति हि विनिर्दिशेत्तस्य जातस्य जातकसारे स्वस्थे खपे खलयुते खलजे राम॰
नवांशे स्वोच्चर्क्षगे स्वभवने सुखवृत्तयः स्युः नीचारिभावगृहगे ल्पसुखाल्पपुण्यो दासोपचारभृतकानुचराश्च दासीः धर्म १६
भावे शुभस्थे तु शुभदृष्टे सुकर्मकृत् पापेक्षिते पापकर्मा स्वामिदृष्टे तु मध्यमाः ॥ वेद्याः पुरोहिताः शास्त्रस्मृतिज्ञा वंचका नराः ॥

CC-0. In Public Domain. Digitization by eGangotri

जायंतेकर्मगैः पापैः सौम्यग्रहनिरीक्षितैः वराहोरार्थोक्तिः पितृपत्निशत्रुमित्रभ्रातृस्त्रीभृत्तकजनाद्दिवाकराद्यैः होरेंहोर्दशमपतिर्वि
कल्पतीयाभेंद्रकांस्मद्गाति गोत्रनाशभस्यां १ अर्कांशेतृणकणकर्णभेषजाद्यैश्चंद्रांशेकृषिजलजांगनाश्रयैश्च धात्वग्निप्रह
रणसाहसैः कुजांशेसौम्यांशेलिपिगणितादिकाव्यशीलैः जीवांशेद्विजविबुधदिवाकरादिधर्मैः काव्यांशेमणिरजतादिगोमहिष्यैः॥सौरां
शेश्रववधभारनीचशिल्पैः कर्मेशाधिषितनवांशकर्मसिद्धिः मित्रारिस्वगृहगतैस्ततस्ततोर्थस्तुंगस्थे बलिनिचभास्करेस्ववीर्यात् राज्या
धीशेकेन्द्रगेसौम्यदृष्टेपापेकेंद्रस्यात्सुशताभिधानः जातोनिस्संभूमिपैः सेवनीयोभाग्यैर्युक्तः सुमतापप्रसिद्धइति अथलाभस्था
ने अखिलानांवस्तूनांप्राप्तिचिंताविधेया तत्रहोराप्रदीपे स्वस्वामिग्रहयुतेक्षिते आयुवर्गेसद्धर्मकेभवति वस्तुविशेषलाभः॥
क्रूरेचदृष्टिसहितेनचतत्रलाभस्तद्वर्गकेप्यथचमिश्रफलंविधत्ते॰ लाभेरवीक्षितयुतेरविवर्गयुक्तेचोराद्चतुष्पदयुताच्चभवेत्प्र
तापः तद्वद्विधोयुवतितोपजनादिजातोवित्तंसुवर्णमणियावकशास्त्रजातः ज्ञापेक्षितिज्ञागणआयेग्रहंधनंस्यात् शिल्पादि।
काव्यलेखनैस्तुंगैः सकांस्येजीवेक्षितायेगुरुवर्गयुतायेगेहेयज्ञादिहेमहयनागरथादिसुखैः शुक्रेक्षितायशनिवर्गयुतेमहिष्य
लोहादिकृष्यवनकार्यभवामिवृद्धिः नीचारिभार्कगखगोक्तफलंप्रदद्याद्गीतिग्नहोद्ववबलेबलिनस्तुवाच्यमिति व्ययग्नहानि
धनग्रहाच्चमलिनकर्मणांचिंताविधेया गर्गजातके॰ क्षीणेजेवाखैरिःकेधनंपुंसामथोहरेत् वहुधार्थक्षयोभोमेत्रदृष्टेस्य।
पुसिद्धयः॥त्रपीडानचसंतप्तंपरिवादेनपीडितः नृशंसंपुरुषंचांद्रः कुरुतेव्ययराशिगः उच्छ्रितस्यपकारीचव्ययगेदेवतागुरौ॥ः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा०लं० अद्धाहीनो घृणाहीनो व्ययगे भार्गवे नरः व्ययस्थानगते मंदे क्रूरे शुक्रयुते रुचिं व्ययेशहीनीचकर्मा कपटी कुत्सदूषकः व्ययेभावे स्वा
१७. मित्रयुक्ते शुभदृष्टे च सत्स्वपि कीर्तिमान् जायते मर्त्यो विपरीते विपर्ययः ॥ ॥३७॥ ॥सुधीभिरिदं नियतं नियमेन ज्ञेयम् अध्यायं स्व
मापयति शालिनीवृत्तेन श्रीगणेशेन भावाध्यायः शैलरामैर्वृत्तैः सप्तत्रिंशद्भिः श्लोकैरुक्तः ॥ ३८ ॥ ॥इतिश्रीजातकालंकारटी
कायां भावफलाध्यायो द्वितीयः ॥ ॥२॥ ॥अथ योगाध्यायः॥ ॥तत्र तावत् शुभाशुभयोगान्यवस्य योगांतरं वक्तुं प्रतिजानीते शिख

हृद्यैः पद्यैर्गुंफिते सूरितोषेलंकारेऽस्मिञ्जातके मंजुलेस्मिन् भावाध्यायः श्रीगणेशेन वर्यैर्वृत्तैर्युक्तः शै
लरामैः प्रणीतः ३८ इति जातकालंकारे भावफलाध्यायो द्वितीयः २ ग्रहाधीना योगाः सदसदभिधा
नाजनिमतां ततो योगाधीनं फलमिति पुराणैः समुदितं अतो वक्ष्ये योगान्सकलगणकानंदजनकान्
शुकास्यादुद्भूतं मतमिह विलोक्येह रुचिरम् ॥ १ ॥ ऋक्षेशः क्षीणवीर्यः सुतनवमगतो मानवो मन्युमा
न्वै राशीशे सांगनाथे रिपुनिधनगृहे प्रांत्यगे दुर्बलः स्यात् ॥

॥ १॥ रिणीवृत्तेन पुराणैर्वसिष्ठशुकपराशरप्रभृतिभिः राम०
प्रोक्तं फलं योगाधीनं अतः सकलगणकानंदजनकान् अशेषज्योतिर्विदां प्रीत्युत्पादकान् योगान्वक्ष्ये किं कृत्वा शुकास्यात् ॥० १७
शुकमुनिमुखादुद्भूतं रुचिरं शोभनमतं विलोक्य आलोच्य ॥ १॥ अथानिष्टयोगानाह ॥ ऋक्षेशः जन्मराशिनाथः क्षीणबलः सन्
त्रिकोणगतश्चेन्मानवो जातः मन्युमान् क्रोधी स्यात् ॥ जन्मराशीशे सांगनाथे तनुपतिसहिते त्रिकस्थे दुर्बलः स्यात् ॥ ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यस्य नवमषष्ठाष्टमेशाः क्रूरग्रहदृष्टियुक्ताः यत्रकुत्रापिस्थिताः यदि तदानीं तस्य भार्याजारगामिनी स्यात् ॥१॥ यस्य जन्मनि ष
ष्ठाष्टमभवननाथौ कुजविधुयुतौ चतुर्थस्थौ स्यातां तदानीं स नरः अन्यजातः जारजातः तथा नवमषष्ठाधिनाथौ यत्रकुत्रापि ॥
स्थितौ क्रूरग्रहयुतौ अथवा केवलेन राहुणा शिखिना वा युतौ स्यातां तदान्यजातः कलुषखगयुता वित्तनेन राहुः केतुरपि सर्व

धर्मद्वेष्याष्टनाथाः खलखचरयुताः स्यानके क्वापि संस्थास्ते दृष्टा स्यात्तदानीं परपुरुषरता सुंदरी तस्य पुंसः ।
॥१॥ मातृस्थाने स्थितौ चेत्कुजविधुसहितौ षष्ठरंध्राधिनाथौ स्यातां यस्य प्रसूतौ भवति खलु नरस्त्व
न्यजातस्तदानीं ॥ क्वापि स्थाने स्थितौ स्तः कलुषखगयुतौ भाग्यषष्ठाधिनाथौ चेदेवं राहुणा वा तदनु च
शिखिना संयुतौ वान्यजातः ॥३॥ युक्तो मंदेन शूद्राद्भवति विदा वैश्यतो भास्करेण क्षत्राज्जातः सितेन
त्रिदशपगुरुणा भूमिदेवात्प्रसूतः ॥ दैत्येशेज्यौ सपापौ मदनरिपुधनस्थानगौ चेत्परस्त्रीगामी व्योमारियो
स्त्रोगगनभवनगौ तत्पिताऽन्यारतः स्यात् ॥ ४ ॥ ॥ क्रूरयोगे विवक्षितः अग्निभश्लोके मंदादीनां पार्थक्येन योगा

पदेशात् कलुषखगयुता वित्तनेनैव सिद्धे राहुकेतुग्रहणं छंदोनुरोधात् ॥३॥ भाग्यषष्ठाधिनाथौ मंदेन युक्तौ शूद्राज्जातः उत्पन्नो
भवति अथ बुधयुक्तौ वैश्याज्जातः भास्करेण युक्तश्चेत् क्षत्रात् क्षत्रियाज्जातः गुरुशुक्राभ्यां ब्राह्मणाज्जातः बुधगुरुशुक्राणां क
लुषखगयुतत्वं क्रूरैर्दृष्टत्वेन द्योगेन नीचत्वे वास्तंगतत्वे क्रूरवर्गस्थत्वेन वा सुधीभिर्बोध्यम् अथ शुक्रबृहस्पती सक्रूरौ सप्त

 मपष्ठधनस्थानगतौचेत्तदा परस्त्रीगामीस्यात् दशमषष्ठाधिपौदशमस्थौतदा तत्पिता जातस्यपिता अस्मःरतःस्यात् परस्त्री
 गामीस्यात् ॥४॥ क्रूरयुक्तोलग्नेशःद्वितीयस्थश्चेत्तत्पितासज्जनस्त्रीसंयुक्तः साधुजनस्त्रीगामीस्यात् सप्तमषष्ठद्वितीयभा
वेशाःक्रूरयुताःद्वितीयस्थाश्चेत्तद्देवंफलंविविधमिति एवंप्रकारः विविधफलमितिज्ञेयं सज्जनस्त्रियामासक्तिर्दुराचार
मूर्तीशःपापयुक्तोधनसदनगतश्चेत्तदासज्जनस्त्रीसंयुक्तस्तत्पितास्यात्खलविहगयुक्ताःकाम
शत्रुस्वनाथाः॥कोशस्थास्तद्वदेवंफलमितिविविधंभ्रातृपत्न्योश्चपित्रोःस्थानेशाःक्वापिभावेतनुप
तिसहिताश्चेत्सुमानन्यजातः॥५॥लग्नाधीशेंदुपुत्रौक्षितितनयनिशानायकौक्वापिसंस्थौयुक्तौस्व
र्भानुनावाभवतिहिमनुजःकेतुनाश्वेतकुष्ठी॥आदित्योभौमयुक्तस्तदनुशनियुतोरक्तकृष्णाख्य
कुष्ठीस्यात्कौलग्नाधिनाथोव्ययरिपुनिधनस्थानगस्तापगंडः ६॥ ॥६॥ ॥६॥ ॥६॥
त्वं भ्रमस्यभस्यकत्वमित्यादिज्ञेयमितिभावः॥तृतीयसप्तमचतुर्थदशमेशास्तदनुपतिसहितायत्रकुत्रापिस्थिताश्चेज्जातःपु प्रा०म०
मानन्यजातः॥५॥लग्नेशबुधौकुजचंद्रौवाराहुकेतुन्यतरयुतौतदाजातःश्वेतवर्णोपलक्षितःकुष्ठरोगीभवति तदनुभौम १८
शनियुतःआदित्यश्चेद्रक्तवर्णाकुष्ठीवर्णनामककुष्ठवान्स्यात् सर्पयुतोलग्नेशःत्रिकभवनस्थश्चेत्तदाजातस्यतापगंडस्तापः

चन्द्रेणयुतोलग्नेशःत्रिकस्थश्चेज्जलजोगंडःस्यात् भौमयुतोलग्नेशःत्रिकस्थश्चेत्तदाग्रंथिशस्त्रव्रणःस्यात् गंस्युपलक्षितःशस्त्रजो
व्रणःस्याद्विसर्थः बुधयुतोलग्नेशःत्रिकस्थःपित्तरोगःस्यात् जीवेनयुतोलग्नेशःत्रिकस्थश्चेत्तदाऽऽमोद्भूतःआमकोपजोरोगः
स्यात् शुक्रेणयुतस्तत्रस्थितोलग्नेशस्तदावुर्नवुध्वस्यक्षयारव्योरोगःयमशिखितमसामेकयुक्शनिराहुकेतूनांमध्येएकेनयुक्तोलग्ने

त्रिपश्चंद्रेणगंडोजलजइहयुतोग्रंथिशस्त्रव्रणःस्याद्भूमीपुत्रेणपित्तंहिमकरजनयेनायजीवेनरोगः॥
आमोद्भूतस्ततश्चेद्भृगुतनययुतोनुःक्ष यारव्यागदःस्याच्चोरेद्भूतोत्यजोद्धायमशिखितमसामेकयुक्
तन्वधीशेः॥७॥चन्द्रोमेषेवृषेवाकुजशनिसहितःश्वेतकुष्ठीसरोगोदैत्येज्यारेन्दुमंदास्तिमिभवनगताः
कर्कटालिस्थितावा॥अंगेसौख्येनहीनःपरमकलुषकृद्रक्तकुष्ठीनरःस्याद्वागीशोभार्गवोवायदिरिपु
गृहपोमूर्त्तिगःक्रूरखेटैः॥८॥

एषः त्रिकस्थश्चेत्तदाचोरजभंस्यजादुत्पन्नोवारोगःस्यात् रजकचर्मकारादयोंत्यजाः॥
७॥कुजशनियुतश्चंद्रोमेषेवृषेवायदितदानरःश्वेतकुष्ठीस्यात् शुक्रभौमेंदुशनयःमीनराशिस्थायद्वाकर्कटवृश्चिकस्थाःतदानरःशरी
रसौख्यरहितःमहापातकीरक्तकुष्ठीस्यात् गुरुःशुक्रोवाषष्ठभावाधिपःक्रूरैर्दृष्टो लग्नस्थश्चेत्तदावक्त्रशोफीमुखाधिकारणकश्चषष्ठ
युरोगयुतःस्यादित्यग्निमश्लोकेनसंबंधः॥८॥ ॥८॥ ॥

जा०लं० ॥ अथमीनकर्कवृश्चिकराश्युपलक्षिताभावाः क्रूरसहिताः यदि तदा नराणां एवं प्रकारेण चिरं कुष्टं स्यात् तत्र प्रकारमाह यत्र लूता ॥
१९ कारकः स विशेषः जंतुविशेषः उत्कृष्टगदविशेषकरः लूताकारकृत कुष्टः स्यादित्यर्थः गुरुर्व्ययस्थश्चेन्नरः गुह्यरोगी स्यात् यद्वा
वैद्यात्ज्ञानरोगी स्यात् भौमशनी व्यये षष्ठे वास्थितौ तदा व्रणी व्रणयुतः स्यात् ॥ ९ ॥ क्रूरगृहयुतो चंद्रशनी मेषमीनमकरवृश्चिका

दृष्टश्चेद्क्रशोफी त्वथ खलसहिता मीनकर्कालिभावा लूताकारश्चिरं स्यात्परमगदकरः कुष्टएवं
नराणां ॥ रिफःस्थानस्थितश्चेद्विबुधपतिगुरुर्गुह्यरोगी नितांतं भूमीमार्तंडपुत्रौ व्ययभवनगतौ शत्रुगौ वा व्रणी स्यात् ॥ ९ ॥ मेषे मीने कुलीरे तदनु च मकरे वृश्चिके मंदचंद्रौ स्यातां क्रूरान्वितौ चेन्नवमभवनगो मानवः स्यात्त्खंजः ॥ लग्नस्थं पश्यतीदुं दिनमणितनयं भूमिजो चून दृष्ट्या बुद्ध्या हीनो नरः ।
॥ स्याद्दिनविधुविवरे भूमिजश्चेत्तथैव १० ॥
न्यतमराशिगतो नवमभवनगो चेन्मानवो जातः खंजः खंजाख्यपादरोगी स्यात् भूमिपुत्रः सप्तम दृष्ट्या लग्नस्थं चंद्रशनिं राम०
च पश्यति चेत्तदा नरः बुद्ध्या हीनः स्यात् दिनविधुविवरे रविचंद्रयोर्मध्ये भौमश्चेत्तथैव बुद्धिहीनः स्यात् इनशशिनोः लक्षणया दिनके १९

CC-0. In Public Domain. Digitization by eGangotri

॥ चन्द्रेलग्नेसाधिकारेग्नहहोराद्रेष्काणादिवर्गाधिपत्यसहितेशनौदशमस्थेवुधेनपूर्णेहृष्टेस्मिन्मानवोजातः बुद्धिमान्स्यात्॥
लग्नस्थंभौमंचंद्रंचपूर्णदृष्ट्याबुधः पश्यतिचेद्बुद्धिहीनःस्यात् यद्वा चंद्रलग्नेशोभौमेनपूर्णदृष्ट्यापीडितोबुद्धिहीनःस्यात्
॥ ११ ॥लग्नस्थेवुधेतद्वत्क्रूरग्नहदृष्टेशुभग्नहदृष्टिरहितौरविशनीएकराशौ अथवाएकभावे चक्रस्यपूर्वार्धेपरार्धेवा

प्रालेयांशौतनुस्थेगगनसदनगेसाधिकारेर्कसूनौदृष्टेस्मिन्कामदृष्ट्याहिमकिरणभुवाबुद्धियुङ्
मानवःस्यात्॥पृथ्वीसूनुंमृगांकंतनुनिलयगतंपूर्णदृष्ट्येंदुसूनुःपश्येच्चेद्बुद्धिहीनस्त्वथशशितनु
पोभूभुवापीडितोवा॥११॥लग्नस्थेरौहिणेयेतद्वनुरविशनीक्रूरदृष्टौरिपुस्थावेकर्क्षेचैकभावेभवतिग
तमतिर्दृष्टिहीनौशुभानां॥तिग्मांशौवैरिनाथेरवलविहगयुतेतुर्यगेसूर्यसूनौहृद्रोगीवाक्पतौवाभ
वतिहृदिनरःकृच्छ्रपित्तौसकंपः ॥ १२ ॥ ॥

॥एकत्रगौषष्ठस्थौचेत्तदागतमतिर्नष्टमतिःस्यात् षष्ठभवननाथे
सूर्येक्रूरग्नहयुतेतुर्यगेसतिहृद्रोगीस्यात्॥ शनौगुरौवाषष्ठेशेक्रूरसहितेचतुर्थस्थेहृदिकृच्छ्रपित्तरोगीस्यात् अथवादुष्टैःपीडि

॥ ॐ ॥
तौहृद्विसकंपःस्यात्॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा०लं० अथ कुजः सूर्यजो गुरुश्चतुर्थस्था यदि तदा हृद्रोगहेतोर्नराणां शरीरे क्लेशकारी व्रणः नियमेन स्यात् यदा जन्मसमये भौ
२० मः चतुर्थस्थः सूर्यबुधराहवः पंचमस्थाः शनिः अष्टमस्थः तदा जातो नरः दुःखभागी भवति ॥१३॥ स्वक्षेत्रस्थितो भौमो य०
दि लग्नं पश्येत्तदा जातो कातरः भीरुः स्यात् यदि शनिर्दशमस्थो राशौ जन्मचेदत्रापि तद्वाच्यम् कातरः स्यादित्यर्थः लग्नगे भौ
दुष्टैर्वा पीडितः सन्नथ कुजरविजौ वाक्पतिर्वंधुसंस्था हृद्रोगः स्यान्नराणां व्रणरुह नियतं क्लेशका
री शरीरे। पातालस्था महीजस्तनयनिलयगाः सूर्यवित्सैंहिकेया रंध्रस्थो भानुपुत्रो यदि जनुषि तदा
स्यान्नरो दुःखभागी १३ लग्नं पश्येन्निजर्क्षे यदि धरणिसुतः संस्थितः कातरः स्याच्छायासूनुर्नभस्थो
यदि निशिजननं तद्वदत्रापि वाच्यं मूर्तौ भूमीतनूजे स्वजनकलहकृत् द्यूनगे स्वाधिकारभ्रष्टो ने भौमे
वपुष्मान्परमधुधिरतस्तीक्ष्णभावश्च नूनम् १४ पश्येत्तां कामदृष्ट्या धरणिविधुसुतौ चेन्मिथः स्या
त्तदानीमुच्चाकारोऽथ चंद्रं शनिरविमहिजाश्चेत्प्रपश्यंति शीतः ॥. ॥ एभिः स्वजनकलहकरः स्यात्० स्वाधि रा०म०
काराद्धीने स्वगृहहोरा द्रेष्काणादिरहिते सप्तमे भौमे वपुष्मान्दृढशरीरः॥ अस्तंतसुहृत्प्रीतिमान्तीक्ष्णस्वभावश्च स्यात्० २०
नूननिश्चयेन १४ धरणिविधुसुतौ भौमबुधौ मिथः अन्योन्यं सप्तमदृष्ट्या पश्येतां तदानीं जातः उच्चशरीरः स्यात् अथ शनि–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रविभौमाश्चंद्रं पश्यंति पूर्णं पश्यंति तदा जातः शीतः शीतलस्वभावः स्यात् शीतलत्वं जडत्वं मूर्खत्वमित्यर्थः क्षीणे चंद्रे भौमसहिते पा
पभूमीः पापकृत् खरस्तीक्ष्णभावः स्यात् मूर्तिस्थो बुधः सप्तमस्थे गुरुं पश्येत्तदा जातो हास्यासक्त इत्यग्रिम श्लोकेन संबंधः ॥
१५ ॥ अथ भौमसहिते बुधे शुभर्क्षे सुभगन हराशौ यद्वा कुजज्ञौ स्वर्क्षे दृष्टौ मंदराशिस्थाः तदा गज्ञां विदुषां च रंजने हर्षोन्मुखी
करणे प्रवीणः स्यात् ॥ त्रिकस्थः चंद्रः शुक्रं पश्येत्तदा विस्मयालुः विस्मययुक्तः स्यात् कुजबुधेंदव :वलिष्ठग्नहदृष्टाश्चे
क्षीणप्रालेयभानो धरणिजसहिते पापभूमीश्वरः स्यान्मूर्तिस्थो द्यूनदृष्ट्या हिमकरतनयो वासवेज्यं प्र
पश्येत् ॥ १५ ॥ हास्यासक्तः सभौमे हिमकरतनये स्यात्शुभर्क्षे कुजज्ञौ मंदर्क्षे वार्कदृष्टौ नरपतिविदुषां
रंजने कोविदः स्यात् ॥ पश्येत्काव्यं सितांशुर्व्ययविलयरिपुःस्थानगो विस्मयालुः क्षिप्रं वाक्स्फूर्तिमान्
स्यात्कुजबुधशशिनो वीर्यवंतेव दृष्टाः १६ ॥ शुक्रज्ञौ द्यूनयातौ गगनविलयगो मानवः पुंश्चलः स्यात्का
माज्ञामंदिरस्थौ कविधरणिसुतौ तद्वदाज्ञांबुयातौ ॥ काव्यारैतद्वदिंदोर्नभसि रविसुतादास्फुजिन्नीरया
यीतद्वत्कामास्पदस्था बुधसितशनयः स्वक्षेगे भार्गवे हि ॥ १७ ॥ ॥ स्वोच्चीं घ्रंमयास्यात्तथा वचनस्फूर्तियुक्तः स्यात् १६
॥ शुक्रबुधौ सप्तमाष्टमदशमगतौ तदा मानवः पुंश्चलः व्यभिचारी स्यात् शुक्रभौमौ सप्तमदशमस्थौ तद्वत् पुंश्चलः स्यात् शुक्रभौ
मौ चतुर्थदशमगौ तद्वत् पुंश्चलः स्यात् चंद्राद्दशमे शुक्रे शनेश्चतुर्थे शुक्रे तदा तद्वत् पुंश्चलः शुक्रे स्वराशिस्थे शुक्रबुधशनयः स

मदसप्तमस्थाः तदा तद्दिनमत्युक्तं ॥ ४२ ॥

CC-0. In Public Domain. Digitization by eGangotri

जा०लं० चंद्रात् शुक्राद्वा शनिस्तत्सुरेभागवर्तौ तदा निमभावे स्थितः चंद्रस्त्र्यौ लग्नस्थो शनिं पश्यन्नेत्त्र राजा जातः अपयशाः अपकीर्तिः।
२ स्यात् अथ सूर्ययुते शनौ भूमिजकेंद्रे लग्नस्थे शुक्रचंद्रे दृष्टे सति दिवसपतेः सूर्यस्योपरागः शेफश्छेदः लिंगच्छेदः नहृदयकी
र्तिः स्यात् १८ शुक्रे वक्रगृहराशिगते सति मानवो जातः सीमंतिन्याः रते संभोगाद्धेतोस्तोषदायी सुषदायी सुखदः स्यात् स्त्रीया
मालेयां शोभिता ह्लादिनमणित नयस्तत्सुरेभागवर्तौ मूर्तौ चेच्चंद्रशुक्रौ यदि तरणिसुतं पश्यतश्चाय
शाः स्यात्॥ शेफश्छेदं तरणामथ तपनसुते भूमिकेंद्रे कंयुते दृष्टे काव्योडुपाभ्यां यदि दिवसपतिश्चोपरा
गो त्र तन्हूत् १८ यातेवक्रगृहर्क्षं जनुषि भृगुसुते मानवस्तोषदायी सीमंतिन्या रतेः स्यान्न खलु मदन
गंभार्गवं लग्ननाथः॥ पश्येत्स्त्रीयालयस्थो यदि रहसि तदा कामिनीतोषदाता न स्यादेवं हि मांशुर्दि
नकरसुतयुक् भौमतः खे सुखे वा॥१९॥ क्षोणीपुत्रेण युक्तः प्रथमसुरगुरुर्लग्नतः षष्ठयोऽयं कामा
धिक्यं नराणां जनयति नियतं पापदृष्टो विशेषात्॥ काव्ये स्त्रीयालयस्थे तदनु मिथुनगे कामवान्मानव
स्यान्मूर्तौ सप्तात्स्वस्तौ धनुषि च वृषभे चेत्सुमानस्य कामः॥२०॥ ((लयस्थो लग्ननाथः सप्तमगः भार्गवं यदि प राम०
स्पन्पूर्णदृष्ट्या इति प्रोषः॥ तदा जातः रहसि रतिस्थाने कामिनीतोषदानः स्यादेव १९ द्वौ द्वौ प्रकृते ये समयत इति न्यासात्॥ २१
चंद्रः शनियुतः भौमाच्चतुर्थे दशमे वा स्यात्तदा एवमुक्तप्रकारेण कामिनीतोषदाता न स्यात् एवं प्रथमसुरगुरुः शुक्रः भौमयुक्ते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्यलग्नात्षष्ठपः षष्ठभावाधिपः तदा जातः नराणां कामाधिक्यं कामबलप्रचुरतां नियमेन जनयति शशुक्रः पापदृक्स्त्रीत्रिंशेषात्तका
माधिक्यं जनयति तदनु शुक्रे स्वभवनस्थे मिथुनस्थे वा मानवः कामवान्स्यात् सप्ताश्वपुत्रः शनिः धनुषि दृषे वा लग्ने चेत्तदा मान
वोऽल्पकामः स्यात् २० शनौ मकरस्थे सति अल्पभाषी अप्रयोजनबहुभाषी भवति तदनु षष्ठभवननाथे चंद्रे वा क्रूरयुते अदृश्या
र्धसंस्थिते सति जनिमतां नेत्रयोरंकः चिह्नविशेषो भवति सप्तमभावभोग्यांशानारभ्याष्टमादिक्रमेण लग्नभुक्तांशपर्यंतमदृश्यार्ध

मंदेतनौऽल्पभाषी त्वथ रिपुगृहपे वा सुधांशौ वदृश्ये चेदर्धे संस्थिते ऽंको भवति जनिमतां नेत्रयोः क्रूरयुक्ते॥
पश्येत्क्षीणं न चंद्रं यदि भृगुतनयः सूर्यजः पश्यतींदुं स्वर्क्षे चंद्रे नभस्थे यदि मदनगते वीक्ष्यते पापखेटैः २१
स्यान्नूनं चाल्पनेत्रस्तदनु तनुगतं भूमिजं वा क्षयेशं पश्येद्वाचस्पतिश्चेदसुरकुलगुरुः काणदृङ्मानवः स्या
त्॥ विच्छायातिग्मभानोः क्षितिभुवि च पुरोभागगे दृङ्नराणां सौम्ये चिह्ने दृशि स्यादथ वपुषि लये भार्गवे क्रूरदृष्टे

ज्ञेयम्॥ यदि क्षीणं चंद्रं शुक्रो न पश्येत् शनिरिंदुं पश्यति कर्कस्थे चंद्रे दशमे सप्तमे वा स्थितैः क्रूरग्रहैर्दृष्टे तदा नूनं निश्चयेन॥
स्वल्पनेत्रः स्यादित्यग्रिमपद्येनान्वयः २१ तदनु लग्नस्थं भौमं चंद्रं वा वाचस्पतिः शुक्रश्च पश्येत् चेत्तदा मानवः काणनेत्रः।
स्यात् तिग्मभानोः सूर्यात्पुरोभागगे अग्रगामिनि अस्ताभिलाषिभौमे नराणां दृक् विच्छायाकांतिरहिता स्यात्॥ सूर्यात् बुधे पुरो
भागगे दृशि चिह्नं स्यात् अथ भार्गवे शुक्रे लग्नस्थेऽष्टमे वा क्रूरदृष्टे सति अश्रुपाताहेतोर्नेत्रपीडा स्यात् अग्रिमश्लोकस्थेन संबंधः २२॥

तदनुचंद्रभौमौएकभागेकनवांशस्थौतदानेत्रयोःकिंचितचिह्नंस्यात् सुधीभिर्योगकर्तृग्रहबलवशात् एवमुक्तप्रकारेणादेश्यंव
क्तव्यं तदनुक्रूरग्रहयुक्तेयुतेवासूर्येव्ययगेनवमेपंचमेसतिजातः सुविकलनेत्रोऽप्रशस्तनयनःस्यात् सूर्यजेशनौक्रूरयुते दृष्टे।
द्वादशगेनवमेपंचमगेव्याधियुक्तोरोगीस्यात्॥२३॥एष्टो दयराशिगंचंद्रं चतुर्थभावस्थंशनिःप्रपश्येत् लग्नपमेषराशिस्थि

नेत्रेपीडासुपाता तदनुशशिकुजावेकभावेयदास्तोष्मिचिह्नं किंचित्तदानीग्रहबलवशतो दृश्यमेवंसु
धीभिः॥मार्तंडेरिःफयातेतदनुनवमगेपुत्रगेवास्वलाढ्येदृष्टेवास्यान्मनस्वीसुविकलनयनःसूर्यजेव्या
धियुक्तः२३ चंद्रंप्रष्टोदयस्थंहिबुकगग्रहगतःसुर्यसूनुःप्रपश्येदित्थंलग्नाधिनाथेक्रियभवनगतेमान
वोवामनःस्यात् कोशेपीयूषभानुर्जलचरगग्रहगःसौरिणासंयुतोवामार्तंडेभूमिकेंद्रेयदिभवतितदा
दद्रुमान्पूरुषःस्यात् २४ दृष्टेक्रूरैर्नसौम्यैर्यदिरिपुगग्रहपेचोडुपेज्ञीहवान्स्यादेवंकामांगनाथेतदनुरवि

तेजातोमानवःवामनःह्रस्वकायःस्यात् जलचरराशिस्थःचंद्रःद्वितीयेप्रथवाशनिनायुक्ते अथवा सूर्येलग्नेगेयदिभवतितदादद्रुमा
न्कुष्ठयुक्तःपुरुषःस्यात् २५॥षष्ठभावाधिपेचंद्रेसौम्यदृष्टिरहितेकेवलेक्रूरैर्दृष्टेज्ञीहपीडितःस्यात् एवंकामांगनाथेसप्तमनाथे

CC-0. In Public Domain. Digitization by eGangotri

लग्ननाथे वा चंद्रे केवलं क्रूरदृष्टे क्लीहवान्स्यात् पापग्रहैर्दृष्टः शनिश्चतुर्थश्चेन्न दृष्टिः अंधः स्यात् क्रूरग्रहैः निष्पीडिते दृष्ट्या योगे
नवा विकलीकृते पद्माववर्जिते लग्नेशे शनौ सौख्यायुक् सौख्यरहितः स्यात् लग्नगते शनौ क्लीहवान् आनंदरहितश्च स्यात् २५॥
यदा क्रूराः केंद्रगास्तदा जातः वपुषि शरीरे विकलः विकलांगः स्यात् पुष्पवंतौ सूर्यचन्द्रौ केन्द्रगौ वा तदा विकलांगः अत्र पुष्पवं
तावित्युक्त्या चंद्रसूर्ययोरेकराशिस्थत्वं विवक्षितं चंद्रस्य क्षीणत्वाद्योगस्य विकलतेति भावः लग्नस्थं शुक्रं शनिः पश्येत्तदा
क्लीहीस्यात् लग्ननाथे दिनकरतनये क्रूरनिः पीडिते चेत्सौख्यायुक् मानवः स्यात् ■सुसदनगे क्लीहवान्हर्ष
हीनः २५ क्रूराः केंद्रालयस्था वपुषि च विकलः केन्द्रगौ पुष्पवंतौ किं वा लग्ने प्रपश्येत्क विमिनतनयः श्रो
णिभागेंगहीनः" काव्यः पातालपापीसुरपतिगुरुणा क्वापि युक्तोर्कसूनुर्भौमो वा रोहिणेयो भवति हि वि
कलः श्रोणिभागे भुजेंघ्रौ २६ आयुःपुण्याधिनाथौ यदि खलखचरास्तुर्यगौ पापयुक्तौ जंघावैकल्यवान्
स्यात्कुजशनिसहिते सिंहिकेये च सूर्ये॥ द्वेष्यस्योत्तद्वदेवं शनिरिपुगृह पौरिः फयातौ खले स्वेदृष्टो न हान
दां नीरविविधुरविजा वैरिरंध्रालयस्थाः २७॥ ॥२७॥ श्रोणिभागे कटितटे अंगहीनः शुक्रश्चतुर्थगः गुरुसहितः शनि
र्भौमो बुधो वा यत्र कुत्रस्थितस्तदा कटितटे हस्ते चरणे वा विकलः स्यात् २६॥ निधननवमेशौ क्रूराश्चतुर्थगौ क्रूरयुतौ जंघावैकल्यवान्
पंगुः स्यात् राहौ भौम शनियुते षष्ठगे च कारणे भौमे शनियुते सूर्ये षष्ठगते तद्वत्पंगुः स्यात् एवं शनिषष्ठभावे शौ क्रूरदृष्टौ व्ययस्थौ त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा॰लं॰ हृत्पंगुः स्यात्॥ सूर्यविधुशनयः षष्ठाष्टमभावस्थाः तदानीं तस्य पंचशाखे हस्ते आर्तिः पीडा स्यादित्यग्रिमस्थेन संबंधः २७॥ श्री
२३ तदनु शुक्रसुते दशमस्थे शनौ क्लीबो नपुंसकः स्यात् शुक्राक्रांतराशेः व्ययषष्ठगे शनौ क्लीबरूपः रूपेण क्लीबसदृशः न तु क्लीबः सिंह
राशिस्थश्चंद्रः सप्तमगं भौमं पश्येत्तदा काणः स्यात् कर्कस्थः सूर्यः सप्तमगं भौमं पश्येत्तदा काणः उभययोगेपि काणः स्यात् यदि न
वमपः मेषसिंहवृश्चिकमकरे स्यादिति संबंधः॥२८॥ सूर्यचंद्रौ ओजर्क्षयुग्मराशौ दुस्थाकृष्यान्वयः अन्योन्यं परस्परं पश्यतः श्री
स्यादार्तिः पंचशाखे तदनु दशमगे सूर्यसूनौ सिताद्ध्ये क्लीबः स्यात्सूर्यसूनौ व्ययरिपुगृहगे शुक्रतः
क्लीबरूपः॥ पश्येत्सूर्यालयस्थो मदनभवनगं भूमिसूनुं सुधांशुश्चार्कः काणश्च कर्के यदि शुभगृह
पो मेषसिंहालिनक्रे २८॥ अन्योन्यं पश्यतश्चेत्तरणिहिमकरौ तत्तनूजो मिथो वा भूसूनुः पश्यतीनं सम
भवनगतं लग्नचंद्रौ यदौजे॥ ओजर्क्षे युग्मराशौ हिमकरशशिजौ भूसुतेनेक्षितौ चेद्युग्राशौ लग्नशुक्रौ
तदनु हिमकरः क्लीबयोगाः षडेते॥ २९॥ ॥१ जद्ये ओजराशिगः सूर्यः समराशिगं चंद्रं पश्यति तादृशश्चंद्रश्च राम॰
सूर्यं पश्यति अयमेको योगः तत्तनुजो शनिर्बुधो ओजसमराशिगौ अन्योन्यं पश्यतः इति द्वितीयो योगः समराशिगं सूर्यं भौमः॥ २३
विषमराशिग इत्यर्थात् सिंहं भौमं च सूर्यः अन्योन्यं पश्यति इति तृतीयो योगः लग्नचंद्रौ विषमराशिगौ भौमेन अर्थात् समरा
शिगेन दृष्टौ इति चतुर्थो योगः चंद्रबुधौ क्रमेण विषमसमराशिगौ भौमेन वीक्षिताविति पंचमो योगः लग्नशुक्रौ चंद्रश्च युग्मरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शो पुरुषग्रहराशिनवांशोस्थिताविति षष्ठो योगः एते षट् क्लीवयोगा ज्ञेयाः ॥ तदुक्तं सारावल्याम् ॥ अन्योन्यं रविचंद्रौ विषमा
विषमर्क्षगौ निरीक्षेते ॥ इंदुजरविपुत्रौ वा तथैव नपुंसकं कुरुते १ वक्रो विषमगतोऽर्कं समगं चैवं परस्परालोकात् विषमर्क्षेल
ग्नेंदू समराशिगतः कुजो विलोकयति २ शशिशशिजौ समविषमे भौमेन निरीक्षितौ भवतः ओजनवांशकसंस्थालग्नेंदुसितास्तथे
वोक्ता इति ३ ॥ २९ ॥ भौमसुते शुक्रेऽष्टमस्थे वातकोपान्मुष्कवृद्धिः वृषणवृद्धिः स्यात् भौमराशिगते भौमसुते शुक्रे भूमिसंस

ऽआयुःस्थानोपयातो धरणिसुतसुते भार्गवे वातकोपात्काव्ये भौमेन युक्ते कुजभवनगते भूमिजा मुष्कवृद्धिः
भौमर्क्षे काव्यचंद्रौ सुरपतिगुरुणा सूर्यजेनाथ दृष्टौ नूनं स्यान्मानवानां जनुषि कललजा मुष्कवृद्धिर्नितांतं ३०
क्रूरैर्दृष्टे विलग्ने सुविहृतरदनश्चापगो मेषसंज्ञे खल्वाटः पापलग्ने धनुषि गवि तथालोकिते क्रूरखेटैः धर्मां
र्थो स्यात्मजस्याप दि खलखचरा बंधभाक्पूरुषः स्यादेवं लग्ने क्रियेवा धनुषि गवि तथा रश्मिजं बंधनं तु ३१

गीत् वातकोपजातवृषणवृद्धिः स्यात् येषां मानवानां जन्मसमये भौमराशिस्थौ शुक्रचंद्रौ गुरुशनिदृष्टौ तेषां कललजा कललदोषजातवृ
षणवृद्धिः अतिशयिता स्यात् कललं शुक्रशोणितमिश्रीभावः ॥ ३० ॥ धनुषि वृषे मेषे वा विलग्ने क्रूरैर्दृष्टे विहृतदशनः दंतरोगी।
स्यात् पापलग्ने पापैर्युक्तं पापलग्नं तस्मिन् यथा पापयुक्तयोगेन सांकर्यं स्यात् तस्मात् क्रूरग्रहयुक्ते धनुषि वृषे वा लग्ने क्रूरदृष्टे।
खल्वाटः खलतिरोगी स्यात् नवमद्वितीयद्वादशपंचमस्थाः क्रूराश्चेत्तदा बंधभाक् पुरुषः स्यात् एवं मेषे धनुषि वृषे वा लग्ने क्रूरा:

जा॰लं॰प॰ शुक्रे शनिएशिक्ष्ये जातो मानवो विग्रहे शरीरे दुर्गंधिः स्यात् षष्ठाधिपे मिथुनकन्यामकरगे तद्दृष्टिग्रहे दुर्गंधिः अथ काव्ये शुक्रे बुधर्क्षे तेन बु
२५ धेन युक्ते केंद्रगे सति यद्दृष्टिग्रहे दुर्गंधिः अथ शुक्रशनी स्वीयहद्दासु तौ स्वत्रिंशांशगो चेत्तद्दृष्टिग्रहे दुर्गंधिः अत्र छंदानुरोधात्त्रिंशांशो हद्दा
शब्देनोपलक्षितः मेषस्थे चंद्रे लग्नगते दुर्गंधिः स्यात् ३२ अथ योगा हद्दासु विचार्यैव कर्तव्यं इत्युपजातिकयाह ग्रहद्वैर्ग्रहाणां हो
रादर्शनादि ज्ञानवद्भिः मानवानां जन्मनि शुभाशुभफलं सुमत्या ग्रहलग्नज्ञानसंस्कृतया बुद्ध्या विचार्य निश्चयेन वक्तव्यं तथोक्तमत्र
लग्ने दशमे ग्रहगणिते जातकर्मावलोक्य विशेषमपि यः कथयति शुभमशुभं वा तस्य न मिथ्या भवेत्तथा च प्रदर्शितं नीलकंठदैवज्ञैः स्वोक्ते
दुर्गंधिर्दीनवेऽर्कपे शनिभवनगते मानवो विग्रहे स्यात् द्वेष्याधीशे बुधर्क्षे नदखुमकरणे तद्दत्राथ काव्ये केंद्रस्थे तेन॰
युक्ते स्यादथ कविरविजौ स्वीयहद्दासु तौ चेत्तद्दृग्चंद्रे जयाते तनुसदनगते चानने स्याद्दुर्गंधिः ३२ एवं ग्रहाणां सदसत्फ
लानां योगात्ग्रहज्ञैरनुयोजनीयं॥ शुभाशुभं जन्मनि मानवानां फलं सुमत्या प्रविचार्य नूनं ३३ हृद्यैः पद्यैर्गुंफितेऽस्मि
न्ति तोषे लंकारएव्येजातके मंजुलेस्मिन्॥ योगाध्यायः श्रीगणेशेन दैवैर्वर्यैर्नैर्सुक्तो रामरामैः प्रणीतः ३४ ॥इति जात॰
योगाध्यायस्त॰ ३॥ भौजंगे कृत्तिकायां शततभिषजि तथा स्वर्पेत्रं दारवारे भद्रासंज्ञे तिथौ या किल जननमियात्साकुमा
री विषाख्या॥ लग्नस्थो सौम्यखेटाच शुभगगनगश्चैकः पापस्ते ततो द्वौ वैरिक्षेत्रानुयातो यदि जनुषि तदा सा कुमारी विषा
दीप्तः समाख्यातो नीचे दीनः प्रकीर्तितः सुदितो मित्रगेहस्थः स्वस्थः स्वगृहेग्रहः शत्रुगृहे स्मृतः सुप्रोजितोन्ये च निपीडितः नीचाभिमुख
गो यस्तु ग्रहः खिन्नस्तु संस्मृतः सुवीर्यः कथितः प्राज्ञैः स्वोच्चाभिमुखगो ग्रहः अधिवीर्यो निगदितः सुरश्मिः शुभवर्गगः ३३ अध्यायं समाप

॥ अथ विषकन्यायोगाः ॥ अथ त्रिभिः पद्यैर्विशेषतो विषकन्यायोगानाह ॰ आश्लेषायां कृत्तिकायां तथा शततारकासु नक्षत्रेषु रवि
शनिभौमवारेषु भद्रासंज्ञके तिथौ द्वितीयासप्तमीद्वादशीसंज्ञायां तिथौ या कन्या जननं दद्यात् जन्म प्राप्नुयात् सा विषाख्या विषकन्या
भवति अत्र नक्षत्रवारतिथीनां क्रमसे एकं द्वितीयो योगः सयथा आश्लेषा रवि द्वितीया प्रथमो योगः कृत्तिका शनि सप्तमी द्विती
योयोगः शततारका भौम द्वादशी तृतीयो योगः ॥ एषु योगेषु जाता कन्या विषाख्ये सर्थः दौ शुभग्रहौ लग्नगौ एकः पापो
मंदाश्लेषा द्वितीया यदि तदनु कुजे सप्तमी वारुण र्क्षे द्वादश्यां च द्विदैवं दिनमणि दिवसे यज्जनिः सा विषा
ख्या धर्मस्थो भूमिसूनुस्तनुसदनगतः सूर्यसूनुस्तदानीं मार्तंडः सूनुयातो यदि जनिसमये सा कुमारी
विषाख्या २ लग्नादिंदोः शुभो वा यदि मदनपति र्द्यूनयायी विषाख्यादोषं चैवानपत्यं तदनु च नियतं हंति वै
धव्यदोषं दुःस्थं त्रयं ग्नह स्तैः सुमतिभिरखिलं योगजातं ग्रहाणां मार्यैरार्यानुमंस्यामत मिह गदितं जातकेजा तकाभरणे ॥ ९ ॥
दशमस्थः द्वौ पापौ शत्रुमाश्रितौ यदि तत्र कन्या जायते तदा सा विषकन्या भवति ॥ १ ॥ अथ क्रमेण पापिनक्षत्रतिथिवारयोगानाह अथश
निवारे आश्लेषा द्वितीया तदनु कुजवारे शततारका सप्तमी दिनमणिदिवसे रविवारे विशाषा द्वादशी एषु योगेषु यस्याः जन्म सा विषकन्या
भवति यदि जन्मसमये भौम शनि सूर्याः क्रमेण नवमलग्नपंचमस्थास्तदा कुमारी सा विषकन्या भवति २ अथ विषाख्याभंगमाह। लग्ना
चंद्राद्वा मदनपतिः सप्तमपतिः शुभग्रहो वा द्यूनयायी सप्तमस्थः विषाख्यदोषं तत्र सुतं अनप त्यं संतानरहितत्वं वैधव्यं दोषं च हंति ॥ मार्तण्डे ॥

CC-0. In Public Domain. Digitization by eGangotri

एवमुक्तप्रकारेण इहास्मिन्जातके आर्यानुमत्याद्देवज्ञसम्यानुमतेन जातका नांगदितं अखिलं योगजातं ज्ञेयं ग्रहाणांस्वभावविशेषा
भिज्ञैरेवेदं योगजातंप्रवक्तुंक्षममितिभावः॥३॥ अध्यायंसमापयतिहृद्यैरित्यादिना॥४॥ इतिश्रीजातकालंकारटीकायांविषक
न्याध्यायश्चतुर्थः॥४॥ अथायुर्दायाध्यायः॥१॥ लग्नाधीशो लग्नस्वामी केंद्रयातैः लग्नचतुर्थसप्तमदशमस्थैः सदीर्घमायुर्दद्या

हृद्यैःपद्यैर्गुंफितेस्मरिन्तोषेलंकाराख्येजातकेमंजुलेस्मिन्॥कन्याध्यायःश्रीगणेशेनवर्यैर्वृत्तैर्युक्तोवह्निसंख्ये
विषाख्यः ४॥इतिजातकालंकारेविषकन्याध्यायश्चतुर्थः ४॥ आयुर्मूलंजन्मिनांजीवनंचस्याजीवानांनि
र्जराणांसुधेव एवंप्राहुःपूर्वमाचार्यवर्यास्तस्मादायुर्दायमेनंप्रवक्ष्ये १ लग्नाधीशोतिवीर्योयदिशुभविह
गैरीक्षितःकेंद्रयातैर्दद्यादायुःसुदीर्घगुणगणसहितंश्रीसुतंमानवानां सौम्याःश्रीयालयस्याजनुषिचरजनीनाय
केस्वीयतुंगेवीर्याढ्येलग्ननाथेवपुषिचशरदांषष्टिरायुर्नराणां २ सौम्याःकेंद्रालयस्यावपुषिसुरगुरौलग्न
तोवासुधांशोरायुर्युक्तंनदृष्टंनचगगनगतैःसप्ततिर्वत्सराणां॥ ॥ ११दित्यर्थः॥ शुभग्रहैर्दृष्टःअतिवीर्यःअधि
कतरबलस्तदाजातानांमानवानां सौम्याःबुधगुरुशुक्राःस्वक्षेत्रस्थाः चंद्रेस्वोच्चगेबलवतिलग्नेशेसतिजातानांनराणांषष्टिरायुर्व
र्षाणांषष्टिरायुःस्यात्॥२॥ लग्नाच्चन्द्राद्वासौम्याः पूर्णचंद्रबुधगुरुशुक्राः केंद्रस्थास्तत्रापिगुरौलग्नगे तत्रदशमस्थैः क्रूरैर्दृष्टंयुक्तंय
दिनभवतितदावत्सराणांसप्ततिरायुःस्यात्०शुभग्रहाःमूलत्रिकोणस्थाः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरौस्वोच्चगेलग्नेशेबहुबलेसतिनराणांगगनवसुसंख्यंनराणां अशीतिवर्षोपलक्षितंआयुःस्यात् एतेषुयोगेषुगुणगणयुक्तमिति
अनुषंगनीयं ३ सौम्येबुधेतिबलेकेंद्रस्थेसतिअष्टमपदंखेटहीनंयदितदावर्षाणांत्रिंशदायुःस्यात् निधनंसौम्येक्षितंचेत्गगन
हिमकरैर्दशभिःसंयुतःत्रिंशद्वर्षाणांचत्वारिंशदायुःस्यात् अथगुरौस्वराशौस्वद्रेष्काणेसतिमुनिनयनमितंसप्तविंशद्वर्षा।
णिआयुःस्यात् चंद्रःस्वर्क्षगोलग्नगोवासप्तमेशुभग्रहश्चेत्तदागगनरससमितंषष्टिवर्षमितंआयुःस्यात् शुभग्रहाःपंचमनवमस्थाः

यातामूलत्रिकोणेशुभगगनचराःस्वीयतुंगेसुरेज्येलग्नाधीशेऽतिवीर्येगगनवसुसमास्तुल्यमायुर्नराणां ३
सौम्येकेंद्रेतिवीर्येयदिनिधनपदंखेटहीनंसमाःस्यु स्त्रिंशत्सौम्येक्षितंश्चेद्गगनहिमकरैःसंयुतास्थास्वभेचेत्
स्वत्र्यंशेचामरेज्येमुनिनयनमितंस्वर्क्षगोलग्नगोवाचंद्रोद्यूनेशुभश्चेद्गगनरसमितंकोणगाःसौम्यखेटाः ४
कीटेलग्नेसुरेज्येयदिभवतितदाखाष्टतुल्यंलयेशोधर्मेगेचांगनाथेनिधनभवनगेक्रूरदृष्टेब्धिहस्ताः लग्ना
धीशाष्टनाथौलयभवनगतौसप्तविंशाद्विलग्नेक्रूरेज्यौचंद्रदृष्टौयदिनिधनगतःकश्चनास्तेद्विपक्षाः ५ ॥

कर्किणिलग्नेसुरेज्योयदिभवतितदाखाष्टतुल्यं अशीतिवर्षतुल्यमायुःस्यादिसग्निमश्लोकेनान्वयः॥४॥ अष्टमेशोनवमेभा
वेलग्नेशेक्रूरदृष्टेअष्टमगतेअब्धिहस्ताश्चतुर्विंशतिरायुःस्यात् लग्नाष्टमेशौअष्टमस्थौयदितदासप्तविंशतिवर्षाण्यायुः ॥
क्रूरसंयुतःगुरुःचंद्रदृष्टोलग्नेयदिअन्यःकश्चिद्ग्रहःअष्टमस्थःतदाद्विपक्षाःद्वाविंशतिरायुःस्यात् ॥ ५ ॥ ॥५॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा०लं० लग्नचंद्रौक्रूरग्रहयोगरहितौलग्नेऽष्टमंग्रहरहितं केंद्रेशुभग्रहैर्यदितदाखशैलाःसप्ततिः शुक्रबृहस्पती केंद्रगौचेत् शतंवर्षा
२६ णिगुरौकर्कलग्नेभृगुजेकेंद्रगेचशतंवर्षाणि एतैर्विशिष्टयोगाद्रूसर्थः योगस्यवैशिष्ट्यंयशःसंपत्सूचकत्वमितिज्ञेयं अथशनौ
नवमगेलग्नस्थेवाचंद्रेव्ययनवमगतेवर्षाणांशतमायुःस्यात् ६ क्रूरग्रहाःपंचमकेंद्रनवमस्थाःनोभवेयुः धनुर्मीनेलग्नेकेंद्रे
शुक्रेगुरौवानवमाष्टमंचशुभग्रहावलोकितंयदितदाशतंवर्षाण्यायुःस्यात् लग्नाच्चंद्राच्चग्रहाःअष्टमस्थाःनस्युःशुक्रगुरुब

लग्नेंदूक्रूरहीनौवपुषिसुरगुरौरंध्रभंखेचहीनंकेंद्रेसौम्येखशैलाःसितविबुधगुरूस्याच्छतंकेंद्रगौचेत् वागी।।
शेकर्कलग्नेशतमिहभृगुजेकेंद्रगेथार्कसूनौधर्मांगस्थेसुधांशौव्ययनवमगतेहायनानांशतंस्यात् ६ धीःकें
द्रायुर्नवस्थायदिखलखचरानोगुरौभेविलग्नेकेंद्रेकाव्येगुरौवाशुभमपिनिधनंसौम्यदृष्टंशतंस्यात् लग्ना
दिंदोर्नखेटायदिनिधनगतावीर्यभाजौसितेज्यौपूर्णायुःस्वोपराशौशुभगगनचराःषष्टिरंगोच्चगेज्ञे ७ कोदं
डांत्यार्धमंगंयदिसकलखगाःस्वोच्चगाश्चेज्जिनांशेगोंऽस्थेपूर्णेचकेंद्रेसुरपतिपूज्यौलाभगेज्ञेपरायुः ।।

लवेंतौतदापूर्णायुः व्योमार्कवर्षायुःस्यात् शुभग्रहाःस्वएशिस्थाः वृषेलग्नेवाचंद्रेसतिवर्षाणांषष्टिरायुःस्यात् ७ कोदंडां राम०
त्यार्धलग्नेधनुर्लग्नद्वितीयहोरायांबुधेजिनांशेवृषस्थे ॥ अन्येसर्वेग्रहाःस्वोच्चगाः तदापूर्णमायुःस्यात् गुरु शुक्रौके २६
न्द्रेसतिलाभगेचंद्रेपरायुःपूर्णायुः शुक्रमीनलग्नगेसौम्यग्रहदृष्टेचंद्रेऽष्टमस्थेगुरौकेन्द्रेसतिवर्षाणांश तमायुःस्यात्।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ तनुगृहपे इत्यग्निमश्लोकेनान्वयः ॥ ८ ॥ लग्नपे ऽष्टमस्थे चंद्रे दशमस्थे गुरौ बलवति अन्ये ग्रहाः नवमभवनगाः तदा शतायुः कर्के
लग्ने चंद्रजीवौ तृतीयषष्ठैकादशे शुभग्रहयुक्तौ शुक्रबुधौ च केंद्रे यदि तदापि शतायुः शतायुरिति देहलीदीपकन्यायेनोभयत्रान्वे
ति रविभौमशनयः गुरुनवमांशस्थाः केंद्रेषु लग्नस्थे गुरौ शेषाः अष्टमरहितभावस्था तदा नराणां शरगजतुलितं पंचाशीति वर्षे

शुक्रे मीने तनुस्थे निधनगृहगते सौम्यदृष्टे सुधांशौ जीवे केंद्रे शतं स्यादथ तनुगृहपे छिद्रगे पुष्करे ऽब्जे ८
वागीशे वीर्ययुक्ते नवमभवनगाः सर्वखेटाः शतायुः कर्के गे जीवचंद्रौ सहजरिपुभवे सत्कविज्ञौ च केंद्रे केंद्रे
सूर्यारमंदा गुरुनवलवगा वाक्पतौ लग्नयाते व्ययस्थानेषु शेषाः शरगजतुलितं स्यान्नराणां तदायुः ९ क्रूराः
सौम्यांशयाता उपचयगृहगाः कातराः कंटकस्थाः सौम्या व्योमार्कसंख्या यदि तनुपकुजौ रंध्रगौ नो परायुः केंद्रे
लग्नेशजीवौ नवसुतनिधने कंटके नो खलाख्याः संपूर्णपापखेटा यदि गुरुजलगा जीवभागे च सौम्याः ॥ १० ॥८

मितमायुः स्यात् ९ शुभग्रहनवांशस्थाः क्रूराः उपचयस्थाः त्रिषट्दश मायस्थाः कातराः भीरवः युद्धे पराजिता इति यावत् शुभ
ग्रहाः कंटकस्थाः केंद्रस्थाः तदा व्योमार्कसंख्यं विंशदधिकं शतं वर्षाणामायुः परायुः स्यात् परायुर्योगेषु शनिकुजौ अष्टमस्थौ
चेत्तदा नो परायुः परायुर्न भवतीत्यर्थः लग्नेशगुरू केंद्रस्थौ क्रूरास्त्रिकोणाष्टमकेंद्रवर्जिताश्चेत्तदा पूर्णायुः स्यात् क्रूरग्रहाः गुरुजल
गाः नवमचतुर्थगाः शुभाः जीवनवांशस्थाः ॥ यद्वा समराशिनवांशस्थाः संतः व्ययधनगृहगाः शुभाः पूर्णश्चंद्रः ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

लग्नस्थः इह योगे जातानां शतं वर्षाण्यायुः कथंभूतं इंदिरामंदिरं संपदासहितमिति ॥ अग्निमश्लोकपूर्वार्धेन संबंधः ॥ १० ॥
शुभग्रहयुक्ते लग्नेशे लग्ने अन्यग्रहैर्न दृष्टे अष्टमेशेऽष्टमगते सति वर्षाणां विंशतिरायुः स्यात् अष्टमेशे लग्नेशे च केंद्रस्थे बल
रहिते च सति त्रिंशद्वर्षाण्यायुः स्यात् ११ चंद्रे आपोक्लिमस्थे तृतीयषष्ठनवमद्वादशगते तनुपे लग्नेशे आपोक्लिमस्थे उभये

युग्मर्क्षांशेगतावाव्ययधनगृहगाश्चेच्छुभाः शीतभानुः संपूर्णो लग्नयायी शतमिह जनितामिंदि
रामंदिरं स्यात् लग्नेशे सौम्ययुक्ते वपुषि च लयपे रंध्रगे नान्यदृष्टे विंशत्केंद्रे लयेशे बलवियुजि तथा
लग्नपे त्रिंशदायुः ११ इन्दावापोक्लिमस्थे तदनु तनुपतौ निर्बले पापदृष्टे दंतैस्तुल्यं ततोऽर्कः खल
खगविवरे लग्नगो ज्ञत्रिसंख्यम् ॥ रिःफे केंद्रे सुरेज्ये गुरुरिपुसहजे स्यात्सपापे गनाथे रामाब्दं कर्क
लग्ने कुजगुहिनकरौ केंद्रं रंध्रं ग्नहीनम् ॥ १२ ॥ ॥ १२ ॥ ॥ १२ ॥ ॥ १२ ॥ ॥

निर्वले क्रूर दृष्टे च सति दंतैस्तुल्यं द्वात्रिंशद्वर्षाण्यायुः स्यात् क्रूरग्रहयोरंतरे लग्नगोऽर्कश्चेत्तदाऽज्ञत्रिसंख्यं एकत्रिंशद्वर्षाण्या
युः ॥ ॥ गुरौ द्वादशे केंद्रे वा सपापे लग्ननाथे नवमषष्ठतृतीये सति रामाब्दं त्रीणि वर्षाण्यायुः कर्कलग्ने चंद्रभौमे केंद्राणि अ
ष्टमभवनं च ग्रहरहितं यदि तदा रामाब्दं स्यादिति अग्निमस्थेनान्वयः ॥ १२ ॥ ॥ ॥ ॥ १२ ॥ श्रीहरिकृष्णाय ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽष्टमेशे लग्नगते ऽष्टमभवनं शुभग्रहरहितं खवेदाश्चत्वारिंशद्वर्षाण्यायुः स्यात् मकरस्थो शनिरवीक्षितो यस्य तुंगो ऽष्टमेशे केंद्रगे पा
रावाराब्धिसंख्यं चतुश्चत्वारिंशद्वर्षाण्यायुः स्यात् तदनु शुभग्रहाः सहजव्ययैर्शुभग्रह नवांशे राशौ वा ऽत्रिंशद्वर्षाण्यायुः स्यात् १३
लग्नेशे क्रूरदृष्टे शुभग्रहाः बलिनः चंद्रे शुभवर्गगे क्वापि भावे स्थिते सति गुणमुनितुलितं त्रिसप्तति वर्षतुल्यमायुः स्यात् चंद्राद् ष्टम
रमाब्दं स्याद्व्ययेशे वपुषि च निधनं सौम्यहीनं खवेदा लग्नेशो रंध्रयातो वपुषि निधनपः स्यान्नूणां वाण
संख्यं ॥ नक्रे तिग्मांशुमंदौ सहजरिपुगतौ कंटके रंध्रनाथे पारावाराब्धिसंख्यं तदनु शुभखगाः सद्व्ययक्षेत्र
स्थाग्निः १३ क्रूरैर्दृष्टे गनाथे यदि शुभविहगा वीर्यवंतः सुधांशौ संस्थे सौम्ये गणे चेद्गुणमुनितुलितं रंध्रगे ऽर्म
ध्यमायुः स्याच्चंद्रदृष्टि पापैर्युतपतसुते द्य गलग्ने हि याते रिःफेशे रंध्रनाथे यदि बलरहिते कं कपन्नाक्ष
संख्यं १४ कर्केंगे सन्नसन्नौ खलविहगयुते पुष्करस्थे हि जे शे केंद्रे याते सुरेज्ये शरविशिखमितं पुष्करे नीरगे
वा सौम्ये पीयूषभानौ व्ययनिधनगते देहगे वा कवीज्यावेकर्से व्योम वाणैर्व्ययरिपुनिधने लग्ननाथाढ्यचंद्रे
गे पापैः दिवाजन्मनि मध्यमायुः स्यात् ऽथ शनौ द्व्यगे हि स्वभावसंज्ञ के लग्ने स्थिते द्वादशभावनाथे ऽष्टमनाथे च बलहीने सति
कंकपन्नाक्षसंख्यं पंचविंशति वर्षाण्यायुः स्यात् १४ सूर्ये कर्कलग्ने क्रूरयुते चंद्रे दशमगे गुरौ केंद्रस्थे शरविशिखमितं पंच पंचाश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वर्षमितमायुःस्यात् बुधेदशमे चतुर्थगेवाचंद्रेव्ययेऽष्टमेलग्नेवाशुक्रगुरुएकराशिगो स्थितोचेत्तदाशोमवाणैःसमं पंचाश
द्वर्षमितमायुःस्यात् लग्नेशयुक्तेचंद्रे द्वादशषष्ठाष्टमेलग्नेशेशस्यंशेशानिनवांशगेभुजगशरमितं अष्टपंचाशन्मितमायुः।
स्यादिसग्निमश्लोकेनान्वयः॥ १५॥ शुभग्रहाः अष्टमव्यतिरिक्तभावस्थाः लग्नेशः पापयुक्तः त्रिकस्थस्तदाषष्टिवर्षाण्या

शंत्यंशेलग्ननाथेभुजगशरमितंस्याद्दशोसौम्यखेटारंध्रोनादेहनाथोव्ययरिपुनिधनेपापयुक्तष
ष्टिरायुः राशीशोलग्ननाथोदिनमणिसहितोमन्मथगोवाक्पतिश्चेन्नो केंद्रे षष्टिरायुर्वपुषिदिनपतिः
शत्रुभौमान्वितश्चेत् १६ वागीशेहीनवीर्येव्ययतनुजगतेयामिनीशेखशैलाधर्मेसर्वैः परायुःखलख
गलव[illegible]गैःकेंद्रयातैरशीतिः क्रूरैःक्रूरर्क्षयातैःशुभभवनगतैःसौम्यखेटैःसवीर्यैर्लग्नेशेस्यात्परा
युःसुतभवनगतैःषष्टिरायुर्नराणाम् ॥ १७ ॥ ॥ १७ ॥ ॥ १८युःस्यात् सूर्यसहितश्चंद्रराशी

शः लग्नेशश्चमन्मथगः गुरुः केंद्रगो नचेत्षष्टिवर्षाण्यायुःस्यात् निजशत्रुभौमाभ्यांयुक्तः सूर्येलग्नेगुरौबलहीनेचंद्रेव्ययपं
चमस्थेखशैलाःसप्ततिवर्षाण्यायुःस्यादित्यग्निमश्लोकेनान्वयः॥ १६॥ सर्वैःग्रहैःक्रूरराशिस्थैःशुभैःशुभग्रहगतैःल
ग्नपतौसबलेपरायुःस्यात् सुतभवनगतैःसर्वैर्ग्रहैःनराणांषष्टिवर्षाण्यायुःस्यात् ॥ १७ ॥ ॥ १७ ॥ ॥ १७ ॥ ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनुर्धरराश्यंत्यनवांशे लग्नगे शुभैः प्रथमनवांशस्थैः केंद्रगैर्वर्षाणां शतमायुः स्यात् ॥ तृतीयचतुर्थाष्टमस्थैः सर्वैश्चिरायुः दीर्घमायुः
स्यात् लग्नाच्चंद्राच्चाष्टमे शेषव्ययकेंद्रस्थैः अष्टाविंशतिवर्षाण्यायुः स्यात् केंद्रे शुभग्रहरहिते अष्टमस्थश्चेत्कश्चिद्ग्रहस्तदा ख
रामास्त्रिंशद्वर्षाण्यायुः स्यात् १७ चंद्रे क्षीणे सति क्रूरग्रहोऽष्टमस्थः मृत्युभावेशः केंद्रस्थः लग्नेशो निर्बलस्तदा खाग्नितुल्यं वि

सारंगस्यांत्यभागे यदि वपुषि गते चाद्यभागे च केंद्रे सौम्यैः खेटैः शतं स्याद्वसुसहजसुखे स्याच्चिरायुः सम
स्तैः लग्नात्प्रालेयभानोर्निधनसदनपैः फकेंद्रेऽष्टविंशत्केंद्रे सौम्यग्रहोने यदि मृतिभवने कश्चिदास्ते ख
रामाः १७ क्षीणे प्रालेयभानौ यदि खलखचरो मृत्युगो मृत्युनाथः केंद्रस्थो लग्ननाथो निजबलरहितः खाग्नि
तुल्यं तदायुः सौम्यैरापोक्लिमस्थैर्दिनमणिजविधू वैरिरंध्रालयस्थौ तुल्यं कामांकुशैः स्याद्व्ययधनमृतिगौ रि
फगौ पापखेटौ १८ हीनोऽस्वर्भानुना वा यदि हिममहसा व्योमनेत्रप्रमाणं केंद्रस्थौ स्वर्पमंदौ यदि वपुषि कुजः
पुष्पवाणांकुशं स्यात् शुक्रेज्यावंगयातौ तनयभवनगौ भौमपापावनायुर्जन्मेशः सार्कलग्ने खलशुभसहि।

शतिवर्षाण्यायुः स्यात् शुभग्रहैः आपोक्लिमगतैः शनिचंद्रौ षष्ठाष्टमस्थौ तदा कामांकु ११ नक्षे सितः स्यादनायुः २० ॥
शनैः खेस्तुल्यं विंशतिवर्षाण्यायुः स्यात् अथैतन्निम्नश्लोकेनान्वयः १८ अथ राहुश्चंद्रसहितो क्रूरग्रहो द्वितीयाष्टद्वादशगो तदा व्यो
मनेत्रप्रमाणं विंशतिसंख्यमायुः स्वर्पशनिकेंद्रगौ कुजो लग्नगस्तदा पुष्पवाणांकुशं विंशद्वर्षाण्यायुः स्यात् शुक्रगुरू लग्नस्थौ भौम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जा०लं० पापौ पंचमस्थौ तदा अनायुः अल्पायुः स्यात् कर्कयुक्तो लग्ने गुः जन्मराशिसंस्थितः अन्यैर्युतः दृष्टश्चेत्तदा अनायुः अल्पायुः स्यात् २०॥
२६ जातकशास्त्रसमुद्रोत्तीर्णैः समस्तजातकशास्त्रज्ञादिभिरित्यर्थः॥ पूर्वं यद्योगजमायुः प्रोक्तं प्रणीतं तस्मात्पूर्वोक्तात्सारभूतं दृढांश
भूतं आयुर्यद्देन दुक्तं तत्सुण्याचारश्लोकभाजां सदाचारे पलस्थित धर्मे यशो युक्तानां नराणां घटत इत्यध्याहारः॥२१॥ अथादेशवि

यत्स्तं प्रोक्तं योगजं पूर्वमायुर्होरापारावारपारंगमज्ञैः तस्मादायुः सारभूतं यदेतत्पुण्याचारश्लोकभाजां नराणां २१
बलाबलविवेकेन पुष्कलयशालिनां सुमनोभिरिदं देश्यमायुर्धर्मादिशालिनां २२ हृद्यैः पद्यैर्गुंफितेस्सूरितो
षेऽलंकाराख्ये जातके मंजुलेऽस्मिन्॥ आयुर्दायः श्रीगणेशेन वर्यैर्वृत्तैर्युक्तो बाहुपक्षैः प्रणीतः २३ इति श्रीजात
कालंकारे पंचमोऽध्यायः ॥५ लग्नाधीशेऽर्थगे चेद्धनभवनपतौ लग्नयाते यदैवास्माद् दुद्ध्याचारप्रवीणः परमसु
कृतकृत्सारभुग्योगशीलः भ्रातृस्थाने गनाथे सहजभवनपे लग्नयाते बलशक्तः सहद्भूराजपूज्यः कुलजनसु

धिरनुष्टुप्वृत्तेनाह॥ बलाबलविवेकेनेति० पुष्कलयशालिनां सूर्यादिग्रहाणां बला १९ स्वदोमात्तपक्षेण युक्तः १ ॥
बलविचारेण सुमनोभिरिदमायुः कथनीयं धर्मादिशालिनां भवति पापकर्मिणां न भवतीति अर्थात्सिद्धं २२ अध्यायं समाप राम०
यति हृद्यैः पद्यैरिति २३ इति श्रीजातकालंकारटीकायां पंचमोऽध्यायः ५ अथ लग्नेशधनेशादीनां व्यत्ययात्फलान्याह० ॥ २६
लग्नेशे धनगे धनेशे लग्नगे सति जातो धनवान् बुध्याचारप्रवीणः बुध्याचारेण च निपुणः उत्कृष्टपुण्यकृत् बलवान् भोगे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८

कशीलश्चस्यात् लग्नेशेसहजेसहजेशेलग्नस्थेअल्पवीर्यः प्रशस्तबंधुयुक्तः कुलजानांसुखदः भ्रातृपक्षेणसहितश्चस्यात् १ चतुर्थे
शेलग्नस्थेलग्नेशेचतुर्थस्थेजातःक्षमायुक्तः तातात्राराजकार्यप्रगुणमतियुक्तःपितुरराज्ञायांराजकार्येचऋजुमतिःसन्प्रशस्तो
गुरुःयस्यपहासतोगुरुःस्वकोयपक्षेचस्थितःस्यात् पंचमेशेलग्नेलग्नेशेपंचमस्थेसतिनरःप्रशस्तमनाःविद्यायाभूषितः

तुर्येशेलग्नयातेतदनुतनुपतौतुर्यगेस्यात्क्षमावान् तातात्राराजकार्यप्रगुणमतियुतःसद्गुरुःस्वीयप
क्षः लग्नस्थेसूनुनाथेतनुजपदगतेलग्ननाथेमनस्वी विद्यालंकारयुक्तोनिजकुलविदितोज्ञानवान्मा
नसक्तः २ षष्ठेशेलग्नयातेतदनुतनुपतौषष्ठगेव्याधिहीनो निसंद्रोहादिसक्तोवपुषिसबलवान्द्रव्य
वान्संग्रहीस्यात् मूर्तीशेकामयातेमदनसदनपेमूर्तिगेतातसेवीलोलस्त्रांतोंगनायाभवतिहिमनुजः।
सेवकःशालकस्य ३ ॥ ॥ स्वकुलेविख्यातोज्ञानवान्सदसद्वस्तुतःमानेअभिमानेसक्तः २ षष्ठेशेलग्नगेतदनु
लग्नगेषष्ठेशेसतिनित्यंरोगरहितःअतएवशरीरेबलवान्द्रोहादौसक्तःआदिशब्देनपरानिष्ठकरणादिज्ञेयं संग्रहपरःअ
तोद्रव्यवान्स्यात् लग्नेशेसप्तमस्थेसप्तमेशेलग्नस्थेसतितदामनुजः पितृभक्तःस्त्रीविषयेचंचलमनाःशालकस्यभार्याभ्रातुः

पंचकैःस्वा ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰लं॰ लग्नेशेऽष्टमगेऽष्टमेशे लग्नगे द्यूतव्यवहारे निपुणः विक्रमवान् चौर्यादिसहितः आदिशब्देन वंचनासु निपुणः राजतो लोकतो वा नि
३० धनपदं मरणमाप्नुयात् लग्नेशे नवमस्थे नवमेशे लग्नस्थे सति विदेशवासी नितांतं धर्मे रतः देवाराधने गुरुसेवायां च तत्परः।
राजसत्कारभाजनश्च स्यात् ४ लग्नेशे कर्मस्थे कर्मनाथे लग्नगे भूपालः लाभेन तद्रूपेण च विख्यातः गुरुसेवायां प्रीति

अंगेशे रंध्रयाते निधनगृहपतावंगगे द्यूतबुद्धिः शूरश्चौर्यादिसक्तो निधनपदमियाद्भूपतेर्लोकतो वा देहा।
धीशे शुभस्थे शुभभवनपतौ देहसंस्थे विदेशी धर्मासक्तो नितांतं सुरगुरुभजने तत्परो राजमान्यः ४ कर्मस्थे।
लग्ननाथे गगनभवनपे लग्नगे भूपतिः स्यात् ख्यातो लाभे च रूपे गुरुभजनरतो लोलुपो द्रव्यनाथः लाभेशे लग्न
याते तनुभवनपतौ लाभसंस्थे सुकर्मा दीर्घायुः क्षोणिनाथो शुभविभवयुतः कोविदो मानवः स्यात् ५ लग्नेशे।
रिःफयाते व्ययसदनपतौ लग्नगे सर्वशत्रुर्बुद्ध्या हीनो नितांतं कृपणतरमतिर्द्रव्यनाशी विलोलः इत्थं तातादि
कानामपि जनुषि नभश्चारिखेचराणां हि योगाद्वाच्यं होरागमज्ञैस्तदनु तनुपयुक् भार्गवे राजपूज्यः ६ ॥ ६

मान् लोलुपः। चंचलचित्तः द्रव्याणां स्वामी च स्यात् लाभेशे लग्नस्थे लग्नेशे लाभगे शोभनकर्मा दीर्घायुः क्षोणीनाथो राजा शुभवि राम॰
भवयुतः कोविदो धीरश्च मानवः स्यात् ५ लग्नेशे रिःफयाते व्ययनाथे लग्नगे सति सर्वशत्रुः सर्वेषां जनानां शत्रुः सर्वे शत्रवो यस्ये ३०
ति वा पतनो निरंतरं बुद्ध्या हीनः बुद्धिरहितः कृपणतरमतिः अतिशयवित्तहीन बुद्धिः अतश्च द्रव्यनाशी विलोलः निर्विचारी शी

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकारीचस्मात्॥ इत्थमुक्तप्रकारेणजातकजन्मसमयेजातादिकानामपिविवेचरणंयोगाद्वफलंहोराशास्त्रज्ञैर्वक्तव्यं अयमर्थः जा
तकस्यजन्मलग्नाद्द्वादशभंभवनंतातत्र गेहंतद्देवलग्नंप्रकल्प्यतदग्निमान्क्रमात् क्रमेण धनादिभावान्परिकल्पयेत् लग्नभावेशयो
र्बलमपस्थितिमवलोक्यलग्नाधीशेऽर्थगेचेद्धनभवनपतौलग्नयातेऽर्थवान्स्यादित्यादिनाउक्तोदाहरणेनजातादीनां अर्थवत्ता
एवंस्वमत्यासुफलप्रबोधंश्रीजातकालंकरणंमनोज्ञं इन्दैरनंतेशमितैर्निबद्धंमयामुदेदैववि
दांमुदारं ७ पुष्करालयवशागुणसारजातकोक्तिरमलेवमरालासंस्कृताविहरतांभवतांमेमान
सेतिसरलेसुकवीनां ८ ॥ इद्धैःपद्यैर्गुंफितेसूरितोषेलंकाराख्येजातकेमंजुलेऽस्मिन् भावा॥
ध्यायःश्रीगणेशेनवर्यैर्इन्द्रैर्युक्तोऽष्टाभिषष्ठःप्रणीतः ९ इतिजातकालंकारेषष्ठोऽध्यायः ॥६॥
दिफलंहोराशास्त्रज्ञैर्वाच्यं अथमंगलायशुभफलेऽप्यादेशंसमापयति तदनुतनुपयुक्भार्गवेलग्नेशसुक्तेशुक्रेत्रिकव्यतिरिक्त
भावग इतिशेषात्तत्रजातोराजपूज्योभवति राजपूज्यशब्देनवांछितपदार्थानांसोलभ्यंध्वन्यते ६ एवमुक्तप्रकारेणमयागणेशे
नस्वबुद्ध्याउदारंसारनिरूपणंमनोज्ञं पदपदार्थरुचिरंसुफलप्रबोधंस्फुटफलजनकंदैवज्ञानांप्रमोदाय अनंतेशमितै
र्दशाधिकशतप्रमितैर्इन्दैःश्रीजातकालंकरणंनिबद्धंविरचितं ७ अथस्वरचितग्रंथस्यकविमनोरुचिरत्वंप्रार्थ्यतेमेमम
जातकोक्तिःभवतांपूज्यानांकवीनांअतिसरलेमानसेनिर्मलामरालाहंसीवविहरतांकथंभूताजातकोक्तिःपुष्करालयवशापुष्कर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा॰लं॰ माकाशस्तदेवालयंयेषांतेपुष्करालयाःखगाःतेषांवशाधीनाःशुभाशुभस्यतत्कर्महोपयोज्याद्इत्यर्थः हंसीपक्षेपुष्करंजलंतस्या
३१ लयोमानसःतद्गातहृत्तिनीत्यर्थःगुणसारःजातकगुणानांसारोयदेशोऽर्थोयस्यांसांहंसीजलेगुणसारंहितगुणादेर्ध्यंयुक्ता
राजहंसास्तुतेचंचुचरणैर्लोहितैःसिताइतिअभिधानात् अमलाशुद्धदोषरहिताइत्यर्थः पक्षेऽमलानिर्मलेत्यर्थःसंस्कृ
तामनोज्ञादिवाक्यपरिष्कृताहंसीपक्षेनिसर्गरुचिराइत्यर्थः ८ अथशालिन्याऽध्यायंसमापयतिहृद्यैःपद्यैरितिस्पष्टार्थः
॥८॥ इतिश्रीजातकालंकारेटीकायांषष्ठोऽध्यायः ६ ॥अथविशिष्टस्ववंशंसंख्यापयन्ग्रंथसमाप्तौदेशकालविशेषंप्रख्या

अभूदवनिमंडलेगणकमंडलाखंडलःश्रुतिस्मृतिविहारभूर्विबुधमंडलीमंडनं प्रचंडगुणगुर्जराधि
पसभाप्रभातप्रभाकवींद्रकुलभूषणंजगतिकाह्नजीकोविदः १ भारद्वाजकुलेबभूवपरमंतस्मात्सुता
नांत्रयंज्यायांस्तेष्वभवद्गुणगणहत्तिलकःश्रीसूर्यदासःसुधीः श्रीमान्सर्वकलानिधिस्तदनुजोगोपाल
नामाभवच्छ्रीमहादेवविदांवरस्तदनुजःश्रीरामकृष्णोभवत् २ ॥ एपपत्तिन्निभिःपृथ्वीशार्दूलविक्रीडितैर्वृत्तैः अव राम॰
निमंडलेभारद्वाजकुलेनाम्नाकाह्नजीकोविदःपंडितःअभूत् सकीदृशः जगतिलोकेमंडलज्योतिर्विद्देवाचार्यःसुरुत्तरपदेव्याघ्र ३१
पुंगवर्षभकुंजराःसिंहशार्दूलनागाद्याःपुंसिश्रेष्ठार्थगोचराइत्यभिधानात् श्रुतिस्मृतिविहारभूःअस्यपःश्रुतिस्मृतिपंडितापादन
द्वारातासांविहारमिह विबुधमंडलीमंडनंपंडितशोभादायकइत्यर्थःप्रचंडगुणगुर्जराधिपसभाप्रभातप्रभाप्रवंदरिपुविजय

CC-0. In Public Domain. Digitization by eGangotri

शालिनेकगुणःसंभवगनहाद्यो यस्य सगुर्जराधिपःगुर्जरदेशाधिपः तस्यसभापाःसभासभेवप्रभाप्रकाशकइत्यर्थः कवींद्रकुलभूष
णंकविश्रेष्ठंसंदेहस्तप्रभावहम् १ तस्मात्काह्नजीकोविदात्परमंउत्कृष्टंसुतानांत्रयंबभूव तेषांज्यायान्ज्येष्ठःग्रहज्ञतिलकः
गणकश्रेष्ठःसुधीःश्रीहर्षदासःअभवत् तदनुजः तस्मात्ज्ञातः श्रीमान्वेदवित् सर्वक लानिधिः सर्वकलाकुशलःगोपा
लनामाअभवत् तदनुजःश्रीमतांदैवज्ञानांचश्रेष्ठः॥श्रीरामकृष्णोऽभवत् २ तत्रगोपालस्तनुः गणेशः मार्गणरामसायकध
शाकेमार्गणरामसायकधरा १५ ३५ संख्येनभस्येतश्यामासेब्रध्नपुरेसुजातकमिदंचक्रेगणेशः॥
सुधीः॥छंदोलंकृतिकाव्यनाटककलाभिज्ञःशिवाध्यापकस्तत्रश्रीशिवविन्मुदे गणितभूर्गोपाल।
स्तनुःस्वयं ३ येपठिष्यंतिदैवज्ञास्तेषामायुःसुखंशिवम् भूयात्कैरवकुंदाभासुकीर्तिःसर्वतोदिशम् ४
तत्संख्येशाकेपंचत्रिंशदधिकपंचदशमिते शाकेनभस्येभाद्रपदमासेब्रध्नपुरेसूर्यपुरेइदंसुजातकंशोभनंजातकंश्रीशिवाख्य
विदःप्रमोदायचक्रे कृतवान् कथंभूतोगणेशः शिवाध्यापकोशिवोऽध्यापकउपाध्यायोयस्य छंदोलंकृत्यादिवत् छंदांसिमा
त्रावृत्तभेदाभिन्नानिवृत्तानिअलंकृतयःउपमाद्यलंकाराः काव्यानिगद्यभेदेनद्विविधानिनाटकानिसंस्कृतप्राकृतभाषानिव
द्धानिकलाश्चित्रकर्माद्याःगणितभूर्गणितास्रयःसिद्धांतविदित्यर्थः ३॥ ॥३॥ ॥४॥ ॥५॥ ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जा०लं० ॥ अध्यायंपूरयति हृद्यैःपद्यैरितिस्पष्टार्थः ॥५॥ श्रीमद्दर्ककुलेमहीपतियशःशुक्लीकृतेजातके ह्यासीत्कृष्णदयाभरप्रमुदितः
३२ कृष्णोजयाद्यःकृती तत्पुत्रेणविभावितातिरुचिरासज्जातकालंकृतिः श्रीरेघाहरभानुनामतिमतामोदाय भूयाच्चिरं

हृद्यैःपद्यैर्गुम्फितेस्फुरितेषेलंकाराख्येजातकेमंजुलेस्मिन् वंशाध्यायः श्रीगणेशेनवृत्तैर्युक्तोवेदैः
शैलसंख्यैःप्रणीतः ॥५॥ इतिश्रीगणेशेनविरचितेजातकालंकारेसप्तमोऽध्यायःसमाप्तः ७
॥ समाप्तम् ॥ ॥सम्पूर्णम्॥ ॥ शुभमस्तु ॥ ॥ श्रीरस्तु॥ ॥शुभंभूयात्॥ ॥

मू॥१॥ ॥इतिश्रीमच्छुक्लोपनामकहरभानुभाविताजातकालंकारटीकासमाप्ता ॥ ॥समाप्तोयंग्रंथः॥ ॥ ॥ गम०
॥ संवत् ॥ १९२६ ॥ शाके ॥ १७९१॥ ॥ शुभंभूयात्॥ ॥ श्रीरस्तु ॥ शुभम् ॥ ॥ ७ ॥ ३२

CC-0. In Public Domain. Digitization by eGangotri

॥ इतिषट्पञ्चासिकासटीकसमाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भूमौ वृषगो कुल्याखेमिथुने गीतनृत्यस्थाने सङ्ग्रामभूमौ वा कर्कटे जलसमीपे सिंहे रण्यभूमौ· कन्यायां नौकासमीपे तुले आप
णगृहे वृश्चिके सर्प्पनिवासवल्मीकादिभूमौ धनुषि सङ्ग्रामेऽश्वभूमौ वा मकरे जलसमीपे कुम्भे शिल्पिगृहे भाण्डस्योपरि समी
पे वा मीने जलसमीपे इति खचराश्च सर्व्वे इति वृहज्जातके प्रोक्तं वयोजातिश्च लग्नपादिति लग्नपाल्लग्नस्वामिनश्चोरस्य वयः
प्रमाणं जातिश्च वदेत् तथा च संहितायां वयांसि तेषां स्तनपानबाल्यव्रतस्थितायौवनमध्यवृद्धाः अतिवृद्धा इति· चन्द्रभौम
ज्ञशुक्रजीवार्कशनैश्चराणां इत्येवं चन्द्रे लग्नपतौ शिशुः भौमे चतुर्वर्षाधिकः बुधे ब्रह्मचारी द्वादशाब्दः शुक्रे यौवनोपेतो
द्वात्रिंशदब्दः गुरौ मध्यवयः पञ्चाशदब्दः सूर्य्ये वृद्धः सप्तसब्दः सौरे तथैव वृद्धः सप्ततेरधिकश्चेति अथवा प्रथमोक्तमेवस्या
त् पुरुषेष्विति· जातिर्ब्राह्मणादिः जीवसितौ विप्राणां क्षत्रस्यारोष्णगू विशां चन्द्रः शूद्राधिपः शशिसुतः शनैश्चरः सङ्करभ
वानामिति जातिनिर्णयः कार्य्य इति ५६ ॥ इति श्रीभट्टोत्पलविरचितायां षट्पञ्चाशिकाविवृतौ मिश्रकाध्यायः समाप्तः ॥

प॰मं॰ ख्यापणागतो मानो ग्रतहस्तो भाण्डं विचिन्तयति द्वितीयः पुरुषः गृध्रतुल्यवदनो घोटकान्वितः क्षुधितस्तृषितश्च तृतीयः पुरुषो दग्ध
टी॰म॰ मुखो दीर्घदृष्टिः धनुष्पाणिः ७ वृश्चिकप्रथमः स्त्री नग्नास्थानच्युतासर्प्पनिबद्धपादा मनोरमा द्वितीयः स्त्री भर्तृकृतामुजगावृतधारी
१७ रस्थानासुखान्यपि वाञ्छती तृतीयः पुरुषश्चिपिटवक्त्रः ८ धन्विप्रथमः पुरुषो रोमशः धनुष्पाणिः द्वितीयः स्त्री सुरूपा गौरवर्णा तृती
यः पुरुषो दण्डहस्तः कूर्च्ची ९ मकरस्य प्रथमः पुरुषो रोमशः स्थूलदन्तो बन्धनभृत् रौद्रवदनः द्वितीयः स्त्री श्यामवर्णा लङ्कारा तृतीयः
पुरुषः श्यामवर्णः दीर्घमुखो धनुष्मीन् १० कुम्भस्य प्रथमः पुरुषः गृध्रतुल्यवदनः सकम्बलः द्वितीयः स्त्री रक्ताम्बरा तृतीयः श्यामः स
रोमकर्णः ११ मीनस्य प्रथमपुरुषो नौस्थः द्वितीयः स्त्री गौरा नौस्था तृतीयः पुरुषो नग्नो भीतः सर्प्पवेष्टिताङ्ग इति ॥ एतद्बृहज्जातके
वराहमीहिराचार्य्यैरुक्तं कठ्यासितवस्त्रवेष्टितः इत्यादिना ग्रन्थेन अस्माभिरिह सङ्क्षेपतः प्रयोजनमात्रं दर्शितमिति एवं द्रेष्का
णैस्तस्करा उक्ता इति राशिभ्यः कालदिग्देशा इति राशीनां कालविभागः मेषाद्याश्चत्वारः सधन्विमकराः क्षपाबला ज्ञेया इति जात
के उक्ताः तेन मेषवृषमिथुनकर्कधन्विमकराणामन्यतमे लग्ने रात्रिसंज्ञके रात्राववपहृतं उक्तं च सिंहकन्यातुलावृश्चिककुम्भमीन
नामन्यतमे दिवासंज्ञके लग्ने दिनेऽपहृतमिति एवं कालो ज्ञेयः अथ दिक् मेषसिंहधनुषि पूर्वस्यां गतं वृषकन्यामकरे दक्षिणस्यां १७
मिथुनतुलाकुम्भैः पश्चिमायां कर्कटवृश्चिकमीने उत्तरस्यां दिशि गतमिति अथ देशः मेषलग्ने पृच्छाकाले स्थिते मेषप्रचारगतो

ह्रस्वः परिवर्त्तुलं मध्यमगा यत दीर्घह्रस्वादि दीर्घमनीवायामं अंशकपतेः सबलेन यथा सारं अल्पबलेऽन्तः सुषिरं नीचस्थेः समितेवा नष्टप्रा
यमेव मंशकवशाद्द्रव्यं ज्ञायते द्रेष्काणैर्लग्नत्रिभागे सत्स्करा श्चौराः स्मृताः ३ छायादृशौ द्रेष्काणस्याकृतिस्तावद्दृश्यैव तस्करस्यापि वा
ज्ञानं यथा मेषस्य प्रथमद्रेष्काणः पुरुषः परशुहस्तः कृष्णो रक्तनेत्रो रौद्रः द्वितीयः स्त्री लोहिताम्बरधरा स्थूलोदरी दीर्घमुख्येकपादा तृ
तीयः पुमान् क्रूरः कपिलो रक्ताम्बरो दण्डहस्तः १ वृषस्य प्रथमः स्त्री कुञ्चितलूनकेशा स्थूलोदरी दग्धपटा द्वितीयो नरः कलावित् लाङ्ग
लशकटवान् शरकर्म्मणि कुशलः तृतीयो नरो वृहत्कायो वृहत्पदः २ मिथुनस्य प्रथमः स्त्री रूपान्विता हीनप्रजा रजस्वला मरणका

राशिभ्यः कालदिग्देशावयो जातिश्च लग्नपात् र्द्दं ॥

र्य्यकृतोद्यराद्वितीयः पुरुषः उद्यानसंस्थः कवची धनुष्मान् तृतीयः पुमान् कृष्णो विभूषितः पण्डितो धनुष्पाणिः ३ कर्कटस्य प्रथ
मः पुरुषो हस्तिसदृशशरीरः शूकरमुखः द्वितीयः स्त्री यौवनोपेता समर्थारण्ये स्थिता तृतीयः पुरुषः सर्पवेष्टितः ४ सिंहे प्रथमः शा
ल्मलिसंस्थो गृध्रजम्बुकवराहश्वाननः द्वितीयः पुरुषो धनुष्पाणि रुन्नतनासाग्रः तृतीयो नरः कूर्चो कुञ्चितकेशो दण्डहस्तः ५ क
न्यकायाः प्रथमः स्त्री पुष्पपूर्णेन घटेन मलदिग्धाम्बरा गुरोः कुलं वाञ्छन्ती द्वितीयः पुरुषो लेखनो हस्तो रोमशः कार्मुकपाणिः तृतीयः स्त्री
गौराङ्गी उच्चासु धौतांघ्री दुकूलाच्छादिता कुम्भकन्दुकहस्ता देवालयप्रवृत्ता ६ तुलाप्रथमः पुरुषो वी·

ष·पं· नाप्यवलोकितस्तदा रोगार्तः परदेशस्थितो रोगपीडितो वक्तव्यः अनेनैव लक्षणेन युक्तः सौरोऽष्टमस्थानेस्थितस्तदा तस्यैव रोगार्त
टी·भ· स्य मृत्युकरो भवति ५४ अथ कश्चित्पृच्छति मदीयः पिताऽन्यदेशे स्थितस्तत्र किमद्यापि तिष्ठति वान्यत्र देशान्तरे गत इत्येतज्ज्ञा
१६ नमाह सौम्यैः शुभग्रहैर्युतः सहितस्तेषामन्यतमेन दृष्टोऽवलोकितो भवति तथाभूतो लग्नाच्चाष्टमर्क्षे स्थितः अष्टमस्थानमुप
गतो भवति तदा तस्य प्रष्टुः पिता तस्माद्देशादन्यत्र देशान्तरे गतो वाच्यः अन्यथा तत्रैव स्थित इति ५५ अधुना तु तस्यार्थस्य स्वरूपं
तस्करकालदिग्देशानां च तस्करस्य वयोरूपं जातिं चाह अंशकादिति· लग्नस्य तात्कालिकस्य नवमभागात्· द्रव्यमपहृतम् धातु

सौम्ययुतोऽर्कः सौम्यैः संदृष्टश्चाष्टमर्क्षसंस्थश्च तस्माद्देशादन्यगतः स वाच्यः पिता तस्य ५५ अंशका।
ज्ज्ञायते द्रव्यं द्रेष्काणैस्तस्कराः स्मृताः॥ ९ मूलजीवाख्यं ज्ञायते एतत्पूर्वमपि व्याख्यातं स्वांशे विलग्नेपदिवा त्रिकोणे इति

तस्य च राशितुल्यो वर्णो वक्तव्यः तथा च लघुजातके अरुणसितहरितपाटलपाण्डुविचित्राः सितेतरपिशङ्गौ पिङ्गलकर्बुरबभ्रुकमलि
नाः रुचयो यथासङ्ख्यमिति तस्य च दीर्घमध्यह्रस्वत्वं न वांशकवशाज्ज्ञेयं तत्र कुम्भमीनमेषवृषाः ह्रस्वाः मकरधन्विमिथुनकर्कटा मध्य
माः सिंहकन्यातुलावृश्चिका दीर्घाः तथा चास्मदीये प्रश्नज्ञाने मेषवृषकुम्भमीना ह्रस्वाः मिथुनकर्किचापधरमकराः मध्या हरियुवति ष·म
तुलालयः स्मृता लग्नगा दीर्घा इति॥ ॥ १६

ष्टः सप्तमभवनादिति पृच्छालग्नात्सप्तमो यो राशिस्तस्मात्त्कालं यदि कश्चिद्ग्रहो भ्रष्टः प्रच्युतश्चलितः स च भौमादिकस्तत्कालं यद्य
न्यत्र गतः तदा प्रवासी पुनर्निवृत्तः स्यात् निवर्तते तद्रूपः अर्थः प्रवासश्चिन्तितो नेनकिन्तु न यास्यति यदि न वक्रीति यो सौ सप्तमभवनात्
ग्रहो भ्रष्टः स यदि न वक्री न प्रत्युपगतिर्भवति तदा निवृत्तः स एवाप्य वक्री तदा न निवृत्तो यास्यतीति ५२ अथ प्रष्टा पृच्छति कीदृश्या
स्त्रिया सह सङ्गमो मम मासीदिति तज्ज्ञानार्थमाह· अस्त इति· रविशुक्राङ्गारकाणामन्यतमे पृच्छालग्नात्सप्तमस्थाने स्थिते परभार्या

भ्रष्टः सप्तमभवनात् पुनर्निवृत्तो यदि न वक्री ५१ अस्तेर विसितवक्रैः परजायां स्वां गुरौ बुधे वेश्यां चन्द्रे च
वयः प्राग्वत् प्रवदेत् सौरेः त्यजानां वा ५२ मन्दः पापसमेतो लग्नान्नवमे शुभैर युत दृष्टः रोगार्तः परदेशे

या सह तस्य संयोग आसीत् एवं गुरौ स्थिते स्वामात्मीयां स्त्रियमिति प्रवदेत् बुधे वेश्यां ॥ चाष्टमगो मृत्युकर एव ॥ ५४॥
साधारणस्त्रियं चन्द्रे चैवं साधारणस्त्रियं तथा सौरेः त्यजानां निकृष्टजातानामगम्यामिति प्रवदेत्· वयः प्राग्वदिति· तासां सर्वासां चन्द्र
वद्वयो वक्तव्यं बाले चन्द्रे बालां प्रौढे प्रौढां वृद्धे वृद्धामिति चन्द्रस्य वयो विभागः प्रागेव प्रदर्शित इति ५३ अधुना रोगार्तस्य परदेशे गमन
स्य मृत्युज्ञानमाह मन्द इति सौरिः पि भौम क्षीणचन्द्राणामन्यतमेन युक्तो नवमस्थाने स्थितस्तत्र च शुभैर युत दृष्टः तत्र शुभग्रहाणामन्य

ष॰पं॰ वमभागस्तस्य पतिः पृच्छालग्ने तत्काले यो नवांश उदितः तस्य पतिर्लग्नगो यदा भवति तदा प्रष्टुः स्वमात्मानं चिन्तागतमिति वाच्यम्॰ अ
टी॰भ॰ थ स्वांशपतिमित्रं सुहृत् तत्काललग्नस्थितस्तदा मित्रं चिन्तागतमिति वाच्यं अथ स्वांशपतेः शत्रुः रिपुस्तत्काललग्ने स्थितस्तदा शत्रु
२५ चिन्तागत इति शत्रुचिन्ता वाच्या अथ निर्दिष्टस्थाने द्वौ त्रयो बहवो वा भवंति तदा तेषां मध्ये यो बलयुतः स पत्रस्थस्तस्य प्रष्टुश्चिन
स्थितमिति वाच्यम् तथा तेनैव प्रकारेण यथाभिहितेषु बलयुतेषु वीर्यवत्सु मध्यात् कार्य्यं वाच्यमिति शत्रू मन्दसितौ समश्च शशि
जो मित्राणि शेषा रवेस्तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः जीवेन्दूष्णकराः कुजस्य सुहृदो सौरिः सितार्कौ समो मित्रे
स्वांशपतिर्मित्रशत्रुसुतश्चैव वाच्यं बलयुतेषु ५२ चरलग्ने चरभागे मध्याद्भ्रष्टे प्रवासचिन्ता स्यात्॰ ॥ ॥
सूर्य्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे॰ १ सूरेः सौम्यसितावरी रविसुतो मध्यः परे त्वन्यथा सौम्यार्कौ सुहृदौ समौ कुजगुरू शुक्रस्य शे
षावरी शुक्रसौ सुहृदौ समः सुरगुरुः सौरस्य चान्येरयो ये प्रोक्ताः सुहृदस्त्रिकोणभवनात् तेऽमी मया कीर्तिताः २ तत्काले पुदशायबंधुस
हजस्वान्तेषु मित्रः स्थितः इत्यनेन जातकग्रंथे मित्रशत्रुविभागः प्रदर्शित इति ५२ अधुना प्रवासचिन्ताज्ञानमाह चरलग्न इति राम
चरलग्ने चरनवांशके उदिते तस्मिंश्चरलग्ने मध्यात्स्वमनवांशकात् भ्रष्टे च्युते तत्परः षष्ठादिकोंऽशस्तत्र वर्तते चेत्तर्हि प्रष्टुः २५
प्रवासचिन्ता स्याद्भवेत् प्रवासनिमित्ता चिन्ता ह्राते तर्हि अत्रैव निश्चयमाह॥

CC-0. In Public Domain. Digitization by eGangotri

कृष्णपञ्चमीं यावत्तरुणः परतो वृद्धः तत्र यदि सबलो बालशशी पृच्छालग्नं पश्यति लग्नेवा तथाभूतोऽवस्थितः तदा प्रष्टुर्मनसि कुमारि-
कावेवर्त्तते एवमेव बुधः पश्यति तत्रावस्थितो वा तथाऽपि कुमारिका अर्थादेव यौवनस्थे चन्द्रे यौवनोपेतां वृद्धे वृद्धामिति केचिद्बालां कु-
मारींच शशी बुधश्चेति पठन्ति शशी बालां करोति आयुष्यदर्शनं यावद्बालास्त्री बुधः कुमारिकामनूढां करोति एवं शनिः सौरो वृद्धां विगत-
यौवनां जराभिभूतनां करोति· रविबृहस्पती प्रसूतां —— प्रसवयुक्तां कुरुतः तथा भौमशुक्रौ कर्कशां अतितरुणीं स्त्रियं कुरुतः एवं वयः
स्यात् एवं चौरोऽपि भवति· पुरुषेप्येवमेव वयो ज्ञातव्यं ४८ अथ प्रष्टा पृच्छति कस्य सम्बन्धेन चिन्ता मे मनसि वर्त्तत इत्येतत्परिज्ञाना

स्त्री कर्कशां भौमसितौ विधत्त एवं वयः स्यात्पुरुषेषु चैव ४९ आत्मसमं लग्नगतैस्तृतीयगैर्भ्रातरः सुतः सुतगैः।
मातावा भगिनी वा चतुर्थगैः शत्रुगैः शत्रुः ५० भार्य्या सप्तमसंस्थैर्नवमैर्धर्म्माश्रिता गुरुर्दशमे· ॥ ❁ ॥

र्यमाह आत्मेति ग्रहैरादित्यादिभिः सबलैर्लग्नगतैर्लग्नसंस्थैः प्रष्टुरात्मसमश्च शरीरतुल्यः कश्चिन्मनसि वर्त्तते तत्कार्य्यं चेति वक्तव्यं
एवं लग्नात्तृतीयगैर्भ्रातरः सहजाः सुतगैः पञ्चमस्थैः पुत्रः चतुर्थगैर्माता भगिनी वेति वाच्यं शत्रुगैः षष्ठस्थानगैः रिपुचिन्ता ५० भार्य्ये-
ति· सप्तमस्थैर्भार्य्या लग्नात्सप्तमस्थानाश्रितैः सबलैर्ग्रहैर्भार्य्या वाच्या नवमस्थैर्धर्म्माश्रिता चिन्ता वक्तव्या दशमे गुरुराचार्य्य इति
स्वांशपतीत्यादि स्वस्य योराशिस्तस्य योंऽशो नवमांशः आत्मीयन॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ष॰पं॰ अधुना प्रष्टुः प्रच्छाकाले वर्णज्ञानमाह सौम्या इति जलराशयः कर्कटवृश्चिकमीनाः सौम्याः शुभग्रहाः जलराशिस्थाः आप्य
टी॰भ॰ राशिषु व्यवस्थिताः सितेपक्षे शुक्लपक्षे मासार्द्धे तु अयं विशेषः जलराशिस्थाः शुभग्रहास्तृतीयधनकेन्द्रगा यदि भवन्ति यथासम्भ
१५ वं वा शशाङ्कोऽन्ययोगापेक्षः अथवा चन्द्रे शशिनि उदयगते लग्नस्थे तत्र जलराशौ सप्तमे सति पृच्छायां वर्णा वर्षणं वदेत् नूपादि
ति ४७ अधुना गर्भस्थितस्य ज्ञानमाह पुंवर्गे इति पुंस्त्री क्रूराक्रूरौ चरस्थिरद्विस्वभावसंज्ञाश्चेति राशीनां संज्ञाः जातके प्रोक्ताः वर्गा

सौम्या जलराशिस्था तृतीयधनकेन्द्रगाः सितेपक्षे चन्द्रे वाप्युदयगते जलराशिस्थे वदेद्वर्षां ४७ पुंवर्गे ल
ग्नगते पुंग्रहदृष्टे बलान्विते पुरुषः युग्मे स्त्रीग्रहदृष्टे स्त्री बुधयुक्ते तु गर्भयुता ४८ कुमारिकां बालशशी बुध
श्चदृष्टां शनिः सूर्य्यगुरू प्रसूतां

लक्षणं चोक्तं पुरुषराशिवर्गे तत्काललग्नतां प्राप्ते तस्मिंश्च जीवमार्तण्ड इति पुंग्रहावलोकिते
लग्ने दृष्टे एवं विधे प्रश्नलग्ने बलान्विते च पुरुषो जायते अधिपयुतो दृष्टो वा बुधजीवनिरीक्षितो यो राशिः स भवति बलवान्न्यदा यु
क्तो दृष्टोऽपि वा शेषैरिति बलाबलं ज्ञातव्यं स्त्रीराशौ युग्मलग्नगते वृषादौ स्त्रीग्रहदृष्टे चन्द्रसिताभ्यां विलोकिते बलयुक्ते च कन्या जाय राम
ते सामान्यतः प्रश्नलग्ने बुधेन संयुक्ते स्त्री सगर्भा वर्त्तते अद्यापि न प्रसूते इत्यर्थः ४८ अथ प्रष्टुः कीदृशी स्त्री पुरुषो वा चेतसि तस्या इति ज्ञाना १५
र्थमाह कुमारिकामिति शुक्लप्रतिपत्प्रभृति दशमीं यावच्छशी बालः एकादश्याः॥

ष·पं· अधुना प्रष्टुः प्रच्छाकाले वर्षणज्ञानमाह सौम्या इति जलराशयः कर्कटवृश्चिकमीनाः सौम्याः शुभग्रहाः जलराशिस्थाः आप्य
टी·भ· राशिषु व्यवस्थिताः सितेपक्षे शुक्लपक्षे मासार्द्धे तु अयं विशेषः जलराशिस्थाः शुभग्रहास्तृतीयधनकेन्द्रगा यदि भवन्ति यथासम्भ
२५ वं वा शुक्लेऽन्यपक्षे वा अथवा चन्द्रे शशिनि उदयगते लग्नस्थिते तत्र जलराशौ सप्तमे सति पृच्छायां वर्षा वर्षणं वदेत् ब्रूयादि
ति ४६ अधुना गर्भस्थितस्य ज्ञानमाह पुंवर्ग इति पुंस्त्री क्रूराक्रूरौ चरस्थिरद्विस्वभावसंज्ञाश्चेति राशीनां संज्ञाः जातके प्रोक्ताः वर्ग

सौम्या जलराशिस्थास्तृतीयधनकेन्द्रगाः सितेपक्षे चन्द्रे वाप्युदयगते जलराशिस्थे वदेद्वर्षां ४७ पुंवर्गे ल
ग्नगते पुंग्रहदृष्टे बलान्विते पुरुषः युग्मे स्त्रीग्रहदृष्टे स्त्री बुधयुक्ते तु गर्भयुता ४८ कुमारिकां बालशशी बुध

लक्षणं चोक्तं पुरुषराशिवर्गे तत्काललग्नतां प्राप्ते तस्मिंश्च जीवमार्त्तण्ड इति पुंग्रहावलोकिते ८ अवदृष्टां शनिः सूर्यो गुरुस्तसूतां
लग्ने दृष्टे एवं विधे प्रश्नलग्ने बलान्विते च पुरुषो जायते अधिपयुतो दृष्टो वा बुधजीवनिरीक्षितो यो राशिः स भवति बलवान्न यदा यु
क्तो दृष्टोऽपि वा शेषैरिति बलाबलं ज्ञातव्यं स्त्रीराशौ युग्मलग्नगते वृषादौ स्त्रीग्रहदृष्टे चन्द्रसिताभ्यां विलोकिते बलयुक्ते च कन्या जाय राम
ते सामान्यतः प्रश्नलग्ने बुधेन संयुक्ते स्त्री सगर्भा वर्त्तते अद्यापि न प्रसूते इत्यर्थः ४८ अथ प्रष्टुः कीदृशी स्त्री पुरुषो वा चेतसि तस्यास्तिज्ञाना २५
र्थमाह कुमारिकामिति शुक्लप्रतिपत्प्रभृति दशमीं यावच्छशी बालः एकादश्याः॥

द्वितीयद्रेष्काणे गृहमध्ये न्नसस्थानसमीपे वदेत् एवं तृतीयद्रेष्काणे गृहान्ते वेश्मपश्चिमभागे ब्रूयादिति ॥ अधुना लाभालाभज्ञा
नमाह पूर्णइति पूर्णमण्डलगतश्चन्द्रः स च पृच्छालग्ने समवस्थितो भवति अथवा शीर्षोदयलग्ने तत्रैव च सौम्यग्रहः समवस्थि
तः स च शुभग्रहैरेवावलोकितो भवति तदा क्षिप्रमेवापहृतस्य धनादेर्लाभं कुरुते लाभोपयातो बलवाञ्छुभश्चेति अथवा लग्ना
द्दशमस्थाने सौम्यग्रहोऽतिबलवान् भवति तथापि च शीघ्रान्नष्टस्याशु लाभं कुरुते ॥ अधुना दिग्ध्वनेः प्रमाणमाह दिशि
ति प्राच्यादीशा रविसितकुजराहुयमेन्दुसौम्यवाक्पतयः इति ग्रहाणां दिश उक्ताः तत्र लग्नकेन्द्रगतैः ग्रहैर्दिशो वाच्याः वक्त

पूर्णः शशी लग्नगतः शुभो वा शीर्षोदये सौम्यनिरीक्षितश्च नष्टस्य लाभं कुरुते तदाशु लाभोपयातो बलवाञ्छु
भश्च ॥ दिग्वाच्या केन्द्रगतैरसम्भवे वा वदेद्विलग्नर्क्षात् मध्याच्युतैर्विलग्नान्वांशकैर्योजना वाच्या ॥३॥

व्याः तात्कालिकलग्नस्य केन्द्रेषु यः कश्चिद्ग्रहः समवस्थितस्तस्य या दिक् तस्यां दिशि प्रणष्टं वित्तं धनं गतं वदेत् ब्रूयात् तद्यथा आदित्ये
केन्द्रगते लग्नचतुर्थसप्तमदशमानामन्यतमस्थानस्थे पूर्वस्यामेव शुक्रे आग्नेय्यां भौमे दक्षिणस्यां राहौ नैर्ऋत्यां शनौ पश्चिमा
यां चन्द्रे वायव्यां सौम्ये सौम्यायां जीवे चैशान्यामिति द्वयोर्बहुषु केन्द्रगतेषु बलाधिक्यवशात् असम्भवे वदेत् विलग्नर्क्षात् अजमेषवृषमि
थुनकुलीराः पञ्चमनवमैः सहैन्द्र्याद्या इति राशीनां दिश उक्ताः अस्यान्यविद्या ॥

ष·पं· मानेकेन्द्रग्रहे विलग्नर्क्षाद्विलग्नराशिगतां दिशं वदेत् ब्रूयात् तद्यथा मेषसिंहधनुःषु लग्नेषु हृतं वित्तं पूर्वस्यां दिशि गतं एवं वृषकन्याम
टी·भ· करेषु दक्षिणस्यां मिथुनतुलाकुंभेषु पश्चिमायां कर्कटवृश्चिकमीनेषु उत्तरस्यामिति मध्याच्च्युतैरिति· विलग्नात्प्राग्भूतान्तस्य नवांश
१२ कोनवमभागः तन्मध्यात्पञ्चमनवांशकान्तच्युतैश्चलितैर्योजनावाच्या वक्ष्यत एतदुक्तं भवति· प्रश्नलग्ने प्रथमनवांशकात्प्रभृति
नवांशपञ्चकं यावद्वर्त्तते तेनावहृतं वित्तं तस्मिन्नेव देशे प्रागुक्तायां दिशि वदेत् पञ्चमांशकात्परतो यावंतोंऽशकाः अतीताः ताव

इति षट्पञ्चाशिकायां नष्टधनाध्यायः षष्ठः ६ विषमस्थितेर्क्कपुत्रे सुतस्य जन्मान्यथाङ्गनायास्तु लग्नाव
रस्थ नारी समस्थितेः तोऽन्यथा वामं ५४॥

न्तियोजनानि तद्धृतं वित्तं प्रागुक्तायां दिशि गतमिति वदेत् ५३ इति श्री
भट्टोत्पलविरचितायां षट्पञ्चाशिकाविवृतौ नष्टधनाध्यायः षष्ठः ६ अथ मिश्रकाध्यायो व्याख्यायते तत्रादावेव गर्भिण्याः पुत्रदु
हितृज्ञानमाह विषमस्थितइति शनौ लग्नं विनाऽन्यत्र विषमस्थाने स्थिते प्रष्टुः सुतस्य प्रादुर्भावं वदेत् नन्वत्र लग्नस्य विषम।
स्थानगणना कथं न क्रियते तत्रादावेव वराहमिहिरो ज्ञापकः विहाय लग्नं विषमर्क्षसंस्थः सौरोऽपि पुंजन्मकरो विलग्नादिति अ ष·भः
न्यथाङ्गनायास्तु अन्यथान्येन प्रकारेण लग्नात्समस्थितेऽर्कपुत्रे अङ्गनायाः स्त्रियो जन्म वदेत् तेन द्वितीयचतुर्थ·॥ ॥ १२

ष.पं. निवर्त्तनं वक्रगते गृहे स्थितिः अथवा वक्रगतो भवति प्रतीपगतिस्तदा नावत्संस्थौः प्रवासिनः प्रवासान्निवर्त्तनं भवतीति ४६ इति
टी.भ. श्रीमहोत्पलविरचितायां षट्पञ्चाशिकाविवृतौ प्रवासचिन्ता नामाध्यायः पञ्चमः ५ अथ नष्टप्राप्तिनामाध्यायो व्याख्यायते तत्रा
१२ दौ चौरयोगज्ञानमाह स्थिरोदये इति स्थिराः वृश्चिकसिंहवृषकुम्भाः एषामन्यतमस्योदये तत्कालेलग्नतां प्राप्ते अथवा यत्र कुत्र
चिल्लग्ने स्थिरांशे अथवा यस्य कस्यचिद्राशेर्वर्गोत्तमनवांशश्चराशिषु प्रथममध्यमान्त्यस्तु क्रमलग्नाः एवं लग्नस्य वर्गोत्तमग

तावद्दिनान्यागमनस्य विन्द्यान्निवर्त्तनं वक्रगतैर्ग्रहैस्तु ४६ इति षट्पञ्चाशिकायां प्रवासचिन्तानामाध्यायः पञ्चमः ५ स्थिरोदये स्थिरांशे वा वर्गोत्तमगतेऽपि वा स्थितं तत्रैव तद्द्रव्यं स्वकीयेनैव चोरितं ४० आदिमध्यावसानेषु द्रेष्काणेषु विलग्नतः द्वारदेशे तथा मध्ये गृहान्ते च वदेद्धनम् ४२॥

ते नवांशे यद्द्रव्यं हृतं नत्स्वकीयेन आत्मीयेनैव केनचिच्चोरितं अपहृतं तच्च तत्रैव तस्मिन्नेव स्थाने स्थितं अन्यथापरेणापहृतस्यात
स्मात् स्थानाच्चालितमिति ४० अधुना स्थानज्ञानमाह आदीति द्रेष्काणाद्याः प्रथमपञ्चनवाधिपानामिति द्रेष्काणलक्षणमुक्तं
आदिद्रेष्काणः प्रथमः मध्यद्रेष्काणो द्वितीयः अवसानद्रेष्काणस्तृतीयः विलग्नं पृच्छालग्नं तस्मात् विलग्नतः तात्कालिकल राम
ग्नात् प्रथमद्वितीयतृतीयद्रेष्काणेषु यथासंख्यं हृतं वित्तं धनं द्वारदेशे तथा मध्ये गृहान्ते च स्थितं वदेत्॥ १२

CC-0. In Public Domain. Digitization by eGangotri

सुखेनाक्लेशेनायाति आगच्छति सौम्यैः शुभग्रहैः केन्द्रस्थैः प्रवासी लाभसमन्वितो लाभयुक्त आयाति २६ अन्ययोगान्तरमाह दृष्टवरा
ति दृष्टोदयाः मेषवृषकर्कटधन्विमकरमीनाः दृष्टोदये पृष्ठलग्ने अस्मिंश्च पापनिरीक्षिते वा शुक्रः त्र चार्थे एवंविधे च योगे प्रवासि
नो वधस्ताडनं बन्धनं वदेत् अथवा पापाः अशुभग्रहाः लग्नात् तृतीयस्थाने स्थिताः सर्वे एव ते च सौम्यैः शुभग्रहैर्न दृष्टाः नावलोकिताः
प्रवासिनो नष्टाः तस्मात् स्थानाद्देशान्तरं गताः अथवा पापा लग्नाद्रिपुस्थाने षष्ठे वा गता से च पापैर्दृष्टास्तदा प्रवासिनो विनष्टाः मृताः
अथवा पापाः केन्द्रेषु लग्नचतुर्थसप्तमदशमेषु स्थिता तत्र च सौम्यैर्दृष्टास्तदा प्रवासिनो मुषिताश्चौरैरपहृतार्थाः स्युर्भवेयुः वा शु

प्रवासी सुखमायाति सौम्यैर्लाभसमन्वितः २७ दृष्टोदये पापनिरीक्षिते वा पापास्तृतीये रिपुकेन्द्रगा वा सौम्यै
रदृष्टा वधबन्धनास्युर्नष्टा विनष्टा मुषितास्तु वा स्युः २८ ग्रहो विलग्नाद्यतमे गृहे तु तेनाहता द्वादश राशयस्तु॥

द्यो योगानां विकल्पार्थः वधबन्धनाः स्युरिति पापानां विशेषणं म २८ अथ प्रवासिनामागमनकालमाह ग्रह इति विलग्नात् लग्ना
ल्लग्नात् यतमे गृहे यावत्संख्ये राशौ यः कश्चिद्ग्रहः स्थितः स च स्पष्टगतिः तेन यावत्प्रमाणेन द्वादश राशयः हताः गुणिताः एतदुक्तं भवति द्वा
दश संख्यात्मकं संस्थाप्य लग्नात्प्रभृति ग्रहाक्रान्तराशिसंख्यां गुणयेत् तत्र यावत्संख्या भवति तावत्संख्यैर्दिनैः प्रवासिन आगम
नस्य विघातं जानीयात् तावद्भिर्दिनैः पथिक आगच्छतीत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प॰ पं॰
टी॰ भ॰
११

सुतस्थानं पंचमं धनस्थानं द्वितीयं सहजं तृतीयं एतेषु स्थानेषु लग्नात्कालिकात् सर्वैः गादित्यादिग्रहैः स्थितैः समन्वितैः दूरगतः
स्यापि प्रवासस्थस्यागमनं संप्राप्तिं बुधगुरुसितपूर्णचन्द्रैः एतेष्वेव स्थानेषु व्यवस्थितैः समवस्थितैः नष्टस्यापहृतस्य वस्तुनः प्राप्तिं लाभं
प्रवदेत् तस्यैव प्रवासिनः यन्नष्टमासीत् स एव वा प्रवासी नष्टोः दर्शनंगत तस्य प्राप्तिर्भवतीत्यर्थः लब्ध्वागमनं गुरुसिताभ्यामिति गुरुर्जी
वः सितः शुक्रः आभ्यामेकेष्वेव स्थानेषु समवस्थिताभ्यां लाब्धागमनं लघुनाल्पेन च कालेनागमनं भवति अथ अन्ययोगान्तरमाह जा
मित्रगृति जामित्रं सप्तमस्थानं सप्तमेस्थाने यवा षष्ठे पृच्छालग्नाद्यः कश्चिद्ग्रहः समवस्थितः तथा चतुर्णां केन्द्राणां च मध्यादन्यत

सौम्यैर्नष्टप्राप्तिं लब्धागमनं गुरुसिताभ्यां ॥ अथ जामित्रे त्वथ षष्ठे वा ग्रहः केन्द्रे यवा कुपतिः प्रोषितागमनं वि
द्यात्त्रिकोणे त्वसिते ऽपि वा ॥ अष्टमस्थे निशानाथे कण्टकैः पापवर्जितैः ॥ ११ मे केन्द्रे वा कुपति र्बृहस्पतिर्भवति

तदा प्रोषितस्य प्रवासिनः आगमनं संप्राप्तिं विद्यात् जानीयात् त्रिकोणे त्वसिते ऽपि वा त्रिकोणे नवपञ्चमे त्वसितो बुधः सितः शुक्रः बुधे
शुक्रे त्रिकोणयोः नवपञ्चमयोः स्थानयोरन्यतमस्थे द्वयोर्वा त्रिकोणस्थयोः प्रोषितागमनं विद्यादिति अथ अन्ययोगान्तरमाह अ रा॰म॰
ष्टमेति निशानाथश्चन्द्रमाः तस्मिन् पृच्छालग्नादष्टमस्थे अष्टमस्थाने समाश्रिते कण्टकानि लग्नचतुर्थसप्तमदशमानि तैश्च पा ११
पवर्जितैः प्रवासी पथिकः ॥ ॥

भ॰पं॰ टी॰भ ११ सुतस्थानं पंचमं धनस्थानं द्वितीयं सहजं तृतीयं एतेषु स्थानेषु लग्नात्कालिकात् सर्व्वैरादित्यादिग्रहैः स्थितैः समन्वितैः दूरगतः
स्य विप्रकृष्टस्यागमनं संप्राप्तिं बुधगुरुसितपूर्णचन्द्रैः एतेष्वेव स्थानेषु व्यवस्थितैः समवस्थितैः नष्टस्यापहृतस्य वस्तुनः प्राप्तिलाभं
प्रवदेत्तथैव प्रवासिनः यन्नष्टमासीत् स एव वा प्रवासी नष्टो दर्शनं गतस्तस्य प्राप्तिर्भवतीत्यर्थः लब्ध्यागमनं गुरुसिताभ्यामिति गुरुर्जी
वः सितः शुक्रः आभ्यामेकैकेष्वेव स्थानेषु समवस्थिताभ्यां लाभ्यागमनं लघुनाल्पेन च कालेनागमनं भवति ३४ अन्ययोगान्तरमाह जा
मित्रमिति जामित्रं सप्तमस्थानं सप्तमे स्थाने ऽथवा षष्ठे च्छ्रालग्नाद्यः कश्चिद्ग्रहः समवस्थितः तथा चतुर्णां केन्द्राणां च मध्यादन्यत

सौम्यैर्नष्टप्राप्तिं लब्ध्यागमनं गुरुसिताभ्यां ३५ जामित्रे त्वथ षष्ठे वा ग्रहः केन्द्रे ऽथवा कुपतिः प्रोषितागमनं वि
द्यात्त्रिकोणे ज्ञसितैः ऽपि वा ३६ अष्टमस्थे निशानाथे कण्टकैः पापवर्ज्जितैः ॥ ९ मे केन्द्रे वा कुपति र्वृहस्पतिर्भवति

तदा प्रोषितस्य प्रवासिनः आगमनं सम्प्राप्तिं विद्यात् जानीयात् त्रिकोणे ज्ञसितैः ऽपि वा त्रिकोणे नवपञ्चमे ज्ञो बुधः सितः शुक्रः बुधे
शुक्रे त्रिकोणयोः नवपञ्चमयोः स्थानयोरन्यतमस्थे द्वयोर्वा त्रिकोणस्थयोः प्रोषितागमनं विद्यादिति ३६ अन्ययोगान्तरमाह अ ग॰प॰
ष्टमेति निशानाथश्चन्द्रमाः तस्मिन्नष्टच्छ्रालग्नादष्टमस्थे अष्टमस्थाने समाश्रिते कण्टकानि लग्नचतुर्थसप्तमदशमानि तैश्च पा ११
पवर्ज्जितैः प्रवासी पथिकः ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri .

प्रवासीवाअन्यदेशस्थआश्वेवायातिनसंशयः निर्विकल्पंयथातथा ग्रहाणांमक्रमक्रमविवक्षयाकदाचित्स्थानेद्वितीयेवातृतीयेवाद्वावपि
तृतीयेवाद्वितीयेवाएकोद्वितीयअन्यस्तृतीयइतिवा २९ इतिश्रीभट्टोत्पलविरचितायांषट्पञ्चाशिकायांहोराविवृतौजयपराजयाध्यायः
स्तृतीयः ३ अधुनाशुभाशुभलक्षणाध्यायोव्याख्यायते तत्रादावेवप्रष्टुः शुभाशुभज्ञानमाह॥ केन्द्रेति केन्द्राणि॰ लग्नचतुर्थसप्तमदशमा
नि त्रिकोणेनवपञ्चमंशुभाशुभग्रहाः एतेषुकेन्द्रत्रिकोणेषुशुभस्थितेषुशुभाः स्थितायेषुसौम्यग्रहयुक्तेष्वित्यर्थः

आश्वेवागच्छतिचमूः प्रवासीवानसंशयः २९ इतिश्रीषट्पञ्चाशिकायांजयपराजयाध्यायस्तृतीयः
१ केन्द्रत्रिकोणेषुशुभस्थितेषुपापेषुकेन्द्राष्टमवर्ज्जितेषु सर्वार्थसिद्धिंप्रवदेन्नराणांविपर्य्ययस्थेषुविपर्य्य
यः स्यात् २ त्रिपञ्चलाभास्तमयेषुसौम्यालाभप्रदानेष्टफलाश्चपापाः॥ १९ तथापापेषुपापग्रहेषु
केन्द्राष्टमवर्जितेषु केन्द्राणि अष्टमञ्चवर्ज्जयित्वाअन्यत्रसमवस्थितेषुसत्सुनराणांमनुष्याणांसर्वार्थसिद्धिंप्रवदेत् ब्रूयात्विपर्य्ययस्थेष्वि
ति विपर्य्यये विपरीतेः स्थानस्थितेविपर्य्ययोविपरीतमेवस्यात् एतदुक्तम् भवतियदापापाः केन्द्रत्रिकोणाष्टमेषुभवन्तिसौम्यास्त्रिकोणव
र्जमन्यत्रभवन्तितदासर्वार्थानामसिद्धिंप्रवदेत् २ अधुनालाभालाभज्ञानमाह त्रिपञ्चेति तृतीयपञ्चमस्थानेप्रसिद्धेलाभमेकादशंअ
स्तमयंसप्तमंएतेषुसौम्याः शुभग्रहाः समवस्थिताः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प.पं. मष्टुर्लाभप्रदाः लब्धिं प्रकर्षेणौ ददति एवं त्रिषष्ठलाभास्तमयेषु पापाः अशुभा नेष्टफलाः अनिष्टमशोभनं फलं कुर्वन्ति अर्थहा
टी.भ. निं कुर्वन्तीत्यर्थः तुलाधकन्यामिथुनो घटश्चेति तुला कन्या मिथुनाः प्रसिद्धाः घटः कुम्भः एते नृराशयः तेषु लग्नेषु सौम्यग्रहाधिष्ठिते
९ षु शुभं वदन्ति ३१ अन्ययोगान्तरमाह स्थानेति सौम्याः शुभा ग्रहाः लग्नाद्दशमे सप्तमे च स्थाने गताः समवस्थिताः प्रष्टुः स्थानप्र
दाः स्थानं ददति पापा व्ययायसहिता इति व्ययं द्वादशस्थानं आयमेकादशस्थानं पापाः अशुभाः व्ययायसहिताः व्ययायस्थिता

तुलाधकन्यामिथुनो घटश्च नृराशयस्तेषु शुभं वदन्ति ३१ स्थानप्रदा दशमसप्तमगास्तु सौम्या मानार्थदाः
लग्न सस्तु तलाभिगता भवन्ति पापा व्ययायसहिता न शुभप्रदाः स्युर्लग्ने शशी न शुभदो दशमे शुभश्च ॥ ३२ ॥ ॥
रन्ध्रं द्विसप्तदशमायरिपुत्रिसंस्थं पश्येद्गुरुः शुभफलं प्रमदाकृतं स्यात् ॥ ऐ न शुभप्रदाः स्युर्भवेयुः अशुभं फलं प्र

यच्छन्ति अशुभं प्रददतीत्यर्थः लाभे शशी न शुभं करोति पापरूत्यनुवर्तते शशी चन्द्रः पापरूपो लग्ने एकाले लग्ने स्थितो न शुभः शुभ
फलं न ददाति अशुभं ददातीत्यर्थः दशमस्थाने समवस्थितः पापोपि शुभफलो भवति ३३ अधुना शुभाशुभफलयोगज्ञानमाह। राम:
रन्ध्रेति छिद्रावेन द्वितीयस्थानमुच्यते सप्तमदशमे प्रसिद्धे आयं एकादशस्थानं रिपुस्थानं षष्ठम् त्रिशब्देन तृतीयस्थानमुच्यते ए १०
तेषु सन्निष्ठतीति संस्थं द्विसप्तदशमायरिपुत्रिसंस्थं रन्ध्रेचन्द्रमसं द्वितीयादि॥

व॰पं॰ आचार्य्यएवज्ञापकः तुलाथकन्यामिथुनोघटश्चनृराशयइतिशुभास्सौम्यग्रहाबुधगुरुशुक्रपूर्णचन्द्राः एतेएच्छालग्नेस्थितास्सुभं
टी॰भ॰ वेषुः अथवातएवसौम्याः नृराशिसंस्थाव्ययायसंस्थाश्चभवन्तिव्ययोद्वादशमंआयएकादशमंचग्रहः समुच्चयेअन्ययोरपिसंस्थिताः
समवस्थिताः यद्यस्मिन्कालेभवन्ति तदातस्मिन्काले आशुक्षिप्रमेवनृपाणांराज्ञांसन्धिंसन्धानंप्रवदेत् नृपान्पापैर्द्विदेहोपग
तैरितिरविभौमशनिक्षीणचन्द्राः पापाः द्विदेहाद्विस्वभावराशयः पापैरशुभग्रहैः द्विदेहोपगतैः द्विस्वभावराशिषुसमवस्थितैः नृपाणां
विरोधंविग्रहंप्रवदेदिति २७ अथान्ययोगान्तरमाह केन्द्रइति केन्द्राणिलग्नचतुर्थसप्तमदशमानितेषूपगताः समवस्थिताः सौम्याः

तदाशुसन्धिंप्रवदेन्नृपाणांपापैर्द्विदेहोपगतैर्विरोधं २७ केन्द्रोपगताः सौम्याः सौम्यैर्दृष्टानृलग्नगाः ॥
प्रीतिंकुर्वन्तिपापदृष्टाः पापास्तथैवविपरीतम् २८ द्वितीयेवातृतीयेवागुरुशुक्रौयदातदा ॥ ॥

शुभग्रहाः अथवातएवसौम्यालग्नगानरराशिषुमागुक्तेषुस्थिताः सौम्यैः शुभग्रहैर्दृष्टाः परस्परं शुभैरवलोकितास्सन्तः एवंविधाः
प्रीतिंसन्धिं कुर्वन्तिनिवर्त्तयन्तितथैवकेन्द्रोपगतेषुपापाः समवस्थितास्तेचपापैर्दृष्टाः परस्परं पापैरवलोकिताः विपरीतंविपर्ययं राम
अप्रीतिंविग्रहंकुर्वन्ति २८ अथसेनागमनज्ञानमाह द्वितीयइतिप्रश्नलग्नाद्द्वितीयेतृतीयेवा यथातथा येनतेनप्रकारेणगुरुशु ८
क्रौजीवसितौयदाभवतस्तदासेना आश्वेवागच्छतिक्षिप्रमायातिः॥

अथ नगरयायिनोः कस्य जयो भवत्येतत्परिज्ञानमाह पौरा इति पुरे भवाः पौराः नागराः पृच्छालग्नात् तृतीयस्थानात्प्रभृति यद्राशिषट्कं मष्टमं यावत् तावत्पौरा नागरा ज्ञेयाः एतद्राशिषट्कं द्वितीयस्थानं यावत्तावद्यायिनो ज्ञेयाः एतद्राशिषट्कं यायिनो शुभाशुभत्वे ज्ञेयमित्यर्थः येनादौ यात्रायामुद्योगः कृतः स यायी येन पश्चात्स नागरः बाह्यो वा चार्थे ज्ञेयः शुभैः शुभदाः एतेषां यथाविभागमवस्थितानां राशयः यस्य शुभैः शुभग्रहैः संयुता भवन्ति तस्य शुभदाः शुभं मङ्गलं ददतीत्यर्थः दिवपदिपापैः संयुतास्तदा तस्य पराजयः तथा च कृष्णाकेवलिकायां धर्म्माधर्म्मौ घैश्च कं दले यायिनो नागरास्तृतीयादौ विजयः सौम्ययुते स्याद्भावैः क्रूरैर्युते भङ्गः तथा चास्मदीयप्रश्नज्ञाने नवमाध्येचक्र

पौरास्तृतीयभवनाद्दश्मर्मो द्वायायिनः शुभैः शुभदाः व्ययदशमायेपापाः परस्थानेष्टाः शुभा याप्यानुः ॥२५॥ तृराशि
संस्था लघुदये शुभास्तु व्ययायसंस्थाश्च पदाभवन्ति ॥

२६ दलेविज्ञेया यायिनस्तृतीयादौ पौराः शुभसंयुक्ते भावे विजयोऽन्यथा भङ्गः इति अर्थादेव भागद्वये पि पापसौम्यैर्मिश्रो युक्तो वा मिश्रं फलं न जयो न पराजय इति व्ययदशमाये पापा इति व्ययं द्वादशस्थानं दशमं प्रसिद्धं आयस्थानमेकादशं समाहारे एकवद्भावः व्ययदशमायेपापाः पापग्रहाः पृच्छालग्नात्समवस्थिता भवन्ति तदा पुरस्थानेष्टाः अशुभाः अन्यथा यातुः पुनः शुभा उपचयकरा इत्यर्थः २६ अथ सन्धिविरोधज्ञानार्थमन्ययोगमाह तृराशीति तृराशयः पुरुषाकृतयः मिथुनकन्यातुलाकुम्भाः तथा च ॥

CC-0. In Public Domain. Digitization by eGangotri

त्वं ग्रहाणां यथासम्भवं योज्यं तदा यातुः पृच्छालग्नात्सप्तमभवनाधिपो यदा वक्री भवति तदा वक्तव्यं प्रवासनिवृत्तेर्यथाकालः २४
अधुना प्रोषितागमनदिनज्ञानमाह उदयर्क्षमिति उदयर्क्षं उदयलग्नं चन्द्रर्क्षं चन्द्रराशिः पृच्छाकाले यत्र चन्द्रमाः स्थितस्तस्मा
दुदयर्क्षाच्चन्द्रर्क्षं यावत्सङ्ख्याङ्कं स्यात्तावत्सङ्ख्यैर्दिनैरतीतैः प्रोषितागमनं स्याद्ध्रुवं तद्दिनमध्ये ग्रहः कश्चित्तयोर्लग्नचन्द्रयोरन्तरे यः
कश्चिद्ग्रहो भवति तदैव ग्रहसम्भवे शत्रुरवध्यमेव नायाती त्यर्थः २५ इति श्रीमद्भोत्पलविरचितायां षट्पञ्चाशिकाविवृतौ ग

उदयर्क्षाच्चन्द्रर्क्षं भवति च यावद्दिनैश्च तावद्भिः आगमनं स्यात्प्रोषितो यदि मध्ये न ग्रहः कश्चित् २५ इति ष
ट्पञ्चाशिकायां गमागमो द्वितीयोऽध्यायः २ दशमोदय सप्तमगाः सौम्या नगराधिपस्य विजयकराः आ
रार्कीन्दुगुरुसिताः प्रभङ्गदा विजयदा नवमे ॥२५॥ २९ मागमो द्वितीयोऽध्यायः २ अथ जयपराजयौ व्याख्या
येते नव्यादावेव जयपराजयज्ञानमाह दशमोदयेति उदयो लग्नं सप्तमदशमनवमाः प्रसिद्धाः एषु स्थानेषु लग्नात्सौम्याः शुभ
ग्रहाः गताः समवस्थिताः पृच्छाकाले नगराधिपस्य पुरस्वामिनो राज्ञो विजयदा विजयं कुर्वन्ति आरोऽङ्गारकः आर्किः शनैश्चरः एतौ प्रश्नल
ग्नान्नवमस्थाने स्थितौ प्रष्टुः संग्रामे प्रभङ्गदौ प्रकर्षेण भङ्गदौ पलायनदौ तथा ज्ञो बुधः गुरुर्जीवः सितः शुक्रः एते लग्नान्नवमे स्थिता विज एम॰ ८
यदाः विशेषेण जयं ददति प्रष्टुः संग्रामे जयं ददतीत्यर्थः ॥२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदा शत्रुः रिपुः स्थितः स्वस्थानान्न चलितः अथवा चरराशौ लग्नगते तत्र रविः सूर्य्यो गुरुर्जीवो वा यदा भवति तदा शत्रोः शीघ्रगमनं स्या
द्भवेत् २० अथ यातुर्निवृत्तिकालज्ञानमाह ग्रहः सर्वोत्तमबल इति लग्नात् स्वलग्नात् यस्मिन् गृहेऽन्यतमस्थे सर्वोत्तमबलो ग्रहः
स्थितः सर्वेषामुत्तमबलः प्रधानबलोपेतः तत्तुल्यसङ्ख्याके तत्तुल्यान्तस्समसङ्ख्याप्रमाणे येषां मासानां तैर्यातुर्जिगमिषोर्निवृत्तिः
निवर्त्तनं निवासान्निर्दिशेत् वदेत् २१ तत्र विशेषमाह चरांशस्थ इति तस्मिन् सर्वोत्तमबले ग्रहे चरांशस्थे चरराशिनवभागस्थिते

उदये रविर्गुरुर्वा चरराशौ स्यात्तदागमनं २० ग्रहः सर्वोत्तमबलो लग्नाद्यस्मिन् गृहे स्थितः मासैस्तत्तुल्यसङ्ख्याकै
र्निवृत्तिं यातुरादिशेत् २१ चरांशस्थे ग्रहे तस्मिन् कालमेतद्विनिर्दिशेत् द्विगुणं स्थिरभागस्थे त्रिगुणं द्व्यात्मकां
शके २२ यातुर्विलग्नाज्जामित्रभवनाधिपतिर्यदा करोति वक्रमावृत्तेः कालं तं प्रवदन्ते परे ॥ २३ ॥ ॥

तत्पूर्वोक्तं कालं विनिर्दिशेत् वदेत् तत्तुल्यसङ्ख्याकैर्मासैरिति स्थिरभांशस्थिते एव कालं द्विगुणं विनिर्दिशेत् वदेत् द्व्यात्मकांशक इति
द्विस्वभावराशिनवमांशकस्थिते एव कालं त्रिगुणं वदेत् इति २२ अथैवमनन्तरमाह यातुरिति विलग्नं पृच्छालग्नं तस्मात् जामित्रभव
नं सप्तमभवनं तस्याधिपतिः स्वामी स यदा वक्रं विपरीतगमनं करोति तत्कालं यातुर्जिगमिषोरावृत्तेरावर्त्तितस्य प्रवासान्निवृत्तिं अपरे
अन्ये आचार्य्याः कृष्णादयो प्रवदन्ते कथयन्ति वक्रे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 शनैश्चरेस्मिते पापाः पापग्रहाः तृतीयपञ्चमषष्ठाः तृतीयपञ्चमषष्ठस्था भवन्ति तदारिपुसङ्गमाय शत्रुसङ्गमाय भवंति मध्ये शत्रुणां
 सह सङ्गमो भवति इत्यर्थः तस्मिन्नेव पूर्वोक्तयोगे पापाः अशुभग्रहाः चतुर्थाश्चतुर्थस्थानस्थिता स्तस्यैव शत्रोर्विनिवर्तनाय प्रतीप
 गमनाय भवन्ति शत्रुनिवर्तनाय इत्यर्थः ७ अन्यदागमनज्ञानमाह नागच्छतीति अर्कः आदित्यः चन्द्रः प्रसिद्धः अर्कचन्द्रौ यदा
यस्मिन् काले लग्नाच्चतुर्थभवनस्थौ चतुर्थस्थानगतौ भवतस्तदा परचक्रं शत्रुसमूहो नागच्छतिनायाति गुरुर्बृहस्पतिः गुरुबुधशुक्रा

त्रिपञ्चषष्ठारिपुसङ्गमायपापाश्चतुर्थाविनिवर्तनाय ७ नागच्छतिपरचक्रंयदार्कचन्द्रौचतुर्थभवनस्थौ
गुरुबुधशुक्राहिबुकेयदातदाशीघ्रमायाति ९ मेषधनुःसिंहवृषाययुदयस्थाभवन्तिहिबुकेवा शत्रुर्निव
र्ततेतदाग्रहसहितावावियुक्तावा १० स्थिरराशौयद्युदयेशनिर्गुरुर्वायदास्थितस्तदाशत्रुः॥ ॥

हिबुके चतुर्थस्थाने यदा स्थिता भवन्ति तदा तस्मिन्नेव काले परचक्रं शीघ्रमाश्ववाश्यति आगच्छति ९ अन्यद्योगान्तरमाह मेषेति धनु
र्धन्वी एते मेषधनुःसिंहवृषाख्या मन्यतम उदयस्थस्तत्काललग्नगतो भवति॥ अथ तत्काललग्नात् हिबुके चतुर्थस्थाने वा भवति
तेच ग्रहैः सहिता वियुता वा भवन्ति तदा तस्मिन् काले शत्रुर्निवृत्तिं प्रयातीत्यर्थः १० अन्यच्छत्रोरागमनमाह स्थिरराशाविति उदये त
त्काललग्ने स्थिरे स्थिरराशौ तत्र च शनिः सौरो गुरुर्जीवो वा भवति॥

CC-0. In Public Domain. Digitization by eGangotri

भवति तथा लग्नगतः प्राप्तलग्नस्थो द्विदेहः द्विस्वभावराशिर्यदा यस्मिन्काले तदा तस्मिन् काले पथः मार्गस्यार्द्धं दलमागत्य प्राप्य
निवर्त्तते प्रतीपं गच्छति तु प्रष्टोऽवधारयेद्विपर्ययस्त्विति विपर्ययराशिस्थशशिनि चरराशौ लग्नगते अथवा स्थिरराशिस्थे चन्द्रे द्विस्वभावे
लग्नगते शत्रोरागमने बलद्वयेन भवेत् पराजयः स्यादशुभेक्षिते तु तस्मिन्नेव विपर्ययो योगे लग्ने चन्द्रे अशुभेक्षिते च पापग्रहसंदृ
ष्टे शत्रोस्सकाशात् प्रष्टुः पराजयोऽभिभवः स्यात् एतदुक्तं भवति चरराशौ लग्नगते चन्द्रे द्विस्वभावगते वा द्वयोरपि पापदृष्टयोः भ
शत्रोरागमनं द्विधा भवति आगमश्च पराजयं करोति ९५ अन्यद्गमनागमनज्ञानयोगमाह अर्केति अर्क आदित्यः आर्किः श

विपर्यये चागमनं द्विधा स्यात्पराजयः स्यादशुभेक्षिते तु ९५ अर्कार्किज्ञसितानामेकोऽपि चरोदये यदा भव
ति प्रवदेत्तदाशुगमनं वक्रगते नेति वक्तव्यं ९६ स्थिरोदये जीवशनैश्चरेक्षिते गमागमौ नैव वदेत्तु पृच्छतः

नि ज्ञो बुधः सितः शुक्र एतेषां मध्ये एकोऽपि चरराशौ लग्नगते स्थितो भवति तदाशु क्षिप्रमेव यायिनो गमनं वदेत् ब्रूयात् रवि
वर्ज्जे अन्येषामेकतमो यदा चरलग्नगतो भवति स च वक्रगः प्रतीपगतिमाश्रितो भवति तदा यायिनो गमनं नास्तीति वक्तव्यं अतोऽन
उच्यते ९६ अन्ययोगान्तरमाह स्थिरोदय इति स्थिरोदये स्थिरराशौ लग्नगते तस्मिंश्च जीवशनैश्चरेक्षिते बृहस्पतिसौरिभ्यां दृष्टे
पृच्छतः प्रष्टुः गमागमौ न वदेत् गमागमौ न भवत इति अस्मिन्नेव स्थिरोदये जीव॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व.पं. अत्रेयमस्कुरोनि स्थिरलग्नमन्यतमस्योदयेवाशुभं स्थिरलग्नमन्यतमस्य उदयेपापसंयुक्तेवाविकल्पेन शुभंभवतितस्यानंपापग्रह
टी.भ. स्यस्वक्षेत्रमुच्चंमूलत्रिकोणमित्रक्षेत्रंवाभवतितदाशुभं अन्यथानिष्टमित्यर्थः केचित्तु स्थिरेऽष्टमेपापेवाशुभमितिपठन्ति स्थिर
६ राशौ लग्नादष्टमेपापासंयुक्तेवा शुभमिति प्रागवदितिसिंहोवृषः प्रथमषष्ठस्य ह्याङ्गनालिकुम्भास्त्रिकोणभवनानिवदन्तिसूर्य्या
त्॥सू।चं।मं।बु।गु।शु।श।१।२।१।६।८।७।११॥१२॥ अधुना शत्रोरागमनमाह स्थिरेशशिनीति स्थिरराशौ चन्द्रो भवति चरोदये।
चरराशौलग्नगतेप्रश्नलग्नकालेयदारिपोः शत्रोर्नचागमं आगमो न विद्यते यस्मिन्नेवप्रश्ने रिपोरागमनं वदेत् ब्रूयात् विपर्य्यये

स्थिरे शशी चरोदये न चागमो रिपोर्यदा तदागमं रिपोर्वदेद्विपर्य्यये विपर्य्ययं १३ स्थिरे तु लग्नमागते द्विरा
त्मके तु चन्द्रमाः निवर्त्तते रिपुस्तदा सुदूरमागतोऽपि सन् १४ चरे शशी लग्नगतो द्विदेहः पथोऽर्द्धमागत्य नि

विपर्य्ययमितितस्मादेवपूर्वोक्ताद्विपर्य्ययं विपरीतमेववक्तव्यं एतदुक्तंभवति चरेशशिनिस्थिरराशौलग्नगते १५ वर्त्तते रिपुः
यदिरिपोरागमनंश्रूयते तदा तस्मिन्प्रश्ने आगच्छतीत्यर्थः १३ अथ शत्रुनिवृत्तिज्ञानमाह स्थिरइति स्थिरे स्थिरराशौलग्नग राम
ते तत्काललग्नप्राप्ते द्विरात्मके द्विस्वभावराशौ यदा चन्द्रमाः शशीभवति तदारिपुः शत्रुः सुदूरमागतोऽपिसन् अतिशयेन दूरं सुदूरं ६
तस्स्थानात्सुदूरमप्यागतः संप्राप्तः निवर्त्तते प्रतीपंगच्छतिअपिः सम्भावनार्था १४ अथान्ययोगान्तरमाह चरइति चरराशौशशीचन्द्र

अधुनातत्तनष्टमुष्टिगतचिन्तितानांधातुमूलजीवानांपरिज्ञानमाह स्वांशएतिकश्चिद्ग्रहस्तत्कालस्वांशेआत्मीयनवांशकेस्थितः
विलग्नेप्रागमलग्नेतत्कालोदितस्वांशान्तस्यैवग्रहस्यआत्मीयनवांशकंतच्चपश्यतिविलोकयति तदाप्रष्टुर्धातुचिन्तांप्रवदेत् सु
वर्णादिमृत्तिकान्तंधातुद्रव्यंएतदुक्तंभवतिस्वांशकस्थोग्रहः स्वांशयुक्तंविलग्नंपश्यतितदाधातुचिन्तांप्रवदेत् अथविलग्नग
तंस्वांशमप्यपश्यति पञ्चमेवास्थितं नमेवस्वांशमप्यपश्यतिनवमस्यात्मीयमपिआत्मीयःआत्मनःप्रथमद्वितीयपञ्चमनवमानामे
कएवनवांशस्तुल्यकालमुदेतिएतदुक्तंभवतियतःस्वनवांशकस्थोग्रहो लग्नपञ्चमनवमानामन्यतमंस्वांशयुक्तंपश्यतितदा

स्वांशेविलग्नेयदिवात्रिकोणेस्वांशेस्थितःपश्यतिधातुचिन्तां परांशकस्थश्चकरोतिजीवंमूलंपरांशोपगतःप

धातुचिन्तांप्रवदेत् तत्रापिधात्वाधात्वप्रविभागोग्रहनवांशकवशाद्वाच्यः यावग्रहांशकसमस्थितस्यधात्वंसौम्यग्र रांशमूह
हसमस्थितस्याधात्वमिति परांशकस्थस्तुकरोतिजीवमिति कश्चिद्ग्रहःपरनवांशकस्थःअन्यग्रहनवांशकस्थितःविलग्नंस्वांश
मप्यपश्यतित्रिकोणयोरन्यतमंवातदाजीवंकरोतिजीवचिन्तांप्रवदेत् पुरुषादिसरीसृपान्तंजीवः तत्रापिग्रहयुक्तनवांशकवशाद्द्वि
पदचतुष्पदसरीसृपविभागः मिथुनकन्यातुलाधन्विपूर्वार्द्धकुम्भाद्विपदाः देवानराःपक्षिणश्चद्विपदास्तेषां मेषसिंहवृषधनुरप
रार्द्धश्चतुष्पदाः कर्कटवृश्चिकमकरमीनाः सरीसृपाः तत्रमीनोत्त्यपदः॥

प्र·पं·टी·भ ५ नमित्यादिकं मस्य वमृष्यते चौरैश्चराशिध्यामैः पृच्छालग्नैः तत्फलमनन्तरोक्तं तद्विपरीतं तद्विपर्ययं भवति पूर्वमुक्तं विद्विस्थानं च
रिः स्थानप्राप्तिर्नास्तीति वक्तव्यं गमागमौ न स्तः इत्युक्तं चरैः गमागमौ विद्येते पूर्वमुक्तं न मृतः चौरैर्मृत इति वाच्यं पूर्वमुक्तं नापि नष्टं चौरै
र्नष्टमिति वाच्यं पूर्वमुक्तं न रोगशान्तिः चरैः रोगशान्तिर्भवति पूर्वमुक्तं न चाभिभवः चरैरभिभवो भवतीति वाच्यं ॥ द्विशरीरैः मिश्रितं
वाच्यं द्विशरीरा द्विस्वभावा मिथुनकन्याधन्विमीनाः तैः पृच्छालग्नैर्विमिश्रितं फलं भवति यच्चरैरुक्तं यत्स्थिरैरुक्तं तस्मिन्मिश्रि
तमुभयमपि द्विस्वभावैर्वक्तव्यं भवति न भवतीति वा तत्रायं निश्चयः द्विस्वभावफलं लग्ने प्रथमेऽर्द्धे स्थिरवत्फलं सर्वं वदेत् द्विती

लग्नेन्द्वोर्वक्तव्यं शुभदृष्ट्या शोभनमन्यथा नोऽन्यत् ८ ॥

येऽर्द्धे चरवत् यतस्तस्य प्रथमार्द्धं स्थिरसमीपवर्ति द्वितीयं चरसमीपवर्त्यतः तथा चास्मदीयप्रश्नज्ञाने स्थिरराशौ लग्नगते स्थानप्राप्ति
र्वदेन्न चागमनं रोगोपशमो नाशो द्रव्यालाभस्यापराभवो नात्र चरराशौ विपरीतं मिश्रं वाच्यं द्विमूर्त्युदये स्थिरवत्प्रथमेऽर्द्धे स्यादपरे च
राशिवत्सर्वमिति लग्नं प्रश्नलग्नं इन्दुश्चन्द्रस्तयोर्लग्नेन्द्वोर्द्वयोरपि शुभदृष्ट्या सौम्यग्रहदर्शनेन शोभनं सर्वं वक्तव्यं देहमनोर्थभ राम: ५
वत्वात् एतदुक्तं भवति तत्र पृच्छासु लग्नचन्द्रौ उभावपि शुभदृष्टौ सर्वफलकरौ अन्यदिति अतोस्मादुक्ताद्विपरीतं अन्यत् अशुभं वक्त
व्यं तेन लग्नचन्द्रौ यदि पापदृष्टौ भवतः तदा सर्वं पृच्छास्वशोभनं वक्तव्यं अर्थादेवैकस्मिन्शुभदृष्टे मध्यमं फलमिति ॥ ८ ॥

मुदितः स यावद्दृश्यः गणनीयः तत्र लग्ननवमांशवलात्मागवद्योगविभागः केचित्तृतीये द्रेष्काणे यथासंख्यं धातुं मूलं जीवमिति योजना
यो युग्मे विन्यासे तद्वद्गणनीयं संक्षेपो यमिति वर्णयन्ति तच्चायुक्तं यस्मादाचार्य एव पुरस्तादुक्तवान् अंशकान्नायते द्रव्यमिति संक्षेपो
यं अयं संक्षेपः विस्तराद्यासेनैवाऽस्य प्रभेदः स्पष्टोऽपृथा विधेय इति ७ इति श्रीभट्टोत्पलविरचितायां षट्पञ्चाशिकाविवृतौ संक्षेपहो
राध्यायः १ अथ गमागमो व्याख्यायते ॥ तत्रादावेवं स्थानवृद्धिगमागमजीवनमरणशान्तिरोगपराभवज्ञानमाह वृषसिंहवृ
श्चिकघटैरिति वृषसिंहवृश्चिकाः प्रसिद्धाः घटः कुम्भः एते स्थिरराशयः एतेषामन्यतमे लग्नगते प्रष्टुः स्थानं विद्धि जानीहि प्रष्टुः स्थानला

इति षट्पञ्चाशिकायां संक्षेपहोराध्यायः १॥ वृषसिंहवृश्चिकघटैः विद्धि स्थानं गमागमो नस्तः न मृतं न चा
पि नष्टं न रोगशान्तिर्न चाभिभवः ८ तद्विपरीतं तु चरैर्द्विशरीरैर्मिश्रितं फलं वाच्यं ॥ ॥

भो भवति गमागमो नस्तः गमश्च आगमश्च तौ गमागमौ न स्तः न भवतः स्थिरत्वात् न मृतमिति विदेशस्थः कश्चित् व्याध्यभिभूतो
वा यस्तन्न मृतं जीवत्येव न चापि नष्टम् धात्वादिद्रव्यं अदर्शनं प्राप्तं स्थितं न नष्टं न नाशं प्राप्तं अथ विदेशस्थो जनस्तस्मात् स्थाना
न्न नष्टः नान्यदेशान्तरं गतः न रोगशान्तिः रोगो ज्वरादिः तस्य शान्तिः शमनं व्याध्यभिभूतस्य न भवति न चाभिभवः पराभवः शत्रोः
सकाशान्न भवति ८ तद्विपरीतं तु चरैरिति चरैर्मेषकर्कतुलामकरैः तद्विपरीतन्नरोक्तम् विद्धि स्था ॥

प्र·प्रं अन्ये वक्रपदाः मूलं परांशोपगतः परांशकमित्यिपः कश्चिद्ग्रहः परांशोपगतः अन्यग्रहनवांशे स्थितः विलग्नगतं परनवांशत्रिकोणे वास्य
टीम नमांशं वापश्यति तदा मूलं करोति मूलचिन्तां प्रवदेत् एतस्यापि सम्भवति न चातिवलग्रहदर्शनाज्ज्ञेयं वृक्षादितृणान्तमूलं तत्रापि ग्र
४ हयुक्तनवांशकवशात् स्थलजलजत्वं ज्ञेयं कर्कमीनमकराजलजाः अन्ये स्थलजा इति चिन्तासिद्धिः प्रश्नज्ञानमुक्तं स्वांशस्थितो विल
ग्नेयदा ग्रहः स्वांशकं निरीक्षते धातुचिन्तां करोति परसंस्थितो जीवात्सुरभागसन्निविष्टः परांशके प्राग्विलग्नमावर्तम् पश्यन्ति मूलं
प्रवदेद् देवं पञ्चके ज्ञेयमिति ॥ एतदेव पुनरपि प्रकारान्तरेणाह मेषमिथुनसिंहतुलाधन्विकुम्भा एते ओजराशयः वृषकर्कटकन्यावृ

धातुं मूलं जीवमित्योजराशौ युग्मे विंद्याद्देतद्देव प्रतीपं लग्ने योंशस्तत्क्रमाद्गण्यमेवं संक्षेपोयं विस्तरात्तस्य भे ॥२६॥

श्चिकमकरमीनाख्ये युग्मराशयः तत्र ओजे विषमराशौ लग्नगते प्रथमनवांशको ज्ञेयः धातुं प्रवदेत् द्वितीये तु मूलं
तृतीये तु जीवं पुनरपि चतुर्थे धातुं पञ्चमे मूलं षष्ठे जीवं पुनरपि सप्तमे धातुं अष्टमे मूलं नवमे जीवमिति युग्मे विंद्यादेतद्देव प्रतीपं।
युग्मे युग्मराशौ लग्नगते नवमांशक्रमेण एतदेव पूर्वोक्तं प्रतीपं विपर्ययेण विद्यात् जानीयात् तेन प्रथमनवमांशके व्युत्क्रमेण विप राम
र्ययः तेन प्रथमनवांशकोदये जीवं द्वितीये मूलं तृतीये धातुं पुनरपि चतुर्थे जीवं पञ्चमे मूलं षष्ठे धातुं पुनः सप्तमे जीवं अष्टमे मूलं ४
नवमे धातुं इत्येवमनेन प्रकारेण परिगण्यं लग्ने विलग्ने यो भागः नवमांशस्तत्काल॰॥

अथ नाशत्रोर्मार्गनिवर्त्तनज्ञानमाह सुतेति सुतश्च शत्रुश्च सुतशत्रू अनयोर्गताः शत्रुस्थानं षष्ठं सुतस्थानं पञ्चमं अनयोर्द्वयोः स्था नयोरेकस्मिन्पापैः सूर्य्यभौमशनिभिः प्रश्नलग्नाद्गतैः समवस्थितैः प्रष्टुः शत्रुः रिपुः मार्गात्स्वयोनिवर्त्तते प्रतीपं गच्छति तैरेव पापैर्लग्नाच्चतुर्थस्थाने समवस्थितैः अपिशब्दः सम्भावनायां प्राप्तोपि शत्रुः निकटस्थो भग्नः पराजितो निवर्त्तते प्रतीपं गच्छतीत्यर्थः १० अथ वा योगान्तरमाह झषालीति झषो मीनः अलिर्वृश्चिकः कुम्भकर्कटौ प्रसिद्धौ एते रसातले चतुर्थस्थाने यदा स्थिताः एषामन्यत

सुतशत्रुगतैः पापैः शत्रुर्मार्गान्निवर्त्तते चतुर्थगैरपि प्राप्तः शत्रुर्भग्नो निवर्त्तते १० झषालिकुम्भकर्कटा रसातले यदा स्थिताः रिपोः पराजयस्तदा चतुष्पदैः पलायनम् ११ चरोदये शुभस्थितैः शुभङ्करोति पापिनां अशोभनैरशोभनं स्थिरोदयेपि वाशुभं ॥ १२ ॥

११ मः प्रश्नलग्नाच्चतुर्थस्थाने यदा भवति समवस्थितः तदा रिपोः शत्रोः पराजयो भवति चतुष्पदैः पलायनं मेषवृषसिंहधनुरपरार्द्धमकरपूर्वार्द्धाश्चतुष्पदाः एषामन्यतमे लग्नाच्चतुर्थस्थाने शत्रोः पलायनमपसर्पणं भवतीत्यर्थः ११ अथ पापिनां प्रति शुभाशुभमाह चरोदय इति चरोदये चरराश्युद्गमे तस्मिन् शुभग्रहाणां बुधजीवशुक्राणां अन्यतमः स्थितः तदा पापिनां गच्छतां शुभं श्रेयस्करं विदधाति तस्मिन्नेव चरोदये अशोभनैः स्थितैः रविभौमार्कजानामन्यतमे स्थिते तेषामेव पापिनामशोभनं॥

CC-0. In Public Domain. Digitization by eGangotri

५·पं· अस्मात्पूर्वोक्तविपर्ययस्तं विपरीतगतं असिद्धिहेतुरसाद्ध्यतायाः कारणं एतदुक्तं भवति पापग्रहे लग्नस्थे पापवर्गे वा लग्नगते प
२ ष्टुः कार्यं न सिद्ध्यति कृच्छ्रेण क्लेशेन संसिद्धिकरं विमिश्रं कार्यसाधनकरं भवति एतदुक्तं भवति सौम्यपापोद्वावपि विलग्नस्थौ
भवतः पापसौम्यवर्गौ वा शीर्षोदयं पापयुक्तो वा पापवर्गस्थो वा पृष्ठोदयः सौम्ययुक्तः सौम्यवर्गस्थो वा उभयोदयो वा तदा क्लेशेन सि
द्धिकृद्भवतीति तद्धिकानिश्चय इति ४ अधुना नष्टस्य ज्ञानमाह होरेति शशाङ्कश्चन्द्रः पूर्णतनुः परिपूर्णमण्डलः शुक्लदशमीमार
भ्य कृष्णपञ्चमीयावत्पूर्णतनुश्चन्द्रो भवति तथा च यवनेश्वरः मासे तु शुक्ले प्रतिपत्प्रवृत्ते पूर्वं शशी मध्यबलो दशाहे श्रेष्ठो द्वितीं

होरास्थितः पूर्णतनुः शशाङ्को जीवेन दृष्टो यदि वा सितेन क्षिप्रं प्रनष्टस्य करोति लब्धिं लाभोपयातो बलवान्शु
भश्च ५॥

पः ल्पबलस्तृतीये सौम्येन दृष्टो बलवान्स दैवेति एवं पूर्णतनुः शशाङ्कः होरायां लग्ने स्थितः होरेति लग्नं भवनस्य चार्द्ध
मिति लग्नस्य होराव्यपदेशः तत्रस्थश्च शशी जीवेन गुरुणा दृष्टावलोकितः यदि वा सितेन शुक्रेण दृष्टः यदि वेत्स्यर्थं निपातो विकल्पार्थे क्षि
प्रमाश्वेव प्रनष्टस्य द्रव्यस्य विनादेर्लब्धिं लाभं करोति विदधातीत्यर्थः लाभोपयातो बलवान् शुभश्चेति शुभः सौम्यग्रहः बलवान्वीर्या राम
युक्तो लाभे एकादशे उपयातः प्राप्तो भवति तथा च शब्दात् क्षिप्रमेव प्रनष्टस्य लब्धिं करोति ग्रहाणां स्थानादिचेष्टाकालबले जातके उ २
क्तं बलवान्मित्रस्वग्रहोच्चराश्यंशगत आरभ्य स्वस्वादिना निष्टशुभाशुभ इत्येतदन्येन ५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्वास्यात् सौम्यग्रहाणां बुधजीवशुक्रपूर्णचन्द्राणामन्यतमेन दृष्टो युक्तो वा यो भावः स्यात्तद्भवेत्तस्यापि वृद्धिर्वक्तव्या पापैरेवमिति एवमनेन
प्रकारेण पापैः पापग्रहैः रविभौमशनैश्चरक्षीणचन्द्राणामन्यतमेन यो यो भावो युतो दृष्टो वा तस्य तस्यास्ति हानिः अपरञ्च यो विज्ञातव्
वक्तव्यः किं चेति तदर्थमाह पृच्छतो जायते पृच्छासमये नराणां जन्मतो जायमानानां वा तथोक्तं स्यात् जातके च वपुः पणन्ति शुभान्
भावान् मूर्त्यादीन् घ्नन्ति संस्थिताः पापाः सौम्याः षष्ठेऽरिघ्नाः सर्वे नेष्टा व्ययाष्टमगा इति जन्माधाने प्रश्नकाले वेति ३ अधुना प्रश्नस
मये लाभालाभशुभाशुभज्ञानार्थमाह सौम्य इति सौम्ये विलग्ने शुभग्रहाणां बुधगुरुसितपूर्णचन्द्राणामन्यतमे विलग्ने स्थि

सौम्ये विलग्ने यदि वास्य वर्गे शीर्षोदये सिद्धिमुपैति कार्य्यं । अतो विपर्य्यस्तमसिद्धिहेतुं कृच्छ्रेण संसिद्धिकरं वि
मिश्रं ४

ते यदि सौम्यस्य वर्गे स्थिते तत्कालं विलग्नप्राप्तग्रहहोराद्रेष्काणद्वादशांशनवमांशत्रिंशांशभेदश्चावयवः प्रतीत
को ग्रहस्य यो यस्य राशिर्निर्दिष्टव्यः वर्गलक्षणमुक्तमेषामन्यतमे विलग्नगते पृष्टुरपि प्रयत्नसिद्धिं साध्यतामुपैति गच्छति अथवा ।
शीर्षोदये पृच्छालग्ने सति कार्य्यसिद्धिमुपैति मेषाद्याश्चत्वारः १।२।३।४।९।१० सधन्विमकराः क्षपाबला ज्ञेयाः पृष्ठोदया विमिथुनाः शी
र्षाख्ये ५।६।७।८।११।१२ उभयतो मीन इति राशीनां पृष्ठोदयत्वं शीर्षोदयत्वञ्चोक्तं एतेषां ५।६।७।८।११।१२ अन्यतमे यदि वि
लग्ने पृच्छतो भवति तत्कार्य्यसिद्धिः साध्यतामुपैति प्राप्नोति अतो विपर्य्यस्तमिति ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीकाशीजीमें महल्लाह उदकटोरानिलोकनाथके फाटकके भीतर रामदास सावकेमकान
में सूर्यप्रभाकर छापाखानेमें हजारीलालगनेसप्रसादकेदूहांषट पञ्चाषिका छापागयालि
खा महेस पाडे छापने वाला राम फल जिसको लेनाहोयसो चांदनी चोकमें कुंजगली के पश्चिम
फाटकके पास हजारीलालगनेसप्रसादके दुकानपर मिलैगा ॥ सं॰ १९३५ वै॰ व॰ २ शुक्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प.पं. श्रीगणेशाय नमः॥ केशाजार्कनिशाकरक्षितिजविज्जीवास्फुजित्सूर्यजान्विघ्नेशं स्वगुरुं प्रणम्य शिरसा देवीं च वागीश्वरीं प्रश्नज्ञानविधौ
१ वराहमिहिरापत्यस्य तद्वृत्तुनिलोकानां हितकाम्यया द्विजवरष्टीकां करोत्युत्पलः १ कानीह शास्त्रे सम्बन्धाभिधेयप्रयोजनानि भवन्ती
त्युच्यते आज्ञत्वादिविनिसृतमिदं वेदाङ्गमिति सम्बन्धः लग्नहोराद्रेष्काणनवमांशकादिना ग्रहस्थानदर्शनेन चगमागमं जयपराज
यलाभालाभमृतनष्टादिपरिज्ञानमभिधेयं सर्वत्र शुभाशुभकथनादिहलोके प्रसिद्धिरिह प्रयोजनं किमेभिरुक्तैरित्यत्रोच्यते सिद्धिः श्रो
तृप्रवृत्तीनां सम्बन्धकथनाद्यतः तस्मात्सर्वेषु शास्त्रेषु सम्बन्धः पूर्वमुच्यते सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् यावत्प्रयोज
नं नोक्तं तावत्तन्न गृह्यते इति कस्यास्मिन् शास्त्रेऽधिकार उच्यते द्विजस्यैव यतस्तेन षडङ्गो वेदोऽध्येतव्यो ज्ञातव्यश्च कान्यङ्गानीत्युच्य
ते शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा छंदसां लक्षणं चैव षडङ्गो वेद उच्यते सतामयमाचारः यच्छास्त्रप्रारम्भे स्वाभिमतदेव
तानमस्कारं कुर्वन्ति तदयमनिकाचार्यो द्विजवरवराहमिहिरस्यात्मजः पृथुयशाः संक्षिप्तां प्रश्नविद्यां स्वसूक्तैः कर्तुकामः आदावेव भ
गवत्सूर्यस्य नमस्कारं स्वनामख्यापनं चार्य्ययाह प्रणिपत्येति वराहमिहिराख्यस्यात्मजेन पुत्रेण पृथुयशाः इत्यभिधानं यस्य तेन र
विसूर्यं मूर्ध्ना शिरसा प्रणिपत्य नमस्कृत्य प्रश्ने प्रश्नविषये दृत्यं प्रश्नविद्या कृता रचिता कीदृशी अर्थगहना अर्थाभिधेयं गहनं गम्भीरं य रा.म.
स्याः किमर्थं परार्थमुद्दिश्य परेषामन्येषां लोकानामर्थं हितमुद्दिश्याभिधाय कीदृशी नष्टपृथुयशा सा सद्यशसा सन्नष्टोऽभूदं यशः कीर्तिर्यस्य तया १.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूतेनविद्याधरोर्यादिगुणसंयुक्तेनेत्यर्थः १ अधुनालग्नचतुर्थसप्तमदशमानांचतुर्णांस्थानानांविचारमाह च्युतिरिति च्यवनंच्युतिः विलग्ना
त् च्युतिर्वा यात्रेष्टा पृच्छति अमुकस्थानान्मे च्युतिर्भवति न वेति तल्लग्नाच्चतुर्थे हिबुका चतुर्थस्थानाद्वृहसुहृत्सुखानांवृद्धिर्वा यामध्यमं
दशमस्थानंतस्मात्प्रवासोज्ञेयः प्रवसनंप्रवासः अन्यदेशादिगमनं अस्तमयान्तसप्तमस्थानान्निवृत्तिः प्रवासनिवर्तनं कथमेतदुच्य
ते चरस्थिरद्विस्वभावात्मकेन यदुक्तंप्रश्नविलग्नकालात् प्रश्नः पृच्छाप्रश्नस्यविलग्नंतस्यकालः समयस्तस्मात् चरराशौलग्नगते

श्रीगणेशायनमः प्रणिपत्यरविंमूर्ध्नावराहमिहिरात्मजेनसद्यशसा प्रश्नेकृतार्थगहनापरार्थमुद्दिश्यपृ
थुयशसा १ च्युतिर्विलग्नाद्धिबुकाच्चवृद्धिर्मध्यात्प्रवासोऽस्तमयान्निवृत्तिः वाच्यंग्रहैः प्रश्नविलग्नकालाद्गृ
हंप्रविष्टोहिबुकेप्रवासी २॥ १९ स्वामिनायुक्तेदृष्टेवाशुभग्रहाणामन्यतमेनवायुते दृष्टेपरिशिष्टगृहसंयोगदर्शनर
हिते च्युतिर्नभवति अन्यथाभवत्येवयत् उक्तंवाच्यंग्रहैः कारणभूतैः वाच्यंसर्वमेवतत् पूर्वंयत् स्थिरराशौग्रहदर्शनयोगरहितेपि
नभवत्येवयावत्तावत्प्यति वृषसिंहवृश्चिककर्कटैः विद्धिस्थानंगमागमोनस्तः इति तथाद्विस्वभावेभवतिवानवास्वामिशुभग्रहदर्श
नाधिक्यात् पापानामल्पकत्वाच्चनभवति अन्यथाभवत्येव एवंचतुर्थस्थानस्यसामान्यतया शुभग्रहस्वामिदर्शनयोगात् गृहादी
नांवृद्धिः अन्यथाअपचयः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प॰ पं॰ दशमस्थानस्य चरराशियोगाच्च प्रवासः अस्तंसप्तमस्थानं तस्य चरराश्यात्मकत्वात् पापग्रहदर्शनाच्च न प्रवासनिवृत्तिः गृहं प्रविष्टो
२ हिबुके प्रवासी हिबुके चतुर्थस्थाने विदेशस्थो नरः गृहं वेश्म प्रविष्टो न चेति वक्तव्यः चतुर्थस्थाने स्वस्वामियुक्ते शुभग्रहयुक्ते वा ग्र
हे प्रविष्टः अन्यथा न प्रविष्टः प्रविष्टस्य यावद्दिनानि व्यतीतानि तावंत्येव गृहप्रविष्टस्य प्रवासिनो गमनानि अथवा यावद्भिर्दिनैश्चतु
र्थस्थाने स ग्रहो यास्यति तावद्भिरेव प्रवासी गृहं प्रविशति एतस्य दूरं गतस्यागमनमित्यस्मिन् वक्ष्यमाणे योगे इति वक्तव्यः २ अधुना
तन्वादीनां द्वादशभावानां शुभाशुभफलमाह यो यो भाव इति तनु १ धन २ सहज ३ सुहृत् ४ सुत ५ रिपु ६ जाया ७ मृत्यु ८ धर्म ९।

यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्यास्ति वृद्धिः पापैरेवं तस्य ——— भावस्य हानिर्विज्ञातव्या

कर्म १० आय ११ व्ययाः १२ इति लग्नाद्द्वादशभावाः इति भावसंज्ञा उक्ताः तथा कुजशुक्रेंदुर्केज्ञगुरु ॥ जायते प्रच्छतां वा ३
क्र कुज जीव सौरि यम गुरवः इति भेशाः राश्याधिपा उक्ताः सौम्येन्दुर्कयमाराः पापास्तैस्संयुक्तः सौम्य इति ग्रहाणां पापसौम्यत्वमुक्तं त
स्याद्दशमतृतीये नवमे पञ्चमे चतुर्थाष्टमे कलत्रे च पश्यन्ति पादवृद्ध्या फलानि चैवं प्रयच्छन्ति इति दृष्टिलक्षणमुक्तं तेन पृच्छासमये यः राम
कश्चिद्भावस्तन्वादिकः स्वस्वामिना आत्मीयेन नाथेन दृष्टोवलोकितः तस्य भावस्य वृद्धिः उपचयोस्ति विद्यते अथवा तेनैव स्वामिना यु २
तः संयुतस्तस्यापि वृद्धिरस्ति सौम्यैः ॥ ॥

यात्रा ७८ मिश्र ८९ ... अनध्याय १०१ पल्लीशरटीह ॥ १०७ गोचर १०८ संक्रान्ति ११५

४०४५ अथ मुहूर्तमार्तंड सटीक प्रारभ्यते ·

४०४५

ग्रंथो यं रचितं ता
...ांतिकथनम
...नाम्नोक्षावा
...नां सुबंधकय
सर्वस्य वहि
...दांगत्वात्
...वेम योज्य
...र्वारंभेष
...गलमाच
...तानमस्

CC-0. In Public Domain. Digitization by eGangotri

सु·मा·
१

श्रीगणेशायनमः आविभ्रमस्कमार्तंडोवतुवाचंनःपादैर्जाड्यतमोहरः वृत्तबद्धतनुःसेव्योभीष्टदोविश्वलोचनः १ अथ
तत्रप्रथमंसूर्यपक्षे मार्तंडः श्रीसूर्यः नोऽस्माकं वाचं अवतु रक्षतु किंलक्षणो मार्तंडः वृत्तबद्धतनुः वृत्तेमंडलेब
स्यसतथा तथाचस्मृतौ सशंखचक्रं रविमंडलेस्थितं कुशेशयाक्रांतमनंतमच्युतमित्यादि श्रुतिरपि यएषएत
लेपुरुषःसोग्निरित्यादि पुनःकिंलक्षणःपादैःकिरणैः जाड्यतमोहरः जाड्यंपातकंशीतंवातमोंधकारस्तद्धरतीतितत्
सेव्यःसेवितुंयोग्यःसेव्यःअभीष्टफलदातृत्वात् पु॰अभीष्टदःसेवितःसन्नभीष्टार्थदायीत्यर्थः पुनःकथंभूतः विश्वलो
लोच्यते अनेनेतिविश्वलोचनः लोकचक्षुर्ग्रहेश्वरइत्यादित्यहृदयेउक्तत्वात् प्रकाशकत्वात् अथग्रंथपक्षे मार्तंडःमुहूर्त
वाचं अवतु किंल॰वृत्तबद्धतनुःवृत्तानिप्रहर्षिणीशार्दूलविक्रीडितानितैर्निबद्धातनुर्यस्यसतथापु॰ पादैर्जाड्यतमोहरःप
दैःजाड्यंमूर्खत्वंतदेवतमः उद्धरतीतितथा पु॰सेव्यःनिरंतरंपठनीयइत्यर्थःपु॰अभीष्टदःयथोक्तमुहूर्तव्युत्पत्तिकरणादभीष्ट
त्यर्थःपु॰विश्वलोचनः समयप्रकाशकत्वात् १ कुर्वेमुहूर्तमार्तंडटीकांमार्तंडवल्लभाम् इयमाकल्पमेतेनादिव्याहृसास्यवंशस
[illegible]तावत्तत्संबंधाधिकारिप्रयोजनान्युच्यंते आब्रह्मादिविनिःसृतमिदंवेदांगमितिसंबंधः उक्तंचनारदसंहितास्त्रसां

मेलंचक्षुर्ज्योतिः शास्त्रमनुत्तमम् अस्यशास्त्रस्य संबंधोवेदांगमिति धातृतइति अत्राप्युक्तम् पूर्ववाक्यार्थमादायग्रंथोयंरचितः
युरिति त्याज्यनक्षत्राद्यृतुलग्नगोचरंगर्भाधानादिसंस्कारविवाहाग्न्याधानवास्तुयात्रामिश्रानध्यायपल्लीग्रहगोचरसंक्रांतिकथनम
भिधेयम् तथाचनारदः अभिधेयंचजगतः शुभाशुभनिरूपणमिति अस्यप्रयोजनंमुहूर्तैर्नानाकार्यसाधनं अस्यसम्यग्ज्ञानान्मोक्षावा
प्तिरितिवा किमेभिरुक्तैरित्यत्रोच्यते नृणांसंबंधाभिधेयप्रयोजनकथनात् शास्त्रेप्रवृत्तिर्जायते उक्तंचसिद्धैः श्रोतृप्रवृत्तीनांसंबंधकथ
नाद्यतः तस्मात्सर्वेषुशास्त्रेषुसंबंधः पूर्वमुच्यते किमेवात्राभिधेयंस्यादितिपृष्टस्तकेनचित् यदिनप्रोच्यतेतस्मै फलंभूल्यंतुतद्भवेत् सर्वस्यवाहि
शास्त्रस्यकर्मणोवापिकस्यचित् यावत्प्रयोजनंनोक्तंतावत्केननगृह्यतइति इहशास्त्रेकस्याधिकारइतिप्रोच्यते द्विजस्यैववेदांगत्वात्
तः षडंगोवेदोहि द्विजैरेवाध्ययनीयोज्ञातव्यश्च तथाचोक्तंभास्करीयासिद्धांतशिरोमणौ तस्माद्विजैरध्ययनीयमेवपुण्यंरहस्यंपरमंपवित्रं योज्यो
षयोन्निनरः सम्यक्धर्मार्थमोक्षांल्लभतेयशश्चेति शिष्टास्तावच्छास्त्रारंभे सर्वारंभाहिदोषेणधूमेनाग्निरिवावृत्ताइति शास्त्रेपारंभेमंग
यमाप्नोसत्यांधर्मेणपापमपनुदतीतिश्रुतिसिद्धप्रयोजमास्थाय स्वस्तिनइंद्रोवृद्धश्रवाइतिश्रौतलिंगाच्चग्रंथस्यनिष्प्रत्यूहपरिसमाप्तयेमंगलमाच
तस्मान्माध्यंदिनीयोब्राह्मणोनारायणोनारायणश्चावासमतिः ज्योतिःशास्त्रसंहितास्कंधेचिकीर्षुरेषप्रत्यूहोपशांतये अभिमतदेवतानमस्क

CC-0. In Public Domain. Digitization by eGangotri

क्षणमंगलपूर्वकंग्रंथकरणप्रतिज्ञांप्रहर्षिण्याह सिंदूरोल्लसितभिति सिंदूरेणउल्लसितंशोभायमानंइभेंद्रवक्त्रंगजाननं अंबांसरस्वतीं
विष्णुंप्रसिद्धं वियतिचरान्ग्रहान् गुरून्निजगुरून्शास्त्रोपदेष्टॄन् प्रणम्यनमस्कृत्वा ऽहंनारायणोमुहूर्तमार्तंडनामग्रंथंतनोमि विस्तारयामि किं
भासन्नौ कार्यसाधनाय पुनःकिमर्थम् विबुधमुदे पंडितहर्षाय हर्षकारणंविशेषणद्वारेणाह किंलक्षणंमुहूर्तमार्तंडं लघुं अतिशयेनाल
अल्पेबह्वर्थाभावशंकांविशेषणद्वारापरिहरति पुनः० बह्वर्थं अर्थबहुलं अल्पग्रंथेबह्वर्थेदुर्बोधशंकांपरिहरति पु० स्फुटगमंप्रकटार्थ
मिति १ अथनानामुहूर्तान्विवक्षुस्तावच्छुभकर्मणित्याज्यांश्चभिःशार्दूलविक्रीडितेनाह यामार्धेभिति यामार्द्धादिकंशुभेशुभकर्म-
सिंदूरोल्लसितेभिभेंद्रवक्त्रमंबांश्रीविष्णुंवियतिचरान्गुरून्प्रणम्य बह्वर्थंविबुधमुदेलघुमुहूर्तमार्तंडंस्फुटगममहं तनोमिप्रभि
णिसत्यजेत् इतिअंतिमश्लोकेनान्वयः यामार्द्धकुलिकोवक्ष्यमाणलक्षणो दिनक्षयोनामयत्रातिथिःसूर्योदयात्षष्टिघटिकाभवति
त्स्ये १ सैवान्यस्मिन्नादिनेदृश्यतेसादिनक्षयः अवमःप्रसिद्धःपारिघंप्रागर्द्धपरिघयोगस्यपूर्वार्द्धं विष्टिर्भद्रावक्ष्यमाणा वैधृतियोगःपातोव्य
तीपातःसंक्रमंसूर्यादीनांराशिसंक्रमणम् सर्वेषांग्रहाणांसंक्रमणेत्याज्यघटिका अग्रेवक्ष्यमाणाःगंडांतंत्रिविधंवक्ष्यमाणम् एकार्गलोवक्ष्य
माणःकृष्णानंगचतुर्दशींकृष्णत्रयोदश्यादिप्रतिपदंतम् चंद्रस्यक्षीणत्वात्केचित्द्वादश्यादिसार्द्धदिनपंचकंत्यज्यतेकृष्णांचांत्यत्रिकंके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्यमोऽयंपक्षोऽङ्गीकृतः कृष्णानंगचतुर्दिनमिति रविशशिक्रांत्योःसमलम् सूर्यचंद्रमसोः क्रांतिसाम्यंगणितगम्यम् तथापितस्यावलोक
नंकस्मिन्दिनेकर्तव्यमित्यग्रेवक्ष्यति स्वलोहोरापापग्रहहोराम् शनिदिनार्कदिनार्धरात्र्यर्धंच उक्तंग्रंथांतरे मूर्तःकालोनिवसतिमहानिशायां
चदिनदलेयस्मात् दशापूर्वदशापरतस्तस्याद्वर्ज्यानिचपलानीति क्षयदिनंपित्रोः मातापितानपितरौतयोःपित्रोः क्षयदिनंश्राद्धदिनमित्यर्थः
जनन्यार्तवंमातुःरजस्वलात्वम् २ मासाद्यमिति मासाद्यंजनिसंभवंजनिरुत्पत्तिः तत्रसंभवोयस्य एवंविधंमासाद्यंमासप्रभृति जन्ममास

यामार्धंकुलिकंदिनार्धमवमंपूर्वंदलंपारिघंविष्टिर्वैधृतिपातसंक्रमगणंगंडांतमेकार्गलम् कृष्णानंगचतुर्दिनंरविशशिक्रांत्योः
समत्वंखलाहोराशात्रिदिनार्धकंक्षयदिनंपित्रोर्जनन्यार्तवम् २ मासाद्यंजनिसंभवंग्रहणभंचंडायुधंदुःक्षणंज्येष्ठपूर्वभ
वस्यपापयुगितेष्वृक्षाणिविष्णंचभवम् जन्मतिथिजन्मनक्षत्रादि ग्रहणभंग्रहणनक्षत्रंचंडायुधंवक्ष्यमाणं दुःक्षणोदुर्मुहूर्तोवक्ष्य
माणःतम् ज्येष्ठंपूर्वभवस्यप्रथमजातापत्यस्यज्येष्ठमासं पापयुगितेष्वृक्षाणि पापाःपापग्रहाः वक्ष्यमाणास्तेषामन्यतमेनयुक्तंइतंगतं ए
षांपुरःस्थितं एतानिऋक्षाणिनक्षत्राणि विष्णंचपांनिक्षत्रंवक्ष्यमाणलक्षणम् ऊनाख्याधिकमासकौ क्षयमासाधिमासौवक्ष्यमाणलक्षणौ युतिषुवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याघ्रूवगंडातिषुत्र्यं ३का९र्था५कं९रस६तुं६पूर्वघटिकाः विष्कंभः व्याघातः शूलः ववज्रःगंडः प्रसिद्धः अतिगंडः एषुयोगेषुक्रमेणात्र्यं
कार्थांकरसर्तुसंख्याकाःपूर्वघटिकाः प्रथमघटिकाः तद्यथा विष्कंभेतिस्रः व्याघातेअंकाः नव शूलेअर्थाःपंच वज्रेअंकाःनव गंडेरसाःषट्‌अ
तिगंडेऋतवःषड ति भानांविषाख्याघटीःभानांअश्विन्यादीनांनक्षत्राणांविषाख्याघटीर्वक्ष्यमाणलक्षणाः६॥३॥लत्तेति लत्तापंचकपापव
र्गएतत्सर्ववक्ष्यमाणंअशुभंचंद्रंवक्ष्यमाणंगोचरप्रकरणेवेधंदशारिष्टकंजातकशास्त्रगम्यम् जन्मेशोज्यसितास्तं जन्मेशोराशिस्वामी ईज्यागु

ऊनाख्याधिकमासकौयुतिषुविव्याघ्रूवगंडातिषुत्र्यंकार्थांकरसर्तुपूर्वघटिकाभानांविषाख्याघटीः३ लत्तापंचकपापवर्ग
मशुभंचंद्रंदशारिष्टकंजन्मेशोज्यसितास्तमंगशशिनोःक्रूरोद्भवांकर्तरीम् रिष्टंगोचरसंभवंग्रहजनिशांतोद्भवंसूतकंदु
श्चिक्यानिमनोविभंगमपिचव्याधिंशुभेसंत्यजेत् ४ रुः सितःशुक्रः एषांअस्तगमनंरविलुप्तिकिरणत्वं अंगशशिनोःक्रूरोद्भवां
कर्तरीम् अंगलग्नं शशीचंद्रःतयोःक्रूरोद्भवांक्रूरग्रहजनितांकर्तरींवक्ष्यमाणलक्षणाम् रिष्टंगोचरसंभवं गोचरेदुष्टग्रहाधिक्यं गोचरंवक्ष्यमाणं
ग्रहजनिशांतोद्भवंसूतकं ग्रहोग्रहणंजनिर्जन्म शांतोमरणं एभ्यः उद्भूतंसूतकं ग्रहणसूतकंजन्मसूतकंमृतसूतकमिति तेषुग्रहणसूतकंवक्ष्यमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णमृदुश्चिह्नानिकार्यारंभसमयेक्षुतदुर्वचनश्रवणादीनि मनोविभंगंअंतःकरणस्यअप्रवर्त्तनं व्याधिर्ज्वरःतमपिरोगःपाप्माज्वरोव्याधिर्वि
कारोदुःखमामयइतिवाग्भट्टः ज्वरितस्यमंगलंनकुर्यादित्यर्थः तथाचोक्तंज्योतिःप्रकाशे जन्माधिपविलग्नेशचंद्रभार्गवमंत्रिणां विरश्मित्वंजन्मभा
सोजन्मभंजन्मवासरः दुर्निमित्तंमनोभंगःक्षयमासाधिमासकौ मृतजातकयोश्चैवसूतकंग्रहणस्यच ज्वरोत्पत्तिंरजोमातुःपित्रोःक्षयदिनंतथा गंडांतत्रि
तयंकालःसंधिर्भस्यातियस्तनोः क्रांतिपातोव्यतीपातोवैधृतिःपरिघार्धकं भानोःसंक्रांतिभोगश्चकुलिकश्चार्धयामकः क्रूरैर्मुक्तंयुतंभोग्यंसराहुशि
रिवधूमितं धिष्ण्यंग्रहणगंपापैर्विद्धंसौम्यैश्चपादतः विष्टिःक्रूरयुतंलग्नंलग्नेशोरिपुमृत्युगः जन्मतोदुस्थितश्चंद्रोलग्नस्थोनिधनोपगः जन्मभाज्ज
न्मलग्नाच्चलग्नलग्नांशकाष्टमौ पापयोर्मध्यगंलग्नंक्षीणेंदुःकुनवांशकः क्रूरवारोपापहोरादुष्टयोगाग्रहोद्भवाः तिथिवृद्धिःक्षयोभानांनाडिका-
विषसंज्ञिताः एतेदोषासमाख्याताःशुभकर्मणिगर्हिताः दशारिष्टोद्भवाश्चान्येगोचरोत्थास्तथापरे लत्तेकार्गलचंडास्त्रकालवेलाश्चपंचकम् मृ
त्युयोगोपग्रहाद्याःस्वेस्वेदेशेतुनिंदिताइति ४ अथोपग्रहांतर्वर्तिदोषांतरंवृत्तार्धेनाह नोकुर्यादिति रविभादसूर्याधिष्ठितनक्षत्रादभगेंद्रधृति
मितानियानिनक्षत्राणितेष्वेषुयुग्मेषु एतदुक्तंभवति सप्तमाष्टमयोःचतुर्दशपंचदशयोःअष्टादशैकोनविंशयोरिति तथापंचाशयोः रविनक्षत्रात्
पंचमदशमयोःतथास्वर्गास्तंचस्तु एकविंशास्तंचस्तनक्षत्रेषुः २१।२२।२३।२४।२५ शोभनानिकर्माणिनोकुर्यात् एषुउग्रशस्त्रघातादिकंतनुयात्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ष्ठ्यां विस्तारयेत् कुर्यादित्यर्थः उक्तं च विष्णुतंत्रमप्रोक्षितेऽश्वचलनं स्यात्सप्तमे सूर्यभान्त्र्शूलं स्यादष्टमेऽपशानिः स्याद्दशमे केतुस्तथाष्टादशे दंडः पंचदशे
चतुर्दश इहप्रोक्तो निपातो बुधैरुल्काकालविदां गणैर्निगदितानैकोनविंशकेऽप्यादिति दैवज्ञवल्लभेऽपि क्रमशोमोहनिर्घातभूकंपावज्रएवच पारिवे
षश्चाविज्ञेयानक्षत्रादेकविंशतेः एतेषु हि दुःसमेतेषु कुर्यात्कर्मनशोभनं दहनाख्याविषैः साध्यं यत्सिद्धिमुपैतिचेति अन्यानपिदोषानग्रेप्रसं
गतोवक्ष्यामि अथास्मिन्ग्रंथेमासादीनांसंज्ञालोकसिद्धाज्ञेयाइति तथापुनरुक्तिनिर्दूषणंवृत्तार्द्धेनाह मासर्त्वायनेति मासाश्चैत्रादयः

नोकुर्याद्विभादर्गेद्धृततोयुग्मेषुपंचाशयोस्वर्गोसंचसकृशोभनानितत्तुथादेष्वाशश्चादिकम् मासर्त्वायनवारयोगतिथिभा
दीनांचसिद्धाभिधाज्ञातव्याःपुनरुक्तिरस्तिकुहचित्सातस्मृतिप्राप्तये ५ इतिश्रीमदनंताख्यचातुर्मास्ययाजिपुत्रनारायणवि
रचितेमुहूर्तमार्तंडेत्याज्यप्रकरणम् १ ऋतवोवसंतादयः अयनेदक्षिणोत्तरे वाराः सूर्यादयः योगाविष्कंभादयः तिथयः प्रतिपदाद
यः भान्यश्विन्यादीनि इत्यादीनांकरणराशिभावादीनांसिद्धाभिधाः शास्त्रांतरसिद्धाः संज्ञाः ज्ञातव्याः तथाइहास्मिन्ग्रंथेकुहचित्क्वचित्पुन
रुक्तिर्वर्ततेसातस्यदूरांतरितस्यस्मृतिप्राप्तयेस्मरणायेतिनदोषः ५ इतिस्वोक्तमुहूर्तमार्तंडटीकायांमार्तंडवल्लभायांत्याज्यप्रकरणम् १ छ

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसाधारणनक्षत्रप्रकरणंविवक्षरादौनक्षत्रदेवताः वृत्तेनैकेनाह अस्मिन्प्रकरणेसर्वाणिशार्दूलविक्रीडितानि भेशाइति अश्विन्याःस
काशात्क्रमेणभेशाबुधैः प्रोक्ताइत्यन्वयः भानांनक्षत्राणामीशाः स्वामिनः दस्रौअश्विन्याः यमोभरण्याःअग्निःकृत्तिकायाःकोब्रह्मारोहि
ण्याः इंदुर्मृगस्य गिरिशोमहादेवःआर्द्रायाःअदितिःपुनर्वसोःअंगिराःगुरुःपुष्यस्य पन्नगाःसर्पाःआश्लेषायाःकव्यभुजःपितरःमघायाः

भेशादस्रयमाग्निकंदुगिरिशाःप्रोक्ताअदित्यंगिराः सर्पाः कव्यभुजोभगोर्यमरविलष्टासमीरः क्रमात् इंद्राग्निन्त्व
थमित्रइंद्रनिर्ऋतिनीरन्चविश्वेविधिर्वैकुंठावसूपाश्यजैकचरणाहिबुध्न्यपूषाभिधाः १

भगःपूर्वाफाल्गुन्याःअर्यमा
उत्तराफाल्गुन्याःरविर्हस्तस्य त्वष्टाचित्रायाः समीरणोवायुः स्वात्याःइंद्राग्नीदेवताद्वयंविशाखायाः मित्रोअनुराधायाः इंद्रोज्येष्ठायाः
निर्ऋतिःराक्षसोमूलस्य नीरंजलंपूर्वाषाढायाःविश्वेउत्तराषाढायाःविधिर्ब्रह्माऽभिजितःवैकुंठोविष्णुःश्रवणस्यवसवोधनिष्ठायाःपा
शीवरुणःशततारकायाःअजैकचरणःपूर्वाभाद्रपदायाःअहिर्बुध्न्यउत्तराभाद्रपदायाः पूषारेवत्याः देवतामयोजनंनक्षत्रज्ञानार्थम् शांतिकादौ
यजनार्थञ्च १ ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथनक्षत्राणांस्थिरत्वादिसंज्ञामाह ब्राह्मंरोहिणी किंलक्षणंब्राह्मम् त्र्युत्तरयुक् तिसृणांउत्तराणांसमाहारस्त्र्युत्तरम् तेनयुक्युक्तं ध्रुवं
स्थिरमितिह्यभिधानंमुनीन्द्रैःस्मृतमित्यन्वयः अथोपूर्वामघायाम्यभंपूर्वात्रयंमघाभरणीतिपंचकम् क्रूरोग्रंक्रूरंउग्रंचोक्तम् श्रवणत्रयादि
तियुतास्वाती श्रवणधनिष्ठाशततारकाःअदितिःपुनर्वसुः एभिःसहितास्वाती चराख्याचलाचोक्ता श्रवणत्रयादिपंचकंचराख्यंच

ब्राह्मंत्र्युत्तरयुक्ध्रुवंस्थिरमथोपूर्वामघायाम्यभंक्रूरोग्रंश्रवणत्रयादितियुतास्वातीचराख्याचला दस्त्रार्काभिजिदीज्यभंल
घुतयाक्षिप्रंचमैत्रांतिमेंदुत्वाष्ट्रंमृदुमैत्रमाग्निभाविशाभिश्रंचसाधारणे२ मूलाहींद्रशिवंचदारुणमदस्तीक्ष्णंमुनीन्द्रैःस्मृतंसंज्ञा
तुल्यमिहाचरंतिसुधियःकार्याहिसंसिद्धये लंप्रोक्तमित्यर्थः दस्त्रार्काभिजिदीज्यभं दस्त्रोअश्विनी अर्कोहस्तःअभिजिद्दृश्यमाणल
क्षणःईज्योगुरुस्तस्यभंपुष्यइतिचतुष्टयंलघुतयाक्षिप्रंप्रोक्तं मैत्रांतिमेंदुत्वाष्ट्रं मैत्रअनुराधा अंतिमंरेवती इंदुर्मृगः त्वाष्ट्रंचित्रा एतच्चतु
ष्टयंमृदुतयामैत्रंप्रोक्तं अग्निभविशे अग्निभंकृत्तिका विशाविशाखा एतेद्वेमिश्रेसाधारणेप्रोक्ते २ मूलप्रसिद्धं अहिराश्लेषा इंद्रोज्ये
ष्ठा शिवःआर्द्रा एतच्चतुष्टयंदारुणं अदः इदंतीक्ष्णंचोक्तं इहएषुध्रुवादिसंज्ञेषुनक्षत्रेषुसंज्ञातुल्यंकार्यम् सुधियःपंडिताःआचरंतिकि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थसंसिद्ध्ये एतदुक्तंभवति स्थिरनक्षत्रेषुस्थिरंकर्मप्रतिष्ठादिकं चरेचरमित्यादिकुर्वतीतिस्पष्टम् अत्रसमानार्थसंज्ञाद्व्यकरणंकवित्वंबंध
नार्थम् अत्रप्रसंगेनसूर्यादीनामपिस्थिरादिसंज्ञासौम्यपापत्वंचवक्तार्द्धेनाह सूर्याद्याइत्यादि सूर्यस्स्थिरः चंद्रश्चंचलः भौमःउग्रः बुधःमिलि
तोमिश्रःगुरुःक्षिप्रःशुक्रोमृदुः शनिर्दारुणःअथपापसौम्यान्ग्रहानाह क्षीणेति क्षीणेंदुःकृष्णाष्टम्यूर्ध्वंप्रतिपत्पर्यंतंक्षीणःअर्कःसूर्यः यमः

सूर्याद्याःस्थिरसंचलोग्रमिलिताःक्षिप्रोमृदुर्दारुणःक्षीणेंद्वर्कयमाररा‍हुशिखिनःपापाबुधस्तैर्युतः ३ अन्हःस्युःशिवसार्पमित्र
पितरोवःस्वंबुविश्वोभिजित्कंद्वंद्वाग्निनिशाचराःआपिजलाधीशोर्यमाख्योभगः रात्रेःस्युःस्मरहात्रयोजचरणात्संचाश्वितो
योदितिर्जीवोविष्णुरिनास्त्वयस्तिथिलवाःकर्मेषुप्रोक्तंस्मृतम् ४
शनिःआरोभौमःराहुःप्रसिद्धःशिखीकेतुः एतेक्षीणेंद्वादयःपा
पाःक्रूराःतैःपापैर्युतोबुधःपापःस्यात् उक्तंचजातकोत्तमे क्षीणेंद्वर्कार्किभौमाः स्युःपापाःसौम्यापितद्युतःराहुकेतूपापतरौपापःपापयुतस्तथेति
अर्थादन्येसौम्याः एषांप्रयोजनंक्रूरसौम्यकर्मसाधने ३ अथप्रसंगेननक्षत्रसमाननामान्दिनरात्रिमुहूर्तान्नक्षत्रोक्तकार्यसाधकान्वृत्तेनैके
नाह एतेह्नोदिवसस्यतिथि १५ लवाःपंचदशांशाःमुहूर्ताःशिवादयःस्युःप्रथमःशिवःद्वितीयः सर्पः तृतीयोमित्रःचतुर्थःपित्ता पंचमोवसुःष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म॰मा॰ ष्टेंदु सप्तमोविश्वे अष्टमोभिजित् नवमोब्रह्मा दशमइंद्रः एकादशइंद्राग्नी द्वादशोनिशाचरः त्रयोदशोजलाधीशोवरुणः चतुर्दशोअर्यमा टी॰
६ रव्यः पंचदशोभगः अथशाने प्रथमः स्मरहाशिवः अजचरणात्त्रयः अजचरणाहिर्बुध्न्यपूषा द्वाः क्रमेण द्वितीयोजचरणः तृतीयोहिर्बुध्न्यः चतुर्थः पू
षा पंचाश्वितइति अश्विनः पंच दस्त्रयमाग्निकेंद्वः पंचमोदस्त्रः षष्ठोयमः सप्तमोग्निः अष्टमः कः ब्रह्मा नवमः इंदुः अथादितिः दशमः एकाद
शोजीवः द्वादशोविष्णुः इनाः त्रयः रविस्त्वष्टानिलाः त्रयोदशोरविः चतुर्दशस्त्वष्टा पंचदशोनिलः वायुः प्रयोजनमाह कर्मेषुप्रोक्तंस्मृतं एषुमुहू
र्तेषुप्रोक्तंनक्षत्रोक्तंकर्मस्मृतम् मुनींद्रैरित्यध्याहारः एतदुक्तंभवति शिवमुहूर्ते आर्द्रानक्षत्रोक्तम् सार्पमुहूर्तेआश्लेषोक्तम् मित्रमुहूर्ते अ
नुराधोक्तंकर्मकुर्यादित्यादि तदुक्तंरत्नमालायाम् यस्मिन्नधिष्ण्येयच्चकर्मोपदिष्टं तद्दैवत्येनन्मुहूर्तेऽपिकार्यमिति लोकेहिस्वामिशब्देसेवके
प्रयुंजानादृश्यंते अतोदेवताशब्दस्तन्नक्षत्रतिथ्यादिषुस्मर्यते तथाविधवृद्धप्रयोगदर्शनाच्च नागोद्वादशनाडीभिर्दिक्पंचदशभिस्त
था भूतोष्टादशनाडीभिर्दूषयन्त्युत्तरांतिथिमिति नागःपंचमी दिग्दशमी भूतश्चतुर्दशीतिवत् ४ इतिस्वोक्तमुहूर्तमार्तंडटीका
यांनक्षत्रप्रकरणम् २ अथगर्भाधानादिसंस्कारप्रकरणंविवक्षुस्तावद्गर्भाधानस्यऋतुसंबंधात्प्रथमंतुफलंस्रग्धरावृत्तेनाह आ ६
द्यर्तावितितत्रादौमासफलमाह आद्यर्तौप्रथमर्तौपौषस्तुकोजेमधुशुक्रचैत्रनभस्याः संतानस्युरित्यन्वयः अर्थाद्ग्रामात्तपरिणामः पौषः प्र

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सिंहःशुक्रोज्येष्ठःऊर्जःकार्त्तिकःमधुश्चैत्रःशुचिराषाढःनभस्योभाद्रपदःएतेषण्मासाःनष्टाःभाद्रइत्यर्थःअर्थादन्येशुभाःतदुक्तंज्योतिर्निबंधे प्र
थमर्त्तौमाघेनारीविधवाभवतिध्रुवम् वैशाखेधनपुत्राढ्याज्येष्ठेरोगान्विताभवेत् आषाढेचमृतापत्याश्रावणेचधनान्विता भाद्रपदेदुर्भगाचआ
श्विनेचतपस्विनी ऊर्जेऽल्पायुष्मतीनारीमार्गशीर्षेबहुप्रजा पुष्येतुपुंश्चलीनारीमाघेपुत्रसमन्विता फाल्गुनेश्रीमतीसाध्वीक्रमान्मासफ
लंस्मृतमिति योगफलमाह कुयुगिति कुयोगोविष्कंभादिकः योगेषुनवयोगाः दुष्टाःसंति विष्कंभादिगंडव्याघातवज्रव्यतीपातपरिघवैधृत

आद्यर्त्तौपौषशुक्रोर्जमधुशुचिनभःस्याःकुयुक्पापवारारिक्तामार्काष्टषष्ठःपरगृहकुप्रदेशास्त्रिसंध्यापराह्णाः भिन्नोग्रामूलती
क्ष्णाविवरमनरुणाल्पाधिकाब्जगराष्टारपातैःपापस्यलग्ननसदरुणजरन्नीलनिर्याबरंच १

यः एतेयोगानशुभाइत्यर्थः अर्थाद
न्येशुभाः तदुक्तं आद्यर्त्तौ दुर्भगानारीविष्कंभेचेद्रजस्वला वंध्याचैवातिगंडेचशूलेशूलवतीभवेत् गंडेचपुंश्चलीनारीव्याघातेचात्मघाति
नीवज्रेचस्वैरिणीप्रोक्तापातेचपतिघातिनी परिघेमृतवंध्याचवैधृतौपतिमारिणी शेषाःशुभाबहवोयोगायथानामफलप्रदाइति वारफलमाह पा
पवाराइति क्षीणेंद्वर्कयमाराःपापाःतेषांवाराःनष्टाःअर्थादन्येशुभाः उक्तंचकारिकायां आदित्येविधवानारीसोमेचैवमृताप्रजा अंगारेऽस्वा

CC-0. In Public Domain. Digitization by eGangotri

सुहृन्नीचबुधेकन्याप्रसूर्भवेत् पुत्रिणीगुरुवारेचकन्यापुत्रवतीभृगौ शनौतुपुंश्चलीपापीप्रथमर्तौविदुर्बुधाइति तथाचनारदः रोगीपतिव्रतादुः
खीपुत्रिणीभोगभागिनी पतिप्रियाक्लेशभागीसूर्यवारादिषुक्रमादिति कारिकावचनेसोमवारफलंमृतप्रजेति नारदवचनेपतिव्रतेति एवंद्वयो
र्विरोधेमृतप्रजेतिकृष्णपक्षेसोमवारविषयम् पतिव्रतेतिशुक्लसोमविषयमितिव्यवस्थापनीयम् अतोमार्तंडवचनंपापवाराइत्येतद्इतिप्रशस्त
म् तिथिफलमाह रिक्तामार्कोष्टषष्ठ्यइति रिक्ताश्चतुर्थीनवमीचतुर्दश्यः अमाअमावास्या अर्कोद्वादशी द्वादश्याःस्वामीअर्कः अथवा
अर्कसंख्यापिद्वादशावाचकासंख्ययापिद्वादशीभवति तिथिदेवताप्रिरत्नमालायां तिथिपाश्चतुर्मुखविधातृविष्णवइत्यादयः अष्टअष्टमी षष्ठी
प्रसिद्धा एताःसप्ततिथयःनशुभाः अर्थादन्याःशुभाःउक्तंच आद्यर्तौसुभगानारीप्रतिपत्सुरजस्वला द्वितीयायांभाग्यवतीतृतीयायांसु-
तान्विता चतुर्थ्यांविधवानारीपंचम्यांधनदायिनी षष्ठ्यांचक्लेशभाक्नारीसप्तम्यांधनवर्धिनी अष्टम्यांराक्षसीनारीनवम्यांपापवर्धिनी दश
म्यांप्रीतिकृन्नारीएकादश्यांसुतान्विता द्वादश्यांदुर्भगानारीत्रयोदश्यांहिरण्यदा चतुर्दश्यांपुंश्चलीस्यात्पौर्णिमास्यांसुपुत्रिणी यदिप्रज्ञानजा
यतदर्शेस्याच्चौरिकाध्रुवमिति स्थानफलमाह परगृहकुपदेति परगृहंभर्तृगृहादन्यत् कुपदंकुत्सितस्थानं एतेउभेनिंद्ये अर्थादन्यच्छुभं उक्तंच
देवस्थानेपितृस्थानेनिंद्यस्थानेन्यवेश्मनि पुष्पवत्याःफलंनस्यान्मार्गेचांडालवेश्मनीति देवस्थानंदेवालयं पितृस्थानंश्मशानं निंद्यस्थानंकुत्सितस्था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नम् अन्यवेश्मभर्तृगृहादन्यद्गृहम् अन्यत्स्फुगमम् नन्वत्रश्लोकेबहूक्तं अत्र कथंपरगृहकुपदेइत्येवोक्तं सत्यं यत्स्थानद्वयमुक्तंतस्मिन्नेवसर्वश्लोकोक्त
मधितिष्ठति तद्यथा देवस्थानान्यवेश्मचांडालवेश्मेतिपदत्रयम् परगृहइत्येतस्मिन्पदेऽधितिष्ठति अन्यत्श्लोकोक्तंनकुपदेवर्तते ननुमार्गः कथंकु
पदेऽस्ति सतुकुत्सितोनभवति अस्तिमार्गेऽपदुष्टत्वं सर्वजनसंचाराद्धर्मशास्त्रप्रसिद्धं तर्हिपूर्वश्लोकोक्तंबहुभाषणंव्यर्थंस्यात् मैवं तदुक्तं
बहुभाषणंत्वनधिकाधिकदोषविवक्षयोक्तमितिनदोषः वेलाफलमाह रात्रिसंध्यापराह्णाइति रात्रिःप्रसिद्धा संध्येद्वे अपराह्णस्त्रेधाविभक्तस्या
ह्नस्तृतीयोभागः एतेचत्वारः कालानशुभाः अर्थादन्योपूर्वाह्णमध्याह्नौशुभौ उक्तंच पुत्रिणीसुभगापुण्यापूर्वाह्णेयारजस्वला मध्याह्नेषुशुभ
प्राप्तिःस्वैरिणीचापराह्णके संध्ययोरुभयोर्वेश्यानिशायांविधवातथेति नक्षत्रफलमाह मिश्रोग्रामूलतीक्ष्णमिति मिश्रेकृत्तिकाविशाखे उग्राणि
पूर्वात्रयभरणीमघाः अमूलतीक्ष्णानिमूलरहिततीक्ष्णानि आश्लेषाज्येष्ठार्द्राइत्येतन्नक्षत्रदशकंनशुभं अर्थादन्यानिशुभानि तदुक्तंनारदीयसंहि
तायाम् श्रीसुतासुभगापुत्रवतीसौख्यान्वितास्थिरा कुलाधिकामानवतीचाश्विन्यांप्रथमार्तवा १ दुःशीलास्वैरिणीस्वस्यगर्भपातनतत्परा परप्रेष्या
कावंध्याभरण्यंप्रथमार्तवा २ अनर्थापुंश्चलीवंध्यागर्भपातनतत्परा प्रेष्यामृतप्रजावापिवन्हिभेप्रथमार्तवा ३ सुशीलासुमनामान्यापतिभक्ताद्दढव्र-
ता गृहार्चनरतानित्यंधातृभेप्र०४ गुणान्विताधर्मरतानारीसर्वसहासती पतिप्रियासज्जाढ्यानचंद्रभेप्र०५ कुलटादुर्भगाकष्टसृतपुत्राखलाजडा

मु·मा· दुष्टाव्रतपरिभ्रष्टा रौद्रेभेप्र०६ पतिभक्ता पुत्रवती वरसंतानमोदिनी कुलाचारानुरक्ताढ्यादितिभेप्र०७ पतिप्रियापुत्रवती नानाभोगवती शुभ टी०
८ मा स्वकर्मनिरता दक्षातिष्यभेप्र०८ परभर्तृरता मेध्या कोपिनी निर्घृणालसा मृषावागीशा दुःपुत्रा भोजंघेप्र०९ निर्द्रव्यारोगसंयुक्ता सर्व-
दागेयलोलुपा पितृवेश्मरता मान्या पितृभेप्रथमा०१० परकार्यरता दीना दुःपुत्रा क्लेशभागिनी मलिना कर्कशा क्रुद्धा [illegible]स्यर्क्षेप्र०११ प्रजावती
धर्मरता निर्वैरा मित्रपुजिता सती मातृगृहासक्ता अर्यमर्क्षे रजस्वला १२ निर्द्रव्या भूरिविभवा पुत्राढ्या भोगभागिनी प्रधाना दानकुशला हस्तर्क्षेप्र०
१३ चित्रकर्मा भोगिनी चकुशला क्रयविक्रये विकीर्णकाम्लक्ष्णाढ्या त्वाष्ट्रभेप्र०१४ बहुधिन्नवती नीरुक्कुशला शिल्पकर्मणी पुत्रपौत्रवती सा-
ध्वी वायुभेप्र०१५ नीचकर्मरता दुष्टा पानासक्ता परप्रिया विपुत्रा मलिना क्रुद्धा द्विदैवेप्र०१६ स्वामिपक्षार्चिता रूपसम्पुणैः सम्यग्विभूषिता सपुत्रा
सुभगा कांता मित्रभेप्र०१७ दुश्चरित्ररता क्लेशिन्यनथा पुंश्चली व्यसः दुःसंतानवती ज्येष्ठानक्षत्रेप्र०१८ संतानार्थगुणैर्नाल्पैर्युक्तान्यक्लेश
भोगिनी स्वकर्मनिरता नित्यं मूलर्क्षेप्र०१९ प्रच्छन्नपापा दुःपुत्रा प्राणिहिंसनतत्परा अजस्रं व्यसनासक्ता तोयभेप्र०२० कार्याकार्येषु कुशला सदा ध
र्मानुवर्तिनी गुणाढ्या भाग्यवती विश्वभेप्र०२१ पुत्रपौत्रान्विता भोगधनधान्यवती सती कालानुमोदिनी मान्या विष्णुभेप्र०२२ धनधान्यवती ८
भोगपुत्रपौत्रसमन्विता स्वकर्मनिरता साध्वी वसुभेप्र०२३ बहुपुत्रा धनवती स्वकर्मनिरता [illegible] कुलानुमोदिनी मान्या वारुणभेप्र०२४

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वंध्यकीबंधुविद्वेष्यानित्यंदुष्टरतारवला शिल्पकार्येषुकुशला १ जांघ्रिभेभ० २५ आढ्यापुत्रवतीमान्यासुप्रसन्नापतिप्रिया बंधुपूज्याधर्मवत्या हिबुध्न्येभ० २६ दृढव्रताधर्मवतीपुत्रसौख्यार्थसंयुता विख्यातागुणसंपन्नापौष्णाभेप्रथमार्तवा २७ अथसंधिफलमाह विवरमिति तिथि- भादीनांविवरसंधिःनशुभं उक्तंच दुर्भगासर्वसंधिष्विति रक्तफलमाह अनरूणाल्पाधिकास्रमिति अरूणादन्यत्अनरुणं अनरुणंच अल्पंचअधिकंचअनरुणाल्पाधिकंतच्चतत् अस्रंच अनरुणाल्पाधिकास्रंनसत्स्यात् अनरुणंनामयत्सुरंगमारक्तंनभवति अस्रंरक्तं अ- न्यत्सुगमम् अर्थादन्यच्छुभं उक्तंच प्रथमर्तौफलंस्त्रीणामुच्यतेरजसोधुना सुभगापुत्रसंयुक्ताशक्रवर्णेतथार्तवे शशशोणितसंका- शेयद्वालक्तकसन्निभे पुत्रकन्याप्रसूतिःस्यान्नीलेतुस्यान्मृतप्रजा कर्बूरंम्रियतेसाचपिंगटेचमृतप्रजा कृष्णेतुविधवानारीरजस्येवंविनि- र्दिशेत् शोणितेबिंदुमात्रेतुस्वैरिणीचाल्पशोणिता वरामध्यस्रवास्यात्तुदुर्भगाबहुशोणितेति ग्रंथांतरेप्युक्तं रक्तेरक्तेभवेत्पुत्रःकृष्णेचमृतपुत्र कापिच्छलाभेभवेद्वंध्या काकवंध्याचपांडुरेति पीतेचस्वैरिणीप्रोक्तासुभगागुंजवर्णके सिंदुराभेभवेत्कन्यारजःशोणितलक्षणमिति करणफल- माह मराष्टेति गरात्अष्टगराष्टगराधृष्टकरणानिबवपर्यंतानिनसत् नशुभानिस्युः अर्थादन्यानिशुभानि उक्तंच बवेपुष्पवतीनारीवंध्या- वाविधवाभवेत् बालवेपुत्रिणीनारीकौलवेप्रमदाभवेत् तैतिलेसुव्रतवतीगरेनारीविनश्यति नष्टप्रजावणिक्संज्ञेविष्ट्यांवंध्यापनो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु·मा· १

ज्झिता शकुनौ च चतुष्पादे नारी वैधव्यमाप्नुयात् नागे नरमते रामा किंस्तुघ्ने विधवा भवेदिति अथोत्पातफलं उत्पातस्त्रिविधः सतु न स्यात् -
तथा च नारदः संध्यास्तूपप्लुवे विष्ट्यामशुभं प्रथमार्तवमिति अथ लग्नफलमाह पापस्य पापलग्नमिति पापग्रहस्य लग्नं न सत्स्यात् क्षीणेन्दु टी॰
र्कयमाराः पापास्तेषामन्यतमस्य लग्नमित्यर्थः पापग्रहस्य मेषसिंहवृश्चिकमकरकुंभाः एतानि लग्नानि न शुभानीत्यर्थः अर्थादन्यानि शुभानि
कर्कलग्ने शुक्लपक्षे शुभं कृष्णपक्षे अशुभं स्वामिवशात् लग्नस्वामिनो वक्ष्यमाणाः उक्तं च आत्मघ्नी भ्रूणहा मेषे वृषे पुत्रवती भवेत् द्वंद्वे कन्या
प्रसूर्नारी मृतापत्या च कार्किणी सिंहे वैधव्यमाप्नोति कन्यायां स्त्री प्रसूर्भवेत् तुलायां बहुपुत्राढ्या दुष्टकर्मरता अलिनि चापे पुत्रधनाढ्या स्यान्मकरे
दुःखिनी भवेत् सकृत्प्रजावती कुंभे मीने चाल्पप्रजा भवेत् नारदोपि कुलीरवृषचापान्त्यनृयुक्कन्यातुलाधनाः राशयः शुभदा ज्ञेया नारीणां प्रथमा
र्तवे इति अत्रापि कर्कलग्नस्य द्वैधं चंद्रस्य सौम्यत्वपापत्ववशाद्व्यवस्था ज्ञेया अथ वस्त्रफलमाह अरुणजरन्नीलचित्रांबरमिति न सत्स्यात् अरुण
मारक्तं जरज्जीर्णं नीलं प्रसिद्धं चित्रं नानावर्णैरंजितं एवंविधं अंबरं वस्त्रं न सत्स्यात् न शुभं स्यादित्यर्थः अर्थात् दृढं शुभं पीतं वस्त्रं शुभं उक्तं च शुभ
गा श्वेतवस्त्रा च रोगिणी रक्तवाससा नीलांबरधरा नारी विधवा प्रथमार्तवे भोगिनी पीतवस्त्रा च दृढवस्त्रा पतिव्रता दुर्भगा जीर्णवस्त्रा चैव सुभगा
चारुवस्त्रिणी अत्रानुक्तमपि त्याज्यप्रकरणोक्तमन्यद्दुष्टं विचारणीयं अत्रास्मिन्नुक्ते निबद्धकाले रजोदर्शने सति अक्षततिलघृतैर्दूर्वयाई १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ययायजनंस्यात् केनदेव्यागायत्रीमंत्रेणसंख्यानुपादानादक्षततिलघृतानामष्टोत्तरशतंहोमः यथाशक्तिस्वर्णगोभूतिलदानंचकार्यं १ इतिस्वो-
क्त० प्रथमार्तवप्रकरणम् ३ अथसाधारणलग्नबलंस्रग्धरावृत्तेनाह प्रायइति इहवक्ष्यमाणेगर्भाधानादिकृत्येप्रायोबाहुल्येनचंद्रंअंत्याष्टमरिपु
तनुगंजजह्यादिति अंत्यंद्वादशं अष्टमंप्रसिद्धं रिपुःषष्ठं तनुर्लग्नं एतान्प्रतिगतंचंद्रंत्यजेति तथाभांशकौत्यज किंलक्षणौभांशकौ मूढनाथौ मूढः
नाथौययोस्तौ तथाअस्तंगतस्यलग्ननवांशावित्यर्थः पुनः किंलक्षणौ क्रूरेद्धाभौ क्रूरग्रहचंद्राणामन्यतमेनयुक्तौ तथाखलांशंत्यज यत्रकुत्रापि

प्रायश्चंद्रंत्यजांत्याष्टमरिपुतनुगंभांशकौमूढनाथौक्रूरेद्धाभौखलांशंमृतिगतखचरंमृत्युतत्पौतनुस्थौ सौम्याः केंद्रत्रिकोणे
ष्वरिभवसहजेष्वन्यखेटाःप्रशस्तास्सर्वत्रैतत्प्रयोज्यंप्रकरणपठितांस्तद्विशेषान्विदित्वा २ इतिसाधारणलग्नबलप्रकरणम् ३

लग्नेपापग्रहनवांशंत्यज तथामृतिगतखचरंत्यज लग्नादष्टमंग्रहंत्यजेदित्यर्थः तथामृत्युतत्पौतनुस्थौत्यज मृत्युर्जन्मराशिजन्मलग्ना-
भ्यामष्टमंस्थानं तत्पस्तत्पतिः त्याज्यः एतौतनुस्थौत्यजेदित्यर्थः लग्नगोचरमाह सौम्याइति सौम्याः सौम्यग्रहाः केंद्राणिलग्न
चतुर्थसप्तमदशमानि त्रिकोणेनवपंचमे एतेषुकेंद्रत्रिकोणेषुसौम्याः ग्रहाः प्रशस्ताः अरिभवसहजेषुअन्यखेटाः अरिः षष्ठं -

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु॰ मा॰ भवः एकादशं सहजंतृतीयंएषुस्थानेषुअन्येखेटाः सौम्येभ्योन्येपापग्रहाः प्रशस्ताः स्युः सर्वत्रैतत्प्रयोज्यं एतत्श्लोकोक्तंसर्वत्र गर्भाधानादि टी॰
१० कृत्येप्रयोज्यं साधारणत्वात् किंकृत्वा प्रकरणपठितांस्तद्विशेषान्विदित्वा पृथक्कृत्येप्रकरणपठितविशेषान्ज्ञात्वा २ इतिसाधारणलग्नबल
प्रकरणम् ३ अथगर्भाधानंस्रग्धरावृत्तेनाह भोसकृतार्थिन्कृतोमुदितः सन्स्वस्त्रींप्रतियाहि गच्छइत्यन्वयः कृतंअर्थयतेअसौकृतार्थी तस्यसं
बोधनंभोसकृतार्थिन् ऋतौरजोदर्शनादारभ्यषोडशरात्रयोऋतुः तस्मिन् मुत्हर्षः संजातोयस्यसमुदितः एवंविधः सन् स्वस्त्रीं प्रति गच्छेत्यर्थः -

स्वस्त्रींप्राङ् निट् चतुष्कासमदिनविवरश्राद्धतत्प्राग्दिनानित्यक्त्वामूलंमघांत्येवस्रकलिजनिभाद्यानिपर्वाणिचर्तौ याहीज्यार्के
दुलग्नेविषमभलवगेरुहूलेभोसकृतार्थिन्व्यस्तैरतैरिहैवायुगहनिमुदितः कन्यकेच्छोसकृचंद्रे १

यतोत्रस्त्रीगर्भधारणंकरोति-
अत्रस्त्रीअपिहर्षिताभाव्या तथाचमनुः ऋतुः स्वाभाविकः स्त्रीणांरात्रयः षोडशस्मृताइति किंकृत्वा प्राङ्निट्चतुष्कासमदिनविवरश्राद्धतत्प्राग्-
दिनानित्यक्त्वा प्राचांनिशाचतुष्कंप्राङ्निट्चतुष्कंपूर्वरात्रिचतुष्टयं असमदिनंविषमदिनं विवराणिदिनरात्रितिथिभादीनांसंधयः श्राद्धंस्वपित्रोः १०
श्राद्धदिनंतत्प्राक्दिनं तस्यश्राद्धस्यपूर्वदिनंएतानित्यक्त्वेत्यर्थः एवंमूलंत्यक्त्वा यथामूलमघांत्येत्यक्त्वा मूलमघेप्रसिद्धे अंत्यंरेवती एतानित्यक्त्वे

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यर्थः तथा वसिष्ठः कलिजनिभाद्यानित्यक्त्वा वसारष्टमी कलिश्चतुर्दशी जनिर्भंजन्मनक्षत्रं अहोदिवा एतानित्यक्त्वेत्यर्थः तथापर्वाणिनत्यक्त्वा पर्वाणिदर्श पौर्णिमासव्यतीपातवैधृतिसंक्रांतिमहापातादीनित्यक्त्वा स्त्रियंप्रतिगच्छेत्यर्थः तथाचनारदः रजोदर्शनतोऽस्पृश्यानार्यादिनचतुष्टयं ततः शुद्धाः क्रियाः स्वेताः सर्ववर्णेष्वयंविधिरिति वसिष्ठः उपप्लवेवैधृतिपातयोश्चविष्ट्यांदिवापारिघपूर्वभागे संध्यासुसर्वास्वपिमातृपित्रोर्मृतेऽह्निपत्नीगमनंविवर्ज्यं दिनेषुयुग्मेषुचवक्ष्यमाणयोगेः सुतार्थीस्वसतीमुपेयात् दिनेषयुग्मेषुचकन्यकार्थीहित्वाचगंडांत्तिथिलग्नभागान् ज्योतिषार्के स्तौयुग्मनिशिस्वस्त्रीं

पुंभेर्केज्यारवारेविभिथुनविषमांगांशयोः पुंसवंस्यात्स्त्रीमंताख्यंचसत्स्वव्ययसुतगृहयोः पर्वरिक्तोनतिथ्याम्

गच्छेत्सुनायसद्विधो मघामूलांत्यपक्षांतभूतदर्शाष्टमीस्त्यजेदिति केः इज्यार्केंदुलग्नैः विषमभलवगैः इज्योगुरुः अर्कः प्रसिद्धः इंदुश्चंद्रः लग्नंप्रसिद्धं एतैर्विषमभलवगैः भंराशिः लवानवांशाः विषमराशिविषमनवांशस्थितैरित्यर्थः नकेवलंविषमभलवगैः अपितुउदूलैः उत्कउत्कृष्टंबलंयेषांतानितथातैः अथ कन्याकामिनोविशेषमाह भोकन्यकेछोइहेवअनंतरोक्तलक्षणेकालेअयुग्महनिविषमदिनेसुदिनः सन्स्त्रींप्रतियाहिकैः एतैर्व्यस्तैः एतैः इज्यार्केंदुलग्नैः व्यस्तैरितिसमभलवगैः समराशिसमांशस्थैः तथाचबृहज्जातके ओजर्क्षेपुरुषांशकेषुबलिभिर्लग्नार्कगुर्विंदुभिः पुंजन्मप्रवदेत्समांशक ग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तैर्युग्मेषुतैर्योषितइति कस्मिन्सति स्वचंद्रेशोभने चंद्रेसति गोचरेण चंद्रबलेसतीत्यर्थः स्वचंद्रइति अनन्यगतिकं विनासर्वत्रयोज्यं पूर्ववल्लग्नबलं १ अ-
थपुंसवनसीमंतोन्नयनेस्रग्धरयाआह पुंभेति पुंभेपुंनक्षत्रे पुंनक्षत्राणिचैतानिपुष्योहस्तपुनर्वसूः अभिजिन्मोष्ठपाचैव अनुराधाश्विसंयुक्तायेति प्रोष्ठ पात्पू-
र्वाभाद्रपदा एषामन्यतमेपुंनक्षत्रे अर्केज्यारवारेरविगुरुभौमवारेविमिथुनविषमांगांशयोः अंगंच अंशश्च अंगांशौविगतं मिथुनंयाभ्यांतौविमिथु-
नौतौचतौअंगांशौचतथातयोः मिथुनरहितेविषमलग्नेविषमनवांशेइत्यर्थः पुंसवंपुंसवनंसीमंताख्यंचसीमंतोन्नयनमपिसत्स्यात् नामेकदे

मासेद्वित्रिप्रसंख्येप्रथमकमपरंतुर्यषष्ठाष्टमेषुप्रोक्तंपुंगर्भलग्नेग्रहबलमनयोर्योज्यमाद्यश्चपक्षः २

शग्रहणेनामग्रहणं कयोः सतोः स्वव्ययस्थतग्रहयोः सतोः पापग्रहरहितयोः व्ययस्थभवनयोः सतोरित्यर्थः पर्वरिक्तोनतिथ्यां पूर्णिमामारिक्तातिथिरहिततिथ्यां-
मासेद्वित्रिप्रसंख्ये प्रथमकं पाठोन्त्याप्रथमकंपुंसवनंगर्भाधानात्द्वित्रिप्रसंख्येमासिद्वितीये तृतीयेवामासिसत्स्यात् अपरंसीमंतोन्नयनं तुर्यषष्ठाष्टमे-
षु गर्भाच्चतुर्यषष्ठाष्टमेषुमासेषुसत्स्यात् यत्पुंगर्भायलग्नबलमुक्तं ईज्यार्केंदुलग्नेरित्यादिकंतदनयोः पुंसवनसीमंतोन्नयनयोर्योज्यं आद्यः पक्षः शु- ११
क्लपक्षश्चयोज्यः नकृष्णः अत्रगर्भाधन्नाशनांतेषुगुरुशुक्रमौढ्यादिकंनचिंत्यमित्यग्रेवक्ष्यति लग्नबलंपूर्ववत् जातूकर्ण्यः द्वितीयेवातृतीयेवामासि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुंसवनंभवेत् व्यक्तेगर्भेभवेत्कार्यंसीमंतेनसहाथवा नृसिंहः रिक्तांचपर्वनवमींत्यक्त्वापुंसवनेशुभाः दृत्तशातेसीमंतोन्नयनंबुधैस्तहिनगोपुन्नामधिष्ण्ये
स्थितेकुर्यात्पुंसवनंचसूर्यदिवसेभौमस्यजीवस्यवेत्यादि बृहस्पतिः कुलीरंमिथुनंकन्यांहित्वाशेषाःशुभावहाइति नारदः चतुर्थेमासिषष्ठेवाप्यष्टमेवात
दीश्वरे बलोपपन्नेदंपत्योश्चंद्रताराबलान्विते अरिक्तापर्वदिवसेकुजजीवार्कवासरे तीक्ष्णमिश्रोग्रवर्ज्येषुपुंलग्नेपुन्नवांशके शुद्धेष्टमेजन्मलग्नात्तयोर्ल
ग्नेनतैधने शुभग्रहेयुतेदृष्टेपापखेटायुतेक्षिते पंचेष्टिकेचतुर्भिर्वाइष्टैर्केंद्रीज्यपूर्वकैः स्त्रीणांतुप्रथमेगर्भेसीमंतोन्नयनंशुभं शुभग्रहेषुधीध-

सूतौजातंविदध्यादपिजनिमरणाशौचकेवाग्निदंतेक्षिप्रैर्ब्राह्मोत्तराभिश्चरमृदुभिरथोनामवर्णाविदध्युः

र्मकेंद्रेष्वरिभवत्रिषु प्रापेषुसत्सुचंद्रेंत्यनिधनाद्यरिवर्जिते क्रूरग्रहाणामेकेपलग्नादंत्यात्मजाष्टगः सीमंतिनीवातद्गर्भंबलीहंतिनसंशयइति २
अथजातकर्मविधिंस्रग्धरावृत्तेनाह सूतौप्रसूतौजातायांजातंजातकर्मविदध्यात्कुर्यात् अथकदाचित्सूतकमध्येप्रसूतौजातायांसत्यांस्मा
र्तकर्मपरित्यागोराहोरन्यत्रसूतकइतिशास्त्रेणजातकर्मणोविरोधेप्राप्तेतदपवादमाह जनिमरणाशौचकेपिअयमर्थः कदाचिज्जातकमृत-
सूतकयोः प्रसूतिर्भवतितदाजातकर्मविषयेसूतकांतरदोषोनास्तीतिभावः सूतकांतरेसत्यपिजातेपुत्रेपितासचैलंस्नानंकुर्यादितिस्वस्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृह्योक्तंकर्मकुर्यादित्यर्थः यतः पूर्वाशौचेनैवास्य शुद्धिः पितुरितिकर्तुरुपलक्षणंवातदंते पूर्वाशौचांतेवा एतस्यांतेवा क्षिप्रादिभिर्नक्षत्रैः कुर्यात् क्षिप्रा-
णिअश्विनीहस्ताभिजित्पुष्याः ध्रुवाण्रोहिणी उत्तरास्तिस्रः चराणिश्रवणत्रयंपुनर्वसूस्वात्यः मृदूनिअनुराधारेवतीमृगचित्राः एभिरित्यर्थः
लग्नबलंपूर्ववत् उक्तंच तस्मिन्जन्ममुहूर्तेपिसूतकांतेथवाशिशोः जातकर्मचकर्तव्यंपितृपूजनपूर्वकं क्षिप्रेध्रुवेमृदौ चरे मिश्रेहीं द्वादशेप्रथमेन्हिवा
केंद्रेशुभैःशुभेगेकार्यंजातकर्मसनातनमिति प्रजापतिः सूतकेतुसमुत्पन्नेपुत्रजन्मयदाभवेत् कर्तुस्तात्कालिकीशुद्धिःपूर्वाशौचेनशुध्यतीति संवर्तः

सूतेः सूर्याष्टिविंशाकृतिमितदिवसेजातमैर्वाचरांगैरिक्ताष्टम्यारमंदान्व्ययगतखचरंप्रोज्झ्यरात्रिंपराण्हे ३

जातेपुत्रेपितुःस्नानंसचैलंतुविधीयते तच्चशीतोदकेनकार्यंतत्रजाबालिः कुर्यान्नैमित्तिकंस्नानंशीताद्भिःकाम्यमेवचेति एतच्चरात्रावपिकार्यं तत्रव
सिष्ठः पुत्रजन्मनियज्ञेचतथासंक्रमणेरवेः राहोश्चदर्शनेस्नानंप्रशस्तंनान्यथानिशि तच्चउत्तराभिमुखंकार्यं तदुक्तंतेनैव श्रुत्वाजातंपितापुत्रंसं
चैलंस्नानमाचरेत् उत्तराभिमुखोभूत्वानद्यांवादेवखातकेइति रात्रौउदकादिगमनाशक्तौविशेषमाह सांख्यायनः दिवाग्रदाहृतंतोयंकृत्वास्व
र्णयुतंतुतत् रात्रिस्नानेतुसंप्राप्तेस्नायादनलसन्निधाविति अथनामकर्माह अथोनामवर्णाविदध्युः सूतेः सूर्याष्टिविंशाकृतिमित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिवसेइति अथानंतरंवर्णाः ब्राह्मणादयः क्रमेणसूतेः प्रसूतेः सकाशात् सूर्या १२ छि १६ विंशा २० कृति २२ मितदिवसेद्वादशषोडशविंशद्वाविंशमितदिव
सेनामविदध्युः कुर्युरित्यर्थः अयमर्थः ब्राह्मणोद्वादशदिवसेक्षत्रियः षोडशे वैश्योविंशतिमिते शूद्रोद्वाविंशतिदिवसे नामकुर्यादित्यर्थः तच्चोक्तं बृहस्प
तिना द्वादशेदिवसेवापिजन्मतोदिवसेशुभे षोडशेविंशतौचैवद्वाविंशेवर्णतः क्रमादिति अत्रान्येपिविकल्पाः संति तत्रव्यासः नामधेयंदशम्यांतुकेचिदि
च्छंतिसूरयः द्वादशेन्त्याहुरन्येतुमासपूर्णेतथापरे अष्टादशेहनितथावदंत्यन्येमनीषिणइति प्राशकालेपिविशेषमाह गर्गः व्यतीपातेचसंक्रांतौग्रह
णेवैधृतावपि श्राद्धंविनाशुभंनैवप्राशकालेपिमानवः अमासंक्रांतिविष्ट्यादौप्राशकालेपिनाचरेदिति यत्रकालनिरोधस्तत्रदोषोनास्ति यस्यां
क्रियायांसर्वोक्तः कालोमासादिनैरपि तस्यांनदोषोभूदल्पंवक्रंवाजीवशुक्रयोरिति अथकालातिक्रमेनक्षत्राण्याह जातभैर्वेति जातभेजात
कर्मोक्तनक्षत्रैर्मैत्रैःक्षिप्रैरित्यादिभिर्वाकार्यं तदुक्तंनारदेन देशकालोपघाताद्यैः कालातिक्रमणंयदि अनस्तगेभृगावीज्येतत्कार्यंचोत्तराय
णे चरस्थिरमृदुक्षिप्रनक्षत्रेशुभवासरे चंद्रताराबलोपेतेदिवसेचशिशोःपितेति अथान्नप्राश्यविशेषमाह चरांगमिति चरांगंचरलग्नंरिक्ता
ष्टम्यारमंदान् रिक्ताश्चतुर्थीनवमीचतुर्दश्यः अष्टमीप्रसिद्धा आरोभौमवारःमंदःशनैश्चरःतान्व्ययगतस्वचरस्वचरंव्ययभावगतंसौम्यं असौम्यंवा
रात्रिःप्रसिद्धा अपराह्णेदिनतृतीयांशः एतान्मोक्ष्यत्यक्कालग्नबलंपूर्ववत् तथाचबृहस्पतिः पूर्वाह्णः श्रेष्ठइत्युक्तोमध्याह्नोमध्यमः स्मृतः अपरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंहंचराशिंचवर्जयेन्नामकर्मणिइति नृसिंहः सायान्हेदुष्टयोगेच्चशनिभूमिजवारयोः रिक्तापर्वाष्टमीविष्टिः किंस्तुघ्नंचविशेषतः एतैर्दोषैर्युते का
लेशान्नावपिनकारयेत्इति बृहस्पतिः शुभवारेचषड्वर्गेशुभानांनामसंपदे राशयश्चास्थिराः श्रेष्ठाह्रिस्वभावाः शुभैर्युताः नृसिंहः लग्नाद्ययाष्टमेसर्वेन
शुभानामकर्मणिइति केषांनामकार्यमितिसंग्रहेउक्तं देवालयगजाश्वानांवृक्षाणांवापिकूपयोः सर्वोपकरणानांचचिन्हानांयोषितांनृणां काव्यादीनांकवी
नांचपश्वादीनांविशेषतः राजप्रासादसंज्ञानांनामकर्मविशिष्यतइति २ अथपालकारोहणंभूम्युपवेशनं दुग्धपानंनिष्क्रमणंचेतिचतुष्टयंवृत्तेकेनाह
प्रसूतेः सकाशात्द्वादशेदिवसेपालकेखट्वायांवा अर्भंबालकंन्यसेत्निदध्यात् उक्तकालातिक्रमेध्रुवमृदुलघुभैर्वानक्षत्रैर्निदध्यात् लग्नबलंपूर्ववत् सू
र्यभाच्चंद्रभंयावत्पंचपंचचतुर्दिशं मध्येचसमदेयानिबालकस्यहितायवै पूर्वभागेतुरोगलंदक्षिणेमरणंध्रुवं पश्चिमेविह्वलोबालोउत्तरे व्याधिसंभ
वः शेषेषुमध्यनक्षत्रेबालकस्यहितायवै तथाचोक्तंबृहस्पतिनास्वसंहितायां खट्वासेहस्तकर्तव्योदशमेद्वादशेपिवा षोडशेदिवसेवापिद्वाविंशेदि
वसेपिवा तथोक्तंभविष्योत्तरे अभीष्टदिवसेपुण्येचंद्रताराबलान्विते मृदुध्रुवक्षिप्रभेतुमाताबाकुलयोषितः शेषशायिनमाचिंत्यप्राक्शीर्षंविन्यसे-
च्छिशुमिति भूम्युपवेशनमाह सौम्येति सौम्योमृगः अश्विनीप्रसिद्धाइज्यः पुष्यः ध्रुवाणि पूर्वोक्तानित्र्युत्तरारोहिण्यः इंद्रोज्येष्ठा एभिर्नक्षत्रैः शुभदिवसं १३
रिक्तादिवर्जितेजन्मतः पंचमेमासिभुविभूम्यांअर्भंनिदध्यात् उपवेशयेदित्यर्थः तथाचोक्तंब्रह्मपुराणे पंचमेचतथामासिभूमौतमुपवेशयेत् तत्रस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैग्रहाः शस्ता भौमोप्यत्रविशेषतः तिथिंविवर्जयेद्रिक्तांशस्तान्याः शृणु भानिमे उत्तरात्रितयंसौम्यंपुष्यर्क्षंशक्रदेवतं प्राजापत्यस्वहस्तश्वशस्तमाश्वि
नमित्रभं वराहंपूजयेद्देवंपृथिवींचतथाद्विजान् भूभागमुपलिप्याथतत्रकृत्वातुमंडलं वाद्यपुण्याहशब्देनभूमौतमुपवेशयेदिति उपवेशनमंत्र
स्तत्रैवोक्तः रक्षैनंवसुधेदेविसदासर्वगतंशिशुं आयुःप्रमाणंसकलंनिक्षिपस्वहरिप्रियेइति दुग्धपानमाह एकत्रिंशेदिनइति एकत्रिंशमितेदिवसेअ
र्भबालकेकंबुनाशंखेनपयःदुग्धंयोज्यंपाययेदित्यर्थः अत्रनृसिंहः एकत्रिंशादिनेचैवपयःशंखेनयोजयेदिति अथमातुःस्वल्पपयस्त्वेपक्षांतरमाह वा

जन्माहाद्द्वादशेन्हिध्रुवमृदुलघुभैर्वान्यसेत्बालकेर्भंसौम्याश्वीज्यध्रुवेंदैर्भुविशुभदिवसेपंचमेमासिदध्यात्

अशननिगदितभैरिति अन्नप्राशननक्षत्रैर्योज्यं भैरित्युपलक्षणं अन्नप्राशनोक्तंअन्यदपिविचार्यं किंलक्षणेअर्भेव्यग्वाशास्येविगतःअगुःराहुर्यस्याःसा
व्यगुःसाचासौआशाचतस्यांआस्यंमुखंयस्यसतथा तस्मिन् राहुवर्जितदिङ्मुखइत्यर्थः लग्नबलंपूर्ववत् व्यग्वाशास्येइतिउपलक्षणं तेन रुद्रयोगिन्या
दिकमपिवर्ज्यं तथाचोक्तंज्योतिर्निबंधे योगिनीराहुरुद्रादिसुखंचैवविवर्जयेत् राहुलक्षणंगुरुर्भान्वोर्वसेत्प्राच्यामिंद्रोभुक्रौचदक्षिणे कालराहुः
कुजेप्रत्यकूउत्तरेबुधमंदयोः लक्षणांतरं इंद्रेवायौयमेरौद्रेतोयाग्निशशिराक्षसे यामार्धमुदयाद्राहुर्भ्रमत्येवंदिगष्टकेइति उदयात्सूर्योदयात् रुद्रल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षणं हरिसोमवन्हिराक्षसयमवरुणानिरहरालयेषेवं उदयादिक्रमतिसदाघटिकारुद्रोमहालयेत्यादि हरिरिंद्रः अथनिष्क्रमणमाह अथास्यगम
वदुदितोनिष्क्रमोमासितुर्ये तुर्येचतुर्थेमासि अस्यार्भकस्यनिष्क्रमोनिष्क्रमणंगमवत्गमनवत्इतियावत् उदितः उक्तः पूर्वैः अत्रयात्राप्रकरणोक्तंसर्वंयोज्यमित्यर्थः
निष्क्रमणंबृहस्पतिनोक्तं अथनिष्क्रमणंनामगृहात्प्रथमनिर्गमः अकृतायांक्रियायांस्यादायुः श्रीनाशनंशिशोः इतियमः उपनिउपनिष्क्रमणंकुर्यात् च
तुर्थेमासिसावनइति कारिकायां चतुर्थेमासिपुण्यर्क्षेशुक्लेनिष्क्रमणंभवेत् स्नातंस्वलंकृतंस्वाभिः कृतस्वस्त्ययनंशिशुमिति आदायगेहान्निर्ग

एकत्रिंशेदिनेवाऽशननिगदितभैःकुंबुनायोज्यमर्भेव्यग्वाशास्येपयोथास्यगमवदुदितोनिष्क्रमोमासितुर्ये ४

च्छेत्सुर्देवतालयं अभ्यर्च्यदेवतांसम्यगाशिषोवाचयेदथ कृत्वाप्रदक्षिणंगेहमानयंतिततःस्वकं मातृस्वसृगृहंवामातुलस्यगृहंनयेत् तदाशी
र्वचनाघैश्चदीर्घायुरभिनंदितः जयंतस्यमतेनायंलिखितः शिशुनिष्क्रमः स्वगृह्यानुसारंयोजयेत् ४ अथकर्णवेधंमंदाक्रांतयाह मैत्रैः अ
नुराधा रेवती मृगचित्राभिःक्षिप्रैः दस्त्रार्काभिजिदीज्यभैः स्थिरभचरभैः स्थिराणिउत्तरात्रयरोहिण्यः चराणिश्रवणत्रयपुनर्वसुस्वात्यः
तैः कथंभूतैः स्थिरभचरभैः व्यानिलांभःपकर्क्षैः विगतानिअनिलांभःपकर्क्षाणियेभ्यस्तानितथातैः अनिलंस्वाती अंभपःशततारका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्संरोहिणी तद्धित्तैरित्यर्थः चैकाफापोषु चैत्रकार्तिकफाल्गुनपौषेष्वित्यर्थः पुंस्त्रीकर्णौपुरुषस्त्रियोः कर्णौपटुनाकुशलेनसविधिस्यथास्थान
यादक्षवामादिवेध्यौपुरुषस्यदक्षिणकर्णादिः स्त्रियः वामकर्णादिरित्यर्थः कर्णवेधनेसूचिमाहबृहस्पतिः सौवर्णीराजपुत्रस्यराजतीविप्रवैश्य
योः शूद्रस्यत्वायसीसूचीमध्यमाष्टांगुलात्मिका कर्णवेधविधिस्तकृत्यपरिशिष्टेउक्तः अथकर्णवेधोवर्षेतृतीयेपंचमेवापुष्येंदुहरिचित्रारे
वतीषुपूर्वाण्हे प्राङ्मुखउपविश्य दक्षिणंकर्णमभिमंत्रयते भद्रंकर्णेभिरिति· सव्यंवक्ष्यंतीवेदिति कुमारायमधुरंदत्वाथाभिवंधात्त

मैत्रैःक्षिप्रैःस्थिरमचरभैर्व्यानिलांमः पकर्क्षैश्चैकाफापौष्विनशनिकुजर्क्षांशवारानपास्य

तोब्राह्मणभोजनमिति किंकृत्वाइनशनिकुजर्क्षांशवारानपास्य रविशनिकुजानांऋक्षाणिलग्नानि अंशानवांशाः वाराःप्रसिद्धास्तांस्त्यक्त्वेत्यर्थः
पुनःकिंकृत्वा रिक्तापर्वेश्वरवसुतिथीनपास्य रिक्ताश्चतुर्थीनवमीचतुर्दश्यःपर्वपूर्णिमामावास्ये संक्रांतिश्च ईश्वरतिथिरेकादशी वसुरष्टमी ए
तानपास्य पुनःकिंकृत्वा रात्रिसंध्येअपास्यस्पष्टं पुनःकिंकृत्वा समाब्दमपास्य समवर्षंत्यक्त्वा विषमेवर्षेकर्तव्यमित्यर्थः तत्रबलंभाग्वत् अ
त्रनृसिंहः वेध्यौकर्णावदंतस्यविषमेब्देपिवाशिशोः शुक्लपक्षेशुभेवारेचैत्रपुष्योर्जफाल्गुने एकादश्यष्टमीपर्वरिक्तावर्ज्याःशुभावहाः शिष्टाश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिथयः सर्वाः कृष्णोचांत्यत्रिकं विना कर्णं कुर्यादितिक्षिप्रमृदुभैस्त्रायगैः शुभैः गुरौलग्ने कैप्याहु कृत्तरावृश्रुतिं व्यधेदिति अगस्त्यः द्वयोश्चसंध्ययोर्लग्नेनकुर्यात्कर्णवेधनं शन्नावपितथालग्नेनक्षत्रतिथिसंधिषु कर्णवेधनं कुर्वीतकुर्याच्चेच्छेदनं भवेदिति बृहस्पतिः मंदार्कांशवारास्तु वर्ज्याः कर्णस्यवेधने गुरुशुक्रेंदुजेंदूनांपूज्यावारांशकोदयादिति संग्रहे शातकुंभमयीसूचीवेधनेषुशुभप्रदा राजतीवायसीवापियथाविभवतः शुभा शुभूमौप्रांगणेरम्येशुचौदेशेवरेरवौ संस्थितेवेधयेत्कर्णौस्त्रीपुंसोर्वामदक्षिणौ शुक्लसूत्रसमायुक्तताम्रसूच्याथवेधयेत् वेधात्तृतीयनक्षत्रेक्षालयेदुष्ण

रिक्तापर्वैश्वरवसुतिथीन्रात्रिसंध्येसमाब्दं पुंस्त्रीकर्णौसविधिपटुनादक्षवामादिवेध्यौ ५

वारिणेदिति देवलः कर्णरंध्रेरवेश्छायानविशेदग्रजन्मनः तंदृष्ट्वाविलयंयातिपुण्यौघाश्चपुरातनाइति ५ अथान्नप्राशनंवृत्तेनाह जन्मतः षष्ठमासे अष्टमेवामासेनुः नरस्य अशनंअन्नप्राशनंनिगदितंप्रोक्तं धीरैः कन्यायाः पंचमेसप्तमेवामासे अशनंप्रोक्तं अत्रनंदाहरिवसुरजनीरिक्ताः उझंतिमुनयः नंदाः प्रतिपत्षष्ठ्येकादश्यः हरिर्द्वादशी वसुरष्टमी रजनीरात्रिः रिक्ताश्चतुर्थीनवमीचतुर्दश्यः ताः स्वर्क्षंजन्मनक्षत्रं एकेआचार्याअत्र उझंति तथाचोक्तं जन्मर्क्षेश्रीक्षयंविद्यादिति जन्मर्क्षंतुपुंविवाहान्नप्राशनादिषुबहुभिर्गृह्यते तदग्रेवक्ष्यतेपुनः कस्मिन्सद्भांशान्दिह १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रेष्काणः अंशोनवांशः अहोदिनं एषांसमाहारः सद्दृक्कांशाहः सनोगृहस्यद्रेष्कांशाहः सद्दृक्कांशाहः तस्मिन्कथंभूतेसद्दृक्कांशान्हि अचांद्रे नवि यतेचांद्रद्रेष्कांशोयस्मिन्तदचांद्रं तस्मिन्चंद्रस्यद्रेष्कांशाहानिनिंद्यानिक्षीणश्चेत् पूर्णेतुनदोषः अन्येषांशुभग्रहाणांशुभानीत्यर्थः पुनः कस्मि न् ध्रुवमृदुचरभक्षिप्रभे ध्रुवादीनिप्रसिद्धानिपूर्वमेवोक्तानि तत्रेत्यर्थः पुनःकस्मिन् अजामिलीनोनांगे अजोमेषः अलिर्वृश्चिकः मीनः प्रसि द्धः एभ्योन्यलग्नेमेषवृश्चिकमीनलग्नान्यन्नप्राशनेनशुभानीत्यर्थः कास्रसतीषुकेंद्रत्रिकोणांत्यमृत्तिषु विमलास्रसतीषु केंद्राणिप्रथम

मासेषष्ठेष्टमेनुर्निगदितमशनंपंचमेसप्तमेवाभीरोरुःस्वंतिनंदाहरिवसरजनीरिक्तकास्त्वर्क्षमेके

चतुर्थसप्तमदशमानि त्रिकोणेनवपंचमे अत्यंद्वादशंमृतिरष्टमं परवह्निंगंद्वंद्वतत्पुरुषयोः एतास्रविमलास्रपापग्रहरहितास्रसतीषु पापग्र होत्रअनिष्टकारीत्यर्थः इंदुश्चंद्रः अखिलःपूर्णः अंगेलग्नेइष्टः अन्नप्राशनेपूर्णचंद्रोलग्नेशुभइत्यर्थः अन्यल्लग्नबलंपूर्ववत् अत्रनारदः ष ष्ठेमास्यष्टमेवापिपुंसांस्त्रीणांतुपंचमे सप्तमेमासिवाकार्यंनवान्नप्राशनंशिशोः रिक्तांदिनक्षयंनंदांद्वादशीमष्टमींसमां त्यक्त्वान्यतिथयःश्रेष्ठाः प्राशनेशुभवासराइति ज्योतिर्विवरणे जन्मर्क्षेश्रीक्षयंविंद्यात्कर्मर्क्षेचातिसौख्यकृत् आधानर्क्षेचबालानांप्राशनेरोगनाशनं स्वनारदः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जीवसौम्यसितानांतु दृक्काणदिवसांशकाः बालान्नप्राशने शस्तान चंद्रार्कार्कजासृजामिति अर्णवे गोश्वोकुंभस्त्रलाकन्यासिंहः कर्कि मृगोयमः एताश्वराशयः शस्तानमेषझषवृश्चिकाइति नारदः चरस्थिरमृदुक्षिप्रनक्षत्रेषुननैधनेइति रवौलग्नेकुष्ठीत्याह ६ अथयेषुसंस्कारेषुगुरुशुक्रास्तादिदोषाभावः येषुदोषः बालत्ववृद्धत्वप्रमाणंशास्त्रेशस्यमौढ्येकिंनकार्यमितिचतुष्टयंवृत्तेनेनाह गर्भाधानाशनांतेषुगर्भाधानादिअन्नप्राशनांतेषुकर्मसुगुरुसितयोर्बाल्यवार्धेचपरंमौढ्यंगुरुशुक्रमूढत्वंनजत्यात् नत्यजेत् कस्माद्धेतोः कालस्यरोधात् यतः

सद्दक्कांशान्त्यचांद्रेध्रुवमृदुचरभक्षिप्रभेजालिमीनोनांगेकेंद्रत्रिकोणांत्यमृतिषुविमलास्विंदुरिष्टेरविलोंगे६

शास्त्रेगर्भाधानादि अन्नप्राशनांतानांकर्मणांकालनिरोधः कृतोस्तितस्माद्धेतोः तथाचमांडव्यः नित्ययानेगृहेजीर्णेप्राशनांतेषुसप्तसु वधूप्रवेशमांगल्येनमौढ्यंगुरुशुक्रयोरिति हरिगुरुः सिंहस्थितंबृहस्पतिं याम्यमयनंदक्षिणायनं ऊनाधिमासो क्षयमासाधिमासौ नत्यजेत् कालस्यरोधादित्येतत्पदंबुध्यावगंतव्यं तद्यथा प्रसूतिसमयएवजातकर्मविहितं तत्रकालनिरोधात् किमप्यस्तादिकंनचिंत्यं अन्नप्राशनंतुमासेषष्ठेष्टमेवेतिविकल्पेनमासद्वयेविहितं तत्रयस्मिन्मासेमौढ्यादिकंनस्यात्तत्रकर्तव्यं कालस्यसावकाशत्वात् तयोरपिमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सयोर्यदि सिंहस्थगुर्वादिनिरोधः स्यात्सोप्यत्रनचिंतनीयः एवंगर्भाधानाशनांतेषुविचारणीयं अनन्यगतिकंकुर्यान्नित्यंनैमित्तिकं तथेतिस्मरणात् सं-
स्कारक्रमस्तुकात्यायनगृह्यकारिकायामुक्तः गर्भाधानंपुंसवनंसीमंतोन्नयनंततः जातकर्माभिधेयंचनिष्क्रमप्राशनेक्रमात् चूडोपनयनंवेदव्र
तानांचचतुष्टयं गोदानमेखलामोक्षोविवाहः षोडशक्रियाइति अनेनक्रमेणगर्भाधान्नाशनांतेषुमौढ्यादिकंबुध्यावलोकयेदित्यर्थः तथाचबृहस्प
तिः मासप्रयुक्तकार्येषुमूढत्वंगुरुशुक्रयोः नदोषकृन्नदामासलक्षणोबलवानिति यमोपि गर्भेवार्धुषिकेभृत्येश्राद्धकर्मणिमासिके सपिंडीक

गर्भाद्यन्नाशनांतेषुनगुरुसितयोर्बाल्यवार्धेचमौढ्यंजल्पात्कालस्यरोधाद्धरिगुरुमयनंयाम्यमूनाधिमासौ

रणेनित्येनाधिमासंविवर्जयेत् भृगुः सीमंतजातकादीनिप्राशनांतानिचक्रमात् कर्तव्यानिनदोषोस्तिपंचाननगतेगुराविति कात्यायनस्मृतौ ग
र्भाधानादिकाअन्नप्राशनांतामलिम्लुचे आकर्णवेधाःकर्तव्यानान्याइत्याहभास्करइति अस्तादिकंचूडादिषुवर्जनीयमित्याह एतच्चौलादिषूक्तमदि
ति एतद्गुरुसितास्तादिकंचूडादिषुकर्मसुउक्तंत्यजेत् अथबालत्ववृद्धत्वप्रमाणमाह अथगुरुसितयोरिति गुरुसितयोर्गुरुशुक्रयोर्बाल्यवा
र्ध्येबालत्ववृद्धत्वे नगाहेसप्ताहे सप्ताहंबाल्यं सप्ताहंवार्धक्यमिति बालत्ववृद्धत्वंबहुविधमस्ति तत्रमध्यमः पक्षोत्राङ्गीकृतः अथप्रावेश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यःअस्तेवर्ज्यमाह अथोशारवेशमौढ्येइति शाखेशोवेदपतिर्वक्ष्यमाणः तस्यमौढ्ये अस्तेव्रतंमौंजीबंधंनिगमारंभमपिवेदारंभमपिआर्यःश्रे-
ष्ठोनकुर्यात् तस्यास्तेव्रतादिकृतेसतिबटोर्मूर्खत्वंस्यात् ननुवेदारंभेमूर्खत्वंघटतेवेदपतित्वात् व्रतेमूर्खत्वंकिमुक्तं उच्यते व्रतबंधस्तुवेदाध्ययनार्थं
क्रियतेतस्मात्तत्रापिमूर्खत्वंघटते तथाचयाज्ञवल्क्यः उपनीयगुरुः शिष्यंमहाव्याहृतिपूर्वकं वेदमध्यापयेदेनंशौचाचारांश्चशिक्षयेत् प्रतिवेदं-
ब्रह्मचर्यंद्वादशाब्दानिपंचवा ग्रहणांतिकमित्येकेकेशांतश्चैवषोडशेति यज्ञानांतपसांचैवशुभानांचैवकर्मणां वेदएवद्विजातीनांनिश्रेयसकरःपरः

एतच्चौलादिषूक्तंस्यादथगुरुसितयोर्बाल्यवार्धेनगाहेचाथोशारवेशमौढ्येव्रतमपिनिगमारंभमार्योनकुर्यात् ७

तथाचकात्यायनगृह्यसूत्रे वेदंसमाप्यस्नायाद्ब्रह्मचर्यंवाष्टाचत्वारिंशकंद्वादशकेप्येकेगुरुणानुज्ञातइत्यादि ७ अथचौलंसनिर्णयंवृत्तेकेनाह
चौलमिति कार्यंवर्णैरिति अग्रिमश्लोकेनान्वयः चूडाकरणंमाघादिपंचसुमासेषुअमधुषुचैत्ररहितेषुप्रदिष्टंउक्तं तथाचोक्तंनारदेनमाघादिपंच
केचौलंहित्वाक्षीणंविधुंमधुमिति द्वित्रिपंचोन्मितेब्देद्वितीयेतृतीयेपंचमेवर्षेस्वाचाराद्वा स्वकुलाचारतोवा उक्तंचकात्यायनगृह्ये सांवत्सरिकस्यचू १७
डाकरणंतृतीयेवाप्रतिहतेषोडशवर्षस्यकेशांतोयथामंगलंवासर्वेषामिति सांवत्सरिकस्यअतिक्रांताब्दस्येतिहरिहरमिश्रैर्व्याख्यानंकृतं तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चयद् गुरुशिष्यः आद्येब्देकुर्वतेकेचित्संचमेन्येद्वितीयके उपनीत्यासहैवेतिर्विकल्पः कुलधर्मतइति सगर्भायदिभवतिजनन्यत्रेनोकार्यमेतत् अत्रउक्त
वर्षेषुद्वित्रिपंचाब्दकेषुजननीकुमारस्यमातायदिसगर्भाभवतिस्यात्तदाएतच्चौलंनोकार्यं पंचमाब्दादूर्ध्वंगर्भिण्यांसत्यामपिकार्यमित्यर्थःसि
द्धं अत्रनारदः सूनोर्मातरिगर्भिण्यांचूडाकर्मनकारयेत् पंचाब्दात्प्रागथोर्ध्वंतुगर्भिण्यामपिकारयेत् उपनयनेनसहक्रियमाणेनदोषइत्याह साकंय
त्रोपनीत्याक्रियतइहतदायन्निरोधोनहिस्यादिति यत्रउपनीत्यासाकंउपनयनेनसहक्रियतेतदाइहास्मिन्चौलेअयमुक्तोनिरोधश्चैत्रमासमातृग

चौलंमाघादिपंचस्वमधुभुगदितंद्वित्रिपंचोन्मितेब्देस्वाचाराद्वासगर्भायदिभवतिजनन्यत्रनोकार्यमेतत्

र्भलक्षणोनत्वेवस्यात् तदुक्तंतेनैव सहोपनीत्याकुर्याच्चेत्तदादोषोनविद्यतेइति अंबार्तवेनिषेधमाह जह्यादंबार्तवेदोव्रतसुपयमनंचा-
विशुद्धेः शुभार्थीइति अंबार्तवेमातृरजसि अदः अनंतरोक्तंचौलमित्यर्थः व्रतंमौंजी उपनयनंविवाहः आविशुद्धेः शुद्धिपर्यंतंशुभार्थीनरः एतत्त्रयं
जह्यात् नकुर्यादित्यर्थः तथाचमनुस्मृतौ उद्वाहव्रतचूडासुमातायदिरजस्वला तदानमंगलंकार्यंशुद्धौकार्यंशुभेप्सुभिः अन्यमुहूर्तालाभेकारिका
निबंधेशांतिकमुक्तं अलाभेसमुहूर्तस्यरजोदोषेतुसंस्थिते श्रियंसंपूज्यतत्कुर्याद्ब्रह्महत्याभयंकरीं हैमीमाषमितांपद्मांश्रीसूक्तविधिनार्चयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्पूर्वं पायसं हुत्वाभिषिच्य शुभमाचरेत् सूतिकोदक्ययोः शुद्धो गांदद्याद्देम पूर्वकं मासेकर्मणि शुद्धिः स्यादितरस्मिन्नशुध्यतीति उदक्याजरवला ८ अ
थवर्णविशेषेणवारविशेषं तथानक्षत्राणिलग्नबलंचर्तत्तेकेनाह वर्णैर्ब्राह्मणादिभिः यथाक्रमेणइनारार्किशनिषु चौलकर्मकार्यमित्यन्वयः इनः सूर्य-
आरोभौमः आर्किःशनिः शनिःप्रसिद्धः तेषित्यर्थः एतदुक्तंभवति विप्रेणरविवारे क्षत्रियेणभौमवारे वैश्येनशनिवारे शूद्रेणापिशनिवारे चौलंकर्त-
व्यमित्यर्थः शूद्रस्यद्वादशसंस्काराउक्ताः वेदोव्रतोपनयनंमहानाम्नीमहाव्रतं विनाद्वादशशूद्राणांसंस्कारानाममंत्रतइति निखिलैरितिनिखिले

साकंयत्रोपनीत्याक्रियतइहतदायंनिरोधोनहिस्याज्ज्ञस्यादंबार्तवेदोव्रतमुपयमनंचाविशस्तैः शुभार्थी ८

चतुर्भिर्वेभैर्विशेषेणइत्रयेबुधत्रयेशुक्रसोमेशुक्लपक्षगतसोमवारेकार्यं कृष्णपक्षेसोमवारोतिनिंदितः क्षीणत्वात् अत्रनारदः अपर्वरिक्तातिथिषु शुक्रेज्यज्ञेंदुवासरेइति बृहस्पतिः सोमवारःसितपक्षेकृष्णपक्षेतिगर्हितः बुधवारःशुभःप्रोक्तःपापग्रहयुतेबुधे पापग्रहाणांवारादौविप्राणांशु
भदोरविः क्षत्रियाणांसमासूनुर्विट्शूद्राणांशनिःशुभइति कैः द्व्यसद्व्यादित्यशाक्रेंदुभिः अंत्याद्देइति द्व्यंत्ये वसाश्विन्यो द्व्यादिसंपुनर्वसुपुष्यौ
शाक्रंज्येष्ठाइंदुर्मृगःतैःपुनःकैःइनहरितस्त्रित्रिभैः इनोहस्तः हरिःश्रवणःताभ्यांत्रित्रिभैःहस्तात्त्रिभिःश्रवणात्त्रिभिरित्यर्थः तथाचनारदः दस्त्रादि १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीन्यचंद्रेंद्रपूषणानिशुभान्यतः चौलकर्मणिहस्तर्क्षात्त्रीणित्रीणिचविष्णुभादिनि द्यूनेकारार्किशुक्राः अत्रचौलेमृत्युदाःस्युः द्यूनेसप्तमेअर्कारार्किशु
क्राः अर्कः सूर्यः आरोभौमः अर्कस्यापत्यमार्किः शनिः शुक्रः प्रसिद्धः एतेचत्वारोमृत्युदाइति चतुर्णांसमानंफलमुक्तं वसिष्ठेनात्रविशेषफलमुक्तं जामित्रे भास्करे
सौरेमृत्युस्याद्भूमिजेतथा शुक्रेसौख्यविनाशस्यान्मंदभाग्यंशनैश्चरइति अत्रचतुर्णामपिसामान्येनमृत्युफलमुक्तं तद्दारिद्र्यान्मरणंवरमितिन्यायेनन
दोषः गतकविनिखिलामृत्युगामृत्युदास्युः गतः कविः शुक्रोयेभ्यस्तेगतकवयः तेचतेनिखिलाश्चशुक्ररहिताः सर्वेमृत्युगाः अष्टमगामृत्युदास्युः अत्रबृहस्प

कार्यंवर्णैरिनारार्किशनिशुनिखिलेज्ञत्रयेशक्रसोमेद्व्यंसद्यादित्यशाकेंदुभिरिनहरितस्त्रित्रिभैश्चौलकर्म

तिः अष्टमस्थानगाः सर्वेनेष्टाःशुक्रविवर्जिताः शुक्रस्तुनिधनेसौरेसर्वसंपत्प्रदः शिशोरिति व्यङ्गाः संतोत्यइष्टाःविगतः अङ्गः चंद्रोयेभ्यस्तेव्यङ्गाः ए
वंविधाः संतोसद्ग्रहाः चंद्ररहिताः सद्ग्रहाः अंत्येद्वादशेइष्टाःशोभनाःस्युः नारदः चौलान्नप्राशनेशस्ताः सौम्यारंध्रव्ययोपगाइति अन्यच्च ननेधनेप्रेषीतं
शोषष्ठाशंत्यविवर्जितइतितस्यैववचनं अन्यल्लग्नबलंपूर्ववत् स्वजगृहशशिनोरात्रिसंध्येचरिक्ताः गुहः षष्ठीशशीपौर्णिमास्पष्टमन्यत् क्रूरवारं
निशांरिक्तांषष्ठींसंध्यांचजन्मभं सद्भिर्विवर्जयेदेत न्नारदस्यवचोयथेति १ अथप्रसंगात्क्षौरनिर्णयंसार्धरत्तेनाह भुक्तइति भक्तः कृत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भोजनः अभ्यक्तः कृताभ्यंगः उपवासी प्रसिद्धः ईश्वरजनो राजसेवकः समर्थो वा युवतिः स्त्री सौभाग्यवती प्राग्वयस्का प्रथमवयस्काः पंचाशद्वर्षपर्यंतं पूर्व
वयः योगी राजयोगी गीतादौ प्रसिद्धः यात्रायुद्धोन्मुखाः यात्राप्रयाणं युद्धं प्रसिद्धं तौ प्रतियेउन्मुखाः प्रचलिताः यात्रोन्मुखा युद्धोन्मुखाश्चेत्यर्थः कृतः
दिनविधिः आह्निकं यैः ते कृतदिनविधयः अस्तंबकोजीवत्पितृकः तेन मुंड्याः मुंडनार्हा न भवंति अवश्यकार्यादृते इत्युत्तरार्धोक्तमत्रानुसंधेयं च

घूनेकोरार्कि शक्रा गतकवि निखिला मृत्यगामृत्यदास्यव्यंङ्गाः संतोत्स्यइष्टास्यजगुहशशिनो रात्रिसंध्ये चरिक्ताः ९ भुक्ताभ्य
क्तोपवासीश्वरजनयुवतिः प्राग्वयस्काश्च योगी यात्रायुद्धोन्मुखा ये कृतदिनविधयोस्त्यबकास्तेन मुंड्याः सीमंतोर्ध्वं न पत्यु
र्नखकचलवनं दूरदेशप्रयाणं वृक्षछेदः समुद्राप्लुतिमृतहरणे स्यादृते वश्यकार्यात् १०
चावश्यं मुंडनकारणं भवति तत्रावश्यं मुंड्याः

अथ क्षौरनिषेधप्रसंगाद्गुर्विणीपतेर्निषिद्धं सापवादमाह सीमंतोर्ध्वमिति सीमंतोर्ध्वं सीमंतोन्नयनादूर्ध्वं पत्युः कृतसीमंतसंस्कारायाः पत्युर्भर्तुर
वश्यकार्यादृते नखकचलवनादिकं न स्यात् नखकचलवनं नखकेशछेदनं अन्यत्स्पष्टम् अवश्यकार्यादृते न स्यादित्यनेन आवश्यकेन दोष इत्यर्थो
सिद्धं यथा पितृमरणे क्षौरादि देशविप्लवे देशांतरगमनं इत्यादिविचारणया आवश्यकेन दोष इत्यर्थः कृताग्न्याधानस्य मुंडनपक्षांगीकारे मुंडनमावश्य

CC-0. In Public Domain. Digitization by eGangotri

कंमासिमास्युपासनीकस्यपक्षेपक्षेग्निहोत्रिणइति १० अथोक्तेभ्योन्येषांक्षौरार्थंनक्षत्रादिकमाह चौलोक्तभादौक्षौरंगदितंप्रोक्तं चौलार्थमुक्त
श्चौलोक्तः सचासौभादिश्चतस्मिन्नक्षत्रतिथ्यादिकालेक्षौरंगदितंप्रोक्तम् अथक्षौरनिमित्तान्याह रविक्षेत्रगंगाध्वराग्न्याधानेपित्रोर्विनाशेत्यादि रवि
क्षेत्रंभास्करक्षेत्रं गंगाप्रसिद्धा अध्वरोयागः अग्न्याधानंअग्निहोत्रं तस्मिन्पित्रोर्विनाशोमरणंतस्मिन् द्विजनृपकथनेब्राह्मणाज्ञायांराजाज्ञायां-
चसत्यांसर्वदाक्षौरंइष्टंस्यात् क्षौरेनक्षत्रादिनियमोनास्तीत्यर्थः तदुक्तंवृत्तशते भुक्ताभ्यक्तनिरासनेरित्यादि रत्नमालायां आज्ञयानरपतेर्द्विज

क्षौरंचौलोक्तभादौगदितमथरविक्षेत्रगंगाध्वराग्न्याधानेपित्रोर्विनाशेद्विजनृपकथनेसर्वदाक्षौरमिष्टम्

न्मनामित्यादि बृहस्पतिः राजकार्येनियुक्तानांनराणांभूपसेविनां श्मश्रुलोमनखच्छेदेनास्तिकालविशोधनं ज्योतिर्निबंधे राजयोगीपुरंध्रीन्च
मातापित्रोश्चजीवितोः मुंडनंसर्वतीर्थेषुनकुर्याद्गुर्विणीपतिः स्मृत्यंतरे सिंधुस्नानंक्षुरच्छेदंवपनंप्रेतवाहनं विदेशगमनंचैवनकुर्याद्गुर्विणी
पतिः क्षौरंनैमित्तिकंकुर्यान्निषेधेसत्यपिध्रुवं पित्रोःप्रेतविधानंचनदोषस्तत्रविद्यते गंगायांभास्करक्षेत्रेमातापित्रोर्मृतेहनि आधानेसोम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पानेचषट्सुक्षौरंविधीयते अंतर्वत्न्यां तुजायायांतीर्थेक्षौरंनकारयेत् प्रेतवाहादिकंनैवसीमंतोन्नयनादनु पंचाशद्वायनात्पूर्वंक्षौरंनैमित्तिकंविना
नकुर्यात्ततऊर्ध्वंतुस्वेच्छयावपुनंचरेत्इति अथाक्षरारंभंवृत्तार्द्धेनाह मित्रत्र्यर्केति मित्रादिभिर्नक्षत्रैः जन्मतः पंचमेवर्षेव्रताद्व्रतबंधात्प्राक्
प्रथमंविद्यारंभोक्तकालेवक्ष्यमाणलक्षणेअक्षरविधिः प्रथमाक्षरारंभविधिः शुभः स्यादित्यध्याहारः कस्मिन्सतिसौम्यसंज्ञेअनयेअर्केसति

मित्रत्र्यर्कादितींद्रांतिमहरितुरगेः पंचमेब्देव्रतात्प्राक्विद्यारंभोक्तकालेक्षरविधिरघटेसौम्यसंज्ञेयनेर्के ११

कथंभूतेसौम्यसंज्ञेअयने अघटे नविद्यतेघटोयस्मिन्तया तस्मिन्कुंभरहितउत्तरायणेत्यर्थः ब्रह्मतुल्ये अयनलक्षणं कर्किमृगादिषट्कते
चायनेदक्षिणसौम्यायनेस्तइति मित्रमनुराधा त्र्यर्कंहस्तत्रयं अदितिःपुनर्वसुः इंद्रोज्येष्ठा अंतिमंरेवती हरिः श्रवणः तुरगोश्विनी शेषंप्र
थममेवव्याख्यातं व्रतात्प्रागित्यनेनव्रतबंधादुपरिनिषेधोअर्थसिद्धः पंचमेवर्षपठणरुच्याव्रतबंधोग्रेवक्ष्यति तथाचोक्तंबृहस्पतिना द्वि
तीयजन्मतःपूर्वमारंभताक्षरात्सुधीरिति नृसिंहः अक्षरस्वीकृतिः प्रोक्ताप्राप्तेपंचमहायने उत्तरायणगेसूर्येकुंभमासंविवर्जयेदिति ११ ७

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथब्रह्मक्षत्रविशांमुख्यंगौणंचव्रतबंधकालंवृत्तेनाह विप्रादेरिति गर्भतः गर्भाधानाज्जन्मतोवा अष्टशिवरविमिते अब्दे विप्रादेर्व्रतंस्यात् विप्रस्या
ष्टमे क्षत्रियस्यशिवमिते एकादशेवर्षेस्यात् वैश्यस्यरविमितेद्वादशेवर्षेस्यात् अत्रस्वस्ववर्षेजीवेगुरौ अनिष्टे अशुभेसत्यपिव्रतंकार्यं क्वअनि
मिषरविमधौ अनिमिषेरविः अनिमिषरविणाविशिष्टोमधुः अनिमिषरविमधुः तस्मिन्मीनस्थेरवौसतिचैत्रेव्रतंकर्तव्यमित्यर्थः अब्दस्यदा

विप्रादेर्गर्भतोब्देष्टशिवरविमितेजन्मतोवाव्रतंस्याद्व्रानिष्टेपिजीवेनिमिषरविमधौकार्यमब्दस्यदाढ्यात्

र्व्यात् वर्षबलात् तदुक्तंसंग्रहे शुद्धिर्नविद्यते यस्यवर्षेप्राप्तेष्टमेयदि चैत्रेमीनगतेभानौतस्योपनयनंशुभं जन्मपादष्टगेसिंहेनीचेवाशत्रुभे
गुरौ मौंजीबंधःशुभःप्रोक्तश्चैत्रेमीनगतेरवौ अशुभेष्वग्रहाः सर्वेशुभगोचरगाअपि शांतिभावाच्छुभंनैवयात्यब्दः कालमृत्युवत् इति
अथगोपाकालफलमाह स्वाब्दादूर्ध्वंक्रमादिति स्वाब्दात्स्ववर्षादूर्ध्वंक्रमात् अद्विगुणितशरदः द्विगुणिताचासौशरच्चद्विगुणितशरद्

र्यं तांमर्यादीकृत्येति तयातस्याः अब्दक्रमेणनिंद्यं तद्यथाब्राह्मणस्याष्टमंवर्षं मुख्यंतद्द्विगुणितंषोडशं अष्टवर्षात्षोडशवर्षपर्यंतंब्राह्मणस्य· २७
एकादशवर्षात्द्वाविंशवर्षपर्यंतंक्षत्रियस्य द्वादशवर्षाच्चतुर्विंशतिवर्षपर्यंतंवैश्यस्य अब्दक्रमेणोत्तरोत्तरंनिंद्यं अर्थादतऊर्ध्वंअनधिकारि
णोभवंति तदुक्तंसंग्रहे नृपा१६ स्मृति२२ जिना२४ द्यांतंनातिकालस्ततःपरं पातित्यंस्याद्द्विजादेर्व्रात्यस्तोमोविशोधनमिति तथाच्चका
त्यायनगृह्ये आषोडशाद्ब्राह्मणस्यानतीतः कालोभवत्याद्वाविंशाद्राजन्यस्याचतुर्विंशाद्वैश्यस्यातऊर्ध्वंपतितसावित्रीकाभवंतिनैनानुप

स्याब्दादूर्ध्वंक्रमादाद्विगुणितशरदोनिंद्यमब्दक्रमेणपंचाष्टांकाब्दतोवाप्रपठनरुचितःश्रुत्तमेषांतदाहुः१२

नयेयुर्नाध्यापयेयुर्नयाजयेयुर्नचैभिर्व्यवहरेयुः कालातिक्रमेनियतवच्चित्रिपुरुषंपतितसावित्रीकाणामपत्येसंस्कारोनाध्यापनंतेषांसंस्का
रेच्छा व्रात्यस्तोमेनेष्ट्वाकामसधीयीरन्व्यवहार्याभवंतीतिवचनादिति अथस्याब्दात्प्रागपिअध्ययनोत्कंठयादुपनयनकालमाह पंचा
ष्टांकाब्दतोवेति पंचमाष्टमनवमवर्षेभ्यः सकाशादेषांब्रह्मक्षत्रविशांक्रमेणप्रपठनरुचितःवेदादिपठणउच्यातद्व्रतंशस्तमाहुर्मुनयः उक्तंच २१
संग्रहे ब्रह्मवर्चसमूर्जश्चविद्यायुःश्रीयशःसुखं विप्रादेरुपनीतस्यपंचाष्टांकाब्दतःफलम्१२ ५ ७ ७ ७

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथात्रगुरुबलाबलंवृत्तेनैकेनाह राशेरिति राशेर्जन्मराशेः सकाशात् षट्त्र्याद्यखस्थोगुरुः इहास्मिन्व्रतबंधे पूजयाशुभदः स्यात् षट् षष्ठं त्रितृतीयं आद्यंजन्मराशिः खंदशमं एषुतिष्ठतीतितथा तथापिपूजयापि प्रांत्योद्वादशः अबुश्चतुर्थः अष्टमः नशुभदः स्यात् पूजयापिअशुभदः स्यादित्यर्थः सयदिनिजगृहगः स्वगृहगः धनुर्मीनगइत्यर्थः तुंगगोवायदिभवतितदाइहदुष्टस्थानेषुवर्तमानः शस्तः स्यात् अस्यतुंगंकर्कटः तदुक्तंबृहज्जातके अजवृषभमृगांगनाकुलीराझषवणिजौचदिवाकरादितुंगाः दश १० शिखि ३ मनुयुक् २८ तिथीं १५ दियांशे ५ स्त्रिनवक २७ विंशतिभि २०

राशेः षट्त्र्याद्यखस्थोगुरुरिह शुभदः पूजयास्यात्तथापि प्रांत्योंबुस्थोष्टमो नो यदि निजगृहगस्तुंगगो वापि शस्तः
एवं कन्यर्क्षतः स्यादतितरगुणिनो लब्धये वातिकाले निष्टेपीहीह्विरर्च्योष्टमभवनगतः शोभनः स्यात्त्रिरर्च्यः १२

श्चतेस्तनीचाइति अर्थादुक्तस्थानेभ्योन्यस्थानगः शुभदः स्यात् एवंकन्यर्क्षतः स्यात् कन्यर्क्षतः कन्याराशेः सकाशात् एवमुक्तवत् शुभाशुभः स्यात् अतितरगुणिनोवरस्यलब्धये अतिकालेवा अनिष्टेपिगुरुर्द्वादशचतुर्थाष्टमः द्विरर्च्यः षट्त्र्याद्यखस्थस्यशास्त्रेयापूजोक्तातत्प्रमाणतोद्विरर्च्यः तेनद्विगुणार्चनेनशोभनः स्यात् एवंसामान्येनोक्त्वा अष्टमस्यविशेषमाह अष्टमभवनगतः त्रिरर्च्यः तेनशोभनः स्यात् अत्रबृहस्पतिः झषचाप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु. मा.
२२

कुलीरस्थोजीवोप्यशुभगोचरः अतिशोभनतां दद्याद्विवाहोपनयादिषु व्रते जन्मत्रिरवारिस्थो जीवोपि शोर्चनात्फलकृत् शुभोनिकाले तु याष्टव्ययस्थो टी.
द्विगुणार्चनात् उद्वाहतत्त्वे कन्यर्क्षाद्विकृतग्धुनायनवमेश्रेष्ठो गुरुश्चान्यथापूज्योष्टान्त्यसारवेतिकालइहतुमाज्ञोद्दिरन्थः शुभः रिः फांबुत्रिधनाश्रगो
यदिग्रहैः श्रेष्ठोपिविद्धोत्यसन्चामाहिन्दइहेष्टदोननिधनेवेधश्चिरचर्यः शुभइति १३ अथगुरोर्वामवेधमाह द्वीषायायागांकसंस्थोगुरुस्तदाशुभः स्या

द्वीषायायागांकसंस्थोव्ययजलनिधनव्यान्नगैश्चेन्नविद्धः शस्तोनिष्टोपिवामं शुभइह खचरैर्वेधितोनोष्टमस्थः
शुक्लेमाघादिपंचस्विनशुभदिवसेप्राग्दलेन्होव्रतं सत्स्यत्कानध्यायरिक्तातिथिसुनिमदनाश्चंद्रभागंप्रदोषम् १४

त् तदा कदा यदि व्ययजलनिधनव्यष्टगैः खचरैर्नोविद्धः स्यात् द्वी द्वितीयं इषुपंचमं आयएकादशं अगाः सप्तमं अंकाः नवमं एतत्स्थानस्थोगुरुः व्ययं
द्वादशं जलंचतुर्थं निधनंअष्टमं त्रितृतीयं अभ्रंदशमं एतत्स्थानस्थैः खचरैः यदिनोविद्धोभवतितदाशुभः स्यात् २ ५ ११ ७ ९ १२ ४ ८ ३ १० वेधितश्चे
दशुभइत्यर्थः अनिष्टोपिव्ययजलनिधनव्यष्टगोपिवामंविद्धः सन् द्वीषायायागांकसंस्थैः खचरैः वेधितः सन्नित्यर्थः इह अस्मिन्व्रतबंधेवि
वाहेवाशुभः नोष्टमस्थः अष्टमस्थोवेधितोनशुभदः स्यादित्यर्थः सोतिकालादौत्रिगुणार्चनेनैवशुभः स्यात् तथाचबृहस्पतिः रजस्वलायदा २२

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्यागुरुशुद्धिंनचिंतयेत् अष्टमेपिप्रकर्त्तव्योविवाहस्त्रिगुणार्चनात् अथोपनयनेमासादिकमाह शुक्लइति. शुक्लेशुक्लपक्षेमाघादिपंचमासेषुज्येष्ठां
तेषु इनशुभदिवसे इनः सूर्यः शुभाः वर्धमानेंदुगुरुबुधशुक्राः एषांदिवसे तस्मिन् अन्हः प्राग्दलेदिवसस्यपूर्वार्द्धेव्रतमुपनयनंसतशुभंस्यात् -
किंकृत्वा अनध्यायरिक्तातिथिमुनिमदनान्चंद्रभागंप्रदोषंत्यक्त्वा अनध्यायाः वक्ष्यमाणाः रिक्तातिथयोचतुर्थीनवमीचतुर्दश्यः मुनिः सप्तमी म
दनस्त्रयोदशी एतान्चंद्रभागः कर्कांशः पापांशादिकंपुरैवनिषेधितं प्रदोदोनध्यायप्रकरणोक्तः तंत्यक्त्वा १४ अथव्रतबंधेनक्षत्राण्याह स्प

शस्तोहीशाग्निशाक्रांतकपितृरहितैः सर्वभैर्मौंजिबंधोवेदेशोज्ञेबलाढ्येगुरुसितकुजविलांज्ञकावेदपाःस्युः
स्वर्क्षोच्चांशेषुसौम्याः श्रुतिपतिरपिचेत्केंद्रकोणास्थितास्युर्वर्णीवेदार्थवेत्तापशुगृहधनवानत्रमंदेत्वसेवी १५

ष्टं उक्तंच मघाचभरणीज्येष्ठाविशाखाचैवकृत्तिका नक्षत्रपंचकंप्राज्ञैर्नग्राह्यंव्रतबंधने वेदेशेवेदपतौ ज्ञेबुधेबलाढ्येसतिस्थानादिनाबलसमृ
द्धेसति तेकेवेदेशाइत्यपेक्षायामाह गुरुसितकुजविलांज्ञकाः क्रमात् वेदपाः वेदाधिपतयः स्युः गुरुः ऋग्वेदस्य शुक्रोयजुर्वेदस्यकु
जः सामवेदस्य वित्बुधोथर्वणवेदस्य पतिरित्यर्थः लग्नगोचरबलमाह स्वर्क्षोच्चांशेषुसौम्याइति सौम्याः स्वोच्चस्वभागांशेषुव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्तमानाः श्रुतिपतिरपिवेदपतिरपिस्वोच्चस्वमांशेवर्तमानश्चेयदिकेंद्रकोणेस्थिताः स्फुः स्तदा वर्णीब्रह्मचारीवेदार्थवेत्तास्यात् नकेवलंवेदार्थवेत्ता स्यात् अपितु पशुगृहधनवान्स्यात् अत्रकेंद्रकोणेशनौमंदेसति अंत्यसेवीअंत्यजसेवकःस्यात् तस्मात्केंद्रकोणेशनिर्नभावितव्यः उक्तं चसंग्रहे केंद्रस्थितैरिनाधैर्नृपसेवीविट्क्रियोश्चवृत्तिश्च वेदाभ्यासीयज्वाक्रतुकर्ताहीनसेवकोभवतीति १५ अथलग्नभंगानाह चंद्रइति चंद्रः क्रूराः क्रूरग्रहाः विलग्नेतनौ शशिसितततनुपाः षष्ठगेहे शशीचंद्रः सितः शुक्रः तनुपोलग्नपः षष्ठगेहे सितः शुक्रः अंत्येद्वादशस्था

चंद्रक्रूराविलग्नेशशिसिततनुपाः षष्ठगेहेसितोंत्येसर्वेरंध्रेबटुघ्नाः क्वचतनुगइनः श्रेष्ठउच्चेंदुरेके
विद्यामौञ्ज्युक्तकालेस्थिरचरहरिजन्युत्तरब्राह्महीनेमौञ्ज्याऊर्ध्वंगणेशंगिरमपिविधिवत्पूजयित्वारभेत १६

ने शेषस्क्रगमं सर्वेरंध्रेअष्टमस्थाने एकेप्रत्येकंबटुघ्नाः बटुमारकाभवंति किंच क्वचित् अन्यलग्नाभावेतनुगः लग्नगः इनः रविः श्रेष्ठः उक्तंच मौंजीपटले शुभदोबलवान्भानुर्लग्नगोदशमस्तथा सर्वशाखाधिपोयस्मात्सर्वेषांव्रतबंधने सर्वशाखाधिपोभानुः केचिदूचुर्महर्षयः तस्मा द्गत्यंतराभावेलग्नस्थोर्कः प्रशस्यते उच्चेंदुरेकइति एकेमुनयः उच्चेंदुः उच्चस्थश्चंद्रः तनुगश्चश्रेष्ठइतिवदंति तद्वाक्यं चंद्रोदयेभिश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तस्यात्क्षयरोगीसितेतरे सितेपक्षेभवेद्यज्वास्वभेतुंगेविशेषतइति अस्यार्थः सितेतरेकृष्णपक्षेचंद्रोदयेचंद्रयुक्तलग्नेसतिव्रती अभिशस्तः
स्यात् क्षयरोगीचस्यात् अभिशस्तोनाममिथ्याभिशस्तः मिथ्याभिशंसी अनेनेदंपातकंकृतमितियल्लोकामिथ्यावदंतिसोभिशस्तः क्षयरोगीस्या
नइति कृष्णपक्षेलग्नस्थचंद्रफलमुक्तंसितपक्षेभवेद्यज्वेतिवाक्यंस्पष्टं अयंश्लोकःपुनः संस्कारविषयइवभाति यतोकृष्णपक्षेव्रतबंधेचंद्रस्यफलमु
क्तंतस्यदिवा असंभवात् पुनः संस्कारार्हस्यतुकर्मलोपभयात् रात्रावपिसंस्कारोविहितोनान्यस्य प्रथमव्रतबंधस्तुसर्वैर्ग्रंथकारैर्दिवैवपूर्वाण्हेविहि
तोनरात्रौ अतःकारणादिदंवचनंपुनः संस्कारविषयंप्रतिभाति पुनःसंस्कारनिमित्तानिरासभारोहणादीनिधर्मशास्त्रप्रसिद्धानि तादृशंवाक्यर
त्नमालायां त्रिषट्खगोर्कस्त्रिधनास्तकर्मगश्चंद्रस्त्रिषष्ठाःशनिराहुभौमाः सर्वेचलाभेद्विंत्रिकोणकेंद्रगाःशुभाशुभास्युर्व्रतबंधकालइति अत्रतृती
यस्यषष्ठस्यसूर्यस्यरात्रिगतलग्नेसंभवः नारदेनतुलग्नस्थचंद्रोनिंदितएव तद्वाक्यमेवं स्वोच्चसंस्थोपिशीतांशुर्व्रतिनोयदिलग्नगः तंकरोतिशि
शंनिःस्वंसततंक्षयरोगिणामिति अन्यल्लग्नबलंपूर्ववत् अथविद्यारंभंवृत्तार्द्धेनाह विद्यांमौंज्युक्तकालइति मौंज्याऊर्ध्वंमौंज्युक्तकालेविद्यामार-
भ्यते मौंज्यर्थमुक्तः मौंज्युक्तः सचासौकालश्चतस्मिन्विद्यां वेदंआरभेत् मौंज्याऊर्ध्वमित्यनेनमौंज्याःप्रागनधिकारःसूचितः किंकृत्वा गणेशं-
गिरमपिसरस्वतीमपिविधिवद्गृह्युक्तमार्गेणपूजयित्वा कथंभूतेमौंज्युक्तकाले स्थिरचरहरिजत्र्युत्तरब्राह्महीने स्थिरचरहरिजंस्थिरलग्नंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रलमंतिसृणामुत्तराणांसमाहारस्त्युत्तरं ब्राह्मंरोहिणी एभिर्हीनेरहिते मौंज्यर्थमेतानिगृह्णीतानि विद्यारंभे अग्राह्याणीत्यर्थः जाड्यंस्थिरेद्व्यंगलग्नेषु
विद्याभिः श्वरेष्व्रमेतिश्रवणात् १६ अथकेशांतंमौंजीविमोक्षंचवृत्तार्द्धेनाह केशांतमिति तदुक्तंमनुना केशांतःषोडशेवर्षेब्राह्मणस्यविधीयते
राजन्यबंधोर्द्वाविंशेविंशेवैश्यस्यद्व्यधिकेततइति केशांतकर्मनृपमितशरदिषोडशेवर्षेचौलवत्स्यादित्यार्या आहुः सर्वंचौलोक्तमत्रग्राह्यमित्यर्थः
व्रतोक्तेकालेमौंजीविमोक्षमाहुः स्पष्टं अनयोः केशांतमौंजीविमोक्षयोः गुरुबलंसुधीभिर्नावलोक्यं अथशूद्राणांमौंज्यभावात्छूरिकाबंधंवृ

केशांतंचौलवत्स्यान्नृपमितशरदीत्याहुरार्याव्रतोक्तेकालेमौंजीविमोकंगुरुबलमनयोर्नावलोक्यंसुधीभिः

त्तार्द्धेनाह शूद्राणांमौंज्यभावात्तदुदिततिथिभेमौंज्युक्तनक्षत्रे अनस्तभौमेज्यशुक्रैः उदितैःभौमगुरुशुक्रैः व्यारेवारे आरोभौमः तद्रहितवा
रेलग्नेनवांशे यत्रकुत्रापिलग्नेभौमनवांशवर्जितइत्यर्थः उपयमविहितेमासिविवाहोक्तमासेविवाहोपयमौसमावित्यमरः आरोभौमइत्यमरः छू
रिकाबंधंकटिप्रदेशे छूरिकाबंधनमाहुः तथाचसंग्रहे शूद्राणांराजपुत्राणांमौंज्याभावेस्त्रबंधनम् मौंजीबंधोक्तमिथ्यादौकार्यंभौमदिनंविना
नारदः छूरिकाबंधनंवक्ष्येनृपाणांप्राक्करग्रहात् विवाहोक्तेषुमासेषुशुक्लपक्षेप्यनस्तगे जीवशुक्रेचभूपत्रेचंद्रताराबलान्विते मौंजीबं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मतिथिषु कुजवर्जितवासरे तेषांनवांशके कर्तुरष्टमोदयवर्जिते शुद्धेष्टमे विधौ लग्नषडष्टांत्यविवर्जिते धनत्रिकोणकेंद्रस्थैः शुभैस्त्र्यायारिगैः परैः छुरिकाबंधनं कार्यमर्चयित्वा सुरान्पितॄन् अर्चयेच्छुरिकां सम्यक् देवतानां च संनिधौ ततः सलग्ने बध्नीयात्कट्यां लक्षणसंयुतां तस्यास्तु लक्षणं वक्ष्ये यदुक्तं ब्रह्मणा पुरा संमितं छुरिकायामं विस्तारेणैव ताडयेत् भाजितं गजसंख्याभिश्च अंगुलान्परिकल्पयेत् शेषं चैव फलं वक्ष्ये ध्वजाये धनवान्भवेत् धूम्राये मरणं सिंहे जयश्वाये तिरोगिता धनलाभो वृषे स्वांते दुःखी भवति गर्दभे गजाये संततं प्रीतिर्ध्वांक्षे वित्तविनाशनमिति स

शूद्राणां मौंज्यभावात्तदुदिततिथिभे नस्त्रपौमेज्यशुक्रे व्यारे वारे लवे मास्यूपयमविहिते च्छूरिकाबंधमाहुः १७

इति मुहूर्तमार्तंडे संस्कारप्रकरणं समाप्तम् वैन्नत्याज्यप्रकारणोक्तं विलोक्यं अस्मिन्प्रकरणे कर्णवेधवृत्तं विना सर्वाणि स्रग्धराव्रत्तानि १७ इति स्वोक्तमुहूर्तमार्तंडटीकायां मार्तंडवल्लभायां गर्भाधानादिसंस्कारप्रकरणं ७ अथ विवाहप्रकरणं विवक्षुस्तावत्प्रथितगुणविचारं द्वादशभिर्वृत्तैराह अतः परं अत्र ग्रंथे सर्वाणि शार्दूलविक्रीडितानि वरः गोत्रकुलादिभिः शुद्धां कांतां कमनीयां कन्यां उद्वहेत् चकाराद्वरोपि एवंविधो भाव्यः गोत्रशुद्धिर्ग्रंथांतरात् ज्ञातव्या कुलमपि पंचसप्तनिर्णयमपि एतद्द्वयं ग्रंथांतरात् ज्ञात्वा अन्यदत्रावलोकये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त् अथयथोत्तरंबलिष्ठं घटितक्रममाह वर्णइतिवर्णः १ वश्यं२ भं३ योनि४ खेचर५ गणः६ कूटं७ नाडी८ क्रमाद्यथोत्तरंबलिनःस्युः अर्होदू
ध्वे अष्टादशाधिकंगुणैक्यंयथोत्तरंस्याच्छुभं तत्रादौवर्णलक्षणमाह झषात्मीनात्सकाशात्विप्रमुखाः ब्राह्मणाद्योवर्णाःपुनर्गणनयाज्ञेया
तद्यथा मीनोब्राह्मणः मेषःक्षत्रियः वृषोवैश्यः मिथुनः शूद्रःपुनः कर्कोब्राह्मणः सिंहःक्षत्रियइत्यादि इहास्मिन्राशिमेलग्नेवर्णोत्तमोवरः शुभः
स्यात् नान्यथेत्यर्थात्सिद्धं१ अथवृत्तान्तेनवश्यमाह नुःनृराशेःमनुष्यराशेः जलजाजलचराभक्ष्याः तस्यैवविहरयःसर्वेवश्याः विगतःहरिः

अथविवाहप्रकरणप्रारंभोयम् शुद्धांगोत्रकुलादिभिर्गुणयुतांकांतांवरश्चोद्वहेद्वर्णोवश्यभयोनिखेचरगणाःकूटंचनाडीक्र
मात् वर्णाद्याबलिनोयथोत्तरमहींदूर्ध्वेगुणैक्यंशुभंवर्णाविप्रमुखाझषादिहवरोवर्णोत्तमःस्याच्छुभः१ सिंहोयेभ्यःतेविह

रयःसिंहरहिताःसर्वेवश्याइत्यर्थः हरेःसिंहस्यविकौर्प्याःवश्याःकौर्प्योवृश्चिकः विगतःकौर्प्योयेभ्यस्तेविकौर्प्याःसिंहस्यवृश्चिकरहिताःस
वेराशयोवश्याःअथानंतरोक्तस्यहरेःअलिर्वृश्चिकोनशुभःवैरीत्यर्थःनुःमनुष्यराशेःअजहरयोःनेष्टाःस्युःअजाःजलजाःहरिःसिंहःएतेनेष्टाः
मेलनंनकर्तव्यमित्यर्थःअन्यज्जनात् अन्यत्अस्यभक्ष्यादिकंजनान्ज्ञेयं तद्यथा नुःपुरुषस्यगोर्वश्याभवति अत्रपरस्परंमित्रत्वंदृश्यते तस्मादनयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेलनंशभंस्यात् इदमेवम्लेंछजातीयवधूवरयोर्नभुषं म्लेंछानांगोभेश्यंइत्येवंलोकप्रचारतोविचारणीयमित्यर्थः राशिस्वरूपंबृहज्जातकवशा दवगंतव्यं बृहज्जातके मत्स्योघटीनृमिथुनंसगदंसवीणंचापीनरोश्वजघनोमकरोमृगास्यः तौलीससस्यदहनाप्लवगाचकन्याशेषाः स्वनामसदृशाः स्वचराश्चसर्वे अथभयोनी द्वावपिदृत्तेकेनाह भगण्येति मिथःपरस्परंवधूवरयोर्भेनक्षत्रेवधूनक्षत्राद्वरनक्षत्रंगण्यं वरनक्षत्रात्कन्यानक्षत्रंगण्यंउ भेअपिनवभिर्भाजितेकार्ये शेषंत्र्यगशराःत्रिसप्तपंचभवंतितदानसत्स्यात् अथयोनिमाह अश्विभादिति अश्विभात्साकाशात्भानांनक्षत्राणांअश्वाद

नुर्भस्याजलजावशाविहरयोवश्याविकौप्यौहरेरस्यालिर्नेशभोनुरंजहरयोनेश्वास्करन्यज्जनात्
भेगण्येकल्हतेमिथस्त्र्यगशराःशेषंनसच्चाश्विभाद्श्वेभाव्यहिभोगिनश्वदृकभुङ्मेषाखुभुकद्वंदुराः २

योयोनयोभवंति अश्वोअश्विन्याः इभोभरण्याः अविर्मेषः कृत्तिकायाः अहिःसर्पोरोहिण्याः भोगीसर्पोमृगस्य श्वाश्ववानःआर्द्रायाः वृकंउंदु रंभनक्तीतिवृकभुक्मार्जारःपुनर्वसोः मेषःप्रसिद्धः पुष्यस्य आखुभुक्मार्जारोआश्लेषायाः द्वुंदुरोद्वौउंदुरोमाघपूर्वाफाल्गुन्योः २ गोरुत्तराफल्गुन्याः कालीमहिषीहस्तस्य पशुभुक्व्याघ्रश्चित्रायाः महिषीस्वात्याः पशुद्विट्व्याघ्रः विशाखायाः द्वौमृगौअनुराधाज्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ठयोः श्वामूलस्य कपिर्वारः पूर्वाषाढायाः द्वौबभ्रूउत्तराषाढाभिजितोः बभ्रूनकुलो कपिर्वानरः श्रवणस्य सिंहोधनिष्ठायाः वाजीअश्वः शतता
रायाः हरिःसिंहः पूर्वाभाद्रपदायाःगौःउत्तराभाद्रपदायाः नागोहस्तीरेवत्याः इतियोनिममभिधाय योनिवैरमाह सिंहश्वइभश्वसिंहेभं सिंहगजं
महिषाश्व ओतुरवनकं मार्जारोंदुरं श्वैणंश्वानमृगौ कीशाविवानरमेषं गोव्याघ्रं बभ्रुफणिनकुलसर्पं इतिवैरं भीरुवरयोः वधूवरयोः प्रे

गौः कालीपशुभुङ्महिष्यथपशुद्विट्द्वौमृगौश्वाकपिर्द्वौबभ्रूकपिसिंहवाजिहरिगोनागाःक्रमाद्योनयः
सिंहेभंमहिषाश्वमोतुरवनकंश्वैणंचकीशाविगोव्याघ्रंबभ्रुफणीतिभीरुवरयोः प्रेष्येशयोश्चत्सजेत् ३

ष्येशयोःप्रेष्यः सेवकः ईशः स्वामी एतयोश्चत्सजेत् वर्जयेत् ३ अथग्रहवैरवैरंविवक्षुस्तावद्राशिनाथानाह क्रियान्मेषाज्ञानांराशीनांइशाः-
मेशाः एतेक्रमेणस्फः मंमंगलोमेषस्य शुःशुक्रः वृषभस्येत्यादिस्पष्टं रवेःसूर्यस्यइज्यकुजेंदवोमित्राणि ईज्योगुरुः कुजोभौमः इंदुश्चंद्रः ए
तेरवेर्मित्राणिसुहृदः शनिसितौशत्रूशनिःप्रसिद्धः सितःशुक्रः एतौशत्रूवैरिणौ अर्थादन्येउदासीनाः विधोर्नोरिपुः विधोश्चंद्रस्यरिपुर्ना-
स्ति सूर्यबुधौमित्रे अन्येसर्वेउदासीनाः कुजस्यभौमस्यवि[illegible] बुधोअरिः सूर्येंदुजीवाःहिताःमित्राणि अन्योसमौ ज्ञस्यबुधस्यअर्को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्फुजिनोरविशक्रोहितोमित्रे विधुश्चंद्रः अरिः वैरी अन्येसमाः सूरेः गुरोः सितज्ञौशुक्रबुधौअरीवैरिणौ ४ अर्ककुजेंदवः रविभौमचंद्राः मित्राणि अन्ये समाः भृगोः जातः भृगुजः तस्यभृगुजस्यशक्रमयरवींदूसूर्यचंद्रौशत्रू मंदज्ञौशनिबुधौहितोमित्रे अन्येसमाः शनेः कुजेंदुरवयःअरयः सितज्ञौ मित्रे अन्येसमाः अथगणमाह पूर्वास्तिस्रः आर्द्राप्रसिद्धा अंतकोभरणीकः रोहिणी उत्तरास्तिस्रः एतन्नक्षत्रनवकंनरिभवति नृगणमित्यर्थः

मेशासंशक्रबुचंरबृशक्रमगुशाः शोगुः क्रियात्सूरवेर्मित्राणीज्यकुजेंदवः शनिसितौशत्रूविधोर्नोरिपुः मित्रेसूर्यबुधौ कुज स्यविदरिः सूर्येंदुजीवाहितास्तस्याकास्फुजितोहितौविधुररिः सूरेःसितज्ञावरी ४ मित्राण्यर्ककुजेंदवोथभृगुजस्या रिरवींदूहितौमंदज्ञौचशनेः कुजेंदुरवयो नेष्टाःसितज्ञौहितौ पूर्वार्द्रांतककोत्तरंनरिस्फरेकाल्यादितीज्यानिलेंदुश्र त्यश्विनिमित्रमन्यदसुरैर्दैत्यैर्नृणांस्यान्मृतिः ५ अर्कोहस्तः अंत्यंरेवती आदितिः पुनर्वसुः इज्यः पुष्यः अनिलः स्वाती इंदुर्मृगः श्रुतिः श्रवणः अश्विनीप्रसिद्धा मैत्रं अनुराधाएतन्नक्षत्रनवकंस्फरेदेवेभवति देवगणमित्यर्थः अन्यन्कृत्तिका आश्लेषा मघा चित्राविशाखा ज्येष्ठामूल शततारकाएतन्नक्षत्रनवकं असुरेभवति रक्षोगणमित्यर्थः दैत्यैर्नृणांमृतिर्भवति ५ देवासुरयोर्देवदैत्ययोः कलिः स्यात् नृसुरयोः नृदेवयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्यंस्यात् स्वयोर्मेलनेसौहृदंस्यात् अथकूटमाह द्विर्द्वादशेनैस्व्यंनिस्वस्यभावोनैस्व्यंनिर्द्धनत्वंस्यात् षडष्टकेविपत्मरणंस्यात् वैपुत्र्यमर्थांकके अर्थांकके पंचमेनवमेवैपुत्र्यं अनपत्यत्वंस्यात् शेषेउवरितेतृतीयेकादशेचतुर्थेदशमेउभयसप्तमेएकर्क्षेविविधार्थाः धनपुत्रपश्वादयःस्युःकथंभूतेशेषे विभैकचरणे विगतंभैकचरणंनक्षत्रैकचरणंयस्मात्तथातस्मिन्नक्षत्रैकचरणेकूटे अनिष्टंफलंश्रूयते एकराशौशुभोद्वाह एकांशेमृतिप्रदइति एकऋक्षस्यचत्वारोभेदाः एकराशिभिन्नर्क्षं एकर्क्षभिन्नराशिः एकराशिनक्षत्रभिन्नचरणं एकराशिनक्षत्रचरणंचेति च

स्याद्वेद्यारूरयोः कलिर्नृरूरयोर्मध्यंस्वयोः सौहृदंनैस्व्यंद्विर्द्वयके षडष्टकेविपद्वैपुत्र्यमार्थांकके शेषेर्थोविधि
धाविभैकचरणेभिन्नर्क्षराश्येककंभिन्नांश्यैकमतयोर्गणखगौनाडीनृदूरं चन ६ त्वारोभेदाः तत्रएकराशिनक्षत्रचरणं

निंदितं विभैकचरणइति अथशुभकूटेयद्भिन्नर्क्षराश्येककंराश्येकत्वं यच्चभिन्नांश्यैकमंएतयोर्गणखगौनाडीनृदूरं चन अत्रकिमपिनालोक्यंश
भमित्यर्थःनृदूरं वक्ष्यमाणं भिन्नांश्यैकभमित्यत्रभेदद्वयमागतंभवति एकर्क्षभिन्नराशिकं अपरंएकराशिनक्षत्रभिन्नचरणं तस्मात्एकराशिनक्ष
त्रचरणंत्यक्त्वात्रिषुभेदेषुगणादिकंनचिंतयेत् तत्रगणादिदोषेसत्यपिशुभंस्यादित्यर्थः उक्तंचबृहस्पतिना एकराशौपृथक्धिष्ण्येपृथग्राशौ २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथैकभे गणनाडीनृदूरंचग्रहवैरंनचिंतयेत् कालनिर्णये दंपत्योरेकनक्षत्रेभिन्नपादेशुभावहं दंपत्योरेकपादेतुवर्षांतेमरणंध्रुवमिति ६ अथग्राह्यषट् काष्टकंद्विर्द्वादशंचाह षट्काष्टेसतिसमभंकर्ककन्यादिचेद्यदिषष्ठसहितंस्यात्तदाशोभनंस्यात् ग्राह्यंस्यादित्यर्थः तद्यथा वृषःसमभंतस्मात्सकाशात्तष्ठेनतुलाधरेणसहितंयदिभवतितदाग्राह्यंस्यानृइत्यर्थः तत्स्वामिनोर्मैत्र्यभावात् समभंअष्टमेनसमंनग्राह्यं एवमेवग्राह्याग्राह्यंविलोकये

षट्काष्टेसमभंचषष्ठसहितंचेच्छोभनंस्यात्समंभंद्विर्द्वादशकेद्वितीयसहितंश्रेष्ठंस्त्रियायुग्घरिः मूलेंद्रार्कभपाश्यजेकचरणादित्यार्यमेशाश्विभैर्याम्यंद्विज्यभमित्रभाग्यवसुभत्वाष्टांब्रहिर्बुध्न्यपैः ७ अन्येनाडयइहैकनाडिनवकेस्यातांद्विभेचस्मृतिर्गोदादक्षिणतःक्वचिन्नृपसुरेवपार्श्वेकनाडीहिता मैत्र्याद्विव्ययमर्थनंदमपिसत्षट्काष्टकंवश्यतः षड्भिस्त्रीनृगणावरोस्त्रपगणःसत्कूटमैत्र्योस्तदा ८ त अथग्राह्यंद्विर्द्वादशंचाह द्विर्द्वादशकेसमभंद्वितीयसहितंयदाभवति तदाश्रेष्ठशोभनंस्यात् विपरीतंअसत् अत्रसिंहेविशेषमाह स्त्रियायुग्घरिरिति विषमोपिसिंहः स्त्रियाकन्ययायुक्युक्तःश्रेष्ठः अथनाडीमाह मूलेतिअत्रश्लोकेतृतीयांतेस्त्रिभिःपादैस्तिस्रोनाड्यःसूचिताःमूलंप्रसिद्धं इंद्रोज्येष्ठा अर्कभंहस्तःपाशीशततारका अजैकचरणंपूर्वाभाद्रपदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदित्यंपुनर्वसुः अर्यमाउत्तराफाल्गुनी ईशआर्द्रा अश्विभंअश्विनी एभिर्नक्षत्रनवकैरेकनाडीभवति याम्यंभरणी इंदुर्मृगः ईज्यभंपुष्यः मित्रंअनुरा
धा भाग्यभंपूर्वाफाल्गुनी वसुभंधनिष्ठा त्वाष्ट्रंचित्रा अंबुपूर्वाषाढा अहिर्बुध्न्यंउत्तराभाद्रपदा एभिर्नवनक्षत्रैरेकनाडीभवति अन्यैरुर्वरितैर्नक्षत्रैरेकना
डीएवंनिस्त्रोनाड्योभवंति इहविवाहविषयेयदाएकनाडीनवकेद्विभेवधूवरयोर्भेनक्षत्रेचेत्स्यातांतदामृतिर्मरणंस्यात् अथगोतम्यादिदक्षिणेदे
शेक्षत्रियादीनांच अन्यवध्वाअलाभेगतिमाह गोदादक्षिणतः गोदागोतमीतस्याः दक्षिणतः दक्षिणेदेशेसर्ववर्णेनृपमुखेक्षत्रियादौस
र्वदेशस्थेकचित् अन्यकन्यायाः अलाभेसति पार्श्वैकनाडीहिता शुभास्यान्नमध्यनाडी उक्तंचरत्नकोशे अग्रनाडीव्यधेभर्त्तामध्यमना
डीव्यधेद्वयं पृष्ठनाडीव्यधेकन्यांम्रियतेनात्रसंशयः समासन्नेव्यधेशीघ्रंदूरव्यधेचिरेणतु व्यधांतरप्रमानेनवर्षैर्दुःखंप्रजायतइति ब्राह्मणविष
यं जठरेनिर्धनत्वंचगर्भेमरणमेवच पृष्ठेदौर्भाग्यमाप्नोतितस्मात्तांपरिवर्जयेदिति ज्योतिःप्रकाशे निधनंमध्यनाड्यांचदंपत्योर्नै
वपार्श्वयोः अथव्यवस्थानत्रैवोक्ता करग्रहेपृष्ठनाड्योननिंद्येइतियदुक्तं तत्क्षत्रियादिविषयंगोतमीयाम्यतस्तयेति अथपूर्वोक्ता
नांद्विर्द्वादशानांशुभफलमाह मैत्र्येति मैत्र्याग्रहमैत्र्याद्विव्ययंद्विर्द्वादशंअर्थनंदंपंचमनवमंसत्शुभंस्यात् वश्यादिषड्भिः षड्राष्टकंशु
भंस्यात् वश्यप्रभेणनिरेवचरगणनाडिभिः षडष्टकंशुभंस्यादित्यर्थः अथयदास्त्रीनृगणावरोस्त्रपगणोरक्षोगणः स्यात्तदातन्मेलनं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्कूटमैत्र्योः सत्वोः शुभंस्यात् ७८ अथयदारक्षस्त्रीरक्षोगणस्त्रीनृपुमान्नृगणःपुरुषः स्यात् तदावशासुखैः षड्भिः वश्यभयोनिखेचरकूटना
डीत्सिंतैः षड्भिर्युतंतन्मेलनंशुभंस्यात् अथनृदूरंसापवादमाह स्त्रीनक्षत्रात् नाडीतिनृनक्षत्रंयदिनिकटेसमीपेभवतितदानृदूरंस्यात् कथंभूतंनृदूरं-
अशुभंअशुभफलदं इदंनृदूरंखेटोडुमैत्र्योः सत्वोः शुभंस्यात् उडुमैत्रीनक्षत्रमैत्रीयोनिमैत्रीतियावत् अथसंकटेदुष्टकूटादौदानमाह द्यर्केति द्या

रक्षस्त्रीनृपुमान्यदावशासुखैः षड्भिर्युतंशोभनंस्त्रीभान्नानिकटेनृदूरमशुभंखेटोडुमैत्र्योः शुभम्
द्यर्केताम्रसुवर्णमष्टरिपुकेगोयुग्ममर्थांककेरौप्यंकांस्यमथैकनाडियुजिगोस्वर्णादिदत्वोद्वहेत् ९

केंद्विर्द्वादशेताम्रसुवर्णादिदत्वाउद्वहेत् अष्टरिपुकेषडष्टकेगोयुग्मंगोमिथुनंदत्वाउद्वहेत् अर्थांककेपंचमनवमेरौप्यंकांस्यंदत्वोद्वहेत् अथएकना
ड्यांदानमाह एकनाडीयुजिगोस्वर्णादिदत्वोद्वहेत् एकनाडीयोगेगोस्वर्णान्नवस्त्राणिबहूनिदत्वोद्वहेत् राजमार्तंडे षडष्टकेगोमिथुनंप्रद
द्यात्कांस्यंसरौप्यंनवपंचमेच नाड्यांतुधेन्वन्नसुवर्णवस्त्रंद्विर्द्वादशेब्राम्हणतर्पणंच उद्वाहतत्ते ताम्रंहेमधनव्ययेरजतयुक्कांस्यंशरांके
रुषंगांदद्याच्चषडष्टकेद्विजभुजिंस्वर्णंचनाडीयुताविति ९ ७ ७ ७ ७ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथगुणविचारंत्रिभिर्वृत्तैराह तत्रादौवर्णगुणविचारमाह वर्णैक्यवरोत्तमेभूरेकोगुणोज्ञेयः वर्णासारैक्यंयस्मिन्घटितेतद्वर्णैक्यंवरउत्तमोयस्मिन्त-
द्वरोत्तमंचउभयत्रापिएकैकोगुणोज्ञेयः अर्थाद्धीनवरेगुणाभावःउक्तंचज्योतिर्निबंधे एकोगुणःसमेवर्णेतथावर्णोत्तमेवरे हीनवर्णेगुणःशून्यंकेच्या
हुःसदृशेदलमिति अथवश्यगुणविचारमाह वशाभक्ष्ये अर्द्धं एकस्यार्द्धंगुणः वशाभक्ष्येयथा मनुष्याणांजलजावशाभक्ष्याश्चतत्र अर्धगुणोग्राह्यः ए
तत्तुद्विजादौज्ञेयं द्विजादयस्तुकदाचिन्छूद्रंपाठीनजातीयमत्स्यभक्षकाभवंतिनसर्वेषां तस्माद्बुधैर्वरजातिविचार्ययोजनीयं हीनजातौशून्यं यतःस्वं

भूर्वर्णैक्यवरोत्तमेथवशाभक्ष्येर्द्धंद्वयंमित्रयोःस्वंवैराशनकेधरारिवशकेयोसद्भयोरग्नयः

वैराशनकेइत्यस्मिन्नेवश्लोकेउक्तत्वात् एवमेवसिंहस्यसर्वेवश्याःभक्ष्याश्चभवंति तत्रमनुष्याःवैरंभक्ष्यं वृश्चिकस्तुवैरी अन्येवशभक्ष्यं अथमि
त्रयोःपरस्परंसौहृदेःद्वयंगुणद्वयंज्ञेयं तत्रविचारः स्वजातौमित्रत्वंप्रकटं मनुष्याणांमेषवृषाश्वमृगैःसहमित्रत्वं तत्रहीनजातीयानांपशवोवशभक्ष्यं
स्यं तत्रार्धगुणः अन्यत्रद्वयं अथअरिवशकेधराएकोगुणः अरिवशकंयथामनुष्याणांवृश्चिकःसिंहवृश्चिकयोर्नित्यंवैरं वृश्चिकदष्टःसिंहो-
मरणमाप्नोतीति लोकेप्रसिद्धं तस्मादत्रगुणाभावःप्रथमंवशाभक्षणेअन्यज्जनादिसुक्तं तस्मात्कबुद्धिभिर्विचार्यवक्तव्यं ममात्रवश्यविचा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणेबुद्धिरेवंस्फुरिता अन्नयद्दुरुक्तंतत्बुधैः शोधनीयं ननुवश्यभक्षणेकोर्प्योनवश्योहरेरित्येवोक्तं त्वयाकथमुक्तंसिंहस्यमनुष्यावैरिभक्ष्यमि
तिसत्यं तच्छ्लोकोक्तलक्षणंसर्वसामान्यमस्ति अतएवोक्तंग्रंथकर्त्रा अन्यजनादिति सिंहस्तनरगजादिप्रतापमारणेऽत्युत्कटः अन्येषांमार

मित्रेतच्छकलंत्वयातिसत्द्ददोवेदास्त्रयोमित्रयोरेकः स्याद्द्विषतोः स्वभावगुणयोर्द्वैरवंमहद्वैरिणोः १०

णेउदासीनः असदृशत्वात् उक्तंच वैरवश्येगुणाभावोद्वयोः सख्येगुणद्वयं वशवैरेगुणश्चैकोवशभक्ष्येगुणार्धकमिति अथतारागुणविचारमाह
सद्वयोः उभयतः सत्तारयोः सतोः अन्नयः त्रयोगुणाः एतदुक्तंभवतिभेगण्येकत्द्दते इत्यनेनप्रकारेणउभयतोपियदिसत्तारेभवतस्तदात्रयोगुणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यर्थः मिश्रेतच्छकलमिति मिश्रे एकतः शुभातारा एकतः अशुभा एवंविधे मिश्रे सति तच्छकलं तेषां त्रयाणां शकलं सार्द्धैको गुण इत्यर्थः अन्यथा गुणाभाव
इत्यर्थात्सिद्धं उक्तंच एकतो लभ्यते ताराशुभान्वैवाशुभान्यतः तदा सार्द्धगुणश्चैकस्ताराशुद्धौ मिथस्त्रयः उभयोनेशुभातारा तदा शून्यं समादिशेत्
अथ योनिगुणविचारमाह अतिस्फुटदोर्वेदाश्चत्वारो गुणाः मित्रयोस्त्रयः द्विषतोर्वैरिणोरेकः स्वभावगुणयोर्द्वौ महद्वैरिणोः खं शून्यं गुणः स्यात्
एवं पंचप्रकारेण योनिगुणाः अस्य विवेकः अष्टाविंशति नक्षत्राणां अश्वादयः सर्वाश्चतुर्दश योनयः तत्र सिंहेभं महिषाश्वमित्यादि यदुक्तं तन्महद्वैरं तत्रापि
महद्वैरे महिषाश्ववानरमेषकं एतद्द्वयं उदासीनं स्वभावगुणं परस्परघाताभावात् अथैकयोनिषु अतिमित्रत्वं ज्ञेयम् एकयोनिष्वपि गजयोः श्वानयोः मा
र्जारयोर्व्याघ्रयोः सिंहयोः एकयोनित्वेपि नामित्रत्वं परस्परकलहकारणात् एतद्युग्मपंचकं स्वभावगुणं एतद्युग्मपंचकं तु महद्वैरस्थं महिषाश्ववानर
मेषं एतद्द्वयमित्येतद्युग्मसप्तकं स्वभावगुणं व्याघ्रस्तु सर्पोंदुरनकुलेषु उदासीनः सिंहोप्येवमेव उदासीनः तथा एतौ व्याघ्रसिंहौ अन्येषां वैरिणौ सर्पमार्ज
र्जारयोः वैरं श्वमेषयोर्मैत्रं गोमहिष्योर्मैत्रं हि उंदुरसर्पयोर्वैरं एवं शत्रुमित्रादिकं उदासीनत्वंच विचार्य उक्तवत् गुणा ज्ञातव्याः औदासिन्ये स्वभावगुण
वत् गुणग्रहणं उदासीनानां गुणा यद्यपि नोक्तास्तथापि स्वभावगुणे महिषाश्वमेषवानरे च औदासिन्यं दृश्यते तस्मादेतद्द्वयं उदासीने गुणग्रहणं क
र्तव्यमित्यर्थात् ज्ञायते उक्तंच महावैरे च वैरे च स्वभावे च यथाक्रमं मैत्रे चैवातिमैत्रे च खं द्वि द्वि त्रि चतुर्गुणा इति १० ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथखेचरगुणविचारमाह एकः ईशोयस्मिन्तदेकेशं उभयत्रमित्रेयस्मिन्तदुभयमित्रं एकेशंचउभयमित्रंच एकेशोभयमित्रे तयोः शरमिताः पंच गुणाग्राह्याः उभयत्रापिपंचपंचग्राह्याइत्यर्थः अर्द्धसमारातिके सम: उदासीनः अरातिः शत्रुः एवंयस्मिन्मेलनेतत्समारातिकं तत्रअर्द्धएकस्यार्द्धंगुणाः स्युः रिपुहितेअरिरूत्यदिभूमिरेकः द्व्युदासेत्र्यः द्वौउदासीनौयस्मिन्तत्रत्रयोगुणाः अनुक्तेगुणाभावः उक्तंच यत्रैकाधिपतित्वेचमित्रत्वेगुणपंचकं चत्वारः सममित्रेचद्वयोः साम्येत्रयोगुणाः मित्रवैरेगुणश्चैकः समवैरेगुणार्द्धकं परस्परंखेटवैरेगुणः शून्यंसमादिशेदिति अथगुणविचारमा

एकेशोभयमित्रयोः शरमिता अर्द्धसमारातिके चत्वारः सममित्रकेरिपुहिते भूमिद्व्युदासेत्र्यः
नादेवोमनुजावधूरिहरसास्तद्वैपरीत्येशराः षट्साम्येस्त्रपपूरुषः सत्र वधूरत्रैक कोन्यत्र खं ११

ह नादेवइति यत्रनानरोदेवगणः वधूर्मनुजामनुष्यगणाभवतिइहरसाः षट्गुणाग्राह्याः तद्वैपरीत्येतयोर्वैपरीत्यंतद्वैपरीत्यंतस्मिन् शरमिताः पंचगुणाग्राह्याः एतदुक्तंभवंति यत्रनरोदेवगणः वधूर्मनुष्यगणा अत्रपंचगुणाग्राह्याइत्यर्थः षट्साम्येगणसाम्येषट्गुणाग्राह्याः यत्र अस्त्रपपूरुषः दैत्यगणः पुरुषः सत्रवधूर्देवगणास्त्रीभवति अत्रैकः एकगुणोग्राह्यः अन्यत्रउक्तादन्यत्रखंशून्यंस्यात् ११ अथकूटेगुणविचारमाह दुःकूटेद्विर्द्वादशाादोस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तियदियोनिमैत्रंअबलादूरंस्त्रीदूरंस्यात् तदांभोधयश्चत्वारोगुणाग्राह्याः नोचेत्यदियोनिमैत्रमबलादूरंनस्यात्तदारवंशून्यंगुणः स्यात् अनयोर्यो
निमैत्रस्त्रीदूरयोर्मध्येयत्रएकंस्यातइह भूरेकोगुणः भांध्यैक्यकेनक्षत्रैक्यचरणेखंशून्यंगुणाग्राह्याः अथसत्कूटेसति यदिवरदूरताभरिपु
ताउभयोर्वैरंयोनिवैरंचस्यात् तदारसाःषट्गुणाग्राह्याः भिन्नराश्यैक्येभेपंचभिन्नराशिश्चएकभताच अत्रपंचगुणाग्राह्याः उर्वरितेसत्कूटेगिरयः

दुःकूटेयदियोनिमैत्रमबलादूरंतदांभोधयोनोचेत्खंत्वनयोर्यदैकमिहभूर्भांध्यैक्यकेरवंगुणाः सत्कूटेवरदूरता
भरिपुताषड्भिन्नराश्यैकभेपंचान्यत्रसुकूटकेचगिरयोथोनाडिभेदेगजाः १२ स्त्रीणामष्टमवर्षतस्त्रिषुनृणांचीर्ण
व्रतानामयुग्मेष्वब्देष्वत्रचराधमाधयुगयोर्मार्गेविवाहःशुभः

सप्तगुणाग्राह्याः अथनाडीविचारमाह अथोनाडीति नाडिभेदे
गजाअष्टौगुणाग्राह्याः अनुक्तेगुणाभावः इतिमुहूर्तमार्तंडेघटितं १२ अथस्त्रियोविवाहकालमाह स्त्रीणामष्टमवर्षतःसकाशात्त्रिषुव
र्षेषुविवाहःशुभःस्यात् अष्टमनवमदशमेषुशुभाःस्यादित्यर्थः तथाचसंवर्तः अष्टवर्षाद्भवेद्गौरीनववर्षाचरोहिणी दशवर्षाभवेत्कन्यात्दू
र्ध्वंवृषलीमता गौरीदानान्नाकलोकेवैकुंठेरोहिणींददत् कन्यादानाद्ब्रह्मलोकेरौरवंतुरजस्वलेति रजस्वलेतिवृषलीपर्यायः तथाचकारिका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यामुक्तं षडब्दमध्येनोद्वाह्याकन्यावर्षद्वयंयतः सोमोभुंक्तेततस्तद्वद्गंधर्वश्चतथानलइति अस्यवाक्यस्यसहायिनीश्रुतिरपि सोमःप्रथमोविविदइत्यपक्र स्य सोमोददद्गंधर्वायगंधर्वोददद्ग्नयइत्यंता नन्वस्यविरोधोब्रह्मपुराणेगौतमीमाहात्म्येभानुतीर्थवर्णनेविशिष्टभानुसंवादेदृश्यते विशिष्टभानुरुवाच चतु र्थाद्वत्सराद्वूर्ध्वंयावन्नदशमात्ययः तावद्विवाहःकन्यायाःपित्राकार्यःप्रयत्नतइति सत्यं अत्रपुराणवाक्यंशूद्रादिविषयं श्रौतंस्मार्तंब्राह्मणादिविषयंइत्य- विरोधःसप्तमवर्षेविषमत्वान्नारदादिभिःस्त्रीविवाहेनांगीकृतंतस्माच्छास्त्रतत्त्ववेदिना आचार्येणसर्ववर्णानामविरुद्धमेवोक्तं स्त्रीणामष्टमवर्षेतस्त्रिषि

ज्येष्ठंपूर्वजयोस्त्यजेद्धिमरुचिंज्ञेज्योनरवेटांन्वितंयन्मासादिजनुर्भवंप्रथमकेगर्भेत्यजेन्नानुजे १३

निकथितकालादूर्ध्वंकदाचिद्वरालाभनिमित्तादोसमवर्षेषुद्वादशचतुर्दशषोडशेषुविवाहोग्रंथांतरेउक्तः कालनिर्णयदीपिकाविवरणेस्वयंवरार्थेकालद्व यमुक्तं जीवत्पितृकायाऋतौवर्षत्रयानंतरंस्वयंवरकालःअदातृकायाअपिऋतौवर्षत्रयानंतरंस्वयंवरकालःअदातृकायाइत्येतत्सर्ववर्णसाधार णं कन्याप्रदातारःकालनिर्णयदीपिकायामुक्ताःपितापितामहोभ्रातामाताबंधुर्यदानहि ऋतौवर्षत्रयादूर्ध्वंकन्याकुर्यात्स्वयंवरमिति बौधायनोप्या ह वर्षाणित्रीण्यृतुमतीकांक्षेतपितृशासनं ततश्चतुर्थेवर्षेतुविंदेतसदृशंपतिमिति अथपुंसांविवाहकालमाह नृणांचीर्णव्रतानांकृतविसर्गाणां

अयुग्मेषुविषमेषुअब्देषुवर्षेषुविवाहःशुभः स्यात् विशेषउक्तवर्षेषुकर्तव्यइत्याह अत्रराधमाघयुगयोः अत्रविषमवर्षेषुराधोवैशाखः माघः प्रसिद्धः अ
नयोर्युगेयुगले राधयुगं वैशाखज्येष्ठौ माघफाल्गुनावित्यर्थः मार्गेमार्गशीर्षेविवाहःशुभः स्यात् एतेपंचमासाः बहुसंमताः एषुज्येष्ठंज्येष्ठमासं
पूर्वजयोः प्रथमजातयोः द्वयोस्त्यजेत् अर्थादेकतरेज्येष्ठेसतिनत्यजेत् दोषांतरमाह हिमरुचिंचंद्रंज्ञेज्योनखेटान्वितंबुधगुरुरहितान्यग्रहयुक्तं
पापग्रहयुक्तंशुक्राणांअन्यतमयुक्तंत्यजेत् अनिष्टफलश्रवणात् मासाद्यंजनिसंभवमितित्याज्यप्रकरणोक्तंयत्तस्यविशेषनिर्णयमाह यन्मासादितिस्प

मूलांत्यार्कमघास्थिरेंद्वनिलयुग्मैत्रंविवाहेशुभंपापत्यक्तमनिंदुभुक्खलयुतंभोग्यंचविद्धंनभं
विश्वं द्वोर्यममित्रयोर्द्विकभयोः पैत्र्यर्क्षहर्योर्मिथोंत्यार्यम्णोः पुनरस्त्रपोर्वरुणभस्वात्योरुभाहस्तयोः १४

ष्टार्थे नारदः नजन्ममासेनक्षत्रेनजन्मदिवसेपिवा आद्यगर्भसुतस्यापिदुहितुर्वाकरग्रहइति १३ अथविवाहनक्षत्राणिसवेधान्याह मूलांत्यार्केति
मूलंप्रसिद्धं अंत्यंरेवती अर्कोहस्तः मघाप्रसिद्धा स्थिराणिरोहिण्युत्तरात्रय इंदुर्मृगः अनिलंस्वाती एभिः सहितंमैत्रंअनुराधाविवाहेशुभं शुभ ३२
फलं अथएतेषूक्तेषुनिंद्यमाह पापत्यक्तंअसत् अनिंदुभुक्चंद्राभुक्तंनशुभं एतदुक्तंभवति पापग्रहत्यक्तंनक्षत्रंचंद्रभुक्तिरहितंनशुभंस्या

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त् खलयुक्तं पापग्रहयुक्तं भोग्यं विद्धं नक्षत्रं स्यात् अथ वेधमाह विश्वेंद्वोः उत्तराषाढामृगयोः यममित्रयोः भरण्यनुराधयोः द्विकभयोः कस्य भेकभे द्वे च
ते कभे च द्विकभे रोहिण्यभिजितौ तयोः पैत्रर्क्षाहर्योः मघाश्रवणयोः मिथः परस्परं अंत्यार्यम्णोः रेवत्युत्तराफल्गुन्योः पुनरस्त्रपोः पुनर्वसुमूलयोः
वरुणानिलस्वात्योः शततारास्वात्योः उभाहस्तयोः उत्तराभाद्रपदाहस्तयोः मिथः परस्परं वेधः स्यात् इत्युत्तरश्लोकेनान्वयः १४ अथ कर्मविशेषेण वेध
निर्णयमाह वेधोयमिति अयं वेधः करपीडने विवाहे पूर्वं मुनिभिर्निगदितः नान्येषु अन्येषु शुभकर्मसु अयं वेधो नोक्त इत्यर्थः तेषु विवाहान्यकर्मसु स

वेधोयं करपीडने निगदितो नान्येषु तेषु स्मृतो वेधः सप्तशलाककेशिवदिशः कार्शानवाद्यैर्युते वेधोंत्यादिमयोर्द्विक
त्रिमितयोरंघ्र्योर्मिथः सद्ग्रहैर्विद्धे भे चरणं त्यजेत् खलखगैः सर्वं त्विहांघ्रिं क्वचित् १५ सप्तशलाककेस्मृतः किंभूते सप्तशलाक

के चक्रे शिवदिशः ईशान्याः सकाशात् कार्शानवाद्यैर्युते कृशानुः देवता यस्येति कार्शानवं कृत्तिका सा आद्या येषां तानि तैर्युते ईशान्यादिप्रदक्षिणं कृत्तिका
दिनक्षत्रयुक्त इत्यर्थः विवाहादृते सर्वकर्मसु सप्तशलाकाचक्रे वेधोवलोकनीय इति अथ पादवेधमाह वेधोंत्यादिमयोरिति अंत्योदिमयोः चतुर्थ-
प्रथमयोः द्विकत्रिमितयोः द्वितीयतृतीययोः अंघ्र्योश्चरणयोः मिथः परस्परं वेधः स्यात् अथास्य निर्णयमाह सत्खगैः शुभग्रहैः भे नक्षत्रे विद्धे सति चर

CC-0. In Public Domain. Digitization by eGangotri

णंत्यजेत् खलखगैः पापग्रहैः विद्धे सति सर्वं नक्षत्रं त्यजेदित्यर्थः इहास्मिन्पापविद्धे क्वचिदन्यमुहूर्तालाभे सति अंघ्रिं चरणं विद्धं त्यजेदित्यर्थः उक्तं च मांड-
व्येन धिष्ण्यं सौम्यग्रहैर्विद्धं पादमात्रं परित्यजेत् क्रूरैस्तु सकलं त्याज्यमिति वेधविनिश्चय इति वैद्यनाथः वेधमाद्यंतयोरंघ्र्योरन्योन्यं द्वितृतीययोः
क्रूरैरपि त्यजेत्पादं केचिदूचुर्महर्षय इति १५ अथ वेधभंगमाह लग्नेश इति लग्नस्वामिनि भवर्गे एकादशगे सति वेधस्य दोषो नास्तीति एको भंगः अथवा श

लग्नेशे भवर्गे यद्वा शशिनि सद्दृष्टे शुभेवांगगे होरायां च शुभस्य वा व्यध भयं नास्तीति पूर्वे जगुः भौमात्र्याद्धृतिषट्जिनाष्टनख
भं हंत्यग्रतो लत्तया रेवेदो कोर्कमितं शशी मुनिमितं पूर्णो न सन्मालवे १६ षण्मासं ग्रहणोडु चंद्रतनुगं विद्धर्क्ष जन्मर्क्षके त्याज्ये
जन्मभलग्नके तनुगते सूर्यान्मनूडु त्यजेत् दंतद्व्यंकदृशो र्कतो युगगजास्तर्कीः खबाणेंदवो नाडीः संक्रमणे त्यजेद्द्विविषदां
प्रायोर वेर्दूषिताः १७ शिनि सत्दृष्टे सति द्वितीयो भंगः वा इत्यथवा शुभे शुभग्रहे चंद्रवर्जिते अंगे सति तृतीयो भंगः शुभस्य होरायां चेति चतुर्थो भं
गः एषामन्यतमे सति व्यधो नास्तीति पूर्वे मुनयो जगुः आहुः तथा च वसिष्ठः लग्नेश शुभे सौम्ययुते क्षितेवा लग्नादिनाथो भवगस्तथा वा कालाख्य होरा च तथा शु
भस्य भवेद्धि दोषस्य तथा विभंग इति उद्वाहतत्वेपि सधुकृद्दृक्तनुगे शुभे व्यध भयं नो वायगे लग्नपे होरायां च शुभस्य वा शशिनि सद्दृष्टे पिचार्ये रूढोः इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथलत्तामाह भौमादिति भौमात्सकाशात्स्वेटोग्रहोराहुंतः क्रमात्व्याकृत्यादिभंनक्षत्रंअग्रतोलत्तयाहंति भौमतृतीयं बुधःआकृतिर्द्वाविंशमितंगुरुः
षष्ठंशक्रः जिनमितं चतुर्विंशंशनिरष्टमंराहुर्नखमितंविंशंलत्तयाहंति अर्कःसूर्यःअर्कमितंद्वादशंशशीपूर्णचंद्रमाःमुनिमितंसप्तमं अग्रतोलत्तयाहंति
तन्हतंनक्षत्रंमालवेमालवदेशेनसतन्नशःभंस्यात् उक्तंच लत्तामालवकेदेशेपातंकौशलकेतथा एकार्गलंतुकाश्मीरे वेधंसर्वत्रवर्जयेत् १६ अथदोषां
तराण्याह षण्मासमिति षण्मासंषण्मासपर्यंतंग्रहणोडुग्रहणनक्षत्रंचंद्रतनुगंचंद्रगतंलग्नगतंचत्याज्यं चंद्रगतमितियस्मिन्दिनेचंद्रमसायुक्तं
भवतितच्चंद्रगतंदिननक्षत्रमितियावत् तनुगंयथा अश्विन्यांग्रहणेजातेसत्यंशत्रयोदशभागांतमेषलग्नेसतिअश्विनीलग्नस्थास्यात् एवंभ
रण्याद्यपिग्रहणोडुइत्यनेनैवअन्यान्यपिउडूनिदुष्टानित्याज्यानिविद्धर्क्षविद्धनक्षत्रंजन्मनक्षत्रंएतेउभेतनुगेत्याज्ये भंचलग्नंचभलग्नेजन्मनिभल
ग्नेजन्मभलग्नेःतएवजन्मभलग्नकेजन्मराशिजन्मलग्नेतनुगेत्याज्ये लग्नांतर्गतनक्षत्रज्ञानायस्वकल्पितसूत्रं नवघ्नंतनुवेदाप्तंसैकंस्यात्तारकंत
नौअर्कनक्षत्रात्सूर्यनक्षत्रान्मनूडुचतुर्दशनक्षत्रंत्यजेत् अथसूर्यादीनांराशिसंक्रमणेत्याज्यघटिकाआह त्याज्याइति रविचंद्रकुजसौम्यगुरु
शुक्रमंदानांसंक्रमणे रदद्धक्दद्ः नाड्यस्त्याज्याः तद्यथा रविसंक्रमणेरनाड्योद्वात्रिंशत्घटिकावर्ज्याःसंक्रमणकालात्पूर्वतःषोडशघ ८
टिकाःपरतःषोडशघटिकाःएवंद्वात्रिंशत्घटिकास्त्याज्याइत्यर्थः तथाच चंद्रसंक्रमणेद्वेनाड्यौभौमसंक्रमणेनवघटिकाः बुधसंक्रमणेद्वेघटिके

CC-0. In Public Domain. Digitization by eGangotri

त्याज्येगुरोः संक्रमणेअब्ध्यष्टौ ८४ चतुरशीतिघटिकाःशुक्रस्यषट्घटिकाः शनेः संक्रमणेरवितिथयः १५० पंचाशदधिकशतंघटिका स्त्याज्याइत्यर्थः अत्रबाहुल्येनसर्वापेक्षयारवेः संक्रमणनाड्योबहुभिराचार्यैर्दूषिताइत्यर्थः १७ अथसंधिदोषमाह षडिति ऋतुसंधितः वसंतादिऋतुप्रवृत्तेः षट् षष्ठीषड्भिरधिकाषष्टिः ६६ घटीनांषट्षष्टिस्त्याज्येत्यर्थः ऋतुप्रवृत्तिलक्षणंरत्नमालायां मृगादिराशिद्वयभानुभोगात्षडर्तवः स्युः शिशिरोवसंतः ग्रीष्मश्चवर्षाचशरच्चतद्वद्धेमंतनामाकथितोत्रषष्ठइति तिथिभयुक्संधौतिथिनक्षत्रयोगानांसंधौद्विनाड्योपृथक्द्वेद्वेघटिकेत्याज्ये अथपूर्वसुक्तंग्र

षट्षष्ठीऋतुसंधितस्तिथिभयुक्संधौद्विनाड्योग्रहात्तत्पादैर्दिवसांस्त्रिवेदषडिभान्भागर्द्धितान्संत्यजेत् हजनिप्रांत्योद्भवंसूतक

मितितत्र ग्रहणसूतकलक्षणमाह ग्रहादिति ग्रहात्ग्रहणतः सकाशात्उपरितत्पादैस्तच्चरणैः ग्रहपादैः त्रिवेदषडिभान् ३ ४ ६ ८ दिवसान्त्यजेत् एतदुक्तंभवति पादैकमात्रग्रहणेत्रीन्दिवसान्त्यजेत् अर्द्धग्रहणेचतुरोदिवसान्त्यजेत् त्रिपादग्रहणेषट्दिवसान्त्यजेत् सर्वग्रहणेअष्टदिवसान् त्यजेत् प्राग्ग्रहणात्प्राक्प्रथमतः अर्धितानत्रिवेदादीन्दिवसान्त्यजेत् एतदुक्तंभवति पादग्रहणेत्रयाणामर्धं तद्यथा पादग्रहणेग्रहणात्पूर्वं सार्द्धैक दिवसं ९० नवतिघटिकास्त्याज्याः अर्द्धग्रहणेचतुर्णामर्धंद्वौदिवसौ पादत्रयग्रहणेषण्णामर्द्धंत्रीन् सर्वग्रहणेअष्टानाम्अर्धंचतुरोदिवसान्ग्रहणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्वंसजेत् उपरागोग्रहोराहुग्रस्तेविंदोनपूष्णिञ्चेत्यमरः शार्ङ्गीयविवाहपटलेसर्वग्रासेदिनान्यष्टौशुभकार्येषुवर्जयेत् त्रिभागोनेषड्दिवसानर्द्धग्रासेच तुर्दिनं चतुर्थांशेत्रिरात्रंतुग्रहणेचंद्रसूर्ययोरिति अत्राप्यंतरालेतुपातोज्ञेयः तथाचार्ष्टिषेणः ग्रहणात्रिदिनंपूर्वंपरतोदिनसप्तकमिति सर्वग्रहणविषयंज्योतिःप्रकाशेपि खग्रासेसर्वपादोनखंडांघ्र्यल्पेतुवासराः गजाश्वेषब्धिरामाबजानेशाङ्गयुः प्राग्दलेग्रहेइति अथोत्पातेवर्जकालमाह उत्पातेग्रहमिति उत्पातेभूकंपनिर्घातमहोल्कानिपातादिके अघ्रह अद्रिमितानांअन्हांसमाहारः अघ्रहसप्ताहमित्यर्थः उत्पातेजातेसतिसप्ताहंशुभकर्मणित्यजेदि

उत्पातेग्रहगुद्गमंचशिखिनोराकाष्टमीप्राग्दलेविट्प्रांत्येकृतरुद्रयोरबहुलेकृष्णेनिरेकेपिह १८ अर्थः दोषांतरमाहउद्गमंचशिखिनःशिखिनःकेतोःउद्गमंउदयंत्यजेत् यावत्केतूदयस्तावन्मंगलंनकुर्यादित्यर्थः तथाचार्ष्टिषेणःपरंसप्ताहमुत्पातेत्यजेत्केतूदयेशुभमिति भद्राकालमाह राकाष्टमीप्राग्दलेविट्स्यात् राकापौर्णिमा अष्टमीप्रसिद्धा अनयोस्तिथ्योः प्राग्दलेपूर्वार्द्धेविट्विष्टिः स्यात् कृतरुद्रयोः प्रांत्येकृतंच चतुर्थी रुद्रएकादशी अनयोः प्रांत्येविट्स्यात् एतद्भद्राचतुष्टयं अबहुलेशुक्लपक्षेस्यात् कृष्णेनिरेकेपिह उक्तेषुतिथिषुनिरेकेषुएकरहितेषुकृष्णेकृष्णपक्षेविट्स्यात् भद्रापवादः शार्ङ्गीयविवाहपटलेदूषितः अतःकारणान्नोक्तः १८ अथगंडांतलक्षणमाह सार्पेंद्रांतिमभेंनि सार्पं आश्लेषाइंद्रोज्येष्ठा अंतिमभंरेवती एषामंतः तस्मात्कालात्प्राक्परंपूर्वापरतः

CC-0. In Public Domain. Digitization by eGangotri

अब्धिघटिकंगंडांगंडांतिकंस्यात् अब्धयश्चतस्रोघटिकायस्मिन्नित्साब्धिघटिकं चतुर्घटिकमित्यर्थः एतदुक्तंभवति उक्तनक्षत्रांतात्पूर्वतो घटिकाद्वयंपरतोघटि
काद्वयं एवंघटिकाचतुष्टयंनक्षत्रगंडांतं अथतिथिगंडांतमाह पूर्णांततोऽब्ध्यर्धकं पूर्णापंचमीदशमीपूर्णिमा तासां अंततःअब्ध्यर्धकंद्विघटिकंगंडांतंपूर्वाप
रतः स्यात् अथलग्नगंडांतमाह कीटांत्यालिविरामतः कुघटिकंकीटः कर्कोटकः अंत्योमीनः अलिर्वृश्चिकः एषांविरामो अवसानं तस्मात्कुघटिकं प्रागर्धघ
टिकापरतोर्धघटिका एवमेकघटिकंलग्नगंडांतंस्यात् अथचंडायुधमाह सार्वेति सासाध्ययोगः वैवैधृतिः शूशूलः व्यव्यतीपातः हहर्षणः गगंडः एतदाख्य

सार्पैंद्रांतिमभांततोऽब्धिघटिकंपूर्णांततोऽब्ध्यर्द्धकंकीटांत्यालिविरामतः कुघटिकंगंडांतमूर्ध्वाधरं सावैशूव्यहगाख्ययोगविरतौभंतत्र
चंडायुधंदुर्योगेदिनभाच्चसाभिजिदयुग्मेर्कस्तदैकार्गलः १९ योगानांविरतिरवसानंतत्रयद्भंनक्षत्रंतस्माच्चंडायुधंस्यात् चंडंप्रचंडंमहत् एवं
विधमायुधंस्यात् तस्मात्तन्नक्षत्रंवर्ज्यमित्यर्थः अथैकार्गलमाह दुर्योगेदिनभादिति विष्कंभातिगंडशूलगंडव्याघातवज्रव्यतीपातपरिघवैधृतयोनव
दुर्योगाः एषामन्यतमेसतिदिनभाद्दिननक्षत्रात् साभिजिद्युग्मे अभिजितासह अयुग्मेविषमनक्षत्रेयदार्कः सूर्योभवति तदाएकार्गलःस्यात् एकार्गलः
शुभावरोधनीयस्मिन्नित्येकार्गलः शुभफलावरोधकइत्यर्थः १९ अथवारदोषमाह सूर्यात्संकाशात्तारेषुक्रमेणनिगमादिकंयामदलंयामार्धमुज्झंति ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यजंतिसुनयइतिशेषः निगममितंरवौ सप्तमितंसोमे अश्विनौद्वौतन्मितंभौमे इषुमितंबुधे नागाष्टौतान्मितंगुरौ त्रिमितंशुक्रे षट्मितंशनौ एतद्याम दलंदिवैवउज्झंतिनरात्रौ अथकुलिकादीनाह इनादौसूर्यादौवारेदिवाइंद्रादिकंषोडशांशंदिनमानस्यषोडशांशोग्राह्यः तेनगण्यास्तेषोडशांशा ग्राह्याइत्यर्थः तंकुलिकमुज्झंति अपरेतिथ्यंशंपंचदशांशंकुलिकमुज्झंति तन्निशितद्रात्रौचत्र्येकंएकरहितंइंद्रादिकंषोडशांशंपंचदशांशमु- ज्झंति तद्यथा रवौदिवाइंद्रमितंचतुर्दशं तद्रात्रौत्रयोदशं सोमेदिवाद्वादशं तद्रात्रौएकादशमित्यादि अथतैरेवइंद्रादिभिर्मुहूर्तैः अमरे

सूर्याद्यामदलंदिवैवनिगमाद्व्यश्वीषुनागत्रिषट्संख्याकंकुलिकंदिवेंद्रविदिङ्नागर्तुवेदद्विकं त्र्येकंतन्निशिषो डशांशमपरेतिथ्यंशमुज्झंतितैः कालंकंटकमैनिघंटममरेज्यज्ञास्फुजिद्भ्यःक्रमात् २०

ज्यज्ञास्फुजिद्भ्यःसकाशात्क्रमा- त्कालंकंटकंऐनिघंटं इनस्यापत्यंपुमानैनिर्यमः तस्यघंटोयमघंटइत्यर्थः तमुज्झंति एतदुक्तंभवतिअमरेज्योगुरुः तस्मात्सकाशात् तैरेवइं द्रादिभिर्मुहूर्तैःकालमुज्झंति ज्ञात्बुधात्तैरेवेंद्रादिभिः कंटकंआस्फुजिच्छुक्रः तस्मात्सकाशात् तैरेवें द्रादिभिः मुहूर्तैःऐनिघंटंयमघंटकमुज्झं ति २० अथदुर्मुहूर्तानाहशक्रःप्रसिद्धः इंदुश्चंद्रः ईज्योगुरुःयमःशनिः एषुक्रमेणगोकरविभूतुल्यामुहूर्तादिवादुष्टाः स्युःदुर्मुहूर्ताइत्यर्थः

CC-0. In Public Domain. Digitization by eGangotri

कुजनिशि अगः सप्तमोमुहूर्तोदुर्मुहूर्तः ग्रंथांतरे अर्यम्णोर्केतुहिनकिरणेराक्षसब्राह्म्यसंज्ञावित्यादिबहवोदुर्मुहूर्ताउक्ताः अत्रस्वल्पाउक्तास्तेषांपरि
हारमाह यइतरेदुर्मुहूर्ताग्रंथांतरपठितास्तेसर्वेअर्द्धयामादिषुसंति अतोत्रमयानोक्ताः यतअर्द्धयामादीनांत्यागेतेपित्यक्ताःस्युः किंग्रंथविस्तरेणेतिभा
वः एतत्तुसूज्ञाज्ञास्यंति यथारवौचतुर्दशोमुहूर्तोदुर्मुहूर्तः कुलिकोपिचतुर्दशोमुहूर्तः तयोरेकत्रसद्भावइत्यन्येपिविचारगम्याः नन्वेवंचेत्तर्हिपूर्वेर्व्यर्थंपठि
तमेवंतेस्त्वनधिकाधिकदोषविवक्षयोक्तमितिनदोषः अथपातसंभवकालमाह प्रेस्यइति संप्रतिसांप्रतं द्वद्वितुर्यचरणे द्वद्वियोगस्यचतुर्थचरणे तथाब्र

शक्रेंद्वीज्ययमेषुगोंकरविभूतुल्यामुहूर्तादिवादुष्टाःस्युः कुजनिश्यगे। यइतरेसंत्यर्धयामादिषु प्रेस्यः संप्रतिद्वद्वितुर्यचर
णेब्रह्मद्वितीयेपमः सूर्याद्या अनुविश्वपाशियमलेंद्वत्यर्कभैर्मृत्युदाः २१

म्हद्वितीयेब्रम्हयोगस्यद्वितीयचरणे अपमः क्रांतिः पातोविलो
क्यः ब्रम्हसिद्धांताद्युक्तप्रकारेणविलोक्यइत्यर्थः अथमृत्युंसर्वत्रवर्जयेदित्युक्तत्वात्मृत्युयोगमाह सूर्याद्याइति सूर्याद्याः अर्कादयः क्रमेण अन्वादि-
भिर्नक्षत्रैःसहमृत्युदाःस्युः अनुअनुराधा विश्वेउत्तराषाढा पाशीशततारका यमलोअश्विनी इंदुर्मृगः अहिराश्लेषा अर्कभंहस्तः एतदुक्तंभवति अर्कःअ
नुराधयासहयुक्तोमृत्युदः सोमउत्तराषाढ्याभौमः शततारकयाबुधः अश्विन्या गुरुर्मृगेण शुक्रः आश्लेषया शनिर्हस्तेनसहितोमृत्युदःस्यादित्यर्थः २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविषघटिकाआह पंचाशदिति अश्वितःसकाशात्नक्षत्रेषुइमाभ्यः पचाशज्जिनेत्यादिभ्योघटिकाभ्योअग्रेपरतोअब्धिनाड्यश्चतुर्नाड्योविषंस्यात् एत
दुक्तंभवति अश्विन्याःपंचाशत्घटिकाभ्योनंतरंचतुर्नाड्योविषंएवमन्यत् अत्रांकन्यासएवव्याख्यानं २२ अथैषांध्रुवकानांस्पष्टीकरणमाह नक्ष

पंचाश ५० जिन २४ खाग्नय ३० श्चखकृता ४० आखंडला १४ मूर्छना २१ स्त्रिंश ३० द्विंश २० रदाः ३२ खराम ३० नख २० धृत्ये १८
काश्विनौ २१ विंशतिः २० शक्रे १४ द्रौ १४ दश १० वासवा १४ रसशराः ५६ सिद्धा २४ नखा २० शा १० दिशो १० धृत्य १८ शा १६
जिन २४ खाग्नयो ३० श्विताइमा भ्योग्रेब्धि ४ नाड्योविषं २२ नक्षत्रस्यगतैष्ययोगगुणितः स्वस्वध्रुवः षष्टि ६० हृत्स्पष्टस्या
दतऊर्ध्वमब्धिघटिकाः स्पष्टाःस्युरेवंकृताः

त्रस्येति नक्षत्रस्यगतैष्ययोगेनगुणितःस्वस्वध्रुवःषष्टिह्नृतस्पष्टःस्यात् अतऊर्ध्वंस्पष्टध्रुवानंत
रंअब्धिघटिकाश्चतुर्नाड्यःविषंस्यात् एतदुक्तप्रकारेणकृताः सत्यःस्पष्टाःस्युः एतदुक्तंभवति ध्रुवंवच्चतुर्नाड्योपिनक्षत्रगतैष्ययोगगुणिताः कार्याःष

CC-0. In Public Domain. Digitization by eGangotri

षित्स्ताः कार्याः ताःस्पष्टाः स्युः स्पष्टानंतरंचतुर्नाड्योविषाख्याज्ञेयाः अथविषघटीनामपवादमाह चंद्रइति चंद्रः सौम्यभगः शुभग्रहराशिगः स
नविषभयंहंति अथवाशुभस्फत्सुहृदृष्टः शुभस्यासौस्फत्सुहृच्चतेनदृष्टः सन्विषभयंहंति अथवास्वांशगः स्वनवांशेवर्तमानः सनविषभयंहंतिवाइत्यथवा
कोणास्ताम्बस्फरवगोपिचंद्रोविषभयंहंति कोणेपंचमनवमे ५ ९ अस्तभंसप्तमं अम्बंदशमं स्फरवंचतुर्थं एतत्स्थानगोपिचंद्रोविषभयंहंतीत्यर्थः

चंद्रः सौम्यभगोथवाशुभस्फत्सुहृदृष्टोथवास्वांशगः कोणा ५ ९स्ता ७ म्ब १० स्फरवे ४ षुगाविषभयंहंतीहसांगेंगपः २३

अत्रास्मिन्कोणादिस्थानेसांगेलग्नेवर्तमानः अंगपोलग्नपोविषभयंहंतीत्यर्थः एवंपंचभंगाः संति ननुसप्तमः खेटोविवाहेनिंदितः कथमत्रचं
द्रोगृहीतः सत्यमिदंवाक्यंसर्वकर्मसाधारणं तस्मान्निंदितंस्थानंवर्जयित्वा अन्यत्रग्राह्यः तथाचबृहस्पतिः चंद्रोविषघटीदोषंहंति केंद्रत्रिको
णगः लग्नंविनाशुभैर्दृष्टः केंद्रेवालग्नपस्तथा फलप्रदीपे विषनाड्युत्थितंदोषंहंतिसौम्यर्क्षगः शशी मित्रदृष्टोथवास्वीयवर्गस्थोलग्नपोपिच २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविवाहलग्नेइष्टानिष्टग्रहानाह लग्नेचंद्रइति चंद्रःखलाश्चलग्नेचंद्रखलाःलग्नेवर्तमानाःशत्त्वेशोकायभवंति तथारिपौषष्ठेविधुसितौचंद्रशुक्रौ त
थासर्वेद्युनेसर्वेक्रूरसौम्याद्यूनेसप्तमे तथाखेदशमेबुधः तथाअब्जाश्चंद्रांत्येअगुःराहुः स्मरखगश्चतुर्थगः नविद्यंतेगावःकिरणायस्येत्यगुःराहुस्त
मोगुरस्वरश्चेतिवृहज्जातकेराहुनामानि तथाअष्टमाःकुजशुभाःकुजश्चशुभाश्चेततथा शुक्रस्तृतीयइतिस्पष्टार्थः एतेप्रत्येकंउक्तस्थानगाःशत्त्वे

लग्नेचंद्रखलारिपौशशिसितौसर्वेद्युनेखेबुधोब्जोंत्येगुःस्मरखगोष्टमाःकुजशुभाःशुक्र स्तृतीयःशत्त्वे लाभेसर्वखगाःशुभा
अखिलगास्त्र्यष्टारिगाःस्युःखलाश्चंद्रस्त्र्यंबुधनेश्रियेंशाभट्टकेट्स्यान्मृत्यवेष्टारिगः २४

शोकायभवंति अथइष्टानाह लाभेएका
दशेसर्वखगाः तथासौम्याःशुभग्रहाःअखिलगानिंद्यंविनासर्वस्थानगाःतथाखलाःक्रूराःत्र्यष्टारिगाःतृतीयाष्टषष्ठगाःतत्रअष्टमेभौमोनिंदितःतं
विनापापाअष्टमाद्याह्याः चंद्रस्त्र्यंबुधनेतृतीयचतुर्थद्वितीयेचंद्रः एतेप्रत्येकंश्रियेलक्ष्म्यैभवंतिश्रीकारकाइत्यर्थःएवंशुभाशुभग्रहानुक्त्वातत्र
विशेषमाह अंशाभट्टकेट् अष्टारिगःसन्मृत्यवेस्यात् अंशोनवांशःभंलग्नंदृक्कोदृकाणःएषामिट्स्वामीनवांशस्वामीलग्नस्वामीदृकाणस्वामीएते

CC-0. In Public Domain. Digitization by eGangotri

प्रत्येकंअष्टषष्ठगाः मृत्युहेतवोभवंतीत्यर्थः ३५ अथकतिचिद्दोषाणामपवादमाह तत्र प्रथमंभृगुषष्ठापवादमाह कन्यानौक्षिकेति कन्याप्र
सिद्धा शुक्रस्यनीचंनौक्षिकोधनुर्धरः शत्रुगेहंपूर्वोक्तं भृगुसुवःशत्रूरवींदूइति तत्ररवेर्गृहंसिंहः इंदोर्गृहंकर्कः एषांकन्यादीनांअन्यतमगेहगतोभृगुः ष
ष्ठोपिनोभंगकृत्स्यात् लग्नभंगकरोनभवतीत्यर्थः तथाचकश्यपः नीचगेतुतुरीयेवाशत्रुक्षेत्रगतेपिवा भृगुषष्ठोद्भवोदोषोनास्तीत्यत्रनसंशयः
अथकुजाष्टमदोषापवादमाह भौमोमृत्युगतोपि अष्टगतोपि शत्रुशशिनोर्गेहस्थितोयदिभवति वाइत्यथवाअर्कगः अस्तंगतोपियदिभवतितदानोभं

कन्यानौक्षिकशत्रुगेहगभृगुः षष्ठोपिनोभंगकृद्भौमोमृत्युगतोपिशत्रुशशिनोर्गेहस्थितोवार्कगः गकृत्स्यात् अस्यशत्रुर्बुधः कु

जस्यविदरिरितिभागुक्तः तस्य गृहंकन्यामिथुनंच शशिगृहंकर्कटः तस्यनीचं एषामन्यतमस्थःअस्तंगतोवाअष्टमगतोपिवालग्नभंगकरोन
भवतीत्यर्थः अस्तगेनोच्चगेभौमेशत्रुक्षेत्रगतेपिवा कुजाष्टमोद्भवोदोषोनकिंचिदवशिष्यतइति अथद्वादशषष्ठचंद्रापवादमाह शुक्लेति ३८
शुक्लपक्षेअंत्यारिविधुः द्वादशषष्ठश्चंद्रः स्ववर्गस्थोगतः वर्गाश्चहृद्दश्चस्ववर्गहृशाः शोभनानांवर्गहृशाः स्ववर्गहृशाः ताः इतः प्राप्तः स्ववर्गहृगितः शुभव
र्गेशुभदृष्टियुतइत्यर्थः एवंविधोविधुः शुभदः स्यात्कस्मिन्सति इज्येगुरौशुक्रेवातनौलग्नेसति कथंभूतेगुरौ स्वोजोयुजि स्वतरांओजःस्वो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नः उक्तरूपबलं तेनयुनक्तीतिस्वोजोयुक् तस्मिन्स्वोजोयुजि अतिबलिष्ठेसतीत्यर्थः शुक्रस्याप्येतद्विशेषणं एतदुक्तंभवति बलिष्ठेगुरौशुक्रेवालग्नस्थे सति शुक्लपक्षेचंद्रमाः स्ववर्गदृष्टिसहितोयदिभवतितदाद्वादशषष्ठगोपिशुभदइतिभंगकरोनस्यात् अन्यथान मुहूर्तदर्पणेकवौगुरौवाबलिनिस्थितेतत नौशुभेनदृष्टः शुभवर्गगः शशीविवर्धमानः शुभकृच्चनाशुभंकरोतिनिष्ठन्नपिरिःफषष्ठयोरिति अथसग्रहचंद्रदोषापवादमाह सग्रहः ग्रहेणग्रहाभ्यां ग्रहैर्वासहवर्तमानः सग्रहः बुधगुरुवर्ज्यअन्यग्रहयुक्तइत्यर्थः यतःपूर्वमुक्तं हिमरुचिर्नेज्योनखेटान्वितमिति एवंविधःसग्रहः विधुः केंद्रनिजवर्गे-

शुक्रेत्यारिविधुःस्ववर्गदृग्गतः स्वोजोयुजीज्येतनोशुक्रेवाशुभदोथकंटकनिजांशेज्येक्षितःसग्रहः २५

ज्येक्षितःसन्शुभदःस्यात् केंद्रंप्रसिद्धं निजवर्गोनिजांशः तत्रवर्तमानोइज्यः केंद्रनिजवर्गेज्यः तेनईक्षितः अवलोकितः सग्रहः चंद्रमाः शुभदः भगक-रोनस्यात् उक्तंच गुरुः स्वकीयवर्गस्थोबलवान्कंटकाश्रितः पश्यन्सग्रहशीतांशुंतद्दोषंविलयंनयेदिति २५ अथसामान्यदोषापवादमाह दोषाणामिति कंटककोणगः केंद्रकोणगः इंदुजः बुधः दोषाणांशतंघातयेत् तत् १ ४ ५ ७ ९ १० स्थः शुक्रः दोषाणांशतयुगंद्विशतंघातयेत् तत्स्थः १ ४ ५ ७ ९ १० बृहस्पतिः दोषाणांलक्षंघातयेत् अपवादांतरमाह अंगंलग्नंइनचंद्रौजस्त्रिपातादिकान्घातयेत् इनचंद्रयोः सूर्यचंद्रयोः ओजो

CC-0. In Public Domain. Digitization by eGangotri

बलमस्यास्तीतिइनचंद्रोजस्वि एवंविधंलग्नंपातादिकान्घातयेत् उक्तंचवसिष्ठेन एकार्गलोपग्रहपातलत्ताजामित्रकर्तयुद्धयादिदोषाः नश्यंतिचं
द्रार्कबलोपपन्नेलग्नेयथार्कोभ्युदयेंधकारइति अथदोषापवादभंगमाह भंगाइति येभंगाः दोषभंगाःविबलाःगतबलानिर्बलास्तत्रदोषभंगविषयेस
फलानभवंति दोषभंगसमर्थानभवंतीत्यर्थः तस्माद्दोषभंगकृतांबलंविचार्यदोषभंगमादिशेदितिभावः उक्तंच सामान्येनोदितादोषाभंगास्तेषांतुतद्वि

दोषाणांशतमिंदुजःशतयुगंशुक्रोगुरुर्घातयेल्लक्षंकंटककोणगोंगमिनचंद्रोजस्विपातादिकान् भंगायेविबलानतेत्रसफलाः स
ध्यंशतुल्योफलःस्याद्भावांशसमोग्रहोखिलफलःसंध्यूर्ध्वगःस्यात्परः २६ भागाःस्युर्नतनाडिकाःसहतास्तद्धीनयुक्
प्राक्परेसूर्यःस्वंसरसंस्कृतं कथितवल्लग्नंसषड्भंमदः दैःयदितेबलहीनाःस्युःप्रध्वंसाभावतांययुः अथभावशुद्धिमाह
संध्यंशतुल्योफलइति संध्यंशतुल्यःसंधिभागसमानोग्रहःअफलःस्यात् सदसत्फलदोनभवति भावांशतुल्योग्रहःअखिलफलःस्यात् संपू
र्णफलदोभवति अर्थान्मध्येअनुपातात्फलंवेद्यं विशेषफलमाह संध्यूर्ध्वगःस्यात्परइति संध्यूर्ध्वगःसंध्यंशाधिकःग्रहःपरःस्यात्परभावफलदःस्या
दित्यर्थः २६ संध्यंशतुल्यइत्याद्युक्तं तत्रकेतेसंधयःकेतेभावाइत्यपेक्षायांतत्साधनंकिंचित्स्थूलमेकेनवृत्तेनाह भागास्युरिति नतनाडिकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहताभागाः स्युः नतसाधनंजातकपद्धतावुक्तं रात्रेःशेषमितं युतंदिनदलेनान्होगतंशेषकंविश्लेष्यंखलुपूर्वपश्चिमनतमिति एतदुक्तंभवति सूर्येष्टकाला
भ्याइष्टकालंसाधयित्वानतंचसाधयित्वातदिष्टकालभवनतंषट्गुणंनतभागाः स्युरित्यर्थः प्राक्पश्चिमेनतेनक्रमेणतन्यूनयुक्सूर्यः तेर्भागैःन्यून
युक्पूर्वनतेसतिन्यूनः पश्चिमनतेसतियुक्युक्तः तत्कालिकः सूर्यः खंस्यात् दशमभावः स्यादित्यर्थः तत्खंदशमभावंसरसंषट्राशियुक्तंसत् सखंचतु
र्थभावः स्यात् कथितवल्लग्नंझेषं तत्सषट्भंषट्राशियुक्तंसत् मदः सप्तमभावः स्यात्एवंभावचतुष्टयंसाधयित्वा अंतर्भावसाधनमाह व्यस्ताभ्रारिल

व्यस्ताभ्रारिलवोयभूच्युतइमौ भूयोंगपातालयोः क्षैप्यौषट्नतयुतः ससंधयइमेषड्भान्विताः स्युःपरे २७ इंदोर्वाहरि
जाद्व्ययस्वगतयोःस्याक्रूरयोःकर्तरीस्वेवक्रयंत्यक्रजुमहत्स्यथगुरोरिःफेऽत्रभेवातनो वइतिविगतःअस्तः सप्तमभावोयस्मात्तत्

व्यस्तंतत्खंतत् अभ्रंचव्यस्ताभ्रं सप्तमभावरहितदशमभावइत्यर्थः तस्यत्रिलवोराश्यादिकोग्राह्यः अयद्दक्च्युतःद्विपतितःकार्यःएतौउभौकेवलत्रि
लवद्दक्च्युतत्रिलवौपृथक्पृथक्कुद्दग्घ्नौसंतौपृथक्पृथक्लग्नेअंबुनिचयोज्यौ अयमर्थःकुघ्नःत्रिलवोलग्नेयोज्यः सद्वितीयभावोभवति दृघ्नोलग्ने
योजितः तृतीयभावोभवति अथदृक्च्युतः त्रिवलः कुघ्नः अंबुनिपूर्वसाधितेचतुर्थभावेयोजितः पंचमभावोभवति दृघ्नोऽबुनियोजितः षष्ठभावोभ

CC-0. In Public Domain. Digitization by eGangotri

वति तेषडनंतरसाधिताभावाः षड्राशिसहिताः कार्याः तेतुसप्तमाज्ञेयाः लग्नंषड्भंमदइतियावत् तेतुलग्नसुखाल्ग्नादयोः भावाः स्युः अथसंधिसाधनमा
ह संधिर्द्वियोगोर्धितमिति द्वयोर्भावयोः योगः अर्धितः संधिः स्यादितिस्पष्टं अथपाठांतरस्यव्याख्या व्यस्तेति सप्तमभावरहितस्यदशमभावस्य अ
रिलवः षड्भावोसास्यादिकः सपृथक्पृथक्भूच्युतः एकस्मात्पतितः इमौउभौ भूयः वारंवारं अंगपातालयोः प्रथमचतुर्थभावयोः क्षेप्यौ तनुतः लग्ना
त्ससंधयः संधिसहिताः षड्भावाः स्युः इमेभावाः षड्भावान्विताः परेससंधयोभावाः स्युः एवंभावसंधिसाधनंकृत्वासंध्यंशतुल्योऽफलइतिप्र

स्वेक्षेसौम्यखगेपिवागुरुभृगुज्ञैः केंद्रकोणेषुवाचेल्लः कर्तरिकारकौद्विचरौनीचास्थितोसानहि २८ लग्नंसेततिथिग्र
हैर्द्वदिभहग्वेदतुभूशेषकैरोगाग्नीनहसात्ययास्त्यजरुजंराग्न्यर्कमौंजीषुच गुक्तग्रहफलंविचार्यं अंतरे अनुपातः भावसंध्यंतरेणास्तं
स्वेदसंध्यंतरात्फलमिति जातकपद्धतेः एतत्स्थूलभावानयनं सूक्ष्मंतुजातकपद्धतावगंतव्यं २७ अथकर्तरीदोषलक्षणंसापवादवृत्तेकेनाह इंदोर्वेति
इंदोश्चंद्रात्सकाशात् वाइत्यथवाहरिजाल्लग्नात् सकाशात्व्यय १२स्व २गतयोः व्ययोद्वादशस्वंद्वितीयंतदुभयत्रगतयोः क्रूरयोः पापग्रहयोः सतोः कर्तरीस्यात्
अथमहाकर्तरीलक्षणमाह स्वेद्वितीयेस्थितः क्रूरः यदिवक्रीस्यात् अंत्येद्वादशेस्थितः क्रूरः ऋजुः मार्गगामीस्यात् तदामहतीकर्तरीस्यात् एवंक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेरीलक्षणमुक्त्वातन्भंगमाह शुद्धेरिति पंचमांशेसतिसाकर्त्तरीनस्यादेवेत्येकोभंगः वाइत्यथवाशुभेग्रहेतुधनुःकुंभमुक्तानामन्यतमेतनौलग्नेसतिसानेतिद्वितीयो
भंगः स्वेद्वितीयेअब्जेचंद्रेसतिसानेति तृतीयोभंगः वाइत्यथवासौम्यखवर्गेद्वितीयेसतिसानेति चतुर्थोभंगः वाइत्यथवाकेंद्र १ ४ ७ १० त्रिकोणेषु ५ ९ भृगु
विदीज्यैः शुक्रबुधगुरवः तैः साढ्यैः कालाच्चेति सप्तम्यर्थेतृतीया साकर्त्तरीनस्यादेवेतिपंचमोभंगः वाइत्यथवाकर्त्तरीकारकौक्रूरौदिविचरौनीचास्थितौयथा
दास्यातांतदासानस्यादितिषष्ठोभंगः हिअवधारणे २८ अथपंचकदोषंसापवादमाह लग्नेति लग्नंइष्टलग्नंसततिथि इतान्वासौतिथिश्चइत
तिथिः गततिथिःतयासहवर्तमानंसततिथि ग्रहैस्तत्नवभक्तंकार्यं इभइग्वेदर्तुभूशेषकैः इभाअष्टौ दृशौद्वे वेदाश्चत्वारः ऋतवः षट् भूरेका ए
तन्मितैःशेषकैः क्रमात्क्रमेणरोगाग्नीनृपचौराः मृत्यवःस्युः रोगः प्रसिद्धः अग्निः प्रसिद्धः इनोराजाराजाधिपःपतिः स्वामीनाथः परिवृढः प्रभुःईश्वरो
विभुरीशान इतीन्द्रइनईशितेति धनंजयः हरश्चौरः अत्ययोमृत्युः एतेपंचकाः स्युरित्यर्थः एतदुक्तंभवति लग्नंशुक्लप्रतिपदादिगततिथियुक्तंकृ
त्वानवभिर्हृत्वा अष्टशेषेरोगः द्विशेषअग्निः चतुःशेषेराजा षट्शेषेचौरः एकशेषेमृत्युः अथैतेकुत्रवर्ज्याइत्याह रात्र्यर्केमौंजीपुरुजंत्यज
रात्रौ अर्के आदित्यवारे मौंज्यांरुजंत्यज भौमगृहंवुधअग्निंत्यज भौमादयः प्रसिद्धास्तेषु बुधशनिसेवेंदुषुइनंत्यज धुर्दिवाशनिः शनिवा
रः सेवास्वामिसेवनं इंदुः सोमवारः एषुइनं राजानंराजपंचकंत्यज ईज्यारेतिषुहारंत्यजचौरंत्यज ईज्योगुरुवारः आरोभौमवारः इतिगतिर्या

CC-0. In Public Domain. Digitization by eGangotri

अथविशेषांतरमाह नोवर्गोत्तमेति वर्गोत्तमतः वर्गोत्तमेनांशेना अंतिमलवंचरमंनवांशंनादद्यात् यल्लग्नंसएवनवांशोवर्गोत्तमः तथाचरर्क्षेचरलग्नेचरंनवां
शंनोदद्यात् कस्मिन्सति चंद्रेतौलिमृगास्यगेतुलामकरगेसति एतच्चरत्रययोगंनोदद्यादित्यर्थः अत्रचरचतुष्टयमध्येचंद्रेतौलिमृगास्यगेइत्येवोक्तंत
न्मेषकर्कटयोर्विवाहनक्षत्राभावात् तथातनुंलग्नंपंचेष्टरवेटोनितांनोदद्यात् यत्रलग्नेपंचइष्टग्रहाःनभवंतितल्लग्नंनदेयंइत्यर्थः अथेष्टनवांशाल्लग्नसाधनमा
ह तत्रतावन्मेषादिषुआद्यांशानाह मेषादिष्विति मेषादिषुअजनक्रतौलिककुलीराद्यानवांशाःक्रमेणोक्ताः तद्यथा मेषेअजाद्याःमेषाद्याःवृषेनक्राद्याःम

नोवर्गोत्तमतोविनांतिमलवंदद्याच्चरर्क्षेचरंचंद्रेतौलिमृगास्यगेनचतनुंपंचेष्टखेटोनितां मेषादिष्वजनक्रतौलिककुली
राद्यानवांशाःक्रमादिष्टात्पूर्वनवांशकादशहतास्त्र्याप्तालवाद्यातनुः ३१ कराद्याःमिथुनेतौलिकाद्याःतुलाद्याः कर्कटेकुलीराद्याःकर्कटा
द्याःएवंपुनःसिंहेमेषाद्याःकन्यायांमकराद्याःतुलायांतुलाद्याःवृश्चिकेकर्काद्याःपुनर्धनुषिमेषाद्याःमकरेमकराद्याःकुंभेतुलाद्याःमीनेकर्काद्याःनवांशाउ
क्ताइत्यर्थःइष्टादंशात्पूर्वनवांशकाःगतांशाःदशहताःदशगुणिताःत्र्याप्ताःत्रिभिर्हृताःलवाद्याभागाद्याःतनुःलग्नंस्यात् अत्रोदाहरणं इष्टलग्नंमेषःतत्रमेषा
दिकाअंशाःप्रवर्तंतेइष्टांशःकन्यांशः आद्यात्षष्ठःपूर्वनवांशकाःपंच ५ एतेदशहताः५० त्र्याप्ताःलवादिफलंलब्धं१६ ४०इष्टलग्नसहितंराश्यादि१६४०० ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०४६

अथ जैमिनीयं सूत्रम्.

श्रीनीलकंठज्योतिर्विद्विरचितयासुबोधिन्याटीकयासहितमध्यायद्वयं

(टीकारहितं चाध्यायद्वयं)

प्रारभ्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्योतिषग्रंथाः

	कीं० रु.	आ.	पै.	डा० रु.	आ.	पै.
बृहज्ज्जातकभाषाटीका	१	८	०	०	३	०
वर्षदीपकपत्रीमार्ग वर्षजन्मपत्र बनानेकाक्रम	०	४	०	०	१	०
मुहूर्तचिंतामणि प्रमिताक्षरा १ रु०	१	८	०	०	३	०
मुहूर्तचिंतामणि पीयूषधारा टीका	३	०	०	०	७	०
ताजिकनीलकंठीसटीकतंत्रत्रयात्मक	१	४	०	०	२	०
ज्योतिषसार भाषा टीका सहित	१	०	०	०	२	०
मुहूर्तचिंतामणिभाषाटीका	१	४	०	०	३	०
बालबोधज्योतिष	०	२	०	०	०	६
चमत्कारचिंतामणि भाषाटीका	०	४	०	०	०	६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सू०		कि० रु.	आ.	पै.	डा० रु.	आ.	पै.	प०
	जातकालंकारभाषाटीका	०	६	०	०	०	६	
॥ १ ॥	जातकाभरण	०	१२	०	०	२	०	
	जातकालंकारसटीक	०	६	०	०	१	०	
	लघुपाराशरीसटीक	०	३	०	०	०	६	
	मुहूर्तमार्तंड	०	१२	०	०	२	०	
	शीघ्रबोधभाषाटीका	०	६	०	०	१	०	
	षट्पंचाशिकासटीक	०	३	०	०	०	६	
	भुवनदीपक सटीक	०	४	०	०	०	६	
	जैमिनिसूत्रसटीक	०	७	०	०	१	०	॥ १ ॥
	सर्वार्थचिंतामणि	०	१२	०	०	२	०	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

	किं० रु.	आ.	पै.	डा० रु.	आ.	पै.
लघुजातकसटीक	०	६	०	०	१	०
सामुद्रिकभाषाटीका	०	४	०	०	०	६
यवनजातक	०	२	०	०	०	६
पंचांगतिथिपत्र	०	१	६	०	०	६
अर्घप्रकाश ज्योतिष भाषाटीका इस्में तेजीमंदी वस्तु देखनेकाबिचार	०	४	०	०	०	६
ज्योतिषकीलावणी	०	१	०	०	०	६
शकुनवसंतराज भाषाटीकासहित....	३	८	०	०	८	०
रत्नद्योतभाषाटीका	०	५	०	०	०	६

पुराणइतिहासग्रंथाः

	किं० रु.	आ.	पै.	डा० रु.	आ.	पै.
वाल्मीकिरामायण सटीक	१५	०	०	१	१४	०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सू० ॥ २ ॥ प०

	कि० रु.	आ.	पै.	डा० रु.	आ.	पै.
श्रीमहाभारतसटीक अति उत्तम बडे अक्षरका मजबूत कागज गणपतकृ०छापेका अनुक्रमणिका सहीत	४०	०	०	५	८	०
श्रीमद्भागवत श्रीधरीटिप्पणीसह अक्षरमोठा परमोत्तम है	१५	०	०	३	८	०
श्रीमद्भागवतभाषाटीकासह ५०० दृष्टांतो सहित	१२	०	०	२	०	०
भागवतविजयध्वजी टीकासह माध्वसंप्रदाय ग्रंथ संख्या ८०००० होगा	१२	०	०	३	०	०
वाल्मीकिरामायण सटीक	९	०	०	१	०	०
श्रीमद्भागवत श्रीधरीटीका और चूर्णिका टीका सह	९	०	०	१	८	०
ब्रह्मवैवर्तपुराण संपूर्ण चारोंखंड	८	०	०	१	४	०
देवीभागवत सटीक	७	०	०	०	१२	०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ॥ सृष्टिस्थित्यंतकर्त्रीहरिहरविधिभिःसेवितानंददात्रीनानातंत्रोक्तमार्गैर्मुनिभिरपिधियाभालचंद्रोज्ज्वलांगी आरक्ताभत्रिनेत्राशिवशवनिलयाराजराजेश्वरीसावाचंनोह्यातनोतुप्रतिपदकठिनेजैमिनेसूत्रसंघे १ विवस्वद्वंशाग्र्यावनिपतिवरश्रीरणजितोदयांभोधेर्वाचातवकरुणयाजैमिनिमुनेः निरालंबेशास्त्रेजननिगिरिजेयास्यतिनकिंसुटीकामेकामोहृदिसमभिपूर्तिरचयितुं २ अथप्राक्तनकर्मज्ञानानुष्ठेयकाशीवासादिनाजगदुद्धारंचिकीर्षुः करुणासिंधुर्जैमिनिमुनिः प्रेप्सितग्रंथप्रतिबंधकोपशमनायश्रीशंकरप्रणति

श्रीगणेशायनमः ॥ उपदेशंव्याख्यास्यामः १ अभिपश्यन्त्यृक्षाणि २ पार्श्वभेच ३

पूर्वकंसकललोकशुभाशुभसूचकजातकशास्त्रमनुष्ठातुंप्रतिजानीते उचतत्पदंउपदंतस्येशःशंकरस्तंव्याख्यास्यामः नमस्कुर्मःउकारःशंकरःप्रोक्तइत्येकाक्षरकोशः प्रकृतार्थस्तुउपदिश्यतेप्रकाश्यतेप्राक्तनशुभाशुभकर्मनेनेत्युपदेशोजातकशास्त्रविशेषस्तंव्याख्यास्यामःकथयिष्यामइति १ नन्वस्मिन्शास्त्रेकिमन्यशास्त्रतोदृष्टिर्विलक्षणोतान्यशास्त्रप्रसिद्धैवेतिसंशयंपरिहरन्नाह ऋक्षाणिराशयःअभिसम्मुखंपार्श्वभेपार्श्वराशीचपश्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिअवलोकयंति क्रमतश्चरेऽष्टमपंचमैकादशराशयः स्थिरेषष्ठतृतीयनवमराशयः द्विःस्वभावेसप्तमचतुर्द शमराशयस्तथाभवन्तीतिदृष्टिचक्रेद्रष्टव्यं वृद्धकारिकाच चरंधनंविनास्थास्नुस्थिरमंत्यंविनाचरं युग्मंस्वे नाविनायुग्मंपश्यतीत्ययमागमंइति तदयंसंग्रहःचरानाग ८ बाणे ५ श ११ राशीन्स्वतोवैस्थिराःषट् ६ तृ तीयां ३ क ९ राशीन्क्रमेण स्वतः शैलभं ७ वेद ४ भं पंक्ति १० भंचक्रमाद्द्विःस्वभावाःप्रपश्यंतिपूर्ण मितिराशिषुसिद्धं २ ३ द्रष्टृदृश्यभावंखेटेष्वातिदिशति तन्निष्ठाःराशिस्थिताग्रहास्तद्वत्तैराशिभिस्तुल्यंयथा

तन्निष्ठाश्चतद्वत् ४। दार ४ भाग्य २ शूल ११ स्थार्गला निध्यातुः ५

भवति तथास्वास्थितराशिवदेवस्वतोष्टमादिराशींस्तान्निष्ठग्रहांश्चपश्यंतीत्यर्थःतथाचोक्तंवृद्धैःचरस्थंस्थिरगः पश्येत्स्थिरस्थंचरराशिगः उभयस्थंतूभयगोनिकटस्थंविनाग्रहं शुभार्गलेधनसमृद्धिरित्यादिसूत्रेष्वर्गलपद संकेतस्याकांक्षांनिवर्तयन्नाह ४ विचाराश्रयीभूतस्यराशेर्निध्यातुर्द्रष्टुर्ग्रहाद्दारभाग्यशूलस्थाः दारादिपद ॥ १ ॥
बोध्यचतुर्थद्वितीयैकादशस्थानस्थिताग्रहाविचाराश्रयीभूतराशिद्रष्टुर्ग्रहस्यअर्गलाः अर्गलासंज्ञकाःस्युः अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्गलाकर्तरीइतियावत् ननुस्वाम्यादिभिर्निध्यातुःफलदातुरित्युक्तं त्वयाऽयमर्थःकथंज्ञातइतिचेच्छृणुभय २ पुण्य ११ विना ४ भावाद्रष्टुराहुःशुभार्गलमितिवृद्धवाक्यादेवशुभार्गलमर्गलाविप्रतिबंधकत्वमिति छंदोव त्सूत्राणीत्युक्तेः संधिश्छांदसःअत्राक्षरैरेवराशिभावबोधनंमुनेरभिप्रेतमित्यनुपदमेवस्फुटीभविष्यतिअस्मि न्ग्रंथेकटपयादिक्रमेणांकाग्राह्याःतत्रापिद्वादशाधिकसंख्यासन्निपातेद्वादशतष्टंकृत्वाऽवशिष्टसंख्याराशिभा वबोधिका अत्रप्राच्यकारिकाच कटपयवर्गभवैरिहपिंडांत्यैरक्षरैरंकाःनञिचशून्यंज्ञेयंतथास्वरेकेवलेकथितं॥

कामस्थातुभूयसापापानां ६ रिःफनीचकामस्थाविरोधिनः ७

यथादारेत्यत्रांकानांवामतोगतिरितिरीत्यादकारस्याष्टसंख्यारकारस्यद्विसंख्येत्यष्टाविंशतिसंख्यामापन्नेपुंजेद्वा दशतष्टेचोर्वरिताःचतुःसंख्याभावबोधिकेति इयमर्गलाशुभपापोभयसाधारणीनचोक्तार्गलाप्रतिबंधकमादौ वक्तव्यमितिवाच्यं तथासत्यर्गलापदस्यमंडूकप्लुत्यानुवृत्तेरस्वारस्यादर्गलांतरमेवाह ५ रविक्षीणचंद्रभौम शनिराहुकेतुपापयुतबुधानांभूयसाबाहुल्येनपापानामितिबहुवचननिर्देशात्त्रिप्रभृतिभिः पापैः कामस्थात्तृतीय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थानस्थाऽर्गलाभवतिएकेनपापेनद्वाभ्यांचनेत्यर्थः इयमर्गलापापसंबंधिनीपूर्वातुशुभपापसाधारणीप्रेमानिधि पंडितैस्तुपापानांमध्येयोधिकांशकस्तेनतृतीयेर्गलाभवतीति यदुक्तंतत्सूत्राक्षरार्थान्नायातिपापानांभूयसेत्यने नपापबाहुल्यंत्वायातीति बहुपापकृतकामस्थार्गलायानिर्बाधकत्वादेव पृथक्सूत्रमिदं ६ पूर्वार्गलाबाधकान्या ह दारेत्यादिपदबोध्यचतुर्थद्वितीयैकादशस्थानस्थितानामर्गलाकर्तृणांखेटानांक्रमेणरिष्फादिपदबोध्यदशम द्वादशतृतीयस्थानस्थिताग्रहाविरोधिनः अर्गलाप्रतिबंधकाइत्यर्थःतथाचदशमादिस्थानेषुग्रहाभावेसत्येवच

नन्यूनाविबलाश्च ८

तुर्थादिस्थानस्थैःग्रहैःअर्गलाभवतिनान्यथेतिभावः ७ बाधकबाधकानप्याहअर्गलाकर्तृग्रहेभ्यःप्रतिबंधकाग्र हान्यूनाअल्पसंख्याकाः द्वौचेदर्गलाकर्तारावेकश्चेत्प्रतिबंधकइत्यादिविबलानिर्बलाश्चयदितदाप्रतिबंधकान स्युःबलमग्रेनिरूपयिष्यति अर्गलास्तत्प्रतिबंधकाश्चवृद्धैरुक्ताःभय २ पुण्य ११ विना ४ भावाद्द्रष्टुराहुःशुभार्ग लंस्फु १२ टांग ३ ज्ञेय १० भावात्तुविपरीतार्गलंविदुःद्रष्टुर्द्रष्टृग्रहस्यद्वितीयादितःशुभार्गलंद्वादशादितोऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभार्गलंप्राहुः अर्गलविरोध्यर्गलमेवविपरीतार्गलमित्युच्यते ८ तृतीयार्गलामुपदिशति त्रिकोणेपंचमनव मयोः अर्गलातत्प्रतिबंधकश्चप्राग्वत् पंचमेग्रहसत्त्वेऽर्गलानवमेन्यूनसंख्यात्वनिर्बलत्वदोषरहितग्रहसत्त्वेऽर्गलाप्रतिबंधकत्वमितिनचदारेत्यादिसूत्रेशांतपदस्यरिष्फेत्यादिसूत्रेधातुपदस्योपादानादेवार्थलाभेसूत्रांतर निर्माणस्यवैयर्थ्यापत्तिरितिवाच्यं विपरीतंकेतोरितिसूत्रेकेतुकृतव्यत्ययस्यत्रिकोणाएववक्तव्यत्वात्साफल्य प्रसंगात् अन्यथाहिदारभाग्यशूलेष्वपिकेतुकृतव्यत्ययापत्तिरितिभावः यत्तुकैश्चिदुक्तंप्राग्वदितिसूत्रस्यपृथ

प्राग्वत्रिकोणे ९

क्करणसामर्थ्यादप्रतिबंधेयमर्गलेतितत्रतथासातिकामस्थेतिसूत्रोत्तरमेवप्रसंगात्तन्निर्मितिः स्यादितिविपरीतंकेतोरितिसार्वत्रिकंयदुक्तंतदपिनकामस्थेतिसूत्रोत्तरंप्राग्वदितिसूत्रंचेत्तदासार्वत्रिकंस्यात्प्राग्वदितिसूत्रानंतरप्रणयनात्तत्रैवास्यप्रवृत्तिरित्यर्थः विपरीतमितिसूत्रस्योत्तरसूत्रे ऽन्वयइतियदुक्तंतदपिनअष्टानांवेतिपृथक्करणसामर्थ्यादेवराहोर्न्यूनांशत्वेनकारकत्वलाभादेतदन्वयस्यवैयर्थ्यापत्तिः अष्टानांवेत्यन्यमतंयदुक्तंतत्रप्रमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णाभावइति ९ केतौविशेषमाह केतोर्ग्रहस्यनवमसर्गलास्थानंपंचमंप्रतिबंधकस्थानं १० किंचसतिमुने
स्तात्पर्येकेतोर्लग्नस्यअस्मिन्ग्रंथेविशेषतः कारकात्फलादेशेकर्तव्येकारकान्विवक्षुरादावात्मकारकंदर्शयति
रव्यादिशन्यंतानांसप्तानांराह्वंतानामष्टानांवामध्येयोनभोगोग्रहःकलादिभिःकलायाआदयोंशास्तैरंशैः अं
शादिभिरितियावत् अधिकःसआत्माआत्मकारकइत्यर्थः अंशपदंविहायकलादिपदेननिर्देशस्त्वंशसाम्ये
पिकलादिकाधिक्येनविनिर्णेतव्यमितिज्ञापनार्थंकलादिभिरपिसाम्येवक्ष्यमाणबलेनैकतरनिर्णयः तत्रद्वि

विपरीतंकेतोः १० आत्माधिकःकलादिभिर्नभोगःसप्तानामष्टानांवा ११

त्र्यादिग्रहाणामंशादिसाम्येनकारकलोपेबलवत्स्थिरकारकादेवतत्तत्कारकविचारःकर्तव्यइति ननुआत्मा
धिकःकलादिभिर्नभोगोष्टानामित्येवपाठोऽस्तुलाघवात्उच्यते तत्राधिकपदस्यनिविष्टत्वाद्राहोरस्तुसर्वग्रहां
शन्यूनांशतयात्मकारकतेतिसूचनायाष्टानांवेतिपृथगुक्तिःननुकथंज्ञातामितिचेत् राहोर्विपरीतंसंचाराल्न्यून ॥ ३ ॥
त्वेनाधिक्यात् नभोगोष्टानामितिपाठेत्वन्यग्रहरीत्याराहोरप्याधिक्यंप्रतीयेतद्वित्राणांग्रहाणांब्रह्मत्वयोगेप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सक्तेराहुयोगेविपरीतमितिसूत्रेणराहोर्योगेनापिन्यूनांशस्यब्रह्मत्वं स्वस्यतुसुतरामिवाल्पांशत्वेनकारकत्वंभवतीत्यर्थः अत्रवृद्धसंमतिः भागाधिकःकारकःस्यादल्पभागोंत्यकारकःमध्यांशोमध्यखेटःस्यादुपखेटःसएवहीति नचवृद्धवाक्याद्राहोर्न्यूनांशकत्वेनात्मकारकत्वंनायातीतिवाच्यंशास्त्रप्रसिद्धतयाबालानामपितथैवबोधाद्विविच्यनोक्तं अत्रवृद्धवाक्यांतरंच मेषाद्यसव्यमार्गेणराहुकेतूनकारकौ अस्यार्थः राहुकेतूमेषाद्यसव्यमार्गेणसव्यंवामंअसव्यंदक्षिणंतुअसव्यमार्गेणमेषादिक्रममार्गेणकारकौनविपरीतमार्गेणतुभवतएवेतिफलितार्थः अत्रराशिकृतमाधिक्यंनग्राह्यमितिसंप्रदायः अथवाअंशादिभिर्ग्रहद्वयसाम्येसप्तमकारकाभावेराहुरपिग्राह्यःतस्मादष्टानांवेतिगौणः कल्पोनिरुक्तः यत्तुप्रेमनिधिपंथैर्विपरीतंकेतोरितिसूत्रंदेहलीदीपकन्यायेनात्रान्वेतीत्युक्तंतदयुक्तं रव्यादिक्रममनादृत्यादौकेतुनिरूपणस्यायोग्यत्वात् राहोरंशाधिक्येनकारकताकेतोस्तुन्यूनांशत्वेनकारकतेतिबाधितत्वाच्चराहोरधिकांशत्वेसतिकेतोरपितथात्वात् नवानामितितुकथंनोक्तमितिचेत् राहुकेत्वोरंशादिसाम्येनकारकांतराभावादष्टानामित्येवोचितमित्यलमतिविस्तरेण ११ आत्मकारकस्योत्कर्षदर्शयति सआत्मकारकोबंधमोक्षयोरीष्टेस्वामीभवतिनीचराशिपापयोगोच्चादिराशिशुभयोगैरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिशेषः नीचपापयुक्तःकारकः स्वदशांतर्दशासुबंधनादिदुःखदःस्यात् उच्चादिशुभयुतस्तुग्रहांतरबलेनब द्धस्यापिमोक्षणकर्त्ताभवति यद्वाप्रतिकूलकःआत्मकारकःपापकर्मप्रवृत्तिद्वारासंसाररूपबंधनदःस्यात् अ नुकूलस्तुज्ञानकाशीवासादिभिर्मोक्षकर्तास्यादित्यर्थः १२ अमात्यकारकमाह तस्यात्मकारकस्यअनुपश्चात्स रणाद्गमनान्न्यूनांशतयाऽमात्यः अमात्यकारकोभवतीति १३ भ्रातृकारकमाह तस्यामात्यकारकस्यानुसरणा

सईष्टेबंधमोक्षयोः १२ तस्यानुसरणादमात्यः १३ तस्यभ्राता १४
तस्यमाता १५ तस्यपुत्रः १६ तस्यज्ञातिः १७ तस्यदाराश्च १८

दल्पांशतयाभ्रातृकारकःस्यात् १४ मातृकारकमाह भ्रातृकारकादल्पांशोग्रहोमातृकारकोभवति १५ पुत्रका रकमाह मातृकारकान्न्यूनांशःपुत्रकारकइति १६ ज्ञातिकारकमाहपुत्रकारकादल्पांशोज्ञातिकारकइति १७ दाराकारकमाह ज्ञातिकारकान्न्यूनांशःस्त्रीकारकः तस्यदाराइत्यनेनैवसिद्धेचकारोनुक्तसमुच्चयार्थःसमस्थि रकारकपदोपपदादिभ्योपिस्त्रीविचारःकार्य्योनतुदारकारकादेवेतिसूचयति १८ पुत्रकारकविकल्पमाह मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृकारकात्पुत्रकारकविचारः कार्यइतिकेचनाचार्यावदंतिकारकद्वयैक्यंवदंतीतियावत् १९ अथनित्यकार
कान्वक्तुमुपक्रमतेतत्रादौभगिन्यादिकारकान्दर्शयति आरतोभौमाद्भगिनीसामान्यंश्यालःस्त्रीभ्राताकनीया
न्कनिष्ठभ्राताजननीमाताएतेविचारणीयाइत्यर्थः २० मातुलादिकारकमाह उत्तरतोभौमाग्रिमाद्बुधात् मातुल
भ्रातृभगिन्यादयोबंधवोमातृसजातीयामातृसपत्न्यश्चविचारणीयाः २१ पितामहादिकारकमाह गुरुमुखा

मात्रासहपुत्रमेकेसमामनंति १९ भगिन्याऽऽरतःश्यालःकनीयाञ्जननीचेति २० मातुलादयोबंधवोमातृसजातीयाइत्युत्तरः २१ पितामहःपतिपुत्राविति गुरुमुखादेवजानीयात् २२ पत्नीपितरौश्वशुरौमातामहाइत्यंतेवासिनः २३

देवगुर्वादिभ्यएवक्रमेणपितामहपतिपुत्राइतिजानीयाद्विचार्याइत्यर्थः नचैवंचेदग्रिमसूत्रेपत्नीपतिःपितरावि
तिवाच्यं मंदात्पुत्रइतितृतीयसूत्रोपादानापेक्षयातथैवसुवचत्वात् उर्वरितंत्वग्रिमसूत्रेनिबद्धंअन्यथामुखपदं
व्यर्थमेवस्यादिति २२ पत्न्यादिषुशुक्रकारकमाह अंतेवासिनःगुर्वग्रेपठिताच्छुक्रात् भार्यामातृपितृश्वशुरश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रूमातामहाविचार्याइत्यर्थः २३ ननुकारकत्वेनद्वित्रादिग्रहसन्निपातेकमालंब्यविचारइतिसंदेहेकलाधिक्य वतस्तत्रापिसाम्येनिसर्गबलवतःकार्यइतिरीतिस्तस्माद्ग्रहाणांनिसर्गबलंसूचयति मंदःशनिःसप्तसुग्रहेष्व ज्यायान्दुर्बलः तथाचबृहज्जातके शकुबुगुशुचराद्यावृद्धितोवीर्यवंतइति तथाचनिसर्गबलेशन्यादयः उत्त रोत्तरंबलिनइत्यर्थः २४ अथचरदशावर्षानयनोपयोगितयौजयुग्मराशिभेदेनगणनामुपदिशति विषमभेषु मेषमिथुनादिराशिषुप्राचीवृत्तिः क्रमगणनास्यात् मेषवृषादिरीत्यागणनास्यादितियावत् २५ उत्तरेषुसमरा

मंदोऽज्यायान्ग्रहेषु २४ प्राचीवृत्तिर्विषमभेषु २५ परावृत्त्योत्तरेषु २६ नक्कचित् २७

शिषुवृषकर्कादिषुपरावृत्त्याव्युत्क्रमेणवृषमेषमीनादिक्रमेणगणनाभवतीत्यर्थः २६ अत्रापवादमाह ओजरा शिषुक्वचिन्नक्रमःयुग्मराशिषुक्वचिद्व्युत्क्रमोनेत्यर्थःकुत्रेत्याकांक्षायांपरंपराश्रुतार्थेनचिरंतनैरुक्तंक्रमाद्वृषेवृश्चि केचव्युत्क्रमात्कुंभासिंहयोरितिसूत्रत्रयफलितार्थसंग्रहस्त्वयंमेषादित्रित्रिभैर्ज्ञेयं पदमोजपदक्रमात् दशाब्दा नयनेकार्यागणनाव्युत्क्रमात्समेप्राचीवृत्तिर्विषमपदेपरावृत्योत्तरेइतिकथंनोक्तामितिचेत् यावदीशाश्रयंपदमृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षाणामितिवक्तव्यत्वात्संदेहभियानोक्तं तथाचमातृधर्मयोः सामान्यंविपरीतमोजकूटयोरितिवक्तव्यत्वाच्चेति २७ अथतत्तद्राशेर्दशाब्दानयनायावधिंदर्शयति अत्रराशीनांनाथाग्रंथांतरोक्ताग्राह्याः अत्रानुक्तत्वात् तथाहिक्षितिजसितज्ञचंद्ररविसौम्यसितावनिजाः सुरगुरुमंदसौरिगुरवश्चगृहांशकपाइति नाथानामवस्थानमै यत्येनचरदशोच्यतेकुत्रचरदशापदेनव्यवहारइतिचेत् जगत्तस्थुषोरर्द्धयोगार्द्धेइत्यादौगृहाणअत्रसमाःअब्दानाथांताः तत्तद्राशीनांतत्तद्राशिनाथाश्रितराशिपर्यंतंग्राह्याः इतिएवंचनाथेद्वितीयेएकाब्दस्तृतीयेद्वौइति

नाथांताःसमाःप्रायेण २८

क्रमेणद्वादशेनाथेएकादशाब्दाः तत्तद्राशौनाथेसतितुद्वादशाब्दाइतिविवेकः तदुक्तंप्राच्यैः तस्मात्तदीशपर्यंतंसंख्यामत्रदशांविदुःवर्षद्वादशकंतत्रनचेदेकंविनिर्दिशेत् अस्यार्थः तत्तद्राशौनाथेस्थितेसतिद्वादशवर्षाणि असतितुएकाब्दोग्राह्यइति अतएवप्रायेणेतिपदेननाथांताःसमाइत्यस्यापवादःसूचितःप्रायेणेत्यनेनैवस्वामिनउच्चत्वनीचत्वाभ्यामेकैकवर्षवृद्धि-ह्रासावपिसूचितावेववृश्चिककुंभयोर्द्विनाथत्वमपिसूचितमेवतदुक्तंवृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्धैः उच्चखेटस्यसद्भावेवर्षमेकंविनिक्षिपेत् तथैवनोच्चखेटस्यवर्षमेकंविशोधयेदितिअत्रवृश्चिककुंभयोर्विशेषो
वृद्धैरुक्तः कुजसौरीकेतुराहूराजानावालिकुंभयोः कुजसौरीकेतुराहूयुक्तौतत्रास्थितौयदि वर्षद्वादशकंतत्रनचेदे
कंविनिर्दिशेत् अयमर्थः वृश्चिकस्यकुजकेतूराजानौनतुतयोरेकैकमपिकुंभस्यशनिराहूराजानौनत्वेकैकमपित
थाचद्वयोःसत्त्वेएववर्षद्वादशकं एकैकसत्त्वेस्वाम्यभावइवोक्तप्रकारेणदशाब्दगणनंकार्यमितिअन्यराशौतदु
भयसत्त्वेनाथांताइतिरीतिरनुसर्तव्यातयोर्भिन्नभिन्नराशिगत्वेयएवनाथोबलवांस्तत्संख्याग्राह्या एतदुक्तंवृद्धैः
द्विनाथक्षेत्रयोरत्रनिर्णयःकथ्यतेधुना एकःस्वक्षेत्रगोन्यस्तुपरत्रयदिसंस्थितः तदान्यत्रस्थितंनाथंपरिगृह्यद
शांनयेत् स्वक्षेत्रेमिलितावेवस्वामिनस्त्वेकशस्तथा एकस्यस्वगृहस्थत्वंनहिकार्योपयोगिकं द्वावप्यन्यर्क्षगौ
तौचेत्सग्रहोबलवान्भवेत् ग्रहयोगसमानत्वेचिंत्यंराशिबलाद्बलं चरस्थिरद्विस्वभावाःक्रमात्स्युर्बलशालिनः
राशिसत्त्वसमानत्वेबहुवर्षोबलीभवेत्एकःस्वोच्चगतस्त्वन्यःपरत्रयदिसंस्थितःग्राहयेदुच्चखेटस्थंराशिमन्यंवि
हायवैनाथांताइतिरीत्यायोबहुवर्षवर्तीदशां करोतिबहुवर्षोसौस्वराशेर्दूरगःखगः एवंसर्वसमालोच्यजातस्यनि
धनंवदेदितिस्पष्टार्थाःश्लोकाः एकःस्वोच्चेत्यस्यार्थः यदितुबहुवर्षदएकोराजापरक्षेत्रगः अपरस्तुराजाऽन्यक्षेत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गएवोच्चगोल्पवर्षदस्तदाबहुवर्षदंत्यक्त्वाऽल्पवर्षदमेवोच्चग्रहमाश्रित्यनाथांताइति रीत्याऽब्दानयनंकार्यमिति अन्यच्चवृद्धैरुक्तंन्यासयोर्ग्रहहीनत्वेवैकस्यान्येनसंयुतौ ग्राह्याराशिर्ग्रहाभावस्तत्स्वाम्युच्चंगतोयदिएकत्रस्वर्क्ष गः खेटश्चान्यत्रद्वौग्रहौयदि ग्रहद्वययुतिंहित्वाग्राहयेत्पूर्वभंसुधीरितिअयमर्थः न्यासयोःलग्नसप्तमयोर्द्वयोः स्थानयोःग्रहाभावेअथवाद्वयोर्मध्येएकस्यान्येनकेनचिद्ग्रहेणस्वेशातिरिक्तेनयुतौसत्यांचतत्रयोराशिन्र्यीये नानिर्बलःसराशिस्तद्राशीशेउच्चंगतेसतिबलवानेवनापरःसग्रहोपिएकत्रराशौस्वक्षेत्रगोग्रहः अपरत्रद्वौग्रहौ

यावदीशाश्रयंपदमृक्षाणाम् २९

स्तस्तदासस्वामिकराशिरेवबलवानितिद्वितीयपद्यतात्पर्यंउच्चराशेस्तुअजवृषभमृगांगनाकुलीराझषवणिजौ चदिवाकरादितुंगाः दशशिखिमनुयुक्तिथींद्रियांशैस्त्रिनवकविंशतिभिश्चतेऽस्तनीचाइतिपंचमेपदक्रमात्प्रा क्प्रत्यक्त्वमितिवक्ष्यमाणसूत्रात्क्रमभेदेनदशालेख्याआरंभावधिस्तुलग्नमेवचरदशायामत्रशुभःकेतुरितिसूत्रा दस्यादशायाश्चरदशेतिनामबोध्यम् २८ अथाग्रेफलविशेषज्ञापनायराशीनामारूढापरपर्यायंपदमुपदिशति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋक्षाणांराशीनांईशाश्रयंयावत्ईशाश्रयंराशिपर्यंतंयासंख्यातामीशाश्रयादग्रेप्रणीयतत्संख्यायस्मिन्राशौसमाप्तातद्राशिस्तद्ग्रहस्वामिकराशेःपदंस्यादित्यर्थःननुईशाश्रयादग्रेप्रणीयेत्यर्थःकथंउच्यतेयावच्चासावीशश्चयावदीशःयावदीशःआश्रयोयस्यतद्यावदीशाश्रयंपदमितिसमासाल्लब्धइतितदेववृद्धैरुक्तंलग्नाद्यावतिथेतिष्ठेद्राशौलग्नेश्वरःक्रमात् ततस्तावतिथंराशिंजन्मारूढंप्रचक्षतेलग्नाल्लग्नपतिर्यावद्राशिसंस्थस्ततःपुनः तावान्नृषिभिरारूढःकथितःसर्वशास्त्रतः यदालग्नाधिपोलग्नेसप्तमेवास्थितोयदि आरूढंलग्नमेवात्रनिर्दिशेत्कालवित्तमः

स्वस्थेदाराः ३० सुतस्थेजन्म ३१

इदंचश्लोकेनलग्नपदंनिरुक्तं पदांतराणामप्युपलक्षणंबोध्यं श्लोकाःस्पष्टार्थाः २९ अथारूढोदाहरणरूपंसूत्रद्वयमाह लग्नात्स्वस्थेचतुर्थस्थेलग्नस्वामिनिदाराः सप्तमस्थोराशिर्लग्नारूढंभवति ३० लग्नात्सुतस्थेसप्तमस्थेलग्नस्वामिनिजन्मलग्नमारूढंभवतीत्यर्थः यावदीशेतिसूत्रेणैवसिद्धे एतत्सूत्रद्वयमुदाहरणद्वारास्पष्टार्थंपठितमितियत्तु आद्यैःस्वस्थेदाराविचारणीयाःसुतस्थेभ्रातृजन्माविचार्यमित्युक्तंतदसंगतमेवप्रतिभातीति ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथात्रभावराशिबोधकपदानामन्यशास्त्रतोवैलक्षण्यमाशंक्याहभावाराशयश्चसवर्णाः वर्णेनसहिताः सवर्णाः एकादिसंख्याबोधकाक्षरगम्याःसर्वत्रग्रंथेननुसिद्धमन्यदितिवक्ष्यमाणत्वात् शिवतांडवादिग्रंथेषुकटपयादि वर्णैःसूचितसंख्याप्रसिद्धैवकिमर्थमिदंसूत्रमितिनचभावराशिग्रहसाधारण्येनबोधःस्यादितिवाच्यं भावराशी नांसंख्याप्राधान्यत्वाद्ग्रहाणांतुग्रहवाचकपदप्राधान्यत्वात्साधारण्येनबोधोनस्यात्किमर्थंसर्वत्रेतिसूत्रमित्याशं क्यवर्णपदराशिपरमेतादितिप्रकारांतरेणैतत्सूत्रंव्याख्यायते सर्वत्रसवर्णाभावाराशयश्चभावाराशयश्चसवर्णाः

सर्वत्रसवर्णाभावाराशयश्च ३२

वर्णेनवर्णदेनसहिताःसवर्णाभवंतिवर्णदापनप्रकारस्त्वित्थंवृद्धैरुक्तः ओजलग्नप्रसूतानांमेषादेर्गणयेत्क्रमात् युग्मलग्नप्रसूतानांमीनादेरपसव्यतःमेषमीनादितोजन्मलग्नांतंगणयेत्सुधीः तथैवहोरालग्नांतंगणयित्वाततःपरं पुंस्त्वेनस्त्रीतयावैतेसजातीयेउभेयदितर्हिसंख्येयोजयीतवैजात्येतुवियोजयेत् मेषमीनादितःपश्चाद्योराशिःस तुवर्णदः ओजयुग्मलग्नानुरोधेनयोजनशोधनोत्तरंद्वादशाधिकेरवि १२ तष्टंकृत्वायतस्थितंतन्मेषमीनादिक्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मव्युत्क्रमगणनयायोराशिर्लभ्यतेसवर्णदराशिरितिबोध्यंहोरालग्नभयोर्नेया दुर्बलाद्वर्णदादशा यत्संख्योवर्णदोलग्नात्तत्तत्संख्याक्रमेणतुक्रमव्युत्क्रमभेदेनदशास्यात्पुरुषस्त्रियोः लग्नाद्यसंख्याकोवर्णदराशिस्तत्तत्संख्याक्रमतः ओजयुग्मलग्नानुरोधेनप्रथमप्रवृत्तक्रमव्युत्क्रममर्यादयातत्तद्राशीनांदशास्यादितियथानाथांताइतिसूत्रेस्वस्वराशेर्नाथांतंवर्षाण्यानीतानि तथात्रलग्नादेवस्ववर्णदपर्यंतंवर्षाण्यानेयानीतिमेषमीनादितःपूर्वोक्तरीत्याधनभावादितत्तद्भावांतगणनांविधायपूर्ववत्करणे तत्तद्भाववर्णददशाराशयोभवंतीतिसर्वत्रेतिपदेनसूचितंनचवर्णदानयनंवर्णददशानयनंचसूत्रार्थान्नयातीतिवाच्यंसिद्धमन्यदितिसूत्रादन्यार्षशास्त्रप्रसिद्धत्वादत्रनोक्तंप्राचीनैःसंगृहीतामिति गुलिकोपितथैवयथावर्णदोराशिर्लग्नौजत्वयुग्मत्वभेदेनमेषमीनादिगणनयाजन्मलग्नहोरालग्नपर्यंतसंख्यावशतः समानीतस्तथैव भावलग्नमेवजन्मलग्नंविभाव्यभाववर्णदराशिरानेयइतिभावलग्नानयंनंवृद्धैरुक्तं सूर्योदयंसमारभ्यघटिकानांतुपंचकं प्रयातिजन्मपर्यंतभावलग्नंतथैवच तथासार्द्धद्विघटिकामितात्कालाद्विलग्नभात् प्रयातिलग्नंतन्नामहोरालग्नंप्रचक्षतइतिस्पष्टार्थौश्लोकौहोरालग्नस्पष्टीकरणंतुसार्द्धद्वयघट्याचेत्त्रिंशदंशालभ्यंतेतर्हिइष्टघट्याकिमितित्रैराशिकेनज्ञेयंभावलग्नंहोरालग्नंचजन्मलग्नाद्गणनीयमिति होरा ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लग्नानयनेजन्मलग्नेविषमेसतिसूर्यराशितोजन्मलग्नेसमेसतितुजन्मलग्नाद्गणयेत् सूर्योदयमारभ्ययावत्योहो
राइष्टकालपर्यंतंजातास्ताःसूर्याल्लग्नाद्वापरिगणनयांतिमंहोरालग्नंज्ञेयमितिप्राचीनाकारिकातोयमर्थोनायाती
तिवर्णदराशितःफलमुक्तंवृद्धैः पापदृष्टिःपापयोगोवर्णदस्यत्रिकोणके यदिस्यात्तर्हितद्राशिपर्यंतंतस्यजीवनं रु
द्रशूलेतथैवायुर्मरणादितिरूप्यते तथैववर्णदस्यापित्रिकोणेपापसंगमे वर्णदात्सप्तमाद्राशेःकलत्रादिविचिंतये
त् एकादशादग्रजंतुतृतीयात्तुयवीयसं पंचमेतनुजंविद्यान्मातरंतुर्यपंचमांपितुस्तुनवमान्मातुःपंचमाद्वर्णदस्यतु

नग्रहाः ३३ यावद्विवेकमावृत्तिर्भानां ३४

शूलराशिदशायांवैप्रबलायामरिष्टकं वर्णदराशेःपंचमात्प्रबलशूलदशायांमातुररिष्टंवर्णदराशिनवमात्प्रबल
शूलदशायांपितुररिष्टंजानीयादित्यर्थः ३२ अत्रापवादमाह प्रथमपक्षेभावाराशयश्चसवर्णाःसंख्याबोधकाक्ष
रगम्याइत्युक्तंग्रहास्तुनप्रसिद्धपदगम्याएवेत्यर्थः द्वितीयपक्षेभावाराशयश्चसवर्णाःवर्णदराशिसहिताइत्युक्तं
ग्रहास्तुवर्णदसहितानतथाचभावराशिवर्णदाभवंतिनग्रहाणामित्यर्थः३३अथांतर्दशाविभागंदर्शयति भानांरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीनांप्रतिराशियेदशाब्दाश्चरस्थिरादिदशासुसिद्धास्तेषांद्वादशविभागेनद्वादशराशीनामावृत्तिर्भवति एवंच द्वादशराशीनांविवेकपदबोध्यचतुश्चत्वारिंशदधिकशतसंख्याभवतीति तदुक्तंप्राच्यैः कृत्वार्कधाराशिदशांरांशे र्भुक्तिक्रमाद्वदेत् एवंदशांतर्दशादिकृत्वातेनफलंवदेदिति यत्तुउपस्थिततयादशारंभावधिःस्वस्वलग्नमेवेतिपंथै रुक्तंतन्नहोरालग्नभयोर्नेयादुर्बलाद्वर्णदादशेतिकारिकोक्तत्वात् एवंप्रतिराशिद्वादशद्वादशाब्दाइतिविवेकसं ख्यामहादशाभिप्रायेणापिसिद्ध्यतीतिअयमर्थोपिसूत्रसंमतएवएतदभिप्रायेणांतर्दशाविभागोवृद्धैरुक्तः एकैक

होरादयःसिद्धाः ३५ ॥ इति प्रथमाध्याये प्रथमःपादः ॥ १ ॥

भावस्यैकैकंवर्षेलग्नादिकल्पयेत् सापर्यायदशालग्नेयुग्मेतुव्युत्क्रमाद्वदेत् लग्नंयुग्मंयदातर्हिसम्मुखंतस्यचादि भमितिपर्यायदशाअंतर्दशेति यदालग्नंयुग्मराशिस्तदातस्यसंमुखंआदिराशिः यथावृषभस्यमेषइति ३४ प्रकृ तशास्त्रेवक्ष्यमाणसूत्रेकचिद्धोराद्रेष्काणाद्यपेक्षासत्त्वेनतदाकांक्षान्निवर्तयन्नाह होराद्रेष्काणादयःसिद्धाःशा स्त्रांतरप्रसिद्धमेषादिगणनयाप्रसिद्धाःनतुदृष्ट्यर्गलादिवद्गुप्ताः तदुक्तंवृद्धैः राशेरर्द्धंभवेद्धोराताश्चतुर्विंशतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मृताः मेषादितासांहोराणांपरिवृत्तिद्वयंभवेत्राशित्रिभागाद्रेष्काणास्तेचषट्त्रिंशदीरिताः परिवृत्तित्रयंतेषां मेषादेःक्रमशोभवेत् सप्तांशकास्त्वोजगृहेगणनीयानिजेशतःयुग्मराशौतुविज्ञेयाःसप्तमर्क्षाधिनायकात् नवांशे शाच्चरेतस्मात्स्थिरेतन्नवमादितः उभयेतत्पंचमादेरितिचिंत्यंविचक्षणैः द्वादशांशस्यगणनांतत्तत्क्षेत्राद्विनिर्दी शेदिति वस्तुतस्तुराशिप्राधान्याद्विलक्षणएवेतिध्येयम् ३५ इतिश्रीनीलकंठज्योतिर्विद्विरचितायांजैमिनिसूत्रव्याख्यायांसुबोधिन्यांप्रथमाध्यायस्यप्रथमःपादः ॥ १ ॥ अथात्मकारकाश्रयनवांशमालंब्यफलानिवक्तुमुप

अथस्वांशोग्रहाणाम् १ पंचमूषिकमार्जाराः २ तत्रचतुष्पादः ३

क्रमते अत्रकारकांशमधिकरोति अथानंतरंग्रहाणांरव्यादीनांमध्येस्वांशः आत्मकारकाश्रितोयोंशोनवांशस्तस्मात्फलंविचार्य्यमित्यर्थः १ कारकाश्रितमेषादिनवांशफलान्याह मेषःकारकांशश्चेन्मूषिकमार्जारादुःखदा भवंतीति २ वृषःकारकांशश्चेच्चतुष्पादःसुखदाभवंति मूषिकादयोदुःखदाश्चतुष्पादः सुखदाइत्यत्रैकरूपतयार्थोऽपेक्षितः कुतस्तुभिन्नरूपेणात्रबीजंकिमुच्यते वृद्धवाक्यमेवबीजंवृद्धवाक्यंतुवृषतौल्यंशकगतेतस्मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्वाणिज्यवान्भवेत् मेषसिंहांशकगतेब्रूयान्मूषकदंशनम् कारकेकार्मुकांशस्थेवाहनातपतनंभवेदिति ३ मिथु नेकारकांशेकंडूः शरीरस्थौल्यंचभवति ४ कर्केस्वांशेजलभयंकुष्ठरोगोभवति ५ सिंहांशश्चेत्श्वापदानि शुनकादयोदुःखदाभवंति ६ कन्याकारकांशश्चेन्मृत्युवन्मिथुनांशवद्भवति अग्निकणश्चअग्निकणेनदुःख दश्चभवति ७ तुलाकारकांशेवाणिज्यवान्स्यात् ८ अत्रवृश्चिकांशेजलसर्पादयोदुःखदाभवंति मातुःस्तन्यंदु

मृत्यौकंडूःस्थौल्यंच ४ दूरेजलकुष्ठादिः ५ शेषाःश्वापदानि ६ मृत्युवज्जायाग्निक णश्च ७ लाभेवाणिज्यं ८ अत्रजलसरीसृपाःस्तन्यहानिश्च ९ समेवाहनादुच्चाच्च क्रमात्पतनं १० जलचरखेचरखेटकंडूदुष्टग्रंथयश्चरिष्फे ११ तडागादयोधर्मे १२

ग्धंचशुष्यति ९ धनुषिकारकांशेवाहनादूर्ध्वप्रदेशाच्चक्रमात्किंचिद्वस्तुसंलग्नतयापतनंभवति नझटितीत्यर्थः १० मकरेकारकांशेजलचरामत्स्यादयः खेचराःपक्षिणःखेटाग्रहाएतेफलदाभवंति कंडूदुष्टग्रंथिरोगा श्चभवंति दुष्टग्रंथिर्गंडादिकं ११ कुंभेकारकांशेतडागादयः तडागवापीकूपादिकर्त्तारोभवंति १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मीनेकारकांशेधर्मेनित्यत्वंकैवल्यंमुक्तिश्चभवति कारकस्यांशादिगुणैः फलंवृद्धैःसंगृहीतंशुभराशौशुभांशेवा कारकांशेधनवान्भवेत् तदंशकेंद्रेषुशुभेराजानूनंप्रजायते कारकेशुभराश्यंशेलग्नांशस्थेशुभग्रहे उपग्रहस्यपाश्चात्त्येस्वोच्चस्वर्क्षशुभर्क्षगे पापदृग्योगरहितेकैवल्यंतस्यनिर्दिशेत् मिश्रेमिश्रंविजानीयाद्विपरीतेविपर्ययः तदंशकेंद्रेषुकारकाश्रितांशकुंडल्यांकेंद्रेष्वित्यर्थः पाश्चात्त्येअंत्यग्रहेइत्यर्थः मिश्रेपापशुभदृग्योगेमिश्रंस्वर्गवासः वि

उच्चेधर्मेनित्यताकैवल्यंच १३ तत्ररवौराजकार्यपरः १४ पूर्णेंदुशुक्रयोर्भोगीविद्याजीवीच १५ धातुवादीकौंतायुधोवन्हिजीवीचभौमे १६

परीतेपापमात्रदृग्योगसाहित्येविपर्ययः नमुक्तिर्नस्वर्गवासइति चंद्रभृग्वारवर्गस्थेकारकेपारदारिकः वृषतौल्यंशकगतेतस्मिन्वाणिज्यवान्भवेत् मेषसिंहांशकेतस्मिन्ब्रूयान्मूषिकदंशनम् कारकेकार्मुकांशस्थेवाहनात्पतनंभवेत् १३ अथकारकांशेग्रहस्थित्यादिनाफलान्युपदिशति कारकांशेसूर्येसतिराजकार्यतत्परोभवति १४ कारकांशेपूर्णेंदुशुक्रयोःसतोर्भोगीविद्याजीवीचस्यात् १५ कारशांशेभौमेसतिधातुवादीरसायनविद्यावान्बर्छीतिभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षयाप्रसिद्धायुधः वन्हिकृतजीवनवांश्चस्यात् १६ कारकांशेबुधेसतिवणिक्प्रभृतयोभवंति १७ कारकांशे गुरौसतिकर्मनिष्ठादयोभवंति १८ कारकांशेशुक्रेसतिराजाधिकारवंतःबहुस्त्रीस्पृहालवःशतवर्षजीविनश्चभवं ति शतंशतवर्षइंद्रियाणियेषामितिस्वामिनः पंथास्तुशतानिइंद्रियाणियेषामितिवदंति तन्नइंद्रियाणांशतत्वा

वणिजस्तंतुवायाःशिल्पिनोव्यवहारविदश्चसौम्ये १७ कर्मज्ञाननिष्ठावेदवि दश्चजीवे १८ राजकीयाःकामिनःशतेंद्रियाश्चशुक्रे १९ प्रसिद्धकर्माजीवःश नौ २० धानुष्काश्चौराश्चजांगलिकालोहयंत्रिणश्चराहौ २१ गजव्यवहारिण श्चौराश्चकेतौ २२ रविराहुभ्यांसर्पनिधनं २३ शुभदृष्टेसन्निवृत्तिः २४

दर्शनात् १९ कारकांशेशनौसतिलोकप्रसिद्धकर्मणाजीवेदित्यर्थः २० कारकांशेराहौसतिधानुष्काश्चौराश्च स्युःकिंवाजांगलिकालोहयंत्रिणश्चस्युःवैकल्पिकमिदंफलद्वयंकथमवगतमितिचेत् मध्येचकारोपादानादेवअ न्यसूत्रेष्वंत्यएवचकारउपात्तः अत्रमध्येकिमर्थमिति २१ कारकांशेकेतौफलमिदं २२ कारकांशेरविराहुस्थि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यासर्पान्मृतिर्भवति २३ शुभग्रहावलोकितेरविराहुयोगेसर्पान्मृतिर्नस्यात् २४ कारकांशगयोःरविराव्होः शुभमात्रयोगेसतिजांगलिकोविषवैद्योभवेत् मात्रशब्देनपापनिवृत्तिः २५ कारकांशगयोरविराव्होःकुजदृष्टौस त्यांस्वगृहदाहकोऽग्निदोवाभवति २६ कारकांशगतरविराव्होःशुक्रदृष्टौसत्यांगृहदाहकोनस्यात् किन्तु अ ग्निदानमात्रंकरोतीत्यर्थः २७ कारकांशगयोरविराव्होःगुरुदृष्टौसत्यांशुक्रदृष्टावसत्यामासमीपगृहात्समीपगृह

शुभमात्रसंबंधाज्जांगलिकः २५ कुजमात्रदृष्टेगृहदाहकःअग्निदोवा २६ शुक्रदृ ष्टेर्नदाहः २७ गुरुदृष्टेस्त्वासमीपगृहात् २८ सगुलिकेविषदोविषहतोवा २९

पर्य्यंतंदाहःस्यात् नस्वगृहमात्रस्य २८ कारकांशेगुलिकसहितेसतिपरस्मैविषदातावास्वयंविषेणहतोवास्या त् गुलिकानयनप्रकारस्तुवृद्धैरुक्तः रविवारादिशन्यन्तंगुलिकादिनिरूप्यते दिवसानष्टधाकृत्वावारेशाद्गण येत्क्रमात् अष्टमोंशोनिरीशःस्याच्छन्यंशोगुलिकःस्मृतः रात्रिमप्यष्टधाभक्त्वावारेशात्पंचमादितः गणयेदष्ट मःखंडोनिष्पत्तिःपरिकीर्तितःशन्यंशेगुलिकःप्रोक्तोगुर्वंशेयमघंटकः भौमांशेमृत्युरादिष्टोरव्यंशेकालसंज्ञकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौम्यांशोऽर्द्धप्रहरकःस्पष्टकर्मप्रदेशकः रव्यादिसप्तवारेषुदिनमानमष्टधाविभज्यतत्तद्वारेशंप्रथमखंडाधिपंकृ
त्वाऽग्रिमखंडेषुतत्तद्वारेशादग्रिमग्रहात्क्रमेणेशत्वेनजानीयादष्टमःखंडस्तुनिरीशः एवंचसप्तसुवारेषुशन्यंशो
गुलिकनामा तथाचरविवारेसप्तमः सोमेषष्ठः भौमेपंचमः बुधेचतुर्थः गुरौतृतीयः शुक्रेद्वितीयः शनौप्रथमः
खंडोगुलिकाभवंति सप्तस्वपिवारेषुरात्रिमानमष्टधाविभज्य तद्वारेशात्पंचमाद्याःखंडाधिपाःज्ञेयाःरात्रावप्यष्ट
मःखंडोनिरीशःएवंचरविरात्रौतृतीयःखंडः सोमेद्वितीयः भौमेप्रथमः बुधेसप्तमःगुरौषष्ठः शुक्रेपंचमः शनौ

चंद्रदृष्टौचौराऽपहृतधनश्चौरोवा ३०

चतुर्थःखंडोगुलिकाभवंति एवंसर्वेषुदिनेरात्रौचगुरुखंडोयमघंटनामाबुधखंडोऽर्द्धप्रहरकाख्यः रव्यंशः कालसं
ज्ञः भौमांशोमृत्युनामेतिज्ञेयंस्पष्टकर्मइति गुलिकादीनांस्पष्टीकरणंतुस्वस्वदेशलग्नप्रमाणानुसारेणतत्तत्खंड
कालान्तलग्नानिस्पष्टानिकृत्वागुलिकादिस्पष्टलग्नेकस्यांशोस्तिसएवकारकांशश्चेत्सगुलिकोजातइतिविवेचनी
यम् तथाचसंग्रहःतथाचरविवारादौदिनेगुलिकसंस्थितिः सप्तर्तुशरवेदत्रिद्विकुखंडेषुहिक्रमात् रात्रौत्रिद्विकु
सप्तर्तुपंचतुर्य्येषुतत्स्थितिरिति २९ सगुलिकेकारकांशेचंद्रदृष्टौसत्यांचौरैर्नीतधनःस्वयमेववाचौरःस्यात् ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सगुलिकेकारकांशेऽन्यग्रहादृष्टत्वेसतिबुधदृष्टेस्थूलवृषणोभवति ३१ सगुलिकेइतिपदंनिवृत्तंतत्रकारकांशेन वांशकुण्डल्यांकेतौसातिपापदृष्टेकर्णच्छेदःकर्णरोगोवाभवति ३२ सकेतौकारकांशेशुक्रदृष्टेसतिकयाचिद्यज्ञ क्रिययादीक्षितःस्यात् ३३ सकेतौकारकांशेबुधशनिदृष्टेनपुंसकःस्यात् ३४ सकेतौकारकांशेबुधशुक्रदृष्टेपुनः

बुधमात्रदृष्टेबृहद्बीजः ३१ तत्रकेतौपापदृष्टेकर्णच्छेदःकर्णरोगोवा ३२ शु क्रदृष्टेदीक्षितः ३३ बुधशनिदृष्टेनिर्वीर्य्यः ३४ बुधशुक्रदृष्टेपौनःपुनिकोदा सीपुत्रोवा ३५ शनिदृष्टेतपस्वीप्रेष्योवा ३६ शनिमात्रदृष्टेसंन्यासा भासः ३७ तत्ररविशुक्रदृष्टेराजप्रेष्यः ३८ रिःफेबुधेबुधदृष्टेवामन्दवत् ३९

पुनरुक्तवचनवक्तादासीपुत्रोवास्यात् ३५ सकेतौकारकांशेखेटांतरेणदृष्टेपिशनिदृष्टेतपस्वीप्रेष्योवास्यात् ३६ सकेतौकारकांशेखेटांतरेणादृष्टेसंन्यासाभासः नपूर्णसंन्यासइत्यर्थः केतावितिनिवृत्तम् ३७ कारकांशेरवि शुक्राभ्यांदृष्टेराजभृत्योभवति ३८ अथकारकांशाद्दशमांशमवलंब्यविचारयति कारकांशाद्दशमेबुधेसतिबुधदृष्टे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 वासतिमंदवत् शनिवत् प्रसिद्धकर्माजीवः शनाविति सूत्रोपात्तं फलंभवतीति ३९ कारकांशाद्दशमेबुधेतरशुभग्र
हदृष्टेस्थिरोभवति नचंचलः बुधेतरशुभदृष्टत्वंकथंज्ञातमितिचेत् बुधदृष्टिफलस्योक्तत्वादेव ४० कारकांशा
 द्दशमेरवौसतिखेटांतरादृष्टेगुरुमात्रदृष्टेगोरक्षकोभवति ४१ कारकांशाच्चतुर्थफलमाह कारकांशाच्चतुर्थेचन्द्र
शुक्रदृष्टियोगाभ्यांप्रासादवान्भवति ४२ कारकांशाच्चतुर्थस्थितेउच्चराशिगतग्रहेपिप्रासादवान्भवति ४३

शुभदृष्टेस्थैर्यः ४० रवौगुरुमात्रदृष्टेगोपालः ४१ दारेचन्द्रशुक्रदृग्योगात्प्रासा दः ४२ उच्चग्रहेपि ४३ राहुशनिभ्यांशिलागृहं ४४ कुजकेतुभ्यामैष्टकम् ४५ गुरुणादारवं ४६ तार्णरविणा ४७ समेशुभदृग्योगाद्धर्मनित्यःसत्यवादीगुरु भक्तश्च ४८ अन्यथापापैः ४९ शनिराहुभ्यांगुरुद्रोहः ५०

कारकांशाच्चतुर्थस्थितेराहुशनिभ्यांशिलानिर्मितंगृहंभवति ४४ इदंसूत्रत्रयंराहुशनिभ्यामितिसूत्रेणैवकृतव्या
ख्यानम् अथकारकांशान्नवमांशफलमाह ४५ ४६ ४७ कारकांशान्नवमेशुभदृष्टियोगाभ्यांधर्मनिरतत्वा
दिमान्भवति ४८ नवमेपापदृष्टियोगाभ्यांधर्मानित्यत्वादिरहितोभवति ४९ नवमस्थाभ्यांशनिराहुभ्यांतद्द्रष्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्यांवागुरुद्रोहः ५० नवमेगुरुरविदृग्योगाभ्यांगुरावविश्वासोभवति ५१ कारकांशान्नवमेशुक्रभौमान्य तरषड्वर्गेसतिपरस्त्रीसक्तःस्यात् ५२ नवमेशुक्रभौमान्यतरषड्वर्गेसतिषड्वर्गापेक्षयाऽधिकाभ्यांशुक्रभौ मदृष्टियोगाभ्यांमरणपर्यंतंपारदारिकोभवति ५३ कारकांशान्नवमेकेतोर्दृष्टियोगाभ्यांप्रतिबन्धः आमरणं

गुरुरविभ्यांगुरावविश्वासः ५१ तत्रभृग्वंगारकवर्गेपारदारिकः ५२ दृग्यो गाभ्यामधिकाभ्यामामरणं ५३ केतुनाप्रतिबन्धः ५४ गुरुणास्त्रैणः ५५ राहुणार्थनिवृत्तिः ५६ लाभेचन्द्रगुरुभ्यांसुंदरी ५७ राहुणाविधवा ५८

पारदारिकत्वस्यानिवृत्तिर्भवति ५४ नवमस्थितेनवमद्रष्ट्रावागुरुणास्त्रीलोलः ५५ नवमस्थेननवमद्रष्ट्रावारा हुणापरस्त्रीसंगनिवृत्तिर्द्रव्यनाशःस्यात् ५६ अथकारकांशात्सप्तमफलमाह अत्रदृक्पदंनिवृत्तं नवमप्रकरण स्यसमाप्तत्वात् कारकांशात्सप्तमेचंद्रगुर्वोर्योगेसतिस्त्रीसुंदरीभवति ५७ सप्तमेराहुयोगेविधवास्त्रीगृहेभवति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ५८ स्पष्टं ५९ अलक्षणांगीत्यर्थः ६० सप्तमेरवियोगेस्वकुलेभर्तृकुलेगुप्तारक्षितास्थितास्यादामरणंनतुस्वातं
त्र्येणेतस्ततोऽटनशीलाचकाराद्विकलांगीच ६१ गीतवाद्यादिषुकुशला ६२ कारकांशाच्चतुर्थेचंद्रेसतिपू
 र्वोक्तयोगेषुसत्सु अनाच्छादितेदेशेप्रोक्तःस्त्रीप्रथमसंगइत्यर्थः कारकांशात्सप्तमेधनुषिचंद्रेइतिवार्थः ६३

शनिनावयोधिकारोगिणीतपस्विनीवा ५९ कुजेनविकलांगी ६० र
विणास्वकुलेगुप्ताच ६१ बुधेनकलावती ६२ चापेचंद्रेणानावृत्तेदे
शे ६३ कर्मणिपापेशूरः ६४ शुभेकातरः ६५ मृत्युचिंतयोःपापेकर्षकः
६६ समेगुरौविशेषेण ६७ उच्चेशुभेशुभलोकः ६८ केतौकैवल्यं ६९

कारकांशात्तृतीयफलमाह कारकांशात्तृतीयेपापेसतिशूरःस्यात् ६४ तृतीयेशुभेकातरः ६५ तृतीयषष्ठयोः
फलमाह कारकांशात्तृतीयषष्ठयोर्द्वयोरपिसपापत्वेकृषीवलःस्यात् ६६ नवमेगुरौविशेषेणकृषीवलः ६७
अथकारकांशाद्द्वादशेफलमाह द्वादशेशुभेसतिशुभलोकप्राप्तिः ६८ कारकांशेशुभेसतिमुक्तिरित्यर्थः अथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाकारकांशात्द्वादशेकेतौसतिमुक्तिरितिवार्थः ६९ कारकांशेमेषेधनुषिवातत्रशुभेसतिविशेषेणमुक्तिःसायु ज्यमुक्तिरित्यर्थः अथवामेषेधनुषिवाद्वादशेकेतौसतिसायुज्यमुक्तिरितिवस्तुतस्तुशुभापेक्षयाकेतोःसायुज्यमु क्तिदातृत्वायोग्यत्वात्प्रथमव्याख्यैवसमुचितेतिबोध्यं नचसूत्रकारेणकेतोः शुभत्वमुक्तंकेतोश्चेच्छुभत्वंस्या त्तर्हिचरदशायामत्रशुभःकेतुरितिवक्ष्यमाणसूत्रोत्तरदशायामेवशुभःकेतुरन्यत्रनेत्यर्थोवगम्यतइति ७० कार

क्रियचापयोर्विशेषेण ७० पापैरन्यथा ७१ रविकेतुभ्यांशिवेभक्तः ७२ चंद्रे णगौर्य्यां ७३ शुक्रेणलक्ष्म्यां ७४ कुजेनस्कंदे ७५ बुधशनिभ्यांविष्णौ ७६ गुरुणासांबशिवे ७७ राहुणातामस्यांदुर्गायांच ७८ केतुनागणेशेस्कंदेच ७९

कांशात्द्वादशेकारकांशेचपापयोगेननशुभलोकोनमुक्तिरित्यर्थः ७१ अमात्यदासेचैवमितिपर्यंतंकेताविति पद मनुवर्ततेकारकांशेरविकेतुभ्यांमिलिताभ्यांस्थिताभ्यांशिवेभक्तिर्भवति अग्रेप्येवमेवयोजना ७२ एवंस्पष्टम् ७३ ७४ ७५ ७६ ७७ ७८ तामस्यांभूतादिदेवतायांचेति ७९ कारकांशेपापराशौशनौसतिकर्णपिशाचा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 दिषुभक्तिः ८० कारकांशेपापराशौशुक्रेतथैव ८१ आत्मकारकग्रहान्न्यूनांशोग्रहःअमात्यस्तस्माद्योदासो
रव्यादिगणनयाषष्ठोग्रहस्तस्मिन्पापर्क्षेकारकांशेसतिक्षुद्रदेवताभक्तिरित्यर्थः पंथास्तुअयमर्थःसूत्रसंमतश्चे
 त्पापर्क्षेमंदशुक्रामात्यदासेषुक्षुद्रदेवतास्थितिसूत्रंप्रणीतंस्यादितिवदंति तन्न एवंचेन्मंदशुक्रामात्यदासेषुमि
लितेषुपापर्क्षेसत्सुक्षुद्रदेवताभक्तिरित्यर्थःस्यात् भवतितुएतेषामन्यतरस्यापिपापर्क्षस्थित्याक्षुद्रदेवताभक्तिरित्त

पापर्क्षेमंदेक्षुद्रदेवतासु ८० शुक्रेच ८१ अमात्यदासेचै
वम् ८२ त्रिकोणेपापद्वयेमांत्रिकः ८३ पापदृष्टेनिग्राहकः
८४ शुभदृष्टेनुग्राहकः ८५ शुक्रेंदौशुक्रदृष्टेरसवादी ८६

स्माद्योगविभागएवोचितइति ८२ कारकांशात्पंचमनवमयोःपापद्वयेक्रमेणस्थितेसतिमांत्रिकः मंत्रवेत्ताभ
वति ८३ त्रिकोणद्वयेसपापेपापदृष्टौभूतादीनांनिग्रहकर्तास्यात् ८४ त्रिकोणद्वयेशुभदृष्टेनुग्राहकःत्रिकोणे
सपापेशुभदृष्टेऽनुग्राहकः लोकेषुअनुग्रहकर्तास्यात् ८५ ॥ कारकांशेचंद्रेशुक्रदृष्टेसतिरसवादीभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वति ८६ शुक्रेंदौबुधदृष्टेसतिवैद्योभवति ८७ कारकांशाच्चतुर्थेचंद्रेशुक्रदृष्टेसतिश्वेतकुष्ठीभवति ८८ चाप गेचंद्रेकुजदृष्टेमहारोगःकुष्ठीभवति ८९ अर्थःप्राग्वत् ९० कारकांशाच्चतुर्थेपंचमेवाययथायोगंकुजराहूचे त्तस्तर्हिक्षयरोगोभवति ९१ उक्तस्थानगयोःकुजराव्होश्चंद्रदृष्टौसत्यांनिश्चयेनक्षयरोगः चंद्रदृष्ट्यभावे

बुधदृष्टेभिषक् ८७ चापेचंद्रेशुक्रदृष्टेपांडुश्वित्री ८८ कुजदृष्टेमहारोगः ८९ केतु दृष्टेनीलकुष्ठम् ९० तत्रमृतौवाकुजराहुभ्यांक्षयः ९१ चंद्रदृष्टौनिश्चयेन ९२ कुजेनपिटकादिः ९३ केतुनाग्रहणीजलरोगोवा ९४ राहुगुलिकाभ्यांक्षुद्रविषाणि ९५ तत्रशनौधानुष्कः ९६ केतुनाघटिकायंत्री ९७ बुधेनपरमहंसोलगुडीवा ९८

क्षयःस्वल्पःचंद्रदृष्टौप्रबलइतिभावः ९२ तत्रमृतौवास्थितेनकुजेनपिटकादिर्भवति ९३ तत्रमृतौवाकेतुश्चे त्संग्रहणीजलोदराद्यारोगाभवन्ति ९४ तत्रमृतौवाराहुगुलिकौयदितर्हिमूषिकादिविषाणिभवंति ९५ मृता विति निवृत्तंकारकांशेचतुर्थेशनौधनुषिनिपुणः ९६ तत्रकेतुश्चेत्घटिकायंत्रीभवति ९७ तत्रबुधेसतिपरम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हंसोलगुडीवा अत्रसर्वत्रापितत्रेतिपदमन्वेति ९८ ९९ १०० १०१ कारकांशेतत्पंचमांशेवायथायोगं चंद्रगुरूचेद्ग्रंथकर्ताभवति १०२ कारकांशेतत्पंचमेवाचंद्रशुक्राभ्यांकिंचिदूनंग्रंथकर्तृत्वंस्यात् ननुअयमर्थस्त्वयाकथंलब्धइतिचेत्केवलशुक्रेणाग्रेफलस्यवक्तव्यत्वात् नचग्रंथकर्तृत्वेकिंचिदूनत्वंकव्यादित्वंचभवतीतिवाच्यं एवंचेत्शुक्रेणकिंचिदूनंग्रंथकृत्कविर्वाग्मीकाव्यज्ञश्चेतिसूत्रंप्रणीतंस्यात् तस्मादयमेवार्थः सूत्र

राहुणालोहयंत्री९९रविणाखड्गी१००कुजेनकुंती१०१मातापित्रोश्चंद्रगुरुभ्यांग्रंथकृत्१०२शुक्रेणकिंचिदूनं१०३बुधेनततोपि१०४शुक्रेणकविर्वाग्मीकाव्यज्ञश्च१०५गुरुणासर्वविद्ग्रांथिकश्च१०६नवाग्मी१०७विशिष्यवैयाकरणोवेदवेदांगविच्च१०८

संमतः नचसमासांतःपतितपदानामेकांशानुवृत्तेरनौचित्यमितिवाच्यं अस्मिन्ग्रंथेत्वियंरीतिरस्त्येवेति १०३ कारकांशेतत्पंचमेवाचंद्रबुधाभ्यांशुक्रयोगापेक्षयापिन्यूनग्रंथकर्तृत्वंस्यात् १०४ मातापित्रोरेकत्रानुक्तयोगेकव्यादिःस्यात् १०५ अर्थःपूर्ववत् १०६ वक्तृत्वंनेत्यर्थःपुनरपिगुरोरेवफलमाह १०७ स्पष्टम् १०८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तस्थानगेनमंदेनसभाजाड्यं १०९ स्पष्टम् ११० स्पष्टम् १११ स्पष्टम् ११२ स्पष्टम् ११३ सूत्रंस्पष्टम् ११४ पूर्वोक्तयोगेगुरुदृष्टिगुरुषड्वर्गसंबंधेसतितत्तच्छास्त्रसंप्रदायज्ञोभवति ११५ कारकांशात्द्वितीयेपिचंद्रगुर्वादिपूर्वोक्तयोगेनग्रंथकर्तृत्वादिपूर्वोक्तंफलंस्यादित्यर्थः ११६ कारकांशात्तृतीयेपिपूर्वोक्तग्रहयोगेनग्रंथकर्तृ

सभाजडःशनिना १०९ बुधेनमीमांसकः ११० कुजेननैयायिकः १११ चंद्रेणसांख्ययोगज्ञःसाहित्यज्ञोगायकश्च ११२ रविणावेदांतज्ञोगीतज्ञश्च ११३ केतुनागणितज्ञः ११४ गुरुसंबंधेनसंप्रदायसिद्धिः ११५ भाग्येचैवं ११६ सदाचैवमित्येके ११७ भाग्येकेतौपापदृष्टेस्तब्धवाक् ११८ स्वपितृपदाद्भाग्येरोगयोःपापेसाम्येकेमद्रुमः ११९

त्वादिफलमूह्यमित्येके ११७ कारकांशात्द्वितीयेकेतौपापदृष्टेसतिस्तब्धवाक्किंचित्संलग्नवचनःकिंवाप्रत्युत्तरदानेझटित्यसमर्थवाणीकःस्यात् ११८ स्वीयजन्मलग्नाज्जन्मलग्नारूढाद्वाद्वितीयाष्टमयोराश्योःकेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 लौपापौस्तः सग्रहत्वेपिशुभपापान्यतरैकग्रहत्वेनद्विग्रहवत्त्वादिनासमसंख्यौचेत्स्तस्तदाकेमद्रुमयोगोभवति
ननुस्वशब्देनकारकांशबोधःकथंनउच्यते स्वशब्दकारकांशबोधकश्चेत्पितृपदादितिवाक्यादेवतल्लाभेपुनरुपा
 दानंव्यर्थंस्यात् स्वशब्दाभावेपितृपदात्कारकांशात्कारकांशारूढादयमर्थःस्यात् अपेक्षितस्तुजन्मलग्नाल्लग्ना
रूढाद्वेति स्वशब्देनतुस्वीयलग्नाल्लग्नारूढाद्वेत्यर्थोभवतीति अयमेवार्थः परंपराश्रुतत्वात्प्राचीनैरुक्तः आ
रूढाज्जन्मलग्नाद्वापापौस्त्रीहानिगौयदि केवलौसग्रहत्वेपिसमसंख्यौशुभाशुभौ चंद्रदृष्टौविशेषेणयोगःकेम

चंद्रदृष्टौविशेषेण १२० सर्वेषांचैवपाके १२१॥ इतिप्रथमाध्यायस्यद्वितीयःपादः॥२॥

द्रुमोमतइति यत्तुकारकलग्नरूढेभ्यइतिस्वामिभिरुक्तं तद्वृद्धसंमतंनेति ११९ प्रोक्तयोगेसतिद्वितीयाष्टमयो
श्चंद्रदृष्टौसत्यांविशेषेणकेमद्रुमोदरिद्रयोगोभवति ननुपूर्वोक्तफलानिकिंसर्वदाभवंति आहोस्वित्कालविशेषे
इत्याह १२०सर्वेषांराशीनांपाकेदशायांएवंपूर्वोक्तानिफलानिभवंति अथवासर्वेषांराशीनांपाकेचदशारंभका
लेपिएवंपूर्वोक्तकेमद्रुमयोगविचारःकार्यःकेमद्रुमेसतिदशायांदारिद्र्यंस्यादिति १२१इतिजैमिनिसूत्रप्रथमाध्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्यद्वितीयपादव्याख्यानं ॥ २ ॥ ॥ अथारूढकुंडलीग्रहानत्रलंब्यफलानिवक्तुंपदमधिकरोति अथैत दनंतरंयावदीशाश्रयंपदमृक्षाणामितिसूत्रलक्षितमारूढापरपर्यायंपदमधिक्रियते अथैकादशस्थानफलमाह १ लग्नपदादेकादशेसग्रहेग्रहांतरदृष्टेसतिलक्ष्मीवंतोभवंति २ एकादशस्थाग्रहाएकादशद्रष्टारश्चग्रहायदिशुभा स्तर्हिन्यायमार्गाल्लाभःस्यात् ३ पापग्रहाश्चेदेकादशस्थाद्रष्टारश्चतर्ह्यमार्गेणशास्त्रविरुद्धमार्गेणलाभोमिश्रैर्मिश्रो

अथपदं १ व्ययेसग्रहेग्रहदृष्टेश्रीमंतः २ शुभैर्न्या य्योलाभः ३ पापैरमार्गेण ४ उच्चादिभिर्विशेषात् ५

लाभइतिज्ञेयम् ४ उच्चस्वगृहादिस्थग्रहयोगादिनाविशेषप्राप्तिः उच्चादिगुणवद्भ्यांशुभपापाभ्यांन्यायादन्या याच्चविशेषतोलाभइत्यर्थः वृद्धैरप्युक्तम् आरूढाल्लाभभवनंग्रहःपश्येत्तुनव्ययम् यस्यजन्मनिसोपिस्यात्प्रब लोधनवानपि द्रष्टृग्रहाणांबाहुल्येतदाद्रष्टरितुंगगे सार्गलेचापितत्रापिबन्हर्गलसमागमे शुभग्रहार्गलेतत्रत त्राप्युच्चग्रहार्गले सुखानिस्वामिनादृष्टेलग्नभाग्याधिपोनवा जातस्यपुंसःप्राबल्यंनिर्दिशेदुत्तरोत्तरमिति को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिग्रहोयदिद्वादशंनपश्यतीति ५ अथपदात्द्वादशफलमाह द्वादशेग्रहसत्त्वेग्रहांतरदृष्टौभूयान्व्ययइत्यर्थः शुभग्रहेसद्व्ययः पापेऽसद्व्ययइति ६ पदात्द्वादशेरविराहुशुक्रैर्व्ययस्तैःसमस्तैर्वाराजमूलोव्ययः स्यात् ७ द्वादशगेरव्यादौचंद्रदृष्टिश्चेन्निश्चयाद्राजमूलोव्ययः चंद्रदृष्ट्यभावेतुसंदिग्धइति ८ बुधेद्वादशगेज्ञातिनिमित्तात्झटकाद्वाद्रव्यव्ययः ९ गुरुर्द्वादशेचेत्करव्याजेनव्ययः १० द्वादशेकुजशनीचेद्भ्रात्रादिद्वाराव्ययः अ

नीचग्रहदृग्योगाद्व्ययाधिक्यम् ६ रविराहुशुक्रैर्नृपात् ७ चंद्रदृष्टौनिश्चयेन ८ बुधेन ज्ञातिभ्योविवादाद्वा ९ गुरुणाकरमूलात् १० कुजशनिभ्यांभ्रातृमुखात् ११ एतैर्व्यय एवंलाभः १२ लाभेराहुकेतुभ्यामुदररोगः १३ तत्रकेतुनाझटितिज्यानिलिंगानि १४

थैकादशेलाभंव्ययवदतिदिशति ११ एतैर्द्वादशस्थानपठितैर्ग्रहैर्यथाव्ययउक्तस्तथातैरेवैकादशगैस्तेनैवप्रकारेणलाभोपिभवतीत्यर्थः अथपदात्सप्तमेफलमाह १२ पदात्सप्तमेराहुकेत्वोरन्यतरेणोदररोगःस्यात् अथपदाद्द्वितीयस्थकेतोःफलमाह १३ तत्रपदात्द्वितीयेकेतुयोगेनशीघ्रमेववार्द्धक्यचिन्हानिभवंति यत्तु स्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यादिभिर्लाभपदानुवृत्त्या तत्रसप्तमेइत्युक्तमूतन्न एवंचेत्तर्हिकेतुनाझटितिज्यानिर्लिंगानीतिसूत्रंप्रणीतंस्यात्तत्रेतिकिमर्थमिति अन्यच्चचंद्रगुरुशुक्रेषुश्रीमंतइतिवक्तव्यत्वात्सप्तमस्यधनविचाराश्रयत्वाभावादिति तदुक्तंवृद्धैः आरूढात्षष्ठभेपापेचोरःस्याच्छुभवर्जिते षष्ठभेद्वितीयेआरूढाद्वापिसौम्येतुसर्वदिश्यधिपोभवेत् सर्वज्ञस्तत्रजीवेस्यात्कविर्वादीचभार्गवे वापिद्वितीयेइत्यर्थः १४ पदात्द्वितीयेऽन्यस्ततयासमस्ततयावाचंद्रा

चंद्रगुरुशुक्रेषुश्रीमंतः १५ उच्चेनव १६ स्वांशवदन्यत्प्रायेण १७ लाभपदे केंद्रेत्रिकोणेवाश्रीमंतः १८ अन्यथादुःस्थे १९ केंद्रेत्रिकोणोपचयेषुद्वयोर्मैत्री २०

दिषुसत्सुश्रीमंतोभवंति १५ द्वितीयस्थितेनशुभपापान्यतरग्रहेणोच्चस्थितेनवा श्रीमंतइत्यर्थः १६ अन्यदत्रानुक्तंफलंकारकांशवद्बोध्यं प्रायेणेत्युक्त्यानसर्वत्रकारकांशवत्फलं औपदेशिकशास्त्रविरुद्धस्यातिदेशिकशास्त्रस्याप्रवृत्तेरिति १७ लग्नारूढात्केंद्रेत्रिकोणेवालाभपदेलग्नात्सप्तमारूढेसतिलक्ष्मीवंतोभवंति १८ लग्नारूढात्सप्तमारूढेदुःस्थेषष्ठाष्टमव्ययस्थेसत्यन्यथास्युः श्रीमंतोनेत्यर्थः १९ लग्नपदात्सप्तमपदेकेंद्रेत्रिकोणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पचयगेसतिद्वयोर्भार्याभर्त्रोर्मैत्रीभवति एवंलग्नपदात्पुत्रादिभावपदेकेंद्रेत्रिकोणोपचयगेसतितयोस्तयोर्मैत्री ज्ञेया अत्रोपचयपदंषष्ठातिरिक्तपदंरिपुरोगचिंतासुवैरमितिवक्तव्यत्वात् २० लग्नपदात्तत्तद्भावपदेषष्ठाष्टमव्यय गेसतितयोस्तयोर्वैरंभवति लाभपदइत्यादिसूत्रचतुष्टयंवृद्धैःसंगृहीतं लग्नारूढंदारपदंमिथःकेंद्रगतंयदि त्रि लाभेवात्रिकोणेवातथाराजान्यथाधमः आरूढौपुत्रपित्रोस्तुत्रिलाभकेंद्रगौयदि द्वयोर्मैत्रीत्रिकोणेतुसाम्यंद्वे षोन्यथाभवेत् एवंदारादिभावानामपिपत्यादिमित्रता जातकद्वयमालोक्यचिंतनीयंविचक्षणैरिति २१ पत्नी

रिपुरोगचिंतासुवैरं २१ पत्नीलाभयोर्दिष्ट्यानिराभासार्गलया २२

लाभयोर्लग्नपदतत्सप्तमयोर्निराभासार्गलयानिष्प्रतिबंधार्गलयादिष्ट्याभाग्यंभवति दिष्ट्येत्याकारांतःशब्दः दिष्ट्यासमुपजोषंचेत्यानंदेइत्यमरः अथवादिष्टमेवदिष्ट्यंदिष्टंभागधेयंयेषांतेदिष्ट्याः भाग्यवंतइत्यर्थः अत्रप्रा चीनैरुक्तम् यस्यपापःशुभोवापिग्रहस्तिष्ठेच्छुभार्गले तेनदृष्टेक्षितंलग्नंप्राबल्यायोपकल्पते यदिपश्येद्ग्रहस्तन्न विपरीतार्गलस्थितइति पत्नीलाभयोरितिभाग्ययोगेसिद्धेपदरूपलग्नगतदृष्ट्यातस्यैवभाग्यप्राबल्यरूपोगुणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽनेनविज्ञापितइतिविशेषः २ २ पदसप्तमयोःशुभैरेवयद्यर्गलंतर्हिधनंबहुवर्द्धतेएतेनपापार्गलेनधनंभवंति शुभ
ग्रहार्गलेततोपिविशेषइत्यर्थः पूर्वसूत्रेशुभपापसाधारण्येनविपरीतार्गलंविनिर्मुक्तार्गलस्यधनादिसत्त्वलक्षण
भाग्ययोगः फलमित्युक्तम् अस्मिन्सूत्रेतुशुभमात्रघटितेधनवृद्धिः सार्वदिकीपापमात्रघटितेधनवत्त्वमात्रंपाप
शुभोभयघटितेकदाचिद्धनसमृद्धिःकदाचिद्धनवत्त्वैवेति ननु भयपुण्येतिश्लोकोक्तशुभपापसाधारणविपरीता
र्गलभिन्नशुभार्गलमेवात्रशुभार्गलत्वेनकुतोनगृह्यतइतिचेत् उच्यतेसूत्रद्वयेएकरूपाचेदर्गलास्यात्तर्हिपूर्वेणैव

शुभार्गलेधनसमृद्धिः२३ जन्मकालघटिकास्वेकदृष्टा

सुराजानः २४ पत्नीलाभयोश्चराश्यंशकदृक्काणैर्वा २५ सिद्धेशुभार्गलइ
तिसूत्रस्यवैयर्थ्यापत्तेरितिभावः नचभाग्यवत्त्वधनवत्त्वभेदादितिवाच्यम् धनंविनाभाग्यवत्ताऽप्रतीतेरित्य
लम् २३ जन्मलग्नंप्रसिद्धम्काललग्नंहोरालग्नंघटिकाघटिकालग्नम्एतेषुत्रिष्वपिकेनचिदेकेनग्रहेणदृष्टेषुराजा
नोभवंतिअत्रैकग्रहदृष्टिविषयत्वमपेक्षितंनत्वेकग्रहमात्रदृष्टत्वंकाललग्नानयनंप्रागुक्तम् घटिकालग्नानयनंतु
वृद्धैरुक्तम् लग्नादेकघटीमात्रंयातिलग्नंदिनेदिने परंतुघटिकालग्नंनिर्दिशेत्कालवित्तमइति स्पष्टार्थः२४ जन्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 राशिकुंडलीनवांशकुंडलीद्दक्काणकुंडलीषुलग्नसप्तमयोर्द्वयोरपिएकग्रहदृष्टयोःसतोःराजानोभवंति द्रेष्काणा
नयनंराशित्रिभागाइतिपूर्वमुक्तम् तथाचकुंडलीत्रयभेदेनलग्नसप्तमद्वयगणनयाषट्संपद्यंतेषट्स्वपिएकग्र
 हदृष्टौराजयोगःपूर्णइत्यर्थः राशिर्जन्मकालेचंद्राक्रांतराशिर्नतुलग्नमिति २५राजयोगद्वयेपिकिंचिद्वैकल्यपर
मिदंसूत्रंताश्चतानिचतानितेषुराश्यंशकद्दक्काणेषुजन्मकालघटिकासुच एकस्मिन्नेकग्रहदृष्ट्यान्यूनेसतिद्वयो
र्लग्नयोरेकदृष्टयोःसतोः न्यूनराजत्वमित्यर्थः एतदुक्तंवृद्धैः विलग्नघटिकालग्नहोरालग्नानिपश्यति उच्चगृहेरा

तेष्वेकस्मिन्न्यूनेन्यूनं २८ एवमंशतोद्दक्काणतश्च २७

जयोगोलग्नद्वयमथापिवा राशेर्द्दक्काणतोंशाच्चराशेरंशादथापिवा यद्वाराशिद्दक्काणाभ्यांलग्नद्रष्टातुयोगदः प्रा
येणायंजातकेषुप्रभूणामेवदृश्यते वाक्यांतरंच जन्मकालघटीलग्नेष्वेकेनैवेक्षितेषुतु उच्चारूढेतुसंप्राप्तेचंद्राक्रां
तेविशेषतः क्रांतेवागुरुशुक्राभ्यांकेनाप्युच्चग्रहेणवा दुष्टार्गलग्रहाभावेराजयोगोनसंशयइति जन्मेतिसूत्रोक्तंरा
जयोगमंशद्दक्काणयोरतिदिशति २८ यथाजन्मेतिसूत्रेजन्मलग्नकुंडल्यासहहोराघटिकाकुंडल्योःसमुच्चयस्तथै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वांशकुंडल्याद्दक्काणकुंडल्याचपृथक्पृथक्कालघटिकाकुंडल्यौसमुच्चये तथाचलग्नकालघटिकासु अंशकाल घटिकासुदृक्काणकालघटिकासुचैकदृष्टासुराजानइतिराजयोगत्रयंसिद्ध्यति राजयोगांतरंग्रंथांतराद्वृद्धैःसंगृहीतं निशार्द्धोच्चदिनार्द्धोच्चपरंसार्द्धद्विनाडिका शुभातदुद्भवोराजाधनीवातत्समोपिवेति २७ अथयानयोगमाह शुक्रचंद्रौयत्रक्वचिद्विद्यमानौयदिपरस्परंदृष्टिभाजौतर्हियानवंतोभवंति एवंशुक्रचंद्रावेवयदिसिंहस्थौतृतीय

शुक्रचंद्रयोर्मिथोदृष्ट्योःसिंहस्थयोर्वायानवंतः २८ शुक्रकुजकेतुषुवैतानिकाः २९ स्वभाग्यदारमातृभावसमेषुशुभेषुराजानः ३०

गौशुक्राच्चंद्रेतृतीयगेचंद्राच्छुक्रेवातृतीयगेसत्यपियानवंतइतिगोलार्थः तदुक्तंवृद्धैःचंद्रःकविंकविश्चंद्रंपश्यत्यपितृतीयगे शुक्राच्चंद्रेततःशुक्रेतृतीयेवाहनार्थवान् २८ शुक्रादिषुमिथोदृष्टिमत्सुपरस्परंतृतीयस्थेषुवाविताना दिराजचिन्हवंतोभवंति २९ आत्मकारकाद्राश्यादिनाद्वितीयचतुर्थपंचमभावतुल्येषुशुभग्रहेषुराजानोभवंति एवंचतत्तत्कारकवशात्तेषांतेषामपिफलमूह्यं तस्मात्पुत्रादिकारकेष्वपिराजयोगबलेपुत्रादीनामपिराज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वंवाच्यम् ३० आत्मकारकात्तृतीयषष्ठभावसमयोःपापयोश्चराजानोभवंति ३१कारकेनिरुक्तंयोगद्वयंलग्नस
प्तमाधिपयोरतिदिशति लग्नाधिपात्सप्तमाधिपाच्चैवंद्वितीयचतुर्थपंचमभावसमयेषुशुभेषुतृतीयषष्ठभावसमयोः
पापयोश्चराजानइत्यर्थः नचारूढाधिकारात्पितृपदेनारूढोग्राह्यइतिवाच्यं जन्मेतिसूत्रात्सूत्रकारेणक्वचित्का
रकात्क्वचिज्जन्मलग्नादुक्तत्वात् पितृशब्देनास्मिन्ग्रंथेप्रायोलग्नस्यैवग्रहणाच्चेति ३२ यदितत्रपापःशुभस्था

कर्मदासयोःपापयोश्च ३१ पितृलाभाधिपाच्चैवं ३२
मिश्रेसमाः ३३ दारिद्रावैपरीते ३४ मातरिगुरौशु
क्रेचंद्रेवाराजकीयाः ३५ कर्मणिदासेवापापेसेनान्यः ३६

नेशुभःपापस्थानेतत्रफलमाह योगद्वयेशुभपापमिश्रणेसतिसमाःराजसमाइत्यर्थः ३३ शुभस्थानेपा
पाएवपापस्थानेशुभाएवतर्हिदरिद्राभवंति ३४ लग्नाधिपात्सप्तमाधिपाच्चपंचमेगुर्वाद्यन्यतमेसतिराज
कीयाराजाधिकारवंतोभवंति ३५ लग्नसप्तमाधिपाभ्यांतृतीयेषष्ठेवापापेसतिसेनाधिपतयोभवंति ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथबुद्धियोगमाहआत्मकारकाल्लग्नाच्चतृतीयषष्ठगतग्रहदृष्ट्याकारकेलग्नेचेत्यर्थः तथातृतीयषष्ठेशदृष्ट्यातथा पंचमेशदृष्ट्यालग्नकारकयोर्धीमंतोभवंति ३७ कारकाल्लग्नाद्वाचतुर्थेशदृष्ट्यालग्नकारकयोःसुखिनोभवंति३८ कारकलग्नाभ्यामष्टमेशस्यकारकलग्नयोर्दृष्ट्यादरिद्राभवंति ३९ कारकलग्नाभ्यांद्वादशेशस्यलग्नकारकयोर्दृ

स्वपितृभ्यांकर्मदासस्थदृष्ट्यातदीशदृष्ट्यामातृनाथदृष्ट्याचधीमंतः
३७ दारेशदृष्ट्यासुखिनः ३८ रोगेशदृष्ट्यादरिद्राः ३९ रिपुनाथ
दृष्ट्याव्ययशीलाः ४० स्वामिदृष्ट्याप्रबलाः ४१ पश्चाद्रिपुभाग्ययो
र्ग्रहसाम्येबंधः कोणयोरिपुजाययोःकीटयुग्मयोर्दाररिष्फयोश्च ४२

ष्ट्याव्ययस्वभावाभवंति४०लग्नेलग्नेशदृष्ट्याकारकेकारकाश्रयराशिदृष्ट्याबलवंतोभवंति४१अथापद्योगाना हपश्चाल्लग्नात्द्विद्वादशयोः पंचमनवमयोः द्वादशषष्ठयोरेकादशतृतीययोश्चतुर्थदशमयोर्वाग्रहसाम्येएकश्चेदे कःद्वौचेत्द्वौत्रयश्चेत्त्रयइतिरीत्याखेटसाम्येसतिबंधःकारापतनंभवति अत्रपठितेषुबुद्धिकेषुनसमुच्चयनियमइ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिवाच्यम् एवमृक्षाणांतदीशानांचशुभसंबंधेनिरोधमात्रंपापसंबंधाच्छृंखलाप्रहारादयः ऋक्षाणांद्विद्वादशा
दिद्विकानांपूर्वोक्तरीत्याशुभसंबंधेसतिद्वितीयद्वादशयोरित्यादिद्विकयोरन्यतरयोगघटकतयाशुभसंबंधश्चेन्नि
रोधमात्रम् नतुपीडापापसंबंधात्केवलपापसंबंधाच्छृंखलादयोभवंति द्विद्वादशादिषुशुभसंबंधाभावेपिद्वाद
शेशादिषुशुभसंबंधेसतिनिरोधमात्रंपापसंबंधेतुशृंखलादयोभवंतीत्यर्थः ४२ अथनेत्रभंगयोगमाह शुक्राल्ल

शुक्राद्गौणपदस्थोराहुःसूर्यदृष्टोनेत्रहा ४३ स्वदारगयोःशुक्रचंद्रयोरातोद्यंराजचि न्हानिच ४४ इति प्रथमाध्यायस्य तृतीयपादः ३ ॥ उपपदंपदंपित्रनुचरात् १

ग्नाद्गौणपदस्थः पंचमराश्यारूढस्थोराहुः सूर्यदृष्टश्चेन्नेत्रनाशकरःस्यात् ४३ स्वादात्मकारकाच्चतुर्थगयोः
शुक्रचंद्रयोः सतोःआतोद्यंवाद्यविशेषोराजचिन्हानिपताकादीनिचस्युः ४४ इतिजैमिनिसूत्रव्याख्यायांसु
बोधिन्यांप्रथमाध्यायस्यतृतीयपादः ॥ ३ ॥ अथोपपदादिकमवलंब्यफलमादिशति तत्रादावुपपदंलक्षय
ति लग्नानुचरात्पदंलग्नात्द्वादशस्यराशेर्यत्पदंतदुपपदमित्यर्थः ननुपित्रनुचरपदेनद्वादशस्यबोधः कथमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेत् उच्यते पितृलग्नमनुचरंद्वितीयंयस्येतिव्युत्पत्त्यागृहाणयत्तुपित्रनुचरादितिपाठंस्वीकृत्याखंडात्सप्तसंख्यालाभात्सप्तमात्पदमुपपदमितिपंथैरुक्तम् तदयुक्तम् एवंचेल्लाघवात् उपपदंपदंलाभादितिसूत्रंप्रणीतंस्यादित्यलम् १ तत्रफलमाह पापस्यतत्रपापस्वामिकेतस्मिन्नुपपदद्वितीयेपापयोगेसतिप्रव्रज्यासंन्यासः स्त्रीनाशोवास्यात् यथाकारकाधिकारपदाधिकारयोस्तत्रेतिपदेनकारकेपदेइत्यर्थोभवति तथात्रोपपदेइतिकुतोनोक्तमितिचेत्सत्यंतत्रोभयत्राधिकारःस्थितः अत्रनास्तीतितत्रपदेनद्विसंख्यालाभादुपपदद्वितीयेइत्युक्तम् अ

तत्रपापस्यपापयोगेप्रव्रज्यादारनाशोवा २ उपपदस्या
प्यारूढत्वादेवनात्ररविपापः ३ शुभदृग्योगान्न ४

नुभवसिद्धत्वाच्चेति तदुक्तंवृद्धैः आरूढात्षष्ठभेपापेचोरःस्याच्छुभवर्जिते आरूढाद्वापिसौम्येतुसर्वदिग्याधिपोभवेत् सर्वज्ञस्तत्रजीवेस्यात्कविर्वादेचभार्गवेइति आरूढादुपपदात् आरूढपदेनचेदारूढंगृह्यतेतर्हिपदाधिकारएवोक्तंस्यान्नत्वत्रेतिनचोपपदादितिवक्तव्येआरूढादितिकथमुक्तमितिवाच्यम् २ अत्रविषयेरविःपापत्वेननग्राह्यः तेनसिंहेउपपदद्वितीयेमेषादिपापराशौरवौवासतिनेदंफलमित्यर्थः ३ उपपदद्वितीयेशुभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टियोगाभ्यामुक्तयोगेसत्यपिनेदंफलंभवति ४ उपपदद्वितीयेनीचग्रहांशकेनीचग्रहाधिष्ठितेवासतिदारना शोभवति ५ उपपदद्वितीयेउच्चेशउच्चग्रहाधिष्ठितेवासतिबहुदारःस्यात् ६ उपपदद्वितीयेमिथुनेसतिबहुदा रःस्यात् ७ दारनाशयोगेविलंबकरयोगमाह तत्रोपपदद्वितीयेस्वामिनायुक्तेउत्तरायुषिनिर्दारःस्यात् तच्छ ब्देनपूर्वपरामर्शः तद्धेतौतस्योपपदाद्वितीयस्यहेतुः स्वामीतस्मिन्स्वर्क्षेस्वराशौसतिचोत्तरायुषिनिर्दारःस्यात्

नीचेदारनाशः ५ उच्चेबहुदाराः ६ युग्मेच ७ तत्रस्वामियुक्तेस्वर्क्षेवातद्धे तावुत्तरायुषिनिर्दारः ८ उच्चेतस्मिन्नुत्तमकुलाद्दारलाभः ९ नीचेविपर्ययः १०

राशेःकारणीभूतोग्रहएवतस्मात्स्वामिनः स्वगृहयोगोऽपेक्षितः ननुस्वाम्यादिभिस्तच्छब्देनदारकारकग्रहणा त्त्वयेदंकथमुक्तमितिचेच्छृणु आदौदारकारकग्रहणाभावात्तच्छब्देनदारकारकग्रहणानौचित्यात् पूर्वदारनाश पदेनदारकारकबोधाभावाच्चननुरविचंद्रयोरेकगृहत्वात्स्वर्क्षेतद्धेतावित्यंशस्यसंभवोनेतिचेन्मास्त्वस्माकंकाक्ष तिरिति ८ तस्मिन्नुपपदद्वितीयस्वामिनिउच्चराशौस्थितेसत्युत्तमकुलाद्दारलाभःस्यात् ९ तस्मिन्नुपपदाद्विती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्वामिनिनीचराशिस्थितेसतिअनुत्तमकुलाद्दारलाभःस्यात् १० उपपदद्वितीयशुभवर्गदृष्टियोगेसतिस्त्रीसुंदरीभवति ११ उपपदद्वितीयेराहुशनिभ्यांयोगेसतिलोकापवादात्त्रियस्त्यागोनाशोवास्यात् १२ उपपदद्वितीयेशुक्रकेतुयोगेसतिरक्तप्रदररोगवतीस्त्रीस्यात् १३ उपपदद्वितीयेबुधकेतुभ्यांयोगेअस्थिस्रावरोगवती

शुभसंबंधात्सुंदरी ११ राहुशनिभ्यामपवादात्त्यागोनाशोवा १२ शुक्रकेतुभ्यां रक्तप्रदरः १३ अस्थिस्रावोबुधकेतुभ्यां १४ शनिरविराहुभिरस्थिज्वरः १५ बुधकेतुभ्यांस्थौल्यं १६ बुधक्षेत्रेमंदाराभ्यांनासिकारोगः १७ कुजक्षेत्रेच १८

स्त्रीस्यात् १४ उपपदद्वितीयेशन्यादित्रिकयोगेऽस्थिज्वरवतीस्यात् १५ उपपदद्वितीयेबुधकेतुभ्यांयोगेस्थूलास्त्रीस्यात् १६ बुधगृहेभौमगृहेवोपपदद्वितीयगतेसतिशनिभौमाभ्यांयोगेनासिकारोगवतीस्यात् १७ बुधकुजान्यतरक्षेत्रेउपपदद्वितीयगेसतितत्रगुरुशनियोगेकर्णरोगवतीनरहकानाडिकानिःसरणरोगवती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 चस्यात् १८ १९ बुधकुजान्यतरक्षेत्रगेउपपदद्वितीयेगुरुराहुभ्यांयोगेदंतरोगवतीस्यात् २० कन्यातुलान्य
तरगेउपपदद्वितीयेशनिराहुभ्यांयोगेपंग्वीवातरोगवतीवास्यात् २१ यद्युपपदद्वितीयेशुभयोगोदृष्टिर्वास्यात्त
 र्हिनिरुक्तादोषानस्युः २२ उपपदाद्यःसप्तमोभावस्तद्भावस्थनवांशश्चताभ्यांतयोःस्वामिनौग्रहौताभ्यांचद्वि

गुरुशनिभ्यांकर्णरोगःनरहृकाच १९ गुरुराहुभ्यांदंतरोगः २० शनि
राहुभ्यांकन्यातुलयोःपंगुर्वातरोगोवा २१ शुभदृग्योगान्न २२ सप्त
मांशग्रहेभ्यश्चैवं २३ बुधशनिशुक्रेचानपत्यः २४ पुत्रेषुरविराहुगुरु
भिर्बहुपुत्रः २५ चंद्रेणैकपुत्रः २६ मित्रेविलंबात्पुत्रः २७

तीये एवंपूर्वोक्तानिफलानिसमुन्नेयानि तदुक्तंवृद्धैः सप्तमेशात्द्वितीयस्थेप्येवंफलमुदाहृतामिति २३ उपप
दात्सप्तमांशग्रहेषुबुधशनिशुक्रयोगेसत्यपत्यहीनोभवति २४ उपपदात्सप्तमांशग्रहेभ्यः पंचस्थानेषुरव्यादि
षुसत्सुबहुपुत्रःस्यात् २५ सप्तमांशग्रहेभ्यःपंचस्थानेषुचंद्रेसतिएकपुत्रःस्यात् २६ उपपदात्सप्तमांशग्रहेभ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचमस्थानेषुअनपत्यत्वबहुपुत्रत्वादिग्रहमिश्रणेसतिविलंबात्पुत्रलाभःस्यात् २७ उपपदात्सप्तमांशग्रहेभ्यः पंचमेषुकुजशनिभ्यांस्थिताभ्यांदत्तपुत्रवान्स्यात् २८ उपपदात्सप्तमांशग्रहेभ्यः पंचमेषुओजराशौसतिबहुपुत्रःस्यात् २९ उक्तस्थानेयुग्मराशौसत्यल्पापत्योभवति ३० गृहक्रमाज्जन्मलग्नक्रमात् यथाभावानांविचारःक्रियते तथाकुक्षितदीशादिभ्योपिकुर्यात् कुक्षितदीशावुपपदोपपदेशौताभ्यांपंचमांशग्रहाः पंचमभावस्त

कुजशनिभ्यांदत्तपुत्रः २८ ओजेबहुपुत्रः २९ युग्मेलपप्रजः ३० गृहक्रमात्कुक्षितदीशपंचमांशग्रहेभ्यश्चैवं ३१ भ्रातृभ्यांशनिराहुभ्यांभ्रातृनाशः ३२

द्भावस्थनवांशश्चताभ्यांतयोःस्वामिग्रहाभ्यांचैवपूर्वोक्तफलविचारः कार्यइत्यर्थः तस्माद्यत्रयस्यसंभवस्तस्याग्रिमसूत्रेनुवृत्तिः कार्याभ्रातृस्ताभ्यमित्यादिसूत्रेषुपपदोपपदेशाभ्यांविचारःकार्यइति कुक्षिपदेनप्रकरणपठितोपपदस्यग्रहणंननुस्वाम्यादिभिः कुक्षितदीशावितिसिंहरवीत्युक्तंतत्सर्वसाधारण्यादनुपयुक्तंविशेषतोऽस्मिन्शास्त्रेऽक्षरगम्यांकानामेवग्रहणादिति ३१ उपपदोपदेशाभ्यांभ्रातृस्थाभ्यामेकादशतृतीयस्थाभ्यांशनिराहु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्यांभ्रातृनाशः एकादशेज्येष्ठस्यतृतीयेकनिष्ठस्यनाशः कर्मादिभिर्भ्रातुर्व्ययादिर्ज्येष्ठस्येतिसूत्रदर्शनात् ननु उपपदोपपदेशाभ्यामितिकुतःसमागतमितिचेच्छृणुगृहक्रमादितिसूत्रात्कुक्षितदीशपदात् नचसमासपतितपदानामेकांशानुवृत्तेरसंभवादितिवाच्यम् अन्यपदेभ्योभ्रातृविचारायोग्यत्वादेकांशानुवृत्तेरितिभावः ३२ एकादशतृतीयान्यतरस्थेनशुक्रेणयथाक्रमंव्यवहितपूर्वापरमातृगर्भनाशःस्यात् ३३ लग्नेलग्नादष्टमेवाशुक्रदृष्टे

शुक्रेणव्यवहितेगर्भनाशः ३३ पितृभावेशुक्रदृष्टेपि ३४ कुजगुरुचंद्रबुधैर्बहुभ्रातरः ३५ शन्याराभ्यांदृष्टेयथास्वंभ्रातृनाशः ३६ शनिनास्वमात्रशेषश्च ३७

सत्यपिव्यवहितगर्भनाशइत्यर्थः ३४ उपपदोपपदेशाभ्यांतृतीयैकादशस्थैःकुजादिभिर्भ्रातृबाहुल्यंस्यात्३५ उपपदोपपदेशाभ्यांतृतीयैकादशयोःशन्यारदृष्टौसत्यांयथास्वंभ्रातृस्थानमनतिक्रम्यतृतीयेदृष्टौकनिष्ठस्यैकादशेदृष्टौज्येष्ठस्योभयत्रदृष्टावुभयोश्चनाशःस्यात् ३६ उपपदोपपदेशाभ्यांतृतीयैकादशयोःशनिदृष्टौसत्यांके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वलंस्वमात्रशेषःस्यादन्येनश्यंतीत्यर्थः ३७ उपपदोपपदेशाभ्यांतृतीयैकादशयोः केतौसतिभगिन्योयथास्वं भूयस्योभवंति ३८ उपपदसप्तमेशात्द्वितीयपराशौराहौसतिस्थूलदंष्ट्रावान्स्यात् तदुक्तंप्राच्यैःसप्तमेशात्द्वितीयस्थेराहौमूकःखलेस्थिते अदंतोधिकदंतोवादंतोवादंष्ट्रायुक्तोथवाभवेत् पवनव्याधिमान्केतौयद्वास्यादस्फुटोक्तिमान् तत्रनानाग्रहैर्योगेमिश्रंफलमुदाहृतमिति३९उपपदसप्तमेशात्द्वितीयेकेतौसतिस्तब्धवागस्फुटोक्ति

केतौभगिनीबाहुल्यं ३८ लाभेशाद्भाग्यभेराहौदंष्ट्रवान्
३९ केतौस्तब्धवाक् ४० मंदेकुरूपः ४१ स्वांशवशाद्वौ
र्नीलपीतादिवर्णाः ४२ अमात्यानुचराद्देवताभक्तिः ४३

मान्स्यात् ४० उपपदसप्तमेशात्द्वितीयेशनौसतिकुरूपोभवति४१आत्मकारकाश्रितनवांशस्वभावाज्जातकांतरप्रसिद्धाजातकवतोवर्णाग्राह्याः एवंचतत्तत्कारकांशतस्तेषांतेषांवर्णाज्ञेयाइत्यपिबोध्यम् ४२ अमात्यत्रहान्न्यूनोयोग्रहस्तस्माद्देवताभक्तिर्विचारणीया अमात्यानुचरोदेवताकारकस्तस्यपापत्वेक्रूरदेवतायां शुभत्वेसौम्यदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वतायां उच्चगत्वेस्वर्क्षगतत्वेचभक्तिदृढतानीचगत्वेभक्त्यस्थैर्यमित्यादिकंज्ञेयम् ४३ कारकांशेशुभग्रहरहितंके वलपापसंबंधेजारजातोभवतिसंबंधस्तुदृष्टियोगषड्वर्गैःज्ञेयः ४४ अत्रकारकश्चेत्पापोभवतितदात्विदंफलंन स्यात् कारकातिरिक्तादेवपापसंबंधादिफलंवाच्यं नकारकात्पापादित्यर्थः अथवाऽत्राष्टमेपापग्रहेसतिनायंयो

स्वांशेकेवलपापसंबंधेपरजातः ४४ नात्रपापात् ४५ शनिराहु भ्यांप्रसिद्धिः ४६ गोपनमन्येभ्यः ४७ शुभवर्गेपवादमात्रं ४८ द्विग्रहेकुलमुख्यः ४९ ॥ इतिप्रथमाध्यायस्यचतुर्थपादः ॥ ४ ॥

गः ४५ शनिराहूयदियोगघटकौशनिराहुदृष्टियोगषड्वर्गैः परजातत्वप्रसिद्धिर्भवति ४६ अन्येभ्यःपापग्रहे भ्योयोगेसतिपरजातत्वगोपनंभवति ४७ पापग्रहेषुयोगघटकेषुसत्सुकारकांशेशुभषड्वर्गसंबंधेसातितुपरजात त्वापवादएवभवेन्नतुपरजातत्वमित्यर्थः ४८ कारकांशेद्विग्रहयोगेसतिकुलमुख्योभवति ४९ इतिश्रीनीलकं ठज्योतिर्विद्विरचितायांजैमिनिसूत्रव्याख्यायांसुबोधिन्यांप्रथमाध्यायस्यचतुर्थःपादःसमाप्तः ॥ ४ ॥ अथायु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीयोपायंदर्शयति लग्नेशाष्टमेशाभ्यामायुर्विचार्यमित्यर्थः लग्नेशाष्टमेशास्थितिवशतोदीर्घायुर्योगमाह १
प्रथमयोश्चरयोरुत्तरयोः स्थिरद्विस्वभावयोर्वायदिलग्नेशाष्टमेशौभवतस्तर्हिदीर्घमायुर्भवति अयमर्थः यत्रक्का
पिचरराश्योर्लग्नेशाष्टमेशयोः स्थित्यादीर्घायुर्योगः स्थिरद्विस्वभावयोः लग्नेशाष्टमेशयोः स्थित्यावास्थिरेलग्ने
शेसतिद्वंद्वेऽष्टमेशः द्वंद्वेलग्नेशेसतिस्थिरेष्टमेशइति पर्यायेणभवस्तदापिदीर्घायुर्योगस्यादिति अत्रैकस्मिन्ने

आयुःपितृदिनेशाभ्यां १ प्रथमयोरुत्तरयोर्वादीर्घं २
प्रथमद्वितीययोरंत्ययोर्वामध्यं ३ मध्ययोराद्यंतयोर्वाहीनं ४

वचरादौतदुभयसत्वेएकस्यैवतदुभयस्वामित्वेवानयोगहानिः २ अथमध्यायुर्योगंदर्शयति प्रथमद्वितीययो
श्चरास्थिरयोश्चरेलग्नेशः स्थिरेऽष्टमेशश्चरेऽष्टमेशेस्थिरेलग्नेशइतिरीत्यायदिभवतः यदिवाद्विस्वभावयोर्द्वाव
पिलग्नेशाष्टमेशौयत्रक्कापिभवतस्तर्हिमध्यायुर्भवतीत्यर्थः ३ अथाल्पायुर्योगमाह यदिमध्ययोःस्थिरयोर्यत्रक्कापि
लग्नेशाष्टमेशौस्तः यदिवाआद्यंतयोश्चराद्विस्वभावयोर्लग्नेशाष्टमेशौस्तस्तर्हिहीनमल्पायुर्भवतीत्यर्थः अथयथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लग्नेशाष्टमेशयोराशिस्थितिभेदेनदीर्घमध्याल्पायूंषिप्रोक्तानितथैवलग्नचंद्राभ्यामप्युच्यंते ४ मंदचंद्राभ्यांल

१ दीर्घ १	१ मध्य २	१ अल्प ३
२ दीर्घ ३	२ मध्य १	२ अल्प २
३ दीर्घ २	३ मध्य ३	३ अल्प १

ग्नेंदुभ्यामेवंपूर्वोक्तप्रकारेणदीर्घमध्याल्पायूंषिविचार्याणीत्यर्थः ५ जन्मलग्नहोरालग्ना भ्यांचपूर्वोक्तप्रकारेणदीर्घमध्याल्पायूंषिसमानेयानि तथाच त्रिविधद्वंद्वेनदीर्घमध्या ल्पायूंषित्रेधासमानेयानीतिपर्यवसितोर्थः होरालग्नानयनंतुपूर्वमेवोक्तम् एतदुक्तंवृद्धैः लग्नेशरंध्रपत्योश्चलग्नेंदोर्लग्नहोरयोः सूत्राण्येवंप्रयुंजीयात्संवादादायुषांत्रये चरेचरस्थि

एवंमंदचंद्राभ्यां ५ पितृकालतश्च ६ संवादात्प्रामाण्यं ७ विसंवादेपितृकालतः ८

रद्वंद्वाःस्थिरेद्वंद्वचरस्थिराः द्वंद्वस्थिरोभयचरादीर्घमध्याल्पकायुषः प्रथमयोरित्यादिसूत्रत्रयसंग्राहकश्चरइ ति प्रस्तारश्लोकः प्रस्तारश्चक्रेद्रष्टव्यः ६ अथत्रिविधेष्वायुर्दायनिर्णयोपापेषुत्रयाणामेकाकारायुःप्रदत्वेनिर्वि वादमेवद्वयोरेककारायुःप्रदत्वेऽपरस्यभिन्नायुःप्रदत्वेनिर्णयमाह प्रकारद्वयेनयादृशमायुरायाति तदेवग्राह्यंन त्वेकेनागतमिति अथत्रयाणांपक्षाणांवैरूप्येग्राह्यपक्षमाह ७ त्रयाणामपिपक्षाणांविसंवादेवैरूप्येसतिजन्मल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्नहोरालग्नाभ्यामागतमायुर्ग्राह्यमित्यर्थः सर्वत्रैवविसंवादेलग्नहोराभ्यामेवायुःप्राप्तावपवादमाह ८ लग्नेसप्तमे वाचंद्रेस्थितेसतिचंद्रलग्नाभ्यामागतमायुर्ग्राह्यमित्यर्थः अल्पायुष्यादिकंवृद्धैरुक्तम् द्वात्रिंशात्पूर्वमल्पायुर्मध्या मायुस्ततोभवेत् चतुःषष्ट्याःपुरस्तात्तुततोदीर्घमुदाहृतमिति द्वात्रिंशच्चतुष्षष्टिषण्णवतिरूपेष्वागतेष्वायुर्दाये षुस्पष्टीकरणंवृद्धैरुक्तम् पूर्णमादौहानिरंतेऽनुयातोमध्यतोभवेत् राशिद्वयस्ययोगार्द्धंवर्षाणांस्पष्टमुच्यते एवं द्विकानांसंचिंत्यत्रयाणांसूत्रवर्त्मनेति अयमर्थःप्रथमयोरित्यादिसूत्रजालेनायुर्यन्निर्णीतं तत्रदीर्घायुंषिसमाग

पितृलाभगेचंद्रेचंद्रमंदाभ्यां ९

तेमध्यमायुरवाधिपर्यंतंनिर्विशंकंसिद्धमेव तदुपरितनेदीर्घायु खंडेद्वात्रिंशदब्दरूपेकियद्ग्राह्यमितिसंशयनिरा करणायायंश्लोकःपितृदिनेशौद्वावपियद्राशौभवतस्तद्राशेरारंभेतौचेत्तर्हितत्रोचितःखंडःपूर्णएवतद्राश्यंतेयदि तौभवतस्तर्हितत्खंडस्यविनाशएव मध्येत्वनुपातेनखंडैकदेशोग्राह्यः अनुपातस्त्वित्थंत्रिंशदंशैश्चेत्द्वात्रिंशद्व र्षाणितर्ह्येकेनांशेनाकिमिति $\frac{1}{32}$ प्राप्तं $\frac{1}{0}$ तत्रलग्नेशाष्टमेशयोःपृथक्स्पष्टंविधाराशीन्दूरीकृत्यांशादेरेकखंडस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रैराशिकेनयदायातिलग्नेचस्याष्टमेश ३०० स्यच २४ तयोरागतयोर्वर्षादिपिंडयोर्योगंविधायतद्योगार्द्धंस्पष्टं भवति तच्चयदिदीर्घायुः संबंधितर्हिचतुःषष्टिमध्येयोज्यम् यदिमध्यायुःसंबंधितदाद्वात्रिंशन्मध्येयोज्यम् यद्यल्पायुःसंबंधितदाप्रथमखंडाभावात्स्वयमेवजन्मप्रभृतिवर्तमानमायुर्भवति एवं मंदचंद्रयोःपितृकालयोरपिसमागतायुष्यंतिमखंडस्पष्टीकरणंविज्ञेयम् अन्येतु होरालग्नादिमांशेतुपूर्णमंतेनाकिंचन स्पष्टीकरणमेतत्स्या

शनौयोगहेतौकक्ष्याऱ्हासः१०विपरीतमित्यन्ये११सूत्राभ्यांनस्वर्क्षतुंगगेसौरे१२

दीर्घमध्याल्पकायुषि अनुपातस्तुपूर्ववत् अनेनहोरालग्नस्यापिसावयवत्वंप्रदर्शितं अथदीर्घमध्याल्पायुर्योगेषु कंचनविशेषंदर्शयति ९ यद्यत्रशनिर्योगकर्तास्यात्तदाकक्ष्याऱ्हासोभवति दीर्घेचेन्मध्यंमध्यंचेन्मध्यंचेदल्पं अल्पंअल्पंचेन्नकिंचनेति मतांतरमाह १० शनौयोगकर्तरिविपरीतंऱ्हासोभवति किंतु यथास्थितएवेत्यन्ये आचार्यावदंति ११ परपक्षंनिर्दिश्यस्वपक्षमाह स्वराशिस्वोच्चगेशनौतथाशुभदृग्योगरहितकेवलपापदृष्टियो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ मैत्रीउच्चनीचपुरुषस्त्रीचक्र.

सूर्य	चं	मं	बु	गु	शु	श	
चं.गु मं	सूर्य मं.गु	र.गु चं	शु.श	र मं चं	श.बु	बु.शु	मित्र
बु.शु श	बु.शु श	बु.शु श	र.मं चं.गु	बु.शु श	र.मं गु.चं	र.चं मं.गु	शत्रु
पुरु	स्त्री	पु	स्त्री	पु	स्त्री	पु	पुंस्त्रीसं

अथ त्रैराशिकचक्र.

०	१	२	३	४	५	६	७	८	९	१०	११	
सू	शु	श	शु	गु	चं	बु	मं	श	मं	गु	चं	दि
गु	चं	बु	मं	सू	शु	श	शु	श	मं	गु	चं	रा

बलचक्र.

स्व	मि	स	श	
३० ०	२२ ३०	१५ ०	७ ३०	स्व
१५ ०	११ ४५	७ ३०	३ ४५	ह
१० ०	७ ३०	५ ०	२ ३०	द्रे
५ ०	३ ४५	२ ३०	१ १५	न

अथ द्रेष्काणचक्र.

०	१	२	३	४	५	६	७	८	९	१०	११	
मं	बु	गु	शु	श	र	चं	मं	बु	बृ	शु	श	१०
र	चं	मं	बु	र	शु	श	र	चं	मं	बु	गु	२०
शु	श	र	चं	मं	बु	गु	शु	श	र	चं	मं	३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति वर्षदीपकः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०८९

॥ अथ पत्रीमार्गप्रदीपिका प्रारभ्यते ॥

यह पुस्तक सन् १८६७का ऐक्ट २५ के बमुजब रजिष्टरी कराके सर्वप्रकारका हक्क यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ॥ नत्वाश्रीशिवशारदागणपतिब्रह्मार्कमुख्यग्रहान्
पत्रीमार्गप्रदीपिकांस्फुटतरांकुर्वेमहादेववित् ॥ यत्पक्षेहिघटंतिशुद्धखचराः
कार्यास्तुतत्पक्षकाः स्वव्यक्षोदययोः खरामविहतौप्राप्ताः पलादिध्रुवाः ॥१॥
॥ अथलग्नदशमपत्रसाधनमाह ॥ ॥ स्थापयेत्खं क्रियारंभे ततः स्वध्रुव
कान्वितम् ॥ निरायनं भवेत् पत्रं लग्नस्यदशमस्यच ॥ २ ॥ ॥ अथ-
लग्नदशमसाधनमाह ॥ ॥ उदयादिष्टकालेषुद्युदलंहिप्रपातयेत् ॥ दश
मस्यभवेदिष्टंसारीखांगौसुखांगने ॥ ३ ॥ भांशजंसायनार्कस्यखांगाङ्कंस्वे
ष्टयुक्तम् ॥ कलाद्यास्तध्रुवघ्नाः स्युर्विपलाद्यास्तुसंयुताः ॥४॥ तदल्पकोष्ठ
जौभांशौग्राह्यौलिप्तादिकावियत् ॥ अल्पेष्टविवरात्पार्श्वान्तराप्तांशादिसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बालाद्यवस्थाःक्रमशोग्रहाणामोजेसमेतद्विपरीतमाहुः ॥ बालःकुमारोथयुवा
चवृद्धोमृतोलवानामृतुभिःक्रमेण ॥ इति ॥१०॥ अथदृष्टिसाधनमाहधराणिध-
रः ॥ ॥ दृष्टाविहीनदृश्यस्यक्रमादेकादिभेदृशः ॥ भागार्धतिथियुग्भा-
गा भागार्धोनशराब्धयः ॥ ११ ॥ भोग्यभागाद्विनिघ्नांशाक्रमात्षड्भा-
धिकेग्रहे ॥ दिग्भ्यःशुद्धेलवार्द्धंचज्ञेयालिप्तादिकादृशः ॥ १२ ॥ पंचेंदुयुक्ताः
खलुसार्धभागाद्विभेंग मेषाष्टिकलास्तथैव ॥ भागोनषष्टिर्भवतीह दृष्टि
स्त्रिभेद्विभे भूमिसुतोनदृश्ये ॥ १३ ॥ जीवोनदृश्यस्यतुवेदभस्याद्वि
घ्नांशकोना खलुषष्टिरेव ॥ सार्धांशकोना गजभेतुषष्टिस्त्रिभेद्विभेंशार्द्धयुते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युतौ ॥ अयनांशादिवियुताल्लग्नंमध्यंस्फुटंभवेत् ॥ ५ ॥ ॥ अथ भाव-
संधितच्चक्रसाधनमाह ॥ ॥ लग्नंतुर्यात्सप्तमाच्चतुर्यंभावंशोध्यंराशिःपंचभि-
स्ताडितोंशाः॥अंशाद्याश्चोद्दिग्घताःस्युःकलाद्यालग्नेतुयेपंचवारंप्रदद्यात्॥६॥
तन्वाद्याः संधिसहिताभावाःषट्षड्युताःपरे ॥ यदंत्यारंभयोःसंध्योरंतस्थ-
स्तद्गतोग्रहः ॥ ७ ॥ ॥ अथक्षयचयफलविश्वानयनमाह ॥ ॥ भावतुल्येग्र
हेरूपंसंधितुल्येतुनिष्फलम् ॥ भावसंध्यन्तरेणाप्तंखेटसंध्यंतरंचयत् ॥ ८ ॥
भावान्न्यूनाधिकेखेटफलंवृद्धिक्षयाभिधम् ॥ फलस्याग्न्यंशकोविश्वायद्वा
विंशहतंफलम् ॥ ९ ॥ ॥ अथग्रहाणामवस्थानयनमाहव्यंकटेशः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥अथतात्कालिकपंचधामैत्रीसाधनमाह॥ ॥सोमदैवज्ञः॥ ग्रहतोऽर्थतृतीय३तोय४खा१०य११व्यय१२संस्थासुहृदानभश्चराः॥ इतरालयगाद्विषोमुनींद्रैरिति तत्कालजमित्रशत्रवोक्ताः॥१८॥ अधिमित्रसमत्वमेति मित्रसमखेटस्तुसुहृद्रिपुत्वमेति॥ रिपुरेति समाधिशत्रुभावंखलुतत्कालजमित्रशत्रुभावात् इति॥१९॥

नैसर्गमैत्री							
र.	चं.	मं.	बु.	गु.	शु.	श.	
चं. गु मं	र.बु.	र.चं गु.	सू.शु.	सू.चं. मं.	बु.श.	बु.शु.	मित्र.
बु.	मं.गु. शु.श.	श.शु.	श.गु मं.	श.	मं.गु.	गु	सम.
शु. श	०	बु.	चं.	शु.बु.	सू.चं.	र.चं. मं.	शत्रु.

॥ अथषड्वर्गसाधनमाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षुवेदाः ॥ १४ ॥ द्विनिघ्नभागाद्विधुभेंतरेस्याद्विभेतुभागार्द्धविहीनषाष्टिः ॥ द्वि-
घ्नांशकोनानवभेतुषष्टिस्त्रिंशद्युतातद्भजभेर्कजस्य ॥ इति ॥ १५ ॥ ॥ अथरा-
शीनांस्वामिनः ॥ उक्तंचव्यंकटेशेन ॥ भौमाच्छ विच्चंद्र रविज्ञ शुक्र कुजे
ज्यमंदार्क सुताऽमरेज्याः ॥ मेषादिभानामधिपाःक्रमेण तदंशकानामप-
पि तेभवेयुरिति ॥ १६ ॥ अथ नैसर्गमैत्रीमाहविश्वनाथः ॥ इंद्विज्यक्षिति-
जा रवींदुतनयौ सूर्येंदुजीवाः क्रमात् भृग्वर्कौ शशिसूर्यभूमितनया ज्ञार्की
ज्ञशुक्रौ मताः ॥ सूर्यादेः सुहृदः समाः शशिसुतः सर्वेपि मंदास्फुजिन्
मंदाचार्यकुजाः शनिः कुजगुरू जीवः परे वैरिणः ॥ १७ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिद्प्राप्त्य११भ्र१०गत स्तनोस्त्रि३ख१०सुखो४पांत्या ११ रिद्दरिःफे १२ शु
भः॥२२॥भौमातुग्लौर्नव ९ धी ५ धनो २ पच्चयगः३।६। १०। ११ षट्ट्दत्र्या ३
त्ति११ धी५स्थोर्कजाल्लुग्राच्चोपचये ३।६।१०।११ रवेरुपच्चया ३।६।१०।
११ ष्टा ८ स्ते ७ षु शस्तो बुधात्॥ धी ५ रंध्रेषु ८ चतुष्टयं १।४। ७।१०।
त्रिषु ३ गुरोःकेंद्राष्टलाभव्यये १।४।७।१०।८।११।१२स्वादेकोपच्चया३।
६।१०।११ स्त ७ गास्त्रि ३ ख १० भवा ११ स्तां ७ बु ४ त्रिकोणे ९।५ भृगोः
॥२३॥ स्वाद्भौमोष्ट ८ चतुष्टयाय १।४।७।१०।११ धन २ गो जीवात्षड्
डायां ११ त्य १२ खे १० चंद्रादाय ११ रिपु ६ त्रि ३ गोभृगुसुतादष्टांत्य १२
लाभा ११ रि ६ गः॥ज्ञात्पंचा ५ य ११ रिपु ६ त्रि ३ गोर्कतनयात्केंद्रा १।४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केशवः ॥ ॥ भेशोथार्केंदुहोरे अयुजि युजिशशिब्रघ्नयोःस्वात्मजां कर्क्षेशात्र्यंशानवांशा अजमकरतुलाकर्किंतोकांशकास्वात् ॥ भौमार्कीज्यज्ञशुक्रा अयुजिशर ५ शरा ५ ष्टा ८ द्रि ७ पंचां ५ शनाथास्त्रिंशायुग्मेविलोमाः क्रम बलिन इमे षट् शुभैः सद्युगोध्वैंः इति ॥ २० ॥ ॥ अथसप्तवर्गसाधनमाह ॥ ॥ नगांशपास्त्वोजगृहे तदीशाद्युग्मे ग्रहेसप्तमराशिपात्तु ॥ पूर्वोक्तवर्गैःसहितोनगांशःस्युःसप्तवर्गा मुनिभिःप्रदिष्टाः ॥ २१ ॥ ॥ अथाष्टवर्गानयनमाह ढुंढिराजः ॥ ॥ स्वान्मंदात्कुजतोरविर्मूर्ति ८ तपो ९ लाभा ११ १ र्थं २ केंद्र १।४।७।१० स्थितः शुक्रादस्तरिपु ६ व्यये १२ षुचगुरोर्धर्मा ९ रि ६ पुत्रा ५ प्ति ५ षु ॥ चंद्रात् प्राप्ति ११ रिपु ६ त्रि ३ खे १० षु शशिजात्पंच ५ त्रि ३ नंद ९ व्यया १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ दशमपत्रनिरायनं

राशि.	०	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७	२८	२९	३०
मे०	०	०	०	०	०	०	०	१	१	१	१	१	१	२	२	२	२	२	२	२	३	३	३	३	३	३	४	४	४	४	०
०	०	९	१८	२७	३७	४६	५५	४	१४	२३	३२	४१	५१	०	९	१९	२८	३७	४६	५६	५	१४	२३	३३	४२	५१	०	१०	१९	२८	९
	०	१६	३२	४८	४	२०	३६	५२	८	२४	४०	५६	१२	२८	४४	०	१६	३२	४८	४	२०	१६	५२	८	२४	४०	५६	१२	२८	४४	१६
वृ०	४	४	४	५	५	५	५	५	५	६	६	६	६	६	६	७	७	७	७	७	७	८	८	८	८	८	८	९	९	९	०
१	३८	४७	५७	७	१७	२७	३७	४७	५७	७	१७	२७	३७	४७	५७	७	१७	२७	३७	४७	५७	७	१७	२७	३७	४७	५७	७	१७	२७	९
	०	५८	५६	५४	५२	५०	४८	४६	४४	४२	४०	३८	३६	३४	३२	३०	२८	२६	२४	२२	२०	१८	१६	१४	१२	१०	८	६	४	२	२८
मि०	९	९	९	१०	१०	१०	१०	१०	११	११	११	११	११	११	१२	१२	१२	१२	१२	१३	१३	१३	१३	१३	१३	१४	१४	१४	१४	१	०
२	३७	४७	५८	९	२०	३०	४१	५२	३	१३	२४	३५	४६	५६	७	१८	२९	४०	५०	१	१२	२३	३३	४४	५५	६	१६	२७	३८	४९	०
	०	४६	३२	१८	४	५०	३६	२२	८	५४	४०	२६	१२	५८	४४	३०	१६	२	४८	३४	२०	६	५२	३८	२४	१०	५६	४२	२८	१४	१०
क०	१५	१५	१५	१५	१५	१५	१६	१६	१६	१६	१६	१६	१७	१७	१७	१७	१७	१८	१८	१८	१८	१८	१८	१९	१९	१९	१९	१९	२०	२०	०
३	०	१०	२१	३२	४३	५३	४	१४	२६	३६	४७	५८	९	१९	३०	४१	५२	३	१३	२४	३५	४६	५६	७	१८	२९	३९	५०	१	१२	१०
	०	४६	३२	१८	४	५०	३६	२२	८	५४	४०	२६	१२	४८	३४	३०	६	२	४८	३४	२०	६	५२	३८	२४	१०	५६	४२	२८	१४	४६
सिं०	२०	२०	२०	२०	२१	२१	२१	२१	२१	२१	२२	२२	२२	२२	२२	२२	२३	२३	२३	२३	२३	२३	२४	२४	२४	२४	२४	२४	२५	२५	०
४	२३	३२	४२	५२	२	१२	२२	३२	४२	५२	२	१२	२२	३२	४२	५२	२	१२	२२	३२	४२	५२	२	१२	२२	३२	४२	५२	२	१२	९
	०	५८	५६	५४	५२	५०	४४	४६	४४	४२	४०	३८	३६	३४	३२	३०	२८	२६	२४	२२	२०	१८	१६	१४	१२	१०	८	६	४	२	५८
क०	२५	२५	२५	२५	२५	२६	२६	२६	२६	२६	२६	२७	२७	२७	२७	२७	२७	२७	२८	२८	२८	२८	२८	२८	२९	२९	२९	२९	२९	२९	०
५	२२	३१	४०	४९	५९	८	१७	२६	३६	४५	५४	३	१३	२२	३१	४१	५१	५९	८	१८	२७	३६	४५	५५	४	१३	२२	३२	४१	५०	९
	०	१६	३२	४८	४	२०	३६	५२	८	२४	४०	५६	१२	२८	४४	०	१६	३२	४८	४	२७	३६	५२	८	२४	४०	५६	१२	५८	४४	१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७।१० ष्ट ८ धर्मा ९ ऽऽय ११ गैः सूर्याच्चोपचया ३।६।१०।११ त्मजे ५ षुत
नुतव्यया ३ या ११ रि ६ खा १० द्यैः १ शुभः ॥२४॥ शुक्रादासुतधर्म ९ लाभ
११ मृतिगः सौम्यः कुजार्क्योस्तपः ९ केंद्रायाष्ट १।४।७।१०।११।८ धने २
स्वतोप्युपचया ३।६।१०।११ न्त्यै १२ क त्रिकोणेशुभः ॥ कोणा ९।५ न्त्या
१२ रि ६ भवे ११ रवेरिपु ६ भवा ११ ष्टां ८ त्ये १२ गुरोरिंदुतः खा १० या ११
ष्टा ८ रि ६ सुखा ४ र्थं २ गः स्व २ ख १० भवा ११ ष्टै ८ कां १ बु ४ षट्
६ सूदयात् ॥ २५ ॥ स्वात्स्वा २ या ११ ष्ट ८ त्रि ३ केंद्र १।४।७।१०।
स्व २ नव ९ दश १० भवा ११ रीति धीस्थश्च शुक्राल्लग्नात्केंद्रा १।४।७।१०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं लग्नपत्रनिरायनं रत्नपुरे पलभा ५ । ८ चरखंडा ५१ । ४१ । १७

राशि	०	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७	२८	२९	९०
मे.	०	०	०	०	०	०	०	०	१	१	१	१	१	१	१	१	२	२	२	२	२	२	२	२	३	३	३	३	३	३	०
०	०	७	१५	२२	३०	३७	४५	५२	०	८	१५	२३	३०	३८	४५	५३	१	८	१६	२३	३१	३८	४६	५४	१	९	१६	२४	३१	३९	७
	०	३४	८	४२	१६	५०	२४	५८	३२	६	४०	१४	४८	२२	५६	३०	४	३८	१२	४६	२०	५४	२८	२	३६	१०	४४	१८	५२	२६	३४
वृ.	३	३	४	४	४	४	४	४	४	५	५	५	५	५	५	५	६	६	६	६	६	६	६	७	७	७	७	७	७	७	०
१	४७	५५	४	१२	२१	३०	३८	४७	५५	४	१३	२१	३०	३८	४७	५६	४	१३	२१	३०	३९	४७	५६	४	१३	२२	३०	३९	४७	५६	८
	०	३६	१२	४८	२४	०	३६	१२	४८	२४	०	३६	१२	४८	३४	०	३६	१२	४८	२४	०	३६	१२	४८	२४	०	३६	१२	४८	२४	३६
मि.	८	८	८	८	८	८	९	९	९	९	९	९	१०	१०	१०	१०	१०	१०	११	११	११	११	११	११	१२	१२	१२	१२	१२	१३	०
२	५	१५	२५	३५	४५	५६	६	१६	२६	३६	४७	५७	७	१७	२७	३८	४८	५८	८	१८	२९	३९	४९	५९	९	२०	३०	४०	५०	०	१०
	०	१२	२४	३६	४८	०	१६	२४	३६	४८	०	१२	२४	३६	४८	०	१२	२४	३६	४८	०	१२	२४	३६	४८	०	१२	३४	३६	४८	१२
क.	१३	१३	१३	१३	१३	१४	१४	१४	१४	१४	१५	१५	१५	१५	१५	१६	१६	१६	१६	१६	१६	१७	१७	१७	१७	१७	१८	१८	१८	१८	०
३	११	२२	३३	४५	५६	७	१९	३०	४१	५३	४	१५	२७	३८	४९	१	१२	२३	३५	४६	५७	९	२०	३१	४३	५४	५	१७	२८	३९	११
	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	२०
सिं.	१८	१९	१९	१९	१९	१९	१९	२०	२०	२०	२०	२०	२१	२१	२१	२१	२१	२२	२२	२२	२२	२२	२३	२३	२३	२३	२३	२३	२४	२४	०
४	५१	२	१३	२५	३६	४७	५९	१०	२१	३३	४४	५५	७	१८	२९	४१	५२	३	१५	२६	३७	४९	०	११	२३	३४	४५	५७	८	१९	११
	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	२०
क.	२४	२४	२४	२५	२५	२५	२५	२५	२५	२६	२६	२६	२६	२६	२७	२७	२७	२७	२७	२७	२८	२८	२८	२८	२८	२९	२९	२९	२९	२९	०
५	३१	४२	५३	३	१४	२५	३६	४७	५८	९	२०	३१	४२	५२	४	१५	१६	३७	४८	५९	१०	२१	३२	४३	५४	५	१६	२७	३८	४९	१०
	०	५८	५६	५४	५२	५०	४८	४६	४४	४२	४०	३८	३६	३४	३२	३०	२८	२६	२४	२२	२०	१८	१६	१४	१२	१०	८	६	४	२	५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशमपत्रानिरायनम्

राशि.	०	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७	२८	२९	९
तु०	३०	३०	३०	३०	३०	३०	३०	३१	३१	३१	३१	३१	३१	३२	३२	३२	३२	३२	३२	३२	३३	३३	३३	३३	३३	३३	३४	३४	३४	३४	०
६	०	९	१८	२७	३७	४६	५५	४	१४	२३	३२	४१	५१	०	९	१९	२८	३७	४६	५६	५	१४	२३	३३	४२	५१	०	१०	१९	२८	९
	०	१६	३२	४८	४	२०	३६	५२	८	२४	४०	५६	१२	२८	४४	०	१६	३२	४८	४	२०	३६	५२	८	२४	४०	५६	१२	२८	४४	१६
वृ०	३४	३४	३४	३५	३५	३५	३५	३५	३५	३६	३६	३६	३६	३६	३६	३७	३७	३७	३७	३७	३७	३८	३८	३८	३८	३८	३८	३९	३९	३९	०
७	३८	४७	५७	७	१७	२७	३७	४७	५७	७	१७	२७	३७	४७	५७	७	१७	२७	३७	४७	५७	७	१७	२७	३७	४७	५७	७	१७	२७	९
	०	५८	५६	५४	५२	५०	४८	४६	४४	४२	४०	३८	३६	३४	३२	३०	२८	२६	२४	२२	२०	१८	१६	१४	१२	१०	८	६	४	२	५८
ध०	३९	३९	३९	४०	४०	४०	४०	४०	४१	४१	४१	४१	४१	४१	४२	४२	४२	४२	४२	४३	४३	४३	४३	४३	४३	४४	४४	४४	४४	४४	०
८	३७	४७	५८	९	२०	३०	४१	५२	३	१३	२४	३५	४६	५६	७	१८	२९	४०	५०	१	१२	२३	३३	४४	५५	६	१६	२७	३८	४९	१०
	०	४६	३२	१८	४	५०	३६	२२	८	५४	४०	२६	१२	५८	४४	३०	१६	२	४८	३४	२०	६	५२	३८	२४	१०	५६	४२	२८	१४	४६
म०	४५	४५	४५	४५	४५	४५	४६	४६	४६	४६	४६	४६	४७	४७	४७	४७	४७	४८	४८	४८	४८	४८	४८	४९	४९	४९	४९	५९	५०	५०	०
९	०	१०	२१	३२	४३	५३	४	१५	२६	३६	४७	५८	१	१९	३०	४१	५२	३	१३	२४	३५	४६	५६	७	१८	२९	३९	५०	१	१२	१०
	०	४६	३२	१८	४	५०	३६	२२	८	५४	४०	५६	१२	५८	४४	३०	१६	२	४८	३४	२०	६	१२	३८	२४	१०	५६	४२	२८	१४	४६
कुं०	५०	५०	५०	५०	५१	५१	५१	५१	५१	५१	५२	५२	५२	५२	५२	५२	५३	५३	५३	५३	५३	५३	५४	५४	५४	५४	५४	५४	५५	५५	०
१०	२३	३२	४२	५२	२	१२	२२	३२	४२	५२	२	१२	२२	३२	४२	५२	२	१२	२२	३२	४२	५२	२	१२	२२	३२	४२	५२	२	१२	९
	०	५८	५६	५४	५२	५०	४८	४६	४४	४२	४०	३८	३६	३४	३२	३०	२८	२६	२४	२२	२०	१८	१६	१४	१२	१०	८	६	४	२	५८
मी०	५५	५५	५५	५५	५५	५६	५६	५६	५६	५६	५६	५७	५७	५७	५७	५७	५७	५७	५८	५८	५८	५८	५८	५८	५९	५९	५९	५९	५९	५९	०
११	२२	३१	४०	४९	५९	८	१७	२६	३६	४५	५४	३	१३	२२	३१	४१	५०	५९	८	१८	२७	३६	४५	५५	४	१३	२२	३२	४१	५०	९
	०	१६	३२	४८	४	२०	३६	५२	८	२४	४०	५६	१२	२८	४४	०	१६	३२	४८	४	२०	३६	५२	८	२४	४०	२६	१२	२८	४४	१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य ११ धी ५ षट् ६ स्व २ नव ९ सुचकुजात्स्वा २ ष्ट ८ केंद्रा १।४।७।१० य
११ इज्यः॥ इंदोर्यू ७ नार्थ २ कोणा १।५ प्ति ११ षुसहज ३ नवा ९ ष्टा ८ य
११ केंद्रा १।४।७१० र्थं २ गोर्कात् ज्ञात्कोणे ९।५ द्व्या २ य ११ खा १० द्यां
१ बुधि ४ रिपु ६ षुशनेरुयं ३ त्य १२ धी ५ षट् ६ सुशस्तः॥ २६ ॥ खा १०
स्तां ७ त्या १२ हित ६ वर्जितेषुतनुतः शुक्रोविनास्ता ७ रि ६ खं १० चंद्रा
त्स्वान्मदन ७ व्यया १२ रि ६ रहितेष्वर्काद्व्यया १२ ष्टा ८ प्ति ११ षु ॥ मं
दाद्व्ये २ क १ रिपु ६ व्यया १२ स्त ७ रहितेष्वीज्यान्नवाया ११ ष्ट ८ धी ५
खे १० ज्ञात्कोण ९।५ भव ११ त्रि ३ षट् ६ सुभव ११ धी ५ त्र्यं ३ त्या १२
रि ६ धर्मेकुजात् ॥ २७॥ स्वान्मंदास्त्रि ३ ष ६ डाय ११ धी ५ षुरवितोष्टा ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इयं रत्नपुरे लग्नपत्रनिरायनं पलभा ५ । ८ चरखंडा ५१ । ४१ । १७

राशि.	०	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७	२८	२९	९०
तु.	३०	३०	३०	३०	३०	३०	३१	३१	३१	३१	३१	३२	३२	३२	३२	३२	३२	३३	३३	३३	३३	३३	३४	३४	३४	३४	३४	३४	३५	३५	०
६	०	१०	२१	३२	४३	५४	५	१६	२७	३८	३९	०	११	२२	३३	४४	५५	६	१७	२८	३९	५०	१	१२	२३	३४	४५	५६	७	१८	१०
	०	५८	५६	५४	५२	५०	४८	४६	४४	४२	४०	३८	३६	३४	२२	३०	२८	२६	२४	२२	२०	१८	१६	१४	१२	१०	८	६	४	२	५८
वृ.	३५	३५	३५	३६	३६	३६	३६	३६	३६	३७	३७	३७	३७	३७	३८	३८	३८	३८	३८	३९	३९	३९	३९	३९	४०	४०	४०	४०	४०	४०	०
७	२९	४०	५१	३	१४	२५	३७	४८	५९	११	२२	३३	४५	५६	७	१९	३०	४१	५३	४	१५	२७	३८	४९	१	१२	२३	३५	४६	५७	११
	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	२०
ध.	४१	४१	४१	४१	४१	४२	४२	४२	४२	४२	४३	४३	४३	४३	४३	४३	४४	४४	४४	४४	४४	४५	४५	४५	४५	४५	४६	४६	४६	४६	०
८	९	२०	३१	४३	५४	५	१७	२८	३९	५१	२०	१३	२५	३६	४७	५९	१०	२१	३३	४४	५५	७	१८	२९	४१	५२	३	१५	२६	३७	११
	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	०	२०	४०	२०
म.	४६	४६	४७	४७	४७	४७	४७	४८	४८	४८	४८	४८	४८	४९	४९	४९	४९	४९	४९	५०	५०	५०	५०	५०	५०	५१	५१	५१	५१	५१	०
९	४९	५९	९	९	२९	४०	५०	०	१०	२०	३१	४१	५१	१	११	२२	३२	४२	५२	२	१३	२३	३३	४३	५३	४	१४	२४	३४	४८	१०
	०	१२	२४	३६	४८	०	१२	२४	३६	४८	०	१२	२४	३६	४८	०	१२	२४	३६	४८	०	१२	२४	३६	४८	०	१२	२४	३६	४८	१२
कुं.	५१	५२	५२	५२	५२	५२	५२	५२	५३	५३	५३	५३	५३	५३	५३	५४	५४	५४	५४	५४	५४	५४	५४	५५	५५	५५	५५	५५	५५	५६	०
१०	५५	३	१२	२०	२९	३८	४६	५५	३	१२	२१	२९	३८	४६	५५	४	१२	२१	२९	३८	४७	५५	४	१२	२१	३०	३८	४७	५५	४	८
	०	३६	१२	४८	२४	०	३६	१२	४८	२४	०	३६	१२	४८	२४	०	३६	१२	४८	२४	०	३६	१२	४८	२४	०	३६	१२	४८	२४	३६
मी.	५६	५६	५६	५६	५६	५६	५६	५७	५७	५७	५७	५७	५७	५७	५७	५८	५८	५८	५८	५८	५८	५८	५८	५९	५९	५९	५९	५९	५९	५९	०
११	१३	२०	२८	३५	४३	५०	५८	५	१३	२१	२८	३६	४३	५१	५८	६	१४	२१	२९	३६	४४	५१	५९	७	१४	२२	२९	३७	४४	५२	७
	०	३४	८	४२	४६	५०	२४	५८	३२	६	४०	१४	४८	२२	५६	३०	४	३८	१२	४६	२०	५४	२८	२	३६	१०	४४	१८	५२	३६	३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तास्तुनीचाः ॥ ३१ ॥ ग्रहनीचातरंकार्यंषड्भादूनंयथातथा ॥ द्विघ्नोंशादिःस
रूपंभमुच्चरश्मिरयंस्मृतः ॥ ३२ ॥ चेष्टोच्चरश्मियोगार्धस्फुटरश्मिःप्रकी
र्त्यते ॥ नखोनैक्येदरिद्री स्याद्विंशोर्द्ध्वेसंपदन्वितः ॥ ३३ ॥ ॥ अथायुर्दान
यनमाह ॥ ॥ कलीकृत्यगृहंतत्रद्विशताप्तेर्कशेषकाः ॥ समाः शेषात्तुमासा
द्याद्वादशादिहतैः क्रमात् ॥ ३४ ॥ स्थिरारित्रेहरेत्त्र्यंशंवक्रचारंविनाग्रहः ॥
शुक्रार्कजान्यस्त्वस्तस्य अर्धंनीचर्क्षगेदलम् ॥ ३५ ॥ वक्रोच्चगेतत्त्रिगुणंद्विनि
घ्नंवर्गोत्तमस्वांशकभात्रिभागे ॥ द्वित्रिघ्नतायांत्रिगुणंसकृद्वौद्वात्रिलवोनेद्विलवो
नमायुः ॥ ३६ ॥ वामंव्ययात्सर्वदलत्रिपादपंचांगभागानशुभाहरंति ॥ सं
न्तोर्द्धमर्द्धंसबलंबहूनामेकर्क्षगानामितिसत्यवाक्यम् ॥ ३७ ॥ लग्नेबलाढ्येस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

या ११ द्विर २ केंद्रे १।४।७।१० शुभो भौमात्खा १० य ११ षडं ६ त्य १२ धीं ५
त्रिषु ३ तनोःखा १० यां ११ बु ४ षट् ६ त्र्ये ३ क १ गः ॥ ज्ञादाया ११
रि ६ नवां ९ त्य १२ खा १० ष्ट ८ सुभृगोरंत्या १२ य ११ षट् ६ संस्थित
श्चंद्रादाय ११ रिपु ६ त्रि ३ गोसुरगुरोरंत्या १२ य ११ धीशत्रुगः ॥ २८ ॥
स्थानानियान्युक्तानि तेषुरेखा अन्यत्राबिंदुः ॥ २९ ॥ इतिरेखाष्टकम् ॥ ॥
अथ रश्मिसाधनमाह ॥ ॥ सत्रिभंसायनार्कसूर्यस्यव्ययकेंदुचंद्रस्यमध्य
स्पष्टयोर्योगार्धंचलोच्चेहीनंभौमादिकानांचेष्टाकेंद्रम् ॥ तद्रसोर्ध्वंमिनभाच्छु
द्धंशेषर्क्षैसैकंअंशाद्याद्विघ्नाचेष्टारश्मिः ॥ ३० ॥ सूर्यात्स्युरुच्चाः क्रियगोमृगस्त्री
कर्कांत्यजूकादशभिर्हुतांशैः ॥ गजाश्विभिर्बाणकुभिः शरेभैर्नखैर्लवैरस्तग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शा ॥ ॥ जनुर्भैस्त्रियुक्ते ष्टतष्टेदशामंगलापिंगलाधान्यकाभ्रामरीच॥ततोभद्रि
कोल्काचसिद्धाक्रमात्संकटासन्निषिद्धासमैकैकवृद्धाः ॥ ४४ ॥ शुक्लेंगेर्कस्य
होरायांदिवाविंशोत्तरीदशा ॥ कृष्णेचंद्रस्यहोरायांरात्रावष्टोत्तरीमता ॥४५॥
अन्यथायोगिनीकार्यासदाकार्यामहादशा ॥ चंद्रस्यलिप्ताखाभ्रेभै ८००
र्लब्धास्युर्गततारकाः ॥ ४६ ॥ शेषाहतास्वपाकाब्दैर्हारेणाप्तासमादिका ॥ ग
तादशासापाकाब्देउंनिताभोग्यसंज्ञिता ॥ ४७ ॥ दशादशाहताकार्यास्वस्व
मानेनभाजिता ॥ लब्धमंतर्दशाज्ञेयावर्षाद्याक्रमशोबुधैः ॥ ४८ ॥ अंतर्दशा
यादिवसाः स्वस्ववर्षैः क्रमाद्धताः ॥ स्वमानाब्दैर्हताप्राप्ताविदशादिवसा
दिकाः ॥ ४९ ॥ ऊर्ध्वंस्थाप्योजन्मशाकःशकाधोजन्मोत्पन्नःपद्मिनीप्राणना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हितंचवर्षैस्तुल्यैर्विलग्नस्यगृहैर्विधेयं ॥ भागादिनाभास्करसंगुणेनयुक्तंदिना
द्यंभवतिस्फुटंतत् ॥ ३८॥ चरभवनेष्वाद्यंशाः स्थिरेषुमध्याद्विस्वभावेष्वंत्याः
वर्गोत्तमाः ॥ ३९ ॥ स्वर्क्षकेंद्रोत्तमांशस्थाः स्वांशमित्रांशकान्विताः॥ परिपू
र्णबलैर्युक्ताःस्वोच्चमूलत्रिकोणगाः॥४०॥ स्वामीगुरुज्ञवीक्षितयुताहोराबलोत्क
टाभवति ॥ ४१ ॥ इत्यायुर्दा ॥ ॥ अथ दशासाधनमाह ॥ ॥ तत्रादौविं
शोत्तरी ॥ ॥ रवेःषडिंदोर्दशसप्तभूभुवोगजेंदवोगोर्धिषणस्यषोडश ॥ श
नेर्नवाब्जानगभूमिताविदोनगास्तुकेतोरनलान्नखाः कवेः ॥ ४२ ॥ ॥ अ
ष्टोत्तरी॥ ॥ र वेःषडिंदोस्तिथयोष्टभूभुवोनगेंदवोज्ञस्यशनेर्दिशोगुरोः॥नवें
दवोगेरवयःसमासितेधराश्विनोवेदहुताशभेशिवात् ॥ ४३॥ ॥ योगिनीद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णः ॥ चक्रघ्नंनृपखाब्ध्याढ्यं ४०१६ ब्रह्मतुल्योगणोभवेत् ॥ ५४ ॥ इत्यागा
म्यब्दप्रवेशः ॥ ॥ विद्यालयेमालवसंज्ञदेशेरत्नावतीरम्यनिवासवासी ॥
औदुंबरःपाठकवंशजातः सुपूज्यविद्यान्वितनंदरामः ॥ ५५ ॥ तत्पौत्रमंत्रशा
स्त्रज्ञरेवाशंकरसूनुना ॥ महादेवेनरचितापत्रीमार्गप्रदीपिका ॥ ५६ ॥
माघस्यशुक्लपंचम्यांशाकेमाझछकै १७९५ मिंते ॥ संपूर्णाभार्गवेवारेपत्री
मार्गप्रदीपिका ॥ ५७ ॥ ॥ इति महादेवकृतपत्रीमार्गप्रदीपिकासंपू
र्णा ॥ ॥ ॥ श्रीरस्तु ॥ शुभमस्तु ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थः ॥ तद्वर्षाद्यंतईशाब्दादियुक्तंतस्मिन्शाकेस्पष्टसूर्योदशांते ॥५०॥ ॥ इति
दशा ॥ ॥ अथागाम्यब्दसाधनम् ॥ ॥ सौरंवर्षंदिनाद्येनहंतेताब्दाःकतु
ल्यजः ॥ जन्मोत्थद्युगणेनाढ्याईज्याद्वर्षमुखेगणः ॥५१॥ ॥ विश्वनाथः॥
गणोधःस्त्रियुक्स्वाक्षिगोंगां ६९२ शयुक्तास्त्रिषट्भक्तआप्तावमैर्युक्तऊर्ध्वः॥
खरामैर्हतासैकशेषंतिथिःस्यात्फलंमासवृंदंततोधोद्विनिघ्नात् ॥ ५२ ॥ रसां
गान्वितस्वेभनेत्रांक ९२८लब्धाविहीनादगांगा ६७ प्तभागोनऊर्ध्वः ॥ हतो
भानुभिः १२ शेषकंयातमासागताब्दाःफलंसेषुखेशं ११०५ शकः स्यात
॥ ५३ ॥ गणेशदैवज्ञः ॥ ॥ त्रिश्वेंद्वग्न्यरुणै १२३११३ र्युक्तःग्रहलाघवयोग

१—३६५ । १५ । ३१ । ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यब्दप्रवेशाध्यायः १ इष्टवारादिषुपातितगतपंक्तिवारादिषुशेषोदिनाद्यो
धनम् १ आगामिपंक्तिवारादिषुपातितेष्टवारादिषुशेषोदिनाद्यमृणम् २
दिनाद्येगतिघ्नेषष्ट्याप्तैंशादिस्तेनपंक्तिस्थग्रहेसंस्कृतेस्पष्टः खगोवक्रेतुवैपरी
त्यंसंस्कृतौ ३ गतर्क्षनाड्यःषष्टिशुद्धाःपृथक्स्थाप्याः ४ एकत्रेष्टघट्याढ्या
भयातम् ५ इतरत्रेष्टर्क्षघट्याढ्याभभोगः ६ षष्टिघ्नंभयातंभभोगेनाप्तंस्पष्टं
भयातम् ७ गतर्क्षसंख्याषष्टिघ्नाभयातान्विताद्विघ्नानवाप्तांशादिरिंदोः ८
खखाष्टाभभोगेनभक्ताअंशात्मिकागतिः ९ जनुरुदयभादिषुभांकमात्रेगता
ब्दांकयोगेर्कभक्तेमुन्था १० सूर्यैकांशभोगकालेमुन्थापंचकलाभुनक्ति ११
नागक्षांगोङ्कदस्राग्निदंताः क्रमोत्क्रमामेषादीनांलंकोदयपलानि १२ स्त्रचरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ महादेवकृतवर्षदीपकप्रारंभः ॥

श्रीगणेशाय नमः ॥ ॥ श्रीगणेशंगुरुंनत्वाशुद्धांश्रीभुवनेश्वरीम् ॥ महादेवं महादेवःकुरुतेवर्षदीपकम् ॥ १ ॥ प्रतिवर्षजन्मग्रहोदयान्पूर्वंजानीयात् ॥ ॥२॥सौरवर्षारंभाच्छकप्रवृत्तिर्वेदितव्या ॥३॥ इष्टशकेजनुः शकहीनेगताब्दाः ॥ ४ ॥ जन्मार्कतुल्योर्कोयत्समयेवर्षप्रवेशस्तत्रैव ॥५॥याताब्दाः सप्ताधिकस हस्रहताः खाभ्रेभाप्ताजन्मवारादियुतावर्षप्रवेशवारादिबोधकाः ॥ ६ ॥ शिव घ्नागताब्दाःस्वखाद्रींदुलवाढ्याजन्मतिथ्यन्विताास्तेषुखाग्निशेषेब्दवेशतिथिः ॥ ७ ॥ क्वचिद्भूनेभूयुतेवा॥८॥जन्मार्कांशादियुग्वारतोब्दप्रवेशानिर्णयः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वारंयोजितश्चेल्लग्नादयस्ससंधयः षड्भावाः २३ एतेषड्भोनाःशेषाःषड्भावाः २४ ग्रहस्स्वाधिष्ठितभावारम्भसन्धितोन्यूनोगतभावोत्थंताद्दाग्विरामसंध्यधिकउत्तरभावोत्थंफलंप्रयच्छति २५ ग्रहसन्ध्यंतरंनखघ्नंभावसंध्यंतरेणाप्तंफलंविंशोपकाः २६ इतिग्रहभावाध्यायः २ वक्राच्छज्ञचंद्रार्कज्ञसितारेज्यार्किमंदेज्यामेषाद्यधिपाः १ मेषगोनक्रकन्याककर्ात्यतुलादिवाकराद्युच्चर्क्षादशमतृतीयाष्टाविंशपञ्चदशपंचमसप्तविंशविंशाः क्रमेणपरमोच्चभागाः २ स्वोच्चसप्तमर्क्षास्तथांशाःक्रमशोनीचर्क्षाःपरमनीचभागाः ३ मेषेङ्गाङ्गाष्टपंचेषवोगुरुशुक्रज्ञारार्कजानांहद्दांशाः ४ वृषेष्टांगेभशराग्नयःसितज्ञेज्यमंदाराणाम् ५ द्वन्द्वेङ्गाङ्गशराद्रयङ्गांशाज्ञशुक्रेज्यारमन्दा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्धीनयुताःस्वदेशोदयाः १३ उदयास्त्रिंशदुद्धृतामेषादीनांपलाद्यागतयः
१४ शकेवेदवेदाब्ध्यूनेऽयनांशकलाः १५ अयनांशहीनेचक्रांशेऽवशिष्टां
शाधस्ताच्छून्यत्रयंलेख्यम् १६ ततस्त्रिंशत्त्रिंशदंशकोष्टकेषुमेषादिगतियो
गेभावांगपत्रे १७ भानुभांशजंलग्नपत्रकोष्टकमिष्टान्वितंतन्न्यूनकोष्टजंभांशं
भानुकलाद्यन्वितंतत इष्टाल्पकोष्टांतरेल्पैष्यकोष्टांतरेणाप्तमंशादिफलंपूर्वत्र
योजितंलग्नंभवेत् १८ लग्नपत्रस्थभानुभांशजकोष्टंस्वाधःस्थितसप्तमकोष्ट
काद्धीनंदिनमानम् १९ तच्चषष्टिशुद्धंरात्रिमानं २० सूर्योदयादिष्टेरात्र्यर्द्ध
युतेतुर्यभावेष्टम् २१ एतदादायभावपत्रतोलग्नवच्चतुर्थभावसाधनम् २२ ल
ग्नशोध्येततुर्यषष्ठांशोलग्नेपञ्चवारंयोज्यस्ततस्सषष्ठांशोरूपाच्छुद्धस्तुर्येपंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुम्भेषुतुलाद्याःकर्कालिमीनेषुककर्याद्यानवांशाः १७ गृहोच्चहद्दाद्रेष्काणन
वांशाःपञ्चवर्गाः १८ योग्रहोयस्यत्र्यायत्रिकोणान्यतमगःससुहृत् १९ केंद्र
गस्तथाशत्रुः २० शेषस्थानस्थःसमः २१ स्वग्रहेत्रिंशल्लवाःसुहृद्भेसार्द्धद्वाविं
शतिः सममेतिथयः शत्रुभेसार्द्धसप्तबलम् २२ यथाभवेत्षड्भालपंतथा
नीचखेटान्तरेतद्भागाङ्कभागस्स्वोच्चबलम् २३ स्वहद्दायांतिथ्यंशामित्रह
द्दायांसपादैकादशसमहद्दायांसार्द्धसप्तशत्रुहद्दायांपादोनवेदांशाबलम् २४
स्वद्रेष्काणेदशमित्रद्रेष्काणेसार्द्धनगाः समद्रेष्काणेपञ्च शत्रुद्रेष्काणेसार्ध
यमाअंशाबलम् २५ स्वनवांशेपंचामित्रांशेपादोनवेदाःसमांशेसार्धयमारि
प्वंशेसपादैकोबलम् २६ पञ्चवर्गबलैक्येवेदोद्धृतेलब्धाविंशोपकात्मकंबल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम् ६ कर्कैन्द्रयंङ्गाङ्नगाऽब्ध्यंशाभौमाच्छज्ञेज्यार्कीणाम् ७ सिंहेङ्गेष्वद्रय
ङ्गाङ्गांशाइज्यासितार्किज्ञाराणाम् ८ कन्यायांनगाशाऽब्धयगाक्ष्यंशाज्ञाच्छे
ज्यरार्कीणाम् ९ तुलेङ्गाष्टनगाद्रयक्ष्यंशामन्दज्ञेज्यसितारांणाम् १० कीटे
सप्ताऽब्ध्यष्टशराङ्गांशावक्राच्छज्ञेज्यार्कीणाम् ११ चापेकैष्वाऽब्धिशराऽब्ध्यंशा
इज्यासितज्ञारमन्दानाम् १२ नक्रेनगनगाऽब्ध्यष्टवेदांशाज्ञेज्याच्छार्किवक्रा
णाम् १३ घटेनगांगाद्रिपंचेषवःशुक्रज्ञेज्यारमंदानाम् १४ झषेर्काऽब्ध्यग्न्य
ङ्गाक्ष्यंशाःसितेज्यज्ञारार्कीणाम् १५ ग्रहेप्रथमद्रेष्काणगेतद्राशौवह्नियोगे
मध्यद्रेष्काणगेतद्राशौसैकेन्त्यद्रेष्काणगेरसयोगेतद्राशौमुनिभक्तेशेषेऽर्का
द्याःपतयः १६ मेषासिंहचापेषुमेषाद्यावृषकन्यानक्रेषुमृगाद्यायुग्मतुला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशगुणितेतद्दशांशादिभादिस्स्फुटः ४३ स्वभादर्क्कांशाः ४४ स्वमित्रोच्चशुभ-
वर्गाःशुभाअन्येधमाः ४५ वर्गेशेस्वर्क्षगेविंशतिर्मित्रर्क्षेतिथयःसमर्क्षेदशरि-
पुभेपञ्चबलम् ४६ द्वादशवर्गजबलैक्येर्कभक्तेविंशोपकाः ४७ स्वभेशतंक-
लानांमित्रभेपञ्चाशतशत्रुभेपंचविंशतिः ४८ तदैक्येषष्टिभक्तेविंशोपकाइ-
त्येके ४९ स्वभस्वोच्चर्क्षान्यतरस्थितौग्रहस्यप्रथमंहर्षपदम् ५० गोत्रिषट्
कोशबाणान्त्यगेषुसूर्यादिषुद्वितीयम् ५१ सूर्यारिज्यानराःशेषाःस्त्रियः ५२
दिनेपुमान्रात्रौस्त्रीतृतीयम् ५३ तुर्यभतस्त्रिषुत्रिषुनृस्त्रियौतुर्यम् ५४ चतुर्ष्वेषु
प्रत्येकंपंचविंशोपकाबलम् ५५ इतिबलाध्यायः ॥ ३ ॥ पञ्चयोनद्दश्येद्विदि
ग्भशेषेतद्विनाअर्धास्तिथिशुद्धास्तथात्र्यंकशेषेभोग्यांशाएववेदाष्टशेषेचसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् २७ षडल्पोल्पबलीरव्याधिकःपूर्णबली २८ चन्द्रार्कौरिज्याःपरस्परंमि
त्राणिशेषाश्च २९ इतरथारिपवः ३० स्वस्वाधिकारबलार्धंमित्रर्क्षेबलंतदर्धं
शत्रुभेशेषंप्राग्वदित्येके ३१ भादयोर्कांशान्ताद्वादशवर्गाः ३२ भाद्यधिपाः
प्राग्वत् ३३ विषमर्क्षेसूर्यशशिनोःसमर्क्षेव्यत्ययेनहोरा ३४ स्वेषुनवर्क्षेशाद्द्रे
ष्काणपाः ३५ केचित्प्राग्वत् ३६ स्वर्क्षजकेन्द्रेशावेदांशपाः ३७ ओजर्क्षे
भौमार्कीज्यज्ञसिताः समर्क्षेप्रतिलोमतः शरांशपाः ३८ विषमर्क्षेमेषाद्याः
समभेतुलाद्याःषष्ठांशाः ३९ ओजभेस्वभाद्यायुग्मर्क्षेतत्सप्तमर्क्षाद्याः सप्तमां
शाः ४० चरभेजाद्याःस्थिरभेचापाद्याउभयभेसिंहाद्याअष्टमांशाः ४१ नवां
शाःप्राग्वत् ४२ यस्यग्रहस्यदशांशैकादशांशौकर्तव्यौतदीयभादौदशैका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भानुनार्कजेराजतातौ १४ शुक्रोनेन्दौमाताकान्तिश्च १५ इज्योनमंदेजी
वितोपायौ १६ ज्ञोनारेकर्म १७ सदाचन्द्रोनाङ्गरोगः १८ लग्नपोनेन्दौकामः
कर्कांगेतुसदालग्नेशोनार्के १९ वक्रोनेज्येकलिक्षमे २० मंदोनेज्येज्ञान्विते
शास्त्रम् २१ सदाचन्द्रोनज्ञेबंधुः २२ ज्ञोनेन्दौपराश्रयः २३ सदाचन्द्रोनाष्ट
मेमन्दान्वितेमृतिः २४ सदाधर्मेशोनधर्मेधनेशोनधनेलाभेशोनलाभेदेशान्तर
धनलाभाः २५ सदासूर्योनभृगौपराङ्गना २६ मंदोनेन्दौदास्यम् २७ सदा
बुधोनचंद्रेवाणिज्यम् २८ दिवार्कोनमन्देसूर्यभपयोगेरात्रौचंद्रोनमन्देचन्द्र
र्क्षेसयोगेकार्यसिद्धिः २९ कोणोनशुक्रेविवाहभार्ये ३० ज्ञोनेज्येआधानम्
३१ सदाचन्द्रोनमन्देषष्ठान्वितेसंतापः ३२ सदाभौमोनसितेश्रद्धा ३३ सदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वौ अंशाः पञ्चवेदतः शुद्धास्तथैवतर्काभ्रशेषेंशाद्विघ्नाः षष्टिशुद्धाः कलाद्याद्द
ष्टिरन्यक्षेंतदभावः१ इतिदृष्टयध्यायः॥ ४ ॥ सर्वत्रसहमसाधनेशुद्ध्याश्रयतः
शोध्यहीनेक्षेपकयुक्तेसहमासिद्धिः १ शोध्यभादेरारभ्यशुद्ध्याश्रयभादितो
र्वाक्क्षेपाभावेसिद्धसहमभंसैकंकार्यम् २ क्षेपकानुक्तौलग्नंयोज्यम् ३ समया
नुक्तौरात्रौशोध्यशोधकौव्यस्तौकार्यौ ४ सूर्योनेचंद्रेपुण्यसहमः ५ चन्द्रोना
र्केगुरुज्ञानज्ञातिसहमाः ६ पुण्योनेज्येयशोदेहसैन्यघातम् ७ पुण्योनज्ञाने
शुक्रान्वितेमित्रम् ८ कुजोनपुण्येमाहात्म्यधैर्यशौर्यम् ९ शुक्रोनमंदेइच्छा
१० लग्नेशोनारेसामर्थ्यंञ्चेदंगेशोभौमस्तदाजीवाच्छोधनीयः ११ सदामं
दोनजीवेभ्राता १२ दिनेचन्द्रोनेज्येसार्केरात्रावर्कोनजीवेसेन्दौगौरवम् १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५६ सदाबुधोनेन्दौसत्यम् ५७ स्वेशेनशुभेनवाब्देशेनवायुतंदृष्टंवासहमंस्वेश
पाकेवृद्धिदमन्यथाविपरीतम् ५८ प्रथमंजन्मकालीयसद्मबलाबलंजानीया
त् ५९ तत्रयानिबलीयांसितेषामेवसंभवः ६० प्रतिवर्षसम्भवतापन्नान्येव
कार्याणिनेतराणिनैष्फल्यात् ६१ प्रश्नेपृच्छकेष्टकार्यसहमंकार्यम् ६२ इ
तिसहमाध्यायः ॥ ५ ॥ अथाब्देशनिर्णयः ॥ दिनेर्कशुक्रार्किसितेज्यचन्द्र
ज्ञारार्किभौमेज्यचन्द्रा रात्रौ जीवेन्दुज्ञारार्कसितार्किशुक्रमन्दारेज्यचन्द्रामे
षादित्रिराशिपाः १ जन्माङ्गेशोवर्षाङ्गेशस्त्रिराशिपोमुन्थेशोदिनेर्कभेशो
निशीन्दुभेशश्चेतिपञ्चाधिकारिणः २ एषांबलाधिकोङ्गद्रष्टावर्षेशः ३ बल
साम्येतुदृष्ट्यधिकः ४ उभयसाम्येधिकाधिकारी ५ त्रितयसाम्येमुन्थेशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुण्योनज्ञानेप्रीतिः ३४ मन्दोनारेज्ञान्वितेजाडचम् ३५ शश्वज्ज्ञोनारेव्यापा
रः ३६ चन्द्रोनार्कजेजलपातः ३७ अर्कजोनभौमेशत्रुः ३८ बुधोनपुण्येज्ञान्वि
तेदारिद्र्यम् ३९ शश्वच्चन्द्रोनजीवशुक्रयोःपुत्रौ ४० दिनेर्कोनस्वोच्चेरात्रौच
न्द्रोनस्वोच्चेमंडलेशः ४१ मन्दोनसार्द्धत्रिभेजलपथः ४२ मन्दोनपुण्येबन्धन
म् ४३ अर्कोनपुण्येलाभान्वितेश्वः ४४ सदाजीवोनेन्दौगजः ४५ रिपुसहमो
नान्त्येपशुः ४६ शश्वत्कोणोनाङ्गारयोर्व्यसनकृषी ४७ सदापुण्योनार्कजेम
न्दयुतेबंधमोक्षः ४८ सदेज्योनपुण्येसारेदुःखम् ४९ कुजोनमन्देउष्ट्रः ५० म
न्दोनार्कैपितृव्यः ५१ षष्ठेशोनषष्ठेसान्त्येआखेटः ५२ ज्ञोनेन्दौभृत्यः ५३
अर्कोनेज्येबुद्धिः ५४ सदातुर्येशोनलग्नेनिधिः ५५ सदाशुक्रोनकोणेऋणम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यकृतौप्रथमखेटस्ययथास्थितांशाः ६ ततःप्रथमंद्वितीयाद्द्वितीयंचतृतीया
दित्यादिक्रमेणशोधयेत् ७ इमेपात्याः ८ वर्षदिनानिपात्यैक्येनभजेत्ल
ब्धंदिनाद्यंध्रुवम् ९ ध्रुवेणस्वस्वपात्यांशाहतादिनाद्यादशा १० यस्यदशा
मानंपात्यांशैक्येनभक्तंतल्लब्धदिनाद्येन स्वस्वपात्यांशाहताः पाकेशतोन्तर्द
शादिनाद्याः ११ जन्मभसंख्यायांगताब्दान्योजयेत्द्व्यूनानवोद्धृताःशेषेसूर्यं
द्वारराहिज्यमन्दज्ञकेतुशुक्राणामेकादिक्रमतोदशाद्याः १२ धृतित्रिंशदेक
विंशतिचतुःपञ्चाशदष्टचत्वारिंशन्न्यूनषष्ट्येकपंचाशदेकाविंशतिषष्टिसंख्या
तानिसूर्यादीनांमुग्धादशादिनानि १३ भगणोनजन्मेंदुलिप्ताःखखाष्टशेषि
ताआद्यदशादिनहताःखाभ्रेभाप्तादिनादिभोग्यदशा १४ दशादशाहताःप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६ पञ्चानामपिमध्येकोपि नाङ्गंपश्येत्तदा मुन्थेशवर्षलग्नेशौयश्चोक्ताधिका
र्यन्तःपातीतदितरोपिजनुस्समये वर्षांगराशिद्रष्टा भवेत्तदैतेषांयोधिकबलः
सवर्षेशः ७ त्रयाणांबलसाम्येमुन्थेशः ८ उक्तरीत्याचन्द्रस्याब्दप
त्वप्राप्तौतदित्थशालिनोब्दपत्वमन्यथातद्गेशस्येत्येके ९ वर्षांगेशोरा
जासमयेशःसेनापतिर्मुन्थेशोमंत्रीजन्मांगेशः पुरेशास्त्रिराशिपो रससस्यधा
त्वधिपइत्येके॥ १० ॥ इत्यब्देशनिर्णयाऽध्यायः ॥ ६ ॥ अथ दशावि
चारः ॥ सलग्नखेटानांमध्येयोन्यूनांशोभवेत्तस्यांशादयः प्रथमंलेख्याः
१ ततस्तदधिकांशानामंशाद्याःक्रमशोलेख्याः २ इमेहीनांशसंज्ञकाः ३
द्वयोरंशादिसाम्येबलाधिकस्यपूर्वादशा ४ बलसाम्येल्पगतिकस्य ५ पा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यादिनदशा ९ मुग्धांगभागमिताघट्याादयः १० प्रश्नांगस्यभंविनालिप्ताः कृत्वाखतिथ्युद्धृताल्लब्धोभादिमध्येऽङ्गैर्युतामुन्थार्थेस्पष्टंलग्नम् ११ प्रश्नां गात्तुर्येंशोजन्मेशोज्ञेयः १२ प्रश्नपत्रतोवर्षकरणेइयान्विशेषः १३ पराशर कुलोत्पन्नोमहादेवउदुंबरः॥पाठकाख्यचणोरत्नललामपुटभेदने १ रेवाशंक रसंभूतिःकृतवान्वर्षदीपकम् ॥ त्र्यंकाद्रीन्दुमितेशाकेकन्यार्कप्रथमेदिने॥२॥ इतिमासाद्यध्यायः ॥ ८ ॥ इति श्रीज्योतिर्विच्छ्रीमहादेवकृतवर्षदीपकं समाप्तम् ॥ ॥ श्रीवेंकटेश्वरार्पणमस्तु ॥ ॥ ॥ ॥ ॥

इदं पुस्तकं श्रीकृष्णदासात्मजखेमराजेन स्वकीये " श्रीवेङ्कटेश्वर "
मुद्रायन्त्रालयेऽङ्कितम् । संवत् १९५१ शके १८१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ट्यधिकत्रिशतेनाप्ताअन्तर्दशादिनाद्यामुग्धायाम् १५ ॥ इतिदशाऽध्यायः ॥७॥ ॥ अथमासादिः ॥ गतमाससंमितराशियुक्तजन्मार्कतुल्यार्केमासप्रवेशः १ गतदिनसम्मितांशामासार्केयुतास्तत्सदृशेर्केदिनप्रवेशः २ मासार्कासन्नंपत्त्यर्कयोरंतरस्यकलाः कृत्वार्कभुक्तिभक्ताप्तदिनादिपङ्क्तिवारादिमध्येपङ्क्त्यर्कादधिकेर्केयुक्तेन्यथाहीनेमासप्रवेशकालः ३ एवंदिनप्रवेशकालः ४ उभयत्रस्पष्टाःखगभावादयश्चकार्याः ५ पात्यैक्येनमासदिनानिभजेल्लब्धेनस्त्रस्वपात्यांशाहतादिनाद्यामासदशा ६ मासप्रवेशर्क्षेसप्तयुतेङ्कहृतेएकादिशेषेअ॰चंभौराजीशबुकेशूनामाद्यादशा ७ मुग्धार्कभागमितादिनाद्यामासदशा ८ दिनप्रवेशस्पष्टलग्ननक्षत्रेसप्तयुतेङ्कहृतेएकादिशेषेप्रागुक्तानामा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गविशिष्टेशनौचनकक्ष्याऱ्हासः अन्यथातुऱ्हासोभवत्येव १२ अत्रान्याचार्यमतमेवानुभवसिद्धमिति सर्वम
तसिद्धांतकक्ष्यावृद्धियोगांतरेणोपदिशति १३ लग्नसप्तमयोर्गुरौसातितथापापदृष्टिपापयोगरहितशुभदृष्टिशुभ
योगसहितेगुरौचकक्ष्यावृद्धिरित्यर्थः तथाचानायुषोल्पायुर्वृद्धिः अल्पायुषोमध्यायुर्वृद्धिः मध्यायुषोदीर्घायुर्वृ
द्धिः दीर्घायुषःषण्णवत्यूर्द्धमायुर्भवतीत्यर्थः आयुषिप्रमाणसिद्धेपूर्णेमरणमतांतरापिमरणंभवतीत्याकांक्षयामा

केवलपापदृग्योगिनिच १३ पितृलाभगेगुरौकेवलशुभदृग्योगिनिचक
क्ष्यावृद्धिः १४ मलिनेद्वारबाह्येनवांशेनिधनंद्वारद्वारेशयोश्चमालिन्ये १५

ह १४ द्वारंबाह्यंचेतिसमाहारद्वंद्वः दशाश्रयोद्वारंततस्तावतिथंबाह्यमित्यग्रेवक्ष्यति तस्मिन्पाकभोगापरपर्या
येद्वारबाह्येमलिने स्वयंपापेपापयुक्तेपापदृष्टेचसतिद्वारबाह्ययोर्नवांशेनवांशदशायांनिधनंभवति अत्रनवांश
पदेनप्रतिराशिनवांशमितानवाब्दाग्राह्याः विषमेतदादिर्नवांशइत्यादिनावक्ष्यमाणानवांशदशोतिजन्मकाले
आद्यदशाश्रयराशेर्यावत्संख्याकोद्धरराशिस्तस्मात्तावत्संख्याकोराशिर्बाह्यमुच्यते द्वारबाह्ययोर्द्वयोरपिम

Sampurnanand Sanskrit University, Balmeeki Campus ...

CC-0. In Public Domain. Digitization by eGangotri

अथहद्दाचक्रम् ।

०	१	२	३	४	५	६	७	८	९	१०	११	
६ गु	८ शु	६ बु	७ मं	६ गु	७ बु	६ श	७ मं	१२गु	७ बु	७ शु	१२शु	ऽ स्वा
६ शु १२	६ बु १४	६ शु १२	६ शु १३	५ शु ११	१०शु १७	८ बु १४	४ शु ११	५ शु १७	७ गु १४	६ बु १३	४ गु १६	ऽ-स्वा
८बु २०	८ गु २२	५ बृ १७	६ बु १९	७ श १८	४ बृ २१	७ गु २१	८ बु १९	४ बु २१	८ शु २२	७ गु २०	३ बु १९	ऽ-स्वा
५ मं २५	५ श २७	५ मं २४	७ बृ २६	६ बु २४	७ मं २८	७ शु २८	५ गु २४	५ मं २६	४ श २६	५ मं २५	९ मं २८	ऽ-स्वा
५ श ३०	३ मं ३०	६ श ३०	४ श ३०	६ मं ३०	३ श ३०	३ मं ३०	६ श ३०	४ श ३०	४ मं ३०	५ श ३०	२ श ३०	ऽ-स्वा

अथमुग्धादिदशा ।

सू	चं	मं	रा	गु	श	बु	के	शु
०	१	०	१	१	१	१	०	२
१८	०	२१	२४	१८	२७	२१	२१	०
१	२	१	४	४	४	४	१	५
३०	३०	४५	३०	०	४५	१५	४५	०
३	५	३	९	८	९	८	३	१०
०	०	३०	०	०	३०	३०	३०	०
०	०	०	०	०	०	०	०	०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वष्टमेशौतयोर्यः प्राणीबलीतस्मिन्कंटकादिस्थेलग्नादिकेन्द्रपणफरापोक्लिमस्थेत्रिधायोगोभवति लग्नादिकेन्द्र गेतस्मिन्दीर्घायुर्योगःपणफरस्थेमध्यायुःआपोक्लिमस्थेत्वल्पायुरित्यर्थः एवंस्वतश्चकारकादपियोगत्रयमिदंबो ध्यम् तथाचकारकात्तत्सप्तमाच्चयावष्टमेशौतयोर्योबलीतस्मिन्कारककेंद्रादिस्थेदीर्घमध्याल्पायुर्योगाभवंतीत्य र्थःअथैतद्योगानामपवादमाह १९ योगाज्जन्मलग्नसप्तमात्सप्तमेनवमेस्वस्मिन्कारकेसतिविपरीतंपितृलाभेत्या दिसूत्रोपदिष्टयोगानस्युःकिंतुदीर्घंचेन्मध्यंमध्यंचेदल्पंअल्पंचेन्नकिंचिदित्यर्थः वैपरीत्यंतुदीर्घंचेदल्पंअल्पंचेद्दी

योगात्समेस्वस्मिन्विपरीतं २०

र्घंमध्यंचेन्मध्यमेवेतितुसंप्रदायविदः आयुर्दायविषयेविशेषमाहुर्वृद्धाः एकोष्टमेशः स्वोच्चस्थः पर्यायार्द्धंप्रय च्छति नीचस्थोनाशयेत्पर्यायार्द्धमायुषिनिश्चिते। नीचरंध्रेशसंयुक्ताः पर्यायार्द्धंपृथक्पृथक्॥ गृहाविनाशयंत्येवं निर्णीतिपरमायुषि उच्चरंध्रेशसंयुक्तग्रहैः प्रत्येकमुन्नयेत्एकैकमर्द्धपर्यायंपरमायुषिनिश्चितेअयमर्थः आयुः पि तृदिनेशाभ्यामित्यनेनाष्टमेशउच्चस्थश्चेत्स्वपर्यायार्द्धंस्वदशार्द्धमधिकंददाति नाथांताइतिरीत्यायावदायुरात्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिनत्वएवनिधनंनत्वन्यतरस्य एवंद्वारराशेर्द्वारेशस्यचमालिन्येसतिद्वारतदीशाश्रयराशिनवांशदशायांनिध
नंभवतीत्यर्थः १५ निधनयोगापवादमाह द्वारबाह्यद्वारेशानांशुभदृष्टिशुभयोगसत्वेद्वारबाह्यद्वारेशाश्रयनवां
शदशायांनिधनंनेत्यर्थः १६ अथशुभदृग्योगाभावेपिनवांशकालनिधनापवादमाह जन्मलग्नादष्टमेशेउच्चंगते
सत्युक्तनिधनयोगेसत्यपिदशायांमरणमुक्तम् तदुत्तरंनवांशवृद्धिः नवाब्दवृद्धिरित्यर्थः ननुराशिवृद्धौसत्यांकुत्र

शुभदृग्योगान्न १६ रोगेशेतुंगेनवांशवृद्धिः १७ तत्रापिपदे
शदशांतेपदनवांशदशायांपितृदिनेशात्रिकोणेवा १८ पितृला
भरोगेशेप्राणिनिकंटकादिस्थेस्वतश्चैवंत्रिधा १९

राशौनिधनमितिशंकायामाह १७ तत्रापिवृद्धिपक्षेपिपदस्यलग्नारूढस्येशः स्वामी तदाश्रयीभूतराशेर्दशायांअंते
निधनंस्यात्अथवा जन्मलग्नारूढनवांशदशायांनिधनंस्यात् किंवालग्नेशाष्टमेशाभ्यांत्रिकोणेलग्नपंचमनवमा
न्यतरराशिदशायामंतर्दशायावानिधनंभवतीत्यर्थः १८अथप्रकारांतरेणदीर्घादियोगत्रयमाह लग्नात्सप्तमाच्चया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल्याद्दिद्वादशयोः षष्ठाष्टमयोश्चपापयोगेसतिपापमध्यवर्तित्वंभवति एवंलग्नसप्तयोकोणपापयोगेवाकोणेषुत्रि कोणेषु लग्नपंचमनवमेषुसर्वत्रपापयोगेवाकक्ष्याऱ्हासोभवति २३ स्वस्मिन्कारकेप्येवंलग्नकुंडलीवद्भवति अयमर्थः कारकराशेस्तत्सप्तमराशेश्चपापमध्यत्वेएकयोगः कारकतत्सप्तमयोस्त्रिकोणेसर्वत्रपापयोगेसातिद्वि तीयोयोगः २४ कक्ष्याऱ्हासायतस्मिन्कारकेपापेनीचेसातिकक्ष्याऱ्हासः कारकेपापेऽतुंगेनुच्चराशौअशुभसंयुक्ते

स्वस्मिन्नप्येवं २४ तास्मिन्पापेनीचेऽतुंगेऽशुभसं
युक्तेच २५ अन्यदन्यथा २६ गुरौच २७

चसतिकक्ष्याऱ्हासोभवतीतितृतीयोयोगः अथकक्ष्याऱ्हासयोगेअपवादमाह २५ अन्यथालग्नसप्तमयोः कारकसप्तमयोर्वाशुभग्रहमध्यगतत्वेलग्नकारकाभ्यांकोणेषुशुभयोगेवाकारके शुभेऽनीचेवाकारके शुभेतुंगे शुभसंयुक्तेचवा अन्यत्कक्ष्यावृद्धिरित्यर्थः तथाचसर्वत्रयोगेपापात्मकेकक्ष्याऱ्हासः शुभात्मकेकक्ष्या वृद्धिः शुभपापरहितेनवृद्धिर्नऱ्हासइतिबोध्यम् २६ अथऱ्हासवृद्धिप्रकारान्गुरावपिदर्शयति एवमित्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति तस्मिन्पुनरपितदर्धमधिकंयोजनीयमितियावत् अष्टमेशोनीचराशिगश्चेदायुष्यर्द्धंनाशयेत् एवमेवनीचाष्टमेशयुक्ताग्रहाअपिस्वदीयमानायुष्यर्द्धमर्द्धंनाशयेयुः एवमुच्चाष्टमेशसंयुक्ताग्रहाः स्वदीयमानायुषिस्वदशार्द्धमाधिकंदद्युः एवमेवलग्नेशादयोपिग्रहाः उच्चनीचगुणतोवृद्धिऱ्हासौकुर्युरितिसंप्रदायः अस्मिन्प्रकरणेकिंबलंग्राह्यंमित्याशंकायामाह २० अत्रराशितोबलंग्राह्यं कारकयोगः प्रथमोभानामित्यादिकंवक्ष्यमाणबलंग्राह्य

राशितःप्राणः २१ रोगेशयोःस्वतऐक्येयोगेवामध्यं २२

पितृलाभयोःपापमध्यत्वेकोणपापयोगेवाकक्ष्याऱ्हासः २३

म् अत्रांशाधिक्यबलंनग्राह्यमित्यर्थः अथप्रकारांतरेणमध्यायुर्योगमाह २१ लग्नात्सप्तमाच्चरोगेशयोरष्टमेशयोः स्वतः कारकेणैक्येसतियोगेवासतिपितृलाभेत्यादिसूत्रेणप्राप्तदीर्घायुषामपिमध्यायुरेवभवतीत्यर्थः जातकशास्त्रांतरे लग्नस्यास्मिन्ग्रंथेकारकस्यप्राधान्यादष्टमेशयोगेनायुषोऱ्हासएवेतिविभावनीयम् २२ अथदीर्घादियोगेषुकक्ष्याऱ्हासमाह पितृलाभयोर्लग्नसप्तमयोर्द्वयोरपिपापग्रहस्यमध्यवर्तित्वेकक्ष्याऱ्हासोभवति लग्नकुंड

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यात् ३० अथदीर्घमध्याल्पायुर्भेदेनमरणखंडेनिर्णीतेनविशेषतोमरणकालज्ञानमितःसंभवतीत्यत्राह तत्रनिधनेऋक्षविशेषःराशिविशेषोस्तीत्यर्थः ३१ सराशिविशेषःकइत्यपेक्षायामाह पापद्वयमध्यगतराशिदशायांप्रथमदशाप्रदराशेस्त्रिकोणद्वादशाष्टमयोर्वापापयोगेसतितद्राशिदशायांनिधनंभवति एतदुक्तंवृद्धैःशुभमध्येमृतिर्नैवपापमध्येमृतिर्भवेदिति लग्नात्कारकाद्वापापाक्रांतत्रिकोणदशायांपापाक्रांतद्वादशाष्टम

तत्रर्क्षविशेषः ३१ पापमध्येपापकोणेरिपुरोगयोःपापेवा ३२ तदीशयोः केवलक्षीणेन्दुशुक्रदृष्टौवा ३३ तत्राप्याद्यर्क्षारिनाथदृश्यनवभागाद्वा ३४

राशिदशायांवानिधनंभवतीत्यन्ये ३२ पुनरपिनिधनेराशिविशेषमाह तदीशयोर्द्वादशाष्टमेशयोर्ग्रहांतरदृष्टिरहितकेवलक्षीणेन्दुशुक्रयोर्दृष्टौसत्यांद्वादशाष्टमराशिदशयोर्निधनंभवतीत्यर्थः बहुवर्षव्यापिन्यांदशायांकदामरणमित्याशंकायामाह ३३ तत्रापिनिधनस्थानत्वेनादिष्टासुपापमध्यराश्यादिदशासुआद्यर्क्षारिनाथौप्रथमदशाप्रदराशितत्षष्ठराशिनाथौताभ्यांदृश्योयोनवमभागोनवांशकुंडल्यांराशिस्तस्यांतर्दशायांवानिध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थः गुरोर्द्विद्वादशषष्ठाष्टमत्रिकोणेषुपापयोगेसातिकक्ष्याऱ्हासः गुरौनीचेअतुंगेऽशुभसंयुक्तेचकक्ष्याऱ्हासः अन्यथाचेदन्यथेति प्राग्वद्योजना २७ तत्रापवादंदर्शयति उक्तस्थानेषुशुभग्रहयोगप्रकरणेपूर्णेंदुशुक्रयोर्योगे सातिनकक्ष्यावृद्धिः किंत्वेकराशिवृद्धिरेवेत्यर्थः २८ पापयोगेनयःकक्ष्याऱ्हासउक्तस्तत्रापवादंदर्शयति श नावुक्तस्थानगेसातिनकक्ष्याऱ्हासः किंत्वेकराशिऱ्हासएवेत्यर्थः अत्रचंद्रशुक्रशनीनांप्राधान्येनयोगकर्तृत्वे

पूर्णेन्दुशुक्रयोरेकराशिवृद्धिः २८ शनौविप रीतं २९ स्थिरदशायांयथाखंडंनिधनं ३०

नग्रहांतरेषुयोगकरेष्वपिएकराशेर्वृद्धिऱ्हासोवास्यान्नतुकक्ष्यायाइत्यर्थः २९ अथसकलायुर्योगापवादत्वेननि धनयोगंस्थिरदशामालंब्याह खंडमनतिक्रम्ययथाखंडंस्थिरदशायांशशिनंदपावकाइतिवक्ष्यमाणायांदीर्घ मध्याल्पायुर्भेदेनपूर्णायुषस्त्रेधाखंडकरणाद्यः खंडः समागतस्तस्मिन्नेवखंडेनिधनंभवतीत्यर्थः एवंचवक्ष्यमा णप्रकारेणनिधनाश्रयखंडात्पूर्वखंडेनिधनलक्षणाक्रांतराशेर्दशायामागतायामपिननिधनंस्यात् किंतु क्लेशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलंनभवति रवियोगेतुनास्यफलस्यभंगइति ३९ अथरुद्रद्वयस्वगुणविशेषेणफलंदर्शयति प्राणिन्यप्राणि निवारुद्रेमंदारेंदुदृष्टेशुभयोगाभावेएकोयोगः मंदारेन्दुदृष्टेरुद्रद्वयेपापयोगेपिवाद्वितीयोयोगः मंदारेन्दुदृष्टेरु द्रद्वयेशुभदृष्टौवासत्यांतृतीयोयोगः प्रथमयोगेशुभयोगाभावेइत्यनेनपापयोगेद्वितीययोगेवक्तव्येशुभपापर हितेरुद्रेऽयमर्थःसंपन्नः योगत्रयेसंपूर्णेसतिरुद्रशूलांतात्परतोऽग्रेआयुःसमाप्तिर्भवतीत्यर्थः वाकारद्वयमना स्थायामित्युक्तायोगद्वयपरमितिपंथैरुक्तम् तन्नवाकारद्वयस्यानास्थाकल्पनायांप्रमाणाभावाद्योगत्रयपरमेववा

मंदारेंदुदृष्टेशुभयोगाभावेपापयोगेपिवाशुभदृष्टौवापरतः ४०

कारद्वयेनलभ्यतइति अस्मिन्प्रकरणेशुभपापावृद्धैरुक्ताः अर्कारमंदफणिनःक्रमात्क्रूरायथाश्रयम् चंद्रोपिक्रू रएवात्रकचिदंगारकाश्रये गुरुध्वजकविज्ञाःस्युर्यथापूर्वंशुभग्रहाइति अयमर्थः अत्रार्काद्याउत्तरोत्तरंयथाश्र यंक्रूरराशिगताःक्रूराभवंति शुभराशिगतास्तुनपापाः किंतु शुभाएव गुर्वादयस्तुशुभाः यथापूर्वंबुधात्कविःक वेःकेतुःकेतोर्गुरुरितिक्रमेणोत्तरोत्तरंशुभाः क्रूरग्रहाणांयथाक्रूराश्रयेक्रूरत्वंशुभाश्रयेशुभत्वम् तथागुर्वादीनाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नंभवतीत्यर्थः ननुआद्यशब्देनदशमराशिः अरिशब्देनषष्ठराशिरितिकैश्चिद्व्याख्यातम् तत्रवैषम्येबीजाभा वादरिशब्देनाष्टमराशिः कुतोनगृह्यतइति एवंचेन्मुनेस्तात्पर्यंतर्हितत्रापिरिष्फतंतुनाथदृश्यनवभागाद्वेति कुतोनोक्तमित्यलम् ३४ अथनिर्याणदशाविशेषंप्रकारान्तरेणदर्शयितुंरुद्रग्रहंलक्षयति लग्नसप्तमाभ्यां यावष्टमेशौतयोर्यः प्राणीबलवान्सरुद्रसंज्ञोग्रहोभवतीत्यर्थः द्वितीयरुद्रमाह ३५ लग्नसप्तमाभ्यांयोष्ट

पितृलाभभावेशप्राणीरुद्रः ३५ अप्राण्यपिपापदृष्टः ३६ प्राणिनिशुभदृ
ष्टेरुद्रशूलांतमायुः ३७ तत्रापिशुभयोगे ३८ व्यर्कपापयोगेन ३९

माधीशोदुर्बलः सोपिपापदृष्टश्चेद्रुद्रःस्यात् तथाचद्वौरुद्रौभवतःप्राणीअप्राणीचेति प्राणिरुद्रस्यफलमाह ३६ बलवतिरुद्रेशुभदृष्टेसतिरुद्रशूलांतंरुद्रात्प्रथमपंचनवमदशांतमायुर्भवति अल्पमध्यदीर्घायुर्योगभेदात्प्रथम द्वितीयतृतीयस्त्रिकोणांतेवाऽऽयुःसमाप्तंभवतीत्यर्थः ३७ अप्राणिरुद्रेविशेषमाह तत्रद्वितीयेरुद्रेपिशुभयोगेस तिरुद्रशूलांतमायुर्भवति नतुशुभदृष्टयेतिभावः ३८ उक्तयोगेअपवादमाह रविंविहायेतरपापयोगेसतिइदं ॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शूलनिर्याणबाधोपिभवतीतिध्वनितम् ४३ अथफलविशेषकथनायमहेश्वरग्रहंलक्षयति स्वादात्मकारकाद्भा वेशोऽष्टमराशीशोमहेश्वरग्रहइत्यर्थः ४४ यदिकारकादष्टमेशःस्वोच्चेस्वगृहेवास्यात्तदाकारकात्द्वादशाष्टमे शयोर्मध्येयोबलीसएवमहेश्वरःस्यान्नतुस्वभावेशइत्यर्थः द्वावपितुल्यबलौचेत्द्वौमहेश्वरौभवतएवस्वोच्चेसग्र हइतिपाठेतुकारकोच्चराशौग्रहयुक्तेसतिकारकादष्टमद्वादशेशयोर्मध्येयोबलीसमहेश्वरः अस्मिन्पक्षेप्रकारांतरे

स्वभावेशोमहेश्वरः ४४ स्वोच्चेस्वगृहेरिपुभावेशप्राणी ४५ पाताभ्यांयोगेस्वस्य तयोर्वारोगेततः ४६ प्रभुभाववैरीशप्राणीपितृलाभप्राण्यनुचरोविषमस्थोब्रह्मा ४७

णायमपिमहेश्वरइत्यर्थः ४५ प्रकारांतरेणमहेश्वरमाह स्वस्यकारकस्यपाताभ्यांराहुकेत्वोरन्यतरेणयोगेतथा कारकाद्रोगेऽष्टमेतयोराहुकेत्वोर्योगेवासतिकारकात्स्व्यादिप्रसिद्धगणनयाततःषष्ठोग्रहोसमहेश्वरोभवति द्वि त्राणांमहेश्वराणांसंभवेयोबलीसएवमहेश्वरःस्यादिति ४६ अथब्रह्मग्रहमाह पितृलाभप्राणीतिसूत्रमध्येस्थि तत्वाद्देहलीदीपकन्यायेनलग्नसप्तमयोर्योबलवद्राशिस्तस्मात्षष्ठाष्टमद्वादशराशिस्वामिनांमध्येयोबलवान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 पिशुभाश्रयेएवशुभतानक्रूराश्रयेशुभताएवमेववृद्धैरप्युक्तम् प्रत्येकंशुभराशिस्थउच्चस्थौवाबुधःशुभःगुरुशुक्रौ
चसौम्यस्थौततोन्यत्राशुभाःस्मृताइति यदिशूलेमृतिस्तर्हिकस्मिन्शूलेस्यादित्यत्रवृद्धैर्विशेषोनिरुक्तः पाप
 मात्रस्यशूलत्वेप्रथमर्क्षेमृतिर्भवेत् मिश्रेमध्यमशूलर्क्षेशुभमात्रेंत्यभेमृतिरिति अस्यार्थः द्वौरुद्रौयदिपापौतर्हि
प्रथमशूलेमृतिःस्यात् यद्येकोरुद्रः शुभोऽपरः पापस्तर्हिमध्यशूलेमृतिः ४० द्वावपिरुद्रौयदिशुभौतर्ह्यंत्यशू
लेमृतिःस्यादितिरुद्राश्रितराशावपिकदाचिन्मरणयोगमाह रुद्राश्रयराशावप्यायुःसमाप्तिर्भवतीत्यर्थः प्रायः

रुद्राश्रयेपिप्रायेण ४१ क्रियेपितरिविशेषेण ४२ प्रथममध्यतोत्तमेषुवातत्तदायुषां ४३

शब्दाद्रुद्राश्रयात्पूर्वंपरतोवाऽऽयुःसमाप्तिर्भवतिइतिध्वनितम् ४१ अत्रविशेषमाह मेषेजन्मलग्नेसतिविशेषेण
रुद्राश्रयेआयुःसमाप्तिर्भवति ४२ योगभेदेननिधनस्थानंदर्शयति तत्तदायुषामल्पमध्यदीर्घायुर्योगवतांप्रथम
मध्यमोत्तमेषुप्रथमद्वितीयतृतीयरुद्रशूलेषुवाक्रमेणायुःसमाप्तिर्भवति रुद्रशूलराशिमहादशायांनिधनेसिद्धेक्र
स्यामंतर्दशायांनिधनमित्यर्थः अत्रशूलेचेदित्युक्त्यारुद्रशूलनिर्याणयोगेसत्यपिबलवत्तरयोगांतरवशातोरुद्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यात् यत्तु अष्टमेशत्वेसत्यष्टमराशिगतत्वमेवब्रह्मत्वेप्रयोजकत्वमितिमतंतन्नतथासातिविवादप्रसक्त्यभावे नैतत्सूत्रमनन्वितंस्यात् नह्येतत्पूर्वान्वितंव्यवहितत्वाद्ग्रंथास्वारस्यप्रसक्तेः बहूनामितिसूत्रेणैवशंकायाः उपक्षीणत्वाच्चेति अष्टमेशाष्टमस्थयोरेकत्वेनिर्विवादंब्रह्मत्वं ५१ तयोर्भेदेतुकतमोभवेदित्यत्राह विवादेद्व योर्ब्रह्मत्वेसतियोबलीसएवब्रह्मास्यात् अथवासर्वेषुब्रह्मसुसमानांशवत्सुयोऽग्रहात्सग्रहइत्यादिनाबलीसब्र

विवादेबली ५२ ब्रह्मणोयावन्महेश्वरर्क्षदशांतमा
युः ५३ तत्रापिमहेश्वरभावेशात्रिकोणाब्दे ५४

ह्माभवतीत्यर्थः ५२ अथब्रह्ममहेश्वरयोःफलमाह स्थिरदशायांब्रह्मग्रहाश्रितराशिमारभ्यमहेश्वरराशिदशा पर्यंतमायुर्भवतीत्यर्थः ५३ महादशायांनिधनाश्रयीभूतामंतर्दशामाह तत्रापिमहेश्वराश्रितराशिमहादशाया मपिमहेश्वराश्रितराशितोऽष्टमराशिनाथस्ययस्त्रिकोणराशिः प्रथमपंचमनवात्मकोराशिस्तस्यैकाद्यात्मकोर्यो तर्दशाकालस्तत्रमृत्युःस्यात् अब्दइति द्वादशवर्षैस्तस्तद्राशिदशेत्यभिप्रायेणन्यूनसंख्ययादशासत्वेत्वब्द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेद्द्विवलग्नतत्सप्तमराश्योर्मध्येयोबलवद्राशिस्तत्पृष्ठगश्चसनमेषमिथुनादिविषमराशिगतःस्यात् सएवग्रहो ब्रह्माभवतीतिलग्नस्यपृष्ठराश्यः सप्तमादिद्वादशांतासप्तमस्यपृष्ठराशयोलग्नादिषष्ठांताबोध्याः ४७ प्रकारांतरेणब्रह्माणमाह शनौब्रह्मणिब्रह्मलक्षणाक्रांतेसतिपातयोराहुकेत्वोर्वाब्रह्मणोःसतोस्तस्माच्छनेराहोः केतोर्वा ततःषष्ठो ग्रहोब्रह्माभवतीत्यर्थः नतुब्रह्मलक्षणाक्रांततयाप्रसक्तः शन्यादिर्ब्रह्मास्यात् ४८ बहूनांब्रह्मलक्षणा

ब्रह्मणिशनौपातयोर्वाततः ४८ बहूनांयोगेस्वजातीयः ४९
राहुयोगेविपरीतं ५० ब्रह्मास्वभावेशोभावस्थः ५१

क्रांतत्वेकतमोब्रह्मास्यादित्याशंकायामाह बहूनांग्रहाणांब्रह्मयोगेसतिस्वजातीयःकारकजातीयोऽधिकांशको ब्रह्मास्यादित्यर्थः ४९ अत्रैवविशेषमाह राहोर्ब्रह्मणासहसंयोगेसतिविपरीतंबहूनांब्रह्मणांमध्येयोन्यूनांशकः सएवब्रह्मास्यात् शनिराहुकेतूनांततइत्युक्त्याब्रह्मत्वाभावात् ब्रह्मत्वेसतितुराहोर्ब्रह्मत्वयोगेराहुन्यूनांशश्चेद्ब्रह्मास्यादित्यर्थःस्यादिति ५० पुनःप्रकारांतरेणब्रह्माणमाह कारकादष्टमेशः कारकादष्टमस्थश्चग्रहोब्रह्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हादशायांचरस्थिरादिरूपायांनिधनंस्यादित्यर्थः ५६ मारकमहादशायांनिधनाश्रयीभूतामंतर्दशामाह तत्रापि मारकग्रहदशायामपिकालात्कारकसप्तमात्द्वादशाष्टमषष्ठेशानामंतर्दशायांनिधनंस्यादित्यर्थः एषांमध्येबलवतोंतर्दशायांनिधनमितिविवेचनीयम् अत्रविशेषोवृद्धैरुक्तः चरेच्चरस्थिरद्वंद्वाइतियोराशिरागतः सएव मारकोराशिर्भवतीतिविनिर्णयः बहुराशिसमावेशेबलवान्मारकःस्मृतइति अयंभावः पितृदिनेशादिद्विका

तत्रापिकालाद्रिपुरोगचित्तनाथापहारे ५७ द्वितीयाध्यायस्यप्रथमपादः ॥ १॥

नामाश्रयीभूतोयोराशिः समारकस्तेराशयोयदिबहवस्तर्हिअग्रहात्सग्रहइत्यादिबलेनयोराशिर्बलवान्समारकस्तद्राशिदशायांतदीशाश्रयराशिदशायांवामृतिरिति अपरेतु चरइत्यादिनायुर्यत्तत्समाप्तुचितोभवेत् योराशिःसतुविज्ञेयोमारकःसूत्रसंमतइति चरइत्यादिश्लोकेनयद्दीर्घाद्यायुःसमागतंपूर्णमित्यादिनास्पष्टीकृतम् तदायुर्यद्राशौसमाप्तंतद्राशिरेवमारकइत्यर्थः ५७ इतिजैमिनिसूत्रव्याख्यायांसुबोधिन्यांद्वितीयाध्याय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोन्यूनमंतर्दशास्वप्यानेयमेव ५४ अथसूत्रद्वयेनमारकग्रहंलक्षयति चित्तनाथःप्रायेणस्वस्मादात्मकारका त्तृतीयषष्ठद्वादशाष्टमेशानांमध्येयोबलवान् समारकग्रहइत्यर्थः सर्वेषांसमबलत्वेसर्वेपिमारकाःस्युः बहूनां मारकत्वेकस्यदशायांनिधनमित्याशंकायांअल्पमध्यदीर्घायुषांयत्रयत्रयस्यसंभवस्तद्राशिदशायांनिधनमित्य र्थः षष्ठेशस्तुप्रायेणमुख्यतयामारकइत्यर्थः अत्रवृद्धैरप्युक्तम् षष्ठाष्टमेशौभवतोमारकावष्टमेश्वरः प्रायेणमा

स्वकर्मचितरिपुरोगनाथप्राणीमारकः ५५ तदृक्षदशायांनिधनं ५६

रकोराशिदशास्वत्राविशेषतः षष्ठभेपापभूयिष्ठेषष्ठेशोमुख्यमारकः षष्ठात्त्रिकोणगोवापिमुख्यमारकइष्यते म ध्यायुषिमृतिःषष्ठदशायामष्टमस्यवा षष्ठत्रिकोणस्यपुनर्दीर्घाल्पविषयेभवेत् षष्ठेबलयुतेतस्यात्रिकोणेमृतिमा दिशेत् षष्ठेशश्चेद्बलाढ्यःस्यातत्त्रिकोणेमृतिंवदेदितिव्यवस्थेयंसमस्तापिकारकादिदशास्वपिबलिनः शुक्रश शिनोर्ग्राह्यंषष्ठाष्टमादिकंश्लोकाःस्पष्टार्थाः ५५ मारकस्यफलमाह मारकग्रहाश्रितस्यमारकस्वामिकस्यवाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लदशादिकंचविचार्यमित्यर्थः पितृनिधनेविशेषमाह ७ क्रियेलग्नात्द्वादशराशौतदाश्रयेर्कबुधाश्रयेसिंहमिथुनकन्यान्यतरराशिसत्वेऽर्कज्ञयोगेसूर्यबुधयोर्योगेसतिलग्नमेषदशायांलग्नात्पंचमराशिदशायांपितुर्निधनं स्यादित्येकेवदंति लग्नेइतिपाठेतुक्रियेमेषराशौरविज्ञयोगाश्रयेलग्नेसतिमेषस्यदशायांपितुर्निधनमित्यर्थः ८ अथबाल्यएवमातापित्रोर्मरणयोगमाह पित्रोःमातापितृकारकयोः प्राणिनोरप्राणिनोर्वारविरहितपापमात्रेण

अर्कज्ञयोगेतदाश्रयेलग्नमेषदशायांपितुरित्येके ८ व्यर्कपाप
भ्रात्रदृष्टयोःपित्रोःप्राग्द्वादशाब्दात् ९ गुरुशूलेकलत्रस्य १०
तत्तच्छूलेतेषां ११ कर्मणिपापयुतदृष्टेदुष्टंमरणं १२

दृष्टयोः सतोर्द्वादशाब्दात्पूर्वमेवमातापित्रोर्यथाक्रमंनिधनंभवति रविशुभदृष्टौनायंयोगइतिस्त्रीनिधनमाह ९ गुर्वाश्रितराशित्रिकोणदशायांपत्नीनिधनंस्यात् एवमन्येषामपिनिधनमाह १०पुत्रमातुलादिकारकराशेस्त्रिकोणदशायांपुत्रमातुलादेर्निधनमित्यर्थः मरणेशुभाशुभभेदंदर्शयतिसूत्रैः ११ लग्नात्कारकाद्वातृतीयेपापेनयुते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यप्रथमःपादः ॥ १ ॥ ॥ पित्रादिनांनिधनकालंबोधयितुंपित्रादिकारकमुपदिशति सूर्यभार्गवयोर्मध्ये योबलवान्सपितृकारकःस्यात् १ चंद्रभौमयोर्योर्बलीसमातृकारकः २ रविशुक्रयोश्चंद्रारयोश्चमध्येयोनिर्बलः सोपिपापग्रहदृष्टश्चेद्यथाक्रमंपितृमातृकारकतांलभते ३ अथप्राणिपित्रादिकारकस्यफलमाह पितृकारकेमातृकारकेवाप्राणिनिशुभदृष्टेसतिपितृमातृकारकाश्रितराशित्रिकोणदशायांपितुर्मातुश्चमरणंज्ञेयं द्विविध

रविशुक्रयोःप्राणीजनकः १ चान्द्रारयोर्जननी २ अप्राण्यपि पापदृष्टः ३ प्राणिनिशुभदृष्टेतच्छूलेनिधनंमातापित्रोः ४ तद्भावेशेस्पष्टबले ५ तच्छूलइत्यन्ये ६ आयुषिचान्यत् ७

कारकस्यफलमाह ४ स्पष्टं ५ ताभ्यांप्राण्यप्राणिकारकाभ्यांभावेशेऽष्टमेशेपितृमातृकारकात्स्पष्टबलेऽधिकबलेसत्यष्टमेशाश्रितराशितस्त्रिकोणराशिदशायांनिधनंभवतीत्यन्येप्राहुः अधिबलइतिवक्तव्ये स्पष्टबलइत्युक्त्यांशाधिक्यबलमत्रग्राह्यम् ६ पित्रादीनामायुषिविचारणीयेअन्यच्चतत्तत्कारकंप्रकारांतरोक्तनिर्याणशू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णम् २१ तृतीयेगुरुणायुतेदृष्टेवाशोफादिभिर्निधनम् २२ तृतीयेशुक्रेणयुतेदृष्टेवाप्रमेहरोगान्निधनम् २३ तत्तद्रोगानांबहूनांतृतीयेयोगेदर्शनेवाऽनेकरोगान्निधनम् २४ तृतीयेतत्तद्ग्रहयोगदर्शनसत्वेतत्रैवचंद्रदृष्टि योगसत्वेतत्तद्रोगान्निश्चयेनमरणंवक्तव्यमित्यर्थः एतेनचंद्रदृग्योगाभावेतृतीयस्थानगेनापितत्तद्ग्रहेणतत्त द्रोगमरणेसंदेहइतिध्वनितम् अथनिधनेदेशभेदंदर्शयतिसूत्राभ्यां स्पष्टम् २५ अत्रबहुत्वमविवेक्षितंतृती

गुरुणाशोफाऽरुचिवमनाद्यैः २२ शुक्रेणमेहात् २३ मिश्रेमि श्रात् २४ चंद्रदृग्योगान्निश्चयेन २५ शुभैःशुभेदेशे २६ पा पैःकीकटे २७ गुरुशुक्राभ्यांज्ञानपूर्वं २८ अन्यैरन्यथा २९

येशुभदृग्योगसत्वेशुभेदेशेपुण्यभूमौमरणं २६ पापैस्तुकीकटेमगधादिपापदेशेमरणमित्यर्थः शुभपापोभय योगेतुनकाश्यादिशुभेनमगधादिपापेदेशइति मृतौज्ञानाज्ञानपूर्वकत्वमाह २७ स्पष्टम् २८ लग्नात्कारकात्तृ तीयगुरुशुक्राभ्यांयुतेदृष्टेवाज्ञानपूर्वंमरणम् गुरुशुक्रातिरिक्तयोगदर्शनाभ्यामज्ञानपूर्वंमरणंफलांतरमाह २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टेवादुष्टंमरणंभवति १२ लग्नात्कारकाद्वातृतीयेशुभेनयुक्तेदृष्टेवाशुभंमरणंस्यात् अग्निजलपातबंधनादिप्रयोज्यंदुष्टंमरणज्वरादिरोगप्रयोज्यंशुभमुच्यते १३ शुभपापयोर्द्वयोरपिदृष्टौयोगेवाशुभाशुभात्मकंमरणमित्यर्थः मरणनिमित्तानिदर्शयति १४ तृतीयेरवियोगेदृष्टौवासत्यांराजहेतोर्मरणम् १५ तृतीयेचंद्रेणयुतेदृष्टेवायक्ष्म

शुभंशुभदृष्टियुते १३ मिश्रेमिश्रं १४ आदित्येनराजमूलात् १५ चंद्रेणयक्ष्मणः १६ कुजेनव्रणशस्त्राग्निदाहाद्यैः १७ शनिनावातरोगात् १८ मंदमांदिभ्यांविषसर्पजलोद्बंधनादिभिः १९ केतुनांविषूचीजलरोगाद्यैः २० चंद्रमादिभ्यांपूगमदान्नकवलोदिभिःक्षणिकं २१

तःक्षयरोगान्मरणम् १६ तृतीयकुजेनयुतेदृष्टेवाव्रणादितोनिधनम् १७ तृतीयेशनिनायुतेदृष्टेवातरोगतोनिधनम् १८ तृतीयेशनिगुलिकाभ्यांयुतेदृष्टेवाविषादिभिर्मरणम् गुलिकस्यस्पष्टीकरणमन्यत्रानुसंधेयम् १९ तृतीयेकेतुनायुतेदृष्टेवाविषूच्यादितोमरणम् २० तृतीयेचंद्रगुलिकाभ्यांयुतेदृष्टेवाक्रमुकमदादिनासत्वरंमर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवाब्दाभवंतीतिनवांशदशेतिनामधेयंज्ञेयम् यत्तुस्थिरराशेःषष्ठेराशिश्चरस्याष्टमएवसःद्विस्वभावस्यराशिस्तु सप्तमः संमुखोमतइतिश्लोकंकृत्वासंमुखत्वंपर्थ्यैरुक्तं तन्न तद्दृष्टिपरमेवनत्वन्यपरं अथस्थिरदशामाह १ स्पष्टम् २ चरस्थिरद्विस्वभावराशीनांक्रमेणसप्ताष्टनवाब्दानियताःस्थिरदशायांभवंतीत्यर्थः तथाचमेषेसप्तवृषेष्टौमिथुनेनवपुनःकर्केसप्तेत्यादिक्रमेणद्वादशराशिपर्यंतमब्दाज्ञातव्याः एतद्दशारंभस्थानमाह ३ एषादशाब्रह्मग्र

विषमेतदादिर्नवांशः १ अन्यथाऽऽदर्शादिः २ शशिनंदपावकाः
क्रमादब्दाःस्थिरदशायां ३ ब्रह्मादिरेषा ४ अथप्राणः ५ कारक
योगःप्रथमोभानां ६ साम्येभूयसा ७ ततस्तुंगादिः ८

हादिर्ब्रह्मग्रहाश्रितराशिमारभ्यप्रवर्तनीयेत्यर्थः अथबलमधिकरोति ४ अथानंतरंप्राणोबलमुच्यते ५ राशीनामाद्यंबलंकारकयोगोभवति ६ ग्रहयोगसाम्येउभयत्रग्रहसत्वेसतिभूयसाग्रहयोगेनबलंभवति ग्रहयोगभूयस्त्वादिभिरपिसाम्येनिर्णायकमाह ७ ततोभूयस्त्वानंतरंतुंगादिर्बलंस्यात् राशेस्तुंगस्वगृहस्थमित्रगृहस्थग्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लग्नाद्द्वादशयोर्मध्येशनिराह्वोःशनिकेत्वोर्वास्थित्यामातापित्रोःसंस्कर्तानस्यात् लग्नद्वादशमध्यंप्रकटयति ३०
लग्नादिपूर्वार्द्धेलग्नादिप्रथमषट्केद्वादशाद्यपरार्द्धेद्वादशाद्युत्तरषट्केशनिराहुशनिकेतुसत्वेमातृपित्रोःक्रमात् सं
स्कर्तानतथाचलग्नादिषट्केशनिराहुशनिकेतुसत्वेमातुःसंस्कर्तानसप्तमादिषट्केशनिराहुशनिकेतुसत्वेपितुःसंस्क
र्तानेतिफलितार्थः शन्यादित्रिकसत्वेइतिकुतोनोक्तमितिचेत् राहुकेत्वोरेकस्थानस्थितेर्बाधत्वान्नोक्तमिति अ

लेपनजनकयोर्मध्येशनिराहुकेतुभिःपित्रोर्नसंस्कर्ता ३० लेपादिपूर्वार्द्धे
जनकाद्यपरार्द्धे ३१ शुभदृग्योगान्न ३२ ॥ द्वितीयाध्यायःद्वितीयपादः

पवादमाह ३१ तत्रलग्नादिद्वादशादिमध्येशुभदृग्योगसत्वेपूर्वोक्तयोगोनस्यात्किंतुपित्रोःसंस्कर्तास्यात् ३२
इतिश्रीजैमिनिसूत्रव्याख्यायांसुबोधिन्यांद्वितीयाध्यायस्यद्वितीयःपादः ॥ २ ॥ अथदशाभेदबलभेदादीनाह
तत्रादौनवांशदशामाह विषमेलग्नेसतितदादिलग्नादिर्नवांशदशास्यात् अन्यथासप्तमराशौलग्नेसत्यादर्शादिः
सप्तमराश्यादिर्नवांशदशास्यात् आदर्शःसंमुखोभवति संमुखराशिःसप्तमएवभवति एतद्दशायांप्रतिराशिनव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलंस्यात् एवंषड्बलानिद्वितीयः प्राणइत्याभिधीयते द्वितीयंभावबलमित्यग्रिमसूत्रेद्वितीयंबलंग्राह्यमितिस्प ष्टीकृतम् १४ स्वामिनोराश्याधिपतेर्वक्ष्यमाणः प्राणस्तृतीयः प्राणइत्यर्थः अथस्वामिबलाबलेदर्शयति १५ स्वादात्मकारकात्कंटकादिषुकेंद्रपणफरापोक्लिमेषुस्वामिनोऽपारदौर्बल्यंभवति केंद्रेशून्यंपणफरेएकंआपो क्लिमेद्विगुणंदौर्बल्यंभवंति १६ चतुर्थतः पापदृग्योगइत्यादिनावक्ष्यमाणचतुर्थबलादपिपुरुषेविषमराशौबलं

स्वामिगुरुज्ञदृग्योगोद्वितीयः १४ स्वामिनस्तृतीयः १५ स्वा
त्स्वामिनःकंटकादिष्वपारदौर्बल्यं १६ चतुर्थतःपुरुषे १७

भवतीत्यर्थः यत्तु चतुर्थतःप्रथमांतात्तसिरित्युक्त्वापुरुषेचतुर्थःप्राणइतिकैश्चिदुक्तंतदयुक्तंएवंचेन्मुनेस्तात्प र्यंतर्हिचतुर्थः पुरुषेइत्येवब्रूयात् चतुर्थबलंकिमितिशंकानिरासायेति चत्वारइत्यग्रेवक्ष्यति ननुतद्बलम प्यत्रैवकुतोनोक्तमितिचेत् तद्बलस्यसांप्रतमनुपयोगादुपयोगिबलमुक्त्वाकाश्चनदशाःप्रदर्श्यवक्षतीतिअथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हयोगः प्राणइत्यर्थः अथराशीनांनिसर्गबलमाह ८ ततस्तुंगादिबलानंतरंनिसर्गबलंग्राह्यं चरात्स्थिरः स्थिरात्द्विस्वभावोबलीत्यर्थः तदुक्तंवृद्धैः अग्रहात्सग्रहोज्यायान्सग्रहेष्वधिकग्रहः साम्येचरस्थिरद्वंद्वाः क्रमात्स्युर्बलशालिनइति ९ राशौतदभावेकारकयोगाद्यभावेस्वामिनोराश्याधिपतेरित्थंभावः कारकयोगादिर्बलंयद्राशिनाथोबलवान्सराशिर्बलीतिभावः १० एकराशौबहुग्रहेषुसत्सुतेषांराशिद्वारकबलसाम्येपि

निसर्गस्ततः ९ तदभावेस्वामिनइत्थंभाव १० आग्रयतोऽविशेषात् ११ प्रातिवेशिकःपुरुषे १२ इतिप्रथमः १३

अत्रास्मिन्ग्रंथेआग्रायतोग्रहोविशेषाद्बलीभवति अग्रमायतःगतः अग्रायतः अग्रायतएवआग्रायतः अधिकांशकइतियावत् तथाचबहुग्रहेष्वेकराशिस्थेष्वधिकांशकोबलवानिति ११ पुरुषेओजराशौप्रतिवेशिकःपार्श्वराशिवर्तीद्विद्वादशगतोपिग्रहः स्वस्यबलकर्त्तास्यात् १२ इतिप्रोक्तप्रकारेणप्रथमः प्राणउक्तइत्यर्थः १३स्वामियोगोगुरुयोगोबुधयोगश्चैकैकशोराशीनांबलंभवति स्वामिदृष्टिर्गुरुदृष्टिर्बुधदृष्टिश्चैकैकशोद्वादशराशीनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्येष्ठभ्रातुर्निर्याणम् २३ लग्नात्सप्तमाद्वाबलिनोनवमराशेःप्रवृत्तायांदशायांततःशूलदशायांपितृवर्गस्यपितृ
व्यादेर्निर्याणंस्यात् अथब्रह्मदशामाह २४ पुरुषेविषमेजन्मलग्नेसतिब्रह्मादिब्रह्मग्रहाश्रितंराशितोदशाप्रवर्त
नीयाः समादासांताःकोर्थः स्वराशेःषष्ठराशिस्वाम्यंतंसमादशाब्दाग्राह्याः ननुदासांतशब्देनषष्ठराशिस्वा
म्यंतमित्यर्थः कथमितिचेच्छृणुषष्ठराश्यंतवर्षानयनेसर्वेषांसमत्वाद्वासप्तत्युत्तरवर्षाभावाच्चायोग्यत्वात्स्वाम्यं

पितृवत्पितृवर्ग २४ ब्रह्मादिपुरुषेसमादासांताः २५
स्थानव्यतिकरः २६ पापदुर्योगाःतुंगादिग्रहयोगः २७

तामित्यर्थः संपन्नइतिचेद्वर्षानयनेब्रह्मादिगणनातदापुरुषेब्रह्मादिसमादासांताइतिसूत्रंप्रणीतंस्यादित्यलम् २५
तत्रस्थानव्यतिकरः सप्तमसंबंधोस्ति अयंभावः विषमेआदौब्रह्माश्रितराशिदशाततः क्रमेणान्येषांसमेलग्ने
तुआदौब्रह्माश्रितसप्तमराशिदशाततोव्युत्क्रमेणान्येषांराशीनांदशाः विषमेब्रह्मादिसमेतुब्रह्मसप्तमादिक्रमव्यु
क्रमभेदेनदशाआनेयाइतिफलितार्थः अथचतुर्थबलमाह २६ पापग्रहाणांदृष्टियोगश्चराशेर्बलंभवति तुंगमू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्याणशूलदशामाह १७ लग्नसप्तमयोर्यःप्रथमबलवान्तदादिगणनयाप्रवृत्तदशपापदालग्नसप्तमान्यतर त्रिकोण १।५।९। राशिदशास्तदानिर्याणंभवतीत्यर्थः अत्रनवनवाब्दाग्राह्याः पुरुषेसमाः सामान्यतइति सूत्रस्यवक्तव्यत्वात् पितुर्निर्याणदशामाह १८ लग्नसप्तमयोर्यौपुत्रराशीनवमराशीतयोर्मध्येयोबलवान् त मारभ्यक्रमेणप्रवर्तितयादशयाप्रोक्तरीत्याशूलदशायांपितुर्निर्याणंभवति मातुर्निर्याणदशामाह १९ लग्नात्स

पितृलाभप्रथमप्राण्यादिशूलदशानिर्याणे १८ पितृलाभपुत्रः प्राण्यादिःपितुः १९ आदर्शादिर्मातुः २० कर्मादिर्भ्रातुः २१ मात्रादिर्भगिनीपुत्रयोः २२ व्ययादिर्ज्येष्ठस्य २३

प्तमाद्वाबलिनश्चतुर्थराशेःशूलः १।५।९ दशायांमातुर्निर्याणंस्यात् २० लग्नात्सप्तमाद्वाबलिनस्तृतीयराशेः शूलदशायांभ्रातुर्निर्याणम् २१ मातृआदिरितिपदच्छेदः लग्नात्सप्तमाद्वाबलिनः पंचमराशेः प्रवृत्तशूलद शायांभगिनीपुत्रयोर्निर्याणम् २२ लग्नात्सप्तमाद्वाबलिनएकादशराशेःप्रवृत्तायांदशायांततः शूलदशायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीयाध्यायस्यतृतीयःपादः ॥ ३ ॥ चरराशेर्नवांशदशायांद्वितीयंभावबलंस्वामिगुरुज्ञदृग्योगइतिफलादेशा यग्राह्यमित्यर्थः अथाद्वारबाह्यराशीर्दर्शयति १ स्पष्टम् २ यस्मिन्कालेयस्यराशेर्यादशाचरस्थिरपर्यायतस्तद्द शाश्रयोराशिर्द्वारमित्युच्यते एनमेवपाकराशिरितिव्यवहरति लग्नाद्यावत्संख्याकोद्वारराशिस्तस्मात्तावत्सं ख्याकोराशिर्बाह्यमितिनिगद्यते एनमेवभोगराशिंवदंति अत्रलग्नशब्देनजन्मकालेयद्राशितः प्राथमिकीद शासमारभ्यतेसराशिर्ग्राह्यःलग्नंसप्तमोवाब्रह्मग्रहाद्याश्रितराशिर्वायथायोगमाद्यदशाश्रयराशिरेवपाकराशेरव

द्वितीयंभावबलंचरणवांशे १ दशाश्रयोद्वारं २ ततस्तावतिथंबाह्यं ३

धिर्नतुप्रसिद्धंलग्नंएवंचेन्नोच्यतेतर्हिसएवभोगराशिश्चपर्यायेप्रथमेस्मृतइतिनलगतियत्रसप्तमाद्ब्रह्माश्रितराशि तोवादशाप्रवृत्तिस्तत्रयः पाकराशिसएवभोगाराशिरितिनसंभवति तदुक्तंवृद्धैः चरेऽनुज्झितमार्गःस्यात्षष्ठ षष्ठादिकाःस्थिरे उभयेकंटकाज्ञेयालग्नपंचमभाग्यतः ९ चरस्थिरद्विस्वभावेस्वजेषुप्राक्क्रमोमतः तेष्वेव त्रिषुयुग्मेषुग्राह्यंव्युत्क्रमतोखिलम् एवमुल्लिखितोराशिःपाकराशिरितिस्मृतः सएवभोगराशिश्चपर्यायेप्रथमेस्मृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लत्रिकोणस्वर्क्षोतिमित्रमित्रराशिस्थितशुभग्रहयोगश्चबलंस्यादित्यर्थः यत्तु तुंगादीतिग्रहयोगइतियोगविभागं कृत्वातुंगादिबलंग्रहयोगबलंचेत्युक्तंपंथैस्तन्नपापदृग्योगइतिसूत्रेणपापयोगबलमुक्तमेवग्रहयोगइतिसूत्रेणैव तदर्थलाभातपापदृगित्येववक्तव्येयोगपदंव्यर्थंस्यात् तस्मात्पापग्रहाणांयत्रकुत्रस्थितानामपियोगेबलंशुभग्रहा णांतुतुंगादिस्थानामेवयोगेबलंनत्वन्यत्रस्थानामितिभावः इतिचत्वारःकारकयोगइत्यादिनात्रयःपूर्वोक्ताःए

पंचमेपदक्रमात्प्राक्प्रत्यक्कम् २८ चरदशायामत्रशुभः
केतुः २९ द्वितीयाध्यायस्यतृतीयःपादः ॥ ३ ॥

कोयमितिचत्वारः प्राणाइत्यर्थः पूर्वोक्तचरदशायांक्रमव्युत्क्रमभेदमाह २७ त्रिभिस्त्रिभिर्भैरसमंचपदानिच त्वारिभवंति चक्रइति लग्नान्नवमेओजपदांतर्गतराशिश्चेत्क्रमात् युग्मपदांतर्गतराशिश्चेद्व्युत्क्रमाद्दशानेया पूर्वंचरदशावर्षानयनमात्रमुक्तं क्रमव्युत्क्रमभेदस्तुनोक्तस्तस्मादत्रोक्तं दशारंभावधेरनुक्तत्वाल्लग्नमेवात्रग्राह्य मिति २८ अस्यांचरदशायांकेतुःशुभःशुभग्रहफलदइति २९ इतिश्रीजैमिनिसूत्रव्याख्यायांसुबोधिन्यांद्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्पणतोनयेत् अयमर्थः पुरुषोजातकवान्चेल्लग्नसप्तमयोर्बलवतोदशानेयास्त्रीजातकवतीचेद्बलवत्सप्तमाद्दशा नेयेति ७ केंद्रदशाक्रमभेदानाहसूत्रैः प्रथमेचरराशौलग्नेसप्तमेवासतिबलवल्लग्नसप्तमान्यतरराशेरनुज्झित मार्गेणदशाक्रमःस्यात् तत्राप्योजयुग्मप्रदभेदात्प्राक्प्रत्यक्त्वंक्रमोत्क्रमत्वंप्रथमद्वितीयादिद्वादश्यादिरीत्याज्ञे यमित्यर्थःयत्तुसामान्यपरिभाषातःप्राक्प्रत्यक्त्वंप्राप्तमेवात्रत्यंप्राक्प्रत्यक्पदमनुज्झितक्रमपदमितिपंथैरुक्तं तन्न सामान्यपरिभाषायादशानयनपरत्वात् नचैवंसत्यनुज्झितक्रमरूपोर्थोनस्यादितिवाच्यंस्थिरद्व्यंगयोःषष्ठकेंद्रा

प्रथमेप्राक्प्रत्यक्त्वं ८ द्वितीयरवितः ९ पृथक्क्रमेणतृतीयेचतुष्टयादि १०

दिक्रमयोर्वक्ष्यमाणत्वादत्राक्षेपादेवतल्लाभात्अन्यथालाघवात्प्रथमेक्रयतइत्येवंब्रूयात् अत्रत्यंपंचमेपदक्रमादि तिसूत्रोक्तंचप्राक्प्रत्यक्पदंदशाक्रमेणसामान्यपरिभाषाऽप्राप्तौलिंगं ८ द्वितीयेस्थिरराशौलग्नेसप्तमेवासति बलवल्लग्नसप्तमान्यतमराशेः ओजयुग्मपदभेदात्क्रमोत्क्रमाभ्यांरवितःषष्ठषष्ठक्रमेणदशाप्रवृत्तिर्ज्ञेयेत्यर्थः९ तृ तीयेद्विस्वभावराशौलग्नेसप्तमेवासतिबलवल्लग्नसप्तमान्यतमराशेश्चतुर्थादिकेन्द्रादितः पृथक्क्रमेणलग्नपंचम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तः लग्नाद्यावतिथः पाकः पर्यायेयत्रदृश्यते तस्मात्तावतिथोभोगः पर्यायेतत्रगृह्यतां तदिदंचरपर्यायस्थिरपर्या
ययोर्द्वयोः त्रिकोणाख्यदशायांचपाकभागेप्रकल्पनमिति पर्यायेदशायामित्यर्थः ३ अथद्वारबाह्ययोःफल
माह त्रिभिस्सूत्रैःतयोर्द्वारबाह्ययोः पापग्रहेसतितद्दशायांबंधादिःस्यात् तदुक्तंवृद्धैः पाकेभोगेचपापाढ्येदेह
पीडामनोव्यथेति ४ तस्मिन्द्वारेबाह्येवाराशौपापाश्रयीभूतेऽस्यपापस्यपरंतूपजीवस्यउपसमीपेजीवोयस्येतिगु

तयोःपापेबंधयोगादिः ४ स्वर्क्षेस्यतस्मिन्नोपजीवस्य ५
भग्रहयोगोक्तंसर्वमस्मिन् ६ पितृलाभप्राणितोयं ७

रुसमीपवर्तिनः स्वर्क्षेस्थितौसत्यांनबंधादिरित्यर्थः पाकभोगाश्रितः पापोयदिस्वर्क्षेगुरुयुक्तस्तर्ह्युक्तदोषोनेति
यावत् ५ अस्मिन्द्वारेबाह्येवाराशिखेटाभ्यांयातायेयोगास्तेषूक्तम् सर्वंशुभाशुभंफलंवेदितव्यमित्यर्थः अथ
केंद्रदशारंभस्थानभेदंदर्शयति ६ लग्नसप्तमयोर्बलवानराशिस्तस्मादयंवक्ष्यमाणदशाक्रमोज्ञेयस्तंराशिमार
भ्यदशाप्रवर्तनीयेतियावत् तदुक्तंवृद्धैः बलिनःशुक्रराशिनोःकेंद्राख्यांतुदशांनयेत् पुरुषश्चेत्ततोनेयास्त्रीचेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुष्टयेषुलग्नादिकेंद्रेषुवैषम्यबलाश्रयोऽधिकबलयुक्तोराशिःप्रथमदशाप्रदःस्थितःपर्यवसितः नवांशानामित्य
नुवृत्त्याप्रतिराशिनवनवाब्दादशाब्दाग्राह्याः तथाचकेंद्रपणफरापोक्लिमानांबलाधिकस्यप्रथममितिक्रमेणसर्व
दुर्बलांतंदशानेयेति १२ कारकादिग्रहदशाब्दानयनमाहसकारकः तल्लाभयोर्लग्नसप्तमयोरावर्तते अयमाशयः
लग्नात्सप्तमाच्चक्रमोत्क्रमगणनयाकारकपर्यंतंराशिसंख्यायत्राधिकासाब्दरूपाकारकग्रहदशाअन्येषांतुग्रहा

सतल्लाभयोरावर्तते १३ स्वामिबलफलानिचप्राग्वत् १४

त्कारकपर्यंतंविषमसमपदानुरोधेनक्रमव्युत्क्रमगणनयासंख्यासातत्तद्ग्रहाब्दाः कारकयुक्तग्रहाणांतुकारका
ब्दतुल्याएवाब्दाभवंतीतिइयंग्रहदशाद्यैरुक्तालग्नात्कारकपर्यंतंसप्तमाद्वादशांनयेत् उभयोरधिकासंख्याकार
कस्यदशासमाः तद्युक्तानांतुतत्तुल्यंप्रत्येकंस्युर्दशाःक्रमात् ग्रहाःकारकपर्यंतंसंख्यान्यस्यदशाभवेत् कारकस्त
द्युतश्चादौतत्केंद्रादिस्थितास्ततः दशाक्रमेणविज्ञेयाःशुभाशुभफलप्रदाः इति१३फलमाहदशास्वामिनांराशी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवमादितः ओजयुग्मपदभेदात्क्रमोत्क्रमाभ्यांदशाप्रवृत्तिःस्यात् लग्नसप्तमान्यतरकेंद्रात्प्रथमंततःपंचमपण
फरतःततोनवमापोक्लिमतोदशाप्रवृत्तिर्ज्ञेयेतियावत् अत्रनवनवाब्दाग्राह्याः एतत्सूत्रत्रयस्यफलितार्थोवृद्धैःस्प
ष्टीकृतः चरेनुज्झितमार्गःस्यात्षष्ठषष्ठादिकाःस्थिरे उभयेकंटकाज्ञेयालग्नपंचमभाग्यतःचरस्थिरद्विस्वभावेष्वो
जेषुप्राक्क्रमोमतः तेष्वेवात्रिषुयुग्मेषुग्राह्यंव्युत्क्रमतोखिलं ओजेषुओजपदेष्वित्यर्थः १० अथकारककेंद्रादिद
शामाह नवांशदशाब्दानांस्वकेंद्रस्थाद्याःकारककेंद्रस्थाद्याराशयःस्वामिनोभवंति आदौकेंद्रस्थास्ततःपणफ

स्वकेंद्रस्थाद्याःस्वामिनोनवांशानां ११ पितृचतुष्टयवैषम्यबलाश्रयःस्थितः १२

रस्थास्ततआपोक्लिमस्थास्तत्रापिबलाधिकस्यप्रथमामितिक्रमेणसर्वदुर्बलांतंनेयमितियावत् तदुक्तमाद्यैःप्रतिभं
नववर्षाणिकारकाश्रयराशितः जन्मसंपद्विपत्क्षेमःप्रत्यरिःसाधकोवधः मैत्रंपरममैत्रंचेत्येवमंतर्दशानयेदिति
किंच स्वकेन्द्रस्थाद्याग्रहाःनवांशानांनवग्रहदत्तानामब्दानांस्वामिनोभवंतीति अयमप्यर्थः सूत्रकारसंमतएव
अन्यथासतद्द्वाभयोरीतिसूत्रस्यवैय्यर्थ्यप्रसंगात् अब्दानयनंत्वग्रेवदिष्यति ॥११॥ केंद्रदशामपरामाह पितृच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषविधानातिरिक्तसकलदशासाधारण्येनदशारंभेदशाब्दानयनेचविशेषमाह १६सर्वासुदशास्वारंभराशौपुरु षेविषमेसति सामान्यतःआरंभलग्नाद्दशाप्रवृत्तिःसामान्यतःसमाः अब्दानवनववर्षरूपाग्राह्याः समेसतितुतत् सप्तमान्नवनवाब्दाग्राह्यास्तस्मादेवदशाप्रवृत्तिर्भवतीत्यर्थःसिद्धमेव तदुक्तंवृद्धैःओजेलग्नंतदेवस्याद्युग्मेतत्स प्तमंभवेत् दशौजक्रमतोज्ञेयायुग्मेव्युत्क्रमतोमतेति किंच पुरुषेजातकवतिआरंभराशितद्दशाप्रवृत्तिस्त्रियांजात

पुरुषेसमाःसामान्यतः १७ सिद्धाउडुदाये १८ जगत्तस्थु षोरर्द्धयोगार्द्धे १९ स्थूलादर्शवैषम्याश्रयमेतत् २०

कवत्यांतुतत्सप्तमाद्दशाप्रवृत्तिः स्यात् तदुक्तं पुरुषश्चेत्ततोनेयास्त्रीचेद्दर्पणतोनयेदिति १७नक्षत्रदशामाह नक्षत्रा युर्दायेविंशोत्तर्यष्टोत्तर्यादिरूपेसमाः अब्दाःसिद्धाःजातकांतरप्रसिद्धाग्राह्याइत्यर्थःअथयोगार्द्धदशामाह १८यो गार्द्धदशायांप्रतिराशिसमागतचरदशाब्दस्थिरदशाब्दयोर्योगार्द्धकर्तव्यं तदेवयोगार्द्धदशाब्दाः योगार्द्धदशा रंभराशिमाह १९एतद्योगार्द्धस्थूलादर्शवैषम्याश्रयेलग्नेसप्तमयोर्बलवदाश्रयंभवति अयमर्थःलग्नेबलवतिलग्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नांग्रहाणांचबलानिफलानिचप्राग्वत् पूर्वोक्तशास्त्रवत्ज्ञेयानीत्यर्थः १४ अथमंडूकदशामाहमंडूकः मंडूकदशा त्रिकूटःचरस्थिरद्विस्वभावात्मकत्रिकूटघटितत्वात्केंद्रादित्रिसमुदायघटितत्वाद्वात्रिकूटःस्थूलादर्शवैषम्याश्र यःलग्नसप्तमयोर्मध्येयोबलवांस्तदाश्रयोभवति विषमस्यभावोवैषम्यंअधिकबलत्वमितियावत् अयमाशयः ल ग्नसप्तमयोर्मध्येबलिनंराशिमारभ्यदशाप्रवृत्तिः तत्रापिपुरुषश्चेज्जातकवान् तदालग्नसप्तमयोर्बलवतोदशा नेयास्त्रीजातकवतीचेद्बलवत्सप्तमाद्दशानेयातदुक्तमाद्यैः बलिनःशुक्रशशिनोज्ञेयामंडूकदादशा पुरुषेश्चत्त

स्थूलादर्शवैषम्याश्रयोमंडूकस्त्रिकूटः १५ निर्याणलाभादिशूलदशाफले १६

तोनेयास्त्रीचेद्दर्पणतोनयेत् इतिकेंद्रादिक्रमेणमंडूकवत्प्लुत्यपतनान्मंडूकसंज्ञइत्यर्थः तस्मादत्रकेंद्रपणफरा पोक्लिमक्रमेणतत्रापिबलिनःप्राथम्यमितिरीत्यादशानेयेतियावत् प्रतिराशिनवाब्दाग्राह्याः ॥ १५॥ अथफल शूलदशामाह फलेवक्तव्यशूलदशानिर्याणराशेःसप्तमराशितःप्रवृत्ताभवति शूलदशेतिनाममात्रनिर्देशः रु द्रशूलरुद्राश्रयमहेश्वरर्क्षमारकर्क्षादिनिर्याणस्थानबाहुल्येनशूलदशानेकविधानवनवाब्दाः अत्रग्राह्याः वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यंसामान्यशास्त्रंओजकूटयोः ओजपदयोर्विपरीतंयुग्मेयुग्मपदयोर्यथासामान्यंसामान्यमनतिक्रम्यविज्ञेयंत थाचक्रमाद्वृषेवृश्चिकेचेत्यत्रवृषवृश्चिकयोरोजकूटस्थत्वाद्व्युत्क्रमेणपंचमैकादशौदृग्योग्यौसिंहकुंभयोर्युग्मकू टस्थत्वाद्यथासामान्यंव्युत्क्रमेणैवपंचमैकादशौदृग्योग्यौभवतः द्विस्वभावे दृग्योग्यपंचमैकादशयोरभावात् दृष्टिचक्रेयत्रयत्रदृष्टिस्तत्रादौनवमदशानंतरंसप्तमस्यततोनवमादित्रिकेद्विस्वभावराशिदृग्दशायांपार्श्वराशि द्वयदशाक्रमस्तुपुंराशिश्चेत्द्विःस्वभावस्तर्हिक्रमेणस्त्रीराशिश्चेद्व्युत्क्रमेणचतुर्थदशमौग्राह्यौ अयंभावः च

पितृमातृधर्मप्राण्यादिस्त्रिकोणे २४

रराशिषुक्रमेणपंचमैकादशौस्थिरराशिषुव्युत्क्रमेणपंचमैकादशौदृग्योग्यौभवतस्तथैवपार्श्वराशिदशाक्रमोज्ञेः याद्विःस्वभावराशिषुआदौनवमस्यततः सप्तमस्यततोविषमश्चेत्द्विःस्वभावस्तर्हिक्रमेणचतुर्थस्यसमश्चेत्तदाव्यु त्क्रमेणचतुर्थस्यततस्तथैवदशमस्योतिअत्रनवनवाब्दाग्राह्याःअथत्रिकोणदशामुपदिशति २३लग्नपंचमनवमेषु योराशिर्बलवांस्ततस्त्रिकोणदशारंभः आरंभराशिमारभ्यक्रमोत्क्रमाभ्यांद्वादशराशीनांदशाज्ञेया एतदुक्तंवृद्धैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्दशाप्रवृत्तिः सप्तमेबलिनितस्माद्दशाप्रवृत्तिर्विषमेक्रमेणसमेव्युत्क्रमेणदशाःप्रवर्तनीयाइति स्त्रीजातकवतीचे द्बलवत्सप्तमाद्दशानेयापुरुषोजातकवांश्चेद्बलवतोदशानेयेति उक्तंचवृद्धैः बलिनस्तुदशानेयाराहोर्हिशशिशु क्रयोः स्त्रीचेद्दर्पणतोनेयापुरुषश्चेत्ततोनयेदिति अथदृग्दशामाह २०कुजादिर्लग्ननवमादित्रिकूटपदक्रमेणदृग्द शाभवति आदौनवमस्यततोदृष्टिचक्रेसंमुखराशेःततःकुत्रचित्क्रमरीत्याकुत्रचिद्व्युत्क्रमरीत्यापंचमस्यततः

कुजादिस्त्रिकूटपदक्रमेणदृग्दशा २१ मातृधर्मयोःसामान्यं
विपरीतमोजकूटयोः २२ यथासामान्यंयुग्मे २३

कुत्रचित्क्रमेणकुत्रचित्व्युत्क्रमेणैकादशस्यसम्मुखराशेरित्युक्तम् तत्रप्रमाणाभावात्पंचमस्यादौकुतोनउच्यते दृष्टिविषयेआदौअभिपश्यंत्यृक्षाणिततःपार्श्वभेचेतिसूत्रस्वारस्यादेवत्रिकूटपदंत्रिराश्यात्मकंपदंततोदशमस्य ततएकादशस्यदृग्दशाभवतिनवमदृग्दशादशमदृग्दशाएकादशदृग्दशेतिफलितार्थः अथौजयुग्मपदभेदेन गणनाक्रममुपदिशति २१ स्पष्टम् २२ मातृधर्मयोःपंचमैकादशयोर्गणनायांसामान्यंनक्वचिदित्यात्मकंसामा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जन्मदिनेयच्चंद्रस्यनक्षत्रंतदीयाः सर्वर्क्षरीत्यायाघटिकास्ताद्वादशधाविभज्यप्रथमखंडमारभ्य द्वादशसुखंडे षुलग्नादिद्वादशराशयः क्रमेणगणनीयाः यस्मिन्घटिकामयेखंडेजन्मसखंडः आदितआरभ्यगणनयाजन्म लग्नादितोयद्राशिविशिष्टस्तंराशिमारभ्यक्रमव्युत्क्रमभेदेनद्वादशराशीनांदशाआनेयाइत्यर्थः अत्रप्रतिराशि नवाब्दाग्राह्याः गुणविशेषतः फलंदर्शयति सूत्रैः सर्वस्पष्टम् २७ २८ २९ तस्मिन्तारालग्नेशेउच्चेनिचेवा

तारार्कांशेमंदाद्योदशेशः २७ तस्मिन्नुच्चेनीचेवाश्रीमंतः २८ स्वमित्रभेकिं चित् २९ दुर्गतोऽपरथा ३० स्ववैषम्येयथासंक्रमव्युत्क्रमौ ३१ साम्येविपरी तं ३२ शनौचेत्येके ३३

राशौसतिजातानराःश्रीमंतोभवति तारालग्नेशेस्व मित्रराशौसतिकिंचिल्लक्ष्मीवंतोभवंति अपरथा शत्रुरशौसातिदुर्गतोदरिद्रोभवतीत्यर्थः तदुक्तमाद्यैः जन्मतारे द्वादशधाविभक्तेयत्रचंद्रमाः लग्नात्तावतिथेराशौन्यसेदाद्यदशाधिपं सयद्युच्चेथवानीचेतदास्याद्राजसेवकः स्वमित्रर्क्षेसुखीशत्रुराशौनिः ऽस्वःसमेसमइतिअथांतर्दशोपदशयोः संचारेविशेषमाहसूत्रैः ३० ३१ ३२ ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लग्नत्रिकोणयोराशिर्बलवानुक्तहेतुभिः तदारभ्योन्नयेच्छ्रीमाञ्चरपर्यायवद्दशा युग्मराशिभुवांपुंसामोजंगृण्हीतसम्मुखे ओजराशिभुवांस्त्रीणांयुग्मंगृण्हीतसंमुखं ओजराशिभुवांपुंसांगृण्हीयादोजमेवतु युग्मराशिभुवांस्त्रीणांयुग्ममेवसमाश्रयेत् क्रमोत्क्रमाभ्यांगणयेदोजयुग्मेषुराशिषु इतिकथनात्पुरुषेजातकवतिक्रमात्स्त्रियांजातकवत्यांतुव्युत्क्रमादित्यथःसंपन्नः चरपर्यायवद्दशामितिकथनान्नाथांताः समाइतिरीत्यावर्षाण्यत्रग्राह्याणीत्यर्थः पाकभोगराशीदर्शयन्फलमतिदिशति २४ तत्तत्रिकोणदशायांद्वारबाह्यराशिभ्यांतद्वत्पूर्वोक्तवत्फलंज्ञेय

तत्रबाह्याभ्यांतद्वत् २५ धासगौरिकात्पत्नीकरात्कारकैःफलादेशः २६

र्थः तदुक्तमाद्यैः तदिदंचरपर्यायस्थिरपर्याययोर्द्वयोः त्रिकोणाख्यदशायांचपाकभोगप्रकल्पने पाकेभोगेचमित्यपापाढ्येदेहपीडामनोव्यथेति तत्तत्कारकेभ्यस्तत्तत्स्थानफलमाह २५ तत्तत्कारकेभ्योधासगौरिकापत्नीकरात् सप्तमतृतीयप्रथमनवमेभ्योयथायोगंतत्तत्कारकैः फलादेशः कर्तव्यः अयंभावः सप्तमात्स्त्रीविचारः तृतीयात्कनिष्ठभ्रातुः कारकात्स्वस्यनवमात्पितुर्धर्मस्यविचारः कार्यइत्यर्थः नक्षत्रदशामाह २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ अथराजजनिताभ्यांयोगेयोगेलियान्येषाधिपः ॥ १ ॥ उच्चनीचस्वांशवती
तादृशदृष्टिश्चशुभमातृदृष्टेयदिमहाराजः ॥ २ ॥ लेयलाभयोः परकाले ॥ ३ ॥ लाभमेया
भ्यांस्थानगः ॥ ४ ॥ तत्रशुक्रचंद्रयोर्यानवंतः ॥ ५ ॥ तत्रशनिकेतुभ्यांगजतुरगाधीशः
॥ ६ ॥ शुक्रकुजकेतुषुस्वभाग्यदारेषु स्थितेषुराजानः ॥ ७ ॥ पितृलाभधनप्राणयोश्च ॥ ८ ॥
पत्नीलाभयोःसमानकालः ॥ ९ ॥ भाग्यदारयोर्ग्रहयुक्तसमानेषुसांप्रतः ॥ १० ॥ तत्रउच्चेकरसं
ख्याराज्ञांच ॥ ११ ॥ पितृधर्मयोर्लेयलाभयोर्गुरौचंद्रशुभदृग्योगेमंडलांतः ॥ १२ ॥ तत्रबुध
गुरुदृग्योगेयुवजोवा ॥ १३ ॥ तस्मिन्नुच्चेनीचेपितृलाभयोःश्रीमंतः ॥ १४ ॥ स्वभावनाथाभ्यां
शुक्रचंद्रदृग्योगयोः ॥ १५ ॥ तत्रशुभवर्गेषुश्रीमंत ॥ १६ ॥ दारशूलयोश्चंद्रगुरौ ॥ १७ ॥ शू
लेचंद्रेरिफगुरौधनेषुशुभेषुराजानः ॥ १८ ॥ पत्नीलाभयोश्च ॥ १९ ॥ एवमंशतोदृक्काणतश्च
॥ २० ॥ लेयलाभश्चंद्रेगुरौशुभदृग्योगेमहांतः ॥ २१ ॥ लाभचंद्रेपि ॥ २२ ॥ पापयोगाभावे
शुभदृग्योगिनिच ॥ २३ ॥ अत्रशुभदृग्योगेराजप्रेष्यः ॥ २४ ॥ शुभवर्जेषुत्रिकोणकेंद्रेवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वस्यात्मकारकस्यवैषम्येओजपदत्वेयथास्वंयथाराशिस्वभावंक्रमव्युत्क्रमौज्ञेयौ ओजपदेओजराशिश्चेत्क्रमः युग्मराशिश्चेत्व्युत्क्रमइतिसाम्येयुग्मपदत्वेविपरीतंयुग्मराशौक्रमः ओजराशौव्युत्क्रमइतिज्ञेयं कारकेयथा ओजयुग्मपदभेदेनक्रमव्युत्क्रमताद्विपरीतत्वम् तथाशनाववपिवेदितव्यानीत्येकेआचार्यावदंति स्वपदोपादाना त्कारकांतर्दशायामुपदशायांचैवेदंबोध्यम् अथदशाफलविशेषमाह ३४ शुभयुतेधाम्निराशौसतितद्राशिद

अतर्भुक्त्यंशयोरेतत् ३४ शुभादशाशुभयुतेधाम्न्युच्चेवा ३५ अन्यथान्यथा ३६ सिद्धमन्यत् ३७ ॥ इति द्वितीयाध्यायस्यचतुर्थःपादः

शाशुभास्यात् उच्चग्रहयुतेराशौतदधिपेउच्चेवातद्राशिदशाशुभेत्यर्थः ३५ उच्चमित्रशुभयोगलक्षणगुणाभावे समानीचादियोगसत्वेऽशुभेत्यर्थः ३६ अन्यत्प्रकृतंग्रंथानुक्तंसिद्धंशास्त्रांतरप्रसिद्धंग्राह्यमित्यर्थः ३७ इतिश्री नीलकंठज्योतिर्विद्विरचितायांजैमिनीसूत्रव्याख्यायांसुबोधिन्यांद्वितीयाध्यायस्यचतुर्थःपादःसमाप्तिमगात् ४

॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लेयरोगक्रूराश्रयेपि ॥ २५ ॥ रोगर्क्षत्रिकोणदशाब्दे ॥२६॥ रोगनवांशदशाभ्यांनिधनं ॥२७॥
तत्रापिशनियोगे ॥ २८ ॥ मिश्रेशुभयोगान्न ॥ २९ ॥ लग्नेंद्वोर्भावेस्वलाभयोर्भावयोःक्रूरेरुद्रा
श्रयेपि ॥ ३० ॥ नवापवादानि ॥ ३१ ॥ इनशुक्राभ्यांरोगयोःप्रामाण्येनिधनं ॥ ३२ ॥
महेश्वरब्रह्मयोराद्यन्तयोः ॥ ३३ ॥ चरनवांशदशायांनिधनं ॥ ३४ ॥ चित्तनाथाभ्यांरिपुरोग
चित्तकर्मणि ॥ ३५ ॥ क्रूरग्रहेपुसद्योरिष्टं ॥ ३६ ॥ शनिराहुचंद्रयोगेसद्योरिष्टं ३९ ॥ कोणा
श्रयेषुसद्योरिष्टं ॥ ३८ ॥ सर्वमेवंपापग्रहेषुच ॥ ३८ ॥ केवलरिपुरोगचित्तनाथाभ्यां ॥ ४० ॥
तत्रापिचित्तनाथापहारे ॥ ४१ ॥ इतिउपदेशेतृतीयेद्वितीयःपादः ॥ २ ॥छ॥ ॥ लेयलाभयोः
पदम् ॥ १ ॥ पदभावयोश्वरे ॥ २ ॥ क्रांतराशौकर्मणिदुष्टंमरणंकर्मणिपापेराजाभ्यांयथा
सनुधे ॥ ३ ॥ दिनेदिनौपुण्यं ॥ ४ ॥ तत्रकर्मादि ॥ ५ ॥ तत्रकर्मादि ॥ ६ ॥ चरचरयोर्वि
परीतकाले ॥ ७ ॥ ततःकोशे ॥ ८ ॥ पत्नीदृष्टमात्रगुरुयुक्ते ॥ ९ ॥ पापदृग्योगे ॥ १० ॥
पाषाणमरणे ॥ ११ ॥ अत्रकेतुयुक्ते १२ ॥ दोषेणहननं ॥ १३ ॥ केतौपापदृष्टौवा ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ॥ २५ ॥ स्वांशयोगेराजवंशः ॥ २६ ॥ उच्चांशेतादृशदृष्टिश्चराजराजवंशोवा ॥ २७ ॥ अ
शुभदृग्योगान्नचेन्नचेन्न ॥ २८ ॥ पंचमांशपदेपिसमेषुशुभेषुराजानोवा ॥ २९ ॥ स्वलेयमिषा
 भ्यांराजाचिन्हानि ॥ ३० ॥ इत्युपदेशसूत्रेतृतीयेप्रथमःपादः ॥ १ ॥ ॥ छ ॥ ॥ छ ॥
यज्ञजनेषाभ्यांस्वकारकाभ्यांनिधनं ॥ १ ॥ निधनंलेयलाभयोःप्राणि ॥ २ ॥ गुरौकेंद्रेमंदारा
भ्यांदृष्टेशनिभोगहेतौकक्ष्यापवादः ॥ ३ ॥ रिपुरोगयोश्चंद्रे ॥ ४ ॥ स्वभावगैश्च ॥ ५ ॥ रोग
तुंगयोवा ॥ ६ ॥ तत्रशनौप्रथमं ॥ ७ ॥ राहुद्वितीयं ॥ ८ ॥ केतोस्तृतीयंनिधनं ॥ ९ ॥
तत्तुत्रिकोणेषु ॥ १० ॥ चरेप्रथमं ॥ ११ ॥ स्थिरेमध्यमं ॥ १२ ॥ द्वंद्वेन्त्यं ॥ १३ ॥ एवं
चरस्थिरद्वंद्वचराभ्यां ॥ १४ ॥ स्वपितृचंद्राः ॥ १५ ॥ तत्रशनिकक्ष्यन्हासः ॥१६ ॥ रिपुष
ष्ठाष्टयोश्च ॥ १७ ॥ प्रथममध्यमयोरंत्यमध्यमयोर्वा ॥ १८ ॥ शुभदृग्योगान्न ॥ १९ ॥ पितृ
लाभेशयोरस्यैवयोगेवा ॥ २० ॥ अप्रसंगवादात्प्रामाण्यंरोगयोःप्राणिसौरदृष्टियोगाभ्यां ॥२१॥
द्वारवाह्ययोरपवादः ॥ २२ ॥ द्वारेचंद्रदृग्योगान्न ॥ २३ ॥ केवलशुभसंबंधेबाह्येच ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दयः ॥ ५० ॥ गुरुणास्ववैषम्येरौपावकः ॥ ५१ ॥ शुक्रेणशुक्लमेहात् ॥ ५२ ॥ शनिनाविषभ
क्षणादि ॥ ५३ ॥ राहुकेतुभ्यांविषसर्पलोष्टबंधनादिभिः ॥ ५४ ॥ शनिराहुभ्यांराहुणादंडादि
॥५५॥तत्रगुरुराहुभ्यामभिचारादि ॥५६॥ तत्रगुरुशनिभ्यांदृष्टेयथास्वनाशः ॥५७॥ स्वत्रिंशांशे
कौलकाफलरोगादि ॥ ५८॥ ललाटंप्रथमं ॥ ५९ ॥ केशांद्वितीयः ॥ ६० ॥ बधिरंतृतीयः
॥ ६१ ॥ चतुर्थोनेत्रे ॥ ६२ ॥ सिंहादौपंचमे ॥ ६३ ॥ षष्ठंजिव्हाग्रे ॥ ६४ ॥ पूर्वषट्केराहुके
तुभ्यांस्वजिव्हादि ॥ ६५ ॥ तत्रशनिमांदिभ्यांगलद्वादि ॥ ६६ ॥ तत्रकुजेशोषः ॥ ६७ ॥
लाभांशेमरणं ॥ ६८ ॥ तत्ररवौप्रातिबंधः ॥ ६९ ॥ कौंतायुधधनौरोगे ॥ ७० ॥ सायकैर्धनं
॥ ७१ ॥ अशनिहतकाये ॥ ७२ ॥ मार्गेमार्गैरिपूणांवैरिवर्गश्चस्ववैषम्येरिपुः ॥ ७३॥ क्रूरा
श्रयवलेरिपुहतः ॥ ७४ ॥ शन्यारफणिवर्गाद्यैः ॥ ७५ ॥ भावेशाक्रांतराशिस्थः ॥ ७६ ॥
रवियुक्तदृष्टेप्राथमिकः ॥ ७७ ॥ तत्रचंद्राग्निश्चयेनाकुजेनज्ञातिभ्यः ॥ ७८ ॥ तत्रशनौमृत्युवा
दाग्निकरणश्च ॥ ७९ ॥ स्वांशेपि ॥ ८० ॥ अन्यतरांशश्च ॥ ८१ ॥ नीचाश्रयेविपरीतं॥८२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रशुभयोगे ॥ १८ ॥ मलिनभावेक्रांतराशौकर्मणिदुष्टंमरणं ॥ १६ ॥ क्रूराश्रयेसर्वेशूलादि
॥ १७ राहुदृष्टौनिश्चयेन ॥ १८ ॥ राहुशनिभ्यांदुष्टवलादि ॥ १९ ॥ तत्रप्रतिबंधः ॥ २० ॥
कुजकेतुभ्यांनित्यंच ॥ २१ ॥ वाशीयोग्यफूलदें (?)॥ २२ ॥ मृत्युरोगाभ्यांराहुचंद्राभ्यांयथा
स्वंमृत्युः ॥ २३ ॥ अत्रभावकरादि ॥ २४ ॥ तुरगवृषवर्गे ॥ २५ ॥ अत्रकुजास्फोटकादि
कुंडलधरश्च ॥ २६ ॥ रत्नाकरयोगे ॥ २७ ॥ कालदंडान्मरणं ॥ २८ ॥ शेषाभुजंगादि
॥२९॥कीटवृषवृश्चिकांशे ॥ ३० ॥ रोगमातृदृष्टयोर्भावेमूषकादिमृतिः ॥३१॥ तत्रमंदे ॥३२॥
विषपानादि ॥ ३३ ॥ सौम्यदृग्योगाभ्यांमंडूकभेदादि॥३४॥ स्वांशयाह्याद्वर्णनामभिः॥ ३५॥
लेयान्मृत्युः ॥ ३६ ॥ चलेमृत्युः ॥ ३७ ॥ भाग्येदंडात् ॥ ३८ ॥ कर्मोविषभक्षात् ॥ ३९ ॥
दारेज्वरभयं ॥ ४० ॥ माताशत्रुहतः ॥ ४१ ॥ शनौरिपुभयं ॥ ४२ ॥ लाभेकुष्ठरोगः॥४३॥
विषूचीजलरोगादिदेहे ॥ ४४ ॥ धनेखड्गादौ ॥ ४५ ॥ नित्यदुर्मरणं ॥ ४६ ॥ तत्ररवियोगेरि
पुशस्त्राग्निभयं ॥ ४७ ॥ चंद्रेणकूपे ॥ ४८ ॥ कुजेनव्रणस्फोटादि ॥ ४९ ॥ बुधेनवृक्षपर्वता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वेपरिपाताभ्यांजघन्यायुषितत्रपरिपाके ॥ १९ ॥ एवंनिधनंमातापित्रोः ॥ २० ॥ भूम्यंशश्च निवृत्तिकारकः ॥ २१ ॥ नायांतसंज्ञाःस्युः ॥ २२ ॥ कर्मस्थाचरपर्याये ॥ २३ ॥ भाग्यदार योःस्थिरोभयोः ॥ २४ ॥ भाग्यकारकाभ्यांमंगलपदं ॥ २५ ॥ मृत्युमृत्युषि ॥ २६ ॥ अन्यै रन्यथा ॥ २७ ॥ भूतमन्यत् ॥ २८ ॥ इत्युपदेशेआयुर्दायापवादेतृतीयेतृतीयःपादः ॥ ३ ॥ पुनःपदःपदे ॥ १ ॥ उपग्रहयुक्तेश्रीमंतः ॥ २ ॥ आधानपितुर्लेयमेषं ॥ ३ ॥ सूर्यात्कर्मणि पित्रोः ॥ ४ ॥ पुनःपदः उत्तरयोः ॥ ५ ॥ पदाभ्यांभृगुसौम्यव्यतिरिक्ते ॥ ६ ॥ दिनकरेला भेयोरेनिसंज्ञाःस्युः (?) ॥७॥ प्रियानुपपत्तिः ॥८॥ तत्रपाकर्म ॥ ९ ॥ स्वकर्मव्याघ्रश्च ॥१०॥ दिनकरत्रिकोणेलाभपदेगर्भसंप्लवे ॥ ११ ॥ तत्रगर्भपाते ॥ १२ ॥ रविकेत्वंशेशुक्रशोणितौ ॥ १३ ॥ गुरुत्रिंशांशे ॥ १४ ॥ चंद्रदृग्योगे ॥ १५ ॥ सुकालिषुवयोः ॥१६॥ शुक्ररेतौ ॥१७॥ वर्णपरिपाकं ॥ १८ ॥ यस्याधानंचंद्रदृग्योगे ॥ १९ ॥ यथाआधानपरिपाकेचचंद्रबुधभृगुयो गाभ्यामाधानपरिमिते ॥ २० ॥ सुवर्णारणिसंयोगे ॥ २१ ॥ शनिचंद्राभ्यांनाभेरधः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रशनौरूपे ॥ ८३ ॥ विषभक्षणादि ॥ ८५ ॥ तनुतनौदंडहरं ॥ ८५ ॥ तत्रभावविशेषः ॥ ८६ ॥ (?)अघशवानिधनं ॥ ८७ ॥ मातापित्रोर्द्वितीयः ॥ ८८ ॥ ज्ञातिवर्गभ्रात्रादिस्तृतीयः ॥ ८९ ॥ कलत्रंचतुर्थं ॥ ९० ॥ पुत्रंपंचमं ॥ ९१ ॥ शत्रुवर्गषष्ठं ॥ ९२ ॥ तत्रपापानांसन्निकृष्टं ॥ ९३ ॥ जनने ॥ ९४ ॥ लाभेस्त्रियाविपत्तिः ॥ ९५ ॥ भावेस्वकर्मचित्तांशात्स्वांशेनिधनेनिधनं ॥ ९६ ॥ स्वभूच्चात्पतनं ॥ ९७ ॥ शूलेमृतिः ॥ ९८ ॥ धनेनज्ञानवान्मरणं ॥ ९९ ॥ नयनेग्रहणीरोगादि ॥ १०० ॥ शूलेशत्रुमरणं ॥ १०१ ॥ उच्चेग्रहभातिः ॥ २ ॥ तत्ररविशनिभ्यामोजेकूटराशौयुग्मेनिर्णयः ॥ ३ ॥ धनसुखाभ्यांपादरोगः ॥ ४ ॥ तनुविक्रमाभ्यामंगुलिरोगः ॥ ५ ॥ तत्रकेतुनाअंगहीनश्च ॥ ६ ॥ तत्रपापदृष्टेपादहीनः ॥ ७ ॥ अथबलानि ॥ ८ ॥ प्राणिनिशुभयुक्ते ॥ ९ ॥ राशिबलभागे ॥ १० ॥ चरपर्यायेन ॥ ११ ॥ शुभदृष्टेपादहीनः ॥ १२ ॥ शुभदृष्टित्रिशूले ॥ १३ ॥ अंशात्रिशूलेवा ॥ १४ ॥ भावकोणाभ्यांनिसर्गस्तः १५ ॥ आश्रयतोबलिष्टः ॥ १६ ॥ यादिर्भराशौपितृलाभयोः ॥ १७ ॥ स्वकर्मभेदेन ॥ १८ ॥ मूर्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोतादिकनेत्रविकृतोष्ठनासिकमुखकर्णकेशदंतपटलपादांगहीनकुब्जबधिरमूलांगोपांगसुशिरके
शावर्तचक्रबीजविपर्यासकुनखीवृषोन्नतबृहन्नाभिनेत्रोपार्श्वदृष्टचोरंधाकुब्जवामनसत्वस्वरनीचस्व
रहीनस्वरेत्यादिष्वपिपितृमात्रोर्बलानि ॥५२॥ एवमृक्षाणांबलानि॥ ५३॥ स्वपितृभाग्ययोःपरि
पाककाले ॥५४॥ इतितृतीयाध्यायेगर्भवर्णननिर्णयोनामचतुर्थःपादः॥४॥समाप्तश्चाध्यायः॥३॥
ओं ॥ पितृदिनेशयोःप्राणीदेहः ॥१॥ लाभचंद्रयोः प्राणिहृदयं ॥ २॥ लेयचंद्रयोः प्राणिशिरः
॥ ३ ॥ भाग्यचंद्रयोः प्राणिमुखं ॥ ४ ॥ कामचंद्रयोः प्राणीकंठः ॥ ५ ॥ दारचंद्रयोः प्राणी
बाहुः ॥ ६ ॥ मातृचंद्रयोः प्राण्युदरं ॥ ७ ॥ ततश्चंद्रयोःप्राणिजघनं ॥ ८ ॥ लाभचंद्रयोः प्रा
णीपृष्ठः ॥ ९ ॥ दिनचंद्रयोः प्राणीगुदः ॥ १०॥धनचंद्रयोःप्राणीपादौ ॥११ ॥ रिःफचंद्रयोःप्रा
णीनेत्रे ॥ १२ ॥ शूलचंद्रयोःकर्णयोः प्राणीकर्णौ ॥ १३॥ रौप्यचंद्रयोः प्राणीनासिके॥१४॥
एवंद्वादशभावानां ॥ १५ ॥ प्राणिबलानि ॥ १६ ॥ अप्राण्यपिपापदृष्टः ॥ १७ ॥ प्राणिनि
शुभदृष्टे ॥ १८ ॥ तत्तद्भावेजन्मसूचितं ॥ १९ ॥ आजन्मादिर्वपुःषु ॥ २० ॥ पित्रोः प्राक्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गर्भवायुपरिवृन्ते ॥ २३ ॥ तत्रकेतुनापुष्करस्रजाः रव्यादिकत्वंतं ॥२४॥ ग्रहान्यतिरेतः॥२५॥
अनयोनिगर्भेष्वजः ॥ २६ ॥ राहुचंद्राभ्यांवीरतमः ॥ २७ ॥ आविरोपपत्तिःकर्मणिपाकेएवं
गर्भनिर्णयं ॥ २८ ॥ स्थानाद्यैःस्वांशगश्च ॥ २९ ॥ यथाधर्मशीले ॥ ३० ॥ स्वांशग्रहैर्नीचउच्च
योः ॥ ३१ ॥ क्रियमेषलग्नेषु ॥ ३२ ॥ अथरविप्राणाः ॥ ३३ ॥ नैसर्गिकबलेष्वाभियोगशू
लइहजायते ॥ ३४ ॥ पुंपुमान् ॥ ३५ ॥ वाणइति ॥ ३६ ॥ अत्रोदाहारः ॥ ३७ ॥ केतुश
निभ्यांरक्तप्रदरः ॥ ३८ ॥ शनौपातयोगेकृष्णवर्णः ॥ ३९ ॥ शनिशुक्राभ्यांश्यामवर्णः॥४०॥
गुरुशशिभ्यांगौरवर्णः ॥ ४१॥ शनिबुधाभ्यांनीलवर्णः ॥ ४२॥ शनिकुजाभ्यांरक्तसुवर्णः॥४३॥
शनिचंद्राभ्यांश्वेतवर्णः ॥ ४४ ॥ स्वांशवशाद्गौरनीलादिनि ॥४५॥ तथाप्युदाहरंति ॥४६ ॥ रेतः
सिंचन्प्रजाःप्रजनयामितिविज्ञायते ॥ ४७ ॥ चरेपापदृग्योगेपुत्रनाशः ॥४८॥ शुक्रदृग्योगेपुत्रला
भः ॥ ४९ ॥ पापशुभदृग्योगाभ्यांप्रथमवर्णक्रमेणह्रासावृत्तिः ॥५०॥ यन्नवभागेनवांशाभ्यांसं
ख्यावृद्धिः ॥५१ ॥ बीजयुगबलयोर्बिंदुपतनकालेयमलाभ्यांऊर्ध्वतःशुभपापयोश्चरस्थिरयोरर्द्धं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलपदयोः प्राणीमारकः ॥ १ ॥ रुद्राश्रयेपि ॥ २ ॥ भावेपिबलदृष्टांतः ॥ ३ ॥ ओजयुग्म
योः प्राणिबलं ॥ ४ ॥ अभिपश्यातिभावानि ॥ ५ ॥ शुभान्यतराणिच ॥ ६ ॥ प्रत्यक्शूले
नित्यविक्रमेबुधशुक्राभ्यांदंतोष्ठपटलपार्श्वपाः ॥७ ॥ करकर्णाभ्यांमृत्युचित्तयोर्विपरीतं ॥ ८ ॥
लग्नेपित्रकभावेपिकामनाथयोरैक्येयमलः ॥ ९ ॥ कामनाथप्राणिनिशुभं ॥ १० ॥ स्वनाथ
प्राणिनिच्युतयोः ॥ ११ ॥ भावयोःप्राणिनिकक्षान्हासः ॥ १२ ॥ शुभयोगबलाच्चैवं ॥ १३ ॥
मिश्रेसमाः प्राणिहीनेविपरीतं ॥ १४ ॥ समेनित्यं ॥ १५ ॥ भाग्ययोर्बलं ॥ १६ ॥ गुरुचं
द्रयोर्धर्मधनैक्येकर्मबले ॥ १७ ॥ मेषेविपरीतं ॥ १८ ॥ ततः प्राणाः स्वापितृयोगः ॥ १९ ॥
शुद्धस्वकाले ॥ २० ॥ अनुकूललेयेतुंगेनीचे ॥ २१ ॥ भावबलाभ्यांतु ॥ २२ ॥ केंद्रत्रिको
णोपचयेषुराहुकुजौजानुहावीरिकेबलराहौतत्रानिधनं ॥ २३ ॥ भौमदृग्योगान्निश्चयेन ॥ २४ ॥
तत्रशनौगुरुदृग्योगेसेतुयोग्यंस्वत्रिकोणराशिषु ॥ २५॥ पदेचापदभावेस्वामिनइत्थं ॥ २६ ॥
ऱ्हस्वफलादिशुभवर्गयुतिशेषास्त्वन्ये ॥ २७ ॥ मूर्तिरूपंच ॥ २८ ॥ स्वकारकव्यतिरिक्तेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काले ॥ २१ ॥ शरमेवमातापितरौजनयतः ॥२२ ॥ अक्षोणितोक्लीवश्च ॥ २३ ॥ एवंभावविचारः ॥ २४ ॥ अंकुशाभ्यांतु ॥ २५ ॥ वर्णभेदाश्रयेण ॥ २६ ॥ जीवेंदुबुधादयः ॥ २७॥ ब्राह्मणश्चरविःकुजःक्षत्रः ॥ २८ ॥ शनिःशूद्रश्च ॥ २९॥ राहुर्दूरजातिः ॥३०॥ केतुश्चांडालः॥३१॥ वर्णभेदेनपुत्रलाभाभ्यांमृगवर्णे ॥ ३२ ॥ आसुरत्रयंच ॥ ३३॥ यदिपापबाहुल्यंतत्ररमणीजालः ॥ ३४ ॥ सुखकेशानि ॥ ३५ ॥ षडानि ॥ ३६॥ शनिराहुकेतुजेषुवैपरीत्यम् ॥ ३७॥ तालुतेफोफस्यशेवलेमित्रावरुणबले ॥ ३८॥ मृत्युनाकैवल्यं ॥ ३९ ॥ शृंगारेलाटः ॥ ४० ॥ प्राणपाणौबले ॥ ४१ ॥ मृत्युविचित्ते ॥ ४२ ॥ माधुरीकन्ये ॥ ४३ ॥ मांजिष्टेमृगे ॥ ४४ ॥ मानुषिकुरूपः ॥ ४५ ॥ मरणेमाने ॥ ४६ ॥ मायामालिंगे ॥ ४७ ॥ शुभेनकर्मणिपितृनियोजयोजयेत् ॥ ४८ ॥ पापेमातरिमिश्रेभ्रातरः ॥४९॥ शुभपापमिश्रेविरूपः ॥५०॥ मातुनाशोकः ॥ ५१ ॥ चंद्रागुरुदृग्योगानिश्चयेनास्वमूर्तिपुरुषेकालरूपः ॥ ५२ ॥ तिर्यग्दृष्टौप्रायोनिर्वृत्तिकारकः ॥ ५३॥ शूलेशयोदीरयोशतोघंगुरुदृष्टेच ॥५४॥ इतिउपदेशेचतुर्थेप्रथमःपादः ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १७ ॥ स्वांशगैश्चबलः ॥ १८ ॥ रविकुजौरक्तौ ॥ १९ ॥ बुधशुक्रौश्यामौ ॥ २० ॥ कृष्णे तराःस्युः ॥ २१॥ त्रित्रिभागेचरस्थिरोभयपर्याये ॥ २२॥ घटिकाषष्टिनिर्णये ॥२३ ॥ अंशस्यै कस्यपंचघटिकाः ॥ २४ ॥ एवंद्वादशपंचस्युः विघटिकादिक्रमेण ॥२५ ॥ ओजेपुरुषः॥२६॥ युग्मेस्त्रियः ॥ २७ ॥ ओजयुग्मयोःस्त्रीपुरुषौ ॥ २८ ॥ यथामातरिवर्णे ॥ २९ ॥ मात्राप्रसव कालमुखेन ॥ ३० ॥ राह्विंदुभ्यांस्त्रीजननं ॥ ३१ ॥ पुरुषतराः ॥ ३२ ॥ शन्याराशिभ्यां पुरुषः ॥ ३३ ॥ शनिबुधाभ्यांस्त्रियः ॥ ३४ ॥ शनिचंद्राभ्यांकुजः ॥ ३५ ॥ शनिशुक्रा भ्यांरूपवत्या ॥ ३६ ॥ शनिकेतोर्जारिणी ॥ ३७ ॥ तत्रबुधांशेबहिर्जारिणी ॥ ३८ ॥ चं द्रशुक्रौकामीप्रवीणतमश्च ॥ ३९ ॥ अंशभेदेन ॥४० ॥ बुधशुक्राभ्यांकामीविवरागतः ॥४१॥ तत्रकेत्वंशे ॥ ४२ ॥ गोपमन्यतरः ॥ ४३ ॥ केत्वंशेबुधचंद्रदृष्टेसर्ववर्णाश्रयेषुसंचरितः ॥४४॥ पापदृष्टेपुंश्चली ॥ ४५ सप्तमाष्टमयोः पापबल्येविघाव (?)॥ ४६ ॥ तत्राष्टमेकुजेकेतुषु ॥४७॥ दृग्योगाभ्यांभर्तृहंत्री ॥ ४८ ॥ एकांशेन ॥ ४९ ॥ ओजयुग्ममार्गया ॥ ५० ॥नीचेविपर्ययः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २९ ॥ भाववलेचंद्राश्रयेपि ॥ ३०॥ दारेमित्रस्वपितृभ्यां ॥ ३१॥ भावशूलदृष्ट्याच॥३२॥
पितृनाथदृष्ट्यारोगः ॥ ३३॥ पुत्रनाथदृष्ट्यादरिद्राः॥३४॥शूलनाथदृष्ट्याव्ययशीलः॥ ३५ ॥
रिपुनाथदृष्ट्याकर्म ॥ ३६ ॥ धननाथदृष्ट्यानिरोगीच ॥ ३७॥माननाथदृष्ट्याप्रवलः॥ ३८ ॥
दारेशदृष्ट्यासुखिनः ॥ ३९ ॥ कामेशदृष्ट्याप्रध्वंसः ॥ ४० ॥ भाग्यनाथदृष्ट्यासुरूपः॥४१॥
सर्वदृष्ट्याप्रवलः ॥ ४२ ॥ दारभाग्येच ॥ ४३ ॥ वर्णपदाश्रयकोणेषु॥ ४४ ॥शुक्रेच॥ ४५ ॥
कोणयोः शुभेषुमित्रप्रागपवर्गौं ॥ ४६ ॥ केंद्रत्रिकोणयोः शुभेकालवलानि ॥ ४७ ॥ इत्युप
देशसूत्रेचतुर्थध्यायेद्वितीयः पादः ॥२॥ छ॥ ॥ बुधशुक्रयोर्युग्मेस्त्रीजननं ॥१॥ कालनिर्णयादि
॥ २ ॥ अंशभेदेनलिप्तविलिप्ताः॥ ३ ॥ कालकाः ॥ ४ ॥ अनुलिप्ताश्च ॥ ५ ॥ द्विनाद्विचतुः
संख्यादि ॥६॥ नवभागशेषे॥ ७ ॥ आद्यंशके ॥८॥ ग्रहक्रमेणवर्णं ॥९ ॥ पुमान्पुंप्रजः ॥१०॥
अन्येस्त्रियः ॥११॥ क्लीबेपूर्वापरौ ॥ १२ ॥ एवंवर्णसंज्ञाःस्युः ॥ १३ ॥ नीचेदारांशकः॥१४॥
आद्यादिस्ववर्णभेदेन ॥ १५॥ मित्रभेदाभ्यांचरपर्यायेणसंज्ञाःस्युः ॥ १६॥ धात्वादिरूपवर्णेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राहुत्रिकोणेषुच ॥ ८७ ॥ केतौचंडालितत्समानवर्ती ॥ ८८ ॥ तत्त्रिकोणेषुच ॥ ८९ ॥ एवंव
र्णसंज्ञाःस्युः ॥ ९० ॥ चक्षुर्हीनं ॥ ९१ ॥ वर्णात्त्रिंशांशेआद्यापहारे ॥ ९२ ॥ पापत्रिकोणेषुच
॥ ९३ ॥ यथास्वंनीचेषुच ॥ ९४ ॥ अंशग्रहबलानां ॥ ९५ रविशुक्राभ्यांप्रथमं ॥ ९६ ॥ रवि
चंद्राभ्यांद्वितीयं ॥ ९७ ॥ रविकुजाभ्यांतृतीयं ॥ ९८ ॥ रविबुधाभ्यांचतुर्थं ॥ ९९ ॥ रविराहु
भ्यांसप्तमं ॥ १०० ॥ रविकेतुभ्यामष्टमं ॥ १०१ ॥ एवंसर्वैरन्ध्रभाग्ययोर्वर्जयेत् ॥ २ ॥ लाभेच
तत्रलाभयोःशुभेनदोषः ॥ ३ ॥ शुभपापयोर्नक्वाचित् ॥ ४ ॥ रंध्रापवादेसौम्यत्रिकोणेमृगवर्गादि
॥ ५ ॥ स्वत्रिंशांशःस्वनीचभवने ॥ ६ ॥ यथामृगतौल्यादि ॥ ७ ॥ आद्यंशभेदेषु ॥ ८ ॥ राहुके
तुभ्यांप्रबंधः ॥ ९ ॥ वर्गोत्तमकाले ॥ १० ॥ प्राणीबलानि ॥ ११ ॥ नवत्रिषडयोरंशः ॥ १२ ॥
सप्ताष्टगुणचेष्टिताः ॥ १३ ॥ गुणभागेनकर्तव्यं ॥ १४ ॥ लक्षलक्ष्यापवादयोः ॥ १५ ॥ क्रमा
त्क्रूरशुभाभ्यांचव्युत्क्रमादुभयाययोः ॥ १६ ॥ रंध्रसप्तमयोरेतत् ॥ १७ ॥ बलसचरितेध्रुवाः ॥ १८ ॥
एतद्योगविहीनस्तुनिश्चित्यःस्त्रीजातके ॥ १९ ॥ इतिगुरुणाभ्यांवर्णः ॥ २० ॥ स्वपितृवर्णश्च ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८१ ॥ षड्वर्गादौसन्निपातहनने ॥ ८२ ॥ मूर्तौरूपं ॥ ८३ ॥ भाग्यांशगैश्चंद्रबाहुल्येबुधशु
क्राभ्यांसुमती ॥ ८४ ॥ तत्रकेतुनाकेत्वंशेदुर्गंधि ॥ ८५ ॥ रविदृष्टेदंतवक्री ॥ ८६ ॥ कु
जदृष्टेक्रोधकरी ॥ ८७ ॥ इतरग्रहदृग्योगः ॥ ८८ ॥ सौम्यश्च ॥ ८९ ॥ पापेपापबाहुल्ये
॥ ६० ॥ शुभेगुणवती ॥ ६१ ॥ मिश्रेसमाः ॥ ६२ ॥ एवमष्टमःसप्तमार्द्धहरितः ॥ ६३ ॥
त्रिकोणात्रिषडायेषु ॥ ६४ ॥ नीचेविपर्ययः ॥ ६५ ॥ दिनभाग्ययोरानुकूल्ये ॥६६॥ शुभेतर
मिश्रतरौच ॥ ६७ ॥ चक्षुर्वर्णभेदेनानित्याश्च ॥ ६८ ॥ यत्नेअंशकतः ॥ ६९ ॥ राज्ञेनीचे
॥ ७० ॥ धनेकामी ॥ ७१ ॥ धर्ममोक्षी ॥ ७२ ॥ धनेपापी ॥ ७३ ॥ तत्ररव्यंशेबालविधवा
॥ ७४ ॥ रवित्रिकोणेषुच ॥ ७५ ॥चंद्रेकामिनी ॥ ७६ ॥ चंद्रत्रिकोणेषुचकुजकुरूपिक्रोधी
॥ ७८ ॥ कुजत्रिकोणेषुच ॥ ७९ ॥ बुधेवंध्या ॥ ८० ॥ बुधत्रिकोणेषुचागुरौपतिभक्तिपरा
यणी ॥ ८१ ॥ गुरुत्रिकोणेषुच ॥ ८२ ॥ शुक्रेसर्वसौभाग्यकारिणी ॥ ८३ ॥ शुक्रत्रिकोणेषुच
॥ ८४ ॥ शनौकामिनीचपुरुषः ॥ ८५ ॥ शनित्रिकोणेषुच ॥ ८६ ॥ राहुसर्वकर्मात्मकेषु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३३ ॥ स्वानंदतुल्येवा ॥ ३४ ॥ वर्गैनवांशश्च ॥ ३५ ॥ तत्रज्ञानाज्ञानेषु ॥ ३६ ॥ पुत्रमणि रमणी ॥ ३७ ॥ बुधकेतुर्वा ॥ ३८ ॥ शुभचंद्राभ्यां ॥ ३९ ॥ स्वलग्ननाथाश्च ॥ ४० ॥ इत्युपदेशसूत्रेवियोनिभेदोनामचतुर्थाध्यायस्यचतुर्थः पादः ॥४॥ समाप्तश्चाध्यायः ॥४॥ ॥ छ ॥

पुस्तक मिलनेका ठिकाणा–
गंगाविष्णु श्रीकृष्णदास,
लक्ष्मीवेंकटेश्वर छापखाना,
मुंबई. कल्याण.

पुस्तक मिलनेका ठिकाणा–
खेमराज श्रीकृष्णदास,
श्रीवेंकटेश्वर छापखाना,
मुंबई.

इदं पुस्तकं यथाप्रतिशोधयित्वा श्रीकृष्णादासात्मजाभ्यां गंगाविष्णुखेमराजाभ्यां मुंबापुर्यां प्रबोधरत्नाकराख्यमुद्रणयंत्रालये धात्वक्षरैर्मुद्रितम् । अस्याधिकाराः सर्वेऽपि राजनियमानुसारेण स्वायत्तीकृताः

संति शकाब्दाः १८१४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 इत्युपदेशसूत्रेचतुर्थाध्याये तृतीयः पादः ॥ ३ ॥ ॥ छ ॥ ॥ छ ॥
गुणेषुगुणरमणी ॥ १ ॥ केंद्रत्रिकोणेषुशुभवर्गेषु ॥ २ ॥ अर्कारमंदफलयोः पुमांश्च ॥ ३ ॥ चंद्र
 बुधाभ्यांस्त्रीच ॥ ५ दृग्योगाभ्यामपि ॥ ५ ॥ यथानिर्हरणं ॥ ६ ॥ रोगेपापेवैधवीपापदृग्योगानि
श्रयेन ॥ ७ ॥ उच्चेविलंबात् ॥ ८ ॥ नीचेक्षिप्रं ॥ ९ ॥ मिश्रेमिश्रात् ॥ १० ॥ चंद्रकुजदृष्टौनिश्चये
न ॥ ११ ॥ आद्याआत्मजस्त्री ॥ १२ ॥ कार्येपापेकोणेवा ॥ १३ ॥ पापदृग्योगकालेवियोनि
संज्ञायांविधित्वादिति ॥ १४ ॥ धात्वादिवर्णकाले ॥ १५ ॥ भावपरिवेधनेन ॥ १६ ॥ उच्चेस्वां
शवर्गः ॥ १७ ॥ अर्धांशेपार्श्वादियानिसंबंधः ॥ १८ ॥ मध्येमृगाः ॥ १९ ॥ अंत्येकीटकादयः
॥ २० ॥ एवमुभौशुभलोके ॥ २१ ॥ रविशुक्राभ्यांपापपूर्वं ॥ २२ ॥ अन्यैरन्यथा ॥ २३ ॥
अत्रशुभः केतुः ॥ २४ ॥ पापदृग्योगान्न ॥ २५ ॥ रविराहुशुक्राः ॥ २६ ॥ गुरुश्चैककालादृग्यो
गामिति ॥ २७ ॥ यथाचंद्रम् ॥ २८ ॥ तत्रगुरुवर्गेस्वाम्यंशेच ॥ २९ ॥ स्वेशभूमित्रनीचांश
कश्च ॥ ३० ॥ पूर्णेंदुराव्होरंतरालाश्च ॥ ३१ ॥ शुभवर्गेशुभदृष्टियुतः ॥ ३२ ॥ अंशेमित्रभेदात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोदयास्तशुद्धिः लग्नांशाविति लग्नांशौलग्ननवांशोस्त्यपद्दग्युतौस्वस्वपतिनादृष्टौयुतौवासंतौ नृस्त्रवदौवरस्यस्त्रवदौस्यातां वाइत्यथवा अन्योन्यपादृष्टौक्षि
तौ अन्योन्यपतिना आद्यौर्वीक्षितौवासंतौनृस्त्रवदौस्यातांइत्यदयशुद्धिमुक्त्वा अस्तशुद्धिमाह तामांसप्तमकौतथैवेति ताभ्यांलग्नांशाभ्यांसकाशात्सप्तमे
सप्तमलग्नतदंशौतथैवेति पूर्ववत्स्वपद्दग्युतौयुवतेः कन्यायाः स्त्रवदौस्यातां वाइत्यथवा तौसप्तमलग्नसप्तमांशकौ अन्योन्यपाद्यौक्षितौयुवतेःस्त्रवदौस्यातां
नोचेत् एवंचेन्नस्यात् तदातयोर्मृत्युदौ स्यातांक्रमेण अथेष्टकालेहोरासाधनमाह द्विघ्नेति अर्कोनविलग्नकेद्विघ्नेकृतेसतिद्युपतेःसकाशात् होरेशाभवंति

लग्नांशौस्त्वपद्दग्युतौनृस्त्रवदौवान्योन्यपाद्यैक्षितौताभ्यांसप्तमकौतथैवयुवतेर्नोचेत्तयोर्मृत्युदौ द्विघ्नेर्कोनविलग्नकेरविसित
ज्ञेंद्वार्किजीवासृजोहोरेशाद्युपतेः खलैर्न्हिखलजानेष्टाशुभेमध्यमा ३२ तेषांगणनाक्रममाह तेकेहोरेशाःरविसितज्ञेंद्वार्किजीवासृजः र
विःप्रसिद्धःसितःशुक्रःज्ञोबुधःइंदुश्चंद्रःआर्किःशनिःजीवोगुरुःअसृक्मंगलः खलेन्हिपापवारेखलजाहोरानेष्टाशुभेमध्यमास्यात् अर्थाच्छुभहोराशु
भवारेशुभतरा पापवारेमध्यमास्यात् अत्रोदाहरणंगुरुवारेइष्टार्कः १ २५ ८ इष्टंलग्नं ४ १० ० इदंअर्कोनं २ १४ ५२ इदंद्विघ्नं ४ २९ ४४ उर्ध्वांकसमाना
गताहोराश्चतस्रः वर्तमानापंचमीहोरा सागणनाक्रमेणद्युपतेर्गुरोः सकाशात्गणनीयाजीवासृजादिगणनयाबुधहोरावर्तमाना ३२ अथलग्नं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिश्रीजैमिनीयंसूत्रं

श्रीनीलकंठज्योतिर्विद्विरचितटीकायुतपूर्वाध्यायद्वयं——सूलाध्यायद्वयरूपंच

समाप्तम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मतितन्नेतित्रयोभंगाः वाइत्थयवारवजलाद्यकोणगः शुभः अब्जंचंद्रसंपूर्णायथा तथाईक्षेततदातन्नरवंदशमं जलंचतुर्थं आद्यंलग्नंकोणेनवपंचमे एषा मन्यतमगतोन्यतमः शुभग्रहश्चंद्रमसंनिखिलदृष्ट्यायदिपश्येत्तदाजामित्रंनस्यादित्यर्थः एतेपंचभंगाः सर्वेमिलित्वाश्चतुर्दशभंगाः संपद्यंते ३३ अथदृष्टिलक्षणमाह त्र्यस्त्रंतृतीयदशमं कोणंनवपंचमं अबायुश्चतुर्थाष्टमंएतद्युग्मत्रयंक्रमेणशनिगुरुभूपुत्राः शनिगुरुभौमाः पूर्णयादृष्ट्यापश्यंति शनिः त्र्यस्त्रं ३ १० गुरुः कोणं९ ५भूपुत्रः अबायुः ४ ८एतेपूर्णदृष्ट्यापश्यंतितथा चैतद्युग्मत्रयंअन्येग्रहाश्चरणोत्तरंयथास्यात्तथापश्यंति तद्यथा

त्र्यस्त्रंकोणमबायुरैनिगुरुभूपुत्राः क्रमात्पूर्णयादृष्ट्यान्येचरणोत्तरंचसकलाः पश्यंतिपूर्णंद्युनं भंहोरात्रिलवोनवांशकद्वनांशस्त्रिंशदंशाः क्रमाद्वर्गाः सन्शुभजः परैस्तुसुहृदोनाब्धूनवर्गातनुः ३४

त्र्यस्त्रं३ १० एकपाददृष्ट्यापश्यंतिकोणं९ ५ द्विपदादृष्ट्यापश्यंति अबायुः ४८ त्रिपाददृष्ट्यापश्यंतिसकलाग्रहाः द्युनंसप्तमंपूर्णंपश्यंति अथषड्वर्गसाधनंविवक्षुस्तावन्नामान्याह भंहोरेति भंगृहंहोराराश्यर्द्धं त्रिलवोद्रेक्काणः नवांशकः प्रसिद्धः द्वनांशोद्वादशांशः त्रिंशदंशः प्रसिद्धः क्रमादेतेवर्गाः प्रोक्ताः शुभजः शुभग्रहजोवर्गः सन्शुभः प्रोक्तः परैराचार्यैः सुहृदोमित्रस्यवर्गः सन्प्रोक्तः अब्धिवर्गान् अंगंचतुर्वर्गानलग्नंनसत्प्रोक्तं ३४ अथैषांसाधनमाह प्रोक्तमिति यस्यग्रहस्ययद्गृहंतस्यैवप्रोक्तं भेशामंशुबुचमिति अथहोरासाधनमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यो: परमजामित्रग्रहज्ञानार्थं उपायमाह तावत्तस्य फलमाह लग्नेंद्वोरिति लग्नेंद्वो: स्मरगे सप्तमगे शुभाशुभखगे सति तदा आधिमृत्यू स्तः शुभे सति आधिर्मनस्तापोस्ति अशुभे सति मृत्युरस्ति तदा कदा यदा ततः स्मरगाद्ग्रहात् अज्ञांगोनात् चंद्रलग्नोनात् चंद्रात् सप्तमस्थश्चंद्रोनः लग्नात्सप्तमस्थो लग्नोन इत्यर्थः तस्मात्कृतमौर्विकात् कृतकलिकात् खखयमैः द्विशत्या लब्धं अब्धीषवः चतुःपंचाशत्स्यात् तदैव आधिमृत्यू स्तः अन्यथा नेत्यर्थः तत्रोदाहरणं पूर्वकल्पितमिदं लग्नं ४१०७ तत्सप्तमगोयं कश्चिद्ग्रहः १०११७ अयं लग्नोनः ६१० अयं कृतमौर्विकः १०८६० अस्मात् खखयमैः २०० लब्धं ५४ अथास्य भंगमाह सन्निति सन्

लग्नेंद्वोः स्मरगे शुभाशुभखगे स्तश्चाधिमृत्यू ततो ज्ञांगोनात्कृतमौर्विकात् खखयमैर्लब्धं यदाब्धीषवः सन्स्विष्टोच्चनिजांशभे स्तमरिवलं पश्येद् रिव्याय गे सूर्ये वा रव १० जला ४ द्यु १ कोणग ९५ शुभो वा च्चमपश्येन्न तत् ३३ सद्ग्रहः स्विष्टोच्चनीचांशभे वर्तमानः अस्तं सप्तमभवनं अखिलं पूर्णं यदि पश्येत्तदा तज्जामित्रं न स्यात् शोभनश्चासौ इष्टश्च स्विष्टः शुभमित्रं स्विष्टश्च उच्चं च निजश्च स्विष्टोच्चनिजाः अंशश्च भं च अंशभं स्विष्टोच्चनिजानां अंशभं स्विष्टोच्चनिजांशभं तस्मिन् स्विष्टोच्चनिजांशभे स्विष्टस्य शुभमित्रस्य अंशे न वांशे भे राशौ वा वर्तमानः अथवा उच्चस्यांशे भे वा वर्तमानः अथवा निजस्य स्वस्य अंशे भे वा वर्तमानः अस्तमखिलं पश्येत्तदा तन्नेति षडुंगाः वा इत्यथवा अर्के रवौ अरिव्यायगे सति षष्ठतृतीयैकादशगे ४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वः पंचभागाः शक्रादीनांस्युः एतद्युग्मभेसमराशौज्ञेयं एतदपिलग्नोत्पन्नभागावसानपर्यंतंगणयेत् यत्रविश्रांतिः सत्रिंशांशनाथः विषमेराशौत एव गदिताग्र
हाः भागाश्चव्यस्ताविलोमाज्ञेयाः इतिषड्वर्गोनिरूपितः ३५ अथइष्टकालसाधनंविविस्तरस्तावत्सूर्यसाधनमाह संक्रांत्यंतरमिति अतः अंतरालंतत्रअहा-
निदिनानिसंक्रांत्योः अंतरहानिसंक्रांत्यंतरहानितैः त्वतः भागितः एवंविधोदिनगणः संक्रांतेः सकाशातइष्टदिनसमूहः तस्माद्यदाप्तंलब्धंसभपूर्वोराशिभा

संक्रांत्यंतरहोत्तताद्दिनगणादाप्तंभपूर्वोरविर्मेषाद्यातभयुग्यतोयनलवैःराश्रांसषड्भः सच तद्भोग्यांशहतस्वभोदयवियत्र्याप्तं
तयालग्नतोभुक्ताशाकलितनयुग्विवरगैः कालःस्फुटोभादयैः १६लग्नार्कोयदिचैकभेशाविवरात्तचीयादयघ्नाद्वियत्र्याप्तिःका
लइनान्ततुर्यदितनुः सूर्योदयात्प्रागसौ कुंडेभःपरिपूरितिस्फुटघटिकामर्धोदयास्तेन्यसेत्तत्खाग्नित्रयवायुगानशभदापूर्णा
ग्निःपंचस्वय ३७

गकलादिकोरविः स्यात् किंभूतंरविः मेषात्मकाशात्यानभयुक् गतराशियुक् सूर्यभक्तराशियुग्मित्यर्थः सतान्कालिकोरविः
स्यादित्यर्थः अत्रोदाहरणं तुलावृश्चिकसंक्रांत्योरंतरदिनानि २९ ५४ ० तथातुलासंक्रांतेः इष्टदिनगणः ५ ६ ० अस्माद्दिनगणात्संक्रांत्यंतरहोभिर्ल
ब्धंराश्यादि ० ५ ७ १ इदंसूर्यभक्तराशियुक्तं ६ ५ ७ १ अयंतान्कालिकः सूर्यः अयनलवैः युतः कार्यः अयनांशाः ग्रंथांतरेप्रसिद्धाः कृताब्ध्यब्ध्यूने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह् ओजभे विषमराशौ अर्कशशिनोर्होरे क्रमेण भवतः प्रथम पंचदशभागेषु अर्कस्य होरा अपर पंचदशभागेषु शशिनश्चंद्रस्य होरा स्यात् अथ समराशौ अब्जार्कयोर्होरे क्रमेण भवतः प्रथमं पंचदशभागेषु चंद्रस्य होरा अपर पंचदशभागेषु अर्कस्य होरा स्यात् अथ दृक्काणसाधनमाह दृक्कोडिति दृक्केट् दृक्काणः त्रिविधो दशभागात्मकः तस्य इट् ईशः प्राक् स्मत धर्मपो ज्ञेयः प्राक् लग्नं स्मतः पंचमं धर्मो नवमं तान्पातीति प्राक् स्मत धर्मपः एतदुक्तं भवति प्रथम दृक्काणस्वामी लग्नपतिः द्वितीय दृक्काणस्वामी पंचमपतिः तृतीय दृक्काणस्वामी नवमपतिः स्यादिति नवलवः प्रोक्तः प्रागेव शस्तोंशा इत्यादि अथ द्वादशांशसाधनं स्वतोर्कांशकः स्वस्मा

प्रोक्तं भागृहमोजभेर्कशशिनोर्होरे समेब्जार्कयोर्दृक्केट् प्राक् स्मत धर्मपो नवलवः प्रोक्तः स्वतोर्कांशकः शक्रज्ञेज्ययमासृजांशारसु
नीभार्थेषवो युग्मभे त्रिंशांशाख्या विषमेत एव वर्गादिताव्यस्तास्त्विषड्वर्गकाः ३५

त् इति स्वत लग्नत इत्यर्थः अर्कांशको द्वादशांशो ज्ञेयः तद्यथा राशिभागाः त्रिंशत् ३० एते द्वादशभिर्विभाजिताः लब्धं सार्द्धभागद्वयं २ ३० इदं द्वादशांशमानं तदेव गणनीयं सार्द्धभागद्वयं लग्नस्य द्वादशांशः तावदेव तस्मात् स्वस्येति लग्नस्योत्सन्न भागावसानपर्यंतं गणयेत् यस्मिन् राशौ विश्रमः तत्स्वामी द्वादशांशनाथः स्यात् अथ त्रिंशांशसाधनं शक्रेति शक्रः प्रसिद्धः ज्ञो बुधः इज्यो गुरुः यमः शनिः असृक् मंगलः एषां पंचानां क्रमेण शारसुनीभार्थेषवः स्युः शराः पंच मुनयः सप्त इभाः अष्टौ अर्थाः पंच इष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्मिन्सति अर्धोदयास्ते जाते सति सूर्यस्य अर्धोदये अर्धास्ते च जाते सति किं कृत्वा त्वां मार्यथित्वा प्रार्थना ग्रंथांतरे उक्ता यंत्राणां मुख्यरूपासि ब्रह्मणा निर्मिते घ-
टि दंपत्योः शुभकालसिद्धेत्वं भव शोभने इति मनिष्ठितायां घटिकायां नद्भुमन फलमाह शान्तिष्ठिता घटी अग्नित्रय वायु गान शुभदा स्यात् अग्नित्रय आग्नेयादि
दक्षिण क्रमेण दिशा त्रयं वायुर्वायव्यदिशा इति दिक्चतुष्टयं प्रतिगतान शुभदा अर्थादन्यदिग्गता तत्रैव स्थिता वा शुभदा स्यात् तथा चोक्तं ग्रंथांतरे संस्तु
तैवं घटी तोये यां दिशं प्रतिगच्छति पूर्वाद्यादिफलं कुर्यात् स्थिता मध्ये धनप्रदा सौभाग्यं निर्धनं नार्या अपमृत्यु रुजान्विता भर्तृप्रिया च वेश्या च मान्या वित्तसं
तान्वितेति एवं गमनफलमुक्त्वा पूर्णता फलमाह पूर्णाग्निपंचस्त्वथेति अग्निपंचस्त्र आग्नेयादि पंचस्वादिक्षु पूर्णा घटी न शुभदा अर्थादन्यदिक्षु पूर्णा शुभा स्या
त् उक्तं च उत्तरेशान पूर्वासु पूर्णा घटी शुभप्रदा दिक्षु शेषासु कन्याया मग्ना वैधव्यदायिनी ३७ अथ गोधूललग्नमाह गोधूलमिति गोधूलं ल
ग्नं सायंकाललग्नं गद्जादिके हीनजातौ शुभकरं प्रोक्तं न पूर्ववर्णानां क्वपंचांगशुद्धौ विवाहोक्त पंचांगे अत्र पंचांग शुद्धिर्मुख्या तत्र कालप्रमाणं विशे-
षणद्वारेणाह कथंभूतं गोधूलं रवेः अर्धास्तात् सकाशात् प्राक् परतो अर्धघटिकं अर्धघटिका यस्मिन् इत्यर्धघटिकं प्राक् पंचदश पलानि परतः पंच
दश पलानि एवमर्धनाडिकमित्यर्थः अत्र त्याज्यमाह इहास्मिन् गोधूललग्ने षष्ठाष्टगं इन्दुं चंद्रं जत्यात् त्यजेत् पुनः किं किं जत्यादित्याह
सौम्यांगं उग्रग्रहसहितं लग्नं कुजं भौमं अष्टमं गुरुयमाहः गुरुयानिर्दिनं पातं महापातं सिद्धांतगम्यं अर्कत्रमं सूर्यसंक्रांतिं जत्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तेशाकेषष्ट्यासा अयनांशकाइति सअयनलवयुतोरविः रवौरात्रौष्टकालसा धनविषयेसषड्भःकार्यःषड्राशियुक्तः कार्यः तद्भोग्यांशानिजोदयाहतिः खरामा
 संकालः स्यात् तस्यसायनांशस्यरवेःभोग्यांशाःतद्भोग्यांशाश्चनिजोदयाश्चतेषामाहतिः गुणनं तस्याः सकाशात् खरामासंत्रिंशताभक्तंलब्धंसूर्यस्यभो
ग्यकालःस्यात् निजोदयाः स्वदेशीयराश्युदयाः तेब्रह्मतुल्यादिभ्योवगंतव्याः कथंभूतःकालः तथैवांगतोभुक्तांशाकलितेनयुक् तथैवसूर्यस्यभोग्यकाल
साधनरीत्याअंगतः लग्नात् भुक्तांशाकलितेनभुक्तांशैर्भुक्तभागैः आकलितेनकालेनयुक्युक्तः एतदुक्तंभवति इष्टलग्नं अयनलवयुक्तंकृत्वातद्भुक्तांशैर्निजो
दयागुणनीयाः त्रिंशताभाज्याः लब्धंलग्नभुक्तकालः तेनकालेनसरविभुक्तः कालोयुक्तः कार्यइत्यर्थः पुनः कथंभूतः विवरगैः भोदयैः युक्विवरंसूर्यलग्नांत
रालं तत्रगतैर्भोदयैः राश्युदयैः युक्युक्तः सपलमयः कालः स्फुटः स्पष्टः इष्टकालः स्यात् षष्टिभक्तोघटिकात्मकः स्यादित्यवगतव्यं ३६ अथेष्टकालसाधने
विशेषमाह लग्नार्काविति लग्नार्कौलग्नसूर्यौयदिएकभेस्तस्तदा अंशविवरात् लग्नार्कयोर्भागांतरात्स्वीयोदयघ्नात् निजराश्युदयगुणितात्खत्र्याप्तिः
त्रिंशतालब्धिः सकालः स्यात् इष्टकालः स्यात् तत्रापिविशेषमाह इनात्तनुरिति इनात्सूर्यात्तनुर्लग्नंयदितनुः लघुः स्यात्तदासौइष्टकालः सूर्योदयात्प्राक्पूर्वंस्यात्
सोपिषष्ट्याभक्तोघटिकात्मकः स्यादित्यवगंतव्यं अथज्ञातंकालंयंत्रैर्विनासाधितुंनशक्यतेअतोयंत्राणांमध्येमुख्यस्यघटीयंत्रस्यस्थापनकालमाह कुंडइ-
ति अंभः परिपूरितेउदकपूर्णेकुंडेपात्रेघटिकामज्जनक्षमेकुंडग्रहणं उत्तानपात्रव्युत्पादयंतस्मात्कुंडरूपपात्रेउदकपूरितेस्म घटिकांषष्टिपलयात्रांन्यसेतानिक्षिपेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोद्वाहवेदिकालक्षणमाह प्राक्प्रवणापूर्वनिम्नाचतुर्वरकराचतुर्भिर्वर करैः प्रमितावरांवैवाह्यः हस्तोच्छ्रिताहस्तप्रमाणेनोन्नता इयमग्र्यस्यब्राह्मण
स्यप्रोक्ता सावेदीदोर्जादेः क्षत्रियादेः क्रमेणद्वित्रियुगांगुलैरपचिताहीना क्षत्रियस्यद्व्यंगुलंन्यूना वैश्यस्यत्र्यंगुलोना शूद्रस्यचतुरंगुलो
चना साद्धकार्येत्याह बहिर्वामतइति गृहाद्बहिर्वामभागेअंगुलप्रमाणंमार्कंडेयपुराणेउक्तं परमाणुःपरंसूक्ष्मंत्रसरेणुर्महीरजः बालाग्रंचैवलि

वेदीप्राक्प्रवणाचतुर्वरकराहस्तोच्छ्रिताग्र्यस्यदोर्जादेर्द्वित्रियुगांगुलैरपचितासोक्ताबहिर्वामतः

क्षाचयूकाचाथयवोदरं क्रमादष्टगुणानाहुर्यवानामष्टतोंगुलं षडंगुलंपदंतच्चवितस्तिद्विपदंस्मृता द्विवितस्तिस्तथाहस्तोमार्कंडेयमुनीरितः आग
मांतरेपि कर्तुर्दक्षिणहस्तस्यमध्यमांगुलिपर्वणः मध्यमोदैर्घ्यमानेनमात्रांगुलमितीरितंमिति अन्यत्रोक्तं यत्किंचित्सौरुषायामंविभज्यदशधा
पुनः एकंद्वादशभागंतुकृत्वातेष्वेकमंगुलं देहलब्धांगुलंनामजानीयात्तस्यतत्पुनः महामानांगुलिरितिमात्रांगुलिरितिहोदिता प्रासादादीनितैने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्येदोषानस्यान्याइत्यर्थः अत्रगुरुयमाहस्त्यन्क्तंतद्दोषोपलंभात् गुरुदिनेसूर्यास्तात्प्राक्यामार्द्धपरतोयमघंटः शनिदिनेअस्तमयात्प्राक्पर
तम्श्वकुलिको मार्तंडोदयतःस्मृतादिनपतेर्यामार्धनाथाग्रहामार्तंडात्मजभोगउत्तरलवस्तद्गैः शुभेकर्मणि त्याज्योसौकुलिकोथसूर्यदिवसादा
नेम्श्वशक्रार्कदिक्वस्वंगाब्धियमैःस्मृतःकुरहितैरात्रौतुतिथ्यंशकैरिति त्याज्योसौकुलिकइत्यनेननशनोअस्तात्प्राक्कुलिकोभवति इत्नादौकु-

गोधूलंपद्जादिकेशुभकरंपंचांगशुद्धौरवेरर्धास्तात्परपूर्वतोर्न्द्धघटिकंतत्रेंदुमष्टारिगम्
सोग्रांगंकुजमष्टमंगुरुयमाहःपातमर्कत्रमंजत्थाद्विप्रमुखेतिसंकटइदंसद्योवनाद्येक्वचित् ३८

लिकंदिवेत्यादिव्येकंतन्निशीतिन्यायेनअस्तात्पुरतोपिकुलिकोभवति इतिहेतोर्गुरुशनिवारौनिंदितो अथविप्रादीनामपिक्वचित्कार्यविशेषेणगोरजप्र
शस्तिमाह विप्रमुखेतिसंकटइदंसद्योवनाद्येक्वचिदिति योवनाद्येअतिसंकटेप्राप्तेसतिक्वचिल्लग्नशुध्यभावेइदंगोधूलंविप्रमुखेविप्रप्रभृतिवर्णत्रयेसत्
शुभंस्यात् अन्यथानेत्यर्थसिद्धं तदुक्तंज्योतिर्निबंधे घटीलग्नंयदानास्तितदागोधूलिकंस्मृतं शूद्रादीनांबुधाःप्राहुर्नद्विजानांकदाचन १ लग्नशुद्धि
र्यदानस्याद्योवनेसमुपस्थिते तदावैसर्ववर्णानांलग्नंगोधूलिकंशुभमिति ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथक्रमप्राप्तंवधूप्रवेशमाह लग्नादिति लग्नाद्विवाहतः सकाशात् अष्टिदिनांततः षोडशदिनमध्येसममुनीषंकेषुषुघस्रेषु समाः समसंख्याकाः मुनिः सप्तमः इषुपंचमः अंकोनवमः एषुघुषुदिवसेषु अतऊर्ध्वंषोडशदिनादूर्ध्वं अयुग्घस्रेविषमदिनेमास्यपिविषमेहायनेवर्षेवधूसंप्रवेशंजगुरूचुः एतदुक्तंभवति षोडशदिनमध्येसमादिषुदिनेषुकर्तव्यः षोडशदिनातिक्रमेमासपर्यंतंविषमदिनेवधूप्रवेशः कार्यः प्रथममासातिक्रमेवर्षपर्यंतंविषमेमासिकर्तव्य-

लग्नादष्टि १६ दिनांततः सममुनी ७ षं ५ क ९ घुषूर्ध्वंत्वयुक्घस्रेमास्यपिहायनेशरमितादूर्ध्वंसरं स्वेच्छया

तदाविषमदिननियमोनास्ति एवंप्रथमेवर्षेअतिक्रांतेपंचमवर्षपर्यंतंविषमेवर्षेकर्तव्यः तदाविषममासनियमोनास्ति पंचमाद्वर्षात्परंविषमवर्षनियमोनास्ति अथविलंबितवधूप्रवेशंकस्मिन्मासपक्षेकर्तव्यमित्याह चैफामार्गासितेवेशाखः फाफाल्गुनः मार्गोमार्गशीर्षः एषांसितः शुक्लपक्षस्तस्मिन्वेः श्रुतियुगोद्वाहर्क्षाचित्राश्विनीज्यर्क्षैः श्रुतियुगंश्रवणधनिष्ठेउद्वाहर्क्षाणिविवाहनक्षत्राणिपूर्वो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 वकुर्यान्मानांतरेणवा वेदिकादीनिशिबिकारथादीनांविधिःपुनरित्यादि अत्रवरकरग्रहणंतस्यहोमकर्तृत्वात् ननुकन्याया अपिलाजाहुतौकर्तृत्वम-
स्तितत्करप्रमाणंकिन्नोक्तं सत्यमस्यावकाशस्थलेकन्याकरप्रमाणमप्यंगीक्रियते तथाचोक्तंदेवयजनदीपिकायां स्वल्पावकाशेनिलयेहीनमा
नंसमाश्रयेदिति अथनानाविधकर्मणां अंगंकस्मिन्नक्षत्रेकर्तव्यमित्याह यस्यांगमिति यस्यकर्मणः यत्अगं अदइदं अंगंअंगिनोमुख्यस्यग

यस्यांगंयदहोंगिनोगदितभेकुर्यादिहेंदोर्बलंनालोक्यंतुविवाहतःस्व्यरिनवाह्निप्राङ्न कुर्यादिदं ३९

दितभेउक्तनक्षत्रेकुर्यात् इहास्मिन्नंगभूतेकर्मणि इंदोर्बलंनालोक्यंनविचारणीयं तत्रविशेषमाह विवाहतःविवाहदिनात्प्राक्व्यरिनवाह्नि तृ-
तीयषष्ठनवमेह्निइदं अंगंविवाहांगंनकुर्यात् विवाहांगानियथा दलनंकंडनंचैवव्यजनंमोदकादिच यवारमंडपोवेदिकुंकुमंवर्णकंतथेति ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींप्रथमाषाढादौभर्त्रादिगृहेवासनिषेधमाह उद्वाहादिति उद्वाहाद्विवाहादुपरिप्रथमेशुचौ आषाढेकन्यायदिभर्तृगृहेवसेत्तदातज्जननींतस्यभर्तु
र्जननींहन्यातइत्यादिस्फुगमं ४१ अथपुनर्भूविवाहमाह शूद्राःप्रसिद्धाःअंत्याःरजकादयः तेषुपुनर्भवापरिणयःप्रोक्तःकैःविवाहोक्तभैःस्पष्टं तत्रपु
नर्भवापरिणयेतिथिमासवेधगुरुशुक्रास्तादिन आलोक्यंस्पष्टं तथाचोक्तंज्योतिर्निबंधे नशुक्रास्तादिकंचिंत्यंस्फद्विवेधादिकंतथा पुनर्भवासंव

उद्वाहात्प्रथमेशुचौयदिवसेद्भर्तुर्गृहेकन्यकाहन्यात्तज्जननींक्षयेनिजतनुंज्येष्ठेपतिज्येष्ठकं पौषेचश्वशुरंपतिंचमलिनेचैत्रे
स्वपित्रालयेतिष्ठतीपितरंनिहंतिनभयंतेषामभावेभवेत् ४१ शूद्रांत्येषुपुनर्भवापरिणयःप्रोक्तोविवाहोक्तभैर्नालोक्यंतिथि
मासवेधभृगुजेज्यस्तादितत्राकभात्. त्रित्र्यक्षेषुमृतिर्धनंपुमृतिमृतीपुत्रामृतिर्दुर्भगंश्रीरोन्नित्यमथोधृतौ १८शा ११ कृत
४ तत्व २५क्षेष्वयःसाभिजित् ४२ स्यांनमासतिथिशोधनमिति अथब्रह्मपद्मनक्षत्रस्फद्मिमाह अर्कभात्सूर्यनक्षत्रात्त्रित्र्यक्षेषुत्रिषुनक्ष
त्रेषुक्रमेण मृतिर्मरणंप्रथमेत्रिकेद्वितीयेत्रिकेधनं तृतीयेमृतिः चतुर्थमृतिःपंचमेपुत्राःषष्ठेत्रिकेमृतिः सप्तमेदुर्भगं अष्टगेलक्ष्मीः नवमेत्रिकेऔ-
न्नत्यंप्रोक्तं अथरुद्रपद्मस्फद्मिमाह अर्कभादित्यनुवर्तते धृतौसाकृततत्वर्क्षे धृतिरष्टदशंईशएकादशं कृतश्चतुर्थं तत्वंपंचविंशं एतन्मितेनक्षत्रेअर्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तानि चित्राश्विनीप्रसिद्धे ईज्यर्क्षेपुष्यः तैः अनवमंदिरेजीर्णगृहे नवीनमंदिरेकन्यांनवोढांनप्रवेशयेदितिनिषेधादनवमंदिरइत्युक्तं उक्तंच वधू
प्रवेशनंकार्यंपंचमेसप्तमेदिने नवमेचशुभेवारेफलेशशिनोबलइति नारदः आरभ्योद्वाहदिवसात्षष्ठेवाप्यष्टमेदिने वधूप्रवेशःसंपत्त्यैदशा
मेथसमेदिनइति संग्रहे विवाहमारभ्यवधूप्रवेशोयुग्मेतथाषोडशवासरांतात् तदूर्ध्वमब्देयुजिपंचमांतादतःपरस्तान्नियमोनचास्ति हृद्ध

वैफामार्गसितेजगुः श्रुतियुगोद्वाहर्क्षचित्राश्विनीज्यर्क्षेश्चानवमंदिरेनिशिवधूसंवेशमंगेस्थिरे ४०

नारदः समेवर्षेसमेमासियदिनारीगृहंविशेत् आयुष्यंहरतेभर्तुःसानारीमरणंव्रजेत् भास्करव्यवहारे रात्रौविवाहमेशस्तःसन्मुहूर्तेस्थि
रोदये वधूप्रवेशोनेवात्रप्रतिशुक्राद्वयंविदुः ऋक्षैर्वैवाहिकैःशुद्धैर्दपक्षेश्वशुभप्रदं वधूप्रवेशनंकार्यंपंचमेत्यशुभंयदि मार्गफाल्गुनवै
शाखेशुक्लपक्षेशुभेदिने मूलपुष्यमृदुस्वातीस्थिराश्विश्रुतिवासवे पितृभेचकरेनारीप्रविष्टापुत्रिणीभवेदिति ४० ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याइति ४२ क्षयदर्शनैत्यकंश्राद्धं अधीतिंपठनं शीतलाक्षशीतलोदकेषु आप्लुतिंस्नानंसीमासिंध्वनिपातंसीमाप्रसिद्धा सिंधुर्महानदी सिंधुर्नदी समुद्रयोरित्यभिधानात् तयोरतिपातः उल्लंघनं सव्यातिपातं अपसव्यमित्येतत् एककुलजाः गोत्रिणः क्वचिन्नोकुर्युः किमवधि मंडपस्यउत्थापावधि यावन्मंडपोत्थापनंस्यात्तावन्नकुर्यादित्यर्थः उक्तंच दर्शश्राद्धंक्षयश्राद्धंशीताद्भिः स्नानमेवच प्राचीनावीतिकरणंनदीसीमातिपातनं अन्यच्च

नोश्राद्धंक्षयदर्शनैत्यकमधीतिंशीतलास्वाप्लुतिंसीमासिंध्वतिपातमेककुलजाः सव्यातिपातंक्वचित्

नित्यश्राद्धमधीतिंच स्नानंचशिशिरैर्जलैः सपिंडानैवकुर्वीरन्मंडपोत्थापनावधि अथसमंडपोत्थापः कदाकार्यइत्याह सशरागान्होरिति शराः पंच अगाः सप्त तस्मिन्मितान्होर्दिनयोः पंचमेसप्तमे विषष्टेसमेषष्ठरहितेसमेन्हिसमदिनेउत्थाप्यः उक्तंच मंडपोत्थापनंकार्यंसमेतुदिवसेबुधैः षष्ठंचविषमंनेष्टंमुक्त्वापंचमसप्तमोइति अब्दांतर्वर्षमध्येगृहोद्वाहौनकर्तव्यौ सहजयोः एकमातृजयोः पुरुषयोः पुरुषस्त्रियोः समानक्रियासमानेकर्मनकुर्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मादेतन्मितेइत्सर्थः तत्रचतुष्टयेसाभिजित्गणितेअस्ययोमृत्युः स्यात् अर्थादन्येषुशुभंप्रोक्तमिति ४२ अथनानाविधशास्त्रार्थानाह उपोषितनरः भुक्त्वायत्नभोजनार्थैवकृतांदद्यात् परंउपोषितनरः भुक्त्वायैवबटवेसावित्रिकांगायत्रींदद्यात् तदुक्तंज्योतिर्निबंधे भुक्त्वासमुद्वहेत्कन्यांसावित्रींग्रहणंतथाउपोषितःकृतांदद्यादागतायवरायचेति आरब्धोत्सवकेयदाजनिमृतीस्यातांस्वगोत्रेक्वचित्सांगंतंविदधीतवाजमपरेइति वाजअन्नंअपरेअसगोत्रिणोविदधीरन् वाजमन्नंगरुद्वाजोवाजंपीयूषमुच्यतेइत्यनेकार्थध्वनिमंजर्यां शेषंसुगमं उक्तंच विवाहोत्सवयज्ञादावारब्धेसूतकंयदि सांगंत

भुक्त्वायैवकृतामुपोषितनरोदद्याच्चसावित्रिकामारब्धोत्सवकेयदाजनिमृतीस्यातांस्वगोत्रेक्वचित् सांगंतंविदधीनवाजमपरे
स्मादारभेत्पूर्वतोयज्ञोद्वाहनचौलमौंजिकमहःकुस्वर्गदिक्त्रित्रिषु ४३

त्कर्मकुर्वीतअन्नदानादिकंपरेरिति अस्मादारभेत्पूर्वतोयज्ञोद्वाहनचौलमौंजिकमहःकुस्वर्गदिक्त्रित्रिषु अस्मान्निश्चितदिनात्पूर्वतःप्रथमतः यज्ञोद्वाहनचौल मौंजिकेत्येतत्कर्मचतुष्टयंक्रमात्कुस्वर्गदिक् १ २१ १० त्रि३ त्रिषु ३ अहःसुआरभेत् यज्ञएकविंशतिदिनेषुउद्वाहनंविवाहः दिक्सुदशसुदिनेषु चौलंत्रिषुदिनेषुमौंजिकंत्रिषुदिनेष्विति उक्तंच एकविंशत्यहर्यज्ञेविवाहेदशवासराः त्र्यहेचूडोपनयनेनांदीश्राद्धंविधीयते आरंभलक्षणं आरंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः नांदीश्राद्धंविवाहादौश्राद्धेपाकपरिक्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्जांतराण्याह उद्वाहव्रतचूडकेक्रमेण अब्ददलतत्खंडं उद्वाहेविवाहेकृतेसति अब्दंवर्षपर्यंतंव्रतेव्रतबंधेकृतेसतिदलंअर्धाब्दंषण्मासपर्यंतंइत्यर्थः चू
डकेचौलकर्मणिकृतेसतितत्खंडंतस्यदलस्यापिखंडं त्रिमासपर्यंतमित्यर्थः तिलैस्तर्पणंपिंडयुतंश्राद्धंचनाचरेत् किंविना महालयगयापित्र्यंवि
ना महालयभाद्रपदापरपक्षः गयाप्रसिद्धा पित्र्यंमातापित्रोःक्षयदिनं तत्रयत्श्राद्धंक्रियतेतन्महालयगयापित्र्यंतद्विना उक्तंच विवाहव्रतचूडासुव-
र्षमर्धंतदर्धकं अतिलंतर्पणंकुर्याच्छ्राद्धंकुर्यादपिंडकं महालयेगयाश्राद्धेमातापित्रोःक्षयेहनि कृतोद्वाहोपिकुर्वीतपिंडदानंयथाविधीति पूर्वमिति-

उद्वाहव्रतचूडकेब्ददलतत्खंडंतिलैस्तर्पणंश्राद्धंपिंडयुतंमहालयगयापित्र्यंविनानाचरेत् पूर्वंसप्तपदीविधेरधिगतेदोषेवरे
वामृतेदेयान्यत्रविवाहितापिचबलाद्याविद्धयोनिर्नचेत् ४५ सप्तपदीविधेःपूर्वंप्रथमतःदोषेअंधमूकादिकेअधिगतेज्ञातेसति वाइत्यथवा
वरेमृतेसतिकन्याअन्यत्रदेया अपिचयाकन्याबलाद्विवाहितासापिअन्यत्रदेयातर्हिकथंचेद्यदिविद्धयोनिर्नस्यात् विद्धायोनिर्यस्याःसातथा
पुरुषभुक्तेत्यर्थः उक्तंचयाज्ञवल्क्येन महादोषेसुविज्ञातेपूर्वंसप्तपदीविधेः मरणादौसमुत्पन्नेदेयान्यस्मैनदोषभाक् बलादुद्वाहिता कन्या
दातव्यान्यवरायचेति अन्यच्च बलादुद्वाहिताकन्यामंत्रैर्यदिनसंस्कृता अन्यस्मैविधिवद्देयायथाकन्यातथैवसेति महादोषाःकारिकानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दित्यर्थः भिन्नमातृजयोर्नदोषइत्यर्थोस्तिइदं अर्थात् भिन्नमातृजयोस्तथासहोद्वाहादिकरणयागतं तद्भिन्नकर्तृत्वेभिन्नगृहे सतिवेदितव्यं कर्तृत्वमत्र श्राद्धाधिकारिणः पित्रोरेवनतुविवाहहोमंकर्तुर्वरस्य तथाचोक्तं एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः नसमानक्रियांकुर्यान्मातृभेदेविधीयतइति पुरुषौपुरुषस्त्रियोपृथक्द्वित्वविवक्षयाबहुत्वासंभवान्नबहुत्वं यद्वा पुरुषश्चस्त्रीचतथातयोर्द्वयोः पुरुषयोस्त्रियोर्वापुरुषस्त्रियोर्वाकन्यापुरुषयोर्वि

उत्पापावधिमंडपस्यसशारागान्होर्विषष्ठेससेन्द्युस्याप्योनगृहोद्वहौसहजयोस्तत्स्यात्क्रियाब्दांततः ४४

वाहविशेषश्चोक्तः सोदर्ययोःकन्यकयोः सुतयोरेकवत्सरे विवाहोनस्मृतस्तज्ज्ञैः कन्यकासुतयोः स्मृतइति अत्रसंवत्सरमानं मनुजमानेनचैत्रादि फाल्गुनांतंवेद्यं समानक्रियेतिद्वयोश्चौलेद्वयोर्व्रतबंधोद्वयोर्विवाहोवासहजयोरित्यनेनैवएकमातृत्वंसंभवति उक्तंच नैकस्मिन्वत्सरेकार्यौगृहोद्वाहौकदाचन ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधनंनस्यात् तथाचोक्तं अपत्नीकेस्तधर्मार्थेकोशीहैमीचराजती ताम्रीविप्रादिभिर्भार्याधार्याहैमीतथाखिलैरिति अथविषकन्यालक्षणमा
ह मंदेति मंदारार्कदिने शन्यर्कभौमानामन्यतमस्यवारे अंबुपाग्निफणिभं शततारकाकृत्तिकाश्लेषाणामन्यतमंनक्षत्रं भद्रातिथिर्द्वितीयासप्त-
मीद्वादशी आसामन्यतमाचेत्स्यात्तदायोगःस्यात् इहोद्भूताअत्रयोगेयाकन्याजातासाविषकन्यका अथयोगांतरमाह रिपुक्षेत्रगोसौम्यौ तनु
गौलग्नगतौचेत्स्यातामू४६ अथयोगांतरमाह एकःक्रूरइति एकःक्रूरःरिपुक्षेत्रगःतनुगश्चेत्स्यात् इमौद्वौयोगौइहोद्भवापिविषकन्यकास्यात् तनो-
लग्नेसौरिःशनिःस्यात् रविःसूर्यःपुत्रगःपंचमगःस्यात् धरणीसुतो भौमोधर्मस्थोनवमस्थोयदास्यात् तदाअयंअपरोयोगःस्यात् तज्जापि-
कन्याविषंस्यात् विषमितियथाविषस्वीकारात् मृत्युर्भवतीतिफलंसूचितंतस्मात्परित्याज्येतिभावः अथमूलजादीनांफलमाह मूलेति मूलस्यआद्य-
त्रिपदोद्भवाप्रथमचरणत्रयेजातकन्याश्वशुरंहंति मारयति अत्यंत्यत्रये अहिराश्लेषातस्यअंत्यत्रयं अंत्यचरणत्रयंतत्रजातातस्त्रियंत-
स्यश्वशुरस्यस्त्रियंश्वश्रूंहंतीत्यर्थः ज्येष्ठांत्येज्येष्ठायाःचतुर्थचरणेजातापतिपूर्वजंज्येष्ठंहंति द्विपचतुर्थेद्वौपौपतीयस्यतत्द्विपंविशाखा तस्य-
चतुर्थचरणेजाता देवरंहंति अर्थादन्यचरणजाशुभा ४७ एवंउक्तनक्षत्रचरणजातोनानरःयुवतेःस्त्रियःश्वशुरादीन्हंति तथाचगर्गः मूल
जाश्वशुरंहंतिसार्पजाचतदंगनां ज्येष्ठजातुपतिज्येष्ठंदेवरंतुद्विदैवतेति तथाचकश्यपपटले मूलांत्यपादजोश्रेष्ठौतथाश्लेषाद्यपादजो द्वीशांत्यपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बंधैरुक्ताः अंधोमूकः क्रियाहीनश्चापस्मारीनपुंसकः दूरस्थः पतितः कुष्ठीदीर्घरोगीवरोनसन् अन्येपिदोषाउक्ताः मूर्खनिर्धनदूरस्थशूरमोक्षाभिला षिणां त्रिगुणाधिकवर्षाणांनदेयाजातुकन्यकेति पुरुषनपुंसकलक्षणं यस्याप्सुप्लवतेबीजंह्लादिमूत्रंचफेनितं पुमांस्याल्लक्षणैरेतैर्विपरीतै- स्तुषंढकः अपरीक्ष्यदानेदोषः अपरीक्ष्यवरंकन्यांनिर्गुणायप्रयच्छति कुलंतस्यैवतच्छोकसंतमोविनिकृंततीति ४५ अथस्त्रीरहितानांविधि-

अस्त्रीकैः कुशहेमरौप्यरचितातास्त्रीचविप्रादिभिर्भार्यावानिखिलैः सुवर्णरचिताधर्मायधार्याबुधैः मंदारार्कदिनेबुधा ग्निफणिभंभद्रातिथिश्चेदिहोद्भूतासाविषकन्यकापितनुगोसौम्योरिपुक्षेत्रगो ४६ एकः क्रूरइहोद्भवाप्यथतनौसौरी र विः पुनगोधर्मस्थोधरणीसुतोयमपरोयोगोपितज्जाविषं मूलाद्यत्रिपदोद्भवाश्वशुरमत्त्यत्रयेतत्त्रियंज्येष्ठांत्ये पतिपूर्वजंद्विपञ्चतुर्थेदेवरंहंतिच ४७ माह अस्त्रीकैः स्त्रीरहितैः विप्रादिभिर्विप्रक्षत्रियविट्शूद्रैः क्रमेणकुशहेमरौप्यरचिताश्री ल्कीचभार्याधर्मायधार्या अयमर्थः विप्रेणकुशरचिताभार्याधर्मायधार्या क्षत्रियेणहेमरचिता वैश्येनरौप्यरचिता शूद्रेणताम्रीतांम्ररचिताभा र्याभर्त्या कथंभूतैर्विप्रादिभिः बुधैः स्वस्वधर्मनिरतैः वाइत्यथवानिखिलैः सर्वैर्विप्रादिभिः सुवर्णरचिताभार्याधार्या यतस्तयाविनागृहस्थधर्म

५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वः तेषु न कार्यौ षण्मासाभ्यंतरे न कार्यौ वित्यर्थः उक्तंच नारदेन विवाहस्त्वेकजन्यानां षण्मासाभ्यंतरे यदि असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत् इति
नोद्वाहाद्व्रतमिति उद्वाहान्मृतुषु व्रतं मौंजी न कार्या तथा चोक्तं नारदेन पुत्रोद्वाहात्परं पुत्री विवाहो न ऋतुत्रये न तयोर्व्रतमुद्वाहान्मंगलेनान्यमंगलमिति नोपु

नोद्वाहौ सहजातयोरथ्मृतुषु नोद्वाहाद्व्रतं नो पुमुद्वाहात्स्त्र्युद्वहनं न मंगलविधेर्मुंडं त्रिरुक्ष्येषु न ४८

मुद्वाहात्स्त्र्युद्वहनमिति पुमुद्वाहात्पुरुषविवाहात्मृतुषु स्त्र्युद्वहनं कन्याविवाहः नो कार्यः तथा च कात्यायनः पुत्रोद्वाहात्परं पुत्री विवाहो न ऋतुत्रयः
इति न मंगलविधेर्मुंडनमिति मंगलविधेः विवाहात्मृतुषु मुंडनं चौलं व्रतं वा न कार्यम् अत्र कात्यायनः कुले ऋतुत्रयादर्वाक् मंडनान्न तु मुंडनमिति
त्रिरुक्ष्ये पुनेति एषु मृतुषु त्रिरुक्षी न कार्या त्रयाणां शुभानां समाहारस्त्रिरुक्षी मंगलत्रयमिति यावत् न कुर्यान्मंगलत्रयमिति वचनात् ४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दज्ञैः दुष्टैस्तथाज्येष्ठांत्यपादजौइति अस्यापवादः अभावइहनोदोषइति अभावेतेषांश्वशुरादीनां अभावेसतिइह मूलादिजोद्वहनेनोदोषः केचिदाचा
र्याः नुः नरस्यमौंज्यूर्ध्वंमौंजीबंधनानंतरंतत्फलंनवदंति उक्तंचनारदेन मूलव्यालभवोदोषोविवाहेयउदाहृतः समौंजीबंधनादूर्ध्वंपुंसांनैवेतिकै

एवंनायुवतेरभावइहनोदोषेनुरेतत्फलंमौंज्यूर्ध्वंनवदंतिकेचिदपिपैत्र्याद्येफलंमूलवत्

चनेति पैत्र्याद्येपिमघाया आद्यचरणेपिमूलवत्फलंस्यादितिकेचिद्वदंति तथाचोक्तंनारदेन पैत्र्यगंडोद्भवाकन्याश्वशुरघ्नीचकेचनेति अथकृतुत्रयस
ध्येकिंकिंनकर्तव्यमित्याह नोद्वाहाविति सहजातयोःएकोदरसमुत्पन्नयोःपुत्रयोःकन्ययोःकन्यापुत्रयोर्वाउद्वाहोविवाहोन्यृतुषुनयश्चतेकृतवश्चव्यूत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विस्तारयेत्कुर्यादित्यर्थः तथाचोक्तंसंहितासारावल्यां फाल्गुनेचैत्रमासेतुपुत्रोद्वाहोपनायने भेदाद्बदस्यकुर्वीतनक्षुत्रयलंघनमिति अथवावेदाहां
तरितेचतुर्दिनांतरितेकालेमंगलंवितनुयात् तथाचस्मृतिसारावल्यां पुत्रीपरिणयादूर्ध्वंयावद्दिनचतुष्टयं पुम्यंतरस्यकुर्वीतनोद्वाहमितिसूरयइति
अथवादिनव्यवहितेएकदिनांतरितेकालेमंगलंकुर्वीत तथाचोक्तं एकोदरप्रसूतानामेकस्मिन्वासरेनरः विवाहंनैवकुर्वीत मंडनोपरिमुंडनमिति
अथवाएकाहेपिनद्यानगेनपर्वतेनअंतरितेदेशेमंगलंवितनुयात् ज्योतिर्विवरणे एकोदरयोर्वरयोरेकदिनोद्वाहतोभवेन्नाशः नद्यंतरएकदि
नेकेप्याहुः संकटेचशुभमिति शार्ङ्गधरोपि नद्यंतरेपिशुभदंपृथकुशैलस्यरोधतइति ४९ एकाहेपीति अथवाएकाहेपिजनाश्रयांतरेमंडपांतरेमं-
गलंवितनुयात् मंडपोस्त्रीजनाश्रयइत्यमरः उक्तंचज्योतिर्विवरणे नप्रतिषिद्धंलग्नंसंप्राप्तेसंकटेमहति एकोदरसंभवयोरेकाहेभिन्नमंडपे
कालइति अथैषांपक्षाणांनिर्णयमाह इहेदमिति इहास्मिन्विवाहादिविषयेइदंभेदेब्दस्येत्याद्युक्तंबुधैस्तारतम्याद्योज्यं संकटानुरूपंयोज्यमि
त्यर्थः अथयमलयोर्विशेषमाह नोयमयोरिति यमयोर्यमलयोः इदंनोनिषिद्धं अनयोर्यमलयोर्मंगलंएकत्रएकवत्सरेएकवारेएकमंडपेका-
र्यमितिसुनयोजगुः उक्तंच एकस्मिन्वत्सरेचैववासरेमंडपेतथा कर्तव्यंमंगलंस्वस्त्रोर्भ्रात्रोर्यमलजातयोरिति स्त्र्यादीनांस्त्रीणांपुरुषा
णांवायमलजातानामप्येवंतुल्यन्यायत्वात् यमलयोर्मध्येएकस्यांस्त्रियांएकस्मिन्पुरुषेसतिस्त्रीविवाहंसमाप्यपुरुषविवाहंकुर्यात् स्त्रीपुरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.भ्रा· नोज्येष्ठाल्लध्विति ज्येष्ठात्मंगलात्विवाहादेरूर्ध्वतुपुलघुमंगलंनोकार्यं यद्बृहिःशालायासुक्तं ततज्येष्ठमंगलं अन्यल्लघुमंगलं ज्येष्ठलघुलक्षणंसारसमुच्च टी
५३ ये चूडाकेशांतसीमंतविवाहोपनयानबुधाः गुरुमंगलमित्याहुस्तदन्यल्लघुमंगलमिति तन्नकार्यमित्यर्थः कस्मादृतेकालरुद्रतः ऋतेकालेनरुद्धंगर्भा
धानपुंसवनादि तस्मादृतेतेनविनेत्यर्थः तथाचकात्यायनः मातृयज्ञक्रियापूर्वंज्येष्ठंकृत्वातुमंगलं ऋतुत्रयंपुनर्यावन्नकुर्याल्लघुमंगलं लघुवागुरु·

नोज्येष्ठाल्लघुकालरुद्धतऋतेकात्यायनोमुंडनंचौलंप्राहनमेखलेत्युभयतःकार्याविवाहादियं भेदेब्दस्यचसंकटेवितनुया
त्पूर्वोदितंमंगलंवेदाहांतरितेदिनुव्यवहितेनद्यानगेनापिवा ४९ एकाह्नेपिजनाश्रयांतरइहेदंतारतम्याद्बुधैर्योज्यंनो
यमयोर्निषिद्धमनयोरेकत्रकार्यंजगुः नैकस्मैदुहितृद्वयंसहजयोर्नैकोद्वहेत्कन्यकेदद्याद्दुद्वहनंमिथोनतनुयात्कुर्याद
संपद्यदः ५०

वाकार्येकार्यंनैमित्तिकंयदीति लघुगुरुमंगलयोर्भिन्नकर्तृत्वेनदोषः कात्यायनोमुनिः इतिप्राह इतीतिकिंव्रतंमुंडनंन चौल
मेवमुंडनं मौंजीविवाहात् उभयतःकार्येति तथाचतद्वाक्यं मुंडनंचौलमित्युक्तंव्रतोद्वाहौतुमंगलं चौलंमुंडनमेवोक्तंवर्जयेद्वरणात्परं मौंजी ५
चोभयतःकार्यायतोमौंजीनमुंडनमिति अथसंकटेप्रवृत्तिमाह भेदेब्दस्येति संकटेदेशकालभयादौ अब्दस्यसंवत्सरस्यभेदेपूर्वोदितंमंगलंवितनुयात्

CC-0. In Public Domain. Digitization by eGangotri

पितापितामहश्चैवमाताचैवपितामही पितृव्यस्त्रीसुतोभ्राताभगिनीचाविवाहिता एभिरेवविपन्नैश्चप्रतिकूलंबुधैःस्मृतं अन्येरपिविन्नैस्तकेचिदूचुर्नतद्ववेदिति अथान्येषांमतमाह अन्येइति अन्येबुधाःस्वान्वयजात्ययेपिस्वकुलजातमर्त्यनाशेपिउद्वाहंनविदधुः तथाचभृगुःवाग्दानानंतरंयत्रकुलयोःकस्यचिन्मृतिः तदोद्वाहोनैवकार्यःस्वपक्षक्षयदोषतइति अथसंकटेप्रवृत्तिमाह जनकांबास्त्रीति जनकश्चअंबाचस्त्रीचसुतश्चअन्यश्च अन्यःकुलजःप्रतिकूलाधिकारी एषांअत्ययोनाशःमरणमितियावत् तस्मिन्सति अब्दार्धार्धार्द्धदलांतरेहेरंबशांत्यागणेशशांत्याक्वचित्संकटे

अन्येस्वान्वयजात्ययेपिजनकांबास्त्रीसुतान्यात्ययेब्दार्धार्धार्धदलांतरेविदधतेहेरंबशांत्याक्वचित् ५१

विदधतेबुधाइत्यध्याहारः एतदुक्तंभवति वरस्यवध्वावापितृनाशेअब्दांतरेवर्षांतरेमातृनाशेअर्धांतरेषण्मासांतरे स्त्रीनाशेअर्धांतरेत्रिमासांतरेएतद्द्वितीयादिविवाहेज्ञेयं तथापुत्रनाशेअर्धांतरेसार्द्धमासांतरे अन्यनाशे पितृमातृस्त्रीत्यादिभ्योन्यस्यकुलजस्यनाशेदलांतरेसार्धार्द्धमासस्यार्द्धांतरेत्रयोविंशतिदिनांतरेविदधतइत्यर्थः ५१ अन्यमध्येभ्रातुर्विशेषमाह भ्रातुश्चात्मजवदिति भ्रातुर्नाशेपुत्रवत्पुत्रनाशोक्तवज्ज्ञेयं सार्द्धमासांतरेकर्तव्यमित्यर्थः तथाचस्मृतिसारावल्यां पितुरब्दमिहाशौचंतदर्द्धंमातुरेवच मासत्रयंतुभार्यायास्तदर्द्धंभ्रातृपुत्रयोः अन्येषांतुसपिंडा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षयोः सहविवाहकरणस्याघटमानत्वात् अथप्रत्युद्वाहनिषेधमाह नैकस्मैइति एकस्मैवरायदुहितृद्वयंएकोद्भवकन्याद्वयंनदद्यात् सहजयोः एको दरसंभवयोर्भ्रात्रोः एकोद्भवेकन्यकेनदद्यात् तथामिथः परस्परंउद्वहनंनतनुयात् अत्रापिसंकटेप्रवृत्तिमाह कुर्यादिति अदः नैकस्मैइत्याद्युक्तम कर्तव्यं असंपदि अन्यवधूवरालाभेसतिकुर्यात् तथाचनारदः प्रत्युद्वाहोनैवकार्योनैकस्मिन्दुहितृद्वयं नचैकजन्ययोःपुंसोरेकजन्येतुकन्यकद्व त्यादि ५० अथप्रतिकूलनिर्णयमाह नोद्वाहमिति निश्चयेपिसतिबुधाः उद्वाहंनजगदुः कस्यांसत्यांपित्रोः असूत्क्रांतौसत्यां माताचपिताचपितरौतयोः

नोद्वाहंसतिविश्चयेपिजगदुःपित्रोःसपित्रोस्त्रियाःसूनोर्भ्रातुरनूढितस्वसुरसूत्क्रांतौपितृव्यस्य

च असूनांप्राणानांउत्क्रांतिः उत्क्रमणंतस्यांसत्यामित्यर्थः कथंभूतयोःपित्रोः सपित्रोः पितरौचपितरौचपितरः मातुःपित रौपितुःपितरावित्यर्थः तैः सहवर्तमानौसपितरौतयोः सपित्रोः पुनः कस्यांसत्यांस्त्रियाः असूत्क्रांतौसत्यां इदंद्वितीयविवाहादौज्ञेयं एवंसूनोःपुत्रस्य भ्रातुः सहजस्य अनूढितस्वसुः अपरिणीतभगिन्याः पितृव्यस्यपितृभ्रातुः असूत्क्रांतौसत्यां एतदुक्तंभवति पित्रादीनामुक्तानांमध्ये अन्यतमेमृ तेसतिविवाहंनकुर्यादित्यर्थः तथावृद्धशौनकः वरवध्वोः पितामातापितृव्यश्चसहोदरः एतेषांप्रतिकूलंचेन्महाविघ्नप्रदंभवेत् अन्यच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्क्रियायामकृतायांनांदीमुखंनाचरेत् एतत्सगोत्रविषयं तथाचमेधातिथिः प्रेतकर्माण्यनिर्वृत्यचरेन्नाभ्युदयक्रियां आचतुर्थंततःपुंसिपं चमेतुश्रुभंभवेदिति नोकुर्यादिति ज्वरितस्यमंगलंनोकुर्यात् तथाचगर्गः ज्वरस्योत्पादनंयस्यशुभंतस्यनकारयेत् दोषनिर्गमनात्पश्चात्तस्योध्र्वंसमाचरेदिति अतीति अतिव्याध्युद्भवेकस्यचित्कुलजस्यशरीरेअतिदारुणज्वरोत्पत्तौनिश्चयंनोकुर्यात् प्रतिकूलभीत्या रोगःपाप्माज्वरोव्याधिर्विकारोदुःखमामयइत्यादिवाग्भट्टेज्वरपर्यायनामानि तथाचगर्गः केचित्तुगृहस्थस्यकस्यचिद्दारुणोज्वरः तावन्मंगलकार्यंचनकार्यंनिश्चितंबु

आतुर्यान्मृतनृक्रियानभिभवेनांदीमुखंनाचरेन्नोकुर्यात्ज्वरितस्यमंगलमतिव्याध्युद्भवेनिश्चयं ५२

ध्येरिति ५२ अथमहत्संकटेसतिवृद्धिसूतकेकर्माईतामाह चेत्यादिति उक्तपूर्वसमयेयज्ञोद्वाहनचौलमौंजिकमित्यत्रोक्ते पूर्वकाले अनारब्धकार्येसतिकर्मणि अनारब्धेसतिसंकटेचप्राप्तेसति कूष्मांडीघृतहोमतःकूष्मांडीभिर्यद्देवादेवहेडनमित्यादितिसृभिर्ऋग्भिर्घृतहोमः कूष्मांडीघृतहोमः तेनजननाशौचेदशाहतःजन्मदशाहमध्येकर्मआचरेत् कूष्मांडीघृतहोमंशास्त्रोक्तंसदक्षिणंकृत्वाकर्मकर्तव्यमित्यर्थः तदुक्तंस्मृत्यंतरे संकटेसमनुप्राप्तेसूतकेसमुपागते कूष्मांडीभिर्घृतंहुत्वा गांदत्वाचपयस्विनीं चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेदिति स्मृत्यंतरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामाशौचंमाससंमितं तदातुशांतिकंकृत्वाततोलग्नंविधीयतइति स्मृत्यंतरेप्युक्तं संकटेसमनुप्राप्ते याज्ञवल्क्येनयोगिना शांतिंकृत्वागणेशस्य- कृत्वातांशुभमाचरेत् अकृत्वाशांतिकंयस्तुनिषेधेसांतेदारुणे प्रकरोतिशुभंसंगर्वात्विघ्नस्तस्यपदेपदेइति ज्योतिःप्रकाशे प्रतिकूलेपिकर्तव्यो विवाहोमा समंतरात् शांतिंविधायगांदत्वावाग्दानादिचरेत्पुनरित्येतत्प्रौढायांकन्यायांपित्रोर्मरणेपिज्ञेयं प्रतिकूलेपिप्रतिकूलाभावमाह भयइत्यादि भयेदुर्भि क्षराजभये अतिसमये अतिकालेपित्रोर्मातापित्रोः मृतेः संशयेसति अन्येषांमातृपितृभ्यांअन्येषांमृतानांप्रतिकूलंनास्ति तथाचोक्तंज्योतिः

स्यात्तुश्चात्मजवद्भयेतिसमयेपित्रोर्मृतेःसंशयेनान्येषांप्रतिकूलधामयिविरक्तारात्गतानामपि

सागरे दुर्भिक्षेराष्ट्रभंगेचपित्रोर्वाप्राणसंशये प्रौढायासपिकन्यायांनान्यकूलंप्रतीक्षतइति विशेषांतरमाह आमयिविरक्तारात्गतानामपिप्रतिकूलंना- स्ति आमयीरोगीदीर्घरोगीतियावत् विरक्तोगृहादिषूदासीनः आराद्गतोदूरगतः देशांतरगतइतियावत् आराद्दूरसमीपयोरित्यमरः एषामपिमृता नांप्रतिकूलंनास्ति तथाचोक्तंस्मृत्यंतरे दीर्घरोगाभिभूतस्यदूरदेशेस्थितस्यच उदासवर्तिनश्चैवप्रतिकूलंनविद्यतइति अथान्यानपिशास्त्रार्था नाह आतुर्यादिति तुर्यश्चतुर्थः पुरुषःमूलपुरुषाच्चतुर्थइत्यर्थः तंमर्यादीकृत्यमृतस्यनरस्यक्रियायाअनभिभवेअभावेसतिक्वचित्कारणांतरा ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भीत्यादिषु रजोभयादिषु सत्सु अंतः गोदाजान्हव्योर्मध्ये हरिलवादूर्ध्वे सिंहेज्येसति अजेमेषे इने सूर्ये सति क्षभमाचरेत् अजेइने इत्येतद्विवाहविषयं अस्त्र भीत्यादिष्वित्यनेनपदेनलक्ष्यते तथाच शौनकः मेषस्थेदिवसकरेसिंहस्थेवज्रपाणिसचिवेच यस्याः परिणयनमसौसाध्वीक्षरवसंप दोपेतेति व्रतबंधस्तु मीनगेसूर्येसति चैत्रे कर्तव्य इति ग्रंथकृताप्रागेवोक्तं अनिमिषरविमध्येकार्यमिति तथाच मौंजीपटले जन्मभाद्दष्टगे-सिंहेनीचेवाशत्रुगेगुरौ मौंजीबंधः क्षमः प्रोक्तश्चैत्रेमीनगतेरवौ अथवाइनेइज्येतत्सदंसर्वक्षभंसाधारणविषयं तथाच शौनकः सिंहस्थे

सिंहेज्येनक्षभंहितंहरिलवोर्ध्वंगोतमीदक्षिणेजान्हव्युत्तरतः क्वचिद्दितमजेर्केतोस्त्रभीत्यादिषु ५३

देवगुरौमेषस्थोयदिभवेत्सहस्रांशुः मंगलकार्यंकुर्यादितिनारदपराशरौवदतइति अस्त्रभीत्यादिष्वित्यत्रादिशब्देनवृद्धपितृमरणशंकायां-कर्त्रंतराभावाद्यतिसंकटेज्ञेयं ५३ अथनामराशिजन्मराश्योर्निर्णयमाह देशः प्रसिद्धः ग्रामः प्रसिद्धः गृहंप्रसिद्धं ज्वरः प्रसिद्धः इत्यादिषु नामराशिः प्रधानंस्यात् एतदुक्तंभवति देशग्रामगृहेषुप्रवेशाद्यर्थंज्वरेचंद्राद्यवलोकनार्थंव्यवहृतिर्व्यवहारः द्यूतंप्रसिद्धं दानंतुलापुरुषा दि एषुचंद्रबलाद्यर्थं मनोमंत्रेमेलनार्थंचंद्रबलाद्यर्थंच सेवाराजादिसेवातत्रमेलाद्यर्थं काकिण्यांकाकिण्यवलोकनार्थं वर्गशुध्यर्थंसंग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनारब्धविशुद्ध्यर्थं कूष्मांडैर्जुहुयाद्घृतं गांदद्यात्पंचगव्याशीततःशुध्यतिसूतकीति अथसिंहेगुरौसतिमंगलनिषेधमाह सिंहेज्येइति सिं
हेसिंहराशौईज्यःसिंहेज्यः तस्मिन्सातिशुभंनित्यव्यतिरिक्तंनहितंस्यात् इदंतुपूर्वमेवप्रपंचितं तथाचकालनिर्णये शांतिकंपौष्टिकंया-
त्राप्रतिष्ठोद्वाहपूर्वकं नकुर्यात्सर्वमांगल्यंसिंहस्थेचबृहस्पतौ तथाचमांडव्यः इष्टापूर्तेचचौलादिसंस्कारान्वास्तुकर्मच अन्यानिशु
भकर्माणिनकुर्यात्सिंहगेगुराविति अथसंकटेप्रवृत्तिमाह हरिलवोर्ध्वमिति क्वचित्संकटेदेशकालभयादौसिंहेज्येपिहरिलवादूर्ध्वंसिंहांश

चेत्स्यात्सूतकमुक्तपूर्वसमयेनारब्धकार्येबुधः कूष्मांडीघृतहोमतोद्विजननाशौचेक्वचित्कारयेत्

दूर्ध्वंगौतम्याः दक्षिणतःजान्हव्याउत्तरतःशुभंकर्महितंस्यात् तथाचज्योतिर्निबंधे सिंहेगुरौसिंहनवांशकोर्ध्वंगोदावरीदक्षिणकूलजातेःउ
द्वाहकालस्यपदोषभीतेः कार्योविवाहस्त्वयवनोब्रवीतीति तथाचगर्गः भागीरथ्युत्तरेतीरेगोदावर्याश्चदक्षिणे व्रतोद्वाहादिकर्माणिसिं
हसंस्थेनदुष्यतीति अर्थाद्गोदावर्याःउत्तरेभागीरथ्याःदक्षिणेएवंद्वयोर्गोदाजान्हव्योर्मध्येसंकटेपिशुभंनआचरेदितिसिद्धं तथाचवसि
ष्ठः गोदावर्युत्तरेतीरेभागीरथ्याश्चदक्षिणे विवाहादिनकुर्वीतसिंहसंस्थेचवाक्पताविति अत्राप्यतिसंकटेप्रवृत्तिमाह अजेति अस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तच्चूचेचोलापदेचाद्येइत्यादयः श्लोकानिबद्धास्तस्मात्चक्रात्धंनक्षत्रंज्ञेयं तद्यथा चूडामणीतिनाम्नः आद्याक्षरात्चकारात् चूचेचोलाइत्यादि
ना अश्विनीनक्षत्रंतत्रप्रथमचरणइतिवत्ज्ञेयंइत्यर्थः तथाचदीपिकायां जन्मनज्ञायतेयेषांतेषांनामगवेष्यते चक्रेवकहडेभांशोत
न्नाडीकेश्चिद्श्विभादिति तन्नाडीत्यस्यार्थः यदानाम्नोनक्षत्रंगवेष्यते तदाअश्विभात्कृत्तिकानक्षत्रात्नाडीविलोक्यैतिकेश्चिदुक्तं केश्चिदि
तितन्मतमग्राह्यं तस्मादश्विन्यादित्रिकंव्यस्तमितिन्यायेननाड्यवलोकनंबहुसंमतमितिभावः अथनामादौसंयोगाक्षरेसतिकिंकर्तव्यमित्य

धंनामादिमवर्णतोवकहडाद्युज्यादिवर्णाद्बवौतुल्यावत्रशसौखषौयदभिधावत्ज्ञोस्यनामांतिमम्

पेक्षायामाह युज्यादिवर्णादिति युजियुक्तेऽक्षरेसंयुक्ताक्षरेप्रद्युम्नेत्यादिकेनामादौयुक्ताक्षरेसति आदिवर्णात्प्रथमवर्णात्धंज्ञेयं यथाप्रद्युम्ने
नाम्नि प्रथमवर्णःप्रस्तत्राप्याद्यःपकारस्तस्मात्धंज्ञेयमित्यर्थः प्रियवन्तेत्यादौपिकारएवद्रुपदेत्यादौदुकारएवग्राह्यइत्यादि स्वरशास्त्रे संयोगा
क्षरजेनाम्निज्ञेयंतत्रादिमाक्षरमिति अथअवकहडचक्रेनामाद्यक्षराभावेसतिकिंकर्तव्यमित्यपेक्षायांआह बवौतुल्यावत्रशसौखषाविति अ
त्रावकहडचक्रेबवौइतिइमौवर्णौतुल्यौ तथाचखषौ शिवइतिनाम्निसति अवकहड चक्रेशकारस्याभावात्साकारस्थानेसकारांगीकारात्धंज्ञेय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 रेसंग्रामेचंद्रबलाद्यर्थं पुनर्भूमेलकेपुनर्भूमेलनायनामराशिरवलोकनीयेत्यर्थः परतःएभ्योन्यत्रविवाहयात्रादौजन्मर्क्षंजन्मराशिः प्रधानंस्यात्
तथाचज्योतिर्निबंधे देशग्रामेगृहेयुद्धेसेवायांव्यवहारके नामराशेःप्रधानत्वंजन्मराशिंनचिंतयेदिति काकिण्यांवर्गशुद्धौचदानेद्यूते
ज्वरोदये मंत्रेपुनर्भूवरणेनामराशेःप्रधानतेति विवाहेसर्वमांगल्येयात्रादौग्रहगोचरे जन्मराशेःप्रधानत्वंनामराशिंनचिंतयेदिति अथ
वधूवरयोर्मध्येएकस्यजन्मर्क्षंज्ञातंएकस्यनज्ञातंतदाशुद्धिमेलादिकंकथमवलोकनीयमित्याह वधूपुरुषयोरिति वधूपुरुषयोर्मध्येचेद्यदि

देशग्रामगृहज्वरव्यवहृतिद्यूतेषुदानेमनौसेवाकाकिणिवर्गसंगरपुनर्भूमेलकेनामभं जन्मर्क्षं
परतोवधूपुरुषयोर्जन्मर्क्षमेकस्यचेत्ज्ञातंशुद्धिमितोविलोक्यचतयोर्नामर्क्षयोर्मेलकः ५४

एकस्यजन्मर्क्षंज्ञातंएकस्यनज्ञातंतदाइतःज्ञातात्जन्मर्क्षादेकस्यशुद्धिंगुर्वादिशुद्धिंविलोक्यतयोर्वधूवरयोर्नामर्क्षयोर्मेलकोवर्णवश्यादिकःपूर्वोक्तोवि
लोक्यःअर्थाद्द्वयोरप्यज्ञानेनामर्क्षादेवसर्वंविलोक्यं तथाचशार्ङ्गधरः विवाहघटनंचैवलग्नजंग्रहजंबलं नामभाच्चिंतयेत्सर्वंजन्मनज्ञायते
यदेति ५४ अथमेलकार्थेनाम्नोनक्षत्रज्ञानमाह भंनामेति नामादिमवर्णोनामाद्यक्षरंतस्मात् अवकहडंशतपदंचक्रंयस्मात्चक्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पट्टबंधनचौलान्नप्राशनेन्चोपनायने श्रवणादंजवनक्षत्रमराणां त्वन्यकर्मणीति ५५ इति स्वकृतमुहूर्तमार्तंडटीकायां मार्तंडवल्लभायां विवाहप्रकरणं स
माप्तम्   अथाग्न्याधानं वृत्तेनैकेनाह   अग्न्याधानमिति अग्नेराधानं बहुभिर्बुधैर्दारकाले अवादि कथितं चतुर्थीकर्मानंतरं दारकालः परैरा
चार्यैर्दायाद्यकाले धनविभागकाले अवादि तथा च वृत्तशते अग्न्याधानं दायकाले विधेयं कैश्चित्प्रोक्तं तच्च दायाद्यकाले इति तथा च कात्यायनगृ
ह्ये आवसथ्याधानं दारकाले दायाद्यकाले एकेषामिति एतद्भाष्यकारैरेवं व्यवस्थापितं अभ्रातृमतो दारकाले भ्रातृमतो दायाद्यकाले प्रोक्तमिति सम्

अग्न्याधानमवादि दारसमये दायाद्यकाले परैर्द्वीशाग्निध्रुवशाक्रपूषभमृगेज्यैर्व्यञ्जलग्नांशयोः

तिपुक्षतदारस्याग्निनाविना बहुदोषो दृश्यते तथाहि कृतदारो नैव तिष्ठेत्क्षणमप्यग्निना विना तिष्ठन् स चेत् द्विजो व्रात्यस्तथा च पतितो भवेत् पितृपाकोपजी
वी स्याद्भ्रातृपाकोपजीवकः ज्ञानाध्ययननिष्ठो वा न दुष्येताग्निना विना योनाग्निमुपसेवेत दारान्कामाहृतावपि पारदारी स विज्ञेयः स्वस्त्री स्वीकरणादपि
यथा स्नानं यथा संध्या वेदस्याध्ययनं यथा तथैवोपासनं दृष्टं न स्थितिस्तद्वियोगत इत्यादि तस्मात्सूत्रकारैः कात्यायनादिभिः दारकाल एव बाहुल्येनो
अग्न्याधाननक्षत्राण्याह कैः द्वीशाग्निध्रुवशाक्रपुष्यमृगपौष्णैः द्वीशं विशाखा अग्निः कृत्तिका ध्रुवाणि त्र्युत्तरा रोहिण्यः शाक्रं ज्येष्ठा पुष्य मृगौ प्रसिद्धौ पौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मितिभावः एवमेवशसौतथारवषौपरस्परवर्णौज्ञात्वाभंज्ञेयं तथाचस्वरशास्त्रे रवषौशसौबवौचैवज्ञेयावितिपरस्परमिति अन्यच्च नप्रोक्ताङञ णाश्चवर्णानामादौसंतितेनहि चेद्भवंतितथाज्ञेयागजडास्तेयथाक्रममिति चक्रंशतपदंवक्ष्येऽक्षाशाक्षरसंभवमितिस्वरशास्त्रोक्तमवकहडचक्रं प्रसिद्धं अथयस्यबहूनिनामानिसंतितस्यकस्मान्नाम्नोभंज्ञेयमित्याकांक्षायांआह यदभिधाबह्वोस्यनामांतिममिति यस्यअभिधानामानि बह्वोभवंति तस्यांतिमंपश्चाद्भवंनामग्राह्यं तथाचस्वरशास्त्रे बहूनियस्यनामानिनरस्यस्युःकथंचन तस्यपश्चाद्भवंनामग्राह्यंस्वरविशार

आर्यानृद्वहनेजनुर्भवममलंपट्टस्यबंधेजगुर्गेहग्रामनृपाभिषेकक्षिमौंज्यन्नाशनेभूषणे ५५

दैरिति अथजन्मनक्षत्रंयेषुयेषुशास्तंतान्याह आर्याइति नृद्वहनेपुरुषविवाहेजनुर्भंजन्मनक्षत्रं अमलंनिर्दूषणंजगुः तथापट्टस्यबंधेपट्टबं धने गेहंगृहकरणप्रवेशनं तथाग्रामोग्रामप्रवेशनं नृपाभिषेकोराजाभिषेकः क्षिः प्रसिद्धामौंजीप्रसिद्धा अन्नाशनंनवान्नप्राशनं भूषणंभू षणधारणं एषांसमाहारस्तस्मिन्जन्मभंशुभदंजगुः तथाचज्योतिःप्रकाशे जन्मभंक्षिनृपाभिषेचनेभूषणेनगरगेहकर्मणि आधिपत्यभु विमौंजीबंधनेपुंविवाहउदितंशुभंबुधैरिति राजमार्तंडे वसंतसमयेदद्यादब्दे गर्भाष्टमेष्टमे मेखलांजन्ममासेपिजन्मभेचतिथावपीति नारदः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजैरिति तथाचसंहितासारे अग्न्याधानंनकुर्वीतकर्किनक्रत्रयेविधौ लग्नगेधनगेपापेतथारंध्रग्रहान्वितइति १ इतिमुहूर्तमार्तंडवल्लभायां अग्न्याधानप्रकरणं अथगृहप्रकरणंविवक्षुस्तावद्ग्रामविचारमाह नामर्क्षादिति नामर्क्षान्नामराशेः सकाशात् द्वि२ सुतां ५ कु९ दिक्१० भव ११ गतोग्रामः शुभः स्यात् अन्यउक्तविपरीतोग्रामः अन्यथास्याद्शुभः स्यादित्यर्थः तदुक्तंज्योतिःसागरे एकभेसप्तमेग्रामेवैरंहानिस्त्रि षष्ठगे तुर्याष्टद्वादशेरोगः शेषस्थानेसुखंभवेदिति एवंग्रामंशुभाशुभमभिधायेदानींग्रामदिङ्नियममाह तत्कोणइति तत्कोणेतस्यग्रा

नामर्क्षाद्विसुतांकदिक्भव व २ ५ ९ १० ११ गतोग्रामः शुभोन्योन्यथातत्कोणेंत्यभुवांशुभंनिवसतांदोषाःपरेषामलं

मस्यकोणेअंत्यभुवां रजकचर्मकारादीनांनिवसतांवसतिंकुर्वतांशुभंस्यात् रजकश्चर्मकश्चैवनटोबुरुडएवच कैवर्तमेदभिल्लाश्चसप्तैते अंत्य जाः स्मृताः इत्यादीनांग्रामकोणेशुभंस्यादित्यर्थः तत्कोणेनिवसतांपरेषांवर्णानां अलंअत्यर्थंदोषाःस्युः अशुभानिस्युरित्यर्थः तथाचज्योतिर्नि- बंधे भवनपुरग्रामाणांयेकोणास्तेषुनिवसतांदोषः श्वपचादयोंत्यजाद्यास्तेष्वेवविवृद्धिमायांति एवंजातीनांशुभाशुभदिग्विभागमुक्त्वाराशि परत्वेनदिक्षुवसतिमाह कन्येति यमाशादितः दक्षिणस्याः सकाशात्क्रमेण श्वसुदिक्षु कन्याकर्किधनुस्तुलादयोराशयोन्यवसंति अन्येउर्वरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्णांरवर्ती तैः कयोः व्यब्जलग्नांशयोः विगताः अब्जाः याभ्यां तौ व्यब्जौ तौ च तौ लग्नांशौ च तयोः अब्जा जलचरराशयः मकरस्य पश्चिमार्द्धं कुंभो मीनः कर्कटश्चै
तेजलचरराशयः चंद्रोपि जलजः एतै रहितयोर्लग्ननवांशयोरित्यर्थः तथा च वृत्तशते कर्किनक्रघटमीनविलग्ने वांशके तनुगते थ तदीयते लग्नगे कुमुदिनी
दयिते वा नाशमेति जनितोपि हुताश इति कैः जीवेंद्वर्ककुजैः स्मृतर्द्धिकेंद्रगुरुस्थैः जीवो गुरुः इंदुश्चंद्रः अर्कः सूर्यः कुजो भौमः तैः स्मृतः पंचमः ऋद्धयः उपचयस्था
वनानि गुरुर्नवमं केंद्राणि प्रथमचतुर्थसप्तमदशमानि ५ ३ ६ ११ १० ९ १ ४ ७ १० एतत्स्थानगतैः कथंभूतैः अनस्तंगतैः सूर्यकिरणैरलुप्तैः पुनः कथंभू

जीवेंद्वर्ककुजैः स्मृत ५ र्द्धि ३ ६ ११ १० गुरु ९ केंद्र १ ४ ७ १० स्थैरनस्तंगतैः स्वोच्चेष्टर्क्षगतैः परैरुपचयैर्विताद्यशुद्धौ बुधैः १

तैः स्वोच्चेष्टर्क्षगतैः स्वश्च उच्चानि च इष्टाश्च एषां ऋक्षाणि राशयस्तद्गतैः स्वराशयश्च राशिमित्रराशिगतैरित्यर्थः परैरुक्तेभ्योन्यैर्ग्रहैः उपचयैः त्रि
षडेकादशमगैः कस्यां सत्यां वित्ताद्यशुद्धौ सत्यां वित्तं द्वितीयं आद्यं लग्नं तयोः शुद्धिः क्रूरराहित्यं तस्यां सत्यां शेषं पूर्ववत् प्रायश्चंद्रमित्यक्त स
वलोक्यं तथा च वृत्तशते केंद्रर्क्षोपचयत्रिकोणभगनाः सूर्यारजीवेंदवः शेषाश्चोपचयस्थिता यदि तदाग्न्याधानमुक्तं शुभं चंद्रेनेधनगे म्रियेत युवती भो ५९
मे पुमानष्टमे शेषैर्मृत्युगतै रुजा च सहितोग्न्याधानकर्ता भवेत् नो कुर्याद्धुतभुक्परिग्रहमिह स्मा पुत्रजीवेंदुभिर्नीचस्थैर्विजितैरिपोर्भवनगैरस्तंगतैर्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तेषांस्ववर्गात्संचमोरिपुरिति तस्मात्स्ववैरिवर्गस्यदिशिगृहंनकार्यमितिभावः अर्थादन्यत्रमध्यमंतत्रापिस्वदिग्वर्गासन्नंशुभं वैरिदिग्गासन्नमशु भमितिबुध्याज्ञेयं एवंस्ववर्गग्रामवर्गयोर्मित्रारित्वमवलोक्यवासः कर्तव्यइतिसिद्धं तत्रराशिघटितवर्गघटितयोर्मध्येराशिघटितंबलवत् तदुक्तं- ज्योतिःसागरे केप्याहुरथवर्गाणांस्वस्थानेशुभदंगृहमिति अथवर्गघटितेकाकिणिकाआह द्विघ्नइति स्ववर्गोग्रामवर्गः वसतिंकर्तुर्वर्गश्चद्वि

अष्टव्रप्रमुखाःस्वपंचमपराद्विघ्नःस्ववर्गोन्ययुक्तष्टः काकिणिकागजैर्मिथइमायस्याधिकाःसोर्थदः

घ्नः द्विगुणितः कार्यः मिथ अन्ययुक् अन्यवर्गयुक्कार्यःगजैरष्टभिस्तष्टः शोधितः सन्काकिणिकाः स्युः इमाः काकिणिकाः यस्यअधिकाःसोर्थदाधन दातास्यात् एवंग्रामदिङ्नियमसुक्त्वाइदानींनिर्माणेपत्तनग्रामक्षेत्रादीनांसमंततः क्षेत्रमादौपरीक्षेतगंधवर्णरसप्लवैरित्युक्तत्वात् तावद्वर्णपरत्वे नशुभमेवर्णरसगंधानुवृत्तार्थेनाह श्वेतेति श्वेतारक्तकपीतकृष्णवसुधाः विप्रतः ब्राम्हणात्मकाशात्वर्णानांशुभाः शोभनाः स्युः श्वेतवसु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तामध्येन्यवसंति एतदुक्तंभवति अभीष्टंग्रामंनवभागंपरिकल्प्य मध्यभागाद्दक्षिणभागेकन्यानवसति कन्याराशिनादक्षिणभागेगृहंनकार्य-
मित्यर्थः तथैवनैर्ऋतेकर्कटः पश्चिमेधनुःवायव्येतुलाउत्तरेअजोमेषःईशान्यांघटःकुंभःपूर्वेकौर्पीवृश्चिकः आग्नेयेअंडजोमीनःन्यवसति अन्येवृष
मिथुनसिंहमकरामध्यभागेन्यवसंति एवंराशिपरत्वेनदिङ्नियममुक्त्वाइदानींवर्गपरत्वेनदिङ्नियममाह अथेति इंद्रककुभःसकाशात्अष्टस्व-
दिक्षुअमसुखाः अष्टौवर्गाः अकचटतपयशाः इत्येतेप्रसिद्धाः ओजस्विनोबलवंतः स्युरित्युत्तरश्लोकेनान्वयः १ अथाविति एतदुक्तंभवति अ

कन्याकर्किधनुस्तुलाक्रियघटाः कौर्प्योंडजोयाम्यतोमध्येन्येन्यवसंत्यथेंद्रककुभोवर्गाःस्युरोजस्विनः १

आइईउऊ-
इत्यादिकः षोडशाक्षरोवर्गःपूर्वस्यांबलीकादिकःपंचाक्षरोआग्नेयां चादिकोदक्षिणस्यां टादिकोनैर्ऋत्यांतादिकःपश्चिमस्यां पादिकोवायव्यां या।
दिकउत्तरस्यां शादिकईशान्यां बली अयमर्थः स्वनामादिमाक्षरात्वर्गंज्ञात्वास्वस्थानेगृहंकार्यमितिभावः यतःस्वस्वस्थानेप्राणिनोबलवंतइनिलो
केप्रसिद्धं किंलक्षणावर्गाः स्वपंचमपराः स्वेभ्यःपंचमाःपराःवैरिणोयेषांतेतथा यथाअवर्गस्यपंचमस्तवर्गः सौम्यवैरीकवर्गस्यपंचमःपवर्गःसोस्य
वैरी एवंसर्वेषांवर्गाणांवैरिणोज्ञातव्याः वैरित्वंहिस्वामिवशेन तदुक्तंभूपालवल्लभे वर्गेशास्तार्क्ष्यमार्जारसिंहश्वासर्पमूषकाः इभेणौपूर्वत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंपृथ्वीवर्णादिकमभिधायइदानींवर्णपरत्वेनभूतलत्वमाह सौम्यादिषुउत्तरादिषुदिक्षुप्लवोनिम्नत्वंयस्यतच्चतद्भूतलंचतस्मिन्विप्रादिकोब्राह्मणादिकःगृहं विरचयेत् एवंवर्णपरत्वेनभूप्लवत्वमुक्त्वाब्राह्मणस्यविशेषमाह अग्र्याखिलइति अग्र्योब्राह्मणः अखिलेसर्वप्लवेगृहंविरचयेत् तथाचभृगुः उदगादिप्लवमिष्टंविप्रादीनांमदक्षिणेनैव विप्रःसर्वत्रवसेदनुवर्णमथेष्टमन्येषामिति अथपक्षांतरमाह यत्रेतिनिखिलाः सर्ववर्णास्तत्रगृहं कुर्युः तत्रकुत्रयत्रभुवि स्वतःअंतःकरणंस्थिरंस्यात् अयमर्थः यस्यांभूमौअंतःकरणप्राशस्त्यंस्यात् तत्रैवगृहंकर्तव्यमित्यर्थः तथाचवा

सौम्यादिप्लवभूतलेविरचयेद्विप्रादिकोग्र्याखिलेनान्येषांनियमोथयत्रनिखिलाःकुर्युर्गृहंतत्स्थिरं

स्कशास्त्रेमनसश्चक्षुषोयत्रसंतोषोजायतेभुवि तस्यांकार्यंगृहंसर्वैरितिगर्गादिसंमतमिति अथशल्यज्ञानंवृत्तार्धेनाह सद्मप्रश्नेति सद्मप्रश्नकृतःअ त्रगृहंकर्तव्यमित्यादिगृहप्रश्नंकर्तुमुखाच्चेद्यदिप्रथमतःवर्गादिवर्णोद्गमःस्यात् वर्गाणांप्रथमाक्षरोदयःस्यात् अकचटतपयशानामन्यतमाक्षरोद्ग मःस्यात्तदाशल्यंतद्दिग्गतंतस्यवर्गस्यदिग्गतंसुधीःआदिशेत् शल्यमत्रास्तीतिकथयेदित्यर्थः एतदुक्तंभवति गृहसंमितांभूमिं दक्षिणोत्तररेखाभिःस मतयानवधाकृत्वावर्गाद्यक्षरैः अकचटतपयशैरष्टभिः क्रमेणाष्टासुपूर्वादिदिक्षुशल्यमादिशेत् अकारेप्रश्नाद्यक्षरेसतिपूर्वस्यांदिशिशल्यमादिशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्व: धाशुभ्रा ब्राह्मणस्य आरक्तवसुधा क्षत्रियस्य पीतवसुधा वैश्यस्य कृष्णवसुधा शूद्रस्य शोभनेति अर्थात् मिश्रजातीनां मिश्रा शोभना तथा च वसि टी.
६१ ष्ठः श्वेता शस्ता द्विजेंद्राणां रक्ता भूमिर्महीभुजां विशां पीता च शूद्राणां कृष्णान्येषां च मिश्रितेति एवं वर्णमुक्त्वा इदानीं रसमाह स्वादुरिति स्वादुर्मधुरा व
सुधा ब्राह्मणस्य शोभना कटुर्मरिचरसा क्षत्रियस्य तिक्तका निंबरसा वैश्यस्य काषाया हरीतकीरसा शूद्रस्य शोभनेति अर्थान्मिश्राणां मिश्रा
शोभना तथा च नारदः मधुरं कटुकं तिक्तं कषायश्च रसाः क्रमात् एवं रसानुक्त्वा गंधानाह घृतेति घृतगंधा ब्राह्मणस्य शोणितगंधा रक्त

श्वेता रक्तकपीतकृष्णवसुधा स्वादुः कटुस्तिक्तका काषाया घृतशोणितान्नमदिरागंधाः शुभा विप्रतः २

गंधा क्षत्रियस्य अन्नगंधा वैश्यस्य मदिरागंधा मद्यगंधा शूद्रस्य मिश्राणां मिश्रगंधा शुभेत्यर्थः तथा चोक्तं कारिकायां घृतासृगन्नमदिरागंधा च क्रमा
च्छोभवेदिति नानायंत्रेषु रसगंधानां नानात्वं तद्विकल्पतो ग्राह्यं तथा च नारदः मधुपैरान्नपिशितगंधवर्णानुपूर्वकं मधुरं कटुकं तिक्तं कषायश्च रसाः क्र ६१
मात् पेरमंधा कषायगंधा अन्यत्तद्गमं तथा च कारिकायां घृतासृगन्नमद्यानां गंधा च क्रमशो भवेत् मधुरास्यात्कषायाम्लकटुका चानुपूर्वश इति

CC-0. In Public Domain. Digitization by eGangotri

एवंशल्यमभिधायेदानींस्थलस्यशुभाशुभज्ञानस्योपायमाह श्वभ्रमिति श्वभ्रंगर्तंहस्तमितंखनेत् इहास्मिन्श्वभ्रेनिशास्येरात्रिमुखे अ
र्द्धसूर्यास्तेजलंपूर्णंन्यसेत् तत्रयदिप्रातःसजलंस्यात् तदातत्स्थलंसत्शुभंस्यात् वृद्धिकरंस्यात् यदिअर्द्धजलंगतजलंस्यात् तदामध्यमं यदा
स्फाटितंस्फुटितंस्यात्तदाअसत् नानाविधहानिकरंस्यादित्यर्थः तथाचनारदः तथानिशादौतत्कृत्वापानीयेनप्रपूरयेत् प्रातर्दृष्टजलेवृद्धिः

श्वभ्रंहस्तमितंखनेदिहजलंपूर्णंनिशास्येन्यसेत्प्रातर्दृष्टजलंस्थलंसदर्द्धजलंमध्यंत्वसत्स्फाटितम्

समंपंकेव्रणेक्षयइति एवंशुभाशुभस्थललक्षणमभिधायेदानींभूमिशोधनमाह ज्ञात्वेति एवमुक्तप्रकारैः स्थानंज्ञात्वागृहाधिक
शुवंजलांतंयथाभवतितथाखनेत् गृहादधिकागृहाधिका साचासौभूश्चतथातांकल्पितगृहात्किंचिदधिकांभूमिंजलपर्यंतंखनेदित्य
र्थः अधिकखननंशुद्धभूभागेभित्तिरचनार्थं वाइत्यथवास्तरोयावत्तावत्खनेत् पृथ्वीगर्भेमृद्भेदानांस्तराःसंति तत्रान्यस्तरपर्यंतंखं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा॰ त् ककारे आग्नेय्यां चकारे दक्षिणस्यां इत्याद्यष्टस्वदिक्षु अष्टभिरक्षरैरादिशेदित्यर्थः तुपुनः हपयैः स्त्रिभिरक्षरैर्मध्यतोमध्यकोष्ठेशल्यमादिशेत् हपया टी॰
६२ नांत्रयाणामक्षराणां अन्यतमेप्रश्नाद्यक्षरेसतिमध्येशल्यमादिशेदित्यर्थः तथाचोक्तंज्योतिर्निबंधे स्मृत्वेष्टदेवतांप्रष्टुवर्चनस्याद्यमक्षरं गृहीत्वातुसतः
शल्याशल्यंसम्यग्विचार्यते अकचटतपयशाहपयावर्णाःपूर्वादिमध्यांताः शल्यकराइहनान्येशल्यगृहेनिवसतांनाशइति एतदेवस्पष्टंतत्रैवोक्तं
पृच्छायायदिअःप्राच्यांनरशल्यंतदाभवेत् सार्द्धहस्तप्रमाणेनतच्चमानुषमृत्युकृत् आग्नेयांदिशिकःप्रश्नेखरशल्यंकरद्वये राजदंडोभवेत्तत्रमा

सद्मप्रश्नकृतोमुखात्प्रथमतोवर्गादिवर्णोद्गमश्चेत्तद्दिग्गतमादिशेत्तुहपयैःशल्यंस्फुधीर्मध्यतः ३

यत्नेनैवनिवर्तते याम्यायांदिशिचःप्रश्नेकुर्यादाकटिसंस्थितं नरशल्यंगृहेशस्यमरणंचिररोगतः नैर्ऋत्यांदिशिटःप्रश्नेसार्द्धहस्तादधःस्थले शुनो
स्थिजायतेतत्रबालानांजनयेन्मृतिं तःप्रश्नेपश्चिमायांतुशिशोःशल्यंप्रजायते सार्द्धहस्तेगृहस्वामीनतिष्ठतिसदागृहे वायव्यांदिशिपःप्रश्नेतुषांगा
राश्चतुःकरे कुर्वंतिमित्रनाशंचदुःस्वप्नदर्शनंतदा उदीच्यांदिशियःप्रश्नेविप्रशल्यंकटेरधः तच्छीघ्रंनिर्धनत्वायकुबेरसदृशस्यहि ईशान्यांदिशि ६२
शःप्रश्नेगोशल्यंसार्द्धहस्ततः तद्गोधनस्यनाशायजायतेगृहमेधिनः हपयामध्यमेकोष्ठेवक्षोमात्रेवभेदधः नृकपालमयोभस्मलोहंतत्कुलनाशकृदिति
१३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंस्थलशुद्धिमभिधायाधुनादिक्साधनमाह उज्जयनीस्थलात्यमदिशिदक्षिणस्यांदिशिस्वाष्ट्रनिलाभ्यंतरात्प्राक्साध्या नैरेरित्यध्याहारः स्वाष्ट्रंचित्रा अनिलस्वाती अनयोरंतरंमध्यंतस्मात्प्राचीसाध्येत्यर्थः एतदुक्तंभवति संभवेसतिरात्रौप्राङ्मुखउपविश्ययुगमात्रोदितांचित्रां नलिकयाविलोकयन्नलिकाग्राल्लंबंभूमिपर्यंतंमुक्त्वाभूमौचिन्हंकृत्वातथैवाचलस्तत्रैवनेत्रेणस्वातिमवलोकयन् तथैवनलिकाग्रात्सकाशाल्लंबं भूमिपर्यंतंमुक्त्वालंबपातेचिन्हंकृत्वानेत्राल्लंबंमुक्त्वातथैवचिन्हंकुर्यात् एवंचिन्हद्वयंचित्रास्वातीचिन्हयोरज्जुंतन्मितांधृत्वारज्जुमांतेरेकीकृ

प्राक्साध्योज्जयनीस्थलाद्यमदिशिस्वाष्ट्रानिलाभ्यंतरात्सौम्येतोभ्युदयादुदग्ध्रुवमुखाद्दिङ्मूढकेस्यान्मृतिः

त्यमध्येचिन्हंकुर्यात् पुनस्तत्रतथैवप्रसार्यमध्यचिन्हेशंकुंनिखायतस्मात्पश्चिमचिन्हपर्यंतंरज्जुंप्रसारयेत् तत्प्राचीसूत्रं एवमुज्जयन्यादक्षिणतःप्रा चीसाधनमुक्त्वाथानंतरंउत्तरतःप्राचीसाधनमाह सौम्येइति अतःउज्जयन्याःसौम्यंउत्तरभागेअभ्युदयात्कृत्तिकोदयात् प्राचीसाध्या एतदुक्तंभ वति पूर्ववन्नलिकयायुगमात्रोदितांकृत्तिकामालोक्यनलिकामूलाग्राभ्यांलंबौमुक्त्वाभूमौचिन्हद्वयंकृत्वातयोरुपरिप्राचीसूत्रं अथोत्तरसाधनमाह उदगिति ध्रुवमुखात्उदक्उत्तरादिक्साध्या इदंसर्वेषांसाधारणं अथदिक्मूढत्वेदोषमाह दिङ्मूढकेस्यान्मृतिरितिस्पष्टं तथाचोक्तंदेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु·म· नेदित्यर्थः अथवाथवासुकषस्तन्मितंवापुरुषमात्रंखनेत् इदंशान्त्यपेक्षयाज्ञातव्यं पुरुषप्रमाणंपंचारत्नयः तथाचशुल्बं पंचारत्नि ४१
६३ दशवितस्तिर्विंशतिशतांगुलः पुरुषइति पंचारत्न्यादयः पुरुषपर्यायाः किंकृत्वा नत्वानमस्कृत्यखनेदित्यर्थः ततस्तदनंतरं तत्खातंकपि-
शिरस्तुल्याश्मभिः वानरशिरः प्रमाणैर्ग्रावाणैः पूरयेत् पूर्णंकुर्यात् तथाचमांडव्यः जलांतंप्रस्तरांतंवापुरुषांतमथापि

शल्येत्तं निखनेत्तगृहाधिकभुवंनखाजलांतस्तरोयावद्वापुरुषस्ततः कपिशिरःस्तुल्याश्मभिः पूरयेत् ४

वासेन्नंसंशोध्यचोत्सृत्यशल्यंसदनमारभेदिति तथाचमत्स्यपुराणे कपिशीर्षप्रमाणैश्चग्रावाणैः पूरयेद्दृढं खातं
तत्रमसंकृत्वाततः प्राचीप्रसाधयेदिति खन्यमानेक्षेत्रेयदाप्यतेतस्यफलंकारिकायामुक्तं खन्यमानेयदाक्षेत्रेपाषाणःप्राप्य ६३
तेयदा धनायुश्चिरतास्यस्मादिष्टकास्तु धनागमः कपालांगारकेशाद्यैर्व्याधिनापीडितोभवेदिति ४ ७ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोक्तेष्वपिनक्षत्रेषुविशेषमाह नोपृष्ठाग्रइति पृष्ठाग्रविधौसतिनोविरचयेत् एतदुक्तंभवति कृत्तिकादीनिसप्तनक्षत्राणिपूर्वस्यांमघादि-
सप्तदक्षिणे इत्यादिसप्तशलाकाचक्रस्थितनक्षत्राणांमध्येगृहानिलादीष्टचंद्रनक्षत्रंयस्मिन्दिग्भागेभवतितद्दिङ्मुखेगृहेसंमुखश्चंद्रोज्ञेयःतत्पृ
ष्ठस्थेपृष्ठतोज्ञेयःएवमग्रगेपृष्ठगेवाचंद्रेसतिगृहंनकर्तव्यमित्यर्थः तथाचभृगुः चक्रेसप्तशलाकाख्येकृत्तिकादीनिविन्यसेत् ऋक्षंचंद्रस्यवा
स्तोःप्यपुरःपृष्ठेचनोशुभमिति तथाचब्रह्मशंभुः धनलाभःप्रवासःस्याद्वामपुरःश्चोरभयंक्रमात् दक्षमवामपृष्ठस्थेगृहकर्तुर्निशाकरेइति नरिक्त

नोपृष्ठाग्रविधौनरिक्ततिथौनार्कारवारांशयोरुक्षेषपिकुंभमीनगविधौस्तंभोच्छ्रितिंनाचरेत् तुर्यात्पंचदशात्त्रिदिक्परि
मितात्वेदाब्धिपंचक्रमान्निंद्यान्यर्कयुताद्गृहकरणेभानिप्रवेशेऽपिच ६ रिक्ततिथ्योरप्यर्कारवारांशयोः अर्कभौमयोर्वारनवांश-
योःनकुर्यात् उक्षेषपिकुंभमीनगविधौसतिस्तंभोच्छ्रितिंनाचरेत् अर्थादन्यत्सर्वमाचरेत् तथाचमांडव्यः पंचकेषुचधिष्ण्येषुनकुर्यात्स्तंभ
मुच्छ्रयं क्षेत्रसूत्रशिलान्यासप्राकारादिसमाचरेदिति अथवृषभवास्तुमाह तुर्यादिति अर्कयुतादिसूर्यनक्षत्रादितुर्यात् चतुर्थात्पंचदशात्
त्रिदिक्परिमितात्त्रयोविंशात्सकाशात्क्रमेणवेदाब्धिपंचभानिनक्षत्राणिगृहस्यकरणेरचनायांप्रवेशेऽपिनिंद्यानिस्युः तथाचव्यवहारसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यजनदीपिकायां चित्रास्वात्यंतरे श्रोणाद्दक्षिणापथवासिनां प्राचीतुल्कांतिकान्तेयाउत्तरापथवासिनामिति धांगात् उज्जयिन्याः तथा च शल्बंकांति काश्रवणंपुष्यंचित्रास्वात्योर्यदंतरं एतस्मात्प्राच्यादिशोरूपंयुगमात्रोदितेपुरन्ध्रीति युगप्रमाणंपडशीत्यंगुलानि तथा च शल्बसूत्रं अंगुलेरथसं मितायाःप्रमाणं तत्राष्टाशीतिशतमीषा चतुःशतमक्षः पक्षःषडशीतियुगंचत्वारांष्टकाःशम्येति तथा च स्फुटकरणे ध्रुवलंबकरेखायारेखांतःसौ म्ययाम्यहरितोस्तः तन्मत्स्यःपुच्छमुखतःपश्चिमपूर्वाभिधेविद्यादिति वृद्धनारदः प्रासादेसदनेलिंगेद्वारेकुंडेविशेषतः दिङ्मूढेकुलनाशःस्या

गेहंमाधवपौषफाल्गुननभोमार्गेषुमृद्ब्राह्मानिलैः पाश्यर्कज्यवसुध्रुवैःस्थिरतनौकुर्यात्सुकेंद्राष्टमे ५

त्तस्मात्तंसाधयेद्दिशइति अथकेषुमासेषुगृहंकर्तव्यमित्याह गेहमिति माधवादिषुमासेषुमृद्ब्रह्मादिभिर्नक्षत्रैर्गेहंगृहंकुर्यात् माधवोवैशा खःपौषफाल्गुनौप्रसिद्धौ नभःश्रावणः मार्गोमार्गशीर्षः तेष्वित्यर्थः मृदून्मृचित्रानुराधारेवतीमृगाःअनिलःस्वाती पाशीवरुणः तद्दैवतंनक्षत्रं शततारा अर्कोहस्तः इज्यःपुष्यःवसुःधनिष्ठा ध्रुवाणिरोहिणीउत्तरात्रयंचतैःस्थिरतनौस्थिरलग्नेकिंलक्षणे सुकेंद्राष्टमेशोभनानिपापग्रहरहितानि
केंद्राष्टमानियस्यतत्तथातस्मिन् अंबरमेइतिवापाठः शेषंपूर्ववत् ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु. रे त्रिवेदाब्धित्रिवेदाब्धिहिहित्रिभे चर्कतः शशी कुर्याल्लक्ष्मीसमुद्घासंस्थैर्यंलक्ष्मीदारिद्रतां धनंव्याधिंक्रमान्मृत्युंप्रवेशारंभयोर्नृपइति ६ अथचतुर्था टी:
६५ द्वारनिर्णयमाह शेतइति भाद्रपदात्रित्रिमासेषुमुखरोवास्तुपुरुषःप्रागादिशीर्षःशेतेइति एतदुक्तंभवति भाद्रपदादिमासत्रयेपूर्वशीर्षःमार्गशीर्षा
दिमासत्रयेदक्षिणशीर्षः फाल्गुनादिमासत्रयेपश्चिमशीर्षः ज्येष्ठादिमासत्रयेउत्तरशीर्षोवास्तुपुरुषःशेतइति अत्रयस्यांशीर्षंतस्यांयदिशा
यांसयमुखंगृहमुखंप्रोक्तं अथसंक्रांतिपरत्वेनमुखनिर्णयमाह गोल्यजेति गोल्यजधटेष्वर्केसतियमादङ्मुखंगृहंकार्यं गोर्नृषः अली

शेतेभाद्रपदात्रित्रित्रिमुखरः प्रागादिशीर्षोंत्रिहिप्रोक्तंसद्मसुखंतु गोल्यजधटेष्वर्केयमोदङ्मुखं हृद्रोगेणकुलीरलेयगरवौ
पूर्वापरास्यंगृहंनान्यस्थेभुजकोटिघातइभस्तत्शेषंस्युरायाः क्रमात् ७ वृश्चिकः अजोमेषः धटस्तुला एषुराशिषु अर्केसूर्येसति

यमोदङ्मुखंदक्षिणामुखंउत्तराभिमुखंवागृहंकार्यमित्यर्थः हृद्रोगेणकुलीरलेयगरवौसतिपूर्वापरास्यं पूर्वाभिमुखंपश्चिमाभिमुखंगृहं
कार्यमित्यर्थः हृद्रोगः कुंभः एणोमकरः कुलीरः कर्कटः लेयःसिंहः एतान्गच्छतिसतथा सचासोरविश्च तस्मिन्सति पूर्वापरास्यंपूर्वपश्चि ६५
ममुखंवागृहंकार्यं अन्यस्थेअन्यराशिस्थेरवौसति गृहंनकार्यं अथायपरत्वेनगृहमुखनिर्णयंविविक्षास्तावदायसाधनमाह भुजेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुजकोटिघातइभक्तशेषंआयास्युः भुजोगृहदैर्घ्यविस्तारयोरन्यतमस्यनाम तदन्याकोटिः तथाचोक्तंलीलावत्यां इष्टोबाहुर्यस्यांतत्स्पर्धिन्यांदि
शितरोबाहुः त्र्यस्रेचतुरस्रेवासाकोटिःकीर्तितातज्ज्ञैरिति तयोर्घातोगुणनं इभक्तशेषंपूर्वादियथास्यात्तथाध्वजादयःआयाःक्रमात्स्युः ७ पू
र्वादिषुध्वजादयोबलिष्ठाइतिभावः एतेध्वजादयःस्वस्वपदेस्वस्वस्थाने ध्वजःपूर्वेधूम्रआग्नेय्यांइत्यादिधार्याः अयमर्थःमुख्यगृहापेक्षया
दिक्षुवक्ष्यमाणगृहेषुधार्याइत्यर्थः अथवास्वसदृशवस्तुषुधार्याः अथवास्वसदृशसत्वगृहेषुधार्याः अथवाक्रूरकर्मसाधनवस्तुषुपराक्रमि

पूर्वादिध्वजधूम्रसिंहश्वानकोक्षाणःखरेभोष्ट्रकाधार्याःस्वस्वपदेध्वजोखिलसुखःप्राग्याम्यवक्त्रोगजः

णांधार्याःअथवास्वसदृशवस्तुसत्वोपजीविनांगृहेषुधार्याःअथवास्वानुरूपवस्तुसाध्यहितवस्तुगृहेषुयथायोग्यंधार्याइत्यर्थः एतत्स्पष्टमुक्तंवा
स्तुप्रदीपेखेटकर्पटकोटेषुवृषःसिंहोगजःपुरेः वापीकूपतडागादौगजोदेयोविचक्षणैः आसनेयोजयेत्सिंहंशयनेचैवकुंजरं वृषंभोजनपात्रे
चदद्याच्छत्रादिषुध्वजं महानसेग्निशालायांगृहेचाग्न्युपजीविनां धूम्रंदद्यात्तथाश्वानंयवनांत्यजयोर्गृहे खरोवेश्यागृहेयोज्योध्वांक्षःपक्षिप
तेर्गृहे वृषसिंहगजंदद्यात्प्रासादेपुरमंदिरे तथाचशिल्पशास्त्रे वस्त्रजेधर्मशालायांकुंभेस्तंभेध्वजेध्वजः गोगजौभूगृहेचैवसाधारणगृहेश्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सो यंत्रेशस्त्रेरथेसिंहो भांडागारेश्वाभोगजः धान्यांबुस्थानगोश्वेभः शालायांवृषभःश्वाभः नास्यभागोद्वाहवेद्यांगजसिंहवृषाः श्वाभाइत्यादि एवंआ-
यसाधनमुक्त्वेदानीं तेषांमुखान्याह ध्वजोखिलमुखःसर्वदिग्द्वारः प्राग्याम्यवक्त्रोगजःस्तगमं प्रागास्योवृषभःआस्यंमुखं प्राङ्मुखोवृषभः-
स्पष्टं विवारुणमुखःसिंहःवरुणस्यायंवारुणो दिग्विभागः पश्चिमदिक्विगतःवारुणोयेभ्यस्तत्रमुखंयस्यसतथा पश्चिमदिशंविनासर्वदि

प्रागास्योवृषभो विवारुणमुखः सिंहः प्रशस्ताइमेधूमोग्नेः श्वानकोंत्यजस्यखगपस्योष्ट्रोऽदृपल्याः खरः ८

ग्द्वारइत्यर्थः योयोयद्दिङ्मुखआयस्तत्संमुखगृहस्यतत्तद्दिग्मुखंकर्तव्यमित्यर्थः एवंआयपरत्वेनगृहमुखमुक्त्वाप्रसंगेन आयानांशुभत्वमाह
प्रशस्ताइमेइति इमेचत्वारआयाःप्रशस्ताःसर्वेषांशुभाः अर्थादन्येचत्वारःसमाआयाअप्रशस्ताः तथाचगर्गः कीर्तिःशोकोजयोवैरंधनंनिर्धनता
सुखं रोगश्चेतिगृहारंभेध्वजादीनांफलंक्रमात् अथदुष्टेपिसमयेविशेषमाह धूमोग्नेरिति अग्नेर्गृहेधूमोधूमायःप्रशस्तः अंत्यज
स्यश्वानकःप्रशस्तः खगपस्यपक्षिपालकस्यउष्ट्रःप्रशस्तः अदृपल्यावेश्यायागृहेखरःखरायःप्रशस्तः ८ ७ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमायपरत्वेन गृहसुखमुक्त्वाधुनाराशिपरत्वेनाह अंत्यवृश्चिककुलीराणांप्राङ्मुखंगृहंहितंप्राहुः अंत्योमीनः वृश्चिकःप्रसिद्धः कुलीरः कर्कः ए षामित्यर्थः जूकोपांत्यगवांप्रचेतोमुखं पश्चिमाभिमुखं जूकः तुला उपांत्यः कुंभः गोवृषः एषामित्यर्थः अबलायुग्मेणकानांयमास्यं दक्षिणामु खंअबलाकन्या युग्मंमिथुनं एणोमकरः एषामित्यर्थः आद्यसिंहधनुषांसौम्यास्यं आद्योमेषः सिंहधनुषीप्रसिद्धे एषांसौम्यास्यं उत्तरामु

प्राहुः प्राङ्मुखमंत्यवृश्चिककुलीराणांप्रचेतोमुखंजूकोपांत्यगवांयमास्यमबलायुग्मेणकानांहितम् सौम्यास्यंगृ हमाद्यसिंहधनुषामत्रेष्टकाशाननंकृत्वाथान्यककुप्गवाक्षवदनंतत्कार्यमास्यंनसत् ९

स्यंगृहंहितंप्राहुराचार्याः

एवंचतुर्धागृहसुखमभिधायेदानींतन्निर्णयमाह अत्रेष्टकाशाननमिति गृहमुखपक्षेषुयोभावकाशानुरूपइष्टकाशाननंइष्टदिङ्मुखंकृत्वा तद्गृहेआसान्यककुप्गवाक्षवदनंकार्यं आसाचेता अन्यककुभश्चतासुगवाक्षाएववदनानियस्यतत्तथा उर्वरितपक्षत्रयमासादिक्षुगवा क्षाः कार्याइत्यर्थः तथाचवास्तुशास्त्रे द्वारंचतुर्विधमोक्तंवास्तुसंक्रांतिभावजं कृत्वाथान्यतमंमुख्यंगवाक्षाद्यैः पराणिचेति आस्यमिति आस्यंगृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हस्यसुखंकोणस्तंभादिभिर्विद्धंनसत्स्यात् ९ एवंगृहसुखनिर्णयमुक्त्वाऽधुनाकोणादिच्छिद्रसुखस्यदोषं तदपवादंचाह कोणाध्वेति कोणोभित्तिकोणः अध्वामार्गः भ्रमोभ्रमयंत्रंघरट्टकुलालचक्रादिकूपःप्रसिद्धःकर्दमःस्नानादिजनितोनिरंतरस्थायी तरुर्वृक्षःद्वाःद्वारांतरं स्तंभःप्रसिद्धः देवःस्थावरः एभिर्विद्धंमुखंनसत्स्यादित्यर्थः अथास्यापवादमाह सद्मोच्येति सद्मोच्यंद्विगुणाधिकांतरभवेद्वेधेनदोषःसद्मनोगृहस्यऔच्च्यंतस्यापेक्षयाद्विगुणाधिकांतरभवेद्द्विगुणाधिकांतरेजातेवेधेकोणादिवेधेनदोषः अर्थान्न्यूनेदोषःकिलेत्यागमेनिश्चयेवा तथाचागमांतरेउक्तंमार्गतरुकोणकूपभ्रमस्थि

कोणाध्वभ्रमकूपकर्दमतरुद्वास्तंभदेवेक्षितंसद्मोच्यंद्विगुणाधिकांतरभवेद्वेधेनदोषःकिल अष्टघ्नेगृहभूफलेभविहृतेशेषं गृहर्क्षंभवेदृक्षेसर्पहृतेव्ययोगृहमसत्स्वल्पायभूरिव्ययम् १०

द्वमग्रभवंद्वारं सद्मोछ्रायाद्द्विगुणांत्यक्त्वाभूमिंनदोषायेति कात्यायनगृह्यकारिकायामप्युक्तम् विद्धंकूपतरुस्तंभपथपंकैःसदेवतैः तद्द्वारमग्रभांप्रोक्तमत्युच्चंनीचमेवचेति अथगृहनक्षत्रानयनंव्ययानयनंचाह अष्टघ्नेइति गृहभूफलेगृहक्षेत्रफलेअष्टघ्नेअष्टगुणितेभविहृतेसप्तविंशतिहृतेसतिशेषंगृहर्क्षंगृहनक्षत्रंभवेत् ऋक्षेसर्पहृतेअष्टहृतेसतिशेषंव्ययोभवेत् एवमायव्ययाविभिधायाधुनातत्फलंविशेषणद्वाराह गृहमसदिति स्वल्पायभूरिव्ययंगृहंअसत् अशुभंस्यात् स्वल्पायश्च ६७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूरिव्ययश्चतोयस्मिंतत्तथा अर्थाद्बहायाल्पव्ययंशुभम् १० नक्षत्रेज्ञातेराशिनिर्णयमाह अश्विनित्रितयंमेषेज्ञेयं त्रिपितृभंमघात्रयंहरौसिंहेज्ञे यंमूलत्रयंधनुषिज्ञेयं अन्येषुराशिषुद्वेद्वेभेज्ञेये तथाचगर्गः अश्विन्यादित्रयंमेषेसिंहेप्रोक्तंमघात्रयं मूलादित्रितयंचापेशेषभेषुद्वयंद्वय- मिति अथगृहतत्स्वामिनोर्घटितमाह गृहेशेति गृहंप्रसिद्धं ईशःस्वामी तयोर्घटितंप्राग्वत्विवाहवत्योज्यं तत्रविशेषमाह नाड्यन्यथेतिनाडीए कनाडीअन्यथायोज्या विवाहवत्तयोर्ज्ञेत्यर्थः अत्रएकनाड्येवप्रशस्तेतिभावः तथाचवृद्धगर्गः प्रभुःपण्यांगनामित्रंदेशंग्रामंपुरंगृहम्

मेषेश्विनित्रितयंहरौत्रिपितृभंमूलत्रयंधन्विनिद्वेद्वेभेपरतोगृहेशघटितंप्राग्वत्तुनाड्यन्यथा एकादिद्विगुणोत्तरागृहमुखाद्दिक्ष्वं
ककाःस्युःक्रमाच्छालाशांकयुतिःकुयुक्प्रवसुखान्योकांसिसंतिस्फुटम् ११

एकनाडीस्थितंप्राज्ञ्यंविरुद्धंवेधवर्जितमिति त थाचज्योतिःसागरे सेव्यसेवकयोश्चैवगृहतत्स्वामिनोरपि परस्परंमित्रयोश्चएकनाडीप्रशस्यतइति अथांशसाधनार्थंगृहाणितन्नामा- क्षरसंख्याचाह एकादीति गृहमुखात्सकाशात्क्रमात्प्रदक्षिणक्रमात्दिक्षुचतसृषुदिक्षुएकादिद्विगुणोत्तराअंकाःस्युः एतदुक्तं भवति द्वारदिशिएकःतस्मात्द्वितीयदिशिद्वौ तृतीयदिशिचत्वारः चतुर्थदिशिअष्टौएवंभवतीत्यर्थःशालाशांकयुतिःशालादिगंकयोर्योग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 कार्यः कुयुक् एकयुक्तासती ध्रुवसुखाविध्रुवादिकानि शास्त्रोदितानि गृहाणि स्फुटं संभवंति तानि यथा ध्रुवं धन्यं जयं नंदं खरं कांतं मनोरमं सु
मुखं दुर्मुखं क्रूरं सुपक्षं धनदं क्षयं आक्रंदं विपुलं चैव विजयं चेति षोडशमिति ११ नामाक्षरसंख्यामाह आषष्ठादिति षष्ठं मर्या
दीकृत्यास्याषष्ठं तस्मात् प्रथमद्वितीयतृतीयचतुर्थपंचमषष्ठानि दशमंत्रयोदशं इमे अष्ट गृहा द्व्यर्णाः द्व्यक्षराः षष्ठांत्यं सप्तमं गृहं चतुरक्ष

आषष्ठाद्दशमंत्रयोदशमिमे द्व्यर्णाः परे त्र्यक्षराः षष्ठांत्यं चतुरक्षरं खलु गृहं स्युः षोडशैवं गृहाः गेहक्ष्माफलयुग्व्ययो गृह
भवैर्नामाक्षरैः संयुतः स्तष्टो वन्हिभिरंशका निःशुभदं गेहद्वितीयांशकम् १२

रं चत्वारि अक्षराणि यस्मिंस्तत्तथा अन्ये गृहाः
त्र्यक्षराः एवं षोडश गृहाः स्युः गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाइत्यमरः अथांशकसाधनमाह गेहक्ष्मेति गेहक्ष्माफलयु
ग्व्ययः गृहक्षेत्रफलयुक्तः पूर्वानीतो व्ययः गृहभवैर्नामाक्षरैः संयुतः वन्हिभिस्त्रिभिस्तष्टः शोषितः सन् अंशकाः स्युः इंद्रो यमो राजेति तन्नामा
नि ग्रंथांतरे उक्तानि तत्र द्वितीयांशकं परस्त्वं गृहं न शुभदं अर्थात् प्रथमतृतीयांशकं शुभदमित्यर्थः निशांतपस्त्यसदनं भवनागारमंदिरमित्यमरः १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ गुणविचारणावधिमाह यावत्सर्यंतंकरैः हस्तैः कृत्वा भूरिगुणं बहुगुणं गृहं त्वद्दिश्चंतःकरणेस्फुरति तत्तावद्दिनार्थं चेद्यदितैः केवलैः करैः हस्तैः
कृत्वा बहुगुणं नस्फुरति तदा अंगुलसुखं अंगुलादिकंकरेषुक्षि स्वाथ्यवाविहायतन्नु यात्कुर्यात्   अथोपायांतर सूचनामाह श्रीगो
पीपतीति गोपीपतिर्गोपीराज मेंगः मेंगनाथदेवज्ञः ह्मालुगिर्म्हालुगिदैवज्ञः एतन्मुखैर्ज्योतिर्विद्भिः आयासविछित्तयेयत्स्वेष्टायर्क्षफल
निबद्धंतदिहास्मिनूगृहकरणविषयेज्ञात्वास्छलंस्वाभीष्टस्छलंसाधयेत्   तथाचगोपीराजः विष्णुंव्येकायगोभ्र १९ हतिभयुजिफलंगोपि

यावन्भूरिगुणंत्वहृदिस्फुरतितत्तावद्दिनार्यंकरैश्चेत्तैर्नोतन्नुयादिहांगुलसुखंक्षिस्वाविहायाथवा   श्रीगोपीपत्तिमेंगह्मा
लुगिमुखैरायासविछित्तयेस्वेष्टायर्क्षफलंनिबद्धमिहतत्ज्ञात्वास्छलंसाधयेत् १३

जोभं २७ शेषात्सायंवेष्टाष्टिद्दस्या
२१६ युतमहि ८ हताद्दकु २भकृत्साख्य २१ विश्वे १३ बाणाः ५ सिद्धा २४ ष्टि १६ नागो ८ द्रु २७ धृति १९ गिरिशा ११ भ्या ३ कृतीं २२ द्र १४ तु ६ नत्वा
२५ त्यस्थं १७ क ९ क्ष्मा १ नखे २० ना १२ र्णव ४ विकृति २३ दिना १५ द्भ ७ त्कृति २६ धृत्य १८ श्शाशा १० इतिअस्यार्थः गोपीराजः विष्णुं
विष्णुनामानंशिष्यंप्रत्याहेतन्वयः किमाह हेविष्णोव्येकायगोभ्रू १९ हतिभयुजिभं २७ शेषात्अहि ८ हताद्दकुभकृत्सादयः फलंस्यात् विग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लः एकोऽस्मात्स व्येकः सचासौ आयश्च व्येकायः व्येकायश्च गोभूश्च अनयोर्हतिर्गुणनं व्येकायगोभूहतिश्च भं च व्येकायगोभहृतिभेतया
युक्तं योगः तस्यां भशेषात् सप्तविंशतिलब्धशेषात् एकादिषु सप्तविंशतिपर्यंतेषु अहिहता अष्टहता दृक्कुभक्तस्यादयः फलं क्षेत्रफलं स्यादित्यर्थः
कथंभूतं फलं सायं आयेन सहवर्तमानं सायं इष्टायसहितमित्यर्थः एतत्स्वेष्टायनक्षत्रजं फलं भवति न्यासः वा इत्यथवा तत्सायं फलं इष्टाष्टिहृ १२१६ ह्या
युतं सत्फलं स्यात् इष्टश्च अष्टिहृक्कुच इष्टाष्टिहृक्कु तयोर्घातो हतिस्तया युतमित्यर्थः इदमपि स्वेष्टायनक्षत्रजं फलं भवतीति अत्रांकन्यास एव व्याख्या
नं तथा च भंगनाथदैवज्ञस्य सूत्रं इष्टभात्यष्टिघाते य आयस्तेनोनितेष्टकः त्रिल्हलब्धहृतागाश्वि २७ युतेन स्वेष्टायभं भवेदिति अस्यार्थः इष्टभात्य
ष्टिघाते इष्टभं च अत्यष्टिश्च तयोर्घातो गुणनं तस्मिन् पृथक् स्थापितेन आयस्तेन ऊनितेष्टकः यदि ऊनो न भवति तदा भैः प्रक्षिप्य स्फोटनीयः ऊ
नितेष्टायः त्रिल्हलब्धहृतागाश्वियुते लब्धेन आहता अश्वि ते अगाश्विनश्च तैः पृथक् स्थापिते इष्टभात्यष्टिघाते युते सति इष्टायभं क्षेत्रफ
लं भवेत् आयश्च भं च आयभे इष्टे आयभे यस्मिंस्तत्तथा अत्र यदि त्रिभिर्भिः शेषो भागो न गच्छति तदा तत्र तावत् भशेषाः क्षेप्याः यावत्त्रिभि-
र्भागो गच्छति तथा च लल्लादैवज्ञस्य गोत्रं व्येकेष्टक्ष्मीहता हि बाणशशिनो १५२ त्यष्ट्यायुता १७ स्तेपि च व्येकेष्टायहते कनाग ८१ सहिताः ष
ण्मूर्छनाभि २१६ र्हृताः शेषं क्षेत्रफलं भवेदभिमतस्वेष्टायनक्षत्रजं स्याद्वै दैर्घ्यं तदगीष्टविस्तृतिहतं दैर्घ्यो घृतिं विस्तृतिरिति स्पष्टार्थोयं श्लोकः

CC-0. In Public Domain. Digitization by eGangotri

इत्यादिविचारणयाइष्टंक्षेत्रफलंअवकाशानुरूपंत्द्दिधृत्वास्थूलंसाधयेदित्यर्थः१३ अथस्थूलसाधनायसूत्रमोटनलक्षणमाह अजरत्सू
त्रंनूतनसूत्रंद्विघ्नायाममितंद्विपाशंचविधायअंतात् एकस्मात्सूत्रांतात् अंकयेदित्यन्वयः द्विघ्नश्चासौआयामश्चद्विघ्नायामः आयामोदैर्घ्यंतेन
मितंद्विगुणितदैर्घ्यसमानमित्यर्थः द्विपाशंद्वौपाशौयस्मिंतद्विपाशंएवंविधंसूत्रंविधायकृत्वा अंतात् सकाशात् अंकयेत्चिन्हयेत् एतदु
क्तंभवति पूर्वकल्पितक्षेत्रस्यदैर्घ्यमितंसूत्रंद्विगुणंविधायतदंतयोः पाशंकृत्वाअंकयेत् कुत्रकुत्रांकयेदित्याह आयामांघ्रिमितेचपरंविस्तृति

पाशौक्षेत्रविरामशंकुनिहितौकृत्वाद्यमाकर्षयेत्कोणेशंकुरितीतरोविनिमयाद्रज्ज्वंतयोश्चापरौ १४

दलेअंकयेत् त्र्यश्चते आयामांघ्रयश्चतेतयातैर्मितंतस्मिन् एतदुक्तंभवति क्षेत्रदैर्घ्यंचतुर्भिर्भक्तालब्धंअंघ्रिप्रमाणंएकस्मादंतात् अं
घ्रित्रयंहित्वाचिन्हयेत् विस्तृतिदलेक्षेत्रस्यविस्तारार्धमितेअंकयेत् तौअंकौकर्षकोणाभिधौस्तः अंघ्रित्रयेकृतः कर्षाख्यः विस्तृतिदले
कृतोंकः कोणाख्यः एवंसूत्रमोटनमुक्त्वास्थूलसाधनमाह पाशाविति पशौक्षेत्रौविरामशंकुनिहितौकृत्वाआद्यंअंकंआकर्षयेदित्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सु॰मा॰ ७० न्वयः क्षेत्रस्यशिरसोंअंतौतयोः शंकूनिहितौनिक्षिप्तौकृत्वाआद्यमंकंकर्षरज्ज्वंआकर्षयेत् एवदुक्तंभवति क्षेत्रस्यमध्यभागेसाधितदिक्सूत्रोप दी॰
पिइष्टदैर्घ्यमित्तसूत्रंप्रसार्यतदंतयोः शंकुनिखातयोः शंक्वोः मोदितसूत्रांतपाशौनिधायकर्षरज्ज्वंचिन्हंधृत्वा एकस्यांदिशिआकर्षयेत् यथो
भयशंकुगतारज्जुः समानाआकृष्टास्यात् तथाआकर्षयेदित्यर्थः कोणेशंकुरिति कोणंकोणचिन्हेयत्रकोणचिन्हमागतंतत्रकाधि

पाशौक्षेत्रशिरसशंकुनिहितौकृत्वाद्यमाकर्षयेत्कोणेशंकुरितीतरोविनिमयाद्रज्ज्वंतयोश्चापरौ ॥१४

शंकुंनिखाय इत्यध्याहारः इत्यमुनाप्रकारेणइतरःशंकुर्निखेयः एतदुक्तंभवति तदेवकर्षचिन्हंअन्यस्यांदिशि आकृष्यकोणे
शंकुर्निखेयः एवंकोणद्वयसाधनमभिधायअन्यकोणद्वयसाधनमाह विनिमयादिति रज्ज्वंतयोर्विनिमयाद्विपरीतधारणात् ७०
अपरौकोणशंकौनिखेयौ एतदुक्तंभवति रज्ज्वंतौविपरीतौधृत्वा पूर्ववत्कर्षाकर्षणंकृत्वाकोणयोःशंकूनिखेयौ १४ ७ ७

CC-0. In Public Domain. Digitization by eGangotri

एवंक्षेत्रसाधनमुक्त्वा सूत्रन्यासमाह आग्नेयादीति आग्नेयादिदृढंप्रदक्षिणगतंसूत्रंआसादयेत् मध्येक्षेत्रमध्येवामकपार्श्वस्थंपुरुषंप्रागुक्त
शिरस्कंध्यात्वातंध्यातंपुरुषंउत्तानकंध्यायेत् कथंभूतम् पार्श्वस्थंलघुमध्यगुरोः परंस्याद्यथोपरितथैवपूरयेत् पश्चिमंचगुरुभिः पुनः पुनः सर्व
मेवलघुरित्ययंविधिरिति कथंभूतं अष्टरव्यंशं अष्टाविंशत्यंशाभागायस्मिन् सतथातं अयमर्थः क्षेत्रप्रमाणंक्षकलासरूपंवास्तुपुरुषंप्र
कल्प्य ततोऽष्टाविंशतिधाकुर्यात् एवमष्टाविंशांशंप्रकल्प्यपुच्छात्सकाशात् अगेंदुसंमितलवान्सप्तदशभागान्विहायत्यक्त्वा अग्रगस्तद

आग्नेयादिदृढंप्रदक्षिणगतंसूत्रंसमासादयेन्मध्येवामकपार्श्वस्थमपुरुषंध्यात्वातमुत्तानकं अष्टाभ्यं २८ शमगें
दु १७ संमितलवान् पुच्छाद्विहायाग्रगोभागोनाभिरितः खनेत्लुवमितंवामेश्यभिःपूरयेत् १५ ग्रगोभागोनाभिः इतोनाभेः सकाशात्

वामेवामभागेऽवसंमितंखनेत् अनंतरंअश्मभिःपूरयेत् तथाचब्रह्मशंभुः सूत्रभित्तिशिलान्यासस्तंभस्यारोपणंतथा पूर्वदक्षिणयोर्मध्येकु
र्यादित्याहकाश्यपइति नारदः नभस्यादिषुमासेषुत्रिषुत्रिषुयथाक्रमं पूर्वादिदिक्शिरावामपार्श्वशायीप्रदक्षिणमिति तथाचशिल्पशास्त्रे
वास्तोः शिरसिपुच्छेच याम्यकुक्षौचपृष्ठतः आयुःकामोरवनेन्नैववामकुक्षौरवनिःशुभा वास्तुक्षेत्रप्रमाणंचकल्पयित्वास्यवामके कुक्षौरवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु॰मा॰ तंविधायादौयावाणैः पूरयेत्ततइति तस्मान्लग्नः स्यंजेद्राशिरोभागोस्यग्रेसप्तदशांशकान् मध्येनाभिंविजानीयात्तत्रशंकुंप्रतिष्ठयेत् आस्थिरस्य दो

७१ शिरोयत्रवास्तोस्तद्दूणयेत्करैः दैर्घ्यंवाविस्तृतिंतत्रछत्वाष्टाशिवभितांशकान्इति १५ अथशंकुन्यासमाह नाकालेति अत्रकुक्षिस्थलेनानरः शंकुःका

लेमुहूर्तसमयेनिधेयः सकियत्प्रमाणइत्यपेक्षायांनृमानमाह अग्यातविप्रातसकाशात्वर्णपरत्वेनसिद्धा २५ विंशा २० क्ष्म १६ हः कृत १२ संख्यांगु

लकः निधेयः प्रतिष्ठापनीयः एतदुक्तंभवति विप्रेणसिद्धसंख्यांगुलकश्चतुर्विंशांगुलोनिधेयः क्षत्रियेणविंशांगुलः वैश्येन अष्टांगुलः षोडशांगुलः

नाकालेत्रनिधेयउक्ततरुजोग्र्यात्सिद्ध २५ विंशा २० क्ष्म १६ हः कृत १२ संख्यांगुलकस्त्रिभागचतुरस्राष्टास्रका

नस्रकः शूद्रेणअहक्षात्संख्यांगुलोद्वादशांगुलोनिधेयइत्यर्थः किंलक्षणः नाउक्ततरुजः शास्त्रोक्तवृक्षोद्भवः पुनः किंलक्षणः त्रिभागचतुरस्रा

ष्टास्रकानस्रकः त्रिभागेषुचतुरस्राष्टास्रकानस्रकानियस्मिन्सतथा एतदुक्तंभवति यथाप्रमाणंशंकुंत्रिधाविभज्य आद्यांशंचतुरस्रंद्वि

तीयांशंअष्टास्रं तृतीयांशंअनस्रंवर्तुलंकुर्यादितिभावः तथाचोक्तंग्रंथांतरे स्याच्चतुर्विंशविंशाष्टिद्वादशांगुलकैः क्रमात् विप्रादीनांशंकुमानं- ७१

स्वर्णवस्त्राद्यलंकृतं खदिरार्जुनशालोत्थंयुगपत्रतरूद्भवं रक्तचंदनपालाशरक्तशालकिलालजं निंबकारंजकुटजंवेणवंबिल्ववृक्षजं शंकुंत्रिधावि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भज्याद्यंचतुरस्रंततःपरं अष्टास्रंवर्त्तुलाद्यंशं अनस्त्रंमृजुमब्रणं एवंलक्षणसंयुक्तंपरिकल्प्यक्रमेदिनइति अथरेखाकरणमाह कमिति अ
भिजेनस्ववर्णेनब्राह्मणादिकः कादिसंस्पृष्ट्वासूत्रवद्रेखांरचयेत् सूत्रवदिति आग्नेय्यादिगृहप्रदक्षिणंकुर्यादित्यर्थः एतदुक्तंभवति ब्राह्मणः
कंशिरःस्पृष्ट्वा तर्जन्यावाकृत्वा आग्नेय्यादिप्रदक्षिणंसूत्रानुगतांरेखांकुर्यात् तथैवक्षत्रियोवक्षस्थलंस्पृष्ट्वारेखांकुर्यात् वैश्यःऊरुयुगुलंस्पृष्ट्वारे
खांकुर्यात् शूद्रःपादयुगुलंस्पृष्ट्वारेखांकुर्यात् तथाचलल्लः कृत्वासूत्रनिपातंमध्यांगुल्याथवाप्रादेशिन्या अंगुष्ठेनवामपाणिनाकनकक्षांतरजतमुक्ता

कंवक्षस्थलमूरुपादयुगुलंसंस्पृश्यविप्रादिकोरेखांसूत्रवदभिजेनरचयेत्तद्वच्चभित्तेःशिलाः १६ भिःरेखांकुर्यादित्यादि तथा
चाप्गुः विप्रःशीर्षंनृपोवक्षोवैश्यश्चोरूपरःपदे स्पृष्ट्वारेखांगृहारंभेकुर्यादग्नेःप्रदक्षिणमिति अग्नेरित्याग्नेय्याः तथाचकारिकायां अंगुष्ठकेन
देशिन्यारेखांकुर्वीतसूत्रतः स्वर्णेनमणिनारूप्यमुक्तादधिफलास्ततः कुसुमैर्वानशस्त्रेणनलोहेनननभस्मना काष्ठादिभिर्नापसव्यंनवक्रांदो
षदर्शनात् शस्त्रेणशस्त्रमृत्युः स्यादित्यादिस्पष्टमीरितमिति तथाचबृहद्वास्तुपद्धतौ शस्त्रेणशस्त्रमृत्युर्वंधोलोहेनभस्मनाग्निभयं तस्कर
भयंतृणेनचलिखिताकाष्ठेनराजभयं वक्राचपादलिखिताशत्रुभयदाकुशादाक्रिरूपाच्च चर्मांगारास्थिकृतादंतेनचकर्तुरकनाय वैरमपसव्यलि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.सा. गिवताप्रदक्षिणासपद्मौविनिर्देश्याइति अथशिलान्यासमाह भित्तेः शिलाअपिसूत्रवदाचरेयुः आग्नेयादिप्रदक्षिणंस्थापयेयुरित्यर्थः तथाचवशि टी.

७२ हः दक्षिणपूर्वकोणेकृत्वापूजांशिलान्यसेत्प्रथमं शेषाःप्रदक्षिणेनस्तंभाश्चैवंप्रतिष्ठाप्याइति १६ अथभित्तिप्रसंगेनद्वारमाह दैर्घ्येगृहदैर्घ्येअं
कामेनवभिर्भाजितेसतिपूर्वादौदिशिक्रमेणसव्यतोनामभागास्त्रिषड्र्थपंचमलवेद्वाः द्वारंउक्तंमुनिभिरितिशेषः त्रयश्चषट्च अर्थाश्च पंच-
चत्रिषड्र्थपंच एतेषांसंख्यापूरकास्त्रिषडर्थपंचमास्तेचतेलवाश्चतेषांसमाहारस्तस्मिन् एतदुक्तंभवति गृहदैर्घ्येनवभागंकृत्वापूर्वाभिमुखे

पूर्वादौत्रिषड्र्थपंचमलवेद्वाः सव्यतोंऽशोत्थतदैर्घ्येद्व्यंशसमुच्छ्रिताश्चिलक्के सर्वासुदिक्षूदिता गृहेक्रियमाणेवामभागात्अंशद्वयं

त्यक्त्वातृतीयांशेद्वारंकर्तव्यं दक्षिणाभिमुखेगृहेतथैवांशपंचकंत्यक्त्वाषष्ठेंशेकार्यं पश्चिमाभिमुखेतथैवांशाश्चतुष्कंत्यक्त्वापंचमांशेकार्यं उदङ्
मुखेपंचमांशेएवद्वारंकर्तव्यं सर्वासुदिक्षुअश्चिलवकेचतुर्भागेद्वारुदिताकिंलक्षणाद्वाः द्व्यंशसमुच्छ्रिताद्विभागोच्चा तथाचवराहः दैर्घ्येनवां-
शाःपदमत्रसव्यात्द्वारंशुभंप्राकृत्रिचतुर्थभागे चतुर्थषष्ठेदिशिदक्षिणस्यांपश्चाच्चतुःपंचमकेतथोदगिति तथाचच्यवनः मानाधिकोनाद्गृहमा
गेद्वारेनीचस्वरवक्षयइति अथनिष्पन्नासुभित्तिषुस्तंभप्रतिष्ठामाह स्तंभोग्नेर्दिशीति अग्नेर्दिशि आग्नेयांसुसमयेपूर्वोदितेस्तंभः स्थाप्यः ॥ ७२

CC-0. In Public Domain. Digitization by eGangotri

अत्राप्युक्तनरुजइत्यनुवर्तते किंलक्षणः स्तंभः पूजितः स्त्रक्चंदनार्चितः पुनः किंलक्षणः शिरःछत्रभाक्शिरसिछत्रंभजतेइतितथा छत्रंतुकाकादिप
स्युपवेशनभयात्स्तंभोपरिक्रियते तथाचवराहः छत्रस्त्रग्बंधयुतः कृतधूपविलेपनः समुत्थाप्यः स्तंभस्तथैवकार्योद्वारोच्छ्रायः प्रयत्नेनेति तथा

स्तंभोमेर्दिशिपूजितःस्रसमयेस्थाप्यःशिरश्छत्रभाग्विस्ताराश्शि१६ल्लवान्वितैःकृत४कैरैस्कल्यंगृहोच्चंविदुः१७

चोसलः स्तंभोपरियदोलूककाकगृध्रादिपक्षिणः व्यालादयश्चतिष्ठंतितदाकर्तुर्नशोभनं तस्मात्स्तंभोपरिछत्रंशाखांफलवतींवा धारयेदथवा
वस्त्रंबुधैरलादिनिक्षिप्तइति गुर्जरदेशेक्वचित् कालसर्पमवलोक्यतच्छून्यदिशिप्रथमंस्तंभप्रतिष्ठांकुर्वीतितदूसत् यतस्तदवलोकनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवाहेवेद्यांकोणेपूर्वशृंगारस्थैस्तंभानरोपयंति तद्विषयं तदप्येकदेशीयं नबहुसंमतं कालसर्पस्तुयथा ईशानतःसर्पतिकालसर्पोविहायसृष्टिं
 गणयेद्विदिक्षु पश्चाद्गतिस्तस्यतुरसमध्यपुच्छत्रिकंत्रिकंवैवृषसंक्रमादेः अहेःफणायांमरणंवरस्यमध्येकुमार्याःस्वजनस्यपुच्छेविधेयमेकंकिलशून्यदेशे
विवाहवेद्यांनिखनेच्चकीलमितिवृषादित्रिषुराशिषुरवौ आग्नेय्यांस्तंभारोपणंकार्यं सिंहादिषुईशान्यांवृश्चिकादित्रिषुवायव्यां घटादित्रिषुनैर्ऋ-
त्यांकर्तव्यमिति तद्विवाहएव गृहेसिंहादवलोकनीयं वृषाद्वेद्यां तथाच वृषाद्वेद्यांगृहेसिंहान्मीनात्त्रीणिस्फुरालये मुखंमध्यंतथापुच्छंहित्वा
स्तंभंनियोजयेदिति अन्यच्च गृहस्तंभप्रतिष्ठापनंबहुभिर्ग्रंथकारैराग्नेय्यामेवाभिहितं तथाचब्रह्मपुराणे सूत्रभित्तिशिलान्यासंस्तंभस्यारो
पणंतथा पूर्वदक्षिणयोर्मध्येकुर्यादित्याहकश्यपः तथाचशार्ङ्गधरः प्रासादेषुचहर्म्येषुगृहेष्वन्येषुसर्वदा आग्नेय्यांप्रथमंस्तंभंस्थापयेत्तद्वि
धानतः तथाचवराहमिहराचार्याः दक्षिणपूर्वकोणेकृत्वापूजांशिलांन्यसेत्प्रथमं शेषाःप्रदक्षिणेनस्तंभाश्चैवंप्रतिष्ठाप्याइति कात्यायनगृह्य-
कारिकायामप्युक्तं एकैकमच्छ्रयेत्स्तंभंमंत्रैरेतैःशिलातले ध्रियोवसानइत्यंतैरिमामित्यादिभिर्गृही आग्नेय्यादिषुकोणेषुमंत्रैरेतैःशिलान्य
सेदिति गृह्येहरिहरभाष्येशालाप्रकृतिष्वप्येवमेवोक्तमित्यलमतिप्रसंगेन उक्ततरुजइत्युक्तत्वात्शास्त्रांतरात्काष्ठान्यवगंतव्यानितथाचवा
स्तुशास्त्रेश्रीपर्णीरोहिणीशाकसर्जाश्चसरलाःशुभाःपतंगरोध्रशालाख्यास्तालार्जुनकशिंशपाः चंदनाशोकबदरीमधूकाश्चकदंबकः प्रशस्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अश्मनीनिंबबिल्ववर्ज्जंगृहांतिके गृहेकाष्ठंसमंश्रेष्ठमलिंदेविषमंशुभमिति नारदः प्लक्षोदुंबरचूताख्यानिंबस्नुहिबिभीतकाः दुग्धाःकंटकिनोवृक्षाव
गश्वत्थकपित्थकाः अगस्तिशिग्रुतालाख्यास्तिंतिडीकाश्चनिंदिताः अन्येचगृहनिर्माणेयोजनीयाःसदाद्रुमाइति तथाचवराहः पितृवनमार्गसु
रालयवल्मीकोद्यानतापसाश्रमजाः चैत्यसरित्संगमभवाश्चघटतोयसिक्ताश्च कुंजानुजातवल्लीनिपीडितावज्रमारुतोपहताः स्वपतितहस्तिनि
पीडितशुष्काग्निप्लुष्टदुष्टमधुनिलयाः तरवोवर्जयितव्याः शुभदास्तु स्निग्धपत्रकुसुमफलाः सुरदारुचंदनसमामधुकतरवःशुभाद्विजातीनां
क्षत्रस्यारिष्टाश्वत्थखदिरबिल्वावृद्धिकराःवैश्यानांजीवकखदिरकसिंदूकस्यंदनाश्चशुभफलदाः तिंदुककेसरसरलार्जुनोस्त्यशालाश्चशूद्राणां सर्वेषांवा
शस्ताः सर्ववृक्षाश्चनिंदितानोचेदिति व्यासोपि अन्यवेश्मस्थितंदारुनैवान्यस्मिन्प्रयोजयेत् नतत्रवसतेःकर्तावसेत्तत्रनजीवतीति समरांगणे
इष्टकालोष्टपाषाणमृत्तिकाजीर्णमायसं तृणंपर्णंबुधैःप्रोक्तंदारुनूनंगृहायवैइति शार्ङ्गधरेपि नूतनेनूतनंकाष्ठंजीर्णेजीर्णंप्रशस्यते जीर्णेचनूतनंश्रे
ष्ठंनोजीर्णंनूतनेशुभमिति वृक्षच्छेदनप्रार्थना ग्रंथांतरेउक्ता। यानीहभूतानिवसंतितानिबलिंगृहीत्वाविधिवत्प्रयुक्तं अन्यत्रवासंपरिकल्पयंतुक्षमंतुता
न्यद्यनमोस्तुतेभ्यइति अथस्तंभप्रसंगेनगृहोच्चतामाह विस्तारेति विस्तारस्यगृहविस्तारस्यअष्टिलवःषोडशांशस्तेनअन्वितैर्युक्तैःकृतकैश्चतुर्हस्तै
स्तुल्यंसमानंगृहोच्चंविदुर्मुनयइत्यध्याहारः तथाचरत्नकोशे विस्तारषोडशांशश्चतुर्हस्तोभवेद्गृहोच्छ्रायइति तथाचलल्लः नात्युच्छ्रितंनातिनीचंकुड्योत्सेधंयथा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रीति१७ अथसुखग्रहात्कस्यगृहंकस्यांदिशिकर्तव्यमाह स्नानेति स्नानंप्रसिद्धं अग्निः प्र० स्वपिः शयनं वस्त्राणिप्रसिद्धानि भोजनंप्र० पशवोगवादयः
द्रव्याणिस्वर्णादीनिअमराःदेवाः एषांओकांसिगृहाणितेषांस्थितिः स्थापनं पूर्वादौदिशिक्रमेणकार्यमित्यध्याहारः तथाचनारदः स्नानागारंदिशिप्रा
च्यामाग्नेय्यामग्निमंदिरं याम्यायांशयनागारंनैर्ऋत्यांवस्त्रमंदिरं प्रतीच्यांभोजनागारं वायव्यांपशुमंदिरं भांडकोशंतूत्तरस्यांईशान्यांदेवमंदिरमि
ति अथजलस्थानमाह ईशितुरीशानस्यदिशिजलंकार्यंनान्यत्र तथाचलल्लः प्राच्यादिदिक्स्थेसलिलेसुतहानिःशिखिभयंरिपुभयंच स्त्रीकलहंस्त्रीदो

स्नानाग्निस्वपिवस्त्रभोजनपशुद्रव्यामरौकःस्थितिंपूर्वादौजलमीशितुर्दिशिपरं वायोरपाङ्मूत्रकं अल्पेशक्तिभुवोर्यथारु
चिपरेगेहस्यदक्षेघरट्टांबूलूखलचुल्लिकापितृपदप्रक्षाल्यनान्यूचिरे १८

ष्यंनैःस्व्यंचिंतात्मजविच्छिरिति अथान्यदप्याह परमिति पर
मनूक्तंपदार्थजातंवायोर्दिशिकार्यं अन्यानिमारुत्यामिति लल्लोक्तत्वात् अपाक्दक्षिणस्यांदिशिमूत्रकंकार्यं स्थलसंकोचेसतिएतद्यत्प्रोक्तं तद्गृहमध्ये
वास्तुतश्चस्वस्वस्थानेतारतम्येनयोज्यं अथशक्तिभुवोःसंकोचेसतिकर्तव्यमाह अल्पेइति शक्तिभुवोरल्पेसतियथारुचिकार्यं गेहस्यदक्षेपरेआचार्याघरट्टादि
कंऊचिरे घरट्टःपिष्टयंत्रंअंबुउदकंउलूखलादिकंप्रसिद्धं तथाचोक्तं ग्रंथांतरे उलूखलंपिष्टयंत्रमग्निस्थानजलाश्रयं वेश्मनोदक्षिणेपार्श्वेपितृणांपादशौचनमिति१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथकेषुकेषुगृहेषुआयादिकंभाव्यंकेषुनभाव्यमित्याह द्वाविंशेभ्यः अधिकाःहस्तायस्मिन्गृहेप्रमाणंतत् द्वात्रिंशाधिकहस्तं अब्धिवदनंचतुर्मुखं तार्णंतृणगृहं आलिंदादिकं आलिंदंपट्टिशालेतिलोकेप्रसिद्धं आदिशब्देननिर्व्यूहादिगृहभूषणंगृह्यते ऐषुआयादिकंनईरितंनोक्तं तथाचदैवज्ञव ल्लभे अलिंदनिर्व्यूहविनिर्गमाद्याचतुर्दिशंयेगृहभूषणाय आयादिकंतेषुनचिंतनीयंयतोनतेवास्तुपरिग्रहेस्युरिति तथाचचिंतामणौ यत्रदे

द्वात्रिंशाधिकहस्तमब्धिवदनंतार्णंत्वलिंदादिकंनैषायादिकमीरितंतृणगृहंसर्वेषुमासेषूदितम् छन्नंवश्यकपाटमर्चिततमंवे श्मोक्तरीत्याविशेदारंभोदितमासकेनारदमतान्माघोर्जशुक्रेषुतु ११ आरंभोदितमैःप्रवेशउदितोपूर्वःसपूर्वस्थिरैर्मैत्रैश्चाच्यु तमूलदस्रसहितैरारक्षभद्रात्मकः कृत्यंवेश्मभवांदिवैर्वाविहितंरात्रौप्रवेशःक्वचित्सूर्यर्क्षादिभपंचकमनुमितादष्टप्रवेशेन
सत् २० र्ध्वंगृहादीनांद्वात्रिंशद्धस्ततोधिकं नतत्रचिंतयेद्धीमान्गणनायव्ययादिकमिति तथाचराजमार्तंडे आयव्ययौमासशुद्धिंचिंतये न्नतृणालयेइति तथाचवसिष्ठः एकादशेयवादूर्ध्वंयावद्द्वात्रिंशहस्तकं तावदायादिकंचिंत्यंतदूर्ध्वंनैवचिंतयेदिति अथतृणगृहेविशेषमाह तृ णगृहंसर्वेषुमासेषुउदितं सर्वमासेषुकर्तव्यमित्यर्थः अथनिष्पन्नेगृहेप्रवेशमाह छन्नमिति आरंभोदितमासेषुशास्त्ररीत्यावेश्मगृहंविशेत् आरंभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यउदिताः प्रोक्तास्तेचतेमासाश्चतेषुशास्त्ररीत्यासूत्राद्युक्तविधिनागृहंप्रविशेत्स्वामीत्यर्थः कथंभूतंवेश्मञ्चलंकृत्येराच्छादितं पुनःकिंलक्षणंयस्य
कपाटं वश्यंअधीनंकपाटंयस्यतत्तथातत्तूवश्यमिति छापित्तउत्घाटितेवातयेवस्थिरंभवति पुनःकिंलक्षणं आर्चिततमं तोरणमालाद्य
लंकृतं तथाचनारदः अकपाटमनाछन्नमदत्तबालेभोजनं गृहंनप्रविशेद्देवविपदामाकरंहितदिति तथाचव्यवनः स्वयमुत्घाटितेरोगेपि
हितेचकुलक्षयः मानाधिकोनदिग्भागेद्वारेनीचेस्वस्वसयइति अथप्रवेशेमासविशेषमाह नरदमतात् माघोर्जफल्गुनेषुमासेषुगृहंप्रविशेत्
माघः प्रसिद्धःऊर्जः कार्तिकः शुक्रोज्येष्ठःएषुगृहंप्रविशेदित्यर्थः आरंभोदितमास्वित्यनेनतृणगृहस्यसर्वमासेषुविहितत्वात्प्रवेशोपिसर्व
मासेषुविहितः तथाचनारदः प्रवेशोमध्यमोज्ञेयःसौम्यकार्तिकमासयोः माघफाल्गुनवैशाखज्येष्ठमासेषुशोभनइति तथाचज्योतिः
प्रकाशे गृहारंभोदितेमासेधिष्ण्येवारेविशेद्गृहमिति तथाचग्रंथांतरे विशेत्सौम्यायनेहर्म्यंतृणागारंतुसर्वदेति तथाचव्यवहारसारत
त्वे सौम्यायनेश्रावणमार्गपौषेजन्मर्क्षलग्नोपचयादशांशे वामंगतेर्के गृहवास्तुपूजांकृत्वाविशेद्वेश्मभकूटशुद्धमिति १९ इदानीम
पूर्वादिप्रवेशानाह प्रारंभेति प्रारंभोदितभैः गृहप्रारंभोदितनक्षत्रैरपूर्वः प्रवेशः उदितः मुनीन्द्रैरित्यध्याहारः अत्रप्रारंभोदितभैरित्यु ७५
पलक्षणं तेनप्रारंभोदिततिथिमादिकंसर्वंग्राह्यं अपूर्वोनामनूतनगृहेप्रथमःप्रवेशउच्यते स्थिरैर्मैत्रैश्चनक्षत्रैः सपूर्वःप्रवेशउदितः सपू-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैनामयात्रावसानेयः क्रियते अथअच्युतमूलदस्रसहितेशरंभभेद्वन्द्वात्मकः प्रवेशः उदितः द्वन्द्वात्मकोनाम अग्न्यादिनानष्टगृहे पुनर्यः क्रियते
तथाचज्योतिःप्रकाशे अपूर्वःप्रवेशोगृहारंभधिष्ण्यैर्विधेयःकरोमध्यमोचेतिकेचित् सपूर्वःस्थिरेमिश्रभैरेवशस्तैरतोन्योशिवमूलाच्युतारंभ
धिष्ण्यैः वसिष्ठः अपूर्वसंज्ञंप्रथमप्रवेशोयात्रावसानेचसपूर्वसंज्ञम् द्वन्द्वाह्वयंचाग्निभयादिजातंगृहप्रवेशंत्रिविधंवदंति अथगृहकृत्यवि
शयेदिनरात्रिविशेषनिर्णयमाह कृत्यंवेश्मप्रवमिति वेश्मप्रवंगृहप्रवंयत्किंचित्कृत्यंतद्दिवैवविहितंनरात्रौ कचिद्दिवामुहूर्ताभावेसति
रात्रौप्रवेशोविहितः नान्यत् तथाचवसिष्ठः दिवाप्रवेशः शुभदःसपुत्रपौत्रादिविवृद्ध्यैनिशिभास्करेंद्वोःबलेनमत्स्यध्वजवासरस्यरात्रिंवि
ना सूर्यतिथिश्चरात्रिमिति अथकलशवास्तुनक्षत्रशुद्धिमाह सूर्यर्क्षादिति सूर्यनक्षत्रादिमपंचकंनक्षत्रपंचकंतथासूर्यर्क्षादिमनुमि
तांचतुर्दशमितान्नक्षत्रादष्टनक्षत्राष्टकंप्रवेशेनसत् नशुभंस्यात् अन्यानिशुभानीत्यर्थात्सिद्धम् अत्रपूर्वोक्तानांनक्षत्राणांशुभाशुभा
त्वंज्ञातव्यम् २० अथप्रवेशेलग्नशुद्धिमाह लग्नेति उपचयस्थिरेलग्नेजन्मर्क्षजन्मलग्नाभ्यांउपचयावहस्थिरेलग्नेवेश्मप्रवेशःशु
भःस्यात् कैः रविमुखैः सूर्याद्यैः प्रारंभवत्संस्थितैः गृहारंभार्थमुक्तंतद्वत्संस्थितैरित्यर्थः कस्मिन्सतिसूर्येवामगतेसति पुनःकैःस्वदिग्वद
नगैःयदिङ्मुखंगृहंतद्दिङ्मुखैःप्रवेशादितैर्नक्षत्रैरित्यर्थः अथवामसूर्यलक्षणमाह रंध्रइति रंध्रेषु ८.द्वि २ भवे ११ भ्यःलग्नादिअष्टमपं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चमद्वितीयैकादशेभ्यः सकाशात् ८ आस्ततगतः आपंचमगतः सूर्योदयास्यात्तदा पूर्वाद्याननमालयं पूर्वादिमुखं गृहं प्रविशतां मनुष्याणां
असौ सूर्यः क्रमाद्वामगः स्यात् एतदुक्तं भवति अष्टमास्ंचस्थवर्तमानोर्कः पूर्वामुखगृहे प्रविशतां वामो भवति पंचमास्ंचस्थगतो दक्षिणामु
खे गृहे प्रविशतां वामो भवतीत्यर्थः २१ इ॰ स्वोमुक्त॰ वास्तुप्रकरणं समाप्तम् अथ यात्राप्रकरणं व्याख्यायते तत्रादौ कस्मिन्काले यात्राकर्त्री

लग्ने चोपचयस्थिते रविमुखे शरंभवत्संस्थिते सूर्ये वामगते त्वदिग्वदनभैर्वेश्मप्रवेशः शुभः रंध्रे पुष्टिभवे व्यास्ततगतः
सूर्यो यदास्यात्तदा पूर्वाद्याननमालयं प्रविशतां स्याद्वामगो सौक्रमात् २१ इति वास्तुप्रकरणं समाप्तम् वारे चोपचयावह
स्य स्वदशास्विष्टं प्रयाणं जगुः कर्णात्यादितितोद्विके षु मृगमैत्रार्के षु नो जन्मभे सार्पार्द्राग्नियमाजपाद पितृपुत्वाष्ट्रत्रये चाप्युभं
रिक्ता ४ ९ १४ पर्व १५ ३० गुहा ६ ष्टमी ८ हरि १२ सितास्येषु ज्ञशक्रोन्मुखम् १ व्येत्याह मुदशासुशोभनादशांतर्दशाविदशोपदशासु
उपचयावहस्य ग्रहस्य वारे गोचराष्टकवर्गादौ शुभफलग्रहस्य वारे प्रयाणमिष्टं शुभं जगुराचार्याः केषु कर्णात्यादितिभद्विकेषु कर्णः श्रवणः अंत्यरेव
ती अदितिभं पुनर्वसुः एषां द्विकः श्रवणधनिष्ठे रेवत्यश्विनो पुनर्वसुपुष्यौ एष्वित्यर्थः पुनः केषु मृगमैत्रार्केषु मृगः प्रसिद्धः मैत्रमनुराधा अर्को हस्त ७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एषुनवनक्षत्रेषुप्रयाणंयात्रामित्यर्थः तत्रविशेषमाह नाजन्मभइति जन्मभेजन्मनक्षत्रे श्रवणाद्यन्यतमेपियानंयात्रामंनोजगुः अथयेषुअशुभंतान्याह सार्पेति
सार्पमाश्लेषा आर्द्राप्रसिद्धा अग्निःकृत्तिकायमोभरणी अजैकपात्पूर्वाभाद्रपदा पित्र्यंमघात्वाष्ट्रंनयेचित्रात्रयेच एषुनवनक्षत्रेषुयानमशुभंज

प्राक्चंद्रासितपक्षभंवरूपरान्ह्वांसंचपेज्यानपाक्तपश्चात्कार्कसितानुदक्कुजबुधार्यमणरूपजेशूलकान् त्रिंशाष्टैनवभूम
योग्निगिरिशाविश्वेषवोर्काब्धयःषट्शक्रास्तिथिपर्वतादशहद्योपेतांस्तिथीनीशातः २ ऐंद्राद्याग्निभसप्तसप्तकगणेवा
य्वाग्निकाद्यास्थितोनोल्लंघ्यः परिघःस्त्वपाक्वरुणभैःप्राच्यैरुदङ्नप्रजेत् सर्वाशास्करवीज्यमित्रतुरगेयायाद्धावश्य
केहित्वामूलमनिष्टभेयदिनिजाशांष्टांगलब्धिर्व्रजेत् ३ मित्रारव्यध्रुवभैर्दिनादिमलवेतोस्णेहिंतीयेतिमेक्षिप्रेनक्ष
मशोमृदुप्रचरभैरात्रित्रिभागेष्वियात् ऋक्षकेज्यमृगेष्वयंननियमोवैश्वांत्यपादश्रवास्तिथ्यंशास्त्वभिजिद्रसेस
फलदोयामींविनापिक्षणः ४ गुः अन्यानिनवनक्षत्राणिमध्यमानीत्यर्थतःसिद्धं अथयात्रातिथिषुअशुभंतदाह रिक्तेति चतुर्थीनवमी
चतुर्दश्यः पर्वणीपूर्णिमामावास्येगुहःषष्ठी अष्टमीप्रसिद्धा हरिर्द्वादशीसितास्यंशुक्लप्रतिपत् तेषुप्रयाणंयानमशुभंजगुः अर्थादन्यासुतिथिषु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शक्रं अन्यद्दुष्टमाह ज्ञेति ज्ञोबुधः शुक्रः प्रसिद्धः तयोरुन्मुखंसंमुखयानंउक्तेषणितिथिनक्षत्रादिषुयानं अक्षभंजगुः बुधशुक्रसंमुखंगमनंनकर्तव्य
मित्यर्थः १ अथशूलमाह प्रागिति प्राक्पूर्वस्यांदिशिचंद्रासितशुक्रभंत्यजेत् चंद्रः सोमवारः असितः शनिवारः शुक्रभंज्येष्ठा एतत्त्रयंपूर्वदिशित्यजेदित्य
र्थः अपाक्दक्षिणस्यांवसुपरार्धात् धनिष्ठोत्तरार्धात् पंचनक्षत्राणिईज्योबृहस्पतिवारः एतानदक्षिणस्यांत्यजेत् पश्चात्पश्चिमायांदिशिकार्कौसितान्त्य
जेत् कः रोहिणी अर्कोरविः सितः शुक्रः एतान्पश्चिमायांत्यजेदित्यर्थः उदक्उत्तरस्यांदिशिकुजबुधार्यम्णस्त्यजेत् कुजोमंगलवारः बुधः प्रसिद्धः अर्यमा
नामोत्तराफल्गुनी एतान्शूलकानउत्तरस्यांत्यजेत् शूलदर्पस्यप्रत्येकंसंबंधः अथयोगिनीमाह त्रिशाष्टाविति एतान्प्रत्येकपद्गतानतिथीन् ईशतः ईशा
न्याः सकाशात् प्रदक्षिणक्रमेणजस्युः एतान्तिथीस्त्यजेत् एतेके त्रिंशा ३० ष्टौ ८ ईशान्यांनव ९ भूभयः १ प्राच्यांअग्नि ३ गिरिशाः ११ आग्नेय्यां विश्वे १३ षन्नः
५दक्षिणस्यां अर्काब्धयः १२ ४ नैर्ऋत्यांषट् ६ शक्रा १४ पश्चिमायांतिथि १५ पर्वता ७ वायव्यां दश १० द्दश २ उत्तरस्यां अत्रांकन्यास एवव्याख्यानम् २ अ
थान्यविघमाह ऐंद्रेति ऐन्द्यादिषुदिक्षुअग्निपात् कृत्तिकायाः सकाशात् सप्तसप्तभगणाभवेत् एतदुक्तंभवति सप्तशलाकाचक्रं निष्पाद्य
पूर्वगतासुसप्तसुरेखासु ईशानतः कृत्तिकादीनिसप्तनक्षत्राणिन्यसेत् ततुरस्थानिसप्त दक्षिणगतरेखासुन्यसेत् एवंपश्चिमोत्तररेखासुक्रमे
णन्यसेत् ततोवायव्याग्नेयदिग्गतांरेखांकुर्यात् अस्यारेखायाः परिघइतिसंज्ञा एवंनिष्पादितेचक्रेप्रयोजनमाह वाय्वग्निकाष्ठास्थितइति वायुः

CC-0. In Public Domain. Digitization by eGangotri

प्रसिद्धः अग्निः प्रसिद्धः अनयोः काष्ठे दिशौ वायव्याग्नेय्यौ तत्रस्थितः परिघो नोल्लंघ्यः अथान्यत्प्रयोजनमाह अपागिति अपाग्दक्षिणस्यां वरुण
भैः प्रतीच्यै नक्षत्रैः न व्रजेत् प्राच्यैर्नक्षत्रैः उदक् उत्तरस्यां दिशि न व्रजेत् न गच्छेत् तत्तद्दिक्स्थापितनक्षत्रे स्वत्तद्दिग्गमनं सिद्धमेव सर्वास्त्र सर्वदिक्षु रवी-
ज्यमित्रतुरगैर्यायात् रविर्हस्तः ईज्यः पुष्यः मित्रमनुराधा तुरगो अश्विनी एभिर्नक्षत्रैः सर्वासु दिक्षु गमनं शुभमित्यर्थः अथावश्यके कृत्ये अस्या
पवादमाह अथावश्यकेति आवश्यके कृत्ये सति निंद्यैः अनिष्टैः यद्दिक्स्थानि निंद्यानि तैः पूर्वोक्तैर्नक्षत्रैस्तस्यां दिशि तदा व्रजेत् तदा
कदा यदा निजाशेष्टांगलब्धिर्भवेत् निजाशायां निजगमनदिशायां इष्टांगलब्धिः इष्टलग्नलाभः स्यात् इष्टलग्नं वक्ष्यमाणलक्षणः तद्यथोक्त
गुणसंपन्नं यदा स्यात्तदा गच्छेदित्यर्थः नोचेन्नेत्यर्थात्सिद्धं किं कृत्वा शूलं त्यक्त्वा पूर्वोक्तं शूलनक्षत्रं त्यक्त्वा शूलनक्षत्रे सति निजाशेष्टांगलब्धावपि न गच्छेदित्यर्थः ३ अथान्यदाह मिश्राख्यैरिति दिनादिमत्ले त्रिधा विभक्तस्य दिनस्याद्यंशे मिश्राख्यैः साधारणैर्नक्षत्रैः ध्रुवभैश्च न इयात् न
गच्छेत् द्वितीयभागे तीक्ष्णैः अंतिमे तृतीयभागे क्षिप्रैर्नक्षत्रैर्नयात् अथ रात्रिस्त्रिभागेषु क्रमशो मृदूग्रचरभैर्नयात् रात्रेः प्रथमभागे मृदुभिः
द्वितीये भागे उग्रैः तृतीये भागे चरभैर्नयात् अथ विशेषमाह श्रुतीति श्रुत्यर्केज्यमृगेषु अयं नियमो न श्रुतिः श्रवणः अर्को हस्तः ईज्यः पुष्यः मृ
गः प्रसिद्धः एभिर्नक्षत्रैः सर्वभागेषु गंतव्यमिति भावः अथाभिजिल्लक्षणं तत्फलं चाह वैश्वेति वैश्वमुत्तराषाढा तस्यां त्यपादश्चतुर्थचरणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रवणस्य आद्यास्तिथ्यंशाः प्रथमः पंचदशांशः एतत्प्रमाणो अभिजित्स्यात् सोभिजिद्यामी दक्षिणां दिशं विना सर्वदिक्फलदः क्षणो मुहूर्तोपि अभिजित्यामी विनाफलदः यातॄणामभीष्टफलदो भवतीत्यर्थः ४ अथान्यदाह एकार्केंदूयनानुकूलमिति अर्कश्च इंदुश्च तयोरयनं अर्केंदूयनं एकं चतत् अर्केंदूयनं च तत्तया तस्यानुकूलं गतं गमनं अनिशं अहर्निशं हितं स्यात् भेदे सति दिवारात्र्योः क्रमेण शस्तं स्यात् अयमर्थः सूर्यो दिनस्वामी चंद्रो रात्रिस्वामी द्वौ चेदुत्तरायणे स्यातां तदाहर्निशमुद्गमनं शस्तं द्वौ चेद्दक्षिणायने भवतस्तदा अहर्निशं दक्षिणगमनं शस्तं रात्रौ चंद्रायनदि

एकार्केंदूनानुकूलमनिशं भेदे दिवारात्र्योर्भौमे प्राक्शनिचंद्रयोर्गतमपाक्पश्चाज्ज्ञगुर्वोर्हितं भृग्वर्कान्द्युदगर्कसाद्युभमगे स्त्र्यंद्विसप्ताडलक्ष्यंगाश्च्यां विडलोनयोर्न गमनं श्रीदेवलोक्त्याहितम् ५

शांप्रतिगमनं शस्तं स्यात् अर्थात् अन्ययानं शस्तं स्यात् अत्र प्राची उत्तरसंबंधिनी ज्ञेया तस्माद्यदा उद्गमनं शस्तं तदा प्राग्गमनमपि शस्तं भवति प्रतीची दक्षिणसंबंधिनी ज्ञेया तेन यदा दक्षिणदिग्गमनं शस्तं तदा प्रतीचीगमनमपि शस्तं स्यात् तथा च रत्नकोशे दिनकरकरप्रतापाभकरादावुत्तरां च पूर्वां च गायाच्चकर्कटादौ याम्यामाशास्यं प्रतीचीं च अथान्यदाह भौमेइति भौमे प्राक् पूर्वदिशि गतं गमनं हितं स्यात् शनिचंद्रयोरपाक् दक्षिणस्यां ज्ञगुर्वोः बुधगुर्वोः पश्चात् पश्चिमायां भृग्वार्कान्हि शुक्ररविदिने उदक् उत्तर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यांगतंहितंस्यात् अथाडलंविडलंचाह अर्कभादिति सूर्यनक्षत्राद्युभंदिननक्षत्रं अंगैःसमभिस्तवंशेषितंसत् द्विसप्तदोवासमवायदा भवेत्तिमदाडलःस्यात्-व्यंगाभ्यांत्रिषट्संख्याकाभ्यांविडलःस्यात् अनयोडलविडलयोः गमनंश्रीदेवलोक्तस्यादेवर्षिवचनेनहितंस्यात् ५ अथवारशूलदोहदमाह सगमं इनात्सूर्यवारात्सकाशात् आज्यादीनिप्राश्यभाशयित्वाशूलेवारशूले यानंप्रयाणं अनर्थकृन्नोभवति अथदिग्दोहदमाह आज्यमिति घृतादिकंप्राश्य ऐन्द्र्यादिषुपूर्वादिषुहस्त्यादिभिर्यानंकुयानंभवति हस्तीप्रसिद्धः अनःशकटः हयोअश्वः नरः शिविकावाहकः एतदुक्तंभवति

आज्यंदुग्धगुडौतिलान्दधियवान्माषानिनाद्प्राश्यनोशूलेयानमनिष्टमिंद्रककुभोआज्यंतिलान्नंतिमीन् दुग्धंप्राश्यचहस्त्यनोहयनरैर्यानंकुयानंतयोध्यानाद्वाभवतिध्रुवेथहारिजंतिथ्यादिलक्षाधिकम् ६ घृतंप्राश्यहस्तिनाप्राग्गमनात्सिद्धिःतिलान्नंतिलोदनंप्राश्यरथेनदक्षिणगमनात्सिद्धिः मत्स्यान्प्राश्य अश्वेनपश्चिमगमनात्सिद्धिः दुग्धंप्राश्यनरैरुदग्गमनात्सिद्धिः स्यादित्यर्थः असतिसंभवेअभसेचेनिर्णयमाह तयोरसवाहनयोध्यानाद्वायानंकुयानंभवति अथलग्नशुद्धिंसहेतुकामाह ध्रुवेथहारिजमिति अयहारिजंलग्नं ध्रुवेवन्निकथंभूतं तिथ्यादिलक्षाधिकं तिथ्यादिभ्योलक्षाधिकंबलिष्ठमित्यर्थः ६ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वर्क्षैस्वर्क्षोनर्धिघटादिकंयात्रालग्नगतंत्यजेत् स्वर्क्षस्वराशिः अनर्धिः स्वराशेः अनुपचयभवनंघटः कुंभः अस्तभंअस्तगतग्रहस्यराशिः अन
नृजुग्रहंवक्रग्रहस्यराशिः एतानरिपोर्भात्वैरिराशेः षष्ठं अनुपृष्ठोदयं तथाचवृहज्जातके गोजाश्विकर्किमिथुनाःसमृगानिशाख्याः पृष्ठोद
याविमिथुनाः कथितास्तएवइति वृषमेषधनकर्कनकराः पृष्ठोदयाः स्वर्क्षांगेशरिपुं ऋक्षंच अंशंचऋक्षांगंतस्येशः स्वामी तस्यारि

स्वर्क्षानर्धिघटास्तभानृजुग्रहान्यष्ठेरिपोर्भादनृ स्वर्क्षांगेशरिपुंखलंजनिबलत्यक्तंतथासांप्रतम्
यात्रालग्नगतंत्यजेदथदिशामीशोर्कशुक्रौकुजोराहूमंदशशांकसौम्यगुरवः केंद्रे दिगीशेव्रजेत् ७

पुःतं स्वलः प्रसिद्धः ननिबलत्यक्तंजन्मनिबलहीनंग्रहं तथासांप्रतंप्रस्तुतंबलत्यक्तं इत्युक्तंसर्वंयात्रालग्नगतंत्यजेत् अथदिक्पतीनाह
दिशामिति दिशांपूर्वादीनांईशाः स्वामिनः अर्कशुक्रादयः पाठक्रमात्स्युः केंद्रेदिगीशे १ ४ ७ १० सतिव्रजेत्गच्छेत् यस्मिन्केंद्रेला
लग्नगतंभवतितत्केंद्रंवर्जयित्वा अन्यकेंद्रदिगीशेसतिव्रजेत् इदमग्रिमश्लोकेवक्ष्यति ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथदिक्पतौललाटगत्वंतद्दिग्गमननिषेधंललाटलक्षणंचाह   दिक्पेललाटगेसतिनप्रवसेत् प्रवासंनकुर्यात् तनेलग्नेवर्तमानइनःसूर्यः
प्राक्प्राच्यांदिशिप्रालगःललाटस्थितःस्यात् मदनेसप्तमेवर्तमानोर्कजःशनिःपश्चिमस्यांललाटस्थितःस्यात् अंबुगबुधश्चतुर्थगतोबुधः-

दिक्पेनप्रवसेल्ललाटगइनःप्राच्यांतनौप्रालगःस्यात्पश्चान्मदने ७ र्कजोंबुग ४ बुधःसौम्यारवगोपाक्कुजः ऐश्यां
हृ २ त्रिगतोगुरुर्ज्वलनदिश्याय ११ व्यय १२ स्थोभृगुर्वायोषट् ६ सुत ५ गोविधुर्निर्ऋतिदिश्यष्टांकसंस्थंतमः ८

सौम्यामुत्तरस्यांललाटस्थितःस्यात् खंदशमंतद्गतःकुजोभौमः अपाक्दक्षिणस्यांललाटस्थितःस्यात् हृत्रिगतोगुरुः ऐश्यांईशान्यां
ललाटस्थितःस्यात् आयव्ययस्थःभृगुःकविः ज्वलनदिशिआग्नेय्यांललाटगःस्यात् षट्सुतगोविधुश्चंद्रःवायांवायव्यांललाटस्थि
तःस्यात् अष्टांकसंस्थंतमःअष्टमनवमस्थानस्थोराहुःनिर्ऋतिदिशिललाटसंस्थःस्यादिति ८

CC-0. In Public Domain. Digitization by eGangotri

 वक्रीति वक्रीग्रहः केंद्रगतः सन्यातुर्गमनकर्तुर्नाशकरः स्यात् तदीयदिवसोऽपिवक्रग्रहस्य दिवसोपि यातुर्नाशकरः स्यात् लग्नेस्यवर्गो
पिनाशकरः स्यात् जन्मर्क्षलग्नेड्रिपुःशत्रुभोपितनुगोयातुर्नाशकरः स्यात् जन्मराशिजन्मलग्ने तयोः ईशौतयोः रिपुः अथसूर्यादी

वक्रीकेंद्रगतस्तदीयदिवसोलग्नस्यवर्गोभवेद्यातुर्नाशकरः शत्रुभोपितनुगोजन्मर्क्षलग्नेड्रिपुः
द्वीशाग्न्यंबुजभाग्यभानिगुरुभंपौष्णांतकेसार्पभं जन्मर्क्षाणिरवेरुपप्लवगतः खेटस्ततोह्यानिकृत् १

नांजन्मनक्षत्राण्याह द्वीशेति रवेः अर्कतः ग्रहाणांद्वीशादीनि जन्मर्क्षाणिजन्मनक्षत्राणिस्युः द्वीशंविशाखासूर्यस्य अग्निः कृत्तिकाचंद्रस्य अंबु
पूर्वाषाढाभौमस्यअजः श्रवणोबुधस्य भाग्यभंपूर्वाफाल्गुनीगुरोः गुरुः पुष्यःशुक्रस्य पौष्णंरेवतीशनेः याम्यंभरणीराहोः सार्पंसार्पश्लेषाके
तोः उपप्लवगतइति उपप्लवगतोनाम यदीभं यस्यग्रहस्य भंजन्मनक्षत्रंहतंत्रिविधोस्यातहतंस्यादसौग्रहोलग्नेस्थिह्यानिकृत्स्यात् १ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेशिरिति सूर्याद्धितीयोराशिर्वेशिः ससौम्ययुतः सन् अंगगोलग्नगोऽतिशोभनः स्यात् जनुषिजन्मकालेसद्भिर्ग्रहैर्युतायेराशयस्तनुगता अतिशोभनाः स्युः जन्मात्कोपचयस्थिताः जन्मात्कोजन्मचंद्रः तस्मादुपचयानित्रिषडेकादशदशमानि तेषुस्थिताग्रहास्तेतनुगता अतिशोभनाः तनोरपिज

वेशिः सौम्ययुतस्तनौजनुषियैसद्भिर्युताराशयोजन्मात्कोपचयस्थिता अपितनोः स्वर्क्षोच्चमित्रर्क्षगाः
पापा अप्यतिशोभनास्तनुगताजन्मेश्वरोकेंद्रगोस्वारात्सन्हितनोरफभोनफलदोमित्रान्हिपापोर्धदः १०

न्मलग्नादप्युपचयस्थलग्नगता अतिशोभनाः स्युः स्वर्क्षोच्चमित्रर्क्षगाः जन्मनियेस्वर्क्षगाः उच्चगाः मित्रर्क्षगास्तेपापा अपितनुगता अपिशोभनाः स्युः
जन्मेश्वरोजन्मराशिजन्मलग्नस्वामिनौकेंद्रगौ अतिशोभनौस्यातां स्वारात्यन्हिस्तनोरिवारेरफभः शुभग्रहः तनोरफोवर्तमानोनफलदोभवति
मित्रान्हिपापः तनौवर्तमानोर्धदः स्यात् तथाच्चयवनः रक्षकावर्धकाश्चैवयेस्युर्जन्मनिनायकाः तान्पापानपिनिः शंकोयात्रालग्नेनियोजयेदित्यादि
१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ स्वकालमेइष्टानिष्टं स्वश्लोकेनैकेनाह ॥ आयार्यन्यगताः खलाः आ३ या११ रिप्यः६ अन्यानि १ २ ४ ५ ७ ८ ९ १० १२ तत्रगताः खलाः पापग्रहाः खंदुश्च ६ इनजः शनिः आयायन्यगताः खलाइत्यनेनैवसिद्धेपिविशेषदुष्टफलज्ञापनार्थं खइनजइत्युक्तम् अंत्या १२ घ्य १ षष्ठ ६ ८ गोब्ज-

आयार्यन्यगताः खलाः खइनजो ज्ञोंत्यायषष्ठाष्टगो भूयः सोपचितोस्तखांबुकृतगः शुक्रोस्तईज्योमृतौ
नष्टज्ञोव्ययगोग्रहान्वितशशी यातुर्महाविघ्नदा अन्यस्थानगताजयार्थकृखदास्त्याज्यं पुरोक्तं नचेत् ११

श्चंद्रः भूयः पुनः सचंद्रः अपचितः क्षीणचंद्रः कृष्णपक्षचंद्रः अस्तं ७ खां १० बु ४ कृत ५ गः अस्ते ७ शुक्रः ईज्योगुरुर्मृतौ ८ नष्टज्ञोस्तमितबुधो
व्यय १२ गतः ग्रहान्वितः शशी येनकेनापिग्रहेणग्रहाभ्यां ग्रहैर्वायुक्तश्चंद्रमाः एतेमस्येकं यातुर्महाविघ्नदाः स्युः नानाप्रकारेणमरणभंगादी
नददतीत्यर्थः अन्यस्थानगताः उक्तेभ्योन्यस्थानगताः संतस्तदाजयार्थकृखदाः स्युः तदाकदाचिद्यदि पुरोक्तं त्याज्यं नस्यात् ११ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथप्रतिशुक्रस्यापवादमाह स्वग्रामेति स्वग्रामःप्रसिद्धः एकपुरंप्रसिद्धं आत्मसद्म आत्मगृहं चतुर्मुखेचतुर्वक्त्रे चतुःशालकंप्रसिद्धं उद्वाहाः विवाहाः ब्राह्म्यादयः विवाहाः तेषु वधूप्रवेशः नववधूप्रवेशः नृपभीराजभयं दुर्भिक्षपीडाप्रसिद्धा तासु तीर्थस्वामिनिदेशयोः तीर्थेतीर्थगमनं स्वामिनिदेशःस्वाम्याज्ञातयोः भृगुवसिष्ठात्र्यंगिरः काश्यपे भृग्वादिगोत्रसमूहे भारद्वाजजवात्स्ययोर्गोत्रयोः एषूक्तेषु सितज्ञो न्मुखं शुक्रबुधसंमुखंयानगमनंहितंस्यात् अत्रवधूप्रवेशेप्रतिशुक्रदोषेनोक्तः तत्तुभर्त्रासहगमनविषयं भर्त्राविनागमनेदोषोदृश्यते नवोढायास्तुवंध्यात्वमिति तथा

स्वग्रामैकपुरात्मसद्मसुचचतुर्वक्त्रेचतुःशालकेतूद्वाहेषुवधूप्रवेशनृपभीदुर्भिक्षपीडासुच तीर्थस्वामिनिदेशयोर्भृगुवसिष्ठात्र्यंगिरःकाश्यपे भारद्वाजजवात्स्ययोर्हितकरंयानंसितज्ञोन्मुखम् १२ चभीमपराक्रमे स्वामिनानीयमानायांप्रतिशुक्रोनविद्यतइति तथाचमतांतरे नवोढायास्तुवंध्यात्वंयदुक्तंसंमुखेभृगौ तदत्रविबुधैर्ज्ञेयंकेवलंतुद्विरागमेइति तथाचलल्लः स्वभवनपुरप्रवेशेदेशानांविग्रहेतथोद्वाहे नववध्वागृहगमनेप्रतिशुक्रविचारणानास्तीति तथाचमत्स्यपुराणेचतुःशालंचतुर्द्वारंमिलिंदैः सर्वतोयुतं नाम्नातत्सर्वतोभद्रंनतत्रप्रतिशुक्रतेति तथाचवसिष्ठः काश्यपेषुवसिष्ठेषुभृग्वत्र्यंगिरसेषुच भारद्वाजेषुवात्स्येषुप्रतिशुक्रोनविद्यतइति १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथान्यंचापवादमाह चंद्रेति चंद्रेपूषभमेषगेसतिसितःशुक्रःअंधःस्यात् तदासंमुखंयानंसत्शुभंस्यात् तथाचगर्गः पौष्णादिवन्हिभार्धंयावत्तिष्ठतिचंद्रमाः तावदंधोभवेच्छुक्रःप्रवेशेनिर्गमेशुभइति अथआवश्यकेप्रवृत्तिमाह परपूर्वयोरिति परपूर्वयोः पश्चिमपूर्वयोः सितविपर्यासात्शुक्रविपर्यासात् आवश्यकेकृत्येसतियानंसत्स्यात् एतदुक्तंभवति शुक्रेपूर्वकपालेगतेसतिपश्चिमांगच्छेत् पश्चिमकपालंगतेसतिपूर्वांगच्छेत् तथाचज्योतिःप्रकाशे अत्युत्कटेषुयावत्साक्षपालस्थोभृगुर्भवेत् तावत्ताशिदिशंगच्छेत्प्राचीमत्यकस्थितस्तथेति अथप्रयाणविधिमाह राजेति राजात्रिदिवसैरेकाब्धिषट्क्रोशकानुव्रजेत् एतदुक्तंभवति प्रथमदिनेक्रोशंगच्छेत् द्वितीयदिनेचतुःक्रोशान् तृतीयेषट्क्रोशान् अर्थात्परतोयथेच्छंगच्छेत् कथंभूतःराजातर्पितवन्हिभूसुरसुहृत् वन्हिरग्निः भूसुराःब्राह्मणाः सुहृदोबांधवाः तेतर्पिताः वन्हिभूसुरसुहृदोयेनसतथा अत्रायंभावःसमिच्चरुतिलादिनावन्हिंतर्पयित्वादक्षिणान्नादिभिर्भूसुरांस्तर्पयित्वा वस्त्रालंकरणादिभिःसुहृदः कलत्रादींस्तर्पयित्वाव्रजेदिति किंकुर्वन्स्नेहानुवृत्तिंत्यजन्सन् स्नेहेनअनुवृत्तिःपुनःगृहागमनं अयंभावः यात्रार्थंबहिर्गत्वापुत्रादिस्नेहवशात्तदवलोकनार्थंगृहं

चंद्रेपूषभमेषगेसतिसितोंधःस्यात्तदासंमुखंयानंसत्परपूर्वयोःसितविपर्यासात्सदावश्यके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नागच्छेदिति कथंभूतः राजा नृपः बुभुक्षितो न गच्छेदिति भावः पुनः किंलक्षणः कार्यमनाः कार्याय उत्कंठितांतःकरणः तथा च रत्नावल्यां स्वनिकेतात्स्मरभव नात्प्रधानादाश्रमाद्गुरुगृहाद्वापि यायात्कृताग्निकार्यः प्राश्य हविष्यं द्विजानुमतमिति तथा च बृहस्पतिः देवज्ञं पूजयित्वा तु विदुषः पूज्य शक्तितः प्र दक्षिणमिमान्कृत्वा तिष्ठं ध्यायेदुमापतिमिति तथा च ज्योतिःप्रकाशे संतोष्य स्वांगनां विप्रान्जह्यात्प्रतिरथादिकं शुचिः शुक्लांबरोष्णीषोनत्वेष्टंस्मरम नाव्रजेदिति तथा च कश्यपः यात्रासमयेष्टेन्द्वानुपरागे ग्रहस्य वैषम्ये गोभूहिरण्यवस्त्रैः संपूज्य श्रद्धया च दैवज्ञमिति बृहद्यात्रायां स्नातो भुक्तो-

राजातर्पितवन्हिभूसुरसुहृत्स्नेहानुवृत्तिंत्यजन्नृपः कार्यमनाव्रजेत्त्रिदिवसैरेकाब्धिषट्क्रोशकान् १३ ॥

नुलिप्तः स्रग्वी सर्वालंकारभूषितः शुक्लांबरधरः श्रीमान्ध्वगः स्मरवमेधत इति भूपालवल्लभे ब्राह्मणान्नावमन्येत कोपयेन्न निजांगनां यात्रां कृत्वा गृ हं नैव सिद्धिकामो विशेद्बुधमिति लल्लः यात्रायां प्रस्थितो यश्च ब्राह्मणानवमन्यते तदंतं जीवितं तस्य नासौ प्रतिनिवर्तत इति बृहद्यात्रायां यस्तु संप्रस्थितो यात्रां स्वभार्यां नाभिनंदति भार्यावानाभिनंदेत नास्य प्रतिनिवर्तनमिति तथा च रत्नावल्यां क्रोशं वा यदि वाप्यर्धं प्रथमे हनि शस्यते द्वि तीये योजनं गत्वा निवसेत महीपतिः तृतीये योजनं सार्द्धं वसेदाक्रम्य दूरतः ततः परं यथेष्टं तु यायान्मार्गं महीश्वर इति १३ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अथयात्रुकस्यनियमानाह क्रोधः प्रसिद्धः क्षौरंप्र॰ रतिर्मैथुनं श्रमः क्लेशः आमिषंमांसं गुडःप्रसिद्धः घृतंघृतवरणं अश्रुअश्रुमोचनंदुग्धंप्रसिद्धं
आसवोमद्यं क्षारंक्षारधान्यंमाषादि अभ्यंगस्तैलाभ्यंगः भयशंकारिपुभयमित्यर्थः असितांबराणि अशुभ्रवस्त्राणि रक्तकृष्णादीनि वमिर्वमनं
तैलंप्र॰ कटुमरीचादि इत्येतद्गमेगमनंउज्झेत् त्यजेत् अथउक्तेषुकिंकिंकतिदिनंत्यजेदित्याह क्षीरेति क्षीरक्षौररतीःक्रमात्त्रि ३ शर ५ सप्ताहं ७
त्यजेत् क्षीरंदुग्धंत्र्यहं ३ क्षौरंशराहंपंचाहं ५ रतिंसप्ताहंत्यजेदित्यर्थः परंउर्वरितंतद्दिनेप्रयाणदिनेत्यजेत् रोगंव्याधिंयावद्बाधंत्यजेत् स्त्र्यार्तवंबीज-

क्रोधक्षौररतिश्रमामिषगुडघृताश्रुदुग्धासवक्षाराभ्यंगभयासितांबरवमिस्तैलंकटूज्झेद्गमे दानपर्यंतंत्यजेत् सितान्य
तिलकंश्वेतव्यतिरिक्तंतिलकंपीतकौंकुमादिकंतद्दिनेत्यजेत् प्रस्थानकेपिइत्येतत्त्यजेत् प्रस्थानकंनाममुहूर्तसमयेकिंचिदभीष्टवस्तुचालनं
तदुक्तंरत्नमालायां छत्रायुधाद्यंमनसस्त्वभीष्टंप्रचालयेद्वैजयिकंजयार्थीति एतत्तुकार्यवशात्क्रियते प्रस्थानेसंपूर्णफलंनास्ति तथाचरत्नको
शेकार्यवशात्स्वयमगमेभूभर्तुःकेचिदाचार्याः छत्रायुधाद्यभीष्टंवैजयिकंनिर्गमेकुर्युरिति तथाचगर्गः स्वशरीरेणयःकश्चिन्निर्गच्छेच्छ्रद्धयान्वितः
तस्ययात्राफलंसर्वंसंपूर्णपथिसिध्यतीतितच्चालनावधिर्ग्रंथांतरात् गृहाद्गृहांतरंगर्गआहसीमांतरंभृगुः शरक्षेपाद्भरद्वाजोवसिष्ठोनगराद्बहिरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंप्रस्थानेकृतेपिस्वयमन्यस्मिन्शुभदिनेगच्छेत् तथाचज्योतिःप्रकाशे प्रस्थानेपिकृतेनेयान्महादोषान्वितेदिने गर्भयोगंविनाकालवृष्ट्यादौचाल्कुतेत
थेति रत्नमालायाम् वसेन्नचैकत्रदशक्षितीशोदिनानिनिसप्तचमंडलीकः यःप्राकृतःसोपिचपंचरात्रंभद्रेणयात्रापरतःप्रयोज्येति एवंविधेप्रस्था
नेपिक्रोधक्षौररत्यादीन्वर्जयेदित्यर्थः गर्गः क्रोधंक्षौरंतथावांतिंतैलाभ्यंगाश्रुमोक्षणम् घृतंमांसंगुडंतैलंयानेमद्यंपरित्यजेदिति रत्नकोशे
कालीयकंहिंगुलकःकुंकुमंरक्तचंदनं पीतरक्तंचवसनंयातुर्नेष्टानितत्क्षणादिति वृद्धयात्रायां कटुतैलगुडक्षारपक्वमांसाशनंतथा मुक्त्वायोयाति

क्षीरक्षौररतीःक्रमात्त्रिशररसप्राहंपरंतद्दिनेरोगंस्त्र्यार्तवकंसितान्यतिलकंप्रस्थानकेपीतिच १४

मोहेनव्याधितःसनिवर्तते लल्लः प्रमत्तोव्याधितोभीतःशांतःक्रुधोबुभुक्षितः अध्वानंनप्रपद्येतक्लीबवेषस्तथैवच रत्नावल्यां स्वकीयांपर
कीयांवास्त्रियंपुरुषमेववा ताडयित्वातुयोगच्छेत्तदंतंतस्यजीवितमिति भृगुः त्रिरात्रंवर्जयेत्क्षीरंपंचाहंक्षुरकर्मच तदहश्चावशेषाणिसप्ता
हंमैथुनंत्यजेदिति यात्रायागमनलक्षणंगर्गोक्तंज्ञेयं मुहूर्तसमयेप्राप्तेहंसचारांघ्रिणाव्रजेत् दैवज्ञामात्यविप्राद्यपुरोगैःस्वजनैर्वृतःपूर्वदक्षिण
सुधृत्यपादंयात्रांनराधिपःद्वात्रिंशतंपदंगत्वायानमारुह्यसंव्रजेत् ततोनिरीक्षयेत्सम्यक्शकुनांश्चशुभाशुभान् तथैवसदसच्छब्दान्निमित्तानिचसंव्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जेद्विति १४ इदानींशकुनानाह वस्त्रेति वस्त्राणिश्वेतवस्त्राणि अन्यान्यपशकुनमध्येपठितानि अलंकरणानिसुवर्णादिनिर्मितानिभूषणानीत्यर्थः पूर्णक
लशःप्रसिद्धः तौर्यध्वनिःवाद्यध्वनिःपुत्रवान्वर्धमानःपुरुषःशंखःप्र॰आदर्शोमुकुरःनृपोराजाअश्वःप्रसिद्धःदंतीहस्तीसुरभीगौःस्त्रीसौभाग्यवती पुष्पाणिश्वेतानि

वस्त्रालंकरणानिपूर्णकलशस्तौर्यध्वनिःपुत्रवान्शंखादर्शनृपाश्वदंतिसुरभिस्त्रीपुष्पधान्यानिच
दोलादीपविधूमवन्हिसुरभिद्रव्याणिशस्मोवृषोवेश्याछत्रवितानचामरकुमार्यासीनगोरोचने १५

धान्यानिअकृष्णानि कृष्णानित्वपशकुनमध्येपठितानि आदिशब्देनसुवर्णादिधातवः दोलाप्र॰दीपःप्र॰विधूमवन्हिः धूमरहितोग्निः सुरभिद्रव्याणिसुगं
धद्रव्याणिकर्पूरचंदनादीनिशस्मोवृषः श्वेतवृषभःवेश्याप्र॰छत्रंप्र॰वितानंवस्त्रनिर्मितंप्र॰चामरंप्र॰कुमारीप्र॰मीनोमत्स्यःजलादुधृतःगोरोचनंप्र॰१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसंकोचेनाह यद्यदिति यद्यद्वस्तुस्वांतनितांततोषकरणम् स्वांतं अंतःकरणंतस्यनितांतं अतिशयंतोषकरणंसंतोषजनकंतत्तत्किंबहुनोक्तेन एवंसंको-
चेनोक्तेदानींयेषुसंतोषासंतोषाभावः तानिपूर्वाचार्यैःशकुनमध्येपठितानितान्याह कोरुद्धृतंगोमयम् कोःपृथिव्याउद्धृतंगोमयम् मृच्च पृथिव्याःउद्धृ-
तामृत्तिका अंभोर्थघटान्वितःसहचरःउदकार्थंकुंभयुक्तोजनःसन्सहचरःसहचरतीतिसहचरःजलार्थीरिक्तकुंभस्तुपथिकेनसहव्रजेत् निवर्ततेयथा
पूर्णःकृतार्थःपथिकस्तथेत्युक्तत्वात् धौतांबरोमौत्रकः धूतवस्त्ररजकः दूर्वाप्रसिद्धा दर्भःप्रसिद्धः दूर्वादर्भौतृणेअपिशस्ते अपशकुनमध्येयत्तृणंपठितं

यद्यत्स्वांतनितांततोषकरणंकोरुद्धृतंगोमयंमृच्चांभोर्थघटान्वितःसहचरोधौतांबरोमौत्रकः तदेतद्व्यतिरिक्तम् रथ्कः प्र०

पलंमांसम् अस्त्रंरक्तम् मदिरामद्यम् वर्णीब्रह्मचारी गुरुः प्र० दैवविज्ज्योतिषी विप्रौद्वौब्राह्मणौ भिन्नंइष्टःमृगःप्र०अरोदनंशवंरोदनरहितंप्रेतम् सिद्धार्था
गौरसर्षपाः दुग्धादिदुग्धदध्याज्यम् ननुयद्यत्स्वांतनितांततोषकरणमित्यनेनदुग्धंग्रहणात्तात्सिद्धं पुनःकिमुक्तंदुग्धमिति सत्यं दुग्धंक्षणेनि-
षेधितम्तत्संदेहनिवृत्त्यर्थंदुग्धपठनमित्यदोषः एवमेवात्रविचारणीयम् तथाचवसंतः दध्याज्यदूर्वाक्षतपूर्णकुंभसिद्धान्नसिद्धार्थकचंदनानि
आदर्शशंखामिषमीनमद्यगोरोचनागोमयमुद्धृतंकोरिति भारद्वाजः राजाविप्रोवत्सहृद्वेश्यासपुत्रास्त्रीकुमारिका अभिरूपोनरोस्त्रीवागजो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाजीवृषः सितः रज्वाधृतान्यवर्णे गौः सवत्साच विशेषतः उद्धृतंगोमयंनीतंमृत्तिकाचोद्धृतातथा रजकोधौतवस्त्रश्चवेश्यातौर्यत्रिकध्वनिः जयमंगल
शब्दश्चशांतिपाठः सदीपकाः दीपोवाप्रज्वलद्वन्हिः पूर्णकुंभंनृपासनम् मद्यंमांसंचरुधिरं भक्ष्याणिविविधानिच इक्षवोमधुतांबूलंवस्त्रालंकरणानि
च रौप्यंताम्रमणिंस्वर्णद्रव्यंदर्पणमक्षताः वितानंचामरंछत्रंदूर्वादर्भतृणध्वजाः दोलाचारुरथोवृद्धः पुत्रपौत्रार्थयुक्शुचिः चंदनानिसुगंधीनितथापु
ष्पाणिरोचना घृतंदधिपयः पेयासिद्धमन्नंवचः शुभम् देवज्ञः सगुरुर्देवश्चित्तोत्साहकराणिच दृष्ट्वैतानिनरोयायात्सर्वार्थंलभतेतुसः इति १६ अ

दूर्वादर्भरथाः फलाश्ममादिरावर्णी गुरुर्देवविद्द्विजोमित्रमृगावरोदनशवंसिद्धार्थदुग्धादिच १६ कुर्वन्दक्षिणतः सदेतदितर
द्वामेप्रकुर्वन्व्रजेद्भस्मास्थ्यैधनविट्तुषाश्मलवणोपानत्तृणायस्कराः पिण्याकौषधकृष्णधान्यरुदनंतक्रंसधूमानलः
कार्पासारुणपुष्पचर्मचगुडस्तैलायसीकर्दमः १७

याश्शुभान्याह कुर्वन्निति एतत् अनंतरोक्तंसत्शुभंदक्षिणतः दक्षिणभागेकुर्वन्
सन्इतरत् अशुभंतस्ययाणंवामेकुर्वन्सन्व्रजेद्गच्छेत् भस्मेति भस्मप्र० अस्थिप्र० इंधनंप्र० विट्विष्ठा तुषंधान्यादीनांत्वक्फल्गु अश्मापाषाणः
लवणंसामुद्रिकंम् उपानहौप्रसिद्धे तृणंप्र० अयस्करोलोहकरः स्वर्णकारेत्यर्थः पिण्याकंमर्दिततिलाः औषधंप्र० कृष्णधान्यंमाषादि रुदनंरोदना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दितकंप्र॰ सधूमानलः धूमसहितोऽग्निः कार्पासः प्र॰ अरुणपुष्पं जपादि चर्मप्र॰ गुडः प्र॰ तैलंप्र॰ अयोलोहं कर्दमः पंकः १७ मत्तइति मत्तः उन्मत्तः वांतः वमितः बुभुक्षितः प्र॰ अंतकः प्राणिहिंसकः खलोदुर्जनः मुंडीमुंडितः जटीजटिलः व्याधितोरोगी खंजः पादेनखंजः व्यंगोंगहीनः दिगंबरोनग्नः यतिः सन्यासी अरीवैरी कषायीगैरिकरंजितवस्त्रः मुक्तालकोमुक्तकेशः चौरः प्र॰ अभ्यक्तः तैलाभ्यक्तः मलाविलोमलिनः पतितोजातिभ्रष्टः पाशीप्रा

मत्तोवांतबुभुक्षितांतकखलामुंडीजटीव्याधितः खंजव्यंगदिगंबरायतिररिः काषायिमुक्तालको चौराभ्यक्तमलाविलाश्च पतितः पाश्यर्गलीगुर्विणीवंध्याकृष्णावृषाहिभेकसरटागोधावराहः शशः १८ जाहोतूमहिषः खरोष्ट्रमहिषारूढश्चरिक्तो घटः छिक्काप्राणिशिरोंगकंपपदवीबंधाः कुवागाहवो

णिबंधार्थपाशवान् अर्गलीअर्गलावान् गुर्विणीसगर्भा वंध्यानिरपत्याकृष्णावृषः कृष्णोनड्वान् अहिः सर्पः भेकोमंडूकः सरठः प्रसिद्धः गोधाप्र॰ वराहः प्र॰ शशः प्रसिद्धः १८ जाहइति जाहः मंडलीलोकेसेहलेतिप्रसिद्धा जाहकोगात्रसंकोचीमंडलीचबुधैः स्मृतइतिहलायुधः ओतुर्मार्जारः महिषः प्र॰ खरोष्ट्रमहिषारूढाः प्रसिद्धाः रिक्तोघटः प्रसिद्धः छिक्काक्षुतम् प्राणिशिरोंगकंपः प्राणिनांगोऽश्वादीनांप्राणिनांशिरोज्झाघटनम् अंगझाटनंवा पदवीबंधोमार्गबंधः ऊर्णनाभादिभिर्मार्गोबध्यते कुवाक्कुत्सितवाक्यश्रवणम् आ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हवः संग्रामो बिडालमहिषादीनाम् पातः पतनम् वस्त्रादीनां स्खलनम् यानमश्वादि तस्य पलायनम् श्वकलहः श्वनां कलहः षंढं नपुंसकम् गोक्षतं प्र
सिद्धं ज्वलद्वेश्म ज्वलद्गृहदर्शनम् इत्येते ऽपशकुनाः प्रतिबंधकाः कार्यप्रतिबंधकाः स्युः छिक्कादिका अपशकुना मृत्युदाः स्युः तथोक्तमागमांतरे
तृणं तैलारिकार्पासभस्मचर्मतुषौषधम् सामुद्रं गुडपंकाहि मत्तं वांतं बुभुक्षितमित्यादि १९ अथ शकुनांतरमाह भृंगो भ्रमरः अलिवृश्चिकः उ

पातो यानपलायनं श्वकलहः षंढः क्षतं गोर्ज्वलद्वेश्मेति प्रतिबंधकाः कुशकुनाश्छिक्कादिका मृत्युदाः १९ भृंगाल्युधूपट
छुकाश्च नखिनः स्त्रीसंज्ञका वामतः काली कुक्कुटपुंप्रथाश्च सुरभिर्दक्षे मनोभीष्टदाः भारद्वाजशिखंडिचाषनकु
लाहंसोज एते दृशं याता इष्टफलाः स्यु रासभरवो वामे ऽपि पृष्ठे ऽर्थदः २० घू: प्र॰ पटछुकाः शब्दं कुर्वाणो राजशकाः नखिनः श्वाना
दयः स्त्रीसंज्ञकाः चंटकाद्यः एते वामतः मनोभीष्टदाः स्युः काली महिषी कुक्कुटः प्र॰ पुंप्रथाः पुरुषसंज्ञकाः काकादयः सुरभिर्गौः एते दक्षे मनोभी
ष्टदाः स्युः भारद्वाजः शिखंडी मयूरः चाषः प्र॰ नकुलो बभ्रुः हंसः प्र॰ अजो बस्तः एते भारद्वाजादयः दृशं याताः संतः इष्टफलाः स्युः अयमर्थः भार
द्वाजादयो वामे वा दक्षिणे वाग्रे वा दृष्टमात्रा इष्टफलाः अभीष्टफलदा भवंतीत्यर्थः रासभरवो गर्दभध्वनिर्वामे पृष्ठे ऽपि अर्थदः अभीष्टार्थदो भवति २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपयेषुयेषुकृत्येषुविपरीतशकुनाःशुभाश्चतानाह नद्युत्तारइति नद्युत्तारोनद्युत्तरणम् भयंनृपादीनाम् प्रवेशोग्रामादिप्रवेशः समरःसंग्रामः द्यूतं
प्रनष्टेक्षणंनष्टवस्तुनःअवलोकनम् व्याधौरोगोपचारे एषुविलोमशकुनाविपरीतशकुनाःशुभदाःस्युः अयमर्थः गमनेयेऽपशकुनास्तेनद्युत्ता
रादिषुशुभदाःस्युरित्यर्थः तथाइडायानाड्याभरेपूर्णतायांविलोमशकुनाःशुभदाःस्युः तथाचवसन्तः भवेदिडायांपरिपूरितायांसर्वोपिवामःश

नद्युत्तारभयप्रवेशसमरद्यूतेषुनष्टेक्षणेव्याधौस्युःशुभदाविलोमशकुनानाड्याइडायाभरे

कुनःप्रशस्तः स्यात्पिंगलायांपरिपूरितायांसर्वोपिसव्यःशकुनःप्रशस्तः संगेरणेकर्मणिचप्रवेशेशत्रुग्रहेनष्टविलोकनेच व्याधौसरिदुर्गवनादिके
पुप्रशस्तः प्रयाणाद्विपरीतभावइति अन्यच्च नद्युत्तारेभयेयुद्धप्रवेशेनष्टवीक्षणे शकुनाव्यस्तगाःशस्तानृपालोकेभयार्णवादिति अथप्रथमे
अपशकुनेजातेसतिकिंकर्तव्यमाह आद्येति आद्येप्रथमेदुःशकुनेजातेसतिनिवृत्त्यनिवर्तनंकृत्वातत्रशुचौदेशेउपविश्यशुद्धैःप्रक्षालितपाणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादः आचांतः कृताचमनः असवः प्राणास्तेषांआयमः प्राणायामः अष्टधाअष्टवारंकृत्वा इयातगच्छेत् चेद्यदिपुनःदुःशकुनः स्यात्तदानिवृत्त्यशु
चिराचांतोऽष्टवारंषोडशवारंअसून्नियम्येयात् अपरे तृतीयेदुःशकुनेजातेसति स्ववर्णंदत्वाइयात् एतदावश्यकगमनविषयम् प्राणायामा
नधिकारीतावत्कालंस्थित्वाव्रजेत् तथाचज्योतिर्निबंधे विरुद्धेशकुनेपूर्वप्राणायामाष्टकंचरेत् द्वितीयेद्विगुणान्कृत्वा तृतीयेनव्रजेत्क्व-

आद्येदुःशकुनेनिवृत्त्यचशफचिभूत्वाष्टधास्त्वायमंकृत्वेयाद्परेऽष्टवारमपरेदत्वास्ववर्णंव्रजेत् २१
इतिश्रीमदनंतात्मजचातुर्मास्ययाजिनारायणविरचिते मुहूर्तमार्तंडे यात्राप्रकरणंसमाप्तम्

चित्इति तथाचवसंतराजः जातेविरुद्धेशकुनेध्वनीनोव्यावृत्त्यकृत्वाकरपादशौचम् आचम्यचक्षीरतरोरधस्तात्तिष्ठन्सपश्ये
च्छकुनांतराणीति तथाचआर्ष्टिषेणिः यदापशकुनंपश्येद्विपरीतमुपस्थितम् सघृतंकांचनंदत्वानिर्विशं
कः स्वस्त्वंव्रजेदिति २१ इतिमुहूर्तमार्तंडटीकायांयात्राप्रकरणंसमाप्तम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथमिश्रप्रकरणंविवक्षुरादौराजाभिषेकंवृत्तार्धेनाह जन्मेति जन्मांगर्क्षदशेशादिभिर्बलिष्ठैः तथामृद्वादिभैः स्थिरर्क्षैर्नृतनोव्यारान्हिभूपस्थितिःशस्तास्यादित्यध्याहारः अंगंचऋक्षंच अंगर्क्षे जन्मनिअंगर्क्षेजन्मांगर्क्षे जन्मलग्नजन्मराशी तेचदशाचजन्मांगर्क्षदशाः दशावर्तमानातस्या ईशाः तेचसद्ग्रहाश्चकुजश्चसूर्यश्चतेच तैः सार्कैःअर्कोरविःतेनसहबलिष्ठैःस्थानादिबलसमृद्धैःसद्भिः तथा मृदुक्षिप्रेंद्रध्रुवभैःस्पष्टं स्थिरर्क्षैर्नृतनो ऋक्षैर्गतानृतनुः ऋक्षैर्नृतनुःस्थिराचासोऋक्षैर्नृतनुश्चस्यातथातस्याम् जन्मराशिजन्मलग्नाभ्यांस्थिरोपचयनृलग्ने व्यारान्हिभौमरहितदिने

जन्मांगर्क्षदशेशसद्ग्रहकुजैःसार्कैर्बलिष्ठैर्मृदुक्षिप्रेंद्रध्रुवभैःस्थिरर्क्षैर्नृतनोव्यारान्हिभूपस्थितिः स्वस्वर्क्षैःसमृदुध्रुवर्क्षचरभक्षिप्रैःसुरस्थापनंमोचुर्माघयुगेचराधयुगलेव्यारान्हिपूर्वाण्हके १

भूपस्थितिः राजप्रतिशशस्तास्यादित्यर्थः लग्नबलं भाग्वत् माघश्चंद्रसजेत्याद्यवलोकनीयम् अथदेवस्थापनमुत्तरार्धेनाह स्वस्वर्क्षैरिति स्वस्वर्क्षैः यस्यदेवस्यप्रतिष्ठाक्रियतेतस्यनक्षत्रैः स मृदुध्रुवर्क्षचरभक्षिप्रैः शेषंस्पष्टं माघयुगे माघफाल्गुनयोः तथाराधयुगले राधोवैशाखः तस्माद्युगुलंतस्मिन् वैशाखज्येष्ठयोरित्यर्थः तथा व्यारान्हि विगतःआरोयस्मात् एवंविधंअहः तस्मिन् भौमरहितदिनइत्यर्थः पूर्वाण्हके अत्रदिनस्यद्वौभागौपूर्वभागःपूर्वाण्हः तस्मिन् आचार्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मरस्थापनंप्रोचुः शेषंस्पष्टं सर्वामरस्थापनमितिशेषः लग्नबलंप्राग्वत् १ अथवस्त्रपरिधानंतस्यक्षालनंउंदुरादिभक्षितफलंचाह धार्यमिति व
स्वर्धनिष्ठा अदितिःपुनर्वसुःइनपंचहस्तपंचकम् गुरुभंपुष्यः अश्वि अश्विनी अंत्यंरेवती ध्रुवाणिपूर्वोक्तानि एतैर्नक्षत्रैः ज्ञत्रयेगुरुबुधशुक्रवारे
अंबरंवस्त्रंधार्यं नान्यत्र यतउक्तं रवौजीर्णंविधौस्तोकंजलार्द्रंदुःखदंकुजे बुधेधनंगुरौज्ञानंशुक्रेसौख्यंशनौमलमिति लग्नबलंप्राग्वत् अथक्षाल
नमाह इहास्मिन्वस्त्रधारणोक्तनक्षत्रादौ क्षाल्यंप्रक्षालनीयम् कथंभूतेज्ञोनेबुधवाररहिते उक्तंच वस्त्रहेमाद्यलंकारधारणोक्तैस्त्वभादिभिः त

धार्यंवस्वदितीनपंचगुरुभाश्व्यंत्यध्रुवैर्ज्ञत्रये ज्ञोनेक्षाल्यमिहाखुभक्षितमसन्मध्यत्रिभागेंबरम्

त्संहितिस्त्रार्गर्माणंविदध्यात्क्षालनादिकमिति यद्यपि यस्यांगंयदुदोगिनोगदितंभेकुर्यात्तिदिष्टपूर्वमेवअंगभूतंकर्मोक्तम् तथापिक्षालनेबुधवर्ज
नार्थंज्ञोनेइहक्षाल्यमित्युक्तंबुधनिषेधश्रवणात् उक्तंच शनौसोमसुतेश्राद्धेषष्ठ्याममावास्ययोस्तथा वस्त्राणांक्षालनंचैवदहत्यासप्तमंकुलमि
ति अथोंदुरादिभक्षितफलमाह आखुभक्षितमिति आखुःउंदुरः तेनअंबरंमध्यत्रिभागेभक्षितंअसत् दुष्टफलंस्यात् एतदुक्तंभवति वस्त्रंत्रिगु
णंकृत्वायदिभक्षितभागोमध्यत्रिभागेपततितदातद्दुष्टमित्यर्थः आखुरित्युपलक्षणम् तेनाग्निदग्धंगवादिभक्षितंमष्याद्यालिप्तंज्ञेयम् तथाचोक्तं ९८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृत्तशते दग्धंवास्फुटितंचगोमयमषीपंकैर्विलिप्तंतदा दग्धंमूषकपूर्वकैरग्रभ्रदंमध्यत्रिभागेंशुकमिति अथस्त्रियारक्तवस्त्रधारणंभूषणधारणंअनुक्तग्रहाणांकुत्रकुत्रप्राशस्त्यंतदुत्तरार्द्धेनाह स्त्रीति स्त्रीअत्रउक्तेवस्त्रधारणमादौअंबरंभूषणंस्वर्णादिभूषणंबिभृयात्धारयेत् कथंभूतेष्वादित्यपुष्यध्रुवेविगतानिआदित्यपुष्यध्रुवाणियस्मात्तत्तथातस्मिन् यतोत्रस्त्रियारक्तवस्त्रभूषणधारणेदोषोदृश्यते तथाचोक्तम् पुष्या

स्त्रीरक्तांबरभूषणेऽत्रबिभृयाद्व्यादित्यपुष्यध्रुवे श्वेतेब्जोरुणरुक्मयोःकुजरवीकृष्णाशनिःशस्यते २

दित्यध्रुवेर्धिष्ण्येयः स्वर्णरक्तांबरादिकम् नवंनभूषणंधार्यंनार्यादयितुरायुषेइति लग्नकंप्राग्वत् अथचंद्रादीनांप्राशस्त्यमाह श्वेतेवस्त्रनिरोप्यमुक्ताफलादिकेअब्जश्चंद्रोहितः सोमवारेश्वेतवस्त्रधार्यमित्यर्थः कुजरवीअरुणरुक्मयोः शस्येते शनिःकृष्णेवस्त्रनिनीलवस्त्रादिकेशस्तःशनौतद्धार्यमितिभावः ज्ञत्रयेतुसर्वंधार्यमितिपुरैवोक्तम् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.मा अथनराणांभूषणधारणंवृत्तचरणेनाह वस्त्रोक्तेरि वस्त्रोक्तेर्भादिभिर्वस्त्रादीतीयत्रोक्ते अंगेअंगेस्थिरलग्ने नुःनरस्यअलंकृतिरलंकरणंधृतंस्या टी.

९९ त् किंलक्षणेवस्त्रोक्तेः व्यनिलद्वयाश्विभिःअनिलद्वयंस्वातीयुगंस्वातीविशाखेति अश्विनीप्रसिद्धा विगतेअनिलद्वयाश्विन्योयेभ्यस्तानितथा
तस्मिन् स्वातीविशाखाश्विनीरहितैरित्यर्थः लग्नबलंप्राग्वत् अथद्वितीयचरणेनविशेषमाह विप्राज्ञेति विप्राज्ञान्ब्राह्मणाज्ञा उत्सवो विवाहादिकः
तथोर्लाभः आसक्तस्य अनुक्तेपिभादौधारणंवस्त्रादिधारणमिष्टकृत्स्यात् तथाचोक्तंव्यासेन लब्धंराजप्रसादेनविप्रादेशात्करग्रहे प्रीत्यादत्तो

वस्त्रोक्तेर्व्यनिलद्वयाश्विभिरगेंगेनुर्विभूषाहिताविप्राज्ञोत्सवलब्धिषूदितमनुक्तेपीष्टकृद्धारणम् मैत्रार्कानिलमूलदस्रहरि
भेंद्वेज्याजपादोत्तरे पण्यानांक्रयविक्रयौघटपरध्यंगेस्वशुद्धौतनु २

सर्वेवस्त्रंधार्यंनिंद्योपिभादिकं इति अथोत्तरार्धेनपण्यानांक्रयवि-
क्रयावाह मैत्रेति मैत्रमनुराधा शेषंसुगमम् घटपरध्यंगे घटः कुंभः तस्मात्परमन्यतमंतच्चतत्क्रूरस्यंगंचक्रूरध्यंगंउपचयलग्नंतस्मिन्कुंभव्यतिरि-
क्तोपचयलग्नेपण्यानांपूगफलखर्जुरादीनांक्रयविक्रयौतनुविस्तारयकुर्वित्यर्थः कस्यांसत्यां स्वशुद्धौसत्यांस्वंधनभावः तस्यशुद्धिःपापराहि- ९९
त्यंतस्यांसत्याम् शेषंप्राग्वत् तथाचोक्तम् दशमैकादशेलग्नेवित्तेकेंद्रत्रिकोणगैः शुभैःपण्यस्यकर्मोक्तंवर्जयित्वाघटोदयमिति २ अथवृत्ता

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्द्धेनधनिष्ठापंचकेवर्ज्यमाह प्रेतेति कुंभद्वयस्थेविधौसतिकुंभमीनगेचंद्रेसतिपरिहरेत्सर्वथानाचरेत् स्पष्टम् अथोत्तरार्द्धेचरणेनसेवामाह सेवेति ध्रुवादिभिर्नक्षत्रैः सेवाइष्टास्यात् सुगमं कस्मिन्सति स्वायेरवौसतिवाइत्यथवाकुजेसति रवंदशमं आयएकादशं अनयोरन्यतमेरविभौमयोरन्यतमेसतीत्यर्थः यस्मिंल्लग्नेसेवाक्रियतेतस्माल्लग्नाद्दशमेएकादशेवारवौभौमेवासतिसेवाइष्टाहितकरास्यादित्यर्थः शेषंप्राग्वत् अथचतुर्थचरणेनसंन्यासमाह संन्यासइति स्थिरनक्षत्रेस्थिरलग्नेचसंन्यासःइष्टःस्यात् कैःखलैर्गतबलैःपापग्रहैर्हीनबलैरित्यर्थः सप्तम्यर्थेतृतीया कस्मिन्सति भार्गे

प्रेतज्वालनशय्यकावितननेस्तंभोच्छ्रयंयाम्यदिग्यानंकाष्ठतृणोच्चयंपरिहरेत्कुंभद्वयस्थेविधौ सेवेष्टाध्रुववारुणांत्यवसुभैः खायेरवौवाकुजेसंन्यासःस्थिरभेखलैर्गतबलैःषष्ठांत्यगेभार्गवे ४ वेशक्रेषष्ठांत्यगे६ १२ सतिशेषंलग्नबलंप्राग्वत् उक्तंच त्रिषडेकादशे सौरिर्व्ययेषष्ठेऽत्रभार्गवः सबलेधर्मपेजीवेकेंद्रेदीक्षाविरक्तिकृदिति ४ अथवृत्तद्वयेनकृषिकर्माह उद्वाहेति उद्वाहर्क्षाणिपूर्वोक्तानिमूलांत्यार्कत्वादीनिएकादशसंख्याकानि चराणिप्रसिद्धानि द्विपंविशाखा इंद्रोज्येष्ठा लघुभानिप्र० त्वाष्ट्रंचित्रातैःव्यार्किज्ञारखगान्हि आर्किःशनिःज्ञोबुधःआरोभौमःविगताआर्किज्ञारायेभ्यस्तेतथा तेचतेखगाश्चतेषांअहःदिनंतस्मिन् शनिबुधभौमरहितवारेइत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युग्मझषगोकन्याविलग्नेयुग्मंमिथुनम् झषोमीनः गौर्वृषः कन्याप्रसिद्धा एषामन्यतमविलग्ने तिथौव्यंकोजे विगतः अंकः नवमीयस्मात् असौ व्यं १
कः सचासौ ओजश्च ओजोविषमस्तस्मिन् नवमीव्यतिरिक्तविषमतिथौवित्यर्थः किंलक्षणेव्यंकोजेतिथौ सदिशिदिक्दशमीतयासहवर्तमाने
१ ३ ५ ७ ११ १३ १५ १० कृषिः शुभास्यात् तथाचोक्तम् चंद्रेसुगोशुभतिथौशुभवारयोगेवारेगुरोशशिजशुक्रेगभस्तिवारे लग्नेवृषेमिथुनके
झषकन्यकायांशस्तंकृषिप्रकरणंपेन्निधानेइति अन्यच्च दशम्येकादशीचैवतृतीयाचत्रयोदशी सप्तमीपंचमीचैवप्रतिपच्चसुखावहा हंस्यष्ट

उह्याहर्क्षेत्वरहितेंद्रलघुभलाष्ट्रैः शुभास्यात्कृषिर्व्यार्किज्ञाररवगान्हियुग्मझषगोकन्याविलग्नेतिथौ व्यंकोजेसदिशिप्रण
म्यखगभूसुरव्यान्सिताछादनः स्वर्णाद्युष्टहलंसमुक्ष्कस्कवृषैः सोमीपटुस्त्रिर्नयेत् ५ मीवलीवर्दान्नवमीसस्यघातिनी चतुर्थीकी

जटनलीपतिंहंतीचतुर्दशी रवौबृहस्पतौचंद्रेशुक्रेकुर्याद्विशेषतः बुधार्किभूमिपुत्राश्चनभवंतिफलप्रदाइति अथविधिमाह सिताछादनः श्वेतवस्त्र
धरः पटुः कुशलः कर्ताखगभूसुरव्यान् देवान्प्रणम्य कृष्यारंभः पूर्वोक्तः सीतायज्ञः क्रियते तत्रपूजितान्खगभूसुरव्यान् ग्रहभूस्पृश्यादीन् प्रद ९०
क्षिणापूर्वकंप्रणम्य मनोवाक्कायकर्मभिर्नमस्कृत्वा स्वर्णाद्युष्टहलंस्वर्णघर्षिताग्रंहलंसमुक्ष्कस्कवृषैः मुष्काद्युपलक्षितैः सहवर्तमानाः समुष्का

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शोभनाः वृषाः स्रष्टषाः गुणावयवपूर्णाः निरोगाः शमुष्काश्चतेस्त्रवृषाश्च तथातैः कृत्वा सीमीउत्तरांदिशंप्रतित्रिवारंनयेत् हलेनपद्धतीः कुर्यादितिभा
वः उत्तरदिशंप्रतित्रिवारनयनेनपंचरेखाउत्पद्यंते तद्यथा प्रथमगमनेनैका आवर्तनेद्वितीया पुनरुत्तरांप्रतिद्वितीयगमनेनतृतीयापुनरावर्तनेचतु
र्थीपुनरुत्तरांप्रतितृतीयगमनेनपंचमीरेखाउत्पद्यते अधिकानकार्याइतिभावः सीमीप टुक्निर्नर्योदित्यत्रपट्टपद ग्रहणंअखंडऋजुरेखाकरणार्थम्
तथाचोक्तम् शस्ताःस्त्रचंद्रताराःस्त्रफणिःशक्लेनवाराःसा स्नात्वागंधैश्चपुष्पैश्चपूजयित्वाविशेषतः पृथिवींग्रहसंयुक्तांपूजयित्वाप्रजापतिम् अग्निं
प्रदक्षिणीकृत्यदातव्याचैवदक्षिणा कृष्णौवृषौनियोक्तव्यौजीवनश्चयुतेनवा विबलंछिन्नलांगूलंकपिलंवृषभंत्यजेत् हलप्रवाहनंकार्यंसिक्तम्भिर्दृष्टे
पकर्षकैः हलादिभिर्दृढैः क्षेमंकुदृढैरशुभंभवेत् वृषभायदियुध्येयुस्तस्यविघ्नंसदाभवेत् हेमघृष्टहलाग्रेणछिन्नरेखांनकारयेत् उत्तराभिमुखोभू-
त्वाक्षीरेणार्घ्यंप्रदापयेत् तस्यसर्वप्रकारेणनिर्विघ्नंकारयेत्तदा एकाजयकरीरेखातृतीयाचार्थवृद्धिदा पंचमीचभवेद्रेखाबहुसस्यफलप्रदा अतऊर्ध्वंनकर्तं
व्यामहादोषस्ततोभवेत् स्मर्तव्यावसवः शक्रः पृथुनामास्तचंद्रमाः पराशरोहलीचैवसर्वविघ्नोपशांतयेइति अत्रदुर्निमित्तानितत्रैवोक्तानि हलप्रवाह्यमा
णेतुकूर्मउत्पद्यतेयदि गृहिणोमृतयेतस्यततोप्रेश्चभयंभवेत् ईषाभंगोयदाकश्चुः संशयोजीवितस्यच स्तनाशोयुगेभग्नेसमानेम्रियतेशिशुः योक्त्रछे
देतुव्यासंगः सस्यहानिश्चजायते हलेप्रवाह्यमाणेतुगौरेकःप्रपतेद्यदि प्रपतेधुक्तमात्रस्तबंधनंचभयच्छति ज्वरातिसाररोगेणकृषिभंगंविनिर्दिशेत् प्रव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेशुक्रमात्रस्थततोगोः स्त्रमतेयदि हलेनयुक्तमात्रस्थतदासस्यंचतुर्गुणमिति ५ अथकृषिविषयेलांगलचक्रमाह त्रिस्त्रीति अर्कभुक्तात्सूर्यभुक्तनक्ष
त्रात्सकाशात् त्रिज्यादिषुस्थानाष्टस्थितेषुनक्षत्रेषु असत्सदित्येतत्फलद्वयंभूयः वारंवारंस्यात् एतदुक्तंभवति सूर्याक्रांतनक्षत्रस्य आदिमान्नक्षत्रात्सकाशा
त्त्रिषुअसत्तदुष्टफलंस्यात् तदनंतरंत्रिषुसत्शुभंस्यात् ततस्त्रिषु असत् ततः इषुषुपंचसुसत् ततोः नलेषु त्रिषु असत् ततः अर्थेषुपंचसुसत् ततोरा
मेषुत्रिषुअसत् ततोहुतभुक्षु त्रिषुसत्स्यादित्यर्थः अथबीजोप्तिमाह कृषिभैरिति कृषिभैः कृषिनक्षत्रैः उग्रध्रुवचरक्षिप्रेत्यादिभिर्बीजवापः शुभः प्रोक्तः

त्रित्रित्रीष्वनलार्थरामहुतभुक्षुभेष्वर्कभुक्तादसत्सद्भूयः कृषिभैर्विवारुणहरींद्रैर्बीजवापः शुभः

किंलक्षणैः कृषिभैः विवारुणहरींद्रैः वारुणंशततारका हरिः श्रवणः इंद्रोज्येष्ठा विगताः वारुणहरींद्रायेभ्यस्तानि तथा तैः शततारकाश्रवणज्येष्ठारहितै
रित्यर्थः कृषिभैरित्युपलक्षणम् तस्मात्कृष्युक्तंसर्वंतिथिवारादिकंज्ञेयम् तथाचोक्तम् मूषकानांभयंभौमेमंदेशलभकीटयोः नवमेचतिथौरि
क्ते हीनेसोमेविशेषतः वृषलग्नेथवामीनेकन्यायांमिथुनेथवा वापयेत्सर्वसस्यानियदीच्छेत्सस्यसंपदइत्यादि लग्नबलंप्राग्वत् अथबीजवाप
विषयेकूर्मदंफणिचक्रमाह सूर्यर्क्षादिति सूर्ययुक्तनक्षत्रादितृतीयम् तस्मादतिधृतिरेकोनविंशंतस्मात् अष्टाष्टभिः तृतीयादष्टभिः एकोनविं ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शादष्टभिर्नक्षत्रै र्बीजवापः सत्फलः अथद्वितीयभेदमाह अन्यैरिति अन्यैराचार्यैः फणिसप्तमात् राहुसप्तमात्सकाशात्रविमितैर्द्वादशभिर्नक्षत्रैः बीज
वापः शुभः प्रोक्तः एतदुक्तंभवति राहुर्यस्मिन्नक्षत्रे भवतितस्माद्यत्सप्तमंनक्षत्रंतत्फणिसप्तममुच्यते तस्मात्सकाशात्द्वादशभिरित्यर्थः राहोस्तु
फणीतिनामग्रंथांतरेप्रसिद्धम् वराहमिहिराचार्येणराहुस्वरूपविकल्पाः ग्रंथांतरोक्ताउद्घटिताः स्वकृतसंहितायां अमृतास्वादविशेषाच्छिन्नमपिशिरः कि-
लासुरस्येदम् प्राणैरपरित्यक्तंग्रहतांयातंवदंत्येके इंद्वर्कमंडलाकृतिरसितत्वात्किलनदृश्यतेगगने अन्यत्रपर्वकालाद्वरप्रदानात्कमलयोनेःभु

सूर्यर्क्षादितृतीयतोऽतिधृतितश्चाष्टाष्टभैः सत्फलः प्रोक्तोन्यैः फणिसप्तमाद्रविमितैस्तत्छेदनंवापभैः ६

रवपुच्छविभक्तांगंभुजंगमाकारमुपदिशंत्यन्येइति भुजंगमाकारकथनात्फणीत्यभिधानंप्रसिद्धम् रत्नमालायामपि फणिभाद्बीजोभिकालेस्फुटमिति तथा
चागमांतरे राहुभादष्टमंयावद्बीजांप्तिःपरिवर्जयेदिति अथधान्यछेदनमाह तछेदनंवापभैरिति तेषांधान्यानांछेदनंतछेदनम् वापभैर्बीजवाप
ननक्षत्रैः प्रोक्तम् ननुयस्यांगंयद्रोगिनोगदितभैकुर्यादितिपुरैवोक्तम् तत्कथंपुनरुक्तंतछेदनंवापभैरिति सत्यं कृपिनक्षत्राणांबीजवाप
ननक्षत्राणांचकिंचित्भेदोस्ति द्वयोः कृष्यंगत्वात्कैः कार्यमितिसंदेहनिवारणार्थंतछेदनंवापभैरित्युक्तम् ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथनिष्पन्नेधान्येक्रमप्राप्तंमेथिरोपणंवृत्तचरणेनाह मेथीमिति क्षीरतरोर्वटवृक्षादेर्मेथींउद्वाह भैर्विवाहनक्षत्रैर्मूलांत्यार्केन्यादिभिःशरोपयेत्तन्निखले
त् मेथिर्नामखले धान्यमर्दनार्थंवृषपंक्तियोजनार्थंकाष्ठमारोप्यते मेथ्यंतेसंगम्यंतेवृषभा अस्मिन्नितिमेथिः पुंसिमेथिः खलेदारुन्यस्तंयत्पशुबंधनइत्य
मरः किंलक्षणेरुद्वाहभैःउफानुरहितैःउफाउत्तराफाल्गुनी अनुःअनुराधाताभ्यांरहितैः उक्तंच रेवतीरोहिणीमूलंस्वातीहस्तोमृगस्तथा
आषाढोत्तरहस्तश्चतथाभाद्रपदामता बंधनेसर्वबीजानांतथाशालाप्रवेशने दुःखदावनदाचैवानुराधोत्तरफाल्गुनी वटश्चसप्तपर्णश्चगंभारीशा-

मेथींक्षीरतरोरुफानुरहितैरुद्वाहभैरोपयेदन्नप्राशनवद्वसंतशरदोः प्रोक्तंनवान्नंबुधैः

ल्मलीतथा औंदुबरी
तयाधात्रीयाचान्याक्षीरवाहिनी स्त्रीनाम्नीवर्षकेनित्यंमेथीकार्याफलप्रदेति अथनवधान्यप्रसंगेननवान्नकर्मद्वितीयचरणेनाह अन्नप्राशन
भैरिति वसंतशरदोःऋत्वोः अन्नप्राशनभैर्नवान्नंनवान्नकर्मबुधैःप्रोक्तम् अन्नप्राशनभैरित्युपलक्षणम् तस्मादन्नप्राशनोक्ततिथिवारा
दिकमत्रग्राह्यम् साग्निकस्यनवान्नकर्मणाविनाव्रीह्यादीनांनवनवमितानांधान्यानांभक्षणेदोषप्रसंगादावश्यकंकर्मैतत् नवधान्यानीमानि व्री
हयोयवगोधूमानीवाराःकंगुवेणकाः शालयोमुद्गमाषाश्चनवधान्यानिचक्रमात् एषांमध्येशरत्संभवानिधान्यानिव्रीह्याग्रयणेनविनानभक्षणी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यानि वसंतसंभवानियवाग्रयणेनविनानभक्षणीयानीतिनियमादिकर्मघारद्वसंतग्रोः क्रियतइतितत् अन्नप्राशनोदितैस्तिथिभादिभिः मासेषष्ठेष्ट मेवेत्यत्रोक्तैर्नवान्नंकर्तव्यमित्यर्थः अथोत्तरार्द्धेनमृत्यसंगीतयोरारंभमाह मैत्रार्कास्येतिमैत्रमनुराधा अर्कोहस्तः अंत्यंरेवती वसवोधनिष्ठा उत्तरा- स्तिस्रः इज्यः पुष्यः वरुणः शततारका इंद्रोज्येष्ठा तैर्नर्तनमारभेत् संगीतकंच आरभेतकस्मिन्सति लग्नेवर्तमानेज्ञेगुरौ वीक्षितेसतिकैः हिबुकगैः सौ-

मैत्रार्कान्त्यवसूत्तरेज्यवरुणैः सेंद्रैः शुभंनर्तनंलग्नेज्ञेगुरुवीक्षितेहिबुकगैः सौम्यैश्चसंगीतकम् ७ द्वीशार्केंद्वदितीज्यवास वशिवाश्व्यंत्याग्निपाशीद्रभैः पूर्वाभिःशुभदाविसिंहभतनौनानापशूनांक्रिया

म्यैः चतुर्थस्थानस्थितैः सौम्यग्रहैः शेषंप्राग्वत् ७ अथना नापशूनांकर्मवृत्तेनैकेनाह द्वीशेति द्वीशांविशाखाअर्कोहस्तः इंदुर्मृगः अदितिः पुनर्वसुः इज्यः पुष्यः वासवोधनिष्ठाशिवः आर्द्रा अश्विनीप्रसिद्धाअं त्यंरेवती अग्निः कृत्तिका पाशीशततारका इंद्रोज्येष्ठातैः पूर्वाभिस्तिसृभिः विसिंहभतनौविगतः सिंहोयेभ्यस्तानिविसिंहानितानिचतानिभानिविसिंहभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नि सिंहरहितराशयः तेषांतनुः लग्नंतस्मिन्नानापशूनांक्रियाश्शुभदाउदिता पशूनांक्रयविक्रयादिकर्मशुभदंप्रोक्तमित्यर्थः अथोत्तरार्धेनवर्ज्यमाह अर्कंचतुर्षुवारेषुरविचंद्रभौमबुधवारेषु कोत्तरहरित्वाष्ट्रेषु कः रोहिणी उत्तरास्तिस्रः आसांसमाहारः कोत्तरंहरिः श्रवणः त्वाष्ट्रंचित्राएषुअमारिक्तयोःअमा अमावास्या रिक्ताश्चतुर्थीनवमीचतुर्दशीनामन्यतमा तयोः अष्टमीप्रसिद्धा तस्यांनानापशूनांक्रियाहितानउदिता अपवादमाह स्वभगभेसतिभदोषो नक्षत्रदोषः क्वचितशुभकर्मणिनस्यात् लग्नबलंप्राग्वत उक्तंच द्यादित्यहिवसुद्यांत्यार्केंद्रहीशोः क्रियादिगोः दर्शभूताष्टमीचित्राध्रुवकर्णेगमाघसत्

वारेष्वर्कचतुर्षुकोत्तरहरित्वाष्ट्रेष्वमारिक्तयोरष्टम्यांनहितोदितास्वभगभेनस्याद्दोषःकिल ८

सोमार्कवैधृतेपातेलग्नेपंचाननेबुधे भद्रासंक्रांतिरिक्तासुपशुकर्मविवर्जयेत् शुभग्रहोदयेशुद्धेनैधनेस्वर्क्षयानिषु रक्षावृद्धिक्रियाशस्तापशूनांमु निभिःस्मृतेति तथाचागमांतरे सोमेभौमेबुधेगावोनचाल्यास्तुरगाःशनाविति अन्यच्च पूर्वात्रयामृतमयूरवहुताशनेषुशक्रा-
ग्निवाजिवसुवारुणशांकरेषु एतेषुगोमहिषिदंतितुरंगमादिनानाप्रकारपशुजातिगतिः प्रशस्तेति ८ ७ ६ ५ ७

CC-0. In Public Domain. Digitization by eGangotri

अथाश्वकर्मवृत्तेनैकेनाह द्व्यादित्येति द्व्यादित्यम् पुनर्वसूपुष्यौ द्विवसुः धनिष्ठाशतताराके स्थिराणिप्रसिद्धानि अश्विनीप्रसिद्धा मृदूनिप्रसिद्धा
नि स्वातीप्रसिद्धा अर्कोहस्तः तैः ज्ञत्रयार्कारान्हि ज्ञत्रयं बुधगुरुशुक्राः अर्कः सूर्यः आरोभौमः एषामह्नः दिनं तस्मिन ईज्यभृगूदये उदयेलग्ने ईज्यभृगो

द्व्यादित्यद्विवसुस्थिराश्विभमृदुस्वात्यर्कभैर्ज्ञत्रयार्कारान्हीज्यभृगूदयेद्विकमदेधिदोक्रियाश्वीहिता ॥ ॥

इतिईज्यभृगूदयम् तस्मिन्गुरुशुक्रयुतेलग्नेइत्यर्थः द्विकमदेषुइंदौ द्विद्वितीयंकंचतुर्थम् मदः सप्तमम् एषुचंद्रेसतीत्यर्थः अश्वीक्रियाक्रयविक्रयादि
कीहिताशुभकर्त्रीस्यात् अथाश्वचक्रमाह तत्रापीति तत्रापिद्व्यादित्यादिपुनक्षत्रेषुसत्स्वपि अर्कभतः सूर्यनक्षत्रात्सकाशात्क्रमात्तिथिमितैर्नक्षत्रैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्चादुक्तमतस्त्रिभिर्नक्षत्रैः साभिजित् यथातथा अश्विनीक्रियाशस्ताशोभनास्यात् एवंसामान्यतोऽश्वकर्मोक्त्वेदानींविशेषमाह येति याअश्विक्रिया
नृसमामनुष्यसदृश्यसाक्रियातदुक्तभसुखैः कार्या तस्मैमनुष्यायउक्तानिभसुखानिनक्षत्रादीनितैः कार्येत्यर्थः परायानृसमानभवतिसाएभिः सामान्ये
ह्यांदित्यादिभिर्बुधैः कार्येत्यर्थः लग्नबलंप्राग्वत् तथाचनारदः विविष्णुन्वरभेशिभेमृदुभेस्थिरभेषुच वाजिकर्माखिलंसूर्यवारेकार्यंविशेषतइत्या

तत्राप्यर्कभतः क्रमात्तिथिमितैः पश्चात्त्रिभिः साभिजिच्छस्तायानृसमातदुक्तभसुखैः कार्यापरैर्भिर्बुधैः १

दि तथाचोक्तम् धृतान्नचणकक्षीरतृणमुद्गादिभक्षणे अन्नप्राशनवद्रक्षःस्नानंसौम्यग्रहोदये चौलेकंस्कारकर्मादौभेषजेभेषजोदितम् ग
भांधानोक्तमश्वानांमैथुनेतुविलोकयेत् गृहारंभोदितेकालेहयशालाविधीयते शिक्षाविद्योक्तकालेचभूषणंभूषणोदिते चर्मकर्मादिकंकार्यंज ९४
ययोगेशुभोदये एवंखरोष्ट्रादिकंकार्यंपूर्वाण्हेवाहनादिकमिति १ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाभ्यंगनिषिद्धकालमाह भद्रेति भद्राप्रसिद्धा संक्रमः संक्रांतिः पातोव्यतीपातः वैधृतिःप्रसिद्ध सितः शुक्रवारः ईज्योगुरुवारः अर्कोरविवारः आरोभौम वासरः षष्ठ्यादयः सर्वातिथयः तास्तु १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२/१३ १४ १५ ३० श्राद्धाहः श्राद्धदिनम् प्रतिपद्द्वयंप्रतिपद्द्वितीये तस्मिन्हेतुंकारणंविनाअभ्यंजनंअभ्यंगंपरिहरेत् कारणेसतिअवश्यंचरेदित्यर्थसिद्धम् तथाचोक्तम् सप्तम्यांनस्पृशेत्तैलंनवम्यांप्रतिपत्तिथौ चतुर्दश्यामष्टम्यांषष्ठ्यांचैवविशेषतइति ग्रंथांतरे चतुर्दश्यष्टमीचैवपौर्णमास्यर्कसंक्रमः तैलस्नानंनकुर्वीतसुतबंधुधनक्षयादिति तथाचवृद्धमनुः

भद्रासंक्रमपातवैधृतिसितेज्यार्कारषष्ठ्यादिषुश्राद्धाहेप्रतिपद्द्वयेपरिहरेन्हेतुंविनाभ्यंजनम्

दर्शेस्नानंनकुर्वीतमातापित्रोस्तुजीवतोः नवम्यांचनचेत्तन्निमित्तांतरसंभवः प्रतिपद्धनपत्यःस्याद्द्वितीयायामपलिकः दशम्यामधनःस्नानेसर्वंहंतित्रयोदशीति रत्नमालायाम् रविस्तापंकांतिंवितरतिशशीर्भूमितनयोमृतिंलक्ष्मींचांद्रिःसुरपतिगुरुर्वित्तहरणम् विपत्तिंदैत्यानांगुरुरखिलभोगानुभवनंनृणांतैलाभ्यंगात्सपदिकुरुतेसूर्यतनयइति अथाभ्यंगहेतूनाह मांगल्यमिति मांगल्यंविवाहादिविजयोत्सवे आश्विनशुक्ल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एपुनिर्निषिद्धतिथ्यादावपि अभ्यंगः कर्तव्यः तथाचोक्तंव्यवहा ८।

शम्याक्रियते अब्दवदनंसंवत्सरप्रतिपत् दीपावलिः प्रसिद्धा एतेभ्यंगस्यहेतवः कारणानि

रसारे वत्सरादौवसंतादौसूतकांतेमहोत्सवे दीपोत्सवचतुर्दश्यामभ्यंगनियमोनचेति तथाचोक्तंस्कांदे विजयादशमीविषयम् निषिद्धमपिकर्तव्यं

तैलाभ्यंजनमादरादिति अथाभ्यंगनिषिद्धापवादमाह क्वथितादिति निंद्येन्हिक्वथितादितैलं अनसत्शुभंस्यात् आदिग्रहणात् सार्षपसुगंधपुष्प

मांगल्यंविजयोत्सवोब्दवदनंदीपावलिर्हेतवोभ्यंगस्यक्वथितादितैलमनसन्निंद्येन्हिनित्येखिलम् १०

वासितादितैलंगृह्यते एवंक्वथितादितैलंनिंद्यदिनेपिशुभमित्यर्थः उक्तंच सार्षपंगंधतैलंचयत्तैलंपुष्पवासितम् द्रव्यांतरयुतंवापिन दु

ष्यतिकदाचन सूर्यशुक्रारवारेपुनिषिद्धास्मार्तास्थिष्वपि कर्तव्यंयदिवास्नानेपक्वतैलंनदुष्यति रवौपुष्पंगुरौदूर्वाभौमवारेचमृत्तिका भार्गवेगो ५

मयंक्षिप्त्वातैलस्नानंसुखावहमिति अथनित्याभ्यंगेविशेषमाह. नित्येखिलमिति नित्येभ्यंगेअखिलंतैलंपक्वादिकंअनसत्शुभंस्यात् उ

क्तंच नित्यस्नानेचकर्तव्येतिथिदोषोनविद्यतइति १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथप्रसंगेनतिलामलकस्नानेनिषिद्धतिथीनाह दिग्विनि दिकदशामी। विश्वेत्रयोदशी अद्रिः सप्तमी हक्द्वितीया अंकोनवमी दर्शोअमावास्या एते
षुतिथिषुश्रीकामः धात्रीफलैः अमलकीफलैःस्नानंनाचरेत तथाचोक्तम् यःकरोतिदशम्यांचस्नानमामलकैः सह पुत्रहानिर्भवेत्तस्यत्रयोदश्यां ध
नक्षयः अर्थपुत्रक्षयस्तस्यद्वितीयायांनसंशयः अमायांचनवम्यांचसप्तम्यांचकुलक्षयइति अथस्त्रीणांबुधादिषुअभ्यंगनिषेधमाह
बुधोबुधवारः अंबुपर्क्षशततारा पितृभंमघा नेषु अभ्यंगस्तस्मात अंगनास्त्रीपतिघ्नीस्यात् उक्तंच स्नानंकुर्वीतयानार्यश्चंद्रेशतभिषग्गते

दिग्वि १० श्वा १३ द्रि ७ द्द २ गंक ९. दर्शतिथिपुस्नानंनधात्रीफलैः श्रीकामोथबुधांबुपर्क्षपितृभाभ्यंगाप

तिभ्यंगना सप्तजन्मभवेयुस्ताविधवादुर्भगाध्रुवमिति त्रिविक्रमशते स्नानंनार्कशुक्रेज्यविष्टिसंक्रांतिपर्वसु द्वाष्टषट्दिक्त्र
योदश्यांस्त्रियस्त्वनमघाबुधैः अथपुत्रवतःसोमवारेभ्यंगनिषेधमाह. पुत्रीति पुत्रवान्सोमवारदिनेनस्नायात् उक्तंच पुत्रवान्स्वगृहेनित्यंनस्ना
यादुत्तरामुखः सोमवारेतथाभ्यंगंवर्जयेत्सर्वथानुधइति अथप्रसंगेनप्रसूतिकास्नाननिषेधकालमाह मस्नूरिति यमोभरणी पितरोमघा त्वा
ष्ट्रंचित्रा इंद्रोज्येष्ठा मिश्रंकृत्तिकाविशाखे अंबुपः शतनारा क्रव्यादोमूलं ईश्वरभमार्द्रा एषांसमाहारस्तस्मिन् कुपुत्रहरिजेकुत्सितपुत्रः पुत्रभावो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्यतत्कुपुत्रंतच्चतद्धरिजंचतस्मिन् यस्माल्लग्नात्पंचमस्थः पापग्रहोभवतितस्मिन्नित्यर्थः निशास्थंरात्रिमुखंसायंकालस्तस्मिन् प्रसूतानस्नायात्
शेषंलग्नबलंप्राग्वत् उक्तंच मघामूलविशाखार्द्राचित्रादितियमद्वये ज्येष्ठासार्पजलेशर्क्षेनैवस्नायात्प्रसूतिका शुभग्रहयुतेलग्नेपंचमेपापवर्जिते प
रित्यज्यमहादोषान्सूतिकास्नानमाचरेत् ११ अथौषधनिष्पादनमाह मंदःशनिःआरोभौमः ताभ्यामन्ये रविचंद्रबुधगुरुशुक्रास्ते
षांदिनंतस्मिन् मृदुध्रुवचरक्षिप्रैर्नक्षत्रैः वलक्षेशुक्लपक्षेसुधायोगे अमृतयोगे ग्रंथांतरप्रसिद्धेस्मिन्निकेंद्रारिव्ययांगेशोभनानिपापग्रहर

पुत्रीसोमदिनेप्रसूर्यमपितृत्वाष्ट्रेंद्रमिश्रांबुपर्क्षव्यादेश्वभेकुपुत्रहरिजेस्नायान्निशास्येपिन ११
मंदारान्यदिनेमृदुध्रुवचरक्षिप्रैर्वलक्षेसुधायोगेभेषजमाचरेत्सुमृतिकेंद्रारिव्ययांगेभिषक् हितानिमृतिकेंद्रारि

व्ययानि यस्यतत्सुमृत्तिकेंद्रारिव्ययं तच्चतत्अंगंच तस्मिन्भिषक्वैद्यः भेषजमाचरेत् कुर्यात् शेषंलग्नबलंप्राग्वत् अथौषधदानमाह
तदिति तदौषधंइहानंतरोक्तेभादौदद्यात् कथंभूतेइहविध्रुवेंदुतनयप्रपद्योतने ध्रुवनक्षत्रबुधरविरहिते अथरक्त विव्रणयोर्विशेषमाह
असृक्स्रावोरक्तस्रावः व्रणःक्षतंअनयोः कर्मसूर्यकुजयोरन्हिदिवसेआचरेत् कयोः सतोः इह्वानयोः सूर्यकुजयं .कद्रस्थयोः सतोः तथा ९६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चोक्तम् मंदारवर्जितेवारेन्चरक्षिप्रमृदुध्रुवैः सूर्यसोम्यैः केंद्रगतैर्भेषजात्पादलंहितम् रक्तस्रावंकुजेकुर्यात्तद्धोरायामथापिवा कुजेकेंद्रेथवामंदेशोरवर्ष्विरव-
लेष्टमे व्रणक्रियाकुजेसूर्येकेंद्रगतेह्निनेष्टमे शुद्धेषष्ठेचसक्रूरेन्चरलग्नेयुवस्वरेइति १२ अथप्रसंगेनरोगमुक्तिदिवसानाहवृत्तार्द्धेन याम्यंभ-
रणी अहित्रयं आश्लेषात्रयम् वायुःस्वाती मूलंभ० जलपःशततारका उपांत्यउ०भा० इंद्रोज्येष्ठा हस्तःप्र० अनुभंपूर्वाषाढा अस्मिन्नक्षत्रगणेरु-
ग्णः रोगीशांत्याययोक्तशांतिकेनविरुक्ज्वरमुक्तोभवति अजद्वीपयोः श्रवणाविशाखयोः रुग्णः नृपैः षोडशभिर्दिनैः विरुक्स्यात अन्यत्र अ-

तद्द्याद्दिहविध्रुवेंदुतनयप्रद्योतनेरोगिणेसृक्स्रावव्रणकर्मसूर्यकुजयोरन्होहकेंद्रस्थयोः १२ याम्याहित्रयवायुमूलज
लपोपांत्यंद्रहस्तांबुभेशांत्याजह्निपयोर्नृपैर्नवदिनैरन्यत्ररुग्णोविरुक्

न्येषुनक्षत्रेषुरुग्णोनवदिनैर्विरुक्भवति एतज्ज्योतिषा-
कोभिप्रायंकिंचिद्बलकोशाभिप्रायमुक्तम् तत्रयेषुनक्षत्रेषुज्वरितस्यमृत्युरुक्तः येषुचकृच्छ्रेणबहुभिर्दिनैर्ज्वरमुक्तिरुक्ता तत्फलमत्रशांत्याविरुग्भि-
त्युक्तम् क्वचिदन्यथाफलदर्शनात् तथायेषुयेषुनक्षत्रेषुसप्तभिर्नवभिरेकादशभिर्दिनैर्ज्वरनिर्मोचनमुक्तम् तत्फलमत्रमध्यमत्वेननवदि-
नैर्विरुगित्युक्तम् ग्रंथलाघवायस्वल्पांतरत्वात् तथाचज्योतिषार्के सप्ताहमृतिनंदाद्रिरुद्रमृत्युनगाद्रिभिः कृच्छ्रमृत्युमृतीशेश्वहः च्छे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शव्यस्नानं नृपैरित्यादि अथोत्तरार्धेन रोगमुक्तिस्नानमाह आदित्येति आदित्यं पुनर्वसुः अहिराश्लेषा अनिलः स्वाती ध्रुवाणि पूर्वोक्तानि अं ८।
संरेवती पितृभं मघा अस्मिन्नक्षत्रगणे शुक्रेंदुवारे शुक्रसोमवारे गदयुक्तस्नानं रोगमुक्तस्नानं अनिष्टं स्यात् तर्हि कुत्र कर्तव्यमित्यत आह अशु
भे भादौ इष्टं शुभं स्यात् कस्मिन् सति खलास्तत्स्थिरे सति खलः पापग्रहः अस्ते यस्य तत्तथा तच्च तत्स्थिरं च तस्मिन् स्थिरलग्ने पापे सप्तमे सतीत्य
र्थः तथा चोक्तम् वैधृतौ व्यतिपाते च भद्रायां धिष्ण्यसंक्रमे रोगमुक्तो नरः स्नायात्कुवारर्क्षतिथिष्वपि द्यूनं पापयुतं शस्तं दशमं च शुभान्वितं सौ

आदित्याह्यनिलध्रुवांत्यपितृभे शुक्रेंदुवारे गदयुक्स्नानमनिष्टमिष्टमशुभे भादौ खलास्तत्स्थिरे १३ द्रव्यं सव्यवहारतो ल
घुचरे योज्यं चरांगे बुधे धर्माष्टात्मजगेऽथ तस्य हरणे हस्तो रविज्ञः कुजः

म्यक्रूरयुतं रंध्रं रोगस्नाने विशंततयेति चंद्रबलं सर्वत्र योज्यम् कु
तिथिभादौ सदित्यनेन चंद्रादिबलविषये मोहो मा भूदित्यतः चंद्रबलं सूचितम् यतः ग्रंथादौ गर्भाधाने सदा इत्युक्तम् तत्सर्वकर्मसु ज्ञेयमिति सर्वग्रंथकृ
रसंमतं तथा चोक्तं संहितायां स्पष्टं स्नायाद्रोगविमुक्तस्तु शुभयोश्चंद्रतारयोरिति १३ अथ व्यवहारद्रव्यं हस्तेनैकेनाह द्रव्यमिति द्रव्यं सुवर्णा ९७
दि संव्यवहारतः कुसीदव्यवहारेण लघुचरैर्नक्षत्रैर्योज्यं देयमित्यर्थः क्व चरांगे चरलग्ने कस्मिन् सति बुधे धर्माष्टात्मजगे सति धर्मो नवमम् अष्टमं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मजः पंचमं एषन्यतमस्थानगतेसतीत्यर्थः अन्यत्पूर्वोक्तंज्ञेयं अथानंतरंतस्यप्रयुक्तस्यहरणंपुनर्ग्रहणंतस्मिन्विषयेहस्तोनक्षत्रंरविःरविवारःज्ञो
बुधवारः कुजोभौमवारः संक्रांतिः सूर्यसंक्रमणदिनं भरणीप्रसिद्धा त्रिपुष्करोयोगः यमोयमलयोगःत्रिपुष्करयोगयमलयोगौग्रंथांतरेप्रसिद्धौ रत्न
मालायां विषमचरणंधिष्ण्यंभद्रातिथिर्यदिसंस्पृशेतक्रूरगुरुशनिक्ष्मापुत्राणांकथंचनवासरे मुनिभिरुदितःसोयंयोगस्त्रिपुष्करसंज्ञक इत्यादिकुं
भांत्ययोश्चंद्रमाः धनिष्ठापंचकम् वृद्धिर्वृद्धियोगोपिशस्तः हस्तादयात्रस्वकीयद्रव्यग्रहणेशस्ताः विदूनेबुधदिनंविनाइहहस्तादौयद्दणंकुर्यात्तत्स्थि

संक्रांतिर्भरणीत्रिपुष्करयमौ कुंभांत्ययोश्चंद्रमावृद्धिश्चेतिशस्ताविदूनइहयत्कुर्याद्दणंतत्स्थिरम् १४ तीक्ष्णोग्रध्रुवमिश्रवा
युषुधनंनष्टादिकंनैतिकाद्रव्यास्मेत्रिस्वशेपयोनगतमत्यस्यांबुशक्तौक्षिपेत् रंस्यात् तथाचोक्तम् चरैः क्षिप्रैश्वरेलग्नेबुधेधर्म

रंस्यात् तथाचोक्तम् चरैःक्षिप्रैश्वरेलग्नेबुधेधर्म
स्थिताष्टमे व्यवहारंविनाद्रव्यप्रयोगोमुनिभिःस्मृतः भरण्यांसंग्रहंकुर्यात्पंचकेज्ञेत्रिपुष्करे ऋणकर्मचरैःक्षिप्रैर्ऋणछेदः कुजेहितः पंचकेपंचगुणितं-
त्रिगुणंचत्रिपुष्करे यमलेद्विगुणंप्रोक्तंहानिवृद्ध्यादिकंबुधैः ऋणंभौमेनकुर्वीतनदेयंबुधवासरे ऋणछेदंकुजेकुर्यात्संचयंसोमनंदने हस्तार्कवा
रेसंक्रांतौयद्दणंस्यात्कुलेषुतत् वृद्धियोगेतयाज्ञेयमृणछेदंतुकारयेत् इति १४ अथतीक्ष्णादिषुनष्टादिद्रव्यस्यप्राप्तितयाद्रव्यनिक्षेपंवृत्तार्धेनाह ती-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्ष्येति तीक्ष्णोग्रध्रुवमिश्राणि पूर्वोक्तानि वायुःस्वाती एषुनष्टादिकंधनंनष्टप्रयुक्तविनिक्षिप्तादिकंस्वर्णादिकंद्रव्यंनैति तथाकात्रोहिणीनक्षत्रात्भेइष्टन
क्षत्रेब्ध्यामेच्चतुर्भक्तेसतित्रिखशेषयोःगतंनइति अथद्रव्यनिक्षेपमाह अंत्यांबुध्रुवद्रौक्षिपेत् धनमित्यनुषंगः अत्यंद्वादशं अंबुचतुर्थं अनयोःशुद्धिःपा
पराहित्यं तस्यांसत्यांक्षिपेत् निक्षिपेदित्यर्थः तथाचोक्तम् साधारणोग्रतीक्ष्णेषुस्वात्यांद्रव्यंनलभ्यते दत्तंप्रयुक्तंनिक्षिप्तंनष्टमित्याहनारदः अथनृसिं
हादिमंत्रविद्यासाधनमुहूर्ततथावृक्षारोपणमुहूर्तंउत्तरार्धेनाह विद्यामिति विद्यामंत्रविद्यांप्रोक्तवत्वेदविद्योक्तभादौ विद्यांभोज्युक्तभादौइत्याद्युक्तेः

विद्यांप्रोक्तवदिष्टदेवतिथिभेथद्वीशमूलध्रुवैर्मृद्वश्वीज्यकरांबुपैःसजलखाङ्गांगेतरून्रोपयेत् १५ तथास्वदेवतिथिभेस्वे
ष्टदेवतिथिनक्षत्रेसाधयेत् गुरुमुखात्गृण्हीयादित्यर्थः तत्रआगमोक्तमंत्रग्रहणेअनध्यायदोषोनास्ति तत्तुस्वदेवतिथिभइत्यनेनैवपदेनपरिस्फुटंतथाचो
क्तंमृदुध्रुवचरक्षिप्रैर्वारार्कौधर्मसत्क्रिया कार्याविद्योक्तभेदीक्षास्वदेवतिथिभेषुचेति अथवृक्षारोपणमाह द्वीशंविशाखामूलंप्रसिद्धं ध्रुवमृदूनिपूर्वोक्तानि
अश्विनीप्रसिद्धाईज्यःपुष्यःकरोहस्तःअंबुपःशततारा एभिर्नक्षत्रैस्तरून्पादपान्रोपयेत् कस्मिन्सजलखाङ्गांगे अंगेः जः अङ्गांगं अंगलग्नंतस्मि
न्जः जलचरराशिः चंद्रोवातदङ्गांगमुच्यते जलंचरवंचजलखेशोषनेजलखेयस्यतत् सजलखंतच्चतत् अङ्गांगंचसजलखाङ्गांगं तस्मिन्

CC-0. In Public Domain. Digitization by eGangotri

शोभनेपापग्रहरहिते जलखेचतुर्थेदशमेयस्याज्ञांगस्यतस्मिन्नित्यर्थः शेषंपूर्ववत् १५ अथवापीकूपादीनद्भुत्तार्दैनाह उद्वाहेति उद्वाहर्क्षाण्येकादशसंख्यानिपूर्वोक्तानि हरित्रयंश्रवणत्रयंअदितिः पुनर्वसुः हयोअश्विनी ईज्यः पुष्यः एभिस्तडागादयोजलाशयाः सिध्यंतिकैः ज्ञेज्याब्जेस्तनुगेः ज्ञोबुधः इज्योगुरुः अब्जश्चंद्रः जलचरराशिश्च एतेस्तनुगैर्लग्नगतैः कस्मिन्सति सितेदशमगेसतिशुक्रेदशमगेसति क्वसद्वासरेसद्गुहवासरेइत्यर्थः तथाचोक्तम् चित्रास्वातिपुनर्वसुमृगशिरोमूलाश्विनीरोहिणीहस्तःपुष्यधनिष्ठकंशतभिषक्भिचोत्तरारेवती एतेषुश्रवणान्वितेषुमकरेलग्नेचकुंभेझ

उद्वाहर्क्षहरित्रयादितिहयेज्यर्क्षैस्तडागादयोज्ञेज्याब्जेस्तनुगेःसितेदशमगेसिध्यंतिसद्वासरे राज्येक्षाश्रवणत्रयेध्रुवमृदुक्षिप्रेःस्वकेंद्रायगेः १ ४ ७ १० ११ सौम्येशांतिकपौष्टिकेसचरभैरेतैःसुधर्मोदये १६ येवापीकूपजलाशयादिखननंशास्तम

शस्तेदिने अन्यच्चोक्तम् सर्वतोराशयारंभः कर्तव्योविबलैःखगैः लग्नस्थेज्ञे यवाजीविलग्नमेकोस्थितेख्गेइति अथोत्तरार्धेनराजदर्शनशांतिकपौष्टिकंचाह राजेक्षेति श्रवणत्रयध्रुवमृदुक्षिप्रैः नक्षत्रैः राजेक्षाराजदर्शनंकार्यंसुगमंपुनःकैः सौम्यग्रहैर्हिकेंद्रायगैः २ १ ४ ७ १० ११लग्नात्तद्विकेंद्र १ ४ ७ १०य११गैःशुभग्रहैरित्यर्थः शेषंप्रागवत् शांतिकपौष्टिकेआह शांतिकपौष्टिकेएतैरेवनक्षत्रैः श्रवणत्रयादिभिर्विधेयेकंथंभूतैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिः सञ्चरभैः चरनक्षत्रसहितैः कस्मिन्सति स्वधर्मोदये शोभनः पापरहितः धर्मो नवमं यस्य स स्वधर्मः सचासावुदयश्च स तथा उदयो लग्नं तस्मिन् इत्यर्थः शेषं पूर्ववत् १६ अथ वृत्तार्धेन दिव्यमाह मलिम्लुचे मासे विधुसितेज्यास्ते विधुश्चंद्रः सितः शुक्रः ईज्यो गुरुः तेषामस्ते विधौ रस्तः कृष्णपक्षे भवति र वावष्टमे गोचरेण सूर्येऽष्टमे मंदारान्हि शनिभौमदिने खलोदये पापराश्युदये यद्वा उदये खलः खलोदयस्तस्मिन् स्थिरतनौ स्थिरलग्ने दिव्यं नैव कु र्यात् अत्र दिव्ये कृते सति अदो दिव्यं अन्यथा विपरीतं स्यात् असत्यवादिनो जयकारी भवतीत्यर्थः अर्थादन्यत्र कर्तव्यमिति सिद्धं लग्नबलं-

दिव्यं नैव मलिम्लुचे विधुसितेज्यास्ते रवावष्टमे मंदारान्हि खलोदये स्थिरतनौ कुर्यात्कृते दोऽन्यथा श्रीशैलग्रहणायनेषु विषुवे संकीर्णजातावुपाकृत्युत्सर्गवधूप्रवेशनगयागोदासु नित्याब्दिके १७ ईशानाहिबलौ हरेः शयनपर्यावर्तने नैत्यके या नेजीर्णगृहे वरोहदमनारोपे पवित्रार्पणे भागवत् अथ गुरुशुक्रयोर्मौढ्यदोषः कुत्र कुत्र नास्तीति वृत्तार्द्धेनाह श्रीशैलः प्रसिद्धः यत्र मल्लिकार्जुनाभिधानं लिंगमस्ति ग्रहणं सूर्यचंद्रयोः अयने दक्षिणोत्तरे विषुवं मेषतुलसंक्रमः संकीर्णजातिर्हीनजातिः उपाकृतिरुपाकर्म उत्सर्गश्छं ९९ दसामुत्सर्गः वधूप्रवेशनं प्रसिद्धं गया प्रसिद्धा गोदा गोदावरी नित्याब्दिकं प्रतिवर्षे यत्क्रियते यथा नवरात्रं १७ ईशानेति ईशानाहिबलिः ई

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शानबलिःप्रसिद्धः अहिबलिः सर्पबलिः हरेः शयनपर्यावर्तनेंविष्णोः शयनमाषाढशुक्लद्वादश्यांभवति पर्यावर्तनंभाद्रपदशुक्लद्वादश्यांभवति नै
त्यकंयानंनित्यगमनं जीर्णगृहंप्रसिद्धं अवरोहः देवानांदोलारोहः पूजाविशेषः दमनारोपश्चैत्र्यां पवित्रार्पणंश्रावण्यां चातुर्मास्यविधौचातुर्मास्य
व्रते अष्टकाः पर्वणियात्रस्सनाम्नांमासानांकृष्णाष्टम्योष्टकाः मार्गपौषमाघफाल्गुनानांकृष्णाष्टम्यइत्यर्थः उत्साहाः पुत्रोत्पत्त्यादयः अंशुकधारणंवस्त्र
धारणं एषुजीवसितयोर्गुरुशुक्रयोर्मूढत्वदोषोनास्तीत्यर्थः नकेवलमेषु गर्भादिसप्तस्वपिगर्भाधानाद्यन्नप्राशनांतेषुसप्तसुसंस्कारेषुमूढत्वदोषो नः

चातुर्मास्यविधौनजीवसितयोर्मूढत्वदोषोष्टकासूत्साहांबरधारणेषुगदितोगर्भादिसप्तस्वपि १८ गदितः गर्भाद्यन्नाशनां
तेष्वित्यत्रश्लोकेयद्यप्युक्तंतथाप्यत्रप्रसंगादुक्तं तथाचगर्गः नित्ययानेगृहेजीर्णेप्राशनेपरिजीर्णके वधूप्रवेशमांगल्येनमौढ्यंगुरुशुक्रयोः भृगुःउ
पाकर्मोपसर्जनपवित्रंदमनार्पणं अवरोहःसहेमंतः सर्पाणांबलिरष्टकाः ईशानस्यबलिर्विष्णोः शयनंपरिवर्तनं कुर्याच्छुक्रगुरोर्मौढ्येपीतीतिस्कृविनि
श्चयात् धर्मप्रदीपे गोदावर्यांगयायांचश्रीशैलग्रहणद्वये अयनेविषुवेचैवचातुर्मास्यव्रतेषुच उत्सवेषुचसर्वेषुसीमंतकृतुकर्मणि शुराशुरे-
ज्ययोश्चैवमौढ्यदोषोनविद्यते कालनिर्णये नष्टेशुक्रेतथाजीवेसिंहस्थेचबृहस्पतौ कार्याचैवस्वदेव्यर्चाप्रत्यब्दंकुलधर्मतः मत्स्यपुराणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मोढ्येपिचप्रकर्तव्यामिश्रजातिक्रियाः शुभाः स्करेज्यशुक्रयोर्वर्णाक्रियाश्चौलादिकानचेति १८ अथतीर्थयात्रानिषेधंप्रेतकर्मनिषेधंन्चसापवादंवृत्ते
केनाह शुक्रेति शुक्रेज्ययोःअस्तमयेअधिकःमासःक्षयःक्षयमासःजनुर्मासोजन्ममासःतेषुजन्मर्क्षकेजन्मनक्षत्रे अपूर्वंप्रथमंतीर्थामरद

शुक्रेज्यास्तमयेऽधिकक्षयजनुर्मासेषुजन्मर्क्षकेनापूर्वामरतीर्थदर्शनमियाद्गोदागयाभ्यामृते

र्शनं तंन्निमित्तंनइयान्नगच्छेत् काभ्यामृतेगोदागयाभ्यामृतेगोदागययोर्दर्शनंसंदेवकुर्यादित्यर्थः प्रेतकर्मनिषेधमाह एष्विति एषुगुरुभुक्रास्ता
दिषुआषाढःप्र० सहस्यःपोषःविष्णुशयनेप्यपियद्वर्षाधिकलंबितंप्रेतकर्मभवतितत्यजेत् गोदागयातोन्यतःगोदागययोःसंदेवकार्यं आषाढ

CC-0. In Public Domain. Digitization by eGangotri

शुक्लद्वादश्यादिकार्तिकशुक्लद्वादशीपर्यंतम् विष्णुशयनम् तथाचोक्तम् बाल्येवायदिवावृद्धे शुक्रेचास्तमुपागते मलमासइवैतानिवर्जयेद्देवदर्शनम् व्यासः
अधिमासेचजन्मर्क्षेनष्टयोर्गुरुशुक्रयोः तीर्थयात्रानकर्तव्यागयांगोदावरींविना भृगुः मलमासेप्यनावृत्तंतीर्थस्नानंविवर्जयेत् अनाद्धिद्देवतांद्रष्टुंशु
चिःस्यान्नष्टभार्गवे तीर्थखंडे गुरुशुक्रास्तादिदोषःप्रोक्तोयस्तीर्थयातॄणाम् अपूर्वयायिनामेवनत्वसौपूर्वगामिनाम् पितृखंडे शुक्रस्या

एष्वाषाढसहस्यविष्णुशयनेषष्ठ्यंत्यकर्मत्यजेद्यद्वर्षाधिकलंबितंभवतितद्गोदागयातोन्यतः १९

स्तमनेचैवदेवेज्यस्यतथैवच प्रेतकार्यप्रदुष्येतप्रथमंवत्सरंविना मांडव्यः मलिनेजन्मभमासेवामौढ्येवागुरुशुक्रयोः तीर्थयात्रानकर्तव्या
गयांगोदावरींविना गरुडपुराणे नकुर्याद्गुरुशुक्रास्तेपुष्येस्वापेमलिम्लुचे विलंबितंप्रेतकार्यंगयांगोदावरींविना मेधातिथिः अस्तग
तेगुरौशुक्रेपुष्याषाढाधिमासके प्रेतकार्यंनकुर्वीतगयांगोदावरींविना प्रेतमंजार्याम् प्रेतकार्याणिसर्वाणिव्रतस्नानजपादिकम् वर्ज्यंशक्रेज्ययोरस्तंग
यांगोदावरींविनेति १९ इतिमुहूर्तमार्तंडटीकायांमार्तंडवल्लभायांमिश्रप्रकरणंसमाप्तम् ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथानंतरशांतिप्रकरणमारभ्यते छिद्राण्येतानिविप्राणांयनध्यायाः प्रकीर्तिताः छिद्रंभ्यः स्रवतिब्रह्मब्राह्मणेनयदर्जितम्, तत्कालेनस्त्ररक्षोसिश्रियंब्रह्मयशोबलम् सर्वमादायगच्छंतिवर्जयंतीप्सितंफलमित्यनध्यायेपठमादोंप्रसंगात्मौंज्यादिनिषेधाच्चवृत्तद्वयेनानध्यायानाह पर्वेत्यासार्धपर्वेत्याकिल

पर्वाग्नादियुगाष्टमीतिथयोमध्वादिपक्षद्वयेनध्यायाश्चरसंक्रमाअथमधौवह्निश्चशुक्रेयमः

क्षणंपर्व अग्नादियुक् अग्नंप्रतिपत् आदिश्चतुर्दशी ताभ्यांयुक्तयुक्तम् अष्टमीप्रसिद्धा इतितिथयश्चतस्त्रस्तिथयः मध्वादिपक्षद्वये मधुश्चैत्रः तदादिषुमासेषुपक्षद्वयंशुक्लकृष्णाख्यंतस्मिन्अनध्यायाः स्फुः कीर्तिताः कथिताः बुधैरित्यध्याहारः अथान्यानाह चरसंक्रमाः चरराशिसंक्रां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नयः मेषकर्कतुलामकरसंक्रांतयइत्यर्थः मधुश्चैत्रस्तस्मिन्वन्हिः वन्हिसंख्याकास्तिथिस्तृतीयेत्यर्थः शक्रेमासेज्येष्ठेमासेयमःद्वितीया यत्रमकरणी
शक्लकृष्णापक्षनिर्देशोनदृश्यतेतत्रशक्लपक्षजस्तिथिर्ज्ञेयः राधेवैशाखेऽग्निस्तृतीया शक्लेतुपुनः असितः कृष्णोयमः द्वितीया शक्रिदृगःशार्कोः शक्रिराषा

राधेग्निस्त्वसितोयमःशक्रिदृगाशार्कोस्त्रयोदश्यर्थोमार्गेकृष्णानगग्रहाविषदृगंकाशाग्नयः कीर्तिताः १

ढः नस्यदृकद्वितीया आशाद
शामी अर्कोद्वादशीत्रयोदश्यपि आषाढशक्लद्वितीयादशमीद्वादशीत्रयोदशीत्यर्थः अथमार्गेमार्गशीर्षेकृष्णानगग्रहो कृष्णासप्तमीनवम्योइषदृगंका-
शाग्नयःइषः अश्विनः तस्यदृकद्वितीया अंकोनवमी आशादशमी अग्निस्तृतीया आश्विनशक्लद्वितीयानवमीदशमीतृतीयेत्यर्थः १ ७. १२.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पौषति पौषेशाः पौषस्यईशाःएकादशीशुक्लातुपुनः असिताकृष्णाद्दृगंकमुनयः द्वितीयानवमीसप्तम्यः अंत्येफाल्गुनेकृष्णारवेटाद्रिदृक् रवेटोनवमी अद्रिःस टी
प्तमी दृक्द्वितीयाएषांसमाहारोरवेटाद्रिदृक्कृष्णंचान्तरवेटाद्रिदृक्चतथा कृष्णनवमीसप्तमीद्वितीयाइत्यर्थः माघेर्काब्धि दृगद्रयः अर्कोद्वादशी अब्धि-
श्चतुर्थी दृक्द्वितीया अद्रिः सप्तमी एतेशुक्लाः तुपुनः असितजाबाह्वंकपृथ्वीधराः असितजाः कृष्णपक्षजाः बाह्वंकपृथ्वीधराः बाहुर्द्वितीया अंकोनव-

पौषेशा ११ स्त्वसिताद्दृ २ गंक ९ मुनयों ७ स्येत्कृष्णारवेटाद्रिदृङ्माघेर्का १२ ब्धि ४ दृ २ गद्रय ७ स्त्वसितजाबाह्वं २ क ९ पृथ्वीधराः ७
ऊर्जेद्व्यं २ क ९ रवी १२ श्वरा ११ असितजाद्दृग् २ विश्व १३ सूर्या १२ नभस्येग्निः कृष्णाद्दृगद्रिविश्वनवमीपैत्रंयमोन्यः श्रवाः २

मी पृथ्वीधरः सप्तमी ऊर्जेकार्तिकेद्व्यंकरवीश्वराः द्विद्वितीया अंकोनवमी रविर्द्वादशीईश्वर एकादशी एतेशुक्लाः तुपुनः असितजाकृष्णापक्षजाः दृग्विश्वसू
र्याः दृग्द्वितीया विश्वेत्रयोदशी सूर्योद्वादशी नभस्येभाद्रपदे अग्निस्तृतीया शुक्लाकृष्णाद्दृगद्रिविश्वनवमीपैत्रंदृक्द्वितीया अद्रिःसप्तमी विश्वेत्रयोदशी १२
नवमी पैत्रंमघा यमो भरणी अन्यः शुक्लः श्रवाः श्रवणः भाद्रपदशुक्लश्रवणाइत्यर्थः २ ५ ५ ७ ७ ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथैषांनिर्णयंवृत्तेनैकेनाह यइति यः कश्चिदनध्यायतिथिःसपूर्वदिवसेस्तात्सूर्यास्तात्प्राक् मुहूर्त्तोन्मितःस्यात् अत्र पूर्वदिवसेब्रह्मवेदं नोपठेत् वाइत्य
थवा अन्यस्मिन्दिवसे परदिवसेक्षणत्रयगतोभवति अत्रास्मिन्दिवसेब्रह्मनोसंपठेत् पर्वाद्यादिषुगष्टमी पूर्ववतपदविभागः इतिचतुस्तिथीस्त्यक्त्वा ए
षु अनंतरोक्तेषु अनध्यायेषुशास्त्र स्मृतीवेदांगानीसमभ्यसेत् क्रमम् निखिलेषुसर्वेष्वनध्यायेषुउक्तंपठेत् नैत्यकंचपठेत् उक्तमितियथा अमा
वास्यायां अभ्यंस्तजपे द्यात्हुति पूर्वकांगायत्रीं सप्रणवांसक्षि्र्वा राक्षोघ्नीः पित्र्यमंत्रान् पुरुषसूक्तमप्रतिरथमन्यानिचपवित्राणीति नै

योनध्यायतिथिःसपूर्वदिवसेऽस्तात्प्राङ्मुहूर्त्तोन्मितोऽन्यस्मिन्वोदयतःक्षणत्रयगतोब्रह्मेहनैवाभ्यसेत् पर्वाद्यादिषुगष्ट
मीतिचतिथीस्त्यक्तेषुशास्त्रस्मृतीवेदांगानिसमभ्यसेच्चनिखिले पूक्तंउपेन्नैत्यकम् ३

त्यकं संध्याहोमब्रह्मयज्ञादि तथाचमनुः वेदोपा
करणेचैवस्वाध्यायेचैवनैत्यके ननिरोधस्त्यनध्यायेहोममंत्रजपेषुचेति वेदोपाकरणानिअंगानि स्मृतिरत्नावल्याम् नित्येजपेच नागेचक्रतो
पारायणेपिच नानध्यायोस्तिवेदानांग्रहणेग्राहणेस्मृतः देवतार्चनमंत्राणांनानध्यायः स्मृतः सदा नानध्यायेजपेद्वेदान्रुद्रांश्चैव विशेष
तः पौरुषंपावमानंचगृहीतनियमाद्दतइति स्मृत्यर्थसारे चतुर्दश्यष्टमीपर्वप्रतिपद्वर्जितेषुच वेदांगन्यायमीमांसाधर्मशास्त्राणिचाभ्यसे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विति कूर्मपुराणे इंदोर्वृद्धिक्षयंप्रासेब्रह्मयज्ञंनकारयेत् नजपेद्वैदिकंमंत्रं गायत्र्याष्टोत्तरंशतमिति स्मृतिरत्नावल्याम् अल्पंजपेदनध्यायेप
र्वण्यल्पतरंजपेदिति ३ अथनैमित्तिकाननध्यायान्वृत्तद्वयेनाह ब्रभ्विति ब्रभ्रुर्नकुलः ओतुर्मार्जारः एणोहरिणः खरः प्र० अग्निः प्र०
अजोमेषः अंबुउदकं अहिः सर्पः गजः प्र० अश्वः प्र० उष्ट्रः प्र० अंत्योंत्यजातिः रजकचर्मकादयः मूकः प्रसिद्धः उन्नतो मत्तः अनः शकटः यानंशिबिकादि
एभिरंतरितेगुरौ सतित्र्यहंत्रिरात्रमनध्यायः पूर्वोमंडूकः खगःपक्षी आदिशब्दाद्रोधादि एभिरंतरितेसज्योतिषं अनध्यायः अयमर्थः दिवा

बभ्र्वोत्वेणखराग्न्यजांबुहिगजाश्वोष्ट्रांत्यमूकोन्नताः नोयानांतरितेत्र्यहंप्लवखगाद्यैर्नाचसज्योतिषम्
स्त्रीगोस्थ्यंतरितेहरुत्सवनिशीथाशौचमार्गेषुचछायायांनकपित्थशाल्मलिमधुश्लेष्मांतकादेःपठेत् ४

अंतरिते सति सूर्यास्तमानपर्यंतं अनध्यायः रात्रावंतरितेरात्रिशेषपर्यंतं अनध्यायइत्यर्थः स्त्रीगोऽस्थ्यंतरितेऽहः स्त्रीप्रसिद्धा गोप्र० अ
स्थिप्राण्यंगं एभिरंतरिते अहर्दिनं अहोरात्रं अनध्यायः उत्सवोमहोत्सवो विवाहादिकः निशीथंमध्यरात्रं आशौचं सूतकम् मार्गोऽध्वा एषुनपठे
त् चपरं कपित्थशाल्मलिमधुश्लेष्मांतकादेश्छायायांनपठेत् स्रगमं आदिशब्दात्कोविदारविभीतकेऽ रंडादीनां ग्रहणम् ४ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रामांतरिति ग्रामांतः कुणपेग्रामसध्येकुणपेप्रेतेसतिनपठेत् श्वशूद्रनिकटेश्वानशूद्रसन्निधौनपठेत् श्राद्धाशनेश्राद्धभोजनेकृतेसतिजीर्णो
वधिनपठेत् वक्रगेसुखगतेतांबूलेसतिनपठेत् ग्रहणात्सकाशात्त्र्यहंनपठेत् तथागुरुक्षितिपतिप्रांतान्मरणात्त्र्यहं उपोत्सर्गतस्त्र्यहं उपउपाक
र्मउत्सर्गश्छंदसामुत्सर्गः तथाउपोत्सर्गतःसकाशात्त्र्यहं भूकंपाशनिपाततस्त्र्यहं भूकंपः प्र० अशनिपातोविद्युत्पातः ताभ्यांत्र्यहंपुरदहेपु

ग्रामांतःकुणपेश्वशूद्रनिकटेश्राद्धाशनेवक्रगेतांबूलेग्रहणाद्गुरुक्षितिपतिप्रांताद्उपोत्सर्गतः
भूकंपाशनिपाततःपुरदहेरिष्टावलोकात्त्र्यहंगर्जेनार्तवकेत्र्यहंसमयजेसज्योतिरसतः५

रदाहात्स्ववसतिग्रामदाहादित्यर्थः त्र्यहंरिष्टावलोकात् गंधर्वनगरभूतादिदर्शनात् त्र्यहंनपठेत् गर्जेऽनार्तवके त्र्यहंऋतौभवः आर्त
वः नआर्तवः अनार्तवएव अनार्तवकस्तस्मिन् अकालगर्जने जातेसतित्र्यहंनपठेत् समयजेऋतुजे गर्जेसतिसज्योतिर्यथास्यात्तथानप
ठेत् दिवागर्जेसतिसूर्यास्तपर्यंतं रात्रौगर्जेसतिसूर्योदयपर्यंतंनपठेदित्यर्थः सतः अंतेस्वशाखिसत्पुरुषस्य मृतौजातेसतिसज्योतिर्नपठेत् ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनध्यायांतरमाह वाद्येति वाद्यादीनांरवेशब्देश्रूयमाणे साम्नांचरवेश्रूयमाणे वातेवातस्यसर्वदाविद्यमानत्वादतिवाते जलेजलमध्येनीहार धूमरूपोत्पाते पतितोजातिभ्रष्टः अभिशस्तोमिथ्याभिशापीतत्समीपे धावज्जनालोकने धावन्मनुष्यालोकने ग्रामांतेग्रामसीमासमीपे पितृ

वाद्योलूकरवरार्तजंबुकरवेसाम्नांचवातेजलेनीहारेपतिताभिशस्तनिकटे धावज्जनालोकने
ग्रामांतेपितृकाननेप्यथसतानूनम्नणीतेदिवंतद्वत्सद्वतिनित्यहंनचपठेद्भुक्त्वार्द्रपाणिर्नच ६

काननेश्मशानेनेनपठेत् सतानूनम्नणीतिदिवंस्वर्गंप्रतिइतेगतेमृतेसतिन्त्यहंनपठेत् तानूनम्नंनामघृतम् यागेयेनयेनऋत्विजासहस्पृष्टंस सतानूनम्नीतस्मिन्मृतेसतित्र्यहंनपठेत् तद्वत्सद्वतिनिमृतेसद्वतंवेदव्रतंचरितंयेनससद्वतीतस्मिन्मृतेत्र्यहंनपठेत् भुक्त्वायावदार्द्रपाणि-स्तावन्नपठेत् अन्येनध्यायामूलग्रंथतोवगंतव्याः ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथप्रदोषानध्यायानाह रात्र्यर्द्धंसदनस्त्रयोदशांयस्मिन्दिनेस्यात् मुनिः सप्तमी रात्रेर्दलयुतेयामेसार्द्धप्रहरेयद्दिनेस्यात् चतुर्थी आदिमेप्रथमे प्रहरेयद्दिनेस्यात् अत्रदिनेप्राग्रात्रौ पूर्वरात्रौपठनंवर्ज्यंतुपुनःउपाकर्मतः सकाशात् माससात्रं रात्रेः प्राग्दलेपठनंवर्ज्यं श्वोनध्यायइतीहइत्यत्ररात्रिपठनंवर्ज्यं सदासंध्ययोरुभयोः पठनंवर्ज्यम घोरोपद्रवेणउपलक्षितोयामः प्रहरः तस्मिन्पठनंवर्ज्यम् त्रिदिवसंदुर्भक्षप्रतिग्राहयोः दुष्टभुक्प्रतिग्रहौ दुभुक्प्रतिग्रहौ तयोः दुष्टभोजनदुष्टप्रतिग्राहयोः त्रिदिवसंपठनंवर्ज्यम् तथाचश्रीधर्यास्मृतिवचनानि अष्टम्योश्चतुर्दश्योः पञ्चदश्योश्चसूतके

रात्र्यर्द्धंसदनो१३मुनि ७र्दलयुतेयामेचतुर्थ्याद्यके प्राग्रात्रौपठनंत्वुपाकरणतोमासंनिशः प्राग्दले श्वोनध्यायइ
तीहरात्रिपठनंवर्ज्यंसदासंध्ययोर्घोरोपद्रवयामकेत्रिदिवसंदुर्भुक्प्रतिग्राहयोः ७ शावेप्रतिपदोर्यत्र भयेन्वेवमहोत्सवे रोगेयुद्धेविवादेच द्यूतेपथिनिशीथके नाधीयीताश्वचिश्चापिनास्नातश्चनतंद्रितः उपाकर्मणिचोत्सर्गेग्रहणेचंद्रसूर्ययोः त्रिरात्रंस्यादनध्यायोमृतेनृपेगुरावपि फाल्गुन्यांपौर्णमास्यांतुचैत्र्यांतुत्र्यहमिष्यते अनध्यायस्तथाषाढ्यांश्रवण्यांकार्तिकेतथा तथैवमार्गशीर्षस्यपूर्णमास्यांनसंचरेत् अशन्याः पतकंपेभूमेर्दाहेपुरस्यच मृगस्यसर्पमार्जारनकुलाद्यश्वदंतिनां अंतरागमनेः जोष्ट्रखराणांत्र्यहंस्मृतं पताकातोरणादर्शरथयानजलाग्निनाम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूकोन्मत्तादिशूद्राणां संतरागमनेप्यहं नारीणामपिसर्वासांगम्यांचैवांतरागमे अहोरात्रमनध्यायो गर्जनेरात्रिसंभवे क्षगर्जनेचरात्रौचापरगर्त्रेदि
नंस्मृतं दिनंतूभक्षसंध्यायामथास्मांचांतरागमे पक्षिमडूकगोधास्तनराणांचांतरागमे दिनंदिवसशेषःस्याद्रात्र्यांरात्र्याश्वनडुद्वेतश्वसृगालखरेवन्
णांश्रोत्रियागमनेऽध्वनि तात्कालिकोप्यनध्यायस्तांबूलस्यचभक्षणे श्राद्धनिमंत्रितोयस्तक्षणात्कानाध्ययनंचरेत् करिष्यंश्चतथाविप्रःप्राग्विप्रा
णांविसर्जनात् एतेप्रोक्तास्त्वनध्यायावैदिकास्तांत्रिकास्ततः प्रवक्ष्यंतेष्टमीद्वंद्वेचतुर्दश्याचकेवलैः विषुवद्भूतयेचैवमयनद्वितयेतथा नपठेत्सा
ठयेद्धीमान्पुराणमपिसत्तमः अष्टम्यांचचतुर्दश्यां यावदस्तमितेरवौ दिनशेषमनध्यायंवैदिकंपरिकीर्तितं तथोदितेदिवारात्रं तत्कालसु
दितेतयोः प्रतिपद्यांचसंक्रांतौतत्कालमखिलास्तच नमोनभस्ययोः कृष्णोमासयोस्त्रिदिनंद्विजः नसप्तम्यामधीयीतत्रयोदश्यांचपैत्र्ययोः
सदात्रयोदशीयावत्प्राड्निशाथास्तिथिर्भवेत् प्राक्तदह्नोपराह्नांतादधीयीतनचद्विजः अष्टम्यांचचतुर्दश्यांप्रतिपद्यांचवर्जयेत धर्मशास्त्रपु
राणानिशास्त्रंतात्कालिकंबुधः विमिश्रितास्तकर्तव्यंसप्तम्यादिषुयत्नतः पुराणाभ्यसनादीनिपंचदश्योश्चवानना नांतरागमनेदोषः पुराणादि
षुविद्यते नशास्यतेचतात्कालं घृतंसंप्राप्यवाबुधः नीयमानंशवंदृष्ट्वामहीस्थंवाद्विजोत्तमः अकालगर्जितादौचपर्वस्त्वाशौचकादिषु अनध्या
याबुधैःकार्याउपरागादिकेषुच श्वोनध्यायेचशर्वर्यांनाधीयीतकदाचन स्मृत्यंतरे प्रदोषेचत्रयोदश्यांनाध्येयंप्रतिपत्स्वपि प्रदोषत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षणास् षष्ठीचद्वादशीचैव अर्धरात्रोननाडिका प्रदोषेनत्वधीयीततृतीयानवनाडिका अर्धरात्रोननाडिका अर्द्धरात्रात् घटिकयाएकयोनेस्य
र्थः अथनैमित्तिकप्रदोषमाह आपस्तंबः श्रावण्यांपौर्णमास्यामध्ययनंमुपाकृत्यमासंप्रदोषेनाधीयीतेति प्रदोषः पूर्वरात्रः तथाचग
र्गः अध्यायानामुपाकर्मश्रावण्यांश्रवणेनवा यावन्मासंपूर्वरात्रेनाधीयीतकदाचनेति नारदः अयनेविषुवेचैवशयनेबोधनेहरेः अनध्यायं-
प्रकुर्वीतमन्वादिषुयुगादिषु मन्वादयोमत्स्यपुराणेनिर्दिष्टाः आश्वयुक्शुक्लनवमीकार्तिकेद्वादशीसिता तृतीयाचैत्रमासस्यतथाभाद्रपदस्य
च फाल्गुनस्यत्वमावास्यापौषस्यैकादशीसिता आषाढस्यापिदशमीमाघमासस्यसप्तमी श्रावणस्याष्टमीकृष्णा आषाढस्यापिपौर्णिमा कार्तिकी
फाल्गुनीचैत्रीज्येष्ठीपंचदशीसिता मन्वंतरादयश्चैतेदत्तस्याक्षयकारकाः युगादयोविष्णुपुराणेदर्शिताः वैशाखमासस्यतुयातृतीयानवम्यसौकार्ति
कस्तुक्लपक्षे नभस्यमासस्यचकृष्णपक्षेत्रयोदशीपंचदशीचमाघे उपाकर्मणिचोत्सर्गेत्रिरात्रंक्षपणंस्मृतम् अष्टकासुत्वहोरात्रंमृतंतासुचरा
त्रिषु मार्गशीर्षेतथापौषेमाघेमासेतथैवच तिस्रोष्टकाः समाख्याताः कृष्णपक्षेतुसूरिभिः स्मृतिरत्नावल्यां चतुर्दश्यांयदापर्वप्रागस्ताद्दृश्यतेरवेः
अनध्यायंप्रकुर्वीतत्रयोदश्यांतुधर्मवित् विद्युत्स्तनितवर्षेतुमहोल्कानांतुसंप्लवे अकालिकमनध्यायमेतेषुमनुरब्रवीत् स्तनितंमेघगर्जितमअत्र
राधर्क्षमारभ्यषोडशर्क्षेतुभास्करः यावच्चरतिवैतावदकालंमुनयोविदुः कालेदृष्टेचतत्कालमकालेचत्रिरात्रकम् अतिमात्रार्थवाहाश्वेनाधीयी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तदिनत्रयम् अकालवर्षणेजातेजलौकाश्वप्रवर्तते एकरात्रमनध्यायमितिकात्यायनोब्रवीत् मेषेचवृषभेचैवतृणाग्रात्प्रचतेजलम् भूमिद्रावमनध्या
 यंकुर्वंतिवृषकुंभयोः अतऊर्ध्वं द्विपादेषुतृणप्रच्यवनंजलं तृणप्रच्यवनंतृणाग्रनाहः चौरैरुपद्रुतेग्रामेसंग्रामेचाग्निकारिते अकालिकमनध्यायं
विंद्यात्सर्वाद्भुतेषुच प्रादुष्कृतेष्वग्नीषुविद्युत्स्तनितनिःस्वने सज्योतिःस्यादनध्यायःशेषरात्रौतथादिवा मनुः निर्घातेभूमिचलनेज्योतिषांचोपसर्जने-
एतान् कालिकान्विंद्यादनध्यायानृतावपि निर्घात अंतरालिकोध्वनिविशेषः ज्योतिषांचोपसर्जनंचंद्रसूर्ययोः परिवेषः आपस्तंबः प्रतिगृह्य द्विजोवि-
दानेकोद्दिष्टस्यकेतनम् त्र्यहंनकीर्तयेद्ब्रह्म राहोरन्यत्रसूतके केतनंनिमंत्रणं कूर्मपुराणे समानविद्यतेत्तुमृतेतथासब्रह्मचारिणि आचार्येसं
स्थितेचापित्रिरात्रंक्षपणंस्मृतं याज्ञवल्क्यः त्र्यहंप्रेतेघनध्यायः शिष्यर्त्विग्गुरुबंधुषु उपाकर्मणिचोत्सर्गेस्वशाखाश्रोत्रियेमृते संध्यागर्जितनिर्घा
तभूकंपोल्कानिपातने समाप्यवेदंद्युनिशामारण्यकमधीत्यच पशुमंडूकनकुलश्वाहिमार्जारमूषकैः कृतेंतरेत्वहोरात्रंशक्रपातेतथोच्छ्रये पराश
रः सर्पस्यनकुलस्याथ अजमार्जारयोस्तथा मूषकस्यतथोष्ट्रस्यमंडूकस्यचयोषितः पुरुषस्यैलकस्यापिशुनोश्वस्यखरस्यच एषांयोवितत्रश्चैवअं
तरागमनेकृते त्रिरात्रमुपवासश्चत्रिरात्रमभिषेचनं अथतात्कालिकाः खरोष्ट्रगर्दभोलूकसामबाणार्तनिःस्वने अमेध्यशवशूद्रांत्यश्मशानपतितांतिके देशेशु-
चावर्त्मनिचविद्युत्स्तनितसंप्लवे भुक्त्वार्द्रपाणिरंभोंतरर्द्धरात्रेतिमारुते पांसुवर्षेदिशांदाहेसंध्यानीहारभीतिषु धावतःपूतिगंधेचशिष्टेचगृहमागते-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खरोष्ट्रयानहस्त्यश्वनौवृक्षेरथरोहणे सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुरिति अथानध्यायापवादः मनुः वेदोपाकरणे चैवस्वाध्याये चैव नैत्यके ननिरोधोस्त्यनध्याये होममंत्रजपेषु चेति ७ इतिमुहूर्तमार्तण्डटीकायां मार्तण्डवल्लभायां अनध्यायप्रकरणं समाप्तम् अथपल्लीसरटयोः प्रकरणं अथपल्लीसरटयोः फलं वृत्तेनैकेनाह दक्षांगोदरनाभिहृत्कपतितापल्ली नथाहृनुं त्यक्त्वावरांगेउत्तमांगेपतितापल्ली नुः नरस्यशुभदास्यात् उत्तमां

दक्षांगोदरनाभिहृत्कपतितापल्लीवरांगेहनुं मुक्त्वानुः शुभदास्त्रियाः फलमिदं वामेतरव्यत्ययात्

गेहनुंविनासर्वत्र

शुभेत्यर्थः अर्थादन्यत्रनशुभा अन्यांगेषु पुरः पार्श्वपृष्ठेषु नशुभास्यात् अथस्त्रियाः विशेषमाह स्त्रियाः इदं पुरुषोक्तं फलं वामेतरव्यत्ययात् ज्ञेयम् वामं वामांगम् तयोर्व्यत्ययो वैपरीत्यम् तस्मात्पुरुषस्यदक्षांगेयत्फलमुक्तं तत्स्त्रियाः वामांगेज्ञेयम् पुरुषस्यवामांगेयदुक्तं तत्स्त्रियादक्षांगे ज्ञेयमित्यर्थः अर्थाद्यत्रांगेवामेतरविभागाभावस्तत्रपुरुषतुल्यं फलंज्ञेयम् वरांगेतूभयोः समानमेव फलं वामदक्षिणफलाविशेषात् सरट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

फलमाह इत्याहुः सरठप्ररोहणफलमिति एवमेव आहुर्मुनय इत्यध्याहारः सरटस्यप्ररोहणे पल्लीवत्फलमित्यर्थः पाते सरठस्यपाते अन्यथा विपरीतंफ
लमाहुः सरठस्यप्ररोहणे यत्फलं तत्तस्यापाते विपरीतफलमाहुरित्यर्थः एके वृथा एके आचार्याः वृथाफलमाहुः सरठस्यप्ररोहणे एवफलपाते वृथाफ
लंनशुभंनचाप्यशुभमित्याहुरित्यर्थः पल्ल्यारोहणकेपि अन्यथाफलमाहुः पल्लीपतने यत्फलं तत्तस्यारोहणे अन्यथाविपरीतफलमाहुः एके वृथा

इत्याहुः सरठप्ररोहणफलंपातेन्यथैकेवृथा पल्ल्यारोहणकेपिवस्त्रसहितंस्नात्वाचरेच्छांतिकम् १

फलमाहुः पल्याः पतने एवफलंप्ररोहणेवृथेत्येके आहुरित्यर्थः अथात्रविधिमाह वस्त्रसहितंस्नात्वाचरेच्छांतिकमिति सचैलस्नानं कृत्वाशां
तिकंशास्त्रोक्तमाचरेत् तथाचज्योतिर्निबंधे पल्लीस्पर्शफलंवक्ष्येयदुक्तंब्रह्मणापुरा ब्रह्मस्थाने भवेद्राज्यंस्थानलाभोललाटके कर्णयोर्भूष
णावाप्तिर्नेत्रयोः प्रियदर्शनम् नासिकायांसुगंधानि सुखेमिष्टान्नभोजनम् कपोलयोर्भवेत्सौख्यं हनुदेशेसहृद्भयम् भ्रूकुट्योर्विग्रहंश्चैव

CC-0. In Public Domain. Digitization by eGangotri

कंठेवाग्व्यसनागमः कलिर्वंशेसुखंपृष्ठ्यादक्षेवामेगदादयः दक्षांसेविजयोनित्यंवामांसेशत्रुजंभयम् इष्टलाभोभुजेमध्येकूर्परेमणिबंधके द
क्षेकरतलेद्रव्यंतत्पृष्ठेसहाययोभवेत् वामेभुजेकूर्परेचमणिबंधेधनक्षयः वामेकरतलेहानिस्तत्पृष्ठेचार्थनाशनम् हृदयेराजसंमानंसौभाग्यं
दक्षिणेस्तने दक्षपार्श्वेचभोगाभिस्तनेवामेयशोधनम् वामपार्श्वेभवेत्पीडावामकुक्षौशिशोस्तथा दक्षकुक्षौसुतावाप्तिरुदरेचविशेषतः वस्त्रा
प्तिर्दक्षकट्यांचवामकट्यांसुखक्षयः नाभ्यांमनोरथावाप्तिर्वस्तौगर्भच्युतिर्भवेत् गुह्येमृत्युर्गुदेरोगोदक्षोरौप्रीतिवर्धनम् वामोरौमृत्युतोदुःखं
दक्षजानौसुवाहनम् पशुहानिर्वामजानौदक्षिणेजघनेसुखम् कुशस्याद्वामजंघायांस्फिजिदक्षेर्थवृद्धिकृत् स्फिजिवामेस्त्रीवियोगोदक्षे
गुल्फेप्रियागमः उपप्लवोवामगुल्फेपादयोर्गमनंभवेत् अत्रयद्यपिसामान्येनोभयोर्गमनफलमुक्तंतथापिदक्षिणपादेगमनाल्लाभो
वक्तव्यः वामपादेगमनेहानिर्वक्तव्या पुरोभागेचदुर्वार्तानष्टवार्ताचपृष्ठतः वामेहानिर्धनंदक्षेपरितोभ्रमणेक्षितः वामदक्षिणभागेन
यत्फलंकथितंनृणाम् विपर्ययेणतत्स्त्रीणांज्ञेयंशेषंद्वयोः समम् इत्थंपल्ल्याःप्रपतनेफलंज्ञेयंविचक्षणैः एतदेवफलंविद्यात्सरठस्यप्ररो
हणे पल्ल्याःप्ररोहणेचैवपतनेसरठस्यच तयोःफलस्यव्यत्यासात्तद्वदेवहिजायते पल्ल्याःप्ररोहणंरात्रौसरठस्यप्रपातनम् नातिदुष्टफ
लंविद्यात्व्याधिमुग्रंविपर्यये पतनानंतरंयस्यरोहणंयदिजायते पतनेफलमुत्कृष्टंरोहणेल्पफलंभवेत् मृत्युयोगेचजन्मर्क्षेविष्ट्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु॰मा॰ पातेच्चवैधृतौ चंद्रेष्टमेचसक्रूरेलग्नेविघ्नंप्रजापते अंगंदक्षिणमारुह्यवामेनोत्तरतेस्फुटम् तदाहानिकरीज्ञेयाव्यत्ययेनतुहानिदा चरणादूर्ध्वगीभू टी॰
१०८ यः सद्योरोहतिशीर्षणम् माज्यंराज्यंतदादत्तेपल्लीश्वेताविशेषतः चिंतिताभ्याधिकंलाभंस्थिताभोजनभाजने पादांगुल्योस्तुसंपाताल्लानिस्वम
हतीभवेत् पल्योः सरठयोर्वापियुग्मसंगेप्रपतते दंपत्योर्जायतेप्रीतिर्निर्यमागेवियोगता शीर्षस्योपरिपतिताप्रसाद्यपल्लीसितानान्या सितगृ
हगोधनास्पर्शेसर्वेघंगेषुशोभनाज्ञेयेति कृकलासः पतेद्यस्यमूर्ध्नितद्विघ्नशांतये मृतसंजीविनीविद्याजपेन्मुंडितमस्तकः अथपल्लीसरठयोः
शांतिः पल्लीसरठयोः स्पर्शेसचैलस्नानमाचरेत् पंचगव्यंप्राशयित्वाकुर्यादाज्यावलोकनम् शक्तेवाप्यथवाशक्तेयदीछेदात्मनः स्वस्वम् पुण्याह
वाचनंकृत्वाशांतिकर्मसमाचरेत् प्रतिरूपंस्ववर्णेनकुर्याद्वित्तानुसारतः रक्तवस्त्रेणसंवेष्ट्यगंधपुष्पैःप्रपूजयेत् तदग्रेमृन्मयंरम्यंकल
शंजलपूरितम् वस्त्रमाल्यैरलंकृत्यस्थापयेत्तंडुलोपरि पंचामृतंपंचगव्यंपंचरत्नानिशक्तितः पंचवृक्षकषायांश्चनिक्षिप्यावाहयेत्ततः पूज
येद्गंधपुष्पाद्यैर्लोकपालान्क्रमेणच अग्निसंस्थापनंकृत्वाहोमकर्मसमाचरेत् मृत्युंजयेनमंत्रेणसमिद्भिः खादिरैः शुभैः तिलैर्व्याहृतिभि
र्होममष्टोत्तरसहस्रकम् अष्टोत्तरशतंवापिकुर्याद्वित्तानुसारतः अभिषेकंततः कुर्यात्पावमान्यस्यचद्विजैः पुण्यवारुणसूक्तैश्चदोष १०८
शांत्यैद्विजोत्तमाः धौतांबराणिधृत्वाथस्वर्णवस्त्रतिलान्ददेत् ब्राम्हणान्भोजयेदित्थंशांतिकर्मकरोतियः तस्यायुर्विजयोलक्ष्मीःकीर्ति

CC-0. In Public Domain. Digitization by eGangotri

वृद्धिः शुभंभवेत् पल्लीसरटयोः शांतिः कथिताभृगुणापुरा शौनकायमुनींद्रायलोकानुग्रहकारिणे १ इतिमार्तंडवल्लभायां पल्लीसरटयोः शांतिप्रकरणम्: अथगोचरप्रकरणंविवक्षुस्तावत् जन्मराशेः सकाशात् कोग्रहः कस्मिन्स्थानेशुभः कस्मिन्नशुभइति चंद्रस्तुशुक्लपक्षेविशेषंताराबलंचकृष्णेत्येनैवेनाह स्वर्क्षाच्चंद्रखलाइति स्वर्क्षात् स्वजन्मराशेः सकाशात् चंद्रखलास्त्रिरवारिषुशुभाः स्युस्त्रिः तृतीयं खंदशमं अरिःषष्ठं तेषुचंद्रखलाः चंद्रः प्रसिद्धः खलाः पापग्रहाः रविभौमशनिराहुकेतवः शुभाः शुभफलाः भवंति पुनः सप्ताद्यगः अब्जश्चंद्रः शुभः स्यात् सप्तमं आपुत्राद्व्ययधर्ममृत्युषुक

स्वर्क्षाच्चंद्रखलास्त्रिखारिषुशुभाः सप्ताद्यगोब्जः पुनश्चापुत्राद्व्ययधर्ममृत्युषुकविः स्वास्तत्रिकोणेगुरुः

विः शुभः स्यात् आपुत्राज्जन्मराशितः क्रमेणपंचपर्यंतं १ २ ३ ४ ५ व्ययोद्वादशं धर्मंनवमं एषुकविः शुक्रः शुभः स्यात् स्वास्तत्रिकोणेगुरुः शुभः स्यात स्वं द्वितीयं अस्तंसप्तमं त्रिकोणंनवमंपंचमं तत्र गुरुः बृहस्पतिः शुभः स्यात् सौम्योत्यंत्यसमेशुभः स्यात् सौम्योबुधः विगतमंत्यंयस्मात्तद्व्ययं तच्चनत समंचतथास्मिन्द्वादशस्थानवर्ज्ये समस्थानेद्वितीयचतुर्थादिकेशुभः स्यादित्यर्थः अखिलाभवगताः शुभाः स्युः सर्वेग्रहाः एकादशस्थानेशुभाः स्युरिति शुक्लेनवेषुद्विगः चंद्रः शुभः स्यात्कृष्णपक्षेइति अथताराबलमाह निजभात्त्रिभुंनवहृतव्यद्रीषुशेषेनसत् निजभंस्वजन्मनक्षत्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मात् ध्रुवंदिननक्षत्रपर्यंतं संगणय्य नवत्ततं सत् व्यद्रीषुशेषं त्रिसमपंचशेषं न सत् नशुभं अन्यच्छुभमित्यर्थो सिद्धम् तथाच विशेषसंग्रहः व्यव
हार पंथाहानिः भियंव्याधिर्दैन्यंस्थ्यंगतिंगदः पापं सुखं धनंहानिं करोत्यर्कः स्वजन्मभात् १ वस्त्रंहानिर्धनंरोगंपीडावित्तंप्रियंवसुः भयंसुखं
धनंरोगंकरोतींदुः स्वजन्मभात् २ भयंहानिर्धनंवैरं दुःखं लाभं भयं क्षयम् पापं लाभं सुखं हानिं जने भौमफलंक्रमात् ३ बंधं लाभं

सौम्योऽप्यस्य समेरविला भगवता शुक्लेन वेसुद्विगश्चंद्रो थोनिज भाद्ध्रुवं नवत्ततं व्यद्रीषुशेषं नसन् १

भयंवित्तंशोकंलक्ष्मीक्षयंधनम् रोगंभोगंसुखंहानिं करोतिज्ञः स्वजन्मभात् ४ भयंवित्तं रुजंहानिं लाभंशोकंसुखंरुजः मानंदैन्यंधनंपीडां
करोतिजन्मभाद्गुरुः ५ जयंवित्तं धनंसौख्यं पुत्रान्वैरंशुभंसुखम् धर्मंदुःखंधनंलाभंजनेः शुक्रोददातिवै ६ भयंशोकंधनंदुःखंहानिंसु
हृत्क्षयंस्मृतिम् पापंश्रमंधनंहानिंजनेः पंगुफलंक्रमात् ७ राहुकेत्वोः फलंशनिकुजवत् १ ७ ७ ७ ७ १०९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसर्वेषां ग्रहाणांवेधं वृत्तद्वयेनाह षष्ठांत्येइति षष्ठप्रसिद्धम् अत्यंद्वादशम् तस्मिन् मिथः परस्परं वेधः तद्वत् खजलेसुतायभवनेत्र्यंके अयंर वेर्वेधः स्यात् यत्रांकन्यासएवव्याख्यानम् समस्थपलक्षितैः पदैर्वेधाज्ञेयाः तद्यथा षष्ठं ६ त्ये १२ ख १० जले ४ सुता ५ य ११ भवने त्रि ३ अंक ९ र वेः सूर्यस्यायंवेधः त्र्यं ३ के ९ जन्म १ सुते ५ ख १० के ४ मृति ८ भवे ११ द्व्य २ स्ते ७ षडं ६ त्ये १२ विधोरयंवेधः त्र्य ३ र्के १२ लाभ ११ सुते ५ सपत्न ६

षष्ठांत्ये खलुजे सुतायभवनेत्र्यंके रवेःस्यान्मिथस्त्र्यंके जन्मसुतं खके मृतिभवेद्व्यस्ते षडंत्येविधोः त्र्यर्के लाभ
सुते सपत्नतपसोर्व्यर्कीशुभानांव्यधोष्टाद्यपुत्रधनेष्टके खराह्वजेर्यके भवांत्येविदः २ द्व्यस्तेष्टादिमयोः खके नवसुते
त्रीशेष्ट पुत्रेत्रिकल्ये ऽर्यत्येकभवे भृगोर्ज्ञशशिनोः शन्यर्कयोर्नोव्यधः

तपसो ९ व्यर्कीशुभानांव्यधोयम् विगतोर्कोयेभ्यस्तेव्यर्काः तेचते अशुभाश्चव्यर्काशुभाः रविरहितपापग्रहाः तेषामयंवेधइत्यर्थः अष्टा ८ द्य १ पुत्र ५ धने २ ष्ट ९ खे १० क ४ सहजे ३ र्य ६ के ९ भावां ११ त्ये १२ विदः बुधःस्यायंवेधः २ द्व्यस्तेति द्व्य २ स्ते ७ ष्टा ८ दिमयोः १ ख १० के ४ नव ९ सुते ५ त्री ३ शे ११ ष्ट ८ पुत्रे ५ त्रि ३ कल्ये १ र्य ६ त्यें १२ क ९ भवे ११ भृगोः शुक्र स्यायंवेधः गुरोर्वेधः संस्कारप्रकरणेकथितः सोत्रसिद्धांज्ञेयः अत्रवेधविधानेज्ञशशिनोः बुधचंद्रयोः शन्यर्कयोश्चपरस्परंनोव्यधः स्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 परस्परं वेधोनास्ति एतदुक्तंभवति विंध्यहिमाचलयोर्मध्ये जन्मराशेः सकाशात् अन्यतमग्रहाधिष्ठितराशिपर्यंतंगणयित्वातद्राशेः सकाशात्तथोक्तवेधस्थानपर्यंतं गणयेत् तत्रयदिकश्चिद्ग्रहोभवतितदागणितोग्रहोविद्धोभवति अन्यदेशेषुजन्मराशेः सकाशात्उभयग्रहंतद्वेधनस्थानंच गणयेत् यदावेधस्थानेकश्चिद्ग्रहोभवतितदान्योग्रहोविद्धोभवति तत्रसूर्यस्यशनिवेधोनास्ति शनेःसूर्यस्यवेधोनास्ति एवंचंद्रबुधयोःपरस्प

विद्धोव्यस्तफलोभवेद्द्विविचरोहेमाद्रिविंध्यांतरेखेटर्क्षाद्ग्रधरंवचरंविगणयान्यत्रोभयंजन्मभात् ३

रंज्ञेयम् अथवेधप्रयोजनमाह विद्धोव्यस्तफलोभवेद्द्विविचरइति विद्धोग्रस्तोव्यस्तफलःस्यात् प्रथमश्लोकोदितं फलंव्यस्तंविपरीतंभवती त्यर्थः रत्नमालायामपि वामवेधविधिनात्वशोभना अप्यमीअशुभफलंदिशत्यलम् तेमृषावचनभाषिणोजने यांतिहास्यमपिकीर्तिलांछनमिति अथदेशविशेषेणवेधगणनाविशेषमाह हेमाद्रिविंध्यांतरइति अस्यार्थः पूर्वमेवव्याख्यातः ३ इतिमुहूर्तमार्तंडेमार्तंडवल्लभायांगोचरप्रकरणसमाप्तम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसंक्रांतिप्रकरणम् अथसंक्रांतिफलं विवक्षुस्तावद्राशिपरत्वेनपुण्यकालंवृत्तार्द्धेनाह द्व्यात्मनोहिस्वभावाराशयः मिथुनकन्याधनुर्मीनाः मृगो मकरः एषांसमाहारस्तस्मिन्नर्कसंक्रमणतः सूर्यसंक्रमणकालात्सकाशात् ऊर्ध्वंउपरिखरामघटिकाःपुण्याः स्युः स्थिरेवृषसिंहवृश्चिककुंभानाम न्यतमेराशौ कर्कटः प्रसिद्धः अर्कसंक्रमणतः पूर्वंप्रथमंखराम ३० घटिकाःपुण्याः स्युः जूकाजोभयतः जूकस्तुला अजोमेषः अनयोरर्कसंक्रमणः सकाशादुभयतः खराम ३० घटिकाःपुण्याः स्युः पूर्वंपंचदशऊर्ध्वंपंचदशेतित्रिंशतघटिकाइत्यर्थः एवंसर्वराशिसंक्रमणपुण्यकालमुक्त्वेदानीं

ऊर्ध्वंद्व्यात्ममृगेर्कसंक्रमणतः पूर्वंस्थिरेकर्कटेऽजूकाजोभयतःखरागघटिकाःपुण्यामृगेदिग्युताः

मकरेपुण्यकालविशेषमाह मृगेदिग्युताइति मृगेमकरेताः खराम ३० घटिकादिग्युताः दशयुताः चत्वारिंशत् घटिकाःपुण्याइत्यर्थः तथाचोक्तं- ज्योतिर्निबंधे संक्रांतिसमयः सूक्ष्मोदुर्लभः पिशितेक्षणैः तस्ययोगादधश्चोर्ध्वंत्रिंशन्नाड्यः प्रकीर्तिताः अर्वाक्षोडशनाड्यस्तु परतश्चैवषोडश पुण्यकालोर्कसंक्रांतेः स्नानदानादिकर्मसु त्रिंशत्कर्कटसंक्रांतौपूर्वतःपुण्यनाडिकाः मकरेतूत्तराः पुण्याश्चत्वारिंशतिनाडिकाः स्थिरेविष्णुपदे कर्कदक्षिणायनमादितः मृगेसौम्यायनंद्व्यंगेषडशीतिमुखंपुरः धटेजेविषुवंमध्येपुण्यंदानाद्यनंतकम् प्रागर्द्धरात्रात्सूर्येस्तुःपुण्यंप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वदिनं प्रागर्द्धरात्रादित्येनदूदुर्वानिपर्ययम् कार्मुकंतुपरित्यज्य मृगसंक्रमतेरविः प्रदोषवार्धरात्रेवातदाभोगः परेहनि रविसंक्रमणेपुण्येयोनस्ना
तोहमानवः सप्तजन्मांतरेरोगीदुःखभाक्निर्धनोभवेत् आदित्यपुराणे शतमिंदुक्षयेदानंउपरागेत्वनंतकम् षडशीत्यांसहस्रंतुविष्णुप-
द्यांतथैवच विषुवेशतसाहस्रंकोटिघ्नंदक्षिणायने शतकोटिगुणंपुण्यंजायतेउत्तरायणेइति अर्थांतराद्देनसंक्रांतेःरादसत्फलमाह कर्केति कर्कः
प्रसिद्धः अजोमेषः अंत्योमीनः वृषःप्रसिद्धः एणोमकरः एतान्सूर्यचलनंनिशिरात्रौसत्स्यात् अन्यभंप्राप्तसूर्यचलनंसूर्यसंक्रमणंदिवासत्स्या

कर्काजांत्यवृषेणसूर्यचलनंनिश्यन्यभंसद्दिवासूर्यारार्किदिनेतृतीयकरणेप्राप्तेश्भेदुःखदम् १

त् अर्थाद्विपरीतंनशोभनम् सूर्यारार्किदिनेरविभौमशनिदिनेतृतीयकरणेकौलवेप्राप्तेकिंस्तुघ्ने अश्भेशकुनौसर्वराशिसंक्रमंदुःखदंस्यात् त-
थाचोक्तम् मृगकर्काजगोमीनसंक्रांतिर्निशिसौख्यदा शेषेषुसमस्तादिवाव्यत्ययादशुभंभवेत संक्रांतिर्जायतेयत्रभास्करेभूसुतेशनौ तत्र
मासिभवेन्घोरंदुर्भिक्षंवृष्टिचौरजम् स्यादुस्थितस्यकिंस्तुघ्नेशकुनेकौलवेरवेः संक्रांतितैतिलेनागेप्रसुप्तस्यचतुष्पदे निविष्टस्यगरेविष्ट्यां ११२
वणिजेबालवेबवे दुर्भिक्षंरोगबाहुल्यंऊर्ध्वसंक्रमतेरविः सुप्तःकरोतिकल्याणमुपविष्टःसमंफलमिति १ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसंक्रांतिप्रसंगेनअधिमासक्षयमासयोर्लक्षणंतत्रकर्तव्याकर्तव्यंक्षयमासेजन्ममरणादौमासज्ञानं इत्येकेनाह ब्रह्माद्यैरिति ब्रम्हाद्यैःसि द्धांतकर्तृभिः इनमंडलांतः सूर्यमंडलांतः चांद्रः चांद्रोमासउदितः परैराचार्यैः अमांतश्चांद्रोमासउदितः एतदुक्तंभवति अमावास्यांतादपरो ऽमावास्यांतोयावत्तावदमांतोमासः अमावास्यांते सूर्यचंद्रमंडलयोर्योगोभवति परतः षड्भिर्घटिकाभिर्वियोगोभवति तस्माद्वियोगादपरोवियो-

ब्रह्माद्यैरिनमंडलांतउदितश्चांद्रस्त्वमांतः परैर्मासोसंक्रमणोद्विसंक्रमणकोज्ञेयोधिकोथोक्षयः

गोयावत्तावद्रविमंडलांतोमासः सब्रह्माद्यैःक्षयमासाधिमासनिर्णयविषयेअंगीकृतः अपरैरमांतोमासोंगीकृतइत्यर्थः अत्रयद्यपिसूर्यग्र हणेमध्यग्रहणकालमनंतरंमोक्षस्थितिकालः षट्घटिकाभ्योन्यूनोदृश्यतेतथापिसूक्ष्मदर्शिभिः पूर्वाचार्यैः रसनाड्योर्कमंडलमित्युक्तम् तत्रागमएव प्रमाणम् तत्रउक्तलक्षणोमासः असंक्रमणः संक्रांतिरहितअधिकोज्ञेयः द्विसंक्रमणकः संक्रांतिद्वययुक्तः क्षयोज्ञेयः अस्योदाहरणम् ब्रम्हमतानुसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिणा श्रीभास्कराचार्येणसिद्धांतशिरोमणौदर्शितम् असंक्रांतिमासोधिमासः स्फुटः स्याद्विसंक्रांतिमासः क्षयाख्यः कदाचित् क्षयः कार्तिकादित्रयेना
न्यथा स्यात्तदावर्षमध्येधिमासद्वयंच १ गतोब्ध्यद्रिनंदै ९७४ र्मितेशाककालेतिथीशैर्भविष्य १११५ स्त्वथांगाक्षसूर्यैः १२५६ गजाद्यग्निभूमि १३७८ स्त
थाप्रायशोयंकुवेदेंदुवर्षैः १४१ क्वचिद्गोकुभि १९ श्च २ श्रीभास्कराचार्येणाब्ध्यद्रिनंदै ९७४ र्मितशाककालादुपरितिथीशै १११५ र्मितशाककालात्पू
र्वंसिद्धांतशिरोमणिर्विरचितः अतएवोक्तम् गतोब्ध्यद्रिनंदैर्मितेशाककालेतिथीशैर्भविष्यतीति तत्रगजाद्यग्निभूमिः तुल्येशाककालेरविसं

कर्माण्यन्यगतीनिनात्रतनुयाद्यज्जन्ममृत्यूक्षयेतन्मासोतिथिखंडयोश्चयमुखेभृत्येधिकोगण्यते २

डलांतमासप्रमाणेनक्षयमासाधिमासौप्रदर्श्येते अश्विनीअमावास्याबुधेचतुश्चत्वारिंशत्घटिका ४४ तस्मिन्नेवदिनेसप्तत्रिंशत् ३७ घटिकास्वाती
तास्तुलासंक्रमणमभूत् अश्विनस्तुलासंक्रांतियुक्तत्वाच्छुद्धः कार्तिकीअमावास्याशुक्रेसप्तदशघटिका १७ तस्मिन्नेवदिनेत्रिंशत्घटिकास्वा
तीतास्तवृश्चिकसंक्रांतिरभूत् अयनसंक्रांतित्वादधिकः कार्तिकः अपरोमासोवृश्चिकसंक्रांतियुक्तः तस्माच्छुद्धोयंकार्तिकः तस्यामावास्या
शनौसप्तचत्वारिंशत् ४७ घटिकास्तस्मिन्नेवदिनेएकोनषष्टिघटिका ५९ स्वातीतास्तधनुःसंक्रमणमभूत् धनुःसंक्रमणंमार्गशीर्षेजातंतस्यामा ११२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वास्यासोमेपादोनपंचदशघटिकाः तस्मिन्नेवदिनेएकोनविंशत्घटिकास्वातीनाक्षमकरसंक्रांतिरभूत् इयंमकरसंक्रांतिर्यद्यपिअमांतमतिक्रम्यजातातथापिरविमंड
लांतमासप्रमाणेनपूर्वमासेएवपतिता तस्मात्संक्रांतिद्वययुक्तत्वात्मार्गपौषयुगुलंक्षयाद्वयंजातं माघीअमाभौमेएकचत्वारिंशत् ४१ घटिकातस्मि-
न्नेवदिनेषट्चत्वारिंशत् ४६ घटिकास्वातीनाक्षकुंभसंक्रांतिरभूत् इयमपिसंक्रांतिर्यद्यपिमासमतिक्रम्यजातातथापिमंडलांतमासप्रमाणेनपूर्व
मासस्यैवतस्मान्माघःशुद्धः अन्यथामंडलांतमासानंगिकारे नक्षयोनाधिमासः स्यान्माघोवैपरिकीर्तितइत्येनच्छास्त्रमनर्थकंस्यात् आ
र्यपक्षेतुसंदेहोनास्ति यतोब्रह्मपक्षतिथितः आर्यपक्षतिथिश्चतुर्घटिकाधिका ब्रह्मपक्षसंक्रांतितः आर्यपक्षसंक्रांतिस्त्रिघटिकोना तस्मादार्यप-
क्षे संदेहाभावः तथाचफाल्गुनी अमागुरौषट्घटिकातस्मिन्नेवदिनेपंचत्रिंशत्घटिका ३५ स्वातीनाक्षमीनसंक्रांतिर्जातातस्मादयंफाल्गुनः अ
संक्रांतित्वाधिकः क्षयः कार्तिकादित्रयेनान्यथास्यात्तदावर्षमध्येधिमासद्वयंचेति तस्योदाहरणंदर्शितं यत्तुब्रह्मपक्षेक्षयमासाधिमासनिर्ण
ये अमांतमासंगणयंतितद्ब्रह्ममतंनविदितं पौलस्तिसिद्धांते स्फुटगत्यायदाचंद्रोरविमंडलमध्यगः तदूर्ध्वंसंक्रमोभानोर्मासः सस्यान्मलिम्लु
चः कालनिर्णये संक्रमोयदिभवेद्दर्शान्तोमंडलात्बहिरनिर्गतेविधौ उच्यतेयसहिसंक्रमोबुधैःशुद्धमासइतरोमलिम्लुच्चः लल्लः यदाशशीयातिगभ
स्तिमंडलंदिवाकरः संक्रमणंकरोत्यनु विवाहयज्ञोत्सवनाशहेतुकस्तदाधिमासःकथितःस्वयंभुवा रत्नमालायाम् सवितृमंडलमेतियदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰म॰ शत्रीतदनुसंक्रमणंकुरुतेरविः मरवमहोत्सवनाशकरस्तदामुनिवरैर्गदितोधिकमासकः शार्ङ्गधरफलग्रंथे चंद्रार्कयोस्तु विंबैक्यंप्रतिपद्दर्शसंधिषु टी॰
११२ तिथ्यंतात्तदुभयतोरसनाड्योर्कमंडलम् तन्मंडलात्क्रगीगच्छेत्ततः सूर्यस्यसंक्रमः मासोसौमलिनः प्रोक्तोनतन्नौनोधिकः स्मृतः पितामहः प्रति
पद्दर्शसंधौतुविंबैक्यंचंद्रसूर्ययोः जवांतरात्संषष्ठिघ्नंनाडिका अर्कमंडलम् अत्रकालात्प्रकाविंव ग्रहणम् ज्योतिः प्रकाशे दर्शांतएकैः कथितो
त्रमासः परैः प्रदिष्टोरविमंडलांतः मतद्वयेचेद्रविसंक्रमः स्यात्सएवपूर्वस्यनचापरस्य पितामहः अष्टाधिमासः स्युर्नित्यंप्रोच्यंतेफाल्गुनादयः
सौम्यपौषौक्षयेनित्यंभवेतामितिनिश्चितम् १ क्षयोवाप्यधिमासोवास्यादूर्जइतिनिश्चितम् नक्षयोनाधिमासः स्यान्माघोवैपरिकीर्तितः २ पंचमा
सास्तुवैमारवादधिमासान्व्यवस्थिताः भवंतिचाष्टभिर्वर्षैर्भवे ११ वांक ९ निशाकरैः १९ ३ तथैवफाल्गुनश्चैत्र आश्विनः कार्तिकोधिकः एतेद्विं
द्रैः १५१ शरांगै ६५ र्वाकदाचिद्गोकु १९ वत्सरैः ४ मार्गपौषौक्षयौस्यातांकदाचित्कार्तिकोभवेत् अधिमासस्तदाज्येष्ठोभवेन्नित्यंक्षयोयदा ५ क्षया
त्प्रागधिमासस्यान्नित्यंभाद्रपदत्रये आश्विनोर्जौसदास्यातामादौभाद्रपदः स्मृत् ६ यस्मिन्वर्षेकार्तिकः क्षयोभवतितस्मिवर्षेज्येष्ठाधिमासोभवे
त् अत्रज्येष्ठशब्देनभाद्रपदोज्ञेयः यतः क्षयात्प्रागधिमासः स्यान्नित्यंभाद्रपदेत्रयेइतिनियमात् भाद्रपदादीनांत्रयाणांमध्येभाद्रपदोज्येष्ठोजानी ११२
यादित्यर्थः अथाधिमासक्षयमासयोः कार्याकार्याण्याह कर्माण्यन्यगतोनिनात्रतनुयाद्विति अन्यागतिर्यपालानिअगतीनि तानिअत्राधि

CC-0. In Public Domain. Digitization by eGangotri

मासक्षयमासयोर्नतनुयान्नविस्तारयेत् नकुर्यात् अर्थादनन्यगतौनिकर्माण्यन्नैवकर्तव्यानीतिप्रसिद्धम् अन्यगतौनामनन्यगतौनामिश्चंविचा
रः यानिकालनिरोधेनप्रोक्तानितान्यनन्यगतौनियथाऋतौजायामुपेयात् तत्रऋतुः स्वाभाविकः स्त्रीणांरात्रयः षोडशस्मृताइतिमनुनाऋतुप्रमाणमु
क्तम् अथषोडशरात्रीणांमध्येनिंद्यदिनान्यपहायगच्छेत् सऋतुर्यदिमलमासमध्यमासांशेव्यांप्रांतिनदाशुद्धमासांशेदोषरहितेगर्भाधानंकुर्यात् अ-
संभवेमलमासेएवकुर्यात् तथाचोक्तम् अनन्यगतिकंकुर्यान्नित्यंनैमित्तिकंतथा एवमन्यान्यपिविचार्यकुर्यात् गर्भाधानाद्यन्नप्राशनांत
कर्मकमलमासादीनांनिषेधोनास्तीतिसंस्कारप्रकरणेउक्तमस्ति गर्भाद्यन्नाशनांतेषुनगुरुक्षितमौढ्यमित्यादि तथाचगर्गः अग्न्याधेयं
प्रतिष्ठांचयज्ञदानव्रतानिच वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः गमनंदेवतीर्थानांविवाहमभिषेचनम् यानंचगृहकर्माणिमलमासेविव
र्जयेदिति तथाचसूर्योदये आवश्यकर्ममासाख्यंमलमासमृताब्दिकम् तीर्थेगजच्छाययोःश्राद्धंमघानंगपितृक्रियाम् कुर्यान्मलिम्लुचेव
र्षमध्येचेत्सर्वदाधिकम् तत्रस्यान्मासिकंमृत्युमासात्सद्वादशोयदि मैनक्रियांसमाप्यात्रकुर्वीताभ्युदयंतथा श्यामाकाग्रयणक्लृप्तेनस्याद्वर्ज्यम
तोन्यथा अन्यच्च काम्यारंभंवृषोत्सर्गपर्वोत्सवमुपाकृतिम् मेखलाञ्चौलमांगल्यान्याधानोद्यापनक्रिया वेदव्रतमहादानाभिषेकान्वर्धमा
नकम् इष्टंपूर्तंतथायस्यविध्यलोपोन्यदाकृतौ तत्सर्वमष्टकादन्यदधिमासेविवर्जयेत् सूतकेपिचकर्तव्यंस्नानाद्यंराहुदर्शनेइति स्मृति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्नावल्याम् प्रवृत्तंमलमासात्प्राग्यत्कास्यमसमापितम् आगतेमलमासेपितत्समाप्यमसंशयमिति अथक्षयमासेजन्मादौमासज्ञान
माह यज्जन्मेति जन्मचमृत्युश्चजन्ममृत्यू यस्यजन्ममृत्यूयज्जन्ममृत्यू क्षयेक्षयमासिभवतस्तस्यमासौतिथिरवंडयोर्ज्ञातव्यौ तिथेःप्रथ
मेर्द्धेजन्मवामृत्युर्वाभवति तदाप्रथममासःद्वितीयेर्धेद्वितीयोमासोज्ञेयः तथाचबृहत्कालनिर्णये तिथ्यर्धेप्रथमेपूर्वोद्वितीयेर्धेतथोत्तरः
मासाविति बुधैर्ज्ञेयौक्षयमासस्यविध्यगाविति अथमलमासःकुत्रकुत्रगण्यतइत्याह चथमुखइति चयोगर्भाधानादिर्वृद्धिः गर्भस्यकलिलंघनां
कुरास्थिचर्मादिचयः प्रतिमासेभवति धनादीनांदिनकलांतराचयस्तदादिके प्रेष्येभृत्येवेतनदानार्थंअधिकोमासोगण्यते तथाचयमः
गर्भेवार्धुषिकेभृत्येश्राद्धकर्मणिमासिके सपिंडीकरणेनित्येनाधिमासंविवर्जयेदिति पाठांतरव्याख्यानम् अधियुगेपूर्वोधिमाःप्राकृत
इति एकस्मिन्वर्षे अधियुगेअधिकद्वयेसतिपूर्वोधिमाःप्रथमोधिमासः प्राकृतः प्राकृतमासवज्ज्ञेयः अधिकत्वन्नत्याज्यः आर्थादुत्तरोधिकमा
सोमलमासः तदुक्तम् मासद्वयेब्दमध्येचसंक्रांत्यनभवेद्यदा प्राकृतस्तत्रपूर्वःस्यादुत्तरस्तुमलिम्लुचइति २ इतिमुहूर्तमार्तं
डटीकायांमार्तंडवल्लभायांसंक्रांतिप्रकरणंसमाप्तम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयालंकारसाह श्रीमत्कौशिकेति कुशिकस्यगोत्रापत्यानिकौशिकाः श्रीमंतश्चतेकौशिकाश्चतेतथा तान्पावयतीतितथा हरिपदद्वंद्वार्पिता
त्माह शिवोसदैवः तस्यपदद्वंद्वंचरणयुगंतस्मिन्नर्पितः आत्मा अंतःकरणंयेनसतथा आत्मादेहेधृतौजीवेइत्यभिधानात् एवंविधोयोहरिस्त
ज्ज्ञस्तस्माज्ज्ञातोयोज्ञानंतन्नाम्ना किंलक्षणः इलास्करार्चितगुणः इलापृथ्वी तस्यांस्करादेवाब्राह्मणाः तैरर्चिताः पूजितागुणाः शमदमतपोदाना-

श्रीमत्कौशिकपावनोहरिपदद्वंद्वार्पितात्माहरिस्तज्ज्ञानंतइलास्करार्चितगुणोनारायणस्तत्सुतः ख्यातंदेवगिरेः
शिवालयमुदक्तस्मादुदक्टापरग्रामस्तत्रसतिर्मुहूर्तंभवनंमार्तंडमत्राकरोत् १

दिगुणायस्यसतथा जितेंद्रियोवेदनिधिः मृ
तिज्ञोदृढव्रतोयज्ञकृदन्नदानेत्यादिगुणसंपन्नइत्यर्थः तत्सुतोनारायणः महूर्तभवनंमुहूर्तानांभवनंसद्मसार्तंडंनामग्रंथमकरोत् अत्रकुत्रदेवगि
रेः सकाशादुदक्उत्तरस्यांदिशियत्ख्यातंपुराणप्रसिद्धम् शिवालयंघृष्णेशशिवालयंइतिप्रसिद्धम् ज्योतिर्लिंगस्थानमस्ति तस्माच्छिवालयादुद
गुत्तरस्यांदिशियः टापरग्रामोस्तितत्रटापरग्रामेअकरोदित्यर्थः किंलक्षणोनारायणः तद्वसतिः तस्मिन्टापरग्रामेवसतिर्वासोयस्यसतथेति १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथास्यपठनेफलश्रुतिंतथाग्रंथेवृत्तसंख्यांप्रहर्षिण्याह षष्ठ्यांतुनंशतं १६० तस्मिन् तानिवृत्तानितैर्निबद्धः कृतः योयंमार्तंडः तमेनंमार्तंडंयोनरः
पठतिसविश्वपूज्योभवति नकेवलंविश्वपूज्योभवति अपितुबह्वायुःसुखधनमित्रपुत्रभृत्यान् संप्राप्नोति मुहूर्तदानात्साधितकार्यस्य विश्वस्यपू-
ज्योभवतीतियुक्तम् जनानांयथार्थमुहूर्तदानात् कार्यसिद्धिर्जनितपुण्येनबह्वायुरारोग्यादीनिसंप्राप्नोतीतियुक्तम् अपरंअधिकलब्धोभवति
नविकलाधीर्बुद्धिर्यस्येतितथा अत्रमुहूर्तमार्तंडेयद्भूमाधानादिकमुक्तंतत्रान्यबहुसंहिताग्रंथानपेक्षत्वादविकलधीत्वमुक्तम् अतएवतीर्थसि

यःषष्ट्यायुतशत १६० वृत्तबद्धमेनंमार्तंडंपठतिनरःसविश्वपूज्यःबह्वायुःसुखधनपुत्रमित्रभृत्यान्संप्राप्नोत्यविकलधीश्च
तीर्थसिद्धिं २ त्र्यंकेंद्र १४९३ प्रमितेवर्षेशालिवाहनजन्मतः कृतस्तपासमार्तंडोयमलंजयतूद्धतः ३ द्धिंप्राप्नोति तीर्थंशास्त्रंतस्यसिद्धि

स्तां अल्पग्रंथेनबहूर्थसिद्धेः यद्वा तीर्थंगुरुःतस्यासिद्धिःशास्त्रोपदेशलक्षणाताम् यद्वा तीर्थयागस्तेनकृत्वायागसुखादिलक्षणासिद्धिस्तांप्राप्नो
तितीर्थंशास्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिष्वितिविश्वः २ अथग्रंथस्याशिषमनुष्टुभाह त्र्यंकेति शालिवाहनजन्मनःत्र्यंकेंद्रवर्षे १४९३ तपसिमाघेमा
र्तंडोमुहूर्तमार्तंडःकृतः नामैकदेशग्रहणेनामग्रहणं अयंमुहूर्तमार्तंडःअलंअतिशयेनजयतु यद्वा यमलंमार्तंडयुग्मंउद्धतंउदयंप्राप्तंजयतुसर्वोत्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्षणास्तु॥२ अथैतद्ग्रंथांगीकारार्थं बुधप्रार्थना स्रग्धरा इतिमुहूर्तमार्तंडव्याख्यासमाप्ता आसीत्प्रासमणूरनामनगरे श्रीकौशिकस्यान्वयेनं
तीवाजसनेयिपूज्यचरणोमाध्यंदिनाग्रणीः कृष्णास्तत्तनयः श्रुतिस्मृतिविदामग्रेसरेज्योहरिस्तत्पुत्रः श्रुतिवित्तदात्मजवरोनंतोग्निहोत्रीगुरुः १
तत्पुत्रस्तदनुग्रहान्नाधिषणोनारायणः श्चापरग्रामेशिष्यगणेच्छयानिजकृतग्रंथस्यटीकांस्फुटाम् चक्रेस्यांकृपयापरोपकृतयेशोध्यंदुरुक्तंबुधैर्माहृस

पूर्ववाक्यार्थमादायग्रंथोयंरचितोलघुः
पठनार्थमशक्तानामंगीकार्योबुधैर्मुदा ३

स्यविलोक्यधार्ष्ट्यमपितेकुर्यंतिनोसज्जनाः २ स्रग्धनिधिपुरुषार्थक्ष्मा १५९४ समाप्तिः समाप्तिः परिमितशककालेजातमार्तंडटीकाम् लिखतिपठ
तिविप्रः सोत्रभूयाद्धरित्र्यांस्रग्धनिधिपुरुषार्थक्ष्मासमोवाक्षमावान् ४ इतिस्वकृतमुहूर्तमार्तंडटीकामार्तंडवल्लभासमाप्ता ७
शके १७८७ क्रोधननामसंवत्सरेमाघवद्यद्वादश्यांभृगुवासरेतद्दिनेसमाप्तम् हेपुस्तककेशवशास्त्रीगुरुजरघ्याणीछापिलेंआस्ते ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिमुहूर्त्तमार्तंडः समाप्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

5089

श्री

प्रमिताक्षरासहितमुहूर्त
चिंतामणिपुस्तकमिदम्

श्रीकाशीविश्वनाथपुरीमेगणेशबनारसके छापेखानेमे
रामप्रसादके हिं छापी जिसे लेना होइ उसे काशीजीमे
ढुंढराजगणेशके पास दाऊ पोथीवालेके दुकानमे मिले
गी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०८१

श्री

प्रमिताक्षरासहितमुहूर्त्तचिंतामणिपुस्तकमिदम्

श्रीकाशीविश्वनाथपुरीमेंगणेशबनारसकेछापेखानेमेंरामप्रसादकेहिंआछपीजिसेलेनाहोइउसेकाशीजीमेंढुंढराजगणेशकेपासदाऊपोथीवालेकेदुकानमेमिलेगी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु० टी०
शु० प्र०
१

॥श्रीगणेशायनमः॥ कैलासेपूर्णराकाहिमकरहरिविंबंविलोक्यस्वकीयंभूयोभूयोपिधावन्प्रतिभटकरटिस्पर्धयाचंडमुंडः माधावत्वंत्वद
ग्रिमहरतिभिरतोधूयतेसौधरित्रीत्यंबावाग्भिर्निरुद्धाः कपटकरटिनःकेलयोनःपुनंतु १ मुहूर्तचिंतामणिसंज्ञकस्यस्वयंकृतस्यप्रमिता
क्षरारव्यं रामोविधत्तेविवृतिंप्रणम्यविघ्नेशर्करुद्रान्पितरौगुरूंश्च २ प्रारिप्सितस्यग्रंथस्यनिर्विघ्नपरिसमाप्त्यर्थंशिष्टाचारानुमितश्रुतिबोधि
तकर्तव्यताकंस्वाभीष्टगणेशदेवताशीर्वादरूपंमंगलमिंद्रवज्रयोपनिबध्नाति गौरीश्रवइति द्विपस्यगजस्यआस्यंमुखंयस्येतिद्विपास्योग
णेशोविघ्नंहरतुनाशयतुयुष्माकमितिशेषः।कीदृशोगणेशः गौरीश्रवः केतकपत्रभंगंहस्तेनाकृष्यमुखाग्रेदधत् गौरीपार्वतीतस्याःश्रवण
योःस्थितंकेतक्याःपुष्पंकेतकंतस्यपत्रंपर्णंतस्यभंगंखंडंहस्तेनशुंडादंडेनाकृष्यहठाद्गृहीत्वास्वमुखाग्रेस्वमुखोष्ठेदधातिस्थापयतीतिदधत्

॥श्रीगणेशायनमः॥ गौरीश्रवःकेतकपत्रभंगमाकृष्यहस्तेनदधन्मुखाग्रे विघ्नंमुहूर्ताकलितद्वितीयदंतप्ररोहोहरतु
द्विपास्यः १ क्रियाकलापप्रतिपत्तिहेतुंसंक्षिप्तसारार्थविलासगर्भं अनंतदैवज्ञसुतःसरामोमुहूर्तचिंतामणिमातनोति २

अनेनगणेशस्यबाललीलासूचिता बालोपिमातृसमीपवर्तियत्किंचित्स्वेष्टंवस्तु बलात्कारेणगृहीत्वामुखेनिक्षिपतीति अतएवमुहूर्ताकलि
तद्वितीयदंतप्ररोहः मुहूर्तंक्षणमात्रंआकलितोनिःसृतोद्वितीयदंतप्ररोहोद्वितीयदंतोद्गमोयेनसः अनेनकेतकपत्रस्यमुखस्थापनसमयेयावत्त्रि
गरणंनकरोतितावद्गणेशोपिद्विदंतएवालौकिकैरित्यमृतोपमेयं १ अथज्योतिषग्रंथमारभमाणोविषयप्रयोजनसंबंधाधिकारिणःसूचयन्
कर्तव्यंउपजातिकयाप्रतिजानीते क्रियाकलापेति अनंताख्यज्योतिर्वित्पुत्रःसःप्रसिद्धःरामोमुहूर्तचिंतामणिंमुहूर्तोनांदिनशुद्धिविशेषणाल
क्षणयातदुपलक्षितःकालोमुहूर्तशब्देनोच्यते तस्यचिंताशुद्धाशुद्धिस्तस्यामणिरिवमुहूर्तचिंतामणिंज्योतिषग्रंथमातनोति निषेधनीनामाधा

रामः
१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्नयायमपिग्रंथोनिखिलमुहूर्त्तानामाधारइत्यन्वर्थनाम्नानंमुहूर्त्तचिंतामणिंज्योतिषग्रंथमातनोति निषेधविध्यादिसंनिवेशविशेषेणनिरूपयती
त्यर्थः ननुजीर्णग्रंथैरेवमुहूर्त्तविचारेसिद्धेकिमनेनेत्यतआह कीदृशंमुहूर्त्तचिंतामणिंक्रियाकलापप्रतिपत्तिहेतुंक्रियाजातकर्मादिकास्तासांकलापः
समूहःतस्यअमुकस्मिन्शुभदिनेकार्यमेतदस्मिन्नशुभदिनेनकार्यमित्येवंरूपाद्द्रुततरंप्रतिपत्तिःसम्यक्ज्ञानंतस्यहेतुंकारणं अयमर्थः अन्यग्रंथे
श्रुतिथ्यादिप्रकरणेश्रुतिथ्यादिषुद्विरुक्तानतज्ज्ञानंतत्तत्प्रकरणानांपुनःपुनरालोडनेनसिध्येदितिगौरवं अत्रत्वेकस्मिन्नेवपद्येयोमुहूर्त्तोविचार्यतेतस्यत
त्रैवनिर्वाहइतिलाघवं नन्वन्येष्वपिग्रंथेषुएवंविधमुहूर्त्तनिरूपणात्व्यर्थोयंश्रमइत्यतआह पुनःकीदृशंमुहूर्त्तचिंतामणिंसंक्षिप्तसारार्थविलासगर्भे
संक्षिप्तश्चासौसारार्थविलासगर्भविस्पष्टार्थस्तस्यविलासःप्रकाशःसगर्भेयस्यासौ अत्रशब्दलाघवेविस्पष्टार्थस्यनिरूपणाद्यथागुरुमुखेविनैवार्थज्ञा
नंसद्योमनसिजागर्तितथानान्यग्रंथेतेषुतत्रशब्दकाठिन्याद्गुरुमुखात्पिष्टादित्यर्थज्ञानेनभवतीत्यतदर्थमस्यारंभइति ननुसंबंधादिचतुष्टयक
थनंविनाकथंश्रोतृप्रवृत्तिः उक्तंच सिद्धिःश्रोतृप्रवृत्तानांसंबंधकथनाद्यतः।तस्मात्सर्वेषुशास्त्रेषुसंबंधःपूर्वमुच्यते किमेवात्राभिधेयंस्यादि
तिपृष्टस्तुकेनचित् यावत्प्रयोजनंनोक्तंतावत्तत्केनगृह्यतेइति उच्यते मुहूर्त्तचिंतामणिमित्यनेनैवपदेनैवसर्वंसूचितं तथाचनारदः अस्यशा
स्त्रस्यसंबंधोवेदांगमितिधातृतइति यद्वात्राभिधेयपदार्थानांमुहूर्त्तानांग्रंथस्यचप्रतिपाद्यप्रतिपादकभावःसंबंधः प्रयोजनंतुशुभाशुभनि
रूपणंविवाहादिकालनिर्णयश्च यदाहनारदः प्रयोजनंचजगतःशुभाशुभनिरूपणमिति कश्यपोपि ग्रहणग्रहसंक्रांतियज्ञाध्ययनकर्म
णां प्रयोजनंव्रतोद्वाहक्रियाणांकालनिर्णयइति तज्जिज्ञासुरधिकारी सचद्विजएवनान्यः उक्तंचनारदेन सिद्धांतसंहिताहोरारूपस्कंध
त्रयात्मकं वेदस्यनिर्मलंचक्षुःज्योतिःशास्त्रमकल्मषं विनैतदखिलंश्रौतस्मार्तंकर्मनसिध्यति तस्माज्जगद्धितायेदंब्रह्मणानिर्मितंपुरा
अतएवद्विजैरेतदध्येतव्यंप्रयत्नतः अत्रैवकारस्यपाठक्रमेणयोजनेप्रयोजनंविनैवज्योतिःशास्त्राध्ययनस्यावश्यकत्वंप्रतीयतेद्विजैरे
वेतिव्याख्यानेद्विजव्यतिरिक्तैःशूद्रैर्नाध्येयमितिचप्रतीयते व्याख्यानद्वयमपियुक्तमेव ननुकथंश्रौतस्मार्तकर्मोपयोगिज्योतिषमितिचेत् उच्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु॰टी॰
शु॰प्र॰
२

ते अष्टवर्षं ब्राह्मणमुपनयीत वसंते ब्राह्मणोऽग्नीनादधीत दर्शपौर्णमासाभ्यां यजेतेत्यादिश्रुतयः संति तत्र वर्षादिज्ञानं वसंतादृतुज्ञानं दर्श
पूर्णमासयोर्ज्ञानं च ज्योतिषं विना सर्वथा न निर्वहतीत्यवश्यम ध्येतव्यं ज्योतिःशास्त्रं उक्तं च वेदांगज्योतिषे वेदा हि यज्ञार्थमभिप्रवृत्ताः का
लानुपूर्व्या विहिताश्च यज्ञाः तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्। यथा शिखा मयूराणां नागानां मणयो यथा तद्वद्वेदांगशा
स्त्राणां गणितं मूर्ध्नि स्थितं तस्मात्कर्मोपयोगिकतयाऽवश्यमध्येतव्यं ज्योतिःशास्त्रं तच्च सुपरीक्षितशिष्यायादेयं तदुक्तं श्रुतौ विद्या ह वै ब्रा
ह्मणमाजगाम गोपाय मा शेवधिष्टेहमस्मि असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती यथा स्यां अन्यच्च नेतद्देयं दुर्विनीताय जातु
ज्ञानं गुप्तं तद्धि सम्यक्फलाय अस्थाने हि स्थाप्यमानेव वाचा देवीकोपान्निर्दहेत्तु चिराय विनयावता यदीयमानं प्रभवेत्कल्पेत वसत्फलाय
उपकृत्यनुचितकानि शास्त्राण्युपकारस्य पदं हि साधुरेवेति शूद्रपाठे च महान्दोषः गर्गः स्नेहाल्लोभाच्च मोहाच्च यो विप्रोऽज्ञानतोपि वा शूद्रा
णामुपदेशं तु दद्यात्स नरकं व्रजेदिति ज्योतिःशास्त्राध्ययने फलमाह मांडव्यः एवंविधस्य श्रुतिनेत्रशास्त्रस्वरूपभर्तुः खलु दर्शनेन वै निह
न्त्यशेषं कलुषं जनानां षडब्दजं धर्मसुखास्पदं स्यात् अतत्त्वज्ञानविशेषेण ज्योतिर्विदः पूजा तारतम्यं जीर्णैरप्यधायि दशदिनकृतपापं हंति सि
द्धांतवेत्ता त्रिदिनजनितदोषं तंत्रविशिष्ट एव करणभगणवेत्ताहंत्यहोरात्रदोषं जनयति घनमंहस्तत्र नक्षत्रसूची नक्षत्रसूचीलक्षणं वराह।
संहितायां अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते स पंक्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः तिथ्युत्पत्तिं न जानंति ग्रहाणां नैव साधनं परवा
क्येन वर्त्तंते ते वै नक्षत्रसूचकः नक्षत्रं सूचयतीति नक्षत्रसूची नक्षत्रसूचको दृष्टमुपवासं करोति यः स व्रजत्यंधतामिस्रं सार्धमृक्षविडंबिना नक्ष राम: २
त्रजीविनं पापं भिषजं शुल्कजीविनं तादृक्पौराणिकादींश्च वाङ्मात्रेणापि नार्चयेत् ऋक्षविडंबिना नक्षत्रसूचकेन सहांधतामिस्रं नरकं व्रजति अ
तश्चायथाशास्त्रमादेशक एव नक्षत्रसूचकः ननु संपूर्णशास्त्रपरिज्ञातादैवज्ञत्वं प्रपद्यतइत्युक्तत्वात् पूर्वकर्मार्जितसदसत्कर्मविपाको दैवं त
ज्जानातीति दैवज्ञः तस्य भावो दैवज्ञत्वं गुरुः दैवज्ञैः शास्त्रतत्त्वज्ञैर्मुहूर्तोऽन्विष्यते यदि सन्मुहूर्तः समन्वेष्यो नाम्यैर्नक्षत्रसूचकैरिति अत एव कस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योवेदपारगस्साहित्येनैवनक्षत्रसूचकस्यश्राद्धभोजनमाह अरिर्विश्रंभहंताचव्यंगोनक्षत्रसूचकः काणःकुंठश्चमंदश्चित्रीमूर्खःकुष्टत्रवान् सर्वेश्रा
द्धेनियोक्तव्यामिश्रिताःवेदपारगैरिति वसिष्ठः त्रिस्कंधपारंगमएवपूज्यः श्राद्धेसदामूसुरवृंदमध्ये नक्षत्रसूचीखलुपापरूपोहेयःसदासर्वसुधर्मकृ
त्ये वराहोपि सांवत्सरिकेदेशेवस्तव्यंभूतिमिच्छता चक्षुर्भूतोहियत्रैषःपापंतत्रनविद्यते मुहूर्ततिथिनक्षत्रमृतवश्चायनानिच।सर्वाण्येवाकु
लानिस्युर्नस्यात्सांवत्सरोयदि अतोगणकानांयदपाक्तेयत्वमभ्यधायिधर्मशास्त्रेतत्रसूचकाभिप्रायेणज्ञेयं महाप्रयोजनंतुएतच्छास्त्रस्यसम्यक्
ज्ञानाद्ब्रह्मसायुज्यमिति तथाचगर्गः ज्योतिश्चक्रेतुलोकस्यसर्वस्योक्तंशुभाशुभं ज्योतिर्ज्ञानंतुयोवेदसयातिपरमांगतिं सूर्यसिद्धांते दिव्यंचक्षुर्ग्र
हाणांतुदर्शितंज्ञानमुत्तमं विज्ञायार्कादिलोकेषुस्थानंप्राप्नोतिशाश्वतं वराहः नसांवत्सरपाठीचनरकेपरिपच्यते ब्रह्मलोकप्रतिष्ठांचलभतेदैववि
त्तकइति तस्माज्ज्योतिःशास्त्रमवश्यमध्येतव्यमितिस्थितं तत्राप्यार्षवाक्यानांपाठमात्रेणापिफलमस्तिस्मृत्यादिपठनवदिति अथमुहूर्तप्रयोज
नमाहसत्याचार्यः शुभलक्षणक्रियारंभजनितापर्वसंभवाः संपदःसर्वलोकानांज्योतिस्तत्रप्रयोजनमिति तेनशुभमुहूर्तारब्धंकार्यंसिध्येदशुभमु
हूर्तारब्धंतुनसिध्येदितितल्लभ्यते येनतुयत्प्राप्तव्यंतस्यविपाकंसुसोमचिवोपि।यःसाक्षात्त्रिपतिज्ञःसोपिनशक्तोन्यथाकर्तुमितिशौनकोक्तेः प्रा
चीनसदसत्कर्मरूपदैवस्यावश्यंभावित्वादितिचेत् नविवाहाविवाहादिषुविहितकालस्य पुरुषप्रयत्नसाध्यत्वादुभययोगेसत्येवकार्यसिद्धिर्नकेव
लदैवेनेति तदुक्तंकेशवार्किणा फलेयदिप्राक्तनमेवतत्किंकृष्याद्युपायेषुपरःप्रयत्नः श्रुतिःस्मृतिश्चापिनृणांनिषेधविध्यात्मकेकर्मणिकिंनिषण्णे
ति यदितुदैवमेवफलेतदासर्वोजनः कृष्याद्युपायेषुकथंप्रवर्ततेति किंच श्रुतिस्मृत्यादयोपिनिषेधविध्यात्मकानिरर्थकाःस्युः नकृष्णमारोहेन्न
बाहुभ्यांनदींतरेन्नसंशयमापद्यतेत्यादीनामाश्वलायनादिवचनानांचिकित्साशास्त्रस्यद्रव्यवैयर्थ्यप्रसंगःस्यादित्यर्थः याज्ञवल्क्योपि दैवेपुरुष।
कारेपिकर्मसिद्धिर्व्यवस्थिता तत्रदैवमभिव्यक्तंपौरुषंपौर्वदेहिकमिति कर्मसिद्धिःफलावाप्तिरिष्टानिष्टाचलक्षणा साचकेवलदैवेनव्यवस्थिता।
अपितुपुरुषकारेपि।पुरुषकारःप्रयत्नः पुरुषकाराभावेदैवमेवनास्तीत्याह तत्रदैवमिति पूर्वदेहार्जितंपौरुषमेवदैवमित्युच्यते तच्चास्यपुरुषप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्नानंतरंमहाफलोदयेन अभिव्यक्तंभवति अतएववसंतराजः पूर्वजन्मजनितंपुराविदःकर्मदैवमितिसंप्रचक्षते उद्यमेनसमुपार्जितंतदावांछितंफलति
मु० टी० नैवकेवलमिति दैवप्रयत्नयोरन्यतरेणसिद्धिर्नभवतीत्यत्र दृष्टांतमाहयाज्ञवल्क्यः यथाह्येकेनचक्रेणरथस्यनगतिर्भवेत्।तद्वत्पुरुषकारेणविना
मु० प्र० दैवंनसिध्यति केशवार्कोपि प्राक्कर्मबीजंसलिलानलोर्वी संस्कारवत्कर्मविधीयमानं शोषायपोषायचयस्यतस्यतस्मात्सदासदाचारवतांनहानिरिति
३ यस्मात्क्रमेजन्मांतरोपार्जितंकर्मदैवरूपंतस्यविधीयमानंअधुनाक्रियमाणंकर्मशोषायचभवति किंवटबीजंसलिलानिलोर्वी संस्कारवत्।यथास
द्बीजंशुभेसलिलादिसंस्कारैःसंस्कृतंसदुदेतिवर्धतेच तद्वत्प्राक्कर्मापिऐहिकेनसत्प्रयत्नेनवर्धते अन्यथाक्षीयतइत्यर्थः तस्मात्ज्योतिःशा।
स्त्रविहितकालेविवाहादिकुर्वतांशांतिचिकित्सादिसदाचारवतांपुरुषाणांसदानहानिःस्यात् अन्यच्च दैवंहिपुरुषनिष्ठंतद्देशकालवशतएवबि
पच्यते दृष्टमपिदृष्टांतरसाहित्येनैतत्दृष्टकारिभवति यथादुर्जनोरंध्रान्वेषणेन अतएववसंतराजः सर्पवह्निविषकंटकादिकंयेनदैवशरणोपिमा
नवःदूरतस्त्यजयतिपौरुषंतदातेननस्फुरतिदैवतोधिकं पौरुषेणहृदयेप्सितांगतिंप्राप्नुवंतिपुरुषाःसुमेधसः यांतिदेवशरणालयंयथापादपाज्व
लतिदावपावकेइति।अतः शकुननिमित्तादिभिःसूचितमशुभंदैवफलंशुभेनप्रयत्नेनवंच्यतएव तथाचवसंतराजः तन्निरूप्यशकुनेनदुःखदं
वंचयंतिनियतंसमुद्यतं पौरुषेणपुरुषाःसुमेधसःसंश्रयंतिपुनरात्मनोहितमिति तद्दैवफलंदुःखदंसमुद्यतंशकुनेननिरूप्यज्ञातापुरुषाः पौरुषे
णवंचयंतीत्यर्थः यथायेनग्रहेणयावतीदशांतर्दशावादत्तानस्याःफलपरिपाकःतावंतंकालमभिव्याप्यभवेदेवेतिस्थितेतद्दशाप्रवेशकालीनचंद्राद्यशु
भाशुभफलनिरूपणं यथातस्यदशाफलस्यान्यथात्वमल्पत्वमाधिक्यंवाबोधयतितद्वदेतदपिबोद्धव्यं नन्वनंतरोक्तसर्पविषवह्न्यादिदृष्टांते राम:
नपौरुषमेवफलसाधनंकथंनस्यात् तथाचबृहद्यात्रायांवराहः तथापरे तपस्यैवदैवंधैर्यावलंबिनःप्रत्यस्ततःक्रियासिद्धेकेवलंजगुरुद्य ३
मं उत्थानहीनोराजाहिबुद्धिमानपिसर्वदा प्रधर्षणीयःशत्रूणांभुजंगइवनिर्विषः विधानगणनाज्ञडःपुरुषकारमुक्तादरोमनोरथपरिश्रमैर्नपरि
तुवंतिश्रीमुखपराक्रमविनिश्चितेकेसुनयोहियस्यः कृतंहरिर्मदसुवासितंपिबतिकुंजरासृक्मधुइत्यादि उच्यते समानभूमिषुसमानसलिलादिप्रय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्नेपि फलवैचित्र्यदर्शनात्तत्कारणान्तरं कल्प्यते तद्दैवं दैवमिति अतउभयोर्योगे सत्येव फलसिद्धिरिति एतदपि तत्रैव कृषिदृष्टिसमायोगाद्दृश्यन्ते फलसि
द्धयः अस्मिन्नर्थे शृणु श्लोकान्द्वैपायनमुखोद्गतान् कृषिः पौरुषं वृष्टिर्दैवः कर्षकः पौरुषेण कृषिं करोति तां दैवं वृष्ट्या साधयति अथ कृषिं करोति चे
त्तदा वृष्ट्या विना न किंचित्फलमाप्नोति यदि पुनः कर्षको बीजं वपति दैवं च वर्षति तदा फलमधिकमुत्पद्यते एवं दैवपुरुषकारयोः समयोर्येन फलसिद्धयो
दृश्यन्ते अत्रार्थे श्रीव्यासमुखोद्गता इमे श्लोकाः नविना मानुषं दैवाद्दैवं वा मानुषाद्विना नैको निर्वर्तयत्यर्थमेकारणिरिवानलमिति केचिद्बुद्धिः कर्मानुसारि
णीति मन्यमानाः प्रयत्नोपि दैवरूप इति कृत्वा दैवमेव फलसिद्धेः कारणमिति वदन्ति तन्न। अनवस्थादोषप्रसंगात् तथाहि प्राक्कर्मार्जितपौरुषमेव किल
दैवशब्देनोच्यते। अत्रान्यः प्रयत्नः प्राचीनपौरुषलक्षणेन दैवेन जन्यते तदपि तत्प्राचीनपौरुषजन्यमित्यनवस्थाऽतः प्रयत्नोपि दैवप्रेरित इत्यनुप
पन्नं ननु बीजांकुरन्यायेनानवस्थादोषो न भविष्यतीति चेत्तन्न हि बीजांकुरन्यायेन दैवमेव मूलमिति निश्चीयते नापि प्रयत्नः अतः सत्युभययोगे फल
सिद्धिरिति तत्त्वं एवं चेत्तर्हि पूर्वोक्तानां शौनकादिवाक्यानां येन तु यत्प्राप्तव्यं तस्य विपाके सुरेशसचिवोपि यः साक्षान्नियतिजः सोपि न शक्तोऽन्यथा
कर्तुमित्यादिकानां का गतिः उच्यते दैवं तु दृढकर्मजं चेति द्विविधं तत्र दृढकर्मजस्यावश्यंभावित्वाद्ग्रहशांत्यादिरूपेण पूर्वेण प्रयत्नादपि तन्निवार
यितुं न शक्यते दृढमूलत्वात् प्रबलवाताघातेपि दृढमूलपादपवत् अदृढकर्मजं तु दैवं प्रयत्नेन निवर्त्यं प्रतिशिथिलमूलपादपवत् तथा च जातके।
ये धर्मकर्मनिरता विजितेंद्रिया ये ये पथ्यभोजनजुषो द्विजदेवभक्ताः। लोके नरा दधति ये कुलशीललीलां तेषामिदं कथितमायुरुदारधीभिरिति। प्रय
त्नाभावे तु विलक्ष्यते तथा च तत्रैव पापिष्ठा ये दुराचारा देवब्राह्मणनिंदकाः अपथ्यभोजिनस्तेषामकालमरणं ध्रुवमिति वैद्यकेपि। पूर्वजन्मकृतं
पापं व्याधिरूपेण बाधते इति सर्वव्याधीनां साधारण्येन कर्मजत्वेपि साध्यासाध्यत्वेन द्वैविध्यं तत्रापि कृच्छ्रोपायः सुखोपायो द्विविधः साध्य उच्यते
असाध्यो द्विविधो ज्ञेयो साध्यो यश्चाप्रतिक्रियः साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा घ्नंति प्राणानसाध्यास्तु नराणामक्रियावतामित्यादिना
ऽचिकित्स्यव्याधेर्दृढमूलत्वमन्येषामदृढकर्ममूलत्वं निश्चीयते अतो दैवस्येदृशं द्वैविध्यमस्ति अतः शौनकवाक्यानामयमर्थः येन त्विति येन पुरुषे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु० टी०
शु० प्र०
४

णयन्प्राप्तव्यं अवश्यंभोक्तव्यं दृढकर्मोपार्जितमिति यावत् तदन्यथाकर्तुं बृहस्पतिरपि न शक्तः अर्थाद्दृढकर्मोपार्जितमन्यथाकर्तुं शक्त इत्यर्थः अतो निमित्तशकुनादिभिर्दुष्टफले ज्ञाते बौधायनादिविहितेन तच्छान्तिदानादिरूपधर्मेण प्रयत्नेन तन्निवर्त्यते शुभं वर्ध्यते अत एव तेनैवोक्तं सुपरीक्षितं विलग्नं धर्मार्थसुखाय दंपत्योः अपरीक्षितं विलग्नं न हि दैवं पठितेन दैवविदा अयशोऽम्बुनिधौ मज्जति शास्त्रमविज्ञाय योऽद्यादिति बृहस्पतिरपीदमाह स्वभावादेव कालोऽयं शुभाशुभसमन्वितः अनादिनिधनः सर्वो न निर्दोषो न निर्गुणः तस्मान्निर्दोषकालार्थं मुहूर्तमधिगच्छतां कालः शुभो गुणैर्युक्तो बलवद्भिः शुभप्रदः दोषैर्युक्तोऽपि चात्माणे बहुभिर्व्यत्ययं द्वयोरिति अतः शुभमुहूर्तबलेन पूर्वकर्मार्जितमशुभमपि दैवफलं निवार्यते इत्यवधेयं २ अथ तिथीशाननुष्टुभाह तिथीशा इति एते तिथीशाः तिथीनां स्वामिनः वह्निश्च कश्च को ब्रह्मा शेषं स्पष्टं प्रयोजनं तु तत्तद्देवतापूजाप्रति

तिथीशा वह्निकौ गौरी गणेशोऽहिर्गुहो रविः शिवो दुर्गान्तको विश्वे हरिः कामः शिवः शशी ३ नंदा च भद्रा च जया च रिक्ता पूर्णेति तिथ्योऽशुभमध्यशस्ताः सितेऽसिते शस्तसमाधमाः स्युः सितज्ञभौमार्किगुरौ च सिद्धाः ४ नंदा भद्रा नंदिकाख्या जया च रिक्ता भद्रा पूर्णसंज्ञाऽधमा कोत॥ ५५शादि

अथ मुहूर्तविचारस्य प्रतिज्ञातत्वात्संवत्सरादिकथनं नोक्तं तत एवावधार्यं ३ अथ तिथीनां संज्ञाः सफला आह नंदेति प्रतिपदादिपंचतिथयो नंदाभद्राजयारिक्तापूर्णासंज्ञाः स्वस्वनामसदृशफलदाः स्युः इति एवंप्रकारेण सर्वाः षष्ठ्यादयो ज्ञेयाः ताः शुक्लपक्षे अशुभमध्यमशुभफलदाः स्युः असिते कृष्णपक्षे शुभमध्यमअधमाफलदाः स्युः ता एव नंदादितिथयः शुक्रबुधमंगलशनिगुरुवारे सुसिद्धिकराः स्युः यथा नंदा शुक्रवारे एवं भद्रा बुधवारे जया भौमे रिक्ता शनौ पूर्णा गुराविति ४ अथ सूर्यादिवारेषु यथासंख्यं निषिद्धतिथीर्दग्धनक्षत्राणि च शालिन्याह नंदेति अर्कादिति स्वपंक्तौ पंचमी अर्कमारभ्य नंदादिकास्तिथिरधमा स्यात् यथा सूर्यवारे नंदाधमा एवं सोमे भद्रा भौमे नंदा बुधे जया गुरौ रिक्ता शुक्रे भद्रा श

राम:
४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शनौपूर्णेति इदमाधुनिकानां प्राच्यानांमतंवस्तुतस्तुतेशुभाः अमृतयोगाः तथाच वसिष्ठः नंदाभौमार्कयोर्भद्राशुक्रेंद्वोश्चजयाबुधे शुभयोगागुरौरि
क्तापूर्णामंदेऽमृताह्वया गुरुरपि आदित्यभौमयोर्नंदाभद्राशुक्रशशांकयोः जयाज्ञस्यगुरौरिक्तापूर्णार्कीश्चामृताशुभाइति नारदवाक्येशनौपूर्णाचमृत्यु
देतिकल्पितपाठः वसिष्ठादिवचनविसंवादात् बहुषुपुस्तकेषुशनौपूर्णाऽमृताशुभेतिपाठाच्चपूर्णसंज्ञाऽमृतार्कीदिनिपाठः साधुः तथारविवारादिषुया
म्यभरणीतद्रादीनिनक्षत्राणियथाक्रमेणदग्धनक्षत्राणिस्युः यथारविवारेभरणीदग्धा सोमेचित्राभौमेउत्तराषाढा बुधेधनिष्ठा गुरावुत्तराफाल्गुनी
शुक्रेज्येष्ठा शनौरेवती नारदः आदित्यभौमयोर्नंदाभद्राशुक्रशशांकयोः जयासौम्यगुरौरिक्ताशनौपूर्णाऽमृताशुभाइति नारदः यमर्क्षमर्कवारेज्ञेचित्रा
भौमेतुविश्वभं बुधेश्रविष्ठार्यम्णांसेगुरौज्येष्ठाभृगोर्दिने रेवतीशनिवारेतुदग्धयोगाभवंत्यमी एतान्येवनक्षत्राणिरव्यादीनांजन्मभानीत्युक्तानितान्य

याम्यंत्वाष्ट्रंवैश्वदेवंधनिष्ठार्यम्णंज्येष्ठांत्यंरवेर्दग्धभंस्यात् ५ षष्ठ्यादितिथयोमंदाद्विलोमंप्रतिपद्बुधे स
प्तम्यर्केऽधमाःषष्ठ्याद्यामाश्चरदधावने ६ ॥ पिनिषिद्धान्येवलग्नः याम्यंत्वाष्ट्रोत्तराषाढेधनिष्ठोत्तरफाल्गुनीज्येष्ठाचरेवतीचैवज

न्मर्क्षाण्यानुतः क्रमात् क्रमात्सप्तेंद्रदशसूर्येनवाष्टपौर्णिमास्यमा १४।१०।१२।९।८।१५।३० सूर्यादिजन्मतिथयः संत्याज्याः शुभकर्मणि जन्मर्क्षेजन्मति
थिषुशुभकर्मविवर्जयेत् बलाच्चेत्कुरुतेकर्मनतत्फलमवाप्नुयादिति ५ अथक्रकचादिनिंद्ययोगाननुष्टुभाह षष्ठ्यादीति क्रमेणषष्ठ्यादितिथयः मंदाद्भौमे
श्वरादिविलोमंविपरीतगणनयाऽधमाः स्युः।यथा शनौषष्ठी अधमा शुक्रेसप्तमी गुरावष्टमी बुधेनवमी भौमेदशमी सोमेएकादशी रवौद्वादशी एतेयोगाः क्रक
चाख्याज्ञेयाः तथाप्रतिपद्बुधवासरे सप्तमीरविवारे संवर्तयोगाख्याधमास्यात् अथषष्ठीआद्याप्रतिपत् अमाअमावास्यारदधावनेदंतानांकाष्ठादिभिर्मलप्र
निराकरणेअधमाः निषिद्धाः स्युः क्वचिन्नवमीरविवारयोरपिनिषेधः काशीखंडेप्रतिपद्दशमीषष्ठीनवम्यांरविवासरे दंतानांकाष्ठसंयोगोदहेदासप्तमंकुलम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु० टी०
सु० प्र०
५

अथकृत्यविशेषेषुनिषिद्धतिथिरिंद्रवंशाछंदसाह षष्ठ्यष्टमीति षष्ठ्यष्टम्योःप्रसिद्धे भूतश्चतुर्दशी विधुक्षयोमावास्या एतासुतिथिषुनापुरुषः तैलं पलंमांसं सुरंक्षौरं रतंमैथुनं नोसेवेत यथाषष्ठ्यांतैलं अष्टम्यांमांसं चतुर्दश्यांक्षौरं अमावास्यायांमैथुनंनसेवेतेत्यर्थः विधुक्षयः सर्वोपलक्षकः वसिष्ठः स्त्रीसेवनंपर्वसुपक्षमध्येपलंचषष्ठीषुचसर्वतैलं नृणांविनाशायचतुर्दशीषुक्षुरक्रियास्यादसकृत्तदासु नारदः व्यतीपातेचसंक्रांतावेकादश्यांचपर्वसु अर्कभौमदिनेविष्ट्यांनाभ्यंगंनचवैधृताविति पर्वाणिवसिष्ठआह चतुर्दश्यष्टमीकृष्णाअमावास्याचपूर्णिमा पुण्यानिपंचपर्वाणिसंक्रांतिर्दिनपक्षश्चेति अत्रतिथिस्तात्कालिकीग्राह्या उक्तंच स्नानेवाभ्यंजनेचैवदंतधावनमैथुने तिथिस्तात्कालिकीग्राह्यातथामरणजन्मनोरिति अथविश्वेत्रयोदशी दशाद्दशमी द्विकेद्वितीया एतासुतिथिषुअभ्यंजनं अभ्यंगंमलापहात्वंचनसेवेत अयंनिषेधोब्राह्मणव्यतिरिक्तस्य तथा

षष्ठ्यष्टमीभूतविधुक्षयेषुनोसेवेतनातैलपलेक्षुरंरतं नाभ्यंजनंविश्वदशाद्विकेतिथौधात्रीफलैःस्नानममाद्रिगो
सप्तत् ७ सूर्येशपंचाग्निरसाष्टनंदावेदागसप्ताश्विगजांकशैलाः॥

५,चभट्टभास्करेणनिर्णयामृते त्रयोदश्यांद्वितीयायांसप्तम्यांचवि
शेषतः शूद्रविट्क्षत्रियाः स्नानंनाचरेयुः कदाचनेति अथधात्रीफलैरामलकैः स्नानममाद्रिगोषुअमावस्यासप्तमीनवमीषुअसत् निषिद्धमित्यर्थः अत्र वसिष्ठादिमते त्रयोदश्यादितिथिषुआमलकस्नानस्यैवनिषिद्धोनाभ्यंगस्य वसिष्ठः कामदुर्गांतकरविनष्टेंद्वर्कदिनेषुच सकृदामलकस्नानंसंपत्पुत्रविनाशनं भट्टभास्करस्तुनवम्यादिष्वेवामलकस्नानंनिषेधति सप्तम्यांचद्रानवमीषुदेहश्रीसंततीरामलकैर्नरस्य स्नानंनिहंत्यन्यदिनेतुधत्तेतिलैःश्रियंपुण्यकरंसदैवेति ७ अथसूर्यादिवारेषुदग्धादियोगचतुष्टयमिंद्रवज्रोपजातिकाभ्यामाह सूर्येति सूर्यादीति सूर्येशपंचाग्निरसाष्टनंदाः तिथयःसूर्यादिवारेदग्धसंज्ञाभवंति यथा द्वादशीरविवारेदग्धा सोमेएकादशी भौमेपंचमी बुधेतृतीया गुरौषष्ठी शुक्रेष्टमी शनौनवमी उक्तंचनारदेन एका

रा०म०
५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशीचेंदुवारेद्वादशीचार्कवासरे षष्ठीबृहस्पतिवारे तृतीयाबुधवासरे अष्टमीशुक्रवारे च नवमीशनिवासरे पंचमीभौमवारे च दग्धयोगाः प्रकीर्तिताः अ
थविषयोगाः वेदेति चतुर्थ्यादितिथयः अर्कादिवारेषु विषाख्या भवंति यथा रवौ चतुर्थी विषाख्या चंद्रे षष्ठी भौमे सप्तमी बुधे द्वितीया बुधेभद्राहूयः
सिद्धियोगस्तु सप्तमीद्वादश्योश्चरितार्थः एवं नवमीशन्यादावपि गुरावष्टमी शुक्रे नवमी शनौ सप्तमी तथा च गुरुः षष्ठी शशांके नवमी च शुक्रे बुधे द्विती
यानपनेचतुर्थी जीवेष्टमी सौरिकुजेकिसप्तमी योगाविषाख्याकुलनाशनाः स्युः अथ हुताशनाख्याः सूर्यांगेति द्वादश्यादितिथयः सूर्यादिवारेषु हुता
शनाख्याः स्युः वसिष्ठः सप्तषष्ठ्यादितिथयः सोमवारादिभिर्युताः अग्निजिह्वाः सप्तयोगामंगलेषतिगर्हिताः ८ अथ यमघंटाः मघाविशाखादिनक्ष
त्राणि रविवारादिषु यमघंटसंज्ञानि स्युः यथा अर्कवारे मघा यमघंटा एवं सोमवारे विशाखा इत्यादि गर्गः मघाविशाखाआर्द्रा च मूलमृक्षं च कृत्तिका

१२ ६ ७ ८ ९ १० ११
सूर्यांगसप्तोरगगोदिगीशा दग्धाविषाख्याश्च हुताशनाश्च ८ सूर्यादिवारेतिथयो भवंति मघाविशाखाशिवमूलवह्नि ब्राह्म्यं करो
कौ यमघंटकाश्च शुभे विवर्ज्या गमने त्ववश्यं ९ भाद्रे चंद्रदृशौ नभस्यनलनेत्रे माधवे द्वादशी पौषे वेदशरा इषे दशशिवा मार्गेद्रि
ऽनागामधौ ॥

रोहिणी हस्त इत्युक्ते यमघंटाः क्रमाद्ध्रुवेः एते दग्धादियोगाः शुभे विवाहादिकार्ये वर्ज्याः गमने तु यात्रायामवश्यं वर्ज्याः एषामपवा
दो वसिष्ठेनोक्तः दिवामृत्युप्रदाः पापदोषास्त्वेते न रात्रिषु शुभकार्ये प्रसूतौ च सर्वदा परिवर्जयेदिति आवश्यककृत्यदीपिकायां यमघंटे त्यजेदष्टौ
मृत्यौ द्वादशनाडिका इति अन्येषां पापयोगानां मध्याह्नात्परतः शुभमिति ९ अथ चैत्रादिमासे शून्यतिथीः शार्दूलविक्रीडितेनाहानुष्टुभाचाह
भाद्र इति शक्रा इति च भाद्रपदादिश्लोकोक्तमासेषु चंद्रदृशौ प्रतिपद्द्वितीये इत्यादिक्रमोक्ततिथयः उभयपक्षगाः शुक्लकृष्णपक्षगताः शून्यसंज्ञ
काः बुधैः कीर्तिताः कथिताः यथा भाद्रपदे प्रतिपद्द्वितीये उभयपक्षे शून्ये एवं नभसि श्रावणे उभयपक्षे तृतीयाद्वितीये शून्ये इत्यादि अनुक्रमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तानां ऊर्जाषाढतपस्यशुक्रतपसां कार्तिकाषाढज्येष्ठफाल्गुनमाघानां कृष्णपक्षे क्रमेण शरांगाब्धयः शक्राः पंच एतास्तिथयः शून्या यथा कार्तिककृष्णे पंचमी शून्या एवमाषाढकृष्णे षष्ठी फाल्गुनकृष्णे चतुर्थी ज्येष्ठकृष्णे चतुर्दशी माघकृष्णे पंचमी अथैषामेव कार्तिकादिमासानां शुक्लपक्षे शक्राह्व्यग्निविश्वरसाः क्रमाच्छून्याः यथा कार्तिकशुक्ले चतुर्दशी शून्या आषाढशुक्ले सप्तमी फाल्गुनशुक्ले तृतीया ज्येष्ठशुक्ले त्रयोदशी माघशुक्ले षष्ठी चेति वसिष्ठः अष्टमी नवमी चैत्रे पक्षयोरुभयोरपि माधवे द्वादशी त्याज्या पक्षयोरुभयोरपि ज्येष्ठे त्रयोदशी निंद्या सिते कृष्णे चतुर्दशी आषाढे कृष्णपक्षस्य षष्ठी शुक्ले तु सप्तमी द्वितीया च तृतीया च श्रावणे सितकृष्णयोः प्रथमा च द्वितीया च नभस्ये मासि निंदिते दशम्येकादशी निंद्या मासीषे शुक्लकृष्णयोः ऊर्जे चतुर्दशी शुक्ला कृष्णपक्षे तु पंचमी सप्तमी चाष्टमी सौम्ये पक्षयोरुभयोरपि पौषे पक्षद्वये चैव चतुर्थी पंचमी तथा माघे तु पंचमी ष

गोष्ठी चोभयपक्षगाश्च तिथयः शून्या बुधैः कीर्तिता ऊर्जाषाढतपस्यशुक्रतपसां कृष्णे शरांगाब्धयः १० शक्राः पंच सिते शक्राह्व्यग्निविश्वरसाः क्रमात् तथा निंद्यं शुभे सार्पे द्वादश्यां वैश्वमादिमे ११ अनुराधा द्वितीयायां पंचम्यां पित्र्यभं तथा उत्तराश्च तृतीयायामेकादश्यां च रोहिणी १२ स्वाती चित्रे त्रयोदश्यां सप्तम्यां हस्तराक्षसे नवम्यां कृत्तिकाष्टम्यां पूभाषष्ठ्यां च रोहिणी ॥ १३

ष्ठी शुक्ले कृष्णे यथाक्रमं तृतीया च चतुर्थी च फाल्गुने सितकृष्णयोः तिथयो मासशून्याख्या वंशवित्तविनाशनाः आसु श्राद्धं प्रकुर्वीत नैव मंगलमाचरेदिति १० अथ नक्षत्रसंबंधि दोषान्सार्धानुष्टुप्द्वयेनाह तथेति अनुराधेति स्वातीति च शुभे कृष्णे द्वादश्यां सार्पमाश्लेषा निंद्या आदिमे प्रतिपदि वैश्वमुत्तराषाढा राक्षसं मूलं लक्ष्यः द्वितीयया चानुराधा उत्तरा च तृतीयया पंचम्यां च मघा युक्ता चित्रा स्वाती त्रयोदशी प्रतिपद्युत्तराषाढा नवम्यां कृत्तिका यदि सप्तम्यां हस्तमूले च षष्ठ्यां ब्राह्म्यं भवेद्यदि पूर्वभाद्रपदाष्टम्यां एकादश्यां च रोहिणी द्वादश्यां च यदाश्लेषा त्रयोदश्यां मघा यदि इत्यादि एषु कार्येषु कृते चेत्स्यात्षण्मासान्मरणं ध्रुवमिति ११ १२ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथचैत्रादिमासेषुशून्यनक्षत्राण्यनुष्टुप्द्वयेनाह कदास्त्रेति कदास्त्रभेरोहिण्यश्विन्योचैत्रेशून्येनक्षत्रे एषुसुभकार्येनकार्यं यतोवित्तविनाशदाः
धननाशकराइत्यर्थः एवंवैशाखेत्वाष्ट्रवायूचित्रास्वात्योशून्यभे पाशीवरुणस्तद्देशततारा अजपात्पूर्वाभाद्रपदा वसिष्ठः अश्विनीरोहिणीचैत्रेशून्यभेप
रिकीर्तिते चित्रास्वातीचवैशाखेज्येष्ठेविश्वेज्यतारकौ भगवासवमाषाढेश्रावणेहरिविश्वभे नभस्येवारुणांत्यर्क्षमजपादश्वयुज्यपिकार्त्तिकेपित्तवन्हृ
क्षेसौम्येचित्राहिर्दैवते पौषेदस्त्रकराद्रीःसुर्माघेमूलंचविष्णुभं तपस्येशक्रभरणीशून्यभान्याहुरग्रजाः।एषुयत्तुकृतंकर्मधनैःसहविनश्यतीति १४ १५
अथचैत्रादिमासेषुशून्यराशीननुष्टुभाह घटइति वसिष्ठः घटमत्स्यवृषायुग्ममेषकन्याःसवृश्चिकाः तुलाचापकुलीराख्यामृगसिंहाश्वराशयः चैत्रादौ

कदास्त्रभेत्वाष्ट्रवायूविश्वेज्यौभगवासवौ वैश्वश्रुतीपाशिपौहेऽजपादग्निपित्र्यभे १४ चित्राहीशौशिवाश्व्यर्कौःश्रुतिमूलेयं
मेंद्रभे चैत्रादिमासेशून्याख्यास्ताराविवित्तविनाशदाः १५ घटोझषोगोर्मिथुनंमेषकन्यालितौलिनः धनुःकर्कोमृगःसिंहश्चै।
त्रादौशून्यराशयः १६ पक्षादितस्त्वोजतिथौघटेणौपंचास्यनक्रौमिथुनांगनेच चापेंदुभेकर्कहरीहयांत्योगोंत्योचनेष्टेति
थिशून्यलग्ने १७

मासशून्याख्यावंशवित्तविनाशनाःइति १६ अथविषमतिथिषुदग्धलग्नानीन्द्रवज्रयाह पक्षादितइति शुक्लपक्षकृष्णपक्षा
दितःप्रतिपदमारभ्यतः ओजतिथौविषमतिथौप्रतिपत्तिथौघटेणौतुलामकरौ तृतीयायांमृगेंद्रनक्रौसिंहमकरौ पंचम्यांमिथुनकन्ये सप्तम्यांचापें
दुभेधनुःकर्कौ नवम्यांकर्कहरीकर्कसिंहौ एकादश्यांहयांत्यौधनुर्मीनौ त्रयोदश्यांगोंत्यौवृषमीनौ एतेतिथिशून्यलग्ने तस्यांतस्यांतिथौनष्टे
निषिद्धे वसिष्ठः मृगसिंहौतृतीयायांप्रथमायांतुलामृगौ पंचम्यांबुधराशीद्वौसप्तम्यांचापचंद्रभे नवम्यांसिंहकीटाख्यावेकादश्यांगुरोर्गृहे वृष
मीनौत्रयोदश्यांदग्धसंज्ञास्त्वमीगृहाः दग्धसमनियत्कर्मकृतंसर्वंप्रणश्यति १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गंगायमुनयोर्मध्ये मध्यदेशः अन्नीतितः।

मु॰ टी॰
मु॰ प्र॰
७

अथैषांदुष्टयोगानांशुभकृत्यावश्यकत्वेसतिपरिहारमाहनारदः तिथयोमासशून्याइतिद्वाभ्यां पंचंघकाणलग्नानिविवाहप्रकरणेवक्ष्यंते जन्मोहने केंद्रेचैवत्रिकोणेचशुभेष्वुपचयेपिवा एकोपिबलवांश्चापिशून्यतिथ्युडुनाशकाइति १८ १९ अथहस्तार्कादिसिद्धियोगानांतिथिविशेषणातिनिंद्यत्वमनुष्टुप्द्वयेनाह वर्जयेदिति बुधानुराधामितिच श्रीपतिः हस्तेरवौशशधरेचमृगोत्तमांगंभौमेश्विनीबुधदिनेचतथानुराधा पुष्योगुरौभृगुसुतेपिचपौष्णधिष्ण्यंरोहिण्यथार्कतनयेऽमृतसिद्धियोगाः एतेपंचम्यादितिथिषुचेद्भवंतितदावर्ज्याः यथापंचम्यांहस्तार्कौवर्ज्यः एवमग्रेपिपश्चादौ अन्येउक्तंच अर्केहस्तः पंचमीचसोमेषष्ठीचचांद्रभं अश्विनीसप्तमीभौमेबुधेमैत्रंतथाष्टमी गुरौपुष्यंचनवमीदशमीरेवतीभृगौ ए

तिथयोमासशून्याश्चशून्यलग्नानियान्यपि मध्यदेशेविवर्ज्यानिनदूष्याणीतरेषुतु १८ पंचंघकाणलग्नानिमासशून्याश्चराशयः गौडमालवयोस्त्याज्यान्यदेशेनगर्हिताः १९ वर्जयेत्सर्वकार्येषुहस्तार्कंपंचमीतिथौ भौमाश्विनींचसप्तम्यां षष्ठ्यांचंद्रेंद्रवंतथा २० बुधानुराधामष्टम्यांदशम्यांभृगुरेवतीं नवम्यांगुरुपुष्यंचैकादश्यांशनिरोहिणीं २१ गृहप्रवेशेयात्रायांविवाहेचयथाक्रमं भौमाश्विनींशनौब्राह्म्यंगुरौपुष्यंविवर्जयेत् २२ आनंदाख्यः कालदंडश्चधूम्रोधातासौम्योध्वांक्षकेतूक्रमेण श्रीवत्साख्योवज्रकंमुद्गरश्चछत्रंमित्रंमानसंपद्मलुंबौ २३ ॥

कादश्यांशनौब्राह्म्यंवर्जयेत्सर्वदाबुधैरिति २० २१ अन्यदप्याह गृहप्रवेशइति ननुभौमाश्विन्यादीनांगृहप्रवेशादौस्वतएववारनक्षत्रदोषादप्राप्तेः किमर्थमिदंवचनं उच्यते यदिविष्टिर्व्यतीपातोदिनंवाप्यशुभंभवेत् हन्यतेऽमृतयोगेनभास्करेणतमोयथेतिवचनात्कार्यमात्राप्राप्तस्यप्राप्ते आवश्यत्वेप्रवेशादिसंभावनास्यात्तदर्थमपवादवचनंयुक्तमेव २२ अथानंदादियोगान्शालिन्युपजातिकाभ्यामाह आनंदइति उत्पातइतिचस्व

राम॰
७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२४ अथैषांगणनोपायमनुष्टुभाह दस्रादिति अत्रनक्षत्राणांसाभिजितांगणनाकार्या यतोष्टाविंशतियोगाः यथाऽर्कदिने अद्यदिननक्षत्रंश्रव
णस्तदाश्विनीतःसाभिजिद्गणनयात्रयोविंशतिसंख्यमस्ति तथासंख्यानंदादियोगेषुत्रयोविंशतिसंख्योगदयोगोजातः एवमिंदुवारेमृगशीर्षोद्गण
नयाआनंदादयोज्ञेयाः २५ अथैतेषुकियतांदुष्टयोगानामवश्यकर्त्तव्यपरिहारशालिन्याह ध्वांक्षइति ध्वांक्षवज्रमुद्गरयोगेषुआद्याइषुनाड्यः
पंचघटिकावर्ज्याः पद्मलुंबयोर्वेदाश्चतस्रः एवंगदेऽश्वाःसप्त धूम्रेमूरेकैव काणेघटिद्वयं मुसलेद्वेघटिके राक्षसमृत्यूत्पातकालाः सर्वेषष्टिघटिका
त्मकावर्ज्याः कालःकालदंडः अत्राप्युक्तेपिचरेयोगेघटित्रयंवर्ज्यं उक्तंचज्योतिःसागरे ध्वांक्षेंद्रायुधमुद्गरेषुघटिकास्त्याज्यास्तुपंचादितःपद्मलुंब

उत्पातमृत्यूकिलकाणसिद्धीशुभोमृताख्योमुसलंगदश्च मातंगरक्षश्चरसुस्थिराख्यःप्रवर्धमानाःफलदाःस्वनाम्ना २४ दा
स्रार्केमृगादिंदौसार्पात्भौमेकराद्बुधे मैत्राद्गुरौभृगौवैश्वात्गण्यामंदेचवारुणात् २५ ध्वांक्षेवज्रेमुद्गरेचेषुनाड्योव
र्ज्यावेदाःपद्मलुंबेगदेश्वाः धूम्रेकाणेमौलयेभूर्द्वयंद्वेरक्षोमृत्यूत्पातकालाश्चसर्वे २६ सूर्यभाद्वेदगोतर्कदिग्विश्वन
खसंमिते चंद्रर्क्षेरवियोगाःस्युर्दोषसंघविनाशकाः २७ सूर्येर्कमूलोत्तरपुष्यदास्रंचंद्रेश्रुतिब्राह्मशशीज्यमैत्रं ॥

कयोश्चतस्रउदिताधूम्रेसदैकापुनः द्वेकाणेमुसलाद्वयेपिचगदेसप्तैवतिस्रश्चरेमृत्यूत्पातकरक्षसांदिनगतास्ताःकालदंडेतथा २६ अथदोषापवाद
भूतान्रवियोगाननुष्टुभाह सूर्यभादिति सूर्योयत्रतन्नक्षत्रमारभ्यचंद्रर्क्षेदिननक्षत्रेचतुर्नवषट्दशत्रयोदशविंशतिसंख्याकेसतिरवियोगाःस्युः तेचदो
षसमूहानांनाशकराः उक्तंच सूर्याच्चतुर्थेदशमेचषष्ठेविश्वर्क्षकेविंशतिमेनवर्क्षे भवंतिषट्भानुसदृक्षयोगाःकुयोगविध्वंसकराःप्रदिष्टाः २७ अ
थसूर्यादिवारेषुनक्षत्रविशेषैःसिद्धियोगानिंद्रवज्रोपजातिकाभ्यामाह सूर्येइति जीवइतिच रविवारेहस्तमूलश्रुत्तरापुष्याश्विनीनक्षत्राणिपूर्वैराचार्यैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वार्थसिध्यै कथितानि एवं चंद्रे श्रवणादीनि एते सिद्धियोगाः दस्रादर्के मृगादिंदाविन्यादिप्रकारेण आनंदादिसमीचीनसद्योगसंबंधिनक्षत्रै रुपनिबद्धाः
भौमपराक्रमेण कुयोगा अप्युक्ताः ज्येष्ठावह्निमघाविशाखवसवो मैत्रं यमाख्यं रवौ सोमे शैव विशाखपुष्यपवनाश्विन्यात्वषाढाद्वयं भौमे विश्वजले शमि
त्रवसवः साम्याद्रसार्पौ शिवः शूली रेवति पूर्वयोनि भरणी वस्वश्विमूला बुधे जीवे मूलमघाद्वयाम्यवरुणा पूषा शशी रोहिणी शुक्रे स्वाति भुजंगदेवतम
घापुष्योत्तरारोहिणी सौरेवर्यमभूलहस्तवरुणाषाढाद्वयं रेवती चित्रा विष्णुमघाश्च सर्वसमये त्याज्या अयोगा बुधैरिति २८ २९ अथावश्यकव
र्ज्यत्वेनस्मृतिसुपस्थित्यर्थं उत्पातमृत्युकाणसिद्धियोगान् शालिन्याह द्वीशादिति विशाखादिचतुर्नक्षत्रै रुत्पातमृत्युकाणौ च सिद्धियोगाः रविवारे

भौमे मघहिर्बुध्न्यकृशानुसार्पत्ते ब्राह्मे मैत्रार्कककृशानुचांद्रं २८ जीवेंत्यमैत्राश्व्यदितीज्यधिष्ण्यं शुक्रेंत्यमैत्राश्व्यदितिश्रवो भं
शनौ श्रुति ब्राह्म्यसमीरभानि सर्वार्थसिध्यै कथितानि पूर्वैः २९ द्वीशात्तोयाद्वासवात्पौष्णभाच्च ब्राह्मात्पुष्यादर्यमर्क्षाच्चतुर्भैः
स्यादुत्पातो मृत्युकाणौ च सिद्धिर्वारेर्काद्ये तत्फलं नाम तुल्यं ३० कुयोगास्तिथिवारोत्थास्तिथिभोत्था भवारजाः हूणवंगखश
शेष्वेव वर्ज्यास्त्रितयजास्तथा ३१ पुस्तुः यथा रवौ विशाखा उत्पातः अनुराधा मृत्युः ज्येष्ठा काणः मूलं सिद्धिरिति एवं सोमवारादौ पूर्वाषा
ढादितो ज्ञेयं तत्फलं नामसदृशं उत्पातमृत्युकाणा निषिद्धाः सिद्धिः शुभ इत्यर्थः नारदः विशाखादिचतुर्वर्गमर्कवारादिषु क्रमात् उत्पातमृत्युकाणा
ख्या योगाश्चामृतसंयुता इति ३० अथ देशविशेषेण कुयोगानां परिहारमनुष्टुभाह कुयोगा इति तिथिवारोत्थाः कुयोगाः क्रकचादयः तिथिभोत्थाः
अनुराधा द्वितीयायामित्यादयः भवारजाः याम्यं त्वाष्ट्रं वैश्वदेवमित्यादयः तथा त्रितयजाः तिथिवारनक्षत्रजाः वर्जयेत्सर्वकार्येषु हस्तार्कपंचमीतिथावि
त्येवमादयस्ते सर्वे हूणवंगखशदेशेष्वेव वर्ज्याः अन्यदेशे न निषिद्धा इत्यर्थः नारदः तिथिवारोद्भवा नेष्टा योगा वारर्क्षसंभवाः हूणवंगखशेष्वेवान्यदेशे षु तेषु
भप्रदा इति ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ समस्त शुभकृत्येवर्ज्यान् शार्दूलविक्रीडितेनाह सर्वस्मिन्निति सर्वस्मिन् शुभेकार्ये एतानि वै नि श्चयेन त्यजपरिहरेत्यर्थः विधुना पापेन वा पापैः क्षी
णेंद्व र्कमहीसुतार्कतनयैर्वा युजोयुक्तो नतुल वौ लग्नलग्ननवांशौत्याज्यौ पूर्णक्षीणोपिवा चंद्रोलग्नेसर्वत्रगर्हितइति कश्यपोक्तेः पापैंदूलग्नगौवां शगतौव
र्ज्यौ शुभेस्वदेतिच निशाङ्कार्धे रात्र्यर्धे दिनार्धेच घटीत्र्यंशं विंशतिपलानिदश पूर्वदश पश्चाच्च परिहर उक्तंच मृतेः कालोनिवसतिमहानिशायां चदिनदलेयस्मात् दश पू
र्वदश परतस्तस्माद्वर्ज्यानि चपलानि कुनवांशकं पापग्रहनवांशकं परिहर अथग्रहणतः पूर्वं दिनानां त्रयं परिहर उत्पातग्रहतः उत्पातादिव्यभौमांतरिक्षास्तेयस्मिन्दि
नेभवंतितत्तोः इयहाश्च सप्तदिनानि वर्ज्यानि ग्रहोयहणंतस्मात्त्र्यपि सप्तदिनानि वर्ज्यानि उक्तंच चंद्रसूर्योपरागे शुभ्यहं पूर्वं शुभंत्यजेत् सप्ताहमशुभं पश्चात्स्म
तंग्रहणस्तकं त्रिविधोत्पातनश्चोर्ध्वेसिंहिकासूनुदर्शने सप्तरात्रंनकुर्वीतयात्रोद्वाहादिमंगलमिति अंगिरा अपि सर्वग्रासे तु सप्ताहमर्धग्रासेदिनत्रयं त्रिद्व्येकां
गुलतोग्रासेदिनमेकं विवर्जयेत् वसिष्ठः सर्वग्रासेदिनान्यष्टौ सर्वकार्ये विवर्जयेत् षट्दिनानि त्रिभागोने अर्धग्रासे चतुर्दिनं चतुर्थांशेत्रिरात्रं स्याद्ग्रहणे चंद्रसूर्ययोः

सर्वस्मिन्विधुपापयुक्तनुलवावर्द्धे निशाङ्गोर्घटीत्र्यंशं वैकुनवांशकं ग्रहणतः पूर्वं दिनानां त्रयं ॥

अत्र कार्यस्यावश्यकत्वे परिहारो ज्योतिर्निबंधे
पंचदिनानि वसिष्ठस्त्रिदिनं गर्गश्च कौशिकस्त्वेकं यवनाचार्यस्यमतं पंचमुहूर्तानि दूषयति राहुरिति अयं च निषेधो नित्यनैमित्तिकादिकृत्यातिरिक्तविष
यः गुरुः नित्ये नैमित्तिके काम्ये जपहोमक्रियासु च उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यत इति शुभदोत्पातिश्च दुष्टं दिनमिति शुभदोत्पातावराहसंहिता
यां चंडाशनिमहीकंपसंध्यानिर्घातनिस्वनाः परिवेषरजोधूमरक्तार्कास्तमनोदयाः द्रुमेभ्योन्नरसस्नेहमधुपुष्पफलोद्गमाः गोपक्षिमदवृद्धिश्च शुभा
यमधुमाधवेद्रत्यादयस्तुपरत्वेनोक्ताः एते यद्दिने भवंति तद्दिनमेव त्यज, अथ ग्रहभिन्नभं ग्रहे भौमादिभिर्भिन्नभेदितं तथा योद्धं ग्रहयोर्युद्धं यस्मिन्दि
नन क्षत्रेयुद्धं जातं तथा उत्पातभं यस्मिन्नक्षत्रे दिव्यांतरिक्षभौमास्त्रिविधोत्पाताः संभूताः एतानि ग्रहभिन्नयोद्धउत्पातनक्षत्राणि षण्मासं त्यज ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु०टी
मु०प्र
९

भेदस्ताराखेटयोर्यत्र वा स्यादिति विवाहवृंदावने नारदः ग्रहणोत्पातभं त्याज्यं मंगलेषु ऋतुत्रयमिति ननु नक्षत्रसंधौ जायमाने ग्रहणं किं नक्षत्रं दूषयेदित्य
त्राह शार्ङ्गधरः यस्मिन्विधुं राहुरिनवधिष्ण्ये ग्रहीताति तत्याज्यमृतुत्रयं स्यात् पाणिग्रहे पुंमरणं विधत्ते द्वयोर्भयोश्चेद्द्वयमेव जह्यात् अन्यच्च पक्षांतरेण ग्रह
णाद्वयं स्याद्यदा तदा तद्ग्रहणोपगंभं पक्षाद्विशुद्धं भवति द्वितीयपाणिग्रहे शुध्यति भोगषट्कात् इति ३२ अथ ग्रहणनक्षत्रे ग्रासभेदेन निंद्यान्मासदिवसां
श्चंद्रवज्रयाह नेष्टमिति ग्रहर्क्षे ग्रहणनक्षत्रं क्रमात् संपूर्णार्धचतुर्थांशग्रासे सति षट्त्र्येकमासान्नेष्टं गुरुः सर्वग्रासेषु षण्मासान् त्रीन्मासांस्तदर्धे
ग्रहे आपादग्रहणे धिष्ण्ये मासमेकं विवर्जयेत् अथ क्रमात् ग्रस्तेऽस्तगे ग्रहणार्धग्रासे उभयोः प्राक्पश्चाच्च त्रित्रिघस्रा नेष्टाः तथा अर्धखंडे ग्रस्तास्त
ग्रस्तोदययोरभावेपि अर्धग्रासे उभयोः प्राक्पश्चाच्च त्रित्रिघस्रा नेष्टाः गुरुः ग्रस्तास्ते त्रिदिनं पूर्वं पश्चाद्ग्रस्तोदये तथा खंडग्रासे त्रित्रिदिनं निःशेषे सप्त स

उत्पातग्रहतोऽद्यहांश्च शुभदोत्पाते च दृष्टं दिनं षण्मासं ग्रहभिन्नभं त्यज शुभे योग्यं तथोत्पातभं ३२ नेष्टं ग्रहर्क्षं सकलार्ध
पादग्रासे क्रमात्तर्कगुणेंदुमासान् पूर्वं परस्तादुभयोस्त्रिघस्रा ग्रस्तेऽस्तगे वाप्युदिते च खंडे ३३ जन्मर्क्षमासतिथयो व्यतिपा
तभद्रावैधृत्यमापितृदिनानि तिथिक्षयर्द्धी॥ प्रचेति कश्यपः ग्रस्तोदये परे दोषो ग्रस्तास्ते वीकृपार्थीनयोः द्युनिशार्धे तूभयं तत्खंडीखं
डव्यवस्थयोरिति ३३ अथ सामान्यतो वश्यवर्ज्यानि पंचांगदूषणादीनि वसंततिलकाद्युक्त्याह जन्मर्क्षेति परिघार्धेति च जन्मनक्षत्रजन्ममासज
न्मतिथयः शुभकर्मसु वर्ज्याः अयं निषेधश्चाद्यगर्भस्यैव नारदः न जन्ममासे जन्मर्क्षे न जन्मदिवसेपि वा आद्यगर्भसुतस्याथ दुहितुर्वा करग्रहः इति ज
न्ममासः स विज्ञेयो वर्जितः सर्वकर्मसु वस्तुतस्तु यत्र शुक्लादिचांद्रमासे चैत्रादौ जन्म भूत्तस्य चांद्रो मासो जन्ममासस्त्याज्यः इंद्राग्नी यत्र हूयेते मासादिः
संप्रकीर्तिताः अग्नीषोमौ स्मृतौ मध्ये समासौ पितृसोमकौ इति हारीतोक्तमासलक्षणात् व्यतीपातादयश्च वर्ज्याः पितृदिनं मातापित्रोर्मरणदिनं तिथि ए०म:
क्षयर्द्धी तिथिक्षयस्तिथिवृद्धिश्च तल्लक्षणमाह वसिष्ठः स्पृशेत्तिस्रस्तिथीर्यो वार एकस्मिन्नवमा तिथिः तिथिर्वारत्रये चैका त्रिद्युस्पृक् द्वेपि निंदिते। ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यूनमासः अधिमासश्चवर्ज्यः संक्रमद्वयसहितः क्षयमासः अधिकमासोऽसंक्रांतः कुलिकार्धप्रहरौ वक्ष्यमाणौ पातो महापातः विष्कुंभयोगवज्रयो
र्योगयोराद्यंघटिकात्रयमेववर्ज्यं एवंप्रकारेणकेश्चिद्वज्रयोगेनवघटिकावर्ज्याइत्युक्तं यथा विष्कुंभाद्यघटीत्रयंचनवकंव्याघातवज्रयोर्द्वयेइति हत्तश
तेतथा व्याघातेवज्रकेकाइतिगणेशज्योति विदुक्तिरपिनिरस्ता विष्कुंभवज्रयोस्तिस्रः षट्चगंडातिगंडयोः व्याघातेनवशूलेतुपंचनाड्योविगर्हिता
इतिकश्यपोक्तेः परिघस्याद्यार्धंवर्ज्यं शूलस्याद्याःपंच गंडातिगंडयोराद्याः षट्षट्घटिकाः व्याघातेचादिमानवघटिकाः वर्ज्याः ३४ ॥३५ अथ
पक्षरंध्रतिथीरावश्यकत्वेतन्निष्टवर्ज्यघटीश्चानुष्टुभाह वेदांगेति चतुर्थी षष्ठीअष्टमीनवमीद्वादशीचतुर्दशीएताःपक्षरंध्रतिथयोतेयाः आसुशुभ
कृत्यस्यावश्यकत्वेसतिआदिमाः क्रमात् वसंकमनुतत्वाशशशरानाडीस्त्यजेत् यथा चतुर्थ्याः आदिमाअष्टघटिकाः षष्ठ्यांनव अष्टम्यांचतुर्दश न

न्यूनाधिमासकुलिकप्रहरार्धपातविष्कुंभवज्रघटिकात्रयमेववर्ज्यं ३४ परिघार्द्धंपंचशूलेषट्चगंडातिगंडयोः व्याघाते
नवनाड्यश्चवर्ज्याःसर्वेषुकर्मसु ३५ वेदांगाष्टनवार्केद्रपक्षरंध्रतिथीस्त्यजेत् वसंकमनुतत्वाशशशरानाडीःपराःशुभाः ३६
कुलिकःकालवेलाचयमघंटश्चकंटकः ॥ ३६वम्यांपंचविंशतिः द्वादश्यांदश चतुर्दश्यांपंचघटिकास्त्याज्याइत्यर्थः परा उर्वरिताःशुभाज्ञे
याः वसिष्ठः चतुर्दशीचतुर्थीचअष्टमीनवमीतथा षष्ठीचद्वादशीचैवपक्षच्छिद्राह्वयाइमाः क्रमादेतासुतिथिषुवर्जनीयाश्चनाडिकाः भूताष्टमनुतत्वा
कदशशेषास्तुशोभनाः दोषनाडीषुयत्कर्मकृतंसर्वंविनश्यतीत्यादि कश्यपेनसर्वसाधारण्येनदर्शैववर्जिताः ३६ अथकुलिकाकालवेलायम
घंटककंटकदोषाननुष्टुभाह कुलिकइतिवर्तमानवारान्मंदेशनेश्वरेगणितेसतियोंकोभवतितस्मिन्द्विगुणेयोंकस्तत्संख्याक्षणोमुहूर्तः कुलिकोभव
ति एवंबुधेजीवेभौमेवर्तमानवाराद्गणितेयोंकोभवतिसद्विघ्नः क्रमात्कालवेलायमघंटकंटकसंज्ञादुष्टमुहूर्ताः स्युः यथारविजः शनिः सप्तसंख्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु. टी. कः तस्मिन् द्विगुणेचतुर्दशजाताः तेनरवौचतुर्दशोमुहूर्तः कुलिकः ।एवंबुधः संख्याचत्वारः तत् द्विगुणोऽष्टमोमुहूर्तः कालवेला जीवेपंचद्विघ्नेदशमो
मु. प्र. यमघंटः भौमेतृतीयेद्विघ्नेषष्ठोमुहूर्तः कंटकसंज्ञः इत्यर्थः एवंसोमवारादावपि अयमशुभकृत्यावश्यकत्वेसतिदेशभेदेनकुलिकादिदोषपरिहारमा
१० हगर्गः विंध्यस्योत्तरकूलेतुयावदातुहिमाचलं यमकंटकदोषोस्तिनान्यदेशेषुविद्यते मत्स्यागमागधांध्रेषुयमघंटस्तुदोषकृत् काश्मीरेकुलिकंदु
ष्टमर्धयाममुसवत्तइति केचिन्मतेकालवेलारवितःशराक्षितर्कानलागांबुधयो ५।२।६।३।७।४ गजेंद्र ८।१।। दिनेनिशायामृतुवेदनेत्रनगेषुरामा
६।४।२।७।५।३ विधुदंतिनौ १।८ च गजेंद्र इत्यर्धप्रहरहयंशनौ यात्रायांमरणंकालेवैधव्यंपाणिपीडने व्रतेब्रह्मवधःप्रोक्तः शुभकर्मततस्त्य"

वारेद्विघ्नेक्रमान्मंदेबुधेजीवेकुजेक्षणः ३७ सूर्येषट्स्वरनागदिङ्मनुमिताश्चंद्रेब्धिषट्कुंजरांकार्काविश्वपुरंदराक्षिति
सुतेह्यब्ध्यग्नितर्कादिशः सौम्येह्यब्धिगजांकदिङ्मनुमिताजीवेद्विषट्भास्कराः शक्राख्यास्तिथयःकलाश्वभृगुजेवेदे
षुतर्कायहाः ३८ दिग्भास्करामनुमितोश्वशनौशशिद्विनागादिशोभवदिवाकरसंमिताश्च दुष्टक्षणाःकुलिककंटकका
लवेलासुश्चार्धयामयमघंटगताःकलांशाः ३९ ॥

॥जेत् गौडाः सूर्येवेदशरौ ४।५ चंद्रेहयपक्षौ ७।२ कुजेक्षिभूः २।१।। ज्ञेबाणा
ग्नी ५।३ गुरौदंतिहयौ ८।७ शुक्रेत्रिवेदकौ ३।४।।मंदेतर्कगजौ ६।८ ज्ञेयौयामार्धावशुभौसदेति ३७ अथसूर्यादिवारेषुशिष्याणांसद्यएवदोष राम.
ज्ञानार्थंदुर्मुहूर्तादिनामकान् मुहूर्तान् शार्दूलविक्रीडितवसंततिलकाभ्यामाह सूर्येइति दिग्भास्कराइतिच रविवारेषष्ठसप्ताष्टमदशमचतुर्दे १०
शमुहूर्तानिंद्याः ।एवंसर्वत्र अयमर्थोमूलेन्यासतः स्पष्टएव एषुमुहूर्तेषुकश्चिद्दुर्मुहूर्तःकश्चित्कुलिकःकंटकःकालवेलाख्यः अर्धयामाख्यः
यमघंटाख्यः स्यात् तत्प्रमाणंकलांशः दिनमानस्यषोडशांशः ३८ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविवाहादिशुभकृत्येहोलिकाष्टकनिषेधंदेशपरत्वेनाह विपाशेति विपाशाइरावतीशतद्रुः एताःपश्चिमदेशप्रसिद्धाःनद्यः तासांतीरेउभयततटवर्ति
देशेत्रिपुष्करदेशेचहोलिकाफाल्गुनशुक्लपौर्णिमाततःप्राग्दिनाष्टकंविवाहादिशुभकृत्येनेष्टंनिषिद्धंअर्थादन्यदेशेननिषिद्धं ४० अथमृत्युयोगादि
दुष्टयोगपरिहारमनुष्टुभाह मृत्युक्रकचेतिमृत्युयोगादास्त्वादर्केइत्यादिनाआनंदादिषूक्ताः क्रकचाःषष्ठ्यादितिथयोमंदादिलोमभित्युक्ताः दग्धा
दियोगाःसूर्येशपंचाग्नीत्यादिनोक्ताः चंद्रेशस्तेकर्तुर्गोचरेणसमीचीनेसतिएतान्योगान्शुभानशुभफलदानजगुःऊचुः राजमार्तंडः क्रकचामृत्यु।
योगाख्यादिनंदग्धंतथैवच चंद्रेशुभेसर्वयातिनष्टाश्चत्रहताइव अथकेचिदाचार्याः यामोत्तरंप्रहरोत्तरंमृत्युक्रकचदग्धादीनशुभानजगुःसए

विपाशेरावतीतीरेशतद्र्वाश्चत्रिपुष्करे विवाहादिशुभेनेष्टंहोलिकाप्राग्दिनाष्टकं ४० मृत्युक्रकचदग्धादीन्निंद्येश
स्तेशुभाञ्जगुः केचिद्यामोत्तरंचान्येयात्रायामेवनिंदितान् ४१ अयोगेसुयोगोपिचेत्स्यात्तदानीमयोगंनिहत्यै।
षसिद्धिंतनोति ॥ ६ ॥

५वाह उत्पातेयमघंटेचकाणेचक्रकचेतथा तिथौदग्धेचकालेचप्राग्यामान्परतः शुभमिति अथान्येआचा
र्याः मृत्युक्रकचदग्धादीन्यात्रायामेवनिंदितान्जगुः विवाहादौतुनदोषः लल्लः वारर्क्षतिथियोगेषुयात्रामेवविवर्जयेत् विवाहादीन्निकुर्वीतग
गादीनामिदंवचः निंद्येष्वितिशेषः अन्यच्च अयोगेषुचसर्वेषुवर्जयेद्घटिकाद्वयं उत्पातमृत्युकाणानांपंचषट्सप्तनाडिकाः ४१ पुनरप्यपवा
दंभुजंगप्रयातेनाह अयोगेइति अयोगेक्रकचादौसतिचेत्सुयोगःसिद्धियोगोपिस्यात् तदाएषःसिद्धियोगःअयोगफलंनिहत्यसिद्धिंतनोति नि।
ष्पादयति मार्तंडः अयोगःसिद्धियोगश्चद्वावेतौभवतोयदि अयोगोहन्यतेतत्रसिद्धियोगःप्रवर्तते परेआचार्याः लग्नशुद्ध्याकुयोगादिनाशमा
हुः यदाहसएव यत्रलग्नंविनाकिंचित् क्रियतेशुभसंज्ञकं तत्रतेषामयोगानांप्रभवाज्जायतेफलं ॥ अथावश्यककृत्येकालांतराभावेपरिहारमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हविष्टिपूर्वमिति विष्टिर्भद्रा सा पूर्वार्धस्य विष्ट्यादिकं मध्याह्नानंतरं शस्तमाहुः उक्तंच विष्टिरंगारकश्चैव व्यतीपातः सवैधृतिः प्रत्यरं जन्मनक्षत्रं म। ध्याह्नात्परतः शुभमिति ४२ अथभद्रां शालिन्याह शुक्ले इति शुक्ले शुक्लपक्षे ; ष्टम्यां पौर्णिमायांच पूर्वार्द्धे भद्रा स्यात् एकादश्यां चतुर्थ्यां च उत्तरार्धे भ द्रा कृष्णपक्षे तृतीयायां दशम्यां च अंत्यार्धे उत्तरार्धे सप्तम्यां शंभुतिथौ चतुर्दश्यां च पूर्वार्धे पूर्वभागे भद्रा स्यात् भद्रास्वरूपं रत्नमालायां उद्वद्दोद्भटत रेत्यादि ४३ अथचतुर्थ्यादितिथिषु भद्रायाः मुखपुच्छविभागं शार्दूलविक्रीडितेनाह पंचद्व्यद्रीति चतुर्थ्यादितिथीनां पंचादिप्रहरेषु आदिघट्यः शराः पंचसंख्या विष्टेर्भद्राया आस्यं मुखं यथा चतुर्थ्याः पंचमप्रहरे आदिभूताः पंचघट्यो भद्रामुखं एवमष्टम्यां द्वितीयप्रहरे एकादश्यां सप्तमप्रहरे पू

परे लग्नशुध्याकुयोगादिनाशं दिनार्द्धोत्तरं विष्टिपूर्वं च शस्तं ४२ शुक्ले पूर्वार्धेष्टमीपंचदश्योर्भद्रैकादश्यां चतुर्थ्यां परार्धे कृष्णेंत्यार्धे स्यात्तृतीयादशम्योः पूर्वे भागे सप्तमीशंभुतिथ्योः ४३ पंचद्व्यद्रिकृताष्टरामरसभूयामादि। घट्यः शरा विष्टेरास्यमसद्गजेंदुरसरामाद्र्यश्विबाणाब्धिषु

र्णिमायां चतुर्थप्रहरे तृतीयायामष्टमे सप्तम्यां तृतीये दशम्यां षष्ठे चतुर्दश्यां प्रथमे प्रहरे भद्रामुखं स्यात् तदसत् अशुभमित्यर्थः अथ पुनश्चतुर्थ्यादितिथीनां क्रमेण गजेंद्वित्यादि प्रहरेषु अंत्यमवं घटीत्रयं पुच्छसंज्ञं तच्छुभकरं यथा चतुर्थ्या अष्टमप्रहरस्यांत्यघटीत्रयं भद्रापुच्छं एवमष्टम्यादिषु प्रथमादिप्रहरस्यांत्यघटीत्रयं पुच्छं तेयं तत्र भद्रा कर्मा। णि वसिष्ठः वधबंधविषाग्न्यस्त्रच्छेदनोच्चाटनादि यत् तुरंगमहिषोष्ट्रादि कर्म विष्ट्यां तु सिध्यति अंगविभागः कश्यपसंहितायां मुखे पंच गले त्वेका वक्षस्येकादश स्मृताः नाभिश्चतस्रः षट्कट्यां तिस्रः पुच्छे तु नाडिकाः कार्यहानिर्मुखे मृत्युर्गले वक्षसि निस्वता कट्यामुन्मत्तता नाभौ च्युतिः पुच्छे ध्रुवो जयः अथ विष्टिपरिहारमाह तथेति तिथ्यपरार्धजाति त्युत्तरार्धभूता विष्टिर्वासरे दिवसे यदि स्यात्तदा शुभकरी॥ ॥ ॥ एम. ११

CC-0. In Public Domain. Digitization by eGangotri

तयातेनैवप्रकारेणतिथिपूर्वार्द्धोत्थारात्रौशुभकरी नारदनिषेधमाह पूर्वार्धोत्थायदानिशि तदाविष्टिः शुभायेति कमलासनभाषितं ४४ अथभद्रानि
वासंतत्फलंचानुष्टुभाह कुंभकर्केति अत्रचंद्रेकुंभद्वयेकुंभमीनस्थेकर्कद्वयेकर्कसिंहराशिस्थितेमनुष्यलोकेतिष्ठति अथमेषात्रयेमेषवृषमिथुन
स्थितेअलिगेवृश्चिकस्थेचंद्रेचस्वर्गेलोकेभद्रातिष्ठति कन्यातुलाधनुर्मकरराशिषुचंद्रेअधःपाताललोकेभद्रातिष्ठति तत्रैवमर्त्यस्वर्गपातालेषुफलंचो
क्तंशुभाशुभभद्राददातीत्यपवादद्वाराप्रयोजनमुक्तंभवति उक्तंच मेषोक्षकौर्प्यमिथुनेघटसिंहमीनकर्केषुचापमृगगतौलिसुतासुचंद्रे स्वर्गेमर्त्यनागन
गरीक्रमशः प्रयातिविष्टिः फलान्यपिददातिहितत्रदेशे उक्तंचभूपालवल्लभे कर्कटकुंभद्वयेभूस्थाकौर्प्येजत्रितयेद्युगा कन्याचापद्वयेचंद्रेभद्रापा

यामेषंत्यघटीत्रयंशुभकरंपुच्छंतथावासरेविष्टिस्तिथ्यपरार्धजाशुभकरीरात्रौचपूर्वार्धजा ४४ कुंभकर्कद्वयेम
र्त्येस्वर्गेब्जेजात्रयेलिगे स्त्रीधनुर्जूकनक्रेधोभद्रातत्रैवतत्फलं ४५ वाप्यारामतडागकूपभवनारंभप्रतिष्ठेव्रतारंभो
त्सर्गवधूप्रवेशनमहादानानिसोमाष्टके गोदानाग्रयणप्रपाप्रथमकोपाकर्मवेदव्रतंनीलोद्वाहमथातिपन्नशिशु
संस्कारान्सुरस्थापनं ४६ ॥

१तालवासिनीति ४५ अथकालशुद्धौनिषेध्यवस्तूनिशार्दूलविक्रीडितेनाह वाप्यारामेति वापीदीर्घि
का आरामउपवनं तडागपुष्करिणी कूपःप्रसिद्धः एतेषामारंभप्रतिष्ठा आरंभोनिर्माणं प्रतिष्ठाउत्सर्गः तत्रगृहप्रतिष्ठागृहप्रवेशोज्ञेयः व्रता
नामनंतव्रतादीनांआरंभःग्रहणंउत्सर्गउत्थापनं महादानानितुलापुरुषादीनि सोमःसोमयागः अष्टकाअष्टकाश्राद्धं गोदानंकेशांतसंज्ञंक
र्म आग्रयणंनवान्नेष्टिः प्रपाजलशाला प्रथमकोपाकर्मप्रथमारभ्यमाणंश्रावणीकर्म वेदव्रतंमहानाम्न्यादित्रयं महानाम्नीव्रतं उपनिषद्व्रतं वे
दव्रतंच नीलोद्वाहःकाम्यवृषोत्सर्गः अतिपन्नशिशुसंस्काराः अतिपन्नाः अतिक्रांताःजातकर्मादयःशिशूनांसंस्काराः देवस्थापनं ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथान्यानिशार्दूलविक्रीडितेनाह दीक्षामौंजीति दीक्षामंत्रग्रहणादिका मौंजिविवाहौप्रसिद्धौ मुंडनंचौलं अपूर्वदेवेक्षणंतीर्थेक्षणंच सन्यासः
प्रसिद्धः अग्निपरिग्रहोग्निहोत्रं अपूर्वराजदर्शनंराजाभिषेकश्च गमंगमनंअपूर्वमेव चातुर्मास्यंचातुर्मास्ययागः समावृत्तिर्मौंजीविसर्गः श्र
वणयोर्वेधःकर्णवेधः परीक्षातप्तमाषादिरूपादिव्यमितियावत् एतानिकर्माणिबुधोनकुर्यात् कदाइज्यसितयोर्बृहस्पतिशुक्रयोर्वृद्धत्वेअस्ते
वशिशुत्वेबाल्येचतथान्यूनाधिमासेक्षयमासेअधिमासेचनकुर्यात् अत्रमूलवचनानि शातातपः अस्तंगतेगुरौशुक्रेबालेवृद्धेमलिम्लुचे उ
द्यापनमुपारंभंव्रतानांनैवकारयेत् ऋक्षोच्चयः वापीकूपतडागयागगमनंक्षौरंप्रतिष्ठाव्रतंविद्यामंदिरकर्णवेधनमहादानंवनंसेवनं तीर्थस्ना
नविवाहदेवभवनंमंत्रादिदेवेक्षणंदूरेणैवजिजीविषुः परिहरेदस्तंगतेभार्गवे उपनयनंगोदानंपाणिग्रहणंगृहप्रवेशगमनानि अस्तमितेषुन
कुर्यात्सुरगुरुभृगुपुत्रचंद्रेषु अस्तमयादिफलमाहबादरायणः गुरोरस्तेपतिंहन्याच्छुक्रास्तेचैवकन्यकां चंद्रेनष्टेउभौहन्यात् तस्मादस्तंविव

दीक्षामौंजिविवाहमुंडनमपूर्वदेवतीर्थेक्षणंसंन्यासाग्निपरिग्रहौनृपतिसंदर्शाभिषेकागमं ॥ ॥

र्जयेत् बालभावेस्त्रियंहन्यात् वृद्धभावेनरंतथा तस्माद्बाल्येचवार्द्धेचविवाहंनैवकारयेत् अथाधिमासेवर्ज्यानिगृह्यपरिशिष्टे सोमयागादिक
र्माणिनित्यान्यपिमलिम्लुचे तथैवाग्रयणाधानचातुर्मास्यादिकान्यपि महालयाष्टकाश्राद्धोपाकर्माद्यपिकर्मयत् स्पष्टमासविशेषाख्याविहि
तंवर्जयेन्मले गर्गबृहस्पती अग्न्याधानप्रतिष्ठांचयज्ञदानव्रतानिच वेदव्रतवृषोत्सर्गचूडाकरणमेखला मांगल्यमभिषेकंचमलमासेविव
र्जयेत् मरीचिः गृहप्रवेशगोदानस्नानाश्रयमहोत्सवं नकुर्यान्मलमासेतुसंसर्पोहस्पतौतथा वसिष्ठः वापीकूपतडागादिप्रतिष्ठायज्ञकर्मच राम॰
नकुर्यान्मलमासेतुसंसर्पोहस्पतौतथा यदाक्षयमासोभवतितदाक्षयमासस्यपूर्वोत्तरावधिमासौभवतः तत्रपूर्वः संसर्पः द्वितीयोंहस्पतिः एता १२
निगुरुशुक्रयोरस्तादावपिवर्ज्यानीत्याहगार्ग्यः बालेवायदिवावृद्धेशुक्रेवास्तंगतेगुरौ मलमासइवैतानिवर्जयेद्देवदर्शनं अपूर्वदेवतांदृष्ट्वाशुचः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुर्नेष्टभार्गवे मलमासेप्यनावृत्ततीर्थयात्रां विवर्जयेत् अनावृत्तात्रअपूर्वतीर्थयात्रा अत्र नियमकालानि सीमंतनामकरणादीनि पूर्वोदस्तादि स्तत्वेपि स्वस्वकाल एव कार्याणि गुरुः मासप्रयुक्तकार्येषु मूढत्वं गुरुशुक्रयोः न दोषकृन्मलेमासे गुर्वादित्यादिकं तथा अन्यत्रापि सीमंत जातकादीनि प्राशनान्तानि यानिवै न दोषो मलमासस्य मौढ्यस्य गुरुशुक्रयोरिति वसिष्ठः अतीतकालान्यखिलानि तानि कार्याणि सौम्यायनगे दिनेशे सितेगुरौ वाप्यथ दृश्यमाने तदुक्तपंचांगदिने प्रशस्ते अत एवातिपत्रशिशुसंस्कारादत्युक्तं ४७ अथ सिंहमकरस्थगुर्वादिष्वतिदेश माह अस्तेवर्ज्यमिति यदस्ते गुर्वस्ते वर्ज्यं निषिद्धमुक्तं तत्सिंहस्थे गुरौ मकरस्थे च गुरौ वर्ज्यं निषिद्धं देवीपुराणे सिंहसंस्थे गुरौ यत्नात्सर्वारंभान्वि वर्जयेत् पुत्रभ्रातृकलत्राणि हन्याच्छीघ्रं न संशयः कारको व्रजते नाशं संतानं म्रियतेऽचिरात् देवारामतडागानि प्रपोद्यानगृहाणि च विवाह

चातुर्मास्यसमावृत्तीश्रवणयोर्वेधं परीक्षां त्यजेद्वृद्धत्वास्तशिशुत्व इज्यसितयोर्न्यूनाधिमासे तथा ४७ अस्तेवर्ज्ये सिंह
नक्रस्थजीवे वर्ज्यं केचिदह्नक्रगे चातिचारे॥

ऽयत्तोपनयनचूडादि चन सिध्यति यथा सिंहस्थिते जीवस्तथैव मकरस्थितः अथ मपि निषेधो नियतकालानां संग्रहः वसिष्ठः नीचराशिगतो जीवः प्रशस्तः सर्वकर्मसु नीचे नीचांशकस्त्याज्यो यस्मादंशेषु नीचता विशेषो मांडव्येनोक्तः देवीपुराणे मकरस्थोयदा जीवो वर्जयेत्पंचमांशकं शेषेष्वपि च भागेषु विवाहः शोभनो मतः तोडरानंदः अतिचारे समप्रदिने वक्रे द्वादशमेव च नीचस्थितेपि वागीशे मासमेकं विवर्जयेत् ज्योतिर्निबंधे हरिनीचारिभागेपि व्रतोद्वाहादिमंगलं न निषिद्धं यदि स्वोच्चे स्वभे वा संस्थितो गुरुः मघात्यत्का यदा गच्छेत्फाल्गुनीं च बृहस्पतिः पुत्रिणी धनिनी कन्या सौभाग्यं सुखमश्नुते इति क्वचिदपूर्वे तीर्थयात्रायां मौढ्यादिदोषो नास्ति गोदावर्यां गयायां च श्रीशैले ग्रहणद्वये सुरासुरगुरूणां च मौढ्यदोषो न विद्यते वायुपुराणे त्रिस्थलीसेतौ गयायां सर्वका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लेषु पिंडं दद्याद्विधानतः अधिमासे जन्मदिने द्य स्तेच गुरुशुक्रयोः नत्यक्तव्यं गयाश्राद्धं सिंहस्थे च बृहस्पतौ अधिमासे सिंहगुरावस्ते च गुरु
शुक्रयोः तीर्थयात्रा न कर्तव्या गयागोदावरी विनेति अथ गुर्वोद्यस्तेयद्वर्ज्यं तद्वक्रगे गुरौ अतिचारगेपि गुरौ वर्ज्यं वात्स्यः यात्रोद्वाहप्रति
ष्ठाच गृहचूडाव्रतादिकं वर्जयेद्यत्नतश्चैव जीवे वक्रातिचारगे अस्यापवादो राजमार्तंडे वक्रातिचारगे जीवे वर्जयेत्तदनंतरं व्रतोद्वाहादि चूडा
या मष्टाविंशतिवासरान् दीपिकायां त्रिकोणजायाधनलाभराशौ वक्रातिचारेण गुरुः प्रयातः यदा तदा प्राह शुभं विलग्नं विहाय पाणिग्रह
णं वसिष्ठः अथ केचिद्गुरुसहिते आदित्ये एकराशिगतो गुरुसूर्याविति यावत् गुर्वादित्येपि सर्वं शुभकर्म वर्ज्यं शौनकः एकराशिगतो सूर्यजी
वो स्यातां यदा पुनः व्रतबंधविवाहादि शुभं कर्माखिलं त्यजेत् अथ केचिद्विश्वघस्रेपि पक्षे यस्मिन्पक्षे तिथिद्वयनाशः सत्रयोदशदिनः पक्षः
सोतिनिंद्यः उक्तं च पक्षस्य मध्ये द्वितिथी पतेतां तदा भवेद्रौरवकालयोगः पक्षे विनष्टे सकलं विनष्टमित्याहुराचार्यवराः समस्ताः तथा त्रयोद

गुर्वादित्येवि श्वघस्रेपि पक्षे प्रोचुस्तद्वद्दंतरत्नादिभूषां ४८॥ शदिने पक्षे तदा संहरते जगत् अपि वर्षसहस्रेण कालयोगः प्रकीर्ति
त इति तस्मिन्पक्षे शुभकर्म वर्ज्यमित्याहुः चंडेश्वरः त्रयोदशदिने पक्षे विवाहादि न कारयेत् गर्गादिमुनयः प्राहुः कृते मृत्युस्तदा भवेत् उप
नयनं परिणायनं वेश्मारंभादि पुण्यकर्माणि यात्रादि क्षयपक्षे कुर्यान्न जिजीविषुः पुरुषाः अथ तद्वत्तेन प्रकारेण दंतरत्नादिभूषां दंता हस्ति
दंतास्तत्संबंधिनी भूषां रत्नसंबंधिभूषां च आदिशब्दात्सुवर्णमणिसंबंधिनीं च भूषां वर्ज्यां प्रोचुः पूर्वस्मिन्निषेधकाले इत्यर्थः राजमार्तंडः
यात्राचूडाविवाहश्रुतिविचरविधिं शंखसप्तप्रवेशप्रासादोद्यानहर्म्यं सुरनरभवनारंभविद्याविधाने मौंजीबंधप्रतिष्ठामणिकनकरदाधार राम
णं कुर्वते ये मृत्युः सिंहस्थिते ज्यगुरुदिनकरयोरेकराशिस्थयोश्चेति सिंहस्थगुरोरुपलक्षणत्वात् गुर्वस्तादावपि प्रथमकर्तव्यसुवर्णादि १३
धारणनिषेध इत्यर्थः ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ सिंहस्थगुरोः प्रकारत्रयेण परिहारमुपेंद्रवज्रयाह सिंहे गुराविति अत्र प्रथमं अंशभेदेन परिहारः सिंहस्थे गुरौ सत्यपि सिंहांशे सत्यंशत्रयो
दशांशे १३।२० भ्योनंतरं सत्यंशमंशत्रयं ३।२० पंचमोनवांशः सिंहांशस्तत्र गुरौ सति विवाहो नेष्टः सिंहराशौ तु सिंहांशे यदा भवति वाक्पतिः
सर्वदेशे ध्रुवं तत्याज्यो दंपत्योर्निधनप्रदः इति राजमार्तंडोक्तेः। अतो वशिष्टांशेषु विवाहादि शुभं भवतीत्यर्थः सिंहेपि भगदेवत्ये गुरौ पुत्रवती भवेत्तत्र
त्यत्तसुभगा साध्वी धनधान्यसमृद्धिदेत्यादि तत्रैवोक्तेः अथ देशभेदेन द्वितीयपरिहार उच्यते अथ गोदोत्तरतः गोदावरी नदी तस्या उत्तरतीरमा
रभ्य भागीरथी याम्यतटं दक्षिणकूलमर्यादीकृत्य गोदावरीगंगांतरालवर्ती यो देशः तत्र सिंहस्थगुरुर्वर्ज्यः नान्यदेशे लल्लः गोदावर्युत्तरे तीरे
यावद्भागीरथीतटं याम्यं तत्र विवाहो नेष्टः सिंहस्थे देवपतिः पूज्ये अर्थाद्गोदावरीदक्षिणतटे भागीरथ्युत्तरदेशे च सिंहस्थगुरुदोषो नास्ति वसि

सिंहे गुरौ सिंहलवे विवाहो नेष्टोथ गोदोत्तरतश्च यावत् भागीरथीयाम्यतटं च दोषो नान्यत्र देशे तपनेपि मेषे ४९ मघादि
पंचपादेषु गुरुः सर्वत्र निंदितः गंगागोदांतरं हित्वा शेषांघ्रिषु न दोषकृत् ५० मेषेर्के सन् व्रतोद्वाहे गंगागोदांतरेपि च
सर्वः सिंहगुरुर्वर्ज्यः कलिंगे गौडगुर्जरे ५१ रेवापूर्वे गंडकीपश्चिमे च शोणस्योदग्दक्षिणे नीचइज्यः॥ ६ ॥ ॥

ष्ठः भागीरथ्युत्तरे कूले गौतम्या दक्षिणे तथा विवाहो व्रतबंधो वा सिंहस्थे ज्यो न दुष्यतीति अत्र विवाहव्रतबंधावेव न निषिद्धौ आभ्यामन्यानि शु
भकर्माणि निषिद्धान्येव अपवादस्य संकोचाश्रयत्वादुपलक्षणायोगात् अथ तृतीयः परिहारः तपने सूर्ये मेषराशौ विद्यमाने सति वा सिंहस्थ
गुरोर्दोषो नास्ति ज्योतिर्निबंधे मंगलानीह कुर्वीत सिंहस्थो वाक्पतिर्यदा भानौ मेषगते सम्यगित्याहुः शौनकादयः इति ४९ सिंहराशिगत
गुरुनिषेधवाक्यानां प्रतिप्रसववाक्यानां च निर्गलितार्थमनुष्टुप्द्वयेनाह मघादिपंचपादेषु इत्यादि ५० मेषर्के इत्यादि च ५१ अथ म
करस्थगुरोः प्रकारद्वयेन परिहारं शालिन्याह रेवापूर्व इति रेवायाः नर्मदायाः पूर्वदेशे गंडकीनद्याः पश्चिमे विभागे शोणनदस्य उत्तरदक्षिण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भागेनीचईज्यः मकरस्थगुरुर्नवर्ज्यः लग्नः। नर्मदा पूर्वभागेतुशोणस्योत्तरदक्षिणे गंडक्याः पश्चिमे भागे मकरस्थोनदोषभाक् अन्यदेशे
षुनिषिद्धस्तत्रनिषिद्धदेशानाह अयमिति अयंमकरस्थगुरुः कोकणदेशेगौडदेशेसिंधुदेशेचशुभकृत्येषुवर्ज्योनिषिद्धः उक्तंच मागधेगौ
डदेशेचसिंधुदेशेचकोंकणे व्रतंचूडांविवाहंचवर्जयेन्मकरेगुरौ एभ्योन्यदेशेषुमंगलमथान्मध्यमं ५२ अथलुप्तसंवत्सरदोषंसापवादंव
शस्थविरेणाह गोजान्त्येतिगोवृषः अजोमेषः अन्त्योमीनः कुंभः प्रसिद्धः एष्वपइतरभे अन्यराशौमिथुनादौ अतिचारगोगुरुः महातिचारेण
समागतः सन् पश्चात्कियद्भिर्दिनैः वक्रितः यदापूर्वराशिंनोएतिभुक्तराशिंनोएतिनागच्छतितदाविलुप्ताब्दः लुप्तसंवत्सरउच्यते सलुप्तसंव
त्सरः शुभकृत्येअतिनिंदितःनिषिद्धः उक्तंच अतिचारगतोजीवस्तंराशिंनैतिचेत्पुनः लुप्तः संवत्सरोज्ञेयोगर्हितः सर्वकर्मसु यदातु गो

वर्ज्योनायंकोंकणेमागधेचगौडेसिंधौवर्जनीयःशुभेषु ५२ गोजान्त्यकुंभेतरभेतिचारगेनोपूर्वराशिंगुरुरेतिवक्रि
नःतदाविलुप्ताब्दइहातिनिंदितःशुभेषुरेवासुरनिम्नगांतरे ५३ पादोनरेवापरपूर्वयोजनैः पलैर्युतोनास्तिथयोदिनाधतः

जान्त्यकुंभेषुपूर्वराशेःसकाशान्महातिचारेणायातिपूर्वराशिंचनैतितदानलुप्तसंवत्सरदोषः गुरुः मेषवृषेष्वपकुंभेयद्यतीचारेणगुरुः नत
त्रकाललोपःस्यादित्याहभगवान्यमः दशमासभोगानंतरंअतीचारेपिलुप्ताब्ददोषोनास्ति च्यवनः मासान्दशैकादशवाप्रयुज्यराशेर्यदाराशि
मुपैतिजीवः भुक्तंनपूर्वंचपुनस्तथापिनलुप्तसंवत्सरमाहुरार्याः पूर्वराशिभेदेनपरिहारमुक्त्वेदानींदेशभेदेनपरिहारमाह सलुप्तसंवत्सरोरे
वानर्मदा सुरनिम्नगाभागीरथीतयोर्नद्योरंतरेऽतिनिषिद्धः उक्तंच लुप्ताब्ददोषोत्रिमतेनमध्येसोमोद्भवायाःसुरनिम्नगायाःइतिनारदेनसम राम:
सप्तकदोषोविवाहेवर्जितः समदृष्टिर्गुरोःशुक्रस्तन्मासेतुप्रयत्नतः विवाहादिनकुर्वीतनर्मदातीरउत्तरे ५३ अथवारप्रवृत्तिमुपजात्याह पा
दोनेति रेवाभूमध्यरेखापुरीराक्षसीदेवकन्याथकांचीत्याद्युक्ता लंकातआरभ्यसुमेरुमस्तकदत्तसूत्राधोवर्तिदेशास्तेमध्यरेखा एष्वदेनोच्य

CC-0. In Public Domain. Digitization by eGangotri

ते यस्मिन्देशे वारप्रवृत्तिश्चिकीर्षिता स देशो रेखातः प्राक् पश्चिमे यावंति योजनानि भवंति तानि स्वचतुर्थांशोनानि कृत्वा तावद्भिः पलैः तिथ्यः पं
चदश घटिका युक्तोना: कार्याः यदा मध्यरेखातः प्रत्यग्योजनानि तदा युक्ताः यदा तु प्राग्योजनानि तदोनाः कार्याः अथ यद्दिने वारप्रवृत्तिरिष्टा
तद्दिवसे यद्दिनार्धं चरपलयुतहीनानाडिका पंचचंद्राइत्यादिप्रकारसिद्धं तस्माद्दिनार्धात्संस्कारविशिष्टाः पंचदश ऊनाधिकाश्चेद्भवंति तदा त
द्विवरोद्भवैः फलैर्दिनार्धस्य संस्कारविशिष्टपंचदशानां च यद्विवरं अंतरं तत्संबंधेनोत्थैरुत्पन्नैः पलैरूर्ध्वं तथाधो दिनपस्य वारस्य प्रवेशः य
दा संस्कारविशिष्टाः पंचदश दिनार्धतश्चेदूनास्तु तदा सूर्योदयादूर्ध्वं वारप्रवृत्तिः यदा संस्कारविशिष्टाः पंचदश दिनार्धतोऽभ्यधिकास्तदा सूर्यो
दयात्प्राक् वारप्रवृत्तिरित्यर्थः यथा वाराणसी रेखाभिधानात् कुरुक्षेत्रात्प्राक् त्रिषष्टियोजनानि ६३ पादोनचतुर्थांशेनोनानि ४७।१५ प्राग्योजन
त्वादेतैः पलैरूनाः पंचदश घटिका जाताः १४।१३ दिनार्धं १६।३० अस्मान्न्यूना इति विवरं २।१७ तेनाभिर्घटीभिः सूर्योदयादूर्ध्वं वा

ऊनाधिकास्तद्विवरोद्भवैः पलैरूर्ध्वं तथाधो दिनपप्रवेशनं ५४ वारादेर्घटिका द्विघ्नाः स्वाक्षह्रच्छेषवर्जिताः सैकास्तष्टा नगैः

रप्रवृत्तिः यदा दिनार्धं १३।५० अस्मादधिका इति विवरं ०।२३ एताभिर्घटीभिः सूर्योदयात्प्राक् वारप्रवृ ऽऽकालहोरेशा दिनपात् क्रमात् ५५
त्तिरित्यर्थः ५४ अथ वारप्रवृत्तिप्रयोजनपुरःसरं कालहोरामनुष्टुभाह वारादेरिति वारप्रवृत्तिप्रकारेण यस्मिन्क्षणे वारप्रवृत्तिर्जाता ततः इष्टघट्यो द्विगुणाः
कार्याः ता द्विस्थाने स्थाप्याः तत्र पंचभिर्भक्ते यल्लब्धं तत्त्याज्यं यच्छेषं तद्द्विगुणघटीमध्ये वर्जितं कार्यं एवंविधा घट्यः सैका एकयुक्ताः कार्याः सप्तभिस्तष्टा अ
वशिष्टाः कालहोरेशाः स्युः ते दिनपात् वारात् क्रमाद्गणनीयाः यथा रविवारे इष्टघटिकाः ६ द्विगुणाः १२ पंचगतास्ता ५ त्तरोषं २ वर्जिताः १० सैका ११ नगैः ७ तष्टा
शेषं ४ रविवारेत्क्रमाद्गणनया चतुर्थो बुधस्तस्य होरा इत्यादि विवाहवृंदावने उदयमारभ्य होरा उक्ताः यथा तत्कालार्कन्यूनलग्नांशपिंडो भक्तः पंचखाग्निभिर्युक्ता
होराः स्युः भास्वच्छुक्रज्ञेंदुसौरेज्यभौमाः संख्यायेरन्वारतस्ते तदीशा इति अनयोर्विषयविभागो वसिष्ठसंहितायां वारप्रवृत्तिविज्ञानं क्षणवारार्थं मे वहि अखिले
ष्वन्यकार्येषु दिनादिरुदयाद्भवेत् क्षणवारः कालहोरारूपः तदर्थं वारप्रवृत्तिः अन्यकार्येषु दिक्शूलादिषु तिथिवारप्रयुक्तेषु वा योगेषु च सूर्योदयादेव वारा ऐश्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.टी.
शु.प्र.
२५

अथ कालहोराप्रयोजनं शालिन्याह वारेप्रोक्तमिति यत्कर्म यस्मिन्वारे प्रोक्तं तद्दिनस्य सदोषत्वादत्यावश्यकत्वे तस्य कालहोरायां कर्तव्यं नारदः यस्य खेटस्य यत्कर्म वारे प्रोक्तं विधीयते ग्रहस्य क्षणवारेपि तस्य तत्कर्म सर्वदा अत्र केचित् यस्य वारे कर्म प्रोक्तं तस्य बलिनो नवांशे सूर्यश्चंद्रो वा चेत्तिष्ठति तदा तत्कर्म कार्यमित्याहुः उक्तं च यस्य ग्रहस्य दिने कर्म यत्किंचिदभिधीयते तस्यांशसंस्थिते चंद्रे सूर्ये वा तद्विधीयते इति अथ धिष्ण्ये नक्षत्रे यत्कर्म वस्त्रपरिधानादिकमुक्तं तदत्यावश्यकत्वे अस्य धिष्ण्यस्य स्वामितिथ्यंशके स्वामिनो मुहूर्ते कुर्यात् नारदः यस्मिन्नृक्षे तु यत्कर्म निखिलं कथितं च यत् तद्दैवत्ये तन्मुहूर्ते कार्यं यात्रादिकं तथेति मुहूर्तस्वामिनो विवाहप्रकरणे वक्ष्यंते क्षणेषु मुहूर्तेषु दिक्शूलादि दिक्शूलवारशूलनक्षत्रशूलं चिंत्यं विचारणीयं एवं पारिघो दंडः क्षणेषु मुहूर्तेषु नैवोल्लंघ्यः दिक्शूलादिकमखिलं पारिघदंडादि विज्ञेयमिति वसिष्ठोक्तेः ५६ अथ मन्वादीन्युगादींश्च शार्दूलविक्रीडितेनाह

वारे प्रोक्तं कालहोरासु तस्य धिष्ण्ये प्रोक्तं स्वामितिथ्यंशकेस्य कुर्याद्दिक्शूलादि चिंत्यं क्षणेषु नैवोल्लंघ्यः पारिघश्चापि दंडः ५६
मन्वाद्यास्त्रितिथीमधौ तिथिरवी ऊर्जे शुचौ दिक्तिथी ज्येष्ठेंत्ये च तिथिस्त्विषे नवतपस्यश्वाः सहस्ये शिवाः भाद्रेग्निश्च सिते त्वमा
ष्ट नभसः कृष्णे युगाद्याः सिते गोग्नी बाहुलराधयोर्मदनदर्शौ भाद्रमाघासिते ५७॥

शार्दूलविक्रीडितेनाह मन्वाद्या इति सिते शुक्लपक्षे एता मन्वादयः मधौ चैत्रे त्रितिथी तृतीयापौर्णिमे ऊर्जे कार्तिके तिथिरवी पूर्णिमाद्वादश्यौ शुचौ आषाढे दिक्तिथी दशमीपूर्णिमे ज्येष्ठे अंत्ये फाल्गुने च तिथिः उभयत्र पूर्णिमैव इषे आश्विने नवमी तपसि माघे अश्वाः सप्तमी सहस्ये पौषे शिवा एकादशी भाद्रपदे अग्निस्तृतीया तु इति पुनः नभसः श्रावणस्य कृष्णपक्षे अमावास्या अष्टमी अथ युगाद्याश्चत्वारः बाहुलराधयोः बाहुलः कार्तिकः राधो वैशाखः तयोः शुक्लपक्षे गोग्नी नवमीतृतीये युगादि कार्तिकशुक्लनवमी कृतयुगादिः वैशाखशुक्लतृतीया त्रेतादिः भाद्रमाघासिते मदनदर्शौ युगादि मदनस्त्रयोदशी दर्शो अमावास्या भाद्रकृष्णत्रयोदशी कलियुगादिः माघकृष्णअमावास्या द्वापरादिः अत्र शुक्लादयो मासा ग्राह्याः कार्तिके शुक्लनवमी चादिः कृतयुगस्य सा त्रेतादिर्माधवे शुक्ला तृतीया पुण्यसंमिता कृष्णा पंचदशी माघे द्वापरादिरुदीरिता कल्यादिः स्यात्कृष्णपक्षे नभस्ये च त्रयोदशीति नारदोक्तेः ५७॥ इति श्रीदैवज्ञानंतसुतदैवज्ञविरचितायां स्वकृतमुहूर्त

चिंतामणिटीकायां प्रमिताक्षरायां शुभाशुभप्रकरणं समाप्तं १

CC-0. In Public Domain. Digitization by eGangotri

अथाधोमुखोर्ध्वमुखतिर्यङ्मुखनक्षत्राणि इंद्रवज्रयाह मूलाहीति मूलं अहिमाश्लेषा मिश्रं कृत्तिका विशाखे उग्रं पूर्वात्रयमघाभरण्यः ए
तानि नव भानि अधोमुखानि ज्ञेयानि आर्द्रा पुष्यः श्रवणत्रयं रोहिण्युत्तरात्रयं च नव भान्यूर्ध्वमुखानि मैत्राणि चित्रा रेवत्यनुराधाः हस्तस्वाती पु
नर्वसुज्येष्ठा अश्विनी एतानि नव भानि तिर्यङ्मुखानि एषु अधोमुखोर्ध्वमुखतिर्यङ्मुखेषु भेषु ईदृशं कृत्यं अधोमुखोर्ध्वमुखतिर्यङ्मुखकृत्य
सत् भवति गरुडपुराणे भरणीकृत्तिकाश्लेषामघामूलविशाखिकाः तिस्रः पूर्वास्तथा चैव अधोवक्त्राः प्रकीर्तिताः एषु वापीतडागादिकूपभूमि
तृणानि च देवागारस्य खननं निधानखननं तथा गणितं ज्योतिषारंभं खनी बिलप्रवेशनं कुर्यादधोगतान्येव कार्याणि वृषभध्वज रोहि
ण्यार्द्रा तथा पुष्यो धनिष्ठा चोत्तरात्रयं वारुणश्रवणं चैव नव चोर्ध्वमुखास्तथा एषु राज्याभिषेकं च पट्टबंधं च कारयेत् ऊर्ध्वमुखास्तुच्छ्रितानि स

मूलाहिमिश्रोग्रमधोमुखं भवेदूर्ध्वास्यमार्द्रेज्यहरित्रयध्रुवं तिर्यङ्मुखं मैत्रकरानिलादितिज्येष्ठाश्विनानीदृशं
कृत्यमेषु सत् ९ पौष्णध्रुवाश्विकरपंचकवासवेज्यादित्ये प्रवालरदशंखसुवर्णवस्त्रं॥ ॥ ९ ॥

र्ण्येषु च कारयेत् रेवती चाश्विनी चित्रा स्वाती हस्तः पुनर्वसुः। अनुराधा मृगो ज्येष्ठा एतास्तिर्यङ्मुखाः स्मृताः गजोष्ट्राश्वबलीवर्ददमनं मा
हिषस्य च बीजानां वपनं कुर्याद्गमनागमनादिकं चक्रयंत्ररथादीनां नावादीनां प्रवाहणं पार्श्वेषु यानि कार्याणि कुर्यादेषु च तान्यपि इदं च।
नक्षत्रविशेषविहितानां कर्मणामावश्यकर्तव्यत्वे मुहूर्तालब्धौ सत्यां कर्मणः अधोमुखाद्याकारं ज्ञात्वा तत्तन्नक्षत्रेषु तानि कर्माणि कार्याणि
यानि च सर्वथा नोक्तानि बिलप्रवेशादीनि तान्येष्वेव नक्षत्रेषु कार्याणीत्येतदर्थमुक्तं ९ अथ प्रवालादिधारणमुहूर्तं वसंततिलकेनाह पौष्ण
ध्रुवेति रेवत्यादिनक्षत्रेषु तथा रिक्तातिथिशनिचंद्रभौमवर्जिते ऽह्नि दिवसे प्रवालं विद्रुमं शंखः शंखवलयादि वस्त्रं श्वेतं एतानि धार्याणि रक्तं
मंजिष्ठादिरंगेन रंजितवस्त्रं भौमवारेपि धार्यं अथ सुभगा सभर्तृका ध्रुवादितियुगे रोहिण्युत्तरात्रयेषु अदिति युगे पुनर्वसौ पुष्ये च प्रवालादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ नक्षत्रप्रकरणं व्याख्यायते तत्रादौ नक्षत्रस्वामिनः शार्दूलविक्रीडितेनाह नासत्येति एते नासत्यांतकादयः ऋक्षेशा नक्षत्रेशाः क्रमात्स्युः
१ अथ ध्रुवनक्षत्राणि तत्कृत्यं चानुष्टुभाह उत्तरात्रयेति उत्तरात्रयं रोहिणी च एतानि नक्षत्राणि रविवारश्च ध्रुवसंज्ञानि स्थिरसंज्ञानि चेति संज्ञाद्व
यं एवमुत्तरत्रापि व्याख्येयं ध्रुवनक्षत्रेषु स्थिरादिकमेकार्यं आदिग्रहणान्मृदुनक्षत्रोक्तं ग्राह्यं वसिष्ठः मृदुध्रुवे कथितान्यपि स्थिरध्रुवे तानि का
र्याणि इति २ अथ चरभानि तत्कृत्यं चानुष्टुभाह स्वात्यादित्येति आदिशब्दात् लघुनक्षत्रोक्तमपि ३ अथोग्रनक्षत्राणि चानुष्टुभाह पूर्वात्रय

नासत्यांतकवह्निधातृशशभृद्रुद्रादितीज्योरगाः क्षेशाः पितरो भगोर्यमरवी त्वष्टा समीरः क्रमात् शक्राग्नी खलु मि
त्रेंद्रनिर्ऋतिक्षीराणि विश्वे विधिर्गोविंदो वसुतोयपाजचरणाहिर्बुध्न्यपूषाभिधाः १ उत्तरात्रयरोहिण्यो भास्कर
श्च ध्रुवं स्थिरं तत्र स्थिरं बीजगेहशांत्यारामादिसिद्धये २ स्वात्यादित्ये श्रुतेस्त्रीणि चंद्रश्चापि चरं चलं तस्मिन्गजा
दिकारोहो वाटिकागमनादिकं ३ पूर्वात्रयं याम्यमघे उग्रं क्रूरं कुजस्तथा तस्मिन्घाताग्निशाठ्यानि विषशस्त्रादि सि
ध्यति ४ विशाखाग्नेयभे सौम्यो मिश्रं साधारणं स्मृतं तत्राग्निकार्यं मिश्रं च वृषोत्सर्गादिसिद्धये ५ हस्ताश्विपुष्या
भिजितः क्षिप्रं लघु गुरुस्तथा तस्मिन्पण्यरतिज्ञानभूषाशिल्पकलादिकं ६ मृगांत्यचित्रामित्रर्क्षं मृदु मैत्रं भृगुस्तथा तत्र
गीतांबरक्रीडामित्रकार्यविभूषणं ७ मूलेंद्रार्द्राहिभं सौरी तीक्ष्णं दारुणसंज्ञकं तत्राभिचारघातोग्रभेदाः पशुदमादिकं ८

मिति आदिशब्दाद्दारुणनक्षत्रोक्तमपि ४ अथ मिश्राण्यनुष्टुभाह विशाखेति आदिग्रहणादुग्रोक्तमपि ५ अथ लघुनक्षत्राण्यनुष्टुभाह हस्ते राम॰
ति शिल्पं वर्धकिविक्रत्यादि कलान्नृत्यादिकाश्चतुःषष्टिः आदिशब्दाच्चरोक्तमपि ६ अथ मृदुनक्षत्राण्यनुष्टुभाह मृगांत्येति ७ अ
थ तीक्ष्णभान्यनुष्टुभाह मूलेति अभिचारः कर्मोणं भयंकरकृत्यं मारणादि पशुदमः पशुशिक्षा आदिशब्दात् बंधनादिकं स्थिरं च ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कंनदध्यात् क्वचिच्छ्रुततारायांस्नानमपिनिषिद्धं उक्तंच रोहिणीगुरुपुनर्वसूत्तरेयाबिभर्तिनववस्त्रविभूषणं सानयोषिदवलंबतेपतिंस्नानमाचरतिवारुणेपियाइति ९ अथनवधाविभक्तस्यवस्त्रस्यदग्धादिदोषेशुभाशुभफलंशार्दूलविक्रीडितेनाह वस्त्राणामिति वस्त्राणांनवभागाः कार्याः कोणचतुष्टयेऽमरादेवाः स्थाप्याः।राक्षसामध्यगतांशगतास्तेयाः नराः दशासदितेपाशेचपुनर्मध्ययोरंशयोर्ज्ञेयाः तत्रचेद्रक्षोंशेनवतरेन्नूतनेवस्त्रेदैवाद्दग्धेऽग्निस्पृष्टे।स्फुटितेपाषाणाद्याघातादिभिर्निहते पंकेनकर्दमेनआदिशब्दात् गोमयादिभिरुपहतेसतितद्वस्त्रनमसत्शुभफलजनकंनभवतीत्यर्थः नृसुरांशयोः एवंवस्त्रदाहादिकेसतिशुभंकल्याणंस्यात् अथसर्वांशकेराक्षसमनुष्यदेवांशकेषुप्रांततः प्रांतभागेऽसदनिष्टफलगमकं इदंसर्वंशय्यापादुकास्वपिज्ञेयं श्रीपतिः कज्जलकर्दमगोमयलिप्तेवाससिदग्धवतिस्फुटितेच

धार्यंविरिक्तशनिचंद्रकुजेह्निरक्तंभौमेध्रुवादितियुगेसुभगानदध्यात् १० वस्त्राणांनवभागकेषुचचतुःकोणेमरारा
क्षसामध्यत्र्यंशगतानरास्तुसदशेपाशेचमध्यांशयोः दग्धेवास्फुटितेंबरेनवतरेपंकादिलिप्तेनसद्रक्षोंशेनृसुरांश
योःशुभमसत्सर्वांशकेप्रांततः ११ विप्राज्ञयातथोद्वाहेराज्ञाप्रीत्यार्पितंचयत्॥

चिंत्यमिदंनवधाविहितेस्मिन्निष्टमनिष्टफलंचसुधीभिः अत्रराक्षसांशेध्वजछत्रादिसदृशीछेदाकृतिशुभफलाज्ञेया देवमनुष्यांशेपिकाकोलूकसदृशीछेदाकृतिरशुभफलदा कश्यपः शरवक्त्राबुजछत्रध्वजतोरणसन्निभा।श्रीवत्ससर्वतोभद्रनद्यावर्तगृहोपमा वर्धमानस्वस्तिकेभमृगकूर्मझषाकृतिः छेदाकृतिर्दैत्यभागेप्यायुरर्थप्रदानृणां खरोष्ट्रोलूककाकादिजंबूकश्वटकोपमा त्रिकोणःसूर्याकृतयोदेवभागेप्यशोभनाः निंदितंवसनंदद्याद्विजेभ्यःस्वर्णसंयुतंआशिषोवाचनंकृत्वात्वन्यद्वस्त्रंचधारयेदिति ११ अंत्रक्वचिद्दुष्टदिनेपिवस्त्रपरिधानमनुष्टुभाह विप्राज्ञयेति धिष्ण्यनक्षत्रवारादोवारतिथियोगादौव्यतीपातभद्रादिदुष्टयोगेनिंद्येपि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु. टी. यद्वस्त्रं ब्राह्मणानुज्ञया न यो द्वाहे एतासां संतोषेणार्पितं दत्तं तद्वस्त्रं धार्यमिति बुधा जगुः १२ अथ लतापादपारोपणराजदर्शनमद्यगोविक्रयमुहूर्तं
न. प्र. नृशार्दूलविक्रीडितेनाह एधामूलेति एधा विशाखा एतदादि चतुर्दशनक्षत्रैर्लतानां वल्लीनां पादपानां वृक्षाणां चारोपो वापनः कार्यः अथ राज
२७ दर्शनं ध्रुवमृदुक्षिप्रश्रवोवासवैः त्रयोदशभैः कार्यं अथ मद्यं मद्यारंभः तीक्ष्णोग्रांबुपभेषु नवनक्षत्रेषु उदितः कथितः अथ गवां क्रयो मूल्ये
नपरस्माद्ग्रहणं विक्रयो मूल्यग्रहणपूर्वकं दानं क्षिप्रांत्यवह्नीदुमादित्येंद्रांबुपवासवेषु हि नवनक्षत्रेषु शस्तः प्रशस्तः अत्र भीमपराक्रमेणापं
चदशभान्यभिहितानि हस्ते तु एधात्रितये सपौष्णे मृगे च पूर्वाश्विविशाखभेषु पुष्ये धनिष्ठाहितये दितौ शे गवां क्रयं विक्रयमामनंतीति १३ अ
थ पशूनां रक्षामुहूर्तं स्थितिनिवेशनिषेधमुहूर्ते चेंद्रवज्रयाह लग्ने शुभ इति शुभे शुभस्वामिके लग्ने अष्टमशुद्धिसंयुते शुभपापाक्रांताष्टमभा

निंद्येपि धिष्ण्ये वा एदो वस्त्रं धार्यं जगुर्बुधाः १२ एधामूलमृदुध्रुवर्क्षवरुणक्षिप्रैर्लतापादपारोपो थो नृपदर्शनं ध्रुवक्ष
दुक्षिप्रश्रवोवासवैः तीक्ष्णोग्रांबुपभेषु मद्यमुदितं क्षिप्रांत्यवह्नीदुमादित्येंद्रांबुपवासवेषु हि गवां शस्तः क्रयो विक्रयः
१३ लग्ने शुभे चाष्टमशुद्धिसंयुते रक्षा पशूनां निजयोनिभे चरे रिक्ताष्टमीदर्शकुजश्रवो ध्रुवत्वाष्ट्रे सु यानं स्थितिवेश

वरहिते सति पशूनां रक्षा रक्षणं प्रवेशादिकं च सत् तथा स्वीययोनिनक्षत्रे चरभे च सत् यथाऽश्वानां योनिभं अश्वि ॥नं नसत् १४
नी शनतारके तत्र चतुष्पदानां रक्षा शस्ता तीक्ष्णे पशूनां दमनं वरं स्यात् पशुपोषणमिति वचनात् अथ रिक्ता ४।९।१४ ष्टमी ८ दर्शोमावास्या एम.
कुजो भौमः श्रवः श्रवणं ध्रुवाण्युत्तरात्रयरोहिण्यः त्वाष्ट्रं चित्रा एषु पशूनां यानं गृहाद्बहिर्निःसारणं स्थितिर्गोष्ठादिवेशनं न सत् शुभं न व्य
वहारोच्चये पूर्वात्रये धनिष्ठेंद्रपौष्णसौम्यविशाखायोः आश्लेषायामथाश्विन्यां यात्रासिद्धिश्चतुष्पदामिति १५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथौषधसेव्यो मुहूर्तं मंदाक्रांतयाह भैषज्यंसदिति भैषज्यं औषधं प्रारब्धं भक्षितं च सत् लघुमृदुचरनक्षत्रे मूले च द्व्यंगलग्ने द्विस्वभावराशिवृमिथु
नकन्याधनुर्मीनेषु लग्नगतेषु सत्सु शुक्रेंद्वीज्यबुधेषु द्विस्वभावलग्नस्थेषु सत्सु च पुनस्तेषां शुक्रेंद्वीज्यबुधानां रवेश्च दिवसे वारे सति थौ रिक्तारहि
ते तिथौ भैषज्यं सत् शुभं स्यात् दीपिकायां द्व्यंगोदये गुरुबुधेंदुसिते प्रशस्ते तेषां रवेश्च सुविधौ सुतिथौ सुयोगे भे भूत्रपन्नगविशाखशिवेतरेषु जन्मर्क्षे
विष्टिरहितेषु कृत: शुभाय इति अथ रि:फद्युनमृतिगृहे लग्नात् द्वादशसप्ताष्टमगृहेषु शुद्धेषु शुभपापग्रहरहितेषु सत्सु औषधं तु वर्षफलप्रश्नादि
ना आयुर्निश्चये च सत् द्यूनशत्रुनिधनव्ययशुद्धौ सद्ग्रहेषु नितरां बलवत्सु आयुषश्च हितकारिणि योगे कीर्तितानि यत्नमौषधसेवेति श्रीपतिभट्टोक्ते:
अथ जनेर्भे जन्मनक्षत्रे नो भैषज्यं सत् जन्मनक्षत्रगश्चंद्र: प्रशस्त: सर्वकर्मसु क्षौरभैषजवादाध्वकर्तनेषु विवर्जयेदिति वचनात् अथ सूचीक

भैषज्यं सल्लघुमृदुचरे मूलभे द्व्यंगलग्ने शुक्रेंद्वीज्ये विदि च दिवसे चापि तेषां रवेश्च शुद्धे रि:फद्युनमृतिगृहे सत्तिथौ नो जनेर्भे सूची
कर्माप्यदितिवसुभैत्वाष्ट्रमित्राश्विपुष्ये १५ क्रयर्क्षे विक्रयो नेष्टो विक्रयर्क्षे क्रयोपि न पौष्णांबुपाश्विनीवात:श्रवश्चित्रा: क्रये शुभा: ॥ १६

र्म सूच्या: संबंधिकर्म घटनसीवनादि अदितिवसुभत्वाष्ट्रमित्राश्विपुष्यनक्षत्रे सत् स्यात् व्यवहारोच्चये अदितिर्वासवं त्वाष्ट्रं मैत्रमैंद्रव वाजिन: सू
चीकर्मतनुत्राणमेमिश्रर्क्षे: प्रशस्यत इति १५ अथान्यदनुष्टुभाह क्रयर्क्षे इति क्रयर्क्षे वक्ष्यमाणक्रयनक्षत्रे विक्रयो न कार्य: तथा विक्रयनक्षत्रे क्रयो
पि न कार्य: दीपिकायां यमाहिशक्राग्निविशाखपूर्वा नेष्टा: क्रये विक्रयणे तिशस्ता: पौष्णाश्विचित्राशतविष्णुवाता: शस्ता: क्रये विक्रयणे निषिद्धा इति
ननु यदा येन क्रय: कर्तव्यस्तदा अन्येन विक्रय: कर्तव्यस्तत्क्रयविक्रयनक्षत्राणां महाभेदात् उभयविधमुहूर्तानुपपत्ति: उच्यते विक्रेता यदा मुहूर्तं विक्रया
र्थं गृह्णाति तदा वस्तु पृथक् क्रियते तत्कर्म विक्रयशब्दवाच्यं यदा क्रयिणा क्रयार्थं मुहूर्त: प्रार्थ्यते तदा विक्रेत्रे मूल्यद्रव्यं दत्वा पृथक्कृतं विक्रेतृवस्तु यो गृह्णाति तत्क्र
यशब्दवाच्यमिति मत्वा यथाकथंचित्समाधेयं तत्र क्रयमुहूर्त: रेवतीशततारा अश्विनी स्वाती श्रवण चित्रा एतानि भानि क्रये शुभानि विक्रयणे निषिद्धानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु॰टी॰ अथविक्रयविपण्योर्मुहूर्तंशार्दूलविक्रीडितेनाह पूर्वाद्वीशेतिद्वीशंविशाखा पूर्वादिनक्षत्रेषु केंद्रेषुप्रथमचतुर्थसप्तमदशमेषुद्वितीयेकोणेनवपं
ने॰प्र॰ चमेशुभैःसद्भिःषट्त्र्यायेषुपापग्रहैःसद्भिःघटतनुंकुंभलग्नंविनान्यत्कासत्तिथौरिक्तामारहिततिथौविक्रयःसन्शुभोक्तयः अथविपणिः
१८ पण्यवीथिकागृहेस्थित्वाक्रयविक्रयाख्यकर्मरिक्तातिथिभौमवारकुंभलग्नानिवर्जयित्वान्येषुतिथिवारलग्नेषुमित्राणिमृगरेवतीचित्रानुरा
धाः ध्रुवाणिरोहिण्युत्तरात्रयंक्षिप्राणिहस्ताश्विपुष्याः एतैर्भैःलग्नेचंद्रस्थितेमूर्तौचंद्रेसितेचसतिव्ययाष्टरहितैःपापग्रहैःसद्भिःशुभैर्द्व्यायखे
द्वितीयेकादशदशमेषुसद्भिर्विपणिःशुभास्यात् १७ अथाश्वगजमुहूर्तमिंद्रवज्रयाहक्षिप्रांत्येति क्षिप्रादिनक्षत्रेषुरिक्ताभौमव्यतिरिक्तदिने
वाजिकृत्यमश्वानांक्रयविक्रयशिक्षास्त्रानाभरणादिकार्यंप्रशस्तंस्यात् श्रीपतिः पुष्यश्रविष्ठाश्विनसौम्यभेषुपौष्णानलादित्यकराह्वयेषु सवारुणेषु

पूर्वाद्वीशकृशानुसार्पयमभेकेंद्रद्विकोणेशुभैः षट्त्र्यायेष्वशुभैर्विनाघटतनुंसन्विक्रयःसत्तिथौ रिक्ताभौमघटान्विनाच
विपणिर्मित्रध्रुवक्षिप्रभैर्लग्नेचंद्रसितेव्ययाष्टरहितैःपापैःशुभैर्द्व्यायखे १७ क्षिप्रांत्यवस्विंदुमरुज्जलेशादित्येष्वरिक्तार
दिनेप्रशस्तं स्याद्वाजिकृत्यंत्वथहस्तिकृत्यंकुर्यान्मृदुक्षिप्रचरेषुविद्वान् १८ स्याद्भूषाघटनंत्रिपुष्करचरक्षिप्रध्रुवेरत्नयुक्तत्ती
क्ष्णोग्रविहीनभेरविकुजेमेषालिसिंहेतनौ॥ बुधैः स्मृतानिसर्वाणिकार्याणितुरंगमाणां अश्वारोहणचक्रं अश्वाकारंलिखेच्चक्रंसाभि
जिद्भानिविन्यसेत् स्कंधेतुसूर्यभान्पंचपृष्ठेचदशभानिच पुच्छेद्वेस्थापयेद्भान्नश्चतुष्पादेचतुष्टयं उदरेविन्यसेत्पंचमुखेद्वेतुरगस्यच अर्थलाभोमु
खेसम्यक्वाजीनश्यतिचोदरे चरणस्थेरणेभंगःपुच्छेपत्नीविनश्यति अर्थसिद्धिर्भवेत्पृष्ठेस्कंधेस्कंधपतिर्भवेत्इति अथविद्वान् ज्ञानामृदुक्षिप्र
चरनक्षत्रेषुरिक्तामाभौमवर्जितदिनेचहस्तिकार्यंगजानांकार्यंक्रयविक्रयभूषादिकुर्यात् वसिष्ठः हस्तत्रयेसौम्यहरित्रयेचपौष्णद्वयेपुष्यपुनर्वसौ
च मैत्रेचसर्वाण्यपिकुंजराणांकर्माणिशस्तान्यखिलानियानीति १९ अथभूषणघटनमुहूर्तंशार्दूलविक्रीडितेनाह स्याद्भूषेति त्रिपुष्करदिनेल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णं भद्रातिथौ रविजे इत्यादिना वक्ष्यति एवंविधे त्रिपुष्करदिने चरक्षिप्रध्रुवनक्षत्रेषु भूषाघटनमाभरणघटनं शुभं स्यात् वसिष्ठः क्षिप्राचलचरऋक्षे रिक्तामावर्जितेषु दिवसेषु निखिलेष्वपि वारेष्वपि त्रिपुष्करे भूषणं कार्यं अथ तद्भूषणं रत्नयुतं माणिक्यादियुतं चेत्तदा तीक्ष्णोग्रविहीनभे तीक्ष्णानि मूलज्येष्ठाऽऽर्द्राश्लेषाख्यानि उग्राणि पूर्वात्रयमघाभरण्यः एतद्व्यतिरिक्ते धिष्ण्ये दशनक्षत्रेषु तथा रविभौमवारेपि कार्ये तथा मेषवृश्चिकसिंहलग्नेषु च वसिष्ठः स्थिरसाधारणचरभे लघुभे त्रेष्वर्ककुजवारे तेषामेव विलग्ने माणिक्यमयभूषणं कार्यमिति कर्कवृषतुलालग्नेषु कार्यमित्यपि तेन वसिष्ठः क्षिप्रमृदुध्रुवचरभे शशिसितयोर्वासरेषु तद्वल्लग्ने मुक्ताफलरजतमयं भूषणमखिलं सवस्त्रकं कार्यं अथ तीक्ष्णानि मूलज्येष्ठार्द्राश्लेषाः उग्राणि पूर्वात्रयभरणीमघा अश्विनीमृगौ द्विदैवं विशाखा दहनः कृत्तिका एषु नक्षत्रेषु घट्टितं शस्त्रं शुभं स्यात् अदितिर्वासवत्वष्ट्

तन्मुक्तासहितं चरध्रुवमृदुक्षिप्रे शुभे सत्तनौ तीक्ष्णोग्राश्विमृगे द्विदैवदहने शस्त्रं शुभं घट्टितं १९ मुद्राणां पातनं सद्ध्रु
वमृदुचरभक्षिप्रभैर्वीदुसौरेघस्रे पूर्णाजयाख्ये न च गुरुभृगुजास्ते विलग्ने शुभैः स्यात् ॥ २० ॥ ॥

मैत्रमैन्दववाजिनः सूचीकर्मनतुत्राणमेभिर्ऋक्षैः प्रशस्यत इति ऋक्षोच्चयोक्तेः अथ सुवर्णरूप्यादिपात्रे भोजनमुहूर्तमाह वसिष्ठः लघुमैत्रध्रुवचरभे सितेंदुबुधजीववारेषु हेमरजतादिभाजनभोजनमारोग्यामृतयोगेषु इति १९ अथ मुद्रापातनमुहूर्तं वस्त्रक्षालनमुहूर्तं च स्रग्धरयाह मुद्राणामिति ध्रुवमृदुचरक्षिप्रसंज्ञकैर्नक्षत्रैः कृत्वा राजमुद्रांकितं सुवर्णरूप्यादिनिष्पादनं मुद्रापातनमित्युच्यते टकसालेति भाषया वीदुसौरेघस्रे चंद्रशनैश्चरवार्जितवारे तथा पूर्णाजयाख्ये पूर्णाः पंचमी दशमी पूर्णिमाः जयास्तृतीयाष्टमीत्रयोदश्यः एतासु तिथिष्वित्यर्थः शुभं स्यात् तथा गुरुशुक्रास्ते न शुभं विलग्ने शुभैः लग्ने शुभग्रहैः सद्भिरित्यर्थः उक्तं च मृदुध्रुवक्षिप्रचरेषु भेषु योगे प्रशस्ते शनिचंद्रवर्ज्ये वारे तिथौ पूर्णजयाह्वये च मुद्राप्रतिष्ठा शुभदा नराणां गुर्वस्ते वासितास्ते वा मुद्राणां घटनं क्वचित् क्रूरग्रहर्क्षांशलग्नेन कार्यं भूतिमिच्छता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथध्रुवेवसुधेनिष्ठा हयोश्विनी दिनकृत्तहस्तः तस्मात्यंचके हस्तचित्रास्वातीविशाखानुराधासु आदित्यंपुनर्वसुः पुष्येवस्त्राणांक्षालनंरजका। धानार्थेदानंसतत्शुभंस्यात् रिक्तापर्वाणिपूर्वोक्तानितिथिप्रकरणे षष्ठीपितृदिनंश्राद्धदिनएतेषुरविजह्नेषुशनिबुधवारेषुकदापिवस्त्रक्षालनंनो कार्यं २० अथखड्गादिधारणंशय्याद्युपभोगमुहूर्तंचस्रग्धरयाह संधार्यांइति विरिक्ते रिक्तावर्जितशुक्रबृहस्पतिरविवारेतथामैत्रध्रुवलघुसं ज्ञकनक्षत्रसहितपुनर्वसुज्येष्ठाविशाखानक्षत्रेषुकुंतादयः संधार्याः कुंतोभल्लः वर्मकवचं इषवोबाणाआस्यतेअनेनेतीष्वसनंधनुः शरोबाणः कृपाणः खड्गः असिपुत्रीछुरिकासंनाहोपीतिकेचित् तथास्थिराख्येवृषसिंहवृश्चिककुंभाख्येलग्ने चंद्रेअपिशब्दात्लग्नेपिशुभग्रहदृष्टे।शुभैः केंद्रगैःसद्भिःकुंतादिधारणंहितंऋक्षोच्चये पुष्येचादितिचित्रपद्मतनयेशक्रोत्तरारेवतीवाजीहस्तविशाखमित्रसहितेभानौगुरौभार्गवे कुंभेकीटगृ

वस्त्राणांक्षालनंसद्वसुहयदिनकृत्यंचकादित्यपुष्येनोरिक्तापर्वषष्ठीपितृदिनरविजह्नेषुकार्यंकदापि २० संधार्याःकुं तवर्मेष्वसनशरकृपाणासिपुत्र्योविरिक्तेशुक्रेज्यार्केक्षिमैत्रध्रुवलघुसहितादित्यशाक्रद्विदैवे स्युर्लग्नेहिस्थिराख्येशशि निचशुभदृष्टेशुभैः केंद्रगैः स्याद्भोगः शय्यासनादेर्ध्रुवमृदुलघुहयेनकादित्यइष्टः २१ ॥ ॥

हेवृषेमृगपतौचंद्रेशुभैर्वीक्षितेसंनाहंशरखड्गकुंतछुरिकाधार्यानृपाणांहितेति यत्तुदीपिकायां मूलेंदुपूर्वात्रययाम्यपित्र्यशक्राश्विसर्पोन लम्भूलिनश्च शस्त्रादिसंधारणमेषुकुर्यात्स्थिरोविलग्नेचशुभेशुभाहेइति तदासन्नयुद्धादिविषयं अथध्रुवमृदुलघुनक्षत्रेषु हरौश्रवणे अं तकेभरण्यांआदित्येपुनर्वसौ एषुशैयासनादेःशय्याःखट्वादिरूपाआसनंपीठमृगत्वगादि आदिशब्दात्पादुकातेषामुपभोगः इष्टःहि नः दीपिकायां मैत्रेंदुपुष्ययमभादितिवह्निचित्राहस्तोत्तराचयहरीज्यविधातृभानि एतेष्वतीवशयनासनपादुकानांसंभोगकार्यमुदितंसु निभिःशुभाहेइति २१ ॥ राम १२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथांधादिनक्षत्राणि शार्दूलविक्रीडितेनाह अंधाख्यमिति धाता रोहिणी विधिरभिजित् दहनभं कृत्तिका भगः पूर्वाफाल्गुनी अन्यत्स्पष्टं २२
अंधादिनक्षत्राणां फलमनुष्टुभाह विनष्टार्थ इति अंधनक्षत्रेषु विनष्टस्यापहृतस्यार्थस्य लाभः शीघ्रं भवति मंदनक्षत्रेषु विनष्टार्थस्य प्रयत्नतो
लाभो भवति मध्ये मध्यनक्षत्रे विनष्टार्थस्य दूरं स्वनगराद् तीव दूरदेशे श्रवणं त्वदीयद्रव्यममुकेन हृतं अमुकस्थले तिष्ठतीति लोकवार्ता भवति ल
ब्धिस्तु नास्ति सुलोचननक्षत्रेषु श्रुत्याप्तीन श्रवणमपि लब्धिरपि न भवतीत्यर्थः २३ अथ धनप्रयोगे निषिद्धनक्षत्राण्यनुष्टुभाह तीक्ष्णेति
एतैस्तीक्ष्णादिनक्षत्रैर्यद्द्रव्यं सुवर्णादि दत्तं कालांतरे विना दत्तं न स्वसत्तापरित्यागेन निवेशितं स्वेष्टसमीपे प्रत्ययार्थे स्थापितं प्रयुक्तं कालांतर
रीति पुरःसरं कस्मैचिद्दत्तं विनष्टं चौरादिनाहृतं स्वयमेव वा क्वचित्त्यक्तं द्रव्यं निश्चयेन कदापि नाप्यते तथा विष्ट्यां भद्रायां पाते व्यतीपाते महापाते वा

अंधाख्यं वसुपुष्यधातृजलभद्वीशार्यमांत्याभिधं मंदाख्यं रविविश्वमैत्रजलपाश्लेषाश्विचांद्रं भवेत् मध्याख्यं शिवपित्र्यजे
कचरणत्वाष्ट्रेंद्रविध्यांतकं स्वक्षं स्वात्यदितिश्रवोदहनभाहिर्बुध्न्यरक्षोभगं २२ विनष्टार्थस्य लाभोंधे शीघ्रं मंदे प्रयत्न
तः स्याद्दूरे श्रवणं मध्ये श्रुत्याप्ती न सुलोचने २३ तीक्ष्णमिश्रध्रुवोग्रैर्यद्द्रव्यं दत्तं निवेशितं प्रयुक्तं च विनष्टं च विष्ट्यां
पाते च नाप्यते २४ मित्रार्कध्रुववासवांबुपमघातोयांत्यपुष्येंदुभिः पापैर्हीनबलैस्तनौ सुरगुरौ ज्ञे वाम्बुगे खे विधौ ॥

हृतं द्रव्यं नाप्यते चकाराद्ग्रहणेपि वसिष्ठः ध्रुवोग्रसाधारणदारुणर्क्षे निक्षिप्तमर्थं त्वथवा प्रनष्टं चौरैर्हृतं दत्तमुपप्लवं वा विष्ट्यां च पातेन न लभ
भ्यते तदिति अत्रेदमनुसंधेयं तीक्ष्णमिश्रादिपंचदशभेषु मध्ये रोहिण्यार्यमविश्वजलभद्वीशेषु दत्तनिवेशितप्रयुक्तद्रव्यस्यैवाऽप्राप्तिः चौ
रापहृतस्य स्वतो गतस्य वा धनस्य लाभ एव तेषां रोहिण्यादीनां मध्यमलोचनभेषु पाठसामर्थ्यादिति भावः २४ अथ जलाशयखनननृत्या
रंभयोर्मुहूर्तं शार्दूलविक्रीडितेनाह मित्रार्केति अनुराधादित्रयोदशनक्षत्रैः सद्भिः पापग्रहैर्हीनबलैर्बलरहितैः सद्भिः तनौ लग्ने सुरगुरौ स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु·टी· तिबुधेवासति खेदशमेम्गोशुक्रे सति आप्येजलराशौविधौसति सर्वतोयाशयानांवापीकूपतडागादीनांतोयाधाराणांखननंहितंस्यात् आ
न·प्र· प्यांबुपांत्यपितृमित्रवसूत्तरार्केकेंद्रीज्यभेषुखननंसलिलाशयानामितिव्यवहारतत्त्वोक्तेः श्रीपतिः लग्नेजीवेशेषयवादुर्बलेअक्रूरैःशुक्रेवापिमे
२· षुरणस्थे आप्येचंद्रेसर्वतोयाशयानामारंभाःस्युःसिद्धयेनिर्विकल्पमिति अथनृत्यारंभः तैःप्रागुक्तैर्नक्षत्रैर्व्यभौमघेःपूर्वाषाढामघारहितैःसंद्र
भेर्ज्येष्ठासहितैःमित्रार्कध्रुववासवांबुपांत्यपुष्येंदुज्येष्ठानक्षत्रैः नृत्यारंभःशुभःस्यात् शुभैर्हिबुकेचतुर्थस्थानेलग्नेशेसति अर्केचंद्रेचराशौमिथु
नकन्यास्थेसतीत्यर्थः २५ अथसेवकस्यस्वामिसेवायांमुहूर्तंशालिन्याह क्षिप्रेति क्षिप्राणिहस्ताभिजिदश्विपुष्याः मैत्राणिमृगरेवतीचित्रानुराधाः
एतेषुनक्षत्रेषुबुधशुक्रसूर्यगुरुवारे सौम्येशुभग्रहेलग्नगेसति अर्केभौमेवाखलाभेदशमेएकादशेचस्थितेसतिसेवकेनस्वामिनः सेवाकार्या

आप्येसर्वजलाशयस्यखननंव्यभौमघैःसंद्रभैस्तैर्नृत्यंहिबुकेशुभैस्तनुगृहेशेऽर्केत्रराशौशुभं २५ क्षिप्रमैत्रेविल्पितार्केज्यवा
रेसौम्येलग्नेऽर्केकुजेवाखलाभे योनेर्मैत्र्याराशिपाश्चापिमैत्र्यासेवाकार्यास्वामिनःसेवकेन २६ स्वात्यादित्यमृदुद्विदैव
गुरुभेकर्णत्रयाश्वेचरेलग्नेधर्मसुताष्टशुद्धिसहितेद्रव्यःप्रयोगःशुभः॥

१,तत्रस्वामिसेवकनक्षत्रयोर्न्योर्मैत्र्यांचपुनःराशिपोःसेव्य
सेवकयोराशिस्वामिनोर्मैत्र्यांप्रीतौसत्यांसेवाकार्या अन्यथानकार्या २६ अथद्रव्यप्रयोगऋणग्रहणमुहूर्तंशार्दूलविक्रीडितेनाह स्वात्यादित्येति
स्वात्याद्येकादशनक्षत्रेषुचरेमेषकर्कतुलामकराणामन्यतमेलग्नेधर्मेनवमं सुतःपंचमं अष्टमेएतेषांशुद्धिः नवपंचमयोःपापग्रहराहित्यं एम·
अष्टमेतुशुभपापराहित्यमेवरूपाशुद्धिस्तयासहितेलग्नेद्रव्यप्रयोगःऋणदानंशुभंस्यात् भीमपराक्रमे मृदुपुष्याश्विनीचैवविशाखाश्रवणत्र २·
यं पुनर्वसोचशंसंतिधनादिनिधिवर्तनं वर्तनमृणादिरूपेणदानं मिश्रनक्षत्राद्विशाखायांनिषेधःप्राप्तेऋणदानेएवविधिः हूतेनप्रादेनिवि
द्वैव शुद्धेषुधर्मात्मजनैधनेषुचरेविलग्नेद्रविणप्रयोगः इति अथारेभौमवारेऋणंनग्राह्यंऋणंभौमेनगृहीयान्नदेयंबुधवासरे॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ऋणछेदं कुजे कुर्यात्तच्च यं सोमनंदने अथ तु विशेषे संक्रमं संक्रांतिदिवसे वृद्धौ वृद्धियोगे करे हस्तनक्षत्रे अर्केह्नि रविवारे इतियत् तत्रापि
नग्राह्यमित्येकसंबंधः यत् यस्माद्धेतोस्तद्दणं न दं शे ऋणं गृहीतुः कुलेषु भवेत् तत्पुत्रपौत्रादिभिरपि परिहर्तुमशक्यमित्यर्थः हस्तेऽर्केवारे संक्रां
तौ यद्दणं स्यात्कुलेषु तत् वृद्धियोगे तथा ज्ञेयमृणछेदं तु कारयेदिति ज्योतिःप्रकाशोक्तेः बुधवारे ऋणं कदापि न देयं २७ अथ हलप्रवाहमु
हूर्तं शार्दूलविक्रीडितेनाह मूलद्वीशेति एतैः मूलादिभिरेकोनविंशतिनक्षत्रैः विनार्कशनिरविशनिवारौ वर्जयित्वान्यवारेषु तत्र पापैर्हीनब
लैर्निर्बलैः चंद्रे जलराशिनवांशके सति शुक्रे चंद्रे च मांसले पुष्टे सति उदिते इत्यर्थः गुरौ लग्ने च सति तदा प्रथमं हलप्रवहणं शस्तं स्यात् कश्यपः
गुरौ लग्नगते शुक्रे बलिन्याप्योदये विधौ शस्ता कृषिक्रिया तत्र दुर्बलैः क्रूरखेचरैः अथ सिंहे घटे कुंभे कर्के अजमेषे एणो मकरे घटे तुला।

नारेग्ना ह्यमृणं तु संक्रमदिने वृद्धौ करेर्केह्नि यत्तद्वंशेषु भवेद्दणं न च बुधे देयं कदाचिद्धनं २७ मूलद्वीशमघाचरध्रुवमृदुक्षि
प्रैर्विनार्कशनिं पापैर्हीनबलैर्विधौ जललवे शुक्रे विधौ मांसले लग्ने देवगुरौ हलप्रवहणं शस्तं न सिंहे घटे ककोजैणघटेतनौ
क्षयकरं रिक्तासु षष्ठ्यां तथा २८ एतेषु श्रुतिवारुणादितिविशाखोडूनि भौमं विना बीजोप्तिर्गदिता शुभा त्वशुभतोष्टाग्नी दु

यां तथा रिक्तासु षष्ठ्यां तथा शब्दोऽनुक्तसमुच्चयार्थस्तेनाष्टम्यामपि न शस्तः यस्मात्तत्क्षयकरं २८ अथ बीजोप्तिमुहूर्तं फ एमंदव: ॥ ६ ॥
णिचक्रं च शार्दूलविक्रीडितेनाह एतेष्विति पूर्वोक्तनक्षत्रेषु श्रुतिवारुणादितिविशाखोडूनि विना श्रवणादिवर्जितेषु मूलमघाध्रुवमृदुक्षिप्रधनिष्ठा
स्वातीषु भौमं विना भौमवारव्यतिरिक्तवारेषु बीजोप्तिः बीजवापनं शुभं ज्ञेयं नारदः मृदुध्रुवक्षिप्रभेषु पितृवायुवसुद्वये समूलभेषु बीजोप्तिरत्युत्कृ
ष्टफलप्रदा रवौ रौद्राद्यपादस्थे भूमौ संजायते रजः तस्माद्दिनत्रयं तत्र बीजवापं परित्यजेदिति राजमार्तंडे आर्द्राप्रथमदिनत्रयनिषेधः अथ
बीजोप्तौ फणिचक्रं अशुभतो न विद्यंते गावो यस्येति अगुः राहुः तस्य भं नदाक्रांतनक्षत्रं तस्मादारो अष्टौ भानि असंति असमीचीनानि ततस्त्रीणि शु

CC-0. In Public Domain. Digitization by eGangotri

मु॰ दी॰ ने॰ प्र॰ २१

भकराणि ततएकमशुभं ततस्त्रीणिशुभानि ततएकमशुभं ततस्त्रीणिशुभानि ततश्चत्वार्यशुभानि एवंबीजोप्तौसप्तविंशतिनक्षत्राणांशुभाशु
भत्वमुक्तं रत्नमालायां मूर्ध्नित्रीणिगलेत्रयंचजठरेधिष्ण्यानिचद्वादशेत्यादि लग्नशुद्धिमाहवसिष्ठः भवरिपुसहजेपापैस्त्रिकोणकेंद्रस्थितैश्चशु
भैः कथितेशुभधिष्ण्येपिचशुभलग्नेबीजवापनंकार्यं अथहलचक्रमुच्यते हलेइतिहलचक्रेअर्कोज्झितात्भात्तन्नक्षत्रात्क्रमेणत्रीणिअसंतिअ
शुभानि ततोष्टभानिसंतिशुभानि ततोनवभानिअसंति ततोष्टौभानिसंति यथा सूर्यआर्द्रायांभुक्तभंमृगः ततआरभ्यत्रीणिअशुभानि ततःपुष्यतोष्टभा
निशुभानि ततोविशाखातोनवभान्यशुभानि ततःशततारकातोऽष्टभानिशुभानि एवमष्टाविंशतिभानिजातानि तथावसिष्ठः अर्कगतागतसंस्थभत्रि
तयंनेष्टमुभयतस्त्विष्टं षोडशधिष्ण्यंनवकंशिष्टमनिष्टंचलांगलेचक्रे कृष्यपोपित्रिषष्टसुनवर्क्षेषुसप्तस्वर्कविमुक्तभात् हानिर्वृद्धिः कर्तृनाशोलक्ष्मी
प्राप्तिर्यथाक्रमादिति एवंबहुमुनिसंवादेसतिइनमोज्झितस्मात् त्रिवह्नित्रीषुत्रीषुनिरमा ३।३।३।५।३।५।३।३।ण्यशुभदशुभानिक्रमाल्लांगलमध्येरितियदुक्तंग

एमेंद्वग्निशुगान्यसच्छुभकराण्युप्तौहलेर्कोज्झितात्द्वाद्वामाष्टनवाष्टभानिमुनिभिःप्रोक्तान्यसत्संतिच २९॥

णेशदैवज्ञैर्मुहूर्ततत्त्वेतन्नचिंत्यं
ऋषिवाक्यमूलाभावात् ननुश्रीपतिवाक्यं अर्कक्रांतगतागतान्यनडुहांनाशायभान्यग्रतोवृद्ध्यैभत्रितयंततस्तुकृषिकृत्घातायमूलत्रयेधिष्ण्यानां
नवकंतदंतरगतेस्यात्श्रियैपंचकेयच्चान्यत्त्रितयंतदन्तगदितंचक्रेशुभंलांगलेइतिमूलंचेत् नह्यपश्चायतिवाक्येशब्दार्थः किंतुमूलवाक्यावबोधेन
स्वाज्ञानप्रकाशकः वाक्यार्थस्तु अर्कोक्रांतगतानित्रीणिभानिवृषनाशकराणिस्युः ततस्त्रीणिवृद्ध्यै ततःपंचनक्षत्राण्यपास्य अग्रिमाणिनवभानिमू
लत्रये त्रिकंत्रिकंकृषिकृत्घातायस्थाप्यानि नन्वत्रपंचनक्षत्रत्यागेकोहेतुरित्यतआह तदंतरगतेपंचकइति तच्छब्देनहलोर्ध्वदंडाग्रमूलोर्ध्वदंडावुच्य
ते अर्कोक्रांतगतागतान्यनडुहांनाशायभान्यग्रतोवृद्ध्यैभत्रितयअयमंतरस्यपूर्वावधिः मध्येततःपदोपादानात् तुशब्दस्तु आनंतर्यद्योतनार्थः तुत्र राम। २१
तेतरंशूलत्रयेधिष्ण्यानांनवकंकृषिकृत्घातायेतिअंतरस्योत्तरावधिः तयोरंतरगतेमध्येविद्यमानाधिष्ण्यानांपंचकंचपंचकंचश्रियैस्यादित्यनेनक्षत्रदश
कमितियावत् यच्चान्यत्त्रितयंहलदंडोर्ध्वभागशुभफलदंलेख्यं एवंचसतिकृषिवाक्येसहास्यैकार्थ्यंतेवसंपद्यते अनेनमहेश्वरादयोपिप्रत्युक्ताः २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथशिरामोचनविरेचनादिमुहूर्त्तं शार्दूलविक्रीडितेनाह त्वाष्ट्रादिति त्वाष्ट्राद्वये चित्रास्वात्यौ मित्रभाद्वयेऽनुराधाज्येष्ठे कृत्तिकानात द्वयेरोहिणीमृगौ श्रो
त्रश्रवणः चित्रादिषुएकादशसुनक्षत्रेषुभौमार्कगुरुवारेशिरामोक्षणंरुधिरवाहिनीनाडिकाशिरातस्याः मुक्तशस्त्रघातेननरशिरातोरक्तमोक्षणं
कुर्यात् अथबुधार्कीविनाबुधशनिवारौत्यक्त्वान्यवारेषुपूर्वोक्तनक्षत्रेषुचविरेकवमनाद्यं औषधेनमुखप्रवृत्तिविरेकः वमनंवांतएतदाद्यंकुर्यात्
मित्रक्षिप्रचरध्रुवेषुत्रयोदशनक्षत्रेषुरविवारेशुभग्रहवारेचविदोबुधस्यलग्नवर्गेजीवस्यापिलग्नवर्गेयस्मिन्कस्मिंश्चिल्लग्नेपिगुरुबुधयोःषड्वर्गे
सतितनौलग्नेगुरौचसतिकेंद्रेगुरुबलेचसतिधर्मक्रियाकोटिहोमरुद्रानुष्ठानादिरूपानिगदिताकथिता ३० अथधान्यछेदनंवसंततिलकेनाह ती
क्ष्णाजपादेति एतेषुएकोनविंशतिनक्षत्रेषुतथाभौमशनिरिक्तावर्जितदिनेस्थिरलग्नेसति धान्यादीनांयवादीनांछिदाछेदनंनिगदिताकथिता ३१

त्वाष्ट्रान्मित्रकभाद्वयेंबुपलघुश्रोत्रेशिरामोक्षणंभौमार्केज्यदिनेविरेकवमनाद्यंस्याद्बुधार्कीविना मित्रक्षिप्रचरध्रुवेरविशु
भाहेलग्नवर्गेविदोजीवस्यापितनौगुरौनिगदिताधर्मक्रियातद्बले ३० तीक्ष्णाजपादकरवह्निवसुश्रुतीदुस्वातीमघोत्तरज
लांतकृतक्षपुष्ये मंदाररिक्तरहितेदिवसेतिशस्ताधान्यछिदानिगदितास्थिरमेविलग्ने ३१ भाग्यार्यमस्तुतिमघेंद्रविधा
तृमूलमैत्रांत्यभेषुकथितंकणमर्दनंस्यात् द्वीशाजपान्निर्ऋतिधातृशतार्यमर्क्षेसस्यस्यरोपणमिहार्किकुजौविनासत्
३२ मिश्रोग्ररौद्रभुजगेंद्रविभिन्नभेषुकर्कोजतौलिरहितेचतनौशुभाहे॥ ११ अथकणमर्दनंसस्यारोपणंचवसंततिलकेनाह भा
ग्येति विधिःरोहिणी अंत्यंरेवती एषुनवमेषुकणानांचणकादीनांमर्दनंयष्टिघातादिनावितुषीकरणंतत्समीचीनंस्यात् अथविशाखादिष
ट्नक्षत्रैः आर्किकुजौविनाशनिभौमतोन्यवारेषुसस्यस्यधान्यस्यरोपणंसत्शुभं ३२ अथधान्यस्थितिधान्यवृद्धिंचवसंततिलकेनाह मि
श्रोग्रेति मिश्रोग्रादिविभिन्नेषुमिश्रादिदशनक्षत्रेभ्योन्येषुसप्तदशनक्षत्रेषुतथाकर्केमेषतुलारहितेलग्नेमकरस्थिरद्विस्वभावलग्नेषुशु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु.टी. भाहे चंद्रबुधगुरुशुक्रवारे धान्यानां स्थितिः एकत्रस्थले स्थापनं सा शुभकरी निगदिता अथ ध्रुवेज्यादित्रयोदशनक्षत्रेषु धान्यवृद्धिः महत्मेता वह्नाभं
नं.प्र. देहि ततो मासद्वयानंतरं सपादं सार्धं वा दास्यामीत्येवं रूपा वृद्धिर्निगदिता ३३ अथ शांतिकपौष्टिकादिकं वसंततिलकेनाह क्षिप्रेति क्षिप्रादिनक्षत्रेषु
२२ पौष्टिकमंगलाभ्यां सह पौष्टिककर्मणा ग्रहशांत्या मंगलकर्मणा विना विनायकशांत्या सह शांतिके दुष्टफलदमूलादिनक्षत्रोत्पन्नशांत्यादिषु मंगला
त् लग्नात् खेदशमे के सति विधौ चंद्रे सुखगते चतुर्थे गुरौ लग्नस्थे सति तन्वंशांतिकं मो क्याद्दि दुष्टसमये गुरुशुक्रास्तादिदुष्टकाले नो शुभदं तथा नि
मित्त के त्वाद्युत्पात दर्शने सति गुरुशुक्रास्तादावपि शुभं स्यात् उक्तं च शांतिकं माणिक्यं वीतरोगे नैमित्तिके तथा गुरुभार्गवमौढ्येपि दोषस्तत्र न विद्य
ते ३४ अथ होमाहुतिशुद्धिमनुष्टुभाह सूर्यभादिति सूर्याक्रांतनक्षत्रात् त्रित्रिभे नक्षत्रत्रयमध्ये चंद्रे चंद्रनक्षत्रे दिननक्षत्रे सति क्रमात् सूर्यादिषु

धान्यस्थितिः शुभकरी गदिता ध्रुवेज्यद्वीशेंद्रहस्तचरभेषु च धान्यवृद्धिः ३३ क्षिप्रध्रुवांत्यचरमैत्रमघासु शस्तं स्याच्छांतिकं
सह च मंगलपौष्टिकाभ्यां खेऽर्के विधौ सुखगते तनुगे गुरौ नो मौढ्यादिदुष्टसमये शुभदं निमित्ते ३४ सूर्यभात्त्रित्रिभे चंद्रे सू ग.
र्यविच्छुक्रपंगवः चंद्रारेज्यागुशिखिनो नेष्टा होमाहुतिः खले ३५ सैका तिथिर्वारयुता कृताप्ता शेषे गुणेभ्रे भुवि वह्निवासः॥

खे होमाहुतिः पतति यथा सूर्याक्रांतनक्षत्रात् नक्षत्रत्रयमध्ये होमारंभे सूर्ये मुखे होमाहुतिपातः ततो नक्षत्रत्रये बुधस्य ततः शुक्रस्य ततः पंगोः श
नेः ततश्चंद्रस्य ततः आरस्य भौमस्य ततः इज्यस्य गुरोः ततः राहोः ततः शिखिनः केतोः एवं सति यद्दिने खले पापग्रहमुखे होमाहुतिः पतति सा नेष्टा न
शुभदा अर्थात् शुभग्रहमुखे शुभा सूर्यनक्षत्राच्चंद्रनक्षत्रपर्यंतगणना ३५ अथ यद्दिने होमश्चिकीर्षितस्तद्दिने वह्निनिवासवशेन शुभाशुभफलमि राम.
ह वज्रयाह सैकेति शुक्लादिगणनया वर्तमानतिथिर्गण्या एकयुता वर्तमानवारयुता चतुर्भिर्भक्ता यच्छेषं तच्चेत् गुणमितं त्रिमितं शून्यमितं च तदा भुवि भू २२.
मौ वह्निर्वासो वसतिः फलमाह सौख्यायहोमे होमदिने भूमावग्नेर्वासे सति सौख्यं भवति अथ शशियुग्मशेषे एकमिते शेषे ऽग्निवासो दिवि स्वर्गे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलंकर्तुः प्राणनाशः द्विमिते शेषेऽग्निवासो भूतले तत्फलंकर्तुरर्थनाशः उक्तंच तिथिवारयुतिः सैका वेदभक्तावशेषकात् निवासो ग्नेर्द्योभ्निरूपे।
वित्तप्राणविनाशदः पाताले द्विकशेषेण धनसंचयनाशनः गुणवेदावशेषेण भूमौ विपुलसौख्यदः संस्कारेषु विचारोस्य न कार्यो नापि वैश्वदेवे नित्ये
नैमित्तिके कार्ये न चाब्दे मुनिभिः स्मृतः केश्चित् वेदसुत्रमपि होमे वर्ज्यमित्युक्तं तद्यथा अर्के अंशद्वादशमे त्याचतुर्थे मंदः शुक्रादष्टमे गारकश्च गुरु
र्धर्मे जीवनः खेटसुत्रे होमे नाशः पुत्रदाराधनानामिति ३६ अथ प्रतिवर्षोत्पन्ननवान्नभक्षणमनुष्टुभाह नवान्नमिति चरादिद्वादशभेषु सत्तनौ समी
चीनलग्ने शुभग्रहे युते दृष्टे चेत्यर्थः नंदातिथयः १।६।११ विषघटी विवाहप्रकरणोक्ताः मधुश्चैत्रः पौषः आर्किः शनिः भूमिजो भौमः एतान्विना
वर्जयित्वा नवान्नभक्षणं शुभं ३७ अथ नौकाघटनमनुष्टुभाह याम्यत्रयेति याम्यत्रयं भरणीकृत्तिकारोहिण्यः ईश आर्द्रा अन्यानि प्रसिद्धानि

सौख्याय होमे शशियुग्मशेषे प्राणार्थनाशौ दिवि भूतले च ३६ नवान्नं स्याच्चरक्षिप्रमृदुभे सत्तनौ शुभं विनानंदाविषघटीमधुपौ
षार्किभूमिजान् ३७ याम्यत्रयविशाखेंदुसार्पपित्र्येशभिन्नभे भृग्विज्यार्कदिने नौकाघटनं सत्तनौ शुभं ३८ मूलाद्रीभर
णीपित्र्यमृगे सौम्ये घटे तनौ सुखे शुक्रेष्टमे शुद्धे सिद्धिर्वीराभिचारयोः ३९ व्यंत्यादितिध्रुवमघानिलसार्पधिष्ण्यैरिक्ते तिथौ
चरतनौ विकवीदुवारे॥ ११ एभ्यो भिन्ननक्षत्रेषु शुक्रगुरुरविवारे सत्तनौ शुभयुतदृष्टे लग्ने नौकाघटनं नौकानिर्माणं शुभं नौकाचालननौका

गमनमुहूर्तौ दीपिकायां शुभाहे विष्णुयुग्मेंदुभगमैत्राश्विपाणिषु चालनं घटनस्थानान्नावः शुभतिथौ उडुषु अश्वि करे ज्य सुधानिधि पूर्वामित्र धनाच्यु
तमे शुभलग्ने तारकयोगतिथौ द्विविशुद्धौ नौगमनं शुभदं शुभवारे ३८ अथ वीरसाधनाभिचारयोर्मुहूर्तमनुष्टुभाह मूलेति मूलादिनक्षत्रपंचके तथा
घटे तनौ कुंभलग्ने सौम्ये बुधे सति तथा शुक्रे सुखे चतुर्थे अष्टमे शुद्धे ग्रहरहिते तादृशे लग्ने वीरस्य धनस्य अभिचारस्य कर्मणः सिद्धिः निष्पत्तिः ३९
अथ योगनिर्मुक्तं स्नानं वसंततिलकेनाह व्यंत्येति विगतान्यंत्यादीनि रेवत्यादीनि नवधिष्ण्यानि येभ्यस्तेषु षोडशशिष्ट नक्षत्रेषु॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा रिक्तासंज्ञासु तिथिषु चरलग्ने तथा शुक्रचंद्रवर्जितवारे तथा विधौ चंद्रे हीने निषिद्धस्थानस्थे निषिद्धस्थानानि गोचरप्रकरणे तथा पापग्रहैर्भवे एकादशे केंद्रे १।४।७।१० कोणे नवपंचमे स्थानस्थितैः सद्भिः एवंविधे लग्ने रुजाविरहितस्य रोगनिर्मुक्तस्य जनस्य स्नानं आरोग्यस्नानं शस्तं शुभं नारदः स्थिरज्यादितिसार्पांत्यपितृवारुणभेषु च न कुर्याद्रोगमुक्तस्य स्नानं वारे ज्ञशुक्रयोरिति ४० अथ शिल्पविद्यामनुष्टुभाह मृदुध्रुवेति मृदुध्रुवादिनक्षत्रेषु बुधे दशमे लग्ने वा सति अथवा गुरौ दशमे लग्ने वा सति तथा विधौ चंद्रे बुधगुरुषड्वर्गस्थे च सति शिल्पविद्या नानावर्णादिनिर्मितं मूर्त्यादिकं तद्विद्यायाः प्रारंभः शस्यते ४१ अथ संधानमनुष्टुभाह सुरेज्येति पुष्यादिनक्षत्रे तथाष्टम्यां तिथौ हरौ द्वादश्यां च तिथौ तैतिलकरणे च तथा शुक्रदृष्टे युते चलग्ने तथा शुभग्रहाणां वारे संधानं संधिर्मैत्रीतियावत् इष्यते तथा च कश्यपः भाग्येपुष्ये समैत्रे चलग्ने शुक्रेक्षितेयुते करणे तैतिले ष्टम्यां द्वादश्यां संधि

स्नानं रुजाविरहितस्य जनस्य शस्तं हीने विधौ खलखगैर्भवकेंद्रकोणे ४० मृदुध्रुवक्षिप्रचरेज्ञगुरौ वा खलग्नगे विधौ ज्ञजीववर्गस्थे शिल्पविद्या प्रशस्यते ४१ सुरेज्यमित्रभाग्येषु वाष्टम्यां तैतिले हरौ शुक्रदृष्टे तनौ सौम्यवारे संधानमिष्यते ४२ त्यक्त्वाष्ट ८ भूत १४ शनिविष्टिकुजाज्जनुर्भमासौ मृतौ ८ रविविधू अपि भानि नाड्याः॥ ॥ रिष्यते ४२ अथ परीक्षामुहूर्तं वसंततिलकयाह त्यक्त्वेति भूतश्चतुर्दशी जनुर्भमासौ जन्मर्क्षं जन्ममासश्च जन्मराशेरष्टमं सूर्यं चंद्रं च नाड्याः भानि जन्मभकर्मभादिनक्षत्राणि नाडीनक्षत्राणि एतानि त्यक्त्वा द्व्यंगे द्विस्वभावे चलग्ने चरलग्ने वा तन्नवांशे च चंद्रशुद्धौ ताराशुद्धौ गुरुशुद्धौ च सत्यां करो हस्तः अदितिः पुनर्वसुः हरिः श्रवणः इंद्रो ज्येष्ठा कं जलं तत्स्वामी वरुणः तस्य नक्षत्रं शततारका एषु भेषु परीक्षा कार्या अन्यत्स्पष्टं परीक्षा नाम सुवर्णस्तेयादिपातकाभिशस्तस्य शुद्ध्यशुद्धिविचारपूर्वकं तप्तमाषादिरूपा दिव्यमितियावत् उक्तं च दीपिकायां नो शुक्रास्ते ऽष्टमार्के गुरुसहितरवौ जन्ममासे ऽष्टमेंदौ विष्टौ मासे मलाख्ये कुजशनिदिवसे जन्मताराशु चाथ नाडीनक्षत्रहीने सुरगुरुरजनीनाथताराविशुद्धौ प्रातः कार्या परीक्षा द्वितनुचरगृहांशोदये शस्तलग्ने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति व्यवहारोच्चये अष्टम्यां च चतुर्दश्यां प्रायश्चित्तपरीक्षणे नपरीक्षाधिवासश्च शनिभौमदिने भवेत् ज्येष्ठा श्रवण हस्तश्च तथाग्नेयः पुनर्वसुः त
द्वच्छतभिषा प्रोक्ता ह्यभियुक्तविचारणे इति नाडीनक्षत्राणि दीपिकाकारवचनात् जन्मर्क्षमाद्यं दशमं च कर्मसंघातिकं षोडशमं च मानसं स्यात्
च विंशं समुदायमष्टादशं त्रयोविंशतिभं विनाशकं एवं षट्भोजनः सर्वो जातिदेशाभिषेकभैः नवभो नृपतिर्ज्ञेयो नाडीतारास्मृतास्त्रमः इति नृ
जातिनक्षत्राणि वराहसंहितायां पूर्वात्रयं सानलमग्रजानां राज्ञां च पुष्येण सहोत्तराच सपौष्णमैत्रं पितृदैवतं च प्रजापतेर्भं च कृषीवलानां आदित्य
हस्ताभिजिदश्विनानि वणिक्जनस्वाम्यमुपागतानि मूलत्रिनेत्रानिलवारुणानि भान्यग्रजातेः प्रभविष्णुतायाः सौम्यैंद्रचित्रावसुदैवतानि सेवा
जनस्वाम्यमुपागतानि सार्पविशाखा श्रवणभरण्यश्चांडालजातेरभिनिर्दिशंतीति देशो वाराणस्यादिकस्तन्नक्षत्रं शतपदचक्रोक्तं यथा वाराण

ह्युंगेचेरेतनुलवेशशिजीवताराशुद्धौ करादितिहरीद्रकृपेपरीक्षा ४३ व्ययाष्टशुद्धोपचयेलग्नगे शुभदृग्युते चंद्रे त्रिषट्द
शायस्थे सर्वारंभः प्रसिध्यति ४४ स्वातींद्रपूर्वाशिवसार्पभे मृतिर्ज्वरेंत्यमैत्रे स्थिरता भवेद्रुजः याम्यश्रवोवारुणतक्षभे शिवा ११
घस्ता हि पक्षो १५ ह्यधिपार्कवासव ४५ स्याः नक्षत्रं रोहिणीति अभिषेकभे यस्मिन् पुष्यादिकेन नक्षत्रेण राजाभिषेको जातस्तदभिषेकर्क्षमिति राज्ञां

नवभानि इतरेषां षडेव भानि ४३ अथ सामान्यतः शुभकार्येषु लग्नशुद्धिमनुष्टुभाह व्ययेति व्ययो द्वादशं अष्टमं एतत्स्थानद्वयं शुद्धं ग्रहरहितं यस्मिन् एता
दृशे स्वजन्मराशेर्जन्मलग्नाद्वा उपचयभवने त्रिषडेकादशदशमराशौ लग्नगते शुभैर्दृष्टे युते च तथा चंद्रे त्रिषड्दशायस्थे सति सर्वेषां शुभकार्याणामारंभः
सिध्यतीति तथा च वसिष्ठः उपचयभे लग्नगते व्ययनैधनशुद्धिसंयुते लग्ने उपचयगे शीतकरे मंगलकर्माणि कार्याणि इति ४४ अथ नक्षत्रेषु ज्वरोत्पत्तौ सत्यां
तन्निवृत्तौ दिनसंख्यां द्वितीयोपजातिकयोपेंद्रवज्रया चाह स्वातींद्रेति मूलाग्नीति स्वातीज्येष्ठापूर्वात्रयाद्रार्श्लेषासु ज्वरे ज्वरोत्पत्तौ सत्यां मृतिर्मरणं
स्यात् अथ अंत्यमैत्रे रेवत्यनुराधयोर्ज्वरोत्पत्तौ रुजो रोगस्य स्थिरता बहुकालेन रोगनिवृत्तिः स्यात् तथा भरणीश्रवणशततारा: तक्षभं चित्रा एतेषु न
क्षत्रेषु शिवा घस्राः एकादशदिवसाः रोगः ह्यधिपं विशाखा अर्कों हस्तः वासवं धनिष्ठा एषु त्रिषु भेषु पंचदश दिवसाः रोगः ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु.टी. मूले अग्निः कृत्तिका दास्रमश्विनी एषु नवदिवसा रोगः पित्र्यभे मघायां नखाः विंशतिर्दिवसाः बुध्न्यभे उत्तराभाद्रपदा अर्यमा उत्तराफाल्गुनी पुष्यपु
न.प्र. नर्वसुरोहिणीषु नगाः सप्तदिवसा रोगः अब्जवैश्वेमृगोत्तराषाढयोः मासस्त्रिंशद्दिनानि रोगस्थैर्यं ततो रोगनिवृत्तिः अत्र शान्तिर्वसिष्ठोक्ता रूक्षेण रूपं
२४ कनकेन कृत्वा तल्लिंगमन्त्रैश्च सुगंधपुष्पैः वस्त्राक्षतैर्गुग्गुलधूपदीपनैवेद्यताम्बूलफलैश्च सम्यक् पूजां च कृत्वा ऽमयनाशनाय द्विजाय दद्याद्दत्तु
लं शिवाय आमयो रोगः अतुलमपरिमितद्रव्यं अथानन्तरं यमाहि मूलभं भरण्यश्लेषामूलेषु कृत्तिकाविशाखार्द्रामघासु च सप्तनक्षत्रेषु यस्य क
स्यचित्फणिदंशने सर्पदंशने मृतिर्भवेत् अत्र सर्पदंशो यस्य एतेषु गोचरवशेन चंद्रबलं न भवति तस्यैव सर्पदंशेन चंद्रबलं न भवति तस्यैव सर्पदंशो
न यद्यत्र चंद्रस्तस्यैव गोचरे वा शुभप्रदः तदा नूनं भवेन्मृत्युः सुधासंसिक्तदेहिनः इति ४६ अथ शीघ्रं रोगीमरणे विशिष्टयोगं द्वितीयोपजातिकया

मूलाग्निदास्रे नव पित्र्यभे नखा २० बुध्न्यार्यमेज्यादितिधातृभे नगाः ७। मासो ३० ब्जवैश्वे थ यमाहिमूलभे मिश्रे शपित्र्येफ
णिदंशने मृतिः ४६ रौद्राहिशाक्राम्बुपयाम्यपूर्वा द्विदैववस्वग्निषु पापवारे रिक्ता हरिस्कंददिने च रोगे शीघ्रं भवेद्रोगिज
नस्य मृत्युः ४७ क्षिप्राहिमूले द्रुहरीशवायुभे प्रेतक्रिया स्यात् त्रपकुंभगे विधौ॥ ४८ रौद्राहीति रौद्रादिनक्षत्रेषु पापवारे सति रि

क्ताः प्रसिद्धाः हरिर्द्वादशी स्कंददिनं षष्ठी एतासु तिथिषु एवंविधे विशिष्टयोगे यस्य रोगोत्पत्तिर्भवति तस्य रोगिजनस्य शीघ्रं मृत्युर्भवेत् ४७ अ
थ प्रेतदाहमुहूर्तं प्रेतदाहादिनिषेधं चोपेंद्रवज्रयाह क्षिप्रेति क्षिप्रादिनक्षत्रेषु प्रेतक्रिया प्रेतानां मृतानां प्रियउत्तमलोकप्राप्त्यर्थं श्राद्धादिक्रिया राम.
स्यात् यदि दाहसमये कारणवशान्नारब्धा अथ झषकुंभगे विधौ मीनकुंभस्थिते चंद्रे धनिष्ठोत्तरार्धादिपंचनक्षत्रे प्रेतस्य दाहो ज्वालनं त्यजेत् च २४
पुनः यमदिग्गमं दक्षिणदिशिगमनं यात्रां तथा शय्यायाः खट्वायाः वितानं वयनं तथा गृहगोपनं गृहाच्छादनं आदिशब्देन तृणकाष्ठसंग्रहं च
त्यजेत् ब्रह्मपुराणे च के मरणमपि निषिद्धं कुंभमीनस्थिते चंद्रे मरणं यस्य जायते न तस्योर्ध्वगतिर्दृष्टा संततेर्न शुभं भवेदिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनपंचकेमृतस्यपंचकेदाहप्राप्तौसत्यांतत्पुत्तलविधिंकृत्वादाहः कार्यः पश्चादाशौचनिवृत्त्यनंतरंशांतिकंकार्यं यदिपंचकप्रवृत्तेः प्रागेवमृतःप्र
तिबंधवशात्पंचकेदाहप्राप्तौपुत्तलविधिमकृत्वादाहः कार्यः आशौचनिवृत्त्यनंतरंशांतिर्नकार्या एवंरेवत्यंतमृतस्यरेवतीमपहायदाहः कार्यः
नपुत्तलविधिः आशौचनिवृत्त्यनंतरंशांतिरेवकार्यः मरणनिषेधदाहनिषेधप्रतिपादकवचनद्वयसद्भावादिति ४८ अथकाष्ठानांगोमयपिं
डानांचसंग्रहमुहूर्तंशार्दूलविक्रीडितेनाह सूर्येत्सार्द्रसभैरितिस्पष्टार्थं ४९ अथत्रिपुष्करयोगंसफलंवसंततिलकयाह भद्रातिथिरिति भद्रा
संज्ञकतिथिर्द्वितीयासप्तमीद्वादशी शनिभौमसूर्यवारेभवति तथाद्वीशंविशाखा अर्यमोत्तराफाल्गुनी अजचरणः पूर्वाभाद्रपदा।अदितिःपुन
र्वसुः वह्निः कृत्तिका वैश्वमुत्तराषाढा एषुनक्षत्रेषुउक्ततिथिवारनक्षत्ररूपेविशिष्टयोगेसतित्रैपुष्करः त्रिपुष्करएवत्रैपुष्करः स्वार्थेण त्रिपुष्करसं

प्रेतस्यदाहंयमदिग्गमंत्यजेद्वैय्याविताने गृहगोपनादिच ४८ सूर्येत्सार्द्रसभैरधस्थलगतैः पाकोरसैः संयुतःशी
र्षैयुग्ममितैःशवस्यदहनंमध्येयुगैःसार्पभैः प्रागाशादिषुवेदभैः स्वसुहृदांस्यात्संगमोरोगभीः क्वाथादेःकरणं
सुखंवचगदितंकाष्ठादिसंस्थापने ४९ भद्रातिथीरविजभूतनयार्कवारेद्वीशार्यमाजचरणादितिवह्निविश्वे॥ ६ ॥

ज्ञकयोगोभवति कीदृशः मृत्युविनाशवृद्धौत्रैगुण्यदः तद्दिनेयदिकश्चिन्म्रियेततदायादास्त्रयोम्रियेरन् यदिकिंचिद्वस्तुविनष्टंतदानस्यतद्व
स्तुत्रयनाशः तथाकिंचिद्वस्तुलब्धंतदात्रिगुणलद्वस्तुलाभः वसिष्ठः रविरविजभौमवारेभद्रायांविषमपादमृक्षंचेत् त्रैपुष्करस्त्वयोगस्त्रिगुण
फलोयुगुलभेद्विगुणः पादानियन्नक्षत्रस्यैवचरणः पूर्वराशौचरणत्रयमपरराशौभवतितानिविषमचरणानिद्वीशार्यमेत्यादीनि अथवसुधे
निष्ठा।तक्षचित्रा चांद्रमृगः एतानिभानिभद्रातिथयः रविशनिभौमवाराश्च अत्रापिविशिष्टयोगेद्विपुष्करनामयोगोभवति तत्फलं मृत्युविना
शवृद्धौद्वैगुण्यकृत्भवति तत्रशांतिमाहनारदः दद्यात्तद्दोषनाशायगोत्रयंमूल्यमेववा द्विपुष्करेद्वयंदद्यान्नदोषस्त्वृक्षमात्रतइति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु॰टी॰ अत्र त्रिपुष्करे कश्यपेन रविस्तानेड्बृहस्पतिवारोप्युक्तः भद्रातिथिः शनीज्यारवारे चेद्विषमांघ्रिभं त्रिपुष्करं त्रिगुणादं द्विगुणं द्व्यंघ्रिभे मृतावि ति इद
नं॰प्र॰ मेव दृष्ट्वा श्रीपतिनाप्युक्तं विषमचरणधिष्ण्यमित्यादि अत्र कश्यपवाक्ये मृतावेव त्रिगुणफलतोक्ताऽग्रंथकृता तु श्रीपतिवाक्यानुरोधान्मृत्यु
२५ विनाशे वृद्धावित्युक्तं ५० अथ शवप्रतिकृतिदाहे निषिद्धकालं शार्दूलविक्रीडितेनाह शुक्रारेति एवंविधे दिने शवस्य प्रतिकृतिः पर्णशरादि
नासावयवत्वकल्पनं तस्य दाहो न कार्यः कुतः द्विविधो हि प्रेतसंस्कारः प्रत्यक्षशरीरस्यैकः तत्र प्रतिकृतेरन्यः तत्र प्रत्यक्षशरीरसंस्कारे दिन
विचाराभावः गार्ग्यः प्रत्यक्षशरीरसंस्कारे दिनं नैव विशोधयेत् इति प्रतिकृतिसंस्कारे कालत्रयं आशौचमध्ये वर्षमध्ये वर्षानंतरं चेति आशौ
चमध्ये क्रियते पुनः संस्कारकर्म चेत् शोधनीयं दिनं तत्र यथासंभवमेव तु आशौचविनिवृत्तौ चेत्पुनः संस्क्रियते मृतः सशोध्येव दिनं ग्राह्यं ऊर्ध्वं संव

त्रैपुष्करो भवति मृत्युविनाशवृद्धौ त्रैगुण्यदो द्विगुणकृद्वसुतक्षचांद्रे ५० शुक्रारार्किषु दर्शभूतमदने नंदासु तीक्ष्णोग्रभे पौष्णवारुण
भे त्रिपुष्करदिने न्यूनाधिमासेऽयने याम्ये ऽब्दात्परतश्च पातपरिघे देवेज्यशुक्रास्तके भद्रावैधृतयोः शवप्रतिकृतेर्दाहो न पक्षे सिते ५१

त्सराद्यदीति गार्ग्यवचनाद्दिनशुद्धिरुच्यते शुक्रारार्कि दिने शुक्रभौमशनिवारे शवप्रतिकृतेर्दाहो न कार्य इति प्रत्येकं संबंधः दर्शोमावास्या भूतश्चतुर्दशी म
दनस्त्रयोदशी नंदाः प्रतिपत्षष्ठ्येकादश्यः आसु तिथिषु तथा तीक्ष्णोग्रभे मूलार्द्राज्येष्ठाश्लेषास्तीक्ष्णानि पूर्वात्रयमघाभरण्य उग्राणि पौष्णं रेवती वा
रुणं शततारा पूर्वोक्ते त्रिपुष्करदिने न्यूनाधिमासे क्षयमासे अधिकमासे अयने याम्ये अब्दात्परतः अब्दमध्ये याम्यायनेपि कार्यः नंदामदनभूताम्मा पातवैधृ
ति विष्टिषु शुक्रार्किभौमपरिघध्रुवमिश्रोग्रमैत्रभैः कर्तुश्चंद्रे एवं दान्ते जन्मप्रत्यरितारके त्रिपादभे सितेपक्षे यनेयाम्ये ऽब्दतः परं शवप्रतिकृतेर्दाहः राम॰
शुक्रेज्यास्ताधिमासके नेष्टो मध्योद्विपान्मैत्रद्वीशादिति भगध्रुवे इति निबंधोक्तेः दिनक्षयोपि वर्ज्यः वर्जयेत्तु दिनक्षयमिति गार्ग्योक्तेः पातपरिघ २५
पातो व्यतीपातो महापातश्च परिघश्च एतेषु दाहो न कार्यः देवेज्यशुक्रास्तके दाहो न कार्यः भद्रायां वैधृतौ च तथा सिते शुक्लपक्ष इति ५१ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतेनैवछंदसावर्ज्येतराण्याह जन्मप्रत्यरितारयोरिति कर्तुः जन्मप्रत्यरितारयोः जन्मताराउत्पत्तिनक्षत्रंदशमैकोनविंशंचेति प्रत्यरिताराजन्म
भात्पंचमचतुर्दशत्रयोविंशंनक्षत्रं तथाकर्तुर्मृतिसुखात्येष्वष्टमचतुर्थेद्वादशस्थेचंद्रेसतिदाहोनसत्नप्रशस्तः अथमध्यमनक्षत्राणि मै
त्रमनुराधा भगःपूर्वाफाल्गुनी अदितिःपुनर्वसुः ध्रुवाणिरोहिण्युत्तरात्रयं विशाखा द्व्यंघ्रिभंमृगचित्राधनिष्ठाः तेष्वपि शवदाहोमध्यमः अ
थोत्तमानि अर्केज्याभ्यांसहितोविधुः अर्कगुरुचंद्रवारेतथाश्रवणहस्तस्वातीअश्विनीपुष्येषुपंचनक्षत्रेषुशवप्रतिकृतेर्दाहः श्रेष्ठः इदमखिलमा
शौचात्परतः अनंतरं मध्येतुयथासंभवंकिंचिद्गुणागीकारेणविचार्यं ५२ अथमूलनक्षत्रजातस्यविशेषमुपजातिकयाह अभुक्तमिति
नारदः अभुक्तमूललक्षणंज्येष्ठांत्यमूलादिभवंघटीचतुष्टयंजगौ ज्येष्ठांत्यघटीचतुष्टयंमूलादिघटीचतुष्टयंचेत्यर्थः नारदः योज्येष्ठामूलयो

जन्मप्रत्यरितारयोर्मृतिसुखांत्येष्वृचकर्तुर्नेसन्मध्यामैत्रभगादितिध्रुवविशाखाद्व्यंघ्रिभेत्वपिच श्रेष्ठोर्केज्यविधोर्दिनेश्रुतिक
रस्वात्यश्विपुष्येतथात्वाशौचात्परतोविचार्यमखिलंमध्येयथासंभवं ५२ अभुक्तमूलंहिघटीचतुष्टयंज्येष्ठांत्यमूलादिभवं
हिनारदः वसिष्ठएकद्विघटीमितंजगौबृहस्पतिस्त्वेकघटीप्रमाणकं ५३

॥रंतरालप्रहरजःशिशुः अभुक्तमूलजःसार्पमघानक्षत्र
योरपि अयमेवमुख्यःपक्षः कश्यपादिबहुमुनिसंवादात्तु कश्यपः ज्येष्ठांत्यमूलयोरंतरालयामोद्भवःशिशुः अभुक्तमूलजःसोथत्वाश्लेषापित्र्य
योरपि वसिष्ठोपि भुजंगपौरंदरपौष्णभानांतदग्रभानांचतदंतरालं अभुक्तमूलंप्रहरप्रमाणंत्यजेत्सुतंतत्रभवांसुतांचेति वसिष्ठएकद्विघटीमितंजगौ
ज्येष्ठांतेएकघटिकामूलाद्यघटिकाद्वयमित्यर्थः। इदंवसिष्ठेनकेचिन्मतमुक्तं यतस्तद्वाक्येकेचित् अपरेइतिपदोक्तेः तद्वाक्यंच ज्येष्ठांत्यपादघटिका
मितमेवकेचिन्मूलंह्यभुक्तमपरेपुनरामनंति मूलाद्यपादघटिकाद्वितयेनसार्धमृष्टेःसमाःपरिहरेदिहजन्मभाजमिति बृहस्पतिस्तुएकघटीप्रमाण
कंजगौ ज्येष्ठांत्यार्धघटिकामूलाद्यार्धघटिकेत्यर्थः गुरुः ज्येष्ठांत्यघटिकार्धंचमूलादौघटिकार्धकं तयोरंतर्गतानाडीह्यभुक्तमूलमुच्यतइति ५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथान्ये आचार्या उपजातिकयाहुः अथोचुरन्य इति आचार्याः प्रोचुः मूलस्य प्रथमा अष्टघटिकाः शाक्रस्य ज्येष्ठायाः अंतिमाः पंचनाडिका एवमुभ
योरंतराले त्रयोदशघटिका अभुक्तसंज्ञकाः प्रोचुः उक्तं च ज्येष्ठांत्या घटिकाः पंच मूलाद्याः वसुनाडिकाः अभुक्तमिति तज्ज्ञेयं तत्र जातं शिशुं त्यजेदिति
तत्फलमाह तत्राभुक्तमूले जातं शिशुं बालं बालां वा पिता परित्यजेत् त्यागाशक्तो वा पिता अस्य बालस्याष्टसमाः अष्टौ वर्षाणि मुखं न पश्येत् नारदः
अभुक्तमूलजं पुत्रं पुत्रीमपि परित्यजेत् अथवाब्दाष्टकं तातस्तन्मुखं न विलोकयेदिति अत्र घटीनां न्यूनाधिक्यकथनं दोषस्याधिक्याल्पत्वक
थनार्थं ज्ञेयं ५४ अथ मूलाश्लेषाजातस्य चरणवशेन फलमुपजातिकयाह आद्ये पित्तेति मूलप्रथमचरणे जातस्य बालस्य पिता नाशं प्राप्नोति
द्वितीयचरणे जननी माता नाशं प्राप्नोति सापत्नमातरि मातृशब्दो गौणः तेन गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति जननीपदप्रयोगः तृतीयचर

अथोचुरन्ये प्रथमाष्टघस्रो मूलस्य शाक्रांतिमपंचनाड्यः जातं शिशुं तत्र परित्यजेद्वा मुखं पिता स्याष्टसमा न पश्येत् ५४
आद्ये पिता नाशमुपैति मूलपादे द्वितीये जननी तृतीये ॥ ० ॥ ० ॥

णे धनं नश्यति चतुर्थश्चरणो बालस्य शुभः अत्र विशेषो नारदेनोक्तः दिवाजातस्तु पितरं रात्रौ तु जननीं तथा आत्मानं संध्ययोर्हंति नास्ति गंडो निरा
मयः वसिष्ठस्तु मूलाद्यपादे यदि रात्रिभागे तदात्मनो नास्ति पितुर्विनाशं द्वितीयपादो दिनगो यदि स्यान्न मातुरस्यो पितदास्ति दोषः अथानंतरं शां
त्या मूलाश्लेषांशांत्यास्तत्वनुष्ठितया सर्वत्र चरणचतुष्टयेपि शुभं अनिष्टफलनाशकं कल्याणं स्यात् शास्त्रोक्तरीत्या खलु सूतकांते मासे तृतीये प्यथवा
ब्दांते इति कालत्रयं वसिष्ठेनोक्तं गंडे तु विशेषः मातृगंडे सुतं जातं सूतकांते विचक्षणः कुर्याच्छांतिं निहस्से वा तद्दोषस्यापनुत्तये शिष्टास्तु सर्वत्रापि
यन्नक्षत्रे जन्म तन्नक्षत्र एव शांतिरिति व्यवहरंति अथाहिभे विलोममिति आश्लेषायां मूलपादोक्तं फलं विलोमं विपरीतं ज्ञेयं मूलस्य प्रथमपा
दे पितृनाश इत्युक्तं सोऽश्लेषाचतुर्थपादोत्पन्नस्य द्वितीयपादे मातृनाशः सोऽश्लेषातृतीयचरणे तृतीयचरणे धननाश उक्तः सोऽश्लेषाद्वितीयचरणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थचरणेशुभमुक्तं तदाश्लेषाप्रथमचरणेज्ञेयं अत्रबहुविचारोस्तिग्रंथभूयस्त्वभयान्नलिख्यते अथकेश्चिन्मूलवृक्षादिविचारउक्तः जयार्णवे
मूलंस्तंभत्वचाशाखापत्रपुष्पफलंशिखामुनयोष्टौदिशोरुद्राः सूर्याःपंचाब्धयोग्नयः मूलेतुमूलनाशःस्यात्स्तंभेवंशविनाशनं त्वचिमातुर्भवेत्
क्लेशःशाखायांमातुलस्यच पत्रेराज्यंविजानीयात्पुष्पेमंत्रिपदंस्मृतं फलेचविपुलालक्ष्मीःशिखायामल्पजीवितं अथमूलपुरुषयोगेघटी
न्यासस्तत्रैव मूलस्यघटिकान्यासोमूर्ध्निपंचनृपोभवेत् मुखेसप्तमृतिःपित्रोःस्कंधेवेदामहाबलः बाह्वोरष्टौबलीपाण्योस्तिस्रोहत्यान्वितोभवेत् हृ
दिवेदा भूपमंत्रीनाभौद्वौब्रह्मविद्भवेत् गुह्येदशातिकामीस्याज्जान्वोःषण्महामतिः पादयोःषट्मृतिकस्यत्युक्तवान्कमलासनइति अ
थमूलोद्भूतकन्यायाः फलार्थमूलांगविभागस्तत्रैव चतस्रोनाडिकाःशीर्षेकुर्वंतिपशुनाशनं मुखेषट्धनहानिःस्यात्कंठेपंचधनागमः कौ
टिल्यंहृदयेपंचबाह्वोर्वित्तागमंततः वेदाःपाण्योर्दयाधर्मंवेदागुह्येतिकामिनी ज्येष्ठमातुलनाशश्चजंघयोर्युगनाडिका ज्येष्ठभ्रातृविनाश

धनंचतुर्थीसस्युभोयशांत्यासर्वत्रसत्स्याद्धिभेविलोमं ५५ स्वर्गेशुचिप्रोष्ठपदेषुमाघेभूमौनभःकार्तिकचैत्रपौषे॥

श्चचतस्रोजानुयुग्मके पादयोर्दशनाड्यश्चतत्रैवैधव्यमादिशेत् इतिमूलप्रसूतायामुनिभिःफलमीरितं अथाश्लेषाजातयोःपुत्रकन्ययोरंग
विभागेनफलंतत्रैव मूर्ध्निपंचसुराज्याप्तिमुखेसप्तपितृक्षयः नेत्रेद्वेजननीनाशःग्रीवायांत्रिषुलंपटः स्कंधेवेदागुरौभक्तिःहस्तेष्टौचबलीभवे
त् हृद्येकादशभिश्चात्मघातीसंजायतेनरः स्त्रीवानाभौभ्रमःषड्भिर्गुह्येनवतपोधनः पादेपंचधनंहंतिसार्पोदेतत्फलंक्रमात् अथाश्लेषावृक्षो
पितत्रैवोक्तः फलंपुष्पंदलंशाखात्वग्लताकंदएवच सार्पवल्यांदशांशाःकखरविश्वार्कसागराः नाडिकास्तद्भवेबालेफलंज्ञेयंयथाक्रमं श्रीःश्रीराज
भयंहानिःमातृपित्रात्मसंक्षयइति अयंविभागोनक्षत्रस्यषष्टिघटिकात्मकोज्ञेयः न्यूनातिरिक्तेअनुपातः ५५ अथमूलनिवासंसफलमिंद्र
जयाह स्वर्गेइति शुचिराषाढःप्रोष्ठपदोभाद्रपदः इषआश्विनःमाघःप्रसिद्धः एषुमासेषुमूलनक्षत्रंस्वर्गेस्ति श्रावणकार्त्तिकचैत्रपौषेषुभू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 मोतिष्ठति तपस्यः फाल्गुनः शुक्रो ज्येष्ठः फाल्गुनमार्गशीर्षवैशाखज्येष्ठेषु अधः पाताले मूलं तिष्ठति तत्फलं च यदा मूलनक्षत्रं यस्मिन्मासे यत्र
 भवति तत्रैव स्वर्गमृत्युपातालेषु एवं प्रोक्तं शुभाशुभफलं ददाति तेन द्रव्याद्यभावे स्वर्गपातालस्थे मूले दोषाभावाच्छांतेरनावश्यकत्वं ज्ञेयं यदा तु
 भूमावेव मूलं तदा शांतिरवश्यं विधेयेति शक्तेन उक्तं च ज्योतिषार्णवे भूमिष्ठं दोषबहुलं सत्यमन्यत्र संस्थितमिति ज्योतिर्निबंधे मूलाश्विपि
त्र्यचरणे प्रथमे च नूनं पौष्णेंद्रयोश्च फणिनश्चतुरीयपादे मातुः पितुः स्ववपुषोपि करोति नाशं जातो यदा निशि दिनेप्यथ संध्ययोर्वेति तत्रापि श्रां
त्याशुभं भवतीति ज्ञेयं ५६ अथ मूलप्रसंगाद्दुष्टेषु गंडांतादिनिमित्तेषु जातस्यारिष्टपरिहारं च शार्दूलविक्रीडितेनाह गंडांतेंद्रभेति एतेषु शिशोरुत्प
त्तिर्न शस्ता दुष्टफलदा गंडांतं तिथिनक्षत्रलग्नानां संधिः तल्लक्षणं ज्येष्ठापौष्णभेत्यादिना वक्ष्यति इंद्रभं ज्येष्ठानक्षत्रं मूलयोगः पातो महापातः परि

मूलं ह्यधस्तात्तु तपस्यमार्गवैशाखशुक्रेष्वशुभं च तत्र ५६ गंडांतेंद्रभमूलपातपरिघव्याघातगंडावमेसंक्रांतिव्यतिपातवैधृ
तिसिनीवालीकुहूदर्शकेवज्रेकृष्णचतुर्दशीषु यमघंटे दग्धयोगमृतौ विष्टौ सोदरभे जनिर्नेपितृभे शस्ता शुभा शांतितः ५७

घव्याघातगंडयोगाः अवमस्तिथिक्षयः संक्रांतिः सूर्यसंक्रमणपुण्यकालः व्यतीपातवैधृती योगौ सिनीवाली दृष्टेंदुरमावास्या कुहूर्नष्टेंदुरमावा
स्या सा दृष्टेंदुः सिनीवाली सा नष्टेंदुकला कुहूरित्यभिधानात् दर्शश्चंद्रदर्शनरहितामावास्या एतद्भेदोग्रे प्रतिपादयिष्यते वज्रे वज्रयोगे कृष्णपक्ष
चतुर्दश्यां यमघंटे मघाविशाखेत्युक्ते दग्धयोगे सूर्येशपंचाग्निरसाष्टनंदा इत्युक्तेः मृतौ द्वीशात्तोयादित्युक्ते मृत्युयोगे विष्टौ भद्रायां सोदरस्य भ्रातु
र्भगिन्या वा नक्षत्रे पितृभे माता च पिता च पितरौ तयोर्भे मातृभे पितृभे च एषु निमित्तेषु सुतस्य सुताया वा जन्म चेत्स्यात्तदानिष्टकृत्स्यादित्यर्थः
दुष्टनिमित्तस्योपलक्षणत्वात् त्रीतरजन्माप्यनिष्टं सजातीयापत्यप्रसवानंतरं विजातीयापत्यप्रसवस्त्रीतरः यथा पुत्रत्रयप्रसवानंतरं क
न्याजन्म कन्यात्रयप्रसवानंतरं पुंजन्म सा जनिः शांतितः वसिष्ठादिप्रोक्तशांत्यानुष्ठितया शुभा परिणामसुखदायिनीत्यर्थः ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथशांतयोलिख्यंते तत्रप्रथमंमूलशांतिरुच्यते॥ शौनकउवाच अथातः संप्रवक्ष्यामिमूलजातहिताय्च मातापित्रोर्धनस्यापिकुलेशांतिहि
ताय्च जातस्यद्वादशाहेतुजन्मर्क्षेवाशुभेदिने समाष्टकेवामतिमान् कुर्याद्वाशांतिमादरात् वसिष्ठः सुसमेपुण्यदेशेतुमंडपंकारयेद्बुधः कुंडं
चतद्बहिः कुर्याद्ग्रहयज्ञोक्तमार्गतः पंचामृतंपंचगव्यंपंचत्वक्पल्लवानिच उदुंबरवटाश्वत्थप्लक्षाम्रत्वक्सपल्लवाः शतौषधीमूलशंखन
वरत्नानिमृत्तिकाः कुष्ठंमांसीहरिद्रेद्वेमुराशैलेयचंदनं वचाचंपकमुस्ताचसर्वौषध्योदशैवहि गजाश्वरथ्यावल्मीकसंगमस्थानसंभवा ह्रदगो
राजनगरद्वारतश्चाष्टमृत्तिकाः शतौषधीमूलानिच अश्मरी१ सहदे२ अपराजिता३ मुंडा४ उशीर५ वाला६ अधःपुष्पी७ शंखपुष्पी८ ज्ये
ष्ठीमधु९ कोरकः१० चक्रांकिता११ विष्णुक्रांता१२ शिवक्रांता१३ मयूरशिखा१४ काकजंघा१५ भृंगराज१६ कुमारी१७ हय१८ कर्णिकार१९
अपामार्ग२० बिल्व२१ षण्मूला२२ अंबुज२३ उत्तरा२४ पुत्रजीव२५ दूर्वा२६ काश२७ कुश२८ साल२९ नाल३० चक्रमर्द३१ सिंही३२ व्याघ्री
३३ अर्क३४ प्लक्ष३५ पलाश३६ पिंपल३७ वट३८ उदुंबर३९ तुलसी४० उत्पल४१ शतपत्र४२ अतसी४३ सारिवा४४ कदंब४५ बकुल४६
शमी४७ राहिक४८ निर्गुंडी४९ मुंडी५० दंडी५१ ब्राह्मी५२ अशोक५३ सूर्यभक्ता५४ रुद्रजटा५५ कदली५६ बीजपूरक५७ मदनक५८ मुस
ली५९ पुनर्नवा६० आम्र६१ पाटल६२ श्रीपर्णी६३ करवीर६४ चंपक६५ गुडूची६६ देवदारु६७ अगरु६८ चंदन६९ कुटज७० शिग्रु७१
हरिद्रा७२ जटामांसी७३ वचा७४ कुष्ठ७५ तज७६ दारुहरिद्रा७७ बंधुजीव७८ सिंधुवार७९ सटी८० अश्वगंधा८१ मुस्ता८२ कुरंटक८३
पनस८४ जीवक८५ जाती८६ मालती८७ मधूक८८ खदिर८९ सप्तच्छद९० सिरीष९१ काकमाची९२ शतावरी९३ केतकी९४ जंबु९५ शाक
९६ वेतस९७ आमलक९८ सरल९९ गिरिकर्णी१०० इति तिलमाषयवव्रीहिगोधूमानिप्रियंगवः चणकैः सहितासप्तसंज्ञाजानिचसर्वदा
वज्रमौक्तिकवैडूर्यपुष्परागेंद्रनीलकं पंचरत्नमिदंप्रोक्तं मंत्रैः कुंभेषुनिक्षिपेत् सुवर्णेनप्रमाणेनतदर्धार्धेनवापुनः निर्ऋतिप्रतिमांकुर्याद्वित्त
शाठ्यविवर्जितः अत्रविशेषः शौनकेन पलमानेनवार्धेनपादेनाथस्वशक्तितः नक्षत्रदेवतारूपंकारयित्वाविचक्षणः यद्वामूल्यंसुवर्णस्यस्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु॰टी॰ पयित्वा प्रपूजयेत् सुवर्णं सर्वदेवत्यं सर्वदेवात्मकोनलः। सर्वदेवात्मको विप्रः सर्वदेवमयो हरिरिति वस्त्राणि षोडशाष्टौ च शुक्लसूक्ष्माण्यतं द्वितः ब्राह्म
ने॰प्र॰ णान्वरयेत्पश्चात्स्वस्तिवाचनपूर्वकं श्रोत्रियांश्चतुरो वाष्टौ द्वादश त्वथ षोडश प्रधानाचार्यमेतेषां श्रेष्ठं तत्प्रतिमार्चने। ईशानादिचतुःकोणेषु व्र
२८ णान्जलपूरितान् पूर्वोक्तद्रव्यसंयुक्तान्स्थापयेदेकवर्णकान् विप्रान्पृथक्पृथक् वापि मधुपर्कादिनार्चयेत् द्वारेषु जापकानष्टौ द्वौ द्वौ च वरये
त्पुनः अग्निर्गोर्वोहणे मंत्रैः शुक्लपुष्पाक्षतादिभिः ततः कुंभे जलं स्पृष्ट्वा कुशकूर्चैर्जपेदिति रुद्रसूक्तं च भद्राग्नेरानो भद्रा इति क्रमात् पुरुषसूक्तं च तन्
मन्त्रैर्देवान्ध्यात्वा प्रयत्नतः गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं पंचगव्यमिदं कुंभे क्षिपेद्गजमदान्वितं रजतं कांचनं ताम्रं विद्रुमं तीर्थवारि च
निक्षिपेद्धेममूलं च दशाष्टयवनिर्मितं देवदारु च शैलेयं पद्मं नीलोत्पलं तथा वचा लोध्रं प्रियंगुं च शतच्छिद्रे घटे क्षिपेत् वंशपात्रोपरिन्यस्तं श
तच्छिद्रे घटे स्थितं ततश्च निर्ऋतिं देवमर्चयेत्पश्चिमामुखं मोषुणस्त्विति मंत्रेण शुक्लवस्त्राक्षतादिभिः मूलरूपं विधातव्यं श्यामं कुणपवाहनं
खड्गखेटधरं चोग्रं द्विभुजं च वृकाननं स्थापयेत्तं ग्रहांश्चैव वस्त्रगंधादिभिर्यजेत् चरुं च श्रपयेत्तत्र नैर्ऋतं दुष्कृतापहं तत्र चत्वारः कुंभाश्चतुर्दि
सुस्थाप्याः एकः कुंभो रुद्रस्थापनार्थमन्यः स्थाप्यः एकः शतच्छिद्रः कुंभः तस्मिन्कुंभे देवदारुशैलेयमित्याद्योषधानि तथा सुवर्णमूलं स्वष्टाद
शयवपरिमितं निक्षिप्य तदुपरि वंशादिपात्रं निधाय तदुपरि वस्त्रं निधाय तत्र निर्ऋतिप्रतिमां इन्द्रप्रतिमां जलप्रतिमासहितां स्थापयेत् ततः षोड
शोपचारैः पंचोपचारैर्वा पूजयेत् उक्तं च शौनकेन पुण्यगर्भैर्मंत्रितैः तोयैः प्रोक्षितायां क्षितौ ततः तत्रोदकुंभं सुश्लक्ष्णं रक्तं व्रणविवर्जितं अकृष्ण
मूलं निर्णिक्तं पूजयेन्निर्मलांभसा आकलशेष्वित्यनया कलशस्थापनं शुभं इमं मे इति मंत्रेण पूरयेत्तीर्थवारिणा कुंभं च वस्त्रगंधाद्यैस्तत्तन्मंत्रैः प्र सम॰
पूरयेत् याः फलिनीरित्यनया क्षिपेद्गन्धौषधादिकं वस्त्रावगुण्ठितं कुर्यात्पूरयेत्तीर्थवारिणा कूर्चं हेमसमायुक्तं चूतपल्लवसंयुतं स्वस्तिकोपरि वि २८
न्यस्य क्षीरद्रुमसपल्लवैः द्रोणव्रीहींश्च निक्षिप्य ईशाने च निधापयेत् पंचरत्नानि निक्षिप्य सर्वौषधिसमन्वितं अर्चितं गंधपुष्पाद्यैः श्रीरुद्रं तत्र
संजपेत् तत्रा प्रतिरथं सूक्तं शतरुद्रानुवाककं रक्षामंत्रं तथा पुण्यं रक्षोघ्नं च सूक्तं जपेत् त्र्यंबकं जपेत्सम्यगष्टोत्तरसहस्रकं एकवारं तथा ज्ञा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीपावमानीसूक्तं शतञ्जपेत् जपस्यपंचकं मासद्वयं वा तल्लाभतः श्रीरुद्रस्यैककुंभं च सर्वसूक्तानि तत्रतु तथान्यं पंचमं कुंभं पूर्वोक्तै र्लक्षणैर्युतं चतुः
प्रस्रवर्णं कुर्यात्पंचवक्त्रं च तत्र्यवेत् वस्त्रावगुंठितं कुर्यात्पूरयेत्तीर्थवारिणा पंचरत्नसमायुक्तमाम्रपल्लवसंयुतं एतस्मिन्नपि पंचरत्नसप्तमृत्तिका श
तमूलदेवदारुप्रभृत्यो षधहेममूलानि निक्षिपेत् तत्र शतमूलालाभे विष्णुक्रांता सहदेवी तुलसी च शतावरी मूलानीमानि गृह्णीयाच्छतलाभे विशेषतः
तस्योपरि न्यसेत्पात्रं स्वर्णं वा रौप्यमृन्मयं शुद्धवस्त्रेण संछाद्य शतमूलानि निक्षिपेत् कुंभोपरि न्यसेद्विद्वान्मूलनक्षत्रदैवतं अधिप्रत्यधिदैवौ च दक्षि
णोत्तरदेशयोः अधिदैवं जपेदादौ ज्येष्ठानक्षत्रदैवतं एवं प्रत्यधिदैवं च पूर्वाषाढर्क्षदैवतं स्वलिंगोक्तै स्वमंत्रैश्च प्रधानादीन्प्रपूजयेत् पंचामृतेन स
स्नाप्य आवाह्यार्थ्यं समर्चयेत् उपचारैः षोडशभिर्यद्वा पंचोपचारकैः रक्तचंदनगंधाद्यैः पुष्पैः कृष्णासितादिभिः मेषशृंगादिधूपैश्च घृतदीपैस्तथैव
च सुरापोलिकमांसाद्यैः नैवेद्यैर्भोजनादिभिः मत्स्यमांससुरादीनि ब्राह्मणानां विवर्जयेत् सुरास्थाने प्रदातव्यं क्षीरं सैंधवमिश्रितं पायसं लवणोपेतं
मांसस्थाने प्रकल्पयेत् उक्तगंधाद्यलाभे तु यथालाभं समर्चयेत् पुष्पांजलिं तु समभ्यर्च्य होमं कुर्याद्यथोदितं निर्वापप्रोक्षणादीनि चरोः कुर्याद्यथा
विधि हविर्गृहीत्वा विधिवन्नैर्ऋत्ये वक्त्रे तु हुनेत् अत्र वसिष्ठेन विशेषोभिहितः मूलं प्रजामिति मंत्रद्वयस्य कण्व ऋषिर्निर्ऋतिर्देवता अनुष्टुप्छं
दः मूलाय स्वाहा प्रजापतये स्वाहेत्युपहोममंत्रौ पलाशसमिदाज्येन चरुणा च सहस्रकं अथवाष्टोत्तरशतं प्रत्येकं जुहुयात्ततः मूलं प्रजामि
त्यष्टाभिर्वाक्यैर्मंत्रद्वयेन च सावित्रसौम्यनैर्ऋत्यमंत्रैरश्वत्थसमवैः समिद्भिश्च तिलव्रीहीन्हुत्वा व्याहृतिभिस्ततः। मूलं प्रजामित्यष्टौ वाक्या
न्यर्चकोजपेत् अष्टोत्तरसहस्रं वा शतं वा नियतात्मवान् अयं होमप्रकारस्तु शाखांतरविषयो ध्येयः मोषुणः परापरेति यत्ते देवेति वा पुनः पाय
सं घृतसंमिश्रं हुनेदष्टोत्तरं शतं समिदाज्यचरून्यश्वाच्छक्तितः संख्यया हुनेत् अधिदैवतयोश्चैव जुहुयात्स्वस्वमंत्रकैः नक्षत्रदेवताभ्यश्च पाय
सेन तु होमयेत् कृणुष्वेति पंचदशभिर्जुहुयात्कृसरं ततः गायत्र्या जातवेदसे त्र्यंबकमिति क्रमात् सौरयुंजंति ता मग्निं वास्तोष्पत्य ग्निमेव च
क्षेत्रस्यपतिना गृणानाग्निं दूतं तथैव च श्रीसूक्तेन तथा विद्वान्समिदाज्यचरूंस्तु क्रमात् अष्टोत्तरशतेनाथ अष्टाविंशतिभिः क्रमात् अष्टाष्टसंख्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यावापिजुहुयाद्भक्तितोबुधः त्वंनःसोमेनपायसंजुहुयात्त्रयोदश चतुर्गृहीतमाज्यंचयातेरुद्रेतिमंत्रतः स्रुवेणजुहुयादाज्यंमहाव्याहृतिभिःक्र
मात् हुत्वास्विष्टकृतंपश्चात्प्रायश्चित्ताहुतीर्हुनेत् आचार्योयजमानोवाऽग्नौपूर्णाहुतिंहुनेत् होमशेषंसमाप्याथवह्निमारोपयेत्ततःकुंभाभिमंत्र
णंकुर्याद्दक्षिणेनाभिमंत्रयेत् मृत्युप्रशमनार्थायजपेत्र्यंबकंशतं रुद्रकुंभोक्तमार्गेणरुद्रमंत्रंस्तुशतंजपेत् धूपंदीपंचनैवेद्यंकुंभयुग्मेनिवे
दयेत् प्रसादयेत्ततोदेवमभिषेकार्थमादरात् भद्रासनोपविष्टस्ययजमानस्यऋत्विजः दारपुत्रसमेतस्यकुर्युःसर्वेभिषेचनं आसीभ्यामितिसूक्ते
नपावमानीभिरेवच आपोहिष्ठेतिनवभिरापइद्वाद्वयेनच सहस्राक्षत्र्चेनापिदेवस्यत्वेतिमंत्रकैः शिवसंकल्पमंत्रेणवक्ष्यमाणैश्चमंत्रकैः यो।
सौवज्रधरोदेवोमहेंद्रोगजवाहनः मूलजातशिशोर्दोषंमातापित्रोर्व्यपोहतु योसौशक्तिधरोदेवोहुतभुङ्मेषवाहनः सप्तजिह्वश्चदेवोग्निर्मूलदो
षंव्यपोहतु योसौदंडधरोदेवोधर्मोमहिषवाहनः मूलजातशिशोर्दोषंव्यपोहतुयमोमम योसौखड्गधरोदेवोनिर्ऋतीराक्षसाधिपः प्रशामयतुमू
लोत्थंदोषंगंडांतसंभवं योसौपाशधरोदेवोवरुणश्चजलेश्वरः नक्रवाहःप्रचेताह्वोमूलोत्थाघंव्यपोहतु योसौदेवोजगत्प्राणोमारुतोमृगवा
हनः प्रशामयतुमूलोत्थंदोषंबालस्यशांतिदः योसौनिधिपतिर्देवःखड्गभृन्नरवाहनः मातापित्रोःशिशोश्चैवमूलदोषंव्यपोहतु। योसौपशुपति
र्देवःपिनाकीवृषवाहनः आश्लेषामूलगंडांतदोषमाशुव्यपोहतु विघ्नेशःक्षेत्रपोदुर्गालोकपालानवग्रहाः सर्वदोषप्रशमनंसर्वेकुर्वंतुशांति
दाः तद्धेयारभिषेकंतुसर्वदोषोपशांतिदं सर्वकामप्रदंदिव्यंमंगलानांचमंगलं वस्त्रांतरितकुंभाभ्यांपश्चात्तुस्नापयेद्बुधः ततःशुक्लांबरधरःशु
क्लमाल्यानुलेपनः यजमानोदक्षिणाभिस्तोषयेदृत्विगादिकान् धेनुंपयस्विनींदद्यादाचार्यायसवत्सकां निर्ऋतिप्रतिमांकुंभवस्त्रहेमंचदाप
येत् ग्रहार्थवस्त्रप्रतिमास्तस्मैदद्यात्प्रयत्नतः श्रीरुद्रजापिनेदेयःकृष्णोनड्वान्प्रयत्नतः तत्कुंभवस्त्रप्रतिमास्तस्मैदद्यात्प्रयत्नतः उक्ता
लाभेततोदद्यादाचार्यब्रह्मऋत्विजां तत्तन्मूल्यंप्रदातव्यंशक्त्यावाथप्रदापयेत् दद्यादन्नंपायसादिब्राह्मणान्भोजयेच्छतं अलाभेसतिपंचा
शद्दशकंतदलाभतः सर्वशांतेश्चपठनमाशिषांग्रहणंतथा गृहीसमापयेद्विद्वान्निर्ऋतिःप्रीयतामिति इतिशौनकीयमूलशांतिः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथाश्लेषाशांतिरप्येवमेव कार्या तत्र विभवे पूर्वोक्तवत्पंचकुंभाः स्थाप्याः असंभवे कुंभद्वयं एकत्र रुद्रस्थापनं द्वितीये आश्लेषाप्रतिमास्थापनं अ
भिमंत्रणादि पूर्ववत् तत्राश्लेषाप्रतिमा सर्पाकारा अधिदैवत बृहस्पतिप्रतिमा प्रत्यधिदैवत पितृप्रतिमा स्थाप्या पूज्या च नमोस्तु सर्पेभ्य इति पूजामंत्र
इतीरितः सर्पो रक्तस्त्रिनेत्रश्च द्विभुजः पीतवस्त्रकः फणकाधिधरस्तीक्ष्णो दिव्याभरणभूषितः एवं ध्यात्वा ततोभ्यर्च्य होमकर्म समारभेत् अ
भिषेके विशेषः आश्लेषार्क्षजातस्य मातापित्रोर्धनस्य च भ्रातृज्ञातिकुलस्थानां दोषं सर्वं व्यपोहतु पितरः सर्वभूतानां रक्षंतु पितरः सदा सार्पनक्ष
त्रजातस्य वित्तं च ज्ञाति बांधवान् सर्पाधीश नमस्तुभ्यं नागानां च गणाधिप गृहाणार्घ्यं मया दत्तं सर्वारिष्टप्रशांतये इत्यर्घ्यमंत्रः मूलनक्षत्रवत्कु
र्यात्सर्वदोषस्य नाशतः एतच्च मूलाश्लेषाशांतिकद्वयं विवाहे उपस्थिते श्वश्रुश्वशुरयोः सत्त्वे मूलाश्लेषोत्पन्नयोरपि वधूवरयोस्तत्तदरिष्टनिवृत्य
र्थं विधेयं उपलक्षणत्वाच्च ज्येष्ठाविशाखोत्पन्नाया वध्वा वरस्य ज्येष्ठबंधुकष्टशांतये च नारदः मूलजा श्वशुरं हंति व्यालजा च तदंगना ऐंद्री
पत्यग्रजं हंति देवरं तु द्विदैवजा शांतिर्वा वृक्षकला चेत्स्यात्तर्हि दोषो न कश्चनेति इत्यश्लेषाशांतिः अथ गंडशांतिः गंडशांतिं प्रवक्ष्यामि सोमम
त्रेण भक्तिमान् कांस्यपात्रं प्रकुर्वीत पलैः षोडशभिर्नवं अष्टाभिश्च चतुर्भिर्वा द्वाभ्यां वा शोभनं तथा तन्मध्ये पायसं शंखेन नवनीतेन पूरिते राज
तं चंद्रमभ्यर्च्य सितपुष्पसहस्रकैः दैवतः शुक्लवासास्तु शुक्लमाल्यावरार्चितः सोमोहमिति संचिंत्य पूजां कुर्यादतंद्रितः दद्याद्दक्षिणामिष्टां गंड
दोषप्रशांतये शुक्लं वागीश्वरं चैव ताम्रपात्रसमन्वितं गंडदोषोपशांत्यर्थं दद्याद्देवविदे [illegible]ः अत्रापि पूर्ववत्प्रतिमाकलशहोमाभिषेकादिकं का
र्यं तिथिगंडे त्वनड्वाहं नाक्षत्रे धेनुरुच्यते कांचनं लग्नगंडे तु गंडदोषो विनश्यति आद्यभागेपि तु गंडे त्रयाणामभिषेचनं इतरत्र शिशोर्मातुरभि
षेकं च कारयेत् अन्यच्च उत्तरातिष्यचित्रासु पूर्वाषाढोद्भवस्य च कुर्याच्छांतिं प्रयत्नेन नक्षत्राकारजां बुधैः चित्राद्यर्धे पुष्यपादे द्वितीये पूर्वाषाढाधि
ष्ण्यपादे द्वितीये जातः पुत्रश्चोत्तराद्ये विघाती मातापित्रोर्भ्रातुरप्यात्मनश्च द्विमासस्योत्तरादोषः पुष्यश्चैव त्रिमासिकः पूर्वाषाढाष्टमे मासि चि
त्राषाण्मासिकं फलं नवमासं तथाश्लेषा मूले चाष्टौ समाः स्मृताः ज्येष्ठामासे पंचदशे पुत्रदर्शनवर्जिता उत्तरे तिलपात्रं स्यात्तिष्ये गोदानमिष्यते अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जांचित्रासुवैदेयापूर्वाषाढेतुकांचनं यवांश्चव्रीहिमाषांश्चतिलमुद्गांश्चदापयेत् यथावित्तानुसारेणकुर्याद्ब्राह्मणभोजनं पितुरायुष्यवृद्ध्यर्थेशांतिरत्रविधीय
ते इतिगंडांतादिशांतिः अथज्येष्ठाशांतिः भरद्वाजः ज्येष्ठादौमातृजननीमातामहंद्वितीयके तृतीयेमातुलंहंतिचतुर्थेजननीतथा आत्मानंपंचमेहंतिषष्ठेगो
त्रक्षयोभवेत् सप्तमेकुलनाशः स्यादष्टमेज्येष्ठसोदरः नवमेश्वशुरंहंतिसर्वेसंहरशमेनतथेतिप्रत्येकंघटिकाषट्कस्यफलमुक्तं अत्रापिमूलशांतिवत्सर्वंका
र्यं तत्रविशेषः घटिकैकाद्यमेचांतेज्येष्ठादौघटिकाद्वयं तयोः संधिरितिज्ञेयंशिशुर्गंडांतमीरितं ज्येष्ठांत्यपादस्तुपितुः स्वस्यचापिविनाशकः ज्येष्ठर्क्षेक
न्यकाजाताहंतिशीघ्रंधवाग्रजं शांतिंतस्यप्रवक्ष्यामिगंडदोषप्रशांतये तत्रचतुर्दिक्षुकुंभचतुष्टयंसंस्थाप्यतन्मध्येशतच्छिद्रंपंचमंकुंभंसंस्थाप्यपूर्ववत्पू
जादिविधायतत्र वज्रांकुशधरंदेवमैरावतगजान्वितं कुर्याच्छचीपतिंरम्यंदेवेंद्रंसुरनायकं शालितंडुलसंपूर्णकुंभस्योपरिपूजयेत् इंद्रायेंद्रोमरुत्वान् इतिमं
त्रेणवाग्यतः पूजयेद्विधिनासम्यग्लोकपालगणान्वितं रक्तवस्त्रद्वयोपेतंदेवराजंशचीपतिं पूजयेद्वारुणैर्मंत्रैः कुंभान्धीमान्स्नपयेत्ततः त्वन्नोअग्नेजपेदादौ
सत्वन्नोपिद्वितीयकेसमुद्रज्येष्ठाइतिचेमंमेगंगेचतुर्थकं पूजयेद्दत्वागंधाद्यैश्चतुरःकलशानपि आनोभद्राजपंचादौभद्राअग्नेद्वितीयकंइंद्रसूक्तंरुद्रजाप्यंजपेन्मृ
त्युंजयंततः समिद्भिर्ब्रह्मवृक्षस्यशतमष्टोत्तरंशतं सर्पिषाचरुणाचैवमूलमंत्रेणवाग्यतः हुनेज्जाप्यंचतेनैवयतइंद्रभयेतिच तिलान्व्याहृतिभिर्हु
त्वाशतमष्टोत्तरंपृथक् ततोभिषेकः ततोरूपंरूपमितिमंत्रेणतच्चक्षुरितिमंत्रेण आज्यावलोकनं पुनर्देवतापूजनंकृत्वा नमोस्तुसुरनाथायनमस्तु
भ्यंशचीपते गृहाणार्घ्यंमयादत्तंगंडदोषप्रशांतये अष्टोत्तरशतसंख्या कुर्याद्ब्राह्मणभोजनं अन्यत्सर्वंतुपूर्ववत् इतिज्येष्ठाशांतिः दिनक्षयेव्य
तीपातेव्याघातेविष्टिवैधृतौ शूलेगंडेचपरिघेवज्रेचयमघंटके कालगंडेमृत्युयोगेदग्धयोगसमन्विते तस्मिन्गंडदिनेप्राप्तेप्रसूतिर्यदिजायते अ
तिदोषकरीप्रोक्तातत्रपापयुतेसति विचार्यतत्रदैवज्ञः शांतिंकुर्याद्यथाविधि यजनंदेवतानांचग्रहाणांचैवपूजनं दीपंशिवालयेभक्त्यागोघृतेनप्र
दापयेत् अभिषेकंशंकरायअश्वत्थस्यप्रदक्षिणं अभीष्टफलसिद्ध्यर्थंकुर्याद्ब्राह्मणभोजनं गणापत्यंपुरुषसूक्तंसौरंमृत्युंजयंशुभं शांतिजा
प्यंपुनश्चैवकृत्वामृत्युंजयीभवेत् इत्युत्तरगार्ग्येदुष्टयोगशांतिः कुमारजन्मकालेतुव्यतीपातश्चवैधृतिः संक्रांतिश्चरवेस्तत्रजातोदारिद्र्यकारकः

CC-0. In Public Domain. Digitization by eGangotri

नवग्रहमखं कुर्यात्तस्य दोषस्य शांतये प्रथमं गोमुखाज्जन्म ततः शांतिं समाचरेत् गृहस्य पूर्वदिग्भागे गोमयेनानुलिप्य च अलंकृतस्व देशे तु व्रीहिरा
शिं प्रकल्पयेत् पंचद्रोणमितं धान्यं तदर्धं तंडुलेन च तदर्धं तु तिलैः कुर्यादन्योन्योपरि कल्पयेत् द्रव्यत्रितयराशौ तु अष्टपत्रं लिखेद्बुधः पुण्याहं वा
चयित्वा तु आचार्यं वरयेत्गुरुः राशौ प्रतिष्ठितं कुंभमव्रणं सुमनोहरं तीर्थोदकेन संपूर्य सर्वौषधिपल्लवं पंचगव्यं पंचरत्नं वस्त्रयुग्मेन वेष्टयेत्
तस्योपरि न्यसेत्पात्रं सूक्ष्मवस्त्रेण संयुतं प्रतिमां स्थापयेत्स्वात्माधिप्रत्यधिदेवतां चंद्रादित्याकृती पार्श्वे मध्ये वैधृतिमर्चयेत् एवमेव व्यतीपा
तशांतौ संक्रमणस्य च अधिदेवं भवत्सूर्यः चंद्रः प्रत्यधिदेवतं तत्तद्व्याहृतिपूर्वेण तत्तन्मंत्रेण पूजयेत् त्रियंबकेन मंत्रेण सोमपूजा समाचरेत्
उत्सूर्य इति मंत्रेण सूर्यपूजा समाचरेत् आप्यायस्वेति मंत्रेण सोमपूजा समाचरेत् तत्राष्टोत्तरसहस्रं अष्टोत्तरशतं वा अष्टाविंशति संख्या जपं स
र्वसौरजपं च आनो भद्रा अग्न इति सूक्तं पुरुषसूक्तं त्रियंबकं एतान् मंत्रान् कुंभान् स्पृष्ट्वा चतुर्दिक्षु जपं कुर्युः त्रियंबकेन मंत्रेण समिदाज्यचरून्हुनेत्
अष्टोत्तरसहस्रं अष्टोत्तरशतं अष्टाविंशतिर्वा मृत्युंजयेन मंत्रेण तिलहोमं समाचरेत् ततः समुद्रज्येष्ठाश्च आपो हि ष्ठेति तृचेन च अक्षीभ्यामिति सू
क्तेन पावमानीभिः त्रियंबकेन उत्सूर्येति आप्यायस्वेति वैदिकमंत्रैः सुरास्त्वामभिषिंचंत्वित्यादिकैः पौराणमंत्रैश्चाभिषेकं कुर्यात् ततश्च आज्याव
क्षणं अन्यद्दक्षिणादानादिकं पूर्ववत् इत्युत्तरगार्ग्ये व्यतीपातवैधृतिसंक्रांतिशांतिः अथ कुहूसिनीवालीदर्शशांतिः तत्र यस्याः कस्याश्चिद्मा
वास्यायाः अष्टौ भागान्कृत्वा प्रथमविभागे चंद्रदर्शनमस्ति न वेति विचार्य यदा चंद्रदर्शनं तदा सिनीवाली यदा चंद्रादर्शनं तदा दर्शः सकलचंद्र
क्षयस्तदा कुहूरित्यर्थः तदुक्तं छंदोगपरिशिष्टे इंदुक्षयकालः श्राद्धकाल इति प्रस्तुत्येंदुक्षयकालपरिगणमुक्तं अष्टमेंशे चतुर्दश्याः क्षीणो भ
वति चंद्रमाः अमावास्याष्टमे भागे पुनः किल भवेदणुः अत्रेंदुराद्यप्रहरे च तिष्ठेत् चतुर्थभागोनकलावशिष्टः तदंत एव क्षयमेति कृत्स्न एवं हि ज्यो
तिश्चक्रविदो वदंतीति एतत्कारिकाव्याख्यानं तद्भाष्यकारेण कृतं प्रहरस्त्वनात्मकश्चंद्रक्षयकाल इति तत्रामायाः सप्तमाष्टमप्रहरोक्तं कृत्स्नक्षय
कालः चतुर्दशीशेषयामदशादियामे च चंद्रसूक्ष्मताकाल इति तत्राय मंत्रविषयविवेकः यस्याममावास्यायां प्रथमप्रहरे शास्त्रात्प्रत्यक्षतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वा चंद्रदर्शनं स्यात्सा सिनीवाली सर्वत्र प्रसिद्धा। तत्रोत्पन्नस्य सिनीवालीशांतिर्विधेया अथ तस्यामेवामावास्यायां यदा नष्टेंदुकलात्वं स च क्षयका
लोमावास्यायामंतिमक्षण एव तस्य च संक्रांतिसमयवदतिसूक्ष्मत्वेन दुर्ज्ञेयत्वात् अमावास्यायाः सप्तमाष्टमप्रहरयोः कृत्स्नक्षयकालस्य भाष्यकारे
ण परिभाषितत्वात् सप्तमाष्टमप्रहरात्मकः कालः कुहूशब्दवाच्यस्तत्रोत्पन्नस्य कुहूशांतिः पुनस्तस्यामेवामावास्यायां प्रथमप्रहरानंतरं सप्तमप्रहरा
दर्वाक् प्रहरपंचकात्मकः कालो दर्शशब्दवाच्य इति तत्रोत्पन्नस्य दर्शशांतिर्विधेयेति एवमेकस्यामेवामावास्यायां कालभेदेन त्रयं संभवति यदा
त्वमावास्यायां चंद्रदर्शनाभावः तदा द्वयमेव दर्शत्वकुहूत्वरूपं संभवतीति अत्र केचिच्चतुर्दशीशेषे चंद्रदर्शने सति परदिने याऽमावास्या सा सिनीवा
लीत्याहुस्तन्न दृष्टश्चंद्रो यस्यामिति अन्यपदार्थस्य अमावास्यारूपस्यैव समानाधिकरण्येन ग्रहणात् किं च सिनीशब्देन श्वेता चंद्रकलावर्णवा
चिनः श्वेतशब्दाद्वर्णादनुदात्तात्तोपधात्तो न इति ङीपनकारे सिनी तां वलते प्राप्नोतीति सिनीवालीति व्युत्पत्तिश्च चतुर्दश्युदितचंद्रा अस्यायाममावा
स्यायां न युज्यते इति च तस्माद्दृष्टेंदुः सिनीवाल्यमावास्यैवाभिधीयत इत्येव न्यायः अथ गोलगणितविदोऽन्यथा समादधुः तत्र स्याद्दृष्टेंदुः सि
नीवालीत्यादौ उदयास्ताधिकारोक्तरीत्या दृक्कर्मद्वयसंस्कृतस्य दर्शनयोग्यत्वे सति प्राक्क्षितिजक्रांतिवृत्तसंबंधवत्त्वं ग्रहाद्दर्शनशब्दवाच्यं
मेघाद्यावरणे तु शास्त्रीयदर्शने हि निवर्तते आत्मा द्रष्टव्य इत्यादिवत् तथैव दर्शनायोग्यत्वे सति प्राक्क्षितिजसंबंधवत्त्वमदर्शनशब्दवाच्यमित्य
दर्शनलक्षणं अतश्चंद्रदर्शनलक्षणवत्यमावास्या सिनीवाली नाम चंद्रादर्शनलक्षणवत्यमावास्या कुहूर्नाम लक्षणद्वयानाक्रांताऽमावास्याद
र्शशब्दवाच्या इति अयमाशयः यदामावास्या सूर्योदयात् प्राक् घटिकात्रयवती तदा दृक्कर्मसंस्कारवशेन चंद्रस्य दृश्यत्वमागतं चेत्तदा सा संपूर्णा
ऽमावास्या सिनीवाली नाम तादृश्याममायां द्वितीयसूर्योदयावधिकायामुत्पन्नस्यारिष्टशांतये सिनीवालीशांतिस्तत्फलं चादेश्यं अथ तिथिवृद्धौ वा राम:
तस्या अमावास्या द्वितीयसूर्योदयानंतरमवशिष्टामावास्याघटीषूत्पन्नस्य कुहूशांतिरेव चंद्रादर्शनलक्षणसत्त्वात् यदि सैवामावास्या सूर्योदयात् प्रा ३१
क् घटिकात्रयचतुष्टयं वा प्रतिपत्संबंधा तदा सिनीवाल्येव अथ तादृश्यां न्यूनायामधिकायां वाऽमावास्यायां तु दृक्कर्मसंस्कारवशेन चंद्रस्य दृश्यत्व

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मागतं सामावास्या संपूर्णा कुहूर्नाम चंद्रादर्शनलक्षणमत्वात् तत्रापि कुहूशांतिरादेश्या यदा तु सूर्योदयादनंतरं कियतीषु द्वित्रासु घटीषु अतिक्रांता
सु अमावास्या प्रवृत्तिः पूर्वं चतुर्दश्येवाखिला तस्यामुषसि दृक्कर्मवशतश्चंद्रो दृष्टो माबाद्दर्शिन तथाप्यमावास्यायां चंद्रदर्शनलक्षणानाक्रांतत्वात्सा संपू
र्णामावास्या दर्शो नाम तत्र दर्शजननशांतिर्विधेयेति एवममावास्याभेदेन सिनीवाली कुहूदर्शरूपं पक्षत्रयं सावकाशमिति गोलज्ञानां मतं अथ
प्रकारांतरेण सिनीवाली सर्ववादिसिद्धा सैव कुहूस्तु पारिभाषिकी यदाह वसिष्ठः नक्षत्रे यस्य दर्शांतो विषनाड्याभवेद्यदि कुहूयोग इति ख्यातो व्या
धिमृत्युभयादिकृत् अयमर्थः यस्मिन्नक्षत्रे या विषनाड्या उक्ता तस्मिन्काले यदि दर्शस्य चरमघटिका भवेत्तन्नक्षत्रं च यस्य पुरुषस्य जन्मनक्षत्रं
जन्मकाले कालांतरे वा स्यात्तस्य पुंसो व्याधिमृत्युकृत् कुहूयोगो ज्ञेयः तत्र कुहूजननफलं शांतिश्च स्यात् कालांतरे पि कुहूयोगसंभवे शांतिर्विधेया
अत एव जगन्मोहने यस्य जन्मर्क्षगश्चंद्रो विषनाड्यां कुहूर्भवेत् अभिचारेण किं तस्य स्वयमेव मरिष्यतीति अतो विषघटिकातः पूर्वकालो दर्श
शब्दवाच्य इति एवं प्रकारत्रयेण सिनीवालीकुहूदर्शानां भेद उपादितस्तत्र यथा संप्रदायं व्यवस्थेत्यलमतिप्रसंगेन अथ शांतिप्रकारः सिनीवा
ल्यां प्रसूता स्याद्यस्य भार्या पशुस्तथा गवाश्वमहिषी चैव शक्रस्यापि श्रियं हरेत् यवसंति द्विजाश्चान्ये त्वप्रसादोपजीविनः वर्जयेत्तान् शेषांस्तु पशु
पक्षिमृगादिकान् द्विजाः पक्षिणः कुहूप्रसूतिरत्यर्थं सर्वदोषकरी मता यस्य प्रसूतिरेतेषां तस्यायुर्धननाशिनी नारीं विना च शेषाणां परित्यागो
विधीयते परित्यागात्तत्र शांतिं कुर्याद्द्वत्याविचक्षणः प्रतिमा कारयेद्रुद्रो भोश्चतुर्भुजसमन्वितं त्रिशूलखड्गवरदाभयहस्तां यथाक्रमात् श्वेतवर्णा
श्वेतपुष्पा श्वेतां बरवृषस्थितां त्र्यंबकेन मंत्रेण पूजां कुर्याद्यथाविधि इंद्रश्चतुर्भुजो वज्रांकुशचापससायकः रक्तवर्णो गजारूढो यत इंद्रेति मंत्र
तः पितरः कृष्णवर्णाश्च चतुर्हस्ता विमानगाः पद्मसूत्रकमंडल्वभयानां च धारिणः येसत्या इति मंत्रेण पूजां कुर्यादनंतरं कलशस्थापनपूजादि
पूर्ववत् समिदाज्यचरो होमं तिलमाषैश्च सर्षपैः अश्वत्थप्लक्षपालाशसमिद्भिः खादिरैः शुभैः अष्टोत्तरशतं मुख्यं प्रत्येकं जुहुयाद्बुधः त्र्यंबके
न मंत्रेण तिलान्व्याहृतिभिर्हुनेत् शंकरस्याभिषेकं च कुर्यादाज्यावलोकनं अन्यत्सर्वमभिषेकादि पूर्ववत् इति सिनीवालीकुहूशांतिः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथदर्शशांतिः अथातोदर्शजातानांमातापित्रोर्दरिद्रता तद्दोषपरिहारायशांतिंवक्ष्यामिनारद तत्रसंकल्पंविधायतन्मध्येकलशंसंस्थाप्य तन्मध्ये
निक्षिपेद्द्रव्यंदधिक्षीरघृतादिकं न्यग्रोधोदुंबराश्वत्थः सचूतानिंबकास्तथा एतेषांवृक्षमूलानांत्वगादीन्पल्लवांस्तथा पंचरत्नानिनिक्षिप्यवस्त्र
युग्मेनवेष्टयेत् तत्रसर्वेसमुद्राइति आपोहिष्ठाऋचेनेतिकयानश्चित्रइत्यृचा यत्किंचेदमृचाचैवसमुद्रज्येष्ठइत्यृचा अभिमंत्र्योदकुंभंत
मग्नेः पूर्वेनिधापयेत् दर्शश्चद्वतायाश्चसोमसूर्यस्वरूपकाः प्रतिमास्वर्णजानिस्युः रजतीताम्रजातथा आप्यायस्वेतिमंत्रेणसवितापश्चा
त्तमेवच उपचारैः समाराध्यततोहोमंसमाचरेत् समिधश्चचरुंद्रव्यंक्रमेणजुहुयाद्बुधः हुनेत्सवितृमंत्रेणसोमोधेनुंचमंत्रतः अष्टोत्तरशतंवा
पिअष्टाविंशतिसंख्यया अभिषेकादिपूर्ववत् हिरण्यरजतंचैवकृष्णाधेनुश्चदक्षिणा ब्राह्मणान्भोजयेत्तत्रकारयेत्स्वस्तिवाचनं इतिद
र्शशांतिः कृष्णपक्षेचतुर्दश्याः प्रसूतेःषड्विधंफलं चतुर्दशींचषड्भागांकुर्यादादौशुभंस्मृतं द्वितीयेपितरंहंतितृतीयेमातरंतथा चतुर्थेमातु
लंहंतिपंचमेवंशनाशनं षष्ठेतुधनहानिःस्यादात्मनोवंशनाशनं तस्मात्सर्वप्रयत्नेनशांतिंकुर्याद्विधानतः प्रतिमांकारयेच्छंभोः कर्षमात्रसुवर्णतः
तदर्द्धार्द्धेनवाकुर्यात्सर्वलक्षणसंयुतां वृषभेचसमासीनंवरदाभयपाणिकं शुद्धस्फटिकसंकाशंश्वेतमाल्यांबरान्वितं त्र्यंबकेनमंत्रेणपूजांकु
र्याद्विधानतः तत्रमूलशांतिवत्कलशस्थापनादिकृत्वातत्रशंभुपूजांविधाय तत्रआवाह्यवारुणैर्मंत्रैरनेनचविधानतः इमंमेवरुणेत्यनया
तत्त्वायामीत्यृचातथा त्वंनोअग्नइत्यनयासत्वन्नइतिमंत्रतः आग्नेयंकुंभमारभ्यपूजांकुर्याद्यथाक्रमात् आनोभद्राश्चसूक्तेनभद्राअग्नेश्च
सूक्तकं जप्त्वापुरुषसूक्तंचकद्रुद्रेतिक्रमाज्जपेत् ईश्वरस्याभिषेकंचग्रहपूजांचकारयेत् समिदाज्यचरूंश्चैवतिलमाषांश्चसर्षपान् अश्वत्थ
प्लक्षपालाशसमिद्भिः खादिरैःशुभैः अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा अष्टाविंशतिभिर्वापिहोमंकुर्यात्पृथक्पृथक् त्र्यंबकेनमंत्रेण राम:
तिलान्व्याहृतिभिःक्रमात् ग्रहाणांचहोतव्याश्चास्मदुक्तविधानतः अन्यत्सर्वमाज्यावलोकनादिपूर्ववत् इतिकृष्णचतुर्दशीजननशांतिः ३२
एकस्मिन्नेवनक्षत्रेभ्रात्रोर्वापितृपुत्रयोः प्रसूतिश्चेत्तयोर्मृत्युर्भवेदेकस्यनिश्चयात् तत्रशांतिंप्रवक्ष्यामिसर्वाचार्यमतेनतु अग्नेरीशान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भागेतुनक्षत्रप्रतिमांततः तन्नक्षत्रोक्तमंत्रेणचार्चयेत्कलशोपरि रक्तवस्त्रेणसंछाद्यवस्त्रयुग्मेनवेष्टयेत् स्वस्वशाखोक्तमार्गेणकुर्यादग्निमुखंततः
अनेनैवतुमंत्रेणहुनेदष्टोत्तरंशतं प्रत्येकंसमिदन्नाज्यैः प्रायश्चित्तांतमेवच अभिषेकंततःकुर्यादाचार्यः पितृपुत्रयोः वस्त्रालंकारगोदानैराचार्यं
पूजयेत्ततः ऋत्विग्भ्योदक्षिणांदद्यान्माषत्रयसुवर्णकं देवताप्रतिमादानंधान्यवस्त्रादिभिःसह यानशय्यासनादींश्चदद्यात्तद्दोषशांतये भोज
येद्ब्राह्मणान्सर्वान्वित्तशाठ्यविवर्जितः इत्येकनक्षत्रशांतिः अत्रैकस्मिन्नेवनक्षत्रेभ्रात्रोर्वापितृपुत्रयोरित्यत्रभ्राताचभ्राताचभ्रातराविति भ्रातृ
पुत्रौस्वसृदुहितृभ्यामितिएकशेषेसोदरयोर्भ्रातृभगिन्योरेवनिषेधः स्यान्नतुपुंभ्रात्रोः एवंपितृपुत्रयोरित्यत्रापिपिताचपुत्रश्चेतिद्वंद्वे पितापुत्र
योरेकनक्षत्रजनननिषेधः स्यान्नतुमातृपुत्रयोः नचमाताचपिताचपितरौमातापितरौत्येकशेषेतथापुत्रश्चदुहिताचपुत्रौपितरौचपुत्रौचेतिद्वंद्वे
पितृपुत्राणामितिबहुवचनंस्यात् तथापिवचनांतरानुरोधात् इष्टविषयोपिसंगृहीतोभविष्यति यदाहवसिष्ठः पित्रोस्तुजन्मनक्षत्रेजातस्तुपि
तृमातृहा जन्मर्क्षेपिचतल्लग्नेजातः सद्योमृतिप्रदः देवकीर्तिः यद्येकस्मिन्धिष्ण्येजायंतेदुहितरोथवापुत्राः पित्रोरंतकराः स्युर्यद्यपरेप्रीतिरतुला
स्यात् अपरेऽन्यनक्षत्रे गर्गः यस्यैवजन्मनक्षत्रेजायेद्भ्रातासुतोपिवा सजातीयः सजात्यावासोस्यप्राणान्प्रसाधयेदिति अथमूलेउपलक्ष
णत्वेनसर्वशांतिशेषभूतोगोमुखप्रसवोभिधीयते गर्गः प्रणिपत्यरविंवस्येप्रायश्चित्तमनुस्मरन् सर्वारिष्टविनाशाययदुक्तंज्योतिषार्णवे पित्रारि
ष्टेसुतारिष्टेमात्रारिष्टेतथैवच पौष्णाश्विन्योर्गुरौसार्पमघाचित्रेंद्रमूलभे एष्वृक्षेषुजातस्यकुर्याद्गोजननंतथा जन्मर्क्षेवानिजन्मर्क्षेशुभवारेशुभे
दिने कृत्वाभ्यंगादिकंसर्वंगृहालंकारपूर्वकं गोमयेनोपलिप्याथयथावित्तानुसारतः नवंशूर्पंतुतन्मध्येरक्तवस्त्रंप्रसारयेत् स्थापयित्वाशि
शुंतत्रपुनःसूत्रेणवेष्टयेत् प्राङ्मुखस्तमवाक्पादःतिलगर्भगतंशिशुं गोमुखंदर्शयित्वातुपुनर्जातंतुगोमुखात् विष्णुर्योनीतिसूक्तेनगव्येनस्ना
पयेच्छिशुं गवामंगेषुमंत्रेणगवामंगेषुसंस्पृशेत् विप्राः श्रेष्ठेनमंत्रेणगोप्रसूतंतुबालकं आचार्यस्तुसमादायपश्चान्मात्रेददातदा मातांजघन्य
भागस्थाशिशुमानीयतंमुखाद् ततः पित्रेतदादद्यात्ततोमात्रेप्रदापयेत् वस्त्रेसंस्थाप्यतुपितापुत्रस्यमुखमीक्षयेत् गोमूत्रंगोमयंक्षीरंदधिसर्पिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain: Digitization by eGangotri

कुशोदकं आपोहिष्ठादिभिर्मंत्रैरभिषिंचेत्ततः शिशुं मूर्ध्नि चाघ्राय तं पुत्रं तन्मंत्रेण तदा पिता अंगादंगात्संभवसि हृदयादधिजायसे आत्मा वै पुत्र
नामासि स जीव शरदः शतं मूर्ध्नि त्रिरवघ्राय तं शिशुं स्थापयेत्ततः पुण्याहं वाचयेत्पश्चाद्ब्राह्मणैर्वेदपारगैः दरिद्रायाथ विप्राय तां गां चाभ्यर्च्य
दापयेत् गोवस्त्रस्वर्णधान्यादि दत्वा दर्कादितः क्रमात् यथाशक्ति धनं दद्याद्ब्राह्मणेभ्यस्तथा पिता ततो होमं प्रकुर्वीत स्वस्वशाखोक्तमार्गतः उ
ल्लेखनादिकं कृत्वा चाज्यभागांतमाचरेत् होमस्येशानदिग्भागे धान्योपरि शुभं घटं सपंचगव्यं संस्थाप्य तिलांस्तत्र विनिक्षिपेत् क्षीरिद्रुमक
षायांश्च पंचरत्नानि निक्षिपेत् वस्त्रयुग्मेन संछाद्य क्षीरादिभिरथार्चयेत् विष्णुं वरुणमभ्यर्च्य प्रतिमां च विधानतः आपोहिष्ठेति तिसृभिरप्सु
मे सोम इत्यथ तद्विष्णोः परमं पदमक्षीभ्यामिति सूक्ततः ऋग्भिराभिः प्रत्येकं च अष्टाविंशतिसंख्यया अशक्तो चाष्टसंख्यं वा दधिमध्वाज्य
संयुतं आदित्यादिग्रहाणां च होमं कुर्यात् समंत्रकं इति गोमुखप्रसवविधिः अथ प्रसंगात् त्रीतरशांतिः सुतत्रये सुता चेत्स्यात् त्रये वा सुतो यदि
मातापित्रोः कुलस्यापि तदाऽरिष्टं महद्भवेत् जातस्यैकादशे वापि द्वादशाहे शुभे दिने आचार्यमृत्विजान्वृत्वा ग्रहयज्ञपुरःसरं ब्रह्मविष्णुमहेंद्रे
द्रप्रतिमाः स्वर्णतः कृताः पूजयेद्धान्यराशिस्थकलशोपरि शक्तितः पंचमे कलशे रुद्रं पूजयेद्रुद्रसंख्यया रुद्रसूक्तानि चत्वारिंशतिसूक्तानि
सर्वशः द्विज एको जपेद्धोमकाले शुचिसमाहितः आचार्यो जुहुयादत्र समिदाज्यतिलांश्चरून् अष्टोत्तरसहस्रं वा शतं वा विंशतिं तु वा देवताभ्यश्च
तुर्वक्त्रादिभ्यो ग्रहपुरःसरं कांस्याज्यवीक्षणं कृत्वा शेषं पूर्ववदाचरेत् इति त्रीतरशांतिः अथ सूर्यचंद्रग्रहणसमयजननशांतिः ग्रहणे चंद्रसू
र्ययोस्य प्रसूतिर्यदि जायते व्याधिपीडा तदा स्त्रीणामारोतुमृत्युदर्शनात् शांतिस्तेषां प्रवक्ष्यामि नराणां हितकाम्यया यस्मिन्नृक्षे विशेषेण ग्रहणं सं
प्रजायते तदृक्षाधिपतेरूपं सुवर्णेन प्रकल्पयेत् यथाशक्त्यनुसारेण वित्तशाठ्यं न कारयेत् सूर्यग्रहे सूर्यरूपं सुवर्णेन स्वशक्तितः चांद्रं चंद्रग्र रामः
हे धीमान् रजतेन विशेषतः राहुरूपं प्रकुर्वीत नागेनैव विचक्षणः नागेन सीसकेन शुचौ देशे प्रयत्नेन गोमयेन प्रलेपयेत् तस्योपरि न्यसेद्धीमा ३३
न् अन्नं वस्त्रं सुशोभनं त्रयाणां चैव रूपाणां स्थापनं तत्र कारयेत् रक्ताक्षतं रक्तगंधं रक्तपुष्पांबराणि च सूर्यग्रहे प्रदातव्यं सूर्यप्रीतिकरं च यत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वेतवस्त्रं श्वेतमाल्यं श्वेतगंधाक्षतादिभिः चंद्रग्रहे प्रदातव्यं चंद्रप्रीतिकरं च यत् एहवे चैव दातव्यं कृष्णपुष्पांबराणि च दद्यान्नक्षत्रनाथाय श्वे
तगंधानुलेपनं सूर्ये संपूजयेद्धीमानाकृष्णेति मंत्रतः चंद्रग्रहे च पालाशैः समिद्भिर्जुहुयान्नरः दूर्वाभिर्जुहुयाद्धीमान्राहोः संप्रीणनाय च सप्तवा
समिद्भिर्ब्रह्मवृक्षोत्थैः भेशाय जुहुयाद्बुधः भेशाय नक्षत्राधिपतये आज्येन चरुणा चैव तिलैश्च जुहुयात्ततः पंचगव्यैः पंचरत्नैः पंचत्वक्पंचप
ल्लवैः जलैरोषधिकल्कैश्च सहितैः कलशोदकैः ओषधिकल्कैः सर्वौषधिकल्कैः अभिषेकं प्रकुर्वीत यजमाने प्रयत्नतः मंत्रैर्वारुणदैवत्यैराप आपो
हिष्ठादिभिः सह इमंमेगंगे पितरस्तत्त्वायामीति मंत्रकैः अभिषेके निवृत्ते तु यजमानः समाहितः अनेन विधिना शांतिं कृत्वा सम्यग्विशेषतः अ
कालमृत्युशोकं च व्याधिपीडां न वाप्नुयात् सौख्यं सौमनसं नित्यं सौभाग्यं लभते नरः इत्थं ग्रहणजातानां सर्वारिष्टविनाशनं कथितं भार्गवेनेरं
शौनकाय महात्मने इति शौनकोक्ता ग्रहणजननशांतिः अथ ज्वराद्युत्पत्तिकालीननक्षत्रशांतिः तत्र साधारणो विधिः यस्मिन्नक्षत्रे ज्वरादि
पीडा भवति तन्नक्षत्राधिदेवताप्रतिमां सुवर्णेन कारयित्वा अमुकनक्षत्रसंभूतव्याधिशांत्यर्थं नक्षत्रशांतिं करिष्ये इति संकल्प्य शुचिप्रदेशे गो
मयेनोपलिप्ते तंडुलैश्चतुरस्रमंडलं निर्माय तन्मध्ये तत्तद्देवतावर्णवस्त्रद्वयवेष्टितग्रंथिं चंदनादिचर्चितं कलशं धान्योपरि विन्यस्य तत्र सर्वौ
षधीः पंचरत्नानि पंचगव्यानि सप्तमृत्तिकाः पंचपल्लवान्स्वस्वमंत्रेण कलशे निक्षिप्य सर्वे समुद्रा इति तत्र तीर्थान्यावाह्य तत्त्वायामीति वरुण
मावाह्य संपूज्य स्वस्वगृह्योक्तविधिनाग्निं प्रतिष्ठाप्य आज्यभागांते तत्तन्नक्षत्राधिदेवतामंत्रेण तन्नक्षत्रपूर्वोत्तरनक्षत्रदेवतामंत्रेण तत्तद्द्रव्ये
ण चहोमं कृत्वा तेन वरुणविकलशेन यजमानाभिषेके विहिते ताः प्रतिमा रोगी ब्राह्मणाय दद्यात् असौ साधारणो विधिः उक्तं च यस्मिन्नृक्षे
भवेत्पीडा तन्नक्षत्रस्य देवता सुवर्णनिर्मितां कृत्वा पूजयेत्प्रयतः शुचिः गोमयेनानुलिप्तस्य मंडलं शुभलक्षणं चतुरस्रं च संकीर्णं तंडुलैश्च कृ
ताकृतैः कृत्वा तु स्थंडिलं तत्र यत्नतः कृष्णया मृदा तत्पार्श्वे च सुधीः कुर्यात्तंडुलानां महाचयं तत्र प्रमाणं खारी वा द्रोणो वा दश शक्त्यपेक्षया अभा
वे पंच वा द्रोणा द्रोणं वा तदभावतः ईशानकोणदेशे तु कलशं स्थापयेत्सुधीः निधाय द्रविणं तत्र कलशे शक्त्यपेक्षया पीठं तु पूर्वतः स्थाप्यं तत्र व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वेणसंयुतं स्वस्तिकं तंडुलानांच शुभानां तत्र संलिखेत् तन्मध्ये देवतालिंखो नक्षत्रित यस्यवै यस्मिन्नृक्षे भवेद्रोगस्तस्य पूर्वापरे सुधीः उडूनी पूजयेद्य
त्नादधिप्रत्यधिदेवते देवतायस्यऋक्षस्तु मंत्रस्तल्लिंगएवच इत्यंचतस्यपत्योक्तप्रभावंप्रकृतंतथा तत्तद्वैविदुषानीयहोमतत्रप्रकल्पयेत् पंचोप
चारसंयुक्तापूजांतत्रप्रकल्पयेत् स्वगृह्योक्तविधानेनकुर्यादग्निमुखंसुधीः कलशंजलपूर्णंचवस्त्रयुग्मेनवेष्टितं निधायचौषधीस्तत्रपंचपल्ल
वसंयुताः सप्तस्त्वा नमृदांकुंभोन्माक्तवालप्रकल्पयेत् इममेवरुणइत्येवंजलमंत्रेणवापुनः सर्वेसमुद्राःसरितइतिमंत्रंचसंस्मरेत् यच्चिद्धितै
विशोयथेत्यादिसूक्तंजपेत्पुनः आवाहयेद्वृढदेवंवरुणंपयसांपतिं एवंनक्षत्रशांत्यर्थंविदध्यात्पूर्वपीठिकां सामान्योयंविधिः प्रोक्तोनक्षत्रा
णांप्रपूजने सर्वौषधीनांदुःप्राप्तौभवेदेकाम्रतावरी सर्वेषामपिगंधानामभावेचंदनंमतं शतपत्रंसुमनसांधूपाभावेचगुग्गुलुः नैवेद्यानामभावे
तुपायसंसघृतंस्मृतं मंत्राणामप्यभावेतुगायत्रीमंत्रउत्तमः होमद्रव्यस्यदुःप्राप्तौतिलाःप्रोक्तामनीषिभिः अष्टोत्तरसहस्रंचतथाशतमुदाहृ
तमिति अथनक्षत्रदेवताध्यानानि देवतेअश्विनौतत्रद्विभुजौशुक्लवर्णकौ सुधाकलशसंयुक्तौकमंडलुधरौशुभौ १ यमस्तुदेवतातत्रकृष्णव
र्णोद्विबाहुकः तुलापवाहनःश्रीमान् पाशदंडधरःप्रभुः २ अग्निस्तुदेवतातत्ररक्तवर्णोऽजवाहनः चतुर्भुजोधृतामन्त्रस्तु वस्तुकुवरदाभयः
३ रक्तवर्णश्चतुर्बाहुर्हंसारूढश्चतुर्मुखः।पद्माक्षसूत्रवरदाभयहस्तोनिरामयः ४ सोमोहिदेवतातस्यश्वेतवर्णःशुभाकृतिः दशाश्वरथमा
रूढःश्वेताश्वोपिनिगद्यते ५ रुद्रोहिदेवतायस्यवृषारूढश्चतुर्भुजः त्रिशूलखड्गवरदाभयहस्तःप्रकीर्तितः ६ चतुर्भुजादितिःपीतसा
क्षसूत्रकमंडलुः वरदाभयहस्तासाकार्यास्वर्णमयीशुभा ७ चतुर्भुजाःपीतवर्णादेवतास्यबृहस्पतिः दंडाक्षसूत्रपाणिस्तुसाभयःसकमंडलुः
८ सर्पस्तुदेवतातत्रमहामंडलिरूपधृक् सुविस्तृताशिरश्चंडोमकपिंगललोचनः ९ पितरोदेवतातत्रकृष्णवर्णश्चतुर्भुजः भद्राक्षसूत्राभयद
कमंडलुधराःशुभाः १० पूर्वाफाल्गुनिकायांचभगोदेवःप्रकीर्तितः रक्तवर्णोंबुजासीनोद्विभुजोभयपद्मकः ११ अर्यमादेवतापद्ममध्यस्थःप
द्मवर्णकःपद्माभयकरःश्रीमान्स्वर्णमूर्तिर्महाद्युतिः १२ सवितादेवतातस्यसप्ताश्वरथवाहनः द्विभुजोरक्तवर्णस्यात्पद्मासनसमाश्रयः १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वष्टा पद्मस्थितिश्चित्रवर्णः स्यात्स चतुर्भुजः पद्मासूत्राक्षवलयः पद्मालः पद्मकरः प्रभुः १४ वायुश्च देवता तत्र मृगारूढश्च मोचकः अजाचर्म
धरः श्रीमान् द्विभुजः परिकीर्तितः १५ इंद्राग्नी देवता तत्र गजाजावाहनोपनौ चतुर्बाहू रक्तवर्णौ निजशस्त्रधरौ तथा १६ चापांकुशाभयैर्युक्तौ
तथा समविराजितौ १६ पद्मासनो रक्तवर्णो मित्रस्तस्यानुदेवता पद्माभयकरः श्रीमान् द्विभुजः परिकीर्तितः १७ शक्र ऐरावतारूढो दिव्यसिंहास
ने विभुः श्वेतवर्णो वज्रधरोऽभयपाणिर्महाभुजः १८ निर्ऋतिर्देवता तत्र प्रेतारूढश्च मोचकः खड्गखेटकधारी च द्विभुजः परिकीर्तितः १९ जलं
तु देवता तस्य शुक्लवर्णा शुभाकृतिः वरुणोऽस्य जलस्यापि स्वामी पूज्यतमो मतः मकरे वाहने विष्टो भवेत्पद्मकरो ध्रुवं २० विश्वेदेवा देवताश्च श्वेतव
र्णाश्चतुर्भुजाः वरदाभयहस्ताश्च साक्षसूत्राम्बुभाजनाः २१ विष्णुस्तु कृष्णवर्णः स्यात्पन्नगाशनवाहनः शंखचक्रगदापाणिः पीतवासश्चतुर्भुजः
२२ वसवो देवतास्तत्र श्वेतवर्णाश्चतुर्भुजाः वरदाभयहस्ताश्च साक्षसूत्राम्बुजासनाः २३ वरुणो देवता तत्र मकरोपरिसंस्थिताः यष्टिपाशधरः
श्रीमान् महापद्मधरस्तथा २४ अजैकचरणो रुद्रो देवतास्य प्रकीर्तिता खड्गचर्मधरो वाग्मी भुजद्वयसमावृतः २५ अहिर्बुध्न्याभिधो रुद्रो देव
तास्य प्रकीर्तिता श्वेतश्चतुष्करः पद्मवरदाभयपाशभृत् २६ पूषा तु देवता तत्र पद्मवर्णोऽम्बुजासनः द्विभुजः पद्मपाणिः स्यात्पद्मगर्भप्रियो विभुः
२७ इति नक्षत्रदेवताध्यानं अथोपयुक्तत्वान्नारदीयोक्ता काकमैथुनदर्शनशांतिः दिवा वा यदि वा रात्रौ यः पश्येत्काकमैथुनं स नरो मृत्यु
माप्नोति ह्यथवा स्थाननाशनं काकघातव्रतं यद्वा विदधीताथ वत्सरं पितॄन् देवान् द्विजान् भक्त्या प्रत्यहं वाभिवादयेत् जितेंद्रियो जितक्रोधः
सत्यधर्मपरायणः तद्दोषशमनार्थाय शांतिकर्म समारभेत् गृहस्येशानदिग्भागे होमस्थानं प्रकल्पयेत् गृह्योक्तविधिना तत्र प्रतिष्ठाप्य हुता
शनं प्रतिमंत्रं त्र्यंबकेन अथ मृत्युंजयेन च व्याहृतीभिस्त्रीहितिलैः जपाद्यं तं प्रकल्पयेत् पूर्णाहुतिं च जुहुयात्कृतो शुचिरलंकृतः स्वर्णशृंगीं रौप्य
खुरां कृष्णां धेनुं पयस्विनीं वस्त्रालंकारसंयुक्तां निष्कद्वादशसंयुतां तदर्धेन तदर्धेन दद्याद्दक्षिणया युतां यथावित्तानुसारेण न्यूनाधिककल्पक
ल्पना आचार्याय श्रोत्रियाय तां गां दद्यात्कुटुंबिने यस्मात्त्वं पृथिवी सर्वा धेनो वै केशवसंनिभे सर्वमृत्युहरा नित्यमतः शांतिं प्रयच्छ मे ब्राह्मणे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु॰ टी॰ न॰ प्र॰ ३५

भ्यो विशिष्टेभ्यो यथाशक्त्या च दक्षिणां ब्राह्मणान्भोजयेत्पश्चाच्छांतिवाचनपूर्वकं एवं यः कुरुते सम्यक् तस्माद्दोषात्प्रमुच्यते इति काकमैथुनदर्शन शांतिः तत्रैव कपोतादिशांतिः आरोहयेद्गृहं यस्य कपोतो वा प्रवेशयेत् स्थानहानिर्भवेत्तस्य यद्वानर्थपरंपरा दोषाय धनिनां गेहे दरिद्राणां शिवाय च तस्य शांतिश्च कर्तव्या जपहोमविधानतः ब्राह्मणान्वरयेत्तत्र स्वस्तिवाचनपूर्वकं षोडश द्वादशाष्टौ वा श्रौतस्मार्तक्रियापरान् देवाः कपोत इत्यादिऋचाभिः पंचभिर्जपं लक्षं कृत्वा प्रयत्नेन स्वगृह्योक्तविधानतः ईशान्यां स्थापयेद्वह्निमुल्लातेऽष्टोत्तरशतं प्रत्येकं समिदाज्यान्नैः प्रतिप्रणवपूर्वकं यत इंद्र भयामहे स्वस्तिदेति त्रियंबकैः त्रिभिर्मंत्रैश्च जुहुयात्तिलान्स्वाहृतिभिस्ततः जपाहुतीस्ततो हुत्वा कुर्यात्पूर्णाहुतिं स्वयं विप्रेभ्यो दक्षिणां दद्यात् द्यौः शांतिं च ततो जपेत् ब्राह्मणान्भोजयेत्पश्चात्स्वयं भुंजीत बंधुभिः एवं यः कुरुते सम्यक् तस्माद्दोषात्प्रमुच्यते पिंगलाया स्वरेप्येवं मधुवल्मीकयोरपि संपूर्णमंदिरे हानिः शून्यसद्मनि मंगलं प्राकारे च पुरद्वारे देवागारे च वीथिषु ग्रामस्य तत्फलं चैव गुरुकल्पनया ततः शांतिकर्माखिलं कार्यं पूर्वोक्ते

त्रिस्त्र्यंगपंचाग्निकुवेदवह्नयः शरेषुनेत्राश्विशरेंदुभूकृताः वेदाग्निरुद्राश्वियमाग्निवह्नयोब्धयः शतद्विद्विरदा भतारकाः ५८

न क्रमेण तु इति कपोतपिंगलामधुवल्मीकादिशांतिः अथ पल्याः पतने शरटस्य वावरोहणे फलं शांतिश्च पादयोर्जंघने पाण्योर्गुह्ये गुह्ये च जंघयोः पल्याः पाते तथारोहे शरटस्य फलं न सत् अन्यत्र शुभदं पश्चात्सचेलं स्नानमाचरेत् दत्त्वा शिवालये दीपं मुखमाज्ये विलोकयेत् पल्लीशरटयो रूपं सुवर्णेन विनिर्मितं तदर्धार्धप्रमाणेन वित्तशाठ्यविवर्जितः वस्त्रयुग्मेन संवेष्ट्य श्रोत्रियाय निवेदयेत् इति पल्लीशरटयोः शांतिः अथ नक्षत्रप्रसंगादेवाश्विन्यादीनां भानां तारका उपजातिकयाह त्रिस्त्र्यंगेति तथा च श्रीपतिः वह्नित्रिऋत्विषुगुणेंदुकृताग्निभूतबाणाश्विनेत्रशरभूकुयुगाब्धिरामाः रुद्राब्धिरामगुणवेदशतद्वियुग्मदंता बुधैर्निगदिताः क्रमशो भताराः इति नन्वत्र संमतिवाक्ये सप्तविंशतिभानि प्रतीयन्ते मूले चाष्टाविंशतिरिति विरोधे उच्यते उत्तराधे रुद्राब्धीत्यत्राब्धायश्चतस्रस्ताराः पूर्वाषाढोत्तराषाढयोर्ज्ञेयाः द्वे पूर्वाषाढायां इति नारदेनापि तथैवाभिधानात् तत्राश्विन्यास्तिस्रस्ताराः एवं भरण्यादीनां साभिजितं ताराः संज्ञेया ताराप्रमाणोक्तिप्रयोजनमाह वराहः नक्षत्रजमुद्वाहे फलमब्दैस्तारकामितैः सदसद्दिवसैर्ज्वरस्य नाशो व्याधेरन्यस्य वा वा

राम: ३५

CC-0. In Public Domain. Digitization by eGangotri

अथाश्विन्यादीनामाकृतिमुपजातिकयोर्वृत्ताभ्यामाह अश्व्यादिरूपमिति अश्विन्यादिनक्षत्राणांरूपमाकृतिरुच्यते तत्राश्विन्यास्तुरगास्यं अश्वमु
खसदृशंरूपं भरण्यायोनिभगसदृशं कृत्तिकायानापितक्षुरसदृशं रोहिण्या अनःशकटसदृशं मृगस्यएणास्यंहरिणमुखसदृशं आर्द्रायामणिस
दृशं पुनर्वसोर्गृहसदृशं पुष्यस्यपृषत्कोबाणस्तत्सदृशं आश्लेषायाश्चक्राकारं मघायामवनगृहसदृशं पूर्वाफल्गुन्याः मंचः खट्वाकारं उत्तरा
फाल्गुन्योःशय्याकारं हस्तस्यहस्ताकारं चित्रायामौक्तिकाकारं स्वात्याविद्रुमंप्रवालसदृशं ५९ तोरणंबलिनिभमिति विशाखायास्तोरणाकारं
अनूराधायाबलिभक्तःपुंजाकारं ज्येष्ठायाः कुंडलाकृतिः मूलस्यसिंहपुच्छाकारं पूर्वाषाढायागजदंतसदृशं उत्तराषाढायामंचकसदृशं अभि
जितस्त्रिकोणकारःश्रवणस्यत्रिचरणसदृशं धनिष्ठायामर्दलसदृशं शततारायावृत्तंवर्तुलं पूर्वाभाद्रपदायामंचकसदृशं उत्तराभाद्रपदाया

अश्व्यादिरूपंतुरगास्ययोनिःक्षुरोनएणास्यमणिर्गृहंच पृषत्कचक्रे भुवनंचमंचःशय्याकरौमौक्तिकविद्रुमंच ५९ तोरणंब
लिनिभंचकुंडलंसिंहपुच्छगजदंतमंचकाः त्र्यस्रिचत्रिचरणाभमर्दलोवृत्तमंचकयमाभमर्दलाः ६० जलाशयारामसुरप्रति
ष्ठासौम्यायनेजीवशशांकशुक्रे दृश्येमृदुक्षिप्रचरध्रुवेस्यात्पक्षेसितेस्वर्क्षतिथिक्षणेवा ६१ रिक्तारवर्जेदिवसेतिशस्ताशशां
कपापैस्त्रिभवांगसंस्थैः॥ ॥यमलाभं रेवत्यामर्दलंमृदंगाकारंस्वरूपमित्यर्थः ६० अथजलाशयारामदेवप्रतिष्ठामुहूर्तेसामान्यतोलग्नशुद्धिर्दे
वताविशेषेणलग्नशुद्धिर्नक्षत्रविशेषंचोपजातिकात्रयेणाह जलाशयेति रिक्तारेति शिवोनृयुग्मेतिच जलाशयाः वापीकूपतडागादयः तेषांप्रतिष्ठाउ
त्सर्गः आरामउपवनं तस्याप्युत्सर्गः सुरादेवाविष्ण्वादयः तेषांप्रतिष्ठापनं सौम्यायनेउत्तरायणे तथाजीवशशांकशुक्रे दृश्येउदितेसति तथामृदुध्रु
वक्षिप्रचरनक्षत्रेषु तथासितेशुक्लपक्षे तथास्वर्क्षतिथिक्षणेवा ६१ तथारिक्तारवर्जेदिवसे रिक्तातिथिभौमवारव्यतिरिक्ततिथिवारेषुएवंविधेदिनेप्रति
ष्ठा जलाशयारामदेवानांक्रमेणकर्मोहत्वापभोग्यत्वपूजायोग्यत्वरूपात्रिशस्तास्यात् तथाचगार्ग्यः देवतारामवाप्यादिप्रतिष्ठासुत्तरायणे माघादिपंचमा
सेषुकृष्णस्याप्यापंचमीदिनं दक्षिणेत्वयनेकुर्वंचतत्फलमवाप्नुयात् यदातुदक्षिणायनएवजलस्थितिसंभवःतदानकालनियमः नकालनियमस्तत्रकारणमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिभविष्यत्पुराणोक्तेः अथक्रूरप्रकृतीनांदक्षिणायनेपिस्थापनंकार्यमित्युक्तंवैखानससंहितायां मातृभैरववाराहनरसिंहत्रिविक्रमाः महिषासुरहंत्री
चस्थाप्यावैदक्षिणायने नारदः चित्रेचैवमाघादिषुचपंचसु यद्दिनंयस्यदेवस्यतद्दिनंतस्यसंस्थितं अथलग्नशुद्धिः शशांकपापैः चंद्रसूर्यभौमश
निराहुकेतुभिः त्रिभवागतैःस्थैः तृतीयषष्ठैकादशस्थानस्थितैरुपलक्षितेलग्नेतथासत्त्वचरैः शुक्रबुधगुरुभिःव्ययांत्याष्टगैः द्वादशाष्टमव्यतिरिक्ताखि
लस्थानस्थैःसद्भिः देवादिप्रतिष्ठाप्रशस्ता अथसूर्योमृगेंद्रेसिंहलग्नेस्थाप्यः तथाकोब्रह्माघटेकुंभेविष्णुर्युवतौकन्यायां ६२ शिवोमहादेवोनृयुग्मेमिथुने
चपुनर्देव्यादृगोदयोद्वितनौद्विस्वभावराशौमिथुनकन्याधनुर्मीनलग्नेषुक्षुद्रादेव्यश्चतुःषष्टियोगिनीप्रभृतयःचरलग्नेमेषकर्कतुलामकरेषु सर्वइमे
उक्तानुक्ताश्चस्थिरक्षेवृषसिंहवृश्चिककुंभेषुतथा :अथपुष्येग्रहाइति ग्रहाश्चद्वादश्याष्टौपुष्यनक्षत्रेस्थाप्याः उपलक्षणमेतत् सूर्यस्यहस्तनक्षत्रे
स्थापनं इंद्रब्रह्मणोः पुष्यश्रवणाभिजित्सुकुबेरस्कंदयोरनुराधायां दुर्गादीनांमूले सप्तर्षीणांस्वाधिष्ठितनक्षत्रे लक्ष्मीव्यासवाल्मीक्यगस्त्यानांपुष्ये।

व्ययांत्याष्टगैःसत्त्वचरैर्मृगेंद्रेसूर्योघटेकोयुवतौचविष्णुः ६२ शिवोनृयुग्मेद्वितनौचदेव्याःक्षुद्राश्चरेसर्वइमेस्थिरर्क्षे पुष्येग्रहाविघ्न
पयक्षसर्पभूतादयोन्येश्रवणेजिनश्च ६३ ॥इतिमुहूर्तचिंतामणौनक्षत्रप्रकरणंद्वितीयं २॥

॥स्थापनं तदुक्तंरत्नमालायां पुष्यश्रुत्य
भिजित्सुचेश्वरकयोर्वित्ताधिपस्कंदयोर्मैत्रेतिग्मरुचेःकरेनिर्ऋतिभेदुर्गादिकानांशुभं सप्तर्षयोयत्रवसंतिधिष्ण्येकार्याप्रतिष्ठाखलुतत्रतेषां श्रीव्यास
वाल्मिकिघटोद्भवानांतथास्मृतावाक्पतिभेग्रहाणामिति अथविघ्नपतिः विघ्नपोगणेशः यक्षोदेवयोनिः सर्पोवासुक्यादयः भूतोदेवयोनिः विद्याध
रोप्सरोयक्षरक्षोगंधर्वकिंनराः पिशाचोगुह्यकःसिद्धोभूतोमीदेवयोनयइत्यमरः आदिशब्देनराक्षसासुरप्रथमसरस्वतीप्रभृतयः अन्येरेवत्यां
स्थाप्याः तथाश्रवणेजिनोबौद्धश्चस्थाप्याः उपलक्षणंचैतत् इंद्रकुबेरवर्जितानांलोकपालानांधनिष्ठायांस्थापनं तथाचश्रीपतिः गणपरिवृढरक्षो
यक्षभूतासुराणांप्रथमफणिसरस्वत्यादिकानांचपौष्णे श्रवसिसुगतनाम्नोवासवेलोकपानांनिगदितमखिलानांस्थापनंहिस्थिरेषु ६३ ॥ ६॥
इतिश्रीदैवज्ञानंतसुतदैवज्ञरामविरचितायांस्वकृतमुहूर्तचिंतामणिटीकायांप्रमिताक्षरायांनक्षत्रप्रकरणंसमाप्तं २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥श्रीगणेशाय नमः॥ अथ संक्रांतिप्रकरणं व्याख्यायते तत्र प्राग्राशितो परराशौ संक्रमणं नाम गमनं संक्रांतिः तस्याः नक्षत्रविशेषवशेन वारवशेन च संज्ञां
फलं च सार्धवसंततिलकेनाह घोरार्केति विप्रांश्चेति अर्कसंक्रमणमर्कसंक्रांतिः उग्ररवौ उग्रनक्षत्रेषु रविवारे चेत्स्यात्तदा घोरेति संज्ञा सा शूद्रा
न्सुखयेत सुखमुत्पादयेत् उग्ररवाविति उग्रैः सहितो रविः उग्ररविः तस्मिन्नुग्ररवाविति मध्यमपदलोपितत्पुरुषः ततः सप्तम्येकवचनं अथवा सम
हारद्वंद्वे अनित्यमागमशासनमिति नुमभावः एवं लघुविधाविन्यादिष्वपि समाधेयं अथ लघुनक्षत्रेषु विधौ सोमवारे सूर्यसंक्रांतिर्ध्वांक्षी नाम्नी वि
प्रा वैश्यान्सुखयेत् चरर्क्षे भौमे चरनक्षत्रे भौमवारे वा सूर्यसंक्रमणं चेन्महोदरयुता महोदरीसंज्ञका चौरान्सुखयेत् ज्ञमैत्रे बुधवारे मैत्रसंज्ञनक्ष
त्रेषु वाऽर्कसंक्रांतिर्मंदाकिनी नाम्नी नृपतीन्राज्ञः सुखयेत् स्थिरगुरौ स्थिरनक्षत्रेषु गुरुवारे चार्कसंक्रांतिर्मंदा नाम्नी विप्रान्ब्राह्मणान्सुखयेत् मिश्र

घोरार्कसंक्रमणमुग्ररवौ हि शूद्रान् ध्वांक्षी विशो लघुविधौ च चरर्क्षभौमे चौरान्महोदरयुता नृपतीन् ज्ञमैत्रे मंदाकिनी स्थिरगुरौ सुखयेच्च मं
दा १ विप्रांश्च मिश्रभभृगौ तु पशूंश्च मिश्रा तीक्ष्णार्कजेंत्यजसुखा खलु राक्षसी च त्र्यंशे दिनस्य नृपतीन्प्रथमे निहंति मध्ये द्विजान पिवि
शो परके च शूद्रान् २ अस्ते निशाप्रहरकेषु पिशाचकादीन्नक्तंचरानपि नटान्पशुपालकांश्च

॥मृगौ मिश्रनक्षत्रयोः भृगुवारे वाऽर्कसं
क्रांतिर्मिश्रा नाम्नी पशून् सुखयेत् तीक्ष्णार्कजे तीक्ष्णसंज्ञकनक्षत्रेषु अर्कजे शनिवारे वा राक्षसी नाम्नी अंत्यजसुखा अंत्यजान् चांडालान् सुखय
तीति अंत्यजसुखा स्यात् १ अथ दिनरात्रिविभागेन संक्रांत्यशुभफलं उत्तरायणदक्षिणायनसंज्ञा च सार्धवसंततिलकयाह त्र्यंश इति अस्ते इति
अत्रार्कसंक्रमणमित्यनुवर्तते दिनमाने त्रिभिर्भक्ते त्र्यंशो भवति तत्र दिनस्य प्रथमे त्र्यंशेऽर्कसंक्रमणं नृपतीन्हंति मध्ये द्वितीयत्र्यंशे द्विजान्ब्राह्मणा
न्हंति अपरके तृतीये त्र्यंशे वैश्यान्हंतीत्येवं सर्वत्र व्याख्येयं अस्ते सूर्यास्तसमयेऽर्कसंक्रमणं शूद्रान्हंति २ अथ रात्रिसंक्रांतिफलं रात्रिप्रथमप्रहरे
पिशाचकान् आदिशब्देन भूतान् द्वितीयप्रहरे नक्तंचरान् राक्षसान् तृतीयप्रहरे नटान् नर्तकान् चतुर्थप्रहरे पशुपालकान् आभीरान् सूर्योदयस
मकालेऽर्कसंक्रमणं सकललिंगिजनं पाखंड्यादिकं हंतीत्यर्थः पाखंडाः सर्वलिंगिजन इत्यभिधानात् क्रूरसौम्यवारपरत्वेन फलमाह वसिष्ठः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रविरविजभौमवारेसंक्रांतौदिनकरस्यतन्मासोपित्तकफानिलजामयनरपतिकलहस्त्ववृष्टिश्च बुधगुरुसितचंद्राहेसतिसंक्रांतावनामयंनृणां क्षि
तिपतिनिकरक्षेमंसस्यविवृद्धिर्विधर्मिणांपीडा जन्मनक्षत्रेसंक्रांतिफलंदीपिकायां यस्यजन्मर्क्षमासाद्यरविसंक्रमणंभवेत् तन्मासाभ्यंतरेतस्यरोगक्लेे
शधनक्षयाः तगरसरोरुहपत्रैरजनीसिद्धार्थलोध्रसंयुक्तैः स्नानंजन्मनक्षत्रेरविसंक्रांतौनृणांशुभदं अन्यच्चवसिष्ठः अजकन्याझषकर्किणिसंक्रां
तौयदिनचेद्वर्षं आमयमरणंभूभृतयुद्धमनर्घ्यंत्ववृष्टिश्च वृषवृश्चिकतुलामकरेवृष्टिःस्यात्संक्रमविषये विस्फोटामयतस्करपीडावृष्टिःकृशा
नुभयं अथसौम्ययाम्यायनमिति मकरकर्कटयोःसंक्रांतिश्चेत्तदाक्रमेणसौम्यायाम्यायनेनिरुक्ते मकरेउत्तरायणंकर्केयाम्यायनंस्यात् ३
अथावशिष्टसंक्रांतिषुषडशीत्यादिसंज्ञांतुष्टुभाह।षडशीत्याननमिति धनुर्मिथुनकन्यामीनेषुअर्कसंक्रमणंषडशीत्याननंषडशीतिमुखसं

सूर्योदयेसकललिंगिजनंचसौम्ययाम्यायनंमकरकर्कटयोर्निरुक्ते ३ षडशीत्याननंचापनृयुक्कन्याझषेभवेत् तु
लाजोविषुवंविष्णुपदंसिंहालिगोघटे ४ संक्रांतिकालादुभयत्रनाडिकाःपुण्यामताःषोडशषोडशोष्णगोः ॥

ज्ञंस्यात् तुलामेषयोःसंक्रांतिर्विषुवसंज्ञा वृषसिंहवृश्चिककुंभेष्वर्कसंक्रांतिर्विष्णुपदसंज्ञकाः ४ संक्रांतौगौणमुख्यकालमुपजात्याह
संक्रांतिकालादिति गणितमार्गेणयउष्णगोःसूर्यस्यसंक्रांतिकालआगतःततउभयत्रऽपूर्वतःपरतश्चषोडशषोडशनाड्योघटिकाःपुण्यसं
पादकत्वात्पुण्यामताः ब्रह्मसिद्धांते संक्रांतेःप्राक्परत्वाच्चसार्द्धाःषोडशनाडिकाः त्रयस्त्रिंशत्संक्रमस्यपुण्याःसर्वस्यनाडिकाः अनेनसंक्रां
तेःपुण्यकालस्तुषोडशोभयतःकलाइतिस्मृतिवाक्यपूर्वतःपरतश्चाष्टौअष्टौघटिकाइत्येवंषोडशेतिव्याख्यातंतदपाकृतंभवति सूर्यसि। रामः ३७
द्धांतेपि अर्कमानकलाःषष्ट्यागुणिताभुक्तिभाजिताःतदर्धनाड्यःसंक्रांतेरर्वाक्पुण्यंतथापरेइति अथनिशीथतइति निशीथतोऽर्धरात्रा
त् अर्वाक्पूर्वंपरत्रपश्चाच्चसंक्रांतिकालेसति पूर्वापराहांतिमपूर्वभागयोःपूर्वापरयोरह्नोःक्रमेणांतिमपूर्वभागयोरुभयत्रषोडशषोडशघ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टिकाः पुण्यादिति पूर्वेण संबंधः अयमर्थः यद्यर्धरात्रात् प्राक् संक्रांतिस्तदा पूर्वदिनस्य उत्तरार्धं पुण्यं यद्यर्धरात्रादुपरि संक्रांतिस्तदोत्तरदिनस्य पूर्वार्द्धमेव पुण्यमित्यर्थः ५ अथार्धरात्रसंक्रमणे मकरकर्कटयोश्च विशेषमुपजातिकयाह पूर्णइति पूर्णे निशीथे अर्धरात्रे यदि संक्रमः स्यात्तदा दिनद्वयं पूर्वदिनं परदिनं च पुण्यमुक्तं उक्तंच यद्यर्द्धरात्र एव स्यात्संपूर्णे संक्रमे रवेः तदा दिनद्वयं पुण्यं स्नानदानादिकर्मसु अथेति अथानंतरमुदयास्तात् सूर्योदयात्सूर्यास्ताच्च पूर्वपरस्ताच्च यदि याम्यसौम्यायने कर्कमकरसंक्रांतो भवतः तदा पूर्वदिने पुण्यं स्यात् अयमर्थः सूर्योदयात् पूर्वं कर्कसंक्रमणं स्यात्तदा पूर्वदिन एव पुण्यकालो नोत्तरदिने तथा यदि सूर्यास्तानंतरं मकरसंक्रांतिः स्यात्तदोत्तरदिन एव पुण्यकालो न पूर्वदिने गार्ग्यः यदास्तमानवेलायां मकरं याति भास्करः प्रदोषे वार्द्धरात्रे वा स्नानदानं परेहनि अर्धरात्रे तदूर्ध्वं वा संक्रांतौ दक्षिणायने पूर्वमेव दि

निशीथतो वा गपरत्र संक्रमे पूर्वापराहांतिमपूर्वभागयोः ५ पूर्णे निशीथे यदि संक्रमः स्याद्दिनद्वयं पुण्यमथोदया
स्तात् पूर्वपरस्ताद्यदि याम्यसौम्यायने दिने पूर्वपरे तु पुण्ये ६ संध्या त्रिनाडीप्रमितार्कबिंबादर्धोदितास्तादध ऊर्ध्व
ऽऽ मत्र ॥

नं यावद्दोदयते रविरिति वाङ्वार्थे प्रदोषलक्षणं स्कांदे त्रिमुहूर्तः प्रदोषः स्याद्भावावस्तंगते सतीति ६ अथोदयास्तादितिवचनस्यापवादमिंद्रवज्रयाह संध्यादिति अर्कमंडलादर्धोदितादर्धास्ताच्चाध ऊर्ध्वं क्रमात्त्रिभिर्नाडीभिर्मिता संध्या संध्याकालः स्यात् अर्धोदितार्कबिंबात् पूर्वं त्रिनाडीमिता प्रातःसंध्या तथार्धास्तादर्कबिंबादुपरि त्रिनाडीमिता सायंसंध्येत्यर्थः तत्प्रयोजनमाह अत्रेति अत्रप्रातःसंध्यायां सायंसंध्यायां च क्रमात् याम्यसौम्ये अयने स्तः तदानीं परपूर्वदिवसौ पुण्यौ यदि प्रातःसंध्यायां दक्षिणायनप्रवृत्तिः तदास्तूर्योदयानंतरं संपूर्णमहः पुण्यं तथा यदि सायंसंध्यायां उत्तरायणप्रवृत्तिस्तदा सूर्यास्तात्पूर्वं संपूर्णमहः पुण्यं स्यादित्यर्थः तदाह नारदः सूर्यास्तमनसंध्यायां यदि सौम्यायनं भवेत् तदोदयादहः पुण्यं पूर्वाहः पूर्वतो यदीति उदयसंध्यास्तसंध्ययोर्लक्षणं तत्रैव अर्धोर्कास्तमनात्संध्या घटिकात्रय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु॰टी॰ सं॰प्र॰ ३८ संमिता तथैवार्धोदयात्प्राग्घटिकात्रयसंमितेति एवं सत्यर्कबिंबस्यार्धास्तादर्धोदयाद्वा क्रमात्पश्चात्प्राक् त्रिघटिमिता अस्तसंध्योदयसंध्यावो
च्यते तत्रास्तसंध्यायां यदि मकरसंक्रमः स्यात्तदा दिन एव पुण्यकालो नोत्तरदिने यद्यस्तसंध्यामतिक्रम्य मकरसंक्रांतिस्तदोत्तरदिन एव पुण्य
कालो न पूर्वदिने एवं यद्युदयसंध्यायां कर्कसंक्रांतिस्तदा सूर्योदयानंतरमेव पुण्यकालो न प्राग्दिने यद्युदयसंध्यातः प्राक् कर्कसंक्रमस्तदा प्रा
ग्दिन एव पुण्यकालो नोत्तरदिने इति निष्कृष्टोऽर्थः अथ रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः इति रात्रौ स्नानदानादिनिषेधेऽपि नैमित्तिकं
तु कुर्वीत स्नानदानं च रात्रिष्वपीति सुमंतुवाक्यशेषात् सुतजनने संक्रांतावुपरागे सूर्यचंद्रयोर्नित्यं रात्रावपि कर्तव्यं स्नानदानं विशेषतोन्ह।
णामिति वसिष्ठवचनात् ग्रहदर्शनसंक्रांतिविवाहात्ययवृद्धिषु स्नानदानादिकं कार्यं निशि काम्यव्रतेषु चेति रात्रौ संक्रमणे रात्रौ स्नानं प्राप्तं तत्क
र्कमकरसंक्रांतौ स्नानदानादौ देशप्रसिद्धशिष्टाचारेण व्यवस्थावगंतव्या तत्राम्भोजेरास्तु ग्रहणवदयन इति स्वीयसूत्रे स्नानं दानं ग्रहणवत्सौ

चेद्याम्यसौम्ये अयने क्रमात्तः पुण्यौ तदानीं परपूर्वघस्रौ ७ याम्यायने विष्णुपदे चाद्यामध्यास्तुलाजयोः ॥ ६ ॥

म्ययाम्यायनद्वय इति कश्यपसंहितोक्तं चातुरज्य रात्रावयनसंभवे सति रात्रावेव स्नानादिकं कुर्वंति दाक्षिणात्यास्तु कार्मुकं तु परित्यज्य झषं
याति दिवाकरः इत्यादि भविष्योत्तरादिवाक्यमंगीकृत्य दिवस एव स्नानादिकं कुर्वंति। तत्रापि नारदोक्तसंध्याकालसंक्रमे विशेषो ध्येय इत्यलं
७ अथ पूर्वपराः षोडशघटिकाः पुण्या इति पूर्वं सामान्येनोक्तमिदानीं विष्णुपदादिविशेषमनुष्टुभाह याम्यायन इति कर्कसंक्रांतौ विष्णु
पदे वृषसिंहवृश्चिककुंभसंक्रांतिषु संक्रांतिकालादाद्याः प्रथमाः षोडशघटिकाः अतिपुण्यदाः स्नानदानादौ अनंतपुण्यदास्तेयाः अग्नि रा॰म॰
मास्तु नतथा तुलाजयोः तुलामेषयोः मध्यास्तूभयतः षोडशघटिकाः संक्रांतिकालात्प्रागष्टौ परतश्चाष्टाविति दीपिकाकारैर्व्याख्यातं ३८
यदुक्तं गुरुणा वर्तमाने तुलामेषे नाड्यस्तूभयतो दशेति मध्यमात्तृतीयांशाभिप्रायेणेति ज्ञेयं तथा षडशीत्याननं मिथुनकन्याधनुर्मीनसंक्रां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिषुसौम्येयनेमकरसंक्रांतौच संक्रांतिकालात्पराः त्रिंशत्षोडशघटिकाः अतिपुण्याः प्रथमास्तु नतथा एवंनिर्णीततेपुण्यकाले स्नानाद्यवश्यं विधेयं तत्रस्नानाद्यकुर्वतःप्रत्यवायमाह वसिष्ठः विषुवत्ययनेग्रहणसंक्रान्तौपुण्यदिवसेवा पितॄन्तृप्तिंनकरोतिहिदत्वाशापंव्रजतितस्यापि ता षडशीत्यांतुयद्दानंयद्दानंविषुवद्द्वये। दृश्यतेसागरस्यांततस्यांतोनैवदृश्यतइतिभरद्वाजोक्तेः अयंचनिर्णयश्चन्द्रादीनामपिसंक्रमेज्ञेयः त त्रहेमाद्र्यादौकालनिर्णयकारादिभिःयाःपुण्यकालघटिकाउपनिबद्धास्ताःस्थूलाःतेनषष्टिघ्नविंबंग्रहभुक्तिभक्तमित्यादिप्रकारेणग्रहमध्य तु भुक्तिमध्यमविवेरानीताः सूक्ष्माघटिकालिख्यंते स्फुटमतिस्फुटबिंबेश्चेत्साध्यंतेताअतिसूक्ष्मास्तासामतिपतत्वात् श्लोकेअनुपनिवधः मध्यमास्तुयथा नाड्योरामगुणा ३३ रवेरथविधोःषट्दोःपलैर्युक्तद्वयं २।२६ भौमस्याब्धिपलैर्युतानव ९।४ विदोयुक्ताःपलैःखाश्विभिः ष ट्नाड्यो ६।२० ष्टगजा ८८ गुरोरथभृगोर्नेदाःपलैरष्टभिः ९।८ पुण्याःस्युःखनृपाः १६० शनेरुभयतीरस्थस्ययोःसंक्रमेरिति ८ निरयनां

षडशीत्याननेसौम्येपराःनाड्योतिपुण्यदाः ८ तथायनांशाःखरसाहताश्वस्पष्टार्कभगत्याविहृतादिनाद्यैः॥ ॥

शसंक्रांतिमभिधायेदानींसायनांशसंक्रांतिसपुण्यकालमुपजात्याह तथेति यथाराशिसंक्रमाबहुपुण्यदास्तथाचलसंक्रमाअपीतिव्यव हितस्तथाशब्दः अयनांशाःषष्ट्यागुण्याःस्पष्टसूर्यगत्याविहृतालब्धैर्दिनाद्यैर्दिनघटीपलैः कृत्वामेषादिद्वादशसंक्रमाःस्युस्तेचलसंक्र मादानेजपादौजपश्राद्धहोमादौबहुपुण्यदाभवंति पुलस्त्यः अयनांशसंस्कृतोभानुर्गोलेचरतिसर्वदा अमुख्याराशिसंक्रांतिस्तुल्यःकाल विधिस्तयोः स्नानदानजपश्राद्धव्रतहोमादिकर्मभिः सुकृतंचलसंक्रांतावक्षयंपुरुषोश्नुतइति जाबालिरपि संक्रांतिषुयथाकालस्तदीये प्ययनेतथा अयनेविंशतिःपूर्वामकरेविंशतिःपरेति अत्रमकरायणेपूर्वाविंशतिर्घटिकाःपुण्याः मकरसंक्रान्तौतुपराविंशतिर्घटिकाः पुण्यकालः मकरव्यतिरिक्तेकादशसंक्रांतिषुतत्तत्संक्रमवत्पुण्यकालोज्ञेयः अयनांशानयनादिविचारःसिद्धान्तादवगंतव्याः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.टी. ईश्वरेच्छालोकादृष्टवशान्नतद्राघ्यादिभागस्य सूर्यतेजःसंपर्कः स्थलसंक्रमः मंडलसंक्रमः राशिसंक्रम इति विषयविवेकः तत्र निरयनग
तं.प्र. णनयैव सकलव्यवहारः साध्यः सायनगणनातु नियतविषयैव अयनांशैः प्रदातव्यालग्नेक्रांतौ चरागमे विविभे सत्रिभे पाते तयोर्दृक्कर्मणोः
३० पातयोरिति एवं द्वयोरपि मानयोरसंकीर्णोव्यवहार इति सर्वमनाकुलं पुण्यकालस्तु अस्य विधसंक्रमे पिज्ञेयः पूर्वेलिखितवाक्यस्वरसात्
१ अथ संक्रांत्युपयोगात् जघन्यबृहत्समनक्षत्राण्युपजात्याह समिति मृदुक्षिप्रवसुश्रवोग्निमघान्निपूर्वोत्तरपभं सम अस्त्रपभं मूलः एता
नि पंचदशभानि समसंज्ञानि ज्ञेयानि ध्रुवद्विदैवादिति भं बृहत्स्यात् ध्रुवादिषट्भानि बृहत्संज्ञकानि सार्पांबुपार्द्रानिलशाक्रयाम्यं जघन्यं स्या
त् आश्लेषादिषट्भानि जघन्यसंज्ञानि १० अथ संज्ञाप्रयोजनमुपेंद्रवज्रयाह जघन्यभे इति जघन्यनक्षत्रेऽर्कसंक्रमणे पंचदशमुहूर्ता ज्ञे

मेषादितः प्राक् चलसंक्रमाः स्युर्दाने जपादौ बहुपुण्यदास्ते ९ समं मृदुक्षिप्रवसुश्रवोग्निमघान्निपूर्वोत्तरपभं बृहत्स्यात्
ध्रुवद्विदैवादितिभं जघन्यं सार्पांबुपार्द्रानिलशाक्रयाम्यं १० जघन्यभे संक्रमणे मुहूर्ताः शरेंदवो १५ बाणकृता ४५ बृ
हत्सु खराम ३० संख्या समभे महर्घं समर्घं साम्यं विधुदर्शनेपि ११ अर्कादिवारे संक्रांतौ कर्के स्याव्द विंशोपकाः ॥ १२ ॥

याः बृहन्नक्षत्रेऽर्कसंक्रमणे बाणकृताः पंचचत्वारिंशन्मुहूर्ता ज्ञेयाः समनक्षत्रेऽर्कसंक्रमणे खरामसंख्यास्त्रिंशन्मुहूर्ता ज्ञेयाः उक्तं च नारदेन
तासां प्रमाणं घटिकास्त्रिंशन्नवतिषष्ट्य इति फलमाह महर्घसमर्घसाम्यमिति पंचदशमुहूर्तायां संक्रांतौ सर्वमन्नं महर्घं दुष्प्राप्यं भवति पंचच रा.न.
त्वारिंशन्मुहूर्ते संक्रांतौ समर्घं त्रिंशन्मुहूर्तायां संक्रांतौ समं यथास्थितं भवति विधुदर्शनेपीति चंद्रदर्शनेप्येवमेव फलं वाच्यं अयमर्थः ज ३०
घन्यभे चंद्रदर्शने महर्घं बृहन्नक्षत्रे चंद्रदर्शने समर्घं समभे चंद्रदर्शने साम्यं ११ अथ प्रसंगात् कर्कसंक्रांतौ मेघविंशोपकाननुष्टुभाह अर्को
दीति कर्कसंक्रांतौ अर्कादिवारे सति एते अब्द विंशोपका ज्ञेयाः यथा रविवारे कर्कसंक्रांतौ दशविंशोपकाः ॥

CC-0. In Public Domain. Digitization by eGangotri

एवंसोमेविंशतिः भौमेषटे तेद्वादश गुरौधृत्योष्टादश शुक्रेष्टादश शनौपंचेत्यर्थः १२ अथकीदृशस्यरवेःसंक्रमोजातस्तुफलमिदृग्वक्ष्यया
ह स्यात्तेतिलेइति रविस्तैतिलेकरणेनागकरणेचतुष्पदेचकरणेसुप्तःसंक्रमितःस्यात् गरादिपंचगरेवणिजेभद्रायांबवेबालवेचनिविष्टःसं
क्रमितःस्यात् किंस्तुघ्नेसकौलवेशकुनौच ऊर्ध्वःऊर्ध्वेस्थितःसंक्रमितःस्यात् इहकरणाधिकरणकसंक्रांतोरविः अर्घवर्षणे अर्घमूल्ये
वर्षणेवृष्टेउपलक्षणत्वादन्नेपिक्रमादनिष्टःसमःश्रेष्ठःस्यात् अयमर्थः सुप्तरविसंक्रमोअर्घवर्षणधान्येषुनिष्टः महार्घवृष्ट्यभावधान्याभावका
रकाः।एवंविनिष्टःसमः तयोर्ध्वःश्रेष्ठः उक्तंचश्रीपतिना धान्यार्घवृष्टिषुभवेत्क्रमशस्त्वनिष्टमध्येष्टतेति १३ अथरविसंक्रांतेःकरणपरत्वे
नवाहनवस्त्रायुधभक्ष्यलेपनजातिपुष्पाणिसफलानिशार्दूलविक्रीडितत्रयेणोपजातिकयाचाह सिंहेति खड्गेति यावश्वेति स्यान्महिष्केति बव

दिशोनखागजाः सूर्याधृत्योष्टादशसायकाः १२ स्यात्तैतिलेनागचतुष्पदेरविःसुप्तोनिविष्टस्तुगरादिपंचके किंस्तुघ्न
ऊर्ध्वः शकुनौसकौलवेऽनिष्टःसमःश्रेष्ठइहार्घवर्षणे १२ सिंहव्याघ्रवराहरासभगजावाहद्विषद्घोटकाःश्वाजोगौश्च
रणायुधश्चबवतोवाहारवेःसंक्रमे ॥ ॥ तोबवमारभ्यैकादशकरणेषुक्रमेणवाहनादीनिस्युः वाहनानिसिंहादीनि रासभोगर्दभः
वाहद्विषन्महिषः लुलायोमहिषोवाहद्विषत्कासरसैरभाइत्यमरः अजोमेषः चरणायुधःकुक्कुटः नारदेनतुविशेषउक्तः खशबाल्हीकवं
गेषुसंक्रांतेधिष्ण्यवाहनं अन्यदेशेषुतिथ्यर्धवाहनाःस्युर्बवादयइति अश्विन्यांयदासंक्रांतिस्तदाश्विन्याःयोअश्वस्तद्वाहनंस्यात् खशादि
देशेषु एवंसर्वनक्षत्रेषु अथवस्त्रं श्वेतादि हरितकंनीलवर्णं पांडुअरुणवर्णं आरक्तमलक्तकवर्णं कालंश्यामं असितश्वेतवर्णरहितं
गर्दभवर्णमित्यर्थः दिग्वस्त्राभावः घनाभमेघवर्णं अथशस्त्रं भुशुंड्यादीनिआयुधानिप्रसिद्धानि अथभक्ष्यं अन्नंभक्तः परमान्नंपा
यसं भैक्ष्यंभिक्षासमूहपकान्नमपूपादि चित्रितान्नंहरिद्रादिरंजितं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

अथ लेपो विलेपनं मृगनाभिः कस्तूरी कुंकुमं केशरं पाटीरं चंदनं स्पष्टप्रसिद्धा रोचनं गोरोचनमिति १४ १५ यावोऽलक्तकः ओतुर्मदो मार्जारघर्मः भाषया जवादिरिति निशा हरिद्रा अंजनं कज्जलं कालागरु रगरुविशेषः चंद्रकः कर्पूरः अथ जातिः संकरभवा अनुलोमजाः प्रतिलोमजाश्च अथ पुष्पं पुनागकं नागकेशरपुष्पं मल्लिका वेलिः जपा ओढ्रपुष्पं जासवनं शेषाणि प्रसिद्धानि सर्वत्र क्वचिद्द्वयोरुक्तं शिशुः कुमारश्च गतालका युवा प्रौढा प्रगल्भा च ततः वृद्धा वंध्या तिवंध्या च सुतार्थिनी च प्रव्राजिका चेति बवादिकानामिति तथा केचित् भोजनपात्रमपु

वस्त्रं श्वेतसुपीतहारितकपांडुरक्तेकालासितं चित्रकंबलदिग्घनाभमथ शस्त्रं स्याद्भुशुंडी गदा १५ खड्गो दंड शरासितोमरम थो कुंतश्च पाशोंकुशोस्त्रं बाणस्त्वथ भक्ष्यमन्नपरमान्नं भैक्ष्यपक्वान्नकं दुग्धं दध्यपि चित्रितान्नगुडमध्वाज्यं तथा शर्करा थो लेपो मृगनाभिकुंकुममथो पाटीरमद्रोचनं १५ यावश्चोतुमदो निशांजनमथो कालागरुश्चंद्रको जातिर्द्वैवनभ्रतसर्प विहगाः पश्वेणविप्रास्ततः क्षत्रावैश्यकशूद्रसंकरभवाः पुष्पं च पुंनागकं जाती बाकुलकेतकानि च तथा बिल्वार्कदूर्वा बुजं १६ स्यान्मल्लिका पाटलिका जपा च संक्रांतिवस्त्राशनवाहनादेः नाशश्च तद्धृत्युपजीविनां च स्थितोपविष्टः स्वपतां च ना शः १७ संक्रांतिधिष्ण्याधरधिष्ण्यतस्त्रिभे स्वभे निरुक्तं गमनं ततोऽगभे॥ ॥ सुवर्णरौप्यताम्राणि लोहसीसं त्रपुस्तथा कांस्यपा

षाणकाष्ठं च मृत्पात्रं वेणुपात्रकमिति एवमुक्तमकाल्यानि वस्त्राशनवाहनादीन्यभिहितानि आदिशब्देनायुधलेपनजातिपुष्पाणि तेषां नाशो भवेत् च पुनस्तद्धृत्युपजीविनां वस्त्रादिवृत्त्युपजीविनां नाशो भवेत् स्थितोपविष्टः स्वपतां च स्यात्तेतिलेड्त्यादिना सुप्तत्वादीन्युक्तानि तद्गुण विशिष्टानां नाशः स्यादित्यर्थः १६ १७ अथ संक्रांतिवशेन प्रति मनुष्यं शुभमशुभं जात्याह संक्रांतीति संक्रांतिर्यस्मिन्नक्षत्रे स्यात्ततोऽधरधिष्ण्य र्वे नक्षत्रं तस्मात्स्वजन्मनक्षत्रं गण्यं तच्चेत्प्रथमत्रि भे भवति तदा गमनं यात्रा स्यात् ततः प्रथमत्रिकानंतरं अगभे षण्णक्षत्रेषु यदि स्वभे तदा सुखं स्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पीडनं शरीरपीडा पुनरंगभेऽम्बं शुक्लं वस्त्रादिप्राप्तिः ततः। त्रिभे स्वभेऽर्थहानिः ततो रसभे स्वभे धनागमो धनप्राप्तिः स्यादित्यर्थः अशुभफलदा
यां संक्रांतिदानमाह नारदः तिलोपरि लिखेच्चक्रं त्रिशूलं त्रिकोणकं तत्र हेम विनिक्षिप्य दद्याद्दोषापनुत्तये इति १८ अथ कार्यविशेषग्रहविशे
षबलं सामान्यतो ग्रहबलं चोपजात्याह नृपेक्षणमिति रवेरिति ल्यप्लोपे पंचमी सूर्ये बले सति एतानि कार्याणि कार्याणि यथा रवेः अर्कबले वा
रे वा नृपेक्षणं राजदर्शनं विधेयं एवं चंद्रादावपि व्याख्येयं चंद्रे सर्वकृतिः सर्वकृत्यानि भौमे संगरो युद्धं बुधे शास्त्रमध्ययं अध्याप्यं वा गुरौ विवाहः
शुक्रे गमनं शनौ दीक्षणाभ्यागमादिदीक्षा विधेयेत्यर्थः अथेति ताराबलतो विधुः शुभो ज्ञेयः यदा चंद्रसंक्रमणं स्यात्तदा ताराबलं चेत्तदा सपा
ददिनद्वयं चंद्रोऽशुभोपि शुभः तारादौष्ट्ये शुभोप्यशुभः एवं विधोर्बलाद्रविः संक्रमणेऽशुभोपि मासपर्यंतं शुभः शुभस्तु सुतरां समीचीन एव च

मुखं त्रिभे पीडनमंगभे स्वं शुक्लं त्रिभेऽर्थहानी रसभे धनागमः १८ नृपेक्षणं सर्वकृतिश्च संगरः शास्त्रं विवाहो गमदीक्ष
णं रवेः वीर्ये यताराबलतः शुभो विधुर्विधोर्बलेऽर्केऽर्कबले कुजादयः १९ स्पष्टार्कसंक्रान्तिविहीन उक्तो मासोऽधि
॥मासः क्षयमासकस्तु॥

द्रदौष्ट्ये शुभोपि अशुभ इत्यर्थः परे भौमादयः संक्रांतिचिकीर्षवस्तद्बलतः सूर्यबलादशुभा अपि शुभा ज्ञेयाः
याः रविदौष्ट्ये तु शुभा अप्यशुभाः १९ अथाधिमासक्षयमासयोर्लक्षणमुपजात्याह स्पष्टार्केति शुक्लप्रतिपदि दर्शांतश्चांद्रो मासः स चेत् स्पष्ट
सूर्यसंक्रांत्या विहीनो रहितो भवेत्तदाधिमास उक्तः चांद्रो मासो ह्यसंक्रांतो मलमासः प्रकीर्तित इति ब्रह्मसिद्धांतोक्तेः तु विशेषे कदाचित्स चांद्रो
मासो द्विसंक्रमः द्वौ संक्रमौ यस्मिन्स द्विसंक्रमः स्पष्टसूर्यसंक्रांतिद्वययुतस्तदा क्षयमाससंज्ञक उक्तः आद्यंतदर्शयोर्मध्ये भानो रेवतयो यदा
संक्रांतिद्वितयं चेत्स्यात्क्षयमासः स उच्यते इति वसिष्ठोक्तेः तत्र क्षयमासे जातानां वर्धापने मृतानां श्राद्धे च तिथिविभागयोः पूर्वोत्तरदलयोः सं
बंधेन प्रथमांतसंज्ञौ मासौ स्तः स्यातां तिथिपूर्वार्धजातानां मृतानां च पूर्वमासे वर्धापनं श्राद्धं च विधेयं तिथ्युत्तरार्धजातानां मृतानां चोत्तरमासे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वृधापनंश्राद्धंचविधेयं तिथ्यर्धेप्रथमेपूर्वोऽपरस्मिन्नपरस्तथा मासावितिबुधैश्चिंत्यौक्षयमासस्यमध्यगौइति मासादिलक्षणभेदविचारस्तु
ग्रंथगौरवभयान्नलिखितः २० इतिश्रीदैवज्ञानंतसुतदैवज्ञरामविरचितायांस्वकृतमुहूर्तचिंतामणिटीकायांप्रमिताक्षरायांसंक्रांतिप्रकरणंस
मातंतृतीयं ३ अथग्रंथांतरेसंग्रहः योगिनीस्थितकाष्ठातःसंक्रांतेरागमोमतः चंद्रस्तुदिशिदृष्टिःस्यात्गमनंवारदिक्स्मृतं इतिक्वचित् रवौसंक्रम
णेपूर्वेमुखंजीवेतुउत्तरे प्रत्यङ्मुखंशनौसोमेशेषेदक्षिणतोमुखंइति ववेपूर्वमुखंप्रोक्तं बालवेयमदिग्मुखं कौलवेपश्चिममुखंतैतिलेचोत्तरेमुखं गरे
वायव्यदिग्वक्त्रं वणिज्याग्नेयदिङ्मुखं भद्रायामीशदिग्वक्त्रं शकुनेनैर्ऋतोमुखं चतुष्पदेचपाताले नागेचोर्ध्वमुखीभवेत् किंस्तुघ्नेसर्वदिग्वक्त्रंसंक्रा
तिमुखलक्षणं अथदृष्टिः चंद्रेगुरौदृष्टिविदिक्कृशानौसूर्येसितेनैर्ऋतिकोणगादृक् धात्रीसुतेदृक्पवनेनिरुक्ता बुधेशमोहृद्दिशीक्षणंभ

द्विसंक्रमात्तच्चविभागयोस्तः तिथेर्हिमासौप्रथमांत्यसंज्ञौ २० इतिमुहूर्तचिंतामणौसंक्रांतिप्रकरणंतृतीयं ३ ॥

॥सूर्योरसांत्यैरवयुगेग्निनंदैशिवाक्षयोर्भौमशनीतमश्च॥

वेत् अथगमनं मंदेचंद्रेगमः सौम्येबुधेभौमेचवारुणे रवौशुक्रेगमोयाम्येगुरौप्राग्गमनंस्मृतमिति अथगोचरप्रकरणंव्याख्यायते तत्रजन्मरा
शेःसकाशाद्ग्रहाणांचारवशेनयच्छुभाशुभफलंतद्गोचरफलमित्युच्यते तत्ररविचंद्रयोर्गोचरफलमुपजातिकयाह सूर्यइति रसांत्येइत्यादौस
माहारद्वंद्वः शिवाक्षयोरित्यादावितरेतरयोगः अंबराध्यावित्यामागमशासनमितिनुमभावोध्येयः एवंसर्वत्र स्वजन्मराशेरितिपंचम्यंतो
कस्तुमत्राध्याहार्यं ततः सूर्यः क्रमात् रसांत्यैशुभोविद्धश्चस्यात् सूर्योजन्मराशेःसकाशात्षष्ठस्थानेशुभः यदितत्रएवजन्मराशेर्द्वादशस्था
नस्थांऽन्येग्रहास्तदाविद्धःसूर्यःशुभोप्यशुभफलदाता अत्रशनेःसूर्यपुत्रत्वात्तद्वेधोनांगीकृतः यतः पितुर्जानकस्यसुतसंबंधिनंवेधनं
वेधनाहुः सुतस्यापिपितृसंबंधिनंवेधंनाहुः तथाखयुगेजन्मराशेर्दशमेसूर्यःशुभः चेच्चतुर्थस्थानेशनिवर्जिताअन्येग्रहाः ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुतदाविद्ध इत्येवं श्लोकत्रयं सम्यग्व्याख्येयं तथाग्निनंदे तृतीयनवमयोः शिवास्तयोरेकादशपंचमयोः क्रमाच्छुभो विद्धश्चत्तेयः भौमेति भौम
शनी तमोगुश्चत्रयोपि जन्मराशितः खांकयोः लाभशरे गुणांत्ये क्रमाच्छुभा विद्धाश्चेत्यर्थः परं तु शनेः सूर्यवेधो नास्तीत्युक्तं प्राक् चंद्रोंब
राब्धौ इत्यग्रे १ अथ बुधगुरुशुक्राणां गोचरफलं उपजातिकेंद्रवज्राभ्यामुपजातिका पूर्वार्द्धेनाह चंद्र इति जन्मभात् अंबराब्धौ गुणनंद
योः लाभाष्टमे आद्यशरे रसांत्ये नगद्वये चंद्रः क्रमाच्छुभो विद्धश्चत्तेयः चंद्रस्य बुधवेधो नास्ति अथ ज्ञ इति द्विशरे अब्धिरामे रसांक
योः नागविधौ खनागे लाभव्यये ज्ञो बुधः क्रमात् शुभो विद्धश्चत्तेयः अत्र चंद्रवेधो नास्ति अथ देवगुरुरिति जन्मभात् शराब्धौ ह्यंत्ये
नवाशे अद्रिगुणे शिवाहौ देवगुरुर्बृहस्पतिः क्रमाच्छुभो विद्धश्चत्तेयः अथ शुक्र इति जन्मराशेः सकाशात् कुनागे द्विनगे अग्निरूपे वेदां

रसांकयोर्लाभशरे गुणांत्ये चंद्रोंबराब्धौ गुणनंदयोश्च १ लाभाष्टमे चाद्यशरे रसांत्ये नगद्वये ज्ञो द्विशरेब्धिरामे रसांक
योर्नागविधौ खनागे लाभव्यये देवगुरुः शराब्धौ २ ह्यंत्ये नवाशेद्रिगुणे शिवाहौ शुक्रः कुनागे द्विनगेग्निरूपे वेदां
बरे पंचनिधौ गजेषौ नंदेशयोर्भानुरसे शिवाग्नौ ३ क्रमाच्छुभो विद्ध इति ग्रहः स्यात् पितुः सुतस्यात्र न वेधमाहुः ॥

बरे पंचनिधौ गजेषौ नंदेशयोः भानुरसे शिवाग्नौ शुक्रः क्रमाच्छुभो विद्धश्चत्तेयः अत्रेदं तात्पर्यं सूर्यो रसांत्ये इत्यादि प्राक्पठितस्थानेषु वि
द्यमानः सन् ग्रहः शुभदः तदनंतरपठितस्थानेषु स्थितो अशुभफलदाता अर्थादेवानुक्तस्थानेषु न शुभो नाप्यशुभ इति २ ३ अथ वाम
वेधस्तुक्लपक्षे चंद्रबलं चापजात्युत्तरार्धेनाह दुष्टोपीति दुष्टोपि स्वजन्मराशेः सकाशादनंतरपठितविरुद्धस्थानस्थितोपि विपरीतवेधाद्वामवे
धाच्छुभः यथा सूर्यो द्वादशोऽनिष्ट इत्युक्तं प्राक् स यदि शनिवर्जितैर्ग्रहैः षष्ठस्थानस्थितैर्विद्धः सन् शुभफलदाता एवमुत्तरस्थानस्थितोयः
कश्चिद्ग्रहः प्राक्पठितस्थानस्थितैर्ग्रहैर्विद्धः शुभ इति सर्वत्र व्याख्येयं अयमेव वामवेध इत्युच्यते ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कश्यपः अपिविद्धोग्रहः किंचिन्नददातिशुभंफलं वामवेधविधानेनत्वशुभोपिशुभप्रदः द्विकोणेइति सितेशुक्लपक्षेअब्जश्चंद्रोद्वितीयनवपंचमेषुस्थितःशुभदः अत्रापिक्रमेणषष्ठाष्टमचतुर्थस्थानस्थितैर्वेधवर्जितैर्ग्रहैर्यदिनविद्धस्तदाशुभइतिध्येयं नारदः शुक्लपक्षेशुभश्चंद्रोद्वितीयनवपंचमे रिपुमृत्युंबुसंस्थेश्चनविद्धोगगनेश्वरैरिति ४ अथद्विविधमतमुपजात्याह स्वजन्मराशेरिति इहद्विविधवेधविधोअन्येनारदाद्यः स्वजन्मराशेः सकाशात् द्विविधमपिवेधमाहुः तथाचोभयत्रापिनारदेनजन्मतइत्युक्तं अन्येकश्यपाद्यःसपुनर्द्विविधोग्रहाधिष्ठितराशितःग्रहोयस्मिन्राशौतिष्ठतितएवक्रमाद्वेधोवामवेधश्चभवति यथा सूर्योजन्मराशेः षष्ठस्थितःशुभःसस्सूर्याक्रांतराशेः द्वादशस्थानस्थितैःशनिवर्जितैर्ग्रहैर्नविद्धः तथासूर्योद्वादशस्थानस्थितोनिष्टःसूर्यःस्वाक्रांतराशेःषष्ठस्थानस्थितैःशनिवर्जितैर्ग्रहैर्विद्धश्चे

दुष्टोपिखेटोविपरीतवेधाच्छुभोद्विकोणेशुभदःसितेब्जः ४ स्वजन्मराशेरिहवेधमाहुरन्येग्रहाधिष्ठितराशितःसः हिमाद्रिविंध्यांतरएववेधोनसर्वदेशेष्वितिकाश्यपोक्तिः ५

॥त्तदाशुभफलदइत्यर्थः अथद्विविधविधस्यैवविषयकल्पनोच्यते हेमाद्रीति हिमाचलविंध्याचलयोर्मध्यवर्तिन्येचदेशेसवेधोविज्ञेयः नसर्वदेशेष्विति काश्यपोक्तिः काश्यपवनेचयदाह सन्नातव्यंजन्मराशेस्तुनिखिलंयद्वलाबलं हिमाद्रिविंध्ययोर्मध्येवेधजंतद्ग्रहालयात् अपरेतु सूर्योरसांत्यइतिक्रामिकेवेधोजन्मराशेरेवज्ञेयःविपरीतवेधस्तुग्रहाधिष्ठितराशितएवेतिवदंति गुरुः जन्मतःक्रमवेधःस्याद्वामवेधोग्रहालयादिति इदमपिहिमाद्रिविंध्यांतरविषयमेवेत्यन्ये एतद्वानदुर्घटमित्याहनारदः अज्ञात्वाद्विविधंवेधंयोग्रहज्ञोबलंवदेत् समृषवचनाभाषीहास्यतानिजनेसदेति एवंगोचरदोषेयात्रादिनकार्यं तत्रशांतिमाहनारदः ग्रहेषुविषमस्थेषुशांतिंयत्नात्समाचरेदिति सौम्येक्षितेनिष्टफलःशुभदःपापवीक्षितःनिष्फलोतोग्रहोस्वेनशत्रुणाचावलोकितःनीचराशिगतःस्वस्यशत्रुक्षेत्रगतोपिवाशुभाशुभफलंनैवदद्यादस्तंगतोपिवेति एतादृशस्थलेदुष्टत्वाभावादेवशांत्याभाव

राम. ४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

अथगोचरप्रस्तावात् ग्रहणीयनक्षत्रफलंग्रहणीयराहुगोचरफलंग्रहणाशुभप्रतीकारंचदुष्टग्रहणदर्शननिषेधेचशार्दूलविक्रीडितेनाह
जन्मर्क्षेइति यस्यजन्मनक्षत्रेग्रहेग्रहणेसतिनिधनंमरणंस्यात् वसिष्ठः यस्यैवजन्मनक्षत्रेग्रस्येतेशशिभास्करौ तस्यव्याधिभयंघोरंज
न्मराशौधनक्षयइति विशेषोभार्गवीये यस्यराज्यस्यनक्षत्रेस्वर्भानुरुपरज्यते राज्यभंगंसुहृन्नाशंमरणंवात्रनिर्दिशेदिति राज्यस्यनक्षत्रे
राज्याभिषेकनक्षत्रे अथराशिफलंजनिभतइति जन्मराशेरारभ्यग्रहणेसतिक्रमेणघातादिकंफलंभवति यथा जन्मराशौग्रहणेसति
घातः शरीरपीडा द्वितीयराशौक्षितिर्द्रव्यनाशः तृतीयराशौश्रीलक्ष्मीप्राप्तिः चतुर्थराशौव्यथाशरीरपीडा पंचमराशौचिंतापुत्रादीनां षष्ठ
राशौसौख्यं सप्तमराशौकलत्रदौस्थ्यंस्त्रीकष्टं अष्टमराशौमृतिर्मरणं नवमराशौमाननाशः दशमराशौसुखं एकादशराशौलाभप्राप्तिः द्वा

जन्मर्क्षेनिधनंग्रहेनिजभतोघातःक्षितिःश्रीर्व्यथाचिंतासौख्यकलत्रदौस्थ्यमृतयःस्युर्माननाशःसुखं लाभो
पायइतिक्रमात्तदशुभध्वस्त्यैजपःस्वर्णगोदानंशांतिरथोग्रहंत्वशुभदंनोवीक्ष्यमाहुःपरे ६ ॥ ९ ॥

दशराशौअपायोनाशः आत्मनइतिकेचित् द्रव्यस्येत्यपरे इदंषण्मासपर्यंतमितिज्ञेयं तदनंतरंग्रहणांतरसंभावनाय उक्तंचदैवज्ञम
नोहरे घातंहानिमथश्रियंजननभाद्व्यालिंचचिंताक्रमात्सौख्यंदारवियोजनंचकुरुतेव्याधिंचमानक्षयं सिद्धिंलाभमपायमर्कशशि
नोःषण्मासमध्येग्रहइति अथाशुभस्यचक्रग्रहणप्रतीकारमाह तदशुभेति तस्यग्रहणाशुभस्यध्वस्त्यैनाशायजपस्वर्णगोदानंजपोगा
यत्र्यादिमंत्राणां स्वर्णंसुवर्णं गौर्धेनुः भूमिर्वा उपलक्षणत्वादन्येषांरूप्यादीनां यथाशक्त्यादानंकार्यमितिशेषः तद्दौस्थ्यव्रणुकद्रुकवज्जय
विधिस्वर्णादिदानंभवेदित्युक्तेः दानंज्योतिर्निबंधे सुवर्णनिर्मितंनागंसतिलंताम्रभाजने सदक्षिणंसवस्त्रंचश्रोत्रियायनिवेदयेत् मंत्रश्च
तमोमयमहाभीमसोमसूर्यविमर्दन हेमनागप्रदानेनममशांतिप्रदोभवेति स्कांदे गोदानंभूमिदानंचस्वर्णदानंविशेषतः ग्रहणक्लेशनाशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यदैवत्तत्प्रयनिवेदयेत् इतिव्यासेनोक्तं सर्वंगंगासमंतोयंसर्वेब्रह्मसमाद्विजाः सर्वंभूमिसमंदानंग्रहणेचंद्रसूर्ययोरिति अन्यच्च ग्रस्यमानेभवे।
त्स्नानंग्रस्तेहोमोविधीयते मुच्यमानेभवेद्दानंमुक्तेस्नानंविधीयतइति सूर्येंदुग्रहणंयावत्तावत्कुर्याज्जपादिकमितिशिवरहस्योक्तेः जपमादिश
ब्दाद्देवार्चनादिकार्यं अथस्थानविशेषेणग्रहणमरिष्टजनकमित्युक्तं तद्दृष्टमुतादृष्टमपीतिसंशयेनिर्णयमाह अथोइति तुविशेषे परेआ
चार्याः अशुभदंग्रहणंतुनोवीक्ष्यंनद्रष्टव्यमित्याहुः उक्तंच जन्मसप्ताष्टरिःफांकदशमस्थेनिशाकरे दृष्टोरिष्टप्रदोराहुर्जन्मर्क्षेनिधनेतथा
जन्मर्क्षंजन्मनक्षत्रं निधनंवधतारासप्तमी अत्रदृष्टइतिपदश्रवणाद्दर्शनंचाक्षुषंविवक्षितमितितेषामाशयंतत्त्वाक्षुषंज्ञानएवदृशेर्मुख्यत्वे
इतिपरेषांमतं तदसत् अदृश्यरूपाःकालस्यमूर्तयोभगणाश्रिताः शीघ्रमंदोच्चपाताख्याग्रहाणांगतिहेतवे इतिसूर्यसिद्धांतपातानामदृश्य
नोक्ता पातोराहुश्चपर्यायः दक्षिणोत्तरयोरेवंपातोराहुश्चरंहसा विक्षिपत्येवविक्षेपश्चंद्रादीनामयंक्रमादितिसूर्यसिद्धांतोक्तेः अतःपाता
नामदृश्यत्वात् राहोर्दर्शनमेवानुपपन्नं ननुग्रहणेसूर्यचंद्रयोश्छादकोराहुर्दृश्यतएव अतएवराहुग्रस्तेनिशाकरइत्यादिपुराणोक्ति
रपीतिचेन्न भानोर्भार्धेमहीछायातत्तुल्येर्केसमेपिवा शशांकपातेग्रहणंकियद्भागाधिकोनके इत्युपक्रम्य छादकोभास्करस्येंदुरधःस्थोघ
नवद्भवेत् भूछायांप्राङ्मुखश्चंद्रोविशत्यस्यभवेदसौ असौभूछायाअस्यचंद्रस्यछादकोभवेदित्यर्थः सूर्यसिद्धांते छाद्यछादकभा
वोऽभिहितःस्पष्टएव पुराणविरोधपरिहारस्तुभास्करेणैवराहुःकुभामंडलगःशशांकमित्यादिनोक्तं वराहेणापितस्मिन्कालेसान्निध्यम
स्यतेनोपचर्यतेराहुरित्युक्तातस्माद्राहोर्दर्शननास्त्येव तन्मतेदर्शनंचाक्षुषमेवविवक्षितं एवंचराहोर्दर्शनंराहुदर्शनमितितत्पुरुषोनुपप
न्नः तस्माद्दर्शनशब्देनोपरागोलक्ष्यते राहुदर्शनराहूपरागस्तस्मिन्राहुदर्शनेइ ति अयमर्थः राहुर्नामपातस्तत्संबंधेनदर्शनमुपरागइ
ति नचराहोरेवलक्षणयोपरागपरत्वस्यदर्शनमिति पूर्वपक्षाभिमतार्थसिद्धिरितिवाच्यं लक्षणयात्वर्थांतरासंभवेमतिवक्तव्याः अत्यं
तादर्शनाद्राहोस्तथाचात्यंतदर्शने प्रजापीडाविनिर्देश्याव्याधिर्दुर्भिक्षतस्करैरितिविष्णुधर्मोत्तरादिवाक्येषुपदांतरसंनिधानाद्राहुशब्दे

CC-0. In Public Domain. Digitization by eGangotri

नोपरागो लक्ष्यते इह च राहोः पातस्य च ग्रहगतिरूपमर्थांतरमस्तीत्यतो राहुदर्शनग्रहपातयोः समानार्थकता नास्तीत्येव सिद्धमिति प्रागुक्तानां सर्व
वचसां ग्रहणे स्नायादित्येकवाक्यार्थः फलितो भवति केचित्तु दर्शनादर्शनविषयकयोस्तु विध्योस्तुल्यबलत्वात्स्वकदृष्ट्वा स्नायादिति वदं
ति तदसत् जन्मसप्ताष्टरिःफांके इत्यादिना सामान्यतो निषिद्धस्य उपरक्तदर्शनस्य नेक्षेतोद्यंतमादित्यं नास्तं यांतं कदाचन नोपरक्तं न वारि
स्थं न मध्यं नभसो गतमिति मनूक्तोपरक्तदर्शनस्य पुनर्निषेधानुपपत्तेः प्रागुक्तदिशा राहुदर्शनपदस्य राहूपरागलक्षकत्वेन तुल्यबलत्वाभा
वात् तस्मादुपरक्तयोः सूर्याचंद्रमसोर्यस्य कस्यापि दर्शननिषेधमत्वात् ग्रहणे च स्नानदानाद्युक्तेस्तद्दानं च ज्योतिःशास्त्रैकदेशगणितग्रंथे
भ्योबुध्वा तस्मिन्काले दानादिविधेयमिति सिद्धांतः अत एव मेघाद्यावृतेषु उपरागे स्नानादि विधेयमेव रात्रौ सूर्योपरागे दिवा चंद्रोपरागे च स्नानादि
कं तु वचनान्न भवति तदुक्तं निगमे सूर्यग्रहो यदा रात्रौ दिवा चंद्रग्रहो यदि तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति तादृशे ग्रहणे दृष्टे पि
दोषो नास्तीत्यपि सूचितं जाबालिवचनं तु संक्रांतेः पुण्यकालस्तु षोडशोभयतः कलाः चंद्रसूर्योपरागे तु यावद्दर्शनगोचर इति स्मृतस्तस्मात्तन्मय
नपर्यंतं दर्शनगोचरत्वात्तावान्कालः पुण्यकालो भवतीति व्याचख्युः तदुक्तं विश्वरूपनिबंधे दिवा चंद्रग्रहो रात्रौ सूर्यपर्वे न पुण्यदं संधिस्थं पुण्य
वद्ज्ञेयं यावद्दर्शनगोचर इति अन्ये तु सूर्यस्यादर्शनं रात्रिर्दिनं तद्दर्शनात्मकं भुजवृत्तादुपरि च स्थितो कोदर्शनं स्मृतमिति वसिष्ठसिद्धांतवचनान्मे
घावृतेऽनावृते चोपरागे गणितागतस्थितिघटिकाः पुण्यकाल इत्याहुः यत्राकाशो भूम्या सह संलग्नमिव दृश्यते स प्रदेशो भुजशब्दवाच्यः अ
के इत्युपलक्षणं चंद्रादिग्रहनक्षत्राणां विष्णुधर्मोत्तरे अहोरात्रं न भोक्तव्यं चंद्रसूर्यग्रहो यदा मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति ग्र
स्तास्ते गुरुः ग्रस्तावेवास्तमानं तु रवींद्वोः प्राप्नुतो यदि तयोः परेद्युरुदये स्नात्वाभ्यवहरेन्नरः इत्यनयोर्वाक्ययोर्दर्शनोदयशब्दो भुजवृत्तोपरिस्थि
तत्वलक्षको अन्यथा मेघाद्यावरणे न परदिवसेपि दर्शनाभावे उपवासः प्रसज्येत तथा यत्र स्पर्शकाले ग्रहणं दृष्टा स्नानं विहितं तत्रांतरे मेघावर
णाद्रविचंद्रयोर्दर्शनाभावो दिवसद्वयं त्रयं वा स्यात्तत्राप्युपवासः प्रसंगः स्यात् न च शिष्टास्तथाचरंति तस्माद्दृशिदर्शनार्थ एव तस्माच्छास्त्रीयग्रहण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

मु·टी· स्नानेसतिमेघानावृत्तेपिग्रहणेग्रहणमदृष्ट्वैवचक्षुष्मता अंधेनगंतुमशक्तेनचवृद्धादादिनासच्छास्त्रीयविधेयमितितात्पर्यार्थः अतएवभागव
गा·२· तेकुरुक्षेत्रेस्नानार्थंमिलितानांपांडवीयलोकानांमध्येधृतराष्ट्रोपिपरिगणितइतिशिष्टाचारोप्येवमेवास्ति एवंचारिष्टजनकत्वेनतस्माज्जन्मसप्त
४४ केतिपद्येनिर्मूलत्वादुपेक्ष्यं किंच मत्पक्षोलब्धवसिष्ठमत्स्यपुराणादिवाक्येदर्शपदाभावाच्च अतएवमूलेपरेइतिपदंप्रयुक्तं शांतिस्तुदर्शा
नाभावेपिविधेया यतोरिष्टयोगानांस्वरूपसत्तामेवारिष्टजनकत्वात् अथग्रहणशांतिः येषांतुविषमस्थानेराहुश्चंद्रमुपक्रमेत् कर्मक्षयप
रिक्लेशान्प्राप्नुवंतिचतेजनाः पितृपक्षविनाशायसूर्यस्थानेभवेद्ग्रहः मातृपक्षविनाशायचंद्रस्थानेभवेद्ग्रहः होरायांग्रहतेयस्यनक्षत्रेवा
निशाकरः प्राणसंदेहमाप्नोतिसवामरणमृच्छति यस्यत्रिजन्मनक्षत्रेग्रहणेशशिभास्करे तज्ज्ञातानांभवेत्पीडायेनराःशांतिवर्जिताः संक्रमद
नस्पर्शेयेषांजन्मतृतीयेथवाग्रहण वहुरोगमृत्युजननोदानाहुतयोजपाश्चकर्तव्याः तस्माद्दानंचहोमंचदेवार्चनजपौतथा उपरागाभिषेकंच
कुर्याच्छांतिर्भविष्यति नक्षत्रदानंयथा रूपंविधायभुजगस्यतुकांचनेनपिष्टेनवाहिमकरंदिवसाधिपंच ग्रस्तेत्रिजन्मदिवसेतमसाप्रदद्या
द्विप्रायवेदविदुषेसुपरीक्षिताय यस्यराशिंसमासाद्यभवेद्ग्रहणसंभवः तत्रस्नानंप्रवक्ष्यामिमंत्रौषधिसमन्वितं चंद्रोपरागंसंप्राप्यकुर्याद्ब्राह्म
णवाचनं संपूज्यचतुरोविप्रान्शुक्लमाल्यानुलेपनैः पूर्वमेवोपरागस्यसमानीयौषधादिकं स्थापयेच्चतुरःकुंभान्व्रणान्सागरानिति गजाश्व
रथ्यावल्मीकसंगमात् ह्रदगोकुलात् राजद्वारप्रदेशाच्चमृदमानीयनिक्षिपेत् पंचगव्यंचकुंभेषुशुद्धमुक्ताफलानिच रोचनंपद्मकंशंखं।
पंचरत्नसमन्वितं स्फटिकंचंदनंश्वेतंतीर्थवारिचपल्लवान् जसदंतवकुहसर्षपोशीरगुग्गुलून् तत्सर्वंनिक्षिपेत्सर्वकुंभेष्वावाहयेत्सुरान् स राम·
र्वेसमुद्राःसरितस्तीर्थानिजलदानदाः आयांतुममशांत्यर्थंदुरितक्षयकारकाः तिलहोमंव्याहृतिभिःसहस्रंचाष्टसंयुतं एवंकृत्वाप्रयत्नेनस्ना ४४
नकर्मसमारभेत् आमंत्र्यनवभिर्मंत्रैःकुंभान्सकल्पपूर्वकं योसौवज्रधरोदेवआदित्यानांप्रभुर्मतः सहस्रनयनःशक्रोग्रहपीडांव्यपोहतु मु
खंयःसर्वदेवानांसप्तार्चिरमितद्युतिः चंद्रोपरागसंभूतामग्निःपीडांव्यपोहतु यःकर्मसाक्षीलोकानांधर्मोमहिषवाहनः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमश्चंद्रोपरागोत्थां ग्रहपीडां व्यपोहतु निर्ऋतिः कोणपो देवः प्रलयानलसंनिभः खड्गव्यग्रोतिभीमश्च रक्षः पीडां व्यपोहतु नागपाशधरो देवः स
दा मकरवाहनः सजलाधिपतिश्चंद्रग्रहपीडां व्यपोहतु प्राणरूपो हि लोकानां सदा कृष्णमृगप्रियः वायुश्चंद्रोपरागोत्थां ग्रहपीडां व्यपोहतु
योसौ निधिपतिर्देवः खड्गशूलगदाधरः चंद्रोपरागकलुषधनक्षेत्रं व्यपोहतु योसाविंदुधृतो देवो भवानीपतिरीश्वरः चंद्रोपरागजां पीडां स नाशय
तु शंकरः त्रैलोक्ययानिभूतानि चनत्तोमेत्रान्विलिख्यकान्वितान् वस्त्रपट्टेऽथवा भूर्जे पंचरत्नसमन्वितान् यजमानस्य शिरसि निदध्युस्ते द्वि
जोत्तमाः ततोतिवाहयेद्वेलामुपरागानुमानिनी प्राङ्मुखं पूजयित्वा तं नत्वा चाभीष्टदेवतां चंद्रग्रहे विनिर्वृत्ते कृतशौचात्ममंगलः कृतस्नानं
च तत्सर्वं ब्राह्मणाय निवेदयेत् अनेन विधिना यस्तु ग्रहस्नानं समाचरेत् न तस्य ग्रहपीडा स्यान्न च बंधुधनक्षयः सूर्यग्रहे सूर्यनाम सदा मंत्रे
षु कीर्तयेत् य इदं शृणुयान्नित्यं श्रावयेद्वापि वा नरः सर्वपापविनिर्मुक्तः सर्वत्र सुखवान्भवेदिति इति मत्स्यपुराणोक्ता ग्रहणशांतिः अथौषधी

पापांतः पापयुक्द्यूने पापाश्चंद्रः शुभोप्यसत् शुभांशे चाधिमित्रांशे गुरुदृष्टोऽशुभोपि सत् ७ सितासितादौ सद्दुष्टे चंद्रे पक्षौ

भिर्ग्रहणशांतिः रोचनं पद्मकं शंखं कुंकुमं रक्तचंदनं शुक्तिस्फटिकतीर्थांबु सितसर्षपगुग्गुलून् मधुकं देवदारुं चविल्लु ऽः शुभाशुभौ ।।
कांताक्रांतावरी वेलां च सहदेवीं च निशाद्वितयमेव च दूर्वांकुरोशीरशमीशिलाजित्सर्वार्थसर्वौषधिपंचमृद्भिः स्नानं विदध्याद्ग्रहणं रवींद्वोः
पीडाकरं शांतिवहं च यस्येति ६ अथ चंद्रबले विशेषमनुष्टुप्छंदसाह पापांत इति शुभफलदोपि चंद्रः पापांतः पापद्वयमध्यवर्ती पापयु
क् पापग्रहयुक्तः पापात् द्यूने सप्तमे वर्तमानस्तदा शुभोपि असत् अशुभ एव यदा त्वशुभोपि चंद्रः शुभांशे शुभग्रहनवांशे अथवाधिमित्रन
वांशे तथा गुरुणा दृष्टः सत् शुभफलदाता भवेत् ७ अन्यदप्यनुष्टुभाह सितेति शुक्लपक्षादौ प्रतिपदि सप्तमी चीनचंद्रे सति संपूर्णः शुक्लः शु
भः असितादौ कृष्णपक्षप्रतिपदि दुष्टे चंद्रे सति संपूर्णः कृष्णः शुभः व्यत्यासे च पूर्वोक्तादर्थाद्वैपरीत्ये द्वावपि पक्षावनिष्टौ ।। ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदा शुक्लप्रतिपदि चंद्रे दुष्टश्चेत्तदा सकलपक्षोऽनिष्टः कृष्णप्रतिपदि चंद्रः शुभश्चेत्तदा संपूर्णः कृष्णपक्षोऽनिष्टः इदमेतावत् अत्र बलं चंद्र
बलं संकटे विवाहयात्रादौ अवश्यकर्तव्ये तात्कालिकचंद्रबलाभावे च ग्राह्यं नान्यथेत्यर्थः ८ अथ ग्रहदोषपरिहारपूर्वकं तुष्टिसंपाद
नार्थं नवरत्नसमुदायधारणशालिन्याह वज्रमिति अत्र सुवर्णमुद्रिकायां नवधा भक्तायां प्रागादिक्रमेण नवरत्नानि निधेयानि तत्र प्रागिति
पंचम्यंतमव्ययं पंचमी चेयल्ल्यप्लोपे तेन प्रागादिदिक्ष्वित्ययमर्थो जातः तत्र शुक्रप्रीतये पूर्वस्यां दिशि वज्रं श्वेतहीरकं निधेयं एवं चंद्रप्रीतये
सुमुक्ता शोभनमुक्ताफलमाग्नेय्यां भौमप्रीत्यर्थं दक्षिणस्यां प्रवालं अगो राहो नैर्ऋत्यां गोमेदं आर्कौ शनौ पश्चिमायां शोभनं नीलं केतौ वाय
व्यां वैडूर्यं गुरौ उत्तरस्यां पुष्पकं पुष्पराजं बुधे ऐशान्यां पाचिः मध्ये मध्यमकोष्ठे अर्कप्रीत्यै माणिक्यं निधेयं ९ अथ सति सामर्थ्ये नवरत्नस

व्यत्यासे चाशुभौ प्रोक्तौ संकटे त्वबलं त्विदं ८ वज्रं शुक्रेऽब्जे सुमुक्ता प्रवालं भौमेऽगौ गोमेदमार्कौ सुनीलं केतौ वैडूर्यं गु
रौ पुष्पकं ज्ञे पाचिः प्राङ्माणिक्यमर्के तु मध्ये ९ माणिक्यमुक्ताफलविद्रुमाणि गारुत्मकं पुष्पकवज्रनीलं गोमेद
वैडूर्यकमर्कतः स्यू रत्नान्यथो ज्ञस्य मुदे सुवर्णं १० धार्यं लाजावर्तकं राहुकेत्वो रौप्यं शुक्रे द्वौ च मुक्ता गुरौ तु ॥ ९ ॥

मुदायधारणमुक्तं इदानीमसति सामर्थ्ये यद्ग्रहकृतदोषस्तद्ग्रहरत्नधारणमिंद्रवज्रयाह माणिक्येति सूर्यप्रीत्यर्थं माणिक्यं धार्यं एवं चंद्रस्य।
मुक्ताफलं भौमस्य विद्रुमं प्रवालं बुधस्य गारुत्मकं गरुडः पाचिः गुरोः पुष्पकं पुष्पराजः शुक्रस्य वज्रं हीरकः शनेर्नीलं लहसुणिया राहो
गोमेदं केतोर्वैडूर्यमित्येवमर्कतोऽर्कादीनां ग्रहाणां रत्नानि धार्याणि स्युः तत्र यद्ग्रहकृतदोषस्तस्य ग्रहस्य तुष्ट्यै तद्रत्नमेव धार्यमित्यर्थः
अथो ज्ञस्य मुदे सुवर्णमित्यग्रिमश्लोकेन संबंधः १० अथ महामूल्यरत्नधारणस्यासामर्थ्ये अल्पमूल्यानि रत्नानि ताराबलं च शालिन्याह
धार्यमिति अथो ज्ञस्य बुधस्य मुदे संतोषार्थं सुवर्णं यथाशक्ति धार्यं राहुकेत्वोस्तुष्ट्यै लाजावर्तकं मणिविशेषो धार्यः शुक्रे द्वौ तुष्ट्यै रूप्यं ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरौ स्तुष्ट्यै मुक्ताफलं शनौ स्तुष्ट्यै लोहं आरभान्वोस्तुष्ट्यै प्रवालं धार्यं तारेति यद्दिने ताराबलं चिकीर्षितं तद्दिने या तारा सा जन्मनक्षत्रात् त्रिरावृत्तितः पु
नः पुनरावृत्तित्रयेण गणनीया स्यात् त्रिरिति सुजंतमव्ययं जन्मनक्षत्रात् दिननक्षत्रगणितनवभिर्भक्ते तिस्र आवृत्तयो भवंति अवशिष्ट तारायाः
शुभमशुभं च व्याख्यामिति फलितोर्थः ११ अथ शेषक्रमेण सकलास्ताराः संज्ञा अनुष्टुभाह जन्माख्येति स्पष्टोऽर्थः १२ अथावश्यकृत्येदु
ष्टताराणां प्रकारद्वयेन परिहारं शार्दूलविक्रीडितेनाह मृत्यौ स्वर्णतिलानिति मृत्यौ वधे तारायां स्वर्णतिलान् यथाशक्ति ब्राह्मणाय दद्यात् वि
पदि विपत्तारायां गुडमिक्षुविकारं दद्यात् त्रिजन्मसु तिसृषु जन्मताराशु शाकं वृंताकादि दद्यात् अथो प्रत्यरितारकासु पंचमतारायां लवणं दद्यात्।

लोहं मंदस्यारभान्वोः प्रवालं ताराजन्मर्क्षात्त्रिरावृत्तितः स्यात् ११ जन्माख्यसंपद्विपद्विपदः क्षेमप्रत्यरिसाधकाः
वधमैत्रातिमैत्राः स्युस्ताराना मसदृक्फलाः १२ मृत्यौ स्वर्णतिलान्विपद्यपि गुडं शाकं त्रिजन्मस्वथो दद्यात्प्र
त्यरितारकासु लवणं सर्वो विपत्प्रत्यरिः मृत्युश्चादिमपर्ययेन शुभदोथैषां द्वितीये शकानादिप्रांत्यतृतीयकाश्च
श्चाशुभाः सर्वे तृतीये स्मृताः १३ षष्टिघ्नं गतभं भुक्तघटीयुतं युगाश्वहृत॥

॥ द्यात् नारदः जन्मत्रिपंचसप्ताख्यातारानिष्टफ
लाः स्मृताः शाकं गुडं च लवणं सतिलान्कांचनं क्रमात् अनिष्टपरिहाराय दद्याद्दानं द्विजातये इति अथ द्वितीयः परिहारः तत्रादिमपर्यये प्र
थमावृत्तौ विपत्प्रत्यरिमृत्युश्च तृतीयपंचमीसप्तम्यस्ताराः सर्वा अपि सामान्यतः षष्टिघटिकात्मिका न शुभदाः स्युः अथ द्वितीये पर्यये द्वितीया
वृत्तौ विपत्प्रत्यरिमृत्यूनां आदिप्रांत्यतृतीयकाश्च अंशा न शुभदाः विपत्तारायामाद्यांशः प्रथमचरणो निषिद्धः प्रत्यरितारायां प्रांत्यांशश्चतुर्थे
चरणस्त्याज्यः मृत्युतारायां तृतीयोंशः तृतीयचरणस्त्याज्य इति अथ तृतीयावृत्तौ विपत्प्रत्यरिमृत्युश्चैते सर्वे षष्टिघटिकात्मिका अपि शुभाः उ
क्तं च दीपिकायां पर्याये प्रथमे वर्ज्या विपत्प्रत्यरिनैधना इति १३ अथ चंद्रावस्थागणनोपायमाह षष्टिघ्नमिति अश्विनीमारभ्य गतभानि षष्टया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु·टी· गुण्या निवर्तमाननक्षत्रभुक्तघटीयुतानि तानि पुनर्युगैश्चतुर्भिर्हतानि शराब्धिहृत ४५ पंचचत्वारिंशता भाज्यानि यल्लब्धमागतं गतावस्थास्ताः
गो·ग्र· शेषं वर्तमानावस्थायाः तत्र लब्धांकस्यापि द्वादशाधिक्ये द्वादशभिर्भागशेषं प्रवासाद्यवस्था चंद्रस्य गताः स्युः ता अवस्था मेषराशेः पुंसः प्रवा।
४६ सादिसंज्ञाः वृषराशेर्नष्टादिसंज्ञाः एवं मिथुनादिदशराशिषु मृतादिसंज्ञावस्थादितो द्वादशावस्थाः क्रमेण भवंतीत्यर्थः १४ अथ द्वादशावस्था
नामानि स फलान्याह प्रवासनाशावितिस्पष्टार्थं १५ अथ ग्रहाणां वैकृतपरिहारार्थं सौषधस्नानं दक्षिणाश्च शार्दूलविक्रीडितेनाह लाजा
कुष्ठेति लाजा भ्रष्टशालयः इति केचित् वस्तुतस्तु औषधीसाहचर्यात्तु लाजाशब्देन लज्जावती गृह्यते कुष्ठं प्रसिद्धं बलावरियाः प्रि
यंगुः फलिनी घनो मुस्ता सिद्धार्थाः सर्षपाः निशा हरिद्रा दारुः देवदारुः पुंखा शरपुंखा लोध्रं प्रसिद्धं एतैरोषधैर्युतैर्जलैः स्नानं ग्रहोत्था

शराब्धि ४५ हृल्लब्धतोऽर्कशेषेऽवस्थाः क्रमाद्विधोः १४ प्रवासनाशौ मरणं जयश्च हास्यारतिक्रीडितसुप्तभुक्ताः॥
ज्वराख्यकंपस्थिरता अवस्था मेषात् क्रमान्नाम सदृक्फलाः स्युः १५ लाजाकुष्ठबलाप्रियंगुघनसिद्धार्थैर्निशादा
रुभिः पुंखालोध्रयुतैर्जलैर्निगदितं स्नानं ग्रहोत्थाघहृत् धेनुः कंबु रुणो वृषश्च कनकं पीतांबरं घोटकः श्वेतो गौर
सिता महासिरजइत्येता रवेर्दक्षिणाः १६ सूर्यारसौम्यास्फुजितोक्षनागसप्ताद्रिघस्तान्विधुरग्निनाडीः॥ ॥ ॥

घहृत् दुष्टग्रहसूचितारिष्टनाशकं स्यात् सप्रियंगुरजनीद्वयमांसीकुष्ठलाजतिलसर्षपखंडैः वारिभिः सहवचैः सहलोध्रैः स्नानमत्ति निखि
लग्नहपीडामित्युक्तेः अथ रवेः रविमारभ्य दक्षिणा उच्यते सूर्याय धेनुं चंद्राय कंबुः शंखः शंखः स्यात्कंबुरस्त्रियामित्यमरः भौमायारु राम·
णो वृषः बुधाय सुवर्णं गुरवे पीतांबरं तच्च यथाविभवं कार्पासं कौशं वा शुक्राय श्वेतो घोटकः शनये श्यामवर्णा गौः राहवे महासिर्महा ४६
मूल्य खड्गं केतवे छागो मेषः एताः दक्षिणाः १६ अथ ग्रहाः गंतव्यराशेः प्राक् कियद्भिर्दिनैः फलं दद्युरित्येतदुपजात्याह सूर्यारेति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जिगमिषितराशेः पुरस्तात् पूर्वं तत्तत्संख्यघटीदिवसमासान् शुभाशुभफलदाः स्युः यथा सूर्यो गंतव्यराशेः प्राक्पंचदिनानि फलप्रदः भौमो
ऽष्टदिवसान् बुधः सप्तदिवसान् शुक्रोऽपि सप्तदिवसान् चंद्रो ऽग्निनाडीत्रयं राहुर्गंतव्यराशेः पूर्वं त्रिमासान् शनिः षण्मासान् गुरुर्मास
द्वयं पूर्वं फलदइत्यर्थः १७ अथावश्यकृत्ये तिथ्यादौ शालिन्या दानमाह दुष्टे योग इति राजादुष्टे व्यतीपातादियोगे तथा नाड्या घटि
कायां दुर्मुहूर्तादिदुष्टायां सुवर्णं यथाशक्ति दद्यात् एवं सर्वत्र शेषं स्पष्टं १८ अथ वसंततिलकयान्यदाह राश्यादीति पूर्वार्धं स्पष्टं अ
ध्वान्नेति यस्मिन्मासे स्वजन्मनक्षत्रप्रवेशः सूर्यादिवारश्च तस्मिन्मासे अध्वादीनि फलानि वाच्यानि यत्र मासि रविवारे जन्मनक्षत्रे
सेति अध्वा मार्गो भवति एवं चंद्रवारे अन्नं भक्ष्यप्राप्तिरित्यादि १९ इति श्रीदैवज्ञरामविरचितायां स्वकृतमुहूर्तचिंतामणिटीकायां गोचरप्र

तमोयमेज्याः त्रिरसाश्विमासान् गंतव्यराशेः फलदाः पुरस्तात् १७ दुष्टे योगे हेम चंद्रे च शंखं धान्यं तिथ्यर्द्धे तिथौ तं
डुलांश्च वारे रत्नं भे च गां हेम नाड्यां दद्यात् सिंधूत्थं च ताराखुराजा १८ राश्यादिगो रविकुजौ फलदौ सितेज्यौ मध्ये स
दा शशिसुतश्चरमे ऽजमंदौ अध्वान्नवह्निभयसन्मतिवस्त्रसौख्यदुःखानि मासि जनिभे रविवासरादौ १९ इति गोचर
प्रकरणं चतुर्थं ४॥ आद्यं रजः शुभं माघमार्गराधेषफाल्गुने॥ प्रकरणं चतुर्थं समाप्तं ४॥ अथ संस्कारप्रकरणं व्याख्यायते तत्र सं
स्क्रियते अनेन श्रौतेन स्मार्तेन वा कर्मणा पुरुष इति संस्कारः स्वीयस्वीयजातौ सामान्यविशेषविहितवैदिकस्मार्तकर्मानुष्ठानद्वारा दृष्टविश
बाधायक इतियावत् लक्षणया तदर्थोक्तदिनशुद्ध्यादिकं संस्कारशब्देनोच्यते तस्य प्रकरणमुपक्रमः ते च संस्कारा गर्भाधानादयः श्चा
चत्वारिंशत् तत्र गर्भाधानं प्रथमसंस्कारः स च रजस्वलात्व्यधीनः ततो रजोदर्शनाच्छुभाशुभफलमुक्तं वसिष्ठेन प्रथमरजोदर्शनतः शुभा
शुभं भवति सर्वे लोकानामिति तत्र शुभसूचकरजोदर्शनमनुष्टुभाह आद्यमिति राधो वैशाखः इष आश्विनः अन्ये प्रसिद्धाः॥ ॥

Nepal Sanskrit University, Balmeeki Campus Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एषुमासेषुआद्यंरजः प्रथमोद्भवंरजोदर्शनंस्त्रीधर्मः शुभंभविष्यंत्छुभसूचकं तथाशुक्ले शुक्लपक्षे कृष्णपक्षेतुदशमीपर्यंतंमध्यमंज्ञेयं
कृष्णपक्षस्यदशमीमध्यमंफलमादिशेदिति यावदितिशेषः सद्वारेसतांचंद्रबुधगुरुशुक्राणांवारे सत्तनौसमीचीनलग्नेशुभस्वामिकलग्ने
दिवादिवसे आद्यंरजोदर्शनंशुभमित्यर्थः अत्राशुभफलापवादमाहवसिष्ठः अशुभमपिसमस्तंयातिवैसंप्रभूतंसुरगुरुसितयुक्तेवीक्षितेवा
थलग्ने तिमिरमिवकठोरज्योतिरुत्पत्तिकालेक्षयमथसमुपैतिप्राप्नुयादीप्सितानि कठोरज्योतिः सूर्यः १ अथात्रशुभमध्याशुभनक्षत्रा
ण्यनुष्टुभाह श्रुतित्रयेति श्रवणत्रयमृदुक्षिप्रध्रुवस्वातीनक्षत्रेषु सितांबरेश्वेतवस्त्रेचाद्यंरजः शुभमितिपूर्वेणसंबंधः मूलेऽदितिभंपुन
र्वसुः पितरोमघा मिश्रेकृत्तिकाविशाखे एतेषुनक्षत्रेषुमध्यमं परेषुभरणीज्येष्ठार्द्राश्लेषापूर्वात्रयेषुअसत् अनिष्टं अत्रविशाखामूलयो

ज्येष्ठश्रावणयोः शुक्रेसद्वारेसत्तनौदिवा १ श्रुतित्रयमृदुक्षिप्रध्रुवस्वातौसितांबरे मध्यंचमूलादितिभेपितृमिश्रेपरे
ष्वसत् २ भद्रानिद्रासंक्रमेदर्शरिक्तासंध्याषष्ठीद्वादशीवैधृतेषु रोगेष्टम्यांचंद्रसूर्योपरागेपातेचाद्यंनोरजोदर्शनंसत्
३ हस्तानिलाश्विमृगमैत्रवसुध्रुवाख्यैः शक्रान्वितैः शुभतिथौशुभवासरेच स्नायादथार्तववतीमृगपौष्णवायुहस्ताश्विधा
तृभिरलंलभतेचगर्भं ४ ॥ मध्यमत्वाभिधानंवसिष्ठवाक्येदुष्टफलश्रवणात् द्विदैवभेपुष्पवतीप्रमत्ताकृत्वेवमोघामयवैरिसंघामूलेप्रका
माधिकहीनसत्वाव्यसृक्संसुक्षोद्भूतदोषचित्तेति २ अथनिंद्यरजोदर्शनशालिन्याह भद्रेति भद्राप्रसिद्धा निद्रानिद्रावस्थायां संध्याप्रातर्मध्याह्नसा
यंसंध्या उपरागेग्रहणे पातेव्यतीपातेमहापातेच शेषंस्पष्टं आद्यंरजोदर्शनंनोसत् अनिष्टफलमित्यर्थः ३ अथरजस्वलास्नानमुहूर्तंवसंत एम· ४७
तिलकयाह हस्तानिलेति एषुएकादशनक्षत्रेषु शुभतिथौरिक्तामारहिततिथौ शुभवारेचंद्रबुधगुरुशुक्रवारे आर्तववतीऋतुमतीस्त्रीस्नायात् अथ
विशेषमाह मृगेति मृगरेवतीस्वातीहस्ताश्विनीरोहिणीनक्षत्रैः स्नाताऋतुमतीअरंशीघ्रंगर्भंलभते लघुक्षिप्रमरंद्रुतमित्यमरोक्तेः दाक्षिणात्यास्तु
चतुर्थदिवसएवंस्नानंकुर्वंति अन्येविहितदिनेकुर्वंति तत्रदेशाचारतोव्यवस्थाइति ५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथगर्भाधानंशार्दूलविक्रीडितशालिनीभ्यामाह गंडांतमिति अत्रस्वपत्नीगमेगर्भाधाने एतान्दोषांस्त्यजेदितिसंबंधः एतान्कान्कानृत्रि
विधंतिथिनक्षत्रलग्नानांगंडांतं श्रीपतिः नक्षत्रतिथिलग्नानांगंडांतंत्रिविधंस्मृतं नवपंचचतुर्थानांह्यकार्धघटिकामितमिति नि
धनजन्मर्क्षे निधनतारांवधतारांजन्मतारांच मूलं अंतकंभरणी दास्त्रमश्विनी पौष्णंरेवती मघा उपरागग्रहणं पातंव्यतीपातंमहापा
तंच वैधृतिं पित्रोः मातापित्रोःश्राद्धदिनं दिवादिवसे परिघयोगस्याद्यार्धे उत्पातहतानिदिव्यभौमांतरिक्षस्त्रिविधोत्पातैर्हतानिदू
षितानिभानि जन्मर्क्षतः जन्मराशेर्जन्मलग्नाद्वामृत्युभवनमष्टमलग्नं पापयुतंभं ५ भद्राषष्ठीति पर्वाणिविष्णुपुराणेचतुर्दश्यष्ट
मीचैवअमावास्याचपूर्णिमा पर्वाण्येतानिराजेंद्ररविसंक्रांतिरेवचेति स्कांदेतु कृष्णाष्टमीचतुर्दश्यौपूर्णिमादर्शसंक्रमइति संध्याद्व

गंडांतंत्रिविधंत्यजेन्निधनजन्मर्क्षेचमूलांतकंदास्रंपौष्णमघोपरागदिवसान्पातंतथावैधृतिं पित्रोःश्राद्धदिनं
दिवाचपरिघाद्यार्धंस्वपत्नीगमेभान्युत्पातहतानिमृत्युभवनंजन्मर्क्षतः पापभं ५ भद्राषष्ठीपर्वरिक्ताश्चसंध्याभौ
मार्कार्कीनाद्यरात्रीश्चतस्रः गर्भाधानंत्र्युत्तरेंद्वर्कमैत्रब्राह्मस्वातीविष्णुवस्वंबुपेसत् ६ केंद्रत्रिकोणेषुशुभैश्चपा
पैस्त्र्यायारिगैःपुंग्रहदृष्टलग्ने॥५५ यं भौमत्र्यंशनिवारान् आद्यरात्रीः रजोदर्शनमारभ्यदिनचतुष्टयंत्यजेत् कालविधाने षष्ठ्य
ष्टमीपंचदशीचतुर्थीचतुर्दशीमप्युभयत्रहित्वा शेषाःशुभाःस्युस्तिथयोनिषेकेवाराःशशांकार्यसितेकुजानामिति गर्भाधानमिति त्र्यु
त्तराः।इंदुमृगः अर्कोहस्तः मैत्रमनुराधा रोहिणीस्वातीश्रवणधनिष्ठाशततारकासुगर्भाधानंसतशुभं गुरुः हरिहस्तानुराधाश्चस्वाती
वरुणवासवं उत्तरात्रितयंसौम्यंरोहिण्यश्चशुभाःस्मृताः आधानेमूलसार्पांत्यमशुभंसममन्यभमिति ६ अथगर्भाधानेलग्नमिंद्रव
ज्रयाह केंद्रेति शुभैःकेंद्रत्रिकोणेषुसद्भिः पापग्रहैस्त्र्यायारिगैः सद्भिः पुंग्रहैः रविभौमगुरुभिर्दृष्टेलग्नेसति तथा ब्रूचंद्रे ओजांशगे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु. टी. विषमराशीनां नवांशगे सति अपिशब्दात् लग्नेपि विषमांशगे युग्मराशौ समराशौ गर्भाधानं कार्यं मध्यममान्याह चित्रादितीज्याश्विषु तद्गर्भा
सं. प्र. धानं मध्यमं स्यात् गुरुः चित्रादित्यैंत यातिष्यैतुरगे चेति मध्यमा शेषाण्यृक्षाणि दुष्टानि स्युर्निषेकाख्यकर्मणीति एवं गर्भाधाने निधा
४९ यपुंसा किं कार्यमित्याह विष्णुः निद्रासमयमासाद्य तांबूलं चंदनान्यजेत् पर्यंकात्समदांभालात्तुंड्रपुष्पाणि मस्तकात् इति गर्भाधानं ७
अथ सीमंतोन्नयनं शार्दूलविक्रीडितेनाह जीवार्केति गुरुरविभौमवारे निर्ऋतिमूल ब्रध्नभंहस्तः एतैर्नक्षत्रैः रिक्ता ४।९।१४ अमा ३० अ
र्को १२ रसाः ६ अष्ट अष्टमी आभिर्वर्जिततिथिभिः उपलक्षिते दिने मासाधिपे पीवरे पुष्टे सतीत्यर्थः एतादृशसमये अष्टमषष्ठमासि अष्टममा
सि षष्ठमासे वा सीमंतः सीमंतकर्मोख्यो गर्भसंस्कारः कार्यः तत्र शुभग्रहैः केंद्रत्रिकोणसद्भिः खलैः पापैः लाभारित्रिषु सद्भिः पुंभांशके लग्ने

ओजांशके त्वपिच युग्मराशौ चित्रादितीज्याश्विषु मध्यमं मतं ७ जीवार्कारदिने मृगेज्यनिर्ऋतिश्रोत्रादितिब्रध्नभे
रिक्तामार्करसाष्टवर्ज्यतिथिभिर्मासाधिपे पीवरे ॥ ५ पुरुषराशौ विषमराशौ लग्ने नवांशे च विषमराशौ सति तदा सीमंतः शुभः

अत्र विशेषमाह कश्यपः चंद्रोपि शुभदो ज्ञेयः त्यक्त्वा षष्ठाष्टमव्ययान् सीमंतलग्नादेकोपि क्रूरः पंचाष्टरिःफगः हंति सीमंतिनीं सापि
तद्गर्भं वा न संशयः नैधने तयोर्लग्नैनैधने शुद्धिसंयुते तयोः स्त्रीपुंसयोः अस्यापवादः लग्नादष्टमराशीशः केंद्रगः शुभवीक्षितः य
द्यप्यष्टमभस्योक्तं दोषमाशु व्यपोहति गर्गः सीमंतोन्नयनं कार्यं शुभांशे शुभलग्नगे कुलीरयुगकन्याश्च वर्ज्याः शेषाश्च शोभना इति ॥ राम.
अत्र ग्रहबले सति कुलीरमिथुनकन्या अपि ग्राह्या इति तत्त्वं अत एव मूले लग्नविचारो न कृतः कारिकायां पुनस्त्राणि चैतानि तिष्याहस्त ४८
पुनर्वसुः अभिजिन्मूलश्रवणाश्चैव अनुराधाश्वियुक्तथा ऋक्षस्य मध्यमे पादद्वये सीमंत इष्यते इत्युक्तं अथ मतांतरं वाधुवान्यसद्दे ध्रुवा
णि रोहिण्युत्तरा अन्त्यं रेवती एषु तथा सतांशुभग्रहाणां चंद्रस्त गुरुशुक्राणां वारे वा कार्यं गुरुः रोहिण्यैंदवमादित्यं पुष्यहस्तोत्तरात्रयं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापग्रहैर्वेधमभं चैव सीमंते सौम्यवारा इति सीमंतादिषु शोभना इत्यर्थः जन्मभं सीमंते निषिद्धमाह वसिष्ठः बालान्नभुक्तौ व्रतबंधने च रा
ज्याभिषेके खलु जन्मधिष्ण्यं शुभं त्वनिष्टं सततं विवाहसीमंतयात्रादिषु मंगलेषु गुरुः मासप्रयुक्तकार्येषु मूढत्वं गुरुशुक्रयोः न दोष
कृत् मलोमासो गुर्वादित्यादिकं तथा यद्यपि पुंसवनस्य प्रथमकर्तव्यत्वात् तत्पूर्वं निरूपणमावश्यकं। तथापि क्वचित्सीमंतेन सहैव
विधानात् बहुषु तथैवाचारदर्शनात् सीमंतमुहूर्त एव प्रथममुक्तः नृसिंहः सीमंतोन्नयनस्योक्ततिथिवारभराशिषु पुंसं च कारयेद्वि
द्वान्सह वैकदिनेऽथवा इति ८ अथ मासेश्वराः स्त्रीणां चंद्रबलं च वसंततिलकेनाह मासेश्वरा इति अष्टममासेश्च आधानलग्नाधिपः स्त्री
णामिति विवाहगर्भसंस्कारे गर्भाधानपुंसवनसीमंतादिरूपे स्त्रीणामपि चंद्रबलं ग्राह्यं इतरकर्मसु वस्त्रालंकारादिधारणादिषु भर्तुरे

सीमंतोऽष्टमषष्ठमासि शुभदैः केंद्रत्रिकोणे खलैर्लाभारित्रिषु वा ध्रुवांत्यसदहे लग्ने च पुंभांशके ८ मासेश्वराः सि
तकुजेज्यरवीदुसौरचंद्रात्मजात्तनुपचंद्रदिवाकराः स्युः स्त्रीणां विधोर्बलमुशंति विवाहगर्भसंस्कारयोरितरक
र्मसु भर्तुरेव ९ पूर्वोदितैः पुंसवनं विधेयं मासे तृतीये त्वथ विष्णुपूजा मासेऽष्टमे विष्णुविधातृजीवैर्लग्ने शुभे मृ

वचंद्रबलं ग्राह्यं यदा भर्ता मृतस्तदा पुनः स्त्रीणामेव राजमार्तंडः विवाहकार्यं कुसुमप्रतिष्ठा गर्भप्रतिष्ठा वनिता ऽऽत्युगृहे च शुद्धे १०
विशुद्धौ अन्यानि कार्याणि धवस्य शुद्धौ पत्यौ विहीने प्रमदात्मशुध्या ९ अथ येषां पृथगेव पुंसवनमित्याचारः तदर्थं पुंसवनमुहूर्तं
विष्णुपूजामुहूर्तं चेंद्रवज्रयाह पूर्वोदितैरिति पूर्वोदितैः सीमंतकर्मण्युदितैस्तिथ्यादिनिरूपलक्षितैः तृतीये मासि पुंसवनाख्यं कर्म
विधेयं पुमान्सूयतेऽनेनेति पुंसवनं कर्मणः पुंस्त्वहेतुना अथेति सीमंतानंतरमष्टमे मासि विष्णुविधातृजीवैः श्रवणरोहिणीपुष्यै
उपलक्षिते दिवसे तथा लग्ने शुभे शुभस्वामिके शुभयुतदृष्टे वा मृत्युगृहे अष्टमस्थाने शुद्धे सर्वग्रहरहिते च सति विष्णुपूजा कार्या १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु० टी० अथ जातकर्मनामकरणयोर्मुहूर्त उपजात्याह तज्जातकर्मादीति जातकर्म यद्यपि जन्मनानंतरमेव विहितं तथापि संक्रांतिव्यतीपातादिदुष्ट
सं० प्र० दिवसतया पित्राद्यसन्निधानेन च तन्न कृतं तदा मुहूर्तविचारणेन कार्यं गर्गः व्यतीपाते च संक्रांतौ ग्रहणे वैधृतावपि श्राद्धं विना शुभं कर्म
५९ प्राप्ते कालेपि नाचरेदिति अत एव कालविकल्पोक्तो नारदेन तस्मिन् जन्ममुहूर्ते तु सूतकांते सदा शिशोः जातकर्म च कर्तव्यं पितृपूज
नपूर्वकमिति अत एव कामिति जातकर्मादीनि तस्य जातस्य शिशोर्जातकर्म आदिशब्दान्नामकर्मोच्यते पर्वाणि चतुर्दश्यष्टमी कुहूरि।
त्यादि पूर्वोक्तानि रिक्ताभिश्च ऊनतिथौ विवर्जिततिथौ शुभेऽह्नि शुभवारे तथा एकादशे द्वादशे वापि घस्रे दिवसे तथा मृदुध्रुवक्षिप्रच
रनक्षत्रेषु शस्तः स्यादतिक्रांतजातकर्मादि विधेयं कर्तव्यं तच्च श्रवणानंतरं सचैलस्नानं कृत्वा कार्यं वसिष्ठः श्रुत्वा जातं पिता पुत्रं सचैलं
स्नानमाचरेत् उत्तराभिमुखो भूत्वा नद्यां वा देवखातके तच्च शीतोदकेन कुर्यान्नैमित्तिकं स्नानं शीताभिः काम्यमेव चेति रात्रावपि कार्यं

तज्जातकर्मादि शिशोर्विधेयं पर्वाख्यरिक्तोनतिथौ शुभेऽह्नि। एकादशे द्वादशकेपि घस्रे मृदुध्रुवक्षिप्रचरोडुषु स्यात्

वसिष्ठः पुत्रजन्मनि यज्ञे च तथा संक्रमणे रवेः राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा निशीति सूतके तु समुत्पन्ने पुत्रज ॥ त० ११
न्म यदा भवेत् कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति रात्रौ जलाशये गमनाशक्तौ सांख्यायनः दिवा यदाहृतं तोयं कृत्वा स्वर्ण राम:
युतं तु तत् रात्रिस्नानं तु संप्राप्ते स्नायादनलसंनिधाविति जातकर्मप्रयोजनमाह गुरुः जातकर्मक्रियां कुर्यात्पुत्रायुःश्रीविवृद्धये ग्रह ५९
दोषविनाशाय सूतकाशुभविच्छिदे कुमारग्रहनाशाय पुंसां सत्वविवृद्धये इति वसिष्ठः एकादशेऽह्नि विप्राणां क्षत्रियाणां त्रयोदशे
वैश्यानां षोडशे नाम मासांते शूद्रजन्मन इति वसिष्ठेन मासनामान्युक्तानि चैत्रादिमासनामानि वैकुंठोथ जनार्दनः उपेंद्रो यज्ञपुरुषो
वासुदेवस्त्रिविक्रमः योगीशः पुंडरीकाक्षः कृष्णोऽनंतोऽच्युतस्तथा चक्रधारीति चैतानि क्रमादाहुर्मनीषिण इति ११ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथसूतिकास्नानमुहूर्तंवसंततिलकेनाह पौष्णेति हयोश्विनी एषुरेवत्यादिनक्षत्रेषुसमित्रभरवीज्यकुजेषुअनूराधानक्षत्रसूर्यगु
रुभौमवारसहितेषुसूत्याः प्रसूतायाः स्त्रियाः स्नानंशस्तं आर्द्रात्रयेश्रवणमघाभरणीमिश्रेकृत्तिकाविशाखेमूलचित्रासुनशस्तं बुधवा
रेशनिवारेवसुरष्टमीषट्षष्ठीरविर्द्वादशीरिक्तातिथिषुचनशस्तं स्तन्यपानमुहूर्तंदेवस्त्रवल्लभे रिक्तांभौमंपरित्यज्यविष्टिंपातंसवैधृतिं
मृदुध्रुवक्षिप्रभेषुस्तनपानंहितंशिशोरिति १२ अथप्रसंगात्प्रथमादिमासोत्पन्नदंतफलंशार्दूलविक्रीडितेनाहमासेचेदिति बालश्चे
ज्जन्मानंतरंप्रथमेमासेचेत्सदशनोदंतयुक्तोभवेत् तदास्वयंबालोनश्येत् ततोद्व्यादिके द्वितीयादिमासेअनुजातभगिनीमातृग्रजानुक्र
माद्धंति द्वितीयेमासियदिदंतोत्पत्तिस्तदाऽनुजातंकनिष्ठभ्रातरंहंति एवंतृतीयेभगिनी चतुर्थेमातरं पंचमेज्येष्ठभ्रातरं षष्ठादिमासेषुअतुलं

पौष्णध्रुवेंदुकरवातहयेषुसूतीस्नानंसमित्रभरवीज्यकुजेषुशस्तं नार्द्रात्रयश्रुतिमघांतकमिश्रमूलत्वाष्ट्रेज्ञसौरिव
सुषड्द्विरिक्ततिथ्यां १२ मासेचेत्प्रथमेभवेत्सदशनोबालोविनश्येत्स्वयंहन्यात्सक्रमतोनुजातभगिनीमा
त्रग्रजान्द्व्यादिके ॥ ६ ॥

भोगंलभते सप्तमेतातात्पितुःसुखं अष्टमेपुष्टतां नवमेलक्ष्मीं दशमेसौख्यं अग्रेपिसुखाधिक्यमेव अथोद्‌इति अथोजनौजन्मकाल
एवसदशनः दंतयुक्तः स्वपित्रादिहास्वमात्मानंपितरंचआदिशब्दान्मातरमपिनाशयतीतिस्वपित्रादिहा वोर्ध्वमिति वाअथवाऊर्ध्वे
ऊर्ध्वेपंक्तौजन्मानंतरंविहितेनिषिद्धेपिकालेसदशनश्चेत्स्यात्तदापिस्वपित्रादिहाआत्मपितृनाशकइति उक्तंचविष्णुधर्मोत्तरे उपरिप्र
थमंयस्यजायंतेचशिशोर्द्विजाः तैर्वासहचयस्यस्यात् जन्मभार्गवसत्तम मातरंपितरंचाथस्वदेहात्मानमेवचेति तत्रैवशांतिरपि गजस्थ
स्थगतंबालंनौस्थंवास्नापयेद्विजः तदभावेतुधर्मज्ञकांचनेतुवरासने सर्वौषधैःसर्वगंधैःबीजैःपुष्पैःफलैस्तथापंचगव्येनरत्नैश्चमृत्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु० टी० कामिश्च भार्गव स्थालीपाकेन धातारं पूजयेत्तदनंतरं सप्ताहं चात्र कर्तव्यं तथा ब्राह्मणभोजनं अष्टमेऽहनि विप्राणां तथा देया च दक्षिणा
स० प्र० कांचनं रजतं गाश्च भुवं वासनमेव चेति १३ अथ दोलाचक्रमनुष्टुभाह दोलेति तत्र बालस्य दोलायां रोहे दोलायां स्थापने अर्के भात् सू
५० र्याक्रांतनक्षत्रात् पंचनक्षत्रैर्नैरुज्यं तदग्रिमपंचनक्षत्रैर्मरणं तदग्निमपंचनक्षत्रैर्देहकार्श्यं कृशत्वं स्यात् तदग्रिमैरिषुभिः पंचनक्ष
त्रैर्व्याधिः रोगः ततः सप्तनक्षत्रैः सौख्यं स्यात् शिशोरेवं फलं संस्कार्यत्वात् उक्तं च सूर्यभाच्चंद्रभं यावत् पंचपंचचतुर्दिशां मध्ये तु सप्त देयानि
दोलिकाचक्रमुत्तमं पूर्वभागे निरोगत्वं दक्षिणे मरणं ध्रुवं पश्चिमे तु कृशो बाल उत्तरे व्याधिसंभवः शेषेषु सप्तधिष्ण्येषु बालकः शयने सु
खीति १४ अथ दोलारोहणमुहूर्तं वसंततिलका पूर्वार्द्धेनोत्तरार्धेन निष्क्रमणमुहूर्तं चाह दंतार्केति दंता द्वात्रिंशत् अर्का द्वादश भूपाः

षष्ठा दोलभने हि भोगमतुलं तातात्सुखं पुष्टतां लक्ष्मीं सौख्यमथो जनैः सदशनो वो ध्वंसं पितादिहा १३ दोलारोहेऽ
र्कें भात्पंच शरपंचेषुसप्तभैः नैरुज्यमरणकार्श्यव्याधिः सौख्यक्रमाच्छिशोः १४ दंतार्कभूपधृतिदिग्भिन्नतो वा
सारेस्याद्वारे शुभे मृदुलघुध्रुवभैः शिशूनां दोलाधिरूढिरथ निष्क्रमणं चतुर्थमासे गमोक्तसमये र्कमितेऽह्नि वा
स्यात् १५ कवीज्यास्ते चैत्राधिमासे न पौषे जलं पूजयेत्सूतिकामासपूर्तौ ॥२ षोडश धृतयोऽष्टादश दिशो दश एतस्मिन्दि

वसे तथा शुभवारे मृदुलघुध्रुवनक्षत्रैरुपलक्षिते बालानां दोलाधिरूढिः दोलायामधिरूढिरारोहः स्यात् अथ चतुर्थमासे गमोक्तसम राम:
ये यात्राप्रकरणोक्तसमीचीनकाले शिशूनां निष्क्रमणाख्यसंस्कारपूर्वकं गृहाद्बहिर्गमनं स्यात् वा अथवा अर्कमितेऽह्नि द्वादशदिवसे ५०
कुर्यात् गृहान्निष्क्रमणं सूनोश्चतुर्थमासि कारयेत् यत्रोक्ते समये मासि तृतीये द्वादशेऽह्नि वेति गुरुवचनात् १५ अथ जलपूजामुहूर्तं
भुजंगप्रयातेनाह कवीज्यास्तेति शुक्रगुर्वोरस्ते चैत्रे अधिमासे पौषमासे समाप्तो सूतिकाप्रसूता स्त्री जलं न पूजयेत् ॥

CC-0. In Public Domain. Digitization by eGangotri

एतद्व्यतिरिक्तकाले तथा बुधचंद्रगुरुवारे रिक्तावर्जिततिथौ हि निश्चितं श्रवणपुष्यपुनर्वसुमृगहस्तमूलअनुराधाश्विनीनक्षत्रैः सहिते दिने जलं पूजयेत् अथ कश्चिद्दुग्धपानमुहूर्तः एकत्रिंशे वासरे वा द्वितीयजन्मर्क्षे वा शुद्धलग्ने नुकूले शंखेनक्षीरं सन्निदध्याच्छिशूनां चके धात्रीपूज्यपूजां विधाय १६ अथान्नप्राशनं सग्धरयाह रिक्तानंदेति अथो निष्क्रमणानंतरमेव विधेकाले बालकानां अन्नप्राशनं सत्शुभं स्यात् तत्रैतान्हित्वा एते वर्ज्याः रिक्तानंदाष्टदर्शाः ४।९।१४।१।६।११।८।३० हरिदिवसं द्वादशी उपलक्षणत्वात्तिथिक्षयं हित्वा शनिभौमरविवारांश्च हित्वा जन्मर्क्षलग्नाष्टमगृहलवं लग्नं च हित्वा जन्मर्क्षे जन्मलग्ने ताभ्यामष्टमलवो ऽष्टमगृहं अष्टमलवोऽष्टमनवांशस्तो गच्छति प्राप्नोति एवं विधलग्नं त्यजेत् इत्यर्थः जन्मराशिविलग्नाभ्यां निधने शं च वर्जयेदिति कश्यपोक्तेः तथा मीनमेषालिके च

बुधेंद्रीज्यवारे विरिक्ते तिथौ हि श्रुतीज्यादितीद्वर्कनैर्ऋत्यमैत्रे १६ रिक्तानंदाष्टदर्शं हरिदिवसमथो सौरिभौमार्कवारान् लग्नं जन्मर्क्षलग्नाष्टमगृहलवगं मीनमेषालिकं च हित्वा षष्ठात्समे मास्यथ हि मृगदृशां पंचमादोजमासे नक्षत्रैः स्यात्स्थिराख्यैः समृदुलघुचरैर्बालकान्नाशनं सत् १७ ॥ अलिर्वृश्चिकः एतानि लग्नानि हित्वा गोश्वकुंभतुलाकन्यासिंहकर्कनृयुग्मकाः शुभदा राशयश्चैते न मीनमेषवृश्चिका इति कश्यपोक्तेः षष्ठादिति षष्ठमासमारभ्य सममासे षष्ठाष्टमदशद्वादशमासेषु बालानामन्नप्राशनं कार्यं पुंबालविषयमेतत् अथानंतरं हि निश्चयेन मृगदृशां कन्यानां पंचमादोजमासे पंचमसप्तमनवमैकादशेषु अन्नप्राशनं तथा च वसिष्ठः युग्मेषु मासेषु च षष्ठमासात्संवत्सरे वा नियतं शिशूनां अयुग्ममासेषु च कन्यकानां नवान्नसंप्राशनमिष्टमेतदिति अत्रानेककालाभिधानेपि सद्गृह्योक्तकालो मुख्यस्तत्र शुक्रास्तादिविचारो नास्ति इतरेषु गौणकालेषु शुक्रास्तविचार आवश्यक एवेति नक्षत्रैरिति मृदुलघुचरसहितैः स्थिरनक्षत्रैः कुर्यात् १७ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु॰ टी॰
सं॰ प्र॰
५१

लग्नबलं वसंततिलकेनाह केंद्रत्रिकोणेति लग्ने रवदशमशुद्धसहिते सर्वग्रहरहिते दशमे इत्यर्थः केंद्रत्रिकोणसहजेषु शुभैः सद्भिः त्रिलाभरिपुगैः पापैः सद्भिः लग्नाष्टषष्ठस्थानरहितं चंद्रं च अन्नप्राशने प्रशस्तं वदंति नारदः दशमे शुद्धिसंयुक्ते शुभलग्ने शुभांशके शुक्लपक्षे च पूर्वाह्णे सौम्ययुक्तनिरीक्षिते त्रिषष्ठलाभगैः पापैः केंद्रधीधर्मगैः शुभैः व्ययान्यारिनिधनस्थेन चंद्रेणप्राशनं शुभं विशेषमाह गुरुः शुक्रा त्राः क्रमाद्याताः सप्तमाष्टमधर्मगाः भोज्यं भोक्तुर्नवत्वे तु सर्वदा मरणप्रदा इति भोज्यमन्नं गोधूमादि तस्य नवत्वेन भक्षणीयत्वे सति भोक्तुरन्नप्राशनकर्तुर्बालस्य नवले सति वा शुक्रः सप्तमः भौमोष्टमः बुधो नवमः एते ग्रहाः मरणप्रदा इत्यर्थः मैत्रेति अनुराधा शततारका स्वाती जन्मनक्षत्राणि केचित् असद्वदंति श्रीपतिना अनुक्तत्वादिति भावः जन्मनक्षत्रनिषेधो गुरुणोक्तः जन्मर्क्षे कर्मनक्षत्रे आधानर्क्षे च वर्ज

केंद्रत्रिकोणसहजेषु शुभैः स्वशुद्धे लग्ने त्रिलाभरिपुगैश्च वदंति पापैः लग्नाष्टषष्ठरहितं शशिनं प्रशस्तं मैत्रांबुपानिलज
नुर्भमसच्च केचित् १८ क्षीणेंदुपूर्णचंद्रेज्यत्तभौमार्कार्किभार्गवैः त्रिकोणव्ययकेंद्राष्टस्थितैरुक्तं फलं ग्रहैः १९

नुभं मसच्च केचित् १८ क्षीणेंदु पूर्णचंद्रेज्य... This line above is the verse; commentary continues: नवान्नभोजनविषयमेतत् नपुंसक...

यत् कर्णवेधं तथा पान क्षुरकर्मान्नभोजनमिति जन्मनक्षत्रान्नस्य भोजनमिति तत्रान्नस्य भोजनमिति युक्त्या वार्षिकनवान्नभोजनविषयमेतत् नपुंसक
नर्बालान्नप्राशनपरं तत्र नारदे नातिप्राशस्त्याभिधानात् तथा च नारदः पट्टबंधनचौलान्नप्राशने चोपनायने शुभदं जन्मनक्षत्रं अशुभं त्वन्यक
र्मणीति १९ अथ ग्रहाणां स्थानवशात्फलान्यनुष्टुप्द्वयेनाह क्षीणेंद्विति त्रिकोणव्ययकेंद्राणि दशमरहितानि ९।५।१२।१।४।७ अष्टौ ८ एषु स्थि एमः
तैः क्षीणेंद्वादिभिः अष्टभिः क्षाशीत्यादि फलं भवति यथा एषु स्थानेषु स्थितः क्षीणचंद्रश्चेत्तदान्नप्राशनकृत् बालो भिक्षाशी दरिद्रः स्यात् पूर्ण ५१
चंद्रश्चेत्तदा ज्योतिष्टोमादियज्ञकृत् गुरुश्चेद्दीर्घजीवी बुधश्चेत् ज्ञानी भौमश्चेत्पित्तरुक् पित्तकृता रोगस्याग्रस्तो पित्तरुक् अर्कश्चेत्कुष्ठी आर्किः
शनिश्चेत् अन्नाभावसंबंधी क्लेशोन्नकृशः वातप्रधानो व्याधिर्वातव्याधिः एतौ विद्यते यस्य सोऽन्नक्लेशवान् वातव्याधिमान्स्यात् राहुकेत्वोरप्येवं
देवफलं शुक्रश्चेद्रोगभाक् स्यात् क्षीणचंद्रपूर्णचंद्रयोर्लक्षणमाह वसिष्ठः संपूर्णेंदुर्भयाष्टम्यामध्येंदुः पूर्णसंज्ञकः विनष्टेंदुर्भयोरष्टम्यामध्ये सो क्षीणसंज्ञक

CC-0. In Public Domain. Digitization by eGangotri

२० अथ भूस्युपवेशनं वसंततिलकेनाह पृथ्वीमिति कुजे विशुद्धे भौमबले सति रिक्तावर्जितेतिथौ पंचममासि व्रजति लग्ने सति शुभैर्दृष्टे शुभग्र
हवारे तथा ध्रुवमृगेज्यानुराधालघुनक्षत्रैरुपलक्षितकाले कटिसूत्रं पट्टसूत्रादिनिर्मितं कटिस्थले बध्वा कोष्ठ पृथिव्यां बालमुपवेशयेत् मं
त्रपाठपुरःसरं उपवेशनाख्यं संस्कारं कुर्यात् मंत्राश्च पद्मपुराणे रक्षैनं वसुधे देवि सदा सर्वगतं शुभे आयुःप्रमाणं सकलं निक्षिप स्व हरि
प्रिये अचिरादायुषस्त्वस्य ये किंचित्परिपंथिनः जीविताराेग्यवित्तेषु निर्दह स्वाचिरेण तान् धारिण्यशेषभूतानां माता त्वमधिका ह्यसि कुमा
रं पाहि मातस्त्वं ब्रह्मा तदनुमन्यतां तस्योपवेशनं कृत्वा भूमौ ब्राह्मणभोजनं ततः कृत्वा ततः कार्यमुत्सवं पूर्ववह्निज इति उत्सवो नीराजना।

पृथ्वीं वराहमभिपूज्य भिक्षाशी यत्र कुरु दीर्घजीवी तानी च पित्तरुक् कुष्ठी चान्नक्लेशवान् व्याधिमान् भोगभागिति २० पृथ्वी वराहमभिपूज्य
कुजे विशुद्धे रिक्ते तिथौ व्रजति पंचममासि बालं बध्वा शुभैर्दृष्टे कटिसूत्रमथ ध्रुवेंदुज्येष्ठक्षेमैत्रलघुभैरुपवेशयेत्कौ
२१ तस्मिन्काले स्थापयेत्तत्पुरस्ताद्वस्त्रं शस्त्रं पुस्तकं लेखनीं च स्वर्णं रौप्यं यच्च गृह्णाति बालस्तैराजीवैस्तस्य वृत्तिः प्रदिष्टा
२२ वारे भौमार्कि हीने ध्रुवमृदुलघुभैर्विष्णुमूलादितीद्रस्वातीवस्वम्बुपैतेमिथुनमृगसुताकुंभगोमीनलग्ने सौम्यैः के
द्रत्रिकोणे रस्तु भगगनगैः शत्रुलाभत्रिसंस्थैस्तांबूलं सार्धमासद्वयमितसमये प्रोक्तमन्नाशने वा २३ ॥ दि इदं कन्यापुत्रयोः साधा

रणं विशेषाभावात् इति भूस्युपवेशनं २१ अथ जीविकापरीक्षां भूस्युपवेशनकाल एव शालिन्याह तस्मिन्काल इति स्पष्टार्थं आजीवैर्जीविका
भिः आजीवो जीविका वार्ता इत्यभिधानात् २२ अथ शिशोस्तांबूलमुहूर्तं स्रग्धरयाह वारे भौमार्कि हीने इति भौमशनिवर्जिते वारे श्रवणमूल
पुनर्वसुज्येष्ठास्वातीधनिष्ठासहितैः ध्रुवमृदुलघुनक्षत्रैरुपलक्षितकाले मिथुनमकरकन्याकुंभवृषमीनानामन्यतमे लग्ने सौम्यग्रहैः केंद्रत्रिकोण
गतैः अशुभगगनगैः पापग्रहैः षष्ठेकादशतृतीयगैः सार्धमासद्वये समये बालकस्य तांबूलदानं प्रोक्तं वा अथवा अन्नाशने अन्नप्राशनसमये प्रोक्तं २३

CC-0. In Public Domain. Digitization by eGangotri

अथकर्णवेधमुहूर्तंस्रग्धरयाह हित्वैनामिति एतान्पदार्थान्हित्वाकर्णवेधःप्रशस्तः इत्यन्वयः हरिशयनंआषाढशुक्लैकादशीकार्तिक
शुक्लैकादशीपर्यंतं जन्ममासंयस्मिन्चांद्रमासेचैत्रादौजन्मसजन्ममासः केचित् आरभ्यजन्मदिवसंयावत्त्रिंशद्दिनंभवेत् जन्ममासःस
विज्ञेयोवर्जितःसर्वकर्मसुइतिलक्षणलक्षितंवर्जयंति रिक्ताः४।९।१४।युग्माब्दसमवर्षंद्वितीयचतुर्थादिकं जन्मताराप्रथमदशमैकोनविं
शात्मिकांचहित्वा ऋत्विति ऋतुमुनिवसुभिःसंमितेमासि षष्ठसप्तमाष्टममासेषु अथोवा जन्माहात्सूर्यैः द्वादशभिःभूपैःषोडशभिःप
रिगणितेदिवसेसौरसावनेबुधगुरुशुक्रचंद्रवारे ओजाब्देविषमवर्षे विष्णुयुग्मश्रवणधनिष्ठे पुनर्वसूमृदूनिमृगरेवतीचित्रानुराधाः
लघूनिहस्ताश्विपुष्याभिजितएतैर्नक्षत्रैःकर्णवेधःप्रशस्तः २४ अथकर्णवेधेलग्नशुद्धिंस्रग्धिण्याह संशुद्धइति मृतिभवनेऽष्टमस्था

हित्वैतांश्चैत्रपौषावमहरिशयनंजन्ममासंचरिक्तायुग्माब्दंजन्मताराम्रृतुमुनिवसुभिःसंमितेमास्यथोवा जन्माहात्सू
र्यभूपैःपरिमितदिवसेज्ञेज्यशुक्रेंदुवारेथोजाब्देविष्णुयुग्मादितिमृदुलघुभैःकर्णवेधःप्रशस्तः २४ संशुद्धेमृति
भवनेत्रिकोणकेंद्रत्र्यायस्थैःशुभखचरैःकवीज्यलग्ने पापाख्यैररिसहजायगेहसंस्थैर्लग्नस्थेत्रिदशगुरौशुभावह

नेसंशुद्धेग्रहरहितेसति शुभग्रहैःत्रिकोणकेंद्रत्र्याय९।५।१।४।७।१०।३।११ स्थैःसद्भिः कवीज्यलग्नेशुक्रगु ऽऽऽहःस्यात् २५॥
वेर्लग्नेवृषतुलाधनुर्मीनाख्ये पापाख्यैःग्रहैः तृतीयषष्ठैकादशस्थानस्थैःगुरौलग्नस्थेसतिकर्णवेधःशुभावहः शुभजनकःस्यात्
अथाब्दपूर्तिमुहूर्तःप्रसंगात् विधिरत्रे अब्देनसौरेणशिशोःसमांतेबालंसुसंस्नाप्यचजन्मधिष्ण्य कृत्वायुषोवृद्धिकरंचकर्मतद्वा
रयेद्वस्त्रसुवर्णसूत्रं तत्रखंडनक्षत्रेगर्गः उदयव्यापिजन्मर्क्षेतस्माद्ग्राह्यतुजन्मतः संगवव्यापिखंडर्क्षेतत्रजन्मकरंशुभं दाक्षिणात्यास्तु
जन्ममासीयजन्मतिथावब्दपूर्तिंकुर्वंतीति २५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ चूडाकर्ममुहूर्तं विवक्षुस्तन्निषेधकं प्रसंगतोऽन्यकर्मनिषेधकं च कालं स्रग्धरयाह गीर्वाणेति गीर्वाणा देवाः अंबु जलं जलाशयः तयोः प्रतिष्ठा उत्सर्गः परिणयो विवाहः दहनाधानमग्न्याधानं गेहप्रवेशो गृहप्रवेशः चौलं राजाभिषेको प्रसिद्धौ व्रतमुपनयनं इदं सर्वं याम्यायने दक्षिणायने शुभदं न स्यात् तथा गुरुशुक्रयोर्बाल्ये अस्ते वार्धक्ये च पूर्वोक्तं न शुभदं स्यात् अथ केतूदये धूमकेतोरुदयेऽपि पूर्वोक्तं न शुभं स्यात् चंडेश्वरः केतोरस्तदिनाद् ध्वंसनाह मंगलं त्यजेत् यावत्केतूदयस्तावदशुद्धः समयो हि सः अत्र केचित्केतूदये जाते सति पक्षं पंचदशदिनानि जहति वर्जयंति वराहः दृष्टः षोडशवासरान्न शुभदः कैश्चित्प्रदृष्टः शिखीति केचित्तु पक्षांतरे अर्धपक्षार्धं सप्तदिनानि केतूदयानंतरं जहति इदमपि तत्रैव केतूदये सप्तदिनानि चोर्ध्वे विहाय यात्रादिषु गर्हितानि दिनानि शेषाणि शुभानि नूनं वदंति रैभ्यप्रमुखा मुनी

गीर्वाणांबुप्रतिष्ठापरिणयदहनाधानगेहप्रवेशाश्चौलं राजाभिषेको व्रतमपि च शुभं नैव याम्यायने स्यात् नो वा बाल्यास्तवार्द्धे सुरगुरुसितयोर्नैव केतूदये स्यात्पक्षं वाद्यं च केचिज्जहति तमपरे यावदीक्षां तदुग्रे २६ पुरः पश्चाद्भृगोर्बाल्यं त्रिदशाहं च वार्धकं ॥ ५५द्राः तमिति अपरे आचार्याः तं केतुं यावद्दीक्षां यावद्दर्शनं यज्जहति तदुग्रे केतोर्द्विनिचूडो जामस्तकीलकादावतिदुष्टफलेद्रष्टव्यं तेषां लक्षणमाह गर्गः त्रिशिखो श्वत्रिनाराश्चरक्तलोहितरश्मयः प्रायशस्तत्र राशांसं च तेनित्यमेव हीतिवयं तु यावद्दर्शनं केतूदये निषिद्धं इत्युक्तं तदुग्रे ब्रह्मपुत्राख्ये केतौ ज्ञेयं ज्योतिर्निबंधे केतोरस्तदिनाद् ध्वंसनराजानि वर्जयेत् ब्रह्मपुत्रोद्गमे वर्ज्यं व्रतयात्रा च मंगलं तल्लक्षणमाह वराहः ब्रह्मसुत एव त्रिशिखो वर्णैस्त्रिभिर्युगांतकराः अनियतदिवसंप्रभवो विज्ञेयो ब्रह्मदंडाख्य इति २६ अथ शुक्रगुर्वोर्बाल्यवार्धक्ययोर्दिनसंख्यामनुष्टुभाह पुरः पश्चादिति भृगोः शुक्रस्य। पुरः पूर्वस्यां दिश्युदितस्य पश्चिमदिश्युदितस्य च यथासंख्यं त्रिदशाहं बालत्वं स्यात् पूर्वस्यां त्रिदिनं पश्चाद्दशदिनमित्यर्थः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च पुनः भृगोर्वार्धकं पूर्वस्यामस्ते पक्षं पंचदश दिनानि पश्चादस्ते पंच दिनानि गुरोः ते बाल्यवार्धके पक्षं पंचदश दिनानि उदाहृते कथिते २७ अथापरमतेन बाल्यवार्धकं चानुष्टुभाह तेदशाहमिति द्विग्रियमंत्यन्का द्वयोर्गुरुशुक्रयोः ते बाल्यवार्धके दशाहं दशदिनं प्रोक्ते कैश्चित् अपरैस्तु सप्तदिनं बाल्यवार्धकं प्रोक्ते अन्यैस्त्र्यहं त्रिदिवसं ते बाल्यवार्धके प्रोक्ते परंतु आत्ययिके कार्ये स्यावश्यंभावः अत्ययः सप्रयोजनमस्येति आत्ययिकं तस्मिन् लग्नांतराभावे सति अतिकालस्य वटोः अवश्यदेयायाः कन्याया वा यथासंभवं दशसप्तत्रिदिनानि वर्ज्यानि नान्यथेत्यर्थः अथ देशभेदेन वा व्यवस्था गर्गः शुक्रो गुरुः प्राक्परतश्च बालो विंध्ये दशा वंतिषु सप्तरात्रं वंगेषु हूणेषु च षट् च पंच शेषेषु देशे त्रिदिनं निषिद्धं चंद्रस्य विशेषमाह अर्धाहमिति विधोस्ते बाल्यवार्धके क्रमेणार्धाहं त्र्यहं च भवतः बाल्यम्।

पक्षं पंचदिनं ते द्वे गुरोः पक्षमुदाहृते २७ ते दशाहं द्वयोः प्रोक्ते कैश्चित्सप्तदिनं परैः त्र्यहं त्वात्ययिकेप्यन्यैरर्धाहं
च त्र्यहं विधोः २८ चूडा वर्षात्तृतीयात्प्रभवति विषमेऽष्टार्करिक्ताद्यषष्ठीपर्वोनाहे विचैत्रोदगयनसमये ज्ञेंदुशुक्रे ॥ज्यकानां ॥ ॥

र्धदिनं वार्धकं त्रिदिनं चंद्रस्येत्यर्थः उक्तं च वसिष्ठेन वृद्धत्वमिंदोस्त्रिदिनं दिनार्द्धं बालत्वमस्तत्वं अहर्द्वयं चापि नोक्तमेकं दिवसं शिशुत्वमित्येतदिंदोस्तदयुक्तमेवेति कश्यपेन बालोपि दुःशुभ एवोक्तः वृद्धचंद्रस्त्रियं हंति पतिं हंत्यस्तमागतः युतस्त्वमृतरश्मित्वाद्बालोपि शुभदः शशीति अत एव संपूर्णायामपि प्रतिपदि द्वितीयादिने द्वितीयायां प्राप्तियंज्ञोपवीतादिकं शिष्टाः कुर्वंति २८ अथ चौलमुहूर्तं स्रग्धरयोद्धताभ्यामाह चूडावर्षादिति क्षीणचंद्रेति तृतीयाद्वर्षादिति ल्यप्लोपे पंचमी तेन गर्भाधानकालाज्जन्मकालाद्वा तृतीये वर्षे पंचमे वा चूडाकरणं प्रभवति कृतं शुभोदर्कं भवतीत्यर्थः तृतीयेब्दे शिशोर्गर्भाज्जन्मतो वा विशेषतः पंचमे सप्तमे वापि स्त्रियाः पुंसोपि वा सममिति मनुना प्रथमे वर्षे अप्युक्तं चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः प्रथमेब्दे तृतीये वा कर्तव्यं।

Nepal Sanskrit University, Balmeeki Campus; Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुतिनोदनादिति अत्र बहुकालोक्तौ यथागृह्यव्यवस्था स्वगृह्यविशेषकालानुक्तौ तु समबलत्वात्सर्वेषां विकल्पः अष्टमी अर्कोद्वादशी
रिक्ताः आद्या प्रतिपत् षष्ठी पर्वाणि पूर्वोक्तानि चतुर्दश्यष्टमीत्यादीनि एतैस्तै रहितैः क्षि गुरुणा गलग्रहोपि निषिद्धः विद्यारंभव्रतोद्देशे
क्षौरं चैव विशेषतः गलग्रहे न कर्तव्यं यदीच्छेत् पुत्रजीवितमिति विचैत्रइति चैत्ररहिते उत्तरायणे चूडा स्यात् शुभाशुभप्रकरणोक्तो जन्ममा
सनिषेधोत्रापि ध्येयः तथाज्ञेंदुशुक्रेज्यकानां वारे लग्नांशयोश्चेति सौम्यग्रहाणां वारे सौम्यग्रहाणां लग्ने तेषामेव नवांशे च चूडा स्यात् पाप
ग्रहाणां वारेपि विप्राणां तु शुभो रविः क्षत्रियाणां तु भूसुतः विट्शूद्राणां शनिः शुभ इति प्रयोगपारिजातोक्तेः तथा स्वभनिधनतनौ मं लग्नं राशि
श्च स्वस्य भे स्वस्वभाभ्यां निधनं अष्टमं लग्नं तन्न विद्यते यस्मिंस्तनौ स्वजन्मलग्नजन्मराशिभ्यामष्टमलग्नरहिते लग्ने चूडा स्यात् तथा नैधने अ
ष्टमस्थाने शुद्धियुक्ते शुक्रव्यतिरिक्तसर्वग्रहरहिते लग्ने चूडा स्यात् अष्टमस्था ग्रहाः सर्वे नेष्टाः शुक्रविवर्जिताः शुक्रस्तु निधने चौले सर्वसंपत्क
रः शिशोरिति पराशरोक्तेः ज्येष्ठायुक्ते रनूराधारहिते मृदुचरलघुभे द्वादशनक्षत्रैः अथ लग्नबल एकादशषष्ठतृतीयस्थानस्थैः पाप
ग्रहैः सद्भिः तथा क्षीणचंद्रभौमशनिसूर्यैः केंद्रगतैः क्रमेण यथासंख्यं मृत्युः शस्त्रान्मृतिः पंगुता खंजत्वं ज्वरः एतानि फलानि स्युः
बुधजीवभार्गवैस्तु केंद्रस्थैः शुभं कल्याणं स्यात् वसिष्ठेन लग्नादिविषये विशेष उक्तः मेषे दुःखी मृगेंद्रे च वृश्चिके व्यसनं भवेत् राजयु
धाच्च धनुषि शुभयुक्ते न दुष्यति विषशस्त्रजले घोरैः पीड्यते मरणान्वितः क्षौरे मृत्यो घटे लग्ने शुभयुक्तेपि सत्तनः जामित्रे भास्करे
क्षौरे मृत्युः स्याद्भूमिजे तथा शुक्रे सौख्यविनाशः स्यान्मंदभाग्यं शनैश्चरे इति नक्षत्रेषु विशेषमाह गुरुः हस्ताश्विविष्णुपौष्णानि श्रवि
ष्ठादित्यपुष्यभं सौम्यचित्रे तथा क्षौरे उत्तमा नव तारकाः त्रीण्युत्तराणि वायव्यं रोहिणी वारुणं तथा क्षौरे षण्मध्यमाः प्रोक्ताः शेषा द्वादश
गर्हिता इति क्षौरादिषु जन्मलग्नं शुभमाह भृगुः कृषिप्रयाणं क्षौरं च विवाहः प्राशनं तथा शिशोर्वस्त्रं च पानं च जन्मराशौ शुभं भवेत् जन्मल
ग्ने शुभं क्षौरं मध्ये वर्ज्यं व्यये ष्टम इति गर्गस्तु आत्मराश्युदये षष्ठे द्वादशे निधने तथा शत्रुक्षेत्रे च नीचे च क्षौरं नैव प्रशस्यते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जन्मलग्नं सति संभवे वर्ज्यमित्यनयोर्व्यवस्था च पुनरिष्टतारया गोचरप्रकरणोक्तया शुभफलदया तारया चूडा स्यात् केशवमानर्त्तपुरं पाटलि
पुत्रं पुरीमहिछत्रं दितिमदितिं च स्मरतां क्षौरविधौ भवति कल्याणमिति २९ ३० अथ सगर्भायां संस्कार्यमातुर्विशेषमनुष्टुभाह पंचमासाधि
केति संस्कार्यमातुर्गर्भे पंचमासेभ्योऽधिके सति चौलं शुभं न स्यात् पंचमासेभ्यः पूर्वं चौलं शुभमित्यर्थः गर्भिण्यां मातुः कुमारस्य न कुर्याच्चौलक
र्म च पंचमासादधः कुर्यादतऊर्ध्वं न कारयेदिति वसिष्ठोक्तेः अस्यापवादमाह पंचवर्षाधिकस्येति उल्लंघितपंचवर्षस्य शिशोर्मातरि गर्भि
ण्यामपि सत्यां पंचमादूर्ध्वमपि चौलमिष्टं नारदः सूनोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत् पंचाब्दात्प्रागतोर्ध्वं तु गर्भिण्यामपि कारयेत् स

वारे लग्नांशयोश्चास्वभनिधनतनौ नैधने शुद्धियुक्ते शाक्रोपेतैर्विमैत्रैर्मृदुचरलघुभैरायषट्त्रिस्थपापैः २९ क्षीणचं
द्रकुजसौरिभास्करैर्मृत्युशस्त्रमृतिपंगुताज्वराः स्युः क्रमेण बुधजीवभार्गवैः केंद्रगैश्च शुभमिष्टतारया ३० पंचमासा
धिके मातुर्गर्भे चौलं शिशोर्नसत् पंचवर्षाधिकस्येष्टं गर्भिण्यामपि मातरि ३१ तारादौष्ट्येऽब्जे त्रिकोणोच्चगे वा क्षौरं सत्स्या
त्सौम्यमित्रस्ववर्गे सौम्ये भेऽब्जे शोभने दुष्टतारा शस्ता ज्ञेया क्षौरयात्रादिकृत्ये ३२ ऋतुमत्याः सूतिकायाः सूनोश्चौलादि नाच
रेत्॥

होपनीत्या कुर्याच्चेत्तदा दोषो न विद्यत इति अत्र तु पंचवर्षाणां न्यूनाधिकभावो नापेक्षितः सर्वापवादकत्वात् ३१ अथ चौले तारा
बलमावश्यकमित्युक्तं तत्र दुष्टतारापवादं शालिन्याह तारादौष्ट्येति दुष्टतारायामपि सत्यां अब्जे चंद्रे त्रिकोणोच्चगे त्रिकोणगे उच्चगे वा सति क्षौरं सत्
शुभं स्यात् वा सौम्यमित्रस्ववर्गे सौम्यानां बुधगुरुशुक्राणां षड्वर्गे चंद्रे सति अथवा स्वस्यैव षड्वर्गे सति क्षौरं सत्स्यात् सौम्येति सौम्ये भे शुभग्रहरा
शौ चंद्रे सति स्वस्य गोचरेण शोभने सति दुष्टतारापि क्षौरयात्रादिकृत्ये शोभना समीचीना ज्ञेया ३२ अथ विशेषमनुष्टुभाह ऋतुमत्या इति ऋतुमत्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रजस्वलायाः तथा सूतिकाया जातापत्यायाश्च सूतोश्चौलोपनयनविवाहादिकृत्यं बालस्य बालिकीश्च वा नाचरेत् नकुर्यात् उक्तं च प्रचेतसा य
स्य मांगलिकं कृत्यं तस्य माता रजस्वला तदा स मृत्युमाप्नोति पंचमं दिवसं विनेति विवाहोत्सवकार्येषु माता चेद्रजस्वला वैधव्यं जायते तत्र नृनार्योः
पाणिपीडने इति ज्येष्ठापत्यस्याद्यगर्भसुतस्य कन्याया वा शुभकृत्यं चौलादिकं ज्येष्ठमासि न भवति केश्चिदिति मार्गशीर्षेपि केश्चिदाचार्यैराद्यग
र्भसुतकन्ययोर्मंगलकृत्यं नेष्यते भरद्वाजः मार्गशीर्षे तथा ज्येष्ठे क्षौरं परिणयं व्रतं आद्यगर्भदुहितुश्च यत्नेन परिवर्जयेदिति ३३ अथ सा
मान्यतः क्षौरमुहूर्तं तन्निषिद्धकालं च शार्दूलविक्रीडितेनाह दंतक्षौरेति चौलोदितेवारनक्षत्रे दंतक्रिया घर्षणादिका क्षौरक्रिया विहिता उ
क्ता निषिद्धकालमाह पातंगीति पतंगस्य सूर्यस्यापत्यं पातंगिः शनिः शनिभौमरविवारान्त्यक्त्वा नवमं घस्रं यद्दिने क्षौरं कृतं ततो नवमदि

ज्येष्ठापत्यस्य न ज्येष्ठे केश्चिन्मार्गेपि नेष्यते ३३ दंतक्षौरनखक्रियात्र विहिता चौलोदिते वारभे पातंग्यारखीन्विहाय नव
मं घस्रं च संध्यां तथा रिक्तां पर्वनिशां निरासनरणग्रामप्रयाणोद्यतस्नाताभ्यक्तकृताशनैर्नहि पुनः कार्या हितप्रेप्सुभिः
३४ ऋतुपाणिपीडमृतिबंधमोक्षणे क्षुरकर्म च द्विजनृपाज्ञया चरेत् ॥

ने पुनः क्षौरं न कार्यं तथा संध्यां प्रातः सायंकाले विहा
य तथा रिक्ताः पर्वाणि पूर्वोक्तानि निशां रात्रिं च विहाय अथाधिकारिणः हितप्रेप्सुभिः स्वशुभमिच्छद्भिः एतादृशैर्हि निश्चयेन क्षौरक्रिया न
कार्या कैर्निरासनैः आसनरहितैः रणः संग्रामः ग्रामप्रयाणमर्थयात्रा एतदर्थमुद्यतः कृतोद्योगैः स्नातैः कृतस्नानैः अभ्यक्तैः कृततैलाभ्यं
गैः कृताशनैः कृतभोजनैः सुवर्णाद्यलंकारभूषितैरित्यपि ध्येयं ३४ अथ मंजुभाषण्या विशेषमाह ऋतुपाणिपीडेति ऋतौ यज्ञे तथा पाणिपी
डो विवाहस्तत्र श्मश्रुकर्मादौ मृतौ मातापित्रोर्मरणे बंधमोक्षणे कारागृहे बंधस्य मोक्षणे द्विजाज्ञया ब्राह्मणाज्ञया बंधमोक्षणे राजाज्ञया दुष्टे
पि वारनक्षत्रादौ क्षौरं चरेत् कुर्यात् अन्यच्च गंगायां भास्करक्षेत्रे मातापित्रोर्मृतेहनि आधाने सोमपाने च षट्सु क्षौरं विधीयते अन्यच्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

राजकार्येनियुक्तानांनटानांरूपजीविनां श्मश्रुरोमनखच्छेदेनास्तिकालविशोधनमिति अथशवेति गर्भिणीगर्भेवृत्तौतस्याःभर्ताशववा
हेमृतकवहनं तीर्थगमंतीर्थयात्रा उपलक्षणत्वाद्विदेशगमनमपि सिंधुमज्जनंसमुद्रस्नानं क्षौरंएतानिकर्माणिनाचरेत्नकुर्यात्
उक्तंच सिंधुस्नानंद्रुमच्छेदंवपनंप्रेतवाहनं विदेशगमनंचैवनकुर्याद्गर्भिणीपतिः राजायोगीपुरंध्रीचमातापित्रोस्तुजीवतोः मुंडनं
सर्वतीर्थेषुनकुर्याद्गर्भिणीपतिः नारदः वपनंमैथुनंतीर्थंवर्जयेद्गर्भिणीपतिः श्राद्धंचसप्तमान्मासादूर्ध्वेचान्यत्रवेदवित् ३५ अथराज्ञां
क्षौरेविशेषंसर्वथावर्ज्यनक्षत्राणिचभुजंगप्रयातेनाह नृपाणामिति नृपाणांपंचमेपंचमेदिनेक्षौरंनक्षत्रेश्मश्रुकर्महितंस्यात् पंचमे
दिनेयदिक्षौरनक्षत्राभावस्तदर्थमाह अस्योदयेवेति अथवाऽस्यक्षौरभस्यउदयेश्मश्रुकर्मकार्यं उदयशब्देनतन्नक्षत्रस्यस्वामि।
नोमुहूर्तः तथाचगर्गः क्षौरकर्ममहीशानांपंचमेपंचमेहनि कर्तव्यंक्षौरनक्षत्रेप्यथवातन्मुहूर्तके इति उत्पलेनतुवराहपद्यव्याख्या

शववाहतीर्थगमसिंधुमज्जनक्षुरमाचरेन्नखलुगर्भिणीपतिः ३५ नृपाणांहितंक्षौरभेश्मश्रुकर्मदिनेपंच
॥मेपंचमेस्योदयेवा॥

नावसरेअस्यउदयेअस्यक्षौरभस्यउदयेलग्नेइतिव्याख्यातं यथा मेषलग्नंत्रिंशत्भागात्मकंतत्राद्या
स्त्रयोदशभागाविंशतिकलाधिकायावताकालेनमेषलग्नेउदयंयांतितावदश्विनीनक्षत्रमुदयंयातीति तदनंतरंयावंतएवांशायाव
ताकालेनोदयंयांतितावद्भरण्युदयइत्यनेनन्यायेनसर्वेषांनक्षत्राणामुदयात्तयाः भ्रांतरस्तु एवंव्याकुर्यात् यस्मिन्कालेअश्विन्याउ
दयंक्षितिजसंबंधःसंपद्यतेतत्समयमारभ्ययावद्भरण्याउदयक्षितिजसंबंधःतदंतरेयावान्कालःसोश्विन्याउदयउच्यते एवंतत्सूदय
लग्नद्वयांशांतरालात्गणितमार्गेणयावानिष्टकालआगच्छेत्सएवतन्नक्षत्रोदयइतिनिष्कृष्टोर्थः षडग्निरिति अग्निः कृत्तिकाक्षौरा
वृत्त्याषड्वारंकृत्तिकायस्यसः एवंत्रीणिमैत्रः अनूराधायस्य अष्टौकःरोहिण्यायस्य पंचपित्र्याणिमघायस्य अब्धयश्चत्वारःअर्यमा

CC-0. In Public Domain. Digitization by eGangotri

णउत्तराफाल्गुनीयस्यसएतादृशात्सौरकृद्वत्सरतोवर्षानंतरंमृत्युंमरणमेतिप्राप्नोति वसिष्ठः अष्टाजर्क्षः पितृपंचकश्चषड्वह्निधिष्ण्याश्चतु
र्यमर्क्षैः त्रिमैत्रभः पञ्चजः संनिभोपिसौरीनरोब्दान्निधनंगतःस्यादिति सौरं ३६ अथप्राप्तकालत्वादक्षरारंभमुहूर्तंप्रपंचामरच्छंदसाह
गणेशेति गणेशविष्णुप्रसिद्धौ वाक्सरस्वती रमालक्ष्मीः एतादेवताःप्रपूज्यपंचमेवर्षेसति शिवएकादशीद्वादशीदशमीद्वितीयाष
ष्ठीपंचमीतृतीयाआसामन्यतमतिथौ रवावुदक्उत्तरायणगतेसति तथालघुनक्षत्राणिहस्ताश्विपुष्यःश्रवणस्वातीरेवतीपुनर्वसुः इं
द्राआर्द्रातक्षचित्रा मित्रमनूराधाएषामन्यतमनक्षत्रेसति तथासतांसोमसुगुरुशुक्राणांदिनेदिवसे तथाचराशयोमेषकर्कतुलामकरा
स्तद्रहितशुभस्वामिकेवृषमिथुनकन्याधनुर्मीनानामन्यतमेलग्नेसतिशिशोर्लिपिग्रहोनूतनाक्षरलिखनारंभः कार्यः ३७ अथवि

षड्ग्निस्त्रिमैत्रोऽर्कः पंचपित्र्योऽब्दतोऽर्यमा सौरकृन्मृत्युमेति ३६ गणेशविष्णुवाग्रमाः प्रपूज्यपंचमाब्दके
तिथौशिवार्कदिक्द्विषट्शरत्रिकेरवावुदक् लघुश्रवोनिलांत्यभादितीशतक्षमित्रभेचरोनसत्तनौशिशोर्लिपिग्रहः
सतांदिने ३७ मृगात्कराच्छ्रुतेस्त्रयेश्विमूलपूर्विकात्रयेगुरुद्वयेर्कजीवविज्ञितेत्क्विषट्शरत्रिके शिवार्कदिक्
द्विकेतिथौध्रुवांत्यमित्रभेपरैः शुभैरधीतिरुत्तमा त्रिकोणकेंद्रगैः स्मृता ३८ ऽऽविद्यारंभमुहूर्तंप्रपंचामरेणाह मृगादिति मृगा

त्त्रयेमृगार्द्रापुनर्वसुषु हस्तात्त्रयेहस्तचित्रास्वातीषु श्रुतेःश्रवणात्त्रयेश्रवणधनिष्ठाशततभेषु अश्विन्यां मूलेपूर्वात्रयेगुरुद्वयेपुष्या
श्लेषयोः तथासूर्यगुरुबुधशुक्राणांदिने तथाषष्ठीपंचम्यादिसप्ततिथिषु शुभेकेंद्रत्रिकोणगैःसद्भिः अधीतिः शुभास्मृता अधीतिर
ध्ययनं परैः ध्रुवांत्यमित्रभेअधीतिःशुभाःप्रोक्ता इदंवचनंविद्याविषयमितिदीपिकोक्तेः विद्यारंभेश्रवणत्रयोपादानमहेश्वरादिम
तात् वसिष्ठादिभिःश्रवणस्यकेवलस्यान्नोक्तत्वात् इतिविद्यारंभः ३८ ॥ ३८ ॥ ३८ ॥ ३८ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथव्रतबंधइति विंशतिपद्यैः प्रोच्यतेइतिशेषः तस्यत्रिविधोपिकालो नित्यः काम्योगौणश्चक्रमेणतं शार्दूलविक्रीडितेनाह विप्राणामि
ति गर्भदिनमारभ्याष्टमेसौरे वर्षेऽथवाजनेरुत्पत्तिदिनात्सौरवर्षेष्टमेसति विप्राणांव्रतबंधनंनित्यंनिगदितं अथकाम्यंविप्राणामेवगर्भो
ज्जनेर्वापंचमेवर्षेकार्यं एवंक्षितिभुजांक्षत्रियाणांगर्भोज्जनेर्वाषष्ठेकाम्यं गर्भोज्जनेर्वाएकादशेसौरवर्षेनित्यंवैश्यानांपुनस्तथैवाष्टमेका
म्यं तथैवगर्भोज्जनेर्वाद्वादशेनित्यं नारदः आधानादष्टमेवर्षेगर्भतोवाग्रजन्मनां राज्ञामेकादशेमौंजीबंधनंद्वादशेविशामिति अत्रफ
लश्रवणान्नित्यमित्यवसीयतेमनुः ब्रह्मवर्चसकामस्यकार्यंविप्रस्यपंचमे राज्ञोबलार्थिनःषष्ठेवैश्यस्यार्थार्थिनोष्टमे अत्रफलश्रवणा
त्काम्यतापैठीनसिनागर्भपंचमेव्रतबंधनमुक्तं गर्भपंचमेब्राह्मणमुपनयेदिति गर्भषष्ठेऽष्टमेचक्षत्रियविशोर्ज्ञेयः गर्भादिःसंख्यावर्षा

विप्राणांव्रतबंधनंनिगदितंगर्भोज्जनेर्वाष्टमेवर्षेवाप्यथपंचमेक्षितिभुजांषष्ठेतथैकादशे वैश्यानांपुनरष्टमेप्य
थपुनःस्याद्द्वादशेवत्सरेकालेथद्विगुणेगतेनिगदितेगौणंतदाहुर्बुधाः ३९ ॥

॥णामितिस्मृतेश्च आपस्तंबसूत्रे गर्भा
ष्टमेषुब्राह्मणमुपनयेद्गर्भैकादशेषुवैश्यमितिबहुत्वान्यथानुपपत्यागर्भषष्ठसप्तमाष्टमेष्वितिवृत्तिकृद्व्याख्यानात्त्रयाणामपिनित्यकाल
ता एवंगर्भैकादशेष्वित्यादावपिव्याख्येयं एतंच्चतच्छाखाध्यायिविषयंज्ञेयं अथगौणकालउच्यते निगदितेप्रोक्तेगर्भोज्जनेर्वाष्टमेइ
त्यादिकेकालेतस्मिन्द्विगुणितेसतितद्व्रतबंधनंगौणमाहुः यथा ब्राह्मणस्यषोडशवर्षपर्यंतं क्षत्रियस्यद्वाविंशतिवर्षपर्यंतं वैश्यस्यचतु
र्विंशतिवर्षपर्यंतंगौणमित्यर्थः मनुः आषोडशाद्ब्राह्मणस्यसावित्रीनाभिवर्तते आद्वाविंशात्क्षत्रबंधोराचतुर्विंशतिर्विशः अतऊर्ध्वं
त्रयोप्येतेयथाकालमसंस्कृताः सावित्रीपतिताव्रात्याभवंत्यपिचगर्हिताइतिकेशवः स्वस्वमौंजीमुख्यकालेश्रेष्ठमध्याधमाःसमाः
तिस्रःकेशवदेवज्ञैःप्रोक्तामौंजीनिबंधनेइति ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथव्रतबंधेनक्षत्रादिकंवसंततिलकेनाह क्षिप्रेति गीर्वाणांबुप्रतिष्ठेत्यादिना दक्षिणायननिषेधादुत्तरायणमासषट्कं प्रशस्तमितिमासानामुक्तत्वान्नक्षत्रादिकमेवोक्तं तत्रकाश्यपः ऋतौवसंतेविप्राणांग्रीष्मेराज्ञांशरद्यथा विशांमुख्यंचसर्वेषांद्विजानांचोपनायनं साधारणंचमासेषुमाघादिषुचपंचसु क्षिप्रेति क्षिप्राणिहस्ताश्विपुष्याः ध्रुवाणिरोहिण्युत्तरात्रयं अहिराश्लेषा चराणिश्रवणधनिष्ठाशततारापुनर्वसुस्वात्यः मूल मृदूनिमृगरेवतीचित्रानुराधाः तिस्रः पूर्वारौद्रमार्द्रायां एषुद्वाविंशतिभेषुव्रतबंधनंसत् उक्तंच प्राजापत्यादिषड्क्षेभगर्क्षादिषुपंचसु मूलादिदशकेचैवसप्तमेव्रतबंधनमिति अर्थाद्भरणीकृत्तिकामघाविशाखाज्येष्ठासुनकार्यमित्यर्थः एतानिसर्वशाखानक्षत्रमेलकाभिप्रायेणोक्तानि क्वचित्ज्येष्ठाशततारापिगृहीता श्रीपतिनिबंधे अश्विनीमृगचित्रासुहस्तेस्वात्यांचशाक्रभे पुष्येचपूर्वफल्गुन्यांश्रवणेपौष्णभेतथा वासवेशततारासुव्रतबंधः प्रशस्यते भुजबलराजमार्तंडयोरपि हस्तत्रयेदेत्यरिपुत्रयेचशाक्रेंदुपुष्याश्विनिरेवतीषिति हस्तेशक्राश्विचित्रादितिवसुवरुणापेंद्रपु

क्षिप्रध्रुवाहिचरमूलमृदुत्रिपूर्वारौद्रेऽर्कविद्गुरुसितेंदुदिनेव्रतंसत् द्वित्रीषुरुद्ररविदिक्प्रमितेतिथौचकृष्णादिमत्रिलवकेपिऽऽनचापराह्णे ४०

ष्येंदुपौष्णस्वातीष्वव्याहतासुसप्तसूपनयनंभार्गवाद्यैर्मुनीद्रैरितिच अर्केति सूर्यबुधगुरुशुक्रचंद्रदिवसेषुव्रतंसत् अर्थाद्भौमशनीनिषिद्धौ नारदः आचार्यसौम्यकाव्यानांवाराः शस्ताशशीनयोः वारौतौमध्यफलदावितरौनिंदितौव्रते तत्राप्यस्तंगतेबुधस्यवारोवर्ज्यः अस्तंगतस्यसौम्यस्यवारोवर्ज्योद्विजन्मनीतिनारदोक्तेः द्वित्रीषिति द्वितीयातृतीयापंचम्येकादशीद्वादशीदशमीसंज्ञासुतिथिषुचव्रतंसत्स्यात् नारदेनसप्तमीत्रयोदश्याः प्राशस्त्यमुक्तंतद्वसंताभिप्रायेणज्ञेयं उक्तंचतत्रैव विनत्तुनावसंतेनकृष्णपक्षेगलग्रहे अपराह्णेचोपनीतः पुनः संस्कारमर्हतीति कृष्णादिमिति विहितमासानांकृष्णपक्षस्यादिमत्रिलवकेपंचमीपर्यंतंव्रतंसत् त्यक्त्वाचतुर्थीमपिकृष्णपक्षेत्वाद्यत्रिभागेषुभदंव्रतंस्यादितिवसिष्ठोक्तेः नचेति त्रिधाविभक्तदिनस्यत्रयोविभागाः क्रमेणपूर्वाह्णमध्याह्नापराह्णाःसंज्ञकाभवंति तत्रापराह्णभागेव्रतंनसत् अपराह्णेचोपनीतः पुनः संस्कारमर्हतीतिनारदोक्तेः त्रिधाविभज्यदिवसंतत्रादौकर्मदैविकं द्वितीयेमानुषंकार्यंतृतीयेंऽशेतुपैतृकमितिनारदोक्तेः ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथव्रतबंधेसामान्यतोलग्नभंगयोगंप्रमाणिकयाह कवीज्येति ऋनौषष्ठेमृत्तावष्टमस्थानेचेच्छुक्रगुरुचंद्रलग्नस्वामिनोभवंतितदात्र्अधमा
मरणकारकाः अत्र भार्गवोचंद्रशुक्रोव्ययेत्र्अधमौ खलाः पापग्रहाः लग्नाष्टमपंचमस्थानेषुस्थिताः अधमाः ४१ अथसामान्यतोल
ग्नमुत्तुष्टभाह व्रतबंधइति शुभग्रहाः अष्टमषष्ठद्वादशस्थानस्थिता श्चेत्तुर्नशोभनाः अन्यस्थानेव्रतबंधेशोभनाः खलाःपापाःतृती
यषष्ठैकादशस्थानेषुशोभनाःस्युः गोककेंति पूर्णःशुक्लपक्षीयोविधुः वृषभस्थःकर्कस्थश्चतनौयदिभवेत्तदासत्तशोभनः नान्यथा गुरुः
चंद्रेलग्नेभिशस्तःस्यात्क्षयरोगीसितेतरे शुक्ल पक्षेभवेद्यज्वास्वभेतुगोविशेषतइति वक्ष्यपक्षेस्वस्थचंद्रसदाएवन्यथे धत्त वर्धमानोपिवाप्
णश्चंद्रोयदिविलग्नगः निःस्वंकरोतिव्रतिनलग्नगःक्षयरोगिणमिति उच्चस्थसंबंधिनोःपक्षयोर्देशाचारतोव्यवस्था स्वगृहगस्तुउत्तममत।

कवीज्यचंद्रलग्नपारिपोमृतौव्रतेधमाः व्ययेब्जभार्गवौतथातनौमृतौसुतेखलाः ४१ व्रतबंधेष्टषट्रिःफवर्जिताः
शोभनाःशुभाः त्रिषडायेखलाःपूर्णोगोककेस्थोविधुस्तनौ ४२ विप्राधीशोभार्गवेज्यौकुजार्कौराजन्यानामोषधी
शोविशांच शूद्राणांत्रश्चांत्यजानांशनिःस्याच्छाखेशास्तुजीवशुक्रारसौम्याः ४३ शाखेशवारतनुवीर्यमतीवशस्तं
शाखेशसूर्यशशिजीवबलेव्रतंसत्॥ ४४ द्वये ४२ अथवर्णेशशाखेशान् शालिन्याह विप्राधीशाविति शुक्रबृहस्पती ब्राह्मणा।
धीशौ. भौमसूर्यौक्षत्रियाणांस्वामिनौ ओषधीशश्चंद्रोवैश्यानांस्वामी बुधःशूद्राणांस्वामी शनिरंत्यजानांचांडालानांस्वामी ऋग्वेदोथय।
जुर्वेदःसामवेदोह्यथर्वणइतिवेदक्रमाज्जीवशुक्रारसौम्याःशाखेशाः स्युः ऋग्वेदस्यगुरुः यजुषःशुक्रः साम्नोभौमः अथर्वणोबुधः।
स्वामी ४३ वर्णेशशाखेशयोःप्रयोजनंवसंततिलकेनाह शाखेशेति यःस्वशाखाधिपस्तस्यवारस्तनुर्लग्नंच वीर्यबलंगोचरप्रकारेणस्व
गृहाद्यवस्थितत्वेनवाबलवत्वचव्रतबंधे ऽतीवशस्तं यथागुरुः ऋग्वेदिनामीशोऽतोगुरुवारेगुरुलग्नेधनुर्मीनाख्येगुरुबलेचसतिउपनयनम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीवशुभं एवंसर्वत्रत्तेयं नारदः शाखाधिपतिवारश्चशाखाधिपबलंशिशोः शाखाधिपतिलग्नंचत्रितयंदुर्लभंव्रते शाखेति शाखावेद
स्तस्येशः स्वोक्तेः जीवेइति जीवेभृगौचकाराच्छाखेशेवर्णेशेवा विजितेयुद्धे परा जितेनीचराशिस्थेचसतिव्रतेनानुष्ठितेनसतावेदशास्त्रविधि
नावेदाध्ययनविधिर्नित्यनैमित्तिकश्रौतस्मार्तकर्मानुष्ठानाख्यस्तेषांसमाहारद्वंद्वस्तेनरहितोव्रतीस्यात् वसिष्ठः शाखेशगुरुशुक्राणांमौढ्ये
बाल्येचवार्धके नैवोपनयनंकार्यंवर्णेशेदुर्बलेसतीति तेनभौमबुधयोस्तेसामगाथर्वणशाखिनोरुपनयनादिनभवतीतितत्त्व तत्र नीचा
द्यवस्थितत्वेपिशाखेशः परिहारमाहवसिष्ठः शत्रुनीचाधिशत्रुस्थेस्वांशेवास्वोच्चभागगे शाखेशेवागुरौशुक्रेननीचफलमश्नुतइति शुक्रस्य
शत्रुराशिस्थत्वंवृषभस्थेर्केकदाचित्संभवति नीचगत्वंशरदिवैश्यमुपनयेदितिवैश्योपनयनंसंभवतीतिध्येयं ४४ अथजन्ममासादेः प्र
तिप्रसवमाह जन्मर्क्षेति जन्मनक्षत्रेजन्ममासेजन्मलग्नेआदिशब्देनजन्मतिथौविप्राणां ब्राह्मणानांआद्यगर्भेपिअपिशब्दात् द्वितीय

जीवेभृगौरिपुगृहेविजितेचनीचेस्याद्वेदशास्त्रविधिनारहितोव्रतेन ४४ जन्मर्क्षमासलग्नादौव्रतेविद्याधिकोव्रती
आद्यगर्भेपिविप्राणांक्षत्रादीनामनादिमे ४५ गर्भादावपिव्रतीबालोव्रतेयज्ञोपवीतेविद्याधिकः स्यात् क्षत्रादीनांक्षत्रियवै

श्यानांपुनरनादिमेद्वितीयगर्भादिबालकेसतिजन्मर्क्षमासलग्नादौविद्याधिकोव्रतीस्यात् आद्यगर्भेतुतेषांसर्वथानिषेधएव शौनकः
जन्मोदयेजन्मसुतारकासुमासेतथाजन्मतिथौचराशौ व्रतेनविप्रोत्स्यपरिश्रुतोपिप्राप्तोविशेषःप्रथितःपृथिव्यां गर्भाष्टमेगर्भपराशरा
द्यैः फलंयदुक्तंव्रतबंधनेतु ततोधिकजन्मसुतारकासुमासेथवाजन्मनिवाडवानां विप्रमुदेववाडवाइत्यभिधानात् प्रथमदर्शमेको
नविंशनक्षत्राणांग्रहणार्थंजन्मसुतारकास्वित्युक्तं जन्ममासनिषेधस्तु आद्यगर्भविषयःक्षत्रियवैश्ययोः विप्राणांतुवाडवानामितिवि
शेषोक्तेराद्यगर्भानाद्यगर्भसाधारणंजन्ममासेउपनयनं जन्ममासादौशस्तमितित्तेयं ४५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ गुरुबलमनुष्टुभाह बटुकन्येति बटुरुपनयनाधिकारी तथा कन्या स्त्रीजातिः एतज्जन्मराशेर्नवपंचमैकादशद्वितीयसप्तमस्थानस्थितो गुरुः श्रे
ष्ठ उत्तमः दशषट्तृतीयप्रथमस्थानस्थितो गुरुः पूजया पूजाविधानेनानुष्ठितेन श्रेष्ठः अन्यत्र चतुर्थाष्टमद्वादशस्थानस्थो निंद्यो निषिद्ध इत्यर्थः
नारदः बालस्य बलहीनोपि शांत्या जीवो बलप्रदः यथोक्तवत्सरे कार्यमनुक्तेनोपनायने वसिष्ठः उक्तेपि वर्षे न गुरुर्बली चेत् शांत्या प्रशस्तं व्रतबंध
कर्म अनुक्तवर्षे सुबलप्रदोपि नैवेतयोरब्दबलं गरीय इति गर्गः व्रतबंधे विवाहे च प्रतिष्ठायां विशेषतः गोचरेणैव कर्तव्यं वेधादिकमकारणमि
ति वेधस्तु व्ययेपक्षैः त्रिगोशैलैः खगेनंदैः सुखेशरैः रंध्रेरुद्रैः ग्रहैर्विद्धो गुरुः शुद्धोशुभोन्यथा प्राच्यास्तु गोचरबलाभावे अष्टकवर्गबलमाहुः राज
मार्तंडः अष्टवर्गविशुद्धेषु गुरुशीतांशुभानुषु व्रतोद्वाहौ तु कर्तव्यौ गोचरेण कदाचनेति अन्यच्च अष्टकवर्गेण ये शुद्धास्ते शुद्धाः सर्वकर्मसु सूक्ष्मा
ष्टवर्गसंशुद्धिः स्थूला शुद्धिस्तु गोचरे तत्र गुरोरष्टवर्गो बृहज्जातके दिक्स्वाद्याष्टमदायबंधुषु कुजात्स्वात्सत्रिके चांगिरः सूर्यात्त्रिनवेषु धीस्व

बटुकन्याजन्मराशेस्त्रिकोणायद्विसप्तगः श्रेष्ठो गुरुः खषट्त्र्याद्ये पूजयान्यत्र निंदितः ४६ स्वोच्चे स्वभे स्वमैत्रे वा स्वांशे
ऽवर्गोत्तमे गुरुः ॥ ८

नवदिग्लाभारिगो भार्गवात् जायायार्थनवात्मजेषु हिमगो मंदात्त्रिषड्धीव्यये दिग्धीषट्स्वसुखायपूर्वेनवगोज्ञात्त
स्मरेष्वद्यात् वराहः पूजाभिलाषं प्रति निस्पृहेपि कुर्याद्गुरोः शुद्धिविवर्जितेपि वरस्य लाभेशुभदं विवाहं वदंति गर्गच्यवनादिमुख्याः अत्र चतुर्था
ष्टमद्वादशस्थानस्थितत्वेन गुरोर्द्विगुणत्रिगुणादिका पूजां विधाय विवाहव्रतबंधादि शुभमिति संप्रदायविदः ४६ अथ गुरुदोषस्यापवादमनु
ष्टुभाह स्वोच्च इति गुरुश्चतुर्थादिनिंद्यस्थानस्थितोपि स्वोच्चे कर्के स्वभे धनुर्मीने स्वमैत्रे मेषसिंहवृश्चिके स्वांशे धनुर्मीननवांशे वर्गोत्तमे नवांशे
यथा वृषराशौ वृषनवांशे गुरुर्वर्गोत्तम इति वर्गोत्तमलक्षणं वर्गोत्तमानवांशाश्चरादिषु प्रथममध्यांता इति एषु स्थितो गुरुः इष्टशुभफलदाता
अन्येषु एतादृशो गुरुः अतीव शुभः भुजबलः वर्गोत्तमे स्वभवने भवनेथ मैत्रे मित्रांशके स्वभवनोच्चनवांशके वा जन्माष्टरिःफरिपुखत्रिचतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थगोपिजीवः सुखार्थसुखवृद्धिकरो विवाहे नीचेति नीचं मकरः अरिस्थाः मिथुनकन्यातुलावृषराशिस्थः शुभोप्यसन् अनिष्टफलदानेत्यर्थः उक्तंच उच्चस्थः स्वगृहे सुहृद्भवनगो वाचस्पतिर्नित्यशः पूर्णायुर्विविधार्थसौख्यजनको जन्माष्टमस्थोपि चेत् नीचस्थोरिगृहे दिवाकरकरच्छायानुगामी सदापीष्टोऽनिष्टफलं ददाति नियतं वैधव्यदुःखास्पदं अत्राष्टमस्थोपि चेदित्यपिशब्देन चाष्टमं लक्षगुणप्रपूजयेदिति विधानात्पूजामनीहमानेप्युपनयनादिशुभंस्यात् द्वादशचतुर्थस्थानेष्वपि तु द्विगुणपूजामिच्छतः तथा तृतीयादिस्थानस्य पूजामात्रापेक्षस्य गुरोः शुभफलदातृतास्तीति किं वक्तव्यमिति केशुक्तिकन्याय सूचनार्थोपिशब्दः नचाष्टमं लक्षगुणंपूजयेदिति शम्भुगृहस्थितगुर्वभिप्रायं अस्यापवादो रत्नकोशे गोचराष्टकवर्गाभ्यां यस्य शुद्धिर्न लभ्यते तस्योपनयनं कार्यं चैत्रेमीनगते रवौ हरौ सिंहांशगे जीवे नीचक्षे नीचभागगे मौञ्जीबंधः शुभः प्रोक्तश्चैत्रेमीनगते रवौ पाठांतरं जन्मभाद्दृष्टगे सिंहे नीचेवाशत्रुगे गुरौ विति अर्थाच्चैत्रे मेषगे कोनिषिद्धः तथाचोक्तं सौम्यायनेव्रतं कार्यं चैत्रमासि विशेषतः झषेन निंद्यो यदि फा।

रिःफाष्टतुर्यगोपीष्टो नीचारिस्थः शुभोप्यसन् ४७ कृष्णे प्रदोषेऽनध्याये शनौ निश्यपराह्णके ॥ ॥

ल्गुने स्याद्झषस्तु वैशाखगतो न निंद्यः मध्याश्रितौ द्वावपि वर्जनीयावित्यादिवाचामपि मेषयुक्तिरिति दृग्गणेशदैवज्ञैरभ्याधायि तन्नाभिर्मूलमिव प्रतिभाति मूलवाक्याभावात् ४७ अथव्रतबंधे वर्ज्यानन्तुष्टुभाह कृष्णेइति एषुव्रतबंधो नेष्टः कृष्णे प्रथमत्रिभागरहिते कृष्णपक्षे प्रदोषे यस्मिन्दिने संध्याकाले प्रदोषो भवेत्तद्दिवसे प्रदोषलक्षणमर्कतर्केत्याद्यग्रेवक्ष्यति अनध्याये वक्ष्यमाणे निशीति अंगवंगकलिंगेषु सौराष्ट्रमगधेषु च तीर्थयात्रां विना गच्छन्पुनः संस्कारमर्हतीति पुनः संस्कारप्राप्तौ निमित्तानंतरमेव नैमित्तिकमिति न्यायेन यदि रात्रिसद्भावस्तदोपनयनं मा भूदिति रात्रिपदोक्तिः तथा प्राक्संध्या प्रातः संध्या तस्यां गर्जिते मेघशब्दे वसिष्ठः व्रतेहि पूर्वसंध्यायां वारिदो यदि गर्जति तद्दिने स्यादनध्यायं व्रतं तत्र विवर्जयेदिति अपरार्कः क्षीणचंद्रे कृष्णे शुक्रे निरंशे चैव भास्करे कर्तव्यं नोपनयनं नानध्याये गलग्रहे राशेः प्रथमभागस्थो निरंशः सूर्य उच्यते तथा गलग्रहे गलग्रहानाह ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गुरुः त्रयोदश्यादि चत्वारि सप्तम्यादिदिनत्रयं चतुर्थी चेकतः प्रोक्ता अष्टावेते गलग्रहः देवज्ञमनोहरे प्रदोषे निश्यनध्याये मंदे क्रूरे गलग्रहे मधुं वि
नोपनीतस्तु पुनः संस्कारमर्हति गलग्रहे प्रदोषे च स्वल्पायुरुपजायते इति च ४८ अथांशफलमनुष्टुभाह क्रूरांशे जड इति षट्कर्माणि यजनं याजनं चै
व तथा दानप्रतिग्रहौ अध्यापनं चाध्ययनं षट्कर्मा धर्मभाक् द्विज इति अन्यत्स्पष्टं ४९ अथ चंद्रनवांशफलं स्वनवांशे सापवादं तज्ज्योलगुरुव
द्मोटनकमिति लक्षणलक्षितेन मोटनकछंदसाह विद्यानिरत इति यस्मिन्कस्मिन्राशौ चंद्रो यदि शुभग्रहराशिनवांशे चेत्तदा व्रती विद्यानिरतो भ
वेत् यदि पापग्रहराशिनवांशे चंद्रस्तदा दरिद्र नरः धनरहितः यदि स्वलवे कर्कांशे स्यात्तदा बहुदुःखसहितो भवेत् अथ स्वांशगतचंद्रस्यापवादमाह क

प्राक्संध्यागर्जिते नेष्टो व्रतबंधो गलग्रहे ४८ क्रूरांशे जडो भवेत्पापः पटुः षट्कर्मकृत्तु बटुः यथार्थभाक्तथा मूर्खोऽर्ख्याद्यं
शे तनौ क्रमात् ४९ विद्यानिरतः शुभराशिलवे पापांशलवे हि दरिद्रतरः चंद्रे स्वलवे बहुदुःखयुतः कर्णादितिभे धनवा
न्स्वलवे ५० राजसेवी वैश्यवृत्तिः शस्त्रवृत्तिश्च पाठकः प्राज्ञोऽर्थवान्म्लेच्छसेवी केंद्रे सूर्यादिखेचरैः ५१ शुक्रे जीवे त
था चंद्रे सूर्यभौमार्किसंयुते ॥ कर्णेति कर्णे श्रवणे अदितौ पुनर्वसौ नक्षत्रे उपनयते स्वांशे चंद्रः स्यात्तदा धनवान् भवेत् नारदः श्रव
णादितिनक्षत्रे कर्कांशस्थे निशाकरे तदा व्रती वेदशास्त्रधनधान्यसमृद्धिमान् ५० केंद्रस्थानां फलमनुष्टुभाह राजसेवीति केंद्रे सूर्यादिखेचरैः राम. ५९
प्रत्येकं सहिते क्रमादिदं फलं ज्ञेयं अन्यत्स्पष्टं अत्र लग्नस्थे चंद्रे केंद्रस्थे शनिं च विना सर्वे ग्रहाः शुभा इत्यवगम्यते मुनिभिस्तु केंद्रे पापा निषिद्धा इ
त्युक्तं नारदः स्फूर्जिते केंद्रगे भानौ व्रतिनो वंशनाशनं कुजिते केंद्रगे भौमे शिष्याचार्यविनाशनं अत्र स्वगृहोच्चाद्यवस्थिताः पापाः केंद्रस्थाः शुभ
फलदातारः अन्यथा नेति विरुद्धार्थवचनयोर्विषयविवेकः ५१ अथान्यदाह शुक्रेति शुक्रे जीवे चंद्रे प्रत्येकं सूर्यसंयुते व्रती निर्गुणः स्यात् भौ
मसंयुते क्रूरचेष्टः क्रूरा हिंसनशीला चेष्टा यस्य तादृशः स्यात् ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

तथाशनिसंयुते निर्घृणो निर्लज्जो निर्दयो वा स्यात् तथा तस्मिन्नेव जीवे शुक्रे चंद्रे वा प्रत्येकं सद्भिर्युते पटुः सर्वविद्यानिपुणः स्यात् ५२ अथान्यत्प्रमाणिकयाह विधोसितांशगेति चंद्रे शुक्रांशगे शुक्रे त्रिकोणगे गुरौ तनौ लग्ने च सति व्रती बटुः समस्तांश्चतुरो वेदान्वेत्तीति समस्तवेदवित् एवं यमांशगे शनिनवांशसंस्थिते चंद्रे सति लग्ने गुरौ च सति सिते त्रिकोणगे सति अपि निर्घृणः स्यात् महेश्वरः जीवे लग्नमधिष्ठिते भृगुसुते धर्मात्मजस्थे विधौ शुक्रांशे खिलवेदविद्बटुसुतस्याशेकृतघ्नो धम इति नारदः लग्नं सर्वगुणोपेतं लभ्यते स्वैर्दिनेनैसत् दोषाल्पत्वं गुणाधिक्यं बहुसंमतमिष्यते दोषदुष्टो हि कालोयः सोयमाहुर्नेशक्यते दोषावेधादयो महादोषइत्यर्थः ५३ अथानध्यायान्जवनचपलार्ययाह शुचिशुक्रेति अनध्यायाः आषाढशुक्लदशमी ज्येष्ठशुक्लद्वितीया पौषशुक्लैकादशी माघशुद्धद्वादशी एता अनध्यायाः भूतश्चतुर्दशी तदादि त्रितयं चतुर्दशी पूर्णिमा प्रतिपदः कृष्णपक्षे

निर्गुणः क्रूरचेष्टः स्यान्निर्घृणः सद्युते पटुः ५२ विधोसितांशगे सिते त्रिकोणगे तनौ गुरौ समस्तवेदविद्व्रतीयमांशगेति निर्घृणः ५३ शुचिशुक्रपौषतपसां दिग्ग्विरुद्रार्कसंख्यसिततिथयः॥

॥ अमावास्या तन्मध्ये अष्टमी च तयोः समाहारः तथा संक्रमणं सूर्यस्य निरयनं संक्रांतिदिनं चकारान्मन्वाद्यास्तिथीन्मधाविन्यादिनोक्ताः तत्राषाढशुक्लदशमी पौषशुद्धैकादशी च मन्वादी ज्येष्ठशुक्लद्वितीया माघशुद्धद्वादशी च सोपपदे यद्यपि चैत्रशुद्धतृतीया मन्वादिः वैशाखशुद्धतृतीया युगादिस्तथापि ते उभे तृतीये नानध्यायौ तथैव फाल्गुनकृष्णद्वितीया चातुर्मास्यद्वितीयापि नानध्यायः तासां प्राशस्त्याभिधानात् तथा च वसिष्ठः या चैत्रवैशाखसिता तृतीया माघस्य सप्तम्यथ फाल्गुनस्य कृष्णे द्वितीयोपनये प्रशस्ता प्रोक्ता भरद्वाजवसिष्ठमुख्यैरिति अन्यासां युगादिमन्वादीनां व्रतबंधे अप्रसंगादेव अग्रहणं केचिदाचार्याः या चैत्रवैशाखेति वचनं लिखित्वापि स्वेछया नांगीकुर्वंति. तत्र शपथमात्रमेव प्रमाणं न पश्याम इत्यलं तन्मते तृतीये अनध्यायत्वेन ज्ञेये व्रतेष्विति पदमावश्यकत्वद्योतनार्थं गौतमः पक्षद्वये चतुर्दश्यामष्टमीद्वितयेन तथा पक्षादावपि पक्षांते ब्रह्मनाधीयते नरैः फलं च अष्टमी हंत्युपाध्यायं शिष्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु॰टी॰ हंतिचतुर्दशी अमावास्योभयंहंतिप्रतिपत्पाठनाशिनी मनुः चातुर्मास्यद्वितीयासुमन्वादिषुयुगादिषु अष्टकासुचसंक्रांतौशयनेबोधनेहरेः अनध्या
स॰प्र॰ यंप्रकुर्वीततथासोपपदासुचेति चातुर्मास्यद्वितीयागर्गेणोक्तः आषाढफाल्गुनोर्जेषुयाद्वितीयाविधुक्षये चातुर्मास्यद्वितीयास्ताःप्रवदंतिमहर्षयः
६० मन्वादयोयुगादयश्चपूर्वमुक्ताःसिताज्येष्ठेद्वितीयाचआश्विनेदशमीसिता चतुर्थीद्वादशीमाघेएताःसोपपदाःस्मृताः नैमित्तिकाअनध्यायास्तु
स्मृत्यर्थसारे निर्घातभूकंपोल्कानिपतनादिसर्वाद्भुतेष्वाकालिकोनध्यायाः अग्न्युत्पातेवाऽकालवृष्टौवा आर्द्रादिज्येष्ठांतात्कालादन्यत्राकालवृष्टिः
सायंसंध्यागर्जनेउदयांतोनध्यायः अर्धरात्रादूर्ध्वंगर्जनेअर्धरात्रेवा आकालिकोनध्यायः प्रातःसंध्यागर्जनेत्वहोरात्रमिति कालंमर्यादीकृत्य
त्याकालं आकालेभवआकालिकः यस्मिन्कालेनिमित्तमुत्पन्नंतदारभ्यद्वितीयदिनेतत्कालपर्यंतमित्यर्थः स्मृतिरत्नावल्यां अनूराधर्क्षमार
भ्यषोडशर्क्षेषुभास्करः यावच्चरतिचेतावदकालमुनयोविदुरिति कालवृष्टौतुतत्कालमकालेतुत्रिरात्रकं अतिमात्राथवावृष्टिर्नाधीयीतदिनत्रयं

भूतादिचितयाष्टमीसंक्रमणंचव्रतेष्वनध्यायाः ५४ अर्कतर्कत्रितिथिषुप्रदोषःस्यात्तदग्रिमैः रात्र्यर्धसार्धप्रहरयाममध्यस्थितैःक्रमात् ५५

आपस्तंबः उल्कायामग्न्युत्पातेचसर्वासांविधानामाकालिकमिति मनुः चौरैरुपप्लुतग्रामेसंभ्रामेचाग्निकारिते आकालिकमनध्यायंविद्यात्सर्वाद्भु
तेषुचेति अद्भुतेषुरुधिरादिवृष्टिषु वसिष्ठः उपलरुधिरप्रपातेत्र्यहमिति स्मृत्यंतरे विद्युद्गर्जितवृष्टीनांसंनिपातोयदाभवेत् कालवृष्टौतुतत्कालम राम॰ ६०
कालेतुत्रिरात्रकमित्यादिकानैमित्तिकाअनध्यायायदामेखलाबंधात् प्रागुत्पन्नास्तदाव्रतबंधोनकार्यएव यदातुमेखलाबंधादनंतरंब्रह्मौदनपा
कात् प्रागुत्पन्नास्तदाजातोपिनप्रवर्तते ५४ अथप्रदोषलक्षणमनुष्टुभाह अर्केति तदग्रिमैरर्कादितिथिषुप्रदोषःस्यात् यथा द्वादश्यामर्धरात्रा
त्प्राक्त्रयोदशीप्रवृत्तौप्रदोषः षष्ठ्यांसार्धप्रहरमध्येसप्तमीप्रवृत्तिस्तदाप्रदोषः तथातृतीयायांप्रहरमध्येचतुर्थीप्रवेशेप्रदोषः अत्रद्वितीयप्रहरस्य
चरमघटिकातृतीयप्रहरस्याद्यावाघटिकेत्येवंघटिकाद्वयमितःकालःस्थूलोरात्र्यर्धशब्दोवाच्यःतेनसमाशब्दाचित्ताभावादर्धंनपुंसकमितिएकदेशिसमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथव्रतबंधानंतरंसायंकालेवक्ष्यमाणंब्रह्मौदनाख्यः संस्कारोभिहितस्तत्रार्यंयाविशेषमाह प्राक् ब्रह्मौदनेनति स्पष्टार्थं उक्तंचनृसिंहप्रसादे ब्रह्मौद
नविधेः पूर्वंप्रदोषोगर्जितेभवेत् तदाविघ्नकरंज्ञेयंवटोरध्ययनस्यतत् तस्यशांतिप्रकारंतुवक्ष्येशास्त्रानुसारतः स्वस्तिवाचनपूर्वंतुहवनंका
रयेद्बुधः प्रधानंपायसंसाज्यंद्रव्यंशांतियज्ञेभवेत् तदुक्तंबृहस्पतेर्विद्वान्पठेद्विद्यासम्यद्वये गायत्रीयुंजतमंत्रः प्रायश्चित्तंतुसर्पिषां धेनुंसवत्स
कांदद्यादाचार्यायपयस्विनीं शिलांहोमविधेः पश्चात्स्थापयेत्तत्रसंसदि ब्राह्मणान्भोजयेत्पश्चात्ततोब्रह्मौदनंचरेदिति ५६ अथवेदविशेषेणन
क्षत्राणिवसंततिलकयाह वेदेति मृगाश्लेषाद्रोहस्तचित्रास्वातीमूलपूर्वात्रयेषुऋग्वेदाध्यायीनां रेवतीहस्तानुराधामृगपुष्यरोहिण्युत्तरात्रये
षुयजुर्वेदाध्यायीनां अश्विनीधनिष्ठापुष्यहस्तोत्तरात्रयार्द्राश्रवणेषुसामवेदाध्यायिनां मृगरेवतीपुष्याश्विनीहस्तानुराधाधनिष्ठापुनर्वसुषु अथ

प्राक् ब्रह्मौदनपाकाद्व्रतबंधानंतरंयदिचेत् उत्पातानध्ययनोत्पत्तावपिशांतिपूर्वकंतत्स्यात् ५६ वेदक्रमाच्छशिशिवाहिक
रत्रिमूलपूर्वासुपौष्णकरमैत्रमृगादितीज्ये ध्रौवेषुचाश्विवसुपुष्पकरोत्तरेशकर्णेमृगांत्यलघुमैत्रधनादितोसत् ५७ नां
दीश्राद्धोत्तरंमातुः पुष्पेलग्नांतरेनहि ॥ ॥ वेदेदाध्यायिनां पूर्वश्लोकानुवृत्ततत्पदपरामृष्टमुपनयनंसत्शुभमित्यर्थः उक्तंच मूलेह
स्तत्रयेष्वार्पशैवेश्वर्वोत्रयेतथा ऋग्वेदाध्यायिनां कार्यंमेखलाबंधनंबुधैः पुष्यपुनर्वसौपौष्णेहस्तेमैत्रेशशांकभे ध्रौवेषुचप्रशस्तंस्याद्यजुषांमौ
जिवंधने पुष्यवासवहस्ताश्विशिवकर्णोत्तरात्रयं प्रशस्तंमेखलाबंधेबटूनांसामगायिनां मृगमैत्राश्विनीहस्तारेवत्यादितिवासवं अथर्वपाठि
नांशस्तोभगणोयंव्रतार्पणे ५७ अथान्यंविशेषमनुष्टुभाह नांदीश्राद्धेति नांदीश्राद्धंवृद्धिश्राद्धंतत्कृत्यानंतरंयदिसंस्कार्यमातुःपुष्परजोद
र्शनेजातेसति लग्नांतरेचनसतितदावश्यकर्तव्यत्वेधर्मशास्त्रोक्तांशांतिंविधायचौलंयज्ञोपवीतंविवाहश्चकार्यः अन्यथासमीचीनलग्नांतर
सत्वेसतिचौलादिनसत् दुष्टफलमित्यर्थः मेधातिथिः चौलेचव्रतबंधेचविवाहेयज्ञकर्मणि पत्नीरजस्वलायस्यप्रायस्तस्यनशोभनं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्मृत्यंतरे प्राप्तमभ्युदयंश्राद्धंपुत्रसंस्कारकर्मणि पत्नीरजस्वलाजातानुकुर्यात्तत्पितातदेति तत्पितेतिनांदीश्राद्धकर्तुरुपलक्षणं अतोज्येष्ठभ्रात्रादि नाकरिष्यमाणनांदीश्राद्धात्प्राकृतत्पत्नीरजस्वलाचेत्तदानांदीश्राद्धनिषेधान्मंगलंनकार्यमेव संस्कार्यमातरिरजस्वलायांतुसन्निहितलग्नांतरा संभवेशांतिंकृत्वातदीनीमेवतन्मंगलंकार्यं आरब्धत्वान्नस्मृत्युक्तदोषः अपशकुननिरासार्थंशांतिःकार्या उक्तंच वधूवरान्यतरस्यजननीचेद्र जस्वला संपूर्णेतुबलेप्राप्तेकुर्यात्तत्पाणिपीडनमिति बलेग्रहबलेच वाक्यसारे अलाभेसुमुहूर्तस्यरजोदोषेह्युपस्थिते श्रियंसंपूज्यविधिवत्ततोमंगल माचरेत् हैमीमाषमितापद्मांश्रीसूक्तविधिनार्चयेत् प्रत्यृचंपायसंहुत्वाभिषिच्यहितमाचरेत् यदातुकृतेपिमंगलेमंडपोद्वासनात्प्राक्मातरिरजस्व लायांशांत्यादिकंकार्यमेव मंगलस्यासमाप्तत्वात् यदातुज्येष्ठभ्रात्रादिनाकृतान्नांदीश्राद्धात्परंतत्पत्नीरजस्वलाचेत्तदानकोपिदोषः अन्योपिविशे

शांत्याचौलंव्रतंपाणिग्रहःकार्योन्यथानसत् ५८ विचैत्रव्रतमासादौविभौमास्तेविभूमिजे छुरिकाबंधनंशस्तंनृपाणां प्राग्विवाहतः ५९ केशांतंषोडशेवर्षेचौलोक्तदिवसेशुभं ॥

पत्रैव उपवासेनशुध्यंतिनार्यःसद्योरजस्वलाः एकाकिन्योविवाह दौदेशभंगेषुवायदीति ५८ अथछुरिकाबंधनमुहूर्तमनुष्टुभाहविचैत्रेति चैत्रवर्जितेषूपनयनमासेषुमाघफाल्गुनवैशाखज्येष्ठेष्वित्यर्थः आ दिशब्देनव्रतबंधोक्ततिथिनक्षत्रजन्मलग्नादीनांग्रहणं वाकीदृशेव्रतमासादौविभौमास्तेभौमास्तरहिते गुरुशुक्रास्तादिसामान्यनिषेधादेवसि द्धं तथा विभूमिजेभौमवाररहितेसूर्यादिवारेनृपाणांक्षत्रियाणांविवाहतः पूर्वंछुरिकायाअल्पशस्त्रविशेषस्यबंधनंकट्यामितिशेषः तच्छस्तंहि तं विवाहात्प्रागित्युक्तेः अवधित्वनिश्चयात्समावर्तनानंतरंकार्यं अन्यथोपनयनानंतरंकार्यमित्येवब्रूयात् ५९ अथकेशांतसमावर्तनमुहूर्तं अनुष्टुभाह केशांतमिति षोडशेवर्षेचौलोक्तदिवसेमुहूर्तेगोदानापरपर्यायंकेशांतसंज्ञंकर्मशुभंस्यात् गावःकेशादीयंतेखंड्यंतेयस्मिंस्तद्गोदा नं गोदानंषोडशेवर्षेइत्येतद्ब्राह्मणविषयं क्षत्रियविशोर्द्वाविंशचतुर्विंशंचविरोधात् तथामनुः केशांतंषोडशेवर्षेब्राह्मणस्यविधीयते ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

राजन्यबंधोर्द्वाविंशेवैश्यस्यद्व्यधिकेततइति आश्वलायनः प्रथमंस्यान्महानाम्नीद्वितीयंचमहाव्रतं तृतीयंस्यादुपनिषद्गोदानाख्यंततः परं अत्र जाताधिकाराद्गोदानंजन्माद्यब्देतुषोडशेइतिवृत्तिकारवचनात् त्रयोदशेमहानाम्न्यादिभवंति त्रयोदशेमहानाम्नी चतुर्दशेमहाव्रतं पंचदशेउपनिषद्व्रतं षोडशेगोदानमिति एवंक्षत्रियविशोरपिउक्तगोदानकालात्प्राक् वर्षचतुष्टयक्रमेणमहानाम्न्यादिभवंति व्रतोक्तेति हिनिश्चयेनयज्ञोपवीतोक्तदिवसेआदिशब्देनवारनक्षत्रतिथिलग्नांशकेषुसमावर्तनकर्मेष्यते अत्रकश्यपेनचैत्रोवर्जितः चैत्रमासविवर्जेषुमाघादिषुचपंचसु एतच्चगोदानानंतरंविवाहात्प्राक्कार्यं कुर्यात्समावर्तनंकर्मपश्चाद्गोदानतः पाणिनिपीडनात्प्रागितिवसिष्ठोक्तः क्वचिद्द्वितीयवर्षेतन्निषेधउक्तः वधूप्रवेशंव्रतमोक्षणंचपुंसांपुनर्दारपरिग्रहंच नाब्देद्वितीयेविदधीतधीमान्वदंतिगर्गात्रिवसिष्ठमुख्याइतितन्निर्मूलत्वादुपेक्ष्यं परिकरोऽलंकारउत्सर्गोयत्नादरूपः

व्रतोक्तदिवसादौहिसमावर्तनमिष्यते ६० इतिमुहूर्तचिंतामणौसंस्कारप्रकरणंपंचमंसमाप्तं ५ भार्यात्रिवर्गकरणंशुभशीलयुक्ताशीलंशुभंभवतिलग्नवशेनतस्याः॥

शेषंस्पष्टं ६० इतिदैवज्ञानंतसुतदैवज्ञरामविरचितायांस्वकृतमुहूर्तचिंतामणिटीकायांप्रमिताक्षरायांसंस्कारप्रकरणंपंचमंसमाप्तं ५ अथविवाहप्रकरणंव्याख्यायते तत्रानाश्रमीनतिष्ठेतेत्यादिवच नात्समावर्तनानंतरंसर्वाश्रमाणामुपकारकत्वाद्गृहस्थाश्रमएवमुख्यः सचसुशीलस्त्र्याधीनः शीलंसुलग्नाधीनमित्यतोलग्नशुद्धिकथनंवसंततिलकयाप्रतिजानीते भार्येति शुभंभर्त्रादेरनुकूलंशीलंस्वभावोयस्याः सात्रिवर्गस्यधर्मार्थकामरूपस्यकरणमतिशयेनसाधनं तस्याःसुलग्नवशेनशीलंशुभंभवति यतः सुतशील्लधर्माः तन्निघ्नताविवाहाधीनता अधीनोनिघ्नआयत्तइत्यमरोक्तेः उपगताः प्राप्ताः अतोहीतिनिश्चयेनविवाहसमयः परिचिंत्यतेविचार्यतइति ननुजन्मकालीनग्रहजनितंशुभाशुभंदुरतिक्रममितिविवाहलग्नानर्थक्यमितिचेन्न ज्योतिषस्मृत्यावेदितशुभसमयारब्धविधिजन्यापूर्वजनितशुभफलेनजन्मांतरीयदुर्दैष्टध्वंसोभवतीत्येवमर्थतयासार्थक्यात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवसत्याचार्यः शुभक्षणक्रियारंभजनिता पूर्वसंभवाः संपदः सर्वलोकानां ज्योतिस्तत्रप्रयोजनमिति सर्वत्रत्रेयं १ अथप्रश्नलग्नाद्विवाहयोगद्
यंस्रग्धरयाह अथशब्दोमंगलार्थः आदौसंपूज्येति आदौगणकं ज्योतिर्विदं रत्नादिभिः मणिवस्त्रफलादिभिः संपूज्य ततःप्रष्टाकन्यायाः उद्वाहं
गणकं वेदयेत् गतिबुद्ध्यादिनाऽणौकर्तुः कर्मत्वं कीदृशं गणकं सुस्थचित्तं अव्याकुलांतःकरणं स्वस्थेचित्तेबुद्धयः संभवंतीत्युक्तः उत्पलः प्रष्टामणि।
कनकयुतैः फलकुसुमैः राशिचक्रमभ्यर्च्य पृच्छेद्यथाभिलषितंभक्त्याविनयान्वितः प्रश्नं दिगिति यदिप्रश्नलग्नात् शुभेकादशतृतीयसप्तमपंचमाना
मन्यतमेस्थानेस्थितश्चंद्रोजीवेनगुरुणादृष्टः सद्यः शीघ्रंपरिणयनकरःस्यात् वाअथवागोतुलेति वृषतुलाकर्कीणामन्यतमप्रश्नलग्नंस्यात्तच्चशुभ

तस्माद्विवाहसमयः परिचिंत्यतेहितन्निघ्नतामुपगताः सुतशीलधर्माः १ आदौसंपूज्यरत्नादिभिरथगणकंवेदयेत्स्वस्थ
चित्तंकन्योद्वाहोदिगीशानलहयविशिखेप्रश्नलग्नाद्यदींदुः दृष्टोजीवेनसद्यःपरिणयनकरोगोतुलाकर्कटाख्यंवास्यात्त
श्चास्यलग्नंशुभखचरयुतालोकितंतद्विदध्यात् २ विषमभांशगतौशशिभार्गवौतनुगृहंबलिनौयदिपश्यतः रचयतो
वरलाभमिमौयदायुगलभांशगतौयुवतिप्रदौ ३ षष्ठाष्टस्थः प्रश्नलग्नाद्यदींदुर्लग्नेक्रूरः सप्तमेवाकुजः स्यात् मूर्ताविं
दुःसप्तमेतस्यभौमोरंडासास्यादष्टसंवत्सरेण ४

ग्रहैर्युतमवलोकितंवाभवेत्तत्परिणयनंविदध्यात् २ अथान्यंयोगद्वयंद्रुतविलं
बितेनाह विषमभांशगताविति स्पष्टार्थं ३ अथप्रश्नलग्नाद्वैधव्ययोगत्रयंशालिन्याह षष्ठाष्टस्थइति चंद्रः प्रश्नलग्नात्षष्ठाष्टमस्थस्तदाक
न्याष्टसंवत्सरेणविवाहवर्षाद्रंडाभर्तृनाशिकास्यात् अथवालग्नेयः कश्चित्क्रूरग्रहःस्यात्ततः सप्तमेकुजोभवेत्तदाष्टवर्षमध्येरंडास्यात् केचित्स
प्तमेपिपापएवंप्रश्नेनिषेधंति कश्यपः एकोलग्नगतःपापोऽन्यः सप्तमराशिगः आसप्तमाब्दान्मरणंपुरुषस्यनसंशयइति तेषांमतेसप्तमेवाख
लःस्यादितिपाठः अथवामूर्तौलग्नेचंद्रःतस्यसप्तमेभौमोभवेत् तदाऽष्टवर्षेणरंडास्यात् ४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रश्नलग्नात्कुलटामृतवत्सायोगंद्बोधकवृत्तेनाह प्रश्नतनोरिति स्पष्टार्थः कश्यपः स्वनीचगः शत्रुदृष्टः पापः पंचमगो यदा मृतपुत्रां करोत्येव कु
लटां वा न संशय इति ५ अथ विवाहभंगयोगं पुष्पिताग्रयाह यदीति सितातिरिक्तपक्षे कृष्णपक्षे यदि चंद्रः समराशिषु वृषकर्कादिषु गतः सन् तनुग्र
हतः प्रश्नलग्नाद्रिरंध्रे षष्ठेऽष्टमे वा स्थाने स्थितः पापग्रहावलोकितो भवति तदायं योगो विवाहस्य विनाशकारको भवति ६ एवं प्रश्नलग्नाद्वैधव्यादि
योगमभिधायेदानीं जन्मलग्नादावपि बालवैधव्ययोगविचारमतिदिशन् तत्परिहारं शार्दूलविक्रीडितेनाह जन्मोत्थमिति प्रश्नलग्नाद्यथा विधवायोगो
विचारितस्तथा जन्मोत्थं जन्मलग्नोद्भवं च बालविधवायोगं जातकशास्त्रात् बाल्ये विधवा भौमे पतिसंत्यक्तादिवाकरे तच्छे सौरे पापे दृष्टे कन्यैव जरां समु

प्रश्नतनोर्यदि पापनभोगः पंचमगोरिपुदृष्टशरीरः नीचगतश्च तदा खलु कन्या सा कुलटा त्वथवा मृतवत्सा ५ यदि भवति सि
तातिरिक्तपक्षे तनुगृहतः समराशिगः शशांकः अशुभखचरवीक्षितोऽरिरंध्रे भवति विवाहविनाशकारकोऽयं ६ जन्मोत्थं
च विलोक्य बालविधवायोगं विधाय व्रतं सावित्र्या उत पैप्पलं हि सुतयादद्यादिमां वा रहः सल्लग्नेऽच्युतमूर्तिपिप्पलघटैः
कृत्वा विवाहं स्फुटं दद्यात्तां चिरजीविनेत्र न भवेद्दोषः पुनर्भूभवः ७ ११ पयाति तथा लग्ने व्यये च पाताले जामित्रे चाष्टमे कुजे कन्या
भर्तृविनाशाय भर्ता कन्याविनाशद इत्याद्युक्तैर्बालवैधव्ययोगैर्बालविधवायोगं विचार्य वक्ष्यमाणं व्रतं वैधव्ययोगपरिहारं कारयेदित्यन्वयः तत्र
वैधव्ययोगपरिहारभावः योयो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्यास्ति वृद्धिरिति सप्तमस्थानं स्वस्वामिसौम्यैक्षितं चेद्भवति तदा भर्तृसुखं भव
तीति अन्ये स्त्रीणामहत्यरिष्टयोगे भर्तुश्च स्वस्येऽरिष्टयोगे तत्परिहारमाहुः अथवा परिहार्ये वैधव्ययोगे प्रतिकारमाह विधायेति रह इति वक्ष्यमाण
मिहापि योज्यं पित्रादिः सुतया कन्यया हत्वा रह एकांते हि निश्चयेन सावित्र्या व्रतं विधाय पश्चादिमां कन्यां चिरजीविने वराय दद्यात् तदुक्तं व्रतखंडे
सावित्र्यादिव्रतादीनि भक्त्या कुर्वंति याः स्त्रियः सौभाग्यं च सुहृत्त्वं च भवेत्तासां सुसंततिरिति व्रतग्रहणप्रकारस्तत एवावगंतव्यः पिप्पलव्रतं तत्स्थानभा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु॰टी॰ स्करे बलवद्वि धवायोगेवाल्येसति मृगीदृशां पितारहसिकुर्वेनितद्वंगंशास्त्रसंमतं सुदिनेशुभनक्षत्रेचंद्रताराबलान्विते अवैधव्यकरैर्योगैर्लग्नेग्रहबला
वि॰प्र॰ न्विते व्रतारंभंप्रकुर्वीतबालवैधव्यनाशकं सुस्नाताचित्रवस्त्राद्यांकन्यापितृगृहाद्बहिः नीत्वाश्वत्थंशमीस्थानेयद्वाबदरिकाश्रमे आलवालंप्रकुर्वी
६३ तविपुलंमृदुकर्षितं कुमार्याचार्यनिर्दिष्टंकृतसंकल्पमादरात् करकांबुप्रपूर्णेनसिंचनंप्रतिवासरं चैत्रेवाश्विनमासेचतृतीयाऽसितपक्षतः यावत्कृष्ण
तृतीयान्यामासमेकंयथाविधि ब्राह्मणानांतथास्त्रीणांपूजनंचसमारभेत् तदाशिषाप्नुयात्कन्यासौभाग्यंचसुखान्वितं प्रतिमापार्वतीनाम्नीवैणवे
भाजनेर्चयेत् चंदनाक्षतदूर्वाद्यैर्बिल्वपत्रैर्यथाविधि उपचारैर्यथाभक्त्यानैवेद्यैः प्रतिवासरं एवंव्रतप्रभावेनबालवैधव्यनिष्कृतिः जायतेकन्यका
नांचततः पाणिग्रहक्रिया इत्यश्वत्थव्रतं अन्यमपिवैधव्ययोगपरिहारमाह वारहइत्यादि अथवारहएकांते अच्युतमूर्तिर्विष्णुप्रतिमा पिप्प
लघटोप्रसिद्धौ एषांमध्येऽन्यतरेणसहस्वलग्नेवक्ष्यमाणदोषरहितेसौभाग्यगुणान्वितेचविवाहलग्नेविवाहंकारयित्वापश्चात्तांकन्यांस्फुटंलोकप्र
सिद्धंयथाभवतितथाचिरजीविनेवरायदद्यात् दत्वापित्रादिकः तदुक्तंमार्कंडेयेन बालवैधव्ययोगेपिकुंभद्रुप्रतिमादिभिः कृत्वालग्नंरहःपश्चा
त्कन्योद्वाह्येतिचापरेइति कुंभइतिमंथन्या अपिउपलक्षणं द्रुवृक्षोश्वत्थएव प्रतिमाविष्णोःसौवर्णीकरशिरोवयवादिसहिता नशालिग्रामादि
रूपा तत्रकुंभविवाहः सूर्यारुणसंवादे विवाहात्पूर्वकालेतुचंद्रताराबलेशुभे विवाहोक्तेचमंथन्याकुंभेनसहचोद्वहेत् पितासंकल्प्यवाद्यंचविवाह
विधिपूर्वकं सूत्रेणावेष्टयेत्पश्चाद्दशतंतुविधानतः कुंभमालंकृतंदेहतयोरेकांतमंदिरे ततःकुंभविनिःसार्यप्रभज्यसलिलाशये ततोभिषेचनंकु
र्यात्पंचपल्लववारिभिः ततस्तेवस्त्रपूजाद्यंब्राह्मणायनिवेद्यच कन्यालंकारवस्त्राद्यंब्राह्मणायनिवेदयेत् प्रार्थना वरुणांगस्वरूपत्वंजीवनानांसमा एम॰
श्रयपतिंजीवयकन्यायाः चिरपुत्रान्सुखंवरं देहिविष्णुवरानंदेनकन्यांपालयदुःखतइति इतिकुंभविवाहः अश्वत्थविवाहेपितत्रैव द्विजान्गुरून्स्तु ६३
हत्वारोमंगलोच्चारणैः समं आहूयोद्वाहकालेचरम्यभूमौच मंडपेगत्वाप्रणम्यगौरींचगणनाथंचभूरुहं भवानीचैवमंथानीपितामंत्रमुदीर
येत् उद्वाहयिष्येविधिवदश्वत्थेनमनोहरा कन्यासौभाग्यसौख्यार्थंहेतवेहंद्विजोत्तमाः नमस्तेविष्णुरूपायजगदानंदहेतवे पितृदेवमनुष्याणामा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अश्वत्थायनमोनमः वनानांपतयेतुभ्यंविष्णुरूपायभूरुह नमोनिखिलपापौघनाशनायनमोनमः पूर्वजन्मकृतंपापंबालवैधव्यकारकं नाशयाशुसुखंदेहिक
न्यायाममभूरुह इत्यश्वत्थविवाहेसंकल्पप्रार्थने विवाहस्तुकुंभविवाहवद्विधेयः एवमेवसौवर्ण्याविष्णुप्रतिमयासहविवाहंविधायप्रतिमांब्राह्मणायद
द्यात् दानप्रकारस्तत्रैव शुभेमासेसितपक्षेसानुकूलग्रहेदिने ब्राह्मणंसाधुमामंत्र्यसंपूज्यविविधार्हणैः तस्मैदद्याद्विधानेनविष्णोर्मूर्तिंचतुर्भुजां शुद्धवर्ण
सुवर्णेनवित्तशक्त्याथवापुनः निर्मितांरुचिरांशंखगदाचक्राब्जसंयुतां दधानांवाससीपीतेकुमुदोत्पलमालिनां सदक्षिणांचतांदद्यान्मंत्रमेतमुदीरये
त् यन्मयापूर्वजनुषि घ्नंत्यापतिसमागमं विषोपविषशस्त्राद्यैर्हतोवातिविरक्तया प्राप्यमाणमहाघोरंयशःसौख्यधनापहं वैधव्याद्यतिदुःखौघनाशाय
सुखलब्धये बहुसौभाग्यलब्ध्यैवमहाविष्णोरिमांतनुं सौवर्णींनिर्मितांशक्त्यातुभ्यंसंप्रददेद्विज अनघात्वहमस्मीतित्रिवारंप्रवदेदिति एवमस्त्वि
तिविप्राशीर्गृहीत्वास्वगृहंविशेत् ततोविवाहिकंतातोविधिंकुर्यान्मृगीदृशा इतिप्रतिमादानविधिः एवंघटादिभिःसहविवाहंएकांतेविधायपश्चाद्वा
द्यत्रयघोषपुरःसरंपित्रादिकन्यामायुष्मतेवरायदद्यात् अत्रपुनर्विवाहात्पुनर्भूत्वादोषोनभवति यतोविधानखंडे स्वर्णांबुपिप्पलानांचप्रतिमा
विष्णुरूपिणीतयासहविवाहेचपुनर्भूत्वंनजायतइत्युक्तत्वात् चकारात् घटस्यापि लक्ष्मीरूपासदाकन्याहरिरूपंसदाजलं हरेर्दत्तंचयद्दानंदातुः
पापहरंसदा लक्ष्मीनारायणप्रीत्यैयादत्ताकन्यकाबुधैः तारयेत्सकलंदातुःकुलंपूर्वापरंसदा चंद्रवह्न्यंबुगंधर्वशिवसोमस्मराइमे पतयःकन्यकानां
चबाल्यात्संतिसदैवते तदुद्वाहविधिर्यत्नात्कृतोनोजनयेद्दयं यथातिभुक्तकमलंदेवानांपूजनायवै अर्हंभवतिसर्वत्रतथाकन्यानृणांभवेत् श्रुतावपि
सोमादिभिःसहविवाहोऽभिहितः सोमःप्रथमोविविदेगंधर्वोविविदउत्तरः तृतीयोअग्निष्टेपतिस्तुरीयस्तेमनुष्यजाइति अतोदेवतभोग्यानांकन्यानांपु
रुषविवाहेनदोषःपुनर्भुवः तथात्रापि अतएव मंथन्याभास्करेयत्नात्कृतवान्दुहितुर्विधिः रेणुकोपिस्वकन्यायालरुद्वाहंचकारसइतिविधानखंडे
भिधानात् अतएव पित्रामात्रातथाभ्रात्रादत्तायातोयधारया विप्राग्निसुहृदांसाक्ष्यंकृत्वासोद्वाहिताभवेदितिकात्यायनादिपरिभाषितत्वादेकदाकन्या
पुरुषविवाहंनिर्वर्त्यपुनर्द्वितीयपुरुषविवाहजातेसापुनर्भूर्भवेत्पल ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.टी. वि.प्र. ६४

अथान्यत्स्रग्विण्याह प्रश्नलग्नक्षणेति तत्रज्योतिर्वित्समीपे यादृशापत्यंयुक्यादृशापत्यमेवविवृणोऽनेकन्यकेसुतादि शेषंस्पष्टं ८ अथसामान्यतो
निमित्तवशेनशुभाशुभप्रश्नंस्रग्विण्याह शंखभेरीति विपंचीवीणाच एतेषांरवैः प्रश्नलग्नेश्रुतैर्मंगलंजायते उपलक्षणत्वान्मनोह्लादितुरगगजछत्रादि
सान्निध्येपिशुभं अथाशुभयोगाः वैपरीत्यमिति वायसःकाकःखरोगर्दभःश्वाकुक्कुरःसृगालःप्रसिद्धःयदिप्रश्नलग्नक्षणेचयदिवायसादिर्नादंशब्दंक
रोतितदावैपरीत्यमशुभंलक्षयेत् उपलक्षणादुलूकोष्ट्रमहिषनादोप्यशुभः अन्येशुभयोगाः शौनकादिभ्योज्ञेयाः विवाहवृंदावनेउपश्रुतिरप्युक्ता आ
रोप्याक्षतपूरितेगणपतिंप्रस्थादिपात्रेशनैःसंमार्जन्यधिवेष्टितेयुवतयस्तिस्रःसकन्यानिशि निर्यानारजकादिवेश्मसुकरेकृत्वातमभ्यर्चितंयांवाचंश्र

प्रश्नलग्नक्षणेयादृशापत्ययुक्स्वेछयाकामिनीतत्रचेदाव्रजेत् कन्य कावासुतोवानदापंडितैस्तादृशापत्यमस्याविनिर्दिश्य
ते ८ शंखभेरीविपंचीरवैर्मंगलंजायतेवैपरीत्यंतदालक्षयेत् वायसोवाखरःश्वासृगालोपिवाप्रश्नलग्नक्षणेरौतिनादंयदि
९ विश्वस्वातीवैष्णवपूर्वात्रयमैत्रैर्वस्वाग्नेयैर्वाकरपीडोचितऋक्षैः वस्त्रालंकारादिसमेतैःफलपुष्पैःसंतोष्यादौस्यादनुक
न्यावरणंहि १० धरणिदेवोऽथवाकन्यकासोदरःशुभदिनेगीतवाद्यादिभिःसंयुतः वरवृत्तिंवस्त्रयज्ञोपवीतादिनाध्रुवयुतैर्वै

णुयात्तदर्थसदृशीलोकेकिलोपश्रुतिः तन्मंत्रश्च उपश्रुतिमहादेविचांडालगृहवासिनि यथार्थंब्रूहिदेवित्वंशक्रराज्यप्रऽद्धि पूर्वात्रयैराचरेत् ११
वर्धिनीभिति ९ अथकन्यावरणमुहूर्तंमत्तमयूरछंदसाह विश्वस्वातीति उत्तराषाढादिनक्षत्रैरथवाविवाहनक्षत्रैरुपलक्षितेकालेवस्त्रालंकारादिशब्देन
स्वाद्यादिमधुरवस्तुभिःसहितैःफलपुष्पैः आदौकन्यातोष्यतोषयित्वाऽनुपश्चात्कन्यावरणंहिनिश्चयेनस्यात् कन्यावरयोर्लक्षणानिसामुद्रिकाध्या
यादवगंतव्यानि १० अथवरवरणमुहूर्तमाह धरणिदेवइति धरणिदेवोब्राह्मणःपुरोहितादिः चंडेश्वरः पूर्वात्रितयमाग्नेयमुत्तरात्रितयेतथा रोहि
णीतत्रवरणेभगणाःशस्यतेसदा उपवीतंफलंपुष्पंवासांसिविविधानिच देयंवरायवरणेकन्याभ्रात्राद्विजेनवेति ११

राम. ६४

CC-0. In Public Domain. Digitization by eGangotri

अथ कन्याविवाहकालं ग्रहशुद्धिं च वसंततिलकाछंदसाह गुरुशुद्धिवशेनेति कन्यकानां विवाहः षडब्दकोपरिष्टात् षड्वर्षातिक्रमानंतरं समेव वर्षेषु युग्म
ग्मवर्षेषु सत्सु संवत्सरवद्गुरुः कन्याजन्मराशेरित्याद्युक्तगुरुशुद्धौ सत्यां विवाहः शुभः अर्थात् पुरुषाणां विषमवर्षेषु गोचरप्रकरणोक्तरविशुद्धौ सत्यां विवाहः शुभः
राजमार्तंडः तृतीयः षष्ठगश्चैव दशमैकादशस्थितः रविशुद्धो निगदितो वरस्यैव करग्रहे जन्मस्थश्च द्वितीयस्थः पंचमे सप्तमेपि वा नवमे भास्करे पूजां कुर्यात्पा
णिग्रहोत्सवे चतुर्थे वाष्टमे चैव द्वादशे भास्करे स्थिते वरः पंचत्वमाप्नोति कृते पाणिग्रहोत्सवे इति यत उक्तं षडब्दमध्ये नोद्वाह्या कन्या वर्षद्वयं यतः सोमो
भुक्तोथ गंधर्वस्ततः पश्चाद्धुताशन इति व्यासः अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला वात्स्यः द्वादशे वृषलीस्मृ
गौरीं ददन्नाकलोकं सावित्रं रोहिणीं ददत् कन्यां ददत्स्वर्गलोकमतः परमसद्गतिं प्राप्नोतीति शेषः अत्र युग्मेब्दे जन्मतः स्त्रीणां शुभदं पाणिपीडनमित्युक्त
त्वात् पुनर्नववर्षायां रोहिण्या अयुग्मवर्षत्वाद्विवाहनिषेधः प्राप्नोतीत्यत्र व्यवस्थामाह श्रीपतिः मासत्रयादूर्ध्वमयुग्मवर्षे युग्मे तु मासत्रयमेव यावत्

गुरुशुद्धिवशेन कन्यकानां समवर्षेषु षडब्दकोपरिष्टात् रविशुद्धिवशाच्छुभो नराणामुभयोश्चंद्रविशुद्धितो विवाहः १२ मि
थुनकुंभमृगालिवृषाजगे मिथुनगेपि रवौ त्रिलवे शुचेः ॥ ११ विवाहशुद्धिं प्रवदंति संतो वात्स्यादयो गर्गवराहमुख्याः इत्यतो नवमवर्षस्यायु
ग्मत्वनिषेधोऽष्टवर्षानंतरं मासत्रयपर्यंतमेव तदनंतरं तु सुखेन विवाह इत्यविरोधः एवं च षष्ठवर्षानंतरं जन्मतो विषमवर्षायां मासत्रयानंतरं न कर्मा
सा: शुभाः समवर्षे आद्यमासत्रयं त्रयं चेति गर्भतो युग्मवर्ष इति निष्कृष्टोऽर्थः उभयोरिति स्त्रीपुंसयोश्चंद्रविशुद्धितो विवाहः शुभः उभयोश्चंद्रबलमाव
श्यकमित्यर्थः शुद्धिर्गोचरेणाभिहिता गोचरबलाभावे अष्टकवर्गादिबलं ग्राह्यमित्याह नारदः गोचरं वेधजं चाष्टवर्गजं रूपजं बलं यथोत्तरं बलाधिक्यं स्थू
लं गोचरमार्गजमिति व्यासः कन्याया ग्रहशुद्धिश्च दशवर्षावधिः स्मृता दशवर्षव्यतिक्रांता कन्या शुद्धिविवर्जिता तस्मात्तारेंदुलग्नानां शुद्धौ पाणिग्रहो मत इति
१२ अथ विहितान्मासान् द्रुतविलंबितेनाह मिथुनेति अलिर्वृश्चिकः एतद्राशिगते रवौ सति तत्र चापि मिथुनस्थिते रवौ सति शुचेः आषाढस्य त्रिलवे तृतीयांशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आषाढशुद्धप्रतिपदमारभ्यदशमीपर्यंतंकरपीडनंविवाहोभवति अर्थादितरराशिगेसूर्ये आषाढशुद्धदशम्यनंतरं मिथुनराशिगेर्केपि हरिशयनेच विवाहोनस्यात् अलीति एतद्राशिगेसूर्ये कार्तिकपौषमधुष्वपिकरपीडनंस्यात् वृश्चिके कार्तिके मकरे पौषे मेषे चैत्रेपीत्यर्थः इदंतु सौरमासग्रहणमतं श्रीधरोपि पौषेपिकुर्यान्मकरस्थितेर्के चैत्रेभवेन्मेषगतेयदास्यात् प्रशस्तमाषाढकृतंविवाहंवदंतिगर्गोमिथुनस्थितेऽर्के इति येतुचांद्रमासानेवाहुर्नारदादयः माघफाल्गुनवैशाखज्येष्ठमासाः शुभप्रदाः मध्यमः कार्तिकेमार्गशीर्षेवैनिंदिताः परे इति तेषांमते फाल्गुनोविहित इति तत्रमीनसंक्रमणसद्भावेपिशुभः चैत्रोनिषिद्ध इतिमेषसंक्रमणसद्भावेप्यशुभः तदुक्तंवृंदावने झषेननिंद्योयदिफाल्गुनःस्यादजस्तुवैशाखगतोननिंद्यः मध्वाश्रितौद्वावपिवर्जनीयाविति अजस्तुवैशाखगतोननिंद्यइतिनिर्मूलमेव वस्तुतस्तुवसिष्ठेन उभयमासविधानात्सौरचांद्रमासैक्ये उत्तमोविवाहः एकतरपक्षाश्रयेणमध्यमः दिनाधिपेमेषवृषालिकुंभनृयुग्मनक्राख्यघटर्क्षसंस्थे माघद्वयेमाधवशुक्रयोश्चमुख्योथवाकार्तिकसौम्ययोश्चेति अथप्रसंगात्सौरचांद्रमासविधायकवचनानितेषांव्यव

अलिमृगाजगतेकरपीडनंभवतिकार्तिकपौषमधुष्वपि ॥१३॥

स्थाचलिख्यते तत्रऋष्यशृंगः विवाहव्रतयज्ञेषुसौरमानंप्रशस्यते गार्ग्योपि विवाहोत्सवयज्ञेषुसौरमानंप्रशस्यते वृद्धगर्गः विवाहादौस्मृतःसौरोयज्ञादौसावनःस्मृतः इत्येवमादीनिसौरमासविधायकवचनानि अथचांद्रमासविधायकानि तथाचवसिष्ठः उद्वाहयज्ञोपनयप्रतिष्ठातिथिव्रतक्षौरमहोत्सवाद्यं पर्वक्रियावास्तुगृहप्रवेशाःसर्वंहिचांद्रेणविगृह्यतेतत् नारदः यात्रोद्वाहव्रतक्षौरतिथिवर्षेशनिर्णयं पर्ववास्तूपवासादिकृच्छ्रंचांद्रेणगृह्यते इत्यादीनितत्रैकतरमासावलंबनेऽपरवैयर्थ्यंस्यादित्यत्रसमाधीयते यत्रसौरचांद्रमानाभ्यांमासशुद्धिरुपलभ्यतेसउत्तमोविवाहः एकतरपक्षावलंबनेम
ध्यमइत्युक्तंप्राक् मध्यमपक्षावलंबनंच अवश्यदेयाकन्याविषयंवेदितव्यं अपरंपुनर्देशविवाहयोः तथातपतीकूलयोर्मध्ये चांद्रोमासः प्रशस्यते अन्ये
षुसर्वदेशेषुसौरोऽव्रतविवाहयोः तथा विंध्याद्दक्षिणेभागेचांद्रोमासः प्रशस्यते उत्तरभागेतुविंध्यस्यसौरमानंविधीयते अन्येषुसर्वदेशेषुमिश्रमानंप्रकल्पयेदिति १३

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथमासप्रसंगाज्जन्ममासादिप्रयुक्तनिषेधविधीन्त्रयोदृतयाह आद्येति यस्मिन्चांद्रेमासेजन्मसजन्ममासः जन्मतिथिमारभ्यत्रिंशत्तिथ्यात्मकोमासोज
न्ममासः अत्रमासेजन्मसजन्ममासावित्युच्यते पक्षद्वयमध्येप्रथमप्रकारेणप्रतिपादितं जन्मनक्षत्रंजन्मतिथिःसमाहारद्वंद्वः जन्ममुहूर्तोपि तत्राद्यग
र्भयोः सुतकन्ययोर्द्वयोः करग्रहोविवाहोनोचितः निषिद्धः वसिष्ठः स्वजन्ममासर्क्षतिथिक्षणेषुवैनाशिकाद्यृक्षगणेषुचैव नोद्वाहमात्माभ्युदयाभिकांक्षी
नैवाद्यगर्भद्वितयंकदाचित् एतदपवादोपि जातंदिद्विषयतेवसिष्ठइत्यादिपूर्वमुक्तः अथेति द्वितीयजनुषोरनाद्यगर्भयोश्चेद्विवाहस्तर्हिसुतप्रदोवि
बुधैः पंडितैः शस्यते अत्राद्यगर्भराहित्यंसर्वथाविवक्षितं अथवाचेदनाद्यजनुषोरितिपठितव्यं तथाचच्यवनः जन्मर्क्षेजन्ममासेवानाएयामथजन्मनि
जन्मलग्नेभवेद्वोढापुत्राद्वापतिवल्लभेति एतच्चानाद्यगर्भविषयं आद्यगर्भेसाक्षान्निषेधात् १४ ज्येष्टमासेविशेषंशालिन्याह ज्येष्ठद्वंद्वमिति पुत्रोज्येष्ठः

आद्यगर्भसुतकन्ययोर्द्वयोर्जन्ममासभतिथौकरग्रहः नोचितोथविबुधैः प्रशस्यतेचेद्द्वितीयजनुषोःसुतप्रदः १४
ज्येष्ठद्वंद्वंमध्यमंसंप्रदिष्टंत्रिज्येष्ठंचेन्नैवयुक्तंकदापि ॥ १५ कन्याज्येष्ठा मासोपिज्येष्ठः इत्येनत्रिज्येष्ठंत्रिज्येष्ठंयत्कदापिनैवयुक्तंनप्रश
स्तं ज्येष्ठमासेज्येष्ठयोर्वधूवरयोर्विवाहोनैवकार्यइत्यर्थः यदात्वेकतरज्येष्ठत्वेज्येष्ठमासोभवतितदामध्यमंसंप्रदिष्टं अगतिविषयकमित्यर्थः एकंज्ये
ष्ठमन्यद्वयमज्येष्ठंतदाशुभमेव वराहः द्वौज्येष्ठौमध्यमौप्रोक्तावेकज्येष्ठः शुभावहः ज्येष्ठत्रयंनकुर्वीतविवाहेसर्वसंमतं अस्यापवादमाहकेचिदिति
सत्यावश्यकत्वेसूर्यवह्निगंकृत्तिकास्थेत्यन्काज्येष्ठमासेपिज्येष्ठवरस्यकन्यकायाः विवाहः शुभइतिकेचिदूचुः एतच्चज्येष्ठापत्यस्यनज्येष्ठेइतिसामा
न्यतोमंगलकृत्यनिषेधेपिद्रष्टव्यं भरद्वाजः ज्येष्ठेज्येष्ठस्यकुर्वीतभास्करेचानलस्थिते नोत्सवादीनिकार्याणिदिनानिदशवर्जयेदिति अत्रज्येष्ठपुत्रदु
हित्रोर्ज्येष्ठमासवत मार्गशीर्षेपिमंगलकृत्यनिषेधमाह भरद्वाजः मार्गशीर्षेतथाज्येष्ठे क्षौरंपरिणयंव्रतं आद्यगर्भेदुहित्रोस्तुयत्नेनपरिवर्जयेदिति स्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमपिज्येष्ठापत्यस्यनज्येष्ठे केश्चिन्मार्गेपिनेष्यत इत्युक्तंप्राक् केचिद्ग्रहणंशिष्टाचाराभावादितिसूचयितुं नैवान्योन्यमिति॥ ॥ ॥ ॥ज्येष्ठायाः
कन्यायाः ज्येष्ठपुत्रेणसहविवाहोनैवस्यात् गर्गः ज्येष्ठायाः कन्यकायाश्चज्येष्ठपुत्रस्यवैमिथः विवाहोनैवकर्तव्योयदिस्यान्निधनंतयोरिति १५
अथान्यंविशेषंहरिणीछंदसाह सुतपरिणयादिति निजकुलेइतिदेहलीदीपन्यायेनात्रापिसंबध्यते निजकुलेस्ववंशेसुतस्यपुत्रस्यपरिणयात्षण्मा
सांतःषण्मासमध्येसुताकरपीडनंकन्याविवाहोनस्यात् नारदः पुत्रोद्वाहात्परंपुत्रीविवाहोनऋतुत्रये नतयोर्व्रतमुद्वाहान्मंडनादपिमुंडनमिति तद्वदि
ति निजकुलेत्रिपुरुषमध्येपुत्रस्यकन्यायावामंडनाद्विवाहान्मुंडनंचौलोपनयनंसमावर्तनादिवानद्वत् षण्मासमध्येनकार्यं अत्रिः कुलेऋतुत्रया

केचित्त्र्यब्दिगंप्रोह्याचाहुर्नैवान्योन्यंज्येष्ठयोः स्याद्विवाहः १५ सुतपरिणयात्षण्मासांतःसुताकरपीडनंनचनिजकु
लेनद्वद्वामंडनादपिमुंडनं नचसहजयोर्देयेभ्रात्रोःसहोदरकन्यके नसहजसुतोद्वाहोर्धाब्दे शुभेनपितृक्रिया १६

र्वाग्मंडनान्नतुमुंडनंप्रवेशान्निर्गमंचैव नकुर्यान्मंडनत्रयमिति अत्रविशेषः शार्ङ्गीये व्रतंसमावर्तनकंसचौलंकेशांतमेतानिवदंतितज्ज्ञाः सौरं
पुरस्कृत्यभवंतियस्माच्चत्वारितस्मादिहमुंडनानि चूडासीमंतकेशांतविवाहोपनयान्बुधाः गुरुमंगलमित्याहुस्तदन्यल्लघुमंगलं ज्येष्ठंकृत्वातुष
ण्मासंनकुर्याल्लघुमंगलं कुर्वंतिमुनयःकेचिदन्येस्मिन्नपिवत्सरे लघुवामंगलंकार्यंकार्यंनैमित्तिकंहितु पुत्रोद्वाहःप्रवेशाख्यः कन्योद्वाहस्तुनिर्ग
मः मुंडनंचौलमित्युक्तंव्रतोद्वाहौतुमंगलं चौलंमुंडनमेवोक्तंवर्जयेद्वरणात्परं मौंजीतुभयतःकार्यायतोमौंजीनमुंडनं अभिन्नेवत्सरेपिस्यात्तदह
स्तत्रभेदयेत् अभेदेदिवसस्यापिनकुर्यादेकमंडपेइति एषामस्मूलत्वेदेशकालसंकटेसतिबोद्धव्यं उक्तंच एकोदरयोर्द्वयोरेकदिनोद्वहनेभवेन्ना
शः नघंतरएवैकेदिनेप्याहुःसंकटेचशुभं नप्रतिषिद्धंलग्नंसंप्राप्तेसंकटेमहति एकोदरसंभवयोरेकाहेभिन्नमंडपेकालेइति नचेति सहजयोः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोदरयोर्भ्रात्रोः सहोदरकन्यकेनदेयेनोद्वाह्ये नारदः नचैकजन्मनोः पुंसोरेकजन्येतु कन्यके नूनंकदाचिदुद्वाह्येनैकदामुंडनद्वयमिति अत्रचकारो ऽनु
क्तसमुच्चयार्थस्तेनैकस्मैवरायसहोदरकन्याद्वयमपिनदेयं नपुत्रीद्वयमेकस्मैप्रदद्यात्तुकदाचनेतिवसिष्ठोक्तेः नसहजसुतोद्वाहो व्दार्धइति सुतश्चसुता
सुता चसुते सरूपाणामेकशेषइत्येकशेषः सुताचसुतोपुमान् स्त्रियेत्येकशेषः सुतौचसुताचसुतेचसुतौ वेतिसुताः इतिकृतैकशेषणाद्वंद्वे पुमान् स्त्रिये
त्येकशेषः सहजाश्चतेसुताश्चतेसुताश्चेतिकर्मधारयः तेषांसोदरभ्रातॄणांविवाहः अब्दार्धेषण्मासमध्येनकार्यः उद्वाहइत्युपलक्षणं ततश्चैकामातृ
जयोः पुत्रयोः कन्ययोर्वासमानसंस्कारोनकार्यइत्यर्थः वृद्धमनुः एकमातृजयोरेकवत्सरेपुरुषस्त्रियोः नसमानाक्रियांकुर्यान्मातृभेदेविधीयते समा
नक्रियामुंडनादिकाभिन्नमातृजयोः समानक्रियायांनदोषः नारदः समानापिक्रियाः कार्यामातृभेदेतथैवच विवाहोदुहितुःकार्योनविवाहश्चतुर्दि
नमिति भिन्नमातृदुहित्रोर्विवाहः समानक्रियायांयदिदिनचतुष्टयमध्येनकार्यमित्यर्थः वसिष्ठेनविशेषउक्तः एकोदरप्रसूतानांनात्रकार्यत्रयंभवेत्
भिन्नोदरप्रसूतानांनेतिशातातपोऽब्रवीत् इति चौलोपनयनविवाहरूपंकार्यत्रयं आदौचौलंततोमौंजीविवाहश्चशुभप्रदः मातृभेदेबुधैरुक्तोमातुरे
क्ये न कर्हिचित् एवंसति भिन्नोदरमंगलमावश्यकत्वेगृहभेदात् एकगृहे आचार्यभेदाद्वाकार्यं वसिष्ठः द्विशोभनंत्वेकगृहेनचेष्टंशुभंतुपश्चान्न
वभिर्दिनैस्तु आवश्यकंशोभनमुत्सुकोवाद्वारेणवाचार्यविभेदतोवेति यमलजातयोस्त्वयमपिनिषेधोनास्ति एकस्मिन्वत्सरेचैववासरेमंडपेतथा
कर्तव्यंमंगलंस्वस्रोर्भ्रात्रोर्यमलजातयोः तत्रापिज्येष्ठानुक्रमेणकार्यंज्येष्ठानुक्रमस्तुगर्भोत्पत्तिकक्रमेण तथाचभागवतेतृतीयस्कंधेहिरण्याक्षहि
रण्यकशिपूत्पत्तौ प्रजापतिर्नामतयोरकार्षीद्यः प्राक्स्वदेहाद्यमयोरजायत तंवैहिरण्यकशिपुंविदुः प्रयंतंजाहिरण्याक्षमसूतत्साग्रतइति तथा
वैद्यके आत्रेयसंहितायां यदाविशेद्द्विधाभूतंबीजंपुष्पोपरिक्षरत् तदाभवेद्द्विधागर्भः सूतिर्वेशविपर्ययात् तेनप्रथमंजातः कनिष्ठः अनंतरंजातो
ज्येष्ठः अतएव यमयोश्चैवगर्भेषुजन्मतोज्येष्ठतामतेतिमनुनागर्भेजन्मतइत्युक्तं जन्मज्येष्ठेनचाह्वानंसुब्रह्मण्यास्वपिस्मृतमितितुमनुवचनं
एककोशजातयमलविषयं तथाचदेवलः यस्यजातस्ययमयोः पश्यतिप्रथमंमुखं संतानः पितरश्चैवतस्मिन्ज्येष्ठंप्रतिष्ठितमिति संतानोवंशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यदातुपुंसोबलातिशयाद्रेतसोद्विधापातः तदाकोशद्वयेयमलोत्पत्तिः यदातुगर्भवायुनाएकस्मिन्नेवकोशेरेतसोद्वैधीभावस्तदाएककोशएवयुगपद्यमलजन्मेति ननुस्त्रीणांविवाहउपनयतस्थानइतिस्मृतेः कन्याविवाहस्यपुत्रोपनयनस्यचसमानमितिचेत् न अष्टवर्षंब्राह्मणमुपनयेदितिवचने ब्राह्मणग्रहणात्सुभारमित्यनुवृत्तेश्च स्त्रीशूद्राणांव्रतबंधनिषेधाच्च यत्तुस्त्रीणांविवाहउपनयनस्थानइत्युक्तंतत्तासांद्विजत्वसिध्यर्थं अतःस्त्रीविवाहोविवाहएवनतूपनयनंतस्मात्सोदरकन्यापुत्रयोर्विवाहोपनयनयोः समानसंस्काराभावात् षण्मासमध्येपितेकार्ये शुभेइति शुभेविवाहादिमंगलकृत्येपितृक्रियाश्राद्धक्रियानकार्या मंगलेनाप्यमंगलमितिनारदोक्तेः अमंगलंश्राद्धं समाप्तेएवमंगलेकार्यं नमध्येइत्यर्थः १६ अथप्रतिकूलनिर्णयमिद्रवंशयाह वध्वावरस्येति निश्चयोत्तरंवाग्दानानंतरंवध्वाःकन्यायाः वरस्यवाकुलेवंशेत्रिपूरुषेपुरुषत्रयमध्येकश्चनसपिंडोनाशंप्राप्नुयात् तत्रमासोत्तरं मरणदिनादारभ्यत्रिंशद्दिनंप्रतिकूलं ततःशांत्यास्वनुष्ठितयाविवाहःसुखेनइष्यते इदंपित्रादिभिन्नविषयं मांडव्यः अन्येषांतुसपि

वध्वावरस्यापिकुलेत्रिपूरुषेनाशंव्रजेत्कश्चननिश्चयोत्तरं मासोत्तरंतत्रविवाहइष्यतेशांत्याथवासूतकनिर्गमेपरैः १७

डानामाशौचंमाससंमितं तदंतेशांतिकंकृत्वाततोलग्नंविधीयते पित्रादिमरणेतुविशेषः वरवध्वोःपितामातापितृव्यश्चसहोदरः एतेषांप्रतिकूलंचेन्महाविघ्नकरंभवेत् पितामातामहश्चैवमातावापिपितामही पितृव्यःस्त्रीसुतोभ्राताभगिनीवाविवाहिता एभिरेवविपन्नैश्चप्रतिकूलंबुधैःस्मृतं वाग्दानानंतरंयत्रकुलयोःकस्यचिन्मृतिः तदासंवत्सरादूर्ध्वंविवाहःशुभदोभवेत् पितुराशौचमब्दंस्यात्तदर्धंमातुरेवहि मासत्रयंतुभार्यायास्तदर्धंभ्रातृपुत्रयोः अन्यच्च प्रतिकूलंसपिंडस्यमासमेकंविवर्जयेत् विवाहस्तुतयोःपश्चात्तयोरेवविधीयते दुर्भिक्षेराष्ट्रभंगेचपित्रोर्वाप्राणसंशये प्रौढायामपिकन्यायांप्रतिकूलंनदुष्यति दीर्घरोगाभिभूतस्यदूरदेशस्थितस्यच उदासवर्तिनश्चैवप्रतिकूलंनविद्यते संकटेसमनुप्राप्तेयाज्ञवल्क्येनयोगिना शांतिरुक्तागणेशस्यकृत्वातांशुभमाचरेत् अथावश्यकत्वेऽपवादमाह अथवेति आशौचनिर्गमेशांत्यास्वनुष्ठितयाविवाहः परैराचार्यैरिष्यते ज्योतिःप्रकाशे प्रतिकूलेपिकर्तव्योविवाहोमासमंतरा शांतिंविधायगांदत्वावाग्दानादिचरेद्बुधः १७ ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथान्यदपिविशेषेणतरमुपजात्याह चूडाव्रतमिति अपिशब्दात्समावर्तनादि चौलमुपनयनंसमावर्तनंचविवाहानंतरंपुरुषत्रयमध्यएवनेष्टं तथाव्रतादुपनयनात्चूडाचपुरुषत्रयपर्यंतंनेष्टा तथावध्वाःस्नुषायाःप्रवेशःसुतायाविनिर्गमोपिपुरुषत्रयपर्यंतमेवनेष्टा मेधातिथिःपुरुषत्रयपर्यंतंप्रतिकूलंसगोत्रिणं प्रवेशान्निर्गमोतद्वत् तथामुंडनमंडनेइति तस्मान्मूलपुरुषस्यचतुर्थत्वेनायंदोषः सचायंदोषःपुरुषत्रयेपिषण्मासपर्यंतमेव अतएवषण्मासइतिमासषट्कानंतरंव्यरतोपिविवाहादिःशुभः एतन्मूलवाक्यंकुलेऋतुत्रयादर्वागित्यादिनाप्रागुक्तं अत्रापवादउच्यते वेति अथवाऽब्दभेदात्वर्षभेदात्षण्मासमध्येपिशुभः यथामाघेविवाहोवैशाखेचौलयज्ञोपवीतंवाभवतीत्यर्थः संहितासारएवल्यां फाल्गुनेचैत्रमासेतुपुत्रोद्वाहोपनायनेभेदादब्दस्यकुर्वीतनर्तुत्रयविलंघनमिति १८ अथमूलादिनक्षत्रोत्पन्नयोर्वधूवरयोःश्वशुरादिपीडकत्वंवसंततिलकेनाह श्वश्रूविनाशमिति अ

चूडाव्रतंचापिविवाहतोव्रताच्चूडाचनेष्टापुरुषत्रयांतरे वधूप्रवेशाच्चसुताविनिर्गमःषण्मासतोवाब्दविभेदतःशुभः १८
श्वश्रूविनाशमहिजौसुतरांविधत्तःकन्यासुतौनिर्ऋतिजौश्वशुरंहतश्च ज्येष्ठाभजाततनयास्वधवाग्रजंचशक्राग्निजाभवतिदेवरनाशकर्त्री १९ द्वीशाद्यपादत्रयजाकन्यादेवरसौख्यदा॥

१९ हिजोऽश्लेषानक्षत्रोत्पन्नौकन्यापुत्रौश्वश्र्वाःसाक्षाद्वरस्यमातुःकन्यायावासाक्षान्मातुःनाशंविधत्तःकुरुतः तथानिर्ऋतिजौमूलोत्पन्नौश्वशुरंहतःनाशयतःजनकंजनहींहंतिभर्तुर्मूलाहिधिष्ण्यजेतिवसिष्ठोक्तेःकुलन्यायत्वात्कन्यायामपिसाक्षान्मातरं ज्येष्ठेति ज्येष्ठानक्षत्रोत्पन्नाकन्यास्वधवाग्रजंभर्तुर्ज्येष्ठभ्रातरंहंति शक्राग्निजाविशाखोत्पन्नादेवस्यभर्तुःकनिष्ठभ्रातुर्नाशकर्त्री उक्तंच ऐंद्रीपत्यग्रजंहंतिदेवरंतुद्विदैवजेति १९ एतदपवादमनुष्टुभाह द्वीशाद्येति स्पष्टार्थं नहंतिदेवरंकन्यातुलामिश्राद्विदैवजा तदन्त्यपादजात्याज्यादुष्टावृश्चिकपुच्छवदितिवृद्धनारदोक्तेः मूलेति मूलचतुर्थचरणोत्पन्नौकन्यासुतौश्वशुरेसौख्यदौ अश्लेषाप्रथमचरणोत्पन्नौचश्वश्र्वःसौख्यदौ नारदःसुतःसुतावानियतंश्वशुरंहंतिमूलजौ तदन्त्यपादजौनैवतथाश्लेषाद्यपादजाविति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुंस्त्वमविवक्षितं ज्योतिर्निबंधेमौंजीवंधनानंतरं मूलाश्लेषादोषो नास्तीत्युक्तं मूलव्यालोद्भवोदोषः पुंसां मौंज्या विनश्यतीति भूपालवल्लभवचनादिति तेन मूलाश्लेषादोषः शूद्रविषयः पर्यवस्यति तथा ज्येष्ठोत्पन्नः पुमान् पत्न्यग्रजमग्रजां वा हंति विशाखोत्पन्नश्च पत्न्यनुजमनुजां हंति उक्तं च कलत्रपटले पत्न्यग्रजामग्रजं वा हंति ज्येष्ठर्क्षजः पुमान् तथा भार्यानुजां चैवानुजं हंति द्विदैवजइत्युक्तं तत्परिहारश्च तत्रैव मूलांत्यपादजो श्रेष्ठो तथाश्लेषाद्यपादजो द्वीशांत्यपादजो दुष्टो तद्ज्येष्ठांत्यपादजाविति ज्येष्ठाविशाखोत्पन्नपुंसः दोषतत्परिहारनिरूपणं ग्रंथेषु दृष्टत्वादुपेक्ष्यं २० अथाष्टकूटानां नामान्यनुष्टुभाह वर्णइति एते वर्णादिमैत्र्यां सत्यां गुणाधिका एकादिगुणाधिकाः स्युः यथा वर्णमैत्र्यामेको गुणः वश्ये द्वावित्यादि २१ तत्रादौ वर्णकूटं प्रमाणिकयाह द्विजाइति मीनकर्कटवृश्चिका द्विजाः ब्राह्मणाः ततोनंतरमन्यमेषसिंहधनुराशयो नृपाः क्षत्रियाः वृषकन्यामकरा विशो वैश्याः

मूलांत्यपादसार्पाद्यपादजाते तयोः शुभे २० वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकं गणमैत्रं भकूटं च नाडी चैते गुणाधिकाः २१ द्विजाझषालिकर्कटास्ततो नृपा विशोंघ्रिजाः वरस्य वर्णतोधिका वधूर्न शस्यते बुधैः २२ हित्वा मृगेंद्रं नरराशिवश्याः सर्वे तथैषां जलजाश्च भक्ष्याः सर्वेपि सिंहस्य वशे विनालिं ज्ञेयं नराणां व्यवहारतोऽन्यत् २३ ॥ ॥ ॥

मिथुनतुलाकुंभाः अंघ्रिजाः शूद्राः तत्र वरवधूराश्योर्वर्णौ ज्ञात्वा वरस्य वर्णतो ब्राह्मणादिका वधूरधिका ज्येष्ठवर्णा बुधैर्न शस्यते किंतु समा हीना वा शस्यत इत्यर्थः एको गुणः सदृग्वर्णे तथा वर्णोत्तमे वरे हीनवर्णे वरे शून्यं केप्याहुः सदृशे दलमिति २२ अथ वश्यकूटमिंद्रवज्रयाह हित्वेति नरराशयो मिथुनकन्यातुलाः एषां मेषादयः सर्वेपि सिंहं त्यक्त्वा वश्याः ननु जलचराणां सहानवस्थानात् कथं वश्यत्वं तत्राह जलजास्तु भक्ष्या इति एषां नरराशीनां जलजाः मकरकुंभमीनकर्कास्तु भक्ष्याः किं पुनर्वश्या इति सूचयितुं तु शब्दः सिंहस्यालिं वृश्चिकं विना सर्वे वश्याः अन्यदनुक्तं चतुष्पदानां जलचराणां वश्यावश्यं नराणां मनुष्याणां व्यवहारतो ज्ञेयं वश्यकूटं वश्यभक्ष्यवैरभेदेन त्रिधा तत्र वरराशेः स्त्रीराशौ वश्ये सति गुणद्वयं भक्ष्ये एको गुणः वैरे गुणाभावः २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथताराकूटमनुष्टुभाह कन्यर्क्षादिति कन्यानक्षत्राद्वरनक्षत्रंयावद्गणयेत् तथावरनक्षत्रादपिकन्यानक्षत्रंगणयेत्ततोवशिष्टकेनवभिर्भक्तेयद
वशिष्टंतच्चेत्त्रिपंचसप्तमितंभवेत्तदाऽसदशुभंस्मृतं अन्यथाएकद्विचतुःषडष्टनवमितंचेत्तदाशुभं उभयत्रापित्रिपंचाद्रिमितशेषेताराभैत्रीनास्त्येव
गुणाभावः एकत्रचेत्तदाऽर्धमैत्रीतदासार्धैकोगुणः उभयत्रापिचेत्र्यादिशेषाभावस्तदापूर्णामैत्रीगुणत्रयं २४ अथयोनिकूटंशार्दूलविक्रीडि
तद्वयेनाह अश्विन्यंबुपयोरिति ज्येष्ठामैत्रभयोरिति अश्विनीशततारकयोर्हयोश्वोयोनिरुक्तःएवंस्वातीहस्तयोःकासरोमहिषःलुलायोमहिषोवाह
द्विषट्कासरसैरभाइत्यमरोक्तेः कर्णःश्रवणः अंबुपूर्वाषाढातयोर्वानरोमर्कटः चाद्रंमृगः अज्ञयोनिर्ब्रह्मा तद्वद्रोहिणीतयोरहिःसर्पः कुरंगोहरिणः

कन्यर्क्षाद्वरभंयावत्कन्याभंवरभादपि गणयेन्नवहृच्छेषेत्रीषद्रिभमसत्स्मृतं २४ अश्विन्यंबुपयोर्हयोनिगदितःस्वात्य
र्कयोःकासरःसिंहोवस्त्वजपाद्भयोःसमुदितोयाम्यान्त्ययोःकुंजरः मेषोदेवपुरोहितानलभयोःकर्णाम्बुनोर्वानरःस्याद्वैश्वाभि
जितोस्तथैवनकुलश्चाद्राब्जयोन्योरहिः २५ ज्येष्ठामैत्रभयोःकुरंगउदितोमूलार्द्रयोःश्वातथामार्जारोदितिसार्पयोरथमघा
योन्योस्तथैवोंदुरुःव्याघ्रोद्वीशभचित्रयोरपिचगौरार्यम्णबुध्न्यर्क्षयोर्योनिःपादगयोःपरस्परमहावैरंभयोन्यास्त्यजेत् २६

अनुराधाज्येष्ठयोः द्वीशभंविशाखाचित्रयोर्व्याघ्रः बुध्न्यर्क्षंउत्तराभाद्रपदाअर्यमोत्तराफाल्गुनीतयोर्गोयोनिः अन्यत्स्पष्टं फलमाह पादगयोरिति
एकस्मिन्पादेचरणेगतयोरुक्तनक्षत्रयोन्योःपरस्परमहावैरंभवेत् यथा अश्विन्यंबुपयोर्हयोनिगदितःस्वात्यर्कयोःकासरइतिपादःतत्रोक्तयोर्भयो
न्योरश्वमहिषयोर्महावैरं एवंसिंहहस्तिनोरित्यादि एतत्फलमाह अत्रिःएकयोनिषुसंपत्त्यैदंपत्योःसंगमःसदाभिन्नयोनिषुमध्यःस्यादरिभावेनचेत्तयोः
योनेरघावेनोद्वाहःसतुकार्योवियोगदःराशिवश्यंचयद्यस्तिकारयेत्तुदोषभाक् अत्रातिवैरवैरोदासीनमैत्रातिमैत्रक्रमेणगुणविभागः गोव्याघ्रादीनांअतिवै
रंतत्रगुणाभावः श्वुनकमार्जारादीनांवैरंतत्रैकोगुणः अश्वमेषादीनामौदास्यंतत्रगुणद्वयं गोमेषादीनांमैत्रंतत्रगुणत्रयं एकयोनौअतिमैत्रंतत्रगुणचतुष्टयं २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु॰टी॰ अथ ग्रहमैत्रीं शार्दूलविक्रीडिताभ्यामाह मित्राणीति मित्रेचेति द्युमणेः सूर्यस्य भौमगुरुचंद्राः मित्राणि शुक्रशनी अस्य वैरिणौ अस्य सौम्यः बुधः समः वि
वि॰प्र धोः चंद्रस्य बुधरवी मित्रे पुनरस्य विधोर्द्विषन् शत्रुर्नास्ति मंगलगुरुशुक्रशनयः समाएव अथ भौमस्य गुरुचंद्रसूर्या मित्राणि बुधः शत्रुः शुक्रशनी स
६९ मौ अथ शशभृत्सूनोः बुधस्य सिताहस्करौ शुक्ररवी मित्रे अस्य बुधस्य शशी शत्रुः गुरुशनीभौमाः समाः अथ गीष्पतेर्गुरोः सूर्यभौमचंद्रा मित्राणि बुधशु
क्रौ शत्रू सूर्यजः शनिः समः अथ कवेः शुक्रस्य बुधशनी मित्रे चंद्रसूर्यौ शत्रू कुजगुरू समौ अथ शनेः शुक्रबुधौ मित्रे रविचंद्रभौमाः द्विषो वैरिणः अन्यो
गुरुः समः अत्र गुणविचारः तत्रैकाधिपतित्वे परस्परमित्रत्वे पंचगुणाः सममित्रत्वे चत्वारः उभयसमत्वे त्रयो गुणाः मित्रवैरे गुणद्वयं समवैरे एकगुणः

मित्राणि द्युमणेः कुजेज्यशशिनः शुक्रार्कजौ वैरिणौ सौम्यश्चास्य समो विधोर्बुधरवी मित्रे न चास्य द्विषत् शेषाश्चास्य समाः
कुजस्य सुहृदश्चंद्रेज्यसूर्या बुधः शत्रुः शुक्रशनी समौ च शशभृत्सूनोः सिताहस्करौ २७ मित्रे चास्य रिपुः शशी गुरुशनि
क्ष्माजाः समा गीष्पतेर्मित्राण्यर्ककुजेंदवो बुधसितौ शत्रू समः सूर्यजः मित्रे सौम्यशनी कवेः शशिरवी शत्रू कुजेज्यौ समौ मि
त्रे शुक्रबुधौ शनेः शशिरविक्ष्माजा द्विषोऽन्यः समः २८ रक्षोनरामरगणाः क्रमतो मघाहिवस्विंद्रमूलवरुणानिलतक्षराधाः
पूर्वोत्तरात्रयविधातृयमेशभानि मैत्रादितीदुहरिपौष्णमरुल्लघूनि २९ निजनिजगणमध्ये प्रीतिरत्युत्तमा स्यादमर
मनुजयोः सा मध्यमासप्रदिष्टा ॥ परस्परवैरेगुणाभावः २७ २८ अथ गणकूटं वसंततिलकया शालिन्या चाह रक्षोनरेति निजनिजेति क्रमतो

रक्षोनरामरगणाः पादत्रयेणोच्यंते तक्षचित्रा राधाविशाखा मघादि एतत्पर्यंतं नक्षत्राणि रक्षोगणः पूर्वात्रयमुत्तरात्रयं विधाता रोहिणी यमो भरणी ईश राम॰
आर्द्रा एतानि भानि नरगणो मनुष्यगणः मैत्रमनुराधा अदितिः पुनर्वसुः इंदुर्मृगः हरिः श्रवणः पौष्णं रेवती मरुत्स्वाती लघूनि अश्विनी पुष्यहस्ताः एतानि ६९
नव भान्यमरगणो देवगण इति २९ निजेति स्वस्वगणे विद्यमानयोः स्त्रीपुरुषनक्षत्रगणयोः रत्युत्तमा प्रीतिः स्यात् अमरमनुजयोर्देवमनुष्ययोः स्त्रीपुरुषयोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परस्परं प्रीतिर्मध्यमा स्यात् असुरमनुजयो राक्षसमनुष्ययोः स्त्रीपुरुषयोर्मृत्युरेव प्रदिष्टः प्रबलदुर्बलन्यायेन मनुष्यगणस्यैव नाशः शार्ङ्गीये रक्षोगणः पुमान् चेत् स्यात्कन्या भवति मानवी केपीच्छन्ति तदोद्वाहं व्यस्तं कोपीह नेच्छति एतत्तुल्यन्यायाद्देवराक्षसयोरपि द्रष्टव्यं अस्यापवादमाह गर्गः रक्षोगणो यदा पुंसां कुमारी नृगणा भवेत् सद्भकूटं खगप्रीतिर्यो निशुद्धं शुभं तदेति अत्रेयं गुणकल्पना नरराक्षसयोर्मेह देरं तत्र गुणाभावः देवराक्षसयोर्वैरं तत्र गुणाभावः देवमनुष्यत्वे चत्वारः गणैकत्वे षड्गुणाः ३० अथ राशिकूटमनुष्टुभाह मृत्युरिति स्त्रीपुरुषयोः परस्परं षष्ठाष्टमराशित्वे सति मृत्युर्ज्ञेयः एवं नवात्मजनवपंचमेऽपत्यानां हानिः एवं द्विर्द्वादशे निर्धनत्वं दारिद्र्यं स्यात् अन्यत्र तृतीयैकादशे चतुर्थदशमे समसप्तमे वा सति सौख्यकृत्याणिपीडनं स्यात् ३१ अथास्य दुष्टभकूटस्य परिहारं शार्दूलविक्रीडितेनाह प्रोक्ते इति स्त्रीपुरुषराश्योर्द्वयोरेकाधिपत्ये सति एकस्वामिकत्वे सति प्रोक्ते दुष्टकूटे

असुरमनुजयोश्चेन्मृत्युरेव प्रदिष्टो दनुजविबुधयोः स्याद्वैरमेकांततोत्र ३० मृत्युः षडष्टके ज्ञेयोऽपत्यहानिर्नवात्मजे द्विर्द्वादशे निर्धनत्वं द्वयोरन्यत्र सौख्यकृत् ३१ प्रोक्ते दुष्टभकूटके परिणयस्त्वेकाधिपत्ये शुभोऽथो राशीश्वरसौहृदेपि गदितो नाड्यृक्षशुद्धिर्यदि ।"

ऽऽ षडष्टकादावपि विवाहः शुभो गदितः यथा मेषवृश्चिकयोः तुलावृषभयोर्वा नवपंचमत्वे काधिपत्याभावः द्विर्द्वादशे मकरकुंभयोः अथवा राशीश्वरयो राशिस्वामिनोः सौहृदे मैत्रेपि यदि नाडीनक्षत्रयोः शुद्धिर्वेधो न भवेत्तदापि दुष्टभकूटके विवाहः शुभः यथा षट्काष्टके मीनसिंहराश्योर्नवपंचमे मेषधनुषोर्द्विर्द्वादशे मीनमेषयोरित्यादि तथा च वसिष्ठः द्विर्द्वादशे वा नवपंचमे वा षट्काष्टके राक्षसयोषिता वा एकाधिपत्ये भवने शमैत्रे शुभाय पाणिग्रहणं विधेयमित्यादि अन्यच्च विषमात्कन्यकाराशेः षष्ठं षष्ठाष्टकं न सत् समात्षष्ठं शुभं ज्ञेयं विपरीतं न शोभनं अन्यर्क्षेऽपयोरिति अन्यर्क्षे प्रीतिषड्वाष्टकादिभ्योऽन्यराशेर्राशिस्वामिनोः परस्परशत्रुत्वे वा सति अंशपयोस्तद्राशिनवांशस्वामिनोर्बलित्वसखित्वे स्यातां बलित्वं च सखिता च प्रथमाद्विवचनान्तं पदं बलित्वे उच्चादिस्थानस्थितत्वेन सबलत्वं सखिता परस्परमैत्री ते उभे चेद्भवतः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा नाड्यृक्षशुद्धौ नाडीनक्षत्रयोर्वेधाभावे सति तथा ताराशुद्धिविशेषे च सति राशिवशताभावे च राशिवश्यत्वे च सति दुष्टभकूटके पि विवाहः शुभो निरु
क्तः उक्तं च जगन्मोहने वसिष्ठेन राशिनाथे विरुद्धे पि सबलांशकाधिपौ तन्मैत्रे पि च कर्तव्यं दंपत्योः सुखमिच्छतेति अन्यच्च तस्मिन्नेव प्रकरणे वसि
ष्ठवाक्यं राशिनाथे विरुद्धे पि मित्रत्वे चांशनाथयोः विवाहं कारयेद्धीमान् दंपत्योः सौख्यवर्धनमिति अन्यच्च तस्मिन्नेव प्रकरणे वसिष्ठवाक्येषु अन्यतर
वाक्यानर्थक्यापत्तेरुपसंहारन्यायेन प्रवर्तते तेनावश्यं वाक्यद्वयस्य भिन्नार्थत्वं वाच्यं तत्र कस्य कोर्थ इति संदेहे न्यूनार्थं द्वितीयं वचनं केवलग्रहवै
रापवादकं तुल्यबलत्वात् अंशनाथसबलत्वाभिधायकं प्रथमवचनं उभयविरोधस्य ग्रहवैरराशिवैररूपस्यापवादकं तेन राशिनाथे विरुद्धे न्यत्रा
शौ च नाथौ च एतेषां समाहारो राशिनाथं तस्मिन् राशिनाथे तथा चायमर्थः राशौ विरुद्धौ षट्काष्टकादिना नाथौ विरुद्धौ कयोरित्याकांक्षायां ययोः

अन्यर्क्षेशपयोर्बलित्वसखिते नाड्यृक्षशुद्धौ तथा ताराशुद्धिवशेन राशिवशताभावे निरुक्तो बुधैः ३२ मैत्र्यां राशिस्वामि
नोरंशनाथद्वंद्वस्यापि स्याद्गुणानां न दोषः खेटारित्वं नाशयेत् सद्भकूटं खेटप्रीतिश्चापि दुष्टभकूटं ३३ ३३ ॥

षट्काष्टकादिविचारस्तयोरेव सन्निहितत्वात् ग्रहणं तयोः समुचिते सति विवाहः शुभः नन्वस्मिन्वाक्ये क्लिष्टव्याख्याने किं मानं उच्यते अंशनाथसबलत्व
स्याधिककरणमेव न च युगपदुत्पन्नस्य दोषद्वैविध्यस्य राशिविरोधग्रहविरोधरूपस्य परिहारकरूपमित्यवगम्यते अस्मिन्नपि पक्षे नाडीशुद्धिस्ताराशुद्धिः
राशिवशता चापेक्षिता इति ३२ अथ दुष्टानां गणकुटभकूटानां परिहारं शालिन्याह मैत्र्यामिति स्त्रीपुरुषयोः राशिस्वामिनोर्मैत्र्यां सत्यां तथा राशिन
वांशनाथयोः द्वंद्वस्यापि मैत्र्यां सत्यां दुष्टगुणानां दोषो न स्यात् अत्रिः राशीशयोः सुहृद्भावे मित्रत्वे चांशनाथयोः गणादिदौष्ट्येप्युद्वाहः पुत्रपौत्रप्रव
र्धनः अथ सद्भकूटं तृतीयैकादशादिकं खेटारित्वं ग्रहवैरकृतं दोषं नाशयेत् एवमेव खेटप्रीतिः ग्रहमैत्री चापि दुष्टभकूटं षडष्टादिकं नाशयेत् अ
सद्भकूटे गुणाभावः भकूटदोषापवादे चत्वारो गुणा इति ३३ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथनाडीकूटंस्त्रग्धरयाह ज्येष्ठारौद्रेति ज्येष्ठा रौद्रमार्द्रा अर्यमोत्तराफाल्गुनी अंभः पतिर्वरुणः शततारकाएभ्योनक्षत्रेभ्योयुगयुगंद्वयं ज्येष्ठामू
लं उत्तराहस्तः आर्द्रापुनर्वसुः शततारापूर्वाभाद्रपदा दास्त्रभमश्विनीच एतन्नक्षत्रनवकंपरस्परमेकनाडीत्युच्यते पुष्यमृगचित्राऽनुराधाभरणीध
निष्ठापूर्वाषाढापूर्वाफाल्गुनीउत्तराभाद्रपदाएतन्नक्षत्रनवकंमध्यानडीत्युच्यते अथवाय्वग्निव्यालविश्वोडुयुगयुगं वायुस्वातीतंयुगद्वयंस्वाती विशा
खा अग्निः कृत्तिकारोहिणी व्यालः अश्लेषामघा विश्वोडुयुगंविश्वेउत्तराषाढाश्रवणश्च पौष्णभंरेवती एतन्नक्षत्रनवकंअपराऽतृतीयेकनाडीत्युच्य
ते एतत्फलमाह दंपत्योः स्त्रीपुंसयोः एकनाड्यांपरिणयनमसत् दुष्टफलस्यात् मध्यनाड्यांहिनिश्चयेनमृत्युर्द्वयोरपिस्यात् नारदेनतुविशेषउक्तः
चतुस्त्रिद्व्यंघ्रिभोत्थायाः कन्यायाः क्रमशोऽश्विभात् वह्निभादिंदुभान्नाडीत्रिचतुः पंचपर्वसु गणयेत्संख्ययाचेकनाड्यांमृत्युर्नसंशयः एकनाडीविवा
हश्चगुणैः सर्वैः समन्वितः वर्जनीयः प्रयत्नेनदंपत्योर्निधनंयतइति अमुमर्थंस्पष्टमाहगर्गः चतुष्पात्कन्यकात्तक्षंगणयेदाश्विनादिकं त्रिभं
संख्यापसव्येनभिन्नपर्वशुभावहं कन्यकाभत्रिपाचेत्स्याद्गणयेत्कृत्तिकादिकं चतुर्भिः पर्वभिस्तद्वदभिजित्तारकान्वितं कन्यकर्क्षंद्विपाचेत्स्याद्गण
येत्सौम्यभादिकं पंचभिस्त्ववरोहेतुपंचमांगुलिवर्जितं आसन्नात्वेकनाडीस्यादासन्नमृतिदायिनी दूरस्याचैकनाडीस्यात् दूरस्थानिष्टकारिणीति ना
डीविचारेचंडेश्वरः एष्टमध्येशुभंसमन्वितभोगः कोऽडेवनिताविततवियोगः मध्यरेखेभवतिविवाहे उभयोर्मरणंवदतिवराहः अश्व्यादिनाडीवेधर्क्षे
क्रमात्पष्ठद्वितीयकं याम्यादितुर्यंतुर्यंचकृत्तिकादिद्विषष्ठकं अन्यच्च अर्केंदुजक्षोणितनूजजीवाः केतुः सितोराहुशशांकसौराः जन्मादिनाडीत्रि
तयेशुभाः स्युः शुभेऽशुभंस्यादशुभेऽशुभंच नद्यथा अर्कः १।१०।१९ बुधः २।११। २० मंगलः ३।१२।२१ बृहस्पतिः ४ १३ २२ केतुः ५ १४ २३ शु
क्रः ६ १५ २४ राहुः ७।१६ २५ चंद्रः ८।१७।२६ शनिः ९।१८।२७। शुभग्रहनाडीनक्षत्रेशुभकार्यंकुर्यान्नाशुभग्रहनाडीनक्षत्रेइत्यर्थः चतुर्नाडी
त्वहल्यायांपांचालेपंचनाडिका त्रिनाडीसर्वदेशेषुवर्जनीयाः प्रयत्नतइति मनुस्तु अहल्येतुचतुर्नाडीसंयोगः कालमृत्युदः एषयोगोन्यदेशेषुअप
मृत्युफलप्रदः पंचनाडीसमायोगः पांचालेकालदंडदः इतरत्रसमायोगोदुःखदारिद्र्यदोषकृत् त्रिनाड्यांतुसमायोगः सर्वत्रानिष्टकारकइति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु·टी· आवश्यकत्वेगुरुः। दोषापनुत्तयेनाड्यां मृत्युंजयजपादिकं विधायब्राह्मणांश्चैवतर्पयेत्कांचनादिना हिरण्मयींदक्षिणांचदद्याद्वर्णादिकूटके गा
वि·प्र वोन्नवसनंहेमसर्वदोषापहारकमिति अन्यच्चषड्वाष्टकेगोमिथुनंप्रदद्यात्कांस्यंसरूप्यंनवपंचमेपि वस्त्रप्रदेयंकनकंचशत्र्याद्विद्वौदशेब्रा
७१ ह्मणतर्पणंचेति ३४ अथैंद्रवज्रया पूर्वमध्यापरभागयोगीनिभान्याह पौष्णेति पौष्णाद्रेवत्याःषट्भं भानिजेन्त्यभिप्रायमेकवचनं पूर्वार्द्धयोगिनि
ज्ञेयानि आर्द्रादिद्वादशमध्यभागयोगिनिज्ञेयानि ज्येष्ठादीनिनवअपरभागयोगिनिज्ञेयानि फलमाह भर्त्ताप्रियइति अयंभावः राज्ञामंतःपुरस्थस्त्री
समागमेगणिकादिसमागमेवापूर्वार्द्धयुतिनक्षत्रेसतिस्त्रीणांभर्त्ताप्रियः मध्यभागयुजिभेपरस्परंप्रीतिर्भवेत् परेपरभागयुतिभेस्त्रीनृणांप्रियाभवेदिति

ज्येष्ठारौद्रार्यमांभःपतिभयुगयुगंदास्त्रभंचैकनाडीपुष्येंदुत्वाष्ट्रमित्रांतकवसुजलभंयोनिबुध्न्येचमध्या वाय्वग्निव्यालवि
श्वोडुयुगयुगमथोपौष्णभंचापरस्यादंपत्योरेकनाड्यांपरिणयनमसन्मध्यनाड्यांहिमृत्युः ३४ पौष्णेशशाक्राद्दसभूर्यनं
दपूर्वार्धमध्यापरभागयुग्मं भर्त्ताप्रियःप्राग्युजिभेस्त्रियास्यान्मध्येद्वयोःप्रेमपरेप्रियास्त्री ३५ अकचटतपयशवर्गाः
खगेशमार्जारसिंहशुनां सर्पाखुमृगावीनांनिजपंचमवैरिणामष्टौ ३६ राश्यैक्येचेद्भिन्नमृक्षंद्वयोःस्यात्नक्षत्रैक्येराशि
एवंवधूवरयोर्नवसमागमेपिज्ञेयमितिरत्नमालाटीकायांमहादेवेनोक्तं भागमपि ३५ अथप्राच्यसंमतंवर्गकूटमार्ययाह अ ऽऽयुग्मंतथैव॥
कचटेति अवर्गोवसंज्ञकः कुचुटुतुपुइतिपंचवर्गाः एकोयवर्गोन्यःशवर्गः एवमष्टौवर्गाः तत्रअवर्गःखगेशस्यगरुडस्य कवर्गोमार्जारस्य चव
र्गःसिंहस्य टवर्गःशुनः तवर्गः सर्पस्य पवर्गआखोर्मूषकस्य यवर्गोमृगस्यशवर्गोऽवेर्मेषस्य अत्रनिजात्स्वस्मात्पंचमावैरिणोयेषांतेतथोक्ताः राम:
गरुडसर्पयोः मार्जारमूषकयोःसिंहमृगयोःश्वमेषयोः परस्परंमहावैरमित्यर्थः स्त्रीपुंसयोर्नक्षत्रंभस्यवर्गेचेत्तदाअशुभंयदात्वेकवर्गेतदा ७१
शुभं एतच्चस्वामिसेवकयोरपिविचार्यं ३६ इदानींनक्षत्रराश्यैक्येविशेषंशालिन्याह राश्यैक्येचेदितिद्वयोर्वधूवरयोःएकराशित्वेसतियदिभिन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृक्षंस्यात् तदानाडीदोषोगणानांचदोषोनस्यात् यथा शततारापूर्वाभाद्रपदापादत्रयंच तथैवनक्षत्रैक्येराशियुग्मंराशिद्वयंचेत्स्यात्तदापिप्रागुक्तोदोषो
नस्यात् यथा पूर्वाभाद्रपदापादत्रयंचतुर्थचरणश्च अत्रापिविशेषमाहगर्गः एकराशौपृथक्धिष्ण्येपुंताराप्रथमाभवेत् अतीवशोभनाप्रोक्तास्त्रीता
राचेत्त्वशोभना अथैकराशिनक्षत्रैक्यःपवादमाह नक्षत्रैक्येइति वधूवरयोः राश्यैक्येनक्षत्रैक्येचयदिचरणभेदस्तदापिशुभंस्यात् जन्मनक्षत्रा
ज्ञानेउपायमाहवसिष्ठः अज्ञातजन्मनांनृणांनामभेपरिकल्पना तेनैवचिंतयेत्सर्वंराशिकूटंद्विजन्मवत् जन्मभंजन्मधिष्ण्येननामभंनामधिष्ण्यतः
व्यत्ययेनयदायोज्यंदंपत्योर्निधनप्रदमिति ३७ सेवकादिभस्यस्वाम्यादिभात् पूर्वोक्तेविशेषंवसंततिलकयाहसेव्याधमर्णेतिस्पष्टार्थं तथाचो
क्तंडामरसंग्रहे भामिनीजन्मनक्षत्राद्द्वितीयंपतिजन्मभं नशुभंभर्तृनाशायकथितंब्रह्मयामले प्रथमंसेव्यजन्मर्क्षंद्वितीयंसेवकस्यच नसेवासुस्थि

नाडीदोषोनोगणानांचदोषोनक्षत्रैक्येपादभेदेशुभंस्यात् ३७ सेव्याधमर्णयुवतीनगरादिभंचेत्पूर्वंहिभृत्यधनिभर्तृपुरा
दिसद्मात् सेवाविनाशधननाशनभर्तृनाशग्रामादिसौख्यहृतिदंक्रमशःप्रदिष्टं ३८ कुजशुक्रसौम्यशशिसूर्यचंद्रजाःकवि
भौमजीवशनिसौरयोगुरुः इहराशिपाःक्रियमृगास्यतौलिकेंदुभतोनवांशविधिरुच्यतेबुधैः ३९ समगृहमध्येशशिरविहोरा
विषममध्येरविशशिनोःसा ४० ऽऽराततस्यजलबुद्बुदवत्प्रियेऋणग्राहकजन्मर्क्षंप्रथमंऋणदस्यभात् द्वितीयंऋणसंबंधोनकर्तव्यःकदाचन कदाचिद्द्र
व्यलोभेनक्रियतेनैवलभ्यते पार्वतीप्राणनाथेनप्रोक्तंडामरसंग्रहे ग्रामभंप्रथमंयस्यद्वितीयंजन्मभंभवेत् नग्रात्यःसर्वथाग्रामोयतःप्राप्यार्थनाशदइति ३८ अ
थराशिस्वामिनोमंजुभाषिण्याह कुजशुक्रेतिस्पष्टार्थं क्रियमृगास्येतिक्रियोमेषः मृगास्यंमकरः तौलिकस्तुलः इंदुभंकर्कः एभ्योराशिभ्योबुधैर्नवांशविधि
रुच्यते मेषेमेषादेव वृषेमकरात् मिथुनेतुलतः कर्केकर्कादेव एवंसिंहेमेषात् एवंकन्यादिषुमकरादिभ्यः एवमेवधनुरादिष्वपिमेषादिभ्यएव ३९
अथहोरांगायत्रीछंदोभेदेनशशिवदनावृत्तेनाह समगृहेति पंचदशभागमितैकैकाहोरा ततःसमराशिमध्येप्रथमाचंद्रस्यद्वितीयासूर्यस्य विषमराशिम
ध्येप्रथमारवेरपराचंद्रस्येत्यर्थः ४०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्रिंशांशद्रेष्काणांश्च वसंततिलकयाह शुक्रेति समराशिमध्ये क्रमेणप्रथमतः पंचांशानांशुक्रः स्वामी ततः शैलांशानांसप्तानांबुधः ततोऽष्टानांगुरुः ततः
पंचानांशनिः ततः पंचानांभौमः विषमभेतु अस्मात्समराशेर्विपरीतंज्ञेयं प्रथमः पंचानांभौमः ततः पंचानांशनिः ततोष्टानांजीवः ततःसप्तांशानांबुधः
ततः पंचांशानांशुक्रः अयंत्रिंशांशकः संज्ञः द्रेष्काणकाइति अस्यप्रमाणंदशांशाः तत्रप्रथमदशांशाः प्रथमोद्रेष्काणःसप्रथमस्यतदधीशस्य ततोदशां
शाः विंशतिभागपर्यंतंद्वितीयोद्रेष्काणःसःस्वराशितःपंचमराशीश्वरस्य ततोविंशतिविभागानंतरंदशांशास्तृतीयोद्रेष्काणःसःस्वराशेर्नवमाधीश्वरस्य
यथा मेषप्रथमद्रेष्काणोभौमस्य द्वितीयःसूर्यस्य तृतीयोगुरोरिति ४१ अथद्वादशांशंषट्वर्गोपसंहारंचसफलंवसंततिलकयाह स्याद्वादशांशइति
इहषट्वर्गेद्वादशांशाःराशितःस्वराशेरेवसार्धभागद्वयात्मकोज्ञेयः मेषस्यमेषादि वृषस्यवृषादि इत्यर्थः गेहं होरा दृक्कः नवमांशः द्वादशांशः त्रिंशां

शुक्रज्ञजीवशनिभूतनयस्यबाणाः शैलाष्टपंचविशिखाः समराशिमध्ये त्रिंशांशकोविषमभेविपरीतमस्माद्रेष्काणकाः
प्रथमपंचनवाधिपानां ४१ स्याद्द्वादशांशइहराशितएवगेहंहोराथदृक्कनवमांशकसूर्यभागाः त्रिंशांशकश्चषडिमेकथि
तास्तुवर्गाःसौम्यैः शुभंभवतिचाशुभमेवपापैः ४२

शः इमेषड्वर्गाः कथिताः एतेवर्गाःसौम्यग्रहाणांचेद्भवंतितदाशुभं पापानांचेदशुभं मि
श्राश्चेदधिकवर्गसदृशंफलं अत्रनारदादिभिरेकविंशतिर्महादोषाउक्ताः यथा पंचांगशुद्धिरहितोदोषस्त्वाद्यः प्रकीर्तितः उदयास्तशुद्धिरहितोद्वितीयःसू
र्यसंक्रमः तृतीयःपापषट्वर्गोभृगुःषष्ठःकुजोष्टमः गंडांतकर्तरिरिष्फषडष्टेंदुश्चसग्रहः दंपत्योरष्टमंलग्नं·राशिर्विषघटीतथा दुर्मुहूर्तोवारदोषः खार्जूरि
कसमांघ्रिभं ग्रहणोत्पातभंक्रूरविद्धर्क्षंक्रूरसंयुतं कुनवांशोमहापातोवैधृताश्चैकविंशतिरिति अन्यैस्तुदशदोषाउक्ताः वेधश्चलत्ताचतथाचपातःखार्जू
रयोगंदशयोगचक्रं पुनश्चजामित्रमुपग्रहाश्च बाणाख्यवज्रौदशचैवदोषाइति अथग्रथकृतालक्षणस्यपृथकवक्तव्यत्वाद्दोषनामानितोक्तानि तत्र
पंचांगशुद्धिदुर्मुहूर्तवारदोषग्रहणोत्पातनक्षत्रदोषाश्चाग्रेशुभाशुभप्रकरणेनिरूपिताएवेतिपुनर्नोच्यंतेदुर्मुहूर्तवारदोषयोः पुनरभिधानप्रयोजनं
तत्रैववक्ष्यामः अनिरूप्यंते तत्रपापषट्वर्गाख्योदोषः कुजशुक्रेत्यादिभिश्चतुर्भिः श्लोकैर्निरूपितः ४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथगंडांतदोषंशार्दूलविक्रीडितेनाह ज्येष्ठापौष्णेति गंडांतंनामसंधिविशेषः सचानेकविधः नक्षत्रतिथिलग्नसंधिः तथायोगकरणवर्षायनर्तुमासपक्ष
दिनरात्रिमध्याह्नप्रातः सायंनिशीथसंधिश्चेति तत्रनक्षत्रतिथिलग्नसंधिर्गंडांतसंज्ञाउच्यते ज्येष्ठापौष्णभरेवतीसार्पभमाश्लेषाएतेषामंतघटिकाद्वयंत
थामूलाश्विनीमघानामादौघटिकाद्वयंतद्दस्यनक्षत्रस्यगंडांतंज्ञेयं यथा रेवत्यश्विन्योराश्लेषामघयोर्ज्येष्ठामूलयोरंतरालवर्तिघटीचतुष्टयंनक्षत्रगंडां
तमशुभदमित्यर्थः अथलग्नगंडांतंकर्केति कर्कः अलिर्वृश्चिकः अंडजोमीनः मीनोवैसारिणांडजइत्यभिधानात् एषांलग्नानामंततोर्धघटिका सप्तम्य
र्थेनसिच्अंतेर्धघटिका तथासिंहमेषोप्रसिद्धौ अश्वोधनुः एषांलग्नानामादिगतार्धघटिकालग्नगंडांतं यथाकर्कसिंहयोर्मीनमेषयोर्वृश्चिकधनुषोः चां
तरालवर्तिन्येकाघटिकालग्नगंडांतंअशुभदमित्यर्थः पूर्णांतेइति पूर्णाः पंचमीदशमीपंचदश्यस्तासामंतेघटिकैका तथानंदाःप्रतिपत्षष्ठ्येकादश्यः

ज्येष्ठापौष्णभसार्पभांत्यघटिकायुग्मंचमूलाश्विनीपित्र्यादौघटिकाद्वयंनिगदितंतद्भस्यगंडांतकं कर्कालिअंडजभांततोर्धे
घटिकासिंहाश्वमेषादिगापूर्णांतात् घटिकात्मकंत्वशुभदंनंदातिथिश्चादिमं ४३ लग्नात्पापावृज्वनृजूव्ययार्थस्थौयदात

तासामादिगतैकाघटिकातिथिगंडांतंनाम यथा पंचमीषष्ठ्योः दशम्येकादश्योः पंचदशीप्रतिपदोः वातिथ्योरंतरालवर्तीघटीद्वयंतिथिगं ॥८८॥
डांतमशुभमित्यर्थः एवंगंडांतसंज्ञः संधिस्तु अथान्येपिसंधयोवसिष्ठेनोक्तः पक्षाब्दसंधिस्त्रिदिनंचमाससंधिस्त्रिनाड्यः खलुसंध्ययोश्च नाड्यश्चन
क्षत्रतिथिऋक्षयोगसंधिस्तदर्धकरणस्यसंधिः पक्षांतेपुत्रनाशः स्यान्मासांतेतुधनक्षयः वर्षांतेवर्गनाशः स्यात्ग्रहणात्सर्वनाशनमिति आवश्यकत्वेतु नक्ष
त्रयोगतिथिसंधिषुनाडिकैकातिथ्यष्टविंशतिपलैः सहितोभयत्र कर्कालिमीनतनुसंधिषुदिक्पलानिवर्ज्यानिशेषविवरेषुचपंचपंचेति वासनांसिद्धंके
शवार्कवाक्यमनुसर्तव्यं गंडांतपरिहारमाहवसिष्ठः गंडांतदोषमखिलंमुहूर्तोभिजिदाख्यः हंतियद्वन्मृगव्याधः पक्षिसंघमिवाखिलमिति ४३ अथक
र्तरीदोषमनुष्टुभाह लग्नात्पापाविति यदापापग्रहोऋज्वनृजूलग्नाद्व्ययार्थे स्यात्द्वादशस्थः पापग्रहोऋजुमार्गीद्वितीयस्थःपापोऽनृजुर्वक्रीस्यात्तदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तरी नामदोषः स्यात् मृत्युदारिद्र्यशोकदा भवेत् कर्तरीकारकौ ग्रहौ उभावपि वक्रिणौ शीघ्रगौ वा न तदा कर्तरीनेत्याह वसिष्ठः लग्नस्य पृष्ठाग्रगयोरसाध्वोः
साकर्तरी स्यादृजुवक्रगत्योः तावेव शीघ्रौ यदि वक्रचारौ न कर्तरी चेति पितामहोक्तिरिति इयं कर्तरी चंद्रस्यापि द्रष्टव्या कश्यपः चंद्रस्य कर्तरी तद्वच्छुभद
स्थानदोषदेति परंतु लग्नस्य चंद्रस्य वा क्रूरमध्यगतत्वदोषो स्त्येव कर्तरीतः स्वल्पफलः कन्यानाशंकरत्वात् क्रूरग्रहमध्यगते लग्ने चंद्रे थवा करग्रहेण ते
यमसदनाभिमुखं गमनं चेच्छंति कन्याया इति वसिष्ठोक्तेः कर्तरीदोषापवादमग्रेपि स्वयं वक्ष्यति ४४ अथ सग्रहदोषमनुष्टुभाह चंद्रेति सूर्ययुक्ते चंद्रे दारि
द्र्यं स्यात् एवं भौमादिषु मरणादिफलं क्रमेण स्यादित्यर्थः पापद्वययोगे चंद्रस्य मृतिः स्यात् नारदादिभिर्बुधगुरुसाहित्यफलमशुभमुक्तं अत्र तु श्रीपतिवा
क्यानुरोधात् वसिष्ठेन च कैश्चिन्मते शुभत्वोक्ते रशुभमुक्तं श्रीपतिः शुभं चंद्रभोलिभृदीज्यविद्भ्यामिति वसिष्ठः दारिद्र्यं रविणा कुजेन मरणं सौम्येन सुः प्रजा

कर्तरी नाम सा ज्ञेया मृत्युदारिद्र्यशोकदा ४४ चंद्रे सूर्यादिसंयुक्ते दारिद्र्यं मरणं शुभं सौख्यं सापत्न्यवैराग्यं पापद्वययुते मृतिः
४५ जन्मलग्नभयोर्मृत्युराशौ नष्टः करग्रहः एकाधिपत्ये राशीशे मैत्रे वा नैव दोषकृत् ४६ मीनोक्षककालिमृगस्त्रियोष्ट
मं लग्ने यदा नाष्टमगेहदोषकृत् ॥ १ दौर्भाग्यं गुरुणा सितेन सहिते चंद्रे ससापत्नकं प्रव्रज्यार्कसुतेन सद्ग्रहयुजो वांछंति केचिच्छुभं द्व्याद्यैर्मृत्युरसद्ग्र
हैः शशियुतैर्दीर्घः प्रवासः शुभैरिति एतत्परिहारो नारदेनोक्तः स्वक्षेत्रगः स्वोच्चगो वा मित्रक्षेत्रगतो यदि युतिदोषाय न भवेद्दंपत्योः श्रेयसे तदेति ४५ अथा
ष्टमलग्नदोषं सापवादमनुष्टुभाह जन्मलग्नभयोरिति जन्मलग्नजन्मराशिसंबंधिनी मृत्यो राशौ अष्टमराशौ विवाहः लग्ने करग्रहो नेष्टः अत्र जन्मलग्ने
जन्मराशौ विवाहः नारदः जन्मराश्युद्गमे नेष्टं जन्मलग्नोदयः शुभः तयोरुपचयस्थानं यदि लग्नगतं शुभं अष्टमलग्नापवादमाह एकेशेति जन्मरा
शिजन्मलग्नयोरन्यतरस्य विवाहलग्नस्य स्वाम्यैक्ये सति यथा मेषवृश्चिकयोः तथा तयोराशीश्वरयोर्मैत्रे सति यथा सिंहमीनयोः एतादृशे विषयेष्ट
ष्टमलग्नदोषो न स्यात् ४६ अथोतराधोक्तमेवार्थं स्पष्टमुपजातिकयाह मीनोक्षेति उक्षो वृषः स्त्री कन्या एते राशयो यद्यष्टमलग्नसुस्तदाष्टमलग्नदोष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्नभवेत् यथा सिंहान्मीनइत्यादि कुतइत्याह अन्योन्येति परिहारांतरमाहगुरुः लग्नादष्टमराशीशः केंद्रगः शुभवीक्षितः यद्यथाष्टमलग्नोत्थदोष माशुव्यपोहति रंध्रेशश्च शुभांशस्थस्तुंगस्वक्षेत्रमित्रगः अष्टमस्थानदोषोहिविनश्यतिनसंशयइति ४७ अथान्यदपिविचित्राछंदसाह मृतीति अष्टम भवननवांशोयदिलग्नेस्यादथवाऽष्टमभवनस्वामीविलग्नेस्यात्तदाशुभकरोनस्यात् अथव्ययभवनंजन्मलग्नजन्मराशिभ्यां द्वादशभवनं अथवाव्ययभ वनांशः अथवास्वामीयदिलग्नेस्यात् तदाकलहकृत्स्यात् कश्यपः दंपत्योरष्टमेलग्नेराशौवापितदंशके तदीशेवालग्नगतेतयोर्मृत्युर्नसंशयइति तथैवद्वादशेलग्नेतदंशेवातदीश्वरे विवाहलग्नगेनेस्यनित्यःस्यात्कलहोद्वयोरिति ४८ अथविषघटीदोषंवंशस्थाभ्यामिंद्रवंशयाचाह खराम इति मनोरिति मूलेइतिरेवतीपुनर्वसूकृत्तिकामघानक्षत्रेषुखरामतः त्रिंशत् घटिकोत्तरं कृताश्चतस्रो घटिकाः विषनाडिकाशुभकार्येवर्ज्याःस्युरितित

अन्योन्यमित्रत्ववशेनसावधूर्भवेत्सुतायुर्गृहसौख्यभागिनी ४७ मृतिभवनांशोयदिचविलग्नेतदधिपतिर्वानशुभ करःस्यात् व्ययभवनंवाभवतितदंशस्तदधिपतिर्वाकलहकरःस्यात् ४८ खरामतो ३० त्यादितिवह्निपित्र्यभेखवेदतः ४० केरद ३२ श्वसार्पभे खबाणतो ५० श्वधृतितो १८ र्यमांबुपेकृते २० भगत्वाष्टभविश्वजीवभे ४१ मनो १४ र्द्विदैवानिलसौम्य शाक्रभेकुपक्षतः २१ शैवकरेष्टि १६ तोजभे॥ ११तीयश्लोकेनान्वयः एवंसर्वत्रव्याख्येयं केरोहिण्यां अजभेपूर्वाभाद्रपदायां तदेवषष्टिघटि कात्मकेनक्षत्रभोगेध्रुवकाउक्ताः न्यूनाधिकत्वेस्पष्टीकरणमाह अथोइति विषनाडिकाध्रुवाः खरामतइत्येवमादयः इष्टनक्षत्रभोगेननिघ्नाः खत कैः षष्टिभाजिताःसंतःविषनाडिकाः अपिभभोगेननिघ्नाः षष्ट्याभाज्यालब्धाःस्पष्टाभवेयुरित्यर्थः परिहारमाहगुरुः चंद्रोविषघटीदोषंहंतिकेंद्रत्रि कोणगः लग्नंविनाशुभैर्दृष्टः केंद्रेवालग्नपस्तथेति विषनाड्युत्थितंदोषंहंतिसौम्यर्क्षगःशशी मित्रदृष्टोऽथवास्वीयवर्गस्थोलग्नपोपिवेति दैवज्ञम नोहरेतिथिवारविषघटिकाउक्ताः तिथीषुनागाद्रिगिरीषुवारिधिर्गजाद्रिदिक्यावकदिग्विभास्कराः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुनीभसंख्यः प्रथमात्तिथेः क्रमात्परं विषं स्यात् घटिकाचतुष्टयं १५।५।८।७।७।५।४।८।७।१०।३।१०।१२।७।८। नखाद्वयं द्वादशदिक्कुचशैलाबाणाश्वतत्त्वानि यथाक्रमेण सूर्यादिवारेषु परं च तस्रो नाड्यो विषं स्यात्तत्खलु वर्जनीयं।२० ।५।१२।१०।७।५।२५।। ५१ ।। अथ दुर्मुहूर्तदोषं विवक्षुरादौ दिवामुहूर्तान्मालिनीछंदसाह गिरिशेति अथ बाणचंद्रा इत्युक्तेर्मुहूर्तस्य पार्थक्येन लक्षणं नोक्तं इंद्रानलौ इंद्राग्नी एते वासरे पंचदश मुहूर्ताः स्युः ५२ रात्रिमुहूर्ताननुष्टुभाह शिवेति प्रथममुहूर्तस्वामी शिव एव ततोऽजपादादष्टौ भेशाः नक्षत्रस्वामिनो मुहूर्तेशाः स्युः यथा अजपादः अहिर्बुध्न्यः पूषा अश्विनौ यमः अग्निः ब्रह्मा सोम इत्यष्टौ ततो दशमुहूर्ता दितिः जीवो गुरुः विष्णुः अर्कः त्वाष्ट्रः मरुतः प्रसिद्धाः एते सर्वे निशिमुहूर्ताः प्रकीर्तिताः अह्नः पंचदशो भागो मुहूर्तो यत तथा निशीति कश्यपोक्तेः ५३

युगाश्वितो २४ बुध्न्यमतो यथाप्यर्भे रवचंद्रतो १० मित्रभवासवः श्रुतौ ५० मूलेंगबाणात् ५६ विषनाडिकाः कृताव ज्याः शुभे थो विषनाडिका ध्रुवाः निघ्नाभभोगेन खतर्क ६० भाजिताः स्फुटा भवेयुर्विषनाडिकास्तथा ५१ गिरिशभुजगमित्राः पित्र्यवस्वंबुविश्वेभिजिदथ च विधातापींद्र इंद्रानलौ च निर्ऋतिरुदकनाथोप्यर्यमाथो भगः स्युः क्रमश इह मुहूर्ता वासरे बाणचंद्राः ५२ शिवोजपादादष्टौ स्युर्भेशा अदितिजीवकौ विष्ण्वर्कत्वाष्ट्रमरुतो मुहूर्ता निशि कीर्तिताः ५३ रवावर्यमा ब्रह्मरक्षश्च सोमे कुजे वह्निपित्र्यौ बुधे चाभिजित्स्यात् गुरौ तोयरक्षो भृगौ ब्रह्मपित्र्यौ शनावीशसार्पौ मुहूर्ता निषिद्धाः ५४ निर्वेधैः शशिकरमूलमैत्र्यपित्र ✲ ब्राह्म्यांत्योत्तरपवनैः शुभो विवाहः रिक्तामारहिततिथौ शुभेह्नि वैश्वप्रांत्यांघ्रिः श्रुतितिथिभागतोभिजित्स्यात् ५५ ।।

अथ दुर्मुहूर्तान्भुजंगप्रयातेनाह रवावर्यमेति रवौ अर्यमा मुहूर्तो निषिद्धः एवं सोमे ब्रह्मरक्षः इंद्वैकुत्वं ब्रह्मरक्षस्वामिको मुहूर्तो निषिद्धो अन्यत्स्पष्टं ५४ अथ वेधविवक्षुर्विहितनक्षत्रादिकमभिजिन्मानं च प्रहर्षिण्याह निर्वेधैरिति वेधरहितैर्मृगादिनक्षत्रैः विवाहः शुभः रिक्तेति रिक्तामा ४।९।१४।३० आभिर्वर्जिततिथिषु शुभेह्नि शुभग्रहवारे विवाहः शुभः अभिजिल्लक्षणमाह अथ वैश्वेति वैश्वमुत्तराषाढानक्षत्रांत्यांघ्रिश्चतुर्थचरणः श्रुतेः श्रवणस्य तिथि भागः पंचदशांशो मिलित्वाऽभिजिद्भागः स्यात् ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथवेधदोषंपंचशलाकाचक्रोद्धारेणैपक्षंस्पष्टं शार्दूलविक्रीडितेनाह वेधोन्योन्यमिति विरिंच्यभिजितोः रोहिण्यभिजितोर्ग्रहहंतोवेधोऽन्योन्यंपर
स्परंभवेत् । रोहिणीस्थग्रहेऽभिजितिरोहिणीविद्धा एवंसर्वत्रव्याख्येयं चरणवेधमाह खेटइति तत्रतस्मिन्नक्षत्रेविद्यमानेग्रहेसति यदिचतुर्थपादेस्थित
दापरनक्षत्रस्यप्रथमपादस्यवेधः । यदितृतीयपादेतदाद्वितीयचरणस्यवेधः एवंयदाद्वितीयपादेतदातृतीयपादस्यवेधः यदिप्रथमपादेतदाचतुर्थपा
दस्यवेधइत्यर्थः अयंचरणवेधःसौम्यग्रहपरएव नारदः पादमेवंशुभैर्विद्धमशुभैर्नैवकृत्स्नतत्इति क्रूरविद्धंयुतंधिष्ण्यंक्रूराक्रांतंचवक्रतत्स्नभंमणिहेममयं
हर्म्यंभ्नताक्रांतमिवत्यजेदिति श्रीपतिः वधूप्रवेशनेदानेवरणेपाणिपीडने वेधःपंचशलाकाख्योऽन्यत्रसप्तशलाककइति ज्योतिर्निबंधेगर्गः मघायां
प्रथमेपादेमूलस्यप्रथमेतथा रेवत्याश्चचतुर्थांशेविवाहःप्राणनाशनइतितद्द्वातरज्ञेयं ५६ अथविवाहादन्यत्रयज्ञोपवीतादौकेश्चिद्विवाहेपिसप्तशला

वेधोन्योन्यमसौविरिंच्यभिजितोर्याम्यानुराधर्क्षयोर्विश्वेंद्वोर्हरिपित्र्ययोर्ग्रहहतोह्यस्तोत्तराभाद्रयोः स्वातीवारुणयोर्भवेन्निऋ
तिभादित्योस्तथाफांत्ययोः खेटेतत्रगतेतुरीयचरणाद्यौवातृतीयद्वयोः ५६ शाक्रेज्येशतभानिलेजलशिवेपौष्णार्यमर्क्षेवसु
द्वीशेवैश्वसुधांशुभेहयभगेसार्पानुराधेमिथः हस्तोपांतिमभेविधातृविधिभेमूलादितीन्द्वाष्ट्रभाजांघ्रीयाम्यमघेकृशानु
हरिभेविद्धेकुभृद्देखिके ५७ ऋक्षाणिक्रूरविद्धानिक्रूरमुक्तादिकानिच

च ४

काचक्रवेधोवेध्यउक्तस्तदर्थंचक्रन्यासंविनैवसप्तशलाकावेधंशार्दूलविक्रीडितेनाह शाक्रेज्येइति कुभृद्देखिके सप्तशलाकोक्ते शाक्रेज्येज्येष्ठापुष्यनक्ष
त्रेमिथःपरस्परंक्रूराधिष्ठितत्वेविद्धेज्ञेयं एवंजलशिवेपूर्वाषाढार्द्राइत्यादिव्याख्येयं दीपिकायां यस्याःशशीसप्तशलाकचक्रेपापेरपापैरथवाविवा
हे उद्वाहवस्त्रेणसमंसकृतांगीश्मशानभूमिंहरतीप्रयातीति ५७ अथक्रूराक्रांतादिदोषंसापवादमनुष्टुभाह ऋक्षाणीति क्रूरग्रहेविद्धानितथाक्रूरैर्मुक्ता
नित्यक्तानि । आदिशब्दात्क्रूरयुतानिक्रूरगंतव्यानिचकाराच्चिविधोत्पातदूषितानिचनक्षत्राणितानियदिचंद्रेणभुक्तामुक्तानितदाशुभाहाणिशुभक

CC-0. In Public Domain. Digitization by eGangotri

मु॰ची॰ र्हाणि विवाहादौ योग्यानि बुधैः प्रचक्षते कथयंति ५९ अथ लत्तादोषमुपजातिकयाह त्रराद्रिति गोनव जातयो द्वाविंशतिः शराः पंच एतैर्मितं भं स्वा
वि॰प्र॰ क्रांतनक्षत्रात् त्रराहुपूर्णेंदुसिताः स्वपृष्ठे संलत्तयंते यथा बुधः सप्तमं राहुर्नवमं राहोः सदा वक्रत्वान्नवमगणना क्रमेणैव कार्या यथाश्विन्यां राहुरा श्ले
७५ षां लत्तयतीति पूर्णेंदुः पूर्णिमांतचंद्रो द्वाविंशं तच्च शुक्लपक्षे पंचम्यादितिथौ न भवति शुक्रः पंचमं स्वपृष्ठे लत्तयतीत्यर्थः अर्कशनीज्यभौमाः क्रमेण पु
रस्तादग्रे सूर्याष्टतर्काग्निमितं संलत्तयंते यथा सूर्यः स्वाक्रांतनक्षत्राद्द्वादशं शनिरष्टमं गुरुः षष्ठं भौमस्तृतीयं नक्षत्रं अग्रतो लत्तयतीत्यर्थः वराहः रवि
लत्ता वित्तहरी नित्यं कौजी विनिर्दिशेन्मरणं चांद्री नाशं कुर्याद्बौधी नाशं वदन्त्येव सौरी मरणं कथयति बंधुविनाशं बृहस्पतेर्लत्ता मरणं लत्ता राहोः कार्यविना
शं भृगोर्वदंतीति ५९ अथ पातदोषं पथ्यार्ययाह हर्षणेति व्यतीपातक इति स्वार्थे कः हर्षणेत्यादिषट्योगानां अंते यन्नक्षत्रं भवेत् पातेन चंडीशचंडायु

भुक्ता चंद्रेण मुक्तानि शुभार्हाणि प्रचक्षते ५९ त्रराद्रि पूर्णेंदुसिताः स्वपृष्ठे भं सप्तगोजातिशरैर्मितं हि संलत्तयंतेर्कशनीज्यभौमा
:सूर्याष्टतर्काग्निमितं पुरस्तात् ५९ हर्षणवैधृतिसाध्यव्यतीपातकगंडशूलयोगानां अंते यन्नक्षत्रं पातेन निपातितं तत्स्या
त् ६० पंचास्याजौ गोमृगौ तौलिकुंभौ कन्यामीनौ कर्कयलीचापयुग्मे तत्रान्योन्यं चंद्रभान्वोर्निरुक्तं क्रांतेः साम्यं नो शुभं मं
गलेषु ६१ व्याघातगंडव्यतिपातपूर्वशूलांत्यवज्रे परिघातिगंडे योगे विरुद्धे त्वभिजित्समेतः खार्जूरमर्को द्विषमेऽशशी चेत् ६२

धारूयेन निपातितं स्यात् ६० अथ क्रांतिसाम्यापरपर्यायं महापातदोषं शालिन्याह पंचास्येति पंचास्याजौ सिंहमेषौ अन्ये प्रसिद्धाः एषु राशिषु पाठक्रमेण युक्त
मेणावस्थितयोश्चंद्रभान्वोः क्रांतिसाम्यं निरुक्तं तन्मंगलेषु नो शुभं स्यात् अनेन क्रांतिसाम्यसंभवमात्रं सूचितं तदानयनं सूर्यसिद्धांतादौ मविनोदाद्वास्पष्टं
यं ६१ अथ खार्जूरदोषं सुबोधमिंद्रवज्रयाह व्याघातेति अंत्यो वैधृतिः यस्मिन्दिने व्याघातादिके विरुद्धे दुष्टे योगे सति अर्कादर्कनक्षत्राद्धशी चंद्रोऽभिजित्स राम॰
मेतो विषमे विषमसंख्याके नक्षत्रे स्यात्तदा खार्जूराख्यो दोषः स्यात् यदा समे स्यात्तदा न दोष इत्यर्थः एकार्गलो दृष्टिपातश्चाभिजिद्रहितानि वै इति कश्यपेनात्रा ७५
भिजिद्गणना निषिद्धा केशवार्कत्रिविक्रमादिभिरंगीकृतेति उभयवचनप्रामाण्याद्विकल्पः ६२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोपग्रहदोषमुपेंद्रवज्रयाह शराष्टेति सूर्यभतः सूर्याक्रांतनक्षत्रात् ज्ञनाराः चंद्रनक्षत्राणि पंचाष्टदशचतुर्दशसप्तैकोनविंशतिः पंचदशाष्टादशै
कविंशतिद्वाविंशतित्रयोविंशतिचतुर्विंशतिपंचविंशतिसंख्याकाःश्चेत्स्युस्तदा उपग्रहोपनामकादोषाः स्युः प्रकृतिरेकविंशतिः एषांदेशभेदेन परिहा
रमाह शुभानत्ति कुरुदेशे बाल्हिकदेशेषु शुभान ६३ अथ प्रसंगात्पातोपग्रहलत्तास्वपवादमर्धयामं चानुष्टुभाह पातेति पातश्चंडीशचंडायुधाख्यो दो
षः उपग्रहाः प्रागुक्तः लत्ता तु राहुपूर्णेंदुसितेत्यादिनोक्ता तत्र खेटपत्समः ग्रहचरणतुल्यः नक्षत्रचरणो नेष्टः अयमर्थः उपग्रहे पाते रविर्यस्मिन् च
रणे स्यात्तत्संख्या एव तस्य चरणो वर्ज्यो नान्यः लत्तायां तु लत्ताकारी ग्रहो यत्र चरणे स्यात्तत्समसंख्य एव चरणं लक्षितनक्षत्रस्यैव वर्ज्यो नान्यः उक्तंच उपग्रहेषु
लत्तायां तथा चंडायुधाह्वये ग्रहोस्ति यत्प्रमाणांशे विद्धांशस्तत्प्रमाणक इति अयं परिहारः खार्जूरिकेपि द्रष्टव्यः सूर्यो यस्मिन्पादे भं तत्तत्समसंख्य एव चरणं

शराष्टदिक्‌शक्रनगातिधृत्यस्तिथिर्धृतिश्च प्रकृतेश्च पंच उपग्रहाः सूर्यभतोज्ञताराः शुभा न देशे कुरुबाल्हिकानां ६३ पा
तोपग्रहलत्तासु नेष्टोंघ्रिः खेटपत्समः वारस्त्रिघ्नोऽष्टभिस्तष्टः सैकस्यादर्धयामकः ६४ शक्रार्कदिग्वसुरसाब्ध्यश्विनः कु
लिकारवेः ॥

एकरेखावस्थितं चंद्रनक्षत्रस्यैव वर्ज्यं इति खार्जूरिकसमांघ्रिमभमित्युक्तत्वात् वार इति इष्टो वारस्त्रिघ्नः अष्टभिस्तष्टः शेषितो योंकः
सैकः सोर्धयामो दोषः स्यात् कश्यपः शैलाक्षश्रुतयः ७।५।४ सूर्ये चंद्रे षट्‌वेदपर्वताः ६।४।७॥ भौमे बाणाग्निनेत्राणि ५।३।२ सौम्ये वेदाक्षिवायवः ४।२।
५॥ गुरुवारेग्निचंद्रेभाः ३।१।८ शुक्रे नेत्राद्रिवह्नयः २।७।३॥ शनौ चंद्रेभतर्काः १।८।६ स्युः कुलिको यमघंटकः अर्धप्रहरसंज्ञास्ता मंगलेषु विवर्जयेत्।
निधनं प्रहरार्धे तु निःसत्वं यमघंटके कुलिके सर्वनाशः स्याद्रात्रावेतेन दोषदा इति ६४ अथ कुलिकमनुष्टुभाह शक्रेति रविमारभ्य सर्ववारेषु क्रमादुक्त
संख्यास्तिथ्यंशा मुहूर्ता कुलिकाः स्युः यथा दिने रवौ १४ चंद्रे १२ भौमे १० बुधे ८ गुरौ ६ शुक्रे ४ शनौ २ रात्रावेतेनिरेकाः कार्याः यथा रवौ १३ चं ११ भौ ९ बु ७ गु ५
शु ३ श १ शनौ तु अंत्योपि रात्रेः पंचदशोपि मुहूर्तः कुलिकः एते निंदिताः। एतेषामर्धयामादिदोषाणां पुनर्निरूपणं विवाहे अवश्यवर्ज्यत्वार्थं शीघ्रोपस्थि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यर्थं वाते कुलिकापवादेगुरुः वारेशेसबलेवापिबलाढ्ये लग्नगेशुभे कुलिंकोदयदोषस्तु विनश्यतिनसंशयः वाराधीशेबलोपेतेविधौवाबलसंयुते अर्धप्रहर
संभूतोदोषोनैवात्रविद्यते शुभेकेंद्रगतेचंद्रे शुभांशेवाशुभेक्षिते लग्नेगेसबलेवापिकुलिकस्तुविलीयते अर्धप्रहरपूर्वोर्धमध्यंतुयमघंटजं कुलिकांत्यांश
शुभमाचरेत् इति ६५ अथदग्धातिथ्याख्यदोषमिंद्रवज्रयाह चापांत्येति तत्तद्राशिद्वयस्थितेपतंगेसूर्येद्वितीयाप्रमुखाउभयपक्षसाधारणासमासंख्या
कास्तिथ्योदग्धाःस्युः यथा धनुर्मीनगतेसूर्येद्वितीयादग्धा वृषकुंभगेर्केचतुर्थी र्केमेषगेषष्ठी कन्यामिथुनगेष्टमी सिंहवृश्चिकगेदशमी तुलामकरगे
र्केद्वादशीदग्धास्त्यर्थः मासदग्धाश्चतिथयोमध्यदेशेविवर्जिताइतिपरिहारः ६६ अथजामित्रदोषंभ्रमरविलसितेनाह लग्नादिति विवाहलग्नाच्चंद्रा
द्वासप्तमभवनगतेग्रहेपरिणयनंनस्यात् अस्यापवादः किंवेति ग्रहाधिष्ठितनवांशमारभ्य बाणाशुग ५५ मितलववर्गेपंचपंचांशन्मितनवांशगेचंद्रेलग्ने

एत्रौनिरेकास्तिथ्यंशाः शनैश्चांत्योपिनिंदिताः ६५ चापांत्यगेगोघटगेपतंगेकर्कीजगेस्त्रीमिथुनेस्थितेच सिंहालिगेनक्र
घटेसमाःस्युस्तिथ्योद्वितीयाप्रमुखाश्चदग्धाः ६६ लग्नाच्चंद्रान्मदनभवनगेखेटेनस्यादिहपरिणयनं किंवाबाणाशुग
मितलवगेजामित्रंस्यादशुभकरमिदं ६७ एकार्गलोपग्रहपातलत्ताजामित्रकर्तर्युदयास्तदोषाः नश्यंतिचंद्रार्कबलोप
पन्नेलग्नेयथार्कोभ्युदयेतुदोषा ६८ उपग्रहर्क्षकुरुवाल्हिकेषुकलिंगवंगेषुचपातितंभं॥

॥वा जामित्रंसूक्ष्मंस्यात् यथा मेषेपंचम
नवांशेभोमोस्तितस्मात्तुलायांपंचमनवांशस्थश्चंद्रोनिषिद्धोऽन्येऽष्टौनवांशाः शुभाः एवंविधंसूक्ष्मजामित्रमिदमशुभकरंस्यात् अस्यापवादोव्यवहारो
च्चये स्वोच्चेथवास्वभवनेस्फुरदंशुजालः सौम्यालयेहितगृहेशुभवर्गगोवा।जामित्रकादिपरिसंचितदोषराशिंहत्वाददातिबहुशः सुखमेवचंद्र इति ६७
अथैकार्गलादिदोषाणांअपवादंसाक्षाद्वसिष्ठवचनमेवेंद्रवज्रयाह एकार्गलेति चंद्रार्कबलोपपन्नेस्वोच्चेमित्रादिराशिस्थितत्वरूपेविहितस्थितत्व
रूपेचसति एकार्गलादयोदोषानश्यंति यथार्कोभ्युदयेदोषारात्रिर्नश्यति ६८ अथकेषांचिद्दोषाणांदेशविशेषेणपरिहारमुपजात्याह ॥ ॥

राम ७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपग्रहर्क्षमिति स्पष्टार्थं अन्यच्च लत्तामालवके देशे पातः कौसलके तथा एकार्गलं तु काश्मीरे वेधं सर्वत्र वर्जयेत् युतदोषो भवेद्गौडे जामित्रस्य च यामुने वेधदोषस्तु विंध्याख्यदेशे नान्येषु केचनेति ६९ अथ दशयोगदोषमुपजात्याह शशांकेति चेद्यदि चंद्रसूर्यनक्षत्रयोर्युतेर्योगात् भैः सप्तविंशतिभिर्भक्ताद्यः शेषस्तस्मिन् शून्यैकचतुःषट्दशैकादशपंचदशाष्टादशैकोनविंशतिविंशतिसंख्याके सति एते काः दश -- योगसंभवा भवंति शिष्टानां दशनामंकानामभिहितत्वाद्दशयोगइत्यन्वर्था संज्ञा ७० अथ दशयोगफलं तदपवादं च शार्दूलविक्रीडितेनाह वातान्त्रेति शून्ये शेषे वातदोषः स्यात् एकशेषेऽभ्रात् चतुःशेषेऽग्नेः षट्शेषे महीपात् दशशेषे चोरात् एकादशसु मरणं पंचदशसु रुक् अष्टादशसु वज्रं एकोनविंशे षुवादः कलिः सकटकइत्यर्थः विंशतिशेषे क्षतिः द्रव्यनाशः अथापवादः योगांकइति खभूयुगादिरूपे योगांके समे युग्मसंख्याके सति दलिते धअर्धीकृते मनुभिश्च

सौराष्ट्रशाल्वेषु चलत्तितं भं त्यजेत्तु विद्धं किल सर्वदेशे ६९ शशांकसूर्यर्क्षयुतेर्भशेषे खंभूयुगांगाग्निदशेशतिथ्यः नागैर्द्वीकैर्द्विमितानखाश्चेद्भवंति चैतेदशयोगसंज्ञाः ७० वाताभ्राग्निमहीपचौरमरणंरुग्वज्रवादक्षतियोगांके दलिते समे मनुयुतेऽथौजे तु सैके धिंते॥ ५,तुर्दशभिर्युक्ते योंकः स्यात् तद्वत्सादश्विनीतो भं नक्षत्रं स्यात् अथौजे तु सैके धिंते योगांके ओजे विषमे सैके अर्धिते अश्विनीतः भं नक्षत्रं स्यात् यथा समांकाः दश अर्धिताः ५ मनु १४ युतः १९ मूलं नक्षत्रं जातं ओजांके यथा विषमांके १५ योगः सैकः १६ अर्धितं ८ पुष्यनक्षत्रं जातं अथानंतरं मनुभिः संमिताश्चतुर्दश रेखास्तिर्यक्क्रमात्संलिखे ततः अनेन प्रकारेण यंनक्षत्रमागतं तत आरभ्य साभिजिन्नक्षत्रचक्रं अस्मिंश्चक्रे लेख्यं तत्र नक्षत्रे ग्रहाः स्थाप्याः दिननक्षत्रे चंद्रः स्थाप्यः ततएकरेखास्थयोः ग्रहचंद्रयोः परस्परावलोकनरूपो वेधो न शुभदः उक्तं च ज्योतिःसारसागरे तिथ्यंगवेदैकदिगूनविंशभूसंभवाष्टादशविंशसंख्याः इष्टोडुनासूर्ययुतोडुनाच योगाद्भमी चेद्दशयोगदोषाः मरुन्मेघाग्निभूपालचौरमृत्युरुजोऽशनिः कलिर्हानिर्दशदोषाः त्याज्यास्तु सर्वथा बुधैः योगांके विषमे सैके समे सवसुलोचने दलीकृताश्विनीपूर्वं दशयोगमुदाहृतं॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु·टी दशयोगे महाचक्रे प्रमदाद्यदि विध्यते क्रूरैः सौम्यग्रहैर्वापि दंपत्योरेकनाशनमिति दशयोगापवादांतरमाह भरद्वाजः गुरौ लग्नाधिपे शुक्रे सवीर्ये लग्नकेंद्रगे
वि·प्र दशदोषा विनश्यंति यथाग्नौ तूलराशयः व्यासः गुरुणा भृगुणा वापि संयुते दृष्टमेव च दशयोगसमायुक्तमपि लग्नं शुभावहं ७१ अथ पंचकाख्यं बाणदोषं
६७ शालिन्याह लग्नेनेति शुक्लपक्षादिकागततिथयो वर्तमानलग्नेनाढ्याः युक्ताः अंकैर्नवभिस्तष्टाः शेषे नागसंख्ये अष्टसंख्ये रोगाख्यो बाणः एवं द्विसंख्ये शे
षे वह्न्याख्यः चतुःसंख्ये राजाख्यः षट्संख्ये चोराख्यः एकसंख्ये मृत्युसंज्ञो बाणश्च ये बाणाः दाक्षिणात्येषु महाराष्ट्रेषु प्रसिद्धाः ७२ अथ व्यासमतेन
बाणं सापवादं मालिन्याह रसगुणेति रसगुणशशिनागाब्धिभिराढ्या चासौ संक्रांतियातांशकमितिश्चेति कर्मधारयः सूर्यभुक्तांशानां मितिः संख्या पंचधा।
स्थाप्या कलादिकमुपेक्ष्यं क्रमेण षट्त्रिएकाष्टचतुर्भिराढ्या संयोज्या अंकैर्नवभिस्तष्टा सति यदा पंचशेषा यस्मिन्स्थले पंच शिष्यंते तत्क्रमेण रुगादिबाणो ज्ञेयः

मंदास्वादयसंमितास्तु मनुभी रेखाः क्रमात्संलिखेद्ध्वोस्मिन्ग्रहचंद्रयोर्न शुभदः स्यादेकरेखास्थयोः ७१ लग्नेनाढ्या याततिथ्यांकतष्टाः शेषे नागद्व्यब्धिनंकेंद्रुसंख्ये रोगो वह्नी राजचोरौ च मृत्युर्बाणश्चापं दाक्षिणात्यप्रसिद्धः ७२ रसगुणशशिनागाब्ध्याढ्यसंक्रांतियातांशकमितिरथ तष्टांकेर्यदा पंचशेषाः रुगनलनृपचोरा मृत्युसंज्ञश्च बाणो नवहृतशरशेषे शेषकैक्ये सशल्यः ७३ रात्रौ चोररुजौ दिवा नरपतिर्वह्निः सदा संध्ययोर्मृत्युश्चाथ शनौ नृपो विदि मृतिर्भौमेग्निचारौ रवौ ॥ ः ॥ ः ॥

ति

यथा आदौ पंचशेषे रोगबाणः द्वितीये पंचशेषेऽग्निबाणः तृतीये राजबाणः चतुर्थे चोरबाणः पंचमे मृत्युबाणः तस्मात्तद्भयं भवतीत्यर्थः अयं बाणः शल्य
रहितः तेन स्वल्पदोषः तदपवादभूतः सशल्यो बाण उच्यते नवेति यानि प्रागागतानि शेषाणि तेषामैक्यं नवहृते पश्चाच्छरशेषे सति सशल्यसहितो बाणः स्या राम:
त् पंचव्यतिरिक्तशेषे शल्यरहितो दुष्ट इत्यर्थः अन्ये तु तिथिवारभलग्नांकोरसाग्न्यङ्काष्टवेदयुक् नंदाप्तपंचशेषे रुक्वह्निराट्चोरमृत्युकृदिति ७३ अ ६७
थ समयभेदे नवारंभे देनकर्मभेदे न च त्रिविधं बाणपरिहारं शार्दूलविक्रीडितेनाह रात्रौ चोरेति चोररुजौ बाणौ रात्रौ त्याज्यौ दिवा नरपतिः राजबाणस्त्याज्यः

वह्निबाणः सदा दिवा रात्रौ त्याज्यः संध्ययोः सायंप्रातःसंध्ययोः मृत्युबाणस्त्याज्यः ज्योतिःप्रकाशे रोगं चौरं त्यजेद्रात्रौ दिवा राजन्यपंचकं संध्ययोर्मृत्युं त्याज्यं सर्वदा वह्निपंचकमिति अथ वासरभेदेन परिहारः अथेति शनिवारे नृपबाणः विदि बुधवारे मृतिबाणः भौमेऽग्निचोरौ वा णौ रवौ रोगबाणस्त्याज्यः उक्तं च रवौ रोगं कुजे वह्निं शनौ च नृपपंचकं वर्ज्यं पुनः कुजे चोरं बुधवारे च मृत्युं अथ कार्यभेदेन परिहारः अथेति क्रमत एषु शुभकर्मसु एते बाणाः वर्ज्याः यथा व्रते यज्ञोपवीते रुक् गृहस्याच्छादनेऽग्निः नृपसेवायां राजबाणः याने चोरः पाणिग्रहे मृतिबाणो वर्ज्यः उक्तं च नृपाख्यं नृपसेवायां गृहगोपेऽग्निपंचकं याने चौरं व्रते रोगं त्यजेन्मृत्युं करग्रहे इति ७४ अथ ग्रहदृष्टिमुपजातिकयाह त्र्यंशमिति ये खेटाः यस्मिन् स्थाने स्थिताः तस्मात् कथ्यमानानि स्थानानि चरणाभिवृद्ध्या पश्यंति तद्यथा त्र्यंशं तृतीयदशमं च एकचरणदृष्ट्या पश्यंति अनेन तत्तद्गृहोद्भवफलं चरणाभिवृद्ध्यैव भवतीति सूचितं

रोगोथ व्रतगेहगोपनृपसेवायानपाणिग्रहे वर्ज्याश्च क्रमतो बुधे रुगनलक्ष्मापालचोरा मृतिः ७४ त्र्यंशं त्रिकोणं चतुरस्रमस्तं पश्यंति खेटाश्चरणाभिवृद्ध्या मंदो गुरुर्भूमिसुतः परे च क्रमेण संपूर्णदृशो भवंति ७५ यदा लग्नांशेशो लवमथ तनुं पश्यति युतो भवेद्वायं वोढुः शुभफलमनल्पं रचयति ॥

५ मंद इति मंदः शनैश्चरः स्वस्थानात् त्र्यंशं संपूर्णदृक् चतुश्चरणदृष्टिः एवं गुरुस्त्रिकोणे पूर्णदृक् भूमिसुतश्चतुरस्रे पूर्णदृक् परेऽर्कचंद्रबुधशुक्राः सप्तमे पूर्णदृशः ७५ अथोदयास्तशुद्धिः शिखरिणीभुजंगप्रयाताभ्यामाह यदा लग्नांशेश इति लवेशो लवमिति लग्नेशः लग्नांशस्तस्येशः स्वामी लग्ननवांशस्वामी लवं नवांशं पश्यति वाऽथवा नवांशेन सह युतो भवेत्तदा वोढुर्वरस्यानल्पं शुभफलं रचयति यथा मेषलग्ने मिथुनांशस्तदीशो बुधस्तुलायां मिथुनं पश्यति तत्र तिष्ठति वा अयमुदयांशशुद्धेः प्रथमप्रकारः तदभावे तु लग्नांशेशस्तनुं लग्नं पश्यति लग्नेन सह युतो भवेत्तदापि वोढुः शुभफलमनल्पं स्यात् यथा मेषलग्ने एव मिथुननवांशः स्वामी बुधो [illegible]रे नवांशं न पश्यति किंतु लग्नं पश्यति अथवा मेष एव तिष्ठति अथ मुदयशुद्धेर्द्वितीयः प्रकारः ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.टी. लवद्यूनस्वामीलवान्नवांशात्द्यूनंसप्तमनवांशः तत्स्वामी लवमदनभंलवान्मदनभंसप्तमनवांशंपश्यतितेनसहयुतोवाभवेत् तदावध्वाः अनल्पंबहुशु
वि.प्र. भंरचयति यथा मिथुननवांशात्सप्तमोधनुरंशः तदीशोगुरुर्मेषेधनुःपश्यतितत्रतिष्ठतिवा अयमस्तशुद्धेः प्रथमप्रकारः तदलाभेतुलवद्यूनस्वामील
७८ ग्नात्मदनंसप्तमंभवनंपश्यतियुतोवासप्तमभवनेतदावध्वाःशुभं यथा गुरुः कर्केस्वनवांशंनपश्यतिकिंतुसप्तमभवनंतुलांपश्यति अथवातु
लायामेवास्ति तदावध्वाःशुभं अयमस्तशुद्धेर्द्वितीयःप्रकारः इतरथेति यदालग्नांशेशोलवंतनुंवानपश्यतितत्रयुतोवानस्यात् तदावरस्याशुभं ए
वंलवद्यूनस्वामीनवांशसप्तमंवानपश्यतितत्रयुतोवानस्यात् तदाकन्यायाअशुभं कश्यपः स्वस्वेशेनोदयास्तांशौवीक्षितौवाथसंयुतौ लग्नंवास्तगृ
हंतत्तदंशेशेनेक्षितंयुतमिति ७६ लवेशइति नवांशस्वामीनवांशंप्रपश्येत् लग्नस्वामीलग्नंप्रपश्येत्तदावरस्यशुभं एवंलवद्यूनपोनवांशात्सप्तम

लवद्यूनस्वामीलवमदनभंलग्नमदनंप्रपश्येद्वावध्वाःशुभमितरथात्वेयमशुभं ७६ लवेशोलवंलग्नपोलग्नगेहंप्रप
श्येन्मिथोवाशुभंस्याद्वरस्य लवद्यूनपोंशंद्युनंलग्नपोस्तंमिथोवेक्षतेस्याच्छुभंकन्यकायाः ७७ लवपतिशुभमित्रवीक्ष
तेंशंतनुंवापरिणयनकरस्यस्याच्छुभंशास्त्रदृष्टं॥ ॥नवांशस्वामीअंशंद्यूनंअंशसप्तमराशिंपश्येत् लग्नपोलग्नस्वामीअस्तंलग्नात्सप्त
मभवनंपश्येत् तदाकन्यायाःशुभंस्यात् वामिथःअंशसप्तमाधीशोलग्नंसप्तममीक्षते लग्नात्सप्तमाधीशश्चांशसप्तममीक्षतेतदापिकन्यायाःशु
भंस्यात् अत्राप्यन्यथात्वेदंपत्योरशुभमित्यर्थः नारदः लग्ननवांशकौस्वस्वपतिनावीक्षितौयुतौ नचेद्वान्योन्यपतिनाशुभमित्रेणवातथा वर
स्यमृत्युःस्यात्ताभ्यांसप्तमस्तोदयांशकौ एवंतौवीक्षितयुतौमृत्युर्वध्वाः करग्रहे इति ७७ अथपूर्वोक्तप्रकारेणोदयास्तशुद्धेरभावेतृतीयःप्रका राम:
रउच्यतेमालिनीछंदसा लवपतीति शुभंचतन्मित्रंचेतिकर्मधारयः लवपतेर्लग्ननवांशेशस्यशुभग्रहः चंद्रबुधगुरुशुक्राणामन्यतमश्चेन्मि ७८
त्रंस्यात्सचेदंशंनवांशंतनुंचवीक्षतेतदापरिणयनकरस्यवरस्यशास्त्रदृष्टंपुत्राद्यिप्राप्तिरूपंशुभंफलंस्यात्॥ ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंमदनलवपस्यास्तांशेशस्यमित्रंसौम्यंनचांश द्युनंत्र्यंशाह्लग्ननवांशाद्यूनंसप्तमनवांशंचेद्वीक्षते अथवातनुमदनगृहंलग्नात्सप्तमभवनंचेद्वीक्षते
नदाववध्वाःशर्मेकल्याणंस्यात् यद्युभयत्रापिनवांशस्वामिनोमित्रंपापग्रहश्चेत्तस्यदृष्टिरशुभैवेतिफलितार्थः वराहः शुद्धिस्त्रिहस्यान्नयदोदयांशे ल
ग्नेनवास्तांशउपेतिशुद्धिं नदासुहृत्सौम्यनिरीक्षितोयःशुभायसस्यात्प्रवदंतिसंतइति केचिद्विवाहेवज्रयोगंनिषिद्धमाह नक्षत्रक्षणं तिथिवारंचनक्ष
त्रंनवभिश्चसमन्वितः सप्तभिस्तुहरेद्भागंशेषांकेफलमादिशेत् त्रिशेषेतुजलंविंद्यात्पंचशेषेप्रभंजनः सप्तशेषेवज्रपातोज्ञेयंवज्रस्यलक्षणमि
ति ७८ अथार्कसंक्रमणदोषंमंजुभाषिण्याह विषुवायनेति विषुवंतुलामेषसंक्रांती चतसृषुसंक्रांतिषुपरपूर्वंमध्यमानगतागामिवर्तमानान् दि
वसान् बुधःशुभक्रियाविधौविवाहादौत्यजेत् इतरसंक्रांतिषुसंक्रमणकालात् परतोग्रेपूर्वंप्रागपिषोडशघटिकामिलित्वाद्वात्रिंशत् घटिकास्त्य

मदनलवपमित्रंसौम्यमंशंद्युनंवातनुमदनगृहंचेद्वीक्षते शर्मेवध्वाः ७८ विषुवायनेषुपरपूर्वमध्यमान् दिवसां।
स्त्यजेदितरसंक्रमेषुहि घटिकास्तुषोडशशुभक्रियाविधौपरतोपिपूर्वमपिसंत्यजेद्बुधः ७९ देवद्युकर्तवोष्टाष्टौनाड्योंका
ःरवन्नृपाःक्रमात् वर्ज्याःसंक्रमणेऽर्कादेःप्रायोर्कस्यातिनिंदिताः ८० घस्रेतुलालीबधिरौमृगाश्वौरात्रौचसिंहाजवृषा।
।।दिवांधाः॥

जेत् गुरुः अयनेविषुवेपूर्वंपरंमध्यंदिनंत्यजेत् अन्यसंक्रमणेपूर्वाःपराःषोडशनाडिकाइति ७९ अथप्रसंगात्सकलग्र
हाणांसंक्रांतिघटिरनुष्टुभाह देवेति यथाक्रमेणसूर्यादेःसंक्रमणेएताघटिकावर्ज्याःयथा रवेःप्राक्पश्चात् त्रयस्त्रिंशत्घटिकास्त्याज्याः चं
द्रस्यद्वे भौमस्यनव बुधस्यषट् गुरोरष्टाष्टौअष्टाशीतिः शुक्रस्याकानव शनेःरवन्नृपाःषष्ट्यधिकंशतइति ८० अथपंगवंधबधिराख्यान्लग्न
दोषाननुपजातिकयाह घस्रइति घस्रेदिवसेतुलावृश्चिकौबधिरसंज्ञकौ रात्रौमकरधनूसंज्ञौ शेषंस्पष्टं वसिष्ठः तुलाचवृश्चिकश्चैवदिवसेबधिरौ
तथा धनुश्चमकरश्चैवबधिरौनिशिकीर्तितौ मेषोवृषोमृगेंद्रश्चदिवसांधाःप्रकीर्तिताः नृयुक्कर्कटकन्याश्चरात्रावंधाःप्रकीर्तिताः॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कुंभमीनौचपंगू द्वौदिवाराचैौयथाक्रमंइति अनेनतस्मिन्कालेंऽधादिलग्नानिवर्ज्यानीत्यर्थः ८१ अथकेचिन्मतमाह बधिराधन्वीति स्पष्टार्थं ८२
अथैषांप्रयोजनंसापवादंप्रहर्षिण्याह दारिद्र्यमिति पंग्वंगेपंगुलग्ने अन्यत्स्पष्टं ८३ अथविहितनवांशाश्विन्नदाछंदसाहकार्मुकेति युग्मंमिथुनं
स्यानवांशाः झषगेवा मीननवांशेविकल्पेन वाशब्दएकीयमतसूचनार्थः एषुअंशेषुयर्हि उपयामोविवाहोभवेत्तर्हिकन्यासतीपतिव्रताभवेत् ८४ अथ
विहितनवांशेक्वचिन्निषेधंश्रीछंदसाह अंत्यनवांशेति विहितनवांशेष्वपियथामेषलग्नेधनुर्नवमांशांतिमाइत्येवंविधेविषयेकाचनकन्यानपरिणेयान

कन्यानृयुक्कर्कटकानिशांधादिनेघटोंत्योनिशिपंगुसंज्ञः ८१ बधिराधन्वितुलालयोपराह्णेमिथुनंकर्कटकोंगनानिशां
धाः दिवसांधाहरिगोक्रियास्तुकुब्जामृगकुंभांतिमभानिसंध्ययोर्हि ८२ दारिद्र्यंबधिरतनौदिवांधलग्नेवैधव्यंशिशुमर
णंनिशांधलग्ने पंग्वंगेनिखिलधनानिनाशमायुःसर्वत्राधिपगुरुदृष्टिभिर्नदोषः ८३ कार्मुकतौलिककन्यायुग्मलवे
झषगेवा यर्हिभवेदुपयामस्तर्हिसतीखलुकन्या ८४ अंत्यनवांशेनचपरिणेयाकाचनवर्गोत्तममिहहित्वा नोचरलग्नेच
रलवयोगंतौलिमृगस्थेशशिनिकुर्यात् ८५ व्ययेशनिःखेऽवनिजस्तृतीयेभृगुस्तनौचंद्रखलानशस्ताः लग्नेट्कविग्लौ
श्वरिपौमृतौग्लौलग्नेट्शुभाराश्चमदेचसर्वे ॥ ८६ ॥ ॥विवाह्या परंतुवर्गोत्तममंतिमनवांशंहित्वातत्रविवाहउचितएव यथा मिथुनल
ग्नेमिथुननवांशेऽन्त्यांशकाअपिश्रेष्ठायदिवर्गोत्तमाह्वयाइतिकश्यपोक्तेः नोचरलग्नइति तौलिमृगस्थेतुलामकरस्थेचंद्रेचरलग्नेविहितचरलवयोगं
नोकुर्यात् यथामेषलग्नेतुलांशइति ८५ अथलग्नभंगमुपजात्याह व्ययेशनिरिति द्वादशेशनिर्नशस्तः खेदशमेऽवनिजोभौमोनशस्तः तृतीयेशुक्रो
नशस्तः लग्नेचंद्रखलाःचंद्रःपापग्रहाश्चनशस्ताः लग्नेट्लग्नस्वामी कविःशुक्रोग्लौश्चंद्रश्चरिपौषष्ठेनशस्ताः ग्लौश्चंद्रः लग्नेट्लग्नस्वामीशुभाबु
धगुरुशुक्राआरोभौमश्च एतेमृतावष्टमेनशस्ताः मदेसप्तमेसर्वेग्रहानशस्ताः ८६ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथोरवाप्रदावसंततिलकयाह त्र्यायेतिस्पष्टार्थं ८७ कर्तर्यादिमहादोषाणामपवादं शार्दूलविक्रीडितेनाह पापोकर्तरिकारकाविति कर्तरिकारकोग्रहो रिपुगृहेशत्रुगृहेस्थितो नीचेनीचराशिगो अस्तगो अस्तंगतोनदाकर्तरीदोषोनैवस्यात् कश्यपः पापयोःकर्तरीकर्त्रोःशत्रुनीचगृहस्थयोः यदाचास्तगयोर्वापिकर्तरीनैवदोषदेति अथसितेशुक्रे अरिनीचगेशत्रुगृहगेस्वनीचगृहगेवासतितत्षष्ठदोषोभृगुषष्ठदोषोपिनस्यात् कश्यपः नीचराशिगतेशुक्रे शत्रुक्षेत्रगतेपिवा भृगुषट्स्थितोदोषोनास्तितत्रनसंशयइति भौमेस्तेअस्तंगतेरिपुनीचगेशत्रुगृहगेनीचगृहगेवाऽष्टमभौमोदोषकृन्नस्यात् कश्यपः अस्तगेनीचगेभौमेशत्रुक्षेत्रगतेऽपिवा कुजाष्टमोद्भवोदोषोनकिंचिदपिविद्यते अथशशिनिचंद्रेनीचेनीचनवांशकेवासतिद्वादशाष्टमषष्ठस्था

त्र्यायाष्टषट्सुरविकेतुतमोर्कपुत्रास्त्र्यायारिगःक्षितिसुतोद्विगुणायगोऽब्जः सप्तव्ययाष्टरहितोन्नगुरुःसितोष्टत्रिद्यूनषट्व्ययगृहान्यरिहृत्यशस्तः ८७ पापोकर्तरिकारकोरिपुगृहेनीचेस्तगेकर्तरीदोषोनैवसितेऽरिनीचगृहगेतत्षष्ठदोषोपिन भौमेस्तेरिपुनीचगेनहिभवेद्भौमोष्टमोदोषकृन्नीचेनीचनवांशकेशशिनिरिःफाष्टारिदोषोपिन ८८ अब्दायनर्तुतिथिमासभपक्षदग्धतिथ्यंधकाणबधिरांगमुखाश्चदोषाः नश्यंतिविद्गुरुसितेष्विहकेंद्रकोणेतद्वच्चपापविधुयुक्तनवांशदोषाः ८९ ॥ ॥

नस्थितेचंद्रेदोषोपिनस्यात् नीचराशिगतेचंद्रेनीचांशकगतेपिवा चंद्रेषष्ठाष्टरिःफस्थेदोषोनास्तिनसंशयइतिकश्यपोक्तेः ८८ अथाब्ददोषाद्यनेकदोषापवादंवसंततिलकयाह अब्दायनेति विद्गुरुसितेषुकेंद्रकोणेसप्तमस्थानरहितेसत्सुएतेदोषाःनश्यंति कश्यपः अब्दायनर्तुमासोत्थाःपक्षतिथ्यृक्षसंभवाः काणांधबधिरोद्भूतादग्धलग्नतिथेर्भवाः अकालजाश्चनीहारविद्युत्पांसभ्रसंभवाः परिवेषप्रतीस्र्यशक्रचापध्वजादयः दोषप्रदामंगलेषुकालजाश्चेद्दोषदाः गुरुरेकोपिकेंद्रस्थःशुक्रोवायदिवाबुधः हरेःस्मृतिर्यथाहंतितद्वद्दोषास्त्रिकोणगः लत्तोपग्रहचंडीशचंद्रजामित्रसंभवान् तत्केंद्रगोगुरुर्हंतिसुपर्णःपन्नगानिव तद्वदितिचें,तथायदिपापाःक्रूराःविधुश्चंद्रस्तैर्युक्तोयोनवांशस्तद्दोषोपिनश्यति उक्तंच सक्रूरराशेरशुभोनवांशःप्रोक्तःसपापोपिविलग्नसंस्थःत्रिकोणकेंद्रेषुगुरुःसितोवायदातदासावशुभोपिशस्तइति ८९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु·टी· अथान्यान्परिहारान् शालिन्याह केंद्रेकोणइति केंद्रेसप्तमरहिते १।४।१० कोणेनवपंचमेवातत्रगुरौसतिसर्वेदोषानाशमायांति कश्यपः काव्येगुरौवासौम्ये
वि·प्र· वायदाकेंद्रत्रिकोणगे नाशयंत्यखिलादोषाः पापानीवहरिस्मृतेः अथवेआयेएकादशेरवौसतिसर्वेदोषानाशमायांति वालग्नेचंद्रेवावर्गोत्तमेराशिनवां
८० शयुक्तेसति यथा मिथुनेमिथुनोनवांशस्तदापिदोषनाशः द्वितीयवाशब्दस्यानुक्तसमुच्चयार्थत्वात् चंद्रोलग्नादुपचयेसर्वदोषविनाशकः उक्तंच यत्रैका
दशगः सूर्योदोषानाशंसुयुस्तदा स्मरणाद्देवरुद्रस्यपापंजन्मशतोद्भवं वर्गोत्तमगतेलग्नेसर्वेदोषालयंययुः चंद्रोवाप्यथवायेपिग्नीस्रकुसरित्तोयथाचं
द्रेति एकादशेचंद्रेसतिदुर्मुहूर्तांशदोषाः दुर्मुहूर्तारवावर्यमेत्यादयः अंशदोषाः पापग्रहनवांशाख्याः तेसर्वेतद्वत् नाशमायांति कश्यपः मुहूर्तलग्नेष
ट्वर्गकुनवांशग्रहोद्भवाः येदोषास्तान्निहंत्येवयत्रैकादशगःशशी ज्योतिर्निबंधे नक्षत्रदोषकनवांशदोषंगंडांतदोषंचमुहूर्तदोषं विरुद्धपंचांगविरुद्ध

केंद्रेकोणेजीवआयेरवौवालग्नेचंद्रेवापिवर्गोत्तमेवा सर्वेदोषानाशमायांतिचंद्रेलाभेतद्वद्दुर्मुहूर्तांशदोषाः ९० त्रिकोणे
केंद्रेवामदनरहितेदोषशतकंहरेत्सौम्यःशुक्रोद्विगुणमपिलक्षंसुरगुरुः भवेदायेकेंद्रेंगपउतलवेशोयदितदासमूहंदो
षाणांदहनइवतूलंशमयति ९१ द्वौद्वौज्ञभृग्वोःपंचेंदोरवौसार्धत्रयोगुरौ रामामंदाशुकेत्वारसार्धैकैकंविशोपकाः ९२

दोषंनिशाकरोलाभगतोनिहंति ९० अथसामान्यतोदोषसमूहपरिहारंशिखरिण्याह त्रिकोणेति त्रिकोणेसप्तमरहितेकेंद्रेयदिसौम्योबुधस्तिष्ठेत्तद्दोषशतं
कंहरेत् उक्तस्थानेशुक्रोपिद्विगुणंद्विशतीहरेत् उक्तस्थानस्थितोगुरुःपिलक्षंदोषान्हरेत् भवेदिति अंगपोलग्नस्वामीउतवार्थे लवेशोलग्नगतनवांशना
थोवाआयेकेंद्रेयदिभवेत्तदासर्वेदोषान्हरेत् दोषाणांसमूहंनाशयति यथा दहनोऽग्निस्तुलंकार्पासमिव लग्नेटलग्नांशनाथोवाआयगःकेंद्रगोपिवा रा·म·
राशिंनिहंतिदोषाणामिंधनानीवपावकइति ९१ अथलग्नविंशोपकोऽनुष्टुभाह द्वौविति ज्ञभृग्वोरेकोमद्दयोः सतोर्द्वौविशोपकौ एवंविधेचंद्रेपंच सूर्येसा ८०
र्धास्त्रयः ३।३० गुरौरामास्त्रयः मंदःशनिः अगूराहुः केतुः आरोभौमः एषुप्रत्येकंसार्द्धमेकैकं १।३० विंशोपकाज्ञेयाः ९२॥ दौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रहवशेन श्वश्रुरादिविभागं सप्रयोजनमुपजात्याह श्वश्रूरिति सितः कन्यायाः श्वश्रूः सूर्यः श्वशुरः तनुर्लग्नं तनुः शरीरं स्यात् जामित्रपः सप्तमाधीशो द्यितो भर्ता मनः चंद्रो एतेषां शुक्रादीनां बलं विचार्य तांत्रिकः सिद्धांतवेत्ता विवाहनात् विवाहादनंतरं श्वशुरादीनां सुखं स्यादिति प्रवदेत् केचिद्विशेषतरमप्युक्तः सूर्यात्पतिः स्त्री च विधोस्तथा राद्दित्तं सुतो ज्ञात्वा सुखं गुरोश्च धर्मः सितादर्कसुताच्च वेश्म ब्रूयात्समुद्वाहविधो स्वयुक्त्येति ९३ अथ संकीर्णजातीनां विशेषं मत्तमयूरछंदसाह क्रूरक्षेपस इति क्रूरक्षेपक्षे शनिभौमार्कवारे विवाहोक्तनक्षत्रभिन्ननक्षत्रेषु चकारात् दुष्टयोगेष्वपि संकीर्णानामनुलोमप्रतिलोमजानामपि यदि करपीडा विवाहः स्यात् तर्हि सा करपीडा सुतायुर्धनलाभप्रीतिप्राप्त्यै भवति एषा स्थितिः वारः वा ग्रहणात् एतदभावे प्रागुक्तदिने पि विवाहः कार्य इति ९४ अथ गांधर्वादिविवाहे विशेषमनुष्टुभाह गांधर्वादीति प्राजापत्याब्राह्मदैवार्षसंज्ञाः विवाहा उक्तकाले एव कार्याः गांधर्वासुरराक्ष

श्वश्रूः सितोऽर्कः श्वशुरस्तनुस्तनुर्जामित्रपः स्याद्दयितो मनः शशी एतद्बलं संप्रति भाव्य तांत्रिकस्तेषां सुखं संप्रवदेद्विवाहतः
९३ क्रूरक्षे सौरिकुजार्कपि च वारे वर्ज्ये नक्षत्रे यदि वा स्यात्करपीडा संकीर्णानां तर्हि सुतायुर्धनलाभप्रीतिप्राप्त्यै सा
भवतीह स्थितिरेषा ९४ गांधर्वादिविवाहेऽर्काद्वेद४नेत्र२गुणे३दवः१॥

सपैशाचकाख्याः सर्वकाले कार्याः श्रीपतिः प्राजापत्यब्रह्मदैवार्षसंज्ञाः काले पूर्वोक्ते एव कार्या विवाहः गांधर्वाख्यश्चासुरो राक्षसं च पैशाचो वा सर्वकालं विधेय इति तत्र केचिदर्कात् सूर्यनक्षत्रात् वेदनेत्रादिभिः युक्रमेण सत्यात् अयमर्थः सूर्याक्रांतनक्षत्रमारभ्य चत्वार्यशुभानि ततो द्वे शुभे ततस्त्रीण्यशुभानीति क्रमेण त्रिपद्यात्रयाणां पदानां समाहारस्त्रिपदी तस्यां ब्रह्मविष्णुरुद्रपदाभिधचक्रत्रये इत्यर्थः एकस्मिन्नपि पदे यदशुभं तदशुभमेव पदत्रये यच्छुभं तच्छुभं इति कृत्वा च अशुभशुभानि क्रमेण पठितानि एवं पदत्रयाणां मुख्यार्थकथनात् एष्य क्रू थनानुपयोगः
तथा च पदत्रयमुक्तं भूपालवल्लभे॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु॰टी॰ एवंपद्वत्रयेशुद्वंनक्षत्रंदापयेत्सुधीः गांधर्वासुरपैशाचराक्षसेषुविचिंतयेदिति ९५ अथविवाहात्प्राक्कर्तव्यानामावश्यककृत्यानांदिनशुद्धिंपृथ्वी छं
वि॰प्र॰ दसाह विधोर्बलेति अत्रचंद्रबलमावश्यकत्वेनविचार्यं वारकोमांगलिकलग्नः गृहभूषणंचित्रलेखनादि अंगणविभूषणंसंमार्जनगोमयाद्यालेपः
८१ अथचवेदिकाचत्वरंवधूवरोपवेशनार्थंस्थलविशेषः मंडपोगृहाच्छादनंकटादिनावितानादिनावा बहुवचनात्कटाहाधारोपणहरिद्राचंदनकंजिका
धारणादिसकलशुभारंभानुद्वाहतः पूर्वविवाहोक्तैरुडुभिर्नक्षत्रैः पंचांगशुद्धिसहितेदिनेरचयेत् उपलक्षणत्वात्तत्तन्नक्षत्रेरुपनयनादावपिपूर्वंशुभक
र्मप्रारंभान्विरचयेत् तथाइदंकार्यजातंत्रिनवषण्मितेदिनेपूर्वंनआचरेत् चित्राविशाखाशततारकाश्विनीज्येष्ठाभरण्योशिवभाचतुष्टयं हित्वाप्रश

कु१ युगां४गा६ग्नि३भू१रामा३स्त्रिपद्यामशुभाःशुभाः ९५ विधोर्बलमवेक्ष्यवादलनवारकंगृहांगणविभूषणान्यथ
चवेदिकामंडपान् विवाहविहितोडुभिर्विरचयेत्तथोद्वाहतोनपूर्वमिदमाचरेत्त्रिनवषट्मितेवासरे ९६ हस्तोच्छ्रायावेद
हस्तैः समंतात्तुल्यावेदीसद्मनोवामभागे युग्मेघस्रेषष्ठहीनेचपंचसप्ताहेस्यान्मंडपोद्वासनंसत् ९७ मेषादिराशिजव
धूवरयोर्बटोश्चतैलादिलापनविधोकथितात्रसंख्या शैलादिशःशरदिगक्षनगाद्रिबाणबाणाक्षबाणगिरयो७।१०।५।
१०।५।७।७।५।५।५।५।७विबुधैस्तुकैश्चित् ९८ ऽऽस्तंफलतैलवेदिकाप्रदानकंकंडनमंडनादिकमितिदेवज्ञमनोहरोक्तेः तत्रैव मूलेंदु
रुद्रश्रवणार्कपौष्णविश्वेशचित्रानलरेवतीषु संस्थापनंकंजिककुंडिकायावारेरविर्भौमिसुतस्यशस्तमिति ९६ अथवेदीलक्षणंमंडपोद्वासने।
दिननियमंचशालिन्याह हस्तोच्छ्रायेति स्पष्टार्थः नारदः हस्तोच्छ्रिताचतुर्हस्तैश्चतुरस्त्रासमंततः स्तंभैश्चतुर्भिःसुश्लक्ष्णेवामभागेस्वसद्मनः मंडपो
द्वासनंकार्यंसमेतुदिवसेबुधैः षष्ठंतुविषमेनेष्टंत्यक्त्वासप्तमपंचमाविति ९७ केचित्तैलादिलापनेसंख्यानियमउक्तस्तमाह मेषादिराशिजेतिस्य राम॰
ष्टं देशविशेषेओडीछादौप्रसिद्धं ९८ ८१

CC-0. In Public Domain. Digitization by eGangotri

अथप्राप्तशिष्टसंमतंमंडपादौस्तंभनिवेशनंदूंद्रवज्रयाह सूर्येति कन्यातुलासिंहगतेऽर्केशैवेईशानकोणेविवाहादौस्तंभः स्थाप्यः वृश्चिकधनुर्मकरस्थि
तेवायुकोणे मीनमेषकुंभस्थितेनिर्ऋतिकोणे वृषमिथुनकर्कस्थितेऽग्निकोणे स्तंभःस्थाप्यइत्यर्थः ९९ अथगोधूलीप्रशंसांमंदाक्रांतयाह नास्मा
मिति स्पष्टार्थे गोधूल्यधिकारिणआहनारदः प्राच्यानांचकलिंगानांमुख्यंगोधूलिकंस्मृतं गांधर्वादिविवाहेषुवैश्योद्वाहेचयोजयेत् भूपालवल्लभे विप्रे
पूर्वादिकानांभेदात्तव्यंगोरजंबुधैः संकीर्णेगोरजःशस्तंपरेषुद्विजयंशुभं घटिकालग्नाभावेकार्यंविप्रेस्तुगोरजोलग्नमिति महादोषान्पुरित्यज्यप्रोक्ता
धिष्ण्यादिकेषुच कारयेद्गोरजोयावत्तावल्लग्नंशुभावहमिति देवज्ञमनोहरे कुलिकंक्रांतिसाम्यंचमृतौषष्ठाष्टगःशशीपंचगोधूलिकेत्याज्याअन्य
दोषाःशुभावहाइति तत्रगोधूलिकालःकेशवार्केणोक्तः अत्रोभयत्रघटिकादलमिष्टमाहुरिति केचित्तु यावद्दिनांतेनिशिपश्चिमायांपश्येत्तृतीयंरवि

सूर्येगनासिंहधटेषुशैवेस्तंभोलिकोदंडमृगेषुवायौ मीनाजकुंभेनिर्ऋतौविवाहेस्थाप्योग्निकोणेवृषयुग्मकर्के ९९
नास्मामृक्षंनचतिथिकरणंनैवलग्नस्यचिंता नोवावारोनचलवविधिर्नोमुहूर्तस्यचर्चा नैवायोगोनचमृतिभवनंनैव
जामित्रदोषागोधूलिःसामुनिभिरुदितासर्वकार्येषुशस्ता १०० पिंडीभूतेदिनकृतिहेमंततौस्यादर्धास्तेतपसमयेगोधू
लिः संपूर्णास्तेजलधरमालाकालेत्रेधायोज्यासकलशुभेकार्यादौ १०१ ॥बिंबभागं तस्मात्परंनाडिकयुग्ममेकेगोधूलिकालंमुन
योवदंतीति यथायोग्यंदेशव्यवस्था १०० अथगोधूलीभेदंजलधरमालाछंदसाह पिंडीभूतइतिहेमंततौशीतकालेमार्गादिमासचतुष्टयेदिन
कृतिसूर्येपिंडीभूतेगोलकसदृशेसंध्यायांनीहाराद्यावृतत्वेननिःप्रभेइत्यर्थः तस्मिन्समयेगोधूलीज्ञेया तथातपसमयेउष्णकालेचैत्रादिमासचतु
ष्टयेऽर्धास्तेअर्धबिंबस्यदृश्यत्वेगोधूलिः जलधरमेघास्तेषांमालासमूहस्तस्योत्पादकेवर्षाकालेश्रावणादिमासचतुष्टयेसूर्येसंपूर्णास्तेऽदर्शन
यस्यतादृशेसतिगोधूलिः जलधरमालाछंदोजाभापिसूचितं नकेवलमियंविवाहेकिंतुसकलशुभेकार्यादौज्ञेया १०१ ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृहस्पतिवारे सूर्ये अस्तं याते गोधूलिः शुभः स्यात् ननु पू

मु.टी. अथ गोधूलीसमये ऽवश्यवर्ज्यानि वैश्वदेवीछंदसाह अस्तंयाते इति गोधूलिरित्यनुवर्तते तथा लग्नात्सायंकालीनलग्ना

वि.भ. र्वे अर्धयामसद्भावात् तथा सौरे शनौ सार्के सत्येव गोधूली शुभा नत्वस्तानंतरं कुलिकसद्भावात् क्रांतिसाम्यमपि त्याज्यं

८२ तु मृत्यावष्टमे रिपुभवने षष्ठे वा लग्ने एववा चंद्रे सति कन्यानाशः स्यात् लग्ने इति लग्नस्थे मदनस्थे मृत्युस्थे वा भौमे सति वोढुर्वरस्य नाशः स्यात् शेषंस

ष्टं १०२ अथ सूर्यस्य स्पष्टगतिमिंद्रवज्रयाह मेषादिगे इति मेषादिद्वादशराशिषु स्थूलाकलात्मिका स्पष्टा गतिरित्यर्थः १०२ सूर्यस्य तात्कालिकीकरण

मनुष्टुभाह संक्रांतियातेति पंचांगे यद्दिने यावतीषु घटीषु च संक्रांतिस्तत आरभ्य स्वाभीष्टदिनपर्यंतं यावंति दिनानि घटीपलानि भवंति तैर्मेषादिष्ट श

मनुष्टुभाह संक्रांतियातेति पंचांगे यद्दिने यावतीषु घटीषु च संक्रांतिस्तत आरभ्य स्वाभीष्टदिनपर्यंतं यावंति दिनानि घटीपलानि भवंति तैर्मेषादिष्ट श

अस्तंयाते गुरुदिवसे सौरे सार्के लग्नान्मृत्यौ रिपुभवने लग्ने चेंदौ कन्यानाशस्तनुमदमृत्युस्थे भौमे वोढुर्लाभे धनसहजे चं

द्रे सौख्यं १०२ मेषादिगेर्के ष्टशरा ५८ नगा सा ५७ सप्तेषवः ५७ सप्तशराः ५७ गजाक्षाः ५८ गोक्षाः ५९ रवितर्काः ६० कुर

साः ६१ कृततर्काः ६१ कंगानि ६१ षष्टि ६० नवपंच ५९ भुक्तिः १०३ संक्रांतियातघस्राद्यैर्गतिर्निघ्नाः खषट् ६० हृता लब्धे

नांशादिनायोज्यं यातर्क्षस्पष्टभास्करः १०४ तनो रिष्टांशकात्पूर्वं नवांशा दश संगुणाः एभाप्तालब्धमंशाद्यं तनोर्वेगादि

साधने १०५ अर्काद्दलग्नात्तायनांशाद्भोग्य भुक्तैर्भोगैर्निघ्नात्स्वोदयात्तवाग्निभक्ताव ॥ १ ॥ शिस्थेर्कस्य स्पष्टगतिर्गुणनीया षष्ट्या भाज्याय

ह्लब्धं तेंशाः अवशिष्टं कलादिअंशावयवास्ते आदिशब्दवाच्याः तैर्यातर्क्षे यातराशिः सूर्यभुक्तमेषादिराशिर्युक्तः सन् तात्कालिकः स्पष्टभास्करः

स्यात् १०४ अथ लग्नानयनमाह तनोरिति लग्नस्य क्रियमृगास्येत्यादिना यो नवांशो विचारितः सयावत्या आगच्छेत्तत्पूर्वं नवांशा यावंतः स्युस्ते द राम:

शगुणा एभैस्त्रिभिराप्ताय ह्लब्धमंशाद्यं अंशकलाविकलात्मकं तत्तनो रिष्टकालिकं भुक्तं स्यात्तेन कृत्वा प्राग्युक्तकुजशुक्रसौम्येत्यादिप्रकारेण षड् ८२

गसाधनं स्यात् १०५ अथैवं साधिताभ्यां रविलग्नाभ्यां घटिकानयनं शालिन्याह अर्कादिति अयनांशसहितसूर्यात्तराशिभोग्यांशैः सायनस्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्योक्रांतराशेः स्वदेशीयउदयाः मेषादिराशीनां कलात्मकं प्रमाणं यद्गुण्यं खाग्निभिस्त्रिंशता भक्तं लब्धानि भोग्यानि च पलानि स्युः एवं लग्नात्सायनांशात् भुक्तां शेः स्वोदयो गुण्याः खाग्निभक्तो लब्धानि भुक्तानि पलानि एवं जातानां भोग्यभुक्तपलानामैक्यं कार्यं तत्सायनांशलग्नार्कयोरंतरालोदयपले युक्तं कार्यं षष्ट्या भक्तं सूर्योदयादिष्टघटिका भवेयुः १०६ विशेषं शालिन्याह चेल्लग्नार्काविति सायनांशौ लग्नार्कौ एकराशौ भवतस्तयोर्विश्लेषो ऽंतरांशास्तैर्गुणितः स्वदेशीयउदयः ततः खाग्निभक्तो लब्धमिष्टकालः सूर्योदयात्स्यात् तत्र यदार्कात्सायनादेकराशिस्थितं लग्नमूनं स्यात्तदायइष्टकाल आगतः स सूर्योदयात्प्राक् रात्रिशेषो भवेत् अयमर्थः आगतइष्टकालः षष्ट्या प्रपात्यप्राग्दिनीयसूर्योदयानंतरमेतावानिष्टकालः अथवा एतन्मानात् प्रपात्यप्राग्दिनीयसूर्यास्तानंतरमेतावानिष्टकालः अत्र एतौ विशेषमानीते इष्टकाले अंशप्रवृत्तेः पंचपलानि योज्यानीति संप्रदायः तत्समये परस्परदर्शनं कार्यं इत्याह कश्यपः

भोग्यंभुक्तंचांतरालोदयाढ्यं षष्ट्या भक्तं स्वेष्टनाड्यो भवेयुः १०६ चेल्लग्नार्कौ सायनावेकराशौ तद्विश्लेषघ्नोदयः खाग्नि भक्तः स्वेष्टः कालो लग्नमूनं यदार्कात् द्रात्रौ शेषेकात्स षड्भिर्निशायां १०७ उत्पातान्सहपातदग्धतिथिभिर्दुष्टांश्चयोगांस्तथा चंद्रेज्याशनसामयात्तमयनं तिथ्यः क्षयद्वीतथा॥ ५ अन्योन्यवीक्षणं सम्यक् सुलग्ने कारयेत्सदेति सुलग्नसाधनं घटिकायंत्रेण साध्यं

तत्र घटीस्थापने नारदः ताम्रपात्रे जले पूर्णे गंधैः पुष्पैरलंकृते तंदुलस्थे रत्नयुते शुचिभूमावहर्पते मंडलार्धोदयं वीक्ष्य जलपात्रे विनिक्षिपेत् तत्रमंत्रः यंत्राणां मुख्ययंत्रत्वमिति धात्रा पुराकृतं सौभाग्यमायुरारोग्यसुपुत्रधनहेतवे जलयंत्र कमेतस्मादिष्टसिद्धिप्रदो भवेत् अथवा साधयेत्कालं द्वादशांगुलशंकुनेति शंकुघटीत्रानंतरामविनोदे मयोक्तं तत एवज्ञेयं १०७ अथ विवाहादौ शुभकार्ये ऽवश्यवर्ज्यान्विस्मरणार्थे शार्दूलविक्रीडितत्रयेणाह उत्पातानिति सेंदुक्रूरेति क्रूरांक्रांतमिति च उत्पातादीन् उद्वाहे विवाहे यज्ञोपवीतादौ शुभकर्मसु च त्यजेदिति तृतीयश्लोके नान्वयः उत्पातान् दिव्यभौमांतरिक्षात् लक्षणयातत्संबंधिसप्तवर्ज्यान्दिवसान् पातो महापातः क्रांतिसाम्यमिति यावत् दग्धतिथयश्चापांत्यो गोघटगे इत्यादिनोक्ताः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु॰टी॰ एतैः सहउत्पातंत्यजेदित्यर्थः तथा दुष्टान् व्यतीपातादियोगान् चंद्रगुरुशुक्राणामस्तमयनमस्तं तिथ्यः क्षयर्द्धीतिथिक्षयंतिथिवृद्धिंच गं
वि॰अ डांतंतिथिनक्षत्रलग्नानांत्रिविधं विष्टिर्भद्रा संक्रमदिनंसंक्रमकालादुभयतोवर्ज्यघटिकाः अयनेविषुवेचपूर्वापरदिनसहितंसंक्रांतिदिनंज्ञेयं तन्वं
८३ शपास्तंतनुलग्नं अंशः लग्नगतोविहितनवांशः तौपातः तौतन्वंशपौतयोरस्तं लग्नेशास्तंलग्ननवांशस्वाम्यस्तंच तथातन्वंशेशविधूनलग्नेशनवां
शेशचंद्रान् अष्टमषष्ठस्थानगान् तथापापग्रहवर्गान् १०८ सेंदुक्रूरखगोदयांशं इंदुसहितंलग्नंलग्नांशंचक्रूरग्रहसहितलग्नंलग्नांशंचेत्यर्थः
उदयास्तशुद्धिं उदयाशुद्धिमस्ताशुद्धिंचइतरयाज्ञेयमशुभमित्याद्युक्तं चंडायुधंहर्षणवैधृतिसाध्येत्यादिनोक्तं खार्जूरंव्याघातगंडइत्यादिनोक्तं द
शयोगः सूर्यर्क्षचंद्रर्क्षयुतेर्भशेषइत्यादिनोक्तं योगोग्रहयुतिः तत्सहितंजामित्रलत्तावेधंजामित्रंलग्नजामित्रंचंद्रजामित्रंच लग्नाचंद्रान्मदनभव

गंडांतंचसविष्टिसंक्रमदिनंतन्वंशपास्तंतथातन्वंशेसविधूनथाष्टरिपुगान्पापस्यवर्गांस्तथा १०८ सेंदुक्रूरखगोदयां
शमुदयास्ताशुद्धिंचंडायुधान् खार्जूरंदशयोगयोगसहितंजामित्रलत्तावेधं बाणोपग्रहपापकर्तरितथातिथ्यृक्षयोगो
त्थितंदुष्टयोगमथार्धयामकुलिकाद्यान्वारदोषानपि १०९ क्रूराक्रांतविमुक्तभंग्रहणभंयत्क्रूरगंतव्यभंत्रेधोत्पातहतं
चकेतुहतंभंसंध्योदितंभंतथा॥ ५५नगेइत्यादिनोक्तं लत्तात्वरुणहुपूर्णेंदुसिताइत्यादिनोक्ता व्यधंपंचशलाकासप्तशलाकोक्तंच बाणाः पंच
कं उपग्रहः प्रसिद्धः शरा‍ष्टदिक्शक्रनगेत्यादि पापकर्तरीसमाहारंद्वंद्वैकवचनं तिथ्यृक्षवारोत्थितंदुष्टयोगंतिथिनक्षत्रवारैः क्रत्वोः स्थितमुत्प
न्नंदुष्टयोगं यथा तिथिनक्षत्रोत्थं सार्पद्वादश्यांवैश्वमादिमइत्यादि तिथिवारोद्भवंसूर्येशपंचेत्यादि नक्षत्रवारोद्भवंयाम्यत्वाष्ट्रमित्यादि तिथिन राम॰
क्षत्रवारोद्भवंहस्तार्कपंचमीतिथावित्यादिदुष्टयोगं अर्धयामकुलिकाद्यान्वारदोषानपिआदिशब्देनदुर्मुहूर्तादिकंच १०९ क्रूराक्रांतविमुक्तभंक्रू ८३
रग्रहेणयुक्तभंक्रूरविमुक्तभंच ग्रहणभंयस्मिन्नक्षत्रेचंद्रसूर्योपरागे जातस्तद्वं क्रूरस्यगंतव्यभं त्रेधोत्पाताः त्रिविधोत्पाताद्दिव्यभौमांतरिक्षाः॥

CC-0. In Public Domain. Digitization by eGangotri

तेहतंभं तन्मासमषट्कंत्याज्यं एवंग्रहणनक्षत्रमपि केतुहतभं केतुनाधूमनैः स्पर्शनैश्चयन्नक्षत्रंहतं अनेननक्षत्रांतरेपिदोषः संध्योदितंभंसूर्यास्तका
लेयन्नक्षत्रस्यक्षितिजेउदयंतत्सूर्यनक्षत्राच्चतुर्दशंनक्षत्रमित्यर्थः तद्वच्चग्रहभिन्नयुद्धगतभंग्रहेणभेदितग्रहयुद्धगतंचषण्मासंनिषिद्धं तथा
ग्रहकृतानूलग्नस्यदोषान्व्ययेशनिः खेऽवनिजइत्यादिकानांलग्नसंबंधिदोषान्संत्यजेत् मूलवाक्यानिपूर्वमेवलिखितानि ११० इतिमुहूर्तचिं
तामणौप्रमिताक्षरायांविवाहप्रकरणंसमाप्तं ६ अथवधूप्रवेशप्रकरणं अथवधूनूतनपरिणीतायावध्वाप्रथमतः क्रियमाणोभर्तृगृहेप्रवेशोव
धूप्रवेशस्तन्मुहूर्तमुपेंद्रवज्रयाह समाद्रीति विवाहाद्विवाहदिवसादारभ्याष्टिदिनांतरालेषोडशदिनांतरालेषोडशदिनमध्येसमाद्रिपंचांकदिने सम
दिनानिद्वितीयचतुर्थषष्ठाष्टमदशमद्वादशचतुर्दशषोडशानि विषमदिनमध्येसप्तमपंचमनवमदिनानितेषुवधूप्रवेशः शुभः नारदः आरभ्यो

तद्वच्चग्रहभिन्नयुद्धगतभंसर्वानिमान्संत्यजेदुद्वाहेशुभकर्मसुग्रहकृतान्लग्नस्यदोषानपि ११० इतिमुहूर्तचिंतामणौ
विवाहप्रकरणंषष्ठं ६॥ समाद्रिपंचांकदिनेविवाहाद्वधूप्रवेशोष्टिदिनांतराले शुभः परस्ताद्विषमाब्दमासदिनेक्षव
षोन्परतोयथेष्टं १ ध्रुवक्षिप्रमृदुश्रोत्रवसुमूलमघानिले॥ ॥

द्वाहदिवसात्षष्ठेवाप्यष्टमेदिने वधूप्रवेशः संपत्यैदशमेथसप्तमेदिने षष्ठादीनांसमत्वादेवग्रहणेसिद्धेपुनस्तदुक्तिरितिप्राशस्त्यार्थः वधूप्रवेश
नेकार्यंपंचमेसप्तमेदिने नवमेचशुभेवारेसुलग्नेशेशिनोबलेइतिज्योतिर्निबंधे षोडशदिवसानंतरंवधूप्रवेशस्तदाविषमाब्दमासदिनेविषमव
र्षेविषममासेविषमदिनेचकार्यः अक्षवर्षादिति पंचवर्षादनंतरंविषमवर्षादिनियमोनास्ति किंतुदोषरहितकालेवधूप्रवेशोविधेयः उक्तंच वि
वाहमारभ्यवधूप्रवेशोयुग्मेदिनेषोडशवासरांतः ऊर्ध्वंततोऽब्देऽयुजिपंचमांत्पुनः पुरस्तान्नियमोनवास्तीति १ अथनक्षत्रशुद्धिमनुष्टुभाह
ध्रुवेति ध्रुवादिनक्षत्रेषुवधूप्रवेशःसन्शुभफलः रिक्तारार्के रिक्ता ४।९।१४ आरेभौमेअर्केरवौनइष्टः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु·टी· अर्थादन्यतिथिषु रविभौमव्यतिरिक्तवारेषु शस्त इत्यर्थः अपरे बुधवारेपिनेष्टः २ अथविशेषमहेंद्रवज्रयाह ज्येष्ठपतिज्येष्ठमिति विवाहतो विवा
व·प्र· हानंतरं आदिमे ज्येष्ठे भर्तृगृहे स्थितावधूः पतिज्येष्ठंहंति आदिमेऽधिके पतिंभर्तारंहंति आदिमे शुचावाषाढे श्वश्रूं भर्तृजननींहंति आदिमे सहस्येपौ
द्वि·प्र· षेश्वशुरंभर्तुः पितरंहंति आदिमे क्षयेक्षयमासे भर्तृगृहे तिष्ठंती तनुंनिजंशरीरंहंति म्रियत इत्यर्थः तथा आदिमे मधौचैत्रे तातगृहेपितृगृहेतिष्ठति तातं
८४ पितरंहंतीत्यर्थः यदिपित्राद्यभावः तर्हितन्मासि तत्रगृहावस्थितौ सत्यामपिनकोपिदोष इत्यर्थः नभयंतेषामभावे इत्युक्तेः ज्योतिर्निबंधे विवाहात्प्र
थमे पौषे आषाढे चाधिमासके नसाभर्तृगृहे तिष्ठेच्चैत्रे तातगृहेपिच आषाढो ज्येष्ठोपलक्षकः अधिमासो क्षयमासोपलक्षकः ३ इतिमुहूर्तचिंता

वधूप्रवेशः सन्नेष्टो रिक्तारार्केबुधेपरैः २ ज्येष्ठपतिज्येष्ठमथाधिके पतिंहंत्यादिमे भर्तृगृहे वधूः शुचौ श्वश्रूंसहसेश्वशुरं
क्षयेतनुंतातमधौ तातगृहे विवाहतः ३ इतिमुहूर्तचिंतामणौ वधूप्रवेशप्रकरणंसप्तमं ७ चरेदथौजहायने घटालि
मीनगेरवौ रवीज्यशुद्धियोगतः शुभग्रहस्यवासरे नृयुग्ममीनकन्यकातुलावृषाविलग्नके द्विरागमंलघुध्रुवेचरेस्वपे
॥मृदूडुभिः॥१॥

मणौप्रमिताक्षरायांस्वकृतटीकायांवधूप्रवेशप्रकरणंसप्तमंसमाप्तं ७ अथद्विरागमनप्रकरणंव्याख्यायते तत्रवधूप्र
वेशानंतरंपरावृत्यपितृगृहंप्राप्तायवध्वाः पुनर्भर्तृगृहेप्रवेशो द्विरागमनशब्दवाच्यस्तन्मुहूर्तंप्रियंवदाचामरछंदसाह चरेदिति अथानंतरेषुलघुध्रुवा
दिनक्षत्रेषु ओजहायने विषमवर्षे प्रथमतृतीयादिवर्षे तथाघटालिमेषगेरवौकुंभेवृश्चिकेमेषेरवौसति तथावरस्यरवीज्यशुद्धियोगतः शुभग्रहस्य राम:
वारे मिथुनमीनकन्यातुलावृषाणामन्यतमेलग्नेशुभयुतदृष्टेसति लघुध्रुवचराणिप्रसिद्धानि अस्वपोमूलं मृदूनिप्रसिद्धानि एतेषुद्विरागमंच ८४
रेत्कुर्यात् अत्रसामान्यतः गुरुशुक्रास्तादिविचारः पूर्वोक्तएवज्ञेयः १॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसन्मुखशुक्रदोषंप्रहर्षिण्याह दैत्येज्यइति दैत्येज्यः शुक्रः गंतव्यादिगभिमुखेगंतुर्दक्षिणभागेवास्थितः स्यात्तदाशिशुर्बालकः गर्भिणीगर्भवती नवोढानूतनपरिणीता एतानगच्छेयुः यदिप्रतिशुक्रेगच्छेयुस्तदेत्याह बालइति चेद्बालोगच्छतितदाविपद्यतेम्रियते नवोढाचेद्व्रजतितदावंध्याऽपत्यसंभावनारहितास्यात् गर्भिणीचेद्व्रजतितदाऽगमोगर्भस्रवतीस्यात् यदिशुक्रः पूर्वस्यामुदितः पूर्वांगंतुःसन्मुखः उत्तरांगंतुर्दक्षिणः पश्चिमांगंतुःपृष्ठिः दक्षिणांगंतुर्वामेस्यात् तदापूर्वोत्तरेदिशौनगच्छेत् यदिपश्चिमायामुदितःशुक्रः तदापश्चिमांगंतुःसन्मुखः दक्षिणांगतुर्दक्षिणः पूर्वांगंतुःपृष्ठे उत्तरांगंतुर्वामे तदापश्चिमदक्षिणदिशौनगच्छेत् केचिद्दीपोत्सवप्रतिपदिनक्षत्रादिनियमंविनैववधूप्रवेशंवाञ्छंति उक्तंच अस्तंगतेगुरौशुक्रेसिंहस्थेवाबृहस्पतौ दीपोत्सवदिनेचैवकन्याभर्तृगृहंविशेदिति २ अथप्रतिशुक्रापवादंमंजुभाषिण्याह नगरप्रवेशेति नगरप्रवेशे विष

दैत्योज्योह्यभिमुखदक्षिणेयदिस्याद्गच्छेयुर्नहिशिशुगर्भिणीनवोढा बालश्चेद्व्रजतिविपद्यतेनवोढाचेद्वंध्याभवति
चगर्भिणीत्वगर्भा। २ नगरप्रवेशविषयाद्युपद्रवेकरपीडनेविबुधतीर्थयात्रयोः नृपपीडनेनववधूप्रवेशनप्रति
भार्गवोभवतिदोषकृन्नहि ३ पित्र्यगृहेचेत्कुचपुष्पसंभवः स्त्रीणांनदोषः प्रतिशुक्रसंभवः॥ ९॥ ॥

योदेशः आदिशब्देनग्रामः तौल्लोपद्रवेऽन्येराजकृतोपद्रवेदुर्भिक्षाद्युपद्रवेवासतिगंतव्यदिशिप्रतिशुक्रदोषोनास्ति करपीडनेविवाहे देशेनयात्रायांसत्यांविबुधादेवास्तेषांयात्रा यथानगरकोटयात्रा तीर्थयात्राप्रयागादिकानयोः नृपपीडनेराज्ञःसकाशात्पीडावाद्गदिकृतायांसत्यां नववधूनूतनपरिणीतानववधूः तस्याः प्रवेशेप्रतिभार्गवःसंमुखशुक्रदोषकृन्नहिभवति भार्गवःस्वभवनपुरप्रवेशेदेशानांविभ्रमेतथोद्वाहेनूतनवध्वोगमनेप्रतिशुक्रविचारणंनास्ति एकस्मामेपुरेवापिदुर्भिक्षेराजविप्लवे विवाहेतीर्थयात्रायांप्रतिशुक्रंनदुष्यतीतिबादरायणोक्तेः ३ अथप्रौढास्त्रीणांद्विरागमनेतथामोक्षपरत्वेनचप्रतिशुक्रापवादांतरमिंद्रवंशयाह पित्र्येगृहइति पितुरिदंपित्र्यंचतस्मिन्पित्र्येगृहेकुचोत्सनेपुष्पमृतुस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्संभवस्यात्तदास्त्रीणांप्रतिशुक्रसंभवोदोषोनास्तीत्यपिज्ञेयं चंडेश्वरः पित्र्यागारेकुचकुसुमयोःसंभवोवायदिस्यात्सत्युःशुद्धिर्नभवतिरवेःसन्मुखोवाथ शुक्रः शुद्धेलग्नेगुणवतितिथौचंद्रताराविशुद्धौस्त्रीणांयात्राभवतिसफलासवितुस्वामिसद्म अथभृगुः अंगिरावत्सवसिष्ठकश्यपात्रीणांभरद्वाजमुनेकुलेकोर्थः एतद्वंशोत्पन्नानांप्रतिशुक्रसंभवोदोषोनास्ति बादरायणः कश्यपेषुवसिष्ठेषुभृग्वत्र्यंगिरस्सुच भारद्वाजेषुः वत्सेषुप्रतिशुक्रंनदुष्यतीति अयंचापवादोयात्रामात्रधारणः केचिदमुमपवादंबुधसौमुखोप्यूचुः महेश्वरः तीर्थानांगमनेतथैकनगरेग्रामंचसौम्यंतथेति ४ पूर्वैःसह ७ इतिदैवज्ञानंतसुतदैवज्ञरामविरचितायांस्वकृतमुहूर्तचिंतामणिटीकायांप्रमिताक्षरायांद्विरागमनप्रकरणमष्टमंसमाप्तं ७

अथाग्न्याधानप्रकरणंव्याख्यायते यत्रनुकालनियमेनाधानादिविहितंतत्रनमुहूर्तविचारः यदानुकालनियमाभावस्तदामुहूर्तविचारस्तद्वसं

भृग्वंगिरोवत्सवसिष्ठकश्यपात्रीणांभरद्वाजमुनेःकुलेतथा ४ इतिमुहूर्तचिंतामणौद्विरागमनप्रकरणमष्टमंसमाप्तं ८ स्यादग्निहोत्रविधिरुत्तरगेदिनेशेमिश्रध्रुवांत्यशशिशक्रसुरेज्यधिष्ण्ये रिक्तासुनोशशिकुजेज्यभृगौननीचेनास्तंगतेनविजितेनचशत्रुगेहे १ नोकर्कनक्रझषकुंभनवांशलग्नेनोऽब्जेननौरविशशीज्यकुजेत्रिकोणे॥

ततिलकेनाह स्यादग्निहोत्रविधिरिति उत्तरगेदिनेशेउत्तरायणगतेसूर्येसतिमिश्रेकृत्तिकाविशाखेध्रुवाणिरोहिण्युत्तरात्रयंअंत्यारेवतीशशीमृगः शक्रोज्येष्ठासुरेज्यधिष्ण्यपुष्यः एषुनक्षत्रेषुअग्निहोत्रविधिःस्यात् रिक्तासुनोकार्यं चंद्रमंगलगुरुशुक्रेषुनीचगतेअस्तंगतेविजितेगृहांबरेषुनयाशत्रुगृहस्थितेषुअग्न्याधाननोकार्यं १ अथलग्नशुद्धिंवसंततिलकेनाह नोकर्केति कर्कमकरमीनकुंभानांनवांशेलग्नेचाग्न्याधाननोकार्यं लग्नेचंद्रेसतिनोकार्यं चंद्रोपलक्षणत्वाच्छुक्रेपिनोकार्यं यस्यचाधानलग्नस्थेचंद्रेचभृगुनंदने उपैतितस्यजातोग्निर्निर्वाणंसततंभुलग्नेतिकश्यपोक्तेः रविशशीज्येति सूर्यचंद्रगुरुभौमेषुत्रिकोणकेंद्रक्षेषद्विभवगेषुभवगेएकादशस्थेएनत्स्थानस्थितेषुसत्सु॥ ८५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परे बुधशुक्रशनिराहुकेतुभिः त्रिलाभषट्खस्थितैः तृतीयैकादशषष्ठदशमस्थानस्थितैः सद्भिः आधानदिनं स्यात् निधनेति अष्टमस्थानशुद्धे लग्ने अष्टमस्थाने शुभग्रहोपि न शुभः अथवा निधनशुद्ध इति निधनमष्टमलग्नं कस्मादित्याधानकर्तुर्जन्मराशिलग्नाभ्यामष्टमं लग्नमित्यर्थः तस्य शुद्धत्वं तदभाव इति यावत् तेन युक्ते लग्न इत्यर्थः अत्र व्याख्यानद्वयेपि प्रमाणसद्भावाद्द्वयमपि युक्तं अत्र निधनशुद्धिश्च ताभ्यां युते लग्न इत्यर्थः २ अथाग्न्याधानकर्तुराधानलग्नवशाद्यागकर्तृत्वयोगाननुष्टुभाह चाप इति जीवे गुरौ चापे धनुस्थे लग्नगे सति आधानलग्ने धनुराख्ये गुर्वधिष्ठिते सतीत्यर्थः अयमेको योगः अथवा भौमे मेषलग्नस्थिते सति अयं द्वितीयो योगः अथवाऽऽधानलग्नाद्दशमे सप्तमे वा भौमे सति योगद्वयमेतत् अथवा ज्ञे चंद्रे षष्ठतृतीयैकादशस्थानस्थे सति योगत्रयमेतत् अथवा षट्त्र्यायेरवौ स्थे सति योगत्रयमेतत् एवंविधे लग्ने

केंद्रस्थे षट्त्रिभवगे च परैस्त्रिलाभे षट्सुस्थितैर्निधनशुद्धियुते विलग्ने २ चापे जीवे तनुस्थे वा मेषे भौमे वरे द्युने षट्त्र्याये ज्ञे रवौ वास्याज्जाताग्निर्यजति ध्रुवं ३ इति मुहूर्तचिंतामणावग्न्याधानप्रकरणं नवमं समाप्तं ९ ॥ ०॥

राजाभिषेकः शुभ उत्तरायणे गुर्विंदुशुक्रैरुदितैर्बलान्वितैः ॥ ॥

नेयो जाताग्निरग्निहोत्रकर्ता ध्रुवं निश्चयेन यजति ज्योतिष्टोमादियागं करोतीत्यर्थः ३ इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचितायां स्वकृतमुहूर्तचिंतामणिटीकायां प्रमिताक्षराख्यायामग्न्याधानप्रकरणं नवमं समाप्तं ॥ ९ ॥ अथ राजाभिषेकप्रकरणं व्याख्यायते तत्र कालशुद्धिमिंद्रवज्रयाह राजाभिषेक इति उत्तरायणगते सूर्ये सति तथा गुर्विंदुशुक्रैः बृहस्पतिचंद्रशुक्रैरुदितैः सद्भिः तथा भौमार्कौ प्रसिद्धौ लग्नेशो जन्मलग्नेशः दशेशो वर्तमानजातकीयमहादशांतर्दशयोः स्वामिनोः जन्मपो जन्मराशिस्वामी एतैर्बलान्वितैः उच्चस्वगृहादिगृहस्थैः सद्भिः राजाभिषेकः शुभ उक्तः नो चैत्रेति चैत्रमासः रिक्ताः ४।९।१४ आरो भौमः निशा रात्रिः मलिम्लुचोधिमासः एषु राजाभिषेको नो कार्यः ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुत्रचित् भौमवार उक्तः स्वसेनापत्याभिषेकपरो ज्ञेयः भौमस्य सेनापतित्वात् गोविप्रराज्यपितृकर्म चतुष्टये पीति चतुष्टये राज्याभिषेक उक्तः सोमवा स्यायाभवत्येवेति १ अथाभिषेके नक्षत्राणि लग्नशुद्धिं चेंद्रवंशयाह शाक्रः श्रवेति शाक्रो ज्येष्ठाः श्रवः श्रवणः क्षिप्राण्यश्विनीपुष्यहस्ताः मृदूनि चित्रामृगरेवत्यनूराधाः ध्रुवाणि रोहिण्युत्तरात्रयं एतैर्नक्षत्रैः राजाभिषेकः शुभः अत्र चित्राग्रहणं ज्येष्ठाश्रवःक्षिप्रमृदुध्रुवेषु सौम्यग्रहस्याह्नि तिथौ च रिक्ता इति महेश्वरवचनात् अन्यग्रंथे तदभावात् शीर्षोदय इति शीर्षोदया मिथुनकन्यातुलावृश्चिककुंभाख्याः एषु अभिषेकलग्नेषु अथवा उपचये स्वजन्मलग्नात् स्वजन्मराशेर्वा उपचये त्रिषडेकादशदशमानामन्यतमे लग्ने सति शुभे शुभग्रहे तनौ लग्नगते सति दृष्टे वा सति अभिषेकः शुभः कथ्यपः जन्मराशेरुपचये लग्ने शीर्षोदये स्थिरे शुभग्रहेक्षितयुते न युते वीक्षिते पैरीरिति पापैरिति पापग्रहैः तृतीयषष्ठैकादशस्थानस्थितैः शुभग्रहैः

भौमार्कलग्ने शदशे शजन्मपे नौ चैत्ररिक्तारनिशामलिम्लुचे १ शाक्रश्रवःक्षिप्रमृदुध्रुवोडुभिः शीर्षोदये वोपचये शुभे तनौ पापैस्त्रिषष्ठायगतैः शुभग्रहैः केंद्रत्रिकोणायधनत्रिसंस्थितैः २ पापैस्तनौ रुक् निधने मृतिः सुते पुत्रार्तिरर्थव्ययगैर्दरिद्रता स्यात् खेलसो भ्रष्टपदो द्युनांबुगैः सर्वं शुभं केंद्रगतैः शुभग्रहैः ३॥ ६ ॥ ६ ॥

प्रथमचतुर्थसप्तमदशमनवमपंचमैकादशद्वितीयतृतीयस्थानस्थितैः राजाभिषेकः शुभः २ अथ विशेषं सापवादमिंद्रवंशयाह पापैरिति तनौ लग्नस्थितैः पापग्रहैः रुक् रोगः स्यात् राज्ञ इति शेषः निधनेऽष्टमे पापग्रहैः मृतिः स्यात् सुते पंचमे पापग्रहैः पुत्रार्तिः पुत्रपीडा स्यात् अर्थव्ययगैः द्वितीयद्वादशगैः पापैर्दरिद्रता स्यात् खे दशमे पापैः अलसो निरुद्योगः स्यात् द्युनांबुगैः सप्तमचतुर्थस्थानस्थैः पापग्रहैः भ्रष्टपदो भ्रष्टैश्वर्यः स्यात् अथापवादमाह सर्वं शुभमिति केंद्रगतैः शुभग्रहैः सर्वं प्रागुक्तं दुष्टफलं शुभं शुभोदर्कं स्यात् ३॥ ६ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ विशेषं भुजंगप्रयातेनाह गुरुर्लग्नकोण इति लग्ने गुरुश्चेत्स्यादथवा कोणे नवपंचमे गुरुः स्यात् कुजो भौमो ऽरेः शत्रुगृहे षष्ठः स्यात् खे दशमे सितः शुक्रः स्यात् एतादृशे ऽभिषेकयोगे यो राजाभिषिच्यते स दा सर्वकालं राजलक्ष्म्या मोदते अयमेको योगः सौरिसूर्यौ तृतीयायगौ स्यातां यथास्थं शनिस्तृतीये रविरेकादशे गुरुः खबंधोः खे दशमे बंधौ चतुर्थे वा चेद्गुरुः स्यादेवंविधयोगे ऽभिषिक्तस्य नृपस्य धरित्री पृथ्वी स्थिरा सदा हस्तगतः स्यात् ४ इति राज्याभिषेकप्रकरणं १० अथ यात्राप्रकरणं व्याख्यायते तत्र किंचित्कार्यमुद्दिश्य देशांतरगमनं यात्रेति सा द्विविधा परविषये विजयार्थं गंतुं समरविजयाख्या निखिलापरयात्राया सामान्या सा भवेद्द्विविधा कथिततिथिवासरर्क्षे ष्वभिमतफलदा भवेच्च सामान्या समराह्वया च या त्रायोग विलग्नक्षितीशयोगे ष्विति तत्र यात्राधिकारिण्यः प्रहर्षिण्याह यात्रायामिति प्रविदितछाया घटिकादिना ज्ञातजन्मलक्षणयात्कालीन लग्नकुंडलिका

गुरुर्लग्नकोणे कुजो ऽरौ सितः खे स राजा सदा मोदते राजलक्ष्म्या तृतीयायगौ सौरिसूर्यौ खबंधौ गुरुश्चेद्धरित्री स्थिरा स्या न्नृपस्य ४ पूर्वैः सह १० यात्रायां प्रविदितजन्मनां नृपाणां दातव्यं दिवसमबुद्धजन्मनां च प्रश्नाद्यैरुदयनिमित्त मूलभूतैर्विज्ञाते ह्यशुभशुभे बुधः प्रदद्यात् १ जननराशितनू यदि लग्नगे तदधिपो यदि वा तत एव वा॥ ॥ ॥

स्व शुभाशुभग्रहसूचितशुभाशुभफलोदर्कं ज्ञानं येषां तेषां नृपाणां यात्रायां दिवसं दातव्यं यात्रादिनं देयमित्यर्थः यदाह वराहः विदिते होराराशौ लग्नादि बलं ग्रहाणां च आयुषि च परिज्ञाते शुभमशुभं यातुरिह भाव्यमिति ननु यस्य जन्मकालो न ज्ञातस्तस्य कथं यात्रा स्यादित्यत आह अबुद्धमज्ञातं जन्मकालो येषां तेषामपि प्रश्नाद्यैः एष्टो यः शकुन्यादिभिः शुभशुभे विज्ञाते सति बुधो यात्रादिवसं प्रदद्यात् कीदृशैः प्रश्नाद्यैः उदयो लग्नं निमित्तं शकुनादि एतदादीनमूलभूतानि निदानकरणानि येषां तैः प्रश्नोदयनिमित्ताद्यैः तेषामपि फलोदय इति नारदोक्तेः १ अथ प्रश्नादेव फलं द्रुतविलंबितेनाह जननेति अत्र यद्यपि जन्मलग्नं जन्मराशिर्ज्ञानं वर्तते न तथापि जातको कुशुभफलदग्रहदशानवगमादज्ञानजन्मत्वं ज्ञेयं॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत एव राशिलग्नानामभावेयदि पृच्छति प्रश्नं वक्ष्यति जननं जन्म तत्संबंधिनी राशिलग्ने यदि प्रश्नलग्नगते स्यातां जन्मराशिर्जन्मलग्नं वा यदि प्रश्नलग्नं स्यात्तदा वसुधापतेराज्ञो विजय एव वा अथवा तदधिपौ लग्नगौ स्यातां जन्मराशिपतिर्जन्मलग्नपतिर्वा यदि प्रश्नलग्ने स्यात्तथापि राज्ञो विजय एव अथ वा तत एतेताभ्यामेव जन्मलग्नजन्मराशिभ्यामेव त्रिरिपुखायगृहं तृतीयषष्ठदशमैकादशानामन्यतमं गृहं यद्युदये लग्नं स्यात्तदापि विजय एव स्यादित्यर्थः

२ अथान्यं प्रश्नमंजुभाषिण्याह रिपुजन्मलग्नभमिति रिपोः शत्रोः जन्मलग्नभं जन्मलग्नं जन्मराशिश्च तन्मध्यादिबुके चतुर्थे द्युने सप्तमे वा स्यात्तदा राज्ञो जयो भवेत् अथवा तयोः शत्रुजन्मलग्नराश्योरधिपौ स्वामिनौ प्रश्नलग्नाद्धिबुके द्यूने वा स्यातां तदापि विजय एव अथवा तत एव ताभ्यां शत्रोर्जन्मलग्नजन्मराशिभ्यामेवोपचयगृहं ३।६।१०।११ प्रश्नलग्नाद्धिबुके द्यूने वा स्यात्तदापि जय एव अथवा तनौ प्रश्नलग्ने शुभवर्गकः शुभग्रहाणां षट्

त्रिरिपुखायगृहं यदि वोदयो विजय एव भवेद्वसुधापतेः २ रिपुजन्मलग्नभमथाधिपौ तयोस्तत एव वोपचयसंज्ञं चेद्भवेत् हिबुके द्यूनेयशुभवर्गकस्तनौ यदि मस्तकोदयगृहं तदा जयः ३ यदि पृच्छति तनौ वसुधारुचिरा शुभवस्तु यदि श्रुतिदर्शनगं यदि पृच्छति चादरतश्च शुभग्रह दृष्टयुतं चरलग्नमपि ४॥

वर्गकश्चेत्स्यात्तदापि जय एव अथवा यदि मस्तकोदयाः शीर्षोदयराशयः प्रश्नलग्नगताश्चेत्स्युस्तदापि जय एव वराहः उदयमुदयपं वा जन्मभं जन्मपं वा तदुपचयगृहं वा वीक्ष्य लग्ने यियासोः विनिहतमरिपक्षं विद्धि शत्रोरिदं वा हिबुकगृहसमेतं पृच्छतोऽस्तस्थितं वेति ३ अथान्यं प्रश्नं तोटकेनाह यदीति अत्र वसुधापतेर्जय इत्यनुवर्तते यदि पृच्छितनौ प्रश्नलग्ने वसुधा भूमी रुचिरा स्यात् अथवा यदि शुभवस्तु मंगल्यवस्तु मंगलवस्त्राभरणादि श्रुतिदर्शनगं श्रवणगोचरं दर्शनमत्र चाक्षुषं अथवा प्रष्टा आदरतो देवतां पृच्छति तदापि वसुधापतेर्जयः स्यादिति सर्वत्र व्याख्येयं अथवा चरलग्नं मेषकर्कतुलामकराख्यं यदि प्रश्नलग्नं शुभग्रहैर्दृष्टयुतं वा तदापि जय एव ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाशुभफलदं प्रश्नं मालिन्याह विधुकुजेति चंद्रमंगलयुक्ते लग्ने सौरिणा शनिना दृष्टे तदा प्रश्नकर्तुर्भंगं पराजयो नाशो वा स्यात् अथ चंद्रं मृतिभमद
नसंस्थे चंद्रे अष्टमे सप्तमे वा लग्ने सूर्ये सति एवंविधे योगे प्रष्टुः सपदि भंगः स्यात् अथाव्ययानामनेकार्थत्वात् अपिशब्दो विपर्ययार्थः तथाहि भा
स्करे मृतिभमदनसंस्थे चंद्रे लग्नगे च सति एवंविधे योगेपि प्रष्टुर्भंगः स्यात् उक्तं च वराहेण चंद्रे सरुधिरे लग्ने भंगः सूर्यात्मजेक्षिते द्यूनेने धनूगे
चंद्रे लग्ने याते दिवाकरे विपर्यये वा यातस्य त्रासभंगवधागमाः इति वाऽथवा पापग्रहे चतुर्थाष्टमलग्नसप्तमानामन्यतमन्यतमस्थे सति प्रष्टुर्भंगः
स्यात् ५ अथ प्रश्नलग्ने विशेषं भुजंगप्रयातेनाह त्रिकोणे कुजादिति कुजान्मंगलात्त्रिकोणे नवपंचमे सौरिशुक्रज्ञजीवाः श्रेष्ठाः अथ वा एको
पि वा सौरिशुक्रज्ञजीवानामन्यतमश्चेत्त्रिकोणे स्यात्तदा पुरुदिष्टगमनं न स्यादेव वाऽथवा ऽर्कोच्छशीत्रिकाणे चेत्स्यात्तदा पुरुदिष्टदिग्गमनं न स्यादेव

विधुकुजयुतलग्ने सौरिदृष्टेथ चंद्रे मृतिभमदनसंस्थे लग्नगे भास्करेपि हिबुकनिधनहोराद्यूनगे वापि पापे सपदि भवति
भंगः प्रश्नकर्तुस्तदानीं ५ त्रिकोणे कुजात्सौरिशुक्रज्ञजीवा यदैकोपि वा नो गमो कोच्छशीवा बलीयांस्तु मध्ये तयोर्यो ग्रहः
स्यात्स्वकीयां दिशं प्रत्युतासौ नयेच्च ६ प्रश्ने गम्यदिगीशात्त्वेटः पंचमगो यः बोभूयाद्बलयुक्तः स्वामाशां नयते सो ७
धनुर्मेषसिंहेषु यात्रा प्रशस्ता शनिज्ञोशनो राशिगे चैव मध्या ॥ ८ तर्हि कस्यां दिशि गमनं स्यादित्याह बलीयानिति तयोरधुनोक्तो दि
ष्टदिकप्रतिबंधकारयोर्ग्रहयोर्मध्ये यो ग्रहो बलवान्स्यात्सः स्वकीयां दिशं प्रत्युतं सा प्रतं नयेत् ६ अथ यो गांतरं मंदलेखयाह प्रश्नेति गम्यदिगीशा
त् गंतुरिष्टा या दिक् तस्या ईशः स्वामी प्रश्नलग्ने यत्र स्थाने स्यात्ततः पंचमे स्थाने यो ग्रहो बोभूयाद्भवेत् तदासौ ग्रहः स्वामाशां दिशं नयते प्रापयति ७
अथ यात्राकालं भुजंगप्रयातेनाह धनुर्मेषेति धनुर्मेषसिंहस्थे रवौ यात्रा प्रशस्ता शुभफलदा शनिज्ञोशनोराशिगे मध्या मकरकुंभमिथुनकन्यावृ
षतुलागते रवौ यात्रा मध्या स्यात् कर्कमीनालिसंस्थे रवौ दीर्घा बहुकालसाध्या यात्रा न फलेत्यर्थः वराहः यात्रा जसिंहतुरगोपगते वरिष्ठा मध्या शनैश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रवुधोशनंसंगरहेषु मानोकुलीरदृषयुग्मवृश्चिकगेतिदीर्घोशस्तश्चदेवलमते ध्वनिपृष्ठगोर्कः इति देवलमते ऽध्वनिमार्गे सूर्यः पृष्ठगतः शस्तः पृष्ठगतत्वंतुवसंतराजोक्तभ्रमणवशेनेतिकेचित् यथा दग्धादिगेशीज्वलितादिगैंद्री धूमान्विनावानलदिक्प्रभाते इत्येवमेवप्रहराष्टके नभुक्तेदिशांताइति अनेनभ्रमणप्रकारेणयस्मिन्प्रहरेभ्रमणसमयःसादिक्सूर्यसंमुखोच्यते ततपंचमीदिक्सूर्यपृष्ठगतेत्युच्यतेइत्याहुः वस्तुतस्तुद्वादशराशिभ्रमवशेनयस्यांदिश्यर्कस्थितः तांपृष्ठतःकृत्वायायादित्यर्थः यथा लग्नस्थेऽर्केपश्चिमांदिशंगच्छेत् चतुर्थेदक्षिणां सप्तमेपूर्वां दशमउत्तरामित्यर्थः यदाहदेवलः लग्नस्थेवरुणाशांहिबुकस्थेदक्षिणांरवौयायात् सप्तमगेपूर्वाशांमेषुरणसंस्थितेसौम्यामिति एवंविदिक्ष्वपिज्ञेयं यथा द्वितीयतृतीयस्थितेर्केनैर्ऋती पंचमेषष्ठेआग्नेयी अष्टमेनवमेऐशानी एकादशेद्वादशेकेवायव्यांगच्छेदिति अथताराणिषेधमाह जनुरिति स्वजन्मनक्षत्राद्दिननक्षत्रंयत्संख्यंस्यात् तस्मिन्नवभक्ते अवशिष्टाः प्रथमसप्तमपंचमतृतीयाख्यास्ताराश्चेत्स्युस्तदानेष्टानिषिद्धाः ८

रवौकर्कमीनालिसंस्थेतिदीर्घोजनुःपंचसप्तत्रिताराश्चनेष्टाः ८ नषष्ठीनचद्वादशीनाष्टमीनोसिताद्यातिथिःपूर्णिमाऽमानरिक्ता॥

अथतिथ्यादिशुद्धिंभुजंगप्रयातेनाह नषष्ठीति सिताद्यातिथिःशुक्लपक्षप्रतिपत् आसुतिथिषुयात्रानप्रशस्तेत्यर्थः नारदः षष्ठ्यष्टमीद्वादशीचरिक्तामावर्जितासुच यात्राशुक्लप्रतिपदिनिधनायाधनायचेति हयोश्विनी आदित्यंपुनर्वसुःमित्रोनुराधा इंदुर्मृगः जीवःपुष्यः अंत्यरेवती हस्तश्रवणधनिष्ठाः एतैर्नवभिर्नक्षत्रैः यात्राप्रशस्तोत्तमा मध्यानिनिषिद्धानिचभानिवसिष्ठआह तिस्रोत्तराशवारुणनैर्ऋतेंद्रपूर्वात्रयंत्र्यग्नभयुग्दशैवं मध्यान्यनिष्टान्यनलानिलेशद्विदेवचित्राहिमघांतकानीति तिस्रोत्तराइत्यार्षःसंधिः ननुवसिष्ठेनवाराउक्ताः सुरेज्यदैत्येज्यशशीदुर्जनावाराश्चवर्गाःशुभदाप्रयाणे आदित्यभूसूनुशनैश्चराणांवाराश्चवर्गानशुभप्रदास्युरिति अत्रकुतोनोक्ताइतिचेन्न नारदादिभिरनुक्तत्वात् वसिष्ठादिभिरुक्तपापग्रहवारस्थूलनिषेधवैयर्थ्याच्च दोषाधिक्येसूचनार्थंतदितिचेन्न भिन्नकर्तृकेषुमुनिग्रंथेषुमुनिवचनानांवैयर्थ्यानर्हत्वादे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वंविधागतिरुचिता नन्वेककर्तृकेग्रंथे तत्रहिपूर्वापरविरोधे अयोत्तरंवाकार्यं ग्रंथांतरेणसहैकवाक्यतावाकार्या तत्रायंवसिष्ठवाक्यस्वरसः
सुहिनकरमंदवारे इतिवाक्यात् पापग्रहवारनिषेधोगौणइत्यनुमीयते तस्यगतिस्त्वेवंयदास्वजन्मराशेरुपचयेयोग्रहः शुभोवाऽशुभोवाभावव
तुससर्वदिसुहितःपरंतुशूलदिशोविहाय यदात्वनुपचयस्थःसतुकुत्रापिनहितः यदाहराजमार्तंडः उपचयकरग्रहदिनेशुद्धिः क्रूरेपिपापिनांभ
वति सौम्येप्यनुपचयस्थेनभवंतियात्राशुभायातुरिति तस्मान्नार्थोवारोक्तोनिवारानोक्ताइत्युक्तं ९ अथवारशूलंनक्षत्रशूलंचपृथ्वीछंदसाह
नपूर्वदिशीति शक्रभेज्येष्ठायांपूर्वदिशिनव्रजेत् तथाविधुसौरिवारेसोमशनिवारेपिपूर्वदिशिनव्रजेत् अजपदभेपूर्वाभाद्रपदायांतथागुरुवा
रेपियमदिशिनव्रजेत् रविशुक्रयोर्वारेतथाधातृभेरोहिण्यांपाशिदिशिपाशीवरुणः तद्दिशिपश्चिमदिशिनव्रजेत् कुजबुधवारेतथार्यमर्क्षेउत्त

हयादित्यमैत्रेंदुजीवांत्यहस्तश्रवोवासवैरेवयात्राप्रशस्ता ९ नपूर्वदिशिशक्रभेनविधुसौरिवारेतथानचाजपदभेगुरो
यमदिशीनशुक्रार्कयोः नपाशिदिशिधातृभेकुजबुधेर्यमर्क्षेतथानसौम्यककुभिव्रजेत्स्वजयजीवितार्थीबुधः १०
पूर्वाह्णेध्रुवमिश्रभैर्नृपतेर्यात्रानमध्याह्नकेतीक्ष्णाख्यैरपराह्णकेनलघुभैर्नोपूर्वरात्रेतथा॥ ११॥ ॥ ॥

राफल्गुन्यांसौम्यककुभिउत्तरदिशिनव्रजेत् कः स्वजयजीवितार्थीबुधः स्वंधनंजयः शत्रुपराजयपूर्वकः स्वोत्कर्षः जीवितमायुष्यं एतानिअर्थ्य
यते असौनव्रजेत् वारशूलपरिहारमाहगुरुः सूर्यवारेघृतंप्राश्यसोमवारेपयस्तथा गुडमंगारकेवारेबुधवारेतिलानपि गुरुवारेदधिप्राश्यशु
क्रवारेयवानपि माषान्भुक्त्वाशनेर्वारेगच्छन्शूलेनदोषभाक् तांबूलंचंदनंमृच्चपुष्पंदधिघृतंतिलाः वारशूलहराण्येकादनाद्धारणतोदनादि
तिच १० अथकालशूलंशार्दूलविक्रीडितेनाह पूर्वाह्णेइति ध्रुवाख्यैर्मिश्राख्यैश्चभैः पूर्वाह्णेयात्रानशुभास्यात् तीक्ष्णाख्यैर्भैर्मध्याह्नेनस्यात्
अपराह्णेलघुनक्षत्रैः पूर्वरात्रेमैत्राख्यैः मध्यरात्रिसमयेउग्रनक्षत्रैः तथारात्र्यंतेरात्रितृतीयभागेचरनक्षत्रैर्यात्रानस्यात्॥ ११॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु॰टी॰ या॰प्र॰ ८९

तत्रविशेषः हरिहस्तपुष्यशशिभिः श्रवणहस्तपुष्यमृगैः सर्वस्मिन्नपिकालेयात्राशुभास्यात् ११ अथतत्रापिकालविशेषमध्यमानांनिषिद्धानांच कियतांभानांवर्ज्यघटिकाइंद्रवज्रयाह पूर्वेति पूर्वात्रयेप्रथमाःषोडशनाड्योनिषिद्धाः कृत्तिकायामेकविंशतिः मघायामेकादश भरण्यांसप्तघटिकाः त्याज्याइत्यर्थः स्वातीविशाखाश्लेषाज्येष्ठानांआद्याश्चतुर्दशघटिकास्त्याज्याः चतुर्भुजः भरण्यांसप्तघटिकावह्निभेचैकविंशतिः एकादश घटीपित्र्येत्रिपूर्वासुचषोडश स्वातीसर्पविशाखार्द्राज्येष्ठासुचचतुर्दश वर्जयेदेताघटिकायात्रायांशुभदामताइति १२ अथमतांतरेणवर्ज्यत्वमिंद्रवज्रयाह पूर्वार्द्धमितिस्पष्टार्थं १३ अथभानांजीवपक्षादिकाःसंज्ञाभुजंगप्रयातेनाह नमोभुक्तेति नमोराहुर्वक्रीग्रहःतेनभुक्ताभुक्ताएवंविधाविश्व

मित्राख्येनचमध्यरात्रिसमयेचोग्रैस्तथानोचेराज्यंतेहरिहस्तपुष्यशशिभिः स्यात्सर्वकालेशुभा ११ पूर्वाग्निपित्र्यांतकतारकाणांभूपप्रक्रत्युग्रयतुरंगमाःस्युः स्वातीविशाखेंद्रभुजंगमानांनाड्योनिषिद्धामनुसंमिताश्च १२ पूर्वार्धमाग्नेयमघानिलानांत्यजेद्द्विचित्राहियमोत्तरार्धे नृपःसमस्तागमनेजयार्थीस्वातीमघांचोशनसामतेन १३ नमोभुक्तताराःस्मृताविश्वसंख्याःशुभोजीवपक्षोमृतश्चापिभोग्याः तदाक्रांतभंकर्तरीसंज्ञमुक्तंततोसेंदुसंख्यंभवेद्ग्रस्तनाम १४ मार्तंडेमृतपक्षगेहिमकरश्चेज्जीवपक्षेशुभायात्रास्याद्विपरीतगेक्षयकरीद्वौजीवपक्षेशुभा॥ ५ संख्यास्त्रयोदशसंख्यास्ताराननक्षत्राणिजीवःप

क्षःसजीवपक्षसंज्ञानिशुभकराणि भोग्याःराहुणाक्रांतनक्षत्रात् भोग्यानिगम्यानित्रयोदशभानिमृतोमृतपक्षसंज्ञानि तदाक्रांतभंतेनराहुणाक्रांत भंतेनराहुकर्तरीत्येवनामकंस्यात् यथा राहुर्हस्तनक्षत्रेतेनभुक्तानिचित्रास्वातीप्रमुखानिपूर्वाभाद्रपदांतानित्रयोदशजीवपक्षः तदाक्रांतभाद्रस्तात्संच राम॰
दशमुत्तराभाद्रपदाख्यंग्रस्तसंज्ञं तेनराहुणाभोग्यानिउत्तराफाल्गुनीपूर्वाफाल्गुनीमघाश्लेषापुष्यपुनर्वसुआर्द्रामृगरोहिणीकृत्तिकाभरणीअश्विनीरेव ८९
त्याख्यानिमृतपक्षः हस्तस्तुकर्तरीग्रस्तमितिच १४ अथजीवपक्षादीनांफलंशार्दूलविक्रीडितेनाह मार्तंडइति मृतपक्षेमार्तंडेसूर्येसतिचंद्रश्चेज्जी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माह॥

वपक्षेस्यात्तदायात्राशुभास्यात् विपरीतगेमार्तंडेजीवपक्षगेसतिचंद्रश्चेन्मृतपक्षगः तदायात्राक्रियमाणायातुःक्षयकरीस्यात् द्वौसूर्याचंद्रमसौचेज्जी
वपक्षेस्यातांतदाशुभाशुभतरेत्यर्थः अर्थादुभौमृतपक्षेस्यातांतदायात्रातिक्षयकरीस्यात् यथास्यापवादेग्रस्तर्क्षमिति मृतपक्षतः मृतपक्षनक्षत्रा
त् ग्रस्तर्क्षेराहुणाक्रांतभात्पंचदशसंख्यंशुभंशुभकरंस्यात् यथाशवान्मरिष्यमाणोदेहीप्रबलः ग्रस्तादाकुभतः पंचदशसंख्याकात् कर्तरीराह्वा
क्रांतंशुभंशुभकरंस्यात् यायीति योराजावैरिणामुद्दिश्यजिगमिषुःसयायी तत्स्वामीचंद्रः यश्चस्वदेशेदुर्गेकृत्वातिष्ठतिसस्थायी रविःस्थितिमान्
स्थायीराज्ञः स्वामी तौद्वौसूर्याचंद्रमसौजीवगौजीवपक्षगतौ तयोःराज्ञोःस्थायियायिराज्ञोः जयकरौरविश्चेज्जीवपक्षगः तदास्थायिनोजयः चं
द्रश्चेज्जीवगस्तदायायिनोजयः उभौचेज्जीवगौतदासंधिकरौ अर्थाद्द्वावपिचेन्मृतपक्षगौउभयोःपराजयकारी अत्रबहुविचारःस्वरोदयादवगं

ग्रस्तर्क्षंमृतपक्षतः शुभकरंग्रस्तात्तथाकर्तरीयायीदुस्थितिमान्नविजयकरौतौद्वौनयोजीवगौ १५ स्वात्यंतका
हिवसुपौष्णकरानुराधादित्युध्रुवाणिविषमास्तिथयोऽकुलाःस्युः॥

तव्यः १५ अथाकुलकुलाकुलकुलगणंवसंततिलकाशार्दूलविक्रीडिताभ्यामाह स्वात्यंतकाहीति पूर्वोश्वीति स्वाती·अंतकंभरणी· आश्ले
षाधनिष्ठारेवतीहस्तअनुराधापुनर्वसुध्रुवाणिउत्तरात्रयरोहिण्याः एतानिद्वादशभानिविषमास्तिथयः प्रतिपत्तृतीयापंचमीसप्तमीनवम्येकादशी
त्रयोदशीपंचदश्येइत्यष्टौतिथयः शनिचंद्रसूर्यबृहस्पतिवाराः चत्वारः एतेप्रत्येकमकुलसंज्ञाः अथज्ञोबुधवारः मूलंअंबुपंशततारकाः ई
शआर्द्रा· विधिभमभिजित् चत्वारिभानि दशषट्द्वितिथ्यः दशमीषष्ठीद्वितीयास्तिस्रस्तिथयः एतेप्रत्येककुलाकुलसंज्ञाःस्युः अथपूर्वोस्तिस्रः
अश्विनीपुष्यमघाइंदुर्मृगःकर्णश्रवणः दहनः कृत्तिका· द्वीशंविशाखा· ज्येष्ठाचित्राएतानिद्वादशभानिशुक्रभौमवारौ अर्काष्टेंद्रवेदैर्मिताः द्वा
दश्यष्टमीचतुर्दशीचतुर्थीसंज्ञाश्चतस्रस्तिथयः प्रत्येकंकुलसंज्ञकाःस्युः फलमाह यायीति अकुलसंज्ञकेतिथिनक्षत्रेवारगणे॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. Ih Public Domain. Digitization by eGangotri

मु० टी०
या० प्र०
९०

समरेयुद्धप्रारंभेसतियायीराजाजयीस्यात् यदिकुलसंज्ञकेतिथिनक्षत्रेवारगणेसतिस्थायीराजातद्वज्जयीस्यात् कुलाकुलेसंज्ञकेतिथिवारनक्षत्र
गणेयुध्यतोर्युद्धकुर्वतोः भूमीशयोराज्ञोः परस्परंसंधिः स्यात् १६ १७ अथपथिराहुचक्रंस्रग्धरयाह सुधर्मेइति अश्विनीपुष्याश्लेषाधनिष्ठा
शततारकाविशाखानुराधाख्यानिभानिधर्मेधर्मस्थानेलेख्यानि अथभरणीपूर्वाभाद्रपदाज्येष्ठाश्रवणपुनर्वसुमघास्वात्याख्यानिभानिअर्थेसुः
अथकृत्तिकाद्रौत्तराभाद्रपदाचित्रामूलाभिजित्पूर्वाफाल्गुनीनक्षत्राणिकामेसुः अथरोहिणीआप्यंपूर्वाषाढामृगोंत्यंरेवतीविश्वमुत्तराषाढाअ

सूर्येंदुमंदगुरवश्चकुलाकुलज्ञोमूलांबुपेशविधिभंदशाषट्द्वितिथ्यः १६ पूर्वाश्वीज्यमघेंदुकर्णदहनद्वीशेंद्रचित्रास्त
थाशुक्रारौकुलसंज्ञकाश्चतिथयोःकोष्टेद्रवेदैर्मिताः यायीस्यादकुलेजयीचसमरेस्थायीचतद्वत्कुलेसंधिः स्यादुभयोः
कुलाकुलगणेभूमीशयोर्युध्यतोः १७ सुधर्मेदस्रपुष्याउरगवसुजलपद्वीशमैत्राण्यथार्थेयाम्याजांघ्रीद्रकर्णादितिपि
तृपवह्नीनाडुन्यथाभानिकामे वह्न्याद्रौबुध्न्यचित्रानिर्ऋतिविधिभगाख्यानिमोक्षेथरोहिण्यार्थेद्वंत्यर्क्षविश्वार्यमभदिन
करक्षाणियंथाद्रिराहो १८ धर्मगेभास्करेवित्तमोक्षेशशीवित्तगेधर्ममोक्षस्थितिः शस्यते कामगेधर्ममोक्षार्थगः शोभनोमो
क्षगेकेवलंधर्मगः प्रोच्यते १९ पौषपक्षत्यादिकाद्वादशैवतिथ्योमाघादौद्वितीयादिकास्ताः॥ ११र्यमभउत्तराफल्गुनीहस्ताख्यानिभा

निमोक्षेसुः पथिशब्दस्यादिर्यस्यतादृशेराहौपथिराहावित्यर्थः चक्रेइतिविशेषमध्याहार्यं १८ अथस्रग्विण्यातत्फलमाह धर्मगेभास्करइतिधर्मे
मार्गेस्थितेभास्करेसतिचेद्वित्तमोक्षेशशीअर्थमार्गेमोक्षमार्गेवाशशीस्यात्तदाशोभनः अथवित्तगेअर्थगेभास्करेसतिधर्ममार्गगः मोक्षमार्गेवाश
शीशोभनः अथकामगेभास्करेसतिधर्मार्थमोक्षमार्गगः शशीशोभनः अथमोक्षमार्गेभास्करेसतिधर्मगः शशीशोभनः अर्थाद्विपरीतावस्थितयोर्द्वयोःसू
र्यचंद्रमसोरशुभत्वंस्यात् १९ अथतिथिचक्रंशालिन्याह पौषइति अत्रपौषादितः प्रतिमासेद्वादशकोष्ठकालेख्याः एवंकृतेश्चतुश्चत्वारिंशदधिकं

राम
९०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पौ	मा	फा	चै	वै	ज्ये	आ	श्रा	भा	आ	का	मा	पूर्व	दक्षि	पश्चि	उत्तर
१	२	३	४	५	६	७	८	९	१०	११	१२	सौख्यं	क्लेशः	प्रीतिः	अर्थाग
२	३	४	५	६	७	८	९	१०	११	१२	१	शून्यं	नैःस्वं	निःस्वः	मित्रात्ता
३	४	५	६	७	८	९	१०	११	१२	१	२	द्रव्यहानिः	दुःखं	इष्टाप्तिः	अर्थः
४	५	६	७	८	९	१०	११	१२	१	२	३	लाभः	सौख्यं	मंगलं	वित्तला
५	६	७	८	९	१०	११	१२	१	२	३	४	लाभः	द्रव्याप्तिः	धनं	सौख्यं
६	७	८	९	१०	११	१२	१	२	३	४	५	प्रीतिः	लाभः	मृत्युः	अर्थाग
७	८	९	१०	११	१२	१	२	३	४	५	६	लाभः	कष्टं	द्रव्यला	सुखं
८	९	१०	११	१२	१	२	३	४	५	६	७	कष्टं	सौख्यं	क्लेशला	सुखं
९	१०	११	१२	१	२	३	४	५	६	७	८	सौख्यं	लाभः	कार्यसि	कष्टं
१०	११	१२	१	२	३	४	५	६	७	८	९	क्लेशः	कष्टाप्तिः	अर्थः	धनं
११	१२	१	२	३	४	५	६	७	८	९	१०	मृत्युः	लाभः	द्रव्यला	शून्यं
१२	१	२	३	४	५	६	७	८	९	१०	११	शून्यं	सौख्यं	मृत्यु	अन्यंत
पौ	मा	फा	चै	वै	ज्ये	आ	श्रा	भा	आ	का	मा	पूर्व	दक्षि·	पश्चि·	कष्टं उत्तर

शतंकोष्ठकाजायंतेतत्रचक्राकृतिर्यथान्यासः प्राग्लिखितः
तत्रपक्षस्यशुक्लस्यकृष्णस्यवापक्षतिः पक्षमूलंप्रतिपा
त्तदादिकाः प्रथमंपौषमासेप्रतिपदादिकाः द्वादशतिथ-
योऽधोधोलेख्याः माघादौमाघादिमासेषुद्वितीयादिकास्ति
थयोलेख्याः यथा माघेद्वितीयादिकाः फाल्गुनेतृतीया
दिकाः चैत्रेचतुर्थ्यादिकाः वैशाखेपंचम्यादिकाः ज्येष्ठे
षष्ठ्यादिकाः आषाढेसप्तम्यादिकाः श्रावणेष्टम्यादिकाः
भाद्रपदेनवम्यादिकाः आश्विनेदशम्यादिकाः कार्त्ति
केएकादश्यादिकाः मार्गशीर्षेद्वादश्यादिकाः सर्वास्तिथ
योद्वादश्यंतालेख्याः अवशिष्टस्थानानिप्रतिपदादिभिः पू
रणानि कामात्तिस्त्विति कामात्त्रयोदशीचतुर्दशीपंचदश्य
स्तृतीयादिवत्तु त्रयोदशीतृतीयावत् चतुर्दशीचतुर्थीवत्
पंचदशीपंचमीवत्स्युरित्यर्थः फलार्थमतिदेशाय तत्रप्र
तिपदादौपूर्वदक्षिणापश्चिमोत्तरासुदिक्षुयानेचिकीर्षिते
सतिफलंशुभाशुभंसौख्यंक्लेशइत्यादिनोहृत्तत्रयेणवक्ष्ये

CC-0. In Public Domain. Digitization by eGangotri

कथयिष्यामि २० फलानिशालिनीत्रयेणाह सौख्यमिति लाभइति सौख्यमितिच श्लोकत्रयंस्पष्टार्थमेव तत्रपोषेप्रतिपदिदिक्चतुष्टयेसौख्यंक्ले
शोभीतिरर्थागमश्चेतिफलचतुष्टयंक्रमेणज्ञेयं एवंद्वितीयादिष्वपिश्लोकश्चतुर्थीशोक्तफलंस्यात् २१ २२ २३ अथसर्वोक्तानंवसंततिलकयाह
तिथ्यृक्षेति तिथयोत्रशुक्लेप्रतिपदादितोग्राह्याः तत्रतिथिनक्षत्रवाराणांयुतिः स्यात्तत्रयेस्थाप्याक्रमेणसप्तभिरष्टभिस्त्रिभिश्चतष्टाभक्तावशि
ष्टाःसतिप्रथमस्थानेवियतिशून्येसतिअतिदुःखीयात्राकर्तास्यात् मध्येद्वितीयस्थानेधननाशः चरमेतृतीयस्थानेशून्यंमृत्युःस्यात् स्थानत्रयेंक
कामात्तिखःसुखतीयादिवत्र्ययानेप्राच्यादौफलंतत्रवस्ये २० सौख्यंक्लेशोभीतिरर्थागमश्चशून्यंनैस्वंनिस्वतामिश्रताच
द्रव्यक्लेशोदुःखमिष्टाप्तिरर्थोलाभःसौख्यंमंगलंवित्तलाभः २१ लाभोद्रव्याप्तिर्धनंसौख्यमुक्तंभीतिर्लाभोमृत्युरर्थागम
मश्च लाभःकष्टंद्रव्यलाभोसुखंचकष्टंसौख्यंक्लेशलाभौसुखंच २२ सौख्यंलाभःकार्यसिद्धिश्चकष्टंक्लेशःकष्टात्सि
द्धिरर्थोधनंच मृत्युर्लाभोद्रव्यलाभश्चशून्यंशून्यंसौख्यंमृत्युरत्यंतकष्टं २३ तिथ्यृक्षवारयुतिरद्रिगजाग्नितष्टास्था
नत्रयेत्रवियतिप्रथमेतिदुःखी मध्येधनक्षतिरथोचरमेमृतिःस्यात्स्थानत्रयेंकयुजिसौख्यजयौनिरुक्तौ २४ रवेर्भ
तोज्ञभोन्मितिर्नगावशेषिताह्यगाः महाडलोनशस्यतेत्रिषण्मितास्त्रमोभवेत् २५ ॥युजित्र्यंकयुतौसौख्यजयोभवेतां २४ अ
थाडलभ्रमणेप्रमाणिकयाह रवेर्भत्तइति सूर्यनक्षत्रात् अज्ञभस्यचंद्रस्योन्मितिर्गणनाकार्यासानगैःसप्तभिरवशेषितासती ह्यगाःद्विशेषमितास
प्तशेषमितावाभवेत् तदामहाडलोदोषःस्यात् सनशस्यते प्रागुक्तप्रकारेणयदित्रिषण्मितात्रिशेषमितापट्शेषमितावास्यात्तदाभ्रमोभ्रमणाख्यो
दोषःस्यात्सोपिनशस्यते एतन्निर्मूलतत्रभ्रमणेयात्रामेवत्यजंति आडलेबहूनिकार्याणित्यजंति उक्तंच यात्रायंत्रहलप्रवाहसमरेचौर्येचसंधौ
तथाकूपारामतडागबंधनविधौपापर्द्धिदुर्गेग्रहे अंश्वेभोष्ट्रयाधिरोहणविधौन्याज्यंसदैवाडलंयत्नान्नात्रशुभेषुमंगलविधौदोषोनतस्यक्वचिदिति २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ हिंवराख्ययोगमुपजातिकयाह शशांकभमिति स्पष्टार्थं प्रसंगात् घबाडमपि सूर्यभाद्गणयेच्चांद्रं त्रिगुणं तिथिसंयुतं सप्तभिस्तु हरेद्भागं त्रि-
शेषं स्याद्घबाडकं एतच्च हिंवराख्यं भेत्तव्यं एतत्सर्वं दाक्षिणात्या विचारयंतीति अत्र प्रसंगात् ग्रंथांतरस्थं संग्रहः सूर्यभाद्गणयेच्चांद्रं तिथिवारं च मिश्रि-
तं सप्तभिस्तु हरेद्भागं पंचशेषं तु टेलकं सूर्यभाद्गणयेच्चांद्रं तिथिवारं च मिश्रितं अर्कसंख्यैर्हरेद्भागं नवशेषं तु गोरखं प्रवेशे गोरखं दद्यान्निर्गमे हिंवरं
तथा नस्करे टेलकं दद्यात् घबाडं सर्वकर्मसु इति ज्योतिर्निबंधे २६ अथ घातचंद्रं शालिन्यानत्परिहारं चानुष्टुब्द्वयेनाह भूपंचेति आग्नेयेति रूपद्या-
ग्नीति मेषादिराशीनां भूपंचांकेत्यादिको घाताख्यचंद्रो ज्ञेयः यथा मेषस्य प्रथमो मेष एव वृषस्य पंचमः कन्यास्थः मिथुनस्य नवमः कर्के द्वितीयः

शशांकभं सूर्यभतोत्र गण्यं पक्षादितिथ्या दिनवासरेण युतं नवाप्तं नगशेषकं चेत्स्याद्धिंवरं तत्क्रमनेति शस्तं २६ भूपंचां-
कद्व्यगदिग्वह्निसप्तवेदाष्टेशार्कोश्च घाताख्यचंद्रः मेषादीनां राजसेवाविवादे वर्ज्यो युद्धाद्ये च नान्यत्र वर्ज्यः २७ आग्ने-
यत्वाष्ट्रजलपपित्र्यवासवरौद्रभे मूलब्राह्माजपादर्क्षे पित्र्यमूलाजभेंद्रमात् २८ रूपद्व्यग्न्यग्निभूरामद्व्यग्न्यब्ध्यब्धि-
युगाग्नयः घातचंद्रे धिष्ण्यपादा मेषाद्वर्ज्या मनीषिभिः २९ गोस्त्रीझषे घाततिथिस्तु पूर्णा भद्रा नृयुक्कर्कटके यनंदा॥ ॥

सिंहे षष्ठः कन्याया दशमः तुलायास्तृतीयः वृश्चिकस्य सप्तमः धनुषश्चतुर्थः मकरस्याष्टमः कुंभस्यैकादशः मीनस्य द्वादशः घातचंद्रो राजसेवा-
याविवादे प्रतिवादिना सह कलहे युद्धाद्ये आदिशब्दान्मृगयादिषु वर्ज्यः अन्यत्र विवाहान्नप्राशनादिमंगलकृत्ये न वर्ज्यः उक्तं च युद्धे चैव विवादे च कु-
मारीपूजने तथा राजसेवावाहनादौ घातचंद्रं विवर्जयेत् तीर्थयात्राविवाहान्नप्राशनोपनयादिषु मांगल्यसर्वकार्येषु घातचंद्रं न चिंतयेत् अत्र लाघवा-
र्थं भ्रात्पुत्रेण गोविंदपद्यं मेषकन्याघटहरिनक्रयुग्मधनुर्वृषाः मीनसिंहधनुःकुंभा घातचंद्रा अजादितः इति घातचंद्रे मेषादिराशिषु कृत्तिकादिभा-
नां चरणा एते वर्ज्या इति केचिद्वदंति २७ २८ २९ घाततिथिरुपजातिकयाह गोस्त्रीति गोः स्त्री कन्या झषो मीनः एतद्राशिमति नरे पूर्णाः पंचमी दश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु.री. मीपंचदशीच घाततिथिः कौर्पी वृश्चिकः अजो मेषः एतयोर्नंदाप्रतिपत्षष्ठ्येकादशीच तिथिः नक्रधटे मकरतुलयोः रिक्ताचतुर्थी नवमीचतुर्दशीच
या.प्र. घाततिथिः धनुः कुंभसिंहानां जयातृतीयाष्टमी त्रयोदशीचघाततिथयः भद्राद्वितीयासप्तमीद्वादशीमिथुनेकर्केचघाततिथयो यात्रादौ नशस्ताः ३०
९२ घातवारान्शालिन्याह नक्रे भौमइति मकरराशिमतिपुरुषे भौमो घातवारः वृषसिंहकन्यासुमंदःशनिर्घातवारः द्वंद्वे मिथुने चंद्रः अजे मेषे ऽर्कः
कर्केबुधः धनुर्मीनहृश्चिकेषु शुक्रवारः जूकस्तुला कुंभतुलयोर्जीवोगुरुर्घातवार इत्यर्थः घातवारा अपि यात्रादौ नशस्ताः ३१ अथघातनक्षत्रा
ण्यनुष्टुभाह मघेति स्पष्टार्थं एतदपियात्रादौ नशस्तं ३२ अथघातलग्नान्याह भूह्यब्धीति स्पष्टार्थं तदपियात्रायांवर्ज्यं ३३ अथयोगिनीजी।

कौर्प्यांजयोर्नक्रधटे च रिक्ता जया धनुःकुंभहरौ न शस्ताः ३० नक्रे भौमो गोहरिस्त्रीषु मंदः चंद्रो द्वंद्वेऽर्कोऽजभे ज्ञश्च कर्के
शुक्रः कोदंडालिमीनेषु कुंभजूके जीवो घातवारा न शस्ताः ३१ मघाकरस्वातिमैत्रमूलश्रुत्यंबुपान्त्यभं याम्यब्राह्मेश
सार्पं च मेषादेर्घातभं न सत् ३२ भूमिह्यब्ध्यद्रिदिक्सूर्यागाष्टांकेशाग्निसायकाः।१।२।४।७।१०।१२।६।८।९।११।३।५॥
मेषादिघातलग्नानि यात्रायां वर्जयेत्सुधीः ३३ नवभूम्यः शिववह्नयोऽक्षविश्वेऽर्ककृताः शक्ररसास्तुरंगतिथ्यः द्विदि
शामावसवश्च पूर्वतः स्युस्तिथयः संमुखवामगा न शस्ताः ८।११/३।५/१३।१२/४।१४/६।७/१५।२/१०।३०/८॥३४॥ पूर्णीस्तास्तिथयनीदोषमाह नवभू
म्यइति एतास्तिथयः पूर्वतः पूर्वदिशमारभ्य अष्टदिक्षु ज्ञेयाः यथा पूर्वस्यां नवभूम्यः नवमी प्रतिपच्च आग्नेय्यां शिववह्नयः एकादशी तृतीयाच
एवमग्रेपि एतास्तिथयो योगिन्य इति जीर्णाः तास्तिथयः संमुखवामगा न शस्ताः यथा प्राच्यां गंतुः प्रतिपत्संमुखी दक्षिणां गंतुर्वामगा प्रती राम:
च्यां गंतुः पृष्ठगा उदीच्यां गंतुर्दक्षिणा एवं सर्वासु दिक्षु सर्वास्तिथयो विचार्याः तत्र संमुखे वामगाश्चेत्तिथयो न शुभाः अर्थाद्दक्षिणाः पृष्ठगाश्च शु ९२
भाः उक्तं च पृष्ठजो दक्षिणे वापि योगिनी गमने हिता वामसंमुखयोर्नेष्टा वायुमेवं विचिंतयेदिति ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ कालपाशयोगं शालिन्याह कौबेरीत इति कौबेरी उत्तरा दिक् तस्याः विपरीतदिक्षु अर्काद्येवारे कालः स्यात् तद्यथा रवावुत्तरदिशि कालः दक्षिणे
पाश इत्यर्थः चंद्रे वायव्यां कालः आग्नेय्यां पाशः एवं भौमादिष्वपि रात्रौ कालदिशि पाश इति वैपरीत्यं ज्ञेयं एतौ यात्रायुद्धादिषु संमुखे वर्ज्यौ उक्तं
च स्वरोदये वारोत्थः पूर्वदिग्भागे ततः सव्येन संक्रमः यत्र कालस्तत्र कालः स्यात्पाशस्तस्य तु संमुखः दक्षिणस्थः शुभः कालः पाशो वामदिगाश्रयः या
त्रायां समरे श्रेष्ठस्ततोऽन्यत्र न शोभनः इति प्रसंगादर्धयामाराहुरपि स्वरोदयस्थो लिख्यते इंद्रवायुयमरुद्रतोयाग्निशशिमाहते यामार्धमुदितो राहु
भ्रमत्येवं दिगष्टके इति ३५ अथ परिघदंडाख्यदोषमनुष्टुभाह पूर्वादिष्विति अनलर्क्षतः कृत्तिकातः सप्तभानि पूर्वस्यां मघातः सप्त याम्यायां
अनुराधातः सप्त पश्चिमायां धनिष्ठातः सप्तभान्युत्तरस्यां लेख्यानि इति सर्वत्र वाक्यशेषः तत्र वायव्याग्नेयदिग्गुपनिबद्धरेखा परिघो दंडः स्यात् स सर्व

कौबेरीतो वैपरीत्येन कालो वारेऽर्काद्ये संमुखे तस्य पाशः रात्रावेतौ वैपरीत्येन गण्यौ यात्रायुद्धे संमुखे वर्जनीयौ ३५ पू
र्वादिषु चतुर्दिक्षु सप्त सप्तानलर्क्षतः वायव्याग्नेयदिक्संस्थं परिघं नैव लंघयेत् ३६ अग्नेर्दिशं नृप इयात्पुरुहूतदि
ग्भैरेवं प्रदक्षिणगता विदिशोऽथ कृत्ये॥

थानोल्लंघयेत् तत्र यवनेश्वरः प्राचीमुदग्द्वारिभिरत्र यायात्प्राग्द्वारिकैश्चोडुभिरप्युदीचीं तथैव याम्यामपराश्रितैर्भैर्याम्याश्रयैश्चाप्यपरां प्र
यायादिति ३६ अथ विदिक्षु गमने नक्षत्राणि दिशन्नावश्यककृत्ये निंद्यदंडापवादं च वसंततिलकयाह अग्नेर्दिशमिति नृपः पुरुहूतदिक् प्राची
तत्स्थैः कृत्तिकादिसप्तनक्षत्रैः अग्नेर्दिशमाग्नेयीमियात् गच्छेत् एवमनेन प्रकारेण प्रदक्षिणागताः सृष्टिमार्गेण स्थिता विदिशो नैर्ऋत्याद्यी
गच्छेत् यथा मघादिसप्तभिः नैर्ऋत्यां अनुराधादिसप्तभैर्वायव्यां धनिष्ठादिसप्तभैरैशानीं गच्छेदित्यर्थः अथेति आवश्यके कृत्ये कर्तव्ये परि
घदंडमपि लंघयित्वा नृपो गच्छेत् परं तु शूलनक्षत्रं शूलं विहाय त्यक्त्वा यदि दिक्तनुशुद्धिरस्ति पूर्वादिदिक्षु मेषादयस्त्रिरावृत्त्यादिराशयस्त्रयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्युः क्रमशो मेषाद्य एवं तस्यां दिशि दिग्लग्नशब्देन व्यवह्रियंते तेषां शुद्धिः शुभफलदातृग्रहानुकूलसाहित्यं स्यात् दिग्लग्नाधीनाह नारदः दिग्द्वाराय:
स्युः क्रमशो मेषाद्याश्च पुनः पुनरिति ३७ अन्यदपीद्रवज्रयाह मैत्रार्केति अनुराधाहस्तपुष्याश्विनीनक्षत्रैः सर्वासु दिशासु चतुर्दिक्षु तज्ज्ञैः ज्यो।
तिर्विवेके यात्रा शुभा निगदिता यत्तु बालविवेकियादि प्रागादिषु श्रवणाश्विपुष्यहस्ता नान्याग उक्तः सतिमूलत्वादुपेक्ष्यः क्वचिद्दृशो सर्वदिग्द्वारिका
ण्युक्तानि गुरुः पुष्याश्विहस्तमैत्राणि पौष्णवैष्णवसौम्यभं वासवं सर्वदिक्स्वाशु यात्रायां शोभनानि हीति वराहः सर्वद्वारिकसंज्ञितानि गुरुभं हस्ता
श्विमैत्राणि च श्रेष्ठान्येवं वपौष्णविष्णुवसुभान्याद्यैः सहाशेषसदेति वक्रीग्रह इति वक्रीग्रहो यदि केंद्रगः स्यात्तगमे यात्रायां निषिद्धः अथवाऽस्य
वक्रीग्रहस्य लग्ने वर्गः षट्वर्गश्चेत्स्यात्तोपि गमने निषिद्धः वाऽस्य वक्रीग्रहस्य दिनं वारोपि गमने निषिद्धं ३८ अथायनशूलमिंद्रवज्रयाह

आवश्यकेपि परिघं प्रविलंघ्य गच्छेच्छूलं विहाय यदि दिक्तनुशुद्धिरस्ति ३७ मैत्रार्कपुष्याश्विनभैर्निरुक्ता यात्रा शुभा स
र्वदिशासु तज्ज्ञैः वक्रीग्रहः केंद्रगतोस्य वर्गो लग्ने दिनं चास्य गमे निषिद्धं ३८ सौम्यायने सूर्यविधू तदोत्तरां प्राचीं व्रजेत्तौ
यदि दक्षिणायने प्रत्यग्यमाशां च तयोर्दिवानिशं भिन्नायनत्वेथ वधोन्यथा भवेत् ३९ ॥ ३९ ॥ ॥

सौम्यायनेति यदि सूर्यचंद्रौ सौम्यायने उत्तरायणे गतौ स्यातां तदा उत्तरां प्राचीं वा व्रजेत् तद्दिङ्मुखा यात्रा शुभेत्यर्थः यदि तु रविचंद्रौ दक्षिणायनग
तौ स्यातां तदा प्रतीचीं दक्षिणां वा व्रजेत् अथ तयोर्भिन्नायनत्वे अयनभेदे सति दिवानिशं व्रजेत् यथा सूर्यो यस्मिन्नयने तां दिशं दिवा व्रजेत् चं
द्रो यस्मिन्नयने तां दिशं रात्रौ यायात् अत्रोत्तरस्यां पूर्वस्या अंतर्भावः दक्षिणस्यां पश्चिमाया इति रत्नकोशे दिनकरकरप्रतप्तां मकरादावुत्तरां च पू
र्वां च यायाच्च कर्कटादौ याम्यामाशां प्रतीचीं चेति अतोन्यथा चेत्कुर्यात्तदा वधो मरणं भवेत् भिन्नायनत्वे सति सूर्यो यस्मिन्नयने तां दिशं प्रयदि रा
त्रौ गच्छेत् चंद्रो यस्मिन्नयने तां दिवा गच्छेत्तदा यातुर्वधो भवेदित्यर्थः ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसंमुखशुक्रदोषमुपजात्याह उदेतीति शुक्रोयस्यांदिशिप्राच्यांप्रतीच्यांवाकालवशेनोदयंकरोतितत्रगंतुः पुंसः शुक्रः संमुखः अयमेकप्रका
रः अथवागोलभ्रमवशेनयत्रयस्यांदिशिउत्तरस्यांदक्षिणस्यांवायदिगच्छेत् तत्रगंतुः पुंसः संमुखशुक्रः स्यात् अयंद्वितीयः प्रकारः अथयत्रकक
ुभसंघेप्राच्यादिदिशिकृत्तिकादिन्यासवशेनयद्दिङ्नक्षत्रेचरतितत्रदिशिगंतुः संमुखः शुक्रः स्यादित्ययंतृतीयः प्रकारः स्यात् अत्रिः यद्दिग्गतः
समुदयेद्विचरेयत्रगोलके यद्वारभेषुविचरेत्त्रिविधंप्रतिभार्गवमिति यत्रोदितइति यस्यांदिश्युदितः शुक्रोदृश्यतेतांदिशमेवनगच्छेत् अन्यदि
श्यपियथासंभवंनेयात् मूढेशुक्रेकार्यहानिः प्रतिशुक्रंपराजयइतिनारदोक्तेः अवश्यकर्तव्येगमनेशांतिमाहवसिष्ठः भृगुर्लग्नेभृगोर्वारेभृगु
वर्गेभृगूदये उपोष्यभृगुवारेपियावच्छुक्रोदयंप्रति रजतेनैवशुनेनकारयेत्प्रतिमांभृगोः लिखेदष्टदलंपद्मंकांस्यपात्रेचतंडुलैः शुक्लसूक्ष्मा

उदेतियस्यांदिशियत्रयातिगोलभ्रमाद्वाथककुभसंघे त्रिधोच्यतेसंमुखएवशुक्रोयत्रोदितस्तांतुदिशंनयायात् ५०

वरैर्वेष्ट्यप्रतिमांतत्रपूजयेत् शुक्लपुष्पाक्षतैर्गंधैर्मुक्ताहारैर्विचित्रितैः उपचाराणिकार्याणिशुक्रंतेन्यदिन्टचा तन्मंत्रेणजपंकुर्यात्स्वयमग्र
तोत्तरशतं कर्मांतेतेनमंत्रेणभक्त्याचार्घ्यंप्रदापयेत् श्वेतगंधाक्षतैः पुष्पैः क्षीरमिश्रेणवारिणा दैत्यमंत्रीदिवादर्शीचोशनाभार्गवः कविः श्वेतो
थमंडलीकाव्योविधिस्थोभृगवेनमः इत्येत्यर्घ्यंप्रयत्नेनप्रार्थयेद्देवभक्तितः अनेनैवतुमंत्रेणप्रांजलिः प्रणतः स्थितः त्वत्पूजयानयाशुक्रसं
मुखत्वसमुद्भवं दोषंविनाशयक्षिप्रंरक्षमांतेजसंनिधे इतिप्रार्थ्यप्रयत्नेनप्रतिमाभूषणान्विता देवज्ञायैवदातव्याश्वेताश्वसहितैवसा शिष्टेभ्यो
दक्षिणांदद्याद्यथावित्तानुसारतः ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजीतबंधुभिः इतरेषांग्रहाणांचपूजांकुर्यात्प्रयत्नतः तत्तत्संमुखजोदोषस्त
त्क्षणादेवनश्यति दीपिकायांतुदानमेवोक्तं सितमश्वंसितछत्रंहेममौक्तिकसंयुतं ततोद्विजायेनदद्यात्प्रतिशुक्रप्रशांतयइति ५० ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवक्रास्तादिदोषं सापवादमुपजात्याह वक्रास्तेति भृगोः सुते शुक्रे वक्रोपगते अस्तोपगते नीचोपगते च उपलक्षणत्वान्ग्रहयुद्धपराजिते वर्णरहि
ते वा सति राजा परराष्ट्रं व्रजन्सन् हि निश्चयेन विद्विषां शत्रूणां वशं याति बद्धो भवतीत्यर्थः भरद्वाजः विवर्णे विजिते नीचे वक्रिते वाऽसिते तथा शत्रुक्षेत्रगते
वापि तद्दृशे तन्निरीक्षिते भौमांशे भौमसंयुक्ते मंदांशे मंदसंयुते यात्रा नैव प्रकुर्वीत लक्ष्म्यायुर्बलहानिदेति बुध इति तत्र शुक्रास्ते यदि बुधोऽनुकूलः पृष्ठ
दिक्संस्थो भवेत्तदा संचलन्नात्मनराजारिपून् शत्रून् जयेत् नैवेति प्रतीद्गजेबुधेऽसंमुखे सति गंतुराज्ञो नैव जयः किंतु पराजयः अयं तु प्रतिशुक्रविचा
रो नृणां प्रथमगमने राज्ञां तु समस्तयात्रायामाहुः रैभ्यः प्रतिशुक्रादिदोषाय नूतनेगमने नृणां राज्ञां विजययात्रायां नान्यथा दोषमर्हतीति ४१ अथ विशे
षं शालिन्याह यावच्चंद्र इति चंद्रो यदा पूर्वभाद्रे वतीनक्षत्रादारभ्य कृत्तिकाद्यपादे रेवत्यश्विनीभरणीकृत्तिकाप्रथमचरणे च यावत्तिष्ठति तावच्छुक्रो धोर

वक्रास्तनीचोपगते भृगोः सुते राजा व्रजन्याति वशं हि विद्विषां बुधोऽनुकूलो यदि तत्र संचलन्नरिपून् जयेन्नैव जयः प्रतीद्गजे
४१ यावच्चंद्रः पूर्वभात्कृत्तिकाद्यपादे शुक्रो धोन्ध इष्टोऽग्रदक्षे मध्ये मार्गे भार्गवास्तेपि राजा तावत्तिष्ठेत्संमुखत्वेपि तस्य ४२
कुंभकुंभांशकौ त्याज्यौ सर्वथा यत्नतो बुधैः तत्र प्रयातुर्नृपतेरर्थनाशः पदे पदे ४३ ॥ यः दृष्टोपि शुक्रो दर्शनकार्यं न करोतीत्यर्थः

यः तेदेवाहन्दुष्ट इति अंधो यदा अग्रे संमुखे दक्षे दक्षिणभागे च दुष्टो न स्यात् मध्ये मार्गे मिति सुमुहूर्ते प्रस्थितोपि राजा मध्ये मार्गे मार्गमध्ये यदि शुक्रा
स्तो भवेत्तावत्कालं तस्मिन्नेव प्रयाणे तिष्ठेत् यावच्छुक्रोदयो भवेत् यदि गच्छतो राज्ञो देवात्संमुखः शुक्रश्चेत्तावदस्य शुक्रस्य संमुखत्वेपि तस्मिन्नेव प्रयाणे
तिष्ठेत् उपलक्षणत्वात्गुरावप्येवं विधेद्रष्टव्यं पराशरः जीवः शशांकः शुक्रो वा मार्गमध्ये स्तगो यदि तत्रैव निवसेद्राजा यावदभ्युदितो भवेदिति मार्गे
मध्ये बुधास्ते न दोषः यदा तु मार्गमध्ये बुधोदयो भवेत्स च पुनः संमुखो भवेत्तदा तु पुनर्दोष एव वसिष्ठः संमुखे चंद्रजं यत्र मार्गमध्ये दितो यदि याव
दस्तंगते तस्मिंस्तावत्तत्रैव सवसेदिति ४२ अथ निषिद्धलग्नमनुष्टुभाह कुंभकुंभांशके तिस्पष्टार्थः ४३ ॥ राम: ९४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथान्यन्मञ्जुभाषिण्याह अथमीनलग्नइति मीनलग्नलग्नांतरेवामीनांशकेचलितराज्ञोवर्त्मवक्रंस्यात् जनीति जनिर्जन्मकालीनंलग्नंजन्मभंजन्म
राशिः तयोर्जन्मलग्नराश्योः पतीस्वामिनौशुभग्रहौसौम्यग्रहौचेदुदयलग्नेभवतस्तदागमोगमनंशुभंस्यात् जन्मलग्नंजन्मराशिश्चयात्रालग्नगं।
शुभमितिप्रागेवाभिहितं जननराशितनूयदिलग्नगइति अर्थाज्जन्मलग्नजन्मराशिस्वामिनौपापग्रहे।यदियात्रालग्नेस्यातांतदानादृशेलग्नेगम
नमशुभफलमित्यर्थः वसिष्ठः जन्मराशौलग्नगतेतदीशेवाविलग्नगे अभीष्टफलदायात्राराशीशश्चेच्छुभग्रहः वृद्धनारदेन जन्मराश्युदमैनैव
जन्मलग्नोदयः शुभः तयोरुपचयस्थानेयदिलग्नगतंशुभइति जन्मराशिर्यात्रालग्नेनिषिद्धउक्तः सजन्मराशेः पापग्रहस्वामित्वेज्ञेयः शुभस्वा
मित्वेप्रागुक्तवसिष्ठवाक्यस्वरस्यात् एवंजन्मलग्नोदयऽशुभइत्यत्रापिजन्मलग्नस्यशुभस्वामित्वेशुभफलता नपापस्वामित्वेइतिव्याख्येयं ४४

अथमीनलग्नउतवातदंशकेचलितस्यवक्रमिहवर्त्मजायते जनिलग्नजन्मभपतीशुभग्रहौभवतस्तदातुदुदयेशु
भोगमः ४४ जन्मराशितनुतोष्टमेथवास्वारिभाच्चरिपुभेतनुस्थिते लग्नगास्तदधिपायदाथवास्युर्गतंहिनृपतेर्मृति
प्रदं ४५ लग्नेचंद्रेवापिवर्गोत्तमस्थेयात्राप्रोक्तावांछितार्थैकदात्री अंभोराशौवातदंशेप्रशस्तंनौकायानंसर्वसिद्धिप्र

अथान्यद्रथोद्धतयाह जन्मराशितनुतइति स्वजन्मराशेर्जन्मलग्नाच्चवाऽष्टमेराशौलग्नस्थितेसतितथारिभात् जिगमिषित ॥दायी ४६
शत्रोर्भाद्राशेर्लग्नात् रिपुभेषष्ठराशौलग्नस्थितेसति अथवातेषांस्वराशिलग्नाभ्यांअष्टमभवनेस्वशत्रुराशेर्जन्मराशिलग्नाभ्यांषष्ठभवनेएषां
स्वामिनोयात्रालग्नगताः स्युर्यदातदाराज्ञोमृतिप्रदाः ४५ अथान्यच्छुभलग्नंशालिन्याह लग्नेचंद्रइति मीनकुंभवर्जितेयस्मिंश्चिद्वालग्नेवर्गोत्त
मनवांशस्थे अथवाचंद्रेवर्गोत्तमस्थेसतियात्रावांछितार्थस्यमनोभीष्टार्थस्यैकाअद्वितीयादात्री अंभोराशाविति जलराशौलग्नगतेसति अथ
वालग्नांतरेतदंशेजलराश्यंशेसतिनौकायानंसर्वसिद्धिप्रदायीस्यात् ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथान्यदिंद्रवज्रयाह दिग्द्वारभेइति पूर्वादिदिक्षुमेषाद्याः क्रमाद्दिग्द्वारराशयः इति दिग्राशिषु गंतव्यदिगवस्थितेषु सम्मुखायायात्राप्रशस्ता प्रशस्त
त्वमाह अर्थदात्रीजयकारिणीचेति यथा मेषः पूर्वस्यां वृषोदक्षिणस्यां मिथुनः पश्चिमायां कर्कउत्तरस्यां एवंसिंहादयोधनुरादयश्चपूर्वादिषुज्ञे
याः हानिमिति दिक्प्रतिलोमलग्नेविपरीतदिगवस्थितेलग्ने यथा पश्चिमायांमेषः उत्तरस्यांवृषः पूर्वस्यांमिथुनः दक्षिणस्यांकर्कः एवंपुनःप
श्चिमादिषुसिंहादयोधनुरादयश्चज्ञेयाः तादृशेलग्नेगंतुः यात्राहानिंद्रव्यादिनाशं शत्रुतोभयंचकुर्यात् दिग्द्वारभेलग्नगतेयात्रार्थविजयप्रदा ल
ग्नेदिक्प्रतिलोमेसाहानिदाशत्रुभीतिदेतिवराहोक्तेः ४७ अथशुभलग्नानिवसंततिलकयाह राशिरिति गंतुःपुंसः स्वजन्मसमयेयोराशिःशुभ

दिग्द्वारभेलग्नगतेप्रशस्तायात्रार्थदात्रीजयकारिणीच हानिंविनाशंरिपुतोभयंचकुर्यात्तथादिक्प्रतिलोमलग्ने ४७
राशिः स्वजन्मसमयेशुभसंयुतोयोयः स्वारिभात्रिधनगोपिचवेशिसंज्ञः लग्नोपगःसगमनेजयदोथभूपयोगैर्गमो
विजयदोमुनिभिःप्रदिष्टः ४८ सूर्यःसितोभूमिसुतोथराहुः शनिःशशीज्ञश्चबृहस्पतिश्च प्राच्यादितोदिक्षुविदिक्षुचा
पिदिशामधीशाः क्रमतःप्रदिष्टाः ४९ केंद्रेदिगधीशेगच्छेदवनीशः लालाटिनितस्मिन्नेयादरिसेनां ५० ॥ ॥

ग्रहैःस्वेंद्रबुधगुरुशुक्रैः संयुतोस्तिसराशिर्यात्रालग्नोपगःशुभः अथवास्वारिभात्स्वशत्रुजन्मराशिजन्मलग्नाद्दष्टमोयोराशिः सचेद्यात्रालग्नोपग
तःशुभः स्यात् अथयोराशिर्वेशिसंज्ञः जन्मसमयेसूर्याक्रांतराशेर्द्वितीयोराशिर्वेशिसंज्ञः सचयात्रालग्नोपगःस्यात् तदागमनेजयदः स्यात् अथवा
भूपयोगैर्जातकोक्तैराजयोगैर्यात्रालग्नस्थितैर्गमोमुनिभिर्विजयदः प्रोक्तः जातकेराजयोगाद्रष्टव्याः ४८ अथदिक्स्वामिनउपजातिकयाह सू
र्यः सितइतिस्पष्टार्थं ४९ अथदिगीशप्रयोजनमध्याछंदसाह केंद्रेइति तस्मिन्दिगीशेलालाटिनिसतिअरिसेनांनेयात् नगच्छेत् ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथलालाटियोगान् शार्दूलविक्रीडितेनाह प्राच्यादाविति प्राच्याद्यष्टदिक्षुक्रमेण विलग्नसदनात् एतेषु भावेषु सूर्यादिग्रहस्थिता लालाटिकाः स्युरि
तिवाक्यार्थः यथा तनौलग्नस्थः तरणिः सूर्यः प्राच्यांगतुर्लालाटिकः एवंभृगुसुतोलाभव्ययेआग्नेय्यां कर्मस्थोभूसुतोदक्षिणस्यां तमोनवाष्टम
गृहेनैर्ऋत्यां सौरिः सप्तमेपश्चिमायां चंद्रःशत्रुगृहात्मजेवायव्यां बुधःपातालगउत्तरस्यां गीष्पतिर्वित्तभ्रातृगृहेईशान्यांगंतुर्लालाटिकइत्यर्थः कश्य
पेनतुसूर्यराशिवशेनलालाटिकाउक्तास्तेयथा दिनेशाधिष्ठितोराशिर्यदालग्नगतस्तदा यातुर्मृत्युप्रदःप्राच्यांदिशिसूर्योललाटगः सूर्यस्यराशि
तस्तस्माद्द्वादशेलग्नगेगृहे एकादशेवाआग्नेय्यांदिशिशुक्रोललाटकः ललाटगःकुजोयाम्येदशमेलग्नगेगृहे लग्नगेनवमेराशावष्टमेवापिनै
र्ऋते ललाटगःसैंहिकेयोयातुर्द्राक्निधनप्रदः लग्नगेसप्तमेराशौशनिः प्रत्यकललाटगः षष्ठराशौलग्नगतेपंचमेवापिचंद्रमाः ललाटगो

प्राच्यादौतरणिस्तनौभृगुसुतोलाभव्ययेभूसुतः कर्मस्थोथतमोनवाष्टमगृहेसौरिस्तथासप्तमे चंद्रःशत्रुगृहात्मजे
पिचबुधःपातालगोगीष्पतिर्वित्तभ्रातृगृहेविलग्नसदनाल्लालाटिकाःकीर्तिताः ५१ मृगेगत्वाशिवेस्थित्वादितौगच्छ
न्जयेद्रिपून् मैत्रेप्रस्थायशाक्रेहिस्थित्वामूलेव्रजंस्तथा ५२ प्रस्थायहस्तेनिलतक्षधिष्ण्येस्थित्वाजयार्थीप्रवसेद्द्विदैवे॥

वायुदिशियातुर्मृत्युप्रदस्तदा चतुर्थराशौलग्नस्थेबुधःसौम्येललाटगः राशौतृतीयेलग्नस्थेद्वितीयेचंद्रपूजितः ललाटगश्चंद्रमौलेर्दिशियातुः
तुर्विनाशदइति अत्रललाटव्यतिरिक्तेकंटकस्थानेयदिदिगधीशस्तिष्ठतितदायात्राशुभाऽन्यथाह्यशोभनेतित्त्व ५१ अथपर्युषितयात्रायो
गचतुष्टयमनुष्टुभेंद्रवज्रयाचाह मृगेति प्रस्थायेति गृहेस्वगृहाद्यातव्यदिगभिमुखंकस्यचिदिष्टस्यगृहेगत्वाप्रस्थायआर्द्रायांतस्मिन्नेवगृहेस्थि
त्वोषित्वादितौपुनर्वसौगच्छन्तद्गृहंत्यक्त्वाग्रामाद्बहिरेवगच्छन्रिपून्शत्रून्जयेत् अयमेकोयोगः एवमेवानुराधायांप्रस्थायशाक्रेज्येष्ठायांस्थि
त्वामूलेव्रजन् तथाजयेदित्यर्थः अयंद्वितीयोयोगः ५२ तथाहस्तेप्रस्थायानिलतक्षधिष्ण्येस्वातीचित्रेस्थित्वाद्विदैवेविशाखायांजयार्थी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भूपादिः प्रवसेद्दिगंतरं गच्छेत् अयंतृतीयः वस्त्वंत्यपुष्येषु निजसीम्नि स्वनगरप्रांते प्रस्थितः सन् यद्येकरात्रोषितः स्यात्तदाऽवनीशो राजा क्ष्मां भूमिरा
त्रोरिति शेषः लभते जयेन प्राप्नोतीत्यर्थः अयं चतुर्थो योगः ५३ अथ समयबलमनुष्टुभाह उषः काल इति सन् शब्दश्चरणचतुष्टयेपि संबंध्यते उ
षः कालः पूर्वां विना यानेयात्रायां सन् एवं सर्वत्र वराहेण तु दिग्विशेषसमयविशेषप्रशस्तोभिहितेः यथा पूर्वाह्णे तूत्तरां गच्छेन्मध्याह्ने पूर्वतो व्रजेत्
अपराह्णे व्रजेद्याम्यामर्धरात्रे तु पश्चिमामिति ५४ अथ लग्नादिभावानां संज्ञा अनुष्टुभाह लग्नात् भावा इति हृन्मनः सांतं हृन्मानसं मन इत्यभि
धानात् आगमः प्राप्तिः अन्यत्स्पष्टं एवंविधसंज्ञाकथनप्रयोजनं तु क्रूरसाहित्येन तत्तद्भावानां पीडा शुभग्रहसाहित्येन तत्तद्भावानां शुभमित्यर्थः ५५

वस्त्वंत्यपुष्येनिजसीम्नि चैकरात्रोषितः क्ष्मां लभतेवनीशः ५३ उषःकालो विना पूर्वां गोधूलिः पश्चिमां विना विनो
त्तरां निशीथः सन् याने याम्यां विनाभिजित् ५४ लग्नाद्भावाः क्रमाद्देह १ कोश २ धानुष्क ३ वाहनं ४॥ मंत्रो ५ रि ६ मार्ग
७ आयुश्च ८ हृत् ९ व्यापार १० गम ११ व्ययाः १२ ५५ केंद्रिकोणे सौम्यखेटाः शुभाः स्युर्याने पापास्त्र्यायषट्खेषु चंद्रः
नेष्टो लग्नांत्यारिरंध्रे शनिः खेऽस्ते शुक्रो लग्नेट् नगांत्यारिरंध्रे ५६ योगात्सिद्धिर्धरणिपतीनामृक्षगुणैरपि भूदेवानां॥

शालिन्याविशेषफलमाह केंद्रकोण इति शुभग्रहाः यदि केंद्रकोणे १।४।७।१०।९।५ स्युस्तदा याने शुभफलदाः स्युः पापास्त्र्यायषट्खेषु ३।११।६।१०
शुभफलदाः स्युः चंद्रो लग्नांत्यारिरंध्रे १।१२।६।८ नेष्टः अशुभफलदः शनिः खे दशमे नेष्टः शुक्रोस्ते सप्तमे नेष्टः लग्नेडिति लग्नेट् यात्रालग्नस्वा
मीनगांत्यारिरंध्रे सप्तमद्वादशषष्ठाष्टमेषु चेत्तदा नेष्टः अशुभफलद इत्यर्थः गुरुः लग्नपो मृत्युदो याने रंध्रास्तारिव्ययोपगः केप्याहुर्भयदो धर्मेशो
षस्थाने शुभावह इति ५६ अथ योगयात्रां व्याख्यायते तदारंभप्रयोजनं पाराकुलकेनाह योगादिति धरणिपतीनां राज्ञां योगाद्वक्ष्यमाणयोगयात्राल
ग्नवशाद्दुष्टेपि तिथ्यादौ सिद्धिर्वांछितकार्यनिष्पत्तिः स्यात् भूदेवानां ब्राह्मणानां ऋक्षगुणैर्नक्षत्रगुणैश्चंद्रबलताराबलविहिननक्षत्रादिभिः सिद्धिर्भ

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वति अपिशब्दात्पंचांगशुद्ध्यादिधनावश्यकता चौराणांवक्ष्यमाणैःशुभस्तु चकशकुनैःसिद्धिर्भवति एतद्भिन्नानांमनुजानांमुहूर्त्तात् गिरिशभुजग
मित्रादृतिविहितनक्षत्रस्वामिकमुहूर्त्तात्सिद्धिर्भवति ५७ अथयोगयात्रालग्नंमंजुभाषिण्याह सहजेरविरिति रविःसहजेतृतीयःस्यात् शशीचंद्रो
दशमभेदशमस्थाने शनिमंगलौरिपुगृहेषष्ठस्थानेस्यातांसितःसुतेपंचमे बुधोहिबुकेचतुर्थे गुरुरपिलग्नगश्चेत्स्यात् एवंविधेयोगेराजाप्रचा-
लितः अचिरात्स्वल्पकालेनैवारीन्जयतिवशीकरोतीत्यर्थः ५८ अथयोगांतरंगाथयाह भ्रातरिसौरिरिति भ्रातरितृतीयेशनिः वैरिणिषष्ठेभूमि-
सुतोमंगलः अर्केआयगतेएकादशे एवंविधेयोगेराजाशत्रुजयोभवेत् चेद्दैत्यगुरुःशुक्रोऽनुकूलःयातव्यदिक्पृष्ठवर्तीभवति ५९ अन्ययोगं

चौराणामपिशकुनैरुक्ताभवतिमुहूर्त्तादपिमनुजानां ५७ सहजेरविर्दशमभेशशीतथाशनिमंगलौरिपुगृहेसितःसुते
हिबुके बुधोगुरुरपीहलग्नगः सजयत्यरीन्अचलितोऽचिरान्नृपः ५८ भ्रातरिसौरिर्भूमिसुतोवैरिणिलग्नेदेवगुरुः
आयगतेर्केशत्रुजयश्चेदनुकूलोदैत्यगुरुः ५९ तनौजीवइंदुर्मृतौवैरिगोऽर्कः प्रयातोमहींद्रोजयत्येवशत्रून् ६०
लग्नगतःस्याद्देवपुरोधाः लाभधनस्थैःशेषनभोगैः ६१ द्यूनेचंद्रेसमुदयगेर्केजीवेशुक्रेविदिधनसंस्थे ईदृग्योगे
चलतिनरेशोजेताशत्रून्गरुडइवाहीन् ६२ वित्तगतःशशिपुत्रोभ्रातरिवासरनाथः॥

५ तरंगाथ्ययाह तनौजीवइति स्पष्टा
र्थः तथाचनारदः जीवार्कचंद्रालग्नारिरंध्रगायदिगच्छतः तस्याग्रेखलमैत्रीचनस्थिरारिपुवाहिनीति ६० अथान्यंयोगंपंक्त्याह लग्नगतइति
लग्नेगुरुःस्यात् अन्येग्रहालाभधनस्थाः एकादशद्वितीयस्थाश्चेदेवंविधेयोगेराज्ञोविजयः ६१ अन्यंयोगंमत्तयाह द्यूनेइति चंद्रेसप्तमस्थेसति
अर्केसमुदयगेलग्नगेसति जीवेशुक्रेविदिबुधेएतेषुत्रिषुधनुस्थेषुसत्सुएवंविधेयोगेनरेशश्चेत् चलतितदाशत्रून्जेताजेष्यति कःकानि
वगरुडोहीन्सर्पान्यथाजयति ६२ अथान्यंयोगंचित्रपदयाह वित्तगतइति बुधोद्वितीये वासरनाथः सूर्यस्तृतीये शुक्रेलग्नेएवंविधेयोगे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेद्राजा चलति तदा शत्रवो राजानः शलभा इव सुः यथा शलभा अग्नौ स्वयमेव गत्वा पतंति तथा शत्रवोपि गंतृराजप्रतापानले पतिष्यंतीत्यर्थः ६३ अथान्यं योगं गाथयाह उदयेरविरिति उदये रविः शनिः षष्ठः चंद्रो दशमः स्यात् एवंविधे योगे वसुधापती राजा यदि याति तदा रिपुवाहिनी शत्रुसेना वशमेति ६४ अथान्ययोगद्वयं जलोद्धतगत्याह तनौ शनिकुजाविति इतआरभ्य वसुधापतिर्यदि याति रिपुवाहिनी वशमेतीत्युत्तरार्द्धं सहजे कुजेइत्येतत्पर्यंतमनुवर्तते तेन यत्र निर्देशो नास्ति तत्र जिगमिषो राज्ञो विजयः स्यादिति वाक्यार्थो ज्ञेयः तनौ लग्नस्थौ शनिमंगलौ स्यातां रविर्दशमे बुधो लाभे दशमे स्यात् भृगुसुतो वा लाभे दशमे वा स्यात् एवंविधे योगे प्रचलितस्य राज्ञोयमेको योगः अथ द्वितीयः त्रिलाभरिपुभेषु ३।११।६ एष्वन्यतम

लग्नगते भृगुपुत्रे स्युः शलभा इव सर्वे ६३ उदये रविर्यदि सौरिररिगः शशी दशमेपि वसुधापतिर्यदि याति रिपुवाहिनी वशमेति ६४ तनौ शनिकुजौ रविर्दशमे बुधो भृगुसुतोपि लाभदशमे त्रिलाभरिपुभेषु भूसुतशनी गुरुज्ञभृगुजास्तथा बलयुताः ६५ समुदयगे विबुधगुरौ मदनगते हिमकिरणे हिबुकगतौ बुधभृगुजौ सहजगताः खलखचराः ६६ त्रिदशगुरुस्तनुगो मदने हिमकिरणो रविरायगतः सितशशिजावपि कर्मगतौ रविसुतभूमिसुतौ सहजे ६७ ॥ ॥

स्थानस्थितौ भूसुतशनी स्यातां यस्मिन्कस्मिंश्चित्स्थाने गुरुज्ञभृगुजा बलयुताः स्युस्तदा एवंविधे योगे तथा राज्ञो विजय इत्यर्थः ६५ अथान्यं योगं त्वरितगतिश्चघनजनगैरित्यनेन छंदसाह समुदयगे इति समुदयगे लग्नस्थे बृहस्पतौ सति हिमकिरणे चंद्रे मदनगते सप्तमस्थे सति चतुर्थस्थौ बुधशुक्रौ स्यातां खलखचराः पापग्रहाः सहजगताः तृतीयगाः स्युः एवंविधे योगे वसुधापतिर्यदि याति रिपुवाहिनी वशमेति ६६ अथान्यं योगं संमुखानजलजगैर्गर्हिता सुखाति लक्षणलक्षितयाह त्रिदशगुरुरिति बृहस्पतिर्लग्ने चंद्रः सप्तमे शुक्रबुधौ दशमे सूर्य एकादशे शनिमंगलौ सहजगतौ तृतीये एवंविधे योगे गंतू राज्ञो विजय एव ६७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथान्यंयोगंस्यादनुकूलाभतनगगश्चेतिलक्षणलक्षितयानुकूलयाह देवगुराविति गुरौचंद्रेवालग्नेसति सूर्येषष्ठे बुधःपंचमस्थाने शनिर्दशम
शुक्रश्चतुर्थेस्यात् एवंविधेयोगेजिगमिषोराज्ञोविजयएव ६८ अथान्ययोगंननररघटितानुमंदाकिनीतिलक्षणलक्षितयामंदाकिन्याहहिमकि
रणइति बुधोबलीचेत्तनौलग्नेस्यात् हीतिनिश्चयेनबृहस्पतिश्चेत्केंद्रगतः यदिनिर्बलोनीचाद्यशुभाधिकारप्राप्तोबलरहितः सन् द्वादशतृतीयष
ष्ठनवमानामन्यतमस्थानस्थश्चंद्रस्तथैवंविधयोगेगंतूराज्ञोविजयएव ६९ अथान्यंयोगंअभिनवतामरसंनजजायइतिलक्षणलक्षितेनाभिनव
तामरसछंदसाह अशुभखगैरिति अशुभग्रहैः अनवाष्टमदनस्थैः नवमाष्टमसप्तमस्थानव्यतिरिक्तस्थानस्थैः कविः शुक्रः चतुर्थतृतीयेकाद

देवगुरौवाशशिनितनुस्थेवासरनाथेरिपुभवनस्थे पंचमगेहेहिमकरपुत्रःकर्मणिसौरिःसुहृदिसितश्च ६८ हिमकिरण
सुतोबलीचेत्तनौत्रिदशपतिगुरुर्हिकेंद्रस्थितः व्ययगृहसहजारिधर्मस्थितोयदिभवतिनिर्बलश्चंद्रमाः ६९ अशुभख
गैरनवाष्टमदस्थैर्हिबुकसहोदरलाभगृहस्थः कविरिहकेंद्रगगीष्पतिदृष्टोवसुचयलाभकरःखलुयोगः ७० रिपुल
ग्नकर्महिबुकेशशिजपरिवीक्षितेशुभनभोगमनैः व्ययलग्नमन्मथगृहेषुजयःपरिवर्जितेषुशुभनामधरैः ७१ ल
ग्नेयदिजीवःपापायदिलाभेकर्मण्यपिचेद्राज्याधिगमः स्यात् ॥ ११ शस्थानस्थः केंद्रगतोगीष्पतिर्गुरुस्तेनदृष्टः एवंविधेयोगेवसुचयो

द्रव्यसमूहस्तस्यलाभकरःस्यात् ७० अथान्यंयोगंयाचालग्नंप्रमिताक्षरासजससैरुदितेतिलक्षणलक्षितयाप्रमिताक्षराछंदसाह रिपुलग्नेति षष्ट
लग्नदशमचतुर्थानामन्यतमस्थानस्थेबुधेशुभनभोगमनैः शुभग्रहैः परिवीक्षितेदृष्टेसतिद्वादशलग्नसप्तमस्थानव्यतिरिक्तस्थानस्थितैरशुभ
नामधरैःपापग्रहैरुपलक्षितेसति एवंविधेयोगेजिगमिषोराज्ञोविजयएव ७१ अथान्ययोगद्वयंत्योत्योमणिमालाछिन्नागुहवक्त्रैरितिलक्षणलक्षि
नयाह लग्नेइति लग्नेगुरुःपापग्रहायदिलाभेएकादशेकर्मण्यपिदशमेपिचेत्स्युः एवंविधयोगेप्रचलितस्यराज्ञोराज्याधिगमः राज्यप्राप्तिःस्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथवा द्यूने सप्तमे बुधशुक्रौ स्यातां चंद्रो हिबुके चतुर्थे स्यादेवंविधयोगे सर्वैर्मुनिवर्यैस्तद्वत्फलमुक्तं राज्याधिगमः स्यात् ७२ अथान्यद्योगत्रयं ननत तगुरुभिश्चंद्रिकाश्चतुर्भिरिरितिलक्षणलक्षितेन चंद्रिकाछंदसाह रिपुरिति अत्र स्थानां ग्रहाणां च साम्यात् यथासंख्यमन्वयः यथा रिपौ षष्ठे शुक्रः लग्ने जीवः अष्टमे चंद्रः एवंविधे योगे गंतुराज्ञो विजय एव अयमेको योगः अथ द्वितीयः बुधभृगुजौ तुर्यगेहस्थितौ चतुर्थस्थानस्थौ स्यातां चंद्रमा मदनभवनगः सप्तमस्थानस्थश्चेदेवंविधे योगे गंतुराज्ञो विजय एव अथ तृतीयो योगः वा चंद्रमा अंबुगः चतुर्थगः शशिसुतभृगुजयोरंतर्गतत्वं एकराशावेव ज्ञेयं अन्यथा चतुर्थस्थानस्थचंद्रस्य बुधशुक्राभ्यां तदुरुधरायोगमेधावस्तत् ७३ अथान्ययोगद्वयं सजससगौ च कथितः कलहंस इति लक्षण

द्यूने बुधशुक्रौ चंद्रो हिबुके वा तद्वत्फलमुक्तं सर्वैर्मुनिवर्यैः ७२ रिपुतनुनिधने शुक्रजीवेंदवो ह्यथ बुधभृगुजौ तुर्यगेहस्थितौ मदनभवनगश्चंद्रमा वांबुगः शशिसुतभृगुजांतर्गतः चंद्रमाः ७३ सितजीवभौमबुधभानुतनूजास्तनुमन्मथारिहिबुकत्रिगृहे चेत् क्रमतोऽरिसोदरखधात्रवहोराहिबुकायगैर्गुरुदिने खिलखेटैः ७४ सहजे कुजो निधनगश्च भार्गवो मदने बुधो रविरपीतनौ गुरुः अथ चेत्सुरीज्यसितभानवो जलत्रिगता हि सौरिरुधिरौ रिपुस्थितौ ७५

लक्षितेन कलहंसछंदसाह सितेति लग्ने शुक्रः सप्तमे जीवः षष्ठे भौमः चतुर्थे बुधः तृतीये शनिः एवंविधे योगे गंतुराज्ञो विजय एव एको योगः अथान्यः गुरुदिने बृहस्पतिवारे अखिलखेटैः समस्तग्रहैः सूर्यादिभिः क्रमतोऽरिसोदरेत्यादिस्थानस्थितैर्यथा षष्ठेऽर्कः तृतीये चंद्रः दशमे भौमः षष्ठे बुधः लग्ने गुरुः चतुर्थे शुक्रः एकादशे शनिः एवंविधे योगेऽपि गंतुराज्ञो विजय एव ७४ अथान्यद्योगद्वयं सजसजगौ च कथिता प्रबोधिके तिलक्षणलक्षितप्रबोधिकाछंदसाह सहज इति तृतीये भौमः अष्टमे शुक्रः सप्तमे बुधः षष्ठे सूर्यः लग्ने गुरुः एवंविधे योगे गंतुराज्ञो विजय एव अयमेको योगः अथान्यः अथेति ईज्यसितभानवो गुरुशुक्रसूर्याः जलत्रिगताः चतुर्थतृतीयस्थानस्थाः सौरिरुधिरौ शनिमंगलौ षष्ठस्थितौ एवंविधे योगे हि निश्चितं

CC-0. In Public Domain. Digitization by eGangotri

अथनामविशेषपुरस्कारेणयोगत्रयंसफलंशार्दूलविक्रीडितेनाह एकइति त्र्येज्यसितेषुबुधगुरुशुक्रेषुएकोपिबुधोवागुरुर्वाशुक्रोवाचेत्पंचमतपः केंद्रेषुतदायोगाख्योयोगः तथात्रेषुत्र्येज्यसितेषुद्वौचेत् बुधगुरूबुधशुक्रौगुरुशुक्रौवाचेत्पंचमतपः केंद्राणामन्यतमस्थानेस्थानभेदेनस्थानेको नवास्थितौस्यातांतदाधियोगाख्योयोगः सकलाः त्र्येज्यसिताः एषुपंचमतपः केंद्राणामन्यतमस्थानेषुस्थानभेदेनस्थानैक्येनवास्थितास्तदायोगा धियोगाख्योयोगः फलमाह योगइति योगेव्रजन्राजाक्षेमंकुशलंलभतेकुशलेनगतागतंकरोतीत्यर्थः अथाधियोगेव्रजन्राजाक्षेमंतथारिपूणां वधंचलभते अथयोगाधियोगेव्रजन्राजाक्षेमयशोलक्ष्मीश्चकाराच्छत्रुवधंचलभते अत्रवसिष्ठादिभिर्बहूनियात्रालग्नानिअभिहितानितानितत्र ग्रंथेभ्यएवावधार्याणि ७६ अथान्येपियात्रायोगालिख्यंतेकश्यपः पंचमेज्ञोरविः षष्ठेवर्ततेनवमेगुरुः भाग्ययोगाभिधेयोगेनिहंतावैरिणांसदा।

एकोत्र्येज्यसितेषुपंचमतपःकेंद्रेषुयोगस्तथा द्वौचेत्तेष्वधियोगएषुसकलायोगाधियोगःस्मृतः योगेक्षेमम
थाधियोगगमनेक्षेमंरिपूणांवधंचाथोक्षेमयशोवनीश्चलभतेयोगाधियोगेव्रजन् ७६ ॥ ॥ ॥

१ गुरुःकेंद्रेत्रिकोणेवारविर्लाभेचकर्मणि कल्याणयोगोभूपस्ययातुःकल्याणकृत्भवेत् २ दिग्गीशोदिग्बलीचेत्स्याल्लग्नेशस्यसुहृद्यदि विजयोनामयोगोयंयातारराजाजयीभवेत् ३ अत्रिः सहजस्थानगोभौमोभाग्यस्थश्चबृहस्पतिः चिंतामणिसमाख्योयंयातुःसंकल्पपूरकः ४ लग्ने शुक्रः शशीबंधौकर्मस्थानेगुरुर्यदा मृगेंद्रयोगोविख्यातोयातुःसर्वार्थसाधकः ५ लग्नेभौमोगुरुश्छिद्रेषष्ठस्थानेचभास्करः मृत्युंजयसमाख्योयंसर्वशत्रुनिबर्हणः ६ आपोक्लिमगतेचंद्रेकेंद्रस्थेसुरपूजिते योगःकेंद्रइतिख्यातोयातुरिष्टार्थसिद्धिदः ७ चंद्रोदयेगुरुश्चास्तेलग्नेवासुरपूजिते योगःपारावतोयातुः शुक्रेवालग्नकेंद्रगे प्रबलोयदियोगोसौगमनेसर्वसिद्धिदः ९ रविःषष्ठेसितश्छिद्रेतृतीयेभूमिनंदनः पिनाकियोगोविख्यातोयातुर्विजयकारकः १० अन्योन्यक्षेत्रगावेकक्षेत्रेवाकविभास्करौ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु०टी० मृत्युयोगोयमाख्यातोयातुर्मृत्युप्रदायकः ११ उच्चक्षेत्रगतश्चंद्रो ह्यक्षीणश्चरविर्गुरुः संजीवनसमाख्योयंमृत्युयोगापहारकः १२ एकर्क्षगौजीवशु
या०प्र क्रौस्यातामन्योन्यसप्तगौ भयंकराख्ययोगोयंयातुर्भीतिप्रदःस्मृतः १३ उच्चमूलत्रिकोणेषुवर्त्ततेगुरुभार्गवौ अभयाभिधयोगोयंभयंकरविनाशनः
९९ १४ भार्येशोव्ययगोनीचःपुत्रस्थानेशनैश्चरः विदारिकसमाख्योयंयातुःपत्नीनिहंत्यसौ १५ मार्गेशःशनिसंयुक्तःसप्तमेस्तंगतोग्रहः विदारिकमिमं
मन्येयातुःपत्नीविनाशकं १६ सप्तमेचंद्रमास्तस्मात्सप्तमेनीचखेचरः कुटुंबहारकोयोगोयातुःप्रियतमांहरेत् १७ दुर्बलोयदिमार्गेशोनिवसेत्पापमध्यगः
पापकुंजरयोगोयंयातुःपत्नीनिहंत्यसौ १८ मार्गेशात्सप्तमेभानुःपंचमेक्रूरखेचरः विदारिकाख्यएवासौभार्यामरिवर्धनयेत् १९ स्वोच्चमूलत्रिकोण
स्थःसौम्यःपापविवर्जितः आनंदार्णवयोगोयंधर्मेणैवजयावहः २० रत्नावल्यां उदयारिनभस्तलगेदिनकृद्घर्मशीतकरैः नभवंत्यरयोभिमुखाहरिणाद्
वकेसरिणः २१ दैवज्ञवल्लभे त्र्येसितेनसहितेस्तगेविधौबंधुगेप्रवसतामहीभुजा संगरेरिपुगणोविकीर्यतेतूलराशिरिवमातरिश्वना २२ मूर्त्तिवित्तसहजे
षुसंस्थिताःशुक्रचंद्रसुततिग्मरश्मयः यस्ययानसमयेरणांगणेतस्ययातिशलभाद्वारयः २३ यात्राशिरोमणौ योयातिजीवेतनुगेमहीशःक्रूरस्थि
तैर्व्योम्न्यथावायसंस्थैः तस्याग्रतःसंयतिवैरिसेनाप्रीतिर्भूपाणामिवनास्थिरास्यात् २४ राजमार्त्तंडः लाभारिदुश्चिक्यगतौयमारौबलान्वितौभार्गव
जीवसौम्याः यस्यप्रयाणेविलयंप्रयांतितस्यद्विषःसर्वरसंयथाप्सु २५ फलप्रदीपे लाभविक्रमसुखस्थितेकवौकंटकस्थगुरुणानिरीक्षिते द्यूनरंध्र
भवर्जितैःखलैःस्याद्गतोभिमतसिद्धिभाङ्नृपः २६ सौम्यग्रहैःकेंद्रतपःसुतस्थैःक्रूरैस्त्रिलाभारिगतैर्गतोयः कोपानलःशांतिमुपैतितेषांविरोधि
नारीनयनांबुपातैः २७ वराहः एकोपिजीवार्ककुजार्कजानांस्वोच्चेविलग्नेस्वगृहेयदींदुः यातस्ययांत्यत्रपराप्रणाशंमहाकुलानीवकुटुंबभेदैः २८
चंद्रेस्तगेदेवगुरौविलग्नेज्ञशुक्रयोःकर्मणिलाभगेर्के सौराऽरयोर्भ्रातृगयोश्चयातोनृपःस्वभृत्यानिवशास्तिशत्रून् २९ नारदः स्वोच्चस्थेलग्नगेजीवे राम:
चंद्रेचायगतेयदि गतोराजारिपून्हंतिपिनाकीत्रिपुरंयथा ३० शुक्रेत्रिकोणेकेंद्रस्थेलग्नेचंद्रेथवारवौ शत्रून्हंतिगतोराजाब्रह्मद्वेषःकुलंयथा ३१ ९९
पापास्तृतीयेहिबुकेसितज्ञौजीवोविलग्नेमृगलंछनोस्ते यस्योद्गतस्यबलंरिपूणांकृतंकृतघ्नेष्विवयातिनाशं ३२ यस्योदयास्तारिचतुस्त्रिसंस्थाःशुक्रो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गिरांगारकसौम्यसौराः द्विषद्बलं स्त्रीवदनानि तस्य क्रान्तानि कांतान विलोकयंति ३३ पूर्वोक्तयोगे धनगो बुधश्चेच्छशांकसूर्यौ च दशायसंस्थौ अस्मि
न्नातस्यालिकुलोपगीतानानावनस्था ह्विरदा भवंति ३४ वराहः त्रिषण्णवांत्येष्वबलः शशांको बुधो वलीयस्य गुरुश्च केंद्रे तस्यारियोषाभरणैः प्रिया
णि प्रियाप्रियाणां जनयंति सैन्ये ३५ चंद्रोऽबलः बुधो बली उभौ च त्रिषण्णवांत्येषु एवं भवतस्तदा योगः केंद्रोपगतेन वीक्षिते गुरुणा रवायतुये गसिते
पापे रन्ध्राष्टसप्तगे वैसुकिं तं न यदाप्नुयान्नृपः ३६ षष्ठष्टगौ शुक्रबुधौ प्रयाणे सुरेशपूज्यो गगने यदि स्यात् रिपुः प्रणाशं विषये षु सौख्यं प्राप्नोति की
र्ति विपुलं च भोगं ३७ दुश्चिक्यलाभारिगतेऽर्कपुत्रे चतुर्थगे दैत्यगुरौ प्रयाति यदा पुमान्स द्विरदेंद्रयानं कीर्तिर्यशः सिद्धिसह स्वमेति ३८ केंद्रस्थाने
सुरपतिगुरौ कंटकस्थेऽसुरेज्ये छिद्रे सौम्ये प्रवसति च यदा त्वष्टमेंदुर्यदि स्यात् येषां क्रूरारिपुसहजगा राहुकेतू च मूर्तौ वायुः कीर्तिं द्रविणमतुलं ते लभंते य
शश्च ३९ मूर्तौ शुक्रे सुरपतिगुरौ छिद्रगे वा त्रिकोणे केंद्रस्थाने शनिरविकुजालाभगा वा यदि स्युः ये भूपा यांति शत्रुं विपुलधनमथो सैन्यनाशं रिपूणां की
र्तिं शुद्धं यशश्च प्रमथितरिपवस्ते सुखाद्या व्रजंति ४० होरासंस्थे सुरपतिगुरौ भार्गवे कंटकस्थे षष्ठे चंद्रे व्रजति यदि वा कार्ययोगात्क्षितीशः प्राप्नोत्यग्र्यं
कनकतुरंगरूप्यरत्नादिकोशमायुः कीर्तिं जयति च तदा मत्तमातंगयूथं ४१ लग्नारिकर्मे हिबुकेषु शुभेक्षितेषु द्यूनांत्यलग्नरहितेष्वशुभग्रहेषु यातु
र्भयं न भवति प्रतरेत्समुद्रं यद्यश्मनापि किमुतारिसमागमेषु ४२ एकांतरस्थैर्भृगुजाद्यैः सौम्यैः स्थितैः सूर्यसुतादुरोवा प्रध्वस्यते रिर्नचिराद्गतस्य वेषाधिको
भृत्यदवेश्वरस्य ४३ शुक्राद्रोमाद्वा सौराज्जीवाद्वा बुधः एकांतरे तृतीयस्थाने यत्र कुत्र स्यात्तदा योगः निरंतरं यदि भवनेषु पंच सुग्रहाः स्थिता दिवसक
रेणवर्जिता यियासतो यदि च भवंति दृष्टतस्तदा परान्बलभिर्दिवा च हतंति ४४ प्राक्कपालस्थे ग्रहैः पश्चिमदिशि इष्टगतं अपरकपालस्थैः प्राच्यां ख
मध्यस्थे रुत्तरदिशि अर्धरात्रस्थैर्दक्षिणादिशि बुधभार्गवमध्यगते हिमगो हिबुकोपगते च नृपः प्रवसेत् पुरुहूतदिशं यदि वांतकृतः पुरुहूतयमं प्र
ति ४५ सितेंदुजौ चतुर्थगौ निशाकरश्च सप्तमे यदा तदा गतो नृपः प्रणाशयत्यरीन्विना तारणात् ४६ शुक्रवाक्पतिबुधैर्धनसंस्थैः सप्तमे शशिनि लग्नगते
ऽर्के निर्गतो नृपतिरेनिकृतार्थो वर्षांते यदरीन्विनिहत्य ४७ सूर्येंदुबलवर्जितौ बलयुतौ लग्ने भृजन्मेश्वरौ पाताले दशमेपि वा शशिसुतौ लग्नस्थि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नोवाक्पतिः षट्सप्ताष्टमवर्जितेषुभृगुजःस्थानेषुयस्यस्थितोयातुस्तस्यनविद्विषोरणमुखेतिष्ठंतियोधाइव ४८ सौरेभौमेलग्नगेर्केखमध्येकर्मण्या
येभार्गवेचंद्रजेवा यायाद्भूपःशत्रुगेहंनिहंतुंद्दप्तंशत्रुंकालवक्रूरचेष्टः ४९ गुरौविलग्नेयदिवाशशांकेषष्ठेरवौकर्मगतेर्कपुत्रे सितज्ञयोर्वंधुसुतस्थ
योश्चयात्राजनित्रीवहितानिधत्ते ५० निनिधेननतनुसप्तमारिसंस्थाःकुजसितजीवबुधारविश्चयस्य खलजनजनितेवलोकायात्रानभवतितस्यचि
रायशत्रुसेना ५१ कुजरविजयुतेरिभेगतानांजलसहजायगतैःसितार्कजीवः परबलमुपयातिनाशमाशुश्रुतमधनस्यकुटुंबचिंतयेवा ५२ भृगु
पुत्रमहेंद्रगुरुगमनेसहितोयदिभंयुगपत्यजतः ज्ञगुरुयदिवांशकमेकतगतोसामरेमराडिवभातितदा ५३ क्षितितनययुतान्नवांशजयदिशातमे
भृगुजोथवागुरुः शतगुणमपिहंत्यरेर्बलंविषमिवकायमस्तकूपथोपगं ५४ स्वोच्चोपगेजीवकुजार्करेभिस्त्रिभिर्वाकथितेरेकलग्ने रात्तःप्रणाशंस
मुपैतिशत्रुःसोख्यंद्विभार्यस्ययथाऽधनस्य ५५ शताशकाद्ध्वंमवस्थितेवुधेयमारयोस्तत्रगतस्यभूभृतः प्रयातिनाशंसमरेद्विषद्बलंयथार्थि
भावोपगतस्यगौरवं ५६ भौमाधिष्ठितनवांशाद्यदिबुधोनवांशकंतादृध्वंस्तिष्ठति एवंशनेरपिसिंहाजतौलिमिथुनामृगककर्कटोचस्वेशान्विताभव
तियस्यशनिश्चलग्नेनतस्नैनिकाःपरबलंसपर्यंतियातुर्मूर्खस्यवित्तमिवचारणचट्टमंस्ताः ५७ चट्टाधूर्ताःमंस्ताअलीकवादिनः अथसमरयात्रा
गुरौवीर्येकेंद्रयुतेबुधेवाभृगुनंदने विजयोनामयोगोयंयातुर्विजयदःसदा ५८ स्वराशिगेबुधेलग्नेसितेवासुरवंदिते नद्यावर्तोह्ययंयोगोया
तुरिष्टार्थसिद्धिदः ५९ स्वांशसंस्थेबुधेलग्नेशुक्रेवादेवपूजिते शंखसंज्ञोह्ययंयोगोयातुःकीर्तिप्रदःसदा ६० स्वराशौस्वांशगेसौम्येलग्नस्थेवा
भृगोःसुते जीवेवावज्रयोगोयंयातुःशत्रुविनाशकृत् ६१ अधिमित्रांशगेसौम्येसितेवाथसुरार्चिते लग्नगेमातृयोगोयंशत्रूणांसंधिकृत्सदा
६२ यत्रैकादशगश्चंद्रोभानुर्वाप्रबलःशुभः अभयोनामयोगोयंअरिभूतिविनाशकृत् ६३ त्रिकोणगेशुभेखेटेसबलेवाद्वितीयगे कल्याण
संज्ञोयोगोयंयायिनांमंगलप्रदः ६४ यत्रस्वोच्चगतश्चंद्रोलग्नादेकादशेस्थितः जयंतोनामयोगोयंशत्रुपक्षविनाशकृत् ६५ वर्गोत्तमग
तेलग्नेशुभेवाथबलान्विते -सिद्धिदायकः ६६ मितेसूर्येतामगेहरसंज्ञगः योगोमहारणेशत्रुप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षक्षयकरः सदा उच्चस्थे लाभगे शुक्रे त्रिषष्ठे देवपूजिते सुदर्शनो महायोगः शत्रुध्वंसकरो रणे ६८ लग्नान्यकेंद्रगे चंद्रे लग्नस्थे देवपूजिते महाशंखाह्वयो
योगः प्रतिपक्षाचमानदः ६९ भूसुते स्वोच्चगे लाभे मृगकुंभगते यमे नद्यावर्ताह्वयो योगो रणे शत्रुतृणानलः ७० मेषगे भास्करे षष्ठे लाभगे स्वोच्चगे यमे
नक्षत्रपद्योगोयं शत्रुमेघानिलो रणे ७१ भौमे स्वराशिगे लग्ने सौम्ये केंद्रत्रिकोणगे पुष्पयोगो रिपुविपिनकुठारः संगरांगणे ७२ एकांतरे गते लग्नाच्छुभखे
टेथवाऽशुभे वापीयोगस्त्वरिव्राततिमिरौघदिवाकरः आवश्यके तथा याने सौम्यास्ते निधनेपि वा व्रजेदर्कोदये स्ते वा मध्याह्ने वाप्यशंकितः ७४ प्रभ्रष्टघु
तितारकास्फुटतटी प्राची भवेन्निर्मला त्वीषद्रक्तविलोहिता न धवला देवैः सदा वांछितं नो वारं न तिथिं न चापि करणं लग्नं च नापेक्षते हत्वा दोषसहस्रकं चय
मुत्वा नूनं करोत्युन्नतिं ७५ मध्यं व्योम प्रयाते स्फुरदनलनिभे केसरेरार्कबिंबे छायासाध्वीचकांता प्रचलति पुरुषे यत्र तत्स्यात् लग्ना तावत्तोरिनेर्विष्टिः कुज

इषमासिसिता दशमी विजया शुभकर्मसुसिद्धकरी कथिता श्रवणर्क्षयुता सुतरां शुभदा नृपतेस्तु गमे जयसंधिकरी
७७ चेतोनिमित्तशकुनैरतिसुप्रशस्तैर्ज्ञात्वा विलग्नबलमुर्व्यधिपः प्रयाति॥ ९॥ ॥

कृतमशुभं नैव ऋक्षं न योगः सैन्यमानारोग्यसंपत्क्षितिमथयुवतिं तत्र गंता लभेत ७६ यावत्सिंदूरवर्णं गगनतलगतं भानुबिंबं घनास्तं यावच्चोदिशु
शांतिं व्रजति खुरपुटैरुद्धतो रेणुसंगः तावन्नैवास्ति दोषः प्रभवति न च सा क्रूरदृष्टिर्ग्रहाणां यात्रायां वा विवाहे सकलशुभकरी सर्वकार्येषु सिद्धिः ७७ इत्यलं
ग्रंथविस्तरेण इति यात्रालग्ने राजयोगाः अथ विजयादशमीसंज्ञकं सिद्धिमुहूर्तं तोटकेन सगणचतुष्टयेनाह इषमासीति स्पष्टार्थः कश्यपः मासीषेशु
क्लदशमी सर्वदा विजयाभिधा विजयस्तत्र यातॄणां संधिर्वा न पराजय इति ७७ अथान्यद्वसंततिलकयाह चेतोनिमित्तेति चेतोंतःकरणं निमित्तमंगस्फुरणादि
शकुनानि वक्ष्यमाणानि एतैः सुप्रशस्तैः सद्भिः खलु निश्चयेन लग्नबलं ज्ञात्वा उर्व्यधिपो राजा प्रयाति तदा सर्वसिद्धिर्वांछितसिद्धिर्भवति यदा तु लग्नादिबले
सत्यपि निंद्यानि शकुनानि स्युः तदा यात्रा निषिद्धैव वसिष्ठः अशुभानि निमित्तानि उत्पातशकुनानि च यात्राकाले नृणां तेषां निधनाया धनाय चेति ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदातुदैवात् शकुनलग्नादीन्यनिंद्यानिचेतोविशुद्धिश्चनास्त्येवात्रकस्यप्राबल्यमित्याह अथेतिशकुनादितोपिसकाशात्चेतोविशुद्धिरधिका तांचेतो-
विशुद्धिंविनानैयात् नगच्छेत् कश्यपः निमित्तशकुनादिभ्यः प्रधानंहिमनोजयः तस्माद्दियासतांनॄणांप्रधानंहिमनोजयइति ७८ अथयात्रायामव
श्यनिषिद्धनिमित्तानिवसंतमालिकाछंदसाह तल्लक्षणंविषमेससजगौ समेचेत्सभरयश्चवसंतमालिका साविषमसमचरणे व्रतबंधनेति व्रतबंध
नंयज्ञोपवीतं देवप्रतिष्ठाप्रसिद्धा करपीडाविवाहः उत्सवो होलिकादिसूतकांतेमरणसूतकंच एषांशास्त्रोक्तयावद्दिनसमाप्त्यानामसमाप्तौसमाप्तिं-
विनाकदापिनैवचलेत्नगच्छेत् नारदः उत्सवोपनयोद्वाहप्रतिष्ठाशौचसूतके आसमाप्तेनकुर्वीतयात्रांनत्रजिजीविषुरिति अकालेतिविद्युत्प्रसिद्धा घनो

सिद्धिर्भवेदथपुनः शकुनादितोपिचेतोविशुद्धिरधिकानचतांविनेयात् ७८ व्रतबंधनदेवतप्रतिष्ठाकरपीडोत्सवसू
तकासमाप्तौ नकदापिचलेदकालविद्युत् घनवर्षातुहिनेपिसप्तरात्रं ७९ महीपतेरेकदिनेपुरात्पुरेयदाभवेतांग
मनप्रवेशकौ भवारशूलप्रतिशुक्रयोगिनीविचारयेन्नैवकापिपंडितः ८० यद्येकस्मिन्दिवसेमहीपतेर्निर्गमप्र
वेशौस्तः तर्हिविचार्यःसुधियाप्रवेशकालोनयात्रिकस्तत्र ८१ प्रवेशान्निर्गमंतस्मात्प्रवेशंनवमेतिथौ॥ ॰ ॥

मेघगर्जितं वर्षावृष्टिः तुहिनंनीहारः एषुपदार्थेषु कालेषुसत्सुसप्तरात्रंदिनसप्तकंनचलेत् नारदः अकालजेषुनृपतिर्विद्युद्गर्जितवृष्टिषु उत्पा
नेषुत्रिविधेषुसप्तरात्रंनतुव्रजेदिति ७९ अथैकदिनसाध्येगमनप्रवेशेविशेषंवंशस्थविरेणाह महीपतेरिति स्पष्टार्थः यथावाराणसीस्थानाच्चर
णादिनगरे प्रवेशः तत्रैतान्दोषान्पंडितोनैवविचारयेत् ८० अथैकदिनमध्येनिर्गमप्रवेशाख्यरूपेकार्येविचिकीर्षितेकिंविचार्यमित्यार्ययाह
यद्येकस्मिन्नितिस्पष्टार्थं ८१ अथप्रयाणेनवमीदोषमनुष्टुभाह प्रवेशादिति गृहप्रवेशतिथितोनवमेतिथौनिर्गमंनकुर्यात् पुनश्चगमनदि
वसात् नवमेतिथौगृहप्रवेशंनकुर्यात् एवंनक्षत्रेचगमननक्षत्रान्नवमेनक्षत्रेगृहप्रवेशं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा गृहप्रवेशनक्षत्रान्नवमनक्षत्रे गमनं च न कुर्यात् वारे च गमनवारान्नवमवारे गृहप्रवेशं गृहप्रवेशवासरान्नवमवारे गमनं न च कुर्यात् गर्गः प्र
वेशान्निर्गमश्चैव निर्गमाच्च प्रवेशनं नवमेयातु नो कुर्याद्धिष्ण्यवारे तिथावपीति ८२ अथ यात्रादिनीयं विधिं शालिन्याह अग्निं हुत्वेति स्पष्टार्थं ८३
अथ नक्षत्रदोहदान् शार्दूलविक्रीडितेनाह कुल्माषानिति अत्र चतुर्थचरणे प्रियंग्वपूपेत्यत्र छन्दोभंगोस्ति सगणप्रक्षेपाकरणात् सत्यं प्रेङ्खेवेति पिङ्ग
लसूत्रेण पकाररेफसंयोगेच प्राग्वर्णस्य लघुत्वाभिधानात् सगणघस्रापएव तथा च कालिदासः गृहीतप्रत्युद्गमनीयवस्त्रेति हयादृक्षे अश्विन्यादि
सप्तविंशतिभेषु कुल्माषादिकं नक्षत्रदोहदं इदं भक्ष्याभक्ष्यं वर्णभेदेन देशभेदेन विचार्यं भक्ष्यसंभवे भक्षयेत् अभक्ष्यसंभवे आलोकयेत् पश्येत् स्पृ

नक्षत्रे च तथा वारे नैव कुर्यात्कदाचन ८२ अग्निं हुत्वा देवतां पूजयित्वा नत्वा विप्रानर्चयित्वा दिगीशं दत्वा दानं ब्राह्म
णेभ्यो दिगीशं ध्यात्वा चित्ते भूमिपालो धिगच्छेत् ८३ कुल्माषांस्तिलतंडुलानपि तथा माषांश्च गव्यं दधित्वाज्यं दुग्धम
थैणमांसमपरं तस्यैव रक्तं तथा तद्वत्पायसमेव चाषपललं मार्गं च शाशं तथा षाष्टिक्यं च प्रियंग्वपूपमथवा चित्रांडजा
न्सत्फलं ८४ कौर्मं सारिकगौधिलं च पललं शाल्यं हविष्यं हयादृक्षे स्यात्कृसरान्नमुद्गमपि वा पिष्टं यवानां तथा॥ ॥

शेद्वेति ध्येयं यथा अश्विन्यां कुल्माषान् सक्तून् स्विन्नमाषान् भरण्यां तिलमिश्रतंडुलान् कृत्तिकायां माषान् रोहिण्यां गव्यं गोरसं च विद्दे धि मृगे
गव्यमाज्यं घृतं आर्द्रायां दुग्धं गव्यमेव पुनर्वसावेणमांसं हरिणमांसं पुष्ये मृगस्य रक्तं आश्लेषायां पायसं मघायां चाषस्य पललं मांसं पूर्वफ
ल्गुन्यां मृगस्येदं मार्गं मांसं उत्तराफल्गुन्यां शशस्येदं शाशं मांसं हस्ते षाष्टिक्यं षष्टिकान्नं चित्रायां प्रियंगुः फलिनी एके स्वात्यामपूपं विशाखायां
चित्रान् नानावर्णान् अंडजान् ईक्षणं अनुराधायां सत्फलं उत्तमफलमन्नादिकं ८४ ज्येष्ठादिदोहदं शार्दूलविक्रीडितेनाह कौर्ममिति ज्येष्ठायां
कूर्मस्य कच्छपस्येदं कौर्मं मांसं मूले सारिकायाः पक्षिण्याः इदं सारिकं मांसं पूर्वाषाढायां गोधायाः इदं गौधिकं मांसं ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उत्तराषाढायां शल्यस्य पक्षिणः दंष्ट्राल्यं मांसं श्वावित्तु शल्य इत्यमरः अभिजिति हविष्यं मुद्गादि श्रवणे कृसरान्नं विचड़िका धनिष्ठायां मुद्गान्नं मुद्गौ
दनं शतभे यवान्नं यवपिष्टं पूर्वाभाद्रपदायां मत्स्यान्नं मत्स्यमिश्रितमोदनं उत्तराभाद्रपदायां चित्रान्नं वर्णमोदनं रेवत्यां दध्यन्नं दधिभक्तमिति नारदः
कुल्माषांश्च तिलान् माषान् दधिगव्यं घृतं पयः मृगमांसं च सारं पायसं चाषकं मृगं शशमांसं च षाष्टिकं च प्रियंगुकमपूपकं चित्राण्डजान् फलं कूर्मं
सारीं गोधां च शल्यकं हविष्यं कृसरान्नं च मुद्गान्नं यवपिष्टकं मत्स्यान्नं चित्रितान्नं च दध्यन्नं दक्षभात् क्रमादिति गुरुः अलभ्यालभ्य भक्ष्या वा स्पृ
त्वा स्पृष्ट्वाथ तान् व्रजेत् दृष्ट्वा सिद्धिमाप्नोति दृष्टभादिषु भूपतिः दोहदेषु ग्रंथांतरे भेदस्तत्र विकल्पो ज्ञेयः ८५ अथ दिग्दोहदमनुष्टुभाह आज्यमिति

मत्स्यान्नं खलु चित्रितान्नमथवा दध्यान्नमेवं क्रमाद्दृश्याभक्ष्यमिदं विचार्य मतिमान्भक्ष्येत्तथालोकयेत् ८५ आज्यं
तिलोदनं मत्स्यपयश्चापि यथाक्रमं भक्षयेद्दोहदं दिश्यमाशां पूर्वादिकां व्रजेत् ८६ रसालां पायसं कांजीं शृतं दुग्धं तत
यादधि पयो श्रितं तिलान्नं च भक्षयेद्वारदोहदं ८७ पक्षादितोर्कदलतंडुलवारिसर्पिः श्राणा हविष्यमपि हेमजलं

आज्यं घृतं पूर्वस्यां तिलमिश्रमोदनं दक्षिणस्यां मत्स्यं पश्चिमायां पयो दुग्धमुत्तरस्यां दिक्षि भवं दिश्यं एतद्दोहदं भक्षयेत् ततः पूर्वो ऽऽ त्वेपूपं ॥
धामाशां व्रजेत् ८६ वारदोहदमनुष्टुभाह रसालमिति रसाला शर्करादधिमरीचकर्पूरैलासंसृष्टा लोके शिखरिणीति प्रसिद्धा तां रविवारे पायसं सोमे कां
जीं प्रसिद्धां तां भौमे श्रितं पक्वं दुग्धं बुधे दधि गुरौ आश्रितं अपक्वं दुग्धं शुक्रे तिलमिश्रमोदनं शनिवारे एतद्वारदोहदं रविवारादिक्रमेण भक्षयेत् स्या
द्रसाला तु मार्जितेत्यमरः ८७ अथ तिथिदोहदं वसंततिलकेनाह पक्षादितइति पक्षादितः प्रतिपदमारभ्य पंचदश तिथिषु क्रमेण तिथिदोहदं भु
क्त्वा व्रजेत् यथा प्रतिपदि अर्कस्य प्रसिद्धस्य दलानि पर्णानि द्वितीयायां तंडुलवारि प्रक्षालिततंडुलजलं तृतीयायां सर्पिर्घृतं चतुर्थ्यां श्राणा यवागूः ॥

CC-0. In Public Domain. Digitization by eGangotri

पंचम्यां हविष्यं मुद्गादि षष्ठ्यां हेमजलं प्रक्षालितसुवर्णजलं सप्तम्यामपूपं अष्टम्यां रुचकं बीजपूरफलं रुचको बीजपूर इत्यमरः नवम्यामंबुजलं दश म्यां धेनुमूत्रं एकादश्यां यवान्नं यवविकारं द्वादश्यां पायसं त्रयोदश्यां गुडमिक्षुविकारं चतुर्दश्यामसृक् रुधिरं पंचदश्यामन्नमुद्गान् अन्नमिश्रितमु द्गान् गुरुः अर्कपत्रं भवेद्धातुः प्रथमायां तु भक्षणं द्वितीयायां भवेद्धातुर्भक्ष्यं संततंडुलोदकं तृतीयायां तथा सर्पिर्यवागूस्यात्ततः परं पंचम्यां तद्धवि ष्यं स्यात्षष्ठ्यां वा कांचनोदकं अपूपभक्तिः सप्तम्यामष्टम्यां बीजपूरकं नवम्यां तोयपानं स्यान्नोमूत्रं तु ततः परं एकादश्यां यवान्नं स्याद्द्वादश्यां पायसं भवे त् त्रयोदश्यां गुडं लेह्यं रुधिरं स्याच्चतुर्दशे मुद्गौदनं भवेद्भोज्यं पंचदश्यां पियासत पक्षयोरुभयोरेवं यात्रायोगे विधिः स्मृत इति अत्र दुष्टभादिषु दोह दभक्षणेन दोषापाकरणं युक्तं धिष्ठिकाव्यर्थमिति चेन्न आवश्यकगमनेमः हा दोषाणामपि पापरिघदंडविरुद्धताशाक्रूरसाहित्यादीनां दोषवारणाय दो

भुक्त्वा व्रजेद्रुचकमंबु च धेनुमूत्रं यावान्नपायसगुडान्नसृगन्नमुद्गान् ८८ उद्धृत्य प्रथमत एव दक्षिणांघ्रिं द्वात्रिंश त्पदमभिगत्य दिश्ययानं आरोहेत्तिलघृतहेमताम्रपात्रं दत्त्वा दोगणकवराय च प्रगच्छेत् ८९ प्राच्यां गच्छेद्गजेनै व दक्षिणस्यां रथेन हि दिशि प्रतीच्यामश्वेन तथोदीच्यां नरैर्नृपः ९० देवगृहाद्वा गुरुसदनाद्वा स्वगृहान्मुख्यकलत्र

हदोक्तः सार्थकः स्यात् एवं विहितमिति दोहधाभिधानं योगिन्यादिदोषनाशार्थं वारदोहदोक्तिरपि वक्ति ग्रहवासरवारस्थूलादि ऽऽ गृहाद्वा ॥
दोषहान्या सार्थकाः ८८ अथ गमनसमये विधिप्रहर्षिण्याह उद्धृत्येति राजा गमनसमय एव प्रथमतो दक्षिणांघ्रिं दक्षिणचरणमुद्धृत्य पश्चात्।
द्वात्रिंशत्पदपरिमितां भूमिं गत्वा दिश्ययानं वक्ष्यमाणं हस्त्यादियानमारोहेत् तिलेति आरोहणसमय एव च तिलघृतहेमसहितं ताम्रपात्रमा दोगणक
वराय ज्योतिर्विच्छ्रेष्ठाय च कारात् अन्येभ्योपि ब्राह्मणेभ्यो यथाशक्ति दानं दत्त्वा प्रगच्छेत् ८९ अथ दिश्ययानमनुष्टुभाह प्राच्यामिति नरैर्नरवाह्यैः सु।
खासनादिभिः अन्यत्स्पष्टार्थं ९० अथ निर्गमस्थानानि पादाकुलकछंदसाह देवगृहादिति देवगृहाद्देवपूजागृहात् गुरोरध्यापकस्य गृहात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कुलगुरोर्वा स्वगृहात्स्वशयनगृहात् बहुस्त्रीत्वसंभवे मुख्यकलत्रगृहं पट्टराज्ञीगृहाद्वा हविष्यं प्राश्य भक्षयित्वा विप्रैर्ब्राह्मणैरनुमतः मंगलद्रव्यं मनोभीष्टं पश्यन् शृण्वन् सन् एयात् गच्छेत् ९१ अथ प्रस्थानवस्तु निवर्णक्रमात्स्रग्विण्याह कार्यादिति किंचिदावश्यकार्यं नाभूदिति चेद्गमनस्य विलंबः स्यात्तदा विधारितया चालग्ने ब्राह्मणादिभिरेतानि वस्तूनि आशु चालनीयानि यथा ब्राह्मणेनोपवीतं यज्ञोपवीतं क्षत्रियेणायुधं वैश्येन मधु शूद्रेणामलफलं नारिकेलादि राजमार्तंडः प्रस्थाने ब्राह्मणादीनां यत्तत्त्वमथायुधं मध्वामलफलं चैव प्रशस्तं वृद्धिकारणमिति वाऽथवा सर्वेषां वर्णानां यदेवेह प्रियं मनोभीष्टं तदेव प्रस्थापनीयं वसिष्ठः श्वेतातपत्रध्वजचामरांश्च विभूषणो स्त्रीगजांबराणि आंदोलिकारत्नरथाश्वचारान् शय्या

प्राश्य हविष्यं विप्रानुमतः पश्यन् शृण्वन् मंगलमेयात् ९१ कार्याद्यैरिह गमनस्य चेद्विलंबो भूदेवादिभिरुपवीतमायुधं च क्षौद्रं चामलफलमाशु चालनीयं सर्वेषां भवति यदेव हृत्प्रियं वा ९२ गेहाद्गेहांतरमपि गमनं तर्हि यात्रेति गर्गः सीम्नः सीमांतरमपि भृगुर्बाणविक्षेपमात्रं प्रस्थानं स्यादिति कथयते सौ भरद्वाज एवं यात्रा कार्या बहिरिह पुरात्स्याद्वसिष्ठोऽब्रवीति ९३ प्रस्थानमत्र धनुषां हि शतानि पंच केचिच्छतद्वयमुशंति दशैव चान्ये॥ ५

नाद्यं मनस्त्वभीष्टमिति ९२ अथ प्राच्यमतेन प्रस्थानपरिमाणं मंदाक्रांतयाह गेहादिति स्वगृहात्परगृहमपि समीपवर्त्यपि तत्रापि चेद्गमनं स्यात्तर्हि यात्रा जातेति गर्गः कथयते अथवा स्वसीमायुक्तं ग्रामसीमांतरं सीमां प्राप्य वसेदिति भृगुः कथयते अथवा महता योद्धा स्वबलेन क्षिप्यमाणः शरो यावद्दूरं गच्छति तावन्मात्रं प्रस्थानं स्यादिति भरद्वाजः कथयते अथवा पुरात् नगरात् बहिः यात्रा कार्येति वसिष्ठः कथयते ९३ अथ मुनिमतेन प्रस्थानपरिमाणं वसंततिलकयाह प्रस्थानमत्रेति धनुःप्रमाणं चतुः करः तादृशानां धनुषां पंचशतानि हस्तसहस्रद्वयमिति यावत् स्वगृहात्तावद्धस्तावधि प्रस्थानं स्यादिति केचिदूचुः अन्ये तु तादृशानां धनुषां शतद्वयं अष्टौ शतानि हस्तास्तावत्प्रस्थानमित्याहुः अपरे तु इह यात्राकाले मंदिरतः स्वगृहाद्दशैव धनूंषि चत्वारिंशत् हस्तास्तावत् दूरे प्रस्थितः प्रयातः

CC-0. In Public Domain. Digitization by eGangotri

एवंत्रेयमित्याहुः प्रस्थानं धनुषां पंचशतान्यथ शतद्वयं स्वदेवसदनाद्वापि दशभि प्रस्थितो हृतरतिवसिष्ठोक्तेः गंतव्यदिक्ष्विति तदपि प्रस्थाने प्रयतेन न
सावधानेन राज्ञा गंतव्यदिक्षु यस्यां दिशि गमनं चिकीर्षितं तद्दिगभिमुखं कार्यं गंतव्यदेशाभिमुख्ये प्रदेशे प्रस्थानमाहुः शुभदं नराणामिति राजमार्तं
डोक्तेः ९४ अथान्यदपि स्रग्धरयाह प्रस्थाने भूमिपाल इति भूमिपालो राजा प्रस्थाने दशदिवसमभिव्याप्य दशाहोरात्राणि न वसेत् सामंतो मांड
लिकश्चतुर्द्वारिकः एकत्र प्रस्थाने सप्तरात्रं न वसेत् तदितरमनुजो ब्राह्मणादिस्तथैव एकत्र प्रस्थाने पंचरात्रं न वसेत् यदि दैवाद्वसेत् तदा किं कुर्या
दित्यत आह ऊर्ध्वमिति अवधिदिवसातिक्रमानंतरं पुनर्गृहमागत्य शुभाहे पूर्वोक्तप्रकारेण विचारिते शुभदिवसे गच्छेत् कश्चिद्विशेषेण प्रस्था
नेदिवसानि यमोभिहितः राजमार्तंडः प्राच्यामहानि मुनयः प्रवदंति सप्त याम्यामतो वसुमदानि दिनानि पंच त्रीण्येव पश्चिमदिशि क्षितिनायकानां प्रस्था

संप्रस्थितो यद्गृहमंदिरतः प्रयातो गंतव्यदिक्षु तदपि प्रयतेन कार्यं ९४ प्रस्थाने भूमिपालो दशदिवसमभिव्या
प्यनैकत्र तिष्ठेत् सामंतः सप्तरात्रं तदितरमनुजः पंचरात्रं तथैव ऊर्ध्वं गच्छेच्छुभाहे प्यथ गमनदिनात्सप्तरात्राणि
पूर्वं चाशक्तौ तद्दिने सौ रिपुविजयमना मैथुनं नैव कुर्यात् ९५

नकेषु दिवसद्वयमुत्तरस्यामिति अथ प्रस्थानकर्तुर्नियममाह अथेति असौ राजादिः रिपुविजयमनाः शत्रुजयेक्ततांतः करणो यात्रादिनात्पू
र्वं सप्तरात्राणि मैथुनं संभोगं नैव कुर्यात् च्यवनः त्रिरात्रं वर्जयेत् स्त्रीरं पंचाहं क्षुरकर्म च तदहश्चावशेषाणि सप्ताहं मैथुनं त्यजेत् वा अथवा अ
शक्तौ सप्ताहमतिकामितया स्थातुमशक्तौ तद्दिने यात्रादिवसे मैथुनं नैव कुर्यात् गर्गः यात्राकाले तु संप्राप्ते मैथुनं यो निषेवते रोगार्तः क्षीणकेशश्च
सन्निवर्त्तेत वा न वेति यदा तु प्रथमदिने स्त्री ऋतुस्नाता भवति गमने चावश्यकता तत्र निर्णयमाह च्यवनः आत्ययिककार्यपाते पुष्पस्नातासमागमं कृ
त्वा सुदिनो गच्छन् लभते मनोरथान् चिरकालेनेति यदा पुनर्गमनार्थे कालांतरमस्ति तद्दिने मैथुनं कृत्वा कालांतरे सुलग्ने यायादित्यर्थः सिद्धं ९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु॰टी॰ अन्यदपिशालिन्याह दुग्धमिति अस्मिन्वासरेयात्रादिनेक्षौद्रं मधुभक्षत्वेन तैलंतैललापनंत्याज्यं वमिश्चदे वोद्भूतांशरीरशोधनार्थंबलात्कारकृ
या॰प्र॰ तांवायात्रादिनेनिषिद्धा ९६ अन्यदपिगीत्याह भुक्त्वेति यदितैलपक्वानिवृदकादीन्यन्नानि गुडमिक्षुविकारं क्षारंसलवणं पक्वमांसानियोभुक्त्वा
१०४ गच्छतिसराजानिरुग्णोरोगसहितोविनिवर्तते गर्गः कटुतैलगुडक्षारंपक्वमांसाशनंतथा भुक्त्वायोयात्यसौमोहात्व्याधितःसन्निवर्ततइति मांस
दुग्धादिनिषधोदोहदव्यतिरिक्तविषयः स्त्रीद्विजमिति स्त्रीचद्विजश्चतयोःसमाहारः स्त्रीद्विजमवमान्यधिक्शब्दताडनादिनामानभंगंकृत्वा
गच्छतः पुंसोमरणंस्यात् गर्गः यस्तुसंप्रस्थितोयात्रांभार्यांनैवाभिनंदति भार्यांवानाभिनंदेत्तनसप्राप्तिनिवर्तते परकीयायांवास्त्रियंपुरुषमेवचनाः
दूयित्वातुयोमोहात्तदंतंतस्यजीवितं यात्रायांप्रस्थितोयस्तुब्राह्मणानवमानयेत् नासौप्रतिनिवर्तेततदंतंतस्यजीवितं केचित्शुभाशुभशब्दान्यात्रा

दुग्धंत्याज्यंपूर्वमेवत्रिरात्रंक्षौरंत्याज्यंपंचरात्रंचपूर्वं क्षौद्रंतैलंवासरेस्मिन्वमिश्चत्याज्यंयत्नाद्भूमिपालेननूनं ९६
भुक्त्वागच्छतियदिचेत्तैलगुडक्षीरपक्वमांसानि विनिवर्ततेसरुग्णःस्त्रीद्विजमवमान्यगच्छतोमरणं ९७ यदिमाःसु
चतुर्षुपोषमासादिषुवृष्टिर्हि भवेदकालवृष्टिः॥ ११ कालेशुभाशुभसूचकाहुः लक्षः प्रापयगच्छविजयसनिर्गच्छ व्रजमुवसंसर्य
सिद्धिकराः खल्वेतेप्रमोदजयजीवशब्दाश्चमागास्तिष्ठनिवर्तक्वगम्यतेमूढदुर्मतेमोहात् यात्रानेच्छंतिबुधाः क्षुतकामितभीतशब्देश्चेति कासितं
रोगार्तध्वनिर्हिक्कादिः ९७ अथाकालवृष्ट्याख्यदोषंवसंततिलकयाह यदीति पोषमाघफाल्गुनचैत्रेषुचतुर्षुमासेषुयदिवृष्टिर्भवेत्ताःका राम॰
लवृष्टिः पोषादिचतुरोमासाःप्राप्तावृष्टिरकालजेतिवचनात् तत्राकालवृष्ट्याजातायांयदिवसुधापृथ्वीयावत्पशवोगवादयः मर्त्यामनुष्यादयस्ते। १०४
षांपदेश्चरणैरंकिताचिह्नितानभवतितावदकालवृष्टेर्दोषोनास्तियदिपशुचरणांकितास्यात्तदादोषोस्त्येव अत्रप्राच्याः अ स्यवृष्टेःकर्दमादिबाहुल्या
त् अत्यल्पावृष्टिर्दोषायनमहतीतिवदंति तत्रबहुवृष्ट्याकर्दमायाकरणात् तत्र स्थितादोमार्गशीर्षस्यप्रतिपद्दिवसेतथा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वाषाढागते चंद्रे गर्भाणां धारणं भवेदिति कश्यपोक्ते मार्गादिमासगर्भग्रहणकालस्तत्र वृष्टिरावश्यकी यदाह वराहः पवनसलिलविद्युत् गर्जिताभ्रा
न्वितोयः सभवति बहुतोयः पंचरूपस्तु मेघ इति ततश्च गर्भग्रहणयोग्या अल्पा वृष्टिर्न दोषदा महती वृष्टिस्तु गर्भगलनं यतो वाराहेणोक्तं गर्भस्रा
मयेऽति वृष्टिर्गर्भाभावाय निमित्तकृतेति निमित्तं शुक्रास्तादिकं सा विकृतिः विद्युतिरूपधीयमाना दोषमुपधिनुयात् एता महावृष्टेरेव दोषवत्वं अ
त एव भृशं स्रस्तो जलदान शस्ता इति बृहद्यात्रायामुक्तं तस्मादन्यत्यायामकालवृष्टौ दोषाभावः अल्पायां त्वल्पदोषः महत्यां तु महादोष इति सच प्रा
प्तानि काइत्युक्तं प्राक् एकेनैकमहः प्रोक्तं द्वितीयेन त्रिरात्रकं तृतीयेन तु पंचाहं दशरात्रमतः परं पौषे तु त्रिदिनं वर्ज्यं माघमासे दिनद्वयं फाल्गुने दि
नमेकं तु चैत्रे तु घटिकाद्वयमिति तु आवश्यककार्यविषयं ९८ पूर्वोक्तमेवार्थं स्पष्टीकुर्वन्नावश्यकयात्रायां तच्छांतिकं दुष्टशकुनशांतिकं चातिश

पश्चमन्ये पदातिकिं तान यावद्भुसुधास्यान्नहि तावदेव दोषः ९८ अल्पायां वृष्टौ दोषोल्पो भूयस्यां दोषो भूयान् जीमू
तानां निर्घोषे वृष्टौ वा जातायां भूयः स्पृये द्वौ बिंबे सौवर्णे कृत्वा विप्रेभ्यो दद्यात् दुःशाकुन्ये सा ज्यं स्वर्णं दत्वा गच्छेत् स्वे
च्छाभिः ९९ विप्राश्वेभफलान्नदुग्धदधिगोसिद्धार्थपद्माम्बरवेश्यावाद्यमयूरचाषनकुलावध्वैकपश्वामिषं ॥

क्तयोगाथाच्छंदसाह अल्पायामिति स्पष्टार्थः प्रथमचरणं अतोयन्याच्या पठंति तावत्प्रयाणादि शुभपती नामकालवृष्टिः प्रकरोति दो
षं यावद्द्वेस्संचरतां जनानां तथा पश्चनांचरणांकिताभूरिति तन्निर्मलत्वादुपेक्ष्यं स्वयं प्रस्थाने सति मार्गमध्ये नास्त्ययं दोषः आवश्यकयात्रा
यां दानमाह जीमूतानामिति जीमूतानां मेघानां निर्घोषशब्दे अकालवृष्टौ वा जातायां सूर्ये द्वौ यथाशक्त्या सौवर्णनिर्मिते बिंबे कृत्वा ब्राह्मणेभ्यो दद्या
ततः स्वेच्छया गच्छेत प्रसंगाद्दुष्टशकुनानां दानमाह दुःशाकुन्ये इति शकुनस्वभावः शाकुन्यं दुष्टं च तच्छाकुन्यं च दुःशाकुन्यं तस्मिन् दुष्टे शकुन
प्रस्थानकाले संभूते सति साज्यं सघृतं स्वर्णं विप्रेभ्यो दत्वा स्वेच्छाभिर्गच्छेत् ९९ अथ शुभसूचकशकुनान् शार्दूलविक्रीडितेनाह विप्राश्वेति विप्रा बहवो द्वौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वानत्वेकः अश्वः प्रसिद्धः इभोहस्ती अनुन्मत्तः फलान्नदुग्धदधीनि प्रसिद्धानि गोः धेनुः सिद्धार्थः सर्षपाः पद्मं कमलं अंबरं वस्त्रं स्वच्छं वेश्यागणिका वाद्यमर्दलादि मयूरचाषौ पक्षिणौ नकुलः प्रसिद्धः बध्वैकपशुः रज्ज्वादिना बद्धो वृषादिः आमिषं मांसं सद्वाक्यं कार्यसिद्धिरस्त्वित्यादिकं कुसुमानि चंपकादीनि इक्षुः प्रसिद्धः सकलः नतु खंडितः जलपूर्णकलशः संमुखः छत्रं प्रसिद्धं मृत्तिका कन्या कुमारी रत्नं माणिक्यादि उष्णीषं शिरोवेष्टनं सितोक्षः श्वेतवृषः अयमबद्धोपि मद्यं प्रसिद्धं ससुतस्त्री सपुत्रा स्त्री दीप्तो जाज्वल्यमानोग्निरिति १०० अन्यच्छार्दूलविक्रीडितेनाह आदर्शांजनेति आदर्शो दर्पणं अंजनं कज्जलं धौतवस्त्र उज्वलीकृतवस्त्रो रजकः वस्त्रनिर्णेक्ता मीनो मत्स्यः आज्यं घृतं सिंहासनं देवादेः शवमेव शावं मृतकं पृष्ठगामि लोकरोदनरहितं ध्वजः पताका मधु क्षौद्रं छागो मेषः असुं धनुरादि गोरोचनं प्रसिद्धं भारद्वाजः पक्षी नृपा

सद्वाक्यं कुसुमेक्षुपूर्णकलशाश्छत्रं च मृत्कन्यका रत्नोष्णीषसितोक्षमद्यससुतस्त्रीदीप्तवैश्वानरं १०० आदर्शांजनधौतवस्त्ररजकामीनाज्यसिंहासनं शावं रोदनवर्जितं ध्वजमधुच्छागास्त्रगोरोचनं॥ ॥ १ ॥ ॥

नं सुखासनादि वेदनिनादो वेदध्वनिः मांगल्यं प्रसिद्धं गीतं गानं अंकुशो हस्तिनिवारणार्थमस्त्रं एते पदार्था गंतुर्भूपतेः प्रयाणसमये संमुखं दृश्यमानाः सत्फलदाः शुभफलदाः तथा रिक्तो जलरहितो घटः कुंभः स्वानुगः स्वस्य पश्चाद्भागगामी सोपि शुभफलदः कश्यपः कार्यसिद्धिर्भवेद्दृष्टे शावे रोदनवर्जिते प्रवेशे रोदनयुतः शवः स्यात्तु शिवप्रदः वसंतराजः आदाय रिक्तं कलशं जलार्थी यदि व्रजेत्कोपि सहाध्वगेन पूर्णं समादाय निवर्तते सौ यथा कृतार्थः पथिकस्तथैवेति अथ केचिल्लग्नवशेन शकुना उक्ताः लग्ने वाक्पतिशुक्रयोर्ब्राह्मणः संमुखा स्त्रियः बुधशुक्रौ च केंद्रस्थौ सवत्सा गौः प्रदृश्यते चंद्रः सूर्यश्च भवति दशमस्थो यदाथवा दीपादर्शौ सुमनसोः रजको धौतवाससा सुतस्थाने यदा सौम्ये वृषो बद्धस्तु संमुखः चंद्रो गुरुश्च सहजे श्वानो वामांगभागतः सर्वैकर्मायनवमे भारद्वाजोथ नाकुलः चाषस्य दर्शनं वास्याद्वामांगेत्यंतदुर्लभं॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदित्योराहुसौरी च सहजस्थो कुमारिकां प्रौढानां सुभगानां वा दर्शनं सर्वकामदं षष्ठे तृतीये कर्मायेभौमश्चत्तत्फलं भवेत् दास्यो वैश्याः सुरामांसं लाभश्चै वसुनिश्चितः सप्ताष्टपंचमेयस्यजीवो ज्ञो वात्र वर्त्तते आदर्शश्च लाभदः राहुर्भौमश्च मंदश्च लग्नाद्यदि तृतीयगः उद्धृतगोमयंपश्येच्छीघ्रं लाभं धनं दिशेत् इत्यादयः शकुनाः शकुनग्रंथेभ्योज्ञेया विस्तरभयादिह नोक्ताः १०१ अथापशकुनान् शार्दूलविक्रीडितेनाह वंध्येति वंध्या प्रसिद्धा चर्मप्रसिद्धं तुषं धान्यादितुष अस्थिसर्पलवणानि प्रसिद्धानि अंगारो निर्धूमोग्निपिंडः इंधनं पाकयोग्यं क्लीबः षंढः विट् उद्धृता विष्ठा अस्त्री विष्ठाविषौ समावित्यमरः तैलं प्रसिद्धं उन्मत्तो मद्यभूताद्यावेशवान् वसा शरीरांतर्धातुविशेषः औषधं प्रसिद्धं अरिः शत्रुः जटिलो जटावान् प्रव्राट् सन्यासी।

भारद्वाजनृयानवेदनिनदामांगल्यगीतं कुशा हृष्टाः सत्फलदाः प्रयाणसमये रिक्तो घटः स्वानुगः १०१ वंध्याचर्मतुषा।
स्थिसर्पलवणांगारेंधनक्लीबविट्तैलोन्मत्तवसौषधारिजटिलप्रव्राट्तृणव्याधिताः नग्नाभ्यक्तविमुक्तकेशपतितानायं
गक्षुधार्तोसृक्स्त्रीपुष्पंसरटः स्वगेहदहनंमार्जारयुद्धंक्षुतं १०२ कषायीगुडतक्रपंकविधवाकुब्जाः कुटुंबेकलिर्वे
स्त्रादेस्स्खलनंलुलायसमरंकृष्णानि धान्यानि च॥

तृणं प्रसिद्धं व्याधितोऽचिकित्स्यव्याधिमान् नग्नः अपरिहितवस्त्रः कुमारव्यतिरिक्तः अभ्यक्तः कृततैलाभ्यंगोस्नातः विमुक्तकेशः असंयतकेशः पतितो मद्यपानाद्यभिशापवान् व्यंगश्छिन्ननासिकादिः क्षुधार्तः क्षुत्पीडितः असृक् रुधिरं स्त्रीणामृतुः शरटः कृकलासः स्वगेहदहनं स्वगेहेऽग्निदाहः मार्जारयुद्धं प्रसिद्धं क्षुतं छिक्का १०२ अन्यदपि शार्दूलविक्रीडितेनाह कषायीति कषायो रागविशेषः तेन रक्तवस्त्रं काषायं तद्वान् गुडतक्रे प्रसिद्धे पंकः कर्दमः विधवाकुब्जौ प्रसिद्धौ कुटुंबे कलिः पुत्रादिभिः कलहः वस्त्रादेः आदिशब्देन कमंडलुछत्रादेः स्खलनं निर्मितं स्वहस्तात्पतनं लुलाया महिषास्तेषां समरं युद्धं कृष्णवर्णानि धान्यानि माषादीनि कार्पासं तुलं वमनं वांतं दक्षे दक्षिणभागे गर्दभः शब्दः अतिरुतं क्रोधाधिक्यं गर्भिणी गर्भवती मुंडो मुंडितशिरस्कः आर्द्रांबर आर्द्रवस्त्रः दुर्वचः स्वमुखोत्थं प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रमुखोत्थं वा दुष्टवाक्यं अंधबधिरौ प्रसिद्धौ उदक्या रजस्वला स्त्री एते पदार्था गंतुः पुंसः यानसमये दृष्टाः संतो न शुभाः किंतु अशुभफलाः नारदः ॥ सर्वदिक्षु क्षुतं नेष्टं गोक्षुतं मरणप्रदं अफलं तत्क्षुतं वाक्यं वृद्धपीनसकेतवैरिति औषधे यानमारोहे विवादे शयने ऽशने विद्यारंभे बीजवापे क्षुतं सप्त शुशोभनमिति १०३ अथान्यच्छकुनं शार्दूलविक्रीडितेनाह गोधाजाहकेति गोधा प्राणिविशेषस्तत्र गोहइति भाषया जाहका गात्रसंकोची प्राणिविशेषः सूकरः प्रसिद्धः अहिः सर्पः शशकः प्रसिद्धः यानसमये एषां गोधादीनां कीर्तनं स्वमुखेनान्यमुखेन वोच्चारणं शुभं चेत्पुनरेतेषां गोधादीनां शब्दो रुतं अथवा विलोकनं दर्शनं निषिद्धं कपिऋक्षाणां कपीनां वानराणां ऋक्षाणां भल्लूकादीनामतो गोधादिभ्यो व्यत्ययो ज्ञेयः यथा वानराणां भल्लूकानां कीर्तनं निषिद्धं तेषामेव दर्शनं शब्दितं वा न निषिद्धं शुभमित्यर्थः नद्युत्तार इति नद्यागंगादेरुत्तारणे भयभयसंबंधिनी कार्ये पलायनादिके प्रवेशे

कार्पासं वमनं च गर्दभरवो दक्षेतिरुद्गर्भिणीमुंडार्द्राबरदुर्वचोंधबधिरोदक्या न दृष्टाः शुभाः १०३ गोधाजाहकसूकराहिशशकानां कीर्तनं शोभनं नो शब्दो न विलोकनं च कपिऋक्षाणामतो व्यत्ययः नद्युत्तारभयप्रवेशसमरे नष्टार्थसंवीक्षणे व्यत्यस्ताः शकुना नृपेक्षणविधौ यात्रोदिताः शोभनाः १०४ वामांगे कोकिलापल्लीपोतकीसूकरीरला पिंगलछुछुकाश्रेष्ठाशिवा पुरुषसंज्ञिता १०५॥ ॥गृहप्रवेशे समरे संग्रामे नष्टार्थस्य नष्टद्रव्यस्य संवीक्षणे गवेषे प्रागुक्ताः शकुनाः व्यत्यस्ता विपरीता ज्ञेयाः शुभशकुना विप्राश्वेत्यादयो ऽशुभा ज्ञेयाः वंध्याचर्मेत्याद्यशुभशकुनाः शुभफलदा ज्ञेयाः नृपेति नृपदर्शनार्थं गमने यात्रायामुदिता विप्राश्वेत्यादयः शुभा ज्ञेयाः नृपावलोकने शकुनः प्रयाणवदित्युक्तो राजदर्शनस्य भयस्थानत्वादपवादोयं १०४ अथान्यदप्यनुष्टुभाह वामांगे इति कोकिला पल्ली प्रसिद्धौ पोतकी दुर्गेति सूकरी जात्यवटिका रला पक्षिविशेषः पिंगला भैरवी छुछुका छुछुंदरी शिवा सृगाली पुरुषसंज्ञिता पुंनाम्नः कपोतखंजनतित्तिरीहंसादयः एते गच्छतां राजादीनां वामांगे वामभागे शस्ताः स्युः १०५॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यदप्यनुष्टुभाह छिक्कर इति छिक्करो मृगजातिः पिक्कः पक्षिविशेषः भासः श्रीकंठः वानरः एते प्रसिद्धाः रुरुर्मृगविशेषः स्त्रीसंज्ञकाः स्त्रीना
म्नामृगपक्षिणः दक्षिणभागगाः शुभाः शेषाः प्रसिद्धाः १०६ अथोक्तव्यतिरिक्तानांमृगपक्षिणांसामान्यतः प्रादक्षिण्येन शकुनमनुष्टुभाह प्रदक्षि
णगता इति रुरुव्यतिरिक्ता मृगाः पक्षिणश्च यात्रायां प्रादक्षिण्येन गताश्चलिताः श्रेष्ठाः शुभफलदाः स्युः परं तु ओजा मृगा विषमसंख्यास्त्रिपंचसप्ताद
यश्चेद्व्रजंतो दृष्टास्तदातिधन्याः स्युः वामे इति स्ववामभागे खरस्वनो गर्दभशब्दोतिधन्यः अथ शकुनानां कियता कालविशेषेण नैर्बल्यमाह वराहः नग्रा
म्यारण्यगो ग्राह्यो नारण्ये ग्रामसंस्थितः दिवाचरो न शर्वर्यां न च नक्तंचरो दिवा द्वंद्वरोगार्दितत्रस्तकलहामिषकांक्षिणः आपगांतरिता मत्ता न ग्राह्याः श
कुनाः क्वचित् रोहिताश्वाजवालेयकुरंगोष्ट्रमृगाः शशाः निष्फलाः शिशिरे ज्ञेया वसंते काककोकिलौ नतु भाद्रपदे ग्राह्याः शूकराश्ववृकादयः शरद्या

छिक्करः पिक्को भासः श्रीकंठो वानरो रुरुः स्त्रीसंज्ञकाः काकऋक्षाश्वानः स्युर्दक्षिणाः शुभाः १०६ प्रदक्षिणगताः
श्रेष्ठा यात्रायां मृगपक्षिणः ओजा मृगा व्रजंतोतिधन्या वामे खरस्वनः १०७ आद्येऽपशकुने स्थित्वा प्राणानेकादश व्रजे
त्॥

क्षाद गोक्रौंचाः श्रावणे हस्तिचातकौ व्याघ्रर्क्षवानरद्वीपिमहिषाः सबिलेशयाः हेमंते निःफला ज्ञेया बालाः सर्वे विमानुषा इति प्रभ
ग्नशुष्कद्रुमकंटकी श्मशानभस्मास्थितुषाकुलेषु प्राकारशून्यालयजर्जरीषु सोम्योपि पापः शकुनः प्रकल्प्यः दैवज्ञमनोहरे वरं श्रये द्दुर्जनका
लसर्पौ वरं क्षिपेद्व्याघ्रमुखे स्वमंगं वरं नरेद्वारि निधिं भुजाभ्यां नोल्लंघयेद्दुःशकुनं कदापि १०७ अथावश्यककार्ये विरुद्धशकुने जाते परिहारमनुष्टु
भाह आद्य इति आवश्यककार्ये विरुद्धशकुने जाते एकादश प्राणान् स्थित्वा एकादशप्राणपरिच्छेद्यं कालं स्थित्वेत्यर्थः ततः समीचीने शकुने
व्रजेत् तत्रापि विरुद्धे शकुने संवृत्ते षोडशसंख्याकान् प्राणान् स्थित्वा शुभशकुने व्रजेत् तत्रापि पुनस्तृतीये विरुद्धे शकुने संवृत्ते क्वचिदपि न व्रजेत् ॥
किंतु स्वगृहमागच्छेत् दशगुर्वक्षरैः प्राण इति कश्यपेन तु प्राणायामत्रयमेव प्रतीक्ष्यमित्युक्तं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यायीक्लिष्टं शकुनमादौ हृष्टा प्रयत्नतः प्राणायामत्रयं कुर्याद्द्वितीये द्विगुणं चरेत् तृतीये पुनरावृत्त्य शांत्या यायाद्दिनांतर इति १०८ अथ यात्रानिवृत्तौ गृहप्रवेशमुपजात्याह यात्रानिवृत्ताविति मृदूनि चित्रानुराधामृगरेवत्यः ध्रुवाणि रोहिण्युत्तराश्च एभिर्नक्षत्रैः राज्ञो यात्रानिवृत्तौ प्रवेशनं शुभदं क्षि॰ प्रचरैर्नक्षत्रैः अश्विनीपुष्यहस्ताभिजिद्भिः श्रवणधनिष्ठाशततारापुनर्वसुस्वातीभिश्च प्रवेशने पुनरपि गमो यात्रा स्यात् तस्मादेतानि मध्यमानि द्वीशादिनक्षत्रे षु प्रवेशे क्रमात्स्त्र्यादीनां नाशः यथा विशाखायां प्रवेशे स्त्रियो रक्ष्या नाशः कृत्तिकायां प्रवेशे गृहनाशो गृहदग्धं स्यात् दारुणभे मूलज्येष्ठार्द्राश्लेषासु प्रवेशे पुत्रस्य नाशः उग्रभे पूर्वात्रयभरणीमघासु प्रवेशे आत्मनः स्वस्यैव राज्ञो नाशः स्यादित्यर्थः लग्नादिविचारो गृहप्रवेशप्रकरणात् ज्ञेयः अन्नेदं विचार्यं यत्र मासे यात्रा कृता तन्मासान्नवमे मासि यात्रादिनान्नवमे दिने च प्रवेशो न विधेयः गुरुः निर्गमान्नवमे मासि प्रवेशो नैव शो

द्वितीये षोडश प्राणांस्तृतीये न क्वचिद्व्रजेत् १०८ यात्रानिवृत्तौ शुभदं प्रवेशनं मृदुध्रुवैः क्षिप्रचरैः पुनर्गमः द्वीशोऽनले दारुणभे तथोग्रभे स्त्रीगेहपुत्रात्मविनाशनं क्रमात् १०९ अयनर्क्षमासतिथिकालवासरोद्भवशूलसंमुखसितज्ञदिक्प॥

भनः नवमे दिवसे चैव प्रवेशो नैव कारयेदिति १०९ अथ विवाहप्रकरणोक्तदोषातिदेशं प्राग्युक्तदोषाश्च शिष्याणामविस्मरणार्थं मंजुभा॰ षिण्याह अयनर्क्षेति एते अयनशूलादयो दोषा विवाहप्रकरणोक्तदोषाश्च यात्रायां नेष्टाः तत्रायनशूलः सौम्यायने सूर्ये विधूनदोत्तरमिति मा सोद्भवः शूलो द्विविधः ग्रंथांतरोक्तः वृषादित्रित्रिराशिवर्के प्राच्यादिदिक्षु न गंतव्यमित्येकः कपाटकंटकादिश्च द्वितीयः स्वरोदये त्रयस्त्रयो वृषा॰ द्याश्च पूर्वाशादिषु धैः क्रमात् राशयो द्वादशैवं तु मेषांताः सृष्टिमार्गतः यत्र पूर्वादिकाष्ठायां वृषराश्यादिगो रविः सा दिशा शूलमिता ज्ञेया स्तिस्रः शेषाः सहोहिता इति कपाटकंटकादिर्यथा कपाटं पूर्वतो ज्ञेयं कार्त्तिकादित्रिकं तथा नभस्यतो वा सुमधोरेकेन कंटक इति ज्योतिषार्कवचनात् नक्षत्रशू लः नपूर्वदिशि शक्रभेन विधुसौरिवारे तथेति तिथिशूलः योगिनी नवभूम्य इति संमुखसितज्ञदिक्पाः संमुखः शुक्रः संमुखो बुधः संमुखो दि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुस्वामीललाटी भृगुवक्रनादि आदिशब्दात् क्षीणत्वास्तमितत्वपराजितत्वबाल्यादिकं वक्रास्तनीचेत्युक्तं परिघाख्यदंडः पूर्वादिषुचतुर्दिक्ष्वित्यु
क्तः स्वऋतुजाद्यशौचं स्वस्त्रीऋतुजं आर्तवस्नानकालपर्यंतं आशौचंजननाशौचंमरणाशौचंच उत्सवोदीपोत्सवः आदिशब्देनविवाहव्रतबंधादि
रिति ११० अन्यदपिमंजुभाषिणीछंदसाह मृतपक्षेति मृतः पक्षः तमोभुक्तताराः स्मृताविश्वसंख्याइत्याद्युक्तः रिक्तरविनर्कसंख्यकाः चतुर्थीनवमी
चतुर्दशीद्वादशीषष्ठ्यस्तिथयः उपलक्षणत्वादष्टमीपूर्णिमामावास्याशुक्लप्रतिपदः सौरिभौमरविवाराः वामपृष्ठगविधुः अजवृषभमिथुनकुलीरइ
त्यादिजातकोक्त्यावामपृष्ठराशिगतः आडलोरेवेभेनोजेभोन्मितिरिति क्रमणमपिज्ञेयं वसुपंचकंधनिष्ठोत्तरार्द्धान्यंचनक्षत्राणि अभिजिन्मुहूर्तश्चदक्षिणे

भृगुवक्रतादिपरिघाख्यदंडकस्वऋतुजाद्यशौचमपिचोत्सवादिकं ११० मृतपक्षरिक्तरविनर्कसंख्यकास्तिथयश्चसौरि
रविभौमवासराः अपिवामपृष्ठगविधुस्तथाडलोवसुपंचकाभिजिदथापिदक्षिणे १११ लग्नेजन्मर्क्षतन्वोर्मृतिगृह
महितर्क्षौ च षष्ठं तदीशावालग्नेकुंभमीनर्क्षनवलवतनूचापिपृष्ठोदयंच पृष्ठाशामृक्षसंस्थंदशमशनिरथोसप्तमेचा
पिकाव्यः केंद्रेवक्राश्चवक्रीग्रहदिवसविवाहोक्तदोषाश्चनेष्टाः ११२ इतिमुहूर्तचिंतामणौयात्राप्रकरणंसमाप्तं ११॥

वर्ज्याएतेपंचांगदोषाः १११ अथलग्नदोषान्स्रग्धरयाह लग्नेइति जन्मराशेर्जन्मलग्नाद्वाऽष्टमगृहे अहितर्क्षौ शत्रुजन्मराशेर्जन्मलग्नाद्वाषष्ठं जन्म
लग्नंयात्रालग्नेतदीशाः तेषांजन्मराशिजन्मलग्नाभ्यामष्टमभवनयोः स्वामिनः रिपुजन्मराशिजन्मलग्नाभ्यांषष्ठभवनयोः स्वामिनोर्वायात्रालग्ने कुं
भमीनयोर्नवलवोनवांशंलग्नंच पृष्ठोदयागोजाश्विकर्किमिथुनाः समृगानिशाख्याः पृष्ठोदयाविमिथुनाइत्याद्युक्ताः पृष्ठाशासंस्थमृक्षंगतव्यादिवि
लोमलग्नं दशमेशनिः सप्तमेकाव्यः शुक्रः केंद्रेवक्राः वक्रिणोग्रहाः वक्रिग्रहवाराश्च एतेदोषाः विवाहोक्तदोषाः उत्पातान्सहपातदग्धतिथि
भिरित्याद्युक्ताः तेसर्वेयात्रायांवर्ज्याः तत्रसप्तमशुक्रव्यतिरिक्तोजामित्रदोषोनास्तीतिज्ञेयं ११२ ॥इतिप्रमिताक्षरायांयात्राप्रकरणंसमाप्तं ११ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथवास्तुप्रकरणं व्याख्यायते गृहनिर्माणप्रयोजनं भविष्यपुराणे गृहस्थस्य क्रियाः सर्वा न सिध्यंति गृहं विना यतस्तस्माद्गृहारंभप्रवेशसमयौ ब्रुवे गृ
हं स्वसतां कं न सिध्यंति निःफला भवंतीत्यर्थः इत्याद्यर्थं मनस्यालोच्य ग्रामादिषु स्वस्य शुभाशुभं लाभालाभादिविचारं शार्दूलविक्रीडितेनाह यद्भमिति
नामभात् व्यावहारिकनामभात् व्यावहारिकनामराशेर्वृश्चिकाख्या यस्य ग्रामादेर्भं यथा चरणाद्रिसंज्ञको ग्रामराशिः मीनाख्यः स चेद्द्वितीयो नवमः पंचमः
एकादशं सख्योदशमश्च स्यात्तदा सो ग्रामः स्वस्य शुभः स्यात् अन्यथा न शुभ इत्यर्थः यथा नीलकंठराशेर्वृश्चिकाख्यात्तत्पंचमो मीनराशिश्चरणाद्रेस्तश्चरणाद्रि
नीलकंठस्य वासयोग्यः नामर्क्षे उक्तं च अत्र नामराशेरेव ग्राह्यः काकिण्यां वर्गशुद्धौ च वादे द्यूते स्वरोदये मंत्रे पुनर्भूवरणे नामराशेः प्रधानतेति अथ ग्रामा
त्मनोरुत्तमर्णाधमत्वं चाह स्ववर्गमिति वर्गास्तु अकचटतपयशवर्गाः खगेशमार्जारसिंहश्वनां सर्पाखुमृगावीनां निजपंचमवैरिणामष्टौ इत्युक्ता तत्र यस्य पुंसो

यद्भं द्व्यंकसुतेशदिङ्मितमसौ ग्रामः शुभो नामभात्स्ववर्गं द्विगुणं विधाय परवर्गाढ्यं गजैः शेषितं काकिण्यस्त्वनयोश्च तद्विवरतो यस्या
धिकाः सोर्थदोथद्वारं द्विजवैश्यशूद्रनृपराशीनां हितं पूर्वतः १॥ ॥ यत् संख्याको वर्गो गरुडादिस्तद्वर्गसंख्यां द्विगुणं विधाय परस्य ग्रामादेर्वर्गसं
ख्यया ढ्यां चकृत्वा तेरष्टभिः शेषितमवशिष्टं ताः पुंसः काकिण्यो ज्ञेयाः एवं ग्रामादेरपि वर्गसंख्यां द्विगुणीकृत्वा परस्य पुंसो वर्गसंख्यया ढ्यां कृत्वा गजैर्भजेदवशि
ष्टाः ग्रामस्य काकिण्यो भवंति एवं अनयोः पुरुषग्रामयोः काकिणीनां विवराद्यस्याधिका अवशिष्यंते सोर्थदः परस्य लाभदः यथा नीलकंठस्य वर्गः सर्पः तत्सं
ख्या ५ द्विगुणः १० चरणाद्रिर्वर्गः सिंहः ३ तत्संख्यया युक्ता १३ गजभक्तावशेषं ५ नीलकंठस्य काकिण्यः एवं ग्रामवर्गसंख्या ३ द्विगुणा ६ नीलकंठवर्ग ५ संख्यया यु
क्ताः ११ अष्टभक्ताशेषं ३ ग्रामस्य काकिण्यः द्वयोरंतरशेषं २ नीलकंठस्याधिकत्वेन दातृत्वाद्द्रव्यहानिरित्यर्थः उक्तं च स्ववर्गं द्विगुणीकृत्य परवर्गेन योजयेत् अ
ष्टभिस्तु हरेद्भागं योधिकः स ऋणी भवेदिति अथ द्वारवेशनमाह अथेति द्विजादिराशीनां पुंसां क्रमेण पूर्वतः प्राच्यादिदिक्चतुष्टये द्वारं हितं यथा द्विजराशीनां क
र्कवृश्चिकमीनानां पूर्वदिशि वैश्यराशीनां वृषकन्यामकराणां दक्षिणदिशि शूद्रराशीनां मिथुनतुलाकुंभानां पश्चिमदिशि नृपराशीनां मेषसिंहधनुषां उत्तरदिशि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथराशिपरत्वेनग्रामनिवासेनिषिद्धस्थानानिवसंततिलकयाह गोसिंहेति वकुमिष्टस्यग्रामस्यवस्त्वविभागवन्नवधाविभागंकृत्वामध्येविभागेगोसिंह
नक्रमिथुनेननिवसेत् वृषसिंहमकरमिथुनराशिमंतः पुरुषानवसेयुः अथपूर्वककुभः पूर्वदिशातोष्टदिग्गतोष्टदिक्षु अलिर्वृश्चिकः तदादिराशिमंतः
पुरुषानवसेयुः यथा पूर्वस्यांवृश्चिकः आग्नेय्यांझषोमीनः दक्षिणस्यांकन्या नैर्ऋत्यांकर्कः पश्चिमायांधनुः वायव्यांतुला उत्तरस्यांमेषः ईशान्यां
कुंभः नवसेदित्यर्थः यथा अवर्गःपूर्वस्यां कवर्गआग्नेय्यां चवर्गोदक्षिणस्यां टवर्गोनैर्ऋत्यां तवर्गःपश्चिमायां पवर्गोवायव्यां य
वर्गउत्तरस्यां शवर्गईशान्यां बलीइत्यर्थः कीदृशः वर्गाः स्वपंचमपराः स्वस्मात्पंचमःपरःशत्रुर्येषांते यथा अवर्गः पूर्वस्यांबलीअनेनपश्चिमायां
द्वारंनिवासोनविधेयः एवंकवर्गादीनामपिवायव्यादौद्वारंनिवासोवानविधेयः २ अथेष्टनक्षत्रायाभ्यांइष्टभूस्याविस्तारयाममिंद्रवज्रेद्रवंशयापूर्वा

गोसिंहनक्रमिथुनंनिवसेन्नमध्येग्रामस्यपूर्वककुभोलिझषौगनाश्च कर्कोधनुस्तुलभमेषघटाश्चतद्वद्वर्गाः
स्वपंचमपराबलिनःसुरेज्याः २ एकोनितेष्टसहृताद्वितिथ्योरूपोनितेष्टायहतेंदुनागैः॥ ॥ ॥

र्धेनाह एकोनितेति खेष्टायेतिच तत्रराशिकूटादिदंपत्योरिवचिंतयेदितिवसिष्ठोक्तेः यदेवनक्षत्रंव्यवहारनाम्नाविवाहोक्तमेलापकविधिनाशुभदं
स्यात् तदेवक्षेत्रेष्टभंकल्प्यं यश्चध्वजाद्यष्टायेविषमआयइप्सितःसात्सएवेष्टायःकल्प्यःताभ्यांविस्तारयामज्ञानं यथा नीलकंठस्यानुराधानक्षत्रं
तस्यरोहिण्यासहमेलापकःसंभवतीतीष्टभंरोहिणीकल्पितं तत्संख्या ४ एकोनितेष्टर्क्षं ३ अनेनद्वितिथ्यो १५२ हताः ४५६ इष्टायःसिंहःकल्पितःतृती
यः रूपोनितइष्टायः २ अनेनेंदुनागाः ८१ गुणिताः १६२ युताः ६१८ घनेश्वा १७ युताः ६३५ भूपाश्विभि २१६ विभक्तःशेषे २०३ इदं मीमेवक्षेत्रफलं गृ
हस्यइष्टायनक्षत्रभवं अथकल्पितदैर्घ्यं २९ अनेनभक्तेलब्धोविस्तारः ७ अथकल्पितविस्तृतिः ७ भक्तोलब्धंदैर्घ्ये २९ अत्रगोपीराजाचार्येकृतंस्
त्रे विष्णुव्येकायगोभू १९ हतिभयुजिफलंगोपिराजोभशेषात्सायंवेष्टाश्विदिग्घ्ना २१६ युतमहि ८ हताहकू २ प्रकृत्या २१ स्वविश्वे १३॥बाणाः ५ सिद्धा २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टि १६ नागो ८ द्रू २७ तिथ्यतिः १९ गिरिशा ११ त्र्या ३ कृती २२ इ २४ तु ६ तत्वा २५ त्यष्टं २७ क ९ क्ष्मा १ नखे २० नाग्र्र्णव ४ विकृति २३ दिना १५ ग्न्या ७ कृतीर्दे मेंदु १८ काष्टा १०॥ गोपीराजः कथयति गोभूहतिभयुजिसतिविलं अहिहताद् कुप्रकृत्याख्यविश्वादयः फलं आह विगतः एको यस्मात्स व्येकः सचा सो आयश्च व्येकायः ध्वजादिरिष्टायः सच गोभुवश्च एषां परस्परगुणानां व्येकायगोभूहति श्च भं व्येकायगोभूहतिभेन योयुक् व्येकायगोभूहतिभ युक् तस्मिन्हतिभशेषात भैः २७ भक्ते सति यच्छेषं तस्माद्विगुनामानं शिष्टं अहिहता अष्टगुणिताद् कु द्वौ प्रकृत्याख्या एकविंशतिः विश्वे त्रयोदश इ त्यादयो गृहक्षेत्रफलं सायं इष्टायसहितं आह वदति अत्रोदाहरणं इष्टायः ३ व्येकः २ गोभू १९ हतिः ३८ इष्टर्क्षं रोहिणी तत्संख्यया ४ युते ४२ अस्मा त् भैः २७ शेषं १५ एतत्संख्यया फलं २५ अहि ८ हतं २०० सायं २०३ इदं खेशायनक्षत्रभवंक्षेत्रफलं पूर्ववत्समेव महत्गृहप्रमाणमाह वेति वा ऽथवा त

युक्ताघनै ७ आपि युता विभक्ता भूपाश्विभिः शेषमितो हि पिंडं ३ खेशायनक्षत्रभवो यदैर्घ्ये हृत्स्याद्विस्तृतिरुच्चदीर्घे ता आया ध्वजो धूमहरिश्वगोखरेभध्वांक्षकाः पिंडइहाष्टशेषिते ४ ध्वजादिकाः सर्वदिशि ध्वजे मुखं कार्यं गृहे पूर्वयमोत्तरे न तथा॥

न इष्टायसहितं जातं यत्क्षेत्रफलं अष्टिहृग्द्रेषुयुतं अष्टिश्च इदृशश्च अष्टिहृग्भिः षोडशाधिकद्विशत्या २१६ हतो गुणितो य इष्टः एकद्वित्र्याद्यंकः तेन युक्तं कार्यमित्यर्थः अत्रैवाचार्यप्रपौत्रगोपिराजस्यापि पद्यं इष्टक्षोढ्यमुनींदवो द्विरहि ८ हृच्छेषात्यजेत्त्वायतो नो चे च्छुध्यति शोध्य मष्टसहिताच्छेषं त्रिहित्साग्रकं चेत्स्यादिष्टयुतं यथा तु नदृशे यंस्यादयो रामहृन्मानं घ्राद्विकरान्विताः फलमभीष्टायर्क्षजं जायते सिद्धे भैक्तः स्यात्करादिष्टदीर्घ मानार्थं चेकादिति ग्रान्भभोगान् तावद्यावत्प्र क्षिपेदिष्टभानविस्तारः स्यादिष्टदैर्घ्येण भक्ते ३ अथोत्तरार्धेन ध्वजाद्यायानाह आयैर्वर्णपरत्वेन च द्वारनिवे शनमुपजात्याह आयाइति ध्वजादिकाइति पिंडे क्षेत्रफले अष्टशेषिते यदवशिष्टं तत्परिमिता ध्वजादिका आयाः स्युः ध्वज धूमो प्रसिद्धौ हरिः सिंहः श्वा कुक्कुरः गो वृषः खरो गर्दभः इभो हस्ती ध्वांक्षः काकः स्वार्थे कः ४ सर्वदिशीति ध्वजाख्ये आये सर्वदिशि दिक्चतुष्टयेपि गृहद्वारं कार्यं॥ ६॥

ग्रं: १०९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरौ सिंहाये पूर्वदक्षिणोत्तरदिक्षु द्वारं कार्यं न पश्चिमादिशि तथा वृषाख्ये प्राच्यां दिश्येव द्वारं नान्यदिक्षु गजाख्ये आये प्राग्यमयोः पूर्वदक्षिणदिश्योः गृहद्वारं कार्यं आयानां प्रयोजनमाह विश्वकर्मा वृषसिंहगजं चैव खेटकर्पटकोटयोः द्विपः पुनः प्रयोक्तव्यो वापीकूपसरस्सु च मृगेंद्रमासने दद्याच्छय्ये नेषु गजं पुनः वृषं भोजनपात्रेषु छत्रादिषु पुनर्ध्वजं अग्निवेश्मसु सर्वेषु गृहे वह्न्युपजीविनां धूमं नियोजयेत्केचित्स्थानम्लेच्छादिजातिषु खरो वेश्यागृहे शस्तो ध्वांक्षश्चापि कुटीषु च वृषसिंहध्वजश्चापि प्रासादपुरवेश्मनि गजाये वा ध्वजाये वा गजानां सदनं शुभं अश्वालयं ध्वजाये च खराये वृषभेऽपि वा अमंत्रच्छत्रवस्त्राणां वृषाये वा ध्वजेऽपि वा पादुकोपानहौ कार्ये सिंहाख्येऽप्यथवा ध्वजे उक्तानामप्यनुक्तानां सर्वेषां च ध्वजः शुभ इति अथ ब्राह्मणादिवर्णपरत्वेन द्वारनिवेशनमाह अथवेति द्विजादितो ब्राह्मणादिवर्णविभागेन पश्चादुदक्पूर्वयमे यथा ब्राह्मणस्य पश्चान्मुखं क्षत्रियस्योदङ्मुखं वैश्यस्य पूर्वमुखं शूद्रस्य दक्षिणमुखमित्यर्थः श्रीपतिः ध्वजे प्रतीचीमुखमग्रजानामुदङ्मुखं भूमिभृतां च सिंहे विशो वृषे प्राग्वदनं गजे तु शूद्रस्य या।

प्राच्यां वृषे प्राग्यमयोर्गजेऽथवा पश्चादुदक्पूर्वयमे द्विजादितः ५ गृहेशतत्स्त्रीसुखवित्तनाशोऽर्के द्वीज्यशुक्रे विबले

स्यानननमामनंतीति ५ अथ गृहारंभे विशिष्य कालनिषेधमुपजात्याह गृहेशेति अर्केंद्वीज्यशुक्रे विबले निर्बले अस्ते अस्तंगऽऽऽस्तनीचे॥ ते नीचे नीचराशिगते सति क्रमात् गृहेशतत्स्त्रीसुखवित्तनाशो भवति यथा सूर्ये निर्बले नीचस्थिते गृहेशस्य नाशः इंदौ चंद्रे निर्बले अस्तमिते नीचगते वा गृहेशस्य स्त्रीनाशः गुरौ ईज्ये निर्बलेऽस्तगे नीचगते वा गृहेशस्य सुखनाशः शुक्रे निर्बले स्तगे नीचगे वा वित्तनाशः वसिष्ठस्तु नीचे शत्रुगते जीवे शुक्रे चंद्रेऽथवा रवौ निर्मितं सदनं शश्वदिति निःस्वत्वमाप्नुयादिति अस्तदोषोऽत्र न ग्राह्यः प्रातिदैवसिको बुधैः नास्तदोषः सदा चंद्रे न मैत्रे त्र्यस्य नीचत इति कर्तुरिति यन्नक्षत्रे दिनचंद्रस्तद्विधुभं यत्गृहस्य विस्तारायामवशादुत्पन्नभं तद्गृहभं तस्मिन्पुरःस्थिते संमुखस्थिते सति कर्तुर्गृहनिर्माणकर्तुस्तद्गृहे स्थितिर्निवासो न स्यात् पृष्ठगते वा विधुवास्तुनोर्भे सति खनिः खननं चोरकृतं नाय द्वारं तद्गृहशान्तर्वेस्वहानिः स्यादित्यर्थः पुरः पृष्ठस्थितं त्वं च दि॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु·टी· ग्द्वारंभक्रमेण यथा गृहे द्वारंयस्यांदिशिविधित्सितंतद्दिङ्नक्षत्रेषुतत्पृष्ठदिङ्नक्षत्रेषु च गृहारंभोनकार्यः वामदक्षिणनक्षत्रेषुगृहारंभः सुखेनकार्यः
वा·प्र· यदुक्तंब्रह्मशंभुना गृहायलब्धनक्षत्रेचयन्नक्षत्रेचचंद्रमाः शालाकासन्नकेदेयंकृत्तिकादिक्रमेणच वामदक्षिणभागेनतन्नशालंशांतिकारकं अग्रपृ
११० ष्ठेनदातव्यंयदिच्छेच्छ्रेयआत्मनः ऋक्षचंद्रस्यवालोभ्यअग्रपृष्ठेनशस्यतइति अयमाशयः कृत्तिकादिसप्तनक्षत्रेषुअनुराधादिसप्तसुवागृहनक्षत्रेचंद्र
नक्षत्रेचसतिपूर्वेद्वारेपश्चिमद्वारंवानकार्यं तत्रचंद्रः पृष्ठस्थितोअग्रस्थितोवाभवति एवंमघादिसप्तसुधनिष्ठादिसप्तसुवागृहनक्षत्रे चंद्रनक्षत्रेवासति
दक्षिणद्वारमुत्तरद्वारंवानकार्यमित्यर्थः ६ इदानीव्ययकथनपुरःसरंसफलमंशकज्ञानंउपजात्याह भमिति प्रागुक्तदिशाकल्पितंयद्गृहभंतच्चनागैरष्ट
भिस्तष्टंअवशिष्टंव्ययईरितः यथा रोहिणीभं४अयमेवव्ययः असौव्ययःध्रुवादिनामाक्षरयुक् ध्रुवादिनामान्यग्रेवक्ष्यति यत् यानिदिक्षुनामानि

कर्तुःस्थितिर्नोविधुवास्तुनोर्भेपुरःस्थितेपृष्ठगतेरवनिःस्यात् ६ भंनागतष्टंव्ययईरितासौध्रुवादिनामाक्षरयुक्सपिंडः त
ष्टोगुणैरिंद्रकृतांतभूपाह्यंशाभवेयुर्नशुभोंतकोत्र ७ दिक्षुपूर्वादितःशालाध्रुवाभ्रद्वीकृतागजाः शालाध्रुवांकसंयोगः
ऽसैकोवेश्मध्रुवादिकं ८॥

दिक्षुद्वाराणिचिकीर्षितानितदनुरोधेनयदागतंध्रुवादिनामतदक्षरसंख्यायायुक्तः ततःसपिंडः प्रागानीतपिंडाख्युक्तः
गुणैस्त्रिभिस्तष्टोभक्तावशिष्टः एकद्वित्रिशेषेणइंद्रयमराजसंज्ञकाह्यंशाःस्युः अत्रगृहारंभेऽन्तकोयमाख्योंशकोनशुभः अर्थादिंद्रराजानौशु राम:
भफलदौ ७ अथशालाध्रुवाद्यानयनमनुष्टुभाह दिक्ष्विति प्राच्यांद्वारंचिकीर्षितेशालाध्रुवांकएकः दक्षिणस्यांद्वौ पश्चिमायांकृताश्चत्वारः उत्तरस्यां ११०
गजाअष्टौ अथदिक्क्रमपरत्वेनयावंतिद्वाराणिएकंद्वेत्रीणिचत्वारिवाचिकीर्षितानितावतांशालाध्रुवकानांसंयोगःसैकएकयुक्तसन् ध्रुवादिकंवेश्मगृ
हंस्यात् यथा पूर्वस्यांपश्चिमायांद्वारेअभीष्टेशालाध्रुवौ१।४ अनयोर्योगः५सैकः६ गृहंजातंकांताख्यं एवंपूर्वदक्षिणोत्तरदिक्षुशालाध्रुवाणां१।
२।८संयोगः११सैकः१२धनदाख्यंगृहं दिक्चतुष्टयेविजयाख्यंगृहंषोडशमिति ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ ध्रुवादीनां नामाक्षरसंख्या यथाचक्रं छंदसाह तिथ्यर्केति दिक्षु पूर्वादितइत्यादिनायत ध्रुवादिवेश्मसमागनं शालाध्रुवांकसंयोगः सैकोवेश्मेत्युक्तदिशा संख्यामवधारयेत् सा चेत्संख्या पंचदशी द्वादशी अष्टमी षोडशी नवमी एकादशी चतुर्दशी वा स्यात्तदा गृहनामाक्षरं त्र्यात्मकं स्यात् ।१५।१२।८।१६।९।११।१४ अत्रत्रीण्येवाक्षराणि सैव संख्या प्रथमा द्वितीया चतुर्थी पंचमी षष्ठी दशमी तृतीया त्रयोदशी वा स्यात् तदा गृहनाम द्वौ अक्षरद्वयात्मकं स्यात् सा संख्या सप्तमी स्यात् तदा व्ययश्चतुरक्षरं गृहनाम ९ अथयद्यपि ध्रुवादिनामाक्षरसंख्याज्ञानं प्राक्पद्ये नैव जातं तथापि तन्मध्ये कानि शुभानि कान्यशुभानि इत्यस्य सदृशफलसूचनार्थं षोडशगृहाणां नामानि आर्यागीति छंदसाह ध्रुव धान्य इति अत्रार्यागीतिलक्षणं वाआर्या पूर्वार्धे यदि गुरुणैकेनाधिकेन निधने युक्तं इतरत्तद्वन्निखिलं यदीयमुदितेयमार्यागीतिरिति अत्रार्या सा पूर्वार्द्धे ॥ऽ॰ऽ॥ऽऽ॰॥ऽ॰॥ ॥॰।ऽ॰ऽउत्तरार्द्धे॥ऽ॰ऽ॥ऽऽ॰॥ऽ॰।ऽ॰ ॥॰।॰ऽ।ऽ॰ऽऽ॰मान्यलक्षणमप्यनुसंधेयं विशेषलक्षणस्य सामान्यलक्षणाधीनत्वात् निधने प्रांते ध्रुवमूर्ध्वमुखं प्रथमं गृहं धान्यं पूर्वद्वारं द्वितीयं जयं दक्षिणद्वारं तृतीयं नंदं प्राग्दक्षिणद्वारं चतुर्थं खरं पश्चिमद्वारं पंचमं कांतं प्राक्पश्चिमद्वारं षष्ठं मनोरमं दक्षिणपश्चिमद्वारं सप्तमं सुवक्त्रं प्राग्दक्षिणपश्चिमद्वारमष्टमं दुर्मुखमुत्तरद्वारं नवमं क्रूरं पूर्वोत्तरद्वारं दशमं रिपुदं दक्षिणोत्तरद्वारमेकादशं वित्तदं पूर्वदक्षिणोत्तरद्वारं द्वादशं नाशाख्यं पश्चिमोत्तरद्वारं त्रयोदशं आक्रंदं प्राक्पश्चिमोत्तरद्वारं चतुर्दशं विपुलाख्यं दक्षिणपश्चिमोत्तरद्वारं पंचदशं विजयं चतुर्दिक्द्वारं षोडशं इति १०

तिथ्यर्काष्टाष्टिगोहद्दशाङ्केनामाक्षरं त्रयं भूद्व्यब्धीषुंगदिक्वह्निविश्वेषु द्वौ नगे ऽब्धयः ९ ध्रुवधान्ये जयनंदौ खरकांतमनोरमं सुमुखं दुर्मुखोग्रं रिपुदं वित्तदनाशौ चाक्रंदं विपुलं विजयाख्यं स्यात् १० पिंडे नवांकांगगजाग्निनागनागाब्धिनागैर्गुणिते ऽः क्रमेण विभाजिते नागनगांकसूर्यैर्नागर्क्षतिथ्यृक्षरवभानुभिश्च ११ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु·टी· अथकेषांचिन्मतेनगृहस्यायादिनवकमपुजातिका पथ्यावक्त्राख्याभ्यामाह पिंडइति आयइति पिंडेक्षेत्रफलेनवधास्थापितेक्रमेणनवादिरं
वा·प· केगुणितेक्रमेणनागादिभिरंकैर्भक्तेचसतियेदायादिकंस्यात् यथा क्षेत्रफलंनवभिर्गुणितंअष्टभिर्भक्तंशिष्टमायःस्यात् तद्यथापिंडः२०३ नव
१११ गुणितः १८२७ अष्टभक्तेशेषं३सिंहायोजातः एवंसर्वेप्यानीताःइमे वारः७ अंशकः ५ द्रव्यं४ऋणं१ नक्षत्रं४ रोहिणी तिथिश्चतुर्थी४।योगः२
प्रीतिः आयुः ६५ उक्तंच गो९ क९ त्व६ ष्ट८ गुणा३ ष्ट८ नाग८ जलधि४ व्याले ८हृतंभूफलनागा८ द्य्रा७ क९ दिवाकरा१२ ष्ट८ भ२७ तिथी१५ यो
गैः २७ खसूर्यै१२० र्भजेत् आयंवारमथांशकंधनमृणंताराँतिथिंचिंतयेद्योगंचायुरितीहशेषकपदेभागेहृतैःतात्रिकैरिति अथैषांप्रयोजनं वि
षमायश्शुभायैवसमायःशोकदुःखदः वाराणां सूर्यारवाराश्यंशाःसदावह्निभयप्रदाः यथागणिततगतोभौमवारःसनिंद्यः तद्राशिःमेषवृ
श्चिकौतौनिंद्यौ तदंशायस्मिन्कस्मिंश्चिल्लग्नेमेषवृश्चिकनवांशानिषिद्धः एवंसूर्यवारोपि अन्येषांवाराश्यंशाःशुभाः अंशानांच गृहस्या
गतनक्षत्रंतद्विराश्यात्मकंयदि तत्रवांशवशात्तत्रज्ञातव्यंसर्वदागृहइति कृत्तिकाद्विराश्यात्मिकावशेषेमेषः द्व्यादिशेषेवृषः मृगेद्व्याधिके
शेषेमिथुनं अन्यथावृषः पुनर्वसावप्यंशकत्रयंयावन्मिथुनं अन्यथाकर्कः एवमुत्तरफाल्गुन्यादिषुद्विराश्यात्मकेषूहनीयंनतुनिःसंदिग्धे
ष्वश्विन्यादिषु धनर्णयोश्च धनाधिकंगृहंहृद्धौनिधनंयदृणाधिकमिति नक्षत्रस्य विपत्प्रदाविपत्ताराप्रत्यराप्रतिकूलदा निधनाख्याताराका
तुसर्वदानिधनप्रदा अस्यार्थः गृहकर्तुर्नक्षत्राद्गृहभसंख्यांनवभक्तावशिष्टंयदिविपत्तारादिकंस्यात् तदातद्गृहमनिष्टंस्यात् अन्यथाशुभा राम:
नि कश्यपः दत्तेदुःखंतृतीयर्क्षंपंचमर्क्षंयशःक्षयं आयुःक्षयंसप्तमर्क्षंकर्तुर्भाद्यादिसद्मभमिति यदा तुगृहकर्तुर्गृहस्यचैकमेवनक्षत्रंतत्र १११
स्वयमेवनिर्णयमाह गृहेति गृहेशर्क्षंस्वामिनक्षत्रंप्रागुक्तप्रकारेणानीतंगृहभंचतयोरैक्यएकमेवचेद्भंस्यात्तद्गृहकर्तुर्मरणप्रदंस्यात् गृहस्यत
त्पतेस्त्वेकंधिष्ण्यंचेन्निधनप्रदमितिवसिष्ठोक्तेः वास्तुशास्त्रेद्विराश्यात्मकेभेषुराश्यादिनिर्णयोन्यथाभिहितः अश्विन्यादित्रयंमेषेसिंहेप्रोक्तं
मघात्रयं मूलादित्रितयंचापेशेषेषुनवराशयइति अयंपक्षोवास्तुशास्त्रेनवांशानुक्तेरुक्ताः गृहस्यनक्षत्रराशितानेवर्णोवश्यमित्याद्युक्तप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारेणगृहस्वामिनक्षत्रराशिवशात् घटितादिविचारो विधेयः तत्र नाडीवेधे प्राशस्त्यमुक्तं चिंतामणौ सेव्यसेवकयोश्चैवगृहतत्स्वामिनोरपि परस्प
रंमित्रयोश्चैकनाडी प्रशस्यत इति तिथिप्रयोजनं दर्शरिक्तां चवर्जयेदिति योगानामपि दुष्टयोगाश्चवर्ज्याः आयुःप्रयोजनं तावत्कालं गृहावा
स्थितिरिति अत्राभीष्टांशादिसिध्यर्थं अंगुलादिकं प्रक्षिप्य विशोध्य वाक्षेत्रफलं साध्यं १२ अथगृहारंभे वृषवास्तुचक्रं शालिनीभ्यामाह गेहाद्या
रंभइति लाभोरामैरिति गेहं गृहं आदिशब्देन प्रासादग्रामादि तदारंभे सति अर्कभात् सूर्याक्रांतनक्षत्रात् रामैस्त्रिभिर्भैः वृषस्य वत्सस्यशीर्षे स्थि
तैः सद्भिः दाहः फलं स्यात् ततो वेदभैः अग्रपादे पुरस्थितपादद्वयस्थितैः शून्यगृहं जनवासरहितं स्यात् ततश्चतुर्भैः पृष्ठपादद्वयस्थैः स्थिरत्वं

आयो वारोंशको द्रव्यमृणमृक्षं तिथिर्युतिः आयुश्चाथगृहेशर्क्षं गृहभैक्यं मृतिप्रदं १२ गुणकाः ९।९।६।८।३।८।
८।४।८ भाजकाः ८।७।९।१२।८।२७।१५।२७।१२० गेहाद्यारंभेऽर्कभाद्वत्सशीर्षे रामैर्दाहो वेदभैरग्रपादे शून्यं वेदैः पृ
ष्ठपादे स्थिरत्वं रामैः पृष्ठे श्रीर्युगैर्दक्षकुक्षौ १३ लाभो रामैः पुच्छगैः स्वामिनाशो वेदैर्नैस्व्यं वामकुक्षौ मुखस्थैः रामैः
पीडासंततं वार्कधिष्ण्याद्भैस्त्रिदिग्भिरुक्तं त्वसत्सत् १४ कुंभेर्के फाल्गुने प्रागपरमुखगृहं श्रावणे सिंहकर्कयोः पौ
षेनक्रे च याम्योत्तरमुखसदनं गोजकर्के चराधे॥ ॥गृहकर्तुः ततो रामैः पृष्ठस्थैः श्रीः स्यात् ततो युगैः चतुर्भिः दक्षिणकुक्षिस्थितैः लाभः

ततस्त्रिभिः पुच्छगैः स्वामिनो गृहकर्तुर्नाशः ततो वेदैः वामकुक्षौ नैस्व्यं दारिद्र्यं ततस्त्रिभिर्मुखस्थैः गृहकर्तुः पीडासंततं अनवरतं स्यात् उक्तं च मार्तंड
ण्डेः त्रिवेदवेदाग्नियुगाग्निवेदत्रिकेषु भानोः शशिभं गृहेषु दाहो विनाशः स्थिरता धनश्रीः शून्यं च दारिद्र्यमृतिक्रमेणेति अथैतस्य निष्कृष्टार्थमाह
वेति अर्कधिष्ण्याद्भैः सप्तभैरसत्फलं ततो रुद्रैरेकादशधिष्ण्यैः सत्फलं ततो दिग्भिर्दशनक्षत्रैरसत्फलमुक्तं स्यादिति निष्कृष्टोर्थः उक्तं च रविभात्स
प्तनेष्टानि शुभान्येकादशाष्टभात् दशशेषाण्यनिष्टानि ताभिजिद्वृषवास्तुनीति १३ १४ अथसूर्यचंद्रमासैक्येन प्रागादिदिक्षु द्वाराणि गृहनिर्माणनस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्राणि च लग्नधरयाह कुंभेऽर्क इति कुंभस्थे सूर्ये फाल्गुने च मासि प्रागपरमुखं गेहं प्राङ्मुखं पश्चिममुखं वा गृहं सत् शुभफलं स्यात् श्रावणे मासे सिंहक
र्किसंक्रान्त्योश्च प्राङ्मुखं पश्चिममुखं वा गृहं स्यात् पौषे मासे नक्रे मकरसंक्रान्तौ च प्रागपरमुखं गृहं स्यात् अथ गोजगेऽर्के वृषमेषगे सूर्ये राधे वैशाखे
मासि याम्योत्तरमुखसदनं शुभं स्यात् मार्गे मार्गशीर्षे जूकालिगे तुलावृश्चिकगते सूर्ये सति याम्योत्तरमुखसदनं दक्षिणमुखमुत्तरमुखं वा सदनं गृहं स्या
त् नारदः गृहसंस्थापनं सूर्ये मेषगे शुभदं भवेत् वृषस्थे धनवृद्धिः स्यान्मिथुने मरणं ध्रुवं कर्कटे शुभदं प्रोक्तं सिंहे भृत्यविवर्धनं कन्या रोगं तुलासौ
ख्यं वृश्चिके धनवर्धनं कार्मुके च महाहानिर्मकरे स्याद्धनागमः कुंभे तु रत्नलाभः स्यात् मीने सद्मभयावहमिति चान्द्रमासानाह श्रीपतिः शोकोधा
न्यमृतिपशुहृती द्रव्यवृद्धिर्विनाशो युद्धं भृत्यक्षतिरथ धनं श्रीश्च वह्नेर्भयं च लक्ष्मीप्राप्तिर्भवति भवनारंभकर्तुः क्रमेण चैत्राद्ये मुनिभिरिति फलं।
वास्तुशास्त्रोपदिष्टं इति अत्र सौरचान्द्रमासानां महान् शुभाशुभफलविरोधः अत्र चिकीर्षितगृहद्वारानुकूलरविसंक्रमसमीचीनविहितमासेष्वे
व वैशाखादिषु गृहारंभः कार्य इति विरोधाभाव इति तथैवोपनिबद्धं द्वारनियममाह श्रीपतिः कर्किनक्रहरिकुंभगतेऽर्के पूर्वपश्चिममुखानि गृहा
णि तौलिमेषवृषवृश्चिकयोगे दक्षिणोत्तरमुखानि च कुर्यात् अन्यथा यदि करोति दुर्मतिर्व्याधिशोकभयनाशमश्नुते मीनचापमिथुनांगनागते का
रयेन्न गृहमेव भास्करे इति तत्र कुंभार्कसहिते फाल्गुने प्रागपरमुखं गृहं कार्यं उभयोर्विहितत्वयोरेकवाक्यताश्रयणात् एवमग्रेपि सर्वत्र जगन्मोहने
पाषाणेष्टादिगेहानि निंद्यमासे न कारयेत् तृणदारुगृहारंभे मासदोषो न विद्यत इति अथ नक्षत्राण्याह ध्रुवेति ध्रुवाणि रोहिण्युत्तरात्रयं मृदूनि मृग
रेवती चित्रानुराधाः वरुणः शततारका स्वाती वसुर्धनिष्ठा अर्को हस्तः पुष्यश्च एषु भेषु गृहनिर्माणं सत् शुभं स्यात् गर्गः उत्तरे पित्र्यरोहिण्यौ पुष्ये मै
त्रे करद्वये धनिष्ठाद्वितये पौष्णे गृहारंभः प्रशस्यत इति अत्र मृगो नोक्तः तदुक्तिश्च महेश्वरयुक्तेः सतीगेहमिति अदित्यां पुनर्वसौ सूतिकागृहनि
र्माणं प्रशस्तं तन्नेति तत्र सूतीगृहे हरिभविधिभयोः श्रवणाभिजितयोर्नक्षत्रयोः प्रवेशः शस्तः लक्ष्मः पुनर्वसौ नृपादीनां कर्तव्यं सूतिकागृहं श्रवा
णाभिजितोर्मध्ये प्रवेशं तत्र कारयेदिति अत्र नृपपदोपादानात् ब्राह्मणानां पूर्वोक्तनक्षत्रेष्वेव कार्यं आवश्यकत्वे तु श्रवणाभिजितो मुहूर्तः तदुद

CC-0. In Public Domain. Digitization by eGangotri

योवायाह्यः तच्चसूतिगृहंनैर्ऋत्यांकार्यं नैर्ऋत्यांसूतिकागृहमिति वसिष्ठोक्तेः वराहेणात्रानकनक्षत्राण्यभिहितानि हस्तादित्य शशांकपुष्यपव
नप्राजेशमित्रोत्तराचित्राश्विश्रवणेषुवृश्चिकघटौहित्वाविरिक्तेतिथौ शुक्राचार्यशनैश्चरत्तशशिनांवारेनुकूलेविधौसद्भिर्वेश्मनिसूतिकागृहविधिः
क्षेमंकरः कीर्त्यतेइति नवमेमासिसूतिकागृहेप्रवेशःकार्यः गर्गः मासेतुनवमेप्राप्ते पूर्वपक्षेशुभेदिने सूतिकासंभवेकालेसद्यएवप्रवेशयेत् रोहि
ण्येंद्रवपोक्षेषुत्तानीवारुणयोरपि पुष्येपुनर्वसौहस्तेधनिष्ठाश्रुत्तरासुच मैत्रेत्वाष्ट्रेतथाश्विन्यांसूतिकागारवेशनं सर्वेशुभग्रहाः केंद्रेपापाश्च
त्रिषडायगाः शुभांशेशुभसंदृष्टौसूतिकावेशनंशुभमिति १५ अथप्रागभिहितानांसौराणांचांद्राणांमासानांप्रकारांतरेणैकवाक्यतांशार्दूलविक्री
डितेनाह केश्चिदिति पूर्वदिग्द्वारवेशनेकवाक्यतोक्ता इदानींमेषस्थेरवौमधौचैत्रमासेगेहंप्रारब्धंशुभंस्यात् तथावृषस्थेसूर्येज्येष्ठमासेकर्क।

मार्गेजूकालिकेसद्भुवमृदुवरुणस्वातिवस्वर्कपुष्यैःसूतीगेहंत्वदित्यांहरिभविधिभयोस्तत्रशस्तःप्रवेशः १५ ॥
केश्चिन्मेषरवौमधौवृषभगेज्येष्ठेशुचौकर्कटेभाद्रेसिंहगतेघटेश्वयुजिचोजेलौमृगेपौषके ॥ ॥ ० ॥ ॥

स्थेशुचावाषाढे सिंहगतेर्केभाद्रपदेमासि घटेतुलास्थेरवौआश्वयुज्याश्विनेमासे अलौवृश्चिकस्थेर्के ऊर्जेकार्तिकमासे मृगेमकरस्थेर्केपौष
मासे नक्रघटेमकरेकुंभेर्केमाघेप्रारब्धंगृहंशुभंस्यादित्यर्थइतिकेश्चिन्निगदितं अनेनमेषेर्केचैत्रेपिगृहंशुभं यत्तुचैत्रनिषेधःसमीनार्कविषयः
वृषस्थेर्केज्येष्ठेपिशुभं यत्तुज्येष्ठनिषेधःसमिथुनार्कविषयः कर्कस्थेर्केआषाढेपिशुभं आषाढनिषेधस्तुमिथुनार्कविषयः सिंहेर्केभाद्रे
पिशुभं भाद्रनिषेधस्तुकन्यार्कविषयः श्रावणस्तुतत्रविहितत्वादेवशुभः वृश्चिकेर्केकार्तिकेपिशुभंनिषेधविषयंस्वयमेववक्ष्यति मा
र्गशीर्षस्तुविहितएव मकरस्थेर्केपौषेपिशुभं धनुरर्कसाहित्येसोप्यशुभः मकरकुंभस्थेर्केमाघेपिशुभं निषेधस्तुधनुरर्कविषयः अतएव
सौम्यफाल्गुनवैशाखमाघश्रावणकार्तिकः मासाःस्युर्गृहनिर्माणेपुत्रारोग्यधनप्रदाइतिनारदवाक्यं मासेतपस्येतपसिमाधवेनभसित्विषे॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ऊर्जे च गृहनिर्माणं पुत्रपौत्रप्रवर्धनमिति वसिष्ठवाक्यं च आश्विनकार्तिकमाघानां शुभत्वप्रतिपादकं तुलावृश्चिकमकरकुंभार्कसाहित्ये प्राशस्त्य
परं वचनांतरे बोधितनिषेधः प्रागुक्तविषयएव एवं फाल्गुनस्यशुभत्वं कुंभार्कविषयं कुंभार्करहित्येतु निषिद्धः ननु कार्तिकमाघमासौ श्रीप
तिनानिषिद्धौ तयोः कोविषयइत्यत आह अथेति ऊर्जः कार्तिको मासः कन्यागतेर्के नसन् न शुभः च पुनः तथा माघमासः धनुष्यपि धनुरर्के नस
न् नन्वेतदयुक्तं यतः शुक्लादिचांद्रमासे चैत्रादिमाससंज्ञाः संति तत्र कार्तिके कन्यासंक्रांतिर्माघे धनुःसंक्रांतिश्च कदापि न संभवति अत आह
कृष्णादिमासादिति मासोद्विविधः शुक्लादिः कृष्णादिश्च तत्र चैत्रशुक्लप्रतिपदामारभ्यामावास्यांतपर्यंतं शुक्लादिः कृष्णप्रतिपदमारभ्यपूर्णि
मांतपर्यंतं कृष्णादिः उभयत्रापिशास्त्रेव्यवहारः अश्वयुक्कृष्णपक्षेतु श्राद्धंकुर्याद्दिनेदिन इति मासिभाद्रपदेष्टम्यां कृष्णपक्षेऽर्धरात्रके भवे

माघेनक्रघटे शुभं निगदितं गेहं तयोर्जेनसत्कन्यायां च तथा धनुष्यपि नसत्कृष्णादिमासाद्भवेत् १६ पूर्णेंदुतः प्राग्वदनं
नवम्यादिषूत्तरास्यंत्वथपश्चिमास्यं दर्शादितः शुक्लदले नवम्यादौ दक्षिणास्यं न शुभं वदंति १७॥ ॥ ॥

त्सोष्टपदे मासि जयंतीनामसास्मृतेति च अत्र यदि दर्शांतो मासो विवक्ष्यते तदा भाद्रपदकृष्णपक्षे श्रावणे मासे चेत्येवं ब्रूयात् नदेतन्मासस्य कृष्णादि
त्वे प्रमाणं तत्राश्विनपूर्णिमांतः कार्तिकपूर्णिमांतं कृष्णादित्वेन व्यवहारात्तत्र कन्यासंक्रांतिसंभवान्निषेध उपपन्नो भवति एवमेव माघे मासि धनुरर्के
संभवेन निषेधसार्थक्यमित्यलं १६ अथ तिथिपरत्वेन द्वारनिषेधमुपजातिकयाह पूर्णेंदुत इति पूर्णेंदुतः पूर्णिमातः कृष्णाष्टमीपर्यंतं प्राङ्मुखं ग
हं शुभं न वदंति कृष्णनवमीतः चतुर्दशीपर्यंतं क्रियमाणमुत्तरास्यं न शुभं अथ दर्शादितः शुक्लाष्टमीपर्यंतं पश्चिमास्यं गृहं न शुभं शुक्लनवमीतश्चतु
र्दशीपर्यंतं दक्षिणास्यं गृहं शुभं न वदंति तासु तासु तिथिषु तत्तद्दिङ्मुखं गृहं न कर्तव्यमित्यर्थः व्यवहारोच्चये पूर्णिमातोष्टमीयावत्पूर्वास्यं वर्जयेद्गृहं
उत्तरास्यं न कुर्वीत नवम्यादिचतुर्दशी अमायाश्चाष्टमीयावत्पश्चिमास्यं विवर्जयेत् नवम्यादौ दक्षिणास्यं यावच्छुक्लचतुर्दशीमिति वधादिविचारो नेलि

CC-0. In Public Domain. Digitization by eGangotri

अथ पंचांगशुद्धिं लग्नशुद्धिं चानुष्टुभाह भौमार्केति भौमार्कवारौ रिक्ताश्च प्रसिद्धाः अमा अमावास्या आदितः यत् उपलक्षणत्वाद् दृष्टस्यापि एतैर्हीने काले तथा चरराशिमेषकर्कतुलामकरैः रहिते लग्ने स्थिरे द्विस्वभावे चेत्यर्थः तथा विपंचके गगनानलनृपचोरमृत्युसंज्ञकपंचकरहिते त्यर्थः उक्तं च दारिद्र्यं प्रतिपत्कुर्याच्चतुर्थी धनहारिणी अष्टम्युच्चाटनं चैव नवमी शस्त्रघातिनी दर्शे राजभयं त्वेवं पूर्णे दारविनाशनमिति मांडव्येनरत्नभोक्ष्ये धनिष्ठापंचके नैव कुर्यात्काभसमुच्चयः सूत्रधारशिलान्यासप्राकारादिसमारभेदिति व्यष्टान्त्य इति अष्टमद्वादशस्थानव्यतिरिक्तस्थैः शुभैः पापैस्तृतीयैकादशषष्ठस्थानस्थैश्चोपलक्षिते लग्ने गृहारंभः कार्यः १८ अथ देवालयादौ विदिक्षु राहुमुखमिंद्रवंशयाह देवालयइति अत्र यथासंख्यसंबंधः देवालयप्रारंभे राहुमुखं मीनार्कतस्त्रिराश्यवस्थिते सूर्ये ऐशान्यां विलोमतो विपरीतविदिक्षु वायव्यादिषु राहुमुखं स्यात् यथा मीनमेषवृषराश्यवस्थिते सूर्ये ऐशान्यां राहुमुखं मिथुनकर्कसिंहस्थितेर्के वायव्यां कन्यातुलावृश्चिकस्थितेर्के नैर्ऋत्यां धनुर्मकरकुंभस्थेर्के

भौमार्करिक्तामाद्यूने चरोनेंगे विपंचके व्यष्टांतस्थैः शुभैर्गेहारंभस्त्र्यायारिगैः खलैः १८ देवालयेगेहविधौ जलाशयेशहो

आग्नेय्यां राहुमुखमित्यर्थः एवं गृहारंभेपि सिंहार्कतस्त्रित्रिराश्यवस्थितेर्के विलोमतः ऐशान्यां राहुमुखं ऽऽमुखं शंभुदिशो विलोमतः ॥ स्यात् वृश्चिकादित्रिभे वायव्यां कुंभादित्रिभे नैर्ऋत्यां वृषादित्रिभे आग्नेय्यां राहुमुखं स्यात् तथा जलाशयप्रारंभेपि मकरतस्त्रिराश्यवस्थितेर्के विलोमत ऐशान्यां राहुमुखं स्यात् मेषादित्रिभे वायव्यां कर्कादित्रिभे नैर्ऋत्यां तुलादित्रिभे आग्नेय्यां राहुमुखं स्यादित्यर्थः फलमाह खातेइति देवालयादिविषयके खाते भूमिशोधने कर्त्तव्ये सति राहुमुखाक्रांतदिशः सकाशात्पृष्ठवर्तिनी विदिक् शुभा भवेत् यथैशान्यां राहुमुखं तत्पृष्ठदिगाग्नेयी तस्यां प्रथमखातारंभः शुभफलदः एवं वायव्यां राहुमुखं तत्पृष्ठविदिगैशानी तस्यां खातारंभः शुभः एवं सर्वत्र उक्तं च ईशानतः सर्पति कालसर्पो विहाय सृष्टिं गणयेद्विदिक्षु शेषोस्य वास्तोर्मुखमध्यपुच्छं त्रयं परित्यज्य खनेच्चतुर्थं वृषार्कादित्रयं वेद्यां सिंहादि गणयेद्गृहे ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवालयेचमीनादितडागेमकरादिकमिति खातारंभादिनक्षत्राण्याह मांडव्यः अधोमुखैर्भैर्विदधीतखातं शिलास्तथैवोर्ध्वमुखैश्चपट्टं तिर्यङ्मुखैर्द्वा
रिकपाटदानंगृहप्रवेशोमृदुभिर्ध्रुवर्क्षैरिति १९ अथगृहेकूपनिर्माणदिगवस्थित्याफलं शालिन्याह कूपेइति वेश्मभूर्वास्तुरस्त्रियामितिवास्तुश
ब्दःपुल्लिंगः वास्तोर्गृहस्यमध्यभागेकूपेजलकूपेसति स्वामिनोर्थनाशःस्यात् अथैशान्यादिषुसृष्टिमार्गेणाष्टसुदिक्षुपुष्टिरित्यादिफलं यथैशान्यांकू
पेपुष्टिः पूर्वस्यामैश्वर्यवृद्धिः आग्नेय्यांपुत्रनाशः दक्षिणस्यांस्त्रीविनाशः नैर्ऋत्यांगृहपतेर्मृतिः पश्चिमायांसंपत् वायव्यांशत्रुतःसकाशात्
पीडास्यात् उत्तरस्यांकूपेसुखंगृहस्वामिनएव वसिष्ठः ऐश्वर्यपुत्रहानिश्चस्त्रीनाशोनिधनंभवेत् संपत्शत्रुभयंसौख्यंपुष्टिःप्रागादितःक्रमात्
कूपेकृतेमध्यमेतुधनहानिर्हिवास्तुनीति अथकूपारंभेचक्रमाह कूपेर्कभान्मध्यगतैस्त्रिभिर्भैः स्वादूदकंपूर्वदिशस्त्रिभिस्त्रिभिः खंडंजलंस्वादुजलं

मीनार्कसिंहार्कमृगार्कतस्त्रिभेखातेमुखात्स्यष्टविदिक्शुभाभवेत् १९ कूपेवास्तोर्मध्यदेशेऽर्थनाशस्त्वैशान्यादौपुष्टि
रैश्वर्यवृद्धिः सूनोर्नाशःस्त्रीविनाशोमृतिश्चसंपत्पीडाशत्रुतःस्याच्चसौख्यं २० स्नानाग्निपाकशयनास्त्रभुजेश्चधान्यभां
डारदैवतगृहाणिचपूर्वतःस्युः॥

॥जलक्षयंस्वादूदकंक्षारजलंशिलाश्चजलंक्षारजलंमिष्टंक्रमाद्भवेद्वासूर्यभात्त्रित्रिमितैःशुभाशुभमि

ति २० अथदिक्परत्वेनउपकरणगृहाणिवसंततिलकयाह स्नानस्येति पूर्वतःपूर्वाद्यष्टदिक्षुस्नानतः गृहाणिस्युःयथा पूर्वस्यांस्नानगृहं आ
ग्नेय्यांपाकगृहं दक्षिणस्यांशयनगृहं नैर्ऋत्यांशस्त्रगृहं पश्चिमायांभोजनगृहं वायव्यांधान्यसंग्रहगृहं उत्तरस्यांभांडारंकोशगृहं ऐशान्यांदेव
तगृहं वसिष्ठः ऐंद्र्यांदिशिस्नानगृहमाग्नेय्यांपचनालयं याम्यायांशयनवेश्मनैर्ऋत्यांशस्त्रमंदिरं वारुण्यांभोजनगृहंवायव्यांधान्यमंदिरं उ
दीच्यांहाटकसद्मऐशान्यांदेवमंदिरमिति नारदस्तु भांडागारंतुकस्यांवायव्यांपशुमंदिरमिति पूर्वाद्यष्टदिक्तन्मध्यतः तयोर्दिग्विदिशोर्मध्ये
ऽष्टसंख्याकेमथनाद्यष्टौगृहाणिस्युःयथा पूर्वाग्नेययोर्मध्येलोडनस्यगृहंस्यात् आग्नेयीदक्षिणयोर्मध्येआज्यस्यघृतसंग्रहस्य दक्षिणनै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्नैरृत्योर्मध्ये पुरीषस्य विसर्जनस्य त्यागस्य गृहं नैरृतीपश्चिमयोर्मध्ये विद्याभ्यासस्य पश्चिमवायव्ययोर्मध्ये रोदनस्य गृहं वायव्योत्तरयोर्मध्ये रतस्य सं भोगस्य गृहं उत्तरैशान्ययोर्मध्ये औषधस्य गृहं ऐशानीप्राच्योर्मध्ये उक्तव्यतिरिक्तसर्ववस्तूनां धामगृहं कार्यं स्यादित्यर्थः वसिष्ठः इंद्राग्न्योर्मथन मध्ये याम्याग्न्योर्घृतमंदिरं यमराक्षसयोर्मध्ये पुरीषत्यागमंदिरं राक्षसांबुपयोर्मध्ये विद्याभ्यासस्य मंदिरं तोयेशानिलयोर्मध्ये रोदनं मंदिरं ततः का मोपभोगसदनं वायुकौबेरमध्यमे कौबेरैशानयोर्मध्ये चिकित्सामंदिरं सदा गृहं हरीशयोर्मध्ये सर्ववस्तुसंग्रहं सदनं कारयेद्देवक्रमादुक्तानि षो डशेति २१ अथ विशेषमुपजातिकयाह जीवार्केति अत्र योगद्वये ग्रहस्थानयोर्यथासंख्यसंबंधः यथा जीवो लग्ने अर्कोरी षष्ठे विद्वधोजामि

तन्मध्यतस्तु मथनाज्यपुरीषविद्याभ्यासाग्न्यरोदनरतौषधसर्वधाम २१ जीवार्कविज्ज्ञकशनैश्चरेषु लग्नारिजामित्रसुख त्रिगेषु स्थितिः शतं स्याच्छरदां सितार्कारेज्येतनुत्र्यंगसुते शतेद्वे २२ लग्नांबरायेषु भृगुज्ञभानुभिः केंद्रे गुरौ वर्षशता। नायुरालयं॥ बंधौ गुरुर्व्योम्नि शशी कुजार्कजौ लाभे नदाशीतिसमायुरालयं २३ स्वोच्चे शुक्रे लग्नगे वा गुरौ वे श्मगते थवा शनौ स्वोच्चे लाभगे वा लक्ष्म्यायुक्तं चिरं गृहं २४

अत्रैसप्तमे शुक्रश्चतुर्थे शनिस्तृतीये एवंविधे लग्ने प्रारब्धस्य गृहस्य स्थितिर द्दशतं वर्षशतं स्यात् अयमेको योगः सितेति शुक्रो लग्ने अर्कस्तृतीये आरः षष्ठे इज्यः पंचमे एवंविधे प्रारब्धस्य गृहस्य स्थिति द्वेशते वर्षशतद्वयं स्या त् २२ अथान्ययोगद्वयमिंद्रवंशयाह लग्नांबरायेष्विति अत्रापि योगद्वये स्थानग्रहयोर्यथासंख्यसंबंधः लग्ने शुक्रः दशमे बुधः एकादशे सूर्यः लग्नव्यति रिक्तकेंद्रे गुरुः तदेवंविधे योगे प्रारब्ध आलयः गृहं वर्षशतमायुरवस्थानं यस्य तादृशं स्यात् अथ द्वितीयः बंधाविति चतुर्थे गुरुः दशमे चंद्रः मंगल शनैश्च रावेकादशे तदा गृहमशीतसमा वर्षाण्यायुर्यस्य तादृशं स्यात् २३ अथान्ययोगत्रयमनुष्टुभाह स्वोच्च इति स्वोच्चस्थे मीनस्थे शुक्रे लग्नगते अथवा स्वोच्चस्थे कर्कस्थे गुरौ चतुर्थस्थानगते सति अथवा स्वोच्चस्थे तुलास्थे शनौ एकादशस्थानगते सति चिरं लक्ष्म्यायुक्तं गृहं स्यात् यदा समुदायो भवेत्तदा यत्नाविधिलक्ष्मी

मुहू० ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु॰ टी॰ अथ गृहस्य परहस्तगामित्वयोगमनुष्टुभाह घूनांबरे इति एकोपि ग्रहोऽत्युत्कृष्टशुभफलदाता परांशस्थः सन् यदि घूने सप्तमे स्यात् अथवांऽबरे द
वा॰ प्र॰ शमे स्यात् तदा सग्रहः तद्गृहं प्रारब्धं अब्दांतर्वर्षमध्ये एव परहस्तस्थं अन्यहस्तगामि कुर्यात् चेद्वर्णपः ब्राह्मणादिवर्णस्वामी विप्राधीशो भार्गवे
११५ ज्यावित्याद्यभिहितः स चेदबलः स्यात् यदा स्ववर्णाधीशः सबलः स्यात्तदा परहस्तगामी न स्यादित्यर्थः २५ अथान्यं विशेषं वसंततिलकयाह पुष्येति
पुष्यः ध्रुवाणि प्रसिद्धानि इंदुर्मृगः हरिः श्रवणः सर्पोऽश्लेषा जलं पूर्वाषाढा एतैर्नक्षत्रैः सजीवैः गुरुयुक्तैः तद्वासरेण गुरुवासरेण कृतं कर्तुमारब्धं
गृहं सुतान् पुत्रान् राज्यं च ददातीति ताद्दशं स्यात् अत्र संमतिर्वसिष्ठनारदवाक्यतः द्वीशेति द्वीशा विशाखा अश्विनी तक्षा चित्रा वसुः धनिष्ठा पाशी
शततभे शिव आर्द्रा एतैर्नक्षत्रैः सशुक्रैः शुक्रसहितैः सितस्य शुक्रस्य वासरे च कृतं गेहं धनानि सुवर्णानि धान्यानि व्रीह्यादीनि ददातीति ताद्दशं गृ

घूनांबरे यदेकोपि परांशस्थो ग्रहो गृहं अब्दांतः परहस्तस्थं कुर्याच्चेद्वर्णपोऽबलः २५ पुष्यध्रुवेंदुहरिसर्पजलैः सजी
वैस्तद्वासरेण च कृतं सुतराज्यदं स्यात् द्वीशाश्वितक्षवसुपाशिशिवैः सशुक्रैः वारे सितस्य च गृहं धनधान्यदं स्यात् २६
सारैः करेज्यांत्यमघांबुमूलैः कौजेऽह्नि वेश्माग्निसुतार्तिदं स्यात् ॥

॥ हं स्यात् तथा च नारदः श्रवणाषाढयोश्चैव रोहिण्यां चोत्तरात्र
ये गुरुवारे कृतं वेश्म राजयोगमिहोच्यते तद्गृहे जातपुत्रस्य राज्यं भवति निश्चयात् अत्र वसिष्ठवाक्ये नक्षत्राधिक्यं तदनुसारेण मूलनक्षत्राभिधा
नं इज्योत्तरात्रयाहीदुविष्णुधातृजलोडुषु गुरुणा सहितेष्वेषु कृतं गेहं श्रियान्वितमिति वसिष्ठोक्तेः अश्विनीशततारासु विशाखा चार्द्रचित्रके
धनिष्ठाशतभे शुक्रसंयुक्तेषु शुक्रवासरे तद्वेश्मनि प्रजातस्तु कुबेरसदृशो भवेत् अत्रापि नक्षत्रभेदः प्राग्वत्समाधिः २६ अथान्यं योगद्वयमिंद्रव राम॰
ज्रयाह सारैरिति हस्तपुष्यरेवतीमघापूर्वाषाढामूलैः सारैर्मंगलसहितैः कौजे भौमसंबंधिनि अह्नि वारे कृतं गृहं अग्निसुतार्तिदं अग्निपीडां सु ११५
तपीडां ददातीति ताद्दशं स्यात् उक्तं च मूलं च रेवतीचैव कृत्तिकाषाढमेव च एषु भौमेन युक्तेषु वारे तस्यैव निर्मितं अग्निना दह्यते क्षिप्रं पुत्रनाशश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जायतइति सत्रैरिति रोहिण्यश्विन्युत्तरफाल्गुनीचित्राहस्तैः सप्तैः बुधयुक्तैः तस्यचवारेकृतंगृहंसुखदंपुत्रदंचस्यात् उक्तंच हस्तार्यमत्वाष्ट्रदास्र उत्तरास्योडुभेपिवा सबुधेबुधवारेच धनपुत्रसुखप्रदमिति २७ अथान्ययोगमनुष्टुभाह अजैकपादिति पूर्वाभाद्रपदोत्तराभाद्रपदाज्येष्ठानुराधा स्वातीभरणीनक्षत्रैः समंदैः शनैश्चरयुक्तैः मंदस्यैववारेचप्रारब्धंगृहंरक्षोभूतश्चयुतंस्यात् उक्तंच अजपाद्द्वितयेयाम्यमित्रेंद्राग्नानलभेपिवा समंदे मंदवारेचगृहंतेयक्षराक्षसैः पुत्रेजातेऽथवातस्मिन् गृह्यतेयक्षराक्षसैरिति अत्रायंनिष्कृष्टोर्थः पूर्वंगृहारंभनक्षत्राण्यवधेयानिततोवृषवास्तु चक्रेशोध्यानि पश्चादिदंयोगपंचकं विचार्यमेवगृहारंभः शुभफलदोभवेत् २८ अथकेषांचिन्मतेनद्वारचक्रंसफलंशार्दूलविक्रीडितेनाह

सप्तैः कदास्रार्यमतक्षहस्तैर्नूनंस्येववारेसुखपुत्रदंस्यात् २७ अजैकपादहिर्बुध्न्यशक्रमित्रानलांतकैः समंदै
मंदवारेस्याद्रक्षोभूतयुतंगृहं २८ सूर्यर्क्षाद्युगभैः शिरस्यथफलंलक्ष्मीस्ततः कोणभैर्नागैरुद्वसनंततोगजमितैः
शाखासुसौख्यंभवेत् देहल्यांगुणभैर्मृतिर्गृहपतेर्मध्यस्थितैर्वेदभैः सौख्यंचक्रमिदंविलोक्यसुधियाद्वारंविधे
यंशुभं २९ इतिश्रीवास्तुप्रकरणंसमाप्तम् सूर्यर्क्षादिति सूर्याधिष्ठितनक्षत्रात् युगभिश्चतुर्भिर्नक्षत्रैः शिरसिउ
परिअवस्थितैः फलंकर्तुः लक्ष्मीप्राप्तिःस्यात् ततः नागभैः अष्टभिः कोणगैः कोणेष्ववस्थितैः उद्वसनंजनवासरहितंस्यात् तदग्रभैर्गजमि
तैरष्टमितैर्द्वारशाखावस्थितैर्गृहस्वामिनः सौख्यंस्यात् तदग्रिमैः गुणभैस्त्रिभिर्नक्षत्रैर्देहल्यामवस्थितैर्गृहस्वामिनोमृतिःस्यात् ततस्तदग्रिमैः
वेदभैश्चतुर्भिर्नक्षत्रैः मध्यरूपेअवकाशेस्थितैः सौख्यंस्यात् फलितार्थमाह चक्रमिति इदंचक्रंविलोक्यसुधियाशुभंशुभंफलदंद्वारंविधेयं
कर्तव्यमिति गद्येनोपसंहरति २९ इतिश्रीदैवज्ञानंतसुतदैवज्ञरामविरचितायांस्वकृतमुहूर्तचिंतामणिटीकायांप्रमिताक्षरायांगृहारंभप्रकरणं
समाप्तंद्वादशं १२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मु.टी. गृ.प्र. ११६

अथगृहप्रवेशप्रकरणं व्याख्यायते तत्र प्रवेशश्चतुर्धा अपूर्वप्रवेशः सपूर्वप्रवेशः द्वंद्वाभयप्रवेशः वधूप्रवेशश्चेति तत्र वधूप्रवेशस्यान्वर्थसंज्ञकत्वाल्लक्षणं नोक्तं सच प्रागभिहितः अन्येषां लक्षणमाह वसिष्ठः अपूर्वसंज्ञः प्रथमप्रवेशो यात्रावसाने तु सपूर्वसंज्ञः द्वंद्वाभयस्त्वग्निभयादिजातस्त्वेवं प्रवेशस्त्रिविधः प्रदिष्ट इति नवं गृहं निर्माय यः प्रथमः प्रवेशः सोऽपूर्वसंज्ञः प्रवेशः यस्तु यात्रानिवृत्त्यनंतरं गृहप्रवेशः स सपूर्वसंज्ञः यस्तु अग्निभयेनाग्निदाहेन आदिशब्देन जुड्वेन राज्ञापातितेन गृहनाशस्तद्गृहं यदा पुनः संपाद्यते तस्मिन्यः प्रवेशः स द्वंद्वाभय इत्युच्यते अन्वर्थसंज्ञा चेयं द्वंद्वं शीतोष्णं अत्र शीतशब्देन जलं उष्णशब्देनाग्निरुच्यते लक्षणया जलाप्लावेनानवरतवृष्टिपातेन वा गृहपातस्तु जलभयं अग्निकृतदाहेन यो गृहनाशस्तदग्निभयं तस्माच्छीतोष्णरूपाद्द्वंद्वात्पुनःस्थापनेन यद्भयमित्युच्यते द्वंद्वाभयं विध्यते तस्मिन्नित्यर्थः आदिभ्यो जितिमन्वर्थयोश्च प्रत्ययः तादृशः प्रवेशो द्वंद्वाभय इति तत्रापूर्वसपूर्वप्रवेशयोः कालशुद्ध्यादिकमिंद्रवंशयाह सौम्यायन इति एषु सौम्यायन इत्यादिकेषु पदार्थेषु पदार्थेसत्सु नृप

सौम्यायने ज्येष्ठतपोन्त्यमाधवे यात्रानिवृत्तौ नृपतेर्नवे गृहे स्याद्वेशनं द्वास्थमृदुध्रुवोडुभिर्जन्मर्क्षलग्नोपचयोदये स्थिरे १

तेर्यात्रानिवृत्तौ अथवा नवे नूतनोत्थापिते गृहे वेशनं प्रवेशनं स्यात् अत्र सौम्यायन इति मंदबुद्धीनां शीघ्रप्रतिपत्त्यर्थं ज्येष्ठेति ज्येष्ठमाघफाल्गुनवैशाखेषु प्रवेशनं शुभं नारदः अपि सौम्यायने कार्यं नववेश्मप्रवेशनं राज्ञा यात्रानिवृत्तौ चेति तथा माघफाल्गुनवैशाखज्येष्ठमासेषु शोभनः प्रवेशो मध्यमो ज्ञेयः सौम्यकार्तिकमासयोरिति मध्यमोक्तिरावश्यकविषया द्वास्थेति यस्मिन्गृहे प्रवेशः कर्तुमिष्यते तस्य यस्यां दिशि मुखं तद्दिङ्नक्षत्रैः पूर्वादिषु चतुर्दिक्षु सप्तसप्तानलर्क्षतः इत्याद्युक्तैः मृदुध्रुवनक्षत्रैः प्रवेशनं स्यात् यद्दिक्कद्वारमंदिरं तद्दिगृक्षैरुक्तर्क्षैः स्यात्तत्प्रवेशो न सर्वैरिति वसिष्ठोक्तेः अन्यदपि तत्रैव अर्कानिलायोदितिदस्रविष्णुकरक्षे प्रविष्टं नवमंदिरं यत् अब्दत्रयात्तत्परहस्तयातं शषेषु धिष्ण्येषु च मृत्युदं स्यादिति जन्मर्क्षेति जन्मर्क्षं जन्मराशिः जन्मलग्नं प्रसिद्धं ताभ्यामुपचयं तृतीयषष्ठदशमैकादशस्थानं तस्मिन् उदये लग्ने स्थिरे स्थिराख्ये वृषसिंहवृश्चिककुंभाख्ये लग्ने प्र

राम. ११६

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेशनंशुभं नारदः कर्तुर्जन्मभलग्ने वा ताभ्यामुपचयेपि वा प्रवेशलग्नेस्याद्विरन्यभेशोकनिस्वतेति सौम्येस्थिरेभेशुभदृष्टियुक्ते लग्नेऽथवा ह्यंगगृहेविलग्नेइतिच सौम्यग्रहयुक्ते ह्यंगे द्विस्वभावराशौ १ अथजीर्णगृहप्रवेशेविशेषमिंद्रवज्रयाह जीर्णगृह इति जीर्णेपुरातनेऽन्यनिर्मितेगृहे अग्निभयात् अग्निनादाहात् आदिशब्देन बहुवृष्टिराजकोपाद्युपद्रवात्पतितेगृहे पुनरपिसम्यगेवकृते उत्थापिते पूर्वोक्ताः सर्वेपिमासाज्ञेयाः किंच मार्गोर्जयोः मार्गशीर्षकार्तिकयोः च श्रावणिकेपि श्रावणेपिवेशः प्रवेशः सन् शुभफलदः स्यात् सनत्कुमारः गृहारंभोदितैर्मासैर्धिष्ण्यैर्वारैर्विंशद्गृहमिति अत्रसामान्यतो गृहारंभोदितामासा गृहप्रवेशेऽभिहिताः तेच सौम्यफाल्गुनवैशाखमाघश्रावणकार्तिकाः मासाः स्युर्गृहनिर्माणेपुत्रारोग्यधनप्रदाइति नारदोक्ते मार्गशीर्षफाल्गुनश्रावणकार्तिकाविहिताः तत्रोत्तरायणएवगृहप्रवेशस्यवाक्यांतरविहितत्वात् श्रावणकार्तिकमार्गशीर्षाणामुत्तरायणत्वाभावात् विरोधेनूतनजीर्णगृहप्रवेशाभ्यां व्यवस्था कथंप्रागभिहितनारदवाक्येन उत्तरायणसाहचर्येण नूतनगृ

जीर्णेगृहेऽग्न्यादिभयान्नवेपिमार्गोर्जयोः श्रावणिकेपिसत्स्यात् वेशोंबुपेज्यानिलवासवेषुनावश्यमस्तादिविचारणात्र ॥ २

हप्रवेशस्य पूर्वप्रवेशयोर्विधानात् गृहारंभोदितैर्मासैरित्यनेनतु सामान्यतस्त्रिविधस्यापि प्रवेशस्यविधानादुत्तरायणीयमासास्त्रिविधगृहप्रवेशेशुभाः दक्षिणायनीयमासाश्रावणाद्यस्तुजीर्णगृहप्रवेशविषयाः अतएवनारदोमार्गशीर्षकार्तिकयोर्नूतनप्रवेशोमध्यमत्वमाह अर्थादेवजीर्णगृहप्रवेशेउत्कृष्टमध्यवस्यता अंबुपेति अंबुपः शततारका ईज्यः पुष्यः अनिलस्वाती वासवं धनिष्ठा एषुभेषुजीर्णगृहेऽग्न्यादिभयान्नवेपिगृहप्रवेशः शुभः प्राक्पद्योक्तनक्षत्रेषुतुशुभएवेति कैमुतिकन्यायादवगम्यते ज्योतिःप्रकाशे प्रवेशोनूतनेहर्म्ये ध्रुवैर्मित्रैः सुरवासवे पुष्यस्वातीयुतैस्तैस्तुजीर्णेस्याद्वासवद्वयेइति नावश्यमिति अत्रैवंविधेजीर्णगृहे अग्न्यादिभयान्नवेपि आवश्यकमस्तादिविचारणाशुक्रास्तगुर्वस्तबाल्यवार्धकसिंहस्थगुर्वादिदोषाणां विचारणाविचारोनास्ति अस्तादयः कालदोषाः संतुमावासंतुतथापिगृहप्रवेशः कार्यः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोपिपंचांगशुद्धिमात्रमंगीकृत्यविहितनक्षत्रेष्वेवकार्यः ज्योतिःप्रकाशे नित्ययानेगृहेजीर्णेप्राशनेपरिधानके वधूप्रवेशेमांगल्येनमौढ्यंगुरु
शुक्रयोरिति वसिष्ठः नवप्रवेशेह्यथकालशुद्धिर्नद्वंद्वसौपूर्विकयोः कदाचित् प्रवेशपंचांगदिनेसुलग्नेवास्त्वर्चनंपूर्ववदेवकुर्यात् पूर्ववदेवनू
तनप्रवेशेयथावास्तुपूजातथाद्वंद्वसौपूर्विकयोरपिकार्येत्यर्थः नारदेनतुयात्राविधेर्निवृत्तिप्रवेशेकालशुद्धिरपेक्षितैवेतितद्वाक्यंप्रागभिहितं
तदेतयोर्वाक्ययोरावश्यकानवश्यत्वेनव्यवस्था अत्रत्रिविधेपिप्रवेशेप्रवेशनक्षत्रंक्रूराक्रांतंक्रूरविद्धंवासर्वथावर्ज्यं वसिष्ठः क्रूरग्रहाधिष्ठि
तंविद्धंभंचविवर्जनीयंत्रिविधप्रवेशेइति २ अथगृहप्रवेशदिनात्प्राक्कर्तव्यवास्तुपूजाविषयेतन्नक्षत्राणिउपजातिकापूर्वार्द्धेनाह मृदुध्रुवेति ए
षुसप्तदशसुनक्षत्रेषुवास्तुपुरुषस्यार्चनंभूतबलिंचकारयेत् गृहपतिर्वास्तुपूजांकुर्यात् पुरोहितोवास्तुपूजांकारयेत् हृक्रोरन्यतरस्यामितिणौकर्तुःक
र्मत्वं वास्तुपूजाप्रकारमाहवसिष्ठः निर्माणेमंदिराणांचप्रवेशेत्रिविधेपिच वास्तुपूजाप्रकर्तव्यायस्मात्तांकथयाम्यतः गृहमध्येहस्तमात्रंसमंतात्त

मृदुध्रुवक्षिप्रचरेषुमूलभेवास्त्वर्चनंभूतबलिंचकारयेत् त्रिकोणकेंद्रायधनत्रिगैःशुभैर्लग्नेत्रिषष्ठायगतैश्चपापकैः ३

दुलोपरि एकाशीतिपदंकार्यंतलैस्तुल्यंसुशोभनं एकद्वित्रिपदाः पंचचत्वारिंशत्सुरार्चिताः द्वात्रिंशद्बाह्यतोवक्ष्यमाणाश्चांतस्त्रयोदश तेषांस्था
नानिनामानिवक्ष्यामीश्वरकोणतः तत्राग्निःशंभुकोणस्थस्त्वसौचैकपदेश्वरः आकाशंचापूरयतःक्रमादेकपदेश्वरौ एवंप्राच्यानवज्ञात्वात्तेवमे
वान्यदिक्षुच आद्यश्चांतावेकपदौद्विपदाःपंचमध्यगाः शिख्याद्यष्टावाकाशांताअमराः पूर्वभागगाः आद्यश्चांत्यावेकपदौद्विपदाः पंचमध्यगाः पू
षाद्यष्टौयमांताःसुरमरायाम्यभागगाः आद्यश्चांत्यावेकपदौद्विपदाःपंचमध्यगाः अष्टौपितृगणाधीशात् पापांताःपश्चिमेसुराः आद्यंतौद्वावेकप
दौद्विपदाःपंचमध्यगाः रोगादिदित्यंतःसुराःसप्तसौम्यदिशिक्रमात् तत्राधस्थचतुःकोणेष्वीशानादिषुचक्रमात् आपःसावित्रविजयरुद्राश्चैकप
देश्वराः मध्येनवपदोब्रह्मातस्येशानादिकोणगाः आपवत्सोथसविताविबुधाधिपसंज्ञकः राजयक्ष्माचचत्वारःसुराश्चैकपदेश्वराः ब्रह्मणःपूर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोदिक्षुत्रिपदाश्चामराश्चमी अर्यमाचविवस्वांश्चमित्रःपृथ्वीधरः क्रमात् स्वस्वकेलेषुदेवेषुस्थापितेष्वीदृशंभवेत् कोणेषुपंचपंचैवचतुर्थैकप
दाःसदा प्रागादिदिक्षुद्विपदाःपंचपंचयथाक्रमं ब्रह्मणःपूर्वतो -- दिपिनेष्वीदृशंभवेत् कोणेषुपंचपंचैस्तुद्विपदाःस्युःसमीपगाः हिरण्यरेताः
पर्जन्योजयंतःपाकशासनः सूर्यःसत्योभृशाकाशोवायुपूषाश्चवैतथाः गृहक्षतःपितृपतिर्गंधर्वोभृंगराजकः यमःपितृगणाधीशस्तथादौवा
रिकाह्वयः सुग्रीवःपुष्पदंतश्चजलाधीशोनिशाचरः शोषःपापश्चरोगोहिर्मुख्योभल्लाटएवच सोमसर्पौदित्यदितीद्वात्रिंशदमराःस्मृताःश्चा
पश्चैवापवत्सश्चजयोरंध्रस्तथैवच मध्येनवपदोब्रह्मानस्यैतस्यसमीपगाः प्राच्याद्यंतरितादेवाःपरितोब्रह्मणःस्मृताः अर्यमासविताचैवविवस्वा
न्विबुधाधिपः मित्रोथराजयक्ष्माचतथापृथ्वीधरःक्रमात् आपवत्सोष्टमःपंचचत्वारिंशत्सुरोत्तमाः ज्ञात्वैवंस्थाननामानिब्रह्मणासहितान्यजेत्ता
वास्तुज्ञोवास्तुमंत्रेणगंधपुष्पाक्षतादिभिः प्रणवेनार्चयेद्वापिअथवास्वस्वनामभिः शुक्लवस्त्रयुगंदद्याद्धूपदीपफलैःसह अपूपैर्भक्ष्यैर्नैवेद्यैः
वाद्यैःसहसमर्चयेत् तांबूलंचततोदद्याद्देवेभ्यश्चपृथक्पृथक् दत्वापुष्पांजलिंकर्ताप्रार्थयेद्वास्तुपुरुषं वास्तुपुरुषनमस्तेस्तुभूशय्यानिरतप्रभो
मद्गृहं धनधान्यादिसमृद्धंकुरुसर्वदा इतिप्रार्थ्यततोदद्याद्दक्षिणामर्चकायच विप्रेभ्योभोजनंदत्वास्वयंभुंजीतबंधुभिः एवंयःकुरुतेसम्यग्वास्तु
पूजांप्रयत्नतः आरोग्यंपुत्रपौत्रादिधनंधान्यंलभेन्नरः वास्तुपूजामकृत्वायःप्रविशेन्नवमंदिरं रोगान्नानाविधान्क्लेशानश्नुतेबहुसंकटं इतिव
सिष्ठसंहितायांवास्तुशांतिः नारदादयःपंचांगशुद्धिमात्रयुक्तेपूर्वदिनेएववास्तुपूजामाहुः विधायपूर्वदिवसेवास्तुपूजांबलिक्रियामिति तृतीय
श्लोकार्धस्यटीका अथलग्नशुद्धिंतिथिवारशुद्धिंचोपजातिकोत्तरार्द्धेनेंद्रवज्रयाह त्रिकोणेति शुद्धांबुरंध्रइति नवमपंचमप्रथमचतुर्थसप्तमद
शमैकादशद्वितीयतृतीयस्थानानामन्यतमस्थानस्थितैःशुभैरुपलक्षिते तथातृतीयषष्ठैकादशस्थानस्थैःपापग्रहैरुपलक्षितेच तथांबुचतुर्थ
स्थानंरंध्रमष्टमस्थानंतस्मिन्शुद्धेसर्वग्रहरहितेअंबुरंध्रेयस्मिंस्तादृशेलग्नेगृहंविशेत् कीदृशेलग्नेविजनुर्भमृत्योभराशिलग्नंचजनुषि
जन्मकालेभंजनुर्भंताभ्यांमृत्युरष्टमभवनं जनुर्भमृत्युःविगतोजनुर्भमृत्युर्यस्मिन्स्वजन्मलग्नात्स्वजन्मराशेर्वाऽष्टमराशिःप्रवेशलग्नेनप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु॰टी॰ क्षिनइत्यर्थः पुनः कीदृशे लग्ने व्यर्कारिरिक्ताचरदर्शचैत्रे अर्को रो प्रसिद्धो वारो रिक्ता ४।९।१४ उपलक्षणत्वाद्दग्धतिथयोपि चरलग्नानि मेषकर्कतु
गृ॰प्र॰ लामकराख्यानि तद्दंशाश्च दर्शोमावास्या चैत्रमासः विगता अर्कादयो यस्मिन् अर्कादयः प्रवेशादिने निषिद्धा इत्यर्थः अग्र इति गृहप्रवेशसमये ज
११८ लपूर्णकलशं लसंमुखं कृत्वा द्विजान्ब्राह्मणांश्चाग्रे कृत्वा वेश्म गृहं विशेत् वसिष्ठः कृत्वाग्रतः पृष्ठतो वामतोर्कं विप्रान्पूज्यानग्रतः पूर्णकुंभं रम्यं गृहं म्यो
तोरणस्रग्वितानैः स्त्रीभिः स्रग्वीगीतवाद्यैर्विशेतदिति अयं विधिः प्रवेशे साधारणः कीदृशं वेश्मभकूटशुद्धं भकूटं षष्ठाष्टकादि उपलक्षणत्वा
द्विवाहप्रकरणोक्तं वर्णावश्यं तथाताराख्यादिकं च तेनापि शुद्धं वसिष्ठः राशिकूटादिकं सर्वं दंपत्योरिव चिंतयेदिति ४ अथ वामगतार्कं ज्ञानं पूर्वादिमु
खगृहप्रवेशं चेंद्रवंशयाह वामोरविरिति अष्टमपंचमद्वितीयैकादशस्थानेभ्यः पंचसुस्थानेषु स्थितेरवौ सति प्राग्वदनादिके मंदिरे प्रवेष्टव्यगृहप्रवे

शुद्धं ध्रुवं धेविजनुर्भमृत्यो व्यर्कारिरिक्ताचरदर्शचैत्रे अग्रेंबुपूर्णकलशं द्विजांश्च कृत्वा विशेद्वेश्मभकूटशुद्धं ४ वामोरविर्मृ
त्युसुतार्थलाभतोर्के पंचमे प्राग्वदनादिमंदिरे पूर्णातिथौ प्राग्वदने गृहे शुभो नंदादिके याम्यजलोत्तराननेः ५ ॥ ९ राम

शेकर्तुर्वामोरविर्ज्ञेयः यथा तस्मिन्लग्ने गृहप्रवेशः कर्तुमिष्यते तस्माद्दष्टमं यत्स्थानं ततः पंचसुस्थानेषु अर्के सति पूर्वाभिमुखे गृहे प्रवेशकर्तुर्वामः
सूर्यः स्यात् तथा लग्नाद्यत्पंचमस्थानं ततः पंचसुस्थानेषु रवौ स्थिते दक्षिणाभिमुखे वामोर्कः तथैव लग्नाद्यद्द्वितीयस्थानं ततः पंचसुस्थानेषु रवौ राम
स्थिते पश्चिमाभिमुखे वामोर्कः तथैव लग्नाद्यदेकादशस्थानं ततः पंचसुस्थानेषु सूर्ये स्थिते उत्तराभिमुखे गृहे प्रवेशकर्तुर्वामः सूर्य इत्यर्थः उक्तं ११८
च रंध्रात्सुतात्द्धनाद्दायात्पंचस्वर्के स्थिते क्रमात् पूर्वाशादिमुखं गेहं विशेद्वामो भवेद्यतः इति पूर्णातिथाविति प्राग्वदने पूर्वाभिमुखे गृहे पूर्णातिथौ पं
चम्यां दशम्यां पूर्णिमायां वा प्रवेशः नंदादिके तिथिगणे याम्यजलोत्तराननेगृहे प्रवेशः शुभः यथा दक्षिणाभिमुखे गृहे नंदायां प्रतिपदि षष्ठ्यामेका
दश्यां वा प्रवेशः शुभः जलपश्चिमादिक् तद्दिङ्मुखे गृहे भद्रायां द्वितीयायां सप्तम्यां द्वादश्यां वा प्रवेशः शुभः उत्तराभिमुखे गृहे जयायां तृतीया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मुरुः नैन्दायां दक्षिणद्वारं भद्रायां पश्चिमामुखं जयायामुत्तरद्वारं पूर्णायां पूर्वेनोविशेदिति ५ अथ प्रवेशकलशवास्तुचक्रं शार्दूलविक्रीडितेनाह वक्त्रेभू रिति गृहप्रवेशसमय इति सर्वत्रापि संबध्यते कुंभे कलशाकृति वास्तोर् विभात् सूर्याक्रांतनक्षत्रात् त्यपलोपे पंचमी रविभमारभ्य कलशस्य मुखे भू रेकं सूर्याक्रांतनक्षत्रमेकस्याप्यं तत्फलं गृहस्याग्निदाहः ततः सूर्यभात् कृताः अग्रिमाणि चत्वारि भानि प्राच्यां स्थाप्यानि फलमुद्वसनं जनवास शून्यत्वं स्यात् ततः कृतायमगताः तदग्रिमाणि चत्वारि भानि दक्षिणे स्थाप्यानि फलं गृहपतेर्लाभः द्रव्यप्राप्तिः ततः कृताः पश्चिमे तदग्रिमाणि चत्वारि भानि पश्चिमायां स्थाप्यानि फलं गृहपतेः श्रीप्राप्तिः ततो वेदा उत्तरे तदग्रिमाणि चत्वारि भानि उत्तरस्यां स्थाप्यानि फलं कलिः लोकैः सह गृहसंबंधीनि रर्थको वादः स्फुकटः कस्यात् ततो युगमिताः तदग्रिमाणि चत्वारि भानि गर्भे कलशमध्ये स्थाप्यानि फलं विनाशो गर्भस्यैवेत्यर्थः ततो रामाः तदग्रिमाणि त्री

वक्त्रे भूरविभात् प्रवेशसमये कुंभेऽग्निदाहः कृताः प्राच्यामुद्वसनं कृतायमगता लाभः कृताः पश्चिमे श्रीर्वेदाः कलिरुत्तरे युग
मिता गर्भे विनाशो गुदे रामाः स्थैर्यमतः स्थिरत्वमनलाः कंठे भवेत्सर्वदा ६॥

णि भानि गुदे बुध्ने स्थाप्यानि फलं स्थैर्यं गृहपतेर्बहुकालं तत्र निवासः ततोऽनलाः तदग्रिमाणि त्रीणि भानि कंठे स्थाप्यानि फलं स्थिरत्वं गृहपतेर्भवेत् एवमभिहितानि सप्तविंशति भानि स्युः ज्योतिःप्रकाशे भूर्वे दपंचकं त्रित्रिः १।४।४।४।४।४।३।३ प्रवेशे कलशेऽर्कभात् मृतिर्गतिर्धनं श्रीः स्यादरिः शुक्स्थिरता सुखमिति अत्र कलशचक्रे शुभफलस्यानपतिसन्येव। विहितनक्षत्राणां परिग्रहो युक्तस्तथापि यद्दिङ्मुखे प्रवेशविधित्सितस्तद्दिङ्मुखं नक्षत्रपरिग्रहः यथा पूर्वस्यां प्रवेशे विधित्सिते रोहिणी मृगो वा ग्राह्यः द क्षिणमुखगृहप्रवेशे उत्तराफाल्गुनी चित्रे एव पश्चिमाभिमुखे अनुराधोत्तराषाढे एव उत्तराभिमुखे उत्तराभाद्रपदा रेवत्यौ ग्राह्ये इति निष्कृष्टोऽर्थः अत एवोक्तं वसिष्ठेन यद्दिग्द्वारं मंदिरं तद्दिगृक्षैः रुक्तैः स्यात्तन्निवेशो न सर्वैरिति तद्दिगृक्षैः रितिवानयोः समानाधिकरण्येनान्वयः भिन्नवाक्यत्वे तु चक्रा रः कर्तव्यः स्यात् अत एव चार्कानिलार्यादितिदस्रविष्णुक्षमेप्रविष्टं नवमंदिरं यत् अब्दत्रयात् तत्परहस्तयाति शेषेषु धिष्ण्येषु च मृत्युदं स्यादिति नाष

CC-0. In Public Domain. Digitization by eGangotri

मु.टी. अथगृहप्रकरणप्रवेशोपसंहारं सूचयन् प्रवेशोत्तरकालीनकर्तव्यविधिमुपजात्याह एवंसुलग्नेइति एवंप्रागुक्तप्रकारेणविचारितसुलग्नेशोभन
गृ.प्र. गुणयुतेस्थिरराश्यादिकेराजावितानपुष्पश्रुतिघोषयुक्तं वितानानिवसुमंडपाः पुष्पाणिस्वकालतुजानिमालत्यादीनिश्रुतिघोषोवेदध्वनिश्चतैर्युक्तं
११७ उपलक्षणत्वात्तोरणाद्यनेकमांगल्यवस्तुसहितमेताद्दशंस्वसत्ताकंगृहंप्रविश्यपश्चात् शिल्पज्ञान्गृहोत्थापकानस्थपतिवर्द्धक्यादीन्देवज्ञान्ज्यो
तिर्विदः विधिज्ञान्वास्तुपूजाभूतबलिगृहप्रवेशविधिज्ञान् पुरोहितप्रभृतीन् पौरान्नागरिकान् पंडितदीनानाथांधकृपणांश्च भूमिहिरण्यव
स्त्रैर्यथाशक्तयाव्यस्तैः समस्तैर्वा उपलक्षणत्वादश्वादिभिर्वाअर्चयेत्पूजयेत् अत्रविशेषमाहवसिष्ठः यद्वास्तुपूजारहितंत्वदत्तबलिंत्वनाच्छन्नगृ
हंविरूपंकपाटहीनंनविशेद्यतस्तत्सर्वोऽपदामालयमेवतत्स्यादिति तस्मात्सकपाटमुपरिष्टाच्छादितंकृतवास्तुपूजादत्तबलिमेवगृहंप्रविशेत् प्रवे

एवंसुलग्नेस्वगृहंप्रविश्यवितानपुष्पश्रुतिघोषयुक्तं शिल्पज्ञदैवज्ञविधिज्ञपौरान्राजार्चयेद्भूमिहिरण्यवस्त्रैः ७ इतिदैव
ज्ञरामविरचितमुहूर्तचिंतामणौगृहप्रवेशप्रकरणंत्रयोदशं १३ आसीद्धर्मपुरेषडंगनिगमाध्येतृद्विजैर्मंडिते ज्योतिर्वित्ति
॥लकः फणीद्ररचितभाष्येकृतातिश्रमः॥

शोत्तरविधिमाह श्रीपतिः ततोनृपोविप्रसुहृत्सुरेधसः शिल्पज्ञभूगोलविदश्चलिंगिनः धनेश्वरै
तैः पश्वभिः समर्चयन्सदाधदीनान्पुरवासिनस्तथेति ७ इतिगृहप्रवेशप्रकरणं अथग्रंथसमाप्तौपितामहवर्णनंशार्दूलविक्रीडितेनाह आसीदि
ति धर्मपुरेनर्मदातीरग्रामविशेषेसप्रसिद्धश्चिंतामणिरासीत् किंभूतेधर्मपुरेषडंगानिशीक्षादीनितानिविद्यंतेयस्यएतादृशोयोनिगमोवेदस्तद
ध्येतारोयेद्विजाब्राह्मणादयस्तैर्मंडितेभूषिते कीदृशश्चिंतामणिर्ज्योतिर्वित्तिलकइवतिलकः ज्योतिर्विच्छ्रेष्ठइत्यर्थः पुनः कीदृशः फणीद्रः शेष
नागः तद्रचितेभाष्येमहाभाष्येकृतोतिश्रमोऽत्यभ्यासोयेन पुनः कीदृशश्चिंतामणिः ततज्जातकसंहितागणितकृत् तानितानिस्वल्पबृहदादिभे
देनानेकविधः जातकानिजातकशास्त्राणिसंहिताः संहिताशास्त्राणिकरोतितादृशः गणितानिगणितशास्त्राणिकरोतितादृशः पुनः कीदृशः
महाभुजानांमान्यः पूज्यः पुनः कीदृशः तर्कोलं ॥ राम. ११७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतिर्वेदवाक्यविलसद्बुद्धिः तर्को न्यायशास्त्रं अलंकृतिरलंकारशास्त्रं वेदवाक्यं वेदवाक्यविचारप्रतिपादको ग्रंथो मीमांसशास्त्रं वेदांतशास्त्रं च तेषु विलसती विलासयुक्ता बुद्धिर्यस्य सः ८ अथक्रमप्राप्तं तातवर्णनं तेनैव वृत्तेनाह ज्योतिर्विदिति तत्सूनुस्तस्य चिंतामणिदैवज्ञस्य सूनुः पुत्रोऽनंत इति नाम्ना प्रथां ख्यातिमधिगतः प्राप्त आसीत् कीदृशः ज्योतिर्विद्गणवंदितांघ्रिकमलः ज्योतिर्विदांगणेन समूहेन वंदितं चरणकमलं यस्य सः पुनः कीदृशः भूमंडलेऽहस्कर इव अध्यापनद्वारा प्रकाशइत्यर्थः पुनः कीदृशः कृती कुशलः ग्रंथकरणसमर्थ इति शेषः ग्रंथकर्तृत्वमेवोत्तरार्द्धेन प्रकाशयति योरम्यामिति रम्यां जनिपद्धतिं जातकपद्धतिं दुष्टाशयध्वंसिनी दुष्टाः जन्मपद्धतिमार्गसंप्रदायानभिज्ञास्तेषामाशयमभिप्रायं ध्वंसयति इति दुष्टाशयध्वंसिनी ता

तत्तज्जातकसंहितागणितकृन्मान्यो महाभूभुजां तर्कालंकृतवेदवाक्यविलसद्बुद्धिः स चिंतामणिः ८ ज्योतिर्विद्गणवंदितांघ्रिकमलस्तत्सूनुरासीत्कृती नाम्नानंत इति प्रथामधिगतो भूमंडलाहस्करः यो रम्यां जनिपद्धतिं समकरोद्दुष्टाशयध्वंसिनीं टीकां चोत्तमकामधेनुगणितेऽकार्षीत्सतां प्रीतये ९ तदात्मज उदारधीर्विबुधनीलकंठानुजो गणेशपदपंकजं हृदि निधाय रामाभिधः गिरीशनगरे वरे भुजभुजेषुचंद्रै १५२२ र्मिते शके विनिरमादिमं खलु मुहूर्तचिंतामणिं १० ॥ इति श्रीदैवज्ञरामविरचितं मुहूर्तचिंतामणिं समाप्तिमगमत् । १३ ॥

मकरोत् तथा उत्तमे ब्रह्मपक्षार्यपक्षप्रतिपादके कामधेनुगणिते ग्रंथविशेषे टीकां च सतां प्रीतयेऽकार्षीत् इत्यर्थः ९ अथ स्वनामकथनपूर्वकं ग्रंथसमाप्तिं पृथ्वीछंदसाह तदात्मज इति तस्यानंतस्यात्मजो रामाभिधो गिरीशनगरे वाराणस्यां मुहूर्तचिंतामणिं मुहूर्तचिंतामणिनामधेयं ग्रंथं भुजभुजेषुचंद्रैः १५२२ मिते शके द्वाविंशत्यधिकपंचदशशतमिते शाके विनिरमात् कार्षीत् शेषं स्फुटं १०

॥ इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचितायां स्वकृतमुहूर्तचिंतामणिटीकायां प्रमिताक्षरायां गृहप्रवेशप्रकरणं त्रयोदशं संपूर्णम् समाप्तं ॥ श्रीरस्तु ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री

प्रमिताक्षरासहितमुहूर्त
चिंतामणिपुस्तकमिदम्

संवत् १९०८ फाल्गुणशु
क्लपौर्णिमायांमिदंग्रंथंस
माप्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०४० ४०४०

श्री ५ को सरकार
संस्कृत

॥श्रीकाशीविश्वनाथपुरीमेंआदिविश्वेश्वरकेपासमहल्लाघुघुरानासामाकीगलीबाबूसाहेववावूहरखचंद॥
॥जीकेवाडामेंगनेसछापेखानेमेंरामप्रशादकेहिंआाहहज्जातकभट्टोत्पलीटीकासहितछापागयावावूलाल॥
॥छापनेवालेसेलिखतंनाथूरामतिवारीजिसकोलेनाहोयउसेढुंढिराजगणेशकेपासदाऊपोथीवालेकीदुका॥
॥नमेमिलेगीसम्वत् १९११॥ ज्॥मितिजेष्टवदीत्रयोदस्याम्॥वुधवासरे॥शुभम्॥ ॥९॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृ॰ ॥श्रीगणेशायनमः॥ ॥ब्रह्माजशंकररवींदुकुजज्ञजीवशुक्रार्कपुत्रगणनाथगुरून्प्रणम्य योस्मन्महोर्णवरलाभविद्दद्धिबुद्धेरावंनिकस्यनमहंविवृणोमिकृत्स्नं १
टी॰ मु॰ यच्छास्त्रंसविताचकारविपुलैःस्कंधैस्त्रिभिर्ज्योतिषंनस्योच्छित्तिभयात्पुनःकलियुगेसंसृत्ययोभूतलं भूयःस्वल्पतरंवराहमिहरव्याजेनसर्वंव्यधादित्यंयंप्रवदं
१ तिमोक्षकुशलास्तस्मैनमोभास्वते २ वराहमिहिरोदधौसुबहुभेदतोयाकुलेग्रहर्क्षगणयादसिप्रचुरयोगरत्नोज्वले भ्रमंतिपरितोयतोल्पधियोर्थलुब्धास्ततःक
रोमिविवृतिप्लवंनिजधियाहमत्रोत्पलः ३ इहशास्त्रेकानिसंबंधाभिधेयप्रयोजनानिभवंतीत्युच्यते वाच्यावाचकलक्षणःसंबंधः वाच्योऽर्थोवाचकःशब्दःअ
थवाउपायोपेयलक्षणःसंबंधः उपायस्त्विदंशास्त्रमुपेयोयद्विज्ञानं अथवा आब्रह्मादिविनिःसृतमिदंवेदांगमितिसंबंधः राशिस्वरूपंहोराद्रेष्काणनवांशकद्वा
दशभागत्रिंशांशांगपरिज्ञानं ग्रहस्वरूप ग्रहराशिबलाबलं वियोनिजन्मधानपरिज्ञानं जन्मकालविस्मापनप्रभावकयनारिष्टायुर्दायदशांतर्दशाष्टकव
र्गकर्म्माजीवराजयोगनाभसयोगचंद्रयोगद्विग्रहादियोगप्रव्रज्याराशिशीलदृष्टिफलभावफलाश्रयप्रकीर्णानिष्टयोगस्त्रीजातकनिर्याणनष्टजातकद्रेष्काण
सताप गुणस्वरूपमभिधेयं लोकानांप्राक्कर्मविपाकव्यंजकत्वंप्रयोजनं सत्यात्रशुभाशुभकथनात् इहलोकपरलोकसिद्धिरितिप्रयोजनकथनम् किमेभिरुक्तै ग
रित्यत्रोच्यते यस्मान्नृणाश्रोतॄणांसंबंधाभिधेयप्रयोजनकथनाच्छास्त्रविषयेश्रद्धाजायतेति तथाचोक्तं सिद्धिःश्रोतृप्रवृत्तीनांसंबंधकथनाद्यतःतस्मात्सर्वेषु
६ शास्त्रेषुसंबंधकमनुच्यते किमेवात्राभिधेयंस्यादितिपृष्टस्तुकेनचित् यदिनप्रोच्यतेतस्मैफलशून्यंतुतद्भवेत् सर्वस्यैवहिशास्त्रस्यकर्म्मणोवापिकस्यचित् राम
यावत्प्रयोजनंनोक्तंतावत्तत्केनगृह्यते कस्मिंश्शास्त्रेऽधिकारइति उच्यते द्विजस्यैव यतस्तेनषडंगोवेदोध्येतव्योज्ञातव्यश्च कान्यंगानीत्युच्यते शिक्षाक
ल्पोव्याकरणंनिरुक्तंज्योतिषांगतिः छंदसांलक्षणंचेतिषडंगोवेदउच्यतेइति सतामयमाचारोयः यत्शास्त्रप्रारंभेष्वभिमतदेवतायानमस्कारेणतत्स्तुत्यावात
द्भक्तिविशेषेणवाभिमतार्थसिद्धिंवांछंति तदयमप्यवन्तिकाचार्य्यःश्रीवराहमिहिरोनामाद्विजोऽर्कोल्लब्धवरप्रसादोज्योतिःशास्त्रसंग्रहकृन्मणित्स्कंधादनंत
रंहोरास्कंधंविकीर्षुरशेषविघ्नोपशान्त्यर्थंभगवतःसूर्य्यादात्मगामिनींवाक्सिद्धिंशार्दूलविक्रीडितेनाह मूर्तित्वेपरिकल्पितःशशभृतो वर्त्माऽपुनर्जन्मनामात्मेत्यात्मविदांक्रतुश्चयजतांभर्त्ताऽमरज्योतिषाम् । लोकानांप्रलयोद्भवस्थितिविभुश्चानेकधायःश्रुतौवाचंनःसददात्वनेककिरणस्त्रैलोक्यदीपोरविः ॥ नः अस्मभ्यंवाचंगिरंददातुप्रय
=३४ तथाचोक्तम् वेदाहियज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्याविहिताश्चयज्ञाः तस्मादिदंकालविधानशास्त्रंयोज्योतिषंवेदसवेदयज्ञानिति ॥३=

CC-0. In Public Domain. Digitization by eGangotri

क्रतुयोसौरविः अनेककिरणः अनेकः किरणोयस्यसः अनेककिरणः प्रभूतरश्मिः सहस्ररश्मिरित्यर्थः त्रैलोक्यदीपः त्रयोलोकास्त्रैलोक्यं भूर्भुवः स्वरस्तं
तत्रदीपः प्रभास्यमानत्वात् तथाच मूर्त्तित्वेपरिकल्पितः शशभृतः शशंप्राणिविशेषंबिभर्त्तिधारयतीतिशशभृच्चंद्रमास्तस्यमूर्त्तित्वेशरीरत्वेपरिकल्पितः पर्य्यै
वस्थापितः यतोजलमयश्चंद्रः प्रकाशशून्यः प्रोक्तः तस्मिन्स्तरणिकिरणप्रतिफलनादितरस्यज्योत्स्नाप्रसरः विस्तरः यस्मादुक्तं सलिलमयेशशिनिरवेर्दी
धितयोमूर्छितास्तमोनैशं क्षपयंतीतिदर्प्पणोदरनिहिताइवमंदिरस्यांतरं इति तथाचवेदे सुषुम्णः सूर्य्यरश्मिश्चंद्रमाइति अथवाशशिभृतइतिपाठः शशि
भृतोमहादेवस्यमूर्त्तित्वेपरिकल्पितः यतोसौभगवानष्टमूर्त्तिः क्षितिजलपवनहुताशनाकाशयजमानसोमसूर्य्याख्याइतिअष्टौमूर्त्तयस्तस्य माहेश्वरीमूर्त्तिःसू
र्य्यइत्यर्थः शशिभृतइतिसाधुपाठः तथावर्त्मा ; पुनर्ज्जन्मनांनपुनर्ज्जन्मविद्यतेयेषांते अपुनर्जन्मानः मुक्तास्तेषांवर्त्ममार्गमोक्षद्वारमित्यर्थः यतोद्विविधोमा

श्रीगणेशायनमः मूर्त्तित्वेपरिकल्पितःशशभृतोवर्त्मापुनर्ज्जन्मनामात्मेत्यात्मविदांक्रतुश्चयजतांभर्त्तामरज्योतिषां॥

र्गः देवयानाख्यःपितृयानाख्यश्च तत्रपितृयानमार्गद्वारभूतश्चंद्रमाः येनस्वर्गगामिनः स्वर्गंगच्छंति मोक्षद्वारंसूर्य्यः यतः सूर्य्यमंडलंभित्वामोक्षभाजोग
च्छंति तथाचाहभगवान्व्यासः स्वर्गद्वारंप्रजाद्वारंमोक्षद्वारंत्रिविष्टपमिति आत्मेत्यात्मविदामिति आत्मानंविंदंतीत्यात्मविदोयोगिनस्तेषांसएवात्माक्रि
त्वंतेजोरूपंहृदयांतरेस्थितः तथाचश्रुतिः सूर्य्यआत्माजगतस्तस्थुषश्चेति जगतोजंगमस्यतस्थुषः स्थावरस्य क्रतुश्चयजतां यजतांयजमानानांसएवक्रतु
र्य्यंतः युदुक्तं अग्नौप्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति भर्त्तामरज्योतिषां अमरादेवाःज्योतींषिग्रहनक्षत्रा
दीनितेषांभर्त्ताप्रभुः प्रधानइत्यर्थः यतः सर्वेदेवास्तस्योपस्थानंकुर्वंति ग्रहनक्षत्राणांचतद्दर्शनोदयास्तमयाः यदुक्तं तेजसांगोऽलकःसूर्य्योः ग्रहक्षोण्यं
बुगोलकानांप्रकाशकः प्रभावंतोहिदृश्यंतेसूर्य्यरश्मिप्रदीपिताइति एवंगुणाधिक्यादमरज्योतिषांप्रभुः लोकानांप्रलयोद्भवस्थितिविभुः द्विकिर्भूरितिलो
कोःभूर्लोकादयस्तेषांप्रलयोविनाशो॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ·टी ऊद्भवो उत्पत्तोस्थितौ पालने प्रभुर्विभुः भगवतः अतीतवर्त्तमानभाविकालत्रयपरिच्छेदचिन्हभूतत्वात् चशब्दोत्रावधारणे अनेकधायः श्रुतौ श्रुतौवेदे यो

भं· ऽनेकधाऽनेकप्रकारैः प्रगृह्यते तथाचोक्तं इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यः ससुपर्णो गरुत्मान् एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुरित्यादि॥

२ अधुनास्य शास्त्रस्य परप्रणीतत्वादानार्थक्यं परिजिहीर्षुस्तथान्यशास्त्रेभ्योस्य गुणत्वं प्रदर्शयन् शार्दूलविक्रीडितेनाह १ भूयोभिरिति होरायास्तंत्रं होरातंत्रं॥

अथवा होरा एव तंत्रं होरातंत्रं तदेव महार्णवो दुःपारत्वात् विस्तन्यते विस्तार्यते येनार्थस्तत्तंत्रं अहं होरातंत्रमहार्णवप्रतरणे भग्नोद्यमानां शास्त्रप्लवं प्रारभे होरा

तंत्रमेव महार्णवो महासमुद्रः तत्प्रतरणे प्रतरणविषये भग्नोद्यमानामवसन्नोत्साहानां शास्त्रप्लवं प्रारंभे करोमि शास्त्रमेव प्लवः शास्त्रप्लवः तत् शास्त्रप्लवं य

थाप्लवोत्तितीर्षूणां पारं पारगमनमाशु संपादयति तथेदमपि होरातंत्रमहार्णवप्रतरणे भग्नोद्यमानामित्यस्य प्लवेन साधर्म्यं केनकृतो होरातंत्रमहार्णवप्रतरणे

लोकानांप्रलयोद्भवस्थितिविभुश्चानेकधायः श्रुतौ वाचं नः स ददात्वनेककिरणस्त्रैलोक्यदीपो रविः॥१॥

भूयोभिः पटुबुद्धिभिः पटुधियां होराफलज्ञप्तये शब्दन्यायसमन्वितेषु बहुशः शास्त्रेषु दृष्टेष्वपि॥ ॥ ॥

भग्नोद्यमानामित्यत्र आह भूयोभिरिति भूयोभिर्बहुतरैः किंभूतैः पटुबुद्धिभिः पट्वी बुद्धिर्येषां ते पटुबुद्धयश्चतुरप्रज्ञाः तैः शास्त्रेषु दृष्टेषु विरचितेष्वपि सत्सु॥

किंभूतेषु शब्दन्यायसमन्वितेषु शब्दानां न्यायः शब्दन्यायः मीमांसा तदुक्तं शब्दानामेव शास्त्रोक्तिः स्तकौयः पुरुषाश्रयेति अथवा शब्दाश्च न्यायाश्च

शब्दन्यायाः शब्दोर्थवान्न्यायो मीमांसा तैः समन्वितेषु संयुक्तेषु किमेकवारं दृष्टेष्वित्याह बहुशः इति बहून् वारान् बहुशः न्यायसमासैर्बहुप्रकारैरचिते

षु इत्यर्थः किमर्थं दृष्टेषु पटुधियां होराफलज्ञप्तये चतुरबुद्धीनां होराफलार्थावबोधनाय प्राक्तनकर्मविपाको होरा होरायाः फलं तस्य ज्ञप्तिः तत्फलं शुभा शुम

शुभं तत् ज्ञानाय किंभूतं शास्त्रप्लवं स्वल्पं लघुग्रंथं च वृत्तविचित्रं वृत्तैः शार्दूलविक्रीडितप्रभृतिभिर्विचित्रं रम्यं तस्मात्स्वल्पार्थत्वैवास्य गुणत्वं यतस्तेषामत्रा २

प्युद्यमभंगो न भवति स्वल्पमित्यनेन ग्रहणधारणे सुखतां प्रदर्शयति तथा च हस्तिवैद्यकरो वीरसोमः समासोक्तस्य शास्त्रस्य सुखं ग्रहणधारणे वृत्तवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री ५ को सरकार
वाल्मीकि संस्कृत महाविद्यालय
४०४२

श्रीकाशीविश्वनाथपुरीमेढुंढिराजगणेशकेपाशदाऊअग्निहोत्रीकेयहांसिद्धविनायकयंत्रमेभास्व-
नीउदाहरणसहितछापागयालिखागयादत्तपाण्डे छापनेवालाभैरो जिसेलेनाहोयउसेढुंढिराज
गणेशपर दाऊपोथीवालेकीदुकानपरमिलेगी श्रीसम्वत्१९२८ मि० भाद्रपदशुक्ल ९ गुरौ० ॥०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा०टी० श्रीगणेशायनमः श्रीसूर्यायनमः॥ सर्वानन्दंसर्गस्थितिप्रलयहेतुंत्रिजगतोहृदिस्थंध्यायंतिद्रुहिणहरमुख्यादिविबुधः यमाद्यंयोगेशंनिगमतरमव्यक्तम
१ परंनमस्तस्मैकस्मैचिद्भवभयविध्वंसपटवे १ कंसारिपादकमलार्चनपूतचित्तः श्रीकान्यकुब्जवसतिः करणेनमस्य कन्दर्प्पजोगणितविद्गणकाभिरामां
टीकांव्यधादनुपमामिहमाधवाख्यः २ अत्रशतानंदस्तावदयमाचार्य्योयत्नवकृ श्रोत्रध्येतृणामात्मनश्चांतरायोपशमनायग्रंथारंभसमयेमंगलमा
चरति तदपिशतानन्दोमहगणितकुशलः सर्वविघ्नोपशमनायशिष्टाचारपरिप्राप्तंनिजवैष्णवत्वप्रतिपादकंविशेषेणेष्टदेवतानमस्काररूपंमंगल
मिंद्रवज्रयाह नत्वेति शतानन्दनामकः प्रसिद्धोयमाचार्य्यवर्य्यः तांप्रसिद्धांभास्वतः सूर्यस्येयंभास्वतीतांसूर्यसिद्धान्तमतानुसारणीमित्यर्थः कांतांस्वा
त्मनीतिकर्त्तव्यतयाधृतां किमर्थंशिष्यहितार्थं किंकृत्वामुरारेश्चरणारविन्दंनत्वा मुरस्यारिर्मुरारिस्तस्यभगवतः पादपद्मंनत्वानमस्कृत्य किंविशिष्टःशता

श्रीगणेशायनमः॥ नत्वामुरारेश्चरणारविन्दंश्रीमाञ्छतानन्दइतिप्रसिद्धः तांभास्वतींशिष्यहितार्थमाह शाकेविहीनेशशिपक्षखैकैः
१०२१॥ १ शाकोनवाद्रीन्दुकृशानुयुक्तः ३१७९ कलेर्भवत्यब्दगणस्तुवृत्तः वियन्नभोलोचनवेद४२०० हीनः शास्त्राब्दपिंडः कथितः सएव॥
२ अथप्रवक्ष्येमिहिरोपदेशात्तत्सूर्यसिद्धान्तसमंसमासात्॥ (नंदः श्रीमान्श्रीः शोभातयायुक्तः कस्मिन्समयेशशिपक्षखैकैः १०२१ विहीनेशाके
शशीचपक्षौचखंचएकंचतैर्विवर्जितेत राश्यादीनांसंज्ञालोकव्यवहारादवगंतव्या शकोनाम अनेकराजानस्तेयस्मिन्समयेविक्रमादित्येनव्यापादिताः सका
लोलोकेशकइतिप्रसिद्धः सचगोगैकगुण ३१७९ संख्येकलियुगाब्देगतेषुसौरवर्षेषुप्रवृत्तः ततआरभ्यगतवर्षगणः शाकाब्दमिते १०२१ तीतस्तेनोनितेषुशका
ब्दगणेशास्त्राब्दपिंडोभवतीतिभावः १ अथापरप्रकारेणशास्त्राब्दपिंडानयनं शाकोनवेति क्षेपकोयंप्रसिद्धःस्पष्टार्थः २ अथसूर्यध्रुवानयनं अथेति मंगला राम
नन्तरंतद्भास्वतीकरणंसमासात्संक्षेपतः श्रीसूर्यसिद्धांतसमंयथास्यात्तथाप्रवक्ष्येकस्मात् मिहिरोपदेशात् मिहिरःसूर्यः तस्योपदेशात सूर्यसिद्धांतज्ञानादित्यर्थः १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शास्त्राब्दपिंडः इतिकर्मेध्रुवो स्थापितः पूर्वोक्तः शास्त्राब्दपिंडः स्वरशून्यदिग्घ्नः कर्तव्यः सप्तोत्तरसहस्रेण १००७ गुणनीयः अष्टशतैर्विभक्तः ८०० अष्टशतै हेरणी यः ३ हृतेयल्लब्धंतन्नगैः ७ शेषितं सप्तहृतावशिष्टं अंगषट् युक्तंकर्तव्यं षड्युक्तोंकोयदिसप्ताधिकोभवति तदासप्तशोधितः सप्तोनश्चेत्तदायथावस्थितएवसूर्या दिगणनयासंवत्सरपालकोभवति तद्यथा एकावशिष्टेसूर्यः संवत्सरपालकः द्वाभ्यांचंद्रइत्यादि सप्तशेषैर्यत्रशून्यं तत्रशनिः पालकः मेषसंक्रांतिदिना द्वितीयंध्रु वकदिनंतस्मिन्पालकएववारः स्यात् उक्तंच यः पालकः पूर्वमिहागतस्तुसएववारोध्रुववासरस्येति उपस्थितसंवत्सरपालकमारभ्यवारान्गणयेत् नतुसूर्या दितः तत्रसएवाद्योवारः शेषंहरेमोह्यइति अष्टशतभक्तशेषं हरेअष्टशते ८०० मोह्यमपात्यवशिष्टंस्थानद्वयेकर्तव्यं तत्रैकस्थानस्थितस्यांकस्यशुद्धिरितिसंज्ञा अपरस्थानस्यादंकाद्गजाशालब्धं अशेत्तरशतेनाप्तं १०८ सूर्यभुक्तांशकाभवन्ति तत्रायंक्रमः प्रथमंलब्धांशकाः शेषंषष्ट्यासंगुणय्पूर्ववद्धृतेलब्धाकलापुनः

शास्त्राब्दपिंडः स्वरशून्यदिग्घ्न १००७ स्तानाग्नियुक्तो ३४९ ष्टशतै ८०० र्विभक्तः ३ लब्धंनगैः ७ शेषितमंगषट् युक्तं सूर्यादिसंवत्सरपालकः स्या

त् शेषंहरेमोह्य ष्टयगजाप्ता १०८ लब्धं रवेरौदयिकोध्रुवः स्यात् ४

(शेषंषष्ट्यासंगुणय्पूर्ववद्भागेनाप्तंविकलाइतिसर्वत्र अथांशादिकः सूर्य स्योदयकालिकोभवतीति अथवासना अस्मिन्ग्रंथेशतानंदेनसौरवर्षेग्रहाणांगतिवशादुत्पन्नगुणाकैः ध्रुवानयनंकृतंतत्रसौरवर्षमित्युच्यते तत्रसूर्यस्य भुक्तराश्यंशाभावाद्गुणकाभावः तदभावाद्ध्रुवकाभावः अत्रसूर्यस्यध्रुवकोत्पत्तिः कथितातत्रोच्यते सूर्यध्रुवकोचारगतिवशादानीतः यतः सूर्यसिद्धांतोक्तग णितक्रमेणानीतंसौरवर्षाद्दिनाद्यं ३६५। १५। ३१। ३१। २४। सप्तशेषितं १। १५। ३१। ३१। २४। इयंसौरसावनगतिः अनयायुक्त्याचभगणपूर्णसमयोऽग्रिमवर्षेभ गणपूर्णकालोजायते तस्मिन्वर्षेतत्कालसंभवाः सर्वेग्राह्याः अनुदिनमध्यमाभवन्ति अथातोयथोदयकालिकः सूर्योभवति तदर्थंध्रुवानयनं अथगुणकोत्प त्तिः १। १५। ३१। ३१। २४। एतेंकाः खखवसुभि ८०० र्हत्वाषष्ट्योपर्युपरिसंयोज्यजातोंक १००७। १८। ४०। ० समुदायः ऊर्द्ध्वंस्वरशून्यदिक्परिमितोगुणकोजातः शेषस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰टी संस्कारार्थं शास्त्रादपिंडवेदनवेंदुभिः १९४ विभज्य लब्धं खरशून्यदिग्घ्ने पिंडे योज्यं तदा संस्कृतो भवति अथ क्षेपकोत्पत्तिः अथारंभसमये चैत्रशुक्लद्वितीयायां श
२ निवासरे गतदंडः २६।१० विपः ३० एवंविधवेलायां भानोर्भगणं पूर्णं जातं तत्र सूर्यादिषड्गणाः पृथक् स्थापिताः शेषं घटिकादिकं २६।१०।३० अष्टशतैः ८०० संगुण्य
षष्ट्योपर्य्युपरि संयोज्य संजाता स्तानागनगः ३४९ अंगगुणमितियदुक्तं तत्रांगद्परिमितावाराः एवं क्षेपकः अथ भाजकोत्पत्तिः भगणकला २१६०० सप्तविंशति
भक्ताः लब्धान्यष्टशतानि ८०० शेषं हरे शोह्य इति मेषसंक्रमणादिवस्योदयकालिकग्रहानयनार्थं शेषमष्टोत्तरशतेनापनीयमित्युक्तं ष्ठथग्गजाशा लब्धमितिशुध्य
र्थं पृथक् धार्य्यं यतः शुध्या सर्वे महा उदयिकाः क्रियंते इदं करणं शतानंदेन सतां सन्निबद्धं तत्र सूर्यचंद्रपातानां शतेन भुक्तनक्षत्रं भवति भौमादीनां भुक्तराशिर्भवति।
अथ नक्षत्रकलाभ्योहारकोत्पत्तिः तद्यथा अष्टाहतानक्षत्रकला ६४०० रविभुक्त्या ५९।८ प्ताउत्पन्नाः गजाशा १०८ एवमौदयिकरविध्रुवानयनं कृतमिति ॥ ४ ॥

सहस्रनिघ्नः १००० खविधू १० निजाथः खसिद्ध २४० भागोनभचक्रशेषः २७०० खपंचप ५० संयुक्तदशा १० प्तशुद्धेश्चंद्राष्ट ८१ भागो
भ्यधिकः प्रष्णांकः ५ ॥
अथ चंद्रध्रुवानयनमाह सहस्रनिघ्न इति शास्त्राद्पिंडः सहस्रेण १००० निघ्नः खखखवेंदुगुणः कर्त्तव्यः पुनः खविधूनितः
कार्य्यः ततोऽधः पृथक् स्थापनीयः खसिद्धेत्यादि खसिद्धभागोनश्चासौ भचक्रशेषश्च सततथाभूतः एतदुक्तं भवति पृथक् स्थापितः खसिद्धै २४० हरेद्यल्लब्धं अंशादि
तेनोपरिस्थितांक ऊनः कार्यः पश्चान्नक्षत्रचक्रेण सप्तविंशतिशत २७०० परिमितेन भागमपहृत्य शेषः स्थाप्यः खपंचेत्यादि पूर्वोदितां शुद्धिं खपंच ५० संयोज्य
दशभि १० र्हृत्वां चंद्रवसुभि ८१ र्हरेत् यल्लब्धं अंशादितेन युक्तो भचक्र २७०० शेषोंको मध्यमचंद्रध्रुवको भवति खपंचसंयुक्ता च दशाप्ता च तथाविधा चासौ शुद्धिश्च तत
स्याश्चंद्राष्टभागेनाभ्यधिकः प्रष्णांकः ध्रुवको भवतीत्यर्थः अथ गुणकोत्पत्तिः तत्र चंद्रस्य राश्यादिका वर्षगतिः ४।१२।४६।४०।४८ एतद्राश्यादिकं कलीकृतं ८९६६।४०। रामः
।४८ एतदष्टशतभक्तं ८०० लब्धं नक्षत्रादिकं ९।५७।३०।३।३६ एतत्कृतगुणितं षष्ट्योपर्य्युपरि संयुतं जातो गुणकः ९९५।५।५०।३६।० उभयोरन्तरं ०।०।३६। बीजा २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यंखविधूनितइतिग्रंथारंभसमयेनक्षत्रगतोमध्यश्चंद्रः २६९० एतन्नक्षत्रादिकंसहस्रनिघ्नेऽब्दपिंडेधनंकार्य्यंइह शतानंदेनखवुद्ध्याभचक्रेपात्यशेषंखविधुपरिमितंनक्ष
त्राणांकृतं यतोत्रसप्तविंशतिशतपरिमितश्चंद्रभगणोऽस्ति अतोभचक्रशेषइत्युक्तं एवंचैत्रादियथोदयिकश्चंद्रध्रुवकोभवति तदर्थंदशघ्नशुद्धेश्चंद्राष्टभागाभ्यधिकइत्यु
क्ताचंद्रगतिः ७९०।३५॥ अष्टभक्तालब्धं ९८।४६ इतिद्वारः खपंचपूर्वशेषंदशघ्नशुद्धेः सकाशादनेनहरेनाप्तांशकाद्याचंद्रगतिर्भवति एवमौदयिकमध्यचंद्रध्रुवानयनंक्ल
तं ५ अथकेंद्रध्रुवानयनमाह रुद्राहतइति शास्त्राब्दपिंडोरुद्रैरेकादशभिःगुणनीयः वेदैश्चतुर्भिःसंयुतःकार्यस्त्रिवेदैर्हरणीयःहृतेयःशेषःसचतुःषष्ठि ६४ गुणःकार्यःपश्चा
द्वात्रिंशद्भिर ३२।धिकःकर्त्तव्यःतंपृथक्द्वितीयस्थानेधार्यं खखागैः ७०० सप्तशतैर्हरेत यल्लाप्तंअंशादितेनोपरिस्थितोंकःसंयुतःकार्यःशुद्ध्यष्टभागश्चाब्दनखांशश्चताभ्यां
युतःएतदुक्तंभवति शुद्ध्यष्टभागेनयल्लब्धंअंशादितथापिंडाद्विंशतिभागेनयल्लब्धंमंशादिताभ्यामधिकश्चंद्रकेन्द्रध्रुवकोभवति इतित्रिवेदशेषे यत्रशून्यंतत्रत्रिवेदएव

रुद्रा ११ हतोवेद ४ युतस्त्रिवेद ४३ शेषश्चतुःषष्ठि ६४ गुणोरदा ३२ढ्यः॥ पृथक्खखागा ७०० प्तयुगिंदुकेन्द्रः शुद्ध्यष्ट ८ भागाब्दनखांश २० युक्तः ६॥

पृथक्धार्यः यदात्रिवेदाएवचतुःषष्ठिगुणाक्रियंते तदासिद्धंकेंद्रभगणः कृत १०१०।७२८।० अयंकलीकृत २८।० अष्टशत ८०० भक्तेलब्धंतत्रनक्षत्रादिकं तच्छताहतषष्ठ्योप
र्युपरियोजितंजातःकेंद्रभगणः २७५६। अस्यापिभगणेनसौरवर्षेऽवशिष्टवर्षगतिः ७०५।३।३०।२० इयंचतुःषष्ठिः ६४ गुणितालब्धं ११।७।५९।२२। उपरिस्थोरुद्रमितो
जातोगुणकःपुनःलब्धेनभक्तागतिः ७०५।३।३०।२० मासप्तश्चतुःषष्ठिमितोंकोपिगुणकएवजातःरुद्राधस्थःविकलादेःसंस्कारार्थंखखागाप्तमित्युक्तंरुद्राधःस्थविकला
दिनावर्षगतिर्भजेल्लब्धाःखखागा ७०० क्षेपकोत्पत्तिः चंद्रकेंद्रस्यपूर्वशेषः २८८ चतुःषष्ठिभक्तं ६४ वेदाः ४ शेषंरदा ३२ द्वावपिक्षेपकौजातौ शुद्ध्यष्टभागेतिउदयिकध्रुवा
नयनार्थंशुद्ध्यष्टभागेत्युक्तं यतः नक्षत्रकला ८०० भक्तालब्धंअष्ट ८ अनेनाढ्यःकार्यः अब्दनखांशेति केंद्रभगणस्मरणार्थंअब्दनखांशयुक्तःकार्यः यतःकेंद्रभगणःषट्श
रसप्तदस्र २७५६ परिमितगणितान्किंचिदूनोजातः यथात्रिवेदाः ४३ चतुःषष्ठि ६४ गुणाः २७५२ खखागाप्तयुक्ताः २७५५।५७। अनंतरं ०।२ अतोब्दनखांशयुक्तमित्युक्तंत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा०टी० अथचंद्रध्रुवसंस्कारमाह पूर्वानीतात्केन्द्रात्केन्द्रध्रुवकाद्भव११घ्नात् इषुनेत्रचंद्रैः १२५पंचविंशत्यधिकघातेन भागमपहृत्य यल्लब्धं अंशादि तेनहीनोमध्यचंद्रध्रुव
३ कः स्फुटचंद्रध्रुवकोभवति यदि केन्द्रफलंमध्यमकेन्द्रेन पततितदासप्तविंशतिशतं २७०० संयोज्य आनीतफलमूनितंकार्यं अयंसंस्कारोग्रेवक्ष्यमाणातिथ्य
धिकारेचंद्रखंडकोत्पत्त्यर्थंकृतः अनेनैवाष्टाविंशतिखंडकाउत्पन्नाः तद्यथा चंद्रभगणाः २७०० केन्द्रभगणाः २७५६ केन्द्रभगणमेकादशगुणंकृत्वा पंचविंश
त्यधिकघातेनभजेल्लब्धंचंद्रस्याष्टाविंशतिखंडास्त्रिवारिनिधिपक्ष २४३ परिमिताः तेनहीनश्चंद्रभगणोजातोऽग्रेवक्ष्यमाणसाधकोऽगशराब्धिदस्रपरिमितः २४
५७ एवमपरेपिखंडकाउत्पद्यंते इतिचंद्रध्रुवानयन ७ अथपातध्रुवानयनमाह पातइति अब्दपिंडः शर२५घ्नः पंचगुणः कर्त्तव्यः पुनर्नगनेत्र २७ युक्तस्त्रिनंदै ९३ र्भा
गमपहृत्यशेषंधार्य्यं तच्छेषांकेषु ६० गुणंकार्य्यं त्रिनंदशेषेयत्रशून्यंभवति तत्रत्रिनंदा ९३ एवषष्ट्या ६० गुणानीयाः द्विरिति स्थानद्वयेस्थाप्यः एकत्रइंदुरा

केन्द्राद्भव११घ्नादिषुनेत्रचंद्रै१२५र्लब्धोनितोमध्यविधुर्ध्रुवःस्यात् ७ पातःशराघ्नोनगनेत्रयुक्त २७ स्त्रिनंद९३शेषोगगनांग६०निघ्नः

मै३१र्भक्तेयल्लब्धमंशादितत्त्वरामसहितं ३० कृत्वाप्रथमांशेपातयेत् नात्रचक्रशेषः यस्माद्राहोर्भचक्रंचतुःपंचाशच्छतं ५४०० शास्त्राब्दपिंडादंगचंद्रभागेनाप्तं
शकादिनासहितः पातध्रुवकोभवति अत्रवासनासूर्यसिद्धांतोक्तक्रमेणानीतोराहोर्वर्षगतिः राश्यादिका०।१९।२१।१२।३६। कलीकृता ११६१।१२।३६। अष्टश
तभक्ता८०० लब्धंनक्षत्रादिकंद्विगुणितंपुनः शता१०० हतंषष्ट्योपर्युपरियोजनीयं जाताशतांशोराहोर्वर्षगतिः २९०।१८। इयंषष्टिभिर्भक्तालब्धं ४।५०।१८ शेषमिंदु
रामभागेनयुक्तंजातोगुणकः शर२५मितः शेषेणगुणकंभजेल्लब्धाइन्दुरामाः ३१ वर्षगतिः इंदुरामांशयुक्तापंचभक्तालब्धंषष्ठी ६० इयमपिगुणकाएवजाता तत्रापि
गुणकोत्पत्तिर्यथाशास्त्राब्दः १ शर२५गुणः ५ गगनांग ६० गुणः ३०० इन्दुरामांशेनहीनः अब्दवृंदादंगचंद्रै१६र्लब्धंयुक्तंजातावर्षगतिः २९०।२३ अस्यागुणकोत्पत्तिः राम०
पूर्ववत् उभयोरंतरं ०।५ बीजार्थे अथक्षेपकोत्पत्तिः ग्रंथारंभसमयेभगणादिकोमध्यमःपातः २२६।३।१८।६ अत्राचार्य्यैर्गणितशकद्वयंषट्कलास्त्यक्ताः वर्षगतेःशू ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणार्थं तेन षट्सप्तत्यधिकवर्षशतत्रयेण पूरणं भवति तस्मात् अस्तःसिद्धांतोक्तप्रकारादानीतादिहन्यूनमेवायाति तदर्थं वीजं धनं भवति तत्परतः सिद्धांतोक्तादधिक
अधिकमायाति ततो वीजं ऋणं भवति अंशाकादित्यवशिष्टांकः ३।१६।१० कलीकृता ६३६० अष्टशत ८०० भक्तालब्धं नक्षत्रादिकं ७।५१।० एतच्छत १०० घ्नंष
ष्ट्योपरियोजितं द्विनिघ्नं १५९० राहोर्भचक्रं द्विगुणं षष्ट्याप्तं २६।३० अत्र त्रिंशत्कलाः संयोज्य जातो नगनेत्र २७ परिमितांकः त्रिनंद ९३ शेषजातः इतिषष्टिघ्ने त्रि
नंदमितांके चंद्रमांशहीने राहोर्भचक्रं भवति ५४०० अतस्त्रिनंद ९३ शेषइत्युक्तं षष्टिघ्ने त्रिनंदमितांके ५५८० भचक्रादधिकांशाः अधिकशतस्य लोपार्थमुक्तं चंद्रा
मांशहीनइतिखरामास्तु येन गनेत्रे २७ क्षेपको योजिता स्त एवात्र हीनाः कर्तव्याइति ८ ॥ इति मिश्रश्रीमाधवविरचिते भास्वतीविवरणे तिथिध्रुवाधिकारः प्रथ
मः १ ॥ अथग्रहध्रुवाधिकारो व्याख्यायते तत्रादौ वर्षाधिपानयनमाह शास्त्रेति शास्त्रादिश्चासौ सौराब्दगणश्च तस्माच्छास्त्रपिंडादित्यर्थः कलेर्वा गतकलिवर्ष

द्विरिन्दुरामाप्त ३१ खराम ३० हीनः सांशोव्दवृंदात्पुनरंगचंद्रैः १६।८ ॥ शास्त्रादिसौराब्दगणात्कलेर्वावर्षाधिपाः सप्त ७ हृतावशेषाः
शुक्रेन्दुवाचस्पतिसूर्यसौम्याः शनिश्चशरौ क्रमशो भवंति १ अव्दोर्कनिघ्नोरविमासयुक्तः सप्तावशेषा रविमासनाथाः ॥

गणाद्वा सप्त ७ भक्ते शेषाः सौरवर्षाधिपा भवंति एतदुक्तं भवति शून्यावशिष्टे शुक्रो वर्षाधिपतिः एकेन १ चंद्रः द्वाभ्यां गुरुः २ त्रिभिः सूर्यः ३ चतुर्भिर्बुधः ४ पंचभिः शनिः ५
षड्भिर्भौमः ६ पुनः प्रकारांतरेण शास्त्राब्दपिंडमेकविंशति २१ भिरूनितं कृत्वाष्टषष्टिभिर्भजेत् ६८ यल्लब्धं तेनैकोनेन युतो वर्षाधिपतिः अथशास्त्राब्दपिंडमनूनितं
वाष्टांगै ६८ र्भजेल्लब्धान्वितो वर्षाधिपतिर्ब्रह्मसिद्धांततुल्यः सावनवर्षाधिपो भवति शुक्रेन्दुवाचस्पतीत्यादिक्रमेण सूर्यसिद्धान्ते प्रदर्शिताः गोलक्रमेण मंदामरे
ज्यभूपुत्रसूर्यशुक्रेंदुजेंदव इति अत्र करणारंभे शुक्रो वर्षाधिपतिरभूत् तस्मात् शुक्रादिगणना कृता शुक्रात्तृतीयश्चंद्रः चंद्रात्तृतीयो गुरुरिति १ अथमासाधिपान
यनमाह अब्देति शास्त्राब्दपिंडोऽर्कनिघ्नो द्वादशगुणः कार्यः पुनर्मेषादिगतसौरमासान्वितः कर्तव्यः तत्र सप्तशेषे ७ बुधशुक्रसूर्याद्येकान्तरक्रमेण सौरमासा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिपा भवंति तद्यथा श्रून्यावशिष्टे बुधः एकेन शुक्रः १ इत्यादि एकान्तरक्रमेण शशिनो मासानामधिपास्तथेत्युक्ताः अत्रापि करणारंभे मासाधिपो बुधोभूत् तस्माद्बु
धादितो गणना बुधाद्र्द्धं स्थः शुक्रः शुक्रात्सूर्य इत्यादि गतकलियुगवर्षाद्वा मासाधिपानयनं कार्यं सावनमासाद्वा अन्ये आचार्याः कथयंति सावनमासाधि
पानयनक्रमः तत्र प्रकारांतरेण लिख्यते शास्त्राब्दपिंडः चैत्रशुक्लादितो गतमासान् विधाय पृथक् धृत्वा नवाग्निपक्षै २३९ र्गुणयित्वा तस्मिन्नेकोनपंचाशद्व
र्षान्यष्टौ मासांश्च ४९।८ संयोज्य रसाद्रिसप्तसप्तभि ७७७६ र्विभज्य लब्धाधिमासा वर्षमासानुपरिस्थितेऽङ्के योजयेत् पुनः पृथक् स्थाप्य नवाब्धिभि २९ र्गुणयित्वा खरसा
ब्धिभवाणान्वितं विचार्य वर्षद्वयं २। मासाष्टकं च ८ संयोज्य शराष्टनागेंदुभि १८५५। र्भाजयित्वा लब्धानि अवमानि वर्षमासदिनान्यधः स्थेंके पातयित्वा सावनव
र्षाधिपानयनार्थं सावनाब्दादिकेन चांद्रदिनानि संयोज्य वर्षस्थाने सप्त ७ तष्टिते शेषाः शुक्रेन्दुवाचस्पतीत्यादि वर्तमानाः सावनवर्षाधिपा भवंति शेषं मासादिवर्षा

त्रिशुक्रसूर्यासुरेज्यसौरास्त्वन्द्रो युगात्सावनमासतोन्ये ॥ २ ॥ अब्दः पृथक् खेशा ११० गुणाः शरागराम्रांक ९३७५ लब्धेन्द्रियचंद्र १५ युक्ताः

धिपतेर्गतं तद्वादशमासेभ्यः शुद्धं गम्यं स्यात् अथ मासाधिपानयनार्थं सावनाब्दादिके रुद्रदिनानि पातयित्वा वर्षस्थाने द्वादशभिः १२ संगुण्य मासान्वितं विधा
य सप्तभि ७ र्भजेत् शेषेत्रिशुक्रेत्यादिना वर्तमानसावनमासाधिपा भवंति शेषं दिनानि मासाधिपतेर्गतं तस्मिन् त्रिंशच्छोध्य गम्यं स्यात् अथ वर्षाधिपानयनार्थं सा
वनाह र्गणं चंद्राग्निचंद्रोनं विधाय खांगाग्निभि र्भजेत् लब्धं त्रिघ्नं रूप १ संयुतं नग ७ शेषितं कृत्वा रव्यादयो वक्ष्यमाणाः सावनवर्षाधिपाः भवंति गतगम्ये पूर्ववत्का
र्ये अथ मासाधिपानयनाह र्गणं चंद्राभं चंद्रोनं कृत्वा १०१ त्रिंशद्भि र्भजेत् लब्धं द्विघ्नं रूप १ युतं सप्तावशिष्टं कर्त्तव्यं तत्र रव्यादयो वर्त्तमानाः सावनमासाधिपा भवंति
गतगम्यं पूर्ववत्कार्यं एवं कृते ब्रह्मसिद्धांततुल्यौ वर्त्तमानाधिपौ भवतः २ अथ संवत्सरानयनं अब्देति अस्य व्याख्यानं सुगमम् सावनदिनैरेकषष्ट्याधिकात्रिंशन्नैर्घ
टिकाद्वयाधिकै ३६१।२ द्वितीयसंवत्सरस्य प्रवृत्तिः अथ सावनार्थ्यं मध्य गुरुभगणाः ३६४२२४ रविभगणाः ४३२००० भक्तो लब्धं राश्यादिका गुरोर्वर्षगतिः ११।०।२१।७।१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राशिवधः स्थापितः शेषं पंचगुणं कृत्वा स्वचतुर्विंशतिभागयुतः कृतो जातः खेशाः ११० गुणाकराशिकलाः १८०० पंचगुणाः ९००० स्वचतुर्विंशतिभागयुतो जातः शरागरामां
का ९३७५ एवं सार्द्धपंचाशीतितमे वर्षे सौरवर्षाद् गुरुवर्षमधिकं भवति अथ क्षेपकोत्पत्तिः क्षेपकोत्र शतानन्देनत्यक्तः सोऽस्माभिः प्रदर्श्यते सूर्यसिद्धान्तोक्तक्रमेण शा
लिवाहनशके कमिते शकाब्दगणे गते चैत्रादौ लब्धोदयस्यो गुरुः ९।८।१।१६ यतो मध्ये धनिष्ठास्थे गुरावुदिते प्रभवस्य प्रवृत्तिः अतो मकरान्ते प्रभवप्रारम्भः कुंभादिमेषान्त
पंचदशराशिभिः प्रभवाद्याः पंचदशसंवत्सरा व्यतीताः एवमस्य राशिः ८ रंशैरेकः १ कलाषोडशकलाभिर्युक्तैर्गुरुमध्यमभुक्तिभिर्भुक्तैर्लब्धाश्चित्रभानोर्गतमासा
३ षड्दिनानि ६ दंडा ३४ पलानि ३६ विपलानि ३६ अतो गंथारंभे एषषष्ट्या अतीतानि पंचदशवर्षाणि १५ त्रयोमासाः ३ षट्दिनानि ६ अचिरामादंडा ३४ पलानि ३६ विप
लानि ३६ एतेक्षेपेणाप्यन्ते क्षेपको जातः मासादिकस्य क्षेपकोत्पत्तिः प्रदर्श्यते मासत्रयं दिनीकृतं ९० सदिनं ९६ स्वछेदेन ९३७५ गुणितं ९००००० चतुस्त्रिंशद्घटिकाः स्व

तत्त्वक्षि ६० शेषादिषु भिर्युगानि लब्धानि शेषे गिरस्तः समाः स्युः ३ शास्त्राब्दपिंडो वसुवह्निषड्भिः ६३८ सषीतरश्मिज्वलनो ३१ महीजः ॥

शतान्हतो द्वादशराशि १२०० चक्रैः शेषो व्चिवाणौ ५४ अयुतो ब्दवृंदात् ४

९ छेदेन गुणिता ३१८७५० त्रयस्त्रिंशत्पलानि स्वछेदेन गुणितानि ३०९३७५
षट्त्रिंशद्विपलानि स्वछेदेन गुणितानि ३३७५०० विपलेभ्यः षष्ट्या लब्धं ५६२५ पलेषु युक्तं ३१५००० तेभ्यः षष्ट्या लब्धं ५२५० दंडेषु युक्तं ३२४००० दंडेभ्यः षष्ट्या लब्धं
५४०० दिनेषु युक्तं ९०५४० एतत्खष्ट्यधिकशतत्रयभक्तं ३६० फलं वर्षाणि २५१५ अयमेव क्षेपकः खेशगुणोऽब्दपिंडे योजनीयः यद्यनेन क्षेपकेण युक्तः क्रियते तदा पूर्वो
क्तमप्यशकादिकं न योजनीयं अथापरप्रकारेण क्षेपकोत्पत्तिः पंचदशगुणछेदः १४०६२५ पूर्वोक्तक्षेपकाय १४३१४० अयं क्षेपकः खेश ११० गुणोऽब्दपिंडे क्षेप्यः यद्य
यं योज्यते तदेन्द्रियचंद्रयुक्तं न कार्यं ततः सिद्धान्तसमः शुद्धः संवत्सरः आयाति एवं प्रकारत्रयेण क्षेपकानयनं कृतं त्रिभिरेव समान एवायातीत्युक्तं ३ अथ भौममध्यमध्रु
वानयनमाह शास्त्राब्देति व्याख्यानं सुगमत्वात्त्यक्तं अत्र वासना चतुर्युगे सौराब्दाः ४३२०००० खचतुष्कदंतार्णवाइतितत्र भौमभगणो दस्राग्न्यष्टरसांकाक्षिलोच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा०टी० नानिकुजस्यतु २२९६८३२ अत्रत्रैराशिकं यद्येतावद्भिः सौराब्दैरेतावन्तो भौमभगणा लभ्यन्ते तदैकेन सौराब्देन किं लभ्यत इति स्थापना भौमभगणाः २२९६८३२ चतुर्युगे सौराब्दै
५ ४३२०००० र्भक्ता लब्धमेकस्य सौरवर्षस्य भोगः ०।६।११।२४।९।३६ इयं भौमस्य वर्षगतिरेनां शतेन १०० संगुण्य वारत्रयं षष्ट्या त्रिंशद्भिश्च भागमपहृत्योपर्य्युपरि संयोज्य जा
तो गुणको वसुवह्निषट्परिमितः ६३८।०।३२।० अत्राचार्य्येण तस्माद्गुणकात्किंचिदधिको गुणको निबद्धः तद्यथा ग्रस्ताब्दः वसुवह्निषड्गुणाः ६३८ पुनर्वर्षवृन्दाद्धृते लब्धं ०।
११।६। तेनान्वितो गुणको जातः ६३८।११।३४ उभयोरन्तरं ०।०।३४। तदेव बीजार्थं एकसंख्याकं ग्रस्ताब्दः षष्ट्या ६० संगुण्य गुणकाधःस्थकलादिना भजेल्लब्धाः ऽब्धिवाणाः ५४
अथ गुणकोत्पत्तिः तत्र ग्रन्थारंभदिने सूर्यसिद्धान्ताहर्गणः २१४४०३८३०७१२९ तस्माद्भौमभगणगुणितात् भूदिनैर्भक्ताल्लब्धं भगणादिको भौमः १०३९८९२९२१।०९
५९।१२ राश्यादिकं शतेन संगुण्य द्विवारं षष्ट्या संगुण्य त्रिंशद्भिरुपर्युपरि योज्य जातः क्षेपकः २३११७।२२ अत्र शीतरश्मिज्वलनमितिः ३१ क्षेपको निबद्धः शेषं स्पष्टं अयं क्षे
पको गणितादूनो निबद्धः गुणकोऽधिको निबद्धः तेन त्रिसप्ताधिकवर्षशतद्वयेन तत्क्षांशनादेः करणं भवति तत्राद्यं बीजं धनं भवति तत्परतः ऋणं भवति मध्यमे बीजाभावः

ज्ञोच्चं खखाश्विघ्नं २०० मघोदशाग्रं १० तिथीन्दु ११५ लब्धांगरसाश्वि २६६ हीनम् ॥

तत्र सिद्धान्तसमान एवायाति ग्रहः शताहतद्वादशराशिचक्रशेषेति द्वादशराशिचक्रे यो भगणः भगणमानं यथा दशभिर्गुर्वक्षरैर्यो निश्वासोऽस्वा मात्मिकः प्राणस्तैः
षड्भिरेका विकला भवति तत्षष्ट्या कला तत्षष्ट्या भागस्ते त्रिंशद्भिरेको राशिस्ते द्वादशभिरेको भगण इति उक्तं च सूर्यसिद्धान्ते विकलानां कला षष्ट्या तत्षष्ट्या भागमु
च्यते तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते १ इदं करणं शतानन्देन शतांशं निबद्धं तत्रायं क्रमः विकला षष्ट्या कला षष्ट्या भागः शतभागेन राशिः अतः शताहतद्वाद
शराशिचक्र इत्युक्तं अब्धिवाणैरिति गुणकस्य शेषानयनार्थं अब्धिवाणैश्च युतो वृन्दादित्युक्तं इति भौमध्रुवानयनमुक्तं ४ अथ बुधोच्चध्रुवानयनमाह ज्ञोच्चमिति
अस्यार्थः प्रांजलिः प्रायः अत्र वासना चतुर्युगे बुधशीघ्रभगणाः बुधशीघ्रस्य शून्यर्तुखाद्रित्र्यंकनगेन्दवः १७९३७०६० तत्राब्दाः ४३२०००० खचतुष्टयरदवेदैति रामः
तत्रत्रैराशिकं यद्येतावद्भिरब्दैः एतावन्तो बुधभगणा लभ्यन्ते तदैकेन रब्देन किं यदिति स्थापना तत्र बुधभगणान् सूर्याब्दैर्भजेत् लब्धं बुधस्य राश्यादिकं सौरश्च ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतिः १।२५।४५।१८।० एनांशतेन संगुण्य द्विवारं षष्ट्या त्रिंशद्भिश्च भागमपहृत्योपर्युपरि योज्योपरि स्थितांकः संजातो गुणकः १८।२।३१। अधस्थोपि गुणक एव अत्राप्ये
तस्माद्गुणकात् शतानन्देन किंचिदधिको गुणको निबद्धः तद्यथा शास्त्राब्दः खखाश्वि २०० गुणाः अधोदशाघ्नः २००० एतस्मात्तिथिभागेन लब्धमंशादिः १७।२३।२९।
देनहीनो जातः स एव गुणकः १८१।२६।३१। उभयोरन्तरं ०५३ बीजार्थं कलादिसप्तदशादिकं संयोज्य खखाश्विनो २०० भवंति अथ क्षेपकोत्पत्तिः ग्रंथारंभदिने सूर्य
सिद्धांतोक्तद्युगणाद्बुधशीघ्रभगणा गुणिता भूदिनैर्भक्ता लब्धं भगणादिकं बुधशीघ्रं ८।२३।२१।३५३।७।१८।८।१२०।० राश्यादिकं शतेन संगुण्य वारद्वयं षष्ट्या त्रिंश
द्भिश्च भागमपहृत्योपर्युपरि योज्य जातः क्षेपकः ९२७।१८। अयं क्षेपकः बुधशीघ्रध्रुवके योजनीयः अत्राचार्येण द्वादशशतेनापात्य शेषं २७२।४२ अर्णीकृतं उभौ यथा
साम्यं अत्र षडंशकात् द्विचत्वारिंशल्लिप्तिकात्यक्त्वा गरसाश्वि परिमितो २६६ गणिताद्दूनः क्षेपको निबद्धः तेन चंद्राष्टपरिमिते शास्त्रपिंडे त्यक्तांशकादेः पूरणं भवति तस्मा

घ्नाना हतोधः खनवाप्त ९० नेत्रसूर्या १२ ढ्य जीवो द्धनखांश २० प्रायुक्तः ५ खेषुस्वर ७५० ग्नोंकशराग्नि ३५९ युक्तः सितोच्चमाढ्यं कुनृपैः १६ शतघ्नान्

द्वर्षैस्तु र्य सिद्धांतसमं बुधशीघ्रमायाति तिथीन्दुलब्धमिति गुणकादधिकांकेशेषस्य निरसनार्थं तिथीन्दुं लब्धमित्युक्तं दशघ्नात्खखाश्विनोऽपि कलारूपं कृत्वा सप्तदशांशादि
नासवर्णितं न भजेत् लब्धस्तिथीन्दवः ११५।३ अथ गुरुध्रुवानयनमाह शताहतेति सुगमम् अत्र वासना शतमितो गुणकः १०० कथं जातः प्रोच्यते चतुर्युगे गुरुभगणाः इह
स्यतेः खदस्राक्षिवेदषड्भूयो युगे ३६४२० रव्यब्दाः ४३२०००० खचतुष्करदार्णवाः अत्रैराशिकं यद्येतावद्भिः सौराब्दैः एतावंतो गुरुभगणा लभ्यंते तदा एकेन रव्यब्देन कि
मिति सौराब्दैर्भक्ताः प्राप्ता गुरोः राश्यादिका सौरवर्षगतिः १।०।२१।६।० अन्यत्सर्वं पूर्वोक्तवत् ५ अथ शुक्रशीघ्रध्रुवानयनमाह खेषितिति अस्य व्याख्या सुगमा अत्र वासना च
तुर्युगे शुक्रशीघ्रभगणा ७०२२३७६ युगे रव्यब्द ४३२०००० तत्रैराशिकं यद्येतावद्भिः रव्यब्दैरेतावंतः शुक्रशीघ्रभगणा लभ्यंते तदैकेन रव्यब्देन कियल्लभ्यते इति स्थापना त
त्र शीघ्रभगणाः ७०२२३७६ रव्यब्दैर्भजेत् लब्धं राश्यादिका शुक्रशीघ्रस्य वर्षगतिः ७।१५।११।५२।४८ एनांशतेन संगुण्य त्रिवारं षष्ट्या त्रिंशद्भिश्च भागमपहृत्योपर्युपरियो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्येऽधः स्थितोंकः खेषुस्वरपरिमितोजातोगुणकः ७५०।३०।३६ अधःस्थावपिगुणकाएव अत्रापिगुणकानयनं शास्त्राद्रपिंडः खेषुस्वरगुणः ७५० शतगुणोद्धात्कुनृपाप्ता
न्वितः ७५०।२०।३६ अत्रापिसिद्धांतोक्ताद्गुणकात्कलाद्वयेनविंशतिविकलादिकस्यापनयनार्थं शतघ्नात्कुनृपैरित्युक्तं शतंविकलीकृतं ३६०००० शेषेराससवर्णितेनभ
जेत् लब्धंकुनृपाः १६१ शतघ्नात्कुनृपैर्भागेनलब्धासप्तत्रिंशत्कलाः षोडशविकलाः ३७।१६ तदन्वितोजातः पूर्वोक्तगुणकः ७५०।३७।१६ अथक्षेपकोत्पत्तिः अथकरणा
रंभसमयेहर्यसिद्धांतादहर्गणः शुक्रशीघ्रभगणगुणिताद्युदिनैर्भक्ताल्लब्धंभगणादिकंशुक्रशीघ्रं ३१७९३८०७५६१।३।१८।१२ राश्यादिकंशतेनसंगुण्यत्रिवारंषष्ट्या
त्रिंशद्भिश्चभागमपहृत्योपर्युपरियोज्यसंजातःक्षेपकः ३६०।२०।५१।४० अत्रोनंशतानन्देनांकसराग्निमितः ३५९ क्षेपकःकृतःशेषंत्यक्तं शुक्रशीघ्रध्रुवकेगुणांकक्षेप
कांकौद्वावप्यूनितौकृतौतस्माच्छुक्रशीघ्रबीजंसर्वदाधनंभवति॥० अथशनिध्रुवानयनमाह खवेदेति अस्यार्थः शास्त्राद्रपिंडः खवेद ४० निघ्नः खंचवेदाश्चतेश्चत्वारिं
शद्भिःगुणनीयः ततोऽच्यिनवेषुभिः अव्ययश्चनवेषवश्चचतुराधिकनवत्युत्तरपंचशतैः ५९४ संयुतःकार्यः पुनःशास्त्राद्दशभिःसंगुण्यशक्रैः १४ चतुर्दशभिर्भजेत् य

खवेदनिघ्नो ४० ब्धिनवेषुयुक्तः ५९४ शनिर्दशघ्नात्सहितश्चशक्रैः ॥

ल्लब्धमंशादितेनाधिकःकर्तव्यः अत्रापिद्वादशशत १२०० भागशेषः शनिमध्यमध्रुवोभवति अत्रवासना खवेदनिघ्नइत्यादिचतुर्युगेशनिभगणः शतेर्भुजंगषट्पंचशरवेद
निशाकराः १४५५६८ युगेरव्यब्दाः ४३२०००० तत्त्रैराशिकं यद्येतावद्भिःसौराब्दैर्भजेत् लब्धंराश्यादिकासौरवर्षगतिः ०।१२।१२।५०।२४ एतांशतेनसंगुण्यवारत्रयंषष्ट्यात्रिंश
द्भिश्चभागमपहृत्योपर्युपरियोज्यजातोगुणकः ४०।४२।४८। करणेपिगुणकानयनंयथा शास्त्राद्रः खवेद ४० निघ्नः दशघ्नाच्छक्राप्ताऽन्वितःसंजातः सएवगुणकः ४०।४२।५१
त त्रसूर्यसिद्धांतोक्तगणितक्रमेणानीताद्गुणकाद्विकलात्रयेणाधिकोगुणकःकृतः तत्रविकलात्रयंबीजार्थं शतानन्देनकलादिकंत्यक्तं खवेद ४० परिमितोगुणकोनिबद्धः
शेषस्यकलानयनार्थंदशघ्नाच्छक्रैरित्युक्तं विकलीकृतं ३६०० शेषेराससवर्णितेन २५२१ भजेत् लब्धंशक्रमितं १४ दशघ्नाच्छक्रभागेन १४ लब्धाद्विचत्वारिंशत् ४२ शत्कलाः एकपंचा
शद्विकला ५१ तदन्वितोजातः पूर्वोक्तगुणः ४१।४२।५१ अथक्षेपकोत्पत्तिः अथकरणारंभदिनेसूर्यसिद्धांतादहर्गणाच्छनिभगणाद्युदिनैर्भक्तालब्धंभगणादिकः शनिः ६६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वकाले नक्षत्रपरिमितं पुष्पसंपदो भागाः पर्युपरियोज्याः । अत्राचार्यैः राज्ञ्विनवेषु५९४परिमितंक्षेपको
५८८०४।५।२८।४३।४८ राश्यादिकं शतेनसंगुरायत्रिवारषष्ट्यात्रिंशद्भिस्वभागमपहृत्योपर्युपरियोज्यजातःक्षेपकः५९५ अत्राचार्येणाव्धिनवेषु५९४परिमितंक्षेपको
निगदितःस्वल्पकं१।३३ अस्यपूरणामधिकंगुणाकेनषष्ट्याधिकाष्टादशशतवर्षे१८६०र्भवेतितावत्पर्यंतंवीजंधनंभवति तत्परतोवीजंऋणंभवति मध्यवीजभावःतत्रसू
र्यसिद्धान्तसौरानरवायातिग्रहः इतिशनिमध्यमध्रुवानयनम्॥ अथदेशांतरानयनमाह देशांतरमिति अस्यार्थः लंकाउत्तरतोमेरुर्यावत्याम्योत्तररेखात
त्स्थितदेशेषुदेशांतरकर्मनकुर्यात् तथापुलस्त्याचार्यः उज्जयिनीरोहितककुवक्षयैर्मुनहिमनिवासमेरूणां देशांतरंनकार्यं तद्रेखामध्यसंस्थानदेशेषु तद्दे
शांतरंयोजनात्मकंदृग्गणितात्प्रसाध्यं दृग्दर्शनंगणितंसिद्धांतप्रकारेणानीतंतस्मात्प्रसाध्यं अथदेशांतरानयनेऽस्मत्कृताःश्लोकाः तत्रादौरवेः रसघ्नदेशांतरयो
जनेभ्योलब्धंफलंपक्षरसैः६२ कलाद्यं रेखापरस्मात्स्वमृणंप्रकुर्यादर्कध्रुवेःस्फिन्करणोपशांतःशे१ अथचंद्रपातयोर्देशांतरं देशांतरंखांक९० निघ्नं विभजेदभ्रभूध
रैः७० चंद्रेर्कवत्फलंपातेयोजनेभ्यःखखेंदुभिः१००देशांतरयोजनानिखांकै९०राहत्यअभ्रभूधरै७०र्विभजेत् लब्धंकलाद्यंफलंसूर्यवच्चंद्रध्रुवकेपिरेखापरस्मा

देशांतरंदृग्गणितात्प्रसाध्यमितीहकल्पांतसमोध्रुवःस्यात्॥

न्देशेषुधनमृणंकार्यं पुनर्देशांतरयोजनानिशतेन१००भजेत् लब्धंकलाद्यंफलंपातध्रुवकेऽर्कवद्धनमृणंकार्यमिति अथभौमादीनांदेशांतरकलानयनं संगुणयदेशांत
रयोजनैर्गतिंग्रहस्यपश्चाद्विभजेच्छराद्रिभिः७५ मध्यस्थरेखापरपूर्वभागयोर्लब्धंकलाद्यंस्वमृणंखगध्रुवे१ व्याख्यासुगमा इतीहकल्पांतसमोध्रुवःस्यात् इत्यनेनदेशां
तरफलसंस्कारंकृत्वा इहभास्वतीकरणेकल्पांतसमः कल्पोब्रह्मणोदिनंवदंनेसिद्धांतोक्तगणितक्रमेणानीतोयोग्रहःतत्समोध्रुवोभवतीत्यर्थः कान्यकुब्जेदेशान्तर
फलंकलादिकंरवेः४।०चंद्रस्य५२।०भौमस्य०।५२वुधस्य२।२७गुरो०।९शुक्रशीघ्रस्य२।५२शनेः०।३ वुधशुक्रयोर्ग्रहयोः१।४७शनिकुजेज्यशीघ्राणां१।४७ पातस्य०।२४
इदंफलंग्रहेषुऋणंकार्यं यतःकान्यकुब्जनगरंमध्यरेखातःपूर्वस्यांवर्त्तते अथग्रहस्यदिनगतेरानयनं अग्नेवक्ष्यमाणं भौमस्वरद्याद्यदित्यनेनैकपरिमिताहर्गणाद्भौम
मध्यमभुक्तिर्भवति१।४५ एवमपाशेषमित्यनेनवुधशीघ्रगतिः अंशा१२कला३९ गुरुर्गुणाघ्रादित्यनेनगुरोर्गतिः५७ दिग्घ्राद्यनोनादित्यनेनवुधशुक्रयोर्मध्यमाग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰टी॰ ८

...यवीजानयनं शास्त्रादेति अथसूर्यसिद्धांतग्रहस्यकरणागतस्ययदंतरंतद्वीजमित्युक्तं तेनसंस्कृताःग्रहाः सूर्य्यसिद्धांततुल्याः अथवीजानयनार्थमस्मत्कृताःश्लो
काः सूर्यवीजंतुपूर्वोक्तं अथमध्यचंद्रवीजं अब्दौघात्त्वाभ्रतर्क्का६००प्तंफलमंशादिकंधनं दशलिप्ताश्चसंयोज्यमध्यमध्रुवकेविधोः अथकेन्द्रवीजमाह पल
प्रभांखांकनिघ्नांभजेत्वाभ्राश्वि२००भिःफलं चंद्रस्फुटेध्रुवेयोज्यंकेन्द्रेसार्द्धांशकद्वयं२।३०। रसाद्रिरामै३७६न्यूनिताच्छास्त्राब्दवृंदात्द्वादश१२भागेणजलब्धं

शास्त्राब्दपिंडाद्गुणितात्कुजादेःसूर्याम्बराक्षी१२।२०मुकु१५खेषु५०वेदै४र्लब्धंक्रमेणाष्टशतैः८००फलंयच्चंद्राष्ट८१तत्त्वाब्धि१४२५४५४घ्नाघ्नं
कथितं वीजंसुगोप्यंकरणेशतांशेशिष्यायदेयंसुपरीक्षिताय शास्त्राब्दपिंडाद्गुणसप्तपक्ष२७३हीनात्कृत४घ्नात्खवेद४०भक्तात् लब्धं
फलंभूमिसुतेनकरणंस्यात्कृतेनिपात्याप्तफलंधनंच चंद्राष्ट८१हीनाद्गणाद्वसुघ्नात्सप्ताप्तलब्धंविधुजेकरणंस्यात्

अंशकलादितेनवर्ज्जितः
पातध्रुवकेःशतांशेकरणेऽर्कसिद्धांतसमोभवति शुद्धंकृत्वासहस्रेण१०००भजेत् यल्लब्धमंशकलादिकेनान्वितःपातध्रुवकःसूर्य्योदयकालिकोभवतीति अथभौ
मवीजं शास्त्राब्देति अस्यार्थः अब्दवृंदंत्रिसप्ताधिकशतद्वयेनो२७३नंकृत्वाशेषंचतुर्भिर्हत्यनखवेदै४०र्भजेत् यल्लब्धमंशादिफलंभौमेकरणंकार्यंत्रिसप्ताधिकद्वि | एमः ८
शतोनेशास्त्राब्देतस्मिन्नेवगुणसप्तपक्षपरिमितेवृंदंनिपात्यपूर्ववत्कर्मकर्त्तव्यं ततोलब्धंधनंभवति अथबुधशीघ्रवीजं तथागुरुमध्यवीजं चंद्राष्टेति अथशुक्रशी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

घ्रवीजम् चंद्राब्धीति अथशनेर्वीजं अब्दौघमिति अस्यार्थः अब्दौघं शास्त्राब्दवृंदं अभ्रांरसकुंजरभूषु षष्ट्यधिकाष्टादशशतेषु १८६० निपात्य ऊनितं कृत्वैकेविंशत्या २१
संगुण्य खखखांब्धिपक्षै २४००० भजेत् यल्लब्धमंशादिकं रविसुते शनिध्रुवके धनं कार्य्यं अधिकमिति षष्ट्यधिकाष्टादशशतेभ्योधिकं वर्षवृंदं तेनैवांकेन षष्ट्यधिका
ष्टादशशतपरिमितेन शोध्यभागमपहृत्य शं खखय पूर्ववत्कर्म कर्त्तव्यं ततो लब्धफलं शनिध्रुवके ऋणं कार्यं अथ बुधशुक्रयोर्मध्यमवीजं कुजगुरुशनीनां शीघ्रवीजमाह
षडंशहीनेति सूर्यध्रुवकं षडंशोनितांशकत्रयो २१५० नितं कृत्वा चतुर्भिः ४ संगुण्य खगैर्भजेत् प्राप्तमंशादिकं फलं कुजेज्यार्किचले बुधशुक्रयोर्मध्यमे धनं कार्यं यदि चे
त् षडंशोनितांशकत्रयं न शुध्यति तदा तद्विपर्ययात् द्वे परीत्येन सूर्यध्रुवकमेव षडंशोनितांशकत्रयाच्छोध्य शेषस्य कर्म पूर्ववत् कर्त्तव्यं ततो लब्धं ऋणं भवति अतो यल्ल

अब्दाद्रसद्व्याप्तखयुगार्थ ५४० लब्धं कुर्याद्गुरोः खं चसराब्धि ४५ लिप्ताः चंद्राब्धि ४१ निघ्नाद्गगनात्त्ववेदवाणै ५४० र्भजेल्लब्धयुतं द्युजे
ज्यशीघ्रं एकांशकेना १ पि समन्वितं स्यादाकल्पमर्कागमतुल्यमेव १ अब्दौघमभ्रारसकुंजरभूषु १८६० पात्यं संगुण्य चंद्रनयनै २१
खखखाब्धिपक्षै २४००० षडंशहीनाग्निलवोनितं रवेर्ध्रुवं कृतघ्नं विभजेत्खगैः फलम् ॥ (लब्धं धनं रविसुते धिकवर्षपिंडे तेव शोध्यफलम

र्कै सुते ऋणं स्यात् १॥ यथा सूर्योदयकालिका भवंति तथोच्यते अत्र सकृतश्लोकः नगार्थवेदै ४५७ र्गगनेचरार्थैः ५९ खखाष्टपक्षै २८० खशरेन्दुभिश्च १५० शू
न्यत्रिकागै ७००० र्विभजेत्क्रमेण शुद्धिं कुजाद्येषु फलं प्रयोज्यं १० अस्यार्थः पूर्वादीनां शुद्धिं कुजद्व्येषु फलं प्रयोज्यं लब्धं फलं भागादिकं भौमध्रुवके योजयेत् ए
वं भौमः सूर्योदयकालिको भवति पुनः शुद्धिं नवार्थै ५९ र्भजेत् लब्धमंशादिकं बुधध्रुवके योजयेत् एवं खखाष्टपक्षै २८०० र्भजेल्लब्धं कलादिकं गुरुध्रुवके योजयेत्
पुनः शुद्धिं शून्यशरेंदुभि १५० र्भजेत् लब्धं भागादिकं फलं शुक्रशीघ्रध्रुवके योजयेत् पुनः शून्यखखागै ७००० र्भजेत् लब्धं कलादि फलं शनिध्रुवके योज्यम् एवं सर्वे
ग्रहा उदयिकाः कर्त्तव्या अथ ग्रहध्रुवार्थं वर्षगणिरुच्यते यथा नयागत्याधुक्ता भौमादीनां ध्रुवाः अग्रिमवर्षस्य ध्रुवका भवंति शुद्धिः सप्तोत्तरशतद्वयं २०७ शोध्या

CC-0. In Public Domain. Digitization by eGangotri

भा०टी० ग्रिमवर्षसंबंधिनी शुद्धिर्भवति अथ शुद्धेर्हानिवृद्धिवेशात्केन्द्रफलसंस्काराच्चंद्रस्यानियतमितित्वादत्रवर्षगतिर्नोच्यते पातस्यवर्षगतिः २९०।३३ भौमस्याब्दगतिः
८ ६३८।१५६ बुधस्याब्दगतिः १२२।३६।३१। गुरोर्वर्षगतिः १०१।८।५० शुक्रस्य शीघ्राब्दगतिः ७५०।३७।१६ शनेर्वर्षगतिः पुनः ४१।४२।५१ स्वस्ववर्षगत्यायुक्ताः सर्वेग्र
हध्रुवाः अग्रिमाब्दसंबंधिनोभवंति अथवर्षान्तादिपरिज्ञानं तत्रगणितभूषणं शाकोरामगुणो ३ महीधर ७ हृतः शेषोद्वि २ निघ्नोर्थ ५ युक् लब्धं पूर्ववदाहृतं द्व
तयमोः २ द्विघ्नं शरैः ५ संयुतं वर्षान्तंतृणशीतलातपहिमावृद्धिः क्षतिर्विग्रहः स्यात्कार्यंच पुनःपुनःपुनरपि प्रोक्तं पदेतत्पुरा १ अस्यार्थः शकाब्दगणः राम ३ गुणः का
र्यः पुनः सप्तहृतं लब्धं धार्यं सप्तभागशेषो द्विगुणितः कर्त्तव्यः ततः पंच ५ युतं कृत्वा वर्षप्रमाणं भवति पुनः सप्तभागलब्धं पूर्ववद्गुणितं सप्तहृतं लब्धं धार्यं शेषं द्वि २

धनंभवेच्छुध्यतितद्विपर्ययपादशांकुजेज्यार्किचलेसिततज्ज्ञयोः ९ ॥

निघ्नं वाण ५ युतं कृत्वा जातमन्नप्रमाणं पुनर्लब्धं त्रिगुणमित्यादिकं कर्मपुनः पुनः कार्यं तदा वर्षादीनां प्रमाणं भवति शाकांके त्रि ३ युक्तं विभजेच्चतुर्भिः ४ शेषेभवं
त्यम्बुधिपाः क्रमेण आवर्त संवर्त्तकपुष्करारव्याद्रोणश्चतुर्थो मुनिभिः प्रदिष्टः २ आवर्त्तेछिन्नवृष्टिः स्यात्संवर्त्तेजलपूरिता पुष्करेमंदवृष्टिः स्याद्द्रोणेवर्षन्तिसर्वदा ३
वर्षाधीशश्चतुर्थोयः सभवेत्तस्यनायकः तस्माच्चतुर्थोयः श्रोत्रकरणाधिप उच्यते ४ अस्यार्थः वर्षाधीशः सूर्योयदाभवेत्तदावासुकिस्तदाधीशः चंद्रेतक्षकना
माभूमिसुतेपीडाकरः सौम्येवक्रजिदाख्यो जीवेकमलपत्राक्षः सितेचदैत्याक्षः जातुर्धातुकनामा शनौभुजंगाधिपः प्रोक्तः इति तथा शाकः कर २ चंद्र १२ हृतः शेषे राम: ८
मासाभवंति वर्षेशाः चैत्रप्रमुखाश्चैतत्प्रोक्तं विज्ञैश्चिरातनैर्न्नियतंस्पष्टार्थाः एते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्षाणशिपयोरब्दान्त्रिगुणितान्पंचसंयुतान् कृत्वापंचेन्दुभिः शेषे भवंत्यब्दपसंज्ञकाः लब्धं३त्रिघ्नं पूरै५र्युक्तं भक्तं पंचेंदुभिस्तथा शेषे व्ययइति मोक्तो मु
निभिः पूर्वदर्शिभिः ६ अस्यार्थः वर्षाधिपस्याब्दान्राश्याधिपस्याब्दानेकीकृत्य त्रिभिः गुणायेत् ततः पंच५संयोज्य पंचदशभि१५र्भजेत् लब्धस्य प्रयोज
नं नास्ति शेषं व्ययमानं भवति राशीनामधिपा जातकोक्ता ज्ञातव्याः अब्दास्तु गौरीजातकोक्ताग्रहदशा एव तद्यथा रवेर्दशाब्दाः ६ चंद्रस्य १० भौमस्य ७ बु
धस्य १[illegible] गुरोः १६ शुक्रस्य २० शनेः १९ राहोः १८ केतोः ७ एतैरेवाब्दायव्ययानयनं कर्त्तव्यमिति भद्रं॥ इति श्रीमाधवविरचिते भास्वतीविवरणे ध्रुवाधिकारो द्वि
तीयः २ अथ तिथ्याधिकारो व्याख्यायते तत्र ग्रहगणितस्याहर्गणमूलत्वात्तदानयनमाह त्रिंशद्गुणेति अस्यार्थः अहर्गणः शून्यं० तस्मात्तृतीयतिथिरार
भ्यापरसंक्रान्तिपर्य्यंतं मेषः तदारभ्याग्रिमसंक्रांतिपर्य्यंतं वृषइत्यनेन क्रमेण सौरमासा उच्यंते ते मेषमुखार्कमासाः मेषादिगतसौरमासास्त्रिंशद्गुणाः ३०

त्रिंशद्गुणा मेषमुखार्कमासा दिनैः समेता ऋतुवासरोनाः ध्रुवं दमेतन्नगभक्तशेषं वारा भवंत्यब्दमुखादिनाथाः १ चन्द्रा१श्वि२वह्नि
३युग४भूत५रसा६श्व७तर्क६षड्६बाण५भूत५विषया५श्वयथाक्रमेण २

(कार्याः ते वक्ष्यमाणमासस्य भुक्तदिनैः सहिताकर्त्तव्याः
तेषु मेषमुखार्कगतमासेषु चंद्राश्विवह्निरित्यादिवक्ष्यमाणाः ऋतुवासराः क्रमेण संयोज्याः तत्र मेषे१ वृषे२ मिथुने३ कर्कटे४ सिंहे५ कन्यायां६ तुले७ वृश्चि
के८ धनुषि९ मकरे१० कुंभे११ मीने१२ एवं कृते ध्रुवं दं भवति दिनगण इत्यर्थः ऋतुवासरोना इत्यपि पाठः मेषादिमासाः सावनमासाः त्रिंशद्गुणाः कार्याः
एतदुक्तं भवति यस्यां तिथौ मेषसंक्रांतिर्भवति तदारभ्याग्रिममासस्य सैव तिथिर्यावदसौ मेषइत्यनेन क्रमेण गतमासाः त्रिंशद्गुणाः कार्याः उपस्थितमास
स्य गततिथयो योज्याः तेषु ऋतुवासरा ऊनाः कार्याः एवं कृते पूर्वानीताहर्गणसमो भवति ततः सप्त७ भचक्रशेषं वारा भवंति सप्तभक्ते ये वशिष्टास्ते ब्दमुखा
धिनाथात् अब्दस्य मुखं वर्षादिमेषसंक्रमणदिनाद्द्वितीयं तस्याधिनाथात् पालकात् गणनया वारा भवंतीत्यर्थः १ ऋतुवासराः श्लोकेन पठंति चंद्रेति अस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा०टी० अर्थः अत्ररवेर्गतवासरात्सूर्यफलस्य धनगतत्वाच्चक्रतुवासराज्ज्ञायंते यतो मृगादिकेन्द्रभुक्तौ ऋणं कर्कादौ धनं अतो गतिक्षयवशान्मेषादिकन्यांतं प्रतिराशिमे
९ कैकं दिनं वर्द्धते तत्परतस्तुलादिधनुरंतं साम्यं ततो मकरादिमीनान्तराशित्रये एकदिनस्य हानिर्भवति अवशिष्टाः पंचतैर्युतास्त्रिंशद्गुणा द्वादश सौरमा
ससंज्ञां तं पंचषष्ट्यधिकशतत्रयं ३६५ एतानि सौरवर्षस्य दिनानि २ अथ रवेः स्पष्टीकरणं सूर्येइति अस्यार्थः स्वरघ्नाः तिथयः सूर्ये देयाः स्वरघ्नाः सप्तगु
णितास्तिथयो दिवसाः सूर्यध्रुवके प्रदेयाः योजनीयाः तिथयोहर्गण इत्यर्थः एवं कृते मध्यमसूर्यो भवति तस्माच्छतशः खंडा लभ्यंते अत्रानुक्रमः मध्यमसू
र्यं पृथक् स्थानद्वये धृत्वैकत्र शतैक १०० भागे वक्ष्यमाणखंडकेषु युक्तः खंडो लभ्यते तदग्रे भोग्य उभौ धार्यौ तयोर्भुक्तभोग्यखंडयोरंतरेण शतभागशेषं संगुणय्य श
तेन लब्धमंशादिफलं तद्भुक्तखंडके योज्य मध्यमसूर्ये योजयेत् तद्दिवसस्यौदयिको नक्षत्रादिकः स्फुटः सूर्यो भवति यत्र शतभागेन खंडो न लभ्यते तत्र प्रथमखं

सूर्ये स्वर७घ्नास्तिथयः प्रदेयाः पृथक् शताप्ताः १०० क्रमशश्च खंडाः शेषाच्च भुक्तोनितभोग्यनिघ्नाच्छता १०० प्तयुक्तो ह्यधिकः स्फुटः स्या
त् ३ सूर्यस्य पंचांधक ९ रवीं १२ द्व १४ भूपाः १६ यनाः १७ नवेन्दुः १९ कुयमा २१ जिना २४ श्च सप्ताश्विनः २७ चंद्रगुणाः ३१ रसाग्नी ३६ द्वय
ब्धी ४२ समकृत ४९ सप्तशराः ५७ शरांगाः ६५॥ ४

उदवगुणकः अत्र वासना चतुर्युगे भगणाः ४३२०००० भूवासराः १५७७९१७८२८ सूर्यभगणात्भू
वासरैर्भज्य लब्धं रवेर्दिनगतिः ०।०।०।५९।८।१० एतत्सप्तभिर्विभज्य लब्धं स्वराः ० शेषं ३।८।१० त्यक्तं तस्य संस्कारोग्रे वक्ष्यमाणखंडकेषु कृतः सूर्यखंडान्याह
सूर्यस्येति अस्यार्थः अत्र प्रथमखंडक द्वितीयखंडक इत्यादिसंख्या बोधव्या अथैतेषां वासना तत्र प्रथमखंडकोत्पत्तिः सूर्यसिद्धान्ताहर्गणादानीतो मध्यमो
रविः ०।११।२६।०।० ग्रहेस्तं शोध्यमंदोच्चात् २।१७।१६।२७ शेषं मन्दकेंद्रं ५।५।५।० भुजः सिद्धः एवं भुजक्षिप्तपिंड ३९५५ लिप्तातत्त्वयमै २२५ र्भक्तालब्धं १७ चतुर्वि राम:
शतिज्याखंडेषु सप्तदशमः खंडः कृतनागाभ्रवह्नि ३०८४ मिति शेषं १३० भुक्तभोग्यखंडांतरेण संगुणय्य ९३ तत्त्वयमै २२५ र्भजेत् लब्धं ५३।४४। भुक्तपिंडेयुतं जातं क ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाद्याभुजज्या ३१३०।४४ ताभोजयुग्मपर्यन्तरेणसंगुण्यत्रिज्यया विभज्यलब्धं १८।० युग्मपरिधौऋणं कार्यं० स्फुटोयुग्मपरिधिः १३।४२ तद्गुणाभुजज्या ४२९८
६।५६ भगणांशैः ३६० भक्तालब्धं ११९।२४। तल्वयमेभ्यः २२५ उनत्वादिदमेवधनुर्लिप्तादिकं अत्रापि सूर्येस्वर्णं इत्यनेन जातो रविः ९५।२४। त्रिंशांशाकः
१ ... ३।१२। उभयोरंतरं १।२१ अस्यलिप्ता ८१ एताभिर्न्यूनफलं ११९।२४ शेषं ३८।२४ अस्मादष्टभागेनलब्धंप्रथमखंडकः ४।४५ अत्रशतानन्देनपंचदश
लिप्ताधिकं कृत्वासूर्यस्यपंचेत्युक्तं अथद्वितीयखंडकोत्पत्तिः पूर्ववदानीतंफलं १०२ अत्ररविः २६६।४४ द्वयोरंतरं ३५ तद्वर्जितंफलं ६७ अष्टभागेनल
ब्धं ८।३३ अयंरवेर्द्वितीयखंडकः पुनः प्राग्वदानीतंफलं ८० अत्ररविः १।२४।१४।१ अंतरं ९ कलान्तरयोर्योगः ८९ अष्टभागेनलब्धं ११।७ अयंतृतीयः खंड
कः पुनः पूर्ववत्फलं ५२ रविः १।२४।१४।१ अंतरं ५४ फलान्तरयोर्योगः १०६ अष्टभागेनलब्धं १३।१५ अयंचतुर्थखंडकः एवमपरेपिरवेः खंडका भवंति ते

पंचाद्रयो ७५ वेदगजाः ८४ कृतांकाः ९४ स्त्रिखेन्दवः १०३ भानुभुवः ११२ कुसूर्याः १२१ अष्टाश्विचन्द्राः १२८ शररामचन्द्राः १३५ खंद्रा
ब्धिचंद्राः १४१ शरवेदेन्दवः १४५ ५ खनन्द ९० निघ्नास्तिथयः शशांके केन्द्रे शत १०० घ्नास्तिथयः प्रदेयाः ॥

षांस्थापनाः प्रथमः ४।
४५ द्वितीयः ८।५३ तृतीयः ११।७ चतुर्थः १३।१५ पंचमः १५।१७ षष्ठः १६।२३ सप्तमः १८।१५ अष्टमः २०।२५ नवमः २३।३१ दशमः २६।३७ एकादशः ३०।२७ द्वादशः
३६।१५ त्रयोदशः ४१।१५ चतुर्दशः ४८।३७ पंचदशः ५७।३३ षोडशः ६४।३० सप्तदशः ७५।१८ अष्टदशः ८३।१२ एकोनविंशः ९३।१७ विंशः १०२।२१ एकविंशः
१११।१९ द्वाविंशः ११२।१५ त्रयोविंशः १२८।० चतुर्विंशः १४३।१९ पंचविंशः १४०।४० षड्विंशः १४५।० अनेनक्रमेणरवेः षड्विंशति खंडका निबद्धाः तैर्येनोनस्त
त्रगतः सूर्यः स्फुटोभवति नक्षत्रभगणस्तुसप्तविंशतिपरिमितः तस्मिन्निपात्यशेषः २५५५ जातः शतभागेनपंचविंशतिखंडकालब्धाः शेषस्यफलानय
नार्थंकृतः खंडकः ५ अथचंद्रस्पष्टीकरणं खनंदेति अस्यार्थः खनंद ९० निघ्नातिथयः शशांके ध्रुवकेप्रदेयाः शतघ्नाः १०० तिथयः केन्द्रध्रुवकेप्रदेयाः ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केन्द्रक्रमाः केंद्रभगणाः षड्विंशत्यश्वसप्तदस्रौ चषट्पंचाशदधिकसप्तविंशतिशतैः शोध्याः केन्द्रक्रमात्षट्त्रिंशगशराब्धिदस्रैः २४५७ विधुशोध्यः पुनः द्युवृंदा
द्दिनगणात्खंचसप्ताष्टीश्वतैर्यल्लब्धं तेनान्वितश्चंद्रः कर्त्तव्यः चरार्द्धभागोनेति समार्द्धोर्द्धर्षा मेषतुलादितश्चरार्द्धभागेन ऊनयुतः कार्यः तत्र विषुवादि मासे
खं० चंद्र १ नेत्र २ द्वयं २ चंद्र १ खं० शाश्वरार्द्धभागा भवंति खंच चंद्रश्च नेत्रे चद्वयं च चंद्रश्च खं शाश्वते तथा पुनर्द्दिनगणात् गगनचंद्रेषवश्च तैर्लब्धं केन्द्रे युतं
कुर्यात् त्र्ययमर्थः दिनगणांकर्मभूमौ स्थाप्य खनंदैः ९० संगुण्य चंद्रध्रुवके योजयेत् एवं मध्यचंद्रो भवति पुनर्द्दिनगणं शतेन संगुण्य केन्द्रध्रुवके योज्य
मेवं मध्यमः केन्द्रो भवति नतः केन्द्रभगणाः षट्शरसप्तदस्रैः २७५६ शोध्याः एतैरंकैः केन्द्रं शोधयेदित्यर्थः शेषं स्थापनीयं तथैव चंद्रभगणाः त्र्यगशराब्धि

केन्द्रक्रमात् षट्शरसप्तदस्रैः २७५६ शोध्यो विधुश्चागशराब्धिदस्रैः २४५७॥ ६ इन्दुर्द्युवृंदात्स्वहितः खखसूर्यै १२० श्चरार्द्धभागोनयुतः स
मार्द्धात् चरार्द्धभागा विषुवादिमासैः खं० चंद्र १ नेत्र २ द्वय २ चन्द्र १ खं० शाः ७ पुनर्द्युवृन्दाद्गगनेषु ५० लब्धं शीतांशुकेन्द्रे तु युतं प्रकु
र्यात् तन्मत्यहंस्युः शतशाश्वखंडा भोग्या भवां शाश्वधनं स्फुटः स्यात् ८ दस्रैः २४५७ शोध्यः शेषं कर्तव्यं केन्द्रशोधनाच्च यल्लब्धं तेन समं चं
द्रशोधनलब्धं यथा स्यात्तथा शोधनीयः यत्र न शुद्ध्यति तत्र सप्तविंशति शतानि संयोज्य शोधयेत् पुनर्द्दिनगणं खसूर्यैर्विंशोत्तरशतेन १२० भजेत् यल्लब्धमं
शादितं चंद्रे योज्यं चरार्द्धभागोनेति वर्षार्द्धे मेषतुलांतः चरार्द्धभागैरूनयुतः चन्द्रः कर्त्तव्यः तत्र मेषादिमासषट्के ऊनयुतः कार्यः तुलादिमासेः खंचंद्रनेत्रद्वय
चंद्रखांशाश्चरार्द्धा भवंति तद्यथा मेषस्थे खं० वृषस्थे चंद्रः १ मिथुनस्थे नेत्रे २ कर्कस्थे द्वयं २ सिंहस्थे चंद्रः १ कन्यास्थे खं० एवं तुलादावपि ज्ञातव्यं पुनर्द्युवृं
दादिति दिनगणाद्गगनेषुभिर्भागे ५० हृते यल्लब्धमंशादितत्केन्द्रे योज्यं तन्मत्यहंस्युरिति तस्मात्केन्द्रात्प्रत्यहं प्रतिदिनं शतशः शतभागेन खंडाद्भवंति भो
ग्येनोद्भवो येषां ते शाश्वस्युः ननु चन्द्रे धनं विधाय स्फुटः शशी भवति एतदुक्तं भवति भागानीते केन्द्रे तु प्रतिदिनं शतभागेन लब्धांकसमो वक्ष्यमाणचंद्रे खं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डेषुभुक्तः खंडो लभ्यते तस्याग्रे भोग्यः शतभागशेषं खंडो नितभोग्यखंडेन गुणायेत् शतेन १०० हरेत् यल्लब्धमंशादि तद्भुक्तखंडकान्वितं कृत्वा चंन्द्रे योजयेत् एव
मौदयिकः चंद्रः स्फुटो भवति अत्र वासना चंद्रभगणा २७०० त्रिघ्ना जिनोलब्धं खनंदाः ९० पुनश्चंद्रभगणा लब्धाः शतेन लब्धं शतं १०० द्वावपि गुणकौ
जातौ शोधकोत्पत्तिस्तु तिथिध्रुवाधिकारे प्रदर्शितः अत्र चन्द्रो वारप्रवृत्तिकालिकः स्फुटो जातः वारप्रवृत्तिस्तु मेषादि तुलादिषु चरार्द्धदेशान्तरघटिकाभि
र्द्दिनगते रात्रिशेषे भवति तस्मादत्र चन्द्रो यथा सूर्योदयकालिको भवति तदर्थं युक्तं चरार्द्धभागोनयुत इति अत्र चरार्द्धभागानयनं खचन्द्रैत्यादिना सामान्ये
नोक्तं अयं विधिः प्रतिदिनं त्रिप्रश्नाध्यायोक्तविधिनाचरमानीय चन्द्रगत्या संगुण्य षष्ट्या भजेत् यल्लब्धमंशादि तदूनयुतश्चन्द्रश्चरार्द्धभागसंस्कृतो भवति ७
पुनर्धुष्टंदाद्गगनेषु लब्धमिति केन्द्रभगणं भ्रमणेन सौरवर्षे वशिष्टा पूर्वोक्ता गति ७०५। ३ अत्र केन्द्रशताभा ३ त्यनेन गुणितं सौरवर्षदिनाद्यं षट्शरसप्तदस्त्रैः शो
इंदोः ख० रूपा १ ग्नि ३ रसाः ६ खचंद्रा १० नृपा जिनाः २४ पंचगुणा ३५ रसाब्धयः ४६ षष्टिः ६० पूर्णागाः ७५ कुनवा ९१ धृकाष्ठाः १०८
षड्गानवो १२६ रामनु १४३ नवाद्रा: १५९ ९ पंचाम्बुदा १७५ खांकभुवो १९० द्विखाश्वि २०२ विश्वाश्वि २१३ जात्यश्वि २२२ खरामद
स्रा २३० पंचाग्निद्वि २३५ गोग्नियमा २३९ कुसिद्धा २४१ नेत्राब्धि दृक् २४२ खद्विजिना २४३ त्रिसिद्धाः २४३ १० भुक्तिर्नवत्या ९० न्वित
भोग्यमिन्दोरर्कोनचंद्रात्तिथयः खनन्दैः ९० धितशेषं द्वा २१। २६ तयोरंतरं ७।११ अंनेन भक्तं सौरवर्षदिनाद्यं लब्धं गगनेषवः ५० एवं खसूर्यो अपि
ज्ञातव्याः १० अथ चंद्रस्य खंडाः इंदोरिति अत्रांकलिखितं व्याख्यायते अष्टाविंशतिखंडाः खरूपद्वत्यादि प्रथमद्वितीयसंख्ययोपर्य्युपरिस्थाप्या एतेषा
मुत्पत्तिः स्वोपकरणेः सूर्यखंडवत् ज्ञातव्याः अथोदयकालिकस्पष्टार्कचंद्राभ्यां शुक्लप्रतिपदादेर्गततिथीनां वर्त्तमानतिथ्याद्यंतयोरानयनमाह भुक्ति
रिति अस्यार्थः नवत्यान्वितं नवत्यन्वितं तच्च तद्भोग्यं चेन्दोश्चंद्रमसो भुक्तिर्भवति अर्केणोनोऽर्कोनः स चासौ चंद्रश्च तस्मात् खनंदैः ९० तिथयो भवंति शेषे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰टी नोनः शेषोनः सचासौ खांकश्च तस्माद्गगनांगनिघ्नाद्गगनं चांगानि च तैर्गुणितात् भुक्त्यंतरेण लब्धा घटिका भवंति अयमर्थः चंद्रस्य भुक्तखंडक भोग्यखं
११ डे निपात्य यद्वशिष्यते तेनान्विता नवतिः चंद्रस्य स्फुटभुक्तिर्भवति सूर्यस्य तत्रैव मध्यमा उदयिकालिका च अर्कचन्द्रौ स्फुटौ स्थाप्य चन्द्रादर्कं
विशोधयेत् यदि चन्द्रादर्को न शुद्ध्यति तदा भगणं दत्वा शोधयेत् शोधने यत्र शून्यं स्यात् छेषं न भवति तत्र शुक्लप्रतिपत्तिथिर्भवति शेषं चेद्भवति तदा ख
नंदैर्भजेत् लब्धं शुक्लप्रतिपदाद्या गततिथयो भवन्ति खनन्दभागशेषं गतमित्युच्यते तस्मात् खनन्दाच्छेषं शोधितमवशिष्टं गम्यं भवति तौ द्वावपि गुणौ
षष्ट्या ६० संगुणय रविचन्द्रयोर्भुक्त्यंतरेण भजेत् पृथक् पृथक् गतस्य गम्यस्य तिथेरादिकालस्यांतकालस्य च घटिका लभ्यते शेषं षष्ट्या ६० गुणनीयः भु
क्त्यन्तरा प्रभोग्यघटिका भवति उक्ते रवेर्भुक्तेः स्फुटीकरणविशेषमाह भुक्तिं च धृत्वा गणयेत् स्वभुक्तभोग्येन हृत्वां वरशून्यचन्द्रैः १०० लब्धं फलं मध्यगतेः
प्रदद्यादहः पंरस्यात् परकर्मकार्यं १ अस्यार्थः सूर्यमध्यमगतिं भुक्तभोग्यखंडान्तरेण संगुणय शते १०० न यल्लब्धमं शादिफलं तेनान्विता मध्यमभुक्तिः स्फुटा

शेषोन खांका ९० गगनाङ्ग ६० निघ्नाद्भुक्त्यंतरेणाप्ता घटिका भवंति ११

भवति अह्नः परस्यादिति अन्यदिने परभुक्तभोग्यान्तरेण गुणयेदिति सर्वत्र कार्यं अत्र वासना अमावास्यांते रविचंद्रौ द्वावपि समकक्षातः अपरमंडलभो
गेन तुल्यौ एकस्थगौ भवतः तदनंतरं चंद्रस्य शीघ्रगतित्वाद्रविः पश्चादवलंबते अतो रविभुक्तः चन्द्रभुक्ता द्विशोध्य येन तयोरंतरं सिद्धं भवति तयोश्चान्त
रे द्वादशभिर्द्वादशभिर्भागैः एकैका तिथिर्भवति तिथित्रिंशता च चान्द्रो मासः तस्मिन्नमावास्यांतात्प्रभृति द्वितीयामावास्यांतं यावद्रविचन्द्रयोरंतरे भग एम:
णो भवति अतो भगणकलानां त्रिंशत्तमो भागोऽयमस्वरा ७२० एतदष्टमो भागः खनंदाः ९० अथवा भगणः २१०० त्रिंशत्तमो भागः खनंदाः ९० तत्रैत्रै ११
राशिकं यदि खनंदैरेका तिथिस्तदनेन रविचन्द्रांतरेण कियत्य इति लब्धं गततिथयः शेषेण चत्रैराशिकं यदि भुक्त्यन्तरेण षष्ठि घटिकास्तदा शेषेण गते

CC-0. In Public Domain. Digitization by eGangotri

नगम्येनवाकियत्यइति लब्धमाद्यंतकालघटिकाइत्युत्पन्नं अथनिरंशाकतिथ्यानयनं तत्रायंक्रमः सूर्येध्रुवकंस्थानद्वयेनधृत्वाएकत्रप्रथमखंडकेनसंगु॰
णयशतेनभजेत् लब्धांशादिनोपहितेनसहितःस्फुटःसूर्योभवति एवंचंद्रध्रुवककेन्द्रध्रुवकावपिधृत्वाशतभागेनखंडकः शेषंसूर्यवत् एवंचन्द्रसूर्यौस्फु
टौविधायार्कोनचन्द्रादितितिथ्यानयनेयदुक्तंतत्कुर्यादेवंध्रुवकतिथेर्घटिकापलानिभवंति ११ अथनक्षत्रानयनं शताघ्नमितिअस्यार्थः शशांकाच्छ
ताघ्नंऋक्षंभवति शताच्छोधिताअंशायस्यसतथाविधःतस्मात्षष्ट्याहताद्भुक्तिहृताः नाड्योभवंति पूर्वोक्तशरजातिलब्धंराशिर्भवति शेषान्नक्षत्रवत्तद्राशेर्घ
टिकाभवंति अयमर्थः पूर्वोक्तविधिनास्फुटचन्द्राच्छतभागेनलब्धांकसमान्यश्विन्यादीनिभानिनक्षत्राणिभवंति शेषंभुज्यमाननक्षत्रस्यभागउच्यतेतच्छ
ताद्विशोध्यशेषंगम्यंभवति तौगतगम्यौद्वावपिराशिषष्ट्यासंगुणयस्फुटचंद्रभुक्त्याहरेत् लब्धंपृथक्पृथग्गतस्यगम्यस्यवर्त्तमाननक्षत्रस्यादिकालस्यांतका

शताघ्नमृक्षंशतशोधितांशात्षष्ट्याहताभुक्तिहृतास्तुनाड्यः राशिः शशांकाच्छरजातिलब्धंनक्षत्रवत्तद्घटिकाश्चशेषात् १२

लस्यचघटिकाफलानिभवंति एवंसूर्यस्यापिनक्षत्रानयनं तत्रायंविशेषः शतभागशेषाद्रविभुक्त्यालब्धंनक्षत्रस्यगतदिवसाभवंति शेषंषष्ट्यासंगुणयघटि
काद्यानयनंपूर्ववत्कार्यं राशिः शशांकादिति स्फुटचंद्रात्पंचविंशत्यधिकशतद्वय २२५ भागेनलब्धंराशिर्भवति मेषाद्यागताराशयोभवंतीत्यर्थः मेषान्नक्षत्र
वर्त्तमानस्यराशेर्घटिकाभवंति एतदुक्तंभवति शरजातिभागशेषंतद्राशेर्गतमुच्यते तच्छरजातिषुअपात्यशेषंगम्यंभवति द्वौताववितिषष्ट्यासंगुणयचन्द्रग॰
त्याहरेत् लब्धंतद्राशेर्गतगम्यघटिकाभवंति एवंसूर्यस्यापिराश्यानयनंकर्त्तव्यं अत्रवासनाभगणेसप्तविंशतिनक्षत्राणिभवंति अतोभगणकलानां॰
२१६००।सप्तविंशतितमेभागेऽष्टशत्या ८०० भागोनक्षत्रमाणंभवति अस्याष्टमोभागः शतं १०० अथनक्षत्रभगणस्य २७०० सप्तविंशोभागः शतं १०० अथ
त्रैराशिकं यदिशतगृहांशैः कियंतानिलब्धान्यश्विन्यादीनिभुक्तानिनक्षत्राणित्रैराशिकं यदिभुक्ताःषष्टिघटिकातदातच्छेषांशेगतेगम्येवांकियत्यइतिल॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा०टी० ष्यंगतगम्यघटिकाः यदिसप्तविंशतिघ्नतेर्द्वादशराशयो भवंति तदैको राशिः कियत्प्रमाणेन लब्धं शरजातयः २२५ १२ अथ रविचंद्राभ्यां भुक्तविष्कंभा
१२ दियोगानां भुज्यमानाद्यंतयोश्चानयनमाह एवमितिअस्यार्थः रविश्चइन्दुश्च रविन्दू तयोर्युतिर्तो योगात् देवनक्षत्रवच्छून्यभागेनयोगा भवंति सप्तभि
रन्विता चंद्रगतिस्तु भाजकः अयमर्थः स्फुटरविचन्द्रोयुतौ हत्वा शतेन भजेत् लब्धं विष्कुंभाद्या गतयोगा भवन्ति शेषं गतगम्यं च षष्ट्या संगुण्य रविचं
द्रयोर्गतियोगेन भजेत् लब्धं वर्त्तमानयोगस्य गतगम्यघटिका भवंति अत्रवासना रविचन्द्रयोः स्वस्वकक्षास्थयोः प्राग्वज्ज्ञातो नयमंडलभोगयोगेन भग
णः तत्तुल्येन विष्कुंभाद्याः सप्तविंशतियोगाः पूर्वाचार्यैः कल्पिताः अनयोर्भोगप्रमाणेन भगणकलानां सप्तविंशतिमो भागः ८सैद्धः स च शतमितः १०० अ
तो रविचन्द्रयोगे भागांशकानां मयमेव भाजको निबद्धो गतगम्येव भुक्तियोगेन चत्रैराशिकं यदि भुक्तभोगांशकैः षष्ठिघटिकालब्दं तैर्गतगम्यघो गांशकैः कि

एवं रवींद्वोर्युतितश्चयोगाः सप्ताऽन्विताश्चन्द्रगतिस्तुहारः १३ अर्कोनचन्द्रात्खवेदहीनात्ततोपिशेषाच्चशराब्धिलब्धं सप्तावशेषं क
रणं ववाद्यं तन्नाडिकाद्यास्तिथिवद्भवन्ति १४

यत्यइतिलब्धं गतागम्याचाद्यंतकलाघटिकादृति अथ करणानां ववादीनामानयनमाह अ
र्कोनेति अर्केणोनः अर्कोनः सचासौ चन्द्रश्चतस्मात्पुनः शराश्च वेदाश्च तैर्हीनात् खशराब्ध्यपश्चतैः पंचचत्वारिंशद्भिः ४५ लब्धं सप्त ७ हृतावशेषं ववाद्यं क
रणं भवति तस्य नाडिकाद्यास्तिथिवद्भवन्ति अस्यार्थः स्फुटचन्द्रः स्फुटसूर्योनं कृत्वा पुनः शरवेदैरूनं कृत्वा शराब्धिभिः ४५ भजेत् यल्लब्धं तत्सप्त ७ हृताव
शेषं कर्त्तव्यं शेषांकतुल्यानि ववादीनि गतकरणानि भवन्ति शेषं वर्त्तमानस्य गतमित्युच्यते तच्छेषं शराब्धिषु प्रपात्य गम्यं भवति द्वावपि राशी षष्ट्या संगु
णय रविभुक्तोनितचन्द्रभुक्त्या भजेत् यल्लब्धं वर्त्तमानकरणस्य गतगम्यघटिका भवंति अत्रवासना करणानां तिथ्यर्द्धभोगत्वात्तिथिभोगप्रमाणस्य खनं रामः
दपरिमितस्यार्द्धेन शराब्धिभिः ४५ करणानि लभ्यंते शरवेदैः करणं क्रियते यतः शुक्लप्रतिपद्द्वितीयार्द्धाद्ववादीनां प्रवृत्तिः तत्प्रथमार्द्धस्य किंस्तुघ्नाख्यस्थिर १२

CC-0. In Public Domain. Digitization by eGangotri

अथस्थिरकरणानांतिथ्यर्द्धावस्थितिनियममाह परेदलइति यात्कृष्णचतुर्द्दशीतस्याअपरेदलेद्वितीयार्द्धेनागः शुक्लप्रतिपत्प्रथमार्द्धेकिंस्तुघ्नमिति आगमएवात्र प्रमाणमिति अथसारणीमाह दिनदिनइति अस्यार्थः प्रतिदिनमहर्गणेप्रशांकोयोज्यः मध्यमसूर्येसप्त ७ मध्यमचन्द्रेखनव ९० चन्द्रकेन्द्रेशतं १०० सर्वयोज्यसूर्यचन्द्रौस्फुटौकृत्वापूर्ववत्तिथ्याद्याःप्रसाध्याः अथवापूर्वाहर्गणेनानितामध्यमारवीन्दुकेन्द्रचन्द्राःस्वस्वेष्टदिनगणकोष्टान्वितादृष्टदिनेमध्यमाभवन्ति अथपूर्वदिनस्फुटीकरणं पूर्वदिवसस्यस्फुटौरविचन्द्रौयथाग्रिमदिवसस्यस्फुटौभवतः तथालिख्यते पूर्वोक्तः

१	२	३	४	५	६	७	८	९	१०	२०	३०	४०	५०	६०	७०	८०	९०	१००	२००	३००
७	१४	२१	२८	३५	४२	४९	५६	६३	७०	१४०	२१०	२८०	३५०	४२०	४९०	५६०	६३०	७००	१४००	२१००
१	२	३	४	५	६	७	८	९	१०	२०	३०	४०	५०	६०	७०	८०	९०	१००	२००	३००
९०	१८०	२७०	३६०	४५०	५४०	६३०	७२०	८१०	९००	१८००	२७००	३६००	४५००	६३००	७२००	८१००	९०००	१८०००		२७०००

परेदलेकृष्णचतुर्द्दशीयातिथ्यर्द्धभोगः शकुनिश्चतुष्पात् नागश्चकिंस्तुघ्नमितिक्रमेणचत्वारिविद्यात्करणानिनित्यं १४ दिनेदिनेहर्गणरूपाशुक्लः सप्तैव ७ सूर्येचखनन्दमिन्दौ ९० खखेन्दवः १०० केन्द्रगणेप्रयोज्याः प्राग्वत्स्फुटीकार्यतिथिःप्रसाध्या १५ स्फुटभुक्त्यान्वितोकोग्रिमदिवसस्यस्फुटोभवति अथवारविस्फुटीकरणोलब्धोयः खंडकस्तत्कोष्टस्यांकान्वितोर्कोग्रिमदिवसस्यस्फुटोभवति अथपूर्वदिवसस्यभुक्तभोग्यान्तरेणाढ्यानवतिः ९० रग्रिमदिवसस्यभुक्तिर्भवतितयोः पूर्वाग्रिमयोः भुक्त्यन्तरेणशतभागशेषंसंगुणयेश

०	१	२	३	२	३	३	४	४	५	१०	१५	२०	२५	३०	३५	४०	४५	५०	४०	३०	दि
१	२	३	४	५	६	७	८	९	१०	२०	३०	४०	५०	६०	७०	८०	९०	१००	२००	३००	ग्रस्तकेन्द्र
१००	२००	३००	४००	५००	६००	७००	८००	९००	१०००	२०००	३०००	४०००	५०००	६०००	७००१	८००२	९००२	१००२	२००२	३०००६	म·गतिः
१	२	३	४	५	६	७	८	९	१०	१२	२४	३६	४८	०	१२	२४	३६	४८	११	०	

१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तेनाप्तमंशकाद्यं स्यात्यं तद्यदि पूर्वदिनभुक्तितोऽग्रिमदिनभुक्तिरधिका भवति तदा पूर्वभुक्तौ धनं कार्यं ऊना चेद्भवति तदा ऋणं कार्यं तया भुक्त्यान्वितश्चन्द्रोऽग्रिमदिवसस्य स्फुटो भवति तस्मिन्नेकदिनान्तरेणैककला योज्या एवं प्रत्यहं रविचन्द्रौ स्फुटौ विधाय तिथ्यानयनं कर्त्तव्यं १५ अथ सूर्यसंक्रान्तिसाधनं राशिरिति अस्यार्थः स्फुटार्कः शरजाति २२५ भागेन लब्धं मेषाद्यो गतराशयो भवन्ति शेषं त्रिंशता संगुणय पूर्ववद्धरेण लब्धा अंशकाः शेषं षष्ट्या संगुणय पूर्ववद्भजेत् लब्धाः कलाः

५	४	३	२	२	१	२	२	३	३	४	५	६	७	८	८	१०	९	१०	९	९	९	७	७	६	४	०	०	०	
०	५	९	१२	१४	१६	१७	१९	२१	२४	२७	३१	३६	४२	४९	५७	६५	७५	८४	९४	१०३	११२	१२१	१२८	१३५	१४२	१४५	०	०	सूर्यस्य भुक्तिः
७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	७	
२१	१६	१२	८	८	४	८	८	१२	३६	२१	२५	२९	३३	३३	४२	२७	४२	३७	३७	३७	२९	२९	२५	१६	०				
०	४८	३८	२४	२४	१२	२४	२४	३६	४८	०	१२	२४	३६	३६	४२	४८	०	४८	४८	४८	२४	२४	१२	४८	०				
०	०	१	३	६	१०	१६	२४	४६	६०	७५	९१	१०८	१२६	१४३	१५९	१७५	१९०	२०२	२१३	२२२	२३०	२३५	२३९	२४१	२४२	२४३	२४३	२४३	चन्द्रभुक्तिः
९०	९१	९२	९३	९४	९६	९८	१०१	१०४	१०५	१०६	१०७	१०८	१०७	१०६	१०५	१०२	१०१	९९	९८	९५	९४	९२	९१	९१	९०	९०	९०	९०	

एवंविकलाः एतदंशादिकं त्रिंशतो विशोध्य शेषं स्फुटरविः गत्याष्टगुणितया भजेत् लब्धं रविसंक्रमणकालं दिनादिकं अथवा स्फुटरविं वसुभिः संगुणय ष

राशिः स्फुटार्काच्छरजातिलब्धं २२५ खवह्नि ३० निघ्नादवशेषितोंशः ॥

स्या ६० भजेत् लब्धा अंशकास्तेभ्यः त्रिंशताप्ता ३० राशयः शेषं कलादिकं अत्राप्यंशादितो विशोध्य शेषं पूर्ववत्कर्त्तव्यं ततो रविसंक्रमकालः स्फुटो भवति अथवा

अ	भ	कृ	रो	मृ	आ	पु	उ	श्ले	म	पू	उ	ह	चि	स्वा	वि	अ	ज्ये	मू	पू	उ	श्र	ध	श	पू	उ	रे	मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
३	३	२	२	२	२	२	२	२	०	२	२	१०	१	०	०	६	५	०	३	२	१	०	६	६	५	४	३	६	२	६	२	५	१	३	४	५	०	२
१५	५३	४०	३४	३३	३६	४२	४५	४७	०	२२	५७	२५	५०	७	१९	२६	०	३४	३७	४१	४७	५७	५२	३०	५६	०	१५	९	३५	१५	४४	४५	१०	४	३५	५३	२०	९
८	२३	११	२४	२९	३४	८	२२	१०	०	४०	१५	२९	३५	२२	१५	१	५०	०	५१	५४	४५	२९	९	४९	१८	१	८	११	४९	४९	२९	२०	३८	३	२०	५०	९	५४

CC-0. In Public Domain. Digitization by eGangotri

स्फुटरविः राशिभागेष्वमाणांके पातयित्वा शेषं रविस्फुटभुक्त्या भजेत् लब्धं दिनादिकं रविसंक्रमकालः स्फुटो भवति अथवा परप्रकारेण रविसंक्रान्त्यानयनार्थं
मस्माभिः कृतः श्लोकः शाकोऽग्निवेदाब्धिकुभिः १४४२ विहीनस्त्रिधाहतश्चन्द्र तिथीन्दुरामैः ३११५१ षष्ट्याप्तयुक्तोसप्त ७ शेषितोऽर्द्धः युक्तो ध्रुवः सद्द्विजमाधवे
न १ अस्यार्थः इष्टशाकवर्षगणः अग्निवेदाब्धिकुभिः द्विचत्वारिंशदधिकचतुर्द्दशैः १४४२ हीनः कार्यः ततस्त्रिधास्थाने त्रयेधार्य्यः तत एकत्र चन्द्रेण गुणः का
र्यः अपरत्र तिथिगुणः तृतीयस्थानस्थइन्दुरामगुणकार्यः षष्ट्या ६० भागमपहृत्योपर्युपरियोज्य उपरि सप्तभिः ७ र्भजेत् शेषं संक्रान्तिध्रुवो भवति मेषादीनां क्षेप
को वारादिः मेषेग्नि ३ वाणेन्दु १५ गजाः ८ वृषे गद ६ नवे ९ श्वरा ११ पक्ष २ शराग्नि ३५ नाना ४९ युग्मेथ कें ग ६ तिथयो १५ त्रिवेदा ४३ सिंहे क्षिवेदाब्धि ४४ नवाश्विनेयः
२९।२ नार्याः शरा ५ र्थाब्धि ४५ नखा २० स्तुले केचन्द्रा १ भ्रचंद्रै १० भगुणाश्व २८ कीटे गुणा ३ ब्धिरामाः ३।४।३१ कृतवेदवह्नि ३४ नखा २० धनुष्यर्थ ५ गुणेषु ५३ खार्थौ ५०

ततोऽपि षष्ट्या ६० निहता भवन्ति लिप्ताः पुनः षष्टि ६० हृतास्तु नाड्यः १६ भौमः खर ७ घ्नाद्युगणात्कृताप्तं ४ पुनर्घ्रुवृन्दात्त्रिशता ३०० तहीनम्

३ मृगेघटेभ्रं ० खपक्षा २० नंदवेदा ४९ मीने क्षि २ ग्रह ९ वेद ४ वाणाः ४९ योज्या ध्रुवांके रविसंक्रमस्य स्फुटस्तदास्यादिवसादिकालाः ४ एते क्षेपकां कावाराद्यास्त्रय
स्त्रयो ध्रुवके योज्या ततो वारादिको मेषादिसंक्रान्तिकालः स्फुटो भवति १६ इति माधवमिश्रविरचितभास्वतीविवरणे तिथ्यधिकारः॥ अथ ग्रहाधिकारो व्या
ख्यायते भौमइति अस्यार्थः खरघ्ना ७ त्सप्तगुणात्कृताप्तं चतुर्भिराप्तं भौमो भवति पुनर्ध्रुवंदादहर्गणात्त्रिशते ३०० राप्तं हीनं कार्यं अयमर्थः अहर्गणांकं भूमौ
संस्थाप्य सप्तभिः संगुण्य कृतैश्चतुर्भिर्भजेत् यल्लब्धमंशादि तद्भौमध्रुवके योजयेत् पुनरहर्गणांशततयेण भजेत् लब्धमंशादिना हीनं कृत्वा स्थाप्यं समध्यमो भव
ति अत्र वासना युगे भौमभगणाः २२९६८३२ तथाचोक्तमार्यसिद्धान्ते दस्त्राष्टरसांकाक्षिलोचनानि कुजस्येति युगभूदिनानि १५७७९१७८२९ उक्तं च वसुद्व्यष्टा
द्रिरूपांकसप्ताद्रितिथयो युगे तत्र त्रैराशिकं यदि युगभूदिनैरेतावन्तो भौमभगणा लभ्यन्ते तदैकेन किं यदिति लब्धा भौमस्य दिनगतिः ३१।२६ कलादिके यंशाहतात्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा॰टी॰ १४

[illegible]दिनगतीरंशादिकाः १।५४।४८ अत्रपंचदशकलाभिरेकोभागः कृतः एकांशस्यभागचतुष्टयं ४ आद्यंकलादीनांभागत्रयंयोज्यजाताः खरा ७ यतोभागचतु[illegible]भवति अतोचतुर्भिर्भागहारः अथबुधशीघ्रानयनं अष्टाष्टेति अस्यार्थः अहर्गणोऽष्टाष्टभिरष्टाशीतिभिः ८८ शेषःकार्यः ततःखखरामैः शतत्रये णगुणनीयंतस्मात्पक्षाक्षिभिर्द्वाविंशतिभिः २२ भजेत् यान्नमंशादितद्बुधशीघ्रेयोजयेत् एवंबुधशीघ्रोच्चंभवति अष्टाष्टशेषेयत्रभूत्यंतत्रध्रुवएवशीघ्रोच्च अथ वाऽष्टाष्टएवखखरामगुणाः कर्त्तव्याः अत्रवासना बुधशीघ्रोच्चस्ययुगभगणाः १७९३७०६० तथाचार्यसिद्धान्ते बुधशीघ्रस्यशून्यर्तुखाद्रित्र्यंकनगेंदवः तत्रत्रै राशिकं यदियुगसावनदिनैरेतावन्तोबुधशीघ्रस्यभगणालभ्यन्ते तदैकेनसावनेनकियदितिलब्धादिनगतिः ४।१५।३२ इयंशताहतात्रिंशताप्ताजाताबुधशीघ्रस्य दिनगतिरंशादिका १३।३९।२६ अनयागुणकभाजकावुत्पद्येते यस्मिन्गुणितेजातंनिष्कलंशतत्रयं ३०० अयमेवगुणकोजातःभाजकोद्वाविंशतिभक्तात्कृतत्रया

अथाष्ट८८ शेषः खखरामनिघ्नः ३०० पक्षाक्षिभिः २२ सोमसुतस्यशीघ्रं १ गुरुर्गुणाग्रा ३ द्युगणाद्दशाप्तोवेदाब्धिभिर्लब्धविवर्जितश्च ॥

लब्धंपूर्वानीताबुधोच्चस्यगतिः १३।३८।११ स्वल्पान्तरत्वान्नदोषः यतोऽष्टाष्टपरिमितोदिनगणोभगणःपूर्णोभवति अतोऽष्टाष्टशेषइत्युक्तं यथाहर्गणः ८८ खख रामगुणाः २६४०० पक्षाक्षिभिःलब्धं १२०० भगणः १ अथगुरुमध्यमानयनं गुरुरिति अस्यार्थः गुणा ३ ग्रात् गुणोस्त्रिभिर्हताद्दिनवृंदाद्दशाप्तंदशभिराप्तंगुरुर्भवति पुनराप्तंदिनगणाद्वेदाब्धिभिश्चतुश्चत्वारिंशद्भिः लब्धेनविवर्जितंकार्यं एतदुक्तंभवति अहर्गणंत्रिभिःसंगुण्यदशभिर्भजेत् यल्लब्धमंशादिकंतत्स्थाप्यंपुनर्दि नगणाद्वेदाब्धिभागेनयल्लब्धमंशादितेनप्रथमस्थापितंहीनंकृत्वागुरुध्रुवकेयोजयेत् एवंमध्यमोगुरुर्भवति अत्रवासना युगेगुरुमध्यमभगणाः ३६४२२० तथा चार्यसिद्धान्ते बृहस्पतेःखदस्राश्विवेदषड्वह्नयोयुगे त्रैराशिकंयद्येतावद्भिर्युगसावनदिनैरेतावन्तोगुरुमध्यमभगणालभ्यंते तदैकेनसावनेनकियदितिलब्धंकला दिकागुरोर्मध्यमगतिः ४।५९।२ इयंशतात्रिंशताप्ताजाताऽत्रगुरुमध्यमदिनगतिःकलादिका १६।३७।१० अनयागुणकभाजकयोरुत्पत्तिः इयंदशघ्नात्शेषकलादि रम॰ १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain: Digitization by eGangotri

पुनानिघ्नगुणाः ईदावपिगुणकभाजकौजातौ गुणेभ्योदशभागेनलब्धं०।१८।० उभयोरंतरं १।२२।५० अनेनैकाख्यदिनगणाल्लब्धं वेदाब्धयः ४४ वेदाब्धिभिर्लब्ध
विवर्जितेकृतेजाताशून्यीनीता दिनगतिः १६।३८।११ स्वल्पांतरत्वान्नदोषः अथशुक्रशीघ्रानयनं वेदाहतेति अस्यार्थः वेदाहतश्चतुर्गुणोहर्गणोऽघोद्विस्थानेधार्यः
तस्यगुणभागेनयुक्तः सितस्यशुक्रस्यशीघ्रंभवति पुनर्दिनगणात्खशकैः खंचशकाश्चतैर्लब्धंसहितंकार्यं अयमर्थः दिनगणंवेदैःसंगुण्याधःस्थानद्वयेस्थापयेत
ततः एकत्रगुणैर्भजेत् लब्धमंशादि अपरत्रस्थितोऽकोधिकःकर्तव्यः पुनर्दिनगणंधृत्वाखशकैर्भजेत् यल्लब्धमंशादितत्सहितंकृत्वाशुक्रस्यशीघ्रध्रुवकेयोजयेत् ए
वंशुक्रशीघ्रंभवति अत्रवासना चतुर्युगेशुक्रशीघ्रभगणाः ७०२२३७६ उक्तंचार्यसिद्धान्ते सितशीघ्रस्यषट्सप्तत्रियमाश्विखभूधरा इतित्रैराशिकं यदियुगभूदिनैः शु
क्रशीघ्रभगणालभ्यंतेतदैकेनभूदिनेनकियदिति लब्धंशुक्रशीघ्रस्यदिनगतिरंशादिकाः १।३६।८ इयंशतानाम्नाहतात्रिंशताजातात्रसितमध्यमगतिरंशादिका ५।२०।२६
अथयथेयंदिनगतिरुत्पद्यते तथाकराशताकृत्वा तद्यथावेदाहताः ४ गुणभागयुतः ५।२० उभयोरंतरं ०।२६।४० अनेनैकसंख्यादिनगणाल्लब्धंखशका १४० खशकभा

वेदाहतोधोगुणभागयुक्तः सितस्यशीघ्रंसहितंःखशकैः १४०॥२ शनिर्घुवृन्दान्नव९भागलब्धंध्रुवान्वितंरव्युदयस्यमध्याः॥

गंशयुक्ताजाताशुक्रशीघ्रस्यदिनगतिरंशादिका ५।२०।२५।४२ स्वल्पांतरत्वान्नदोषः २ अथशनिमध्यमानयनं शनिरिति अस्यार्थः घुवृंदाद्दिनगणात्नव९भाग
लब्धंशनिर्भवति एतेग्रहाःस्वस्वध्रुवकेनसमन्विताः सूर्योदयकालिकामध्यमाभवंति अयमर्थः दिनगणंकर्मभूमौसंस्थाप्यनवभिर्भजेद्यल्लब्धमंशादितच्छनिध्रु
वकेयोजयेदेवंमध्यमःशनिर्भवति अत्रवासना चतुर्युगेशनिभगणाः १४६५६८ तथाचार्कसिद्धान्ते शनिर्भुजंगषट्पंचषट्वेदनिशाकराः अत्रत्रैराशिकं यदियुग
सावनदिनैरेतावंतःशनिभगणाःलभ्यंते तदैकेनसावनेनकियदिति लब्धाकलादिकाशनेर्दिनगतिः २।०।२२ इयंशताहताक्षिंशताप्ताजाताशनेर्दिनगतिः कलादिका
६।४१।१६ अनयैकसंख्याकदिनवृंदाल्लब्धंभाजकोनवपरिमितः ९ नवभिर्लब्धाशून्यीनीताशनेर्दिनगतिः ६।४० स्वल्पांतरत्वान्नदोषः २ अथबुधशुक्रयोर्मध्यमानय
नंकुजगुरुशनीनांशीघ्रानयनं दिग्घ्नेति अस्यार्थः दिग्घ्नाद्दशगुणाद्दिनगणात्घनोनात्सप्तदशभिर्हृतात्पुनःखनगांशेनसप्ततिभिर्भागेनहीनात्त्रिभिर्लब्धंहृत्गुण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रो मध्यमो भवतः आर्किकुजेज्यानामर्कस्यापत्यमार्किः स च कुजश्च ज्यश्चैतेषां शीघ्रं भवति अयमर्थः अहर्गणं दिग्भिः संगुण्य सप्तदशभिरूनं कुर्यात् ततः स्थानद्वये धृत्वैकत्र खनगैर्भजेत् लब्धेनांशादिनोपरिस्थितेहीनं कृत्वा त्रिभिर्भजेत् लब्धं ज्ञभृग्वोर्मध्यमः शनिगुरुभौमानां शीघ्रं भवति अत्र वासना इह मध्यमसूर्य एव ज्ञभृग्वोर्मध्यमं कुजगुरुशनीनां शीघ्रं स एव कुतः यतः आगान्तिकानां सूर्यज्ञशुक्राणां मंदभगणाः चतुर्युगाब्दा एव ४३२०००० भौमजीवार्कजानां शीघ्रभगणाः अपि च चतुर्युगाब्दा एव स्युः कथमिति यदिदं भचक्रं चतुर्थकक्षास्थितसूर्यगतिवशंगतः तदधः स्थौ सितज्ञौ शीघ्रं सूर्यनिकटं तावत्याकृष्यतयोः कृते आत्मानं मंदं करोति तथा स्वोपरिस्थान्भौमेज्यमन्दान्सूर्यः स्वात्मानं पराकृष्यते षां कृते आत्मानं शीघ्रं दर्शयति अतो भौमादीनां मन्दशीघ्रकर्मद्वयत्वाद्वक्रमार्गता च स्यात् चंद्रार्कयोरेकमन्दकर्मत्वात् वक्रतानभवति तस्माद्यथाशतांशेराश्यादिकोमध्यमः सूर्यो भवति तथाशतानन्देनायं क्रमो निवद्धः निघ्नादिति चतुर्युगे रविभगणाः ४३२०००० भूवासराः १५७७९१७८२८ त्रैराशिकं यद्येतावद्भिर्भूवासरैरेतावंतः सूर्यभगणा लभ्यंते तदैकेन किमिति लब्धाः कलादिका रवेर्दिनगतिः ५९।८।१० इयं शतानाहता त्रिंशता प्ता जाता शतांशे रवेर्दिनगतिरंशादिका ३।७।७

दिग्घ्नाद्वनोना १७ त्खनगांशहीनात्रिभिर्भृगुज्ञार्किकुजेज्यशीघ्रं ३

१२ अस्या आनयनार्थे दिनगणो दशगुणितः तस्मात्त्रिभिराप्ता गतिः ३।२० अन्तरं २।५२।४० अनेनैकसंख्यादिनं वृन्दाल्लब्धं खनगांश ३।७० हीना लब्धा पूर्वानीता दिनगतिः ३।७।८।१४ स्वल्पान्तरत्वान्न दोषः अत्रापि निःकरत्वाद्गुणकभाजकौ निवद्धौ इह सूर्यध्रुवकाभावाद्यस्मिन्काले रविगतिवशाद्भगणपूरणं भवति तत्कालिक एव मध्यमः आयाति तन्मेषसंक्रमकालादग्रे दिनद्वयेन दशघटिकाभिः सार्द्धाभिर्भवति तदर्थं घनोनादिति ग्रंथारंभे दिने एकपंचत्रिंशद्घटिका भुक्ता ग्रिमदिने सूर्योदयकालिको मेषादौ मध्यमो रविर्जातः तद्दिनादिकं दशघ्नषष्ट्योपरिसंयुतं जातं १५।४० अत्रांशाकमेकं विंशतिकला योज्या पनिवद्धघनोना संस्कारोस्माभिः शीघ्रवीजानयने श्लोकं कृतमस्ति तस्मिन्वीजसंस्कृतो यावद्द्वादशराश्यात्मको भगणो यावत्सूर्यते तावत्पूर्वाहर्गणे नैव कर्म्म कर्त्तव्यं अयमर्थः यदा दशगुणो घनो भवति तदाग्रिमाहर्गणोपरि शीघ्रानयनं कर्त्तव्यं यावद्घनो न भवति तावत्पूर्वानीताहर्गणे घनो नो भवति इत्युपरि कर्म कार्यमिति अथवा दिनगणं कृत्वा तद्ग्रहस्य भुक्तको ष्टस्याकं त्विदं ध्रुवं कृत्वा सम मध्यग्रहो भ १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथग्रहाणां [illegible] ष्टिकरणमुच्यते तत्रांकफलसंस्कारमा
ह अष्टेति पृथक् द्विस्थाग्रहाः अष्टेषुषट्नन्दचतुःशताढ्याः क
र्त्तव्याः तेषड्भगतैष्यकेन्द्राः भवंति वीजंदेशान्तरसंस्कृताः भौमा
दयोमध्यग्रहाः पृथक्स्थानद्वयेधार्याः ततएकत्रक्रमेणाष्टेषुषट्
नंदचतुःशतैर्युक्ताः कार्याः तद्यथा भौमानयनेभौमोधःस्थापितोऽष्ट
शतैः ८००रधिकः कर्त्तव्यः वुधानयने पृथक्स्थापितो वुधः पंचशता

अष्टे८००षु५००षट्६००नंद९००चतुः४००शताढ्याः पृथ
ग्ग्रहाः षड्भगतैष्यकेन्द्राः षड्भाधिकाश्चक्रगणाद्विशो।
ध्याशतेन१००लब्धाः स्फुटमत्रखंडाः रुद्रा११नवेन्दु
१९द्वियमा२२नवेन्दु१९रुद्राश्चभोग्योङ्कवयुक्तहीनाः४
धिकः ५००कार्यः एवंषट्शताधिको६००गुरुः कार्यः नवशताधि
कः९००शुक्रः चतुः४००शताधिकः शनिः कर्त्तव्यः क्रमेणाधिके
कृतेसतिद्वादशशतैः१२००अपात्यशेषंगम्यकेन्द्रंभवति तन्मंद
फलंग्रहेऋणधनंकार्यं तस्मात्केन्द्राच्छतैक१००भागेनक्रम।
शोवक्ष्यमाणाःखंडकालभ्यंते तेयथारुद्रानवेन्दुद्वियमानवेंदु

भौमभुक्तिराश्यादिका

०१	२	३	४	५	६	७	८	९	१०	२०	३०	४०	५०	६०	७०	८०	९०	१००	२००	३००
००	००	००	००	००	००	००	००	००	००	००	००	००	०१	०१	०१	०१	०१	०१	०३	०५
०१	०३	०५	१६	००	१०	१२	१३	१५	१७	३४	५२	६९	८७	०४	२२	३९	५७	७४	४९	२४
४४	२९	२४	५९	४४	२८	१३	५८	४३	२८	५६	२४	५२	२०	४८	१६	४४	१२	४०	२०	००
४८	३६	२४	१२	००	४८	३६	२४	१२	०	०	०	०	०	०	०	०	०	०	०	००

अथवुधोच्चभुक्तिराश्यादिका

१	२	३	४	५	६	७	८	९	१०	२०	३०	४०	५०	६०	७०	८०	९०	१००	२००	३००
००	००	००	००	००	००	००	०१	०१	०१	०२	०४	०५	०६	०८	०९	१०	००	०२	०३	०४
१३	२७	४०	५४	८६	८१	९५	०९	२२	३६	७२	०९	४५	८१	१८	५४	९०	२७	६३	२७	९०
३८	१६	५४	३२	१०	४९	२७	०५	४३	२१	४३	०५	२७	४९	११	३२	५४	१६	३८	१६	५५
४०	२२	३३	४४	५५	६	१७	२८	३९	५०	४०	३०	२०	१०	०	५०	४०	३०	२०	४०	०
१	२	३	४	५	६	७	८	९	१०	२०	३०	४०	५०	६०	७०	८०	९०	१००	२००	३००
००	००	००	००	००	००	००	००	००	००	००	००	००	००	००	००	००	००	००	००	००
००	००	००	०१	०१	०१	०१	०२	०२	०२	०५	८	११	१३	१६	१९	२२	२४	२७	५५	८३
१६	३३	४९	०६	२३	३९	५६	१३	२९	४६	३२	१९	०५	५१	३८	२४	१०	५७	४३	२७	१०
३६	३८	५४	३२	११	४९	२७	५०	४३	२१	४३	५	२७	४९	११	३२	५४	१६	३८	१६	५५

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा॰टी॰ चेति ११।१९।२२।१९।११ एते भौमादीनां मंदखंडकाः शतेन भागेन लब्धा गतखंडका भवन्ति लब्धांकसमो गतखंडकः स्थाप्यः तदग्रिमभोग्यो धार्यः ततो योऽपसिन्यन तिसन
१६ स्मिन्यातनीयः शेषं खंडांतसंज्ञके धार्यं एवं कृते भोग्यखंडकं विसृज्य गतखंडकः स्थापनीयः ततः शतभागशेषं गतभोग्यखंडान्तरेण संगुण्य शतेन भजेत् लब्धं फलं
यदि गतखंडाद्भोग्यखंडो ऽधिको भवति तदा गतखंडके योज्यं यदि गतखंडाद्भोग्यखंडको न्यूनो भवति तदा फलं गतखंडके ऋणं कार्यं यदि पंचमखंडको लभ्यते त
दा पंचमखंडेन गुणिताच्छतभाग १०० लब्धेन फलेन स एव पंचमः खंडो हीनः कार्यः यदि शतभागेन खंडो न लभ्यते तत्र प्रथमखंडकेनैव शतभागशेषं संगुण्य शतेन भजेत् लब्ध
मंशादि मंदफलं भवति अत्र वासना केन्द्रशतेनात्र वृत्तमध्यात्पूर्वाचार्यैः संकेतितं तच्च कक्षामंडले मंदनीचोच्चवृत्तमध्यग्रहचिह्नितप्रदेशे नीत्वा प्रदर्शयेत् तद्यथा वृत्त
मंडले यावंतो भागादयो मेषादिप्रवृत्तग्रहेण भुक्तास्तान्स्वमंदोच्चेन भुक्तिराशिभागादिभ्यो विशोध्य शेषा ये राशिभागादयस्तावद्भिः स्वमन्दोच्चमध्यां वर्तते अयया वद्वृत्तं
केन्द्रमुच्यते स्वोच्चे स्वातस्तत्रापि प्रदेशे केन्द्रस्य शीघ्रचास्य ग्रतो गतत्वाद्यतः स्वशीघ्रोच्चाच्छीघ्रगतिग्रहो मंदोच्चाद्विशोध्यते उक्तं च सूर्यसिद्धान्ते ग्रहं संशोध्य मंदोच्चात
था शीघ्राद्विशोध्य च शेषं केन्द्रपदं तस्माद्भुजज्याकोटिरेवेति अधिकप्रदर्शपरिज्ञायोच्चप्रदेशेन प्रतिमंडलस्य परमोच्चतोच्यते तस्य प्रदेशस्य कक्षास्थग्रहस्य च पदं तं तन्केन्द्रमुच्यते
अथ शतानन्देनाष्टेषु षट्नन्दचतुःशताब्द्यद्युत्येन मंदोच्चानयनं कृतं तद्यथा ग्रन्थारंभे कल्पाहर्गणः ७१४४०३८३०७१२ अयं भौमोच्चमंदभगणो २०४ गुणितः कल्पभूदि
नै १५७७९१७८२८००० भक्तो लब्धं भगणादिकं भौममंदोच्चं ९२।४।१०।१५।१ भगणास्त्यक्त्वा राश्यादिकं शतेन १०० संगुणितं वारद्वयं षष्ट्या त्रिंशद्भिश्च भागमपहृत्योपरि संयो
ज्य जातं ४।३।३६।१० शतांशे भौममन्दोच्चं एतस्माद्ग्रहं संशोध्य शेषं मंदकेन्द्रं भवति तन्मेषादि मंदकेन्द्रमध्यमग्रहे मंदफलं धनं कार्यं तुलादिके ऋणमिति सूर्यसिद्धांत
मतं पक्षद्वयेपि ग्रहः अत्र शतानन्देन विपरीतं कर्मणा ग्रहान्मन्दोच्चं संशोध्य शेषं जातं ३।६६।३३।५० अत्र त्रयस्त्रिंशत्कान्वितद्विशतिलिप्तादशभिराप्ता भौमानयने क्षेप
त ८०० मितो निक्षेपको बद्धः तथाहर्गणः बुधमन्दोच्चभगणैः ३३२ संगुणितं कल्पभूदिनैर्भक्तो लब्धं भगणादिकं बुधमंदोच्चं १६६।७।२६।५० एतद्भगणांशतेन १०० गुणितं
वारद्वयं षष्ट्या त्रिंशद्भिर्भागमपहृत्योपरि युतं जातं ७।३४।४९।२६ शतांशे बुधमंदोच्चं द्वादशशतेपात्यशेषं ४।६५।१०।३४ चतुस्त्रिंशद्दशकैरेकोनपंचाशत्कलाभिः षड्विंश
तिविकलाभिर्युतं जातो बुधमंदकर्मणि पंचशत ५०० परिमितः क्षेपकः एवमहर्गणो गुरुमंदोच्चभगणैः ९०० गुणितः कल्पभूदिनैर्भक्तो लब्धं भगणादि गुरुमंदोच्चं ४०७ रामः
।५।२१।४८। राश्यादिकं शतेन १०० संगुण्य भागहारेण विभज्य लब्धमुपर्युपरि योज्य जातं शतांशे गुरुमंदोच्चं ५।१।२।४० द्वादशशतेभ्यः शुद्धं ६।२८।५७।२० अष्टाविंशति १६

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain: Digitization by eGangotri

कलादिरहितं जातो ... मंदकर्मणि षट्शत ६०० परिमितो क्षेपकः तथा दिनगणोसितमंदोच्चभगणाः ५३५ गुणितः कल्पभूदिनैर्भक्तो लब्धं भगणादिसितमंदोच्च राश्यादि
कंशतेन संगुणय भागहारेण विभज्य लब्धमुपर्युपरियुतं जातम त्र शुक्रमंदकर्मणि मंदोच्चं २६६।७।१४ द्वादशशतेभ्यः शुद्धं ९३३।५२।४६ त्रयस्त्रिंशत्कलादिरहितं
जातो त्रक्षेपकोनवशतमितः ९०० एवं दिनगणाच्छनिमन्दोच्चभगणा ३९ गुणिना कल्पभूदिनैर्भक्ता लब्धं भगणादिकं शनिमंदोच्चं १७।७।२६।३७।२४। राश्या
दिकं शताहतं भागहारेण लब्धमुपरियुतं जातं शतांशेश निमंदोच्चं ७८८।४४।४० द्वादशशतेभ्यो विशोध्य शेषं ४११।१५।२०। एतदेकादशशरहितं चतुःशतपरिमितः श
निमंदकर्मणि क्षेपकः एवमेते भौमादयो ग्रहाः अष्टेषुषट्नंदचतुःशताढ्याः स्वमंदोच्चोनाः शुद्धा भवंति अत्रांशकादित्यजनाद्योजनाच्च सांतरो ग्रहः आयाति तस्मा
त्पूर्वोक्तगणितागतक्षेपाढ्याः ग्रहाः शुद्धा भवंतीति तत्क्षेपाः भौमस्य ७६६।२२।५० बुधस्य ४६५।१०।३५ गुरोः ६२८।५६।२० शुक्रस्य ९३३।५२।४६ शनेः ४११।१५।२० अथ खं
डकानामुत्पत्तिः ग्रहमंदकर्मणि यत्केन्द्रं राश्यादि प्रागानीतं तस्य त्रिभिस्त्रिभिराशिभिः पदानि प्रकल्प्य येन् अयमर्थः केन्द्रं राश्यादि यदि प्रथमपदे राशित्रयमध्ये भवति त

घना१७गनाग८त्रय३स्तर्य१२निघ्ना१० हृशोद्धृतं हीनधनं च मध्ये॥

दा यद्देव पदस्य भुक्तं स एव कुभुजः अथ केंद्रं द्वितीयपदे राशित्रयादूर्ध्वं राशिषट्कमध्ये भवति तदा षड्भ्यो राशिभ्यो विशोध्य शेषं यत्पदस्य भोग्यं स भुजः अथ केन्द्रं तृतीयपद
मध्ये राशिषट्कादूर्ध्वं राशिद्वादशकादर्वाक् तदा राशिद्वादशकाद्विशोध्य शेषं पदं भोग्यं स भुजः अयमेवार्थो स्मत्कृतभुजकोटिश्लोकेन अथवा ग्राशिपात सिद्धः षट्काच्छोध्यो यु
ग्माधिकः षड्भाधिको विषड्भास्यादं कोको गुणाद्दूनो भुजः तत्र विषमपदे गत्यंशज्या मूलत्वान्मंदफलस्य वृद्धिर्भवति समपदे गत्यंशक्योभवति समपदांते षट्शतद्वादशश
तपरिमिते मंदफलाभावः तत्र मध्यमग्रहएव मंदकर्मसिद्धः तस्मादत्र शतानन्देन पदद्वयस्य वृद्धिक्षयात्मकाः पंचमखंडकाः निबद्धाः ते चास्य बुद्धा समासेन कथिताः तेभ्यः
स्वस्वगुणेकगुणोभ्यः स्वस्वभागहारैर्भक्तेभ्यो लब्धं स्वस्वं मंदफलं स्फुटं भवति ५ तदेवाह घनेति घनाश्चागाश्चनागाश्च त्रयं च सूर्याश्च तैर्निघ्ना द्वै भौमादीनां मंदफलाद्
शोद्धृतं दशभिर्लब्धं फलं मध्यमग्रहे हीनं धनं कार्यं अयमर्थः भौमादीनां तन्मंदफलं क्रमेण घनागनागत्रयस्तर्यैः संगुणय दशभिर्भजेत् यल्लब्धं मंशादितन्मध्यग्रहे मे
षादिकेन्द्रे धनं क्रणं कार्यं षट्शताधिके तुलादिकेन्द्रे धनं कार्यं एतेन मंदकर्मसिद्धो ग्रहो भवति अत्रवासना अत्रैकैकेन राशिना खंडको निबद्धः तत्रायं क्रमः ग्रहं संशोध्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा०टी० मंदोच्चात्स्फुटं मन्दकेन्द्रं १०।५०।० भुजः सिद्ध एव तस्यांशाः ३ तेषां लिप्ताः १८०० लिप्तातत्त्वयमै २२५ भेक्ता लब्धं ८ चतुर्विंशतिज्यापिंडे अष्टमोन्त्यः खंडः १७।१९ शेषं खंड एव कलायाभू
१७ जज्यातो मोजयुग्मपरिध्यंतरेण ३ संगुण्य त्रिज्यया विभज्य लब्धं २।३० तदूनितो युग्मपरिधिः स्फुटः ७३।३० तद्गुणा भुजज्या १२५३४६।३० भगणांशैर्भक्ता लब्धं ३।८।११ अस्य
धनुः अंशादिकं १९।२२।२६।४० अत्रायेन गुणाकापवर्त्तकेनानिः कलांको लभ्यते स एव कल्पनीयः तत्र जातो गुणांको दिकूपरिमितः १० भाजकोयं जातः १७।२७ दशघ्नात्मं
दफलाद्भाजकेनाप्तं रुद्राः ११ प्रथमखंडः अत्र शनांशे भौममंदफलानयने खंडकानां गुणाको संजातः १७।२७ भाजको दश १० परिमितः शतानन्देन करेणाघनानिव
द्धः १७ गुणकहृताद्दूमितानषडंशभागेन लब्धं मंदफलं १९।२२।२६।४० अथ द्वितीयखंडकोत्पत्तिः ग्रहं संशोध्य मंदोच्चात्तस्फुटं मंदकेन्द्रं २।०।०।० अस्य कला ३६००लि
प्तातत्त्वयमै २२५ भेक्ता इति लब्धं १६ चतुर्विंशतिज्याखंडकेषु षोडशखंडः २९७८ शेषं खंड एव भुजज्यातो मोजयुग्मपरिध्यंतरेण संगुण्य ८९३४ त्रिज्यया विभज्य लब्धं
२३५ तेनोनितः स्फुटो युग्मपरिधिः ७२।२५ तद्गुणा भुजज्या २१५२५६।५० भगणांशैर्भक्ता लब्धं ५९७।५२ अस्य धनुः करणं ज्यां प्रास्येत्यपि अत्र ज्यापिंडद्वयं २ पतति शेषं

पृथक्स्वशीघ्रोनितकेन्द्रषड्भात्त्रिघ्नात्स्वशीघ्रोनयुतः स्फुटः स्यात् १

१४८।५२ तत्त्वयमगुणितं ३३४९८।४५ गतभोग्यज्याखंडांतरेण २२२ भक्तं लब्धं १५०।५२ तत्त्वयम २२५ घ्न गतपिंडे ४५० योजितं ६००।५२ जातं धनुर्लिप्तादिकं षष्ट्या विभ
ज्य लब्धोंऽशाकः १०।०।५२ एतद्दशाधिकं शतेन संगुण्य मंडलभागेन भजेल्लब्धेनोपर्युपरियुतं जातं शतांशे राशिद्वयस्य मंदफलं ३३।२२।३६।४० दशघ्नादेतस्मात्म
वोक्तापवर्त्तकेन १७।२७ भक्ते लब्धं नवेंदू खंडो जातः १९ अथ तृतीयखंडकोत्पत्तिः ग्रहं मंदोच्चाद्विशोध्य शेषं मंदकेन्द्रं ३।०।०।० भुजः सिद्ध एव अस्य लिप्ताः ५४००लिप्ता
तत्त्वयमैर्भक्ता लब्धं २४ चतुर्विंशतिरोजखंडः ३४।३८ स्फुटपरिधिः तद्गुणा भुजज्या २४९३७६० भगणांशैर्भक्ता लब्धं ६९।२।४२ अस्य चापकरणं अत्र पिंडत्रयं ३ पतितं
शेषं २१।४२ तत्त्वयमैर्गुणितं ४८८२।३० गतभोग्यांतरेण २१९ भक्तं लब्धं २२।२१ गतपिंडेषु तत्त्वयमगुणितेषु युतं जातं मंक्वादिकं धनुः ११।३२ शतेन संगुण्य मंडलभागेन
भजेत् लब्धं उपरियोज्य जातं शतांशे राशित्रयस्य मंदफलं ३८।३०।३६।४० एतन्मंदफलं दशघ्नात्पूर्वापवर्त्तकेन भक्तं लब्धं द्वियमा २२ एवं व्यत्ययेन भुजमूलत्वाद्पि ग्रमः
तएवं अराबुधस्य भौ एवदानीतेराशेः फलं २।२८।११ शतांशे १२।५९।२० राशित्रयस्य ४।२७ शतांशे १५।५१।३० एभ्योपवर्त्तकेन लब्धा रुद्रादयः अथ गुणेरेकराशेः फ १७

CC-0. In Public Domain. Digitization by eGangotri

लं २।३।५ राशिद्वयस्य ४।२।५।५। राशित्रयस्य ५।६ शतांशेऽपवर्त्तकेन ८।३६।४३। द्वि १४।४६।१। तृ ७।०।० अस्यापवर्त्तकेन ७।५० एभ्यो पवर्त्तकेन लब्धा रुद्रादयः अथ शुक्रस्य
एकराशेः फलं ०।५४।४८ राशिद्वयस्य १।३८।१ राशित्रयस्य १।५४।२८ शतांशेप ३।२१।४० द्वितीयस्य ५।२६।४३। तृतीय ६।२१।२३ शुक्रस्यापवर्त्तकः ३।४८। राशिफलेभ्यो पवर्त्त
केन लब्धा रुद्रादयः अथ शनेः एकराशिफलं ३।५१।२२। द्वि ६।३८।४५। तृ ७।७।१७। शतांशेप १२।५१।१३। द्वि २२।९।१० तृ २५।३०।१० अस्यापर्त्तकः ११।४०। राशिफलेभ्यो
पवर्त्तकेन लब्धा रुद्रादयः अत्र कलादिकं कुत्रापि दलाकुत्रचित्कृतानंदेन गुणका निबद्धाः तेनेदं शतांतरमायाति गणितागतगुणकैः शुद्धं आयाति तस्माद्गुणके रेवक
तेव्यं तएव गुणका यथा भौमस्य १७।२। बुधस्य ७।० गुरोः ७।५ शुक्रस्य २।४८ शनेः ११।४ भागहारस्तु सर्वेषां दिक्परिमित १० एवेति अथ भौमादीनां शीघ्रफलानयनमाह।
पृथगिति मंदकर्मसिद्धं ग्रहं पृथक् द्वितीयस्थाने भागानीतेन स्वशीघ्रेणोनं कुर्यात् शेषं शीघ्रकेन्द्रं भवति यदि ग्रहे शीघ्रकेन्द्रं न पतति तदा द्वादशशतराशियुतं कृत्वा पा
तयेत् तत्र शीघ्रकेन्द्रे चक्रावशिष्टे द्वादशशत १२०० परिमिते वक्ष्यमाण दिनैरस्तोदयौ ज्ञेयौ चक्रार्द्धावशिष्टे षट्शत ६०० परिमिते वक्ष्यमाण दिनैर्वक्रमार्गौ ज्ञेयौ तत्र मंद
कर्मवत् षट्शतोने शीघ्रकेन्द्रे शीघ्रफलादूने ऋणं प्रकल्पयेत् षट्शताधिके धनं षट्शताधिकं द्वादशशतेपात्य शेषं गम्यकेन्द्रं भवति ग्रहे शीघ्रोनिते कृते यत्र शून्यं तत्र
फलाभावः मंदकर्मसिद्ध एव स्फुटो ग्रहः तस्माद्गत गम्यकेन्द्रे शतेन १०० षट् ६०० लभ्यते यदि गतकेन्द्राङ्को गम्य द्वादशशतभागेन पंचमखंडो लभ्यते तदा पंचमं पृथ
क्स्थाप्यं शेषं त्रिभिः ३ संगुण्य शतेन हरेत् यल्लब्धं तदपि पृथक्स्थापित पंचके योज्यं एतेन यावत्संख्याको भवति तावत्संख्याको भुक्तखंडो लभ्यते यदि त्रिगुणिताच्छेषा
च्छतभागेन किंचिल्लभ्यते तदा पंचमखंड एव लब्धः शेषं मंदखंडवद्वक्ष्यमाण भौमादीनां शीघ्रखंडेषु गतभोग्यखंडान्तरेण संगुण्य शतेन १०० भजेत् यत्प्राप्तं मंशादि
कं गताङ्को गम्यखंडादूने भुक्तखंडे योज्यं खंडादधिके भुक्तखंडं पातयेत् शेषं शीघ्रकेन्द्रफलं भवति तत्र मंदकर्मसिद्ध एव ग्रहे यत्तच्छीघ्रफलकेंद्रक्रमेण मंदफलवदृणं धनं
कार्यं एतेन ग्रहः स्फुटो भवति ॥१॥ अथ भौमादीनां शीघ्रखंडाः भौमस्येति अत्रांकलिखनमेव व्याख्या प्रथमखंडक द्वितीयखंडक इत्यादि बोध्यं अथ खं
डकानामुत्पत्तिः अत्र शतानन्देन प्रतिराशि मेकैकांशाः खंडा निबद्धाः केन्द्रस्य षड्भागा भवंति तत्र पंचमराशीनां पंचमखंडकाः कृताः षष्ठराशेर्दशदशदशांशकैः खंड
कत्रयं अतः षड्भा त्रिंशादिर्ध्यं कृतं खंडकोत्पत्तिस्तु सूर्यसिद्धान्तात् प्रदर्श्यते शीघ्राद्ग्रहं संशोध्य शेषं शीघ्रकेन्द्रं १।०।०।० तस्य भुजः सिद्ध एव ३० ३३।१८।६।६ शोध्यः राशित्र
यात् स्फुटो भुजः कोटिः २।०।०।० भुजांशाः ३० कोटयंशाः ६० भुजज्या १७।१९। कोटिज्या ७९७८ भौमस्योजपरिध्यंशाः १३२ युग्मपरिध्यंशाः १३५ तयोरंतरं ३ तद्गुणा भुजज्या त्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा°टी°
१८

ज्ययाप्ता १।३० तदूनितो सुगमपरिधिः स्फुटः १२३।३० स्फुटपरिधिघ्नाभुजज्या ४०१३८।३० भगणांशैर्भक्ताल्लब्धं भुजफलं १११४।५७ तद्गुणा कोटिज्या ५९५३६२ भगणांशै ३६०
भक्तालब्धं कोटिफलं १९३१।३४ मृगादौ शीघ्रकेन्द्रे कोटिफलवर्गः ११२७२१३।३० उभयोर्योगः २९९५९४६०।१५ तस्मान्मूलं लब्धं कर्णः ५४२७३।३१ त्रिज्या ३४।३८ गुणितं भु
जफलं ९४५०६ चलकर्णविभाजितं लब्धं ३९७।५२ त्रस्य चापकरणं ज्यापिंडास्त्रयः पतिताः ३ शेषं २६ तत्प्रथमगुणितं पिंडान्तराप्तं २७।३६ तत्प्रथमद्वेगतपिंडे युतं जातं
धनुर्भागादि ११।४२ शके ५६ योज्य भौमस्य खाब्धीत्युक्तं स्वं भौमस्य द्वितीयखंडकफलं भागादि २२।३६।२१ तृतीयखंडकफलं भागादि ३२।४८।५५ चतुर्थखंडकफलं ३९।
२४।४ पंचमखंडकफलं २६।३१।३२ षष्ठखंडकफलं ७।५६।५७ द्वितीयखंडकफलं १५।२।२९ तृतीयखंडकफलं २०।९।३६ चतुर्थखंडकफलं २१।१८।० पंचमखंडकफलं
१५।६।४९ षष्ठखंडकफलं १०।५४।४० सप्तमफलं ५।५४।४३ तथा भौम - वस्त्वोपकरणैरानीतं गुरोः प्रथमखंडफलं ४।४८।५६ द्वितीयफलं ८।५५।३१ तृतीयफलं ११।१८।

भौमस्य खाब्धी ४० नगसप्त ७७ खेशा ११० देवेन्दु १३३ जातींद्व १२२ गगो ९७ नगार्थाः ५७ बुधस्य भा २७ ग्नीषु ५३ कु सप्त ७१ षट्स्वराः ७६ नतत्रि
पंचां ५३ गगुणाः ३७ नवेन्दवः १९ गुरोर्नृपाः १६ खाग्नि ३० गजत्रयं च ३८ षड्गुहयो ३६ रामयमा २३ नृपा १६ काः ९ भृगोर्द्वि वेदाः ४२ कुग
जाः ८१ खसूर्या १२० व्योमाह १५० नागेंद्र १४८ भभू १२७ स्त्रिशैलाः ७३

१८ चतुर्थफलं १४।५०।५० पंचमफलं १६।४६।५९ षष्ठफलं ४।४२।४० सप्तमफलं २।
२४।१६ एवं सोपकरणैरानीतं शुक्रस्य प्रथमखंडफलं १२।२३।२० द्वि° २४।३६।४२ तृ° ३५।११।३१ चतु: ४४।२५।१७ पंचमः ४४।१७।२५ षष्ठः ३७।५७।४३ सप्तमः २४।५२।२९ एवं
स्वोपकरणैः साधितं शनेः प्रथमखंडस्य फलं २।५१।४९ द्वि° ५।११।१४ तृ° ६।२०।२२ चतुर्थः ५।४७।४६ पंचमः ३।३८।४ षष्ठः २।२२।७ सप्तमः ११।१२।४४ एतानि फला
नि शनेः पृथक् पृथक् संगुण्य त्रिंशता विभज्य लब्धं भौमादीनां शतांशे सप्तमखंडकाः तद्यथा भौमस्य प्रथमः ३९।४ द्वितीयः ७७।२५ तृतीयः १०९।२२ चतुर्थः १३२।५५।२ पं
चमः १२।४२ षष्ठः ९।९।५ सप्तमः ५।८।२२ बुधस्य प्रथमः २६।२७ द्वि तृतीयः ६७।० चतुर्थः ७०।५७ पंचमः ५०।३२ षष्ठः ३६।२१ सप्तमः १९।१८ गुरोः प्रथमः १६।३ द्वि° २९।
४४ तृतीयः २७।२९ चतुर्थः ३६।९ पंचमः २७।३५ षष्ठः १५।४० सप्तमः ८।० शुक्रस्य प्रथमः ४।१५।० द्वि° ५२।२३ तृ° ११९।३० चतुर्थः १४८।४२ पंचमः १४७।३२ षष्ठः १२६।४० सप्तमः

रामः
१८

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0: In Public Domain. Digitization by eGangotri

७९।५४ शनेः प्रथमः ९।२३ द्वि० १७।१७ तृ० २१।७ चतुर्थः १९।१८ पंचमः ११।१२ षष्ठः ७।५६ सप्तमः ४।१ एतैः खंडकैः शनिरानीतं ग्रहाः शुद्धा आयांति शतानंदेनात्र न्यूनाधिकानि
वृद्धाः अथ भुक्तिस्पष्टीकरणं तत्रास्मत्कृतौ श्लोकौ भुक्तेर्ष्यंतरसंगुणामपहरेद्भुक्तिं खद्विभिः १०० फलान्मेषाद्यागादिगुणान् क्रमात्खविधुभिः १० लब्धं धनर्णं गतौ केंद्रे
कर्किमृगादिके चलगतिं तद्वर्जितामंतराभ्यस्तं खाभ्रकुभिर्हरेद्धनमृणं खंडवन्मंदगतौ धनमृणं कार्यं २ अयमर्थः ग्रहानयने मंदगतिं स्थानद्वयं धृत्वैकत्र गतभो
ग्यखंडांतरेण संगुण्य शतेन भजेत् लब्धं फलं मंदफलवत् धनागनागादिभिर्भौमादिक्रमेण संगुण्य दशभि १० र्भजेत् प्राप्तं यत्कर्क्कादिकेन्द्रे त्रिशता भुक्तिर्भवति तथा
मंदगत्या ग्रहस्य शीघ्रगतिं हीनां कृत्वा शेषं गतभोग्यशीघ्रखंडांतरेण संगुण्य शतेन भजेत् लब्धं फलं स्वखंडवन्मंदकर्म्मसंस्कृतभुक्तौ धनमृणं कार्यं यदि शीघ्रखंडे
धनं तदत्रापि धनं यदि शीघ्रखंडे ऋणं तदात्रापि ऋणं एवं ग्रहभुक्तयः स्फुटा भवन्ति तत्क्षेपातोन इति यदि शीघ्रकेन्द्रे षट्शतोनं पंचशताधिकं भवति तदा शीघ्रखंडांतरह
तां गतिं त्रिभिः संगुण्य शतलब्धं पूर्ववद्धनमृणं कर्त्तव्यं यदि ऋणखंडकक्रमेण शीघ्रफलं मंदगतौ न पतति तदा व्यत्ययेन फलं पातयेत् तदा वक्रिता भुक्तिर्भवति अथा

शनेर्दिशो १० ब्दा १७ कुयमा २१ नवेन्दू १९ द्विभूनयो १२ मंगल ८ मव्ययश्च ४

त्र शतानन्देन ग्रहानयनं कर्मद्वयेनोक्तं तेन सूर्यसिद्धान्ताद्ग्रहोऽत्र किंचिन्न्यूनाधिकः आयाति सर्वसिद्धान्तेषु कर्मचतुष्टयेन ग्रहानयनं दृश्यते उक्तं च शैघ्र्यं मांदं पुनर्मांदं शैघ्र्यं
चत्वार्यनुक्रमात् तस्मादत्रास्माभिः कर्मचतुष्टयेन ग्रहानयनक्रमो लिख्यते तत्र ग्रहस्य पूर्वोक्तप्रकारेण मंदशीघ्रमानीय मध्यमग्रहस्य स्थानत्रये धृत्वा शीघ्रोनितं कृत्वा केन्द्र
विचारादि पूर्ववत् कर्म कृत्वा दृफलमुपरिस्थे मध्यमग्रहे धनमृणं कार्यं तेन प्रथमकर्मसंस्कृतो ग्रहो भवति तं पृथक्कृत्वाष्टेषुषट्नंदेत्यादि मंदः पूर्वोक्त एव कृत्वा तत्फलार्द्धं प्र
थमसिद्धे ग्रहे धनमृणं कार्यं एतेन द्विकर्मसिद्धो ग्रहो भवति तस्मादष्टेषुषसंदेत्यादि यत्पूर्ववन्मंदफलं तृतीयस्थानस्थे मध्यमग्रहे धनमृणं कार्यं तेन तृतीयकर्मसिद्धो ग्रहो भ
वति तं पुनः पृथक्धृत्वा स्वशीघ्रोनितं कृत्वा शीघ्रकर्मफलं संपूर्णं त्रिकर्मसिद्धे ग्रहे धनमृणं च कार्यं तेन चतुर्थे शीघ्रकर्मसिद्धो ग्रहः स्फुटो भवति भुक्तिस्तु पूर्वोक्तेन क्रमेण स्फुटा
कर्त्तव्या एवं सूर्यसिद्धांतसमो ग्रहः स्फुटो भवति ०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपातग्रहानयनं अहर्गणमिति अस्यार्थः अहर्गणंवेदैः ४ संगुणयद्दशभि १०र्भजेत् यत्प्राप्तमंशादितत्पातध्रुवार्द्धेयोजयेत् सपातोभवति पातंखखागनेत्रेषु २७०० प्रपात्यशेषोरा
हुर्भवति तत्रराहौसार्द्धेत्रयोदशशतानि १३५ संयोज्यराहुपुच्छः केतुःस्यात् अत्रोपपत्तिः युगचंद्रपातभगणाः २३२२३४२ उक्तंचपातस्य नेत्राब्धिद्वियमावह्निवाहवः भूवास
राः १५७७९१२८।२८ त्रैराशिकेनलब्धाराहोर्दिनगतिः कलादिका ३१०।४५ इयंषष्ट्याहताष्टभक्तालब्धंप्राप्तांशेनदिनगतिः कलादिका २३।५० इयंदश १० गुणिता २
३८।२० षष्ट्याप्ता ३।५८।२० अत्रांककलांचत्वारिंशदधिकांकृत्वाजातावेदाः ४ एतस्माद्गुणकाद्यथाराहोर्गतिर्योनि तथाभागहारः कर्त्तव्यः तत्रदशभि १० र्भागोप्राप्तावे
दयमाः २४ स्वल्पांतरत्वात् केतोरानयनार्थंसार्द्धत्रयोदशशतानियोजयेत् अथइष्टकालेग्रहस्यतात्कालिकीकरणार्थमुत्तरश्लोकः इष्टनाडीपराःपूर्वाभुक्तिघ्नाषष्टि
६० भाजिता लब्धांशादिधनेनांतंस्युर्ग्रहास्तात्कालिकाःस्फुटाः सूर्योदयाद्गोग्योनापराभुक्तातत्रेष्टयाप्रवर्त्ततेपराः पूर्वाइष्टनाडीस्फुटग्रहभुक्त्यागुणयेत् षष्ट्याभजेत्
लब्धमंशादिग्रहेधनंकार्यं यदापरघटीसंभवंफलं यदापूर्वघटीसंभवंफलंतदात्क्षरणं अत्रायंविशेषः वक्रीग्रहपरघटीसंभवंक्षरणंकार्यं पूर्वघटीसंभवंधनं अत्रत्रैरा

अहर्गणंवेद४हतंदशा१०प्तंध्रुवार्द्धयुक्तंभवतीहपातः खखागनेत्रां२७००तरितोमुखंस्याच्चक्रार्द्धयुक्तं१३५०स्फुटराहुपुच्छः १

शिकेनवासना यदिषष्टिघटीभिरियतीभुक्तिःतदेष्टघटिकाभिः किमितिगुणकस्थानेनव ९ अथनक्षत्रगताद्राशिगतकरणं राशिगतान्नक्षत्रगतकरणमाह भादिःकृ
तघ्नों९कहृतोग्रहस्तुराश्यादिरंकेगुणितश्चकृताप्तः भादिभवेद्भादिषुराशिहारःशराक्षनी २२५ राशिमुखेशतंच १ नक्षत्रगतग्रहंचतुर्भिःसंगुणितंनवभि ९ र्भजेत् लब्धं
राश्यादिकोग्रहोभवति एवंराशिगतंग्रहंनवभिः ९ संगुणयवेदै४र्भजेत् प्राप्तंनक्षत्रगतोग्रहोभवति नक्षत्रगताच्छराक्षनिभागेन २२५ त्रिंशांशकंराशिकंराशिक्रमेण
ग्रहस्य भुक्तराश्यंशकलादिकंभवति एवंराशिगताद्ग्रहाच्छतभागेन १०० प्राप्तराश्यंशकलादिकंभवति तत्रायंक्रमः प्रथमंशतांश १०० भागेनराशयः पुनः शेषंत्रिंश
ता ३० संगुण्यतेनैवभागेनाप्तात्र्यंशाः पुनःशेषंषष्ट्यासंगुण्यतेनैवपूर्ववदाप्ताकलाइत्यादि अथवाराश्यादिकंग्रहंअष्टादशभिःसंगुण्यशतेनहरेत् लब्धांशांशके
कलादिकंअंशेभ्यः त्रिंशताप्ताराशयः स्फुटग्रहभुक्तिरंशादिकाष्टादश १८ गुणिताविकलादिकाभवति षष्ट्याप्ता ६० कलादिकाभवति नक्षत्रानयनार्थंराश्यादिकंग्रहं ।। राम:
ष्टादशभिः १८ संगुण्याष्टशतै ८०० र्भजेत् लब्धमश्विन्यादिनक्षत्राणिशेषंशतद्वयेन २०० भजेत् लब्धागतनक्षत्रपादाः शेषंगतगम्यंकृत्वात्रिघ्नांशकराशेःक १९

CC-0. In Public Domain. Digitization by eGangotri

लादिकयास्फुटभुक्त्याभजेत् लब्धानि गतगम्यदिनानि शेषं षष्ट्या ६० संगुण्य तथैवाप्ता घटिकाद्यादिपादृगतो न क्रियते तेन तदा शतभागशेषं गतगम्यं कृत्वा पूर्ववत्क
र्म कर्त्तव्यमिति एवं राश्यानयनमपि कर्त्तव्यं अथ च शतांशराश्यादिकं ग्रहं शनेन गतगम्यं चन्द्रं त्वा शतांशभुक्त्या हरेत् लब्धानि गतगम्यदिनानि शेषं षष्ट्या संगुण्य
पूर्ववद्धरेत् लब्धं घटिकाद्यादि १ अथ भौमादीनां शीघ्रकेन्द्रे चक्राद्यपरचक्रार्द्धं यावन्मासमसंख्यामाह विश्वेति विश्वाश्विनोचगन्धर्वाश्च दश च अंशानि च माघाश्च
क्षितिजादिषूह्नीयं अयमर्थः चक्रं द्वादशशतानि १२०० चक्रार्द्धं षट्शतानि ६०० तत्र भौमस्य शीघ्रकेन्द्रे यदा पूर्णं चक्रं भवति तस्मात् त्रयोदशे मासि चक्रार्द्धं वोद्धव्यं एवं
चक्रार्द्धं चक्रं बुधस्य द्वितीयमासि गुरोः सप्तमे मासि भृगोर्दशमे मासि शनेः षष्ठे मासि एवं भौमादीनां चक्राचक्रार्द्धं चक्रं भवति प्रयोजनं च यस्मात् तावद्वक्रं भौमस्य त्रयो
दशमासि गच्छति एवं चक्रादस्ते एवमुक्तप्रकारेण सर्वे ग्रहाश्चक्रास्तेशमनुवंति अत्र वासना भौमस्य मंदगत्यूनितशीघ्रगतिः ।१।३२ भक्ता चक्रार्द्धं ६०० लब्धानि दि

मादिः हतलब्धांक ८ हतो ग्रहस्तु राश्यादिरंकैर्गुणितः कृतांशः भादिर्भवेद्धा दिवराशिहारः शराकृती २२५ राशिमुखे शतं च १ विश्वा
१३ श्वि २ गन्धर्व ७ दश्यां १० गह मासेश्वक्रार्द्धचक्रं क्षितिजादिषूह्यं षड्वह्नयो ३६ द्वादश १२ रसभार्यो ५६ वेदाश्विनः २४ सप्तरसाः ६७
क्रमेण ॥

नानि ३९०।१८ रभ्य त्रिंशताप्तं मासादिकं १२।१८ एवं बुधस्य मंदगत्यूनितशीघ्रगत्याप्तं १० २१।५०।६ त्रिंशताप्तं मासादिकं १।२०।६ गुरोर्मंदगत्यूनितशीघ्रगत्याप्तं ३०० त्रिंशता
प्तं मासादिकं ७।२२।४१ एवं शुक्रस्य मंदगत्यूनितशीघ्रगत्याप्तं एवं शनेः गंदगत्यूनितशीघ्रगत्याप्तं ३।१०।१९।३८ त्रिंशताप्तं मासादिकं ८।९।३८ अत्र शतानंदे
न सामान्येन मासोपादानं कृतं दिनानामुपेक्षा कृता ०॥ अथ ग्रहाणां वक्रमार्गदिनादिज्ञानमाह षड्वह्न्यइति स्वशीघ्रकेन्द्रस्य मंडलार्द्धाच्चक्रात्स्वोपराएते वक्रागवा
सरा भवंति अयमर्थः यस्मिन्दिने भौमस्य शीघ्रकेन्द्रं भवति तद्दिनात्पश्चात् षट्त्रिंशद्दिने ३६ भौमो वक्रगतिर्भवति आगामिषट्त्रिंशद्दिने ३६ मार्गगो भवति एतेन द्विसप्तति
७२ संख्याकानि भौमस्य वक्रदिनानि एवं बुधस्य द्वादश १२ दिनैर्वक्र आगमिष्यति द्वादशदिने मार्गः १२ गुरोः षट्पंचाश ५६ ज्ञव भोग्यदिने वक्रमार्गौ शुक्रस्य चतुर्विंश
ति २४ गतयोग्यदिनैर्वक्रमार्गी शनेः सप्तषष्टि ६७ दिने वेक्रमार्गौ तानि द्विगुणितानि वक्रस्य ग्रहदिनानि भवंति तानि यथा भौमस्य ७२ बुधस्य २४ गुरोः ११२ भृगोः ४८ शनेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१३४० अथांतरेवक्रमार्गज्ञानं भौमोगकुनिवक्रतांशरपारांगे ६५५ न्द्रोत्वशीघ्रोनिनेनद्दचंद्रसुतोजिनाद्रिषुमुने ७२४ जीवोरिषट्पर्वते ७६६ शुक्रः खेषुरसे ६५० खरांशु
ननयैववक्रीन्दुनागे ८१३ पुनः कौटिल्यंपरिहृत्यपुष्कर गतिर्मार्गी भवेच्छोधिते १ पंचपंचाशदधिकंषट्परिमितेशीघ्रकेन्द्रे भौमोवक्रीभवति एवमपरेज्ञातव्याः
कौटिल्यंवक्रतांपरिहृत्यपुष्करगतिग्रहः अस्मिंकेंद्रवक्रशोधिते १२०० मार्गीभवति तत्रमार्गानयनक्रमः प्रदर्श्यते भौमादिग्रहानयनेयदिशीघ्रकेंद्रंचक्रांशेभ्यो ३६०
ऽधिकंभवतितदावक्रांशाः तस्माद्वक्रांशाच्छोध्यशेषंग्रहस्यस्फुटमंदभुक्त्योनितशीघ्रभुक्त्याभजेत् लब्धांशेरागामिनोमार्गीप्राः वक्रदिनानिशेषंषष्ट्यासंगुणय पूर्ववदा
प्तघटिकाः एवंयदिकेन्द्रंमार्गांशेभ्योऽशुद्धंभवतितदातस्मान्मार्गांशाद्विशोध्यं शेषंपूर्ववद्गतिलब्धान्यागामिमार्गदिनानियदिकेन्द्रंचक्रांशेभ्यः ऊनंभवति तदाकेन्द्रंचक्रां
शेषुप्रपात्यशेषस्यपूर्ववत्कर्मकृत्वागतवक्रदिनानिलभ्यंते एवंमार्गांशेनेमार्गेषुप्रपात्यशेषस्यपूर्ववत्कर्मकृत्वामार्गदिनानिलभ्यंतेइति अत्रवासना भौमादिकोमंद
स्फुटोग्रहः स्वशीघ्रोच्चाद्द्विराशिषट्कादधिकोऽतएवस्वशीघ्रोच्चस्यादूर्ध्वंगतस्तद्वशाच्छिथिलरश्मिर्जायते शिथिलरश्मिभिः सव्येतरपार्श्वद्वयेनतस्मादागोग्रहस्तदा

स्वशीघ्रकेन्द्रस्यचमण्डलार्द्धान्पूर्वोपराचक्रगतास्वराशेः २ षष्ठ्य६० षि१६भूपा१६कगुणाः ३९ कुदस्रा २१ चक्रादितः प्रागपरतोस्त
गःस्यात् एवंज्ञभृग्वोर्वसु ८ पंच ५ षड्भा ६०० आगूनखेटः परतोधिकोर्कात् १ भौमोस्तदहनग्रहे ९३ खजलदे १७० सौम्योरिवेदाः ४६
गुरुर्व्योमाष्टे ८० भृगुज्ञोयमोरिपुरसैः ६६ केन्द्रेस्वशीघ्रोनिते॥

वक्रगतिर्भवति तथाचार्कसिद्धान्ते दूरस्थितःस्वशीघ्रोच्चाद्ग्रहः शिथिलरश्मिभिः सव्ये
तराकृष्टतनुर्भवेत् वक्रगतिस्तदाइति भौमस्यचक्रांशेभ्यः षट्शतानिशोध्यशेषंमंदभुक्त्यो ११५ नितशीघ्र ३१३२ भुक्त्या १३२भजेल्लब्धंषड्गतयः एवंबुधादीनामपि ०॥

भौमः	बुधः	गुरुः	शुक्रः	शनिः	ग्रहाः
६५५	७२४	७६६	६५०	८१३	व॰ प्रा॰
५५५	४७६	४३४	५५०	३८७	मा॰ प्रा॰

अथग्रहाणामस्तोदयज्ञानमाह षष्ठ्येति चक्रादितः प्राक्परतएववासराअस्तंगतस्यज्ञातव्याः यथाभौमादीनांचक्रार्द्धेनवक्रमार्ग
ज्ञानंज्ञातेनथायस्मिन्दिनेचक्रंद्वादशशत १२०० परिमितंशीघ्रकेन्द्रंभवतितस्मात्पश्चात्षष्टिदिनैर्भौमस्यास्तोज्ञेयः आगामिषष्टि ६०
दिनैरुदयः एवंगतगम्यषोडशदिनै १६ र्बुधस्यास्तोदयौ गुरोस्तथैवषोडश १६ दिनैः शुक्रस्यैकोनचत्वारिंशद्दिनैः ३९ शनेरेकवि
शतिदिनैः २१ अत्रचक्रेणकुजगुरुशनीनांपश्चादस्तः प्रागुदयः चक्रेणबुधशुक्रयोः प्रागस्तः पश्चादुदयः एवंज्ञभृग्वोश्चक्रार्द्धाद

सुमंच दिवसा एतदुक्तं भवति यस्मिन्दिने केन्द्रं षट्परिमितं भवति तद्दिनात्पश्चाद्वसु ८ दिनैर्बुधस्यास्तं आगामिवसुदिनैः ८ रुदयः एवं गतपंचदिनैः शुक्रस्यास्तंगम्य पंचदिनैः ५
रुदयः अत्र तु शुक्रयोश्चक्रार्द्धेन पश्चादस्तं प्रागुदयः प्रागून खेट इति अर्कादूनः खेटः प्रागस्तं जाति अर्कादधिकः परतः पश्चादस्तं याति अयमर्थः अस्तदिने गणितागत
तो ग्रहो यदि सूर्याल्पांशादिभिरूनो भवति तदा तस्य प्रागस्तं योऽधिको भवति तस्य पश्चादस्तं अस्तं ग्रहाणामदृश्यत्वं दृश्यत्वमुदयः अथान्तरेऽस्तोदयज्ञाने भौम इ
ति त्रिनवति ९३ परिमिते शीघ्रकेन्द्रे भौमोऽस्तं याति खजलदे १७० बुध इत्यादि त्रिपन्नगरसे ६८३ बुधो लघ्व
स्तं याति अरिवेदे ४६ गुरुः एवं काष्ठारिपौ ६१० शुक्रः एतस्मिन्नेव स्वकेन्द्रे चक्राद्द्वादशशतमिता १२०० च्छोधिते
यावत्केन्द्रं भवति तस्मिन्नेवोदयं याति अत्रापि वक्रमार्गक्रमेणादिनादिज्ञानं कार्यं अथागस्त्योदयास्तज्ञानार्थमुत्त
रश्लोकः पलप्रभेति स्वदेशपलभां विषुवच्छायां तत्त्वैः २५ संगुण्य खखाङ्कैः ९०० संयुतां कुर्यात् तमेव चक्र

भौमः	बुधप	गुरुः	शुक्रप·	शनिः	बु·प·	शु·प	ग्र·
९३	१७०	४६	८०	६७	६८३	६१०	अ·
११०७	१०३०	११५४	११२०	११३४	५१७	७२०	३०

लब्धास्तं शशिजस्त्रिपन्नगरसैः ६८३ काष्ठारिपौ ६१० भार्गवस्तस्मिंश्चक्रविशोधिते समुदयं यान्ति ध्रुवं खेचराः १ पलप्रभां तत्त्वहतां २५ खख
खांक ९०० युक्ता स्फुटार्केण समो यदि स्यात् याम्ये तदा स्यादुदयो निशान्ते मुनेरगस्त्यस्य सुरारिहन्तुः १ शकेन्द्रकालात्खशराब्धि ४५० ही
नात्खषष्ट्याप्तसंख्या अयनांशकाः स्युः ॥

स्यार्द्धत्रयोदशमिते १२६० मपास्य शेषांकसमेऽर्के मुनेरस्तो भवतीति भद्रं ॥१० इति श्रीमाधवविरचिते भास्वतीविवरणे
ग्रहानयनाधिकारश्चतुर्थः ४ तत्रादौ अयनांशानयनमाह शकेन्द्रेति खं च शराश्चाब्धयश्च तैः सार्द्धचतुःशतैर्हीनाच्छकेन्द्रकालात् षष्ट्या ६० प्तसंख्या अयनांशका
भवंति तैरयनांशकैरहर्गणं युतं कुर्यात् तदा द्युनिशोः प्रमाणे ध्रुवं स्टो भवेत् अयमर्थः शककालं खशराब्धिभिरूनं कृत्वा षष्ट्या भजेत् लब्धांकशमा अयनांशका भवं
ति शेषाः कलास्तैरयनांशकैरहर्गणं संयुतं कृत्वा रात्रिमाने ध्रुवं दं भवेत् अथ सूर्यसिद्धांतादयनांशानयनमुच्यते त्रिंशत्कृत्वो युगे भगणा चक्रं प्राक् परिलंबते तद्गुणाद्भूदिनै
र्भद्युगणोद्यद्वाप्यते तत्संयुक्तात्ग्रहात्क्रान्तिच्छायाचरदलादिकं स्फुटं दृक्तुल्यतो गच्छेत् सादने विषुवद्द्वये २ युगे इति एकस्मिंश्चतुर्युगे रसभक्तशेषे ४३२०००० त्रिंशत्कृत्वो विंशद्वा
रान् विंशतिमगणान् प्राग्प्रलंबनं स्याद्देवं युक्ते कलियुगे विंशति २० द्वापरे च ४० त्वारिंशत्त्रेतायां षष्टि ६० कृतयुगे अशीति ८० एकत्रांके चतुर्युगशतद्वयं २०० याम्यवलं

भा·टी· वनद्वयं भवति यतो भचक्रस्य प्रत्येकमनेन विना प्रत्यक्चलनं चक्रस्य युक्तमेवेति एवं भागंशतद्वयेन सावनकल्पाहर्गणाद्व्यवहारिकयुगाहर्गणाद्वा गुणिताच्चतुर्भिर्भूदिनैर्भ·
२१ क्ताद्वाप्यते तेन संयुतादर्कात् क्रान्तिच्छायाचरदलादिकं स्फुटं दृक्तुल्यतां गच्छति प्राक्चलितं स्यात् अस्यार्थगाम्भीर्यस्य श्लोकत्रयस्य संक्षिप्तार्थः स्पष्टतरो व्याख्या
यते तत्रादौ शतद्वयस्योत्पत्तिः सूर्यसिद्धान्ते चक्रस्य प्राक्परलंवनागतिः प्रतिवर्षमेकलिप्तां षष्टिवर्षैर्भागमेकं अष्टादशवर्षशते १८०० रेको राशिः षट्शताधिकैकविंश
तिवर्षसहस्रे २१६०० भगणमेकं चतुर्युगे युगेऽभि ४३२००० भगणशतद्वयमुत्पद्यते तेन सावनाहर्गणं संगुण्य भूदिनयुगदिनैर्विभज्य यल्लब्धं भचक्रस्य प्राग्लंवनं
भगणादिकं परलंवनसहितं च भवति ये भोग्यास्त एवायनांशा वोद्धव्याः एतावता सूर्यसिद्धान्ते त्रिंशदंशावधिलंवनांशा जायन्ते एवं प्राक्परलंवनद्वयसंयुतं भचक्रम्भवा
हावह्येन वायुना ताडितं पश्चिमाभिमुखं भवति अथ प्राक्परचलनावधिनिरूपणं अष्टादशवर्षशते १८०० रेकं प्राक्चलनं तथैव द्वितीयं प्रत्यक्चलनं च द्वयोरैक्यं षट्त्रिं
शद्वर्षशतं ३६०० प्रतिभगणं समराशिषु षट् षट् प्राक्प्रत्यक्चलनानि अथ प्रत्यक्चलनानलक्षणं यस्मिन्वर्षे गणितागतोऽर्कः मेषतुलयोः संक्रमदिने दिनरात्रिमाने

अहर्गणान्नैर्युतमेव कुर्याद्द्वेद्युरन्द्युनिशोः प्रमाणे १

समानं मृगकर्कादेर्वर्द्धमानं हीयमानं कुर्वन् दृश्यते तदा तत्प्रत्यक्चलनान्तः तत्रायनांशानामभावात् छायार्कगणितार्कयोस्तुल्यताच्च अथ प्रत्यक्चलनगतिमाह प्रा
क्चलहीने छायार्काद्गणितागते तत्रवासना तस्मात्प्रत्यक्चलनान्ता देवद्विज्या दिवर्षैरष्टादशवर्षशतान्यवधीकृत्य मेषादितः प्रतिवर्षं भुक्तमेणैवैकैकां लिप्तां
भचक्रं यथा यथा पश्चान्मीनादिं यावद्व्रजति तथा तथा तदास एव गणितागतोऽर्को मन्तव्यः तेनोपलक्ष्यमाणगणितत्वात् तत्र प्राक्चलने क्रमेणैकत्रिंशद्द्वांशास्त्ववधयो हानि
शावृद्धिः तदानयनं यथा प्राक्चलनं लब्धायनगणं त्यक्त्वा विषमराशेर्यद्भुक्ता भागास्त एवायनांशाः स्युः तत्रेऽस्मे वर्षे वर्द्धमानांशे भुक्तो गणितागतोऽर्को मीनकन्ययोः संक्रमदिने
त्रिंशद्भिरयनांशैस्त एव प्राप्तो दिनमानं रात्रिमानं समानं यथा तथा चाप मिथुनादयनांशैर्युक्तस्त एव कर्कमृगादिप्राप्तो दिनमानं हीयमानं वर्द्धमानं करोति तदा प्रत्यक्चलनान्तः स्या रम:
त्स एव सायनः छायार्कः कथ्यते एवं छायार्काद्गणितागतेऽर्के हीने भचक्रं प्राक्चलनं द्रष्टुं युक्तं भवति यथास्मात्प्राक्चलनान्तात्तदा प्रत्यक्चलनगतिमाह अन्तरांशैरिति द्विती २१

CC-0. In Public Domain. Digitization by eGangotri

यपद्वासनांशेष इति यः प्रागुक्तो मीनादिरूपः स एव शेषः तस्मादेकद्वित्र्यादिवर्षे २ ह्याष्टादशशतानां १८०० समयदि मीनादितः प्रतिसंवत्सरं क्रमेणैकैकां लिप्तां भच
क्रं यथायथाग्रतोऽग्रतो मेषादियावत् यदायदा समागच्छति तथातथा तदा स एव गणितागतोऽर्को मन्तव्यः अतः शेषैरित्यत्र वासना प्रत्यग्वलने लब्धायनभागादिह्रासस्स
मराशेर्भुक्तभागास्ते त्रिंशन्मध्याच्छोधिता अत एवापाविन्नाङ्गोगांशाश्चलितांशाः प्रोच्यन्ते प्रत्यग्वलने यत्र यत्रोक्तक्रमेणैकद्वित्र्यादिभागदायेन त्रिंशतः शून्यपर्यन्तमयनां
शानां क्षयः तत्तत्तेष्टवर्षेऽयनांशेर्गणितागतोऽर्को युक्तो यदा तदा मेषतुलादौ समं दिनरात्रिमानं मृगकर्कादौ वर्द्धमानं करोति तदा स एव छायार्कः अयनांशाना मभावप्रत्यक्च
लनान्तः अयमेवार्थः स्पष्टतरः कथ्यते प्राक्चलने दुष्टे ह्निनिरयनो गणितागतोऽर्को मेषादितो मीनादियावद्यथा पश्चान्निदृश्यते तथा स च वर्द्धमानांशैर्युक्तः सायनदिवसः ए
वं प्रत्यक्चलने दृष्टे ह निनिरयनो गणितागतोऽर्को मीनादितो मेषादियावत् यथायथाग्रतोऽग्रतो गच्छन्दृश्यते तथातथा च हीयमानायनांशैर्युक्तः सावनेच दिवसः प्रत्यक्च
लनद्वयेऽप्ययनांशैर्गणितागतमर्केयोज्यं तत्तु कदापि पात्यं तांयतः छायार्कोद्गणितागतोऽर्को हीन एवायाति तस्मादयनांशैर्युक्तो गणितागतोऽर्कः छायार्कतुल्यः क्रि
यतो छायार्कानयनं सूर्यसिद्धान्तादवगन्तव्यं अत्र ग्रन्थविस्तारभयान्नोदाहृतं सामान्यत उदाहरणं संवत् १५८२ शाकः १४४२ स्फुटकल्पगताब्दाः १९५५८८४६२६ अभ्यःसा
यनकल्पाहर्गणः ७१४४०२९८६२०८ अयमहर्गणो शतद्वयेन २०० गुणितो १४२८८०७१९७२६६६०० युगभूदिनैः १५७७९१७८२८ भक्तो लब्धा कल्पादितोऽयनभगणाः ९०५५०
शेषावली २२७९२६२०० अतो ग्रहवद्राश्यादिकमयनचलनं २।१७।५।५९ अथवा अस्मिन्नेव वर्षे व्यावहारिकायुगाब्दाः ४६२६ व्यावहारिकयुगाहर्गणः १६८९६८१ अयं शत
द्वयेन गुणितः ३३७९३६२०० युगभूदिनैर्भक्तो लब्धं भगणाद्ययनचलनं २।१७।५।५९ अत्र प्रकारद्वयेन राश्याद्यमेव तुल्यमायातं यद्वा स्फुटकल्पगताब्दा १९५५८८४६२६ षष्ट्यात्रिंश
ता द्वादशभिरुपर्युपरि सुक्तालब्धं कल्पादितो भगणाद्ययमेव चलनं ९०५५०२।१७।६ अथवा व्यावहारिकयुगाब्दाः ४६२६ षष्ट्या त्रिंशता द्वादशभिरुपर्युपरि भक्ता लब्धं
कलियुगादितो भगणाद्ययनचलनं २।१७।६ अत्रापि प्रकारद्वयेन राश्याद्यं तुल्यमेवायातं अहर्गणात्तथा गताब्देभ्यः आनीतेमयनांशानां विकलैकांतरं यत्तत्सौरसावनभे
देन अथ विषमराशिस्था प्राक्चलनं स्यात् प्राक्चलने ये भुक्तभागास्ते वृद्धिमन्तोऽयनांशा ज्ञेयाः एवं प्रत्यक्चलनमग्रतः समराशौ भविष्यति अत्र ये भुक्तभागास्ते त्रिं
शतः शोधिताः अत एवायाता शेषाः क्षयात्मकाः अयनांशा भविष्यंति एवं प्रकारचतुष्टयेनानयनमयनांशानां प्रदर्शितं तत्स्यात्त्तं तज्ज्ञैः सद्भिरवधार्यं अथ भास्वतीमतेन
अयनांशानामानयने उदाहरणं शाकः १४४७ खशराब्धि ४५० हीनः ९९७ षष्ट्या ६० प्तायनांशकाः १६।३७ तथा प्रागानीतायनांशकाः १७।६ उभयोरंतरं कला २९ मात्रा एतावदंतरं कथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतितं अथ उत्तरं यतः सूर्यसिद्धान्तेऽक्तनादीनामंतेऽयनांशानां क्षयः स्यात् तथाऽस्मिन्द्वापरान्ते क्षयोऽभूत् ततः ननु कलियुगादितोऽष्टादशवर्षप्रान्ते १८०० एवं भाक्कलनं च षड्विंश
द्वर्षशतमध्ये २६०० द्वितीयं प्रत्यक्चलनमपि गतं अधुना तृतीयं भाक्कलनं चतुःपंचाशताब्दावधि ५४०० भविष्यति तथा गोऽगैकगुणैः ३१७९ कलिगताब्दैः शाकः प्रतिजातिः
तदनंतरमनेनाचार्येण खशराब्धिपरिमिते शके छायार्कोदयनांशस्थाने शून्यमेव लब्धं अतिसूक्ष्मत्वात्कलादिकं लब्धं तत्र कलिगताब्दा एते स्युः ३६२९ षड्विंशद्वर्ष
शतैः भाक्कलनान्तो जातः अनेनैकोनत्रिंशत्तमे वर्षेऽयनांशानामादिकृतः तदैवैकोनत्रिंशत्कलानामन्तरं पतितं परं सत्यायुते १७१६ तस्मात्कुजमध्ये हीनादि
तिपाठः समीचीनः ०॥ अथ मध्यमचरदलानयनमाह द्युवृंदत इति द्युवृंदतो हर्गणात् अगाश्चाष्टौ चकुखैः गजाब्दाश्च स्वल्पैर्गतैष्यान्तरदक्षिणे भवतः
अयमर्थः अयनांशयुतादहर्गणात् अगाष्टकुभिः १८७ गतगम्यं कृत्वा स्वल्पं ग्राह्यं अगाष्टकुसंख्यान्युत्तरगोलदिनादितत्संबंधिचरदलमुत्तरं भवति यद्यगाष्टकुभ्योऽधि
को हर्गणो भवति तदाष्टकुभिर्हीनं विधाय शेषं गजाब्दैर्गम्यं कृत्वा स्वल्पं ग्राह्यं तत्संबंधि दक्षिणं चरदलं भवति यतो गजाब्दसंख्यानि दक्षिणगोलदिनानि ततः खराम

द्युवृन्दतो गाष्टकुभि १८७ र्गजाब्दैः १७८ स्वल्पं गतैष्योत्तरदक्षिणे तु ततः खरामं क्रमशश्च दद्यात्सार्द्धं सषष्टं च दलं चरार्द्धम् १ पलप्रभाघ्नं श
रषड्यमाप्तं २६५ पंचेन्दुत १५ स्तत्स्वमृणं स्वगोलात्॥

मिति खरामं यथासंभवं पृथक्कुर्यात् खरामत्रयं भवति ततो यथाक्रमेण प्रथमं खरामं स्वकी
यार्द्धयुतं कुर्यात् तेन पंचाब्धिसंख्या भवति ४५ द्वितीयं सषष्टांशं एतेन पंचाग्नि ३५ तृतीयमर्द्धं कुर्यात् तेन तिथिसंख्या १५ खराममित्युपलक्षणं तेन यथावत्स्थितं प्रथमं सा
र्द्धं द्वितीयं सषष्ठं तृतीयमर्द्धं यत्र खरामं न लभ्यते तत्रावस्थितांकं सार्द्धं कुर्यादिति ततः सर्वमेकीकृत्य मध्यमचरार्द्धं भवति खरामत्रयमिति चरदलखंडकत्रयोत्पत्त्यर्थं
उक्तं अगाष्टकुसंख्यान्युत्तरगोलदिनादि कथं तदुच्यते मेषादिषड्राशयः त्रिंशद्गुणा जाताः १८० पूर्वोक्तकन्यान्तवासरैर्युताः १८६ निरंकुशकध्रुवकदिनेनाद्या जा
ता अगाष्टचन्द्राः १८७ एतत्सौरवर्षदिनेषु ३६५ मपास्य शेषं गजाब्दाः १७८ उभयोर्योगे जाताः सौराब्ददिवसाः ३६५ । अथ स्फुटचरानयनमाह पलप्रभेति तत्र
यच्चरार्द्धं पलप्रभाघ्नाच्छरषड्यमैराप्तफलं गोलक्रमपंचेन्दुतः स्वमृणं भवति एतदुक्तं भवति पूर्वोक्तप्रकारेणानीतं मध्यमचरार्द्धं स्वदेशपलप्रभया विषुवच्छाययासं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणंयच्छरषट्यमैः २६५भंजेत् लब्धं घटिकादिस्फुटचरदलंभवति तद्यदिसायनांशोत्तरगोलदिनसंबंधीभवति तदापंचेन्दुषु १५ स्वंधनंकार्यं तद्दिना
र्द्धंभवति तद्द्विगुणंदिनमानंस्यात् यदिचरदलंसायनांशाद्दक्षिणगोलदिनसंबंधीभवति तदापंचेन्दुषु १५ तच्चरदलमृणंकार्यं तेनदिनार्द्धंभवति तद्द्विगुणं
दिनमानं व्यस्तमिति अतोव्यस्तंनिशार्द्धंभवति अयमर्थः यत्रदिनार्द्धानयनार्थंपंचेन्दुषु १५ चरदलंधनं तत्र निशार्द्धानयनार्थंपंचेन्दुषुऋणंकार्यं एतेननिशार्द्धंभ
वति यत्रऋणंतत्रधनंकार्यं निशार्द्धंयुतंदिनमानंमिश्रसंज्ञंभवति उक्तंचरात्र्यर्द्धंखरसैः ६० संशोध्ययदाभवेन्निशा अथवाकार्यंगणकैर्निशार्द्धदिनसंयुतंकार्यंमिश्रंतयो
र्योगेनैष्यांतरितमितितयोर्दिनार्द्धनिशार्द्धयोर्योगेनैष्यांतरितंभवति अयमर्थः दिनार्द्धनिशार्द्धकर्मभूमौस्थाप्य यद्यस्मिन्पततितत्तस्मिन्पातनीयंशेषंनभवति अत्रवासनाभा
रतखंडेजम्बूद्वीपेनिरक्षलंकास्थानेभचक्रस्यसममंडलगत्याविषुवच्छायायाचरदलस्यभूतीनामभावाद्द्वादशसंक्रांतिषुदिनरात्रिमानंत्रिंशत्घटिकमेवततःसाक्षे
देशेविषुवच्छायांचरदलादिकमुत्पद्यते चरतिगच्छति उत्तरगोलेदिनंदक्षिणगोलेरात्रिरयंकालइति चरं तस्यपूर्वापरभागेनदलमर्द्धंचरदलं तच्चत्रिज्यातोहोरात्र्यर्द्धवृत्त

अहर्दलंव्यस्तमितोनिशार्द्धंतयोर्योगेनैष्यान्तरितंततंच २ षड्भ्रंचरार्द्धंदशा १० भागहीनंयाम्यंतुरामांशा ३ युतंदशाप्तं १० ॥ ॥ ॥ ॥

वदितिक्षितिपोमंडलयोरंतरंतदुच्यते तस्यभुजसंबंधेराशित्रयस्यचरार्द्धस्यत्रीणिखंडकानिस्थापयुत्पादितानि अतःसार्द्धसप्तमिज्याद्यैकैकेनराशिनाखंडक
त्रयंकृतंउदाहरणं प्रथम ४५ द्वि ३५ तृ १५ कान्यकुब्जेविषुवच्छायायासंगुण्यशरषट्यमैर्भजेत् लब्धंप्रथमःखंडः ६० द्वि ४८ तृ २० एकंयुग २८ पलभानुसायनविषु
वद्दिनार्द्धयतोद्वादशांगुलशंकुच्छायाशास्त्रेदृशाविषुवत्प्रभाविषुवतीच्छाया स्यात् सेवपलप्रभेत्युच्यते उक्तंच एवंविषुवतीच्छायांस्वदेशेयद्दिनार्द्धभाद्दक्षिणोत्त
रयोरेखासानत्रविषुवत्प्रभेति अथप्रतिदिनमध्यप्रभानयनमाह षड्भ्रमिति षड्भिर्गुणितंपूर्वोक्तंमध्यमचरदलंस्वदशांशेनहीनंदशात्तंयाम्यांतुरामांशेन ३ युतंदशाप्तं
उदग्दक्षिणतः अक्षिहीनेअक्षेणवियुतायुक्तंविधायभानोःसूर्यस्यउदग्दक्षिणतःप्रभास्यात् अयमर्थः पूर्वोक्तंमध्यमचरार्द्धंषड्भिर्गुणयेत् ततोयद्युत्तरगोलसंबंधि
तदास्वकीयदशांशे १० नहीनंविधायदशभिः १० भंजेत् यल्लब्धंतद्द्वाभ्यांहीनेऽग्रेवक्ष्यमाणाक्ष्येणान्वयेत् शेषमुत्तरप्रभाभवति यदिदक्षिणप्रभाभवतिमध्याह्नच्छायेत्यर्थः
अत्रवासना विषुवद्दिनेचरदलाभावाद्विषुवच्छायैवमध्याच्छायातद्विषुवन्मध्यछायातःसौम्ययाम्यक्रांतिवशेनप्रतिदिनमध्यच्छायाद्योर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा०टी० णार्कक्रमेणास्मात्तनेन स्यात् कोर्थः सौम्ययाम्यक्रान्तौ मेषादितो यथा यथा शंकुना नत्यतिदिनमध्यच्छाया विषुवच्छायातो मिथुनान्तं यावत् दीयते कर्कादितः कन्यान्तं या
२३ वत् वर्द्धते एवं याम्यक्रान्तावपि तुलादितो यथा यथा नति दिनमध्यच्छाया विषुवच्छायातश्चापांतं यावद्वर्द्धते मकरादितो मीनान्तं यावद्धीयते निरक्षप्रदेशाद्दिक्षु
द्वित्र्यादिरच्छा परमक्रांतिसमानं शकान् याम्ये मेषादिषड्राशिषु मध्याह्नच्छाया उत्तरनतांशेषु याम्यभागे पतति एवं तुलादिषड्राशिषु याम्यनतांशेषु सौम्यभागे क्षांश
मानेन पतति एवं परमाणाक्षांशेभ्योक्षाधिका भवति तत्र मिथुनराशेरक्षांशप्रमाणेन मध्यच्छाया विषुवच्छायावषिष्यते उदाहरणं मीनान्ते मेषादौ चरदलाभावात् शतानन्दोक्तो अक्षि
हीनाक्ष एव मध्यच्छाया तत्र कान्यकुब्जेक्षः ६२ अक्षिहीनत्रयस्सेव मीनान्ते मध्यच्छाया एवं मिथुनान्ते चरदलं ९६।४५ षड्घ्नं ५८०।३० उत्तरगोलकत्वात् दशभागे
न ५८०।३ हीनं ५२२ दशाप्तं ५२।१४ अक्षिहीनाक्षेण वियुक्तं ९।४६ इयं मिथुनान्ते मध्यच्छाया अत्र परमापरमसमानाक्षांशाधिकांशवशेन मध्यच्छाया वशिष्टा यत्र पर
मापरमसमानाक्षांशा एतावंतः २४ तत्र विषुवच्छाया ५।१२ यतः शतानन्दोक्तो अक्ष एतावान् ५।१४ मिथुनान्ते मध्यच्छायालोपः एवं कन्यान्ते क्षिहीनोऽक्ष एव मध्य

तदक्षिहीनाक्षवियुक्तयुक्तं भानो रुदग्दक्षिणतः प्रभा स्यात् १ छायादशघ्ना १० शतसंयुता च मध्यप्रभोना भवतीह शंकुः ॥

प्रभा तथा धनुरन्ते मध्यचरं ९४।३० षड्गुणं ५६७ याम्यगोलत्वात् रामांशा १८९ युतं ७५६ दशाप्तं ७५।३६ अक्षिहीनाक्षेण युक्तं १२६।३६ इयं धनुरन्ते मध्यप्रभा १ अथ दिनग
तैष्यघटिकाज्ञानमाह छायेति छाया दशभि १० र्गुणिता शतेन १०० संयुता मध्यप्रभोना भवतीह शंकुः यतो हतो हरहेलतस्तदाक्षहीनां छायेह शंकुर्भवति शतेन हता ह
हेलतो दिनार्द्धोन्नदाघ्नं तेन शंकुनाप्तं अहर्गतैष्याख्यो गतगम्यो घटिकादिकालो भवति अयमर्थः इष्टकाले द्वादशाङ्गुलशंकोर्यावत्यंगुलव्यंगुलादिका छाया लभ्यते
तावती दशगुणा कार्या पुनः शतेकेन १०० संयुता ततः पूर्वोक्तमध्यप्रभया हीना एतेन तत्कालशंकुर्भवति हार इत्यर्थः ततो दिनार्द्धं शतेन १०० संगुण्य सवर्णितासवर्णि
तेन शंकुना हरेत् लब्धमिष्टघटिकादिकालो भवति यदि दिनार्द्धोर्द्ध्वं गतः पश्चादेष्यो गम्यो वक्तव्यः उक्तं च शिनातनलेखसंसिद्धिर्वेत्रलेपोपि वा समे इष्टशंक्वंगुले
रिष्टैः सममंडलयोर्लिखेत् तत्र शंकुमूलेऽव्यंधगुलविपुलसूर्येद्वादशांगुलो छाया तत्रांकांगुलनियमो विनुष्टैर्वेदैः खाब्धिरिति १ अथ गतैष्यघटिकाभ्यः रामः
छायाज्ञानमाह खखेन्द्विति घटिकादि दिनार्द्धं शतेन संगुण्य १०० गतेन गम्येन वा घटिकादिना भजेत् यल्लाप्तं तन्मध्यप्रभया समेतं विधाय शतेन हीनं कृत्वा दश २३

CC-0. In Public Domain. Digitization by eGangotri

भि १०भंजेत् लब्धांगुलव्यंगुलादिका छाया १ अथ लग्नानयनमाह लग्नमिति स्वभोदयैः स्वराश्युदयपलैः सौरमासस्य गतभोग्यदिनानामनुपातात् त्रैराशिकेण
सूर्योदयतः सूर्यभुज्यमानराशेः लग्नं प्रसाध्य इत्यत्र शतानन्देन संक्षयेण कथितं तदस्माभिः स्पष्टतया कथ्यते तत्रायं क्रमः तात्कालिकार्कं सायनांशं कृत्वा एकत्र स्थाप्य
तदन्वर्कभुक्तराशयः पृथक् धार्य सूर्यस्य भुक्तांशादिकं त्रिंशतो विशोध्य भोग्यं कार्यं तेन भोग्यांशकादिना अर्काक्रान्तस्य उदयपलानि संगुण्य भागस्थाने त्रिंशता प्राप्तं भोग्यपला
नि स्युः एवं गतकालाद्गतपलानि स्युः तानि पृथक् स्थापितानि इष्टघटिकापलेभ्यः शोधितानि सूर्यभुक्तराशिषु एकराशियोज्यते शेषफलसमूहाद्यथाक्रमं सूर्येक्रां
तराशितः स्वदेशोदयाः शोध्याः शुद्धलग्नप्रमाणांकाः सूर्ये क्षेप्याः ते भचक्रादिकाश्चेत्तदा चक्रशुद्धाः कार्याः एवं कृते यत्पलशेषं तत्खरामाप्तं ३० मशुद्धलग्नपले
लब्धमंशाद्यं पृथक् स्थापितार्कराशीनां मध्ये न्यस्त मयनांशैर्हीनमिष्टकाले तात्कालिकं लग्नं भवति एवं सर्वत्र अथ रात्रिगते लग्नानयनं निशापूर्वार्द्धगते इष्टका

घाताहता हर्दलतस्तदाप्तमहर्गतैष्योघटिकादिकालः १ खखेन्दुनिघ्ना १०० द्युदलाद्गतैष्यनाड्याप्तमध्यप्रभया समेतं ।
पातोनितं तद्दशभि १० र्विभक्तं लब्धाङ्गुलाद्या भवतीष्टभानां २ लग्नं तु सूर्योदयतः प्रसाध्यं स्वभोदयैः सौरदिनानुपाता
त्

लेराशिषट्कयुतसायनार्कदिनवल्लग्नमानेयं अथ रात्रिशेषे लग्नानयनं रात्रिशेषे प्राग्वत्तात्कालिकार्कं सायनमेकान्ते धृत्वा इष्टकालघटिकापलान्यपि पृथ
क् स्थाप्यन्ते तदनु सूर्याक्रान्तराशेर्भुक्तभोग्यादिना सूर्योदयलग्नपलानि हत्वा भागस्थाने त्रिंशता हृत्वा लब्धमिष्टपलेभ्यः शोध्यं सूर्याद्भुक्तभागानयनाय पलशे
षं पृथक् स्थाप्य तस्मिन्पक्षसमूहे अर्कराश्युदयास्तस्य यावन्तो राशयः शुद्धास्तावत्प्रमाणांकांशाः सूर्याक्रान्तराशेः शोध्याः तच्छेषस्य खरामा ३० प्तं उत्क्रमाच्छुद्धराश्यु
दयेनाप्तं भागादिकं तस्मिन् सूर्ये पात्यं अयनांशैर्हीनं इष्टे निशाशेषे तात्कालिकं लग्नं जायते उक्तं च रविभोग्यांशकान्हत्वा स्वोदयैः खगुणै ३० र्भजेत् लब्धा भोग्यवि
नाड्यः स्युरेवं लग्ने गतांशकाः १ इष्टे गतविनाडीषु शोध्या भोग्यविनाडिकाः स्वस्वलग्नविनाड्यस्तु शोध्यास्तस्वोदयास्ततः २ यत्तत्र शुद्धं भवेल्लग्नं तस्य भुक्तपलानि च
गुणयेत् त्रिंशता भागं स्वभुक्त्या च समाहरेत् ३ लब्धमंशादिकं ग्राह्यं भुक्तराशिस्तु योजयेत् एवं राश्यादिकं लग्नं क्रियते गणकैः सदेति ४ ४ ४ ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चन्द्राश्विनिघ्नेति स्वदेशविषुवच्छायां चन्द्राश्विभिरेकविंशत्या संगुण्य षष्ट्या विभज्योपरियोज्यार्द्धयेन एवं लङ्कावधेः इहास्मिन्निष्टदेशे दक्षिणाक्षो भवति अङ्गुलसं
भवे षष्ट्या भागेन यथा उदाहरणं कान्यकुब्जे विषुवच्छायांगुलादिका ६।५० इयं चन्द्राश्वि २१ गुणिता १२६ अर्द्धिता ६३ अयमत्राक्ष एवं सर्वत्र अथोल्लंकोदयास
नामानयनं सूर्यसिद्धान्तात्प्रदर्श्यते त्रिभद्युकर्णार्द्ध गुणास्त्वाहोरात्रार्द्धभाजिताक्रमादेकद्वित्रिविभज्यात च्चापानि पृथक् पृथक् स्वाधोधः प्रविशोद्धानि शेषालंकोद
पासवः स्वांगाष्टयो १६७० र्थगोगैकं १७९५ शरत्र्यंशकाह्निमांशवः १९३५ व्याख्योत्पत्तिः उदाहरणं नैव आदौ २१ दिनव्यासदलानयनम् परमक्रांतिज्या १३९१ तद्वर्गं १९
५१६०९ त्रिज्या ३४३८ वर्गा १७८२९८४४ त्वोह्यशेषस्य पदे दिनव्यासदलं ३१४१ अयमेव गुणकारः अथैकराशिभागानां ज्या ६९८।३० त्रिवज्यावर्गाद्विशोध्य मूलमेकरा
शेर्व्यासदलं भागहारः ३३६६ द्वितीयराशेः क्रान्तिभागानां ज्या १२१० वर्गं त्रिज्यावर्गादपास्य मूलं द्वितीयराशेर्व्यासदलं भागहारः ३२१८ तृतीयराशिक्रांतिभागानां जीवा १४
९७ वर्गं त्रिज्यावर्गादपास्य शेषस्य पदं तृतीयराशेर्व्यासदलं भागहारः ३१४१ एवं भागहारैर्भक्तालब्धं फलमेकज्यातः १६०४ द्विज्यातः २९०६ त्रिज्यातः ३४३८ एवं चा

चन्द्राश्विनिघ्ना २१ पलभार्द्धिताच लङ्कावधेः स्यादिह दक्षिणोक्षः ३

पानि प्रथमं १६७० द्वितीयं ३४३५ तृतीयं ५४०० एतान्यधोधः शुद्धानि लंकायामुदयासवो भवेयुः यथा मेषस्य १६०० वृषस्य १७९५ मिथुनस्य १९३५ एतेवैपरीत्येन कर्कटस्य १९
३५ सिंहस्य १७९५ कन्यायाः १६०० एते व्युत्क्रमेण तुलादितो मीनांताः स्युः एते षड्भिर्भक्ता लंकोदयाविनाड्यः वसुभानि २७८।२० छिद्रनवयमा २९९ त्रिरदा ३२२ इति भ
वंति अथ निरक्षतः षट्षष्ट्यक्षांशपर्यन्तं स्वदेशे चरखंडानयनं क्रांतिज्या विषुवद्भध्नाक्षितिज्याशंकुभिर्हता त्रिज्याभ्यस्ता स्वकर्णोन्नानच्चापानि पृथक् पृथक् अधोधः
शुद्धाः प्राणाद्याः स्वदेशचरखंडकाः पलाद्याः स्युस्तदैके स्यात्परं चरं व्याख्योत्पत्तिरुदाहरणे नैव यथैकराशेः। क्रांतिज्या ६९८।३० द्वितीयराशेः १२१० तृतीयराशेः १३९७
एताः कान्यकुब्जविषुवच्छाया ६।।० गुणिता द्वादशभिर्भाजिता लब्धं क्षितिज्या स्यात् यथा मेषस्य ३४९।१५ वृषस्य ६०५। मिथुनस्य ६९८।३० एता त्रिज्यागुणिता प्रथमः
१२००२१ द्वि० २०७९९९० तृ० २४०४३।० स्वकर्णेन यथा मेषस्य ३३६६ वृषस्य ३२१८ मिथुनस्य ३१४१ पृथक् पृथक् भाजिता लब्धं मेषज्या ३५ वृषस्य ज्या ६४६।२१ मिथुनस्य राम: २४
ज्या ७६४३२ एते षांचापानि प्रथमं ३५७।२९। द्वि० ६५० तृ० ७७१।५ एते अधोधः शुद्धाः श्रीमत्कान्यकुब्जे चरखंडकाः स्युः ६०।४८।२०। चरदलानयनार्थमेताभ्यः कर्मकार्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२८ एभ्यैर्वंचपरम चरं घस्यादि २८ एतद्द्विगुणं ४।१६ लंकादिने ३० क्षिप्तं जातं परमदिनं ३४।२६ एवं स्वदेशे चरखंडयुक्ते द्विः सर्वत्र भवति अतः स्वदेशे मेषादिलग्नोद
२ यास्तन्मानयनं स्वदेशे चरखंडोनाभवंतीष्टोदयासवः व्यस्ताव्यस्तायुतास्तैस्तैः कर्कटाद्यास्ततः स्वयं उत्क्रमेणैव खंडेन भवंतीष्टा तुलादयः व्याख्योदाहर
णेनैव लंकोदयासवो मेषस्य १६७० वृषस्य १७९५ मिथुनस्य १९२५ कर्कटस्य १९३५ सिंहस्य १७९५ कन्याया १६७० एते स्वदेशे मेषादीनां चरासुभिः ३५७।२९१।१२१ क्र
मेण वियुक्ता जाताः श्रीमत्काम्यकुब्जे मेषषड्राशिकस्य १३१३ वृषस्य १५०० मिथुनस्य १८१४ कर्कटस्य २०५६ सिंहस्य २०८७ कन्यायाः २०२२ एते विलोमेन तुलादि
मीनान्ता भवंति एते षड्भिर्भक्ताः पलानि यथा मेषस्य २१९ वृषस्य २५० मिथुनस्य ३०२ कर्कटस्य ३४३ सिंहस्य ३४८ कन्यायाः ३३८ एतानि षष्टिभक्तानि ६० लब्धं
घस्यादिकं मेषस्य ३।३९ वृषस्य ४।१० मिथुनस्य ५।२ कर्कटस्य ५।४३ सिंहस्य ५।४८ कन्यायाः ५।३८ एवमुत्क्रमेण तुलादीनामपि अथवा परप्रकारेण चरखंडे विना
डिका विषुवच्छायां द्विगुणीकृत्य स्थानत्रये धृत्वा क्रमेण सूर्यो १२।६।१५ षड्गुणे विभजेत् लब्धानि चरखंडपलानि भवंति वसुवृक्षनंदनंदाग्नित्रिरदंचक्रमोत्क्रमात्

द्विरभ्रोरविः पर्वकृतानृयुक्तो दिग्भि १० स्तमोष्ट ८ य्यदिनभुवाढ्यः ॥

चरखंडोनितं युक्तं विनाड्योजादिकादयः एतानि २७८।२९९।३२३। चरखंडकैः क्रमेण हीनानि एतान्युत्क्रमेणोत्क्रमेश्च रखंडकैर्युतानि मेषादीनां क्रमेण तुलादीना
मुत्क्रमेण विनाड्यो भवन्तीति ॥०॥ इति श्रीमाधवमिश्रविरचिते भास्वतिविवरणे त्रिप्रश्नाध्यायः पंचमः ५ अथ चंद्रग्रहणाधिकारो व्याख्यायते तत्रादा
वेव पूर्णिमायां तिथ्याधिकारोक्तविधिनौदयिकौ रविचंद्रौ स्फुटौ विधाय तिथ्यंतः साध्यः अथ शरानयनमाह द्विघ्न इति उदयकालिकः स्फुटसूर्यो द्वाभ्यां गुणि
तः पूर्णिमायां तत्प्रमाण घटीविघटीनां तुर्यांशेन संयुतस्तात्कालिको रविर्भवति दिग्भिरिति अष्टगुणेनाह्निगणाद्दिग्भि १० र्भागेन यल्लब्धं तत्पात ध्रुवकेनाढ्यं कृत्वो
दपिकस्तमो भवति तद्ग्रहाधिकारोक्तविधिना तात्कालिकं कुर्यात् ततस्तमोयुताद्द्विघ्नसूर्यात् खखभे २७०० यल्लब्धं तदेकाधिकं कृत्वा सौम्ययाम्याधिकारः कार्यः तत्र
शून्ये एकाधिकं कृत्वा सौम्यशरः एकांके एकमधिकं कृत्वा याम्यशरः द्विसंख्यांके एकमधिकं कृत्वा सौम्यशरः त्रिसंख्यांके एकमधिकं कृत्वा याम्यशरः इति
सर्वत्र यदि सौम्यः शरस्तदोत्तरस्यां ग्रासः यदि याम्यस्तदा दक्षिणस्यां दिशि ग्रासः खखभे २७०० भक्ते यदवशिष्यते तत्सप्तविंशतिशतेन गतगम्यं कृत्वा यदल्पं भ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेनद्राह्यंपश्चात्पृथक्कृथ्त्वा दशभि १० र्भक्तेयन्नाप्तं तत्प्रथमशणैपातयेदेवं स्फुटशरोभवति सर्वत्रसिद्धांतेषु पातो न चंद्राच्छुरानयनं दृश्यते अत्रपातानंदेन पातयु
क्तार्काच्छरानयनमुदाहृतं तत्कथं तत्रोच्यते पौर्णिमास्यंतेसर्वदारविचन्द्रौभार्द्धान्तरितौभवतः तत्रस्फुटचंद्रेस्फुटपातोनेकृतेयएवांकोभवति स एव मध्यम
पातान्वितस्फुटसूर्याद्भवति तस्मात्तमोयुतार्कादित्युक्तं उभयत्रसाम्यं १ अथग्राह्यग्राहकानयनमाह मानमितिअग्नि ३ घ्नौ नागनिघ्नौहिमांशोश्चंद्रस्यमानंभव
ति दिग्घ्नाच्चंद्रमानाच्चतुर्भि ४ र्यल्लब्धं तमःप्रमाणंभवति तद्योगतोर्द्धंतयोर्योगतोयदर्द्धं तच्छरहीनंस्फुटपर्वसंधौशुद्धांशोश्चंद्रमसोग्रासोभवति अयमर्थः चंद्र
स्फुटीकरणेभुक्तखंडोनितभोग्यखंडान्वितोनभवति चंद्रगतिः साग्निहीनासहितंचंद्रमानंभवति तदेवचंद्रमानंसंगुण्यदिग्भिः १० संगुण्य चतुर्भि ४ र्भजेत् य
ल्लब्धं तत्तमोमानंभवति तत्तमोमानचंद्रमानयोर्योगंकृत्वार्द्धयेत् तन्मानयोगार्द्धंभवति तत्रमानयोगार्द्धेस्फुटशरंप्रपात्यशेषंग्रासः स्फुटतिथ्यंतेस्यात् ग्रासचंद्रा

ततोयुतार्कात्खखभा ७ २७०० सौम्यंयाम्यंशरोल्पः खदशांशहीनः १ मानंहिमांशोर्गतिरग्नि ३ घ्नीनाद्दिग्घ्ना १०
चतुर्भि ४ स्तमःप्रमाणं तद्योगतोर्द्धंशरवर्जितंतत्ग्रासःसुधांशोःस्फुटपर्वसंधौ २ ॥ २ ॥ २

र्कयोर्मानज्ञानंचंद्रार्कयोर्ग्रहणंयदिग्रासोमानसमोभवति तदासर्वग्रहणसंभवः मानैक्यार्द्धोद्विक्षेपयोस्तुल्यंस्पर्शमात्रमेवस्यात् उक्तंचार्कसिद्धान्ते ग्राह्यमा
नाधिकेतस्मिन्सकलंशून्यमेवान्यथा योगार्द्धोदधिकेतस्मिन् विक्षेपेग्राससंभवइति विक्षेपःशरः अथग्राहकभूच्छाया उक्तंचतन्नैवच्छादकोभास्करःसेंदुरधः
स्थोघनवद्भवेत् भूच्छायांप्राङ्मुखश्चंद्रोविशत्यपर्यंभवेदसौ व्याख्याः चंद्रकक्षातः सूर्यकक्षोपरिस्थानादधःस्थःशशीसूर्यंघनवत्समाच्छादयति यद्यप्येतौद्वौतापि
तौतथासूर्यादतिश्चन्द्रोपरिभागादधःत्रविश्यपूर्वाभिमुखंगच्छन्सूर्यमंडलात्मायोनिर्गच्छति अतःसूर्यग्रहणेपश्चिमदिक्स्पर्शः चंद्रग्रहणेतुचंद्रःप्राङ्मुखंगच्छ
त तदधःस्थांस्थिरांभूच्छायांविलोमामपरभागंश्टश्याकृभागेनिर्गच्छति तस्माच्चंद्रस्यपूर्वस्यांस्पर्शः पश्चिमायांमोक्षः यत्रभूच्छायाभूश्चंद्रःस्पृशति तत्रचंद्रस्य एमः
र्वभागः येचमुंचति तत्रापरभाग अतश्चंद्रस्याधःस्थाभूच्छायाएवग्राहकाः २ अथस्थित्यर्द्धानयनम्॥ ॥ २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अगेदराहृतमिन्दोः खंडखपंच ५० युक्खंडेन विखंडितं भक्तं स्थित्यर्द्धं भवति तत्स्थित्यर्द्धं हीनं धनं कार्यं इन्दुग्रासः षड्भिः ... स्यक्षवर्णायेत् खपंचयुक्तेन ग्रासेन तद्वर्णितेन भजेत् लब्धं
घटिकादि स्थित्यर्द्धं भवति तद्दिनमानं हीन पूर्णिमातिथिघटिकासु तत्स्थित्यर्द्धं पातयेत् शेषं स्पर्शकालो भवति पूर्णिमा ... टिका मध्यग्रहणकालः मध्यग्रहणकाले स्थित्यर्द्धं योजयेत् मो
क्षकालो भवति द्विगुणितं स्थित्यर्द्धं पुण्यकालः सर्वग्रासे तु चंद्रग्रहणे चंद्रमानं रविग्रहणे रविमानं पूर्वोक्तस्फुटग्रासे प्रपात्य शेषं ग्रहः स्यात् तं खग्रह स्थित्यर्द्धेन गुणयि
त्वा स्फुटग्रासेन हरेत् लब्धं निमीलनोन्मीलनं विमर्द्दार्द्धं स्यात् तत्रायं क्रमः स्फुटपूर्णिमाघट्यः पञ्चधा स्थाप्य प्रथमस्थाने स्थित्यर्द्धहीना कार्या शेषं स्पर्शसमयः द्विती
यस्थाने निमीलन विमर्द्देन हीना शेषं निमीलनकालः तृतीयस्थाने यथास्थिता एक मध्यग्रहणसमयः चतुर्थस्थाने उन्मीलन विमर्द्देन युक्ता उन्मीलनकालः पंचमस्था
ने मोक्षस्थित्यर्द्धेन युक्तो मोक्षकालः निमीलनं चन्द्रार्कयोरदर्शनं उन्मीलनं दिवसस्येव दर्शनं उक्तंच अस्मत्कृत गणित भूषणे स्थित्यर्द्धं ग्रासखग्रहाप्त्यर्द्धनाद्धं ग्रासे

स्थित्यर्द्धमङ्गाहृतमिन्दुखंडं खपञ्च ५० युक्खंडविखण्डितञ्च हीनन्धनं पर्वणि पूर्णितः प्रक्षेपः स्पर्शोथ मुक्तिश्च तदिष्टकालः २ खखे
न्दुवेदा ४१०० धिक भास्करस्य भागवह्निचक्रा २७०० प्तदिग्शः शरस्य ॥

नाप्तं पर्वणि स्पर्शमोक्षौ स्थित्यूनाढ्योन्मर्द्देनेनो निंद्ये न्वीहोरांशोमीलनोन्मीलनं
स्तः १ अर्केसिद्धान्तेपि स्फुटतिथ्यवसाने तु मध्यग्रहणमादिशेत् स्थित्यर्द्धनाडिकाहीने ग्रासं मोक्षं तु संयुते निमीलनोन्मीलनाख्ये भवतां सफलग्रहे तद्वदेव च मर्द्दार्द्धना
डिकाहनिशं युत इति ३ अथ परिध्युपयोगि वलनानयनार्थं दिक्शरमाह खखेन्द्विति तद्दिने सूर्यं खखेन्दुवेदैकचत्वारिंशच्छतैः ४१०० रधिकं कृत्वा भचक्रे सप्तविंश
तिशतपरिमितेन २७०० भजेत् यल्लब्धं तत्पूर्ववत्सौम्यविचारः कार्यः शेषं च पूर्ववद्गतगम्यं कृत्वा स्वल्पं ग्राह्यं स्वदृशां प्रोतं कृत्वैवं दिक्शरो भवति तद्दिक्चरं खखाष्टभिः ८००
भजेत् लब्धं खाष्टभागः स सौम्यशरस्य सौम्यो याम्यशरस्य याम्यः तस्य कृतिः कार्या कृतिलक्षणं सर्वं पलमयं कृत्वा तेनैव गुणयेत् ततः वियत्खरसाग्निभि ३६०० र्भक्तं स्त
ब्धं यत्तत्कृतिर्भवेत् १ सर्वमंकं पलमयं कृत्वा तमंकं तेनैवांकेन गुणयेत् षड्भिः शतैः भजेत् लब्धं कृतिर्भवति अथ वा पृथक्स्थमात्मगुणितं तेनैवाधः स्थितं भजेत् खगु
णैर्लब्धं यच्छेषं तत्स्वात्तदुपर्येव स्थितं द्विगुणितं वर्गः पृथक्स्थितमुपस्थितमंकं आत्मनातेनैव गुणयेत् तेनै वाधः स्थानकानपि गुणयेत् खगुणैस्त्रिंशद्भिर्भजेत् ३० लब्ध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मु॰टी॰ मुपर्युपर्यंके भागशेषेद्विगुणितेमेलयेत् एवमुपर्युपरि सर्वानपि मेलयेद्वर्गः सिद्धान्तिवर्गएवकृतिः अथवा दृष्टांकं त्रिधास्थाप्य प्रथमस्थानस्थितांकेन द्वितीयस्थान
२६ स्थितमंकं गुणयेत् षष्ट्या विभज्योपर्युपरि निक्षिपेत् एवं षष्टभागस्य कृतिर्भवति सा च चन्द्रग्रहणे दिक्शरवत् सौम्ययाम्या वा स्यात् सूर्यग्रहणे सौम्यशरस्य याम्याकृतिः या
म्यशरस्य सौम्या ४ अथ नतानयनमाह मध्यमिति अत्र सूर्यग्रहणे रविदिनार्द्धं मध्यंदिनमित्युच्यते चंद्रग्रहणे दिनमानयुतं निशार्द्धं चंद्रमध्यंदिनं तत्र पर्वमध्यदिन
योरन्तरे कृते यदवशिष्यते तन्नतं स्यात् तन्मध्यदिनात् प्राक् सौम्यं नतं परतो याम्यं नतं भवति यदि मध्यदिनमानतुल्या पर्वान्तघट्यो भवन्ति तदा नताभावः अथ पूर्ववत्कृ
तिः कार्या सा चदि सौम्यनतस्य नष्टा सौम्या यदि याम्यनतस्य तदा याम्या यदि स्वाष्टभागकृतिर्नताकृतिश्च द्वे अपि तुल्ये दिशां ते भवतः अथ पर्वाधिपानयनार्थं गणित
भूषणोस्मत्कृतो श्लोकौ स्थानत्रये स्थाप्य कलेर्गताब्दानं तं भजे चन्द्रगुणे ३१ र्फलोनः द्विस्थस्तदेषेन्दु १८ लवेन युक्त २ द्वौ द्वि २ निघ्नोंगद्युतोद्रि ७ भक्तः १ शेषेभ
वन्तीन्दुरविग्रहेस्मिन् पर्वाधिनाथाः सदृशाः फलैश्च ब्रह्मेन्दुशक्रो धनपादिकव्यपाशिकपीटयोन्यं तत्कृतः क्रमेण २ कलियुगादिगतवर्षाणि स्थानत्रये धृत्वा तेषां चन्द्रगुणे

तत्स्वाष्टभागस्यकृतिः सुधांशोर्येथादिशां व्यस्तमितः स्वरांशोः ४ मध्यंदिनात्प्राक्परतश्च सौम्यं याम्यं नतं स्यादथ तत्कृतिश्च कृत्यां स्तुतुल्या
न्यदिशोः क्रमेण योगान्तरं वा वलनादूवीन्दोः ५ ३१ हरेत् लब्धेन फलेन हीनो द्वितीयस्थानस्थितोंकः कार्यः अष्टादशभिर्विभज्य लब्धाधिकः

प्रथमेंके द्वाभ्यां गुणितेंगद्युताद्रि ७ भिर्हरणीयः अद्रिशेषे चंद्रसूर्यग्रहणे ब्रह्माद्याः पर्वाधिपा भवंति तेषां सादृश्यफलानि पूर्वाचार्यैरुक्तान्यत्र विस्तारभयान्नोदाहृतानि उक्त
रुद्रिक्पः कुबेरः पाशी वरुणः कपीटयोनिरग्निः अंतकृतो यमः वाराहसंहितायामपि षण्मासोत्तरवृद्ध्या पर्वेशाः सप्तदेवताः क्रमशः ब्रह्मा शशीन्दुकुबेरा वरुणाग्नियमाश्च वि
ज्ञेयाः १ अथार्कचन्द्रयोर्ग्रस्तयोर्वर्णज्ञानं सूर्यसिद्धान्तादिष्वप्युक्तं अर्द्धादूनं सधूम्रं स्यात् कृष्णमर्द्धाधिकं भवेत् विमुंचतः कृष्णताम्रं कपिलं सकलग्रहे १ अर्द्धादूनमिति स्प
र्शमोक्षासन्नकालयोर्यो ग्रासः स धूम्रवर्णो भवति यदाह ब्रह्मगुप्ताचार्यः आद्यन्तयोः सधूम्रकृष्णखंडग्रहे ततोप्यधिको ग्रासः स कृष्णताम्रः सर्वग्रहे शशी कपिलवर्णः
२ खंडग्रहे चार्द्धादूने र्द्धे च कृष्णवर्णः प्रतिभासते अर्द्धादधिके विमुंचतः कृष्णताम्रो भवेत् सर्वग्रासेनु चंद्रः कपिलवर्णो भवेत् रविस्तु ग्रस्तः सन् सर्वेष्वपि भागेषु कृष्ण एवो
पलभ्यते तत्पक्षमेवाति अथ यावत्प्रमाणं चंद्रसूर्यग्रहणमादेष्टव्यमित्युक्तं खंडखाद्ये आचार्यमाह द्वादशभागादूनं ग्रहणं तेक्षणयाद्रवेरनादेश्यं षोडशभागादिन्दोः राम:
स्वच्छत्वादधिकसादृश्यं रवेर्ग्रहणं द्वादशभागादूनं तदा नादेष्टव्यं तेजस्तैक्ष्ण्यात् दुर्निरीक्ष्यत्वेन रविबिम्बस्य द्वादशभागोग्रस्तोपि न दृग्विषयमेति अतोधिकमेवादेष्टव्यं २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चंद्रविंबस्य षोडशांशोग्रस्तोपि नैर्मल्यान्नोपलक्ष्यते अतस्तदधिकमेवादेष्टव्यमिति सूर्यसिद्धांतेपि स्वच्छत्वाद्द्वादशांशोऽपि ग्र[illegible]दृश्यते हि निशापतेः लिप्तात्रयमपि ग्रस्तं तैक्ष्ण्यत्वान्न वि
वस्वतइति ५ इति श्रीमाधवमिश्रविरचिते चंद्रग्रहणाधिकारः षष्ठः ६ ॥ ० अथ सूर्यग्रहणाधिकारो व्याख्यायते तत्र चन्द्रः छादकः सन् तिथ्यन्ते पर्वे मंडलभागे समो भव
ति तद्विक्षेपस्य मानैक्यार्द्धादल्पत्वे पर्वसंभवः तत्काले द्रष्टा भूगोलोपरिस्थितो यावत्पश्यति भूकेंद्रं विंबद्वौ तावत् [illegible] स्वकक्षास्थौ पृथक् पृथक् सूत्रगौ पश्यति तत्रानयोर्यत्पू
र्वापरमंतरं भूच्छायास्पर्शनावलंबनमित्युच्यते तच्च याम्योत्तरमंतरं सावनतिः तत्रादावेव लंबनमाह नतादिति दशघ्नात् नताज्जिनयुक्तेन नतेन यल्लब्धं तल्लंबनं भवति तेन युतं
नतं च कर्तव्यं अयमर्थः चंद्रपर्वोध्यायोक्तेन विधिना रविचन्द्रौ स्फुटौ विधायामावस्यांतं समानीय द्विग्रविपातौ समानीय स्थापयेत् एवं पूर्वोक्तप्रकारेण नतं समानीय स्थानद्व
ये धृत्वा एकत्र दशभिः १० संगुण्य सवर्णयेत् अपरत्र चतुर्विंशत्या २४ युतं कृत्वा सवर्णयित्वा तेन भजेत् यल्लब्धं तल्लंबनं स्यात् तन्नतेन संयोज्य पुनरपि स्थानद्वये धृत्वैकत्र
दशभिः १० संगुण्य सवर्णयित्वाऽपरत्र चतुर्विंशति २४ युतेन सवर्णितेन भजेत् लब्धं नतेन योजयेदेवं तावत्कर्तव्यं यावत्स्थिरं भवति सुगमत्वेन स्थिरलंबनार्थं गणि

नतात् दशा १० घ्नाज्जिन २४ युग्नतात्तं तल्लंबनं तेन युतं नतं च तत्वांकू ९० निघ्नोन युतस्य भानोः प्राचीप्रतीच्योः स्वशरः प्रसाध्यः १

तंभूषणोमामकंवाक्यं नताद्दिनदलानं प्रालब्धं द्विवारणाहतात् स्वाष्टचन्द्रा १८ न्वितद्विद ४ युताप्तं लंबनं भवेत् १ पूर्वोक्तनताद्दिनार्द्धस्यांगांशेन लब्धं स्थानद्वये
धार्यं ततएकत्राष्टहतात् स्वाष्टादशांशो १८ नान्वितात् अपरत्र वेदै ४ र्युतेनाप्तं स्थिरलंबनं भवेत् एतदुक्तं भवति पूर्वोक्तप्रकारेण नतं दिनार्द्धे चानीय स्थानद्वये धार्यं ए
कत्राष्टाभिः संगुण्य स्वाष्टदशभागेन युतं कृत्वा सवर्णयेत् अपरत्र वेदैः ४ रन्वितं कृत्वा सवर्णात्वेन भजेत् लब्धं स्थिरलंबनं भवति नत यदि चतुरधिकं भवति तदाष्ट
संख्यांके पातनीयं शेषं स्थिरलंबनं भवति चतुर्भिरूनं यथास्थितमेव स्थिरलंबनं यदि दिनार्द्धमानतुल्याः पर्वान्तघट्यो भवन्ति तदा लंबनाभावः उक्तं च अर्कसिद्धान्ते
मध्यलग्नसमये भानोर्हरिजस्य न संभवेति हरिजं लंबनं तत्खांकनिघ्नेन युतस्येति प्राचीप्रतीच्योः लग्नात युतं लंबनेन खांकनिघ्नेन युतं भानोः स्वस्वशरः प्रसाध्यः अ
यमर्थः स्थिरलंबनं नतेयोज्य खांकैर्गुणयेत् ततः सौम्यनतं द्विघ्नरवौ पातयेत् याम्यं नते योजयेत् यदि खांक ९० गुणांको रवौ न पतति तदा चतुःपंचशतानि ५४०० रवौ संयो
ज्य पातयेत् तत्पश्चाद्भचक्रेण २७०० भागं परिहृत्य पूर्ववत्सौम्ययाम्यं स्वल्पं स्वदशांशोनं कुर्यादेवं नतशरो भवति १ ॥ -०- ॥ ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्र०टी॰ अथावनत्यानयनमाह पृथगिति नतशरं पृथक् स्थानद्वये धृत्वा एकत्र शतेन भजेत् १०० यल्लब्धं मध्यादिकं रुद्रैरेकादशभिः ११ संयुतं कार्यं रुद्रयुक्तेन सवर्णितं नतशरं भजेत्
२१ लब्धं यत्तद्घटिकाद्यमध्यशरस्य तदाक्षेरायोगं विधायावनतिर्याम्या भवति अथ सौम्यशरस्य तदाक्षेरास्महान्तरेकृतेयदवशिष्यते तदेवावनतिर्भवति तदक्षशेषस्तदावनतिर्या
म्या यदि सौम्यशरः शेषं तदा सौम्या तल्लंवनमिति दिग्भि १० र्गुणितं गुणो ३ रमाप्तं लंवनं प्राक्परतः स्वर्णं शेरवोहीनं धनं कार्यं अयमर्थः स्थिरलंवनं दशभिः संगुण्य त्रिभि ३ र्भ
जेत् यत्प्राप्तं तत्सौम्यनतं क्रमेणाद्विघ्ने रवौ पातयेत् २ अथस्फुटशरानयनं नतइति नमः संभगुनाद्राहुयुक्तात्ततोऽर्कोच्चरः साधनीयः शरावनत्योरंतरयुक्स्फुटशरो भवति

पृथक्शतांशाधिक १०० रुद्रभक्तस्तदक्षयोगान्तरितोनतिः स्यात् तल्लंवनं दिग् १० गुणितं गुणाप्तं हीनं धनं प्राक्परयोः स्वर्णंशोः २
नतस्तमः संभयुताच्छरस्त्वपारयनत्यन्तरयुक्स्फुटः स्यात् मानं रवेर्भोग्ययुताङ्गनन्दास्तत्द्ग्राहकोधः स्थितएवचन्द्रः ३ ३ ३

एतदुक्तं भवति लंवनफलसंस्कृतान्द्विघ्नसूर्यात् नमसान्वितात्पूर्ववच्छरः साधनीयः तस्यशरस्यावनत्यासहैकदिशियोगोभिन्नदिशिअन्तरं कुर्यात् एवं स्फुटशरो भवति
मानं रवेरिति भोग्ययुतांगनंदा ९६ रवेर्मानं भवति तद्ग्राहकअधश्चन्द्रोऽधः स्थितएवभवति अयमर्थः सूर्यस्पष्टीकरणे भुक्तखंडो नितभोग्यखंडसंगतनन्दे ९६ र्युतं कुर्या
त् तद्रविमानं भवति सूर्यग्रहणे सूर्यो ग्राह्यश्चंद्रो ग्राहकः उक्तं च वराहसंहितायां चंद्रोधः स्थः स्थगयतिरविमंबुदवत्समागतः पश्चात् यदिदेश्यमतः चित्रंद्रष्टिवशाद्ग्रासः राम:
स्पर्द्धणमिति ग्राह्यग्राहकमानयोगं विधायार्द्धयेत् तन्मानयोगार्द्धं भवति मानयोगेशरं सपात्य शेषं ग्रासः स्यात् ३ ३ ० ० ० २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथस्थितिविमर्दानयनं ग्रासादिति चतुर्घ्नाच्चतुर्गुणितात्तद्विनुः सूर्यस्य ग्रासात्त्वरामग्रासैक्येन लब्धं स्थितिमर्दनार्द्धं भवति अयमर्थः ग्रासंस्थानद्वये धृत्वा एकत्र चतुर्भिः ४ संगु
ण्य सवर्णयेत् अथैकत्र खरामैः ३० त्रिंशद्भिः सहितं कृत्वा सवर्णयित्वा तेन भजेत् भाज्यं घटिकादि स्थितिविमर्दार्द्धं भवति सौम्येन तेन स्थिरलंबनं घटिकादि पर्वान्तघटीषु पा
त्यस्थित्यर्द्धं पातयेदेवं स्पर्शकालो भवति याम्यनतेतिथ्यंतघटीषु स्थिरलंबनं योज्य स्थित्यर्द्धं पातयेदिति उक्तं च सूर्यसिद्धान्ते रवीन्दोर्लंबनं ज्ञेयं प्राक्पश्चाद्घटिकादि तत् म
ध्यलग्नाधिके भानौ तिथ्यंतात्तद्विशोधयेत् धनमृणमिति अत्र केचिदाहुः सूर्यस्य ग्रहे स्वदेशाक्षं स्थित्यर्द्धं प्राक्शराङ्गुलं चतुर्थांशरहितं स्फुटं स्यात्सर्वदैव हि तत्क्वचिदपि सूर्य

ग्रासाच्चतुर्घ्नात्तद्विनुः खरामग्रासैक्यलब्धं स्थितिमर्द्दनार्द्धं इतीह सूर्यग्रहणे विशेषः शेषस्तु चंद्रग्रहवद्विचिन्त्यः ४ मानं शरादेः खनतस्य
पञ्चभागोनदिक्शेषहृताङ्गुलाद्याः चन्द्रार्कमानाङ्गुलसंगुणासा खखाग ७०० भक्तावलनाङ्गुलानि १

सिद्धान्तादिषु ग्रन्थेषु न दृश्यते तस्मा
दादरणीयमिति इतीह सूर्यग्रहणे विशेष इति इह सूर्यग्रहणे इति विशेषः खखेन्दुवेदाधिकेत्यादिवलनानयननिमीलनोन्मीलनविमर्द्दपर्वाधिपानयनाधिकं चन्द्रग्रह
णवद्विचिन्त्य इति ४ इति माधवमिश्रविरचिते भास्वतिविवरणे सूर्यग्रहणाधिकारः सप्तमः ७ अथ परिलेखाधिकारो व्याख्यायते तत्र शरादीनामङ्गुलव्यंगुलानय
नमाह मानमिति चन्द्रसूर्यस्य शुद्धनतात् पंचभागेन लब्धं तद्दशसु १० सपातयेत् शेषः सवर्णितो हारको भवति भागहार इत्यर्थः तेन शरादेः माने हृते अंगुलव्यंगुलानि लभ्यंते
आदिशब्देन ग्राहकमानं ग्रास इति तेषामङ्गुलव्यङ्गुलादिकरणं भवति चन्द्रार्कमानाङ्गुल इति चन्द्रस्य रवेर्मानाङ्गुलव्यङ्गुलैः खवलनासंगुण्य खखागैः सप्तशते॰

भा०दी० अथ खंडानयनमाह चन्द्रार्केति चंद्रस्य सूत्रस्य वा मानार्द्धसूत्रेण मंडलं कृत्वा मध्ये याम्योत्तररेखां कुर्यात् पूर्वापररेखां कुर्यात् चंद्रग्रहणे प्राग्भागे स्पर्शः प्रत्यग्भागे मोक्षः सूर्यग्र
२८ हणे विपर्ययात् अपरस्पर्शः प्राच्यां मोक्षः तत्र चंद्रमंडले याम्योत्तररेखा पूर्वभागः पूर्वपश्चिमभागः पश्चिमः सूर्यमंडले रेखा पश्चिमभागः सौम्यः पूर्वभागे याम्यः उक्तं च या
म्योत्तरप्राच्यपरासाधनं पूर्वं दिशं शशिग्रहणं पश्चान्मोक्षोऽर्कस्य विपर्ययात् यथादिशं ग्रहग्रहणं वलनं हिमदीधितेः मोक्षकं तु विपर्यस्तं विपरीतमिदं रवेरिति यदि
सौम्यः शरस्तदोत्तरदिक्सममंडलात् चंद्रस्य सौम्यभागे वलनादानं यदि याम्यशरस्तदा दक्षिणदिक्सममंडलात्सौम्यभागे वलनादानं सूर्यस्य यदि सौम्यः शरस्त

चन्द्रार्कयोर्दिक्सममण्डलस्य सव्यापसव्ये वलनाग्रसूत्रम्
मध्यादुदग्दक्षिणतः शरांतात्तमोर्द्धसूत्रेण रवीन्दुखंडः २ ॥

दोत्तरदिक् सममंडलात्सौम्यभागे वलनादानं यदि याम्यशरस्तदा दक्षिणदिक्सममंडलात्सौम्यभागे वलनादानं सूर्यसिद्धान्तेपि वलनं प्राङ्मुखं देयं तद्विक्षे
पैकतायदि भेदे प्रत्यङ्मुखं देयमिन्दोर्भानोर्विपर्ययात् चन्द्रस्य यदि सौम्यशरः सौम्यवलनादानो याम्योत्तररेखायां याम्यभागे पूर्वाभिमुखं वलनादानं यदिया
म्यशरः सौम्यवलनं तदा पूर्वपश्चिमरेखायां याम्यभागे पूर्वाभिमुखं वलनादानं यदि सौम्यशरो याम्यवलनं तदा पूर्वपश्चिमरेखायां उत्तरभागे प्रत्यङ्मुखं वलनादा राम
नं सूर्यस्य सौम्यः शरो यदि सौम्यवलनं तदा पूर्वपश्चिमरेखायां सौम्यभागे प्रत्यङ्मुखं वलनादानं यदि याम्यश[रो] याम्यवलनं तदा पूर्वपश्चिमरेखायां याम्यभागेप्र २८

त्यङ्गुलं वलनादानं यदि सौम्यशरो याम्यवलनं तदा याम्योत्तररेखायाः सौम्यभागे मत्यङ्गुलं वलनादानं यदि याम्यः शरः सौम्यवलनं तदा याम्योत्तररेखाया याम्य
भागे मत्यङ्गुलं वलनादानं यत्र वलनाग्रशेषः तत्र वलनाग्रं वाच्यं ततश्चंद्रस्य सूर्यस्य वा तन्मंडलमध्याद्वलनाग्रभागेन शराङ्गुलानि दद्यात् यत्र शरस्थानं तल्लग्र
हणमध्यं स्यात् तस्मिन्ग्राहकमध्ये तन्मनार्द्धसूत्रं धृत्वा भ्रामयेत् तेन चन्द्रस्य वा ग्राह्यस्य यावत्यङ्गुलाग्रात्पुनः सूत्रं मध्यमिन्दुं प्रवेशयेत् मध्यसूत्रेण विक्षेपं वल

स्थित्यर्द्धनिघ्नैरसवेदभक्तैर्मानाङ्गुलैः प्राक्परतस्तदद्यात्॥
स्पर्शोयमुक्त्योश्च तदिष्टकालादिन्दुग्रहेऽर्कग्रहणे प्रतीपात् २

नाभिमुखं नयेत् विक्षेपार्द्धाल्लिखेद्वृत्तं ग्रासकार्द्धेन तेन यत् ग्राह्यवृत्तं समाक्रान्तं तद्ग्रासं तमसा भवेत् २ अथ प्रागपराङ्गुलानयनम् स्थित्यर्द्धनिघ्नैरिति स्थित्यर्द्धनिघ्नै एमः
रसवेदभक्तैश्चन्द्रस्य सूर्यस्य मानाङ्गुलानि स्वस्वस्थित्यर्द्धेन गुणयेत् ३॥ इति श्रीमाधवमिश्रविरचिते भास्वतीविवरणे परिलेखाधिकारोऽष्टमः समाप्तः ८ ॥०॥ २९

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्रमित्यनेनसूच्यतां प्रदर्शयति ननुस्वल्पशास्त्रस्यस्वल्पार्थतैवभविष्यतीत्याह अर्थबहुलंबह्वाभिधेयं अतएवपूर्वविरचितशास्त्रेभ्योस्यगौरवं अन्यथाहि
शास्त्रसंभवात्पुनरुक्ततादोषःस्यात् एतदुक्तंभवतिप्रागभिहितशास्त्राण्यतिविस्तृतान्यतस्तेभग्नोद्यमास्तदर्थमहंशास्त्रप्लवंप्रारभेननुकदाचिदल्पप्रज्ञतयानेभ
ग्नोद्यमास्तत्कुतोलब्धं यथापूर्वेशास्त्राणांमहत्वाद्भग्नोद्यमास्तदर्थमिदमल्पमिति अतइदमाह पटुधियामिति अनेनैतत्प्रतिपादितंभवतिनहितेबुद्धिहीनत्वात्तेषु
शास्त्रेषुभग्नोद्यमाः किंतर्हि शास्त्रदोषादल्पत्वापितेषामुद्यमभंगःस्यात्त्वमपिस्वल्पंचलघुवृत्तमदीर्घविचित्रम्यमर्थबहुलंविततपरिपूर्णंएवंविधंतितीर्षूणा
मतिसुखावहंभवतीति होरेति अधुनाहोराशास्त्रस्यपुराकृतकर्मविपाकव्यंजकत्ववर्णद्वयपरिहारेणशाब्दव्युत्पत्तिप्रदंप्रतिज्ञाप्रदर्शयन्निदवक्तव्याह २ हो
रार्थशास्त्रहोरा नामहोरात्रविकल्पमेकेवांछंति अहश्चरात्रिश्चाहोरात्रशब्देनोच्यते तस्यविकल्पोविकल्पना एकेअन्येहोरावांछंतिइत्यर्थः कथमुच्यते तस्यवि
कल्पोविकल्पनाएके अन्ये पूर्वपरवर्णलोपात् अहोरात्रशब्दस्यपूर्वोवर्णोकारोपरवर्णश्चत्रकारस्तयोर्लोपमदर्शनंकृत्वाहोराशब्दोवशिष्यते किमर्थं

होरातंत्रमहार्णवप्रतरणेभग्नोद्यमानामहं स्वल्पंवृत्तविचित्रमर्थबहुलंशास्त्रप्लवंप्रारभे २ होरेत्यहोरात्रविकल्पमेकेवांछन्तिपूर्वापरवर्ण
लोपात्॥

पुनरहोरात्रशब्दाद्धोराशब्दोव्युत्पाद्यतेइति अत्रोच्यते मेषादयोद्वादशलग्नराशयोहोरात्रांतर्भूताः लग्नस्यचकालवशात्ज्ञानं लग्नवशाच्छु
भाशुभज्ञानं अतोहोरात्राश्रयत्वात्ततएवहोराशब्दोव्युत्पाद्यते एतदेवाचार्य्यस्याप्यभिप्रेतं यतः परमतमप्रतिसिद्धंस्वमतमितितथाचसारावल्यां आद्यंतव
र्णलोपाद्धोरास्माकंभवत्यहोरात्रात् तत्प्रतिवद्धाःसर्वेग्रहभगणश्चिंत्यतेयस्मात् किंपातुप्रयोजनमित्याह कर्म्मार्जितंपूर्वभवेसदादियत्तस्यपंक्तिंसमभिव्य
नक्ति पूर्वभवेप्राग्जन्मनियत्सदादिशुभमशुभंमिश्रंचकर्म्मोर्जिततस्यपक्तिंपाकंसम्यक्व्यनक्ति प्रकटीकरोति तथाचलघुजातके यदुपचितमन्यजन्म
निशुभाशुभंतस्यकर्म्मणःप्राप्तिमिति ननुशुभस्याशुभस्यवावश्यभाविनः किंव्यनक्ति उच्यते द्विविधंशुभाशुभं॥ दृढकर्म्मोपार्जितमदृढकर्म्मोपार्जि
तंच तत्रदृढकर्म्मोपार्जितस्यदशाफलपाकक्रमेणव्यनक्ति अशुभंदशाफलंज्ञात्वातदादिपरिहारःकर्तव्यः शुभंज्ञात्वायात्रादेरतिशयेनदानं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ· टी· म· ३

अदृष्टकर्म्मोपार्जितस्याएकवर्गेणफलंव्यनक्ति तच्चाशुभंज्ञात्वाशांत्यादिभिरुपशमनंनयेत् तथाचयवनेश्वरः यद्यद्विधानंनियतंप्रजानांग्रहर्क्षसंयोगप्रभवंप्र
सूतौ भाग्यानितानीत्यभिशब्दयंतिवर्षानुयोगेतिदशान्तराणां तदप्यभिज्ञैर्द्विविधंनिरुक्तं स्थिरारव्यमैत्यान्तिकसंज्ञितंच कालक्रमाज्ज्ञात्वनिश्चितंयत्क्रमोपस्था
प्यस्थिरमुच्यतेतत् सप्तग्रहाणांप्रथितानियानिस्थानानिजन्मप्रभवानिसद्भिः तेभ्यःफलंचाग्रहकर्क्रमस्यादद्युर्यदौत्यानिकसंज्ञितंतत् अनेनास्थिरस्यशां
त्यादिभिरुपशमः प्रदर्शितोभवति उक्तंचभगवान्व्यासः विहन्यादुर्वलंदैवंपुरुषेणविपश्चितेति अधुनाव्यवहारार्थंकालाख्यस्यपुरुषस्यमेषादिराशिपूर्वकंशिरः
प्रभृत्यंगविभागंशार्दूलविक्रीडितेनाह ३ कालांगानीति कालस्यांगानिकालांगानितानिचमेषादिप्रथमराशयोनवर्क्षचरणानवभिर्ऋक्षचरणैर्नक्षत्रपा
दैः प्रमाणंयेषांतेअश्विप्रथमाअश्विनीतः प्रभृतिनवनवनक्षत्रपादाएकैकस्यप्रमाणं मेषप्रथमराशयोश्विप्रथमेनक्षत्रेयुक्तमित्यर्थः तथाभूताराश
योः धातुरवयवाः तथाचयवनेश्वरः द्वेद्वेसपादेभवनंगतेति तथाचभगवान्गार्गिः अश्विनीभरणीमेषः कृत्तिकापादमेवच तत्पादत्रितयंब्रह्मंवृषः सौम्य

कर्म्मार्जितंपूर्वभवेसदादियत्तस्यपंक्तिसमभिव्यनक्ति ३ कालांगानिवरांगमाननमुरोहृत्क्रोडवासोभृतोवस्तिर्व्यंजनमूरुजानुयु
गलेजंघेततोङ्घ्रिद्वयम्॥ ॥३दलंतथासौम्यार्द्रमार्द्रोमिथुनस्त्वादित्याश्चरणत्रयं तत्पादःपुष्यमश्लेषाराशिःकर्कटकःस्मृतः पित्र्यंभाग्यमथार्य्यम्णः

पादः सिंहःप्रकीर्त्तितः तत्पादत्रितयंकन्याहस्तश्चित्रार्द्धमेवच तुलाचित्रादलंस्वातीविशाखाचरणत्रयं तत्पादंमित्रदैवत्यंज्येष्ठावृश्चिकउच्यते मूलमाप्यं
तथाधन्वीपादोविश्वेश्वरस्यच तत्पादत्रयंश्रवणमकरोवासवोदल तद्दलंवारुणकुंभस्तथाजाचरणत्रयं तत्पादमेकोमीनस्याहिर्बुध्न्यंचरेवती चक्रस्थिताः
चक्रेस्थिताः चक्रेस्थिताराशयः अथवाचक्रवत्स्थिताश्चक्रस्थिताः अनेकसंस्थानमेषांप्रदर्शितंभवति तत्रकालाख्यस्यवरांगंशिरोमेषः आननंमुखंतद्वृषः
उरोवक्षोमिथुनः तद्धृदयंकुलीरः क्रोडमुदरंसिंहः वासोभृत्कटिःकन्या वस्तिर्नाभिर्व्यंजनयोरंतरंतुला व्यंजनंयेनपुंस्त्वंव्यज्यतेलिंगंतद्वृश्चिकः ऊरूयुगलंध
न्वीजानुयुगलंमकरः जंघेकुंभः अंघ्रिद्वयंपादयुगलंमीनइति तथाचवादरायणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेषः शिरोथवदनं वृषभो विधातुर्वक्षो भवेन्नृमिथुनं हृदयं कुलीरः सिंहस्तथोदरमथो युवतिः कटिश्चवस्तिस्तुलामृद् थमेहनमष्टमंस्यात् धन्वीरास्योरुयुगलंमक
रोजानुद्वयं भवति धातुः जंघाहितयं कुंभः पादौ मत्स्यद्वयंचेति प्रयोजनम् जन्मकाले यो राशिः पापग्रहाक्रांतः सकालाख्यस्य पुरुषस्य यस्मिन्नंगे स्थितस्तत्रांगे जातस्योप
घातोवक्तव्यः यत्र सौम्यस्थितस्तत्र पुष्टिरिति तथाचसारावल्यां कालनरस्यावयवाः पुरुषाणां कल्पयेत्प्रसवकाले सदसद्ग्रहसंयोगात्पुष्टाः सोपद्रवाश्चापिइतिराशि
क्षेत्रमित्यादि एषांच प्रत्येकस्य राशिरितिसंज्ञा तस्यैव पर्यायनामानि क्षेत्र ग्रह ऋक्षभं राशिश्च क्षेत्रं च गृहं च ऋक्षं च भं च तानि राशिः क्षेत्रगृहर्क्षभानि भवनंच गृहत्वा
द्भवनग्रहणेसिद्धेयत्पुनर्भवनग्रहणं कृतंतत्सर्वेषांग्रहपर्यायाणांग्रहणार्थं ऋक्षत्वादपि भग्रहणे सिद्धे यत्पुनर्भग्रहणंतेनैतद्दर्शयति यत्रयत्र होराशास्त्रे भगृहणं
ऋक्षग्रहणंवातत्रतत्रराशेरेवग्रहणंस्यान्नतु नक्षत्रस्य एते राश्यादयः शब्दाः एकार्थसंप्रत्ययाः एकार्थज्ञाने एकार्थमभिधायकाइत्यर्थः अधुनाराशीनांस्वरूप
मेषाश्विप्रथमानवर्क्षचरणाश्चक्रस्थितारायोराशिक्षेत्रगृहर्क्षभानि भवनंचैकार्थसंप्रत्ययाः ४ मत्स्यौघटीनृमिथुनंसगदंसवीणं चापी
नरोश्वजघनो मकरोमृगास्यः ॥ ५ वित्तानंवसंततिलकेनाह ४ मत्स्येति मीनोराशिर्मत्स्यौ मत्स्यद्वयमन्योन्यंपुच्छाभिमुखं राशितुकृतोलभ्यते उच्यते तस्यैवो
भयोदयत्वात् वक्ष्यतिच लग्नंसमेत्युभयतः एकुरोमयुग्ममिति घटीकुंभः स्कंधासक्तरिक्तघटधारीपुरुषः कुंभः मिथुनोनृमिथुनं नॄणांमिथुनं नृमिथुनं स्त्रीपुमांसौ
तन्मिथुनं सगदंसवीणंपुमान्सगदः स्त्री सवीणा चापीनरः नरोश्वजघनः धन्वीराशिश्चापीविद्यमानधन्वानरः अश्वजघनः अश्वस्तुरगोजघनेयस्यसोश्वजघनः
चतुष्पादित्यर्थः मकरोमृगास्यः मकरोराशिर्मकरएवसचमृगास्यः मृगमुखः तौलीत्यादि तुलाविद्यमानतुलापुरुषः कन्याकुमारीप्लवगानौकास्यासससस्यदह
ना सस्यानिचदहनश्चतौसस्यदहनौताभ्यांसहवर्ततेसासस्यदहना शेषाः स्वनामसदृशाः शेषाराशयो मेषवृषकर्कटसिंहवृश्चिकाः स्वनामसदृशाः स्वसंज्ञाविहि
ताकृतयः तद्यथामेषोमेषः वृषोदांतः कर्कटः कुलीरो जलचरप्राणी सिंहः केसरी वृश्चिकोवृश्चिकएवकीटजातिः तथाचसत्यः छागोवृषभोवीणागदाधरौमिथु
नमंभसिकुलीरः सिंहः शैलेकन्यानौस्थाप्रदीपसस्यकरा पुरुषस्तुलाधरोवृश्चिकोथधन्वीनरोहयांत्याङ्गः मकरोमृगपूर्वः कुंभाधारीपुरुषोझषोमीनः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ. दी. भ. ४

स्वचराश्चसर्वे सर्वेद्वादशराशयः स्वचराः स्वेषुस्वेषुस्थानेषुचरंति यथादृष्टस्थाननिवासिनइत्यर्थः तद्यथा मेषवृषावारण्यौदिवारात्रौ मिथुनोग्राम्यः कर्क
टोम्बुचरः सिंहआरण्यचारीकन्यादर्शितदेशविभागाः तुलापण्यवीथिस्थः वृश्चिकःश्वभ्रचारी धन्वीग्राम्यः मकरः पूर्वभागआरण्योन्योजलचरः कुंभो
ग्राम्यः मीनोजलचरइति तथा च यवनेश्वरः आद्येति आद्यःस्मृतोमेषसमानमूर्त्तिः कालस्यमूर्द्धागदितः पुराणैः सोजाविकासंचरकंदराद्रिस्तेनाग्निधात्वा
करत्नभूमिः १ वृषाकृतिस्तुप्रथितोद्वितीयः सवक्त्रकण्ठायतनंविधातुः वनाद्रिसानुद्विपगोकुलानांकृषीवलानामधिवासभूमिः २ वीणागदाभृन्मिथुनं
तृतीयः प्रजापतेःस्कंधभुजासदेशः प्रनर्त्तकोगायनशिल्पकस्त्रीक्रीडारतिर्द्यूतविहारभूमिः ३ कर्कःकुलीराकृतिरंबुसंस्थोवक्षःप्रदेशोविहितश्चधातुः केदा
रवापीपुलिनानितस्यदेवांगनारम्यविहारभूमिः ४ सिंहश्चशैलेहृदयप्रदेशःप्रजापतेःपंचममाहुराद्याः तस्याटवीदुर्गगुहावनाद्रिव्याधावनीदुर्गवनप्रदेशः प्र
दीपिकांगृह्यकरेसाकन्यानौस्थाजलेषष्ठमितिब्रुवंति कलार्थेधीराजठरंविधातुः सशाद्वलास्त्रीरतिशिल्पभूमिः ६ वीथ्यांतुलापण्यधरोमनुष्यः स्थितःसना

तौलीससस्यदहनाप्लवगाच कंन्याशेषाः स्वनामसदृशाः स्वचराश्चसर्वे ५॥

भीकटिवस्तिदेशे शुल्कार्थवीथ्यापणपट्टनाध्वसार्थाधिवासोन्नतसस्यभूमिः ७ स्वभ्रोष्टमोवृश्चिकविग्रहस्तुप्रोक्तःप्रभोर्मेढ्रगुदप्रदेशेः गुहाविलश्वभ्रवि
षाश्मगुप्तिर्वल्मीककीटाजगराहिभूमिः ८ धन्वीमनुष्योहयपश्चिमार्द्धस्तमाहुरूरुभुवनप्रणेतुः समस्थितव्यस्तसमस्तवाजिशूराख्नभृद्यज्ञरथाश्वभूमिः एभ. ४
९ मृगार्द्धपूर्वोमकरोंबुगार्द्धोजानुप्रदेशंतमुशंतिधातुः नदीवनारण्यसरोन्ननूपश्वभ्राधिवासोदशमःप्रदिष्टः १० स्कंधेतुरिक्तःपुरुषस्यकुंभोजंघेतमे
कादशमाहुराद्याः उद्घादकाधारकुजस्यपक्षिस्त्रीशौंडिकद्यूतनिवासभूमिः ११ जलेतुमीनद्वयमंत्यराशिः कालस्यपादौविहितौवरिष्ठौ सपुण्यदेवद्वि
जतीर्थभूमिर्नदीसमुद्रांबुधराधिवासः १२ प्रयोजनं हतनष्टादिषुद्रव्यस्थानपरिज्ञानं उक्तंच राशिभ्यःकालदिग्देशाइति अधुनाराशिनवमांशद्वादशां

शाधिपान्श्लोटकेनाह ५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षितिजादयोग्रहाः गृहपाः अंशकपाश्च गृहाणांराशीनांमेषादीनांक्रमशः स्वामिनोभवंति एतदेवमेषादिनवांशकाधिपतयः क्षितिजोंगारकः समेषस्याधिपतिः सितःशुक्रः वृषस्य ज्ञोबुधोमिथुनस्य चंद्रः कर्कटस्य रविरादित्यः सिंहस्य सौम्योबुधः कन्यायाः सितःशुक्रः तुलस्य अवनिजोंगारकोवृश्चिकस्य सुरगुरुर्बृहस्पतिःधन्विनः मंदःशनैश्चरोमकरस्य सौरीशनैश्चरोमंदोइत्यमरः कुंभस्य गुरुर्बृहस्पतिःमीनस्येति॥ प्रयोजनं होरास्वामिन्गुरुज्ञकवीक्षितितत्सुतेत्यत्र एतेवनवांशकाधिपतयः नकेवलंमेषस्यभौमोधिपतिः यावद्यस्मिन्राशौमेषनवांशकोदयोभवति तस्यापिभौमोधिपतिः शेषानामप्येवं तेचनवांशकाः कथंभवंतीत्याह अजमृगतौलिचंद्रभवनादिनवांशविधिरिति अजोमेषः मृगोमकरः तौलीतुला चंद्रभवनंकर्कटः आदिनवांशंविधिरितिप्रत्येकमभिसंबध्यते तत्रैवमितिसंबंधोजायते अजादिर्मृगादिः तौल्यादिःचंद्रभवनादिर्नवांशविधिः सर्वराशीनांविधिर्भवति तत्राजादिनवांशविधिः मेषस्य तेनमेषवृषमिथुनकर्कटसिंहकन्यातुलावृश्चिकधनुर्द्धराणांसंबंधिनोनवांशाः मेषस्यभवंति मृगादिर्वृषस्य तेनमकरकुंभमीनमे

क्षितिजसितज्ञचंद्ररविसौम्यसितावनिजाः सुरगुरुमंदसौरिगुरवश्चगृहांशकपाः॥

षवृषमिथुनकर्कटसिंहकन्यासंबंधिनोनवांशाः वृषस्य तौल्यादिर्मिथुनस्यतेनतुलावृश्चिकधनमकरकुंभमीनमेषवृषमिथुनानांसंबंधिनोनवांशाः मिथुनस्य कर्कटादिकर्कटस्य तेनकर्कटसिंहकन्यातुलावृश्चिकधनमकरकुंभमीनानांसंबंधिनोनवांशाः कर्कटस्य एवंसिंहस्यमेषवत् कन्यायाः वृषवत् तुलायाः मिथुनवत् वृश्चिकस्यकर्कटवत् पुनरपिधनुर्मेषवत्मकरस्यवृषवत् कुंभस्यमिथुनवत् मीनस्यकर्कटवत् तदुक्तंग्रंथांतरे मेषकेसरिधन्वीनांमेषाद्याः अंशकाःस्मृताः वृषकन्यामृगाणांचमकराद्यानवांशास्स्मृताः तुलामिथुनकुंभानांतुलाद्याः नवकीर्तिताः कर्कटालिझषाणांचकर्कटाद्याः नवांशकाइति प्रयोजनं स्तेनोभोक्तापंडिताग्राइत्यादि भवनसमांशकाधिपतयःस्वगृहा क्रमशः भवनसमाअंशकाभवनांशकाः भवनानिद्वादशतत्समाअंशकाद्वादशांशकाइत्यर्थः तेचप्रत्येकस्यराशेः स्वगृहादारभ्यगणनीयाः तद्यथा मेषस्य॥ १ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृ॰ टी॰ भ॰ ५

मेषवृषमिथुनकर्कटसिंहकन्यातुलावृश्चिकधन्विमकरकुंभमीनानां संबंधिनो द्वादशभागा भवंति तेषां भौमाद्याधिपतयः एवं वृषस्य वृषाद्या मेषांताः मिथुन
स्य मिथुनाद्या वृषांताः कन्यायाः कन्याद्याः सिंहांताः तुलयातुलाद्याः कन्यांताः वृश्चिकस्य वृश्चिकाद्याः तुलांताः धन्विनो धनुराद्याः वृश्चिकांताः मकरस्य मकरा
द्याः धन्वंताः कुंभस्य कुंभाद्याः मकरांताः मीनस्य मीनाद्याः कुंभांताः प्रयोजनं तात्कालिकेंदुसहितो द्विरसांशक इत्यादि अधुना त्रिंशांशकस्याधिपतीनां गणनयाप
रिज्ञानं च पुष्पिताग्रयाह ९ कुजेति कुजो भौमः रविजः सौरः शनिः गुरुर्बृहस्पतिः ज्ञो बुधः शुक्रो भार्गवः एवं कुजरविजगुरुज्ञशुक्राणां क्रमेण भागाः पवनस
मीरणकौर्प्पिजूकलेयाः तद्यथा पवनः वायवः पंच पंच एव भागाः कुजस्य ततऊर्द्ध्वं समीरणाः पंचैव रविजस्य एवं दश ततऊर्द्ध्वं कौर्पिसंज्ञा अष्टौ गुरोः कौर्प्यो
स्यो वृश्चिकः स च गणनयाष्टमः एवमष्टादश ततः परं जूकसंज्ञाः सप्त भागाः बुधस्य जूकसंज्ञा तुलस्य स च गणनया सप्तमः एवं पंचविंशतिः ततऊर्द्ध्वं तुलेयसं
ज्ञाः पंच शुक्रस्य लेयसंज्ञा सिंहस्य स च गणनया पंचमः एवं त्रिंशत् किं सामान्येनेत्याह अयुजि युजीति अयुजि विषमराशौ कुजादयो ग्रहाः पवनादीनां भागानां

९ अजमृगतौलिचंद्रभवनादिनवांशविधिर्भवनसमांशकाधिपतयः स्वगृहात्क्रमशः ९ कुजरविजगुरुज्ञशुक्रभागाः पवनसमीरणकौ
यथाक्रमेणाधिपतयः तत्र मेषमिथुनसिंहतुलाधनुःकुंभानां विषमराशीनां मेषः क्रमः युजि भे तु विपर्य्ययस्थाः युजि समराशौ ऽऽर्प्पिजूकलेयाः॥
पवनादिभागग्रहाश्च विपर्य्ययस्था विलोमेन तिष्ठंति तद्यथा तत्रादौ पंच शुक्रस्य ततः परं सप्त बुधस्य एवं द्वादश ततः अष्टौ परं जीवस्य एवं विंशतिः ततः
परं पंच शनेः एवं पंचविंशतिः ततः परं पंच भौमस्य एवं त्रिंशत् तत्र वृषकर्कटकन्यावृश्चिकमकरमीनाः समराशयः एवं त्रिंशद्भागाधिपतयः पंचताश राम
ग्रहाः अत्र केचिदाहुः यथा विपर्य्ययस्थाः स्यने नानंतराणां एव पवनादिसंख्यानां भागानां विपर्य्ययेण भवितव्यं न त्वग्रहितानां कुजादीनां तच्चायुक्तं तस्मा ५
तुशब्दोत्र पठ्यते स च कुजादिसमुच्चयार्थः तथा च श्रुतकीर्तिः पंचायपंचचाष्टौ सप्त च पंचैव चौजभवनेषु धरणिसुतमंदसुरगुरुबुधशुक्राणां क्रमेण
शाः पंचैव सप्त चाष्टौ पंच पंचाथ युग्मभवनेषु भागाः भार्गवशशिसुतसुरेज्यशनिभूमिपुत्राणामिति प्रयोजनं कन्यैव दुष्टा व्रजतीह दास्यं साध्वी समा याकु
च रविनयुक्ता भूम्यात्मजर्क्षे क्रमशोंशकेषु वक्रार्किजीवेन्दुजभार्गवानामित्यादि शशिभवनालिझषांतमृक्षसंधिः अंतशब्दः प्रत्येकमभिसंबध्यते॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शशिभवनांतमत्स्यांतऊषांतंचऋक्षसंधिः शशिभवनंकर्कटः अलिर्वृश्चिकः झषोमीनः एतेषामंतंनवमनवांशकं यत्रनक्षत्रराश्योर्युगपदपर्यवसानंतं दृक्षसंधिः यस्मादश्लेषांतंकर्कटांतं ज्येष्ठांतंचवृश्चिकांतं रेवत्यंतंमीनांतमिति एतदेवलोकेगंडांतमितिप्रसिद्धं उक्तंच अश्विनीपित्र्यमूलाद्यामेषसिंह हयादयः विषमर्क्षान्निवर्तंते पादवृद्ध्यायथोत्तरमितिप्रयोजनं सधोपापैः शशिनिचजडःस्यात्तत्रचेत्सौम्यदृष्टइति अधुनाव्यवहारार्थंमेषादीनांसंज्ञा यथार्थयाह ७ इत्थमेवंप्रकारेणनामानोमेषाद्याराशयोज्ञेयाः तद्यथा क्रियोमेषः तावुरिर्वृषः जितुमोमिथुनः कुलीरोकर्कटः लेयःसिंहः पाथोनः कन्याजूकस्तुला कौर्प्योख्योवृश्चिकः तौक्षिकोधन्वी आकोकेरोमकरः हृद्रोगकुंभः अंत्यभंमीनइतिप्रयोजनं गोसिंहौजितुमाष्टमौकियतुलेइ त्यादि अधुनाग्रहस्यक्षेत्रहोराद्रेष्काणनवांशद्वादशभागत्रिंशद्भागानांवर्गसंज्ञानांव्यवहारार्थमिंद्रवज्रयाह ८ द्रेष्काणेति द्रेष्का णादयःषट्पदार्थाः

अयुजिषुजितुभेविपर्य्ययस्थाः शशिभवनालिझषांतमृक्षसंधिः ७ क्रियताबुरिजितुमकुलीरलेयपाथो

नजूककौर्प्याख्याः तौक्षिकआकोकेरोहृद्रोगश्चान्त्यभंचेत्थम् ८ द्रेष्काणहोरानवभागसंज्ञास्त्रिंशांशकद्वादश

स्वकीयग्रहस्यवर्गसंज्ञातत्रद्रेष्काणोराशित्रिभागाः होराराश्यर्द्धं नवभागोनवांशकः त्रिंशांशकस्त्रिंशद्भागः द्वादशांशो संज्ञिताश्च॥ ॥

द्वादशभागः क्षेत्रंराशिः एतत्संज्ञिताश्च एषांसंज्ञाख्यायेषांतेतथा यद्यस्यग्रहस्यक्षेत्रंराशिः सतस्यवर्गः वर्गशब्देनात्रषड्वर्गः तेसर्वएवग्रहस्यात्मीयवर्ग संज्ञा एवंषड्विकल्पोराशिः षड्चात्मीयेषुस्थितोवर्गस्थग्रहोवर्गस्थितोभवति ननुग्रहस्यषड्विकल्पानसंभवंति यतश्चंद्रार्कयोस्त्रिंशांशकाभावाः भौमादी नांहोराभावः तस्मात्पंचसंभवंति तेनपंचस्वात्मीयेषुस्थितोवर्गस्थः एतदप्युपलक्षणं अतोयथासंभवंत्यादिविकल्पस्योग्रहोवर्गस्थउच्यते यस्माद्ग्रहवर्गाणि क्षेत्रहोराद्रेष्काणनवांशद्वादशांशकः त्रिंशांशकश्चवर्गोयंसर्वस्यसउदाहृतः आद्येष्वपिपदार्थेषुस्थितःस्वेषुस्ववर्गगः परवर्गगतोप्येवंग्रहोभवतिचान्यथा इति प्रयोजनं एकोपिवक्रोपगतोनराणांशुभाशुभौवापिचतुष्टयस्थः वर्गोपितस्योदयगोविनाशंबहुप्रकारंकुरुतेध्वगानामित्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰ जा॰ टी॰ भ॰ ६

होरालग्नयोः संज्ञार्थमाह होरेतिलग्नं भवनस्य चार्द्धं इति होराइतिलग्नमुच्यते प्रयोजनं होरास्वामिगुरुज्ञवीक्षितयुतेति भवनस्य चार्द्धं होरा प्रयोजनं॥
मार्त्तंडेंद्वोरयुजिसमभे चंद्रभान्वोश्चहोराइति अधुनाराशीनां रात्रिदिनसंज्ञित्वं पृष्ठोदयशीर्षोदयत्वं च वसंततिलकेनाह ९ गोजाश्वेति गोजाश्विककर्किमिथु
नाइति गोशब्देनवृषउच्यते अजेमेषः अश्वोस्यास्तीत्यश्वी धन्वी कर्की कुलीरः मिथुनोप्रसिद्धः एतेगोजाश्विककर्किमिथुनाः समृगाः मृगेणमकरेणसहि
ताः षड्राशयोनिशाख्याः रात्रिबलसंज्ञाइति पृष्ठोदयाविमिथुनास्त एवरात्रिसंज्ञाविमिथुना मिथुनवर्जिताः पृष्ठोदयसंज्ञाभवंति पृष्ठेनउदयंयांतीत्य
र्थः मिथुनः पुनः शीर्षोदयः शीर्षोदयाइति उक्तेभ्यः शेषाः सिंहकन्यातुलावृश्चिककुंभाः शीर्षोदयाः शिरसाउदयंयांति दिनबलाश्चभवंति अथरात्रिदि
नवलाख्याइतिसंज्ञामात्रं यत्तेषामुत्तरोत्तरेबलंवक्ष्यति द्वित्रियदादयोह्निनिशिचप्राप्तेचसंध्याद्वयेइति एवंसत्याचार्य्यस्यवचनविरोधः स्यात् तस्मात्संज्ञामा

क्षेत्रं चयः ... होरेति लग्नं भवनस्य चार्द्धं ९ गोजाश्विककर्किमिथुनाः समृगा निशाख्याः पृष्ठोदया विमिथु
नाः कथितास्त एव शीर्षोदया दिनबलाश्च भवंति शेषाः लग्नसमे त्वुभयतः पृथुरोमयुग्मम् १० क्रूरः सौम्यः पुरुषवनिते ते चराग
द्विदेहाः प्रागादीशाः क्रियवृषनृयुक्कर्कटाः सत्रिकोणाः॥ ११ त्रंबलग्रहणंप्रयोजनं रात्रिद्युसंज्ञेषुविलोमजन्मइत्यादि तथापृष्ठोदयकोदयर्क्षे
गाइति याचार्यांचवक्ष्यति शीर्षोदयेसमभिवांछितकार्य्यसिद्धिं पृष्ठोदयेविफलतावलबुद्धिनाशः शस्तंदिवादिनबलेनिशिनक्तवीर्य्यराशौविपर्य्ययबलेग रा॰ ६
मनंनशस्तं अन्यल्लग्नेभ्योमीनस्यविशेषमाह लग्नंसमेत्वुभयतः पृथुरोमयुग्ममिति पृथुरोमामत्स्यः तद्युग्मंमत्स्यद्वयंमीनोराशिः सउभयतः पृष्ठशीर्षो
भ्यांलग्नमासक्तं समेत्युदेतीति अधुनाराशीनां क्रूरसौम्यविभागं स्त्रीपुरुषविभागं चरस्थिरद्विस्वभावविभागं दिगधिपत्वं होराद्रेष्काणपतीनां विभागं च
मंदाक्रांतयाह १० क्रूरः सौम्याइति तेमेषादयोराशयोयथाक्रमंक्रूरसौम्यसंज्ञाः तत्रमेषः क्रूरः वृषः सौम्यः मिथुनः क्रूरः कर्कटः सौम्यः एवंसर्वेषां
योज्यं युक्तकरणीयमित्यर्थः तेनविषमराशयः क्रूरसंज्ञाः समराशयः सौम्यसंज्ञा प्रयोजनं क्रूरेषुजाताः क्रूरस्वभावः सौम्येषुजाताः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौम्यस्वभावाभवंति तथाचसत्याचार्य्यः ओजाः पुरुषाज्ञेयाः सौम्याः स्त्रीसंज्ञकाः क्रमात् ओजेषूग्राःपुरुषाः सौम्याःयुग्मेषुभवनेषु पुरुषवनितेइति त
एवमेषादयोयथाक्रमं पुरुषवनिताख्याज्ञेयाः तेनमेषः पुरुषोनरो वृषोवनितास्त्री एवंसर्वत्र तेनषड्विषमराशयःपुरुषसंज्ञाः षट्समराशयःस्त्रीसंज्ञाः
प्रयोजनं पुरुषराशिषुजातास्तेजस्विनः स्त्रीराशिषुजातामृदवोभवंति तेचरागंद्विदेहाइति तएवमेषादयोयथासंख्यंचरागद्विदेहाख्याभवंति तत्रमेष
श्चरः वृषोऽगः स्थिरः मिथुनोद्विदेहाद्विस्वभावः एवंकर्कटादिषुयोज्यं तेनमेषकर्कटतुलामकराश्चराः वृषसिंहवृश्चिककुंभाःस्थिराः मिथुनकंन्याधनु
मीनाद्विस्वभावाः प्रयोजनं चरराशिषुजाताश्चरस्वभावाभवंति स्थिरेषुस्थिराः द्विस्वभावेषुमिश्रस्वभावाभवंति तथोचसत्यः चरसंज्ञाः स्थिरसंज्ञाद्विप्रकृति
श्चेतिराशयः क्रमशः राशिस्वभावतुल्याजायंतेप्रकृतयः प्रस्तुतानां प्रागादीशाइति क्रियोमेषः वृषःप्रसिद्धः नृयुग्मिथुनःकुलीरः कर्कटः एतेक्रियवृ
षनृयुक्कर्कटाः सत्रिकोणाभ्यांस्वयंपंचमनवमाभ्यांसहिताः प्रागादिषुपूर्वाद्यासुचतसृषुदिशासुईशाःस्वामिनः तेनमेषसिंहधन्विनःपूर्वस्यां वृषकन्याम
करदक्षिणस्यां मिथुनतुलाकुंभाःपश्चिमायां कर्कटवृश्चिकमीनामुत्तरस्यामिति प्रयोजनं हृतनष्टादौ चौरादेर्द्रव्यस्यदिग्विज्ञानं सूतिकागृहद्वारज्ञानं
च तथाच यातव्यदिग्मुखगतस्यसुखेनसिद्धिर्व्यर्थश्रमोभवतिदिक्प्रतिविलोमलग्नमिति मार्त्तंडेंदोरितिमार्तंडः सूर्य्यः इंदुश्चंद्रः अयुज्योजराशौयथा
क्रमं मार्त्तंडेंद्वोर्होरेभवतः प्रथमहोरासूर्य्यस्य द्वितीयहोराचंद्रस्य होराशब्देनात्रराश्यर्द्धमुच्यते समभेचंद्रभान्वोश्चेतिसमभेसमराशौचंद्रभान्वोः होरेभ
वतः प्रथमहोराचंद्रस्यशशिनःद्वितीयभान्वोःसूर्य्यस्य प्रयोजनंसूर्य्यहोरायांजातास्तेजस्विनः चंद्रहोरायांमृदुस्वभावाभवंति द्रेष्काणाः स्युरिति द्रेष्का
णोराशित्रिभागः स्वभवनसुतत्रित्रिकोणाधिपानांसंबंधिनोद्रेष्काणाभवंति प्रथमोद्रेष्काणः स्वभवनाधिपतेः आत्मीयभवनाधिपतेः द्वितीयः सुतभव
नस्यपंचमस्थानाधिपतेः त्रितीयस्त्रिकोणाधिपतेर्नवमस्थानाधिपतेः तेनमेषस्यप्रथमद्रेष्काणोभौमस्य द्वितीयोर्कस्य तृतीयोगुरुः वृषस्यप्रथ
मोशुक्रस्यद्वितीयोबुधस्यतृतीयः शनेः मिथुनस्यप्रथमोबुधस्यद्वितीयः शुक्रस्यतृतीयःशनेः कर्कटस्यप्रथमश्चंद्रस्यद्वितीयोभौमस्यतृतीयोजीवस्य
सिंहस्यप्रथमोसूर्य्यस्यद्वितीयोजीवस्यतृतीयोभौमस्य कंन्यायाः प्रथमोबुधस्यद्वितीयःशनेः तृतीयःशुक्रस्य तुलस्यप्रथमःशुक्रस्यद्वितीयः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ. शौरस्यतृतीयोवुधस्य वृश्चिकस्यप्रथमोभौमस्यद्वितीयोजीवस्यतृतीयश्चंद्रस्य धन्विनः प्रथमोजीवस्यद्वितीयोभौमस्यतृतीयोरवेः मकरस्यप्रथमो शनिः
टी. भ. द्वितीयोशुक्रस्यतृतीयोवुधस्य कुंभस्यप्रथमःसौरस्यद्वितीयोवुधस्यतृतीयःशुक्रस्य मीनस्यप्रथमोजीवस्यद्वितीयश्चंद्रस्यतृतीयोभौमस्येति प्रयोजनं द्वि
८ रुत्तमास्वांशाकभंत्रिभागगैरित्यादि अधुनामतांतरेणहोराद्रेष्काणपतीनांलक्षणमिंद्रवज्रयाह ११ केचिदिति केचिद्यवनेश्वरादयः प्रथमांहोरांभपस्य
धिपतेर्वांछंति द्वितीयांलाभाधिपतेरेकादशस्थानाधिपस्य यथामेषस्यप्रथमहोराभौमस्यद्वितीयांसौरस्य एवंसर्वेषामपियोज्यं द्रेष्काणसंज्ञामपीति
स्वद्वादशैकादशराशिपानामपि एकेद्रेष्काणसंज्ञांवांछंतिकथयंति प्रथमंस्वाधिपतेरात्मीयस्वामिनः द्वितीयद्वादशाधिपतेः तृतीयमेकादशराश्यधिप
तेः यथामेषस्यप्रथमोद्रेष्काणोभौमस्यद्वितीयोजीवस्यतृतीयःसौरस्य एवमन्येषामपिज्ञातव्यं तथाचयवनेश्वरः आद्यांहोरांभवनस्यपत्युरेकादशक्षेत्र

मार्त्तंडेंद्वोरयुजिसमभेचंद्रभान्वोश्चहोराद्रेष्काणाःस्युःस्वभवनसुतत्रित्रिकोणाधिपानां ९ केचित्तुहोराःप्रथमांभपस्यवांछंतिलाभाधि
पतेर्द्वितीयां द्रेष्काणसंज्ञामपिवर्णयंतिस्वद्वादशैकादशराशिपानां ११ अजवृषभमृगांगनाकुलीराझषवणिजौचदिवाकरादितुंगाः

पतेर्द्वितीयां स्वद्वादशैकादशराशिपानांद्रेष्काणसंज्ञाःक्रमशस्त्रयोक्ता एवंयवनेश्वरमतेनसर्वग्रहाणांहोराद्रेष्काणाधिपत्वमस्ति एतदाचार्य्यस्यनाभिप्रे
तं सत्यादिनामपि तथाचसत्यः ओजेषुरवेर्होराप्रथमयुग्मेषुचोत्तराःशेषाःइंदोःक्रमशोज्ञेयाः जन्मानिचेष्टोस्वहोरास्थो राशिस्त्रिद्रेष्काणस्तत्रपंचमनव ८म
म१।५।९ भवनपतयःस्युः तेषामधिपतयःस्युःस्वद्रेष्काणेग्रहाबलिनोइति अथग्रहाणामुच्चनीचविभागंपुष्पिताग्रयाह ११ अजादयेति अजादयो ८
राशयोयथाक्रमेणदिवाकरादीनांग्रहाणांतुंगाःउच्चसंज्ञाः तद्यथा अजोमेषः सादित्यस्योच्चः वृषभोवृषःसचंद्रस्य मृगोमकरःसभौमस्य अंगनाकंन्या
वुधस्यकुलीरः कर्कटःजीवस्य झषोमीनःशुक्रस्य वणिक्तुलाधरःसौरस्य एतएवराशयोदशादिषुभागेषुसूर्य्यादीनांपरमोच्चसंज्ञाभवंति तत्रआदि
त्यस्यमेषोदशमेभागेपरमोच्चः चंद्रस्यवृषः शिखिसंख्येतृतीयेभागे भौमस्यमकरोमनुयुक्तसंख्येऽष्टाविंशेभागेपरमउच्चः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनवश्चतुर्दशतेषांयुगं द्विगुणामनवद्दत्यर्थः बुधस्यकन्यायास्तिथिसंख्येपंचदशेभागे कर्कटइंद्रियसंख्येपंचमेभागेजीवस्य शुक्रस्यमीनः त्रिनवसंख्येसप्तविंशेसौरस्यतुलोविंशे ननुसर्वएवराशिउच्चसंज्ञाः सचत्रिंशदंशकः तन्नदशादीनांतदंतर्भूतानांसिद्धएवोच्चसंज्ञः तत्किंदशाद्युपादानंसत्यं किंतुपरमोच्चज्ञार्थंदशादीनांग्रहणं अथवासर्वएवराशिउच्चसंज्ञः तेनोक्तराशिदशाद्यंशसंख्याः कथिताग्रहाः परमोच्चस्थाइत्युच्यते परमोच्चज्ञानेनस्वोच्चव्यतिरिक्तं प्रयोजनंअस्तितथाचभगवान्गार्गिः स्वच्चगोरविशीनाश्रूजनयेतांनराधिपः उच्चस्थोधनिनंख्यातंस्वत्रिकोणगतावपि तथाचयवनेश्वरः स्वोच्चेषुसर्वान्यरिगृह्य भागंतिष्ठत्सुसर्वेषुबलाधिकेषु लग्नेशुभेपूर्णवपुश्चमतीदौत्रैलोक्यराज्याधिपतिः प्रसूतः अथेदृशाः एवंविधाः सूर्य्यादयः परमोच्चस्थिताः द्रष्टव्याः अत्रवृत्तभंगभयात्पूरणप्रत्ययांतादशादयोचार्य्येणोक्ताः पूरणप्रत्ययांतत्वमेषांयवनेश्वरवाक्यात्प्रायते तथाचयवनेश्वरः सूर्यस्यभागेदशमेतृतीयेचंद्रस्यजीवस्यतुपंचमेंशे सौरस्यविंशेन्वधिसप्तकेतुविंघाद्भृगोः पंचदशेबुधस्यभौमस्यविंशेऽष्टयुतेतुस्वोच्चंत्रिंशल्लदेस्वोच्चगृहेनिवेशं तत्सनीचाइति ते आ

दशाशिखिमनुयुक्तिथीद्रियांशैस्त्रिनवकविंशतिभिश्चतेस्तनीचाः १२ वर्गोत्तमाश्चरगृहादिषुपूर्वमध्यपर्य्यंतगाःशुभफलानवभागसंज्ञाः

दित्यादयःग्रहाः अस्तनीचाः अस्तेनीचंयेषांतेअस्तः सप्तमःप्रकृतित्वात् स्वोच्चात्सप्तमःप्रत्येकस्यनीचसंज्ञाः तद्यथा आदित्यस्वोच्चान्मेषात्सप्तमस्तुलासनीचसंज्ञः चंद्रस्यसप्तमोवृश्चिकः भौमस्यसप्तमोकर्कटः बुधस्यमीनः गुरोर्मकरः शुक्रस्यकन्या सौरस्यमेषः इति अत्रापिदशादिषुभागेषु परमनीचस्थाद्रष्टव्याः तथाचयवनेश्वरः स्वोच्चात्तुयाभित्रमुपैतिनीचंत्रिंशल्लवोयच्चसमानसंख्या अथेदशांन्यासाः एवंविधारव्यादयः परमनीचस्थाभवंतिपरमनीचस्थानामनिष्टफलंभवतीतिगार्गिणाप्रदर्शितं तथाचगार्गिः अधंदिगंबरंमूर्खंपरपिंडोपजीविनं कुरुतामतिनीचस्थौपुरुषंशशिभास्करौइति ॥१॥ अधुनाग्रहाणांवर्गोत्तममूलत्रिकोणपरिज्ञानंवसंततिलकेनाह १२ वर्गोत्तमेति चरगृहादिषुचरस्थिरद्विस्वभावेषुराशिषुयथासंख्यपूर्वमध्यपर्य्यंतगः आदिमध्यावसानतःपूर्वमध्यपर्य्यंतगावापाठः येनवभागास्तेवर्गोत्तमसंज्ञाभवंति वर्गोशकसमूहेतुउत्तमाः प्रधानावर्गोत्तमाः तद्यथा ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ· चरेषुमेषकर्कतुलामकरेषु प्रथमोनवांशोवर्गोत्तमाख्योभवंति स्थिरेषुवृषसिंहवृश्चिककुंभेषुमध्यमःपंचमोनवांशकोवर्गोत्तमः द्विस्वभावेषुमिथुनकंन्या
टी·भ· धन्विमीनेषुपर्य्यंतगः नवमोनवांशकोवर्गोत्तमः एतदुक्तंभवतिप्रत्येकस्मिन्राशौस्वयंनवमांशकोवर्गोत्तमाख्यइति शुभफलानिनवभागसंज्ञाइति तेच
८ वर्गोत्तमाख्यानवभागसंज्ञाः जन्मनिशुभफलदाः शुभफलंददाति वक्ष्यतिच शुभंवर्गोत्तमेजन्मइति तथाचसत्यः चरभवनेष्वाद्यंशाः स्थिरेषुमध्याःद्वि
मूर्तिषुतथांत्याः वर्गोत्तमाः प्रदिष्टास्तेष्विहजाताकुलेमुख्यमांशकोवर्गोत्तमाख्यमिति तथाचयवनेश्वरः स्वेस्वेगृहेषुसप्तहांशकाग्र्ववर्गोत्तमास्तेयवनैर्निरु
क्ताइतिप्रयोजनं स्वंतुंगवक्रोपगतेस्त्रिसंगुणंद्विरुत्तमेस्वांशकमन्त्रिभागगैरिति सिंहोवृषइत्यादिसिंहादयोराशयः यथापाठक्रमेणसूर्य्यादीनांग्रहाणां
त्रिकोणभवनानिमूलत्रिकोणभवनानिभवंति तद्यथा सिंहः सूर्य्यस्यादित्यस्यमूलत्रिकोणसंज्ञाः वृषश्चंद्रस्यप्रथमोमेषोंगारकस्यषष्ठःकंन्याबुधः
स्य हयांगोधन्वीबृहस्पतेः तौलीतुलाशुक्रस्य कुंभेसौरस्येति प्रयोजनंउच्चस्वत्रिकोणगैर्बलस्थैस्त्ववधेर्भूपतिवंशजानरेंद्राइत्यादि अधुनालग्नादी

सिंहोवृषःप्रथमषष्ठहयांगतौलिकुंभास्त्रिकोणभवनानिभवंतिसूर्य्यात् १३ होरादयस्तनुकुटुंबसहोत्थबंधुपुत्रारिपत्निमरणानि
नांद्वदशानांस्थानानांतन्वाद्याद्वादशसंज्ञास्त्रितीयषष्ठदशमैकादशानांचोपचयसंज्ञावसंततिलकेनाह १३ होरादयइति ॥शुभास्पदायाः॥ ॥
॥होरादयोलग्नादयः तेषांयथाक्रमेणतन्वादीनांनामानिभवंतीत्यर्थः तत्रलग्नस्यतनुरित्याख्या द्वितीयस्यकुटंबइत्याख्या तृतीयस्यसहोत्थःसहो
त्थोभ्राता चतुर्थस्यबंधुःबंधुशब्दोज्ञातिवाची पंचमस्यपुत्राख्यः अरिः शत्रुस्तदाख्यःषष्ठः पत्न्याख्यःसप्तमः मरणाख्योऽष्टमः शुभाख्योनवमःआ
स्पदाख्योदशमः आयाख्यएकादशः रिःफाख्योद्वादशः इतिशब्दः प्रकारार्थोद्योतकः तेनहोरादीनांतन्वादिपर्य्यायाअपिसंज्ञाभूताइत्येवगंतव्यं उ राम
पचयान्यरिकर्म्मलाभदुश्चिक्यसंज्ञितहाणीति अरिःषष्ठंकर्म्मदशमं लाभएकादशम् दुश्चिक्यसंज्ञंतृतीयं एतानिगृहाणिस्थानान्युपचयसंज्ञानीति ८
ननित्यमेकेइति एकेकेचिन्ननित्यमुपचयानीतिवर्णयंतिकथयंति तेषामयमभिप्रायः यदिपापग्रहेणस्वस्वामिशत्रुणावादृष्टायुक्ताभवंति तदानोपच
यास्तेचगर्गादयस्तद्वाक्यं अथोपचयसंज्ञास्यास्त्रिलाभरिपुकर्म्मणां ततश्चेद्भवंतिदृष्टास्तेपापस्वस्वामिशत्रुभिः एतदाचार्य्यस्यवराहमिहिरस्यनाभिप्रेतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतोसौसवदेवोपचयाख्यैलैर्व्यवहारेति सत्याद्येप्येवं तथाचसत्यः दशमैकादशषष्ठतृतीयसंज्ञानिजन्मलग्नाभ्यांउपचयभवनानिस्युः एषाऋक्षाण्युपचयानि
यवनेश्वरश्च षष्ठतृतीयंदशमंचराशिमेकादशंचोपचयर्क्षमाहुः होराग्रहस्थानवशात्कतेभ्यः शेषाणिचेभ्योपचयात्मकानि प्रयोजनं उपचयगृहमित्रेस्वोच्चगेः
पुष्टमिष्टंत्वपचयगृहंनीचारीतिगैर्नेष्टंसपदादित्यादि पुनरपिहोरादीनांसंज्ञांतराणिवसंततिलकेनाह १४ एतानिअपिलग्नादीनांद्वादशानांयथाक्रमंक
ल्याद्याः संज्ञाभवंति तद्यथा लग्नस्यकल्यःकल्यशब्दः शक्तिवाची द्वितीयः स्वं तृतीयंविक्रमं चतुर्थंगृहं पंचमेप्रतिभा षष्ठंक्षतः सप्तमंचित्तोत्थः अष्टमंरंध्रः
नवमंगुरुः दशमंमानं एकादशंभवं द्वादशंव्ययं लग्नाच्चतुर्थेनिधनेइति लग्नाच्चतुर्थस्थानंनिधनमष्टमंचतेचतुरस्रसंज्ञेचतुरस्राख्ये लग्नात्सप्तमगृहंद्यूनंदश
मर्क्षंदशराशिमाज्ञाख्यएताः संज्ञाव्यवहारार्थंज्ञेयाः अथकेन्द्राणांसंज्ञातस्याराशिबलंचत्रोटकेनाह १५ कंटकेति सप्तमलग्नचतुर्थानिप्रसिद्धानिखमंदशमं

रिफाख्यमित्युपचयान्यरिकर्मलाभदुश्चिक्यसंज्ञितगृहाणिननित्यमेके १४ कलास्वविक्रमगृहप्रतिभाक्षतानिचित्तोत्थरंध्रगुरुमानभव
व्ययानि लग्नाच्चतुर्थनिधनेच्चतुरस्रसंज्ञेद्यूनंचसप्तमगृहंदशमर्क्षमाज्ञा १५ कंटककेंद्रचतुष्टयसंज्ञाः सप्तमलग्नचतुर्थखभानां तेषुयथा
भिहितेषुबलाढ्याः कीटनराम्बुचराः पशवश्च १६॥ खमाकाशमध्येतत्कालसंयद्राशिवर्तनेनतस्यखभेतिसंज्ञा एतेषांसप्तमम् लग्नचतुर्थखभानांराशी
नांप्रत्येकस्यकंटककेन्द्रचतुष्टयइतितिस्रःसंज्ञाः तेषुस्थानेषुयथाभिहितेषुयथोक्तेषुकीटनराम्बुचराः पशवश्चराशयोबलाढ्याबलिनोभवंति तद्यथा कीटको
वृश्चिकः सप्तमेस्थानेबली नरःनृराशयः मिथुनतुलाकन्याकुंभधन्विपूर्वार्द्धानराः एतेलग्नेस्थिताबलिनः अंबुचराः जलचरराशयः कर्कटमीनमकरपरार्द्धास्तेच
तुर्थस्थानेबलिनः पशवश्चतुष्पदाः मेषवृषसिंहधन्विपरार्द्धमकरपूर्वार्द्धाः एतेदशमस्थाबलिनोभवंतिइत्यर्थः तथाचभगवान्गार्गिः नृयुक्तुलोधरः कन्या
पूर्वार्द्धलग्नस्याबलिनोज्ञेयाएतेहिनराशयः चतुर्थेकर्कटोमीनोमकरार्द्धंचधन्विनः पश्चिमंविज्ञेया बलिनोनित्यमेनेहिजलराशयः सप्तमेवृश्चिकः कीटोबल
वान्परिकीर्तितः धन्व्यंताद्धोजगोसिंहाबलिनः खेचतुष्पदाः अत्रार्द्धशब्देनमकरपूर्वार्द्धागृहीतइति अधुनापरिशिष्टस्थानानांसंज्ञांतराणिवसंततिलकेनाह १६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र॰ दी॰ भ॰ ८५

केन्द्रादिति सर्वस्मात्केन्द्राद्द्वितीयस्थानं सर्वं पणफरं तेन द्वितीयपंचमाष्टमैकादशस्थानानां पणफरसंज्ञा यतश्च सर्वमापोक्लिमं सर्वस्मात्पणफरात्परं सर्वस्था
नमापोक्लिमं तेन तृतीयषष्ठनवमद्वादशस्थानानां आपोक्लिमेति संज्ञा॥ ॥हिबुकमंबुसुखं च वेश्म वेश्मशब्दो गृहपर्यायः वेश्मेति चतुर्थस्य प्राक्संज्ञाभिहिता
तस्यैव हिबुकसंज्ञा अंबुसंज्ञा सुखसंज्ञा च यामित्रमस्तभवनं अस्तभवनं सप्तमस्थानं यतः सर्व एव ग्रहा उदयराशेः सप्तमराशावस्तं यांति तदेवास्तभवनं या
मित्रं सुतभं त्रिकोणं सुतभं पंचमस्थानं त्रिकोणसंज्ञं मेषूरणं दशमं दशमस्थानं मेषूरणसंज्ञं च अत्रास्मिन्स्थाने कर्मेत्यपरा संज्ञा विंद्यात् जानीयात् अ
थ होरादीनां बलं व्यवहारार्थं च प्रमाणं शार्दूलविक्रीडितेनाह १७ होरेति होरालग्नं स्वामिना तत्पतिना वीक्षिता दृष्टा वा वीर्योत्कटा बलवती भवति तै
नैव युता संयुता बलवती भवति स होरास्वामिना राश्याधिपेन गुरुणा जीवेन ज्ञेन बुधेन वीक्षिता च दृष्टा युता च वीर्योत्कटा बलवती भवति यदि नान्यैरन्यैः खेचरैर्यु

केन्द्रात्परं पणफरं परतस्तु सर्वमापोक्लिमं हिबुकमंबुसुखं च वेश्म। यामित्रमस्तभवनं सुतभं त्रिकोणं मेषूरणं दशममत्र च कर्म विंद्या
त्॥ १७ होरास्वामिगुरुज्ञवीक्षितयुता नान्यैश्च वीर्योत्कटा केन्द्रस्था द्विपदादयोऽह्नि निशि च प्राप्ते च संध्याद्वये॥ १ ॥

क्ता दृष्टा वा नान्यैश्चेति नान्यैर्ग्रहैः स्वामिगुरुज्ञवर्जितैः शेषैर्यदि युता दृष्टा न भवति तदा वीर्योत्कटा अथवा यद्युक्तानुक्तैर्मिश्रैर्युता दृष्टा भवति तदा म
ध्यबला अर्थादेव स्वागुरुज्ञवर्जितमन्यैर्युतदृष्टा बलहीना भवति तथा च बादरायणः जीवस्वनाथशशिजैर्युतदृष्टा बलवती भवति शेषैर्बलहीना स्यादेवं मि रम॰
श्रैस्तु मध्या बली बलहीना यदि सर्वैर्न वीक्षिता नैव युक्ता वा केन्द्रा इति वीर्योत्कटा इत्यनुवर्तते अत्रादिशब्दो लुप्तो द्रष्टव्यः केन्द्रस्थाः सर्व एव राशयो बलि ८५
नो भवंति पणफरस्था मध्यबलाः आपोक्लिमस्था हीनबलाः अन्ये केचित्तु केन्द्रपणफरापोक्लिमानां द्विपदचतुष्पदकीटानां यथाक्रमं बलवत्त्वं व्याचक्ष
ते तदयुक्तं यस्माद्बादरायणः केन्द्रस्थातिबलाः स्युर्मध्यबलाः पणफराश्रिता ज्ञेयाः आपोक्लिमस्थाः सर्वे हीनबला राशयः कथिताः द्विपदादयोऽह्नि निशि
च प्राप्ते च संध्याद्वयेति वीर्योत्कटा इत्यनुवर्तते द्विपदादयो द्विपदचतुष्पदकीटाः यथाक्रममह्नि निशि प्राप्ते च संध्याद्वये वीर्योत्कटा भवंति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्हि दिने द्विपदा बलिनः निशि रात्रौ चतुष्पदाः संध्याद्वये कीटाः अत्र न केवलं वृश्चिको कीटः यावदाप्याः कीटग्रहणेनैव ज्ञेयः अत्र च श्रीदेवकीर्त्तिः
मिथुनतुलाकुंभकन्यादिवाबलाधन्विनश्च पूर्वार्द्धे अजवृषसिंहा रात्रौ मृगहययोः पूर्वपश्चार्द्धे वृश्चिकमीनकुलीरमकरांत्यार्द्धे च संध्यायामिति पूर्वा
र्द्धे विषयादयः कृतगुणा इति विषयाणि इंद्रियाणि तानि पंच तदादयः पंचषट्सप्ताष्टनवदश यावत् एते एव सर्वे एव कृतगुणाश्चतुर्गुणिताः पूर्वार्द्धमानं
कस्य प्रकृतत्वाद्भचक्रस्य पूर्वार्द्धे मेषादीनां षण्णां मानं प्रमाणं तदेव प्रतीपं विपर्य्ययात्तुलादिषु षट्सु प्रमाणं तद्यथा विषयादयः ५।६।७।८।९।१० एते च
तुर्गुणाः जाताः २०।२४।२८।३२।३६।४० एते क्रमेण षण्णां मानं मेषादीनां व्यत्ययाच्च तुलादीनां मानमिति तथा च सत्यः चतुरोत्तरोत्तराः स्युर्विंशति भागा भ
वंति मेषाद्येषु भषट्के षुक्रमानमानमिहार्द्धे पूर्वे षु भषट्के षु मीनाद्येष्वश्चाचोत्क्रमाद्द्धे भागा व्यवहाराश्च क्षेत्रे भागेनैकेन काले दशघ्नाश्च षट्का भवंति यस्मा
द्याः कलाः क्षेत्रे लिप्ताः स काले प्राणा इति यस्माद्भट्टब्रह्मगुप्तेनोक्तं लंकाग. पश्चिमगप्राणेन कलां गमंडलं भ्रमनीति एवमेते भागा दशगुणिताश्च षट्का
भवंति तत्रैतज्जातं काले घटिकास्ताः षष्ठ्याधिकेन शतत्रयेण गुणिताः प्राणा भवंति क्षेत्रे च तावंत्य एव लिप्तास्तासां षष्ठ्या भागमपहृत्य षड्भागाः क्षेत्रे
भवंति एवं मेषादीनां प्रमाण भागा दशगुणिताश्च षट्का भवंति तेन च षट्कशतद्वयं मेषमीनयोः प्रमाणं एवं चत्वारिंशदधिकं शतद्वयं वृषकुंभयोः शत
द्वयमशीत्यधिकं मिथुनमकरयोः शतत्रयं विंशत्यधिकं कर्कटधनुषोः शतत्रयं षष्ठ्याधिकं सिंहवृश्चिकयोः शतचतुष्टयं कन्यातुलयोः एतदेव षट्काद
शविभक्ता भागत्वेन परिकल्पिताः यतः क्षेत्रे दशभिश्च षट्कैर्भागो भवति ननु च राहलवशान्मतिदेशमन्यरूपेषु राश्युदयेषु गणितस्कंधसिद्धेषु किमर्थं
मेकरूपं तदुदयप्रमाणं दर्शितमाचार्य्येण अत्रोच्यते नष्टचिंतादिषु ध्वपरिज्ञानाय पुरुषाणामवयवानां चिन्हे ह्रस्वदीर्घत्वज्ञानायोपयुज्यते तथा च य
वनेश्वरः आद्यं तु राशेरुदयप्रमाणं द्वौ द्वौ मुहूर्तौ निपतं प्रदिष्टौ क्रमोत्क्रमाभ्यामपि पंचमस्याश्चक्रार्द्धयोर्विद्धयुदयप्रमाणं एवं प्रमाणानि गृहाणि बुध्वा
ह्रस्वानि मध्यानि तथायतानि चक्रांगभेदैः सदृशीकृतानि मार्गप्रमाणानि विकल्पयंति अंगभागकल्पना वक्ष्यंति कादिविलग्नविभक्तभगात्र इति यत्र
यस्मिन्नंगे दीर्घराशिर्भवति दीर्घाधिपो वा ग्रहलदंगमतीव दीर्घं भवति एवं मध्यमयोर्मध्यमं ह्रस्वयोर्ह्रस्वमिति तथा च सारावल्यां ह्रस्वास्तिमिगोजघटाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ॰ मिथुनधनुः कर्किमृगमुखास्तुसमाः वृश्चिककन्यामृगपतिवणिजोदीर्घासमाख्याताः एभिर्लग्नादिगतैः शीर्षप्रभृतानिसर्वेजंतूनां सदृशानिचजायंते गगनचरैश्चैव
टी॰ भ॰ तुल्यानि तथाचसत्यः दीर्घाधिपतिर्दीर्घगृहेस्थितोऽवयवदीर्घकृद्भवति एवमादिस्वर्थेध्वैर्विकल्पनाकार्य्या लग्नोदयनिरूपणं गणितस्कंधसिद्धांतेरेवकार्य्यमिति
१० दुश्चिक्यंसहजमितिसहजस्यतृतीयस्थानस्यदुश्चिक्यसंज्ञा नवमस्यचतपःसंज्ञा स्याद्यंत्रिकोणंचतत् तदेवनवमस्थानंस्याद्यंत्रिकोणं त्रिशब्दआद्योयस्यत्रिकोणस्य
तत् स्याद्यंत्रिकोणं त्रित्रिकोणमित्यर्थः त्रिकोणंचतदेवनवममिति अधुनाराशिवर्णान्मंदाक्रांतयाह १९ रक्त इति प्रथमभवनंमेषः तदाद्येषुमेषादिषुराशिषु
यथाक्रमंतेवर्णाभवेयुः तत्रमेषोरक्तोलोहितवर्णः वृषश्वेतःशुक्लः मिथुनःशुकतनुनिभोहरितइत्यर्थः कर्कटःपाटलोपुष्पवर्णः ईषद्रक्तइत्यर्थः सिं
होधूम्रपांडुः ईषत्शुक्लः कन्याविचित्रानानावर्णइत्यर्थः तुलाकृष्णः वृश्चिकःकनकाभःसुवर्णवर्णः धन्वीपिङ्गलःपीतवर्णः मकरःकर्बुरःश्वेतोरक्तःशुक्लःक
पिलव्यामिश्रवर्णः कुंभोबभ्रुःनकुलवर्णसदृशः मीनःस्वच्छवर्णोमत्स्यवर्णइति प्रयोजनं वियोनिवर्णविज्ञानंलग्नांशकादितिवक्ष्यति प्लवत्वंस्वाम्याशाख्यमिति।

पूर्वार्द्धेविषयादयःकृतगुणामानंप्रतीपंचतद्दुश्चिक्यंसहजंतपश्चनवमंस्याद्यंत्रिकोणंचतत् १९ रक्तःश्वेतःशुकतनुनिभःपाटलोधूम्रपांडु
श्चित्रःकृष्णःकनकसदृशःपिंगलःकर्बुरश्च॥ स्वामिनःआशास्वाम्याशाआशांदिक् तत्रप्लवत्वं प्लवस्यभावःप्लवत्वंसर्वस्यराशेःस्वाम्याशायां प्लवत्वंनि
म्नतेइत्यर्थः यथामेषवृश्चिकयोर्भौमोधिपतिः तस्यदक्षिणाशादिक् तत्रतौप्लवसंज्ञौवृषतुलयोःशुक्रोधिपतिः तस्याग्नेयदिक् तत्रतौप्लवसंज्ञौ मिथुनकन्ययोर्बु
धोधिपतिस्तस्योत्तरदिक् तत्रतौप्लवसंज्ञौ कर्कटस्यचंद्रोधिपतिस्तस्यवायव्यांप्लवत्वं सिंहस्यादित्योधिपतिस्तस्यपूर्वस्यांप्लवत्वं धन्विमीनयोर्जीवोधिपतिस्तस्यैशान्या रामः
दिक् तत्रतौप्लवसंज्ञौमकरकुंभयोःसौरोधिपतिस्तस्यपश्चिमदिक् तत्रतौप्लवसंज्ञौ एवंराशिस्वामिनोधिपादिक्तस्यतत्रत्यवोराशेर्ज्ञेयः प्रयोजनं हृतनष्टादिषुतद्दि १०
गामनंचौरादेः अन्यच्चयात्रायामुपयुज्यते तथाचसारावल्यां भवनाधिपदिग्भागमप्लवदृहयवनैः प्रबंधतःकथितः तत्प्लवगोविनिहन्यादचिरेणमहीपतिःशत्रूनिति
दिनकरयुतात्माद्वितीयंचवेशिः दिनकरःसूर्य्यस्तेनयुतोयोराशिस्तस्माद्द्वितीयोवेशिसंज्ञः प्रयोजनं यात्रायांवक्ष्यति वेशिर्विलग्नोपगतोपियासोइति तथाच॥
वेशिस्थानेचसद्ग्रहइत्यादि अत्रसंज्ञाध्यायेयासंज्ञाउक्तास्ताःद्विप्रकारः॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥८॥ःथ८७॥५५८४ः२५०॥७।८५।२५५

प्रयोजनं कांचित्निदर्शप्रयोजनं तत्रेमाः संज्ञामात्रप्रयोजनाः यथा लग्नस्य होराः तृतीयस्य दुश्चिक्यं चतुर्थस्य हिबुकं पंचमस्य त्रिकोणं सप्तमस्य द्यूनं नवमस्य त्रिकोण संज्ञा दशमस्य मेषूरणं द्वादशस्य रिष्फं चतुर्थाष्टमयोश्चतुरस्रसंज्ञा लग्नचतुर्थसप्तमदशमानां कंटककेन्द्रसंज्ञा चतुष्टयसंज्ञा च तथा द्वितीयपंचमाष्टमैकादशस्थाना नां पणफरसंज्ञा तृतीयषष्ठनवमद्वादशानामापोक्लिमसंज्ञाः एताः संज्ञामात्रप्रयोजनाः इमाश्च फलनिर्देशप्रयोजनाः तत्र लग्नस्य तनुः संज्ञा कल्पसंज्ञाश्च तेन लग्नाच्छरीरवृद्ध्यन्वेषणमारोग्यान्वेषणं च कार्य्यं द्वितीयस्य कुटुंबसंज्ञा स्वसंज्ञाश्च तत्तेन तस्माद्धनान्वेषणं कार्य्यं तृतीयस्य सहजसंज्ञा विक्रमसंज्ञाश्च तेन तस्माद्भ्रातॄणां पुरुषार्थस्य चान्वेषणं कार्य्यं चतुर्थस्य बंधुसंज्ञा वेश्मसंज्ञा सुखसंज्ञाश्च तेन तस्माद्बंधुसुखगृहाणां चान्वेषणं कार्य्यं पंचमस्य बुद्धिसंज्ञा पुत्रसंज्ञाश्च तेन तस्माद्बुद्धिपुत्र योरन्वेषणं कार्य्यं षष्ठस्यारिसंज्ञा क्षतसंज्ञा च अरिशब्दः शत्रुवाची क्षतशब्दो व्रणवाची तेन तस्मादरीतिव्रणान्वेषणं कार्य्यं सप्तमस्य दारचित्तोत्थयामित्रसंज्ञाश्च दारशब्दो भार्य्यावाची चित्तोत्थशब्दः कामवाची यामित्रशब्दो विवाहवाची तेन तस्माद्भार्य्याकामविवाहान्वेषणं कार्य्यं अष्टमस्य मरणरंध्रसंज्ञाश्च मरणं मृत्युः रंध्र

वन्धुःस्वछः प्रथमभवनाद्येषु वर्णाः स्ववत्त्वस्वाम्याशास्यं दिनकरयुताङ्गाद्द्वितीयं च वेशिः ९

शब्दः पापपर्य्यायः तेन तस्मान्मरणपापान्वेषणं कार्य्यं नवमस्य शुभगुरुतपः संज्ञाश्च शुभशब्देनात्र धर्म्मो ज्ञेयः गुरवो मातृपितृपूर्वकाः तपो व्रतं तेन तस्माद्धर्म्ममातृ पितृपूर्वकाणां गुरूणां तपसश्चान्वेषणं कार्य्यं दशमस्यास्पदकर्म्मसंज्ञाश्च आस्पदशब्दः कर्म्मवाची स्थानवाची च कर्म्माज्ञेषु प्रसिद्धे तेन तस्मात्क्रियाभावान्वेषणं कार्य्यं एकादशस्य भवायसंज्ञाः भवशब्दोत्र विद्यागुणसंपत्प्राप्तिवाचिनः आयशब्दोर्थवाची तेन तस्मात्तयोरन्वेषणं कार्य्यं व्यय इति द्वादशस्याख्या तेन तस्माद्व्ययान्वेषणं कार्य्यं तृती यषष्ठदशमैकादशस्थानानां उपचयसंज्ञा उपचयकरत्वात् अयं च तेषामुपचयकरत्वं यदि तत्रस्थाः पापा अपि शुभफलप्रदा भवंति तथा हि षष्ठस्थानं विना सौम्याः सर्वत्र भाववृद्धिकराः षष्ठस्थाः पापा अरिहानिं कुर्वंति क्षतहानिं च पापास्तूपचयस्थाः भाववृद्धिं कुर्वीरन् अपि षष्ठमुपचयस्थानं प्राप्य तच्चिंत्यं दुष्टभावयोररिक्षत योरपि हानिं कुर्वंति यतस्तेषामुपचयाद्यन्वर्थसंज्ञा उपचयस्थास्तु एव पापाः भावहानिं कुर्वाणाः अपि अष्टमद्वादशस्थानं चिंत्यमनिष्टभावस्थानित्वात् स्थानस्योपच यात्मकत्वाद्वृद्धिं प्रापयंति तथा च श्रीदेवकीर्तिः सौम्याः षष्ठे पापास्त्वन्वर्थसुखारिधर्म्मधीद्यूनगाः कुर्युर्भावविपत्तिं शेषोपगताश्च तद्वृद्धिमिति एतद्विशेषवचनं विनासर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰ टी॰भ ११

अथातो ग्रहयोनिभेदाध्यायो व्याख्यायते तत्र चराचरं जगद्ग्रहमयमेव प्राक् कालाख्यस्य पुरुषस्य कालांगानि इत्येवमादिना राशिनक्षत्रमूर्त्यंगविभागः प्रदर्शितः तन्म
दर्शनेन च ग्रहमय एवासौ प्रदर्शितो भवति यतो राशिस्वामिनो ग्रहा एव अधुना तस्यात्मादीन्भावान्ग्रहानेव जगत्यालकांस्तथा राजादीन्ग्रहमयानेव च शार्दूलवि
क्रीडितेनाह १ कालात्मादिनकृदिति कालस्यात्मा कालात्मा दिनकृत्सूर्य्यः अस्यैव तुहिनगुश्चंद्रो मनः तुहिनेन हिमेन सदृशाः शीतला गावो रश्मयो यस्य स तुहि
नगुः सत्वं कुजो भौमः सत्वस्य लक्षणं अधिकारकरं सत्वं व्यसनाभ्युदयागमे सत्वशब्दोऽत्र शौर्यपर्य्यायः यच्च सिंहादीनामस्ति तथा च एकाकिनि वनवासिन्यराजल
क्षण्यनीतिशास्त्रज्ञैः सत्वे स्थिते मृगपतौ राजेति गिरः परिणमंति उत्कृष्टतरस्वभाव इत्यर्थः ज्ञो बुधो वाचो गिरः जीवो बृहस्पतिः ज्ञानसुखे ज्ञानं च सुखं च ज्ञान
सुखे सितः शुक्रो मदनः कामः दिनस्येशो दिनेशः सूर्य्यः तस्यात्मजः पुत्रः शनैश्चरो दुःखं अत्र कालग्रहणं कालस्य सर्वगतस्य प्रदर्शनार्थं अत्र न केवलं काल
पुरुषस्य मेषाद्या राशयः शिरः प्रभृत्यंगविभागेन स्थिता यावदात्मादयश्चात्मविभागेन सर्वस्य जगतः स्थिताः प्रयोजनं पीडिते ग्रहे देहवंतोपि तदंगभावान्

कालात्मादिनकृन्मनस्तुहिनगुः सत्वं कुजो ज्ञो वचो जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजः राजानौ रविशीतगू क्षितिसुतो नेता कुमारो
बुधः सूरिर्दानवपूजितश्च सचिवौ प्रेष्यः सहस्रांशुजः ॥१॥ गुणपीडनं कर्त्तव्यं पुष्टैः पुष्टिरिति न केवलं यावत् जन्मनि बलवद्भिर्ग्रहैरेत एव भावा आत्मा
दयः शुभा भवंति दुर्बलैर्दुर्बलाः किंतु सौरस्य विपरीतं तथा चसारावल्यां आत्मादयो गगनगैर्बलिभिर्बलवत्तराः दुर्बलैर्दुर्बला ज्ञेया विपरीतं शनेः स्मृतमिति राजा एभ
नावित्यादि रविरादित्यः शीतगुश्चंद्रः एतौ राजानौ नृपौ क्षितिर्भूमिस्तस्याः सुतः पुत्रोंगारकः स नेता सेनापतिः कुमारो बुधः कुमारो युवराजः राजपुत्र इति केचि ११
त् सूरिर्बृहस्पतिः दानवपूजितः शुक्रः एतौ सचिवौ मंत्रिणौ सहस्रांशुः सूर्य्यस्तस्माज्जातः शनैश्चरः स प्रेष्यो दासः ननु गत्यालकरणे शनैश्चरः प्रेष्यः किमत्रो
च्यते प्रेष्योपि स्वकर्म्मणा पालक एव प्रयोजनं जन्मनि प्रश्नकाले वा बलवानुपचयस्थो ग्रहो भवति तदुक्तो राजादिकस्तस्य कार्य्यसाधको भवति अन्यथा हानिक
रः अधुना व्यवहारार्थं सूर्य्यचंद्रांगारकशनैश्चराणां संज्ञाः शालिन्याह १ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्य्योदित्योहेलिसंज्ञाः चंद्रमाःशीतरश्मिसंज्ञः शीताःरश्मयोकिरणाःयस्यसः इंदुपुत्रोबुधः सहिम्नावित्ज्ञोबोधनःएतास्तस्यसंज्ञा अवनिर्भूस्तस्यापत्योसचा
वनेयोभौमःसच्चारःवक्रःक्रूरदृक् सूर्य्यपुत्रःसौरःकोणःमंदःअसितः अधुनागुरुशुक्रराहुकेतूनांसंज्ञावसंततिलकेनाह २ जीवइतिजीवोबृहस्पतिःस
एवांगिराःसुरगुरुःसुराःदेवाःतेषांगुरुःवचसांपतिः ईज्यःपूज्यःदेवानांएताःबृहस्पतेःसंज्ञा शुक्रोभार्गवःसएवभृगुसुतःसितःआस्फुजित् चशब्दःसमुच्च
यार्थः एताःशुक्रस्यसंज्ञाः राहुःस्वर्भानुःसएवतमः अगुःनविद्यंतेगावोरश्मयोयस्यसः अरश्मिरित्यर्थः असुरोदैत्यःएताराहोसंज्ञाःशिखीतिकेतुःकेतोः
शिखीतिसंज्ञा शिखाविद्यतेयस्यसशिखी अन्यंपर्य्यायंलोकादन्यशास्त्रात् उपलभ्यवदेत्ब्रूयात् अथरविस्तीक्ष्णांशुर्दिवाकरोभास्वं स्तीक्ष्णरश्मिर्भानु
विवस्वानित्यादिकाःसूर्यस्य शशांकःतुहिनगुर्मृगांकःशशीनिशाकरोनक्षत्रपतिरित्याद्याश्चंद्रस्य कुजःइलाहितोभौमःक्ष्मातनयइत्याद्याभौमस्य सौम्योरौ

हेलिःसूर्य्यश्चंद्रमाःशीतरश्मिर्हैम्नोवित्ज्ञोबोधनश्चेंदुपुत्रः आरोवक्रःक्रूरदृक्चावनेयःकोणोमंदःसूर्य्यपुत्रोसितश्च २ जीवोंगिरासुर
गुरुर्वचसांपतीज्योशुक्रोभृगुर्भृगुसुतःसितआस्फुजिच्च राहुस्तमोगुरसुरश्चशिखीतिकेतुः पर्य्यायमन्यमुपलभ्यवदेच्चलोकात् ३ रक्त
श्यामोभास्करोगौरइंदुर्नात्युच्चांगोरक्तगौरश्चवक्रः दूर्वाश्यामोज्ञोगुरुगौरगात्रःश्यामःशुक्रोभास्करिःकृष्णदेहः ४ ॥ ६ ॥

हिणेयश्चांद्रिर्मृगांकतनयइंदुजइत्याद्याबुधस्य सूरिःसुरेंद्रपूज्योवाग्पतिर्देवपुरोहितइंद्रमंत्रीत्याद्यागुरोः भार्गवःउशनादैत्येज्यःअसुरगुरुःदैत्यमंत्रिगित्याद्या
शुक्रस्य यमःरविजःपातंगिःछायासुतःइत्याद्याःसौरस्य सैंहिकेयःस्वर्भानुःदानवःअमृतचौरइत्याद्याराहोरिति अधुनाग्रहवर्णान्शालिन्याह ३ रक्तश्या
मइति रक्तश्चासौश्यामःपाटलपुष्पवर्णइत्यर्थः एवंविधोभास्करःआदित्यः इंद्रश्चंद्रोगौरःश्वेतवर्णप्रायः वक्रोंगारकोनात्युच्चोनातिदीर्घःरक्तगौरःपद्मप
त्राभःज्ञोबुधःसदूर्वाश्यामःशाद्वलमृणालवर्णःगुरुर्बृहस्पतिःसगौरगात्रोगौरशरीरःशुक्रःश्यामवर्णोनातिगौरोनातिकृष्णःभास्करिःसौरःसकृष्णदेहोऽसितशरी
रः वर्णप्रयोजनं सर्वेग्रहेभ्योयोबलवान्तद्वर्णस्तत्कालजातोभवति प्रश्नकालेचौरादेरपि अधुनाग्रहाणांवर्णस्वाम्यंग्रहदेवताश्चदिक्स्वाम्यंसौम्यपापत्वंचशार्दू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दु॰ वर्णोइति ताम्राद्यो वर्णाः सूर्यादिग्रहनाथाः सूर्यादयोग्रहनाथाः स्वामिनोयेषां ताम्रवर्णस्यादित्योनाथः स्वामी सितस्यश्वेतस्यचंद्रः अतिरक्तस्यातिलोहितस्यभौ
टी॰ भे॰ मः हरितस्यशुकवर्णस्यबुधः विशेषेणआसमंतात्पीतस्यहारिद्रस्यशदृशजीवः चित्रस्यनानावर्णस्यशुक्रः असितस्यकृष्णवर्णस्यसौरः प्रयोजनम् बलवतंग्रहे
१२ हृतनष्टादिद्रव्यवर्णज्ञानं जन्मनिप्रश्नकालेचोक्तद्रव्यलाभः अन्यथाहानिः ग्रहपूजायांतद्वर्णकुसुमपूजा तथाचयाज्ञवल्क्यः वर्णैर्मंडलकेषुचेति वन्हीत्यादि
सूर्यादिनाथाइत्यनुवर्तते सूर्यादीनांनाथाःसूर्यादिनाथाः आदित्यस्यवन्हिरग्निर्नाथः स्वामी चंद्रमसोंबुजलं भौमस्याग्निजःकुमारः स्वामिकार्तिकेयइत्यर्थः
बुधस्यकेशवोविष्णुःगुरोरिंद्रः शतक्रतुः शुक्रस्यशचीद्राणी सौरस्यकःप्रजापतिःब्रह्माइत्यर्थः प्रयोजनं ग्रहपूजायांग्रहोक्तदेवतापूजा तथाचयवनेश्वरः
देवाग्रहाणांजलवन्हिविष्णुप्रजापतिस्कंदमहेंद्रदेवी चंद्रार्कचांड्यर्कजभौमजीवशुक्राश्रयस्तेषुयजेनशश्वत् तथाचौरनामानयनेबलग्रहोक्तदेवतापर्यो
यनाम तथाचयात्रायांग्रदेवतांसंपूज्यतद्दिशंयात् तथाचसारावल्यां ताम्रसितातिरक्तहरितव्यापीतविचित्रासिताइनादीनां पावकजलगुहकेशवशक्रशचीवे

प्रागाद्यारविशुक्रलोहिततमःसौरेंदुवित्सूरयः॥ ॥

धसःकथितःपूर्वादिग्रहदेवांस्तन्मंत्रैः समभिपूज्यतामाशांधनकनकगजवाहनादीन्प्राप्नोतिगत्तोरितः शीघ्रंप्रागाद्याइति प्रागाद्याः पूर्वप्रथमादिशास्तासांपू
र्वादीनांरव्यादयोनाथाः तत्रपूर्वस्यांदिशिरविरादित्योधिपतिः पूर्वदक्षिणस्यांशुक्रः दक्षिणस्यांलोहितोंगारकः दक्षिणपश्चिमायांतमोराहुः पश्चिमायांसौरः
शनैश्वरःपश्चिमोत्तरस्यामिंदुश्चंद्रः उत्तरस्यांवित्बुधः उत्तरपूर्वस्यांसूरिर्बृहस्पतिः प्रयोजनं केन्द्रस्थैर्ग्रहैः सूतिकागृहद्वारज्ञानं हृतनष्टादिषुचौरादेर्गमनंच॥ राम॰
क्षीणेंदुर्केतिक्षीणश्चासाविंदुःक्षीणेंदुः कृष्णाष्टम्याद्यौच्छुक्लाष्टम्यंईयावत् क्षीण श्चंद्रः परतःपूर्णः आयुर्दायविधोकृष्णपक्षत्रयोदश्यांतावत्प्रभृतिया १२
वदमावास्यांतेसूर्यमंडलांतर्गोइंदुःतस्तावत्क्षीणइति यस्माद्यवनेश्वरः चंद्रस्यपापत्वंनकदाचिदपीच्छति तद्वाक्यं मासेतुशुक्लप्रतिपत्प्रवृत्ते पूर्वेशशीमध्य
बलोदशाहे श्रेष्ठोद्वितीयेल्पबलस्तृतीयेसौम्यैस्तुदृष्टोबलवान्सदैव तथाच क्रूरग्रहोर्कःकुजसौर्यौतुपापौशुभाःशुक्रशशांकजीवाः सौम्यश्चसौम्यःव्यतिमि
श्रितोन्यैर्वर्गेस्तुप्रकृतिन्वमेतीतितस्मादेनावत्क्षीणइति आदित्यः महीसुतोंगारकः अर्कतनयःसौरः एतेसदैवपापाः बुधस्तैर्युतस्तेषामेकतमेनयुक्तःपापएव॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौम्याशेषाः शुक्लपक्षाष्टम्यद्यन्तकृष्णपक्षाष्टम्यर्द्धं यावच्चन्द्रः सौम्यो बुधः पापविमिश्रितयुतः पाप एव जीवशुक्रौ सदैव सौम्याविति प्रयोजनं पापसौम्यग्रहबला
ज्ज्ञातः पापात्मकः सौम्यः स्वभावश्च भवति अधुना ग्रहाणां प्रकृतिविभागं महाभूताधिपत्यं श्लोकेनाह ५ बुधसूर्य्य इति बुधश्चांद्रिः सुर्य्यसुतः शनिः एतौ
नपुंसकाख्यौ नपुंसकनामानौ शशी चन्द्रः शुक्रो भार्गवः एतौ द्वौ युवतीसंज्ञौ शेषा रविजीवभौमा नराः पुरुषसंज्ञाः पुरुषनामानः प्रयोजनं जन्मनि चिंता
यां हृतनष्टादिषु बलवतः स्वस्वरूपमेव कुर्वंति तेषामुपेतोपेतदाश्रितानामुपतापः शिखिभूखपयोमरुद्गणानामिति शिख्यादीनां पंचानां महाभूतानां पंच
ग्रहा भूमिसुतादयः क्रमेण वशिनः तद्यथा शिखिनोऽग्नेर्भूमिसुतोऽगारको वशी भौमेष्वग्नेः स्वामीत्यर्थः एवं भूमेर्बुधः खस्याकाशस्य जीवः पयसो भसः शु
क्रः मरुतो वायवो शनैश्चरः गणग्रहणमत्र वृत्तपूरणार्थं नन्वादित्यचंद्रयोः कस्मान्नोक्तमित्यत्रोच्यते तयोः पूर्वमेवोक्तं वन्ह्यंबुविति तावेव प्रसिद्धौ प्रयो

क्षीणेंद्वर्कमहीसुतार्कतनयाः पापा बुधस्तैर्युतो ५ बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नराश्च शेषाः शिखिभूखपयोम
रुद्गणानां वशिनो भूमिसुतादयः क्रमेण ६ विप्रादितः शुक्रगुरू कुजार्कौ शशी बुधश्चेत्यसितोऽन्त्यजानां ॥ ॥ ॥

जनं स्वदशायां महाभूतकृतां छायां व्यंजयंति वक्ष्यति च छायां महाभूतकृतां च सर्वे इति अधुना ग्रहाणां ब्राह्मणादिवर्णाधिपत्यं गुणविभागं चोपजाति
कयाह ६ विप्रादितो ब्राह्मणादेर्वर्णचतुष्टयस्वामिनो ग्रहाधिपतयः शुक्रो भार्गवः गुरुर्बृहस्पतिरेतौ द्वौ ब्राह्मणानामधिपती कुजो भौमः अर्कादित्य एतौ
द्वौ क्षत्रियाणां शशी चंद्रो वैश्यानां शूद्राणां बुधः असितः शनैश्चरः अन्त्यजानां वर्णप्रतिलोमभवानां चांडालमागधनिशादीनां प्रयोजनं हृतनष्टादि
षु ग्रहबलाच्चौरादीनां ग्रहोक्तवर्णप्रभावः एषामुपघाते तद्वर्णोपघातः तथा च सत्यः गुरुशुक्रौ रविरकौ चंद्रः सौम्यः शनैश्चरश्चेति विप्रक्षत्रीयविट्शूद्र
शंकराणां प्रसूतिकराः अजयेजयेथ तुष्टावप्रीतो वित्तना शनैर्लाभं तेभ्यस्तेभ्यः कुर्य्युर्गुणाश्चंद्रो शांश्च पक्षाणां चंद्रार्कजीवा इत्यादि चंद्रः शशी अर्के
आदित्यः जीवो बृहस्पतिः एते सत्वसंज्ञाः ज्ञो बुधः सितो शुक्रः एतौ द्वौ रजःसंज्ञौ कुजोऽगारकः आर्किः सौरः एतौ द्वौ तमसंज्ञौ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृ॰ एतेयथाक्रमंसत्वादिगुणाधिपतयोग्रहाः प्रयोजनं सत्वंरजस्तमोवात्रिंशांशोयस्यभास्करस्तादृगितिस्वजातके अन्येपुनः ग्रहबलाद्वर्णयंति तथाच
टी॰ भ श्रीदेवकीर्त्तिः बलवद्भिस्तद्गुणोभवेज्जातइति अत्राचार्य्यस्ययवनेश्वरेणसहसतभेदः तेनैभौमस्यसात्विकउक्तः तथाचतद्वाक्यं सत्वाधिकाभास्क
१३ रभौमजीवाभृग्वात्मकोराजसिकःशशीच शनैश्चरस्तामसिकोबुधस्तुसंयोगतोन्यालभतेविशेषात् आचार्य्यस्यस्वसवचनमभिमतं तथाचसत्यः तामसिकौ
कुजसौरीराजसिकौभार्गवः शशिसुतश्चजीवशशिभास्कराःसात्विकाग्रहप्रकृतिनान्हणा एवंयत्रयत्राचार्य्यस्ययवनेश्वरेणसहमतभेदस्तत्रसत्यमतमपि अथ
पूर्वमतमभिहितं सत्वंकुजस्तचंद्रार्कजीवाःपुनः किमित्युक्तउच्यते इहवचनात्सत्वशब्दस्तत्रशौर्य्यपर्य्यायः कार्य्याकार्य्यप्रवृत्तीनामप्यस्ति येनसएकाकिनो
पिवनवासिनः तथाच एकाकिनिवनवासिन्यराजलक्ष्मण्यनीतिशास्त्रज्ञे सत्वोत्थितेमृगपतौराजेतिगिरःपरिणमंति अथगुणस्वरूपं यःसात्विकस्तस्य

चंद्रार्कजीवाज्ञसितौकुजार्कीयथाक्रमंसत्वरजस्तमांसि ७ मधुपिङ्गलदृक्चतुरस्रतनुःपित्तप्रकृतिःसवितात्यकचः तनुवृत्ततनु
र्बहुवातकफःप्राज्ञश्चशशीमृदुवाक्शुभदृक् ८ क्रूरदृक्तरुणमूर्त्तिरुदारःपैत्तिकःसुचपलःकृशमध्यमाः ॥ ४ ॥

दयास्थिरत्वंसत्यार्ज्जवंब्राह्मणदेवभक्तिः रजोधिकः काव्यकलाहृतस्त्रीसंसिक्तचित्तःपुरुषोतिशूरः तमोधिकोवंचयितापरेषांमूर्खोलसःक्रोधपरोतिनि राम॰
द्रइति अथचंद्रार्कयोःत्रोटकेनाह ७ मधुपिंगलदृगिति मधुवत्पिंगलादृष्टिर्यस्यसः ईषत्कातराक्षः चतुरस्रतनुः प्रसारितभुजद्वयप्रमाणसमोच्छ्रायः १३
पित्तप्रकृतिःपित्ताधिकः अल्पकचोकोर्थः विरलकेशः एवंविधःसविता आदित्यः तनुवृत्ततनुरित्यादि तन्वीचासौवृत्ताचतनुवृत्तातादृशीतनुर्य्यस्यसतनुवृ
त्ततनुः कृशवर्त्तुलांगइत्यर्थः अथबहुवातकफः प्रभूतमारुतश्लेष्मा प्राज्ञो मेधावी मृदुवाक्कोमलभाषी शुभदृक् दर्शनीयाक्षः एवंविधः शशीचंद्रः
अथअंगारकबुधयोः स्वरूपंस्त्रागीतयाह ८ क्रूरइति क्रूराद्दुष्टादृष्टिर्य्यस्यसक्रूरगंगारकः सचतरुणमूर्त्तिः नित्ययौवनोपेताकारविग्रहः उदारोदा
ता पैत्तिकःपित्तबहुलः सुचपलोतीवास्थिरचित्तः एषांकृशमध्यस्तनूदरः एवंविधोंगारकःभौमः श्लिष्टवागित्यादिकेनवागद्गदभाषी ॥

CC-0. In Public Domain. Digitization by eGangotri

सततहास्यरुचिः नित्यंपरिहासशीलः पित्तमारुतकफप्रकृतिर्दोषत्रयोल्बणस्वभावः एवंविधोज्ञोबुधः अथजीवशुक्रयोः स्वरूपंवंशस्थेनाह ९ बृहत्तनुरि
ति मूर्द्धजाः केशाः ईक्षणेच नयनेपिंगलेयस्यकपिलकेशः कातरीस्त्रइत्यर्थः श्रेष्ठमतिर्द्धर्मानुगः प्राज्ञः कफात्मकः कफाधिकशरीरः श्लेष्मात्मा एवं
विधोबृहस्पतिः भृगुरित्यादि सुखीनित्यंसुखासक्तः कांतवपुर्दर्शनीयशरीरः सुलोचनः शोभनाक्षः कफानिलात्मा श्लेष्ममारुतप्रकृतिः असितवक्र
मूर्द्धजः असिताः कृष्णावक्राःकुटिलाः मूर्द्धजाःकेशाःयस्यकृष्णकुंचितकेशइत्यर्थः ॥एवंविधोभृगुःशुक्रः अधुनाशनैश्चरस्वरूपंस्नाय्वादिसारत्वंचग्रहा
श्रयंति वसंततिलकेनाह १० मंदोलसइति अटोसःक्रियास्वपटुःकपिलदृष्टिः कातराक्षः कृशः दुर्बलः दीर्घः उच्चतरंगात्रंयस्यसः गात्राणिवासदुर्बलोच्चदेहः
स्थूलद्विजोबृहद्दंतः परुषरोमकचः रुक्षतनूरुहकेशः अनिलात्मा वातप्रकृतिः एवंविधोमंदः शनैश्वरः स्नाय्वस्थीत्यादि मंदादीनांग्रहाणांस्नाय्वादिसार

श्लिष्टवाक्यसततहास्यरुचिर्ज्ञः पित्तमारुतकफप्रकृतिश्च ९ बृहत्तनुःपिंगलमूर्द्धजेक्षणोबृहस्पतिः श्रेष्ठमतिःकफात्मकः/ भृगुः सुखी
कांतवपुःसुलोचनःकफानिलात्मासितवक्रमूर्द्धजः १० मंदोलसःकपिलदृक्कृशदीर्घगात्रः स्थूलद्विजः परुषरोमकचोनिलात्मा
॥स्नाय्वस्थ्यसृक्त्वगथशुक्रवसाः समज्जा मंदार्कचंद्रबुधशुक्र सुरेज्यभौमाः ११ देवांब्वग्निविहारकोशशयनक्षित्युत्करेशाः क्र
माद्वस्त्रंस्थूलमभुक्तमग्निकहतंमध्यंदृढंस्फाटितं॥ ११ त्वं स्नाय्वस्थिनीः सिद्धार्थेतिदेहवतांशनैश्चरादित्यो स्नायुर्मंदः शनैश्चरः नासासारः अस्थी
त्यर्कः आदित्यः अस्थीसारः असृग्रुधिरंतच्चंद्रमाः त्वक्चर्मतद्बुधः अथशब्दआनंतर्य्यार्थे शुक्रंरेतः तच्छुक्रः वसामेदस्तत्सुरेज्योगुरुः मज्जा अस्थ्यंत
रंगतोधातुविशेषःसभौमः ग्रहाणांस्वरूपंज्ञान प्रयोजनं लग्नंनवांशतुल्यतनुःस्यादित्यत्रोपयुज्यते जन्मकालेयोग्रहो बलवान्तत्पठितस्वरूपस्तत्का
लजातोभवति तद्धातुसारश्च हतनष्टादिप्रश्नकालेप्येवंविधधातुःरूपाश्चोरादयः व्याधितःप्रश्नेयद्ग्रहंयच्चलग्नेनवांशकोवर्त्ततेतत्स्वामिनोबलवशा
दभिहितदोषेणवापीडा अधुनाग्रहाणांस्थानवस्त्रद्रव्यंतत्रप्रभुत्वंशार्दूलविक्रीडितेनाह ११ देवामिति अर्कोप्रभृतितदादीनांग्रहाणांक्रमाद्देवादीनि
स्थानानि तत्रदेवस्थानमादित्यस्य अंबुस्थानंचंद्रमसः अग्निस्थानंभौमस्य विहारभूमिः क्रीडास्थानंबुधस्य कोशोभांडागारस्तत्स्थानंबृहस्पतेः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शयनस्थानं शुक्रस्य क्षितसुत्करः आकारराशिस्तत्स्थानं शनैश्चरस्य एतेषांस्थानानां एते स्वामिनः प्रयोजनं बलवति गृहे ग्रहोक्तस्थाने प्रसववज्ज्ञानं हृतनष्टादि
श्चौरादेः तदेव स्थानं द्रव्यस्य च वस्त्रमित्यादि अर्कादिसर्वत्रानुवृत्तिः तत्स्थूलं ततनुक्तमादित्यस्य वस्त्रं अभुक्तं नवं चंद्रस्य अग्निनाहतं एकदेशदग्धं भौम
स्य केनाबुनाहतं क्लिन्नं बुधस्य मध्यं नातिनवं नातिजीर्णं बृहस्पतेः दृढं कालांतस्थापि न शुक्रस्य स्थापि तजीर्णं शनैश्चरस्य प्रयोजनं सूतिकावस्त्रज्ञानं ह
तनष्टादिचिंतायां चौरादेर्बलवद्ग्रहवशाद्वस्त्रज्ञानं तांम्रं स्यादित्यादि तांम्रमादित्यस्य चंद्रस्य मणयः भौमस्य हेमं सुवर्णं बुधस्य युक्तिः युज्यत इति युक्तिः रा
रिकांस्यादि रजतं रौप्यं बृहस्पतेः स्वस्थानस्थतस्यैव सुवर्णमपि मुक्ता शुक्रस्य अयः कृष्णलोहं सीसत्रपुणी च शनैश्चरस्य तथा चानेनैव सूक्ष्मजातके उक्तं अ
र्कादितांम्रमणिहेमयुक्तिरजतानि मौक्तिकं लोहं वक्तव्यं बलवद्भिः स्वस्थाने हेमजीवेपि तथा च वादरायणः अर्कस्य ताम्रमणयो हिमांशो भौमस्य हेमेंदुसुतस्य
युक्तिः जीवस्य रूप्यं स्वगृहे स्थितस्य तस्यैव हेम उशनसश्च मुक्ता तीक्ष्णायसं देहप्रभवस्य सीसं कृष्णायसं च प्रवदंति तज्ज्ञाः प्रयोजनं सूतिकागृहे बलवद्ग्रहस्य द्र
व्यस्तवाहृतनष्टादिचिंतायां च तद्द्रव्यनाशादिपरिज्ञानं तच्छुभदशायां तस्मिन्नुपचयस्थे तदाप्तिः उक्तविपरीते हानिः द्रेक्काणैरित्यादि अत्र शकारादिभिर्गु
पर्यंतैर्वर्णैः संज्ञाद्यैः शनैश्चरप्रभृत्तीनां गुर्वंतानां ग्रहाणामनुरोधान्निर्देशाकृतः शनैश्चरशुक्ररुधिरचंद्रबुधगुरुषु यत्तुलग्नस्य गतेषु शिशिराद्यः षडृतवो ज्ञेयः
तत्र शकारोपलक्षितः शनैश्चरः तस्मिन्नुदयति लग्नस्थे शिशिरऋतुर्विज्ञेयः शुकारोपलक्षितः शुक्रः तस्मिन्नुदये वसंतः रुकारोपलक्षितो रुधिरो भौमस्त
स्मिन्नुदये ति ग्रीष्मः चकारोपलक्षितश्चंद्रस्तस्मिन्नुदयेति वर्षा ज्ञेयः ज्ञो बुधस्तस्मिन्नुदये शरत् गुकारोपलक्षितो गुरुस्तस्मिन्नुदयति हेमन्तः आदित्येप्युदय राम
ति ग्रीष्मः तथा च वादरायणः ग्रीष्मम् अथ प्रवदंति कुजार्कावपि द्रेक्काणैरित्यस्यावाद्यन्तेनान्यवहितेन संबंधः द्रेक्काणे वा यद्यद्भिः शनैश्चरादिसंबंधिभिः १४
शिशिराद्यो ज्ञेयः एतदुक्तं भवति लग्ने ग्रहासंभवे शनैश्चरद्रेक्काणे लग्नगते शिशिरः एवं शुक्रद्रेक्काणे वसंतः भौमद्रेक्काणे ग्रीष्मः रविद्रेक्काणे ग्रीष्मः
एवं चंद्रद्रेक्काणे वर्षा बुधद्रेक्काणे शरत् जीवद्रेक्काणे हेमन्तः अत्र च मुख्यग्रहोदयेन तु निर्देशः कर्त्तव्यः तदभावे द्रेक्काणेन ज्ञातव्यं वन्हिनामुदयेपि द्रेक्का
णेनैव केचिद्वन्हिनामुदये बलवद्ग्रहेणेति व्याचक्षते तथा च मणित्थः ह्याद्यैर्लग्नोपगतैर्यो बलवांस्तद्ग्रहर्तुनिर्देशः इति तत्रैतज्जातं लग्ने यो ग्रह स्थितस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुक्तं ऋतुर्वीच्यः बहुषु लग्नगतेषु यो बलवान् ग्रहाभावे द्रेष्काणपते ऋतुनिर्देशः प्रयोजनं नष्टजातके ऋतुनिर्देशः हृतनष्टादिचिंतायां चेति अत्राचार्येणग्र
हाणां शाखाधिपत्येनोक्तं उक्तं च स्वल्पजातके ऋगथर्वसामयजुषामधिपा गुरुसौम्यभौमसिताः ऋग्वेदाधिपतिर्गुरुः अथर्ववेदाधिपतिः सौम्यो बुधः साम
वेदाधिपतिर्भौमः यजुर्वेदाधिपतिः शुक्रः प्रयोजनं बलवति शाखाधिपे ब्राह्मणादेस्तच्छाखापाठको भवति ब्राह्मणे चौरे ज्ञाते शाखाविज्ञानं अनिष्टस्थान
स्थग्रहे तन्मंत्रैः शांतिरिति अथ ग्रहाणां दृष्टिस्थानानि निसर्गदृष्टिफलानि च प्रहर्षिण्याह १२ यस्मिन्स्थाने ग्रहाः स्थितास्तस्मात्त्रिदशादीनि स्थानानि चर
णानि वृद्धितः पाददृष्ट्यावलोकयंति ग्रहो यस्मिन्राशौ व्यवस्थितः तस्माद्यत्तृतीयगो ग्रहादिशमगतश्च तथा तृतीयदशमस्थो राशिगतो पादेन चतुर्भागदृष्ट्या
वलोकयंति एवं त्रिकोणस्थो नवपंचमस्थानगता वर्द्धदृष्ट्या चतुरस्रेऽष्टमचतुर्थे अष्टमचतुर्थस्थानस्थो पादहीनदृष्ट्या सप्तमगं सगृहं परिपूर्णदृष्ट्या चरणा
भिवृद्धइति अत्राभिशब्दो वीप्साद्योतयति चरणवृद्ध्या पादवृद्धेत्यर्थः यावत्पाददृष्ट्यापश्यन्ति तावत्फलं प्रयच्छंति तथा च स्वल्पजातके दशमतृतीये नव

तांस्त्रस्यान्मणिहेमयुक्तिरजतान्यर्कोच्चमुक्तायसी द्रेष्काणैः शिशिरादयः शशुकुचतस्त्वादिषूद्यत्सुचा १२ त्रिदशत्रिकोणचतुरस्र
सप्तमान्यवलोकयंति चरणाभिवृद्धितः॥ १ पंचमे चतुर्थाष्टमे कलत्रं च पश्यंति पादवृद्ध्या फलानि चैवं प्रयच्छंति अर्थादेव ग्रहोक्तस्थानानि पश्यंत

इति तथा च सारावल्यां सद्यः पश्यंति सदा ग्रहाश्चरणवृद्धितः सर्वे त्रिदशत्रिकोणचतुरस्रसप्तगतान्फलक्रमेणैव पूर्णं पश्यति रविजस्तृतीयदशमे त्रिकोण
मपि जीवः चतुरस्रं भूमिसुतः सितार्कबुधहिमकराः कलत्रं च तथा च यवनेश्वरः द्वौ पश्चिमौ षष्ठमथ द्वितीयं संस्थानराशेः परिहृत्य राशिं शेषान्ग्रहः पश्य
ति सर्वकालमिष्टेषु चैषां विहितानि दृग्भिस्त्र यामित्रभे दृष्टिफलं समग्रं स्वपादहीनं चतुरस्रयोश्च त्रिकोणयोर्द्धं गफलार्द्धमाहुर्द्विभिकस्यसंज्ञे दशमे च पादं रवि
जामरेज्यरुधिरा इति किलेत्यागमसूचने चरणाभिवृद्धितइत्यनुवर्तते एते रविजादयश्चरणाभिवृद्धितः पादेऽपि चयाद्वीक्षणे दर्शनेक्रमशोऽधिकफलप्रदा भ
वंति रविजः शेषः सदर्शनेपादफलप्रदः अमरेज्यो बृहस्पतिरर्द्धफलप्रदः रुधिरोंगारकः सपादहीनफलप्रदः अपरोर्कचंद्रबुधशुक्रास्त्ववीक्षणे समग्रफ
लप्रदाः एतन्नैसर्गिकं ग्रहाणां दृष्टिफलं स्थानवशादेतेषां यथास्वं दृष्टिफलमूलं एवमेके व्याचक्षते अपरे तु प्राहुः स्थानफलमेतत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनत्रिदशादिस्थानगतान्ग्रहराशीन् पश्यंते रविजादयोदर्शनेधिकफलप्रदा भवंति तद्यथा तृतीयदशमस्थानान्ग्रहान्राशीन्वारानैश्चरः पश्यन्नन्येभ्योग्र
हेभ्योधिकफलप्रदोभवति परिपूर्णपश्यतीत्यर्थः एवंत्रिकोणस्थांजीवः चतुरस्रगान्भौमः सप्तमस्थान्सूर्यचंद्रबुधशुक्राः एतच्चबहुनराणांआचार्याणां
मतं तथाचभगवान्गार्गिः दुश्चिक्युस्त्वगतान् सौरस्त्रिकोणस्थान् बृहस्पतिः सूर्यचाष्टमगान्भौमः शेषाःसप्तमसंस्थितान्भवंतीक्ष्णोनित्यमुक्ताधिकफला
ग्रहाइति अधुनाग्रहाणांकालनिर्देशंचवैतालीयेनाह १३ अयनइति भास्करादादित्यात्प्रभृत्ययनादिःकालनिर्देशः तत्रायननिर्देशोभास्करात्सूर्यात्
क्षणेमुहूर्तस्तस्मिन्निर्देशश्चंद्रात् मासनिर्देशोजीवात् वासरोदिवसस्तन्निर्देशोभौमात् ऋतुमासद्वयात्मकस्तन्निर्देशोबुधात् मासनिर्देशोजीवात् मासार्द्धःप
क्षनिर्देशःशुक्रात् समःसंवत्सरस्तन्निर्देशः सौरात् प्रयोजनं प्रश्नलग्नेयस्यग्रहस्यनवांशकोदयस्तग्रहस्तस्मान्नवांशकाद्यावत्संख्येनवांशकेभवतितावत्संख्यो
ऽयनादिकोग्रहोपलक्षितःकालःशुभाशुभफलपक्तोवाच्यः अन्यत्वेवंव्याचक्षते लग्नेयावत्संख्यानवांशकोदितस्तावत्संख्योऽयनादिकालोंशपतिवशाद्
रविजामरेज्यरुधिराः परेचयेक्रमशोभवंतिकिलवीक्षणेद्धिकाः १४ अयनक्षणवासरर्त्तवोमासोर्द्धंचसमाश्चभास्करात् कटुकलवण
तिक्तमिश्रितामधुराम्लौकषायइत्यपि १४ जीवोजीवबुधौसितेंदुतनयौव्यर्काविभौमाःक्रमाद्वीद्वर्काविकुजेंद्विनाश्वसुहृदःकेषां।
ऽचिदेवंमतम्॥ १ ॥
क्तव्यः तथाचमणित्थः लग्नांशकपतितुल्यकालोलग्नोदितांशसमतुल्यः वक्तव्योरिपुविजयेगर्भाधानेथकार्यसंयोगेव
क्तव्यः कटुकलवणेत्यादि भास्करादादित्यात् कटुकादिरसनिर्देशः तत्रादित्यात्सूर्यात्कटुकस्यरसस्यनिर्देशः चंद्रात् लवणस्य भौमात्तिक्तस्य तिक्तंमरि राम
चादिबुधान्मिश्रस्य षड्रसस्य जीवान्मधुरस्यमिष्टस्य शुक्रादम्लस्य सौरात्कषायस्यप्रयोजनं आधानकालेयोबलवांस्तदुक्तरसस्यदोहददोगर्भिण्याभवति॥ १५
तथाचसारावल्यां मासतृतीयेस्त्रीणांदोहदकोजायतेवश्यं मासाधिपस्यभावैर्लग्नपयोगादिभिश्चिंत्यं भोजनाश्रयेच्चप्रश्नेग्रहोदयेतन्नवांशकोदयेवा॥
तदुक्तरसान्वितभोजनज्ञानमिति अधुनामित्रामित्रविधिंशार्दूलविक्रीडितेनाह १४ सूर्यादीनांग्रहाणांक्रमाज्जीवादयःसुहृदः तत्रादित्यस्य सूर्यस्य
जीवोबृहस्पतिःसुहृन्मित्रं जीवबुधौचंद्रस्य शुक्रबुधौभौमस्य विगतोर्कःसूर्योयेभ्योग्रहेभ्यस्तेसूर्यवर्जिताःसर्वएवबुधस्य विकुजाविगतांगारकः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वाएवबृहस्पतेः वौद्धकोविगतश्चंद्राकौयेभ्यस्तेसर्वेएवशुक्रस्य विकुजेंद्विनाः कुजोभौमइंदुश्चंद्रः इनः सूर्य्यः एतेविकुजेंद्विनाः सर्वेएवसौरस्य शनैश्चरस्य
...तं केषांचिन्मतं नबहूनां अत्रचतेषांशत्रुमित्रस्यव्यवहारएवेष्टोनोदासीनव्यवहारस्तस्मान्मित्रेभ्योन्योन्यमित्राणीति केचिद्यवनेश्वरादयः तथाच रवेर्गुरुर्मित्र
मतोन्यथान्येगुरोस्तुभौमंपरिहृत्यसर्वेचांद्रेरनर्काः भृगुनंदनस्यव्यर्केंदवोथ्वसुहृदः प्रदिष्टाः १ भौमस्यशुक्रोशशिजश्चमित्रमिंदोर्बुधंदेवगुरुंचविद्यात् सौरस्य
मित्राण्यकुजेंदुसूर्य्याः शेषाणि पूर्व्विद्विनृणांचतद्वत् २ सत्योक्तइति सत्योक्तेहोराशास्त्रेस्वात्त्रिकोणभवनादात्मीयमूलत्रिकोणराशेः स्वान्त्यधीधर्म्मपाः स्वोच्चायुः
सुखपाश्चतेग्रहाः सुहृदोभवंति तत्रत्रिकोणंमूलत्रिकोणंतस्मात्स्वयोद्वितीयराश्याधिपः तस्माद्वांत्यपोद्वादशस्थानाधिपः पंचमस्याधिपः धर्म्मपोनवमा
धिपः स्वोच्चणेग्रहोच्चस्यस्वामी आयुषोष्टमस्थानाधिपः सुखपश्चतुर्थस्थानाधिपतिः ग्रहोमित्रंभवति स्वलक्षणविधेर्विरोधादन्यैः अ त्रिमस्थानाधिपति
भिर्ग्रहैः सहनायंमित्रः नमित्रविभागोकल्पनीयः विरोधादसुहृद्भवं स्वंचतल्लक्षणंचस्वलक्षणंस्वलक्षणेविधिः स्वलक्षणविधिस्तेनविरोधस्तस्मात् एतदुक्तं
भवति योस्वविधेः मित्रलक्षणविभागः प्रदर्शितः अतोन्यस्थानाधिपापेग्रहास्तेग्रहस्यसुहृदोनभवंति तथाचसत्यः सुहृदस्त्रिकोणभवनाद्ग्रहस्यसुतभेव्यये
थधनभवने स्वजनेनिधनेधर्म्मेस्वोच्चेचभवंतिनाशेषाः स्वजनसंज्ञंचतुर्थस्थानं तत्रद्विराश्याधिपोमित्रसंज्ञः एकराश्याधिपोमध्यमः अनुक्तराश्याधिपः
शत्रुः वक्ष्यतिचद्व्येकानुक्तभपान्सुहृत्समरिपूर्न्संचिंत्यनैसर्गिकानिति एकराश्यधिपोमध्यस्थइति यदुक्तं तथाच चंद्रार्कावेकराश्यधिपवपिमित्रसंज्ञो
भवतः तयोर्हिराशिद्वयस्याधिपत्याभावात् राशिद्वयस्ययोधिपतिर्ग्रहः सएव यद्युच्चराश्यधिपत्वात्त्रिभपत्वंप्राप्नोति तथापिद्विभपएवज्ञातव्यः तस्यस्वरा
शिव्यतिरेकात् एतन्मंदबुद्धिव्युत्पादनार्थंस्पष्टतरंव्याख्यायते तथादित्यस्यसिंहः त्रिकोणः तस्माद्वादशस्थानस्यकर्कटस्यचंद्रमास्त्वधिपतिः सएकराश्यधि
पोपिसद्वितीयस्यराश्याधिपत्यस्याभावादादित्यस्यमित्रं सिंहाच्चतुर्थोवृश्चिकः नवमोमेषः तयोर्भौमोधिपतिः आदित्यस्यस्वोच्चंमेषः तस्याधिपोभौमः मेष
स्यसिंहनवमत्वादादित्यस्यस्वोच्चत्वादेकराशित्वंमेषस्यैकत्वाद्वृश्चिकस्यद्वितीयत्वाद्भौमः द्विराश्यधिपोजातः तेनादित्यस्यमित्रं सिंहान्त्यंचमाष्टमौधन्वि
मीनौतयोरधिपतिर्जीवः सचोक्तस्थानद्वयस्याधिपतित्वादादित्यस्यमित्रं गुरुः सिंहाद्वितीयेकादशौकन्यामिथुनौतयोर्बुधः स्वामी तत्रद्वितीयस्थानस्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृ॰ क्तत्वादेकादशस्यानुक्तत्वात्पठितैकराश्यधिपत्वाद्बुधो रवेर्मध्यमः सिंहात्षष्ठसप्तमस्थाने मकरकुंभौ नोक्तौ तयोरधिपत्यादादित्यस्य शनैश्चरः शत्रुः सिंहाद्
टी॰ भ शमतृतीये वृषतुले तयोरनुक्तयोः स्थानयोः राश्यधिपत्वाच्छुक्र आदित्यस्य शत्रुः एवं रवेः अथ चंद्रस्य तथा चंद्रस्य वृषस्त्रिकोणस्तस्माच्चतुर्थस्थानं सिंहस्त
१६ स्याधिपः सूर्यः स एकराश्यधिपोपि स द्वितीयस्य राशेरधिपत्यस्याभावाच्चंद्रस्य मित्रं वृषाद्द्वितीयो मिथुनः पंचमः कन्या तयोर्बुधः अधिपतिः स चोक्तस्था
नद्वयस्याधिपत्वाच्चंद्रस्य मित्रं वृषात्सप्तमद्वादशौ वृश्चिकमेषौ तयोर्भौमः स्वामी तत्र द्वादशस्योक्तत्वात्सप्तमस्यानुक्तत्वात्पठितैकराश्यधिपत्वाद्भौमः
चंद्रस्य मध्यमः वृषादष्टमैकादशौ धन्विमीनौ तयोः गुरुः स्वामी तत्रैकादशस्थानस्यानुक्तत्वात् अष्टमस्योक्तत्वात्पठितैकराश्यधिपत्वाज्जीवश्चंद्रस्य मध्य
स्थः चंद्रस्य वृष उच्चः वृषात्षष्ठस्तुला तस्य शुक्रोधिपतिस्तत्र वृषस्योच्चत्वादुक्तत्वात्पठितैकराश्यधिपत्वाच्चंद्रस्य शुक्रो मध्यस्थः वृषान्नवमदशमौ मकर
कुंभौ तयोः स्वामी शनिः तत्र दशमस्यानुक्तत्वात्पठितैकराश्यधिपत्वात्सौरः चंद्रस्य मध्यस्थः एवं चंद्रस्य अथ भौमस्य भौमस्य मेषस्त्रिकोणं मेषाच्चतुर्थस्था
नस्य कर्कटस्याधिपश्चंद्रः स एकराश्यधिपोपि स द्वितीयस्य राशेरधिपत्याभावाद्भौमस्य मित्रं चंद्रः मेषात्पंचमस्य सिंहस्याधिपः सूर्यः स एकराश्यधिपोपि
स द्वितीयराशेरधिपत्याभावाद्भौमस्य मित्रं सूर्यः मेषान्नवमद्वादशौ धन्विमीनौ तयोर्जीवोधिपतिः स चोक्तस्थानद्वयस्याधिपत्वाद्भौमस्य जीवो मित्रं मेषात्तृ
तीयषष्ठौ मिथुनकन्ये तयोरपठितत्वात् तयोर्बुधस्याधिपत्वाद्भौमस्य बुधः शत्रुः मेषाद्द्वितीयसप्तमौ वृषतुले तयोः शुक्रः स्वामी तत्र द्वितीयोक्तत्वात्सप्तमस्या एम
नुक्तत्वात्पठितैकराश्यधिपत्वाच्छुक्रो भौमस्य मध्यस्थः मेषाद्दशमैकादशौ मकरकुंभौ तयोः सौरोधिपतिः भौमस्य मकर उच्चः तस्योक्तत्वादेकादशस्यानुक्त १६
त्वात्पठितैकराश्यधिपत्वात्सौरो भौमस्य मध्यस्थः एवं भौमस्य अथ बुधस्य बुधस्य कन्या मूलत्रिकोणं तस्माद्द्वादशस्थानस्य सिंहस्याधिपतिः सूर्यः स
एकराश्यधिपोपि स द्वितीयराशेरधिपत्याभावाद्बुधस्य मित्रं सूर्यः कन्यायाः द्वितीयनवमौ तुलवृषौ तयोः शुक्रोधिपतिः स चोक्तस्थानद्वयस्याधिपत्वाद्बु
धस्य शुक्रः मित्रं कन्यायाः एकादशस्थानस्य कर्कटस्याधिपतिश्चंद्रस्तस्यानुक्तत्वाद्बुधस्य चंद्रः शत्रुः कन्यायाः तृतीयाष्टमौ वृश्चिकमेषौ तयोर्भौमोधि
पतिः तत्राष्टमस्योक्तत्वात्तृतीयस्यानुक्तत्वात्पठितैकराश्यधिपत्वाद्भौमो बुधस्य मध्यस्थः कन्यायाः चतुर्थसप्तमौ धन्विमीनौ तयोर्जीवोधिपतिस्तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थस्योक्तत्वात्सप्तमस्यानुक्तत्वात्पठितैकराश्यधिपत्वाज्जीवो बुधस्य मध्यस्थः कन्यायाः पंचमषष्ठौ मकरकुंभौ तयोः सौरोधिपतिस्तत्र पंचमस्योक्तत्वात्षष्ठस्यानुक्तत्वात्पठितैकराश्य
धिपत्वात्सौरो बुधस्य मध्यस्थः एवं बुधस्य अथ गुरोः जीवस्य धन्वी त्रिकोणं तस्मादष्टमस्थानस्य कर्कटस्याधिपतिश्चंद्रः स एकराश्यधिपो पिस द्वितीयस्य राशेरधिपत्याभावाज्जीव
स्य मित्रं चंद्रः धनुषः पंचमद्वादशौ मेषवृश्चिकौ तयोः भौमोधिपतिः स चोक्तस्थानद्वयस्याधिपतित्वाज्जीवस्य मित्रं भौमः धनुषो नवमस्य सिंहस्याधिपतिः सूर्यः स एकराश्यधिपो
पि स द्वितीयस्य राशेरधिपत्याभावाज्जीवस्य मित्रं सूर्यः धनुषो द्वितीयतृतीयौ मकरकुंभौ तयोः सौरोधिपतिः तत्र द्वितीयस्योक्तत्वात्तृतीयस्यानुक्तत्वात्पठितैकराश्यधिपत्वात्सौरो
जीवस्य मध्यस्थः धनुषः सप्तमदशमौ मिथुनकन्ये तयोर्बुधोधिपतिः स्थानद्वयस्यानुक्तत्वात् गुरोर्बुधः शत्रुः धनुषः षष्ठैकादशौ स्थानौ वृषतुलौ तयोः शुक्रोधिपतिः स्थान २
द्वयस्यानुक्तत्वाच्छुक्रो गुरोः शत्रुः एवं जीवस्य अथ शुक्रस्य शुक्रस्य तुला त्रिकोणं तस्मान्नवमद्वादशस्थाने मिथुनकन्ये तयोर्बुधोधिपतिः स चोक्तस्थानद्वयस्याधिपति
त्वाच्छुक्रस्य मित्रं बुधः तुलायाः चतुर्थपंचमौ मकरकुंभौ तयोरधिपतिः सौरः स चोक्तस्थानद्वयस्याधिपत्वाच्छुक्रस्य सौरः मित्रं तुलाद्वितीयसप्तमौ वृश्चिकमेषौ तयोर्भौ

सत्योक्ते सुहृदस्त्रिकोणभवनात्स्वात्स्वांत्यधीधर्मपास्तोच्चायुः सुखपाः स्वलक्षणविधेनान्ये विरोधारिति १४॥

मोधिपतिः तत्र द्वितीयस्योक्तत्वात्सप्तमस्यानुक्तत्वात्सत्पठितैकराशि अधिपत्वाद्भौमः शुक्रस्य मध्यस्थः तुलातृतीयषष्ठौ धन्विमीनौ तयोर्जीवोधिपतिः मीनः शुक्र
स्योच्चस्तस्योक्तत्वाद्धनुषोनुक्तत्वात्पठितैकराश्यधिपत्वाज्जीवः शुक्रस्य मध्यस्थः तुलादशमः कर्कटस्तस्यानुक्तत्वाच्छुक्रस्य चंद्रः शत्रुः तुलादेकादशः सिंहस्तस्या
धिपः सूर्यः तस्य स्थानस्यानुक्तत्वाच्छुक्रस्यार्कः शत्रुः एवं शुक्रस्य अथ सौरस्य सौरस्य कुंभस्त्रिकोणं तस्मात्पंचमाष्टमौ मिथुनकन्ये तयोर्बुधोधिपतिः स चोक्तस्था
नस्याधिपतित्वात्सौरस्य बुधो मित्रं सौरस्योच्चस्तुला कुंभाच्चतुर्थनवमौ वृषतुलौ तयोरधिपतिः शुक्रः स चोक्तस्थानद्वयस्याधिपतित्वात्सौरस्य शुक्रो मित्रं कुंभाद्वि
तीयैकादशौ मीनधन्विनौ तयोर्जीवोधिपतिः द्वितीयस्योक्तत्वादेकादशस्यानुक्तत्वात्तस्य जीवो मध्यस्थः कुंभात्षष्ठः कर्कटस्तस्याधिपश्चंद्रस्तस्यानुक्तत्वात्सौर
स्य चंद्रः शत्रुः कुंभात्सप्तमः सिंहस्तस्याधिपतिः सूर्यस्तस्यानुक्तत्वात्सौरस्य सूर्यः शत्रुः कुंभात्तृतीयदशमौ मेषवृश्चिकौ तयोर्भौमोधिपतिस्तयोरनुक्तत्वाद्भौ
मः सौरस्य शत्रुरिति अधुना सत्योक्तेनैकद्येकानुक्तभपान्ग्रहस्य सुहृन्मध्यस्थ शत्रून् शार्दूलविक्रीडितद्वयेनाह १५ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृ. ज. टी. १७

१८ति शत्रूमंदसितावितिरवेरादित्यस्यमंदःसौरः सितःशुक्रः एतौद्वौशत्रूरिपू शशिजोबुधः समोमध्यस्थः नशत्रुर्नमित्रमुदासीनइत्यर्थः शेषाग्रहाश्चंद्रांगा
रकगुरवोमित्राणीति तीक्ष्णांशुरित्यादिशीतगोश्चंद्रमसः तीक्ष्णांशुः सूर्य्यः हिमरश्मिजोबुधः एतौद्वौसुहृदौमित्रे शेषाःसर्वेएवभौमजीवशुक्रसौराः समामं
ध्यस्थाउदासीनः जीवेन्दूष्णकराइति कुजस्यभौमस्यजीवोबृहस्पतिः इंदुश्चंद्रः उष्णकरःसूर्य्यः एतेगुरुचंद्रसूर्य्याःसुहृदोमित्राणि ज्ञोबुधःशत्रुः सितार्की
शुक्रसौरौसमौमध्यस्थावितिमित्रेसूर्य्यसितावितिसूर्य्योरविः सितःशुक्रः एतौद्वौबुधस्यमित्रेसुहृदौ हिमगुश्चंद्रमाःशत्रुररिः अपरेऽन्येभौमगुरुसौराः स
मामध्यस्थाइति १६ सूरेरित्यादि सूरेर्बृहस्पतेः सौम्योबुधःसितःशुक्रः एतावरीशत्रू रविसुतः सौरोमध्यस्थः अपरेअन्येरविचंद्रभौमाः अन्यथामित्राणीत्यर्थः
सौम्यार्कीत्यादि शुक्रस्यसौम्यार्कीबुधसौरौसुहृदौमित्रे कुजोभौमः गुरुर्जीवः एतौद्वौसममध्यस्थौ शेषावादित्यचंद्रावरीशत्रू शुक्रस्तावित्यादि सौरस्यशनेः

शत्रूमंदसितौसमश्चशशिजोमित्राणिशेषारवेस्तीक्ष्णांशुर्हिमरश्मिजश्चसुहृदौशेषाःसमाःशीतगोः जीवेंदूष्णकराःकुजस्यसुहृदोज्ञो
रिःसितार्कीसमौमित्रेसूर्य्यसितौबुधस्यहिमगुःशत्रुःसमाश्चापरे १६ सूरेःसौम्यसितावरीरविसुतोमध्योपरेत्वन्यथासौम्यार्कौसुहृदौसमौ
कुजगुरूशुक्रस्यशेषावरी शुक्रज्ञौसुहृदौसमःसुरगुरुःसौरस्यचान्येरयोयेप्रोक्ताःस्वत्रिकोणभादिषुपुनस्तेमीमयाकीर्तिताः १७ अन्यो
न्यस्यधनव्ययायसहजव्यापारबंधुस्थितास्तत्कालेसुहृदःस्वतुंगभवनेप्येकेरयस्त्वन्यथा॥१ शुक्रज्ञौसितबुधौसुहृदौमित्रे सुरगुरुर्जीवः समोमध्य
स्थः अन्येअपरे रविशशिभौमाः अरयः शत्रवः येप्रोक्ताइत्यादि येमयास्वत्रिकोणभादिषुपूर्वेत्रिकोणभवनात्स्वात्ययधीधर्म्मपाइत्यादिग्रंथेनोक्तास्तेएवेह
प्रविभज्यपुनर्भूयःप्रकीर्तिताः उदाहरणत्वेनप्रदर्शिताइति एवंनैसर्गिकंमित्रामित्रमध्यस्थविभागंशार्दूलविक्रीडितेनाह १७ अन्योन्यस्यपरस्परमेतेषु
धनादिषुस्थानेषुग्रहस्यग्रहाव्यवस्थितास्तत्कालेजन्मनियात्रायांविवाहेप्रश्नेवातत्समयेसुहृदोमित्राणिभवंति धनस्थानंद्वितीयंव्ययस्थानंद्वादशमायः
स्थानंएकादशंसहजस्थानंतृतीयंव्यापारस्थानंकर्मोदशमंबंधुस्थानंचतुर्थंएते षुस्थानेषुयोग्रहस्थितः सयस्मात्ग्रहात्व्यवस्थितस्तस्यसुहृन्मित्रंभवे

राम १७

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वतस्यापिभवति यत्तदुक्तमन्योन्यस्येति स्वतुंगभवनेष्वकेंद्र इति एकेन्येपुनराचार्य्याः ग्रहस्ययस्योच्चे योग्रहः स्थितः सतस्यतात्कालिकंमित्रमिच्छंति तेचयंयव
नेश्वराद्यः तथाचतद्वाक्यं मूलत्रिकोणाद्दलधर्म्मबंधुपुत्रव्ययपस्थानगताग्रहेंद्राः तात्कालिकास्तेसुहृदोभवंति स्वोच्चेचयोयस्यविकृष्टवीर्य्ये इति एतदप्या
चार्य्यैः नाभिप्रेतं यस्मादनेनैवसत्वस्यजातके उक्तं तत्कालेचदशायबंधुसहजस्वांत्येषुमित्रंस्थिताइति अरयस्त्वन्यथेति अन्यथाअन्येनप्रकारेणग्रहस्य
ग्रहाव्यवस्थितास्तत्काले ऽरयः शत्रवोभवंति अन्योन्यमिति तद्यथा एकराशिगतः पंचमषष्ठः सप्तमाष्टमनवमस्थानस्थश्चतत्कालंशत्रुर्ग्रहस्यग्रहोभवति॥
द्वौकानुक्रमपानिति पूर्वमेवदर्शितद्वितीयमपानेकमपाननुक्रमपांश्चमित्रमध्यस्थशत्रून्नैसर्गिकाञ्छत्रूमंदसितावित्यादिनाग्रंथेनोक्तास्तान्संचिंत्यविज्ञा
यतत्कालेजन्मादौतानेवाधिसुहृन्मित्रादिभिरुपलक्षितान्कल्पयेत् तत्रधनादीनिमित्रस्थानानितेषुनैसर्गिकसुहृत्स्थितोधिमित्रंभवतिमध्यस्थोमित्रं शत्रुर्म
ध्यस्थइति धनादिवर्ज्जितेष्वन्येषुस्थितोनैसर्गसुहृन्मध्यस्थोभवति मध्यस्थःशत्रुःशत्रुरधिशत्रुरिति अत्रग्रहाणांचतुर्विधंच स्थान दिक् चेष्टा कालबला

द्वौकानुक्रमपान्सुहृत्समरिपून्संचिंत्यनैसर्गिकान्तत्कालेचपुनस्तुतानधिसुहृन्मित्रादिभिः कल्पयेत् १८ स्वोच्चसुहृत्स्वत्रिकोणनवां
शैः स्थानबलंस्वगृहोपगतेच॥ऽ एवं तत्रतावत्स्थानदिग्बलंदोधकेनाह १९ स्वोच्चसुहृदिति स्वग्रहणंप्रत्येकमभिसंबध्यते तत्रस्वोच्चेस्थितोग्र
होबलवान्भवतितात्कालिकस्यसुहृदोमित्रस्यक्षेत्रेस्थितोबलवानेव स्वत्रिकोणे आत्मीयेमूलत्रिकोणेस्थितः स्वनवांशेस्थितः स्वगृहेस्वराशावुपगतः प्रा
प्तोबलवानेवएतेषामन्यतमेव्यवस्थितोग्रहः स्थानबलयुक्तोभवति तत्रार्कस्यसिंहः स्वत्रिकोणं तदेवस्वगृहंक्षेत्रं चंद्रस्यवृषउच्चः सएवत्रिकोणं भौमस्य
मेषः त्रिकोणं तदेवस्वक्षेत्रंबुधस्यकन्याउच्चः सैवमूलत्रिकोणस्यक्षेत्रं गुरोः धन्वीत्रिकोणंतदेवस्वक्षेत्रं शुक्रस्यतुलात्रिकोणंतदेवस्वक्षेत्रं सौरस्यकुंभस्त्रिको
णंतदेवस्वक्षेत्रं एतेषामाचार्य्येणविशेषेनोक्तः अस्माभिरन्यहोराशास्त्रादानीयशिष्यहितायेहलिख्यते तथाचसारावल्यां विंशतिरंशाः सिंहेत्रिकोणमपरे
स्वभवनमर्कस्य उच्चंभागत्रितयंवृषमिंदोःस्यात्त्रिकोणमपरेभागाः द्वादशभागामेषेत्रिकोणमपरेस्वभंतुभौमस्य उच्चफलं कन्यायांबुधस्यतुंगांशकैःसदाचिंं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृ. टी. भ १८

परतस्त्रिकोणजातः पंचभिरंशैः स्वराशिजं परतः दशभिर्भागैर्ज्जीवस्य त्रिकोणफलं स्वभं परं चापे शुक्रस्य तु तिथयो भागास्त्रिकोणमपरे धटे स्वस्वराशिश्च कुंभे त्रि
कोणजनितेरविजस्य रवेर्य्याम्ये सिंहे एतदार्य्याचतुष्टयं दिक्षुबुधांगिरसावित्यादि प्राच्यां दिशि बुधांगिरसौ बलिनौ भवतः तत्र पूर्वस्यां बुधां गिर
सौ ज्ञजीवौ बलिनौ भवतः लग्नस्थावित्यर्थः दक्षिणस्यां रविभौमौ सूर्य्यांगारकौ दशमस्थावित्यर्थः पश्चिमायां सूर्य्यसुतः शनिः सप्तमस्थ इत्यर्थः उत्तरस्यां
सितशीतकरौ शुक्रचंद्रौ चतुर्थस्थावित्यर्थः यो ग्रहो यत्र बली स तस्मात्सप्तमस्थानस्थो विबलो भवति मध्येनुपातऊह्यमिति सर्वत्रेयं परिभाषा ग्रहाणामुच्चनी
चप्रविभागे राशीनां दिग्बलप्रविभागेपि तथा च यवनेश्वरः गुर्वैंदवौ पूर्वविलग्नसंस्थौ नभस्तलस्थौ च दिवाकरारौ सौरोस्तगः शुक्रनिशाकरौ तु तलेस्थितौ तौ स

बलौ भवेतामिति अन्यबलेग्रहाणां अंतरे नुपात एव युक्तः एतद्ग्रहाणां दिग्बलमुच्यते अधुना चेष्टाबलं द्योधकेनाह १९ उदगयने
ति मकरादिराशिषट्कमुत्तरमयनं कर्कटादिराशिषट्कं दक्षिणमयनमिति उदगयने उत्तरायणे रविशीतमयूखौ सूर्यचंद्रमसौ बलिनौ भव

दिक्षु बुधांगिरसौ रविभौमौ सूर्य्यसुतः सितशीतकरौ च १९ उदगयने रविशीतमयूखौ वक्रसमागमगाः परिशेषाः॥

तः परिशेषाः भौमबुधगुरुसितसौराः वक्रगा विपरीतगतयो बलिनो भवंति तथा च समागमगाश्चंद्रेण सहिताः बलिन एव चंद्रेण संयो
गो ग्रहाणां समागमशब्दो वाच्यः रविणा सहाऽस्तमयो भौमादीनां परस्परं युद्धं उक्तं चाचार्य्यविष्णुचंद्रेण दिवसकरेणास्तमयः समाग

एभ
१८

मः शीतरश्मिसहितानां कुसुतादीनां युद्धं निगद्यते न्योन्ययुक्तानामिति विपुलकरा इति विपुलाः करा येषां ते विपुलकराः विस्तीर्णरश्मयो बलिनो भवंति शीघ्र
केंद्रे द्वितीयतृतीयपदस्थे ग्रहस्य विपुलकरत्वं प्रायः संभवति वक्रासन्नत्वात् युधि संग्रामे चोत्तरसंस्था बलिन एव कुसुतादीनां युद्धमित्युक्तं तत्र यः उत्तर
दिग्भागसंस्थितो जयासच बलवान् उत्तरसंस्थत्वमत्रोपलक्षणार्थं यस्तेजयी स एव बलवान् तत्रैतज्जयलक्षणं दक्षिणदिक्स्थः परुषो वेपथुरप्राप्य संनि
वृत्तोऽणुः अधिरूढो विकृतो निष्प्रभो विवर्णश्च यः स जितः उक्तविपरीतलक्षणसंपन्नो जयगतो विनिर्दिष्टः विपुलः स्निग्धो द्युतिमान् दक्षिणदिक्स्थोपि जययुक्त इति॥

CC-0. In Public Domain. Digitization by eGangotri

एतच्छुक्रस्यप्रायः संभवति यस्मात्पुलिशाचार्य्यैः सर्वेजयिनउदक्स्थाद्दक्षिणदिक्स्थोजयिशुक्रइति एतच्चेष्टाबलं एषामन्यतमेनसंयुक्तश्चेष्टाबलयुक्तोभ
वति अधुनाग्रहाणांकालबलंनैसर्गिकबलंचमालिन्याह २० निशीति शशिकुजसौराश्चंद्रभौमशनयः निशिरात्रौवीर्य्यवंतोबलिनः ज्ञोबुधः सर्वदा स
र्वस्मिन्कालेनिशिदिनेचबली अन्येपरेरविगुरुसितास्त्वह्नि दिनेबलिनः क्रूराःपापाः प्रागुक्ताः बहुलपक्षेकृष्णपक्षेपिक्रूरोबलवान्भवति यस्माद्यवनेश्वरः
मासेतुशुक्लेप्रतिपत्प्रवृत्तेपूर्वेशशीमध्यबलोदशाहे श्रेष्ठोद्वितीयोऽल्पबलस्तृतीयेसौम्यैस्तुदृष्टोबलवान्सदैवेतिसितगताःशुक्लपक्षेस्थिताःसौम्याःब
लिनः द्व्यनेतिप्रमाणंयस्यद्व्यनंतत्तुवर्षस्ववर्षे आत्मीयवर्षेयोग्रहोयत्रवर्षेऽधिपतिःसतत्रबलवान्स्वदिवसे आत्मीयवासरे स्वहोरायां कालहो
रायां तथा स्वमासेयस्मिन्मासेयोऽधिपतिःसतत्रबलिः द्व्ययनदिवसहोरामासनाथाधिपैः येक्षेत्रग्रहैःकालबलोपेतैरुपलक्षणीयाः तेकालबलोपेता
इत्यर्थः केचिद्व्ययनदिवसहोरामासपैरितिपठ्यते स्वदिवससमहोरामासपैरितिपठंतियएषामपराधपाठः एतेषुकालेषुसर्वेएवबलिनोभवंति एत

विपुलकरायुधिचोत्तरसंस्थाश्चेष्टितवीर्य्ययुताःपरिकल्प्या २० निशिशशिकुजसौराः सर्वदाज्ञोन्हिचान्येबहुलसितगताःस्युःक्रूरसौ
ग्रहाणांकालवीर्य्यं एतेषांमतेनसंयुक्तःकालबलसंपन्नोभवति शकुबुगुशुचराद्याइति शादयोवर्णाः एषांशकारआद्यास्ते ऽभ्याःक्रमेण ॥ ॥
शाद्याःशनैश्चरःसर्वेभ्योबलहीनः कुकाराद्योकुजःभौमःशनैश्चराद्बलवान् बुकाराद्योबुधःसभौमाद्बलवान् गुकाराद्योगुरुःसबुधाद्बली शुकारा
द्योशुक्रःसजीवाद्बलीचकाराद्यश्चंद्रःसशुक्राद्बली रकाराद्योरविस्सचंद्राद्बलीति एतद्ग्रहाणांनैसर्गिकबलं यस्माद्देवानेनस्वल्पजातकेउक्तं मन्दारसौ
म्यवाक्पतिसितचंद्रार्कायथोत्तरंबलिनः नैसर्गिकबलमेतद्बलसाम्येस्यादधिकचिंतेति १ एतद्ग्रहाणांग्रहयोर्वाबलसाम्येभवति ततस्माद्बलाधिक्यं
अधिवीर्य्यवत्तोज्ञेयइति अत्राचार्य्येणचतुःप्रकारस्यफलंनोक्तंतच्चाभिरन्यशास्त्रलिख्यते तथाचसारावल्यांउच्चबलेनसमेतःपरांविभूतिंग्रहःप्रसा
धयति स्वत्रिकोणबलःपुंसांसाचिंत्यं १ बलवतिन्त्वंवा स्वर्क्षबलेनचसहितप्रमुदितधनधान्यसंपदाक्रांतं मित्रबलसंयुक्तोजनयतिकीर्त्यान्वितंपुरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ० षंतेजसीनमतिसुखिनंसुस्थि वसतिभवनृपाद्बलस्थंस्वनवांशस्कबलयुक्तः करोतिपुरुषंग्रहसिद्धंच सूक्ष्मजातके उक्तं बलवान्मित्रस्वग्रहोच्चनवांशके शादृक्षितःशु
टी०म० भैश्चापि चंद्रसितौस्त्रीक्षेत्रेपुरुषक्षेत्रेयोपगताःशेषाइति तत्रशुभदृष्टफलंतावत् शुभदर्शनबलसहितः पुरुषंकुर्य्योद्धूतान्वितंख्यातंशुभगं प्रधानमखिलंसुरूप दे
१९ हंचसौम्यंच पुंस्त्रीभवनबलेनचकरोतिजनपूजितंकलाकुशलं पुरुषंप्रसन्नवित्तंकल्पंपरलोकभीतंच आशाबलसमवेतोनयतिस्वदिशनभश्चरः पुरुषं नीवावस्त्रवि
भूषणंवाहसासौख्यान्वितंकुरुते क्वचिद्राजान्वितंक्वचित्सुजा क्वचिद्यशः ददातिविहगश्चत्रंश्चेष्टावीर्य्यसमन्वितः वक्रिणस्तुमहावीर्य्येःशुभाराज्यप्रदाग्रहाः पापाःव्य
सनदाःपुंसांकुर्वंतिचवृथाटनं स्वस्थशरीरसमागमसुखमाहवजयबलेनविदधाति शुभमतुलंविहगोंद्योराज्यंचविनिर्ज्जितंताराभिः रात्रिदिवाबलसर्णेभूगजला
भेनशौर्य्यपरिवृद्धौमलिनयति शत्रुपक्षंभुंजतिलक्ष्मीनभश्चरैःपुरुषःद्विगुणंद्विगुणंदद्युः वर्षाधिपमासदिवसहोरेशाःकुर्य्युवृद्धासौख्यस्वदशासुधनंचकीर्त्तिं
च पक्षबलाद्रिपुनाशरत्नांवरदत्तिसंपदंदद्युः स्त्रीकनकभूमिलाभंकीर्तिंचशशांक धवलितरां सकलबलभारभारितनिर्मलकरजालभासुराः सततंराज्यं

द्ध्ययनदिवसहोरामासपैः कालवीर्य्येशकुबुगुशुचराद्याःवृद्धितोवीर्य्यवंतः २१॥

ग्रहाविदध्युःसाख्यंचमनोरथातीतं आचारसैन्यशुभशौचयुताःसुरूपाःतेजस्विनःकृतविदोद्विजदेवभक्ताःसहस्त्रमाल्यजनभूषणसंप्रियाश्चसौम्यग्रहैर्बलयुतैःपु
रुषाभवंति लुब्धाककुर्म्मनिरतानिजकार्य्यनिष्टाःपापग्रहैर्बलयुतैर्पिशुनाः कुरूपाःपुंराशिषुग्रहैंद्रैवीराःसंग्रामकांक्षिणोबलिनः निस्नेहाःसुकठोराःक्रूरामूर्खा
श्चजायंते युवतिभवनस्थितेषुचमृदवःसंग्रामभीरवःपुरुषाःजलकुसुमवस्त्रनिरतासौम्याःकलहाःससंयुक्ताइति एवतत्सर्वेसुगमं॥ ॥इतिभट्टोत्पलविरचि
तेबृहज्जातकविवृतौग्रहयोनिभेदाध्यायोद्वितीयः॥ ॥अथातोवियोनिजन्माध्यायोव्याख्यायते कःपुनस्थावियोनिजन्मेत्युच्यते विविधवियोनिजन्मानो
तिर्य्यक्पक्षिसरीसृपचराद्दीनामुत्पत्तिर्वियोनिजन्मेत्युच्यते तत्रप्रष्टुःसकाशाज्जातककालंविज्ञायवियोनिजन्मनिश्चयज्ञानंभवति तत्रवसंततिलकेनाह॥क्रूरग्रहैःसु
बलिभिरितिचंद्रोपगद्विरसभागेति चंद्रमाउपगतोव्यवस्थितोयस्मिन्द्विरसभागेद्वादशभागेतत्समानरूपंतत्सदृशंरूपंसत्वंप्राणिनंवियोनिजन्मानंवदेत्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सचद्विरसभागोयदि वियोनिसंज्ञोभवति सचंद्राक्रांतोद्वादशभागोयदि वियोनिसंज्ञस्तदैववदेन्नान्यथेति तत्रमेषद्वादशभागव्यवस्थिते चंद्रमसि मेषाख्यस्यं वियोनिजन्मज्ञातव्यं अजादिछागादेः एवंवृषद्वादशभागव्यवस्थिते वृषाख्यस्यमहिषादेश्च कर्कटद्वादशभागव्यवस्थितेकुलीरादेः सिंहद्वादशभागव्यवस्थितेः सिंहद्वीपिशृगालश्वानमार्ज्जारादिसत्वानांजन्म वृश्चिकद्वादशभागव्यवस्थिते सर्वकीटादेः धनुर्द्धरद्वादशभागेद्वितीयार्द्धेव्यवस्थितेऽश्वगर्द्दभजन्म मकरद्वादशभागेपूर्वार्द्धेव्यवस्थितेमृगजन्म अपरेमंडुकादेजलचरप्राणिनइत्युक्तंति मीनेमीनस्यैव किमेतावतैववियोनिजन्मनिश्चयोनेत्याह क्रूरग्रहैरित्यादि क्रूरग्रहैरादित्यागारकशनैश्चरैर्बुधेनचतदेकतमेनयुक्तेनक्षीणेनचंद्रमसाएतैःसुबलिभिरितिबलसंयुक्तैः सौम्यैःशुभग्रहैः क्रूरैरपरिशिष्टैर्विबलैर्वीर्य्यरहितैः क्लीबेशनैश्चरेबुधेवाचतुष्टयगतेकेंद्रस्थेएकोवियोनिजन्मयोगः तदेवेक्षणाद्वा चंद्रमसिप्रदर्शितवियोनिजन्मद्वादशभागव्यवस्थिते क्रूरैर्बलयुक्तैः सौम्यैः विबलैर्हीनबलैर्यैन्ततत्रावस्थितेनबुधेनशनैश्चरेणवालग्नेदृष्टेवियोनिजन्मज्ञानेद्वितीयोयोगः अर्थादेवद्विपदद्वादशभागव्यवस्थितेचंद्रमसिपूर्वोक्तयोगाभावेद्विपदजन्म तथाचसारावल्यां क्रूरैःसुबलसमेतैर्विबलैः सौम्यैर्वियोनिभागगते चंद्रेत्तशनीकेंद्रेतद्दीक्षितेचोदयेवियोनिःस्यात् मेषेशशीनदंशेछागादिप्रसवमाहुराचार्य्याः गोमहिषाणां गोंशेनस्वरूपारगांत्रितीयेंशे तत्रचतुर्थेभागेकूर्म्मादीनांभवेदुदकजानांजन्म व्याघ्रादीनांपरतः परतोज्ञेयानराणांच वणिगंशेनस्वरूपावृश्चिकभागेतथाभुजंगाद्याः खरतुरगाद्यानवमेमृगशिथिनांस्यात्तथादशमेज्ञेयाश्चतत्रविविधावृक्षास्तृणजातयश्चित्राः एकादशेचपुरुषाजलजानानामविधाश्चांत्येश्वमार्ज्जारमूषिकादीनांसंख्याज्ञानं श्वप्रभृतीनांप्रभवेयावंतोद्वादशांशकेलग्नेतावंतिएववदेत्पाज्ञःपुंस्त्रीसंज्ञान्यपत्यानि अथवियोनिजन्मज्ञानयोगांतरंवैतालीयेनाह १ पापाइति चंद्रोपगद्विरसभागसमानरूपमित्यनुवर्त्तते पापाः क्रूरग्रहाः प्रागुक्ताबलिनः सबलाः नकेवलंयावत्स्वभागाःस्वनवांशस्थाः भागग्रहणेनेहनवांशकएवज्ञातव्यः शोभनासौम्यग्रहाः प्रागुक्ताः पारक्येपरनवांशके विबलावीर्य्यरहिताव्यवस्थिताः लग्नंतात्कालिकंचयदिवियोनिसंज्ञिकंभवति तदाप्यस्मिन्नपियोगेचंद्रोपगद्विरसभागसमानरूपंसत्वंजातमितिज्ञानावदेत् ॥

क्रूरग्रहैःसुबलिभिर्विबलैश्चसौम्यैः क्लीबेचतुष्टयगतेतदवेक्षणाद्वा चंद्रोपगद्विरसभागसमानरूपंसत्वंवदेद्यदिभवेत्सवियोनिसंज्ञा १
पापाबलिनःस्वभागगाः पारक्येविबलाश्चशोभनाः ॥

CC-0. In Public Domain. Digitization by eGangotri

वृ॰ अथवियोजनावपिचतुष्पदानांप्राधान्येनोपयोगित्वात्तदंगविभागंराश्यात्मकमुपजात्याह २ क्रियोमेषश्चतुष्पदानांशिरस्तदुपलक्षितमित्यर्थः वृषोवक्त्रंगले
टी॰ म वक्त्रंमुखंगलंकंठोवृषः अन्येमिथुनादयोयथाक्रमपादादिमिथुनः पादांसकंपादौपूर्वपादावंसोत्कंधोएष्टंकर्कटः उरोवक्षःसिंहः अथशब्दआनंतर्य्ये पार्श्वे
२०॰ पार्श्वद्वयंकन्या कुक्षिद्वयंतुला अपानंगुदोवृश्चिकः अंघ्रीपश्चिमपादौधन्वी अथशब्दोपादपूर्णे मेढ्रंलिंगंमुष्कोवृषणोमकरः स्फिकौकुंभः पुछंलांगूलंमी
नइतिशब्दःप्रकारयकेचिचतुष्पदांगेराशिविभागंआह केचिद्वदंतीत्याचार्य्याइतिवाक्याध्याहारः चतुष्पदग्रहणमुपलक्षणार्थे पक्षिणामप्येवं तेषांपूर्वपा
दस्थानेपक्षःपाली शेषंसामान्यं प्रयोजनं राश्युपलक्षितेंगेवर्णोप घातादेर्विज्ञानमिति अथवियोनिवर्णज्ञानंवैश्वदेव्याह ३ लग्नांशइति लग्नेयेनग्रहे
णयोगोयस्तत्रव्यवस्थितस्तस्ययोयोवर्णःप्राप्तोवर्णस्तांस्तसितातिरिक्तहरिताइति तद्वर्णेवियोनौसत्वंजातोवदेत् हतनष्टादौवा ईक्षणाद्वेति अथलग्नेनक

लग्नेचवियोनिसत्वकंदृष्ट्वात्रापिवियोनिमादिशेत् २ क्रियःशिरोवक्त्रागलेवृषोन्येपादांसकंएष्टमुरोथपार्श्वे कुक्षिस्त्वपानांघ्र
यमेढ्रमुष्कौस्फिक्पुछमित्याहचतुष्पदांगे ३ लग्नांशकाद्ग्रहयोगेक्षणाद्वावर्णान्वदेद्बलयुक्ताद्वियोनौ॥ ॐ ॥ ॥ ॥

श्चिद्ग्रहोभवतितदायेनग्रहेणलग्नमीक्ष्यतेदृश्यतेतस्ययोवर्णस्तंवदेत् अथलग्नंनकेचिद्युतंदृष्टंभवतितदालग्नांशकात् लग्नेयद्राशिनवांशकोदयस्तद्राशि रम
वर्णरक्तःश्वेतादिकंवावदेत् दृष्ट्यासमानामिति अथवहुभिर्ग्रहैर्लग्नंयुतंदृष्टंचभवतितदाबहूनेववर्णान्वदेत् तत्रापियोवीर्यवान्सबलसद्वर्णबाहुल्यं यदु २०
क्तं बलयुक्तात्इति अथलवस्वस्वामिनायुतदृष्टस्यराशेः संवंधिनवांशकोदयोलग्नगतोभवतितदातद्वर्णमिववदेत् यत्रयोग्रहोवियोनौयस्मिन्नंगेव्यवस्थि
तस्तन्नामीयवर्णंकरोतितस्मिन्नंगे एतत्कुतोलब्धं रेखांवदेत्स्मरसंस्थैश्चएष्टइतिवचनात् लग्नात्स्मरसंस्थैः सप्तमस्थानगतैःग्रहैर्बलवद्ग्रहवर्णान्पृष्टेवियो
नौरेखांवदेत् तथाचसारावल्यां मेषादिभिरुदयस्थैरंशैर्वाग्रहयुतैश्चदृष्टैर्वा स्वगृहांशकसंयोगाद्विद्याद्वर्णान्यपरांशकेहूतौ १ सप्तमसंस्थाःकुर्य्युःएष्टेरेखां
स्ववर्णसमां वीक्ष्यंतेयावंतोवियोनिवर्णाश्चतावंतेव २ बलदीप्तागगनचरः करोतिवर्णंवियोनीनां पीतंकरोतिजीवःशशीसितभार्गवोविचित्रंच ३ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्तौ दिनकररुधिरौ रविजः कृष्णं बुधः सबलं खेराशौ परभागे परराशौ खे नवांशके तिष्ठन् ४ पश्यन् ग्रहो विलग्नं स्ववर्णवर्णं तदाकृते अधुनापक्षिणो जन्मज्ञानं वंश
स्थेनाह ४ खगेति खगेद्दकाणे पक्षिद्रेष्काणे तत्रपक्षिद्रेष्काणो मिथुनो द्वितीयः सिंहप्रथमः तुला द्वितीयः कुंभप्रथमः एषामन्यतमद्रेष्काणे उदयति शनैश्च
रेन्दू ईक्षणयोगसंभवाः यथाक्रमं विहगाः पक्षिणः स्थलांबुजाः संभवंति पक्षिद्रेष्काणे शनैश्चरेण युते दृष्टे वा स्थलजपक्षिणां जन्म वक्तव्यं एवमिंदुना युते दृष्टे वा ज
लजानां पक्षिणां जन्म इति एको योगः अत्र लग्ने प्रथमदशकभागे यो ग्रहः स्थितः प्रथमद्रेष्काणस्थः ततः परमान्यस्मिन् दशके द्वितीयद्रेष्काणस्थस्ततः परमान्य
स्मिन् दशके तृतीयद्रेष्काणस्थ इति एवं त्रयो भागा लिप्ताश्च विंशतिकलाश्चैक नवांशक प्रमाणं परिकल्प्य ग्रहस्थितिरन्वेष्या सर्वराशिष्वियं परिभाषा बलसंयुतेन वा ग्र
हेण युक्ते चरभांशकोदये यस्य तस्य लग्नस्य चरनवांशकोदये बलसंयुतेन ग्रहेण संयुक्ते तथेति तेन शनैश्चरयुतदृष्टे स्थलजानां पक्षिणां जन्म चंद्रयुतदृष्टे जलजा
नां पक्षिणां जन्मज्ञानं द्वितीयो योगः बुधांशके वेति बुधनवांशके मिथुनकन्ययोरन्यतमे तात्कालिकस्य लग्नस्योदिते तस्मिंश्च बलवद्ग्रहसंयुक्ते शनैश्चरयुतदृष्टे

दृक्ष्यासमानान्प्रवदेत्स्वसंख्यया रवां वदेत्स्मरसंस्थेश्च दृष्टे ॥ ४ ॥ खगेद्दकाणे बलसंयुतेन वा ग्रहेण युक्ते चरभांशकोदये बुधां
शके वा विहगाः स्थलांबुजाः शनैश्चरेंद्वीक्षणयोगसंभवाः ५ होरेंदुसूरिरविभिर्विबलैस्तरूणां तोयस्थले तरुभवोंऽशकृतः प्रभेदः ॥

स्थलजानां जन्म चंद्रयुतदृष्टे जलजानामिति जन्मः तृतीयो योगः एते शनैश्चरस्येंद्रोर्वा संयोगेक्षणेन वा संभवंतीति तथा च सारावल्यां विहगोदितदृक्काणेग्र
हेण बलिना युते थ चरभांशे बौधांशे वा विहगाः स्थलांबुजाः शनिशशीक्षणाद्योगात् १ अधुना वृक्षजन्मज्ञानं वसंततिलकेनाह ५ होरेति होरा लग्नं इंदुश्चंद्रः सू
रिर्जीवः रविरादित्यः एतैर्विबलैर्वीर्यरहितैः प्रष्टा तरूणां वृक्षाणां जन्म पृच्छति इति वक्तव्यं तत्रायं विशेषः तोयस्थल इति तत्र तरुभवो वृक्षजन्म किम् तोये जलेस्थ
लेनिर्जले चेति तत्प्रभेदस्तद्विकल्पोंऽशकृतो नवांशकविहितः तत्र परस्यांशकोदये तोयसमीपजान् वृक्षान् ५ नूपजान्तोयराशयः कर्कटमकरपश्चार्द्धमीनाः
एतैरनूपजवृक्षजन्मेति ज्ञानं इतरराश्यंशकोदये स्थलवृक्षजन्मज्ञानं तत्रापि संख्येयं लग्नाद्ग्रह इति उदितांशः स्थलचारी जलचारी वा भवति तदधिपतिर्यो
वत्संख्ये तत्र शो लग्नाद्भवस्थितस्तावंत एव संख्यास्तरवो वृक्षाः स्थलजा जलजा वा वक्तव्याः अत्राप्यंशकपतिवशाद्स्वमानायुर्दायविधिना द्वित्रिगुणत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ· स्वतुंगवक्रोपगतैस्त्रिसंगुणं द्विरुत्तमस्वांशकभागगैरिति अत्र द्वित्रिगुणत्वप्राप्तैर्यावंत्योगणनाभवंतितावंत्योकार्य्येत्यागमविदः तथाचसारावल्यां लग्नार्कजी
टी· भ वचंद्रे खलेशेषैश्चमूलयोनिः स्यात् स्थलजलभवनविभागावृक्षादीनांप्रभेदकराः स्थलजलयोरवगोलग्नाद्यावतिराशौतुतेपितावंत्यः द्वित्रिगुणत्वंतेषामायुर्द्रा
२१ यप्रकारोक्तं अधुनास्थलजलजानामंशस्वामिवशाद्वृक्षाणांविशेषज्ञानंमंदाक्रांतयाह ६ अन्तस्सारानिति रविः सूर्य्योंशकपतिरंतस्सारान् मध्यदृढांशांशपा
दीन्वृक्षाञ्जनयतिउत्पादयति सूर्य्यस्तुरक्ति दुर्भगान्दृढन्नसोरप्रियान् कुकुपप्रभृतीञ्जनयति तुहिन किरणश्चंद्रः क्षीरोपेतान्सक्षीरान् इक्षुप्रभृतीञ्ज
नयति भौमः कुजः कंटकाढ्यान् कंटकबहुलान्खदिरप्रभृतीञ्जनयति वागीशज्ञाविति वागीशोबृहस्पतिः ज्ञोबुधः एतौद्वौयथासंख्येनसफलविफलान्वृ
क्षाञ्जनयतः तत्रबृहस्पतिः सफलानाम्र वृक्षप्रभृतीन् बुधोविफलान् मरादुकप्रभृतीन् शुक्रः पुष्पवृक्षान्मालत्यादीन्जनयति इंदुश्चंद्रः भूयः पुनः स्निग्धा

लग्नाद्ग्रहः स्थलजलर्क्षपतिस्तुयावान्तावंतएवतरवः स्थलतोयजाताः ६ अन्तस्साराञ्जनयतिरविर्दुर्भगान्सूर्य्यसूनुः क्षीरोपेतान्तु
हिनकिरणः कंटकाढ्यांश्चभौमः वागीशज्ञौसफलविफलान्पुष्पवृक्षांश्चशुक्रः स्निग्धानिंदुः कटुकविटपान्भूमिपुत्रश्चभूयः ७
शुभोऽशुभर्क्षेरुचिरंकुभूमिजंकरोतिवृक्षंविपरीतमन्यथा॥ ८ नसविकृणान्धवदेवदारुप्रभृतीञ्जनयति भूमिपुत्रोंगारकः कटुकविटपान्भल्ला
तकप्रभृतीञ्जनयति अत्रोभयजनितत्वनिर्देशाच्चंद्रभौमयोर्विकल्पनादेशः अधुनाभूमिगशुभाशुभज्ञानंसंख्याश्चवंशस्थेनाह ७ शुभोऽशुभर्क्षेति॥ एम·
सएवस्थलजलांशपतिर्ग्रहः शुभस्तत्कालमशुभर्क्षेपापग्रहराशौव्यवस्थितोभवतितदारुचिरतरुंशोभनंवृक्षंकुभूमिजमशोभनभूमिजातंवदेत् अन्यथा २१
विपर्य्ययेविपरीतंवृक्षंकरोति अंशपतिरशुभस्तत्कालंशुभग्रहराशिस्थोभवतितदाअशोभनंवृक्षंशोभनभूमिजातंवदेत् अर्थादेवशुभग्रहेशुभर्क्षेत्रस्थे
ऽशुभंवृक्षंशोभनभूमिजातंवदेत् अशुभग्रहेअशुभर्क्षेत्रस्थेअशोभनवृक्षमशोभनभूमिजातंवदेत् परांशकेयावतीति सस्थलजलांशपतिर्ग्रहः स्वका
दात्मीयादंशकाद्विच्युतश्चलितोयावत्संख्येपरनवांशकेव्यवस्थितः स्वमंशमतिक्रम्ययावत्संख्येपरनवांशकेवर्त्ततेतत्तुल्यास्तत्संख्यास्तथोक्त तज्जातीयाश्चतर
वोवृक्षाभवंतितावंतएवस्थलजाजलजावातरवः प्राक्संख्ययात्वथचेति॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र पुनः संख्याकरणाद्विकल्पेनादेश इति तथा च सारावल्यां स्वांशात्परांशगामिषु यावत्संख्या भवंति तावंतः स्थलजा वा जलजा वा नरवः प्राक्संख्यया प्रवदेदि
ति ॥ ८ ॥ ॥ इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृत्तौ वियोनिजन्माध्यायस्तृतीयः ॥ ३ ॥ अथातो निषेकाध्यायो व्याख्यायते तत्रादावपि ऋतौ सति गर्भाधा
नमित्यतः ऋतुनिरूपणमृतावपि स्त्रीपुरुषसंयोगज्ञानं वंशस्थेनाह १ कुजेंदुहेतुरिति कुजो भौमः इंदुश्चंद्रः तौ हेतुः कारणं निमित्तं यस्य रजसः स कुजेंदुहेतुः
मासं मासं प्रति मासं स्त्रीणां प्रतिमासमार्त्तवं कुजेंदुहेतुः प्रतिमासग्रहणेन प्रथमोद्भूतरजोनिवृत्तिं दर्शयन् गर्भग्रहणक्षममार्त्तवं प्रदर्शयति ऋतौ भवमार्त्तवं कथया
मित्याह गते तु पीडर्क्षमनुष्णदीधितौ इति अनुष्णदीधितौ शीतमयूखे चंद्रे पीडर्क्षं गते प्रकृतत्वात् स्त्रीणामनुपचयगृहाश्रिते आर्त्तवकारणं भवति अयोदेवय
दि चंद्रः कुजः संदृष्टो भवति एतदुक्तं भवति स्त्रियो जन्मर्क्षादनुपचयसंस्थश्चंद्रमास्तत्र चयद्यंगारकेण दृश्यते तदा गर्भग्रहणक्षममार्त्तवमतीव हेतुर्भवति अ
न्यत्र बालवृद्धातुरवंधाम्यः अत्र च बादरायणः स्त्रीणां गतोऽनुपचयर्क्षमनुष्णरश्मिः संदृश्यते यदि धरातनयेन तासां गर्भग्रहार्त्तवमुशंति तदा नवंध्यावृद्धातुरा

परांशके यावति विच्युतः स्वकाद्भवंति तुल्यास्तरवस्तथाभिधा ८ कुजेंदुहेतुः प्रतिमासमार्त्तवं गते तु पीडर्क्षमनुष्णदीधितौ ॥ ९ ॥

स्त्ववयसामपि चैतदिष्टं १ तथा च सारावल्यां अनुपचयराशिसंस्थे कुमुदाकरबंधवे रुधिरदृष्टे प्रतिमासं युवतीनां भवतीह रजो ध्रुवं त्येके इंदुर्ज्जलं कुजोऽग्नि
र्ज्जलमिश्रं त्वग्निरेवपित्तं स्यात् एवं रक्ते क्षुभिते पित्ते न रजः प्रवर्त्तते स्त्रीषु एवं यद्भवति रजो गर्भस्य निमित्तमेव कथितं तत् उपचयसंस्थे विफलं प्रतिमासं दर्शनं त
स्याः एवं गर्भग्रहणयोग्यमार्त्तवं प्रदर्श्य स्त्रीषु पुरुषसंयोगसंभवासंभवौ प्रदर्शयति अतोऽन्यथास्थ इति अतोऽन्यथा अस्मादुक्तप्रकारादन्यथास्थे विपर्ययस्थे चं
द्रमसि तत्रोक्तविपर्ययस्थः पुरुषजन्मराशेरुपचयस्थश्चंद्रमा यदि भवति तस्मिं शुभेन सौम्येन पुंग्रहेण गुरुणेक्षिते दृष्टे कामिनी स्त्री नरेण पुरुषेण सह संयोगं
मैथुनमुपैति गच्छतीति वक्तव्यं नन्वत्रातोऽन्यथास्थ इति स्त्रिया उपचयस्थः कस्मान्न व्याख्यायते अयुक्तमेतत् प्राधान्यात्पुरुषस्यैव तत् यस्माद्बादरायणः पुरुषो
पचयगृहस्थो गुरुणा यदि दृश्यते हिममयूखः स्त्रीपुरुषसंयोगं तदा वदेदन्यथा नैवमिति सारावलीकारेण समासामान्येनोक्तं तद्यथा उपचयभवने शशी शशभृ
दृष्टो गुरुणा सुहृद्भिरथवासौ पुंसां करोति योगं विशेषतः शुक्रसंदृष्टः कस्मिन्कालेयं विचारः उच्यते चतुर्थदिने स्नातायां तथा मणित्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ
टी·भ
२२

ऋतुविरमे स्नातायां यद्युपचयस्थः शशी भवति बलिना गुरुणा दृष्टो भर्त्रा सह संगमश्च तदा तदा राजपुरुषेण रविणा विटेन भौमे न वीक्षिते चंद्रे सौम्येन चपल
मतिना भृगुणा कांतेन रूपवता भृत्येन सूर्यपुत्रेण याति सा स्त्री समायोगं एकैकेन फलं स्याद्दृष्टे चान्यैः कुजादिभिः पापैः सर्वैः स्वगृहं त्यक्त्वा गच्छति वेश्यापदं
कुर्वती अथ मैथुनप्रकारज्ञानमिंद्रवज्रयाह १ यथास्तराशिरिति आधानलग्नाज्जन्मलग्नात्प्रश्नलग्नाद्वा यो स्तराशिः सप्तमो स्तलग्नस्तत्संज्ञको यो जंतुता
न्मिथुनं स्त्रीपुमांसौ यथा येन प्रकारेण समेति संयोगं सुरतं याति तथा तेनैव प्रकारेण तस्य नरस्य मिथुनप्रयोगः संयोगो वाच्यो वक्तव्यः तस्मिन्नेवास्ते सप्तमे स्या
ने असद्ग्रहालोकितसंयुते पापग्रहैर्दृष्टे युक्ते वा सरोषः सकलहो मिथुनप्रयोगो वाच्यः दृष्टैः सौम्यैर्युतदृष्टे सविलाससहासः विलासोपहासः सीत्कारादिसंयुते मिथु
नप्रयोगो वाच्यः अर्थादेवं न केचिद्युतदृष्टेन सरोषो नापि सविलाससहास इति मिश्रयुतदृष्टे सरोषोसविलाससहासश्चेति तथा च सारावल्यां द्विपदादयो विलग्ना
त्सुरतं कुर्वंति सप्तमे यद्वत् तद्वत्पुरुषाणामपि गर्भाधानं समादेश्यं अस्तेशुभयुतदृष्टे सरोषकलहं भवेद्ग्रहाभ्यां सौम्यैः सौम्यं सुरतं वात्स्यायनसंप्रयोगमरव्यातं अथ

अस्तोन्यथास्थे शुभपुंग्रहे क्षितेन नरेण संयोगमुपैति कामिनी १ यथास्तराशिर्मिथुनं समेति तथैव वाच्यो मिथुनप्रयोगः असद्ग्रहालोकि
तसंयुतेस्ते सरोषदृष्टैः सविलाससहासः २ रवींदुशुक्रावनिजैः स्वभागगैर्गुरौ त्रिकोणोदयसंस्थितेपि वा॥ गर्भसंभवासंभवं वंशस्थेनाह २ रवीति

रविः सूर्यः इन्दुश्चंद्रः शुक्रः सितः अवनिजोंगारकः एतैः स्वभागगैर्यत्र तत्र राशौ स्वनवांशकस्थैराधानकालेऽवश्यमेवापत्यं भवति गर्भसंभवो भवतीत्यर्थः य
दि च सर्वे स्वभागगा न स्युस्तदा पुरुषोपचयर्क्षगाभ्यां सूर्यसिताभ्यां स्वनवांशकस्थाभ्यामेवं गर्भसंभवो वाच्यः एवं भौमचंद्राभ्यां नार्युपचयर्क्षगाभ्यां स्वनवांशक
स्थाभ्यामाधानकालेऽवश्यमेवापत्यं भवति गर्भसंभवो भवतीत्यर्थः यस्माद्नेन स्वल्पजातके नोक्तं बलयुक्तौ स्वगृहांशेष्वर्कसितावुपचयर्क्षगौ पुंसां स्त्रीणां वा एम
कुजचंद्रौ यदा तदा संभवति गर्भः गुरौ त्रिकोणोदयसंस्थितेपि वा इति गुरौ बृहस्पतौ त्रिकोणयोर्नवपंचमयोरुदये लग्नेपि वा संस्थिते एषामन्यतमस्थानस्थेपि भ २२
वत्यसंभवो गर्भग्रहणं विबीजिनामिमे इति हि यस्मादर्थे एते हि योगाः विबीजिनां षंढानां विगतबीजं वीर्यं येषां स्त्रीपुरुषाणां तेषामफला विद्यमाना अपि न
संभवंति अत्रोदाहरणं कराहिमांशौ विदृशामिवाफलाइति यथा हिमांशोः शीतरश्मेः॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चंद्रस्य करा रश्मयो विद्यमाना अपि विहृशामं धाना मफलानि: फला विगताह ष्टियें षांते विदृशः तेषामिवेति अधुना स्त्री पुंसयोराधानकालवशाद्गर्भसवविधिं यावच्छु
भाशुभज्ञानं वंशस्थेनाह ३ दिवाकरेति दिवाकरात्सूर्यात्स्मरगो सप्तमस्थानस्थौ कुजार्कजौ कुजोंगारकोऽर्कजः सोरः यदि भवतः तदा पुंगलस्य मनुष्यस्य गदप्रदौ
रोगप्रदौ भवतः एवं चंद्रात्स्मरगौ सप्तमस्थानस्थौ कुजार्कजौ यदि भवतः तदा योषितः स्त्रियः गदप्रदौ रोगप्रदौ भवतः एतदुक्तं भवति आधानकाले यत्रार्के स्थि
तस्तस्मात्सप्तमे स्थाने यदांगारको भवति सौरो वा तदा पुंसो रोगप्रदो भवति स्वमासे एवमिंदोः चंद्रात्सप्तमे भौमः सौरो वा भवति तदा योषितः स्त्रियो रोगप्रदो भवति॥
स्वमासे एव व्ययस्वगौ मृत्युकरावि ति तावेव कुजसौरौ व्ययस्वगौ द्वादशद्वितीयगौ तयोर्दिवाकरेंद्वोः सकाशादुभयत्र पार्श्वस्थितयोस्तदा पुंगलयोषितोः स्त्रीपुरुषयो
र्मृत्युकरौ भवतः एतदुक्तं भवति सूर्याद्येको द्वादशो द्वितीये तदा तयोर्मध्याद्यो बलवान्सस्वमासे मृत्युकरो नरस्य भवति चंद्राद्प्येवं व्यवस्थिते चंद्राद्येको द्वादशे द्वि
तीयो द्वितीये तदा तयोर्मध्ये यो बलवान्सस्वमासे मृत्युकरो स्त्रियो भवति युतौ तथेति तदिति कुजसौरयोः परामर्शः तयोः कुजसौरयोर्मध्याद्येदेके नादित्यो युतः स

भवन्त्यपत्यं हि विबीजिनामिमे करा हिमांशोर्विदृशामिवाफलाः ३ दिवाकरेंद्वोः स्मरगौ कुजार्कजौ गदप्रदौ पुंगलयोषितोस्तदा व्ययस्व
गौ मृत्युकरौ युतौ तथा तदेक दृष्ट्या मरणाय कल्पितौ ४ दिवार्कशुक्रौ पितृमातृसंज्ञितौ शनैश्चरेंदू निशि तद्विपर्य्ययात्॥ ॥ ॥

हितो भवत्यंन्येन दृश्यमेतदा नरस्य मरणाय कल्पितौ निश्चितः एवं चंद्रमा यद्येकेन युक्तो भवत्यपरेण दृष्टः तदा स्त्रियो मरणाय कल्पितः द्वयोर्मध्ये यो बलवान्तस्य मा
सेइति अथ निषिक्तस्य पितृमातृपितृव्यमातृस्वसॄणां शुभाशुभज्ञानं वंशस्थेनाह ४ दिवार्कशुक्राविति दिवा दिने निषिक्तस्य जातस्य वा जंतोर्य्यथाक्रमं पितृमा
तृसंज्ञितावर्कशुक्रौ भवतः पितृसंज्ञको र्को मातृसंज्ञकः शुक्रः एवमेव निशि रात्रौ निषिक्तस्य जातस्य वा शनैश्चरेंदू सौरचंद्रौ शनैश्चरो पितृसंज्ञकः चंद्रो मातृसंज्ञकः॥
तद्विपर्य्ययादिति तद्विपर्य्ययाद्दिवारात्रिव्यत्यया त्तावेव पूर्वोक्तौ ग्रहौ पितृव्यमातृस्वसृसंज्ञितौ भवतः तत्र दिवा निषिक्तस्य जातस्य वा शनैश्चरो पितृव्यसंज्ञः चंद्रो
मातृस्वसृसंज्ञः रात्रौ निषिक्तस्य जातस्य वार्कः पितृव्यसंज्ञकः शुक्रो मातृस्वसृसंज्ञः तत्संज्ञायाः प्रयोजनं तावथौजयुग्मर्क्षगतौ तयोः शुभाविति तावेव यथाक्रमग्र
हौ तयोरोजयुग्मर्क्षगतौ शुभौ ज्ञेयौ ओजा विषमराशयो युग्माः समराशयः तत्र दिवार्को विषमर्क्षगो मेषमिथुनसिंहतुलधन्विकुंभानामन्यतमस्थः पितुः शुभकृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ० टी०भ० २३ रात्रौपितृव्यस्यतथादिवाशुक्रः समर्क्षगो वृषकर्कटकंन्यावृश्चिकमकरमीनानामन्यतमस्थोमातुः शुभकृत्‌रात्रौमातृस्वसुः शनैश्चरोरात्रौविषमर्क्षगतः पितुः
शुभकृद्दिवापितृव्यस्यतथा चंद्रोरात्रौसमर्क्षगोमातुःशुभकृत्‌दिवामातृस्वसुः सामर्थ्यादेवोक्तविपर्ययस्थःसएवोक्तयोरशुभः यथादिवासमक्षेत्रगतोऽर्कःपि
तुरशुभोरात्रौपितृव्यस्य दिवाविषमर्क्षगतःशुक्रोमातुरशुभोरात्रौमातृस्वसुः रात्रौसमक्षेत्रगतःशनैश्चरःपितुरशुभोदिवापितृव्यस्य रात्रौविषमर्क्षगतश्चंद्र
मामातुरशुभोदिवामातृस्वसुरिति अथाधानप्रसवमध्येआधानकालवशात्मातुर्मरणयोगद्वयमाह ५ उदयर्क्षमुदयलग्नमसद्भिःपापग्रहैरभिलषद्भिःत
त्रोदयलग्नाभिलाषिःकश्चिल्लग्नाद्द्वितीयस्थग्रहव्याख्यातः तेषांअभिमतंपुनरुदयलग्नादनंतरंतदुभयस्यप्रत्यासन्नतयाभिलषन्नुदयर्क्षमिति अन्येपुनर्ल
ग्नाद्द्वादशस्थानस्थग्रहस्योदर्क्षाभिलाषंकथयंति यस्मात्तद्विहायराशिगमनंग्रहःकरोति एवंलग्नाद्द्वादशस्थैःपापैर्लग्नेचयदिशुभदृष्टिंसौम्यग्रहदर्शनमया
तेअप्राप्तेसौम्यग्रहेरदृश्यमानेस्त्रीयोषिद्गर्भिणीमरणमेतिमृत्युंप्राप्नोति अत्रचभगवान्गार्गिः अशुभैर्द्वादशर्क्षस्थैःशुभदृष्टिविवर्जिते आधानलग्नेमरणंयो

पितृव्यमातृष्वसृसंज्ञितौचतावथौजयुग्मर्क्षगतौतयोःशुभौ ५ अभिलषद्भिरुदयर्क्षमसद्भिर्मरणमेतिशुभदृष्टिमयाते उदयराशि
सहितेचयमेस्त्रीविगलितोडुपतिभूसुतदृष्टे ६ पापद्वयमध्यसंस्थितौलग्नेंदूनचसौम्यवीक्षितौ ॥ ११ षित्तःप्रवदेद्बुधस्ततेयोगांतरइतिआ

ह उदयराशिसहितेचयमेत्यादि यमेशनैश्चरेउदयराशिसहितेलग्नस्थितस्मिंश्चविगलितेनोडुपतिनानक्षत्रस्वामिनाक्षीणचंद्रेणभूसुतेनांगारकेणचदृष्टेऽवलो
कितेस्त्रीगर्भिणीमरणमेति अथयोगांतरंवैतालीयेनाह ६ लग्नमुदयराशिरिंदुश्चंद्रस्तौलग्नेंदूपापद्वयमध्यसंस्थितौलग्नस्थेचंद्रमसियद्येकःपापग्रहो
द्वादशस्थोभवतिद्वितीयस्थोऽपरःतदालग्नेंदुयुगपत्तुल्यकालंपापद्वयमध्यमगावुच्येते अथवालग्नेंदुविकृष्टांशकांतरितौभवतस्तत्रैवैकःपापस्तावन्मा
त्रस्थितोऽपरस्तावदतिक्रम्यस्थितस्तथापिलग्नेंदूपापद्वयमध्यगावुच्येते अथवाद्वादशस्थानेएकपापोऽपरोद्वितीयेतृतीयेचंद्रश्चतुर्थेचपापोभवति तथापि
लग्नेंदूपापद्वयमध्यगावुच्येते एवंलग्नेंदूयदियुगपत्पापद्वयमध्यगतौनचसौम्यवीक्षितौशुभग्रहावलोकितौ नभवतस्तदानारीस्त्रीगर्भयुताविपद्यते॥ राम: २२
म्रियते पृथगेवेति अथवापृथक्स्थौलग्नेंदूभवतस्तयोर्मध्यादेकतमोपिपापद्वयमध्यगोभवतिसौम्यग्रहदृष्टश्चनभवतितथानारीगर्भयुताविपद्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्रियतेइति पृथगेवेति अथवा लग्नात्त्रितीयेचंद्रोद्वितीयचतुर्थेद्वादशस्थापापाः तथापिलग्नेदुपापमध्यगोभवतः अथवालग्नादेकादशेचंद्रोद्वितीयतृतीयद्वादशगाः पापास्तथापिलग्नेंदूपापद्वयमध्यगोभवतः युगपद्ग्रहणंपादपूर्णार्थेविस्पष्टार्थेवा तदर्थेस्पष्टथगेवसामर्थ्यालब्धत्वात् अत्रयोगकर्तॄणांग्रहाणांमध्याद्योबलीतन्मासिगर्भिणीमरणंभवतीतिसर्वत्रपरिभाषाअन्ययोगांतराणिवैतालीयेनाह ७ शशिनश्चंद्रात्क्रूरैःपापग्रहैः चतुर्थस्थानस्थैर्निधनाश्रितेऽष्टमस्थानस्थेकुजेभौमेएकोयोगः अथवालग्नाच्चतुर्थैःपापैरष्टमेभौमेचैवंद्वितीयोयोगः वंध्वंत्यगयोःकुजार्कयोरिति लग्नाद्बंधुगतेचतुर्थस्थेभौमेन्त्यगतेद्वादशस्थानस्थेऽर्केसूर्येयत्रतत्रस्थेक्षीणेन्दौपरिक्षीणेचंद्रेतृतीयोयोगः एषामाधानकालेन्यतमस्यसंभवेमरणायपूर्ववन्नारीगर्भयुताविपद्यत इति अधुनामातुःशस्त्रनिमित्तमरणयोगगर्भेश्रवंचाधानलग्नवशाद्वैतालीयेनाह ८ उदयास्तइति निषेककालेकुजाऽर्कयोभौमसूर्ययोर्यथासंख्यमुदयास्तगयोर्लग्नसप्तमस्थयोर्लग्नेभौमेसप्तमस्थेऽर्केगर्भयुतायाःभार्यायाःस्त्रियःशस्त्रकृतंशस्त्रहेतुकंमरणंनिधनंवदेद्ब्रूयात् तथातेनैवप्रकारेणेति नारीगर्भयुता

युगपत्पृथगेववावदेन्नारीगर्भयुताविपद्यते ७ क्रूरैःशशिनश्चतुर्थगैर्लग्नाद्वानिधनाश्रितेकुजे बंध्वंत्यगयोःकुजाऽर्कयोःक्षीणेन्दौनिधनायपूर्ववत् ८ उदयास्तगयोःकुजाऽर्कयोर्निधनंशस्त्रकृतंवदेत्तदा मासाधिपतौनिपीडितेतत्कालंश्रवणंसमादिशेत्

९ शशाङ्कलग्नोपगतेःशुभग्रहैस्त्रिकोणजायाऽर्थसुखास्पदस्थितैः॥ ११ विपद्यतइत्यर्थः मासाधिपताविति गर्भमासेषुमासाधिपान्वक्ष्यति कललघनेत्यादिना तत्रनिषेककालेयोग्रहोभौमादिरन्येनग्रहेणयुद्धेविजितोभवतिपराजितोभवतियतःकुसुतादीनायुद्धमित्युक्तं केतुनावाभिधूमितउल्कयावाभिहितःसोपिनिपीडितग्रहइत्युच्यते सूर्याचंद्रमसौक्रूरयुक्तौदृष्टौवाग्रहणाग्रहणेपीडितौइत्युच्यंते तस्यापिनिपीडितस्यग्रहस्ययोभवतिमासोयस्मिन्मासेमासाधिपत्यंतस्यमासंभवतितत्कालंतस्मिन्कालेगर्भस्यश्रवणंच्युतिंसमादिशेत्वदेत् अधुनागर्भपुष्टिज्ञानंवंशस्थेनाह ९ यत्रराशौशशांकश्चंद्रःस्थितस्तत्रैवशुभग्रहेर्व्यवस्थितैर्बुधगुरुसितैरित्यर्थः अथवालग्नस्थैःशुभग्रहैः लग्नेव्यवस्थितैः अथवावाकेश्चिच्छशांकोपगतैः केश्चिल्लग्नोपगतैः॥ एवंशशांकोपगतैःशुभग्रहैरुदयोपगतैर्वा अथवात्रिकोणजायाऽर्थसुखास्पदस्थितैः त्रिकोणंनवपञ्चमे॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जायास्थानं सप्तमं अर्थस्थानं द्वितीयं सुखस्थानं चतुर्थं आस्पदस्थानं दशमं एतेषु त्रिकोणजायाऽर्थसुखास्पदेषु यथासंभवं चंद्राल्लग्नाद्वा द्वयोर्वा समवस्थितेनोतथा
पापकैः क्रूरग्रहैश्चंद्राल्लग्नाद्वा तृतीयलाभर्क्षगतैः तृतीयैकादशस्थानस्थैस्तैर्यथासंभवं द्वयोर्व्यवस्थितैरविणा सूर्येण यः निरीक्षितो दृष्टः शशी लग्नं वा भव
ति यस्मादेव योगः सच दृश्यते तदा गर्भः सुखी पुष्टिमान्पुमान्भवति केचिद्गुरुणा निरीक्षित इति पठंति वदयुक्तं यस्मात्सारावल्यामुक्तं होरेंदुतैः सौम्यैस्त्रिकोण।
जायार्थसुखांबरस्थैर्वा पापैस्त्रिलाभयातैस्सुखी तु गर्भो निरीक्षितोरविणा अथ निषिक्तस्य निषेककालाज्जातस्य जन्मकालादुभयोरपि प्रश्नकालाद्वा पुंस्त्रीवि
भागज्ञानं शार्दूलविक्रीडितेनाह १० ओजर्क्षेति ओजर्क्षे पुरुषांशकेष्विति लग्नमुदयलग्नं आदित्यः अर्कः गुरुर्जीवः इन्दुश्चंद्रः एतैर्लग्नार्कगुर्विंदुभिरो
जर्क्षस्थैर्विषमराशिव्यवस्थितैर्न केवलं यावत्पुरुषांशकेषु विषमनवांशग्रहणं नास्ति तत्कथं व्याख्यातं विषमनवांशकगतैरिति उच्यते पुरुषांशकेषु इतिवच
नात्पुरुषराशीनामंशा इत्यर्थः यतः य एव विषमराशयस्त एव पुरुषराशयः समांशकगतैर्युग्मेष्विति तैरेव लग्नार्कगुर्विंदुभिर्युग्मेषु समराशिषु स्थितैर्यथा

त्रितीयलाभर्क्षगतैश्च पापकैः सुखीतुगर्भोरविणा निरीक्षितः १० ओजर्क्षे पुरुषांशकेषु बलिभिर्लग्नार्कगुर्विन्दुभिः पुंजन्म प्रवदेत्स
मांशकगतैर्युग्मेषु तैर्योषितः॥ ११ संभवं न केवलं यावत्समांशकगतैर्युग्मराशिनवांशकस्थैर्बलिभिश्च योषितः स्त्रियो जन्म वदेत् अथैषां यथाभि

हितानां लग्नग्रहाणामुभयविकल्पकानां बाहुल्यात्पुंस्त्रीनिर्देशः साम्ये बलाधिकत्वात् गुर्वर्कावितिः अथैतेषां गुर्वर्कौ विषमे भवति गुरुर्जीवः अर्कः आदि
त्यः एतावुभविपि विषमराशीगतौ यत्र तत्र नवांशकस्थौ नरं मनुष्यं कुरुतः बलग्रहणमत्रानुवर्तते शशी चंद्रः सितः शुक्रः वक्रोंगारकः एते यदि सबलाः युग्मेस
मराशीगता यत्र तत्र नवांशकस्था स्त्रियं जनयति द्व्यंगस्था इति एत एव ग्रहा द्व्यंगस्था यत्र तत्र राशौ द्विशरीरनवांशकस्थाः बुधवीक्षणाच्च बुधदृष्टा यमलौ द्वौ स्वप
क्षे कुर्वंति स्वपक्षे आत्मीयपक्षे आत्मीयपक्षे पुरुषनवांशके स्त्रीनवांशके चेत्यर्थः एतदुक्तं भवति चत्वारो द्विस्वभावा मिथुनकन्याधन्विमीनाः तत्र मिथुन
धन्विनो पुरुषांशकौ कन्यामीनौ स्त्र्यंशकौ तेयथासंभवं मिथुनधन्वकगता वादित्यजीवौ यदि बुधेन यत्र तत्रावस्थितेन दृश्यते तदा यमलौ द्वौ पुरुषौ वाच्यौ॥
एवं यथासंभवं कन्यामीनांशकगताः शशीशुक्रभौमाः यत्र तत्रावस्थितेन बुधेन दृश्यते तदा यमलौ द्वे कन्ये कुर्वन्ति॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ द्वावेव विषमराशिगतौ यथा दर्शितस्थावुभौ पश्यति तदा द्वौ पुरुषौ द्वावेव कन्येव कर्त्तव्यं नन्वत्रांशकग्रहणं नास्ति तत्कथं व्याख्यातं द्विशरीरांशेष्विति उच्य
ते अनेनैव स्वल्पजातके उक्तं बलिनो विषमेऽर्कगुरू नरं स्त्रियं समगृहे कुजेंदुसिताः यमलौ द्विशरीरांशेष्विंदुजदृष्टाः स्वपक्षसममिति अन्यथा पुनरुक्तता स्या
त् ओजर्क्षे पुरुषांशकेष्वित्यनेनैव गतार्थत्वात् बलग्रहणमत्रानुवर्त्तनीयमिति अथ पुंजन्मयोगांतरमुपेन्द्रवज्रयाह ११ विहायलग्नमिति उक्तयोगाभाव
स्यावसरे नान्यथा आधानलग्नं प्रश्नकालिकं लग्नं वा लग्नं विहाय यस्मात्सौरः शनैश्चरो लग्नाद्विषमर्क्षगतस्तृतीयपंचमसप्तमनवमैकादशाख्यानां नामन्यत
मस्थः पुंजन्मकरः पुरुषजन्मकरो भवति प्रोक्तग्रहाणामिति प्रोक्तग्रहाणां कथितयोगकर्तॄणां ग्रहाणां वीर्यं बलमवलोक्य विचार्य प्रसूतौ प्रसवे पुरुषो न
रो नास्त्री वा जन्म वक्तव्यं एतदुक्तं भवति यत्र पुरुषजन्मयोगसंभवः स्त्रीजन्मयोगसंभवश्च दृश्यते तदा यो योगो बलवद्ग्रहाभिर्निर्मितस्तद्वशात्पुंस्त्रीजन्म वक्त

गुर्वर्कौ विषमे नरं शशिभृगुसितौ वक्रश्च युग्मे स्त्रियं द्व्यंगस्था बुधवीक्षणाच्च यमलौ कुर्वन्ति पक्षे स्वके ११ विहाय लग्नं विषमर्क्षसंस्थः
सौरोऽपि पुंजन्मकरो विलग्नात् प्रोक्तग्रहाणामवलोक्य वीर्यं वाच्यः प्रसूतौ पुरुषोऽगनावा १२ अन्योन्यं यदि पश्यतः शशिरवीय
द्यार्किसौम्यावपि वक्रो वा सममं दिनेशमसमे चंद्रोदयौ चेत्स्थितौ॥ ॥ ११ व्यं अथ क्लीबजन्मयोगांश्शार्दूलविक्रीडितेनाह १२ अन्योन्यमिति ॥
अन्योन्यं परस्परं यदि पश्यतः समराशिस्थश्चंद्रो विषमराशिगतमर्कं पश्यत्यर्कश्चंद्रं शशिनं पश्यति तदा क्लीबजन्मयोगो एकः यद्यार्किसौम्यावपि आर्किसौ
रः सौम्यो बुधः एतावार्किसौम्यौ यथाक्रमं युग्मौजर्क्षगतौ अन्योन्यं यदि पश्यतस्तदा द्वितीयो योगः वक्रो वा सममगमिति वक्रोंगारको विषमर्क्षगः समगं समराशि
स्थं दिनेशं सूर्यं पश्यति सूर्यश्चांगारकं पश्यति तदा तृतीयो योगः असमे चंद्रोदयौ चेत्स्थितौ भूम्यात्मजेनांगारकेण समराशिगेन क्षितौ दृष्टौ तदा चतुर्थो यो
गः युग्मौजर्क्षगतावपीति इंदुश्चंद्रः शशिजो बुधो एतौ यथासंख्यं युग्मौजर्क्षगतौ समविषमराशिगौ भूम्याजेन भौमेन यत्र तत्रावस्थितेन वीक्षितौ दृष्टौ तदा
पञ्चमो योगः पुंभागइति सितः शुक्रः लग्नं उदयलग्नं शीतकिरणश्चंद्रः एते सितलग्नशीतकिरणाः यत्रेतरराशौ पुंभागे पुरुषनवांशके व्यवस्थिता भवन्ति
तदा क्लीबजन्मयोगः षष्ठः तथा च बादरायणः अन्योन्यं रविशशिनौ विषमर्क्षगौ निरीक्ष्येते इंदुजरविपुत्रौ वा तथैव गर्भे नपुंसकं कुरुतः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ई. टी. म २५

वक्रोवा विषमेसूर्य्यः समगस्त्वेवंपरस्परावलोकात् विषमर्क्षेलग्नेंदूसमराशिगः कुजोवलोकयति बुधचंद्रौकुजदृष्टौविषमर्क्षसमर्क्षगौ तथैवोक्तौ ओजनवांशक
संस्थाल्लग्नेंदूसितास्तथैवोक्ताइति एतेयोगाः पूर्वयोगानामभावेवक्तव्याः तेषांयोगानामेतेषांचसंभवेतेषामेवबलवत्वं अधुनाद्वित्वगर्भसंभवेयोगान् शार्दूलविक्री
डितेनाह १३ युग्मेचंद्रसितावितिचंद्रसितौशशिशुक्रौयुग्मेसमराशौव्यवस्थितौतथातेनैवप्रकारेणज्ञारजीवोदयाः ज्ञोबुधः आरोंगारकः जीवोबृहस्पतिः उ
दयोलग्नएतेसर्वेएवौजभवनेविषमराशौस्युर्भवेयुः एवमेतेमिथुनंकुर्युः दारिकादारकश्च लग्नेंदून्नृनिरीक्षितावितिलग्नेंदूउदयचंद्रौसमगौयुग्मराशि
व्यवस्थितौनृनिरीक्षितौनरग्रहेणकेनचिद्दृष्टौभवतस्तथापिमिथुनंगर्भसंस्थंवाच्यं युग्मेषुवाप्राणिनः तएवपूर्वोक्ताज्ञारजीवोदयाः सर्वएवयुग्मेषुसमराशिषुस्थि
ताः प्राणिनोबलिनोभवन्ति तथापिमिथुनंकुर्युः ग्रहोदयगतानित्यादि ग्रहः सर्वएवद्व्यंगांशकेषुद्विस्वभावनवांशकेषुगताः प्राप्ताःउदयोलग्नश्चद्व्यंगांशकेषु
गताः तान्ग्रहोदयगतान् द्व्यंगांशकान्स्वांशेस्वनवांशकस्थेज्ञेबुधेपश्यतितदात्रितयंवक्तव्यं तत्रायंविशेषः ज्ञांशएवबलाद्युग्मंतुइति ज्ञोबुधोगतोव्यवस्थितोय

युग्मौजर्क्षगतावपीदुशशिजौभूम्यात्मजेनेक्षितौपुंभागेसितलग्नशीतकिरणाः षट्क्लीबयोगाः स्मृताः १३ युग्मेचंद्रसितौतथौजभ
वनेस्युर्ज्ञारजीवोदयाः लग्नेंदून्नृनिरीक्षितौचसमगौयुग्मेषुवाप्राणिनः॥ ॥

स्मिन्नवांशकेस्थितः तद्वशाद्युग्मं बुधोयस्मिन्नंशकेव्यवस्थितः
सयल्लिंगांशकस्तल्लिंगंतत्रगर्भेयुग्मंवक्तव्यं एकस्तद्विपरीतः एतदुक्तंभवति मिथुनांशकस्थोबुधोयदाग्रहोदयगतान् द्व्यंगांशकान्पश्यतितदागर्भेदारकद्वयंदा
रिकाचैकावक्तव्या अथान्यनवांशकस्थोबुधोद्व्यंगांशकव्यवस्थितान्ग्रहोदयान्पश्यतितदागर्भेदारिकाद्वयंएकंचदारकंवक्तव्यं अमिश्रैः समैर्मिश्रितैस्तैग्रहोदय
गतैः सबुधैरमिश्रैःस्थितैर्द्विस्वभावः समलिंगस्थितैस्त्रितयंसममेकलिंगंवक्तव्यं एतदुक्तंभवति मिथुननवांशकव्यवस्थितोबुधोमिथुनधन्व्यंशकव्यवस्थिता
न्ग्रहोदयान्पश्यति तदागर्भेदारकत्रितयंवक्तव्यं अथकन्यांशकव्यवस्थितोबुधः कन्यामीनांशकव्यवस्थितान्ग्रहोदयान्पश्यतितदागर्भेदारिकात्रितयंवा एम
च्यमिति तथाचसारावल्यां समराशौशशिसितयोर्विषमेगुरुवक्रसौम्यलग्नेषु योगेस्मिन्नार्भगतंनूनंमिथुनंतुविज्ञेयं लग्नेंदूवासमगौपुंग्रहदृष्टौचमिथुनज २५
न्मकरौ उदयलग्नज्ञावक्रगुरवोवलिनः समराशिगास्तथैवोक्ताः द्विशरीरांशकयुक्तान्ग्रहान्विलग्नंचपश्यतीदुसुतः कंन्यांशेद्वेकंन्येपुरुषश्चनिषच्यतेगर्भे॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिथुनांशेकन्येकाद्वौपुरुषौत्रितयमेवस्यात् नृमिथुनधनुरंशगतान्ग्रहान्विलग्नंचपश्यतिइंदुसुतः मिथुनांशकस्यश्वपदापुरुषस्त्रितयंतदागर्भेकन्यामीनांशक
स्थान्विहगानुदयंयुवतिभागगताः पश्यतिशीतगुतनयः कन्यात्रितयंतदागर्भे अधुनात्यधिकगर्भसंभवयोगत्तानमुपजातिकयाह १४ धनुरिति धन्विलग्ने
धनुर्द्धरांशकेचोदयंलग्नमुपगते धनुर्द्धरस्यधनुषोंत्यगगतेविलग्नेधन्व्यंशकेचोपगतेग्रहैः सर्वैरेवतदंशोपगतैर्य्यत्रतत्रराशौधन्विनवांशकस्थैर्नेकेवलंया
वद्बलिस्थैर्वीर्य्यवद्भिस्तस्मिंश्चलग्नेज्ञेनार्किणाचदृष्टेज्ञेनबुधेनआर्किणाशनैश्चरेणचवीर्य्ययुतेनबलवतादृष्टेवलोकितेप्रभूतावहवःकोशसंस्थाजरायुवे
ष्टितविग्रहागर्भेसंभवंतीति पंचसप्तदशयावत् पूर्वमुक्तमासाधिपतोनिपीडितेतत्कालंश्रवणंसमादिशेदिति तदधुनागर्भस्यमासाधिपान्त्रोटकेनाह १५
सितादाग्रहागर्भस्यप्रथममासात्प्रभृतिकललादीनिभवन्तिसुवर्त्तयंति तद्यथा गर्भस्यप्रथममेमासिकललंभवति शुक्रशोणितेघनेसंमिश्रीभूतेतत्रगर्भस्य
तस्मिन्मासेसितःशुक्रोऽधिपतिः द्वितीयेघनताकाठिन्यंभवति तत्रतस्यकुजोंगारकोभौमोऽधिपतिः तृतीयेंकुरोत्पत्तिर्हस्ताद्यवयवजन्मतत्रजीवोबृहस्पतिः

कुर्युस्तेमिथुनंग्रहोदयगतान् द्व्यंगांशकान्पश्यतिस्वांशेज्ञेत्रितयंतृगांशकवशाद्युग्मंत्वमिश्रंसमम् १४ धनुर्द्धरस्यांत्यगतेविलग्नेग्रहै
स्तदंशोपगतैर्बलिष्ठैः ज्ञेनार्किणावीर्य्ययुतेनदृष्टेसंतिप्रभूताअपिकोशसंस्था १५ कललघनांकुरास्थिचर्म्मांगजचेतनताः सितकुज
जीवसूर्य्यचंद्रार्किबुधाःपरतः॥ ॥ चतुर्थेऽस्थिसंभवः तत्रसूर्य्योरविरधिपतिः पंचमेचर्म्मसंभवस्तत्रचंद्रोऽधिपतिः षष्ठेंगजसंभवोलोमजन्म

तत्रार्किःसौरोऽधिपतिः सप्तमेचेतन्यतासंभवोभवतितेतनस्यभावः तत्रबुधोऽधिपतिः बुधमासात्परतोयोन्याशेषामासास्तेगर्भस्यशनोद्वेगप्रसवकारास्तेषु
चोदयपतिचंद्रसूर्य्यनाथाःस्वामिनःक्रमशोगदिताः उक्तातत्राष्टमेमासिगर्भस्थोजंतुरशनंकरोति मात्राभुक्तंपीतंरसादिः तस्यानाभिलग्ननलेनसंक्रमते
तत्रगर्भाधानलग्नाधिपतिर्य्योग्रहःसमासाधिपतिः नवमेगर्भस्थस्योद्वेगोभवति तत्रचंद्रोऽधिपतिर्भवति दशमेगर्भस्यप्रसवोप्रसूतिर्भवतितत्रसूर्य्योरवि
रधिपतिः तथाचस्वल्पजातकेकललघनावपचास्थित्वग्रोमस्मृतिसमुद्भवाःक्रमशः मासेषुशुक्रकुजजीवसूर्य्यचंद्रार्किसौम्यानां अशनोद्वेगप्रसवाःपर
तोलग्नेशचंद्रसूर्य्याणामिति अत्रप्रथमद्वितीयमासाधिपयोर्य्यवनेश्वरेणमतभेदः तथाचतद्वाक्यं कुजास्फुजिज्जीवरवींदुसौरशशांकलग्नेंदुदिवाकराणां॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ मासाधिपत्यप्रभवोनचैषांजयोपधातैर्ग्रहवद्भवंति आद्येतुमासेकललंद्वितीयेपेशिस्तृतीयेपिभवन्तिशाखाः १ अस्थीन्यथस्नायुशिराश्चतुर्थेमज्जातुच
टी·भ· र्मोएयपिपंचमेतु षष्ठेत्वसृग्रोमनखोपकृच्चचेतः स्थिताः सप्तममासचेष्टा तृष्णाशनास्वादनमष्टमेस्यान्पूर्वापराद्योनवमेरतिश्च स्रोतोभिरुद्घाटितपूर्णदेहोग
२६ र्भोर्कमासेदशमेप्रसूते आचार्य्यस्यबहुमतसाम्यमभिमतमितिभवति शुभाशुभंचमासाधिपतेःसदृशंगर्भस्यस्यमासाधिपतिसदृशंशुभमशुभंफलंभवति
एतदुक्तंभवति आधानकालेयोग्रहोनिपीडितोभवतितन्मासिगर्भस्यपतनंकलुषेमंदरश्मौविवर्णेपीडनंनिर्मलेरश्मिजालसंपन्नेबलवतिपुष्टिरिति तथाच
सूक्ष्मजातकेकलुषैःपीडापतनंनिपीडितैर्निर्म्मलैःपुष्टिरिति अथचान्यैःशास्त्रकारैर्विशेषउक्तः तत्किंचित्प्रदृश्यतेतथाचसारावल्यां तत्रशुभाशुभमि
श्रैःकर्म्मभिरधिवासितोविषयवृत्तिःगर्भावासेनिपततिसंयोगेशुक्रशोणितयोः मैथुनस्यमनोभावोयद्वद्भवदन्नबलस्यसंभवति श्लेष्मादिभिश्चदोषैस्तत्तुल्य
गुणोनिषिक्तस्ययाद्दक्यश्यतिसौम्यस्तत्तुल्यदलगुणंसुतंसमाधत्ते पितृजननीसादृश्यंरवेःशशांकस्यबलयोगात्तुवोधमेतत् अथाधिकांगमूकःचिरल

उदयपचंद्रसूर्य्यनाथाःक्रमशोगदिताःभवन्तिशुभाशुभंचमासाधिपतेःसदृशं १६ त्रिकोणगेज्ञेविबलेस्तथापरैर्मुखांघ्रिहस्तैर्द्विगुणे
स्तदाभवेत् अवागवीदावशुभैर्भसंधिगैःशुभेक्षितश्चेत्कुरुतेगिरंचिरात् १७॥ ऽऽधजिरांसंभवयोगान्वंशास्येनाह १६ ज्ञेबुधेत्रिकोणगे लग्नान्नवमस्थे
पंचमस्थेवातस्माद्बुधादपरैरन्यैःसर्वैर्ग्रहैर्यत्रतत्रावस्थितैर्विबलैर्वीर्य्यरहितैर्मुखांघ्रिहस्तैर्द्विगुणैर्गर्भस्थोवाच्यः द्विशिरश्चतुर्बाहुश्चतुर्भुजइत्यर्थः त्रिकोणगेज्ञे
इत्यत्रकेचिन्मूलत्रिकोणगेबुधेकन्यागतइत्याहुः तच्चायुक्तं यस्माद्भगवान्गार्गिः बलहीनैर्ग्रहैःसर्वैर्नवपञ्चमगेबुधे द्विगुणांघ्रिशिरोहस्तोभवत्येकोदरस्तथा १
अवागिति गवि वृषेस्थितेइन्दौचन्द्रेऽशुभैःपापैर्भसंधिगैःकर्कटवृश्चिकमीनानामंत्यनवांशकस्थैर्य्यथासंभवंतदाअवाङ्मूकोगर्भस्थोवाच्यःशुभेक्षितइ एम
तिचेद्बुद्धोपपद्यर्थे एवंविधेयोगेयदिशुभेक्षितःसौम्यग्रहदृष्टश्चंद्रोभवतितदाजातस्यचिराद्बहुनाकालेनगिरंवाचंकुरुते अर्थादेव पापवीक्षितेवाग्हीनः २६
एवयोगेमिश्रग्रहवीक्षितेयदासौम्याबलिनस्तदाचिरेणकालेनवाग्भवत्यथपापाबलिनस्तदानैवेति अत्रचभगवान्गार्गिः कुलीरालिझषांतस्थेपापैश्चंद्रे
वृषोपगे मूकःपापेक्षितैःसौम्यैःचिरेणलभतेगिरं मिश्रदृष्टैर्ग्रहैर्बलवान्मूकोवाऽश्चवाक्शिरादिति अधुनासदन्तकुब्जजडजन्मयोगान्संदाक्रांतयाह १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौम्यइति रविजः शनैश्चरः रुधिरोंगारकः यत्रतत्रराशौशनैश्चरोंगारकौसौम्यर्क्षांशेबुधनवांशकेमिथुनांशकेकंन्यांशकेवाभवतः अथवाबुधर्क्षेमिथुनकंन्ययोरंन्यतमेराशौस्थितौभवतः चेच्छब्दोऽपद्यर्थे यद्येवंतदात्रास्मिन्योगेसदन्तोदन्तसहितोगर्भस्थोवाच्यः केचित्सौम्यसौशेमिथुनेमिथुनांशकेकन्यायांकंन्यांशकेकेचिदिछंति त्र्यक्षांशयोर्युगपद्ग्रहणात् अंशशब्देनकेवलेनैवसिद्धिः स्यात्तदृक्षग्रहणमितिरिच्यतइति एवंविधेयोगेगर्भस्थः सदन्तोभवतिजातोवा कुब्जः स्वर्क्षेइति शशिनिचन्द्रेस्वर्क्षेस्वामीयराशौकर्कटस्थितेतथाभूतेचतनुगतेतस्मिंश्चमन्दमाहेयदृष्टे मन्देशनैश्चरेणमाहेयेनांगारकेणचदृष्टेऽवलोकितेगर्भस्थोकुब्जोवाच्यः पंगुर्मीनइति मीनेलग्नसंस्थेयमशशिकुजैः दृष्टेपंगुर्गर्भस्थोभवति यमः शनैश्चरः शशिश्चंद्रः कुजः भौमः एतैर्वीक्षितेदृष्टेपंगुः पादविकलोगर्भस्थोवाच्यः संधौपापेति पापैरादित्यकुजसौराणामंन्यतमेशशिनिचचंद्रेसंधौकर्कटवृश्चिकमीनांत्यनवांशगतेर्य्यथासंभवंगर्भस्थोजन्तुर्जडः श्रोत्रेंद्रियहीनोवाच्यः तन्नचेत्सौम्यदृष्टाइति एतेयोगकर्त्तारोग्रहाययादर्शितानचेद्यदिसौम्यैः शुभग्रहैर्दृष्टानभवंतितदैतद्योगचतुष्टयंपूर्णवक्तव्यं सौम्यैर्बलिभि

सौम्यर्क्षांशेरविजरुधिरौचेत्सदन्तोत्रजातः कुब्जः स्वर्क्षेशशिनितनुगेमंदमाहेयदृष्टे पंगुर्मीनेयमशशिकुजैर्वीक्षितेलग्नसंस्थेसंधौपापैः

शशिनिचजडः स्यान्नचेत्सौम्यदृष्टः १८ सौरशशांकदिवाकरदृष्टेवामनकोमकरांत्यविलग्ने॥ ५५ निरीक्षितायोगाएवनभवन्ति मध्यबलैर्हीनबलैर्वादृष्टास्तदाअसमग्रफलाभवंतिइति अधुनावामनकहीनांगौदोधकेनाह १८ सौरशशांकइति मकरांत्यविलग्ने मकरस्यांत्यनवांशकेविलग्नस्थे नवमनवांशकोदयमानः सचमकरस्यभवतिइत्यर्थः तस्मिंश्चसौरशशांकदिवाकरदृष्टे सौरः शनैश्चरः शशांकश्चंद्रः दिवाकरस्सूर्य्यः एतैरवलोकितेवामनकोगर्भस्थोवाच्यः धीनवमोदयगैरिति अत्रकेचिदेवंव्याचक्षते यदालग्नेद्वितीयद्रेष्काणोदयोभवतितदातस्यपञ्चमराशिसंबंधित्वाद्धीनद्रेष्काणइत्याख्यातस्मिन्द्वितीयद्रेष्काणेपापग्रहयुतेउदयमनुप्राप्तेसौरशशांकदिवाकरदृष्टेगर्भस्थोऽभुजोभुजहीनोवाच्यः एवंलग्नेतृतीयद्रेष्काणेयदाभवतितदानवमराशिसंबंधित्वात्तृतीयोनवमसंज्ञः तस्मिनुदयगतेपापयुतेसौरशशांकदिवाकरदृष्टेऽनंघ्रिः पादहीनोगर्भस्थोवाच्यः एवंप्रथमद्रेष्काणस्यलग्नसंबंधित्वादुदयद्रेष्काणइत्याख्यातस्मिनुदयगतेवापापयुतेसौरशशांकदिवाकरदृष्टेऽशिरोशिरहीनोगर्भस्थोवाच्यः॥ १ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ
टी॰भ॰
२७

एतेषुयोगेषुसौरशशांकदिवाकराणांदर्शनयोगात्पापयुक्तइति केवलेनांगारकेणयुक्तेयोगोभवति अत्राप्यन्येधीनवमोदयगैर्द्रेक्काणैःपापयुतैः केवल
मेवाभुजांघ्रिसिरसांसंभवंव्याचक्ष्यते सौरशशांकदिवाकरदृष्टइत्यस्यानुवृत्तिंनेच्छंति अन्येविभुजादिसंभवेयथासंख्यंत्यक्त्वाद्रेक्काणत्रयेपिप्रतिद्रेक्काणंतदुक्त
वविकल्पमाहुः विभुजोवानंघ्रिर्वाविशिरावेति अन्येएवंव्याचख्यते यथालग्नेयदाप्रथमद्रेक्काणोदयोभवति तदापंचमराशौप्रथमद्रेक्काणोनवमोपिप्रथ
मएवतत्तद्रेक्काणत्रयंयदापापयुतंभवतितदाभुजहीनोगर्भस्थोवाच्यः अथलग्नेद्वितीयद्रेक्काणोदयोभवतितदापंचमनवमयोरपिद्वितीयएवएतद्रेक्काणत्र
यंयदापापयुतंभवतितदापादहीनोगर्भस्थोवाच्यः अथलग्नेतृतीयद्रेक्काणोदयोभवतितदापंचमनवमयोरपितृतीयएवएतद्रेक्काणत्रयंयदिपापयुतं
भवतितदाशिरोविहीनोगर्भस्थोवाच्यः अत्राप्यन्येयथासंख्यंत्यक्त्वात्रिप्रकारेपियोगेऽभुजाङ्घ्रिशिरोहीनानांविकल्पेनगर्भसंभवंमानसंभवमाहुः वयं
पुनर्ब्रूमः निषेककालेयःपंचमराशौयोद्रेक्काणःसयद्यंगारकेणयुक्तःसौरशशांकदिवाकरदृष्टश्चभवतितदाऽनङ्घ्रिःपादरहितोगर्भस्थोवाच्यः उदय

धीनवमोदयगैश्चदृकाणैःपापयुतैरभुजांघ्रिशिरःस्यात् १८ रविशशियुतेसिंहेलग्नेकुजार्किनिरीक्षितेनयनरहितःसौम्यासौम्यैःस
बुद्बुदलोचनः॥ ॥

स्थानेलग्नेयोद्रेक्काणःसयद्यंगारकेणयुक्तःसौरशशांकदिवाकरदृष्टश्चभवतितदाऽशिरोगर्भस्थोवाच्यः एतैवव्याख्यासाध्वी॥
यस्मात्भगवान्गार्गिः लग्नद्रेक्काणगोभौमःसौरसूर्येंदुवीक्षितः कुर्याद्विशिरसंतद्वत्पंचमेबाहुवर्जितं १ विपदंनवमस्थानेयदिसौम्यैर्नवीक्षितइति त
थाचसारावल्यां भौमयुतोद्रेक्काणास्त्रिकोणलग्नेषुभेषुसंदृष्टः विभुजांघ्रिमस्तकःस्याच्चनिरविचंद्रैर्बुधैर्देहगर्भे अधुनानयनरहितजन्मज्ञानार्थंहरणीय
माह १८ रविशशियुतेतिसिंहेलग्नेरविशशियुतेअर्कचंद्राभ्यांसंयुतेतथाभूतेकुजार्किनानिरीक्षितेभौमसौराभ्यांदृष्टेनयनरहितोभवति नेत्ररहितोंधोगर्भ
स्थोवाच्यः अथादेवकेवलेसिंहलग्नेऽर्केणयुक्तेसौरांगारकेनदृष्टेदक्षिणाक्षिकाणः एवंसिंहलग्नेकेवलेनचंद्रेणयुक्तेसौरांगारकेनदृष्टेवामाक्षिकाणः सौ
म्यासौम्यैःसबुद्बुदलोचनइति तस्मिन्नेवसिंहलग्नेऽर्कचंद्राभ्यांयुक्तेसौम्यासौम्यैःशुभपापग्रहैर्दृष्टेगर्भस्थःसबुद्बुदलोचनःपुष्पिताक्षोवाच्यः अत्राप्येक
तमयुक्तेभागवत्पुष्पिताक्षित्वंवाच्यम् व्ययगृहगतइति निषेककाललग्नाद्वाजन्मलग्नाद्वायस्यचंद्रमाव्ययगृहगतोद्वादशस्थोभवतितस्यवामंचक्षुर्नोस्ति

एम
२७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं त्रिपादिन्यो लग्नाद्द्वादशोऽपरं दक्षिणं च वस्तु नास्ति अशुभगादिता योग इति यएते योगाः प्रागभिहितास्त्रिकोणगेष्विंद्वित्यादिना ग्रंथेन शुभाशुभफलदास्तेषां
सर्वेषामेव योगानां यदा योगकर्त्तारो ग्रहाः शुभग्रहैः सौम्यग्रहैः दृष्टा भवंति तदा ते योगा याप्या भवंति पूर्णं यथोक्तं फलं न प्रयच्छंति किंतु किंचित् प्रयच्छंतीत्यर्थः
अथ प्रश्नाधानकाले योगवशात्प्रसवकालज्ञानं वसंततिलकेनाह २० तत्कालमिंदुसहितेति तत्कालमिंदुः तत्काले प्रश्नकाले आधानकाले वा यस्मिन् राशौ च
न्द्रमा वर्त्तते तत्र च यस्मिन्द्वादशभागे व्यवस्थिते स तत्कालमिंदुसहितो द्विरसांशकः केचित्तात्कालिकेंदुसहितो द्विरसांशक इति पठन्ति तात्कालिकेंदुना यावत्सं
ख्यो द्वादशभागसहितः तत्तुल्यस्तावत्संख्यो मेषादौ गणनया यो राशिस्तत्रस्थे चंद्रमसि पुरतोऽग्रतो दशमे मासि गर्भस्य प्रसवो वाच्य इति केचित् तथा च सारावल्यां
यस्मिन्द्वादशभागे गर्भाधाने व्यवस्थितश्चंद्रः तत्तुल्यर्क्षे प्रसवो गर्भस्य समादिशेत्प्राज्ञः १ अन्ये पुनरेवं व्याचक्षते आधानकाले यत्र राशौ चंद्रमा व्यवस्थित
स्तत्र यावत्संख्ये द्वादशभागे वर्त्तते तस्माद्द्वादशभागात्तावत्संख्यो य एव पुरतो राशिस्तत्रस्थे चंद्रमसि प्रसवो वक्तव्यः एषैव साध्वी व्याख्या यस्मात् भगवान्गार्गिः

व्ययगृहगतश्चंद्रो वामं हित्वा परं त्रिभिरशुभगादिताः योगाः याप्या भवंति शुभेक्षिताः २० तत्कालमिन्दुसहितो द्विरसांशको यस्त
त्तुल्यराशिसहिते पुरतः शशांके॥ ॥

यावत्संख्ये द्वादशांशे शीतरश्मिर्व्यवस्थितः तत्संख्ये यस्ततो राशिर्जन्मेंदौ तद्गते वदेत् १ अत्रापि नक्ष
त्रानयने यमनुपातो न्यायः यदि चंद्राक्रांतद्वादशभागप्रमाणेन सकलचंद्रराश्यष्टादशशतलिप्ताप्रमाणं लभ्यते तदनेन भुक्तद्वादशराशिप्रमाणेन कि
मिति लब्धं चंद्रराशिभुक्तं लभ्यते ततोऽष्टशतलिप्तापरिकल्पनया नक्षत्रमुदयमूह्यं तत्रापि दिनरात्रिज्ञानमाह यावानिति दिनरात्रिलग्नाः पूर्वं व्याख्या
ताः गोजाश्विकर्किमिथुनाइत्यादि आधानकाले प्रश्नकाले वा यल्लग्नं तस्य यः प्रविभागः दिनसंज्ञो रात्रिसंज्ञो वा यावानुदेति समानं तस्मिन् यावत्कालभा
गे गतस्तावत्येव दिननिशीः समानाङ्गते काले जन्म भविष्यतीति वाच्यः दिनस्य रात्रेर्वा गतस्तत्कालभागं बुध्वानुपातेन प्रसवकाले लग्नहोराद्रेष्काणन
वांशकद्वादशभागत्रिंशांशका वाच्या इति मुनयः प्रवदंति कथयंति तथा च सारावल्यां तत्कालं दिवसनिशासंज्ञा समुदेति राशिभागो यः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ°
टी° अ°
२८

यावानुदयस्तावान्वाच्यो दिवसस्य रात्रेर्वा इत्याधानप्रथमं सूतिकालं सुनिश्चितं कृत्वा जातकविहितं च विधिं विचिंतयेत्तत्र गणितज्ञः अधुनाधृतस्य गर्भस्य वर्षत्रयवर्षद्वादश प्रसूतिज्ञानं मालिन्याह २१ उदयतीति मृदोः सौरस्य भांशो मृदुभांशः तस्मिन्निषेककाले यस्य तस्य लग्नस्योदये मृदुभांशे शनैश्चरस्य शिनवांशके मकरांशके कुंभांशके वोदय इति तथाभूते तस्मादेव लग्नात् मंदे शनैश्चरे तत्काले द्यूनेगते सप्तमस्थे एवंविधे योगे यदि निषेको भवति तदात स्य गर्भस्याब्दत्रयेण वर्षत्रयेण सूतिकायाः प्रसवो वक्तव्यः शशिनीति एष एव विधिर्य्यदा शशिनि चंद्रे भवति तदा द्वादशे वर्षे सूतिः प्रसवं कुर्य्यात् एतदुक्तं भवति यस्य तस्य लग्नस्योदये यदा कर्कटांशकोदयो भवति तस्माल्लग्नात्सप्तमश्चंद्रो भवति तदा धृतस्य गर्भस्य द्वादशेऽब्दे प्रसवो वाच्यः निगदितमिहेति इहास्मिन्नाधानाध्याये आधानकालयोगवशात् यथा हीनाधिकांगादीनां गर्भसंभवंति तथा प्रसूतिकाले पितादृग्योगवशात्तथाविधीनामेव जन्म वक्तव्यं पि

यावानुदेति दिनरात्रिसमानभागे तावद्गते दिननिशोः प्रवदन्ति जन्म २१ उदयति मृदुभांशे सप्तमस्थे च मंदे यदि भवति निषेकः
सूतिरब्दत्रयेण॥ शशिनि तु विधिरेषः द्वादशेऽब्दे प्रकुर्य्यान्निगदितमिह चिंत्यं सूतिकाले पियुक्त्या २२ पितुर्ज्जातः परोक्ष
स्य लग्नमिंदावपश्यति॥ ११ तं मातृपितृव्यमातृव्यस्वसॄणामपि शुभाशुभं जन्मकालवशात्तदनंतरमपि वक्तव्यं युक्त्या तियंत्र संभवति तत्र वक्त

व्यं यथा गर्भस्रावादि गर्भप्रसवकालनिर्देशादि च एवमाधानकालात्प्रसवकालाच्च यथैवादेशः कृतः तथा प्रश्नकालादपि वक्तव्य उच्यते जन्मन्याधाने प्रश्नकाले वेति॥ ॥इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृतौ निषेकाध्यायो चतुर्थः॥४॥ ॥अथातो जन्मविधिनामाध्यायो व्याख्यायते॥ ॥ एस° २८

तत्रादावेव पितुः सन्निधौसन्निधौ वा जातस्य जन्म इत्यनुष्टुपमाह २२ पितुर्ज्जात इति इंदौ चंद्रे प्रसवलग्नमपश्यति विदेशस्थस्य चरभेनावलोकयंति सति पितुः परोक्षस्य जनस्यासन्निधौ जातः तत्रास्य पितुरसन्निधाने स्वदेशपरदेशस्थितिज्ञानमाह विदेशस्थस्येति दिवाकरे सूर्य्ये चरराशिगे चरराशिस्थिते मध्याद्भ्रष्टे मध्यात्दशमस्थानाद्भ्रष्टेऽधः पतिते नवमाष्टमस्थानस्थे पितुर्व्विदेशस्थस्य अन्यदेशस्थस्य अन्यदेशगतस्य जातः चंद्रमसि प्रसवलग्नमपश्यत्येषयोगानान्यथेति चंद्रे प्रसवलग्नमपश्यति अर्के स्थिरराशिस्थे मध्याद्भ्रष्टे स्वदेशस्थस्य पितुः परोक्षे जातः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्मिन्नेवयोगेद्विस्वभावस्थेमध्याद्भ्रष्टेदिवाकरेस्वदेशपरदेशयोर्मध्येपथिस्थितस्यपरोक्षजातः मार्गमध्येइत्यर्थः अर्थादेवचंद्रेप्रसवलग्नमपश्यत्यर्के चरराशौ
स्थेस्थिरराशिस्थेवाद्विस्वभावराशिस्थेवामध्याद्भ्रष्टेदिवाकरेपिपितुःस्वदेशस्थस्यैवपरोक्षेऽसान्निध्येजातइतिवक्तव्यं तथाचसारावल्यांहोरामवीक्ष्यमाणेपितुर्व्य
येहस्थितेशशिनिजातः मेषूरणाद्यूतेवाचरभेभानौविदेशगते अथान्यानपियोगानतुष्टुभमाह १ उदयस्थइतिमंदेसौरेउदयस्थेलग्नगतेपितुःपरोक्षेजा
तः वाशब्दःप्रकारार्थ अथवाकुजेभौमेजन्मलग्नादस्तंसप्तमंस्थानंसमागतेप्राप्तेपितुःपरोक्षस्यजातः स्थितेवान्तइति क्षपानाथेशशांकसुतशुक्रयोःमध्य
स्थेराशांकसुतोबुधःशुक्रोभार्गवः अनयोर्मध्यस्थितेचंद्रेचंद्रादेकोद्वादशोऽन्योद्वितीये अथवैकस्मिन्राशौमध्यभागेषुचंद्रस्थितः आद्यंतभागयोर्बुधशुक्रौत
थापिमध्यस्थः एवंविधेयोगेपितुःपरोक्षेजातः तथाचस्वल्पजातके चंद्रेलग्नमपश्यतिमध्येवासौम्यशुक्रयोश्चंद्रे जन्मपरोक्षस्यपितुर्व्योम्नियेवाकुजेचास्ते
इति अधुनासर्प्पवेष्टितजन्मज्ञानचानुष्टुभमाह २ शशांकेति वृश्चिकेशोभौमः वृश्चिकस्वामीत्यर्थः शशांकेचंद्रेवृश्चिकेशत्रिभागगेभौमद्रेष्काणस्थेचंद्रेत

विदेशस्थस्यचरभेमध्याद्भ्रष्टेदिवाकरे १ उदयस्थेपिवामंदेकुजेवास्तंसमागते स्थितेवांतः क्षपानाथेशशांकसुतशुक्रयोः २ शशांके
पापलग्नेवावृश्चिकेशत्रिभागगे शुभैःस्वायस्थितैर्ज्जातः सर्प्पस्तद्वेष्टितोपिवा ३॥

५ त्रभौमद्रेष्काणःमेषप्रथमः कर्कटेद्वितीयः सिंहेतृतीयः वृश्चिके
प्रथमःधनेद्वितीयःमीनेतृतीयःएषामन्यतमस्थस्यचंद्रमसःशुभैःशुभग्रहैःस्वायस्थितैर्द्वितीयैकादशस्थानस्थितैःसर्प्पउरगोजातइत्येवोक्तं पापलग्नेति
एवंपापग्रहसंबंधिलग्नोदयेयदाभौमद्रेष्काणोभवति तत्रपापलग्नेभौमद्रेष्काणःमेषप्रथमःक्षीणेचंद्रेकर्कटेद्वितीयःवृश्चिकेप्रथमःसिंहेतृतीयःएषामन्यतम
स्योदयेलग्नाच्चशुभग्रहैर्द्व्येकादशस्थैस्तद्वेष्टितःसर्प्पवेष्टितोजंतुर्ज्जातइतिवक्तव्यं अन्येपुनरेवंव्याचक्षते चंद्रेपापलग्नेवाभौमद्रेष्काणोभवतितत्रपापलग्नेभौम
द्रेष्काणःमेषप्रथमःकर्कटेद्वितीयःसिंहेतृतीयःवृश्चिकेप्रथमःधन्विद्वितीयःमीनेतृतीयःतस्मादेवशुभैःस्वायस्थितैःविकल्पेनसर्प्पोवासर्प्पवेष्टितोवाजातइतिव
क्तव्यं अत्रपूर्वव्याख्यासाध्वी यस्माद्भगवान्गार्गिः भौमद्रेष्काणगेचंद्रेसौम्यैराप धनस्थितैःसर्प्पस्तद्वेष्टितस्तद्वत्पापलग्नेविनिर्द्दिशेत् १ तथाचसारावल्यां भौम
द्रेष्काणगेचंद्रेलग्नेवातस्थितेवदेज्जातं द्व्येकादशगैःसौम्यैरहिवेष्टितकोभुजंगोवा १ अधुनेकजरायुवेष्टितयोर्ज्जन्मज्ञानमनुष्टुभमाह ३ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ. टी भ. २८

चतुष्पदेति भानौ सूर्य्ये चतुष्पदराशिगते मेषसिंहवृषधन्विपरार्द्धमकरपूर्वार्द्धानामन्यतमस्थे शेषैरन्यैः सर्वैर्ग्रहैर्द्वितनुस्थैर्द्विस्वभावस्थितैश्च वीर्य्यसमन्वितैर्बलि
भिश्च कोशवेष्टितौ एकजरायुर्वेष्टितौ यमलौ जायते अधुना नालवेष्टितजन्मज्ञानमनुष्टुभमाह ४ छागेति छागो मेषः सिंहः प्रसिद्धः वृषो वृषभ एव एतैः छागसिं
हवृषैर्लग्नस्थितैः एषामन्यतमो यदि लग्नगतो भवति तत्स्थे सौरेऽथवा कुजे तस्मिन्छागसिंहवृषाणामन्यतमे लग्ने ततस्थे तत्रस्थे सौरे शनैश्चरेऽथवा कुजे भौमे तत्र
स्थे नालवेष्टितो जंतुर्जायते नालशब्देन नाड्याभिधीयते कस्मिन्नंगे वेष्टित इत्याह राश्यंशसदृशगात्रेति राशेरंशो राश्यंशः राशेः लग्नस्य यो नवांशकस्तन्का
लमुदितः स च यद्राशिसंबंधी स च कालांगानीत्यादिना ग्रंथेन नियतराशिः यस्मिन्नंगे कालपुरुषस्यावस्थितस्तत्सदृशे गात्रे तस्मिन्नेवांगे शीर्षमुखादिना वेष्टित इ
ति वक्तव्यं तथा च सारावल्यां सिंहाजगोभिरुदये सूतो नालेन वेष्टितो जंतुः लग्ने कुजेऽथ सौरे राश्यंशसमानगात्रेषु १ अधुना जारजातकज्ञानं वंशस्थेनाह ५
न लग्नमिति गुरुर्जीवो लग्नमुदयमिंदुं चंद्रं च यदि न निरीक्ष्यते न पश्यति लग्नचंद्रावेकराशिस्थौ पृथक्स्थौ वा यदोभावपि गुरुणा दृश्येते तदा परेण जारेण जा

चतुष्पदगते भानौ शेषैर्वीर्य्यसमन्वितैः द्वितनुस्थैश्च यमलौ भवतः कोशवेष्टितौ ४ छागसिंहवृषैर्लग्ने तत्स्थे सौरेऽथवा कुजे राश्यंशसदृशे
गात्रे जायते नालवेष्टितः ५ न लग्नमिंदुं च गुरुर्निरीक्ष्यते न वा शशांकं रविणा समागतं॥ ५५ तइतिनिश्चयात्प्रवदंति मुनयः अत्र यदि लग्नचंद्रौ जी
वभागस्थौ जीवनवांशकस्थौ भवतः तदा न परजात इति वक्तव्यं यस्माद्यवनेश्वरः अजीवभागे घनवीक्ष्यते वा जीवेथ चंद्रेण विलग्नमेवा जातं पराद्भुतमिति ब्रुवंति राम २८
वाच्यो जनेता थ बलावलोकादिति १ न वा शशांकमिति शशांकश्चंद्रः रविणा सूर्य्येण समागतं संयुक्तं गुरुणेन निरीक्षते चंद्रार्कावेकराशिस्थौ यदि चेद्बृहस्पतिना
न दृश्यते तदा परेण जातः अथवा शशी चंद्रश्च पापग्रहेण भौमेन सौरेण वा युक्तः तथाविधोर्केण सूर्य्येण यदि युक्तो भवति तथापि परे जात इति अत्राप्यन्ये जी
वदृष्ट्यानुवर्त्तितं व्याख्यानं कुर्वंते तदायुक्तं यस्माच्चंद्रार्कावेकराशिगतौ पापयुक्तौ अयुक्तौ वा जीवेन दृश्यमानौ वा जारजातजन्मकरौ तत्र चंद्रार्कयोर्योगे पा
पेन समेत्य किं हतं भवति तस्माच्चंद्रार्कावेकराशिगतौ स पापौ जीवेन दृश्यमानौ स पापौ जीवेन दृश्यमानौ जारजातजन्मकरौ निश्चयात्प्रवदंति अत्र चंद्रमा य
दि बृहस्पतिर्गुरुर्गृहगतः तद्द्रेष्काणतन्नवांशकद्वादशभागस्थो भवति अन्यत्र वा राशौ गुरुणा युक्तस्तदा न जारजात इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्माद्भवान्मार्गैः गुरुक्षेत्रगतेचंद्रेतद्युक्तेवान्यराशिगे तद्द्रेष्काणेतदंशेवानपरैर्जातइष्यते १ अधुनाथजातस्यपितृबंधनयोगज्ञानवैतालीयेनाह ६ क्रूर
र्क्षगताविति क्रूरक्षाणिक्रूरग्रहराशयः मेषसिंहवृश्चिकमकरकुंभाः कृष्णपक्षेणचंद्रेकर्कटः पापयुक्तबुधेपिकन्यामिथुनेअशोभनोपापौ शनिभौमौक्रूरर्क्ष
गतौपापक्षेत्रस्थौतौसूर्य्याद्द्वेर्द्यूननवात्मजस्थितौ द्यूनंसप्तमंनवमंप्रसिद्धं आत्मजस्थानंपंचमं एषामन्यतरस्थौभवतस्तदाजातस्यपिता[illegible]कोकुड्योवध्यः
तस्यादित्याक्रांतराशिवशाद्बंधनस्थदेशज्ञानमाह स्वेवान्यस्मिन्राशिवशादथोपथीति चरराशिस्थेर्केपरदेशेबधःस्थिरराशिस्थेर्केस्वदेशे द्विस्वभावेपथि
मार्गेएवंराशिवशात्स्थानपरिज्ञानं अथोइत्ययंनिपातोविकल्पेनकेचित्स्थिरराशिवशात्तथापथीतिपठंति अधुनापोतगतप्रसवज्ञानंवैता[illegible]लीयेनाह ७
पूर्णेति शशिनिचंद्रेपूर्णेपरिपूर्णमंडलेतस्मिंश्चस्वराशिगेकर्कटस्थितेतथासौम्येबुधेलग्नगतेउदयस्थेशुभेजीवेएवंसुखेचतुर्थस्थेपोतगतानौस्थाप्रसूयते
इतिवक्तव्य तत्रान्येशुभैःसुखइतिपठंति पठित्वात्वेवंव्याचख्यते सुखेचतुर्थभवनेशुभैरितिबहुवचनंघटतेलग्नेबुधउक्तःशुक्रबृहस्पतिशेषौशुभाभ्यामित्ये

सपापकोर्केणयुतोथवाराशीपरेणजातंप्रवदंतिनिश्चयात् ६ क्रूरर्क्षगंतावशोभनौसूर्य्याद्यूननवात्मजस्थितौ बद्धस्तुपिताविदेशगःस्व
वाराशिवशादथोपथि ७ पूर्णेशशिनिस्वराशिगेसौम्येलग्नगतेशुभेसुखे लग्नेजलजेस्तगेपिवाचंद्रेपोतगताप्रसूयते ८ ॥ ॥

वंप्राप्नोति यत्क्रियतेशुभैरिति तस्मादेवमवसीयतापूर्णश्चंद्रमाः शुक्रबृहस्पतीभ्यांयुक्तोभवति तदाशुभैरितिभवति एतच्चमेषलग्नेतत्रस्थेबुधेपूर्णेचंद्रेशुक्र
बृहस्पतीभ्यांसमायुक्तेकर्कटव्यवस्थितेसर्वत्रयुज्यतइतिअयंपाठोऽसद्व्याख्यानेनयुक्तः यस्मान्मकरावस्थितेऽर्केकर्कटस्थश्चंद्रमाःपूर्णोभवति मकरव्यवस्थि
तेचार्केमकराच्चतुर्थभवनेमेषेबुधस्यसंभवोनास्ति किंपुनर्मकरात्सप्तमराशौकर्कटकेशुक्रस्याप्यवस्थानमिति तस्माच्छुभेसुखेइतिसप्तम्येकवचनांतएवपाठो
ऽन्यथाशुभैसुखइति तत्कथंजीवोव्याख्यातः उच्यते बुधोलग्नगतस्तस्माच्चतुर्थेशुक्रस्यावस्थानंनभवति अतोजीवइतिव्याख्यातं केचित्पूर्वशास्त्रानुसारेण
तिशुक्रेइतिइच्छंति अथपोतगतप्रसवयोगोद्वितीयः लग्नेजलजइति लग्नेजलजेजलराशौकर्कटमकरपश्चिमार्द्धमीनानामन्यतमे तस्मादस्तगेसप्तमस्था
नस्थेचंद्रेपूर्णेवाऽपूर्णेचपोतगतेवप्रसूयतइति वाशब्दःप्रकाराय अथोदकमध्यप्रसवज्ञानवैतालीयेनाह ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰ आप्योदय इति आप्यराशयो मकरस्य पश्चार्द्धं कर्कमीनौ तेषामन्यतमस्योदये आप्योदये जलराशिलग्ने भवति शशी चंद्रश्चाप्यगो जलराशिस्थः तदा सूतिः प्रसवः
टी॰ भ सलिले जलसमीपे न संशयः निश्चयाद्वाच्यः अथवा संपूर्णः शशी लग्नगमाप्योदयं समवेक्षते पश्यति तथापि सलिले जलसमीपे प्रसूतिः मेषूरणबंधुलग्न
३० इति अथवाप्यराशावुपगते मेषूरणबंधुलग्नगे मेषूरणे दशमे बंधुस्थाने चतुर्थे लग्ने प्राग्लग्नगे स्थितः स्यात् एवं तथापि सलिले प्रसूतिः निवदेत् तथाच सारा
वल्यां सलिलभलग्ने चंद्रे जलराशौ वीक्ष्यते थवा पूर्णः प्रसवं सलिले विंद्याद्धू धूदयदशगश्च यदा ९ अधुना बंधनागारावटयोः प्रसवज्ञानं वैतालीयेनाह
९ उदयोलग्नं उडुपश्चंद्रः तयोरुदयोडुपयोरेकराशिस्थयोर्यमे सौरे व्यवस्थिते द्वादशस्थे तस्मिंश्च पापनिरीक्षिते गुर्व्यां बंधनागारे प्रसूयते इति वक्तव्यं सौरे
शनैश्चरे अलिकर्कियुते वृश्चिककुलीरयोरन्यतमस्थे विलग्नगे तस्मिंश्च शीतकरेक्षिते चंद्रदृष्टे ऽवटे श्वभ्रे प्रसूतिर्वक्तव्य अथ क्रीडागृहदेवालयसोषरभूमिप्रदे
शेषु प्रसवज्ञानं वैतालीयेनाह १० मन्देति मन्दे शनैश्चरे ऽब्जगते जलराशिस्थे तथा भूते विलग्नगे प्राग्लग्नस्थे क्रमात् परिपाट्या बुधसूर्येंदुनिरीक्षिते बुधरविचं

आप्योदयमाप्यगः शशी संपूर्णः समवेक्षतेथवा मेषूरणबन्धुलग्नगाः स्यात्सूतिः सलिलेन संशयः ९ उदयोडुपयोर्व्यये स्थिते गुर्व्यां पा
पनिरीक्षिते यमे अलिकर्कियुते विलग्नगे सौरे शीतकरेक्षिते वटे १० मंदे ऽब्जगते विलग्नगे बुधसूर्येंदुनिरीक्षिते क्रमात् क्रीडाभवने सुरा
लये सोषरभूमिषु च प्रसूयते ११ नृलग्नगं प्रेक्ष्य कुजः श्मशाने रम्ये सितेंदुगुरुरग्निहोत्रे ॥ ११

द्रदृष्टे क्रीडाभवने सुरालये सोषरभूमिषु च प्रसवं प्रसू-
यत इति वदेत् एतदुक्तं भवति शनैश्चरे जलराशिस्थे लग्नगते बुधनिरीक्षिते बुधदृष्टे क्रीडाभवने रतिगृहे प्रसूयति एवं सूर्येणार्केण निरीक्षिते सुरालये देवगृहे राम
इंदुना चंद्रेण निरीक्षिते सोषरभूमिषु सबालुकास्तवनिषु प्रसूयते इति अथ श्मशानरम्यप्रदेशाग्निशालानुपदेवगृहगोकुलशिल्यालयेषु प्रसवज्ञानमेवोप ३०
जातिकयाह ११ नृलग्नगमिति पूर्वश्लोकान्मंद इत्यनुवर्तते प्रत्यासन्नमिति न्यायात् नृलग्नगं नरराशिलग्ने स्थितं नरराशयो मिथुनकन्यातुलाधन्विपूर्वार्द्ध
कुंभाः वक्तव्याः तत्रगतं शनैश्चरं कुजोंगारकः प्रेक्ष्य दृष्ट्वा भौमो यदि पश्यति तदा श्मशाने प्रसवं जन्म करोति केचित्तु लग्नदृशं क्षितिज इति पठंति नृलग्नं
पश्यति तद्दृष्टीत्तोन्नलग्नदर्शी क्षितिजः रम्ये सितेंदु इति नरराशिं लग्नगतं शनैश्चरयुक्तं सितः शुक्रः इंदुश्चंद्रो वा पश्यति तदा रम्ये रमणीयमंदिरे जन्म॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधंसौरंगुरुर्जीवः पश्यतितदा अग्निहोत्रे ऽग्निशालायां एवंविधंसौरं रविः पश्यतितदानरेंद्रामरगोकुलेषु नरेंद्रगृहे राजवेश्मनि अमरगृहे देवागारे वा गोकुले
वा गोशालायां प्रसूतिः जन्मः एवमेवबुधेनदृष्टे सौरे शिल्पालये शिल्पिगृहे चित्रपुस्तककारकबार्द्धकि प्रभृतीनां शिल्पीनां प्रसिद्धानामन्यतमस्य गृहे प्रसूतिरिति
तथा च सारावल्यां रविजे जलजविलग्ने क्रीडोद्यानेबुधेक्षिते प्रसवः रविणा देवागारे तथा रवौ चैव चंद्रेण १ आरण्यभवनलग्ने गिरिवनदुर्गेषु ... रविलग्ने
रुधिरेक्षिते श्मशाने शिल्पिकनिलये च सौम्येन शूर्पेक्षिते गोनृपदेववासिसुकेंदुजाभ्यां रमणीयदेशे सुरेज्यदृष्टे द्विजवह्निहोत्रे नरो दये संप्रवदंति सूतिं अथ
प्रसवदेशज्ञानं वैतालीयेनाह १२ राश्यंशेति राशिश्च अंशश्च तद्राश्यंशं राशिर्लग्नः राशिरंशो नवांशकः लग्नराशेस्तन्नवांशकस्य वा यः समानः सदृशस्तात्मीये
गोचरे मार्गेविषयः सचराश्च सर्वइत्यनेन प्रदर्शितः तत्र यस्मिन् यस्मिन् प्रदेशे यो यो राशिरूपः प्राणी संचरति तत्र यो मार्गः पंथास्तस्मिंजन्म यदि चरलग्नस्तन्नवांश
को वा यदि चरो भवति अथ लग्नराशिस्तन्नवांशको वा स्थिरस्तदा राशितुल्यस्य प्राणिनः स्वगृहे यत्र प्रसवस्तिनस्थाने जन्म वक्तव्यं अथ लग्नराशिस्तन्नवांशको

रविनेरेंद्रामरगोकुलेषु शिल्पालयेज्ञः प्रसवं करोति १२ राश्यंशसमानगोचरे मार्गे जन्म चरे स्थिरे गृहे स्वर्क्षांशगते स्वमंदिरे बलयोगा
त्फलमंशकर्क्षयोः १३ आरार्कजयोस्त्रिकोणगे चंद्रे ऽस्ते च विसृज्यते बया॥

॥ वा द्विस्वभावस्तदा तद्गृहाद्बहिः पथसमीपेस्थाना चलितस्य यो मार्गः न
त्रेति स्वर्क्षांशयुत इति चरस्य स्थिरस्य द्विस्वभावस्य वा राशेर्लग्नगतस्य स्वर्क्षांश आत्मीयनवांशको द्योयदा भवति तदा स्वमंदिरे आत्मीय एव गृहे एव जन्म वक्तव्यंत
त्र राश्यंशसमानगोचरे मार्गे जन्म इत्यादिसामान्येनोक्तं तत्र ज्ञायते किं लग्नराशिसमानगोचरे किमंशसमानगोचरे प्रसवोदेशः कृपतां तदर्थमयं निश्चयः तत्रा
यं नियमः बलयोगादिति अंशको नवांशः ऋक्षं राशिः अनयोर्बलयोगात्फलं प्रसवस्थानज्ञानं एतदुक्तं भवति लग्नराशेर्नवांशकराशेश्च यो बलवांस्तत्सम्मा
नगोचरे मार्गगृहसमीपेषु प्रसवो वक्तव्यः अत्र पूर्वोक्तयोगाभावे राश्यंशसमानगोचरे मार्गादिषु प्रसवो वक्तव्यः तेषां संभवे योगोक्तप्रदेश एव प्रसवो वक्तव्यः अ
थ यस्मिन्योगे जातो माता त्यज्यते यस्मिंश्च योगे जातस्त्यक्तोपि मातृवत् दीर्घायुः सुखी च भवति तद्योगद्वयं वैतालीयेनाह १२ आरादिति चंद्रे राशिन्यारार्कज
यो र्भौमसौरयोरेकराशिगतयोस्त्रिकोणगे नवमस्थे पंचमस्थे वा ऽस्ते च सप्तमे स्थाने स्थिते जातो बयामात्रा विसृज्यते त्यज्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह एवंविधेयोगेचंद्रमसिअमरराजमंत्रिणागुरुणादृष्टेमात्रात्यक्तोपिपरहस्तगतोपिदीर्घायुः चिरंजीवीसुखभाक्सुखविभागीभवति अथयस्मिन्योगेजातोमात्रात्यक्तो
टी.भ. विनश्यतिवसंततिलकेनाह १४ पापेक्षितइति तुहीनगौचंद्रेपापेक्षितेपापग्रहदृष्टेसौरेणांगारकेनचेत्यर्थः तथाभूतेउदयेलग्नेस्थितेकुजेभौमेसतिसप्तम
३१ स्थानस्थेजातोमात्रात्यक्तोविनश्यतिम्रियतइत्यर्थः कुजार्कजयोरिति तथातेनैवप्रकारेणलग्नगतेचंद्रमसिपापेक्षितेसूर्य्यदृष्टेकुजार्कजयोर्भौमशनैश्चरयोरा
येएकादशस्थितयोर्जातोमात्रात्यक्तोपिविनश्यतिम्रियतइत्यर्थः सौम्येपिपश्यतीति पूर्वोक्तयोगस्थेचंद्रमसिपापदृष्टेसौम्येशुभग्रहेपिपश्यतिसतुजातोमात्रा
त्यज्यतेत्यक्तोपियादृग्वर्णप्रभुणासौम्यग्रहेणचंद्रमादृष्टस्तथाविधस्यहस्तमेतितादृग्वर्णस्यब्राह्मणादेर्हस्तंगच्छतितेनचउपाल्यंतोजीवयतिच अथास्मिन्योगे
स्थितश्चंद्रमापापेनकुजेनसूर्य्येणसौरेणवादृश्यतेऽन्येनसौम्यग्रहेणचदृश्यतेतदाजातोतयोर्दृष्टग्रहयोर्य्योबलवान्तादृग्वर्णस्यब्राह्मणादेर्हस्तंगतोपिविनश्य
ति यदुक्तं सौम्येतरेषुपरहस्तगतोप्यनायुरिति ननुयथायोगचंद्रमसिसौम्यैः पापैश्चदृश्यमानेमात्रात्यक्तोविनश्यतीत्यभिहितंतत्रक्षत्रियवैश्यशूद्रवर्णसं

दृष्टेमरराजमंत्रिणादीर्घायुःसुखभाक्सस्मृतः १४ पापेक्षितेतुहिनगावुदयेकुजेऽस्तेत्यक्तोविनश्यतिकुजार्कजयोस्तथाये सौम्येपि
पश्यतितथाविधहस्तमेतिसौम्येतरेषुपरहस्तगतोप्यनायुः १५ पितृमातृगृहेषुतद्बलात्तरुशालादिषुनीचगैः शुभैः ॥ ० ॥

करादिषुहस्तगतःसर्वएवविनाशमाप्नोति वहवश्चमात्रात्यक्ताः क्षत्रियादिवर्णसंकरगताश्चजीव्यमानादृश्यंते तस्मात्पूर्वश्लोकादृष्टेऽमरराजमंत्रिणादीर्घायु
सुखभाक्सस्मृतइत्येतदिहशेषभूतमवगंतव्यं तस्माद्बुधेनशुक्रेणवायथादर्शितयोगस्थश्चंद्रमादृश्यतेजीवेनदृश्यतेतदापरहस्तगतोपिक्षित्रते यथापापेक्ष एम
सौम्येनवादृश्यमानोपिजीवेनदृश्यतेतदादृष्टग्रहाबलवशात्तद्वर्णस्यब्राह्मणादेर्हस्तगतेजीवति तथाचसारावल्यां म्रियतेपापैर्दृष्टःशशिनिविलग्नेकुजेस्तगेत्यक्तः ३१
लग्नाच्चलाभगतयोर्वसुधासुतमंदयोरेवं पश्यतिसौम्योबलवान्यादृग्गृहन्हातितादृशोजातं शुभपापग्रहदृष्टेयुतेपरैर्गृहीतोप्यसौम्रियते सर्वैर्दृष्टे [illegible] पु
शशीसुरेज्यसंदृष्टःभवतितदादीर्घायुर्हस्तगतःसर्ववर्णेषु अधुनाप्रसवगृहज्ञानंवैतालीयेनाह १५ पितृमातृति पितृमातृग्रहादित्यार्कशुक्रावित्यादिनो
क्ताः तद्बलात्पितृमातृग्रहवीर्य्यात्पितृमातृगृहेप्रसूतइतिवदेत् तदार्कशनैश्चरयोरन्यतमेबलवतिपितृगृहेपितृव्यस्य पितृव्यादिसंबंधिगृहेप्रसूतिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं मातृग्रहयोश्चंद्रशुक्रयोरन्यतमे बलवद्भवति मातृग्रहे मातृस्वसृमातुलादिषु गृहे प्रसूतिः तरुशालादिषु नीचगैः शुभैरिति बहुवचनात्सर्वैरेव शुभग्रहैः यदा
नीचस्थैर्भवितं तदा तरुषु वृक्षेषु शालेषु प्राकारसमीपेषु प्रसवो वाच्यः आदिग्रहणान्नदीकूपारामपर्वतेषु सर्वेषु प्रदेशेषु नाह्नत्तेषु यदि नैकगतैरिति नीचगैः शुभैरित्य
नुवर्तते सर्वैः शुभग्रहैः नीचगतैः लग्नेंदू उदयचंद्रावुभावप्येकराशिगतौ ग्रहैर्बहुवचनात्त्रिः प्रभृतिभिर्यदा न दृश्यते तदा विजने जनरहिते स्थाने दृष्ट्वा प्रसूति
ति यदा पुनरेकस्थैर्बहुभिर्ग्रहैर्यदा लग्नेंदू दृश्यते तदा जनाकीर्णे प्रसूतिरिति तथा च सारावल्यां पितृमातृग्रहे वर्गे तत्स्वजनगृहेषु बलयोगात् प्राकारतले नदी
षु च प्रसूतिर्नीचाश्रितैः सौम्यैः नेक्षते लग्नेंदू यद्येकस्था ग्रहाः तदाटव्यां अधुना दीपसंभवासंभवभूप्रदेशे प्रसवज्ञानं गर्भमोक्षं मातृक्लेशज्ञानं मे दाक्रांत योह
१९ मंदर्क्षांशमिति शशिनि चंद्रे यत्र तत्र राशौ मंदर्क्षांशे शनेश्चरस्य नवभागे मकरकुंभयोरन्यतमांशकस्थे तमसि अंधकारे सूतिशयनं वक्तव्यं हिबुके लग्नाच्च
तुर्थस्थे चंद्रे अंधकार एव शयनं यत्र तत्रावस्थिते चंद्रे मंदेन सौरेण दृष्टे अंधकार एव अब्जगे वा अब्जराशौ अत्र कर्कटमीनौ द्वौ विज्ञेयौ मकरकुंभयो रुक्तत्वात् मंद

यदि नैकगतैस्तु वीक्षितौ लग्नेंदू विजने प्रसूयते १९ मंदर्क्षांशे शशिनि हिबुके मंददृष्टेऽब्जगे वा तद्युक्ते वा तमसि शयनं नीचसंस्थैश्च भूमौ।

र्क्षांशे इत्यादिनेति तेन यत्र तत्र राशौ कर्कटनवांशकस्थे मीननवांशकस्थे वा चंद्रमसि अंधकार एव तद्युक्ते वेति तदिति सौरः परामृश्यते यत्र तत्रावस्थिते चंद्रे सौर
युक्ते अंधकार एव एवं निषेककाले नारीशयनमपि सर्वेष्वेतेषु योगेषु यदार्कदृष्टः चंद्रमा भवति तदांधकाराभावः यस्माद्यवनेश्वरः सौरांशकस्थे शशिनि प्रलग्ने ज
ले जलराश्यंशकमाश्रिते वा स्वांशस्थिते केंद्रगतेऽर्कजे वा जातस्तमिस्रे यदि नार्कदृष्टः १ अन्येषां मतं यथा सूर्ये बलवति भौमेन दृष्टे सत्स्वपि योगेष्वंधकारा
भावः तथा च सारावल्यां बलवति सूर्ये दृष्टे बहुप्रदीपाधरासुपुत्रेण अन्यैर्व्ययगतवीर्यैः सूतौ ज्योतिषरूपणे भवति सौरांशेऽथ जलांशे चंद्रेऽर्कसंयुतेऽथवा हिबुके
तद्दृष्टे वा कुर्यात्तमसि प्रसवं न संदेहः नीचसंस्थैश्च भूमाविति शयनमित्यनुवर्तते बहुवचनाद्यथासंभवं त्रिप्रभृतिभिर्ग्रहैर्नीचस्थैर्भूमौ शयनं वाच्यं भूशब्देनात्रा
तृणास्तृता भूर्ज्ञेया केचिल्लग्नस्थे चतुर्थस्थे वा नीचगते चंद्रे भूशयनमिच्छंति यथा सारावल्यां नीचस्थे भूशयनं चंद्रेऽप्यथवा सुखे विलग्ने वा यद्वदिति प्रसव.
लग्नराशिर्यद्वत्तेन प्रकारेण हरिजिं व्रजत्युदयलेखां परित्यजति तद्वत्तेनैव प्रकारेण नार्या गर्भमोक्षो वाच्यः। यत्राकाशं भूम्यासहासर्क्षं समंताद्दृश्यते तद्द्वारि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृ. टी. भ. ३२

हरिजमितिगर्भेन मवज्जो प्रक्रमिवलक्ष्यतेयथोक्तेषु तद्यथा शीर्षोदयेषु लग्नेषूक्तानाथ्य: उक्तानाद् र्शनंदर्शयंयतोगर्भस्यमोक्षोवाच्य: पृष्ठोदयेष्वधोमु
खस्यप्रष्टंदर्शयत: तथाचसारावल्यां शीर्षोदयेविलग्नेमूर्द्ध्नाप्रसवोन्यथोदये चरणै: उभयोदयेचहस्तै: शुभदृष्टेशोभनोन्यथाकष्ट: केचिदेवंव्याचख्य
ते यदालग्नाधिपोनवांशकाधिपोवालग्नस्थोवाग्रहोवक्रीभवतितदावैपरीत्येनगर्भमोक्षोभवति तथाचमणित्थ: लग्नाधिपेंशकपतौलग्नस्थेवक्रिते
ग्रहेपिवा विपरीतगतेमोक्षोवाच्योगर्भस्यसंक्लेश: पापैरिति पापग्रहैश्चंद्रगतेशशिनासहव्यवस्थितै: स्मरगतैलग्नात्सप्तमस्थैर्वासुखगतैश्चतुर्थस्थैर्वाप्र
सवकालेजनन्या: मातु: क्लेशमाहु: कष्टंकथयंतिसूरय: तथाचसारावल्यां क्लेशोमातु: क्रूरैर्बंधुस्मरगतै: शशांकयुक्तैर्वा अथदीपगृहद्वारज्ञानमाह इंदु
वज्ञयाह१७ स्नेहोशशांकादिति शशांकाच्चंद्रात्स्नेहोवाच्य: जन्मकालेपूर्णेचंद्रमसिस्नेहेनपूर्णंदीपभाजनंवक्तव्यं क्षीणेक्षीणास्नेहमिति तथाचसारा
वल्यां दीप: पूर्ण: पूर्णेशशिनिक्षीणेक्षयस्तुतैलस्य यद्येवंतदामावास्यायांसर्वेषामंधकारेप्रसवोभवति तस्मादयुक्तमेतत् तेनयत्रराशौचंद्रमाव्यवस्थित

यद्द्वाशिर्व्रजतिहरिजंगर्भमोक्षस्तुतद्वा पापैश्चंद्रात्स्मरसुखगतै: क्लेशमाहुर्जनन्या: १७ स्नेह: शशाङ्कादुदयाच्चवर्त्तिर्दीपोर्कयुक्त

स्तत्रयदिराशिप्रारंभेस्थितोभवतितदादीपभाजनंस्नेहेनपूर्णंवक्तव्यं अथराश्यवसानेस्थितस्तत्रस्नेहांतंदीपंस्नेहरहितं मध्ये ऽर्क्षवशाच्चराद्य: ॥
प्राप्तेऽर्द्धे अन्यथानुपातादिति उदयाच्चवर्त्ति: उदयाल्लग्नाद्दीपेवर्त्तिरादेश्य: लग्नारंभेतत्क्षणाद्दत्तावर्त्ति: मध्येऽर्द्धदग्धावर्त्ति लग्नावसानेवर्त्तिदाहोवा
च्य: अंतरेनुपात: तथाचसारावल्यां यावल्लग्नादितितंवर्तिर्दग्धावृतावतीभवतिदीपोर्कयुक्तर्क्षवशादिति अर्कोनद्युक्तराशिवशाच्चराद्योदीपोवाच्य: तत्र एम. ३२
चरराशिव्यवस्थितेऽर्केसंचार्य्यमाणोदीपोआदेश्य: स्थिरराशिस्थेऽर्केएकदेशस्थ: दीप: द्विस्वभावस्थेऽर्केचालित: प्रतिष्ठितइति केचिद्वदंतियथायुक्ति
न्राशावर्क: स्थित: सराशिर्यस्यांदिशिस्थित: प्रागादीशा: क्रियवृषनृयुक्कर्केटेत्यादिनाप्रदर्शितं तस्यांदिशिदीपोआदेश्य: अन्येएवंवदंति यथायस्मि
शिअर्कोभ्रमवशेनाष्टप्रहरकल्पनयाष्टासुदिक्षुपरिभ्रमतस्तुतेनैवक्रमेणयस्यांदिशिव्यवस्थित: तस्यांदिशिगृहस्यदीपस्थानमिति तथाचसारावल्यां॥
द्वादशभागविभक्तेवासगृहेव्यवस्थितेसहस्रांशो दीपश्चरस्थिरादिषुतथैववाच्य: प्रसवकाले अत्रप्राच्यादिगृहंद्वादशधाविभाज्यमेषादिगणनयार्कराशि

श्रीकृष्ण

CC-0. In Public Domain. Digitization by eGangotri

तत्रदीपस्थानमिति केचिल्लग्नस्ययाद्दशोवर्णे लाट्ग्वर्णोदीयवर्तिमिच्छन्ति तथाचमणित्थः लग्नस्ययोत्रवर्णोनिर्दिष्टस्तेनवर्तिरादेश्यद्वारंतद्वास्तुनीति तद्वास्तुनिसूतिका
गृहेलग्नकेंद्रस्थैर्ग्रहैर्द्वारादेशोकार्य्यः तस्यग्रहस्ययोदिक्प्रागाद्यांरविशुक्रकोहितनमइत्यादिनोक्तस्तदिगभिमुखंसूतिकागृहंवक्तव्यं बहुषुकेंद्रेषुबलवद्ग्रहव
शात्शून्येषुकेंद्रेषुलग्नराशिवशाल्लग्नस्ययादिकृतदभिमुखंद्वारं यस्मादनेनैवस्वल्पजातकेउक्तं द्वारंवास्तुनिकेंद्रोपगाद्ग्रहादसतिवाविलग्नर्क्षादिति अन्येत्वा
तियथालग्नद्वादशभागराशिस्तद्दिगभिमुखंसूतिकागृहद्वारं तथाचमणित्थः लग्नेयोद्वादशांशस्तदभिमुखंसूतिकागृहद्वारमिति एतच्चसंवादेनापिदृष्ट
मिति वीर्य्यसमन्वितादित्युत्तरत्रसंबध्यते केचिद्वदंति यथावीर्य्यसमन्विताद्ग्रहाद्गृहद्वारंवदेत् तथाचसारावल्यां वासगृहेद्यानगतंदिक्यालकाद्वलोपेतादि
ति अधुनासूतिकागृहस्वरूपज्ञानंशार्दूलविक्रीडितेनाह १८ जीर्णसंस्कृतमिति वीर्य्यसमन्वितादित्यनुवर्त्तते सर्व्वग्रहेभ्योऽर्कजेसौरेवीर्य्येवतिसबलेजीर्ण
मतिचिरंतनंभूयः संस्कृतंसूतिकागृहंवाच्यं क्षितिसुतेभौमेबलवत्यग्निनादग्धं एवंशीतगौचंद्रेनवममिनवंशुक्लपक्षेउपलिप्तंवदेत् यस्माद्यवनेश्वरः संवद्
द्वारंवनद्वास्तुनिकेंद्रसंस्थेर्ज्ञेयंग्रहेवीर्य्यसमन्वितेर्वा १८ जीर्णसंस्कृतमर्कजेक्षितिसुतेदग्धंनवंशीतगौकाष्ठाढ्यंनदृढंरवौशशि
सुतेनन्वेकशिल्प्युद्भवं॥ ॥

१९ तांचंद्रमसोपलिप्तमिति काष्ठाढ्यंनदृढंरवाविति रवौआदित्येकाष्ठाढ्यंदारुबहुलंनदृढमसारं शशिसुतेबुधेतद्गृहम
नेकशिल्प्युद्भवबहुविधशिल्पिरचितंरम्यंविचित्रयुतंइति भृगुजेशुक्रेरमणीयंमनोरमंचित्रयुक्तंचित्रकर्म्मसंयुतं जीवेगुरौदृढंचिरकालस्थायि चक्रस्थैरिति॥
चक्रस्थैर्भगणचक्राधिरूढैर्ग्रहदातुर्ग्रहसमीपस्थैरितियेग्रहैः सामंतपूर्व्वोसमंतात्सर्व्वासुदिक्षुयथोपदिष्टांवदेद्ब्रूयात् सामंतपूर्व्वोप्रतिवेश्मिकवेश्मनांसमंता॥
क्रमेणेत्यर्थः यथाग्रहस्यग्रहाःपुरतःपश्चाद्वा पार्श्वयोर्वोन्येग्रहाव्यवस्थितास्तेनैवक्रमेणसूतिकागृहस्यान्यानिप्रतिवेश्मगृहाणिवाच्यानि अन्येसामं
तपूर्व्वामितिपठन्ति सामंतादृहपर्य्यन्तात्पूर्व्विकारचनामिति तथाचसारावल्यां भवनग्रहसंयोगैःप्रतिवेश्माश्चिंतनीयाःस्युः देवालयांबुपावककोशविहार
घवस्करस्थानं निद्रागृहंचभास्करशशिकुजगुरुभार्गवार्किबुधयोगात् अत्राचार्य्येणगृहभूमिकाप्रमाणं त्रिशालद्विशालत्वानंचनोक्तं तदुच्यते द्दहस्य
तोकर्कटस्येपरमोच्चभागाद्भ्रष्टेलग्नाद्दशमगेद्विभूमिकमुच्चभागेषद्वोत्क्रस्थितेषुत्रिभूमिकमुच्चभागस्थेचतुर्भूमिकं धनुषिसबलेदशमस्थानस्थेगुरौत्रिशाल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दै.
टी.भ
३३

गृहं मिथुनकंन्योमीनस्येद्विशालं उक्तंचस्वल्पजातके गुरुरुच्चोदशमस्थोद्वित्रिचतुर्भूमिकं करोतिगृहं धनुषिसबलेत्रिशालंद्विशालमंन्येषुयमलेषुइति अथ
समस्तवास्तुनिक्कसूतिकागृहमितितद्दिक्ज्ञानंदोधकेनाह १९ मेषकुलीरतुलालिघटे: मेषःक्रियःकुलीरःकर्कटःतुलाप्रसिद्धः अलिर्वृश्चिकःघटःकुंभः
एतैर्लग्नैरेषामंशकैर्वालग्नगतेवास्तुनिप्राग्भागेसूतिकागृहंवक्तव्यं गुरुसौम्यगृहेषु गुरुगृहेषुधन्विमीनौसौम्यगृहेषुमिथुनकंन्येएतेषुलग्नेषुतदंशकेषुवा
उत्तरतोवास्तुनिउत्तरदिग्भागेसूतिकागृहंकुरुतः वृषेलग्नेतदंशकेवापिपश्चिमतोनिवासोप्रसूतिकागृहंवाच्यं मृगसिंहौ मकरकेसरिणौदक्षिणभागकराविति
दक्षिणभागेसूतिकागृहंकुरुतः अथसूतिकागृहेक्कशयनमितितत्ज्ञानंवैतालीयेनाह २० प्राच्यादिति प्राच्यादिगृहेसूतिकावेश्मनिप्राच्यादिषुपूर्वाद्या
स्वष्टसुदिक्षुषुक्रियाद्यामेषाद्याराशयः द्वौद्वौचतसृषुदिक्षुकोणगताविदिक्षुगताद्विमूर्त्तयः द्विस्वभावः तद्यथामेषवृषयोर्लग्नयोर्गृहस्यस्यप्राग्भागेसूतिकाशयनं
मिथुनेआग्नेय्यां कर्कटसिंहयोर्दक्षिणे कंन्यायांनैऋतेतुलावृश्चिकयोः पाश्चिमे धनुषिवायव्ये मकरकुंभयोरुत्तरे एषविधिःशय्यास्वपिवक्तव्यं यात

रम्यंचित्रयुतंनवंचमृगजेजीवेदृढंमंदिरंचक्रस्थेश्वयथोपदेशरचनांसामंतपूर्वंवदेत १९ मेषकुलीरतुलालिघटैः प्रागुत्तरतोगुरुसौम्य
गृहेषु पश्चिमतश्चवृषेणनिवासोदक्षिणभागकरौमृगसिंहौ २० प्राच्यादिगृहेक्रियाद्योद्वौद्वौकोणगताद्विमूर्त्तयः शय्यास्वपिवास्तुव
द्वदेत्यादेःषड्त्रिनवांत्यसंस्थितैः २१॥ ॥उक्तं शय्यास्वपिवास्तुवद्वदेदितिकिंचित्अयंविशेषः पादैःषट्त्रिनवांत्यसंस्थितैरिति इहखट्वापादाःषट्त्रिनवांत्यराशयः लग्नात्षष्टतृतीयनवद्वादशराशयःखट्वायाःपादाःपरिकल्प्याः तत्रैतज्जातं येनलग्नेनप्रसवस्तदुक्तदिशिशय्यायाःशिरस्तस्मादेवषट्त्रिनवांत्याः
पादास्तत्रद्वादशतृतीयौपूर्वपादौतृतीयोदक्षिणःद्वादशोवामः षष्टनवमौपश्चिमपादौतत्रापिषष्टोदक्षिणःनवमोवामः लग्नद्वितीयौशीर्षभागं चतुर्थपंचमौदक्षिणमंगं सप्तमाष्टमौपादांतरभागः दशमैकादशौवाममंगं प्रयोजनं विनततंयमलक्षैः क्रूरैस्तत्तुल्यमुद्घातः इतियत्रद्विस्वभावराशयःस्थितास्तत्रविनतत्वं यत्रपापास्तत्रतत्सदृशश्चोपघातः एवंसदैवानुपपन्नत्वद्वागप्रसवाःयस्मात्वस्वक्कचिदपियमलैर्भाव्यंक्कचित्पापग्रहैश्चतस्माद्यत्रयमर्क्षेसौम्यग्रहस्तस्तामिथुनदृष्टं
तत्रापिविनतत्वंपापाग्रहोपिस्वोच्चराशित्रिकोणमित्रक्षेत्रस्थः अशुभफलकरोनभवतीति अथुनोपसूतिकासंख्याज्ञानमुनुष्टुभाह २१ ॥

राम
३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चंद्रलग्नामिति लग्नाद्यस्मिन्यत्रराशौचंद्रमाव्यवस्थितस्तदंतरेतयोर्म्मध्येयावंतोग्रहाव्यवस्थितास्तेचंद्रलग्नांतरगताः ग्रहास्तैरुपसूतिकाः स्युस्तावत्संख्याउपसूति
काः सूतिकासमीपवर्त्तिन्यः स्त्रियास्युर्भवेयुः ताश्चग्रहतुल्यज्ञातिवयोवर्णरूपाः तथाचसारावल्यां शशिलग्नविवरयुक्ताग्रहतुल्याः सूतिकाश्चविज्ञेयाः अनुदि
तचक्रार्द्धयुतैरंतर्बहिरंन्यथात्वेके रूपविभूषणयोगस्तासांज्ञेयः शुभैर्य्योगात् क्रूरैर्व्विरूपदेहालक्षणाहीनासुरौद्रवीर्य्याश्च मिश्रैर्म्मध्यमरूपो [illegible]
तेदव धार्य्यं बहिरंतरश्चेति तथायावंतोदृश्येचक्रार्द्धेव्यवस्थिताः तावत्संख्याउपसूतिकाबहिर्गृहबाह्यावक्तव्याः यावंतपश्चाद्दृश्येचक्रार्द्धेव्यवस्थितास्तावत्संख्याअं
तर्गृह अभ्यंतरेवक्तव्याः अत्रलग्नस्ययावंतउदिताभागास्तथाद्वादशैकादशदशमनवमाष्टमराशयस्ततसप्तमराशेर्लग्नानुदितभागतुल्यंदृश्यम[illegible]शेषमदृश्यं।
मिति अन्यथापरे अपरेअन्येआचार्य्याअन्यथा अन्येनप्रकारेणदृश्येचक्रार्द्धेऽभ्यंतरगतावर्णयंति अदृश्येबाह्यस्था तथाचजीवशर्म्मा उदयशशिमध्यसं
स्थैर्ग्रहैः स्युरुपसूतिकास्तत्र उदगर्द्धगतैर्बाह्यादक्षिणगैरंतरेज्ञेयाइति एतदाचार्य्यस्यानाभिप्रेतं यतोनेनैवस्वल्पजातकेउक्तं शशिलग्नांतरसंस्थाग्रहतुल्यारु

चंद्रलग्नांतरगतैर्ग्रहैःस्युरुपसूतिकाः बहिरन्तरश्चचक्रार्द्धेदृश्यादृश्येन्यथापरे २२ लग्ननवांशपतुल्यतनुः स्याद्वीर्य्ययुतग्रहतुल्यतनुर्वा

पसूतिकाश्चवक्तव्याः उदगर्द्धेऽभ्यंतरगाबाह्याचक्रस्यदृश्येर्द्धेइति अत्रचआयुर्द्दायविधिनाद्वित्रिगुणत्वंकृत्वाग्रहस्थानवशादुपसूतिकासंख्यानिश्चयः कार्य्यः
यदिबहुजनप्रसूतियोगोनभवतितथाग्रहसंख्याधिकसूतिकासंभवोयत्रभवतितत्रबहुजनप्रसूतियोगेनभवतिनभवितव्यमिति अथजातकस्यस्वरूपज्ञानंदो
धकेनाह २२ लग्ननवांशपेति जन्मकालेलग्नेयोनवांशकोभ्युदितस्तस्ययोस्वामीसलग्ननवांशपस्ततुल्यतनुस्तदाकारोजातोवक्तव्यः यथामधुपिङ्गलदृगि
त्यादि अथवाजातककालेसर्व्वग्रहेभ्योयोग्रहोवीर्य्ययुतोबलवान्तत्तुल्यतनुर्व्वावक्तव्यः यदिलग्ननवांशकस्योराशिर्ब्बलवान्भवतितदातदंशपतुल्यतनुर्भवत्य
न्यथासर्व्वग्रहेभ्योवीर्य्यवान्यग्रहतुल्यतनुरिति चंद्रसमेतनवांशपवर्णइति योनवांशकश्चंद्रेणशशिनासमेतः संयुक्तश्चंद्रोयस्मिन्नवांशकेस्थितइत्यर्थः ॥
तस्यनवांशकराशेर्य्योधिपतिः सचंद्रसमेतनवांशकपः तस्ययोवर्णःतद्वर्णोजातोभवति अत्रचवर्णोरक्तश्यामोभास्करीरिति अन्येचंद्राक्रांतराशिवर्णमेववाहुः
यथारक्तः श्वेतः शुकतनुनिभरित्यादितत्रशुकवर्णस्यासंभवादयुक्तमेतत् एतच्चवर्णादिजातिकुलदेशान्बुध्वाकाव्यं उक्तंच ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२. बलिनः सदृशी मूर्तेर्बुध्वा वा जातिकुलदेशानिति कादिविलग्नविभक्तभगात्रइत्यनेन विधिना शिरः प्रभृतीनामवयवानां ह्रस्वदीर्घत्वं निरूपयति कादिनि विलग्नादि
टी.भ भिर्विभक्तानि भैः राशिभिर्गात्राणि यस्य स कादिविलग्नविभक्तभगात्रः तत्र लग्नादयो राशयो कादिषु शिरप्रभृतिषु गात्रेषु परिकल्प्याः यथा कालाङ्गानीति तत्र
३४ लग्नं शिरः द्वितीयो मुखं तृतीयो उरः चतुर्थो हस्तः पंचमो क्रोडः षष्ठः कटी सप्तमो वस्तिः अष्टमो शिश्नगुदे नवम ऊरु दशमो जानुनी एकादशो जंघे द्वादशः
पादाविति तत्र चराशीनां प्रमाणमुक्तं पूर्वार्द्धे विषयादयइति तत्र यत्रांगस्य दीर्घे राशौ दीर्घराश्याधिपो वा व्यवस्थितो भवति तदंगं तस्य दीर्घत्वं वक्तव्यं तथा च सत्यः
दीर्घाधिपतिं दीर्घगृहे स्थितोऽवयवदीर्घकृद्भवति अथो दे वा स्वप्रमाणराश्याधिपोऽल्पराशिव्यवस्थितो वा तदंगाल्पकृद्भवति अत्र राश्यधिपो पि अल्पराशिव्यव
स्थितो गमध्यकृद्भवति अल्पराश्यधिपो दीर्घराशिव्यवस्थितोंगमध्यमत्वं यत्रांगराशौ वह वो व्यवस्थितास्तत्र बलवद्ग्रहवशाद्वाच्यं यत्र न कश्चिद्व्यवस्थितस्तत्र
राशिप्रमाणात् एवं योग्यं वाच्यं इति सूतिकाप्रकरणं अत्रैव सूतिकाध्याये जातस्य व्रणमशकादिचिन्हनिरूपणार्थं मंगप्रकरणमारभ्यते तत्र च लग्नप्रथमद्वितीय

चंद्रसमेतनवांशपवर्णैः कादिविलग्नविभक्तभगात्रः २३ कं दृक् श्रोत्रनसाकपोलहनवो वक्त्रं च होरादयस्ते कंठांसकबाहुपार्श्वहृदयक्रो ।
तृतीयद्रेष्काणो नवांशेन प्रथमद्वितीयतृतीयशरीरभागपरिच्छेदः तत्र शिरः प्रथमोंगविभागः शिरोरधस्ताद्यावन्नाभिस्तावद्द्वितीयः । ऽऽडानि नाभिस्ततः ॥
नाभेरधः प्रभृति पादांतं यावत्तृतीयः तेषामंगविभागानां राशिविभागं शार्दूलविक्रीडितेनाह २२ कं दृक् इति त्रिप्रकारं त्रिधा त्रिभिर्द्रेष्काणभागैस्त्रिधा शरीरप्रवि राम
भागः तत्र लग्नस्य प्रथमद्रेष्काणे उदयति प्रथमो मूर्द्धाद्यंगविभागः द्वितीयद्रेष्काणे उदयति कंठपूर्वकोंगद्वितीयो विभागः तृतीयद्रेष्काणे उदयति वस्तिपूर्वकं तृ ३४
तीयांगविभागः तत्रांगविभागे वामदक्षाऽवयवज्ञानमाह वाममुदितैरिति राशिभिरुदितैर्दृश्यभागावस्थितैर्वामांगविभागः लग्नस्योदितभागास्तथा द्वादशै
कादशदशमनवमाष्टमाः सप्तमराशेर्लग्नानुदितभागास्तथा द्वितीयतृतीचतुर्थपंचमषष्ठाः सप्तमराशेर्लग्नोदितं लग्नतुल्यभागाः एवं स्थिते लग्नप्रथमद्रेष्काणेषु
दिलग्नराशिः कं शिरः परिकल्पनीयः लग्नाद्द्वितीयद्वादशौ दृक् चक्षुषी तत्र द्वितीयो दक्षिणमक्षि द्वादशो वाममक्षि तृतीयैकादशौ श्रोत्रे तत्र तृतीयो दक्षिणमे
कादशो वामं चतुर्थदशमौ नासापुटौ चतुर्थो दक्षिणं दशमो वामं पंचमनवमौ कपोलौ पंचमो दक्षिणं नवमो वामं षष्ठाष्टमौ हनुनी षष्ठो दक्षिणमष्टमो वामं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तमोवक्त्रंमुखं एवंराश्याद्युपलक्षितः प्रथमोंगविभागः तेकंठांशकइति अथद्वितीयोद्रेष्काणोदयस्तदातेहोरादयोंगविभागः परिकल्प्याः तद्यथा लग्नंकंठोगलं
द्वितीयद्वादशौस्कंधौ तत्रद्वितीयोदक्षिणस्कंधोद्वादशोवामं तृतीयेकादशौबाहूतृतीयोदक्षिणमेकादशोवामं चतुर्थदशमौपार्श्वेचतुर्थोदक्षिणंदशमोवामंपंचम
नवमौहृदयंगौपंचमोदक्षिणंनवमोवामं षष्ठाष्टमौक्रोडमुदरभागौषष्ठोदक्षिणः अष्टमोवामः सप्तमोनाभिरिति नाभिग्रहणमपरोदरोपलक्षणार्थं एवंद्वि
योंगविभागः बस्तिःशिश्नगुदेति लग्नेद्रेष्काणेतृतीयेउदयतिसएवहोरादयस्तृतीयोंगविभागपरिकल्प्याः तद्यथा लग्नंबस्तिःनाभिलिंगयोर्मध्यमभागः द्वितीय
द्वादशौशिश्नगुदंतत्रद्वितीयोशिश्नगुदयोर्दक्षिणभागःद्वादशोवामः ततोनंतरंतृतीयेकादशौवृषणौतृतीयोदक्षिणःएकादशोवामः चतुर्थोदशमोऊरूचतुर्थोदक्षि
णः दशमोवामः पंचमनवमौजानुनीपंचमोदक्षिणःनवमोवामं षष्ठाष्टमौजंघेषष्ठोदक्षिणजंघा अष्टमोवामजंघा सप्तमः पादयमिति अथअंगज्ञानंप्रयोज
नंशार्दूलविक्रीडितेनाह २४ तस्मिन्पापयुतइति तत्रप्रथमद्रेष्काणजातस्यशिरोंगविभागोद्वितीयद्रेष्काणजातस्यकंठाद्यंगविभागः तृतीयद्रेष्काणजातस्यवा

बस्तिशिश्नगुदेततश्चवृषणावूरूततोजानुनीजंघेंघ्रित्युभयत्रवामसुदितैःद्रेष्काणभागैस्त्रिधा २४ तस्मिन्पापयुतेव्रणंशुभयुतेदृष्टेचलक्ष्मा
दिशेत्स्वर्क्षांशेस्थिरसंयुतेषुसहजःस्यादन्यथागंतुकः मंदेश्मानिलजोग्निशस्त्रविषजोभौमेबुधेभूभवः सूर्येकाष्ठचतुष्पदेषुहिमगोशृंग्य
स्याद्यंगविभागः तस्मिन्पापयुतेति यत्रांगराशौपापग्रहसंयुक्तेतत्रांगेव्रणंविस्फोटकादिच्छिद्रंमशकादिचिन्हमादिशेत् तस्मिन्पा॥ब्जजोन्यैःशुभम् २५॥
पयुतेंगराशौपापग्रहसंयुतेशुभसंयुतेदृष्टेसौम्यग्रहसंयुक्तेऽवलोकितेवातद्राश्युपलक्षितेंगेलक्ष्मादिशेत् मशकादिचिह्नंवाच्यं स्वर्क्षांशइति सएवग्रहोव्रणमश
कादिकर्तास्वर्क्षेस्वराशौस्वनवांशकेवास्थितोभवति स्थिरराशौस्थिरांशकेवास्थितस्तदाव्रणमशकादिकंसहजोन्मसमकालएजंतोर्भवतिअन्यथोक्तविपर्ययेस्थेआ
गंतुकोजातस्योत्तरकालेकेनचिन्निमित्तेनवक्ष्यमाणेनस्वदशाकालेवक्तव्यं आगंतुकस्यव्रणादेर्ग्रहवशेनतस्मिन्निमित्तमाह मंदेश्मानिलजइति मंदेशनैश्चरेव्रण
कर्तृत्वप्राप्तेतद्गुणाद्यश्मनापाषाणहेतुकोऽनिलजोवातव्याधिहेतुकोवावक्तव्यः भौमव्रणस्यकर्तृत्वंप्राप्तेअग्निशस्त्रविषजोऽग्निहेतुकःशस्त्रहेतुकोवि
षहेतुकोवावक्तव्यः बुधेभूभवोच्छ्रितपाताद्भूम्यभिघातहेतुकोलोष्टप्रहारहेतुकोवासूर्येरवौकाष्ठप्रहारहेतुकश्चतुष्पदप्राणिहेतुकोवावक्तव्यः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰ हिमगोचंद्रेशृंग्यब्जजः शृंग्यभिघातहेतुकः शृंगेविषाणेयस्यप्राणिनः सशृंगीतज्जातोऽब्जकृतोवाजलप्राणिहेतुकोवावक्तव्यः अन्यैः शुभैः अन्यैर्ग्रहायत्रांग
टी॰भ देशस्थाभवंतितत्रशुभाव्रणकरानभवंतितत्रावशेषोगुरुसितौशुभयुक्तोबुधोपिव्रणकरोनभवतितस्माद्बहुवचनादुच्यते बुधः पापयुक्तोव्रणकरः क्षीणश्चं
३५ द्रमास्तथा ततोन्यैः शुभमित्युक्तं अथव्रणज्ञानंहारिण्याह २५ समनुपतितादिति यस्मिन्भागेवामेदक्षिणेवात्रयः सबुधाग्रहाः त्रयोन्येग्रहाश्चतुर्थेनबुधेन
सहिताः समनुपतिताः समाश्रिताःस्तत्रांगेपूर्वोक्तेव्रणादेर्नियमान्निश्चयादवश्यंप्राप्तिर्भवतिशुभेषुवा तेग्रहाः सबुधाः शुभाः सौम्याः अशुभाः पापावाभवंति॥
तथापितत्रांगेनस्यव्रणावाप्तिर्वक्तव्या तेषांमध्याद्योबलीसस्वदशामवाप्यकरोतिव्रणकृदिति लग्नात्षष्ठेस्थानेऽशुभः पापोव्यवस्थितोदेहेशरीरेव्रणकृद्भवति।
कस्मिन्स्थानेतनोर्भसमाश्रिते ततोलग्नात्सषष्ठस्थोराशिः कालांगानीत्यनेनदर्शितांगविभागेयस्मिन्भवतितस्मिन्भसमाश्रितेराशियुक्तेदेहेशरीरेभवति तत्रापिस्वक्षो
शस्थिरसंयुतेषुसहजः स्यादन्यथागंतुकइत्यनुवर्तनीयं सएवषष्ठस्थानस्थः पापः सौम्येनशुभग्रहेणयदादृष्टोभवतितदातत्रांगेतिलकमसकृद्भवतितिलकः

समनुपतितायस्मिन्भागेत्रयः सबुधाग्रहाभवतिनियमात्तस्यावाप्तिः शुभेष्वशुभेषुवा व्रणकृदशुभः षष्ठेदेहेतनोर्भसमाश्रितेतिलकम
सकृद्दृष्टः सौम्यैर्युतश्चसलक्ष्मवान् २६ संध्यायांहिमदीधितिहोरापापैर्भांतगतैर्निधनाय॥ ॥ कृष्णः विंदुः मशकोऽर्ज्जुनः अथस्वशुभग्रहेणसए
वपापयुतस्तदासलक्ष्मवान्भवति राश्युपलक्षितमंगंसचिन्हंभवतिअत्रस्थानेघनोलोमनिचयोलक्ष्मइति॥ ॥इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकवि
वृतौजन्मविधिनामाध्यायोपंचमः समाप्तः॥ ॥अथारिष्टाध्यायोव्याख्यायतेतत्रतावज्जातस्यारिष्टसंभवेसत्यायुर्दायाष्टकवर्गादेर्नाशः कर्त्तव्यः तस्मात्प्रथ राम
मारिष्टाध्यायंवक्ष्यति तत्रारिष्टत्रयंविद्युतमालयाह १ संध्यायामिति संध्यायालक्षणंसंहितायामुक्तं अर्द्धास्तमयात्संध्याव्यक्तीभूतानतारकायावत्
तेजः परिहानिमुखाद्भानोरर्द्धोदयोयावत् अस्मिन्संध्याकालइति तत्रजन्मनियस्यसंध्याकालेभवतितत्काललग्नगताहिमदीधितेश्चंद्रस्यहोराभवति॥ ३५
यथासंभवंपापैर्भांतगतैः यत्रतत्रराशिस्थानवमांशगताः पापाभवंति तदेषयोगेजातस्यनिधनायमरणायभवति प्रत्येकमिति एकमेकंप्रतिप्रत्येकं
शशिचंद्रः पापाः त्रयश्चतुर्षुकेंद्रेषुव्यवस्थिताभवंत्येकैकंप्रतियथासंभवंचत्वार्य्यपिकेंद्राण्याक्रांताभवंति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथापियस्यजन्मभवतिसविनाशमुपैति म्रियतइत्यर्थः अथान्यानरिष्टयोगानिंद्रवज्रयाह १ चक्रस्येति यावंतोभागालग्नस्योदितास्तावंतएवभागाश्च
तुर्थराशेः परित्यज्यशेषभागेत्यारभ्यपंचमषष्टसप्ताष्टमनवमराशयोदशमराशिलग्नोदितभागतुल्यांशाश्चक्रेपरार्द्धं तत्रचक्रस्यपूर्वभागेक्रूराः पापाः इत
रभागेपश्चिमेसौम्याः शुभग्रहाः कीटलग्नेवृश्चिकराशावुदयेकर्कटेवोदयस्थितेजातः शिशुः क्षिप्रमाश्वेवविनाशंउपैतिमरणंप्राप्नोतिइत्यर्थः नन्वत्रपूर्वं
वृश्चिकः कीटसंज्ञाउक्तः पुनरपिद्विपदादयोः द्विनिशीचप्राप्तेचसंध्याद्वयेइत्यत्रकर्कटवृश्चिकमीनानांकीटत्वमभ्युपगतं तदत्रवृश्चिककर्कटौकथंव्याख्
यातावित्यत्रोच्यते मकरमीनयोर्जलचरत्वादपिसमत्वात्कीटसंज्ञानामभ्युपगम्यते यस्माद्बादरायणः पूर्वापरभागगतैरशुभैरलिनिकर्कटेलग्ने जातस्या
शिशोर्मरणंसद्यः कथयंतियवनेन्द्रः पापैर्विलग्नास्तमयाभितश्चेति पापैः क्रूरग्रहैः विलग्नाभितः अस्तमयाभितश्चस्थितैश्वशब्दाज्जातः क्षिप्रंशीघ्रमेव
विनाशंसमुपैति अत्रकेचिदेकेयोगद्वयंव्याचक्षते अभितश्चोभयतः लग्नात्पापैरभितः एकोयोगः अस्तमयादभिहतोद्वितीयः तत्रद्वादशद्वितीयस्थयोलग्ना

प्रत्येकंराशिपापसमेतैः केंद्रैर्वासविनाशमुपैति १ चक्रस्यपूर्वापरभागगेषुक्रूरेषुसौम्येषुचकीटलग्ने क्षिप्रंविनाशंसमुपैतिजातः
पापैर्विलग्नास्तमयाभितश्च २॥

त्पापयोर्जातोम्रियतेषष्टाष्टमयोश्चपापयोश्चजातोम्रियते तथालग्नसप्तमाच्चान्येपुनरभिशब्दोआभिमुनवर्त्ततेइत्यनुवर्ण
यंति तत्रलग्नाद्योद्वितीयराशौग्रहः स्थितः सउदयमभिलषतेलग्नस्याभिमुखोभवति यश्चलग्नादष्टमराशौभवतिसोस्तमयमभिलषतीत्यतः सप्तमराशाव
भिमुखोभवति तेनैतज्जातं लग्नाद्वितीयाष्टमगतैः सर्वैः पापैर्जातोम्रियते वयंपुनरभिशब्दआभिमुख्यवृत्तिंब्रूमः यस्माद्यवनेश्वरः ग्रहेषुलग्नाभिमुखेषुस
र्वेषवाप्तवीर्येषुस्ववर्गगेषुइतिकिंतुयोलग्नाद्वादशस्थानेस्थितः सउदयमभिलषति लग्नाभिमुखोभवति यश्चषष्टेस्थितः लग्नात्सोस्ताभिमुखोभवति यस्मा
द्ग्रहाणांप्राङ्मुखीगतिः उक्तंच प्राग्गतस्तुल्यजवाग्रहाश्चसर्वेस्वमंडलगाइति तत्रपूर्वाभिमुखंव्रजतोलग्नाद्वितीयस्यस्यतदाभिमुख्यंनसंभवतिनचाष्टमस्य
स्यास्ताभिमुख्यं तेनैवतज्जातंलग्नाद्द्वादशषष्टाश्रितैः पापैः यः जन्मसम्रियतइति भगवतागार्गेणसर्वाण्येवव्याख्यायान्यभिमुखानीति तथाचतद्वाक्यं
रिपुव्ययगतैः पापैर्य्यदिवाधनमृत्युगैः लग्नेवापापमध्यस्थेद्यूनेवामृत्युमाप्नुयादिति अथयोगांतरमनुष्टुभमाह २॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ॰ पापाविति एकः पापउदयेलग्नेस्थितोन्योऽस्तसप्तमेगतः शशीचंद्रमाः यत्रतत्रस्थः क्रूरेण पापेनयुतोभवतिसचसौम्यैः शुभग्रहैः यदिनदृष्टः तदाजातस्याशु
टी॰भ॰ मृत्युरचिराच्छीघ्रमेवभवेत् अथारिष्टांतरमनुष्टुभमाह ३ क्षीणेति हिमगौचंद्रेक्षीणेलग्नाद्व्ययगेद्वादशस्थेतथापापैः क्रूरग्रहैरुदयाष्टमगैः लग्नस्थैरष्टमगतैश्च
३६ केंद्रेषुकंटकेषुचेद्यदिशुभानभवन्तितदाजातस्यक्षिप्रमाश्वेवनिधनंमरणंवदेद्ब्रुयात् अत्रकेचित्पापैरुदयाष्टमगैरितिनेच्छंति तदयुक्तं यस्माद्भगवान्गार्गिः
क्षीणेचंद्रेव्ययगतेःपापैरष्टमलग्नगैः केंद्रबाह्यगतैःसौम्यैर्जातस्यनिधनंभवेत् १ अथारिष्टांतरसममालिन्याह ४ क्रूरइति शशीचंद्रः क्रूरेणग्रहेणसंयु
तस्तथाभूतः स्मरांत्यमृत्युलग्नगः सप्तमद्वादशाष्टमलग्नानामन्यमस्थस्तथा शुभैः शुभग्रहैः कंटकबाह्यस्थैः केंद्रवर्ज्यअन्यस्थानस्थैः अवीक्षितः नदृष्टो
भवति तदाजातस्यमृत्युदोमरणदोभवति अर्थादेवसौम्यैः केंद्रस्थैः तदारिष्टाभावः तथाचसारावल्यां व्ययाष्टसप्तमोदयगेशशांकेपापैः समेतेशुभदृष्टिही

पापावुदयास्तगतौक्रूरेणयुतश्चशशी दृष्टश्चशुभैर्नयदामृत्युश्चभवेदचिरात् ३ क्षीणेहिमगौव्ययगेपापैरुदयाष्टमगैः केंद्रेषुशुभा
श्चनचक्षिप्रंनिधनंप्रवदेत् ४ क्रूरसंयुतः शशीस्मरांत्यमृत्युलग्नगः कंटकाद्बहिः शुभैरवीक्षितश्चमृत्युदः ५ शशिन्यरिविना
शगेनिधनमाशुपापेक्षितेशुभैरथसमाष्टकंदलमतश्चमिश्रैःस्थितिः॥ ५ने केंद्रेषुसौम्यग्रहवर्जितेषुजातस्यसद्यः कुरुतेप्रणाशं अथारिष्टांत

राणिष्टय्याह ५ शशिनिइतिशशिनिचंद्रे अरिविनाशगे लग्नात्षष्ठस्थानस्थेऽष्टमस्थेवातत्रचपापानांक्रूराणांमध्यादन्यतमेनक्षितेदृष्टेसौम्यग्रहेणादृ
ष्टेनस्यनिधनंमरणमाशुक्षिप्रमेवभवति शुभैरिति अथलग्नात्षष्ठाष्टमगेचंद्रेसौम्यैर्ग्रहैर्दृष्टेपापनादृश्यमानेजातस्यसमाष्टकंवर्षाष्टकंस्थितिः जीवितंव
क्तव्यं ततोमरणमिति समशब्दोवर्षपर्यायः दलमतइति लग्नात्षष्ठाष्टमगेचंद्रेमिश्रैः पापसौम्यैश्चदृष्टेअतोऽस्मात्समाष्टकादर्षाष्टकाद्दलमर्द्धंवर्षचतु राम
ष्टयंस्थितिर्वदेत्ततोमरणमिति अर्थादेवषष्ठाष्टमस्थेचंद्रमसिनकेचिद्दृश्यमानेऽरिष्टयोगाभावः चंद्रमायदिषष्ठाष्टमस्थः सौम्यक्षेत्रगतोभवत्यथवापा ३६
पक्षेत्रगतः सौम्ययुक्तोभवतितदानमरणप्रदः यस्माद्यवनेश्वरः लग्नाच्छशीनेधनगोशुभर्क्षेषष्ठेयवापापनिरीक्षितश्च सर्वांपुराहन्तिशुभैर्विमिश्रस्तदी
क्षितोऽव्दाष्टकपापेक्षणं तथायस्यकृष्णपक्षेदिवाजन्मनिशुक्लपक्षेरात्रौजन्मनिलग्नात्षष्ठाष्टमगः शशीशुभाशुभदृष्टोपिभवतितस्यनमरणप्रदः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मान्मांडव्यः पक्षेसितेभवतिजन्मयदिसपापांकच्छेथवाहनिशुभाशुभदृश्यमानः तच्चंद्रमारिपुविनाशगतोपिलग्नाद्वायत्सुरस्सतिपितेवशिशुंनहंति अ
सद्भिरिति अत्रास्मिन्नेवषष्टेष्टमेवास्थानेशुभेसौम्यग्रहेबुधगुरुसितानामंन्यतमेस्थितेतस्मिंश्चासद्भिः पापैः बलिभिः वीर्ययुक्तैरवलोकितेदृष्टेजातस्यमा
सस्थितिः जीवितंवक्तव्यं ततोमरणमिति अत्रनिर्द्दिष्टयोगस्थेचंद्रमसिशुभदृष्टेऽरिष्टयोगाभावः यस्मादनेनैवस्वस्यजातकेउक्तं शशिवत्सौम्याः पापैर्बलिभि
रवलोकितानशुभदृष्टाः मासेनमरदाःस्युःपापजितोलग्नपश्चास्ते कलत्रसहितरिति विलग्नाधिपेजन्मलग्नपतौकलत्रसहितेसप्तमस्थानस्थेवापापवि
जितेक्रूरयुद्धेसंग्रामेविजिते विजितलक्षणं दक्षिणदिकस्थःपरुषोवेपथुप्राप्यसन्निवृत्तोणुः अधिरूढोविकृतोयःनिःप्रभोविवर्णश्चयःसजितःभौमादीनां
आकाशेयुद्धंभवतियःदक्षिणाशस्थः सग्रहजितःकुसुतानांयुद्धमित्युक्तत्वाच्चंद्रदीपिकायां परुषोरूक्षः वेपथुःकंपायमानः अन्यग्रहमप्राप्यसंनिवृ
त्तःविपरीतगतिमापन्नः अणुःसूक्ष्मः अधिरूढः अनेनाक्रांतः विकृतः विकारसहितः निःप्रभोदीप्तिरहितःविवर्णःवर्णरहितःसजितरिति चशब्दान्मा

असद्भिरवलोकितेबलिभिरत्रमासंशुभेकलत्रसहितेचपापविजितेविलग्नाधिपे ६ लग्नेक्षीणेशशिनिनिधनरंध्रकेंद्रेषुपापैः
पापांतस्थेनिधनहिबुकद्यूनयुक्तेचचंद्रे एवंलग्नेभवतिमदनच्छिद्रसंस्थेश्चपापैर्म्मात्रासार्द्धंयदिचनशुभैर्वीक्षितःशक्तिभृद्भिः ७
राश्यंतगेसद्भिरवीक्ष्यमाणेचंद्रेत्रिकोणोपगतैश्चपापैः॥

११ संस्थितिस्ततोमरणमिति अथारिष्टांतराणिमंदाक्रांतयाह ६ लग्नेक्षीणरिति क्षीणे
शशिनिचंद्रेक्षीणेलग्नेस्थितेतथारंध्रकेंद्रेष्वष्टमकेंद्रेषुपापैः क्रूरैः स्थितैर्य्यथासंभवमेवंविधेयोगेजातस्यनिधनंमरणंवक्तव्यं तथाचंद्रेशशिनिपापांतस्थेपा
पमध्यगतेनिधनहिबुकद्यूनयुक्तेऽष्टमचतुर्थसप्तमस्थानानामंन्यतमस्थेजातस्यमरणंवक्तव्यं एवमिति एवमनेनैवप्रकारेणलग्नगेपापांतस्थेशशिनि
तथामदनच्छिद्रसंस्थेसप्तमाष्टमस्थानयोरंन्यतमस्थेपापेक्रूरेयदिशुभैः सौम्यग्रहैः शक्तिभृद्भिःसबलैः चंद्रमानवीक्षितोनदृष्टोभवति तदाजातस्यमात्रासा
र्द्धंजनन्यासहमरणंवदेत् अथनिर्द्दिष्टयोगस्थश्चेच्चंद्रमाशुभैर्दृश्यतेबलिभिस्तदाजातस्यैवमरणंनतन्मातुरिति अथारिष्टांतराणिइंद्रवज्रयाह ७ रा
श्यमिति चंद्रेशशिनिराश्यंतगेयत्रतत्रराशौनवमनवांशकगतेतथासद्भिःशुभग्रहैःनवीक्ष्यमाणेनसंदृष्टेपापैःक्रूरैस्त्रिकोणोपगतैः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवपंचमस्थानस्थैः जातः शिशुः बालकः आशु क्षिप्रमेव प्राणैरसुभिः वियोगं प्रयाति गच्छति म्रियत इत्यर्थः अस्ते च पापैरिति तुहिनांशौ चंद्रे लग्नगे अस्तेसप्तमे सप्तमस्थानस्थितैः पापैश्च शब्दाच्छिशुराश्वेव प्राणैः वियोगं प्रयाति अत्र तुहिनांशुलग्न इति कर्कटलग्ने केश्चिद्व्याख्यातं तदयुक्तं यस्मादनेनैव स्वल्पजातके उक्तं उदयगतो वा चंद्रः सप्तमराशिस्थितैः पापैरिति अथारिष्टांतराणि हरिण्याह ८ अशुभसहितैरिति चंद्रे शशिन्यशुभसहिते यद्यपि सामान्येनोक्तं तथाप्यशुभेन शनैश्चरेणैव युक्ते तथाभूते लग्नगते न केवलं यावद्ग्रस्ते राहोराशिगते लग्नाच्च कुजे अंगारके निधनाश्रिते ऽष्टमस्थानस्थे जननिसुतयोः मातापुत्रयोः मृत्युर्भवति रवौ तु सशस्त्रज इति एवंविधे योगे रवावादित्ये स्थिते जननिसुतयोः सह मृत्युः शस्त्रजः शस्त्रेण युद्धेन जातस्य मृत्युर्भवति एतदुक्तं भवति शनैश्चरेण बुधेन वा युक्तेऽर्केऽस्ते लग्नगते कुजे चाष्टमगे जातस्य मात्रा सह शस्त्रहेतुकं मरणं वाच्यं नन्वशुभ इति सामान्येनोक्तं तत्केवले न शनैश्चरेण युक्ते चंद्रे शशिनि इति किं व्याख्यातं शनैश्चरेण बुधेन वा युक्तेऽर्केति नोक्तं अत्रोच्यते असंभवादेव पौर्णमास्यां चंद्रग्रहणं भवति तत्र तावदर्के

प्राणैः प्रयात्याशु शिशुर्वियोगमस्ते तु पापैस्तुहिनांशुलग्ने ८ अशुभसहितेग्रस्ते चंद्रे कुजे निधनाश्रिते जननिसुतयोर्मृत्युर्लग्ने र
वौ तु सशस्त्रजः उदयति रवौ शीतांशौ वा त्रिकोणविनाशगे निधनमशुभैः वीर्योपेतैः शुभैर्नयुते क्षिते ९

ऽऽसहितेन चंद्रमसा न भवितव्यं बुधे नचार्कसमीपवर्तिना सदैव भवितव्यं अष्टमस्थानत्वात् भौमेनापि चंद्रसहितेन न भवितव्यं शनैश्चरं विना व्यवस्थितेन बुधेन सौम्येनैव भवितव्यं तस्माच्चंद्रग्रहणे शनैश्चरेणेति व्याख्यातं अर्कग्रहणे तु पुनः बुधेन यदि युक्तोऽर्को भवति तदार्कसहितत्वात्तस्य पापता भवतीत्यतोऽर्कस्य बुधसहितत्वमिति व्याख्यातं॥ क्षीणेंदुयोगादर्कस्य पापयोग एवायं न गम्यते यस्मादवश्यममावास्यायांतेऽर्कग्रहणेन भवितव्यं तत्र चावश्यमर्केण क्षीणचंद्रसहितेन भवितव्यं यथार्के क्षीणेंदुना युक्त इति आचार्यस्याभिप्रेतः स्यात्तदा ग्रस्तेऽर्के निधनाश्रिते कुजे इति केवलं वक्ष्यतः उदयति रवाविन्यादि रवावादित्ये उदयति लग्नगते शीतांशौ चंद्रे वा लग्नगते तथा शुभैः सौम्यग्रहैः वीर्योपेतैः बलवद्भिः नयुक्ते क्षिते न संयुक्ते नापि दृष्टे जातस्य निधनं मरणं वदेत् अर्थादेवोक्तयोगस्य रवौ चंद्रे वा बलिभिः शुभैः युते दृष्टे चारिष्टयोगाभावः अथारिष्टांतरमपरवक्त्रेणाह ९ ॥ ९॥ ॥ ९ ॥ एम· २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असितरिति असितः सौरः रविरादित्यः शशांकः चंद्रः भूमिजोंगारकः एतैः शनिरविचंद्रभौमैर्यथाक्रमं व्ययनवमोदयनैधनाश्रितैः द्वादशनवमलग्नाष्टम स्थानस्थैः तत्रैतज्जातं शनैश्चरे द्वादशे अर्के नवमे चंद्रे लग्नगे भौमे ऽष्टमस्थे एते सर्व्वे एव योगकर्त्तारो ग्रहा यदि बलिना वीर्य्यवता गुरुणा न दृष्टास्तदा जातस्य जन्तोराश्वेव मरणं प्रवदेत् अत्र यदा योगकर्त्तॄन् ग्रहान् सर्व्वान् बलवान् गुरुः पंचमस्थः कांश्चित्पश्यति कांश्चिन्न पश्यति अथवा बलहीनः सर्व्वानेव पश्यति तदा जातस्य मरणं प्रवदेत् किंतु आशु शीघ्रं न वदेत् अर्थाद् एवं सर्व्वान् एव गुरुः पंचमगः पश्यति तदारिष्टयोगाभावः अथारिष्टांतरं पुष्पिताग्रयाह १० सुतरिति शीतरश्मिः चंद्रः स च क्षीणः अशुभयुतः पापग्रहेण संयुक्तः सुतमदननवान्त्यलग्नरंध्रेषु स्थितः पंचमसप्तमनवमद्वादशोदयाष्टमगतः एतेषां अन्यतमस्थः भृगुसुतः शुक्रेण शशिपुत्रबुधेन देवपूज्यबृहस्पतिना बलिभिः वीर्य्यसंयुक्तैः न नयुतो नाप्यवलोकितः एषां त्रयाणां मध्ये एकतमेनापि संयुतो नापि दृष्टस्तदा जातस्य मरणाय भवति अर्थाद् एवं भृगुसुतशशिपुत्रदेवपूज्यानामन्यतमेन बलवता दृष्टो युक्तो वा भवति तदारिष्टयोगाभावः अत्र क्षीणं चंद्रग्रहणं नास्ति तत्कथं व्याख्यातं उच्यते आगमां

असितरविशशांकभूमिजैर्व्ययनवमोदयनैधनाश्रितैः भवति मरणमाशु देहिनां यदि बलिना गुरुणा न वीक्षिता १० सुतमदननवान्त्यलग्नरंध्रेष्वशुभयुतो मरणाय शीतरश्मिः भृगुसुतशशिपुत्रदेवपूज्यैर्यदि बलिभिर्न युतोवलोकितो वा ११ योगेस्थानं गतवति बलिनश्चं

नरदृष्टत्वात् तथा च सारावल्यां निधनास्तव्ययलग्नत्रिकोणगाः क्षीणचंद्रसंयुक्ताः पापा बलिनः शुभैरदृश्यमाना गतायुषं कुर्युः ॥ देहं वा तनुगृहमथवा ॥ अथानुक्तमरणकालपरिज्ञानं भ्रमरविलासिहायमाह ११ योगेस्थानमिति यस्मिन्नरिष्टयोगे जातस्य मरणकालावधिर्नोक्तस्तस्मिन्नरिष्टयोगकर्त्तारो ग्रहास्तेषां मध्यात् यो बलवान् स यस्मिन् राशौ जन्मकाले व्यवस्थितः स राशिबलिनः तत्स्थानं तत्र चारक्रमाच्चंद्रमसि प्राप्ते जातस्य मरणं वक्तव्यं अथवा चंद्रे स्वमात्मी यस्थानं गते जन्मकाले यत्र राशौ चंद्रमाः स्थितस्तमेव राशौ पुनरपि चंद्रे गते तत्र तस्य मरणं वक्तव्यं तनुगृहमथवा तनुगृहं लग्नं वा चारक्रमागते चंद्रमसि जातस्य मरणं वक्तव्यं केचिद् एवं उच्यते वर्षस्यांतः संवत्सराभ्यंतरे एतदुक्तं भवति अनुक्तकालारिष्टजातो वर्षं नातिक्रमतीति ननु अत्र प्रतिमासं चंद्रमसी स्थानानि गंतव्यानि तत्किमित्युक्तं वर्षस्यांतः उच्यते पापैर्दृष्टे बलवतीति एषु निर्दिष्टस्थानेषु मध्याद्यत्रागतश्चंद्रमा बलवान् भवति पापैश्च दृश्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ
टी.भ
३८

तदा जातस्य मरणं वक्तव्यं नकेवलं गतमात्र एव चंद्रे किल मुनिगदितं किलेत्यागमसूचने निश्चयेन मुनिगदितं रिष्टलक्षणमित्यागमपारंपर्येणाश्रूयत
रिति अत्रान्यैराचार्यैररिष्टभंगा नुक्तास्ते च सत्यरूपाः यतो बहवो जाता अरिष्टेष्वपि योगेषु जीवंतो दृश्यंते येषु सत्स्वपि योगेषु जीवंत्यतोऽस्माभिः किंचिल्लि
ख्यते सर्वानिमानतिबलः स्फुरदंशुजातो लग्नस्थितः प्रशमयेत् सुराजमंत्री एकोबहूनि दुरितानि सुदुस्तराणि भक्त्या प्रयुक्त इव शूलधरप्रणामः १ लग्ना
धिपोतिबलवानशुभैरदृष्टः केंद्रस्थितैः शुभफलैरवलोक्यमानः मृत्युं विधूय विदधाति सुदीर्घमायुः सार्द्धं गुणैर्बहुभिरूर्जितया च लक्ष्म्या २ लग्नादष्ट
मवर्ज्यपि गुरुबुधशुक्रद्रेष्काणगश्चंद्रः मृत्युप्राप्तमपि सुतं परिरक्षत्येव निर्व्याजं ३ चंद्रः संपूर्णतनुः सौम्यर्क्षगतः स्थिताः शुभस्थानः प्रकरोति रिष्टभंगं
विशेषतः शुक्रसंदृष्टः ४ बुधभार्गवजीवानामेकतमः केंद्रमागतो बलवान् यद्यपि क्रूरसहायः सद्योरिष्टस्य भंगाय ५ रिपुभवनगतोपि शशी गुरुसितचंद्रा
त्मजद्रिकाणस्थः गरुड इव भोगिदृष्टं परिरक्षत्येव निर्व्याजं ६ सौम्यद्वयांतरगतः संपूर्णः स्निग्धमंडलः शशभृत् निःशेषरिष्टहंता भुजंगलोकस्य गरुड इव

पापैर्दृष्टे बलवति मरणं वर्षस्यांतः किलमुनिगदितं १२

७ शशभृति पूर्णशरीरे शुक्ले कृष्णे निशाभवे द्दिवसे रिपुनिधनस्थे रिष्टं प्रभवति नैवात्र जातस्य ८ प्रस्फुरित्तकिरणजाले स्निग्धामलमंडले वक्लोकय
ते सुरमंत्रिणि केंद्रगते सर्वारिष्टं शमयमुपैति ९ सौम्यभवनोपयाताः सौम्यांशकसंभवद्रेष्काणस्थाः गुरुचंद्रकाव्यशशिजाः सर्वे रिष्टस्य हंतारः १० चं
द्राध्यासितराशेरधिपः केंद्रे शुभग्रहेर्वापि प्रशमयति रिष्टयोगं पापानियया हरिस्मरणं ११ पापा यदि शुभवर्गे सौम्यैर्दृष्टाः शुभांशवर्गस्थैः निघ्नंति तदा रिष्टं एम
पतिं विरक्ता यथा युवतिः १२ एहुस्त्रिषष्टलाभे लग्नात्सौम्यैर्निरीक्षितः सद्यः नाशयति सर्वदुरितं मारुत इव तूलसंघातं १३ शीर्षोदयेषु राशिषु सर्वे गगनाधिवा ३८
सिनः स्नतौ प्रकृतिस्थश्चारिष्टं विलीयते घृतमिवाग्निस्थं १४ तत्काले यदि विजयी शुभग्रहः शुभनिरीक्षितो वश्यं नाशयति सर्वारिष्टं मारुतरिव पादपान्प्रबलः १५
सर्वैर्गगनभ्रमणैर्दृष्टश्चंद्रो विनाशयति रिष्टं आपूर्यमाणमूर्त्तिर्यथा नृपः स्वनयेद्वेषीति १६ इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृत्तौ रिष्टाध्यायः षष्ठः
॥ अथायुर्दायाध्यायो क्तारिष्टावर्जितस्यायुर्दायः कर्त्तव्यः तत्रादावेव मयथवनमणित्थशक्तिरसजितेन प्रत्येकस्य ग्रहस्य परमायुः प्रमाणं पुष्पितायाह ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मययवनेति मयनामादानवः सूर्य्यवरप्रसादः यवनोम्लेछजातयोहोराविदः मणित्थआचार्य्यः शक्तिपूर्वः पराशरः शक्तिः पूर्वोयस्यसशक्तिपूर्वः पूर्वशब्देनपि
नाउच्यते तैः मयवनमणित्थशक्तिपूर्वैः दिवसकरादिषादित्यादिषुग्रहेषुवत्सराः संवत्सराः परमायुप्रमाणाब्दाः प्रदिष्टाः उक्ताः नवतिथिविषयाश्विइत्यादि
अत्रनवादिभिर्दशसहितारितिसर्वत्रैवविशेषभूतंतेननवभिः दशसहिताएकोनविंशतिः परमायुप्रमाणवत्सरादिवसकरस्यादित्यस्य तिथिभिः पंचदशभिः सहि
तादशपंचविंशतिश्चंद्रस्य विषयैः पंचभिः सहितादशपंचदशभौमस्य अश्विभ्यांद्वाभ्यांसहितादशद्वादशबुधस्य भूतैः पंचभिः सहितादशपंचदशगुरोः रु
द्रैरेकादशभिः सहितादशएकविंशतिः शुक्रस्य दशभिस्सहितादशविंशतिः २० सौरस्य एतानिग्रहाणापरमायुप्रमाणंवर्षाणि स्वतुंगभेषु स्वपरमोच्चांशस्थि
तेषुभवंति तत्रेदृशाः परमोच्चस्थिताआदित्यादयोभवंतितेयथानिर्दिष्टवर्षाणिप्रयच्छंतिअंकेनापिएतान्यर्कादीनांपरमायुप्रमाणवर्षाणि अथपरमनीचावस्थि
तानामायुर्ह्रासज्ञानंचमंदाक्रांतयाह १ नीचेति नीचतरेवदिवसकरादयोनीचेपरमनीचेप्राप्ताअर्द्धंपरमायुप्रमाणवर्षेभ्योऽपहरंति अतएवोक्तंनीचेऽतोऽ

मययवनमणित्थशक्तिपूर्वैर्द्दिवसकरादिषुवत्सराः प्रदिष्टाः नवतिथिविषयाश्विभूतरुद्रैर्द्दशसहितादशभिः स्वतुङ्गभेषु १ नीचेतो
र्द्धंह्रसतिहितत्रश्चांतरस्थेनुपातोहोरात्वंशप्रतिममपरेराशितुल्यंवदंति॥ ऽऽ स्मात्पूर्वोक्तात्परमायुषोऽर्द्धंदलंह्रसतिक्षीयते अथेदृशार्क्यादयः पर

मनीचस्थाभवंति परमनीचस्थास्तएवपूर्वोक्तायुषोऽर्द्धंदलंप्रयच्छंति तद्यथा रविः नवसार्द्धानिवर्षाणिप्रयच्छंति चंद्रोद्वादशसार्द्धानिवर्षाणिप्रयच्छंति एवंभौमः सप्त
सार्द्धानि एवंबुधः षट्‌एवंबृहस्पतिः सप्तसार्द्धानि एवंशुक्रस्यदशसार्द्धानि एवंशनैश्चरस्यदशअंकेनापिवर्ष ९ मास ६ अयंसूर्य्यस्य चंद्रस्यवर्ष १२ मास ६ भौम
स्यवर्ष ७ मास ६ बुधस्यवर्ष ६ मास० गुरोः वर्ष ७ मास ६ शुक्रस्यवर्ष १० मास ६ शनेः वर्ष १० मास० ततश्चांतरस्थेनुपातरिति ततः तस्मादुच्चान्नीचाच्चांतरस्थे
मध्यवर्त्तिनिग्रहेनुपातः त्रैराशिकः कर्त्तव्यः तत्रतावत्सर्वस्यैवग्रहस्यपरमोच्चपरमनीचांतरालंराशिषट्कं भवतिलिप्तापिंडीकृतंदशसहस्राण्यष्टौचशतानिभ
वंति तत्रस्वोच्चादधिकंग्रहेणयदाभुक्तंभवतितदातत्रसोच्चंविशोध्यशेषस्यलिप्तापिंडीकार्य्या अथस्वनीचादधिकंग्रहेणभुक्तंभवतितदातत्रस्वनीचमपास्याव
शेषंलिप्तापिंडीकार्य्यं तासांलिप्तानांग्रहभुक्तलिप्तागणइत्याख्या तस्यैवग्रहस्यपरमनीचोक्तानिवर्षाणिमासाकार्य्याणिकथमुच्यते॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰ टी॰ भ॰ ३९८

वर्षाणि द्वादशभिः संगुण्य तत्र मासान् योजयेत् तानि चक्रतान्यादित्यादीनां लिख्यते तद्यथा चतुर्द्दशाधिकं शतं रवेः सार्द्धशतं चंद्रस्य नवतिर्भौमस्य द्विसप्तति
धस्य नवतिर्जीवस्य षड्विंशत्यधिकं शतं शुक्रस्य विंशत्यधिकं शतं सौरस्य अंकेनापि ११४ सू १५० चं ९० भौ॥ ७२ बु ९० जीव १२६ शुक्रस्य १२० शनेः तत्र
स्त्रैराशिकं यदि भगणार्द्धलिप्ताभिः खखाष्टदिक्संख्याभिरेताभिः १०८०० इष्टग्रहपरमनीचमासा लभ्यंते तद्ग्रहभुक्तलिप्ताभिः कियंत इति तत्रेदं सूत्रं त्रैराशि
के प्रमाणं फलमिच्छाद्यंतयोः सदृशराशी इच्छाफलेन गुणिता प्रमाण भक्ता फलं भवतीति तदर्थं ग्रहभुक्तलिप्ता एवं ग्रहपरमनीचमासैः संगुण्य भगणार्द्धलिप्ताभिः।
विभाज्यावाप्तं मासाः मासशेषं त्रिंशद्गुणितं ३० तेनैव छेदेन भागमपहृत्यावाप्तं दिवसाः दिनशेषं षष्ट्या संगुण्य तेनैव छेदेन भागमपहृत्यावाप्तं घटिका घटिकाशेषं
षष्ट्या संगुण्य प्राग्वद्विभाज्यावाप्तं च शेषकाः एवं मासादिश्चषकांतः काल आगतः मासानां द्वादशभिः भागमपहृत्य वर्षाणि लभ्यंते शेषं मासाः एवमागतं
वर्षादि परमोच्चायुः दर्शितवर्षेभ्यः संशोध्यावशेषं ग्रहेण वर्षादिरायुषः कालोदत्तो भवति एवमुच्चाद्विच्युतस्य नीचमप्राप्तस्य कर्त्तव्यं नीचाद्विच्युतस्योच्च
प्राप्तस्य प्राग्वत्कालमानीय तस्य च ग्रहस्य परमनीचार्द्धायुषि संयोज्य ग्रहस्यायुषः कालो वर्षादिर्भवंति अथवा यदि राशिषट्कलिप्ताभिरर्द्धायुर्वर्षाण्यपची
यंते तदाभिः ग्रहभुक्तलिप्ताभिः किमित्यंतमध्यमराशिसवर्णीकृत्य तेन ग्रहभुक्तलिप्ता गुणयेत् ततः परिवर्त्य भागहारछेदांशैः छेदसंगुणच्छेदं शेषगु
णो भाज्यास्य भागहारः सवर्णितयोरित्यत्र वर्षाणि मध्यमस्वछेदेन द्विकेन भगणार्द्धनलिप्ताः संगुण्य खखषड्द्विनलिप्ता भवंति २१६०० एताभिर्भागमप
हृत्य वर्षाणि लभ्यंते शेषं द्वादशभिः सविकलं संगुण्याधस्यस्य विकलस्य षष्ट्या भागमपहृत्योपरितनराशौ संयोज्य प्राग्वद्विभाज्य मासा लभ्यंते एवं शेषं सविक
लं त्रिंशता षष्ट्या षष्ट्या संगुण्य दिनघटिकाविघटिकाश्चानयितव्याः शेषं प्राग्वत्कर्म्म अथ लघुनोपायेन पिंडायुष आनयनं प्रदर्श्यते तद्यथेष्टग्रहादस्मान्ना
युक्तमुच्चध्रुवकं विशोध्यावशेषं कर्म्मभूमौ स्थापयेत् अथोच्चध्रुवकं न शुध्यति तदा ग्रहराशिद्वादशकं दत्वा तस्मादुच्चमपास्यावशेषं स्थापयेत् ततस्तदव
शेषं राशिषट्कादूनं भवति तदा राशिद्वादशकाद्यास्य शेषं स्थाप्यं अथ राशिषट्कादधिकं भवति तदा तदेव ग्राह्यं तत्कर्म्मभूमौ राश्यादिकं विलिप्तांतं स्वप
रमायुर्वर्षैः संगुण्य स्वछेदैर्विभाज्य लब्धमुपर्य्युपरि योजयेत् अवशेषं स्थापयेत् विलिप्तास्थाने षष्ट्या लिप्तास्थानेपि षष्ट्या भागानां त्रिंशता राशीनां द्वाद

राम ३९८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शभिः राशिभ्योलब्धंवर्षाणितदवशेषंमासाः भागशेषंदिवसा लिप्ताशेषंघटिकाः विलिप्ताशेषंचषकारिति एतावतैवकर्म्मणास्फुटंभवति तथाचसारावल्यां
स्वोच्चशुद्धोग्रहः शोध्यः षड्भाश्यूनोभमंडलात् स्वपिंडगुणीतोभक्तोराशिमानेनवत्सराः होरात्वंशप्रतिममिति होरालग्नं साचांशप्रतिमान्निवर्षाणिददाति॥
यावंतोनवांशकोलग्नेनभुक्तास्तावंत्येववर्षाणिददाति तत्करणं यथातत्कालिकलग्नस्यराशीनपास्यांशशेषंलिप्तापिंडीकार्य्यंतत्रशतद्वयेनभागमपहृत्य
वाप्तंभुक्तनवांशास्तावंत्येववर्षाणिलग्नमायुर्द्दायंप्रयच्छंति अवशेषेणसह त्रैराशिकंकृत्वावर्षाणामधस्तान्मासाद्यानपिज्ञातव्यंतद्यथा यदिलिप्ताशतद्वये
नद्वादशमासालभ्यंते तदवशेषलिप्ताभिः किंयंतइति तेनावशेषलिप्ताद्द्वादशभिः संगुण्यशतद्वयेनविभाज्यावाप्तंमासास्तेचवर्षाणामधः स्थाप्यमासशेषं
त्रिंशतासंगुण्यशतद्वयेनप्राग्वद्विभाज्यावाप्ताश्चदिवसाः तान्मासानामधःस्थापयेत् दिनशेषंषष्ट्यासंगुण्यप्राग्वद्विभाज्यावाप्तंघटिकोदिवसाना
मधःस्थाप्याः घटिकाशेषंषष्ट्यासंगुण्यप्राग्वद्विभाज्यावाप्तंचषकाघटिकानामधःस्थाप्यः एवंलग्नायुर्द्दायः अपरेराशितुल्यंवदंति अपरेऽन्येमणित्थादयः
आचार्य्यालग्नस्यराशितुल्यंआयुर्द्दायमिच्छंति लग्नेयावंतोराशयोभुक्तास्तावंत्यएववर्षाणिलग्नायुः लग्नस्यभुक्तभागादिकंलिप्तापिंडीकृत्यमासाद्यान
यनेत्रैराशिकंकर्त्तव्यं यद्यष्टादशभिर्लिप्ताशतैर्द्वादशमासालभ्यंते तदेताभिः लग्नभुक्तलिप्ताभिः किंयंतइति प्राग्वद्वर्षाणामधस्तान्मासाद्यान्स्थापितव्यं
तथाचमणित्थः लग्नराशिसमाश्चाब्दामासाद्यानुपाततः कृत्वायत्तद्भवेत्कालंवर्षादिलग्नजीवितं तदेवमतंशोभनमित्यस्माकमभिमतं अन्येप्येवमिच्छंति
यथालग्नांकपतौबलवति अंशप्रतिमंराश्यधिपेबलतिराशितुल्यंवदंतिकथयंतिइत्यर्थः तथाचसारावल्यां लग्नाद्यायांशतुल्यंस्यादंतरेचानुपाततः तद्व
द्बलसंयुक्तेराशितुल्यंचभाधिपे हित्वावक्रमिति येनग्रहेणयावत्संख्ययायुर्द्दायोदत्तस्तत्तस्यसंभवति तस्मात्स्वादायुषः भौमादिकस्यवक्रंविपरीतांगतिं।
हित्वावक्रेथित्वायोग्रहोरिपुगृहगतः शत्रुक्षेत्रावस्थितोभवतितेनस्वादायुषस्त्रिभागोहीयते सग्रहस्त्रिभागमपहरतीत्यर्थः वक्रितः पुनः शत्रुक्षेत्रगतोना
पहरति तथाच वक्रचारंविनात्र्यंशंशत्रुराशौहरेद्ग्रहः एतद्दूहनाम्मतं आचार्य्यस्यपुनरेषएवपक्षोऽभिप्रेतः अन्यथाहित्वाभौमंरिपुगृहगतैः हीयतेस्व
त्रिभागरित्येवावस्थत् अतएवज्ञायते यथावक्रगोग्रहोंशायुर्द्दायंबलवत्वात्त्रिगुणंददाति तथात्रापिनापहरतीतिनिश्चयः अन्येपुनरेवंव्याचक्षतेयथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰ टी॰भ॰ ४०

वक्रमंगारकं हित्वा योग्रहो रिपुराशिगस्तेन स्वादायुषस्त्रिभागो हीयते भौमः शत्रुक्षेत्रगतोनापहरति हित्वावक्रमित्यत्र केचिद्दिच्छंति यथावक्रितं ग्रहं हित्वा
ऽन्यः स्वशत्रुगृहगतः स्वभागमपहरति तदसत् अत्रच वादरायणः भूम्याः पुत्रं वर्ज्जयित्वा रिभस्थाहन्युः स्वस्वादायुषस्ते त्रिभागमिति सूर्य्योछिन्नद्युतिषु
सूर्य्येण रविणाछिन्नाकर्तृताद्युतिर्य्येषां ते सूर्य्योछिन्नद्युतयः आदित्यमंडले अस्तमितेषु ग्रहेषु दलमर्द्धं हीयते किंतु शुक्रार्कपुत्रौ सितशनैश्चरौ प्रोह्य वर्ज्जयि
त्वा तावस्तंगतावपि नापहरतः तथाच वादरायणः अस्तंयाताः सर्व्वे एवार्द्धहानिं कुर्य्युर्हित्वा दैत्यपूज्यार्कपुत्रौ अथ स्वादायुषो ग्रहाणां चक्रपातेनापहानिं प्र
दर्शयिण्याह २ सर्व्वार्द्धमिति असत्सु पापग्रहेषु व्ययभवनादारभ्य द्वादशस्थानात्प्रभृति सप्तमांतं यावद्व्यवस्थितेषु वाममुत्क्रमेण यथाक्रमं सर्व्वोदयो भागाः
क्षीयंते तत्र लग्नाद्द्वादशस्थः पापग्रहः सर्व्वमायुरात्मीयमेवापहरति एकादशस्थोऽर्द्धं दशमस्थस्त्रिभागं नवमस्थश्चतुर्भागं अष्टमस्थः पंचमभागं सप्तमस्थः
षड्भागमिति सत्स्वर्द्धमिति एतेष्वेव व्ययादिषु स्थानेषु सत्सु शुभग्रहेषु व्यवस्थितेषु शुभग्रहोक्तस्यार्द्धं क्षीयंते तत्र लग्नाद्द्वादशस्थः शुभग्रहः स्वादायुषोऽर्द्धम

हित्वा वक्रं रिपुगृहगतैर्हीयते स्वत्रिभागः सूर्य्योछिन्नद्युतिषु च दलं प्रोह्य शुक्रार्कपुत्रौ २ सर्व्वार्द्धत्रिचरणपञ्चषष्ठभागाः क्षीयन्ते व्यय
भवनादसत्सु वामम् सत्स्वर्द्धं ह्रसति तथैकराशिगानामेकोंशं हरति बलीतथाह सत्यः ३ ॥ ५५ ॥ ६ ॥ ॥

पहरति एकादशस्थश्चतुर्भागं दशमस्थः षड्भागं नवमस्थोऽष्टमभागं अष्टमस्थो दशमभागं सप्तमस्थो द्वादशभागमिति तथैकराशिस्थानामिति उक्त।
स्थानेषु यदा ग्रहद्वयं भवति बहवो वा स्युस्तदा तेषामेकसंस्थितानां मध्यादेक एव यो बली वीर्य्यवान्स एवैकांशभागं यथापठितमपहरंति नान्ये तत्रस्थापह
रंति एतत्सत्याह सत्याचार्य्याः कथयति अंशग्रहणं यथासंभवभागप्रदर्शनार्थं तथाच सत्यः एकादशोत्क्रमात्सप्तमादिग्रहहरणकर्म्माणि एकसंगेषु
वीर्य्याधिकः स्वभागं हरेदेकं अर्द्धं तृतीयमथचतुः पंचषष्ठं च आयुः पिंडात्पापाहरंति सौम्यास्ततोऽर्द्धानि द्वादशसंस्थः पापः स्वादायं शोभनस्ततोऽ
र्द्धं तु अपहरति सर्व्वमायुः यथाच योगस्तमपि वक्ष्येदिति वराहमिहिरस्याप्येवम्मतं तदिह सत्यमतोपन्यासस्त्वागमांतःश्रुतिदर्शनार्थं लग्नस्थः पापः
चक्रपातवशादायुषोंशमपहरति तस्यांशप्रमाणज्ञानं वसंततिलकेनाह ३ ॥

रा॰भ॰ ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साद्धोदितइति उदितायेतेनवांशास्तउदितनवांशाः सहार्द्धोदितेननवांशेनवर्त्ततेइतिसार्द्धोदितोदितनवांशाः तात्कालिकस्यस्फुटलग्नस्ययेभुक्ताभा[illegible]गाः तान्लिप्तापिं
डीकृत्यशतद्वयेनभागमपहृत्यावाप्तंतस्मिन्कालेभचक्रस्यचयावंतोनवांशकाउदिताः पश्चादर्द्धोदितोनवांशकाःसतत्रउदितनवांशसमूहेयोज्यः एवंकृतेसार्द्धोदि
तोदितनवांशसमूहोभवति तेनगणितागतंसमस्तमेवायुः पिंडंगुणनीयं एवंकृतेसार्द्धोदितोदितनवांशहतंसमस्तमायुः पिंडंभवति तस्मादष्टाधिकशतेनभा
गेहृतेयदवाप्यतेवर्षादितत्तायुमुपैतिक्षयंगच्छति किंसर्व्वदानेत्याह क्रूरेविलग्नसहितेति यदाविलग्नस्थःक्रूरः आदित्यांगारकशनैश्चराणामन्यतमोभवति
तदैवभागतंवर्षादिसमस्तायुःपिंडात्संशोध्यंएवंकृतेतत्कालजातस्यजंतोरायुर्वर्षादिस्फुटंभवति किंतुप्रत्येकस्यग्रहस्यैतत्कर्म्मकर्त्तव्यंयतः येनायुःसंस्फुटा
निदशावर्षाणिसर्वेषांभवति विधिनात्वनेनसौम्येक्षितइति अनेनविधिनासएवलग्नस्थःक्रूरग्रहोयदासौम्येक्षितःशुभग्रहेणदृश्यतेतदोविधिनात्वनेनय
त्फलमायुःपिंडात्सार्द्धोदितोदितनवांशहतादष्टोत्तरशतेनभागेलब्धंयत्ततोदलमर्द्धंप्रलयंप्रयाति तदर्द्धीकृत्यायुःपिंडात्पातयदेवंकृतेआयुःप्रमाणंस्फुटंभ

सार्द्धोदितोदितनवांशहतात्समस्ताद्भागोष्टयुक्तशतसंख्यमुपैतिनाशं॥ ॥

वति अन्येएवंव्याचख्यते तात्कालिकेनलग्नेनभुक्तानवांशकास्तेसार्द्धोदिताग्रहाः अयमर्थःतात्कालिकस्यलग्नस्यराशीनपास्यभागालिप्तापिंडीकृत्यतस्य
चशतद्वयेनभागमपहृत्यावाप्तमुदिनांशकास्तेचार्द्धोदितेनसहकार्य्यास्तैः कर्म्मप्राग्वत्कार्य्यंएतदपिस्थूलं तेनलग्नभागाल्लिप्तापिंडीकृत्यताभिःप्रत्येकग्रहद
त्तंवर्षादिरायुर्द्दायंसंगुणाप्यधःस्वच्छेदैर्भागमपहृत्योपर्य्युपरियोजयेत् वर्षस्थानेभगणाकलाभिर्भागमपहरेल्लब्धंवर्षादि तस्यप्राग्वत्पातनंकार्य्यं तथाचसारावे
ल्यां लग्नांशलिप्तिकाहत्वाप्रत्येकविहितायुषात् भाज्यमंडललिप्ताभिर्ल्लब्धंवर्षादिशोधयेत् १ स्वायुषोलग्नगेक्रूरेसौम्यदृष्टेचतद्दलमिति एतदेवशोभनम
स्माकंप्रतिभाति नकेवलमत्रयावच्चक्रपातेप्येवंविधिः लग्नादिष्टग्रहंविशोध्यावशेषंयदिषड्भागादूनंतदातस्यग्रहस्यचक्रपातोस्तिनान्यथेति तेनावशेषेणायुः
पिंडस्यभागमपहृत्यलब्धंप्राग्वदायुषःपातयेत् अथरूपादूनोभागहारोभवतितदारूपाद्भागहारंसंशोध्यशेषेणायुर्द्दायंसंगुण्यरूपेणभागमपहृत्यलब्धमेवा
युःशुद्धंभवति उक्तंच लग्नग्रहोनकंषड्भादूनकंपद्यसौहरः आयुःपिंडंभजेत्तेनलब्धंवर्षादिशोधयेत् रूपाद्यदोनोहरःस्याद्रूपाच्छुद्धेनताडयेत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपेणविभजेल्लब्धंतदेवायुःस्फुटंभवेत् अस्मिन्सार्द्धेदिते निकर्म्मणि लग्नेयदापापसौम्याभवतस्तदायोलग्नोदितांशाकसमीपवर्त्तीसएवग्राह्योनेनरइति तत्रक्रू
रशब्देनक्षीणश्चंद्रमानग्राह्यः तथाचवादरायणः सूर्य्यारकशनीनामेकस्मिन् लग्नगेभवतिहानिः विधिनात्वनेनसौम्येक्षितेदलंपातयेल्लब्धं अथपुरुषादी
नांपरमायुःप्रमाणज्ञानंशिखरिण्याह ४ समाषष्टिर्द्विघ्नीइति समशब्देनवर्षमुच्यते समानांवर्षाणांषष्टिर्द्विघ्नाद्विगुणीकृताविंशत्यधिकंवर्षशतंपंचनिशा
पंचरात्रयोऽहोरात्राणीत्यर्थः मनुजकरिणांमनुजानांमनुष्याणां करिणांहस्तिनांचपरमायुः हयानांद्वात्रिंशत् अश्वानांद्वात्रिंशद्वर्षाणिपरमायुः खरोगर्द्दभः
करभउष्ट्रः अनयोःपंचककृतिः पंचकस्यकृतिः पचानांवर्गः पंचविंशतिः परमायुः विरूपासैवायुरिति सापंचककृतिः विरूपाविगतोरूपोएभ्यः एकोनाच
तुर्विंशतिर्वर्षाणिवृषमहिषयोः वृषाणांमहिषीणांचपरमायुःगोमहिष्योरित्यर्थः शुनांसारमेयानांद्वादशवर्षाणिपरमायुः श्वग्रहणंसर्वेषांनखीनामुपलक्ष
णार्थंतेनसिंहमार्ज्जारादीनामप्येतदेव स्मृतंछागादीनामितिदशकसहिताषट्षोडषवर्षाणिपरमायुः छागादीनां आदिग्रहणान्नविमृगयोरपिपरमायुरि

क्रूरे विलग्नसहितेविधिनात्वनेनसौम्येक्षितेदलमतःप्रलयंप्रयाति ४ समाःषष्टिर्द्विघ्नीमनुजकरिणांपंचचनिशाहयानांद्वात्रिंश
त्खरकरभयोःपंचककृतिः विरूपासात्वायुर्वृषमहिषयोर्द्वादशशुनांस्मृतंछागादीनांदशकसहिताःषड्परमं ५ अनिमिषप
रमांशकेविलग्नेशशितनयेगविपञ्चवर्गलिप्ते॥ इति सर्वेषांशेषभूतं परमायुर्ज्ञानप्रयोजनंअश्वादीनांजातानामायुःप्रमाणज्ञानार्थमिति तद्यथा॥
अश्वादेर्ज्जातस्यपुरुषवदायुप्रमाणमानीयंततस्त्रैराशिकंकर्त्तव्ययदिविंशत्यधिकवर्षशतंपंचदिनाधिकंयस्यपुरुषस्यायुप्रमाणंतस्येदमायुस्तद्द्वात्रिंशद्वर्षा
युःप्रमाणस्याश्वस्यकिंस्यादितिएवमागतमायुःप्रमाणमश्वस्यतत्कालजातस्यवाच्यं एवंसर्वेषामभिहितप्राणिनांस्वायुषामपरेणत्रैराशिकंकृत्वातत्कालजात
स्यस्वायुषःप्रमाणनिर्द्देशःकार्य्यः अन्येएवंवदंति यथापठितंपरमायुषःप्रमाणंनकश्चिज्जीवतितदयुक्तं यस्माद्विंशत्यधिकाद्वर्षशतादभ्यधिकमप्यायु
र्गुणिकर्म्मणाभवति यस्मात्परमायुःप्रमाणपठनंत्रैराशिकार्य्यमेवज्ञातव्यमिति अथयस्मिन् योगेजातस्यपरमायुर्भवतितद्योगज्ञा[illegible]प्यिनाग्न्याह ५
अनिमिषपरांशकेति अनिमिषोमीनः तस्यपरमांशकोनवमनवांशकः सचीत्यः तस्मिननिमिषपरांशकेविलग्नेशशितनयेबुधेगविवृषे[illegible]वर्गलिप्तेस्थिते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिप्ताः पंचविंशतिभुक्त्वा बुधोवृषेस्थितः सकला समस्ताग्रहारंन्येसर्व्वेएवयदिस्वतुङ्गभेषुस्थिताः परमोच्चगाःभवन्ति तथाजातस्यपरमायुर्प्रमाणंविंशत्यधिकंवर्षशतंपञ्चदिनाधिकमायुःभवति अत्रचकर्म्म तद्यथा आदित्यादयोग्रहाः सलग्नाईदृशाः अत्रादित्यादीनांबुधवर्ज्जितानांयथापठितानिपरमायुः प्रमाणवर्षाणि भवंतिबुधस्यपुनः कियंतोतत्रतावद्बुधोनीचादात्मीयान्मीनद्विच्युतः तस्मात्तात्कालिकाद्बुधादस्मात् बुधात् १।००।२५ परमनीचध्रुव मिदं ११।१५।०० संशोध्यजातमेतल्लिप्ता ११।१५।२५ पिंडीकृतं २०१२५ एताभिस्त्रैराशिकंयदिभगणार्द्धलिप्तानां एताः संगुण्य १०८०० बुधपरमनीचवर्षाणि षट् भवन्ति तदा तात्कालीनीचाक्रांतलिप्तानां २०१२५ किंस्यादिति अत्रप्राग्वत्फलंवर्षादि १।६।५ एतद्बुधपरमनीचगतेवर्षेषुदत्वाजातं ७।६।५ एतद्बुधस्य परमायुः तत्रलग्नादेकादशस्थानत्वाद्भौमस्यपरमायुः प्रमाणार्द्धंपंचवर्षादर्द्धं सार्द्धानि सप्तवर्षापातयित्वाजातंवर्षे ७ मास ६ सप्तसार्द्धानिवर्षाणिसौरस्याष्टमस्थानस्थत्वात्परमायुःप्रमाणार्द्धंविंशतिः पंचभागचत्वारिवर्षापातयित्वाजातानि षोडशवर्षाणि १६। आदित्यचंद्रवृहस्पतिशुक्राणांपरमायुः लग्नस्य नवमनवांशकस्थत्वान्नववर्षाणिभवन्ति सर्व्वेषांस्थापनी सूर्य्यवर्ष १९ चंद्रवर्ष २५ भौमवर्ष ७ मास ६ बुधवर्ष ७ मास ६ दिन ५ जीववर्ष १५ शुक्रवर्ष २१ शनिवर्ष १६ लग्नवर्ष ९ सार्व्वेषांयोगः वर्ष १२० दिन ५ एवंदर्शितयोगेपरमायुः प्रमाणमागतमिति अत्रचादित्येमेषस्येकन्यास्थत्वंबुधस्यनसंभवतितेनषड्विग्रहैरु[?]स्येबुधेचवृषस्थेयोगोयंप्रदर्शितः अत्रपरमोच्चगतेसूर्य्येबुधस्यवृषाद्भागचतुष्टयंभुक्त्वास्थितिर्भवतिनास्मादधिकं यतोमध्यमार्कोदयेराशिस्थानेशून्योभवतिभागाः षड्वाशल्लिप्ताभवन्ति तदातस्यस्फुटस्यपरमोच्चताभवति एषएवसूर्य्योबुधमध्यमः अत्रचयदापरममंदफलंपरममचशीघ्रफलंधनगतंभवतितदावृषेभागचतुष्टयंभुक्त्वास्थितिर्भवतितत्रयथादर्शितलग्नेयथावस्थितग्रहसंस्थायीवृषचतुर्थेभागेईदृशोबुधोभवति १।४ अस्मान्नीचध्रुवकमिदं ११।१५ संशोध्यजातं ०।१९ एतल्लिप्तापिंडीकृतं ११४० एताभिस्त्रैराशिकं यदिभगणार्द्धलिप्तानामेतासां १०८०० षड्वर्षाणितदैताभिः सांका

सू	चं	मं	बु	वृ	शु	श	ल
०	१	९	१	३	११	६	११
९	२	२७	२४	४	२६	१९	२७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰ टी॰ नं॰ ४२

२८४० नीतिलब्धं वर्ष १ मास ७ दिन १८ एतद्बुधपरमनीचवर्षेषु हत्वा जातं वर्ष ७ मास ७ दिन १८ एतदाद्येषु यथादर्शितवर्षेषु संयोज्य जातं वर्षाणां शतं १२० मास १
दिन २३ एतद्दर्शितपरमायुःप्रमाणादधिकमप्यायुः संभवति तस्मात्परमायुःप्रमाणं यवनत्रैराशिकार्थ्यमेव व्याख्यातं अन्येपुनः अनिमिषपरमांशके विलग्ने
योगः एवायं व्याचख्यते यथा मीने वर्गोत्तमगते लग्ने वृषभस्थेन बुधेन पंचविंशतिलिप्ताभुक्ताभवंत्यन्येच ग्रहाः स्वोच्चराशिषु परमोच्चभागव्यतिरेकेणापि यदि
स्थिता स्तदायोगशतेयेवपरमायुःप्रमाणं जातो जीवति अथ बुधस्य परमनीचगतस्य ध्रुवकमिदं ११।१४ पूर्वप्रदर्शितं सांप्रतं कर्म्मकालेक थमिदं ११।१५।०
प्रदर्शितमित्यत्रोच्यते चतुर्दशभागान्भुक्त्वा पंचदशे पठितेपरमनीचभागेव्यवस्थितो भवति अतश्चतुर्दशभागाः परमनीचस्यास्य प्रदर्शिताः अत्रास्यास्य परम
नीचप्रदर्शितमायुर्भवति तस्माद्यावत्पंचदशोभागो न भुक्तो बुधेन तावत्त्रैराशिकोत्पत्तिर्न कर्त्तव्येत्यतः कर्म्मकाले पंचदशभागाः प्रदर्शिताः इत्यतः सर्व्वेषामेव
ग्रहाणां त्रैराशिककालेपठितैर्भोगैर्भुक्तैः प्रदर्शयितव्यानि तत्त्रैराशिकार्थमुच्चध्रुवकाः तथा त्रैराशिकार्थे परमनीचध्रुवकाः एतैः कर्म्मकर्त्तव्यमिति अथा

भवतिहिपरमायुषः प्रमाणं यदि सकलाः सहिताः स्वतुङ्गभेषु ६ आयुर्द्दायं विष्णुगुप्तोपि चैवं देवस्वामी सिद्धसेनश्च चक्रे ॥ ६ ॥ ६ ॥

स्या परमतायुर्द्दायस्य दूषणार्थे शालिन्याह ६ आयुर्द्दायमिति एतदायुर्द्दायं न केवलं मयय वनमणित्थशक्ति पूर्वैरुक्तं यावद्विष्णुगुप्तेनापि चाणक्यपरना
म्नैवमुक्तं आचार्य्यदेवस्वामीतया सिद्धसेनश्चैवं चक्रे कृतवानित्यर्थः तथाचविष्णुगुप्तः परमोच्चगतैः सर्व्वैर्मीनेमीनांशसंस्थिते लग्ने सौम्येवृषगे जातः पर[illegible]
वतिचमनुष्यः तथाच देवस्वामी सूर्य्याद्यैरुच्चगतैर्मीनेमीनांशसंस्थिते लग्ने सौम्ये वृषभंयाते जातः परमायुराप्नोति तथाच सिद्धसेनः मीनेपरमांशगते सौम्यगो
पंचवर्गोलिप्तास्ये सर्व्वैः परमोच्चगतैर्ज्जातः परमायुराप्नोति यद्येवं बहुभिराचार्य्यैरुक्तं तत्कोस्य दोषः अत्रोच्यते वक्ष्यमाणं सत्याचार्य्यमतमायुर्द्दायं बहुतराणा
माचार्य्याणां मतमिति यस्मादाचार्य्यवराहमिहिरस्य प्रतिज्ञेयं ज्योतिषमागमशास्त्रं विप्रतिपत्तोनयोग्यमस्माकं स्वयमेव विकल्पयितुं किंतु बहूनां मतं वक्ष्ये अ
स्य परमतस्य बहुतरवाच्यत्वं तावदास्तां यावदसंभवो दोषोस्ति दोषश्चैषामित्यादि एषामाचार्य्याणां मते दोषो जायते कीदृशः आह अंशावशिष्टमित्यादि व
र्षाष्टकं यावज्जातानामरिष्टमुक्तं तं वर्षाष्टकं हित्वा त्यक्त्वा वर्षविंशतेरधस्तादृर्शितप्रकारेणायुस्तस्यनागच्छति ॥ ॥ ॥

रा॰ ४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंवर्षाष्टकादूर्ध्वमरिष्टंनास्तितस्माद्वर्षाष्टकादूर्ध्वंवर्षविंशतेरधस्तान्नकस्यचिन्मरणमापद्यते यावद्दृश्यन्तेम्रियंतेरिति अयंतेषांप्रत्ययस्तोदोषः अधुनातेषा
मेवाचार्य्याणामायुर्दूषणंशालिन्याह ७ अस्मिन्योगेति अनिमिषपरमांशवोविलग्नइत्यस्मिन्योगेविंशत्यधिकंवर्षशतंपंचदिनंपरमायुःपूर्णंप्रदिष्टंतस्मिन्
योगेषड्ग्रहाःपरमोच्चगताभवन्ति षड्भिश्चपरमोच्चगतैश्चक्रवर्त्तीभवतीतिप्रोक्तमभिहितमन्यैराचार्य्यैः तथाचवादरायणः षड्भिःस्याच्चक्रवर्त्तीत्रिभुवनमखिलं
शास्तिसर्वैर्ग्रहैर्द्वैरिति यवनेश्वरश्च षड्राजराजर्द्धिवलोपकर्षप्रदानमानेश्वभिजातशक्तिं तत्रपरमोच्चगतायावत्षड्ग्रहानभवंतितावत्परमोच्चायुःनप्राप्नोति य
दापरमोच्चगताभवंतितदाजातेनचक्रवर्त्तिनाभवितव्यं एवंपूर्णमायुःविंशत्यधिकंवर्षशतमर्थैर्ईनैर्विनावर्ज्जितावहवःपुरुषाभवंति तस्मादयमपिपूर्वपरीदो
षः एतच्चपरमतायुर्दूषणंशालिनीद्वयमसंबंधत्वाद्वराहमिहिराक्तमेवनभवतीतिनप्रतिभाति तत्रतावद्यदत्रप्रथमशालिन्यादूषणमुक्तंतस्यदूषणस्यसंबंधे
नमुच्यते सार्द्धोदितोदितनवांशहतासमस्तादिति न्यायेनयत्क्रूरेविलग्नगतेआयुषः यत्तनंक्रियतेतस्यप्रतिलग्नंप्रत्यंशकवशोद्भियतत्रसंभवतीति तच्चपात

दोषश्चेषांजायतेष्टावरिष्टंहित्वानायुर्विंशतेःस्यादधस्तात् ७ अस्मिन्योगेपूर्णमायुःप्रदिष्टंतस्मिन्प्रोक्तंचक्रवर्त्तित्वमन्यैः॥ ॥

यित्वायदायुर्विशिष्यतेतस्यापीयत्वान्नास्तीति तस्माद्युदुक्तं नायुर्विंशतेःस्यादधस्तात्तदयुक्तं तत्रोदाहरणं यदाकुंभलग्नस्याद्यांशक उदयेआदित्यचंद्रश्च
क्राः परमोच्चेबुधजीवशनैश्चराःपरमनीचेभौमश्चकुंभस्याप्यष्टाविंशतिमंभागंभुक्त्वास्थितस्तदातात्कालिकाग्रहाःसलग्नाः अत्रलग्नेननकिंचिद्भुक्तमिति
लग्नायुर्हीयोनास्तिपरमोच्चगतानांपरमनीचगतानांच भौमस्यक्रियते तात्कालिकाद्भौमादस्मा१०।२८ भौमस्यपरमोच्चध्रुवकमिदं ८।२८ संशोध्यजातं १।०ए

सू	च	म	बु	बृ	शु	श	ल
०	१	१०	११	८	११	०	१०
८	२	२८	१४	४	२६	१९	६
०	०	०	०	०	०	७	०

तद्धिप्तापिंडीकृतं १८०० अथत्रैराशिकंयदिभगणाद्र्ध‌लिप्तानामेतासां १०८०० भौमनीचमासाः नवतिभवंति ८०
तदैतासांकियंतइति लब्धामासाः १५ एतैर्वर्षसत्रिमासंजातंवर्ष १ मास ३ एतद्भौमपरमोच्चवर्षध्वेतेषु १५ संशोध्यजा
तंवर्ष १२ मास ९ एतद्भौमायुर्ह्रीयः अथजीवस्यलग्नाद्द्वादशस्थत्वाच्चपातेनार्द्धपातयित्वाजातंजीवायुर्ह्रीयः वर्ष ३
मास ९ परमोच्चगतानांपरमनीचगतानांचशत्रुक्षेत्रगतत्वात्त्र्यंशंअस्तंगतानांअर्द्धंचनिपात्यते। ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ- यस्मादनिमिषपरमांशके विलग्ने इत्यत्रयोगेचंद्रमसोवृषभस्थत्वात्तस्यायुषः त्रिभागः पात्यतेतदापूर्णमायुर्नभवतियस्मात्सत्याचार्य्यमतमेवं तात्कालिकमित्रा
टी·भ- मित्रविधावुक्तंमूलत्रिकोणाधनधर्म्मबंधुपुत्रव्ययस्थानगताग्रहेंद्राः तात्कालिकाः स्युः सुहृदोग्रहस्यस्वेच्चे चयोयस्यविकृष्टवीर्य्यः १ यामित्रषष्ठाष्टमशत्रु
४३ मूर्त्तिर्मूलत्रिकोणैकगृहेनिविष्टाः तात्कालमेतेरिपवोभवंतिमोलोनिमित्राणिरिपूंश्चवक्ष्ये २ अनेनापिशुक्रश्चंद्रमसस्तात्कालिकंमित्रंनभवति तस्मात्मीन
स्येशुक्रेवृषस्थश्चंद्रमाः शत्रुगृहगोभवति तस्यचशत्रुक्षेत्रस्थत्वाद्यथायुषस्त्र्यंशः पात्यतेतदा अनिमिषपरमांशकइत्यत्रयोगेपूर्णमायुर्नप्राप्नोतीति तच्चा
चार्य्येणशृंगग्राहिकेयेवप्रदर्शितं तेनैतत् ज्ञापयति परमोच्चगतानांपरमनीचगतानांचशत्रुक्षेत्रेत्र्यंशमस्तंगतानांचार्द्धंचननिपात्यते तेनयथादर्शितयो
गेपृथक्पृथग्ग्रहायुर्दायवर्षाणिलिख्यंते सूर्य्यस्यवर्ष १९ चंद्रस्यवर्ष २५ भौमस्यवर्ष १३ मास ९ बुधस्यवर्ष ६ जीवस्यवर्ष ३ मास ९ शुक्रस्यवर्ष २१ शनैःवर्षे
१० लग्नेननकिंचिद्भुक्तमितिलग्नायुर्दायोनास्ति अथैतेषांयोगः वर्ष ९८ मास ६ अथांगारकस्यलग्नगतत्वात्माद्धोदितेतिकर्म्मक्रियते तत्रचलग्नेकुंभारं
भत्वान्नवति ९० नवांशकाभुक्ताभवंतितेचनवांशकाल्लग्नस्योदिताउदयगतएकंनवति ९१ तेनैकनवत्यात्सर्वायुः पिंडमिदंवर्ष ९ मास ६ संगुण्यजातं ८९६३।
अस्याष्टाधिकशतेनभागमपहृत्यावाप्तंवर्षाणि ८३ शेषमर्द्धाधिकंगृहीत्वापरित्यक्तं एतानि ९८ संशोध्यजातंवर्षाः १५ मास ६ एवमष्टात ऊर्द्ध्वंविंशतेरधस्तात्
युक्तमन्नं तस्मादयुक्तमुक्तं नायुर्विंशतेःस्यादधस्तात् अत्रान्येवदंति यथाक्रूरंहीनंमीनलग्नंहृदिकृत्वैतद्वराहमिहिरेणाभिहितं अनिमिषपरमांशकेति
अनेनापिप्रकारेणनवक्तव्यं यथानायुर्विंशतेःस्यादधस्तात् तत्रधन्विलग्नेक्षीणेचंद्रेविंशतितमेभागेबुधस्तुलेस्तमितः सर्वेश्चान्येषुपरमनीचास्थेषुयस्यज रम
न्मभवतितस्यचक्रपातेनायुर्दायोबहुपततीति तस्यैवतावत्प्रदर्श्यते तत्रतात्कालिकाग्रहाः सलग्नाः तत्रबुधस्यप्राग्वत्कृत्वाजातंवर्ष १० मास १० अन्येषां ४३
परमनीचत्वात्ताःपातएवचपातेसर्वेतदायुर्दायोनास्ति चंद्रस्यक्षीणस्यपापत्वाल्लग्नाद्द्वादशस्थत्वाच्चक्रपातेनसर्वंपततितदातस्यायुर्दायोनास्ति आदित्य
स्यलग्नेकादशत्वाच्चक्रपातेनार्द्धंपातयित्वाजातंवर्ष ४ मास ९ बुधस्यास्तमितत्वार्द्धंपातयित्वाजातंवर्षे ५ मास ५ दशमस्थत्वाच्छुक्रस्यादायुषस्त्रितीय
मंशमपहरतिसौम्यत्वात्तदर्द्धमस्मात्षड्भागाद्वर्षमेकंनवमासान्पातयित्वाजातान्यष्टौवर्षाणित्रिवमासाश्चशुक्रस्यवर्ष ८ मास ९ भौमस्यलग्न[illegible]मस्थत्वात्पंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सू.	चं	मं	बु	बृ	शु	श	ल.
६	७	३	६	९	५	०	८
९	२	२७	२४	४	२६	१९	०

भागंसार्द्धवर्षेपातयित्वाजातानिवर्षाणिषट्इतिएवंसर्व्वेषांवर्षाणि वर्ष ४ मास ९ सूर्य्यस्यवर्षे [illegible] मास० चंद्रस्य
वर्षे ६ मास० भौमस्यवर्ष ५ मास ५ बुधस्यवर्षे ७ मासजीवस्यवर्षे ८ मास ९ शुक्रस्यवर्षे १० मास० शनैश्चरस्यवर्षे०
मास० लग्नस्यसर्व्वेषांयोगावर्षे ४२ मास ५ अत्रासंभवेप्यभिगम्यापिक्रमः एवंविधायुर्द्दायुः सर्व्वेप्यस्तंगतायदिभ
वंतितदासूर्य्योछिन्नद्युतिषुचदलंप्रोह्यशुक्रार्कपुत्राविति कृत्वात थापिपंचविंशतिवर्षाणिमासोनास्ति जातो
बुधस्यपूर्व्वमेवार्द्धंपातितंएवंद्वाचत्वारिंशतोऽधस्तादायुर्नोगच्छतीति तत्रापिविंशतेरधस्तादित्यसंबद्धं अत्रान्येएवंवदंति तत्क्रूरहीनेविलग्नेजाताअ
ष्टाभ्यऊर्द्धंविंशतेरधस्तान्म्रियमाणादृश्यते तेनान्याचार्य्यमतसंबद्धं अत्रोच्यते अन्याचार्य्यमतंपूर्व्वाचार्य्येणाविचार्य्यैतदूदंति यैरेवाचार्य्यैरनेनमार्गेणायुर्द्दा
यःप्रदर्शितस्तैरेवाथमृत्युयोगोप्रदर्शितः सचेहलिख्यते तथाचवादरायणः षष्ठाष्टमस्थोरिपुदृष्टमूर्त्तिः पापग्रहःपापगृहेयदिस्यात् स्वांतर्द्दशायांमरणायजं
तोर्न्नेयःसयुद्धेविजितोयदान्यैः १ तथाचयवनेश्वरः षष्ठाष्टमस्थोरिपुदृष्टएवेद्रपापाशुभस्थानगतेनदृष्टः : स्वांतर्द्दशायांप्रकरोतिमृत्युंव्याध्यध्ववंधादिपरि
क्षयाद्वा १ तथाचसारावल्यां क्रूरदशायांक्रूरःप्रविश्यचांतर्द्दशायदाकुरुते पुंसांस्यात्संदेहस्तदारियोगेसदैवमहान् १ रवितनयस्यदशायांक्षितिजस्यांतर्द्द
शायदाभवति बहुकालजीविनामपिमरणंनिःसंशयंपुंसां १ क्रूरराशौस्थितःपापःषष्ठेवानिधनेपिवातत्स्थेनरविणादृष्टःस्वपाकेमृत्युदोग्रहः १ यो
लग्नाधिपतेःशत्रुर्लग्नस्यांतर्द्दशांगतः करोत्यकस्मा न्मरणंसत्याचार्य्यप्रभाषते १ एवंक्रूरहीनेलग्नेजातास्तेषांवर्षाष्टकादूर्द्धंदर्शितकालादधस्तान्म
रणंसंभवत्येव तेचापमृत्युयोगेनानेनमृताज्ञेयः यस्मात्तस्यदर्शितग्रहस्यांतर्द्दशायदिभवति अत्रायनियमः तस्मादन्याचार्य्यमतेनाष्टाभ्यऊर्द्धंदर्शितकाला
धस्तान्मरणंसंभवत्येव तस्मादेतत्दूषणमसंबद्धं अथद्वितीयस्यदूषणस्यासंबद्धत्वमुच्यते अत्रचक्रवर्त्तित्वंयोगमपिविनादीर्घमायुःसंभवति अत्रोदाह
रणं यत्रताल्कालिकाग्रहाःसलग्नाः वृषेकोदशभागान्भुक्त्वास्थितः एवंमिथुनेचंद्रमास्त्रीन्भागान् कुंभेभौमोष्टाविंशतिभागान् मेषेबुधःपंचदशभागा
न् सिंहेजीवःपंचभागान् मेषेसप्तविंशतिःसत्रिभागाःशुक्रः कुंभेविंशतिभागाःसौरः धन्विलग्नमंत्यैषां तद्यथा ईदृशाग्रहाः अत्रपूर्व्वप्रदर्शितकर्म्मेणा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ. गतानिग्रहायुर्द्दायवर्षाणि लिख्यंते वर्ष १७ मास ५ सूर्य्यस्यवर्षे २ मास ११ चंद्रस्यवर्षे १३ मास ९ भौमस्यवर्षे ७ मास ० बुधस्यवर्षे १४ मास ७ जीवस्यवर्षे १९ मास ३
दी. भ. शुक्रस्यवर्षे १५ मास ० शनेः वर्षे ९ मास ० लग्नस्य अथबृहस्पतेर्व्वर्षाणांचक्रपातादष्टभागमपास्यजातंवर्ष १३ मास ९ चंद्रस्यषड्भागमपास्यजातंवर्षे १९ मास
४४ ९ रवेःशुरुर्मित्रमतोन्यथान्यइति शुक्रः शत्रुःसचार्कमूलत्रिकोणात्सिंहान्नवमेस्थानेस्थितः तस्मात्तात्कालिकंमित्रीभूतः तेनदृषस्थः शुक्रक्षेत्रेमध्यक्षेत्रे
शत्रुक्षेत्रद्धिः स्थितः तेनतस्यायुर्द्दायंनकिंचित्पतति चंद्रश्चमिथुनेमित्रक्षेत्रेस्थितः तस्यापियथादर्शितान्येवायुर्द्दायवर्षाणि यस्मादुक्तं इंदोर्बुधं देवगुरुंधवि
घात अंगारकः कुंभेशत्रुक्षेत्रेस्थितः यस्मादुक्तं भौमस्यशुक्रः शशिजश्चमित्रंशेषान्नृपून् शेषत्वाच्छनेश्चरस्वरस्तस्यशत्रुतात्कालिकश्चैकगृहेनिविष्टत्वाच्छने
श्वरोधिशत्रुः किंत्वत्रांगारकस्यशत्रुक्षेत्रस्यस्यापिनपतति यस्मादुक्तं हित्वावक्रंरिपुगृहगतैर्हीयतेस्वत्रिभाग इति तस्मादंगारकस्ययथागतमेवायुः चंद्रेरनर्को
इतिवचनाद्भौमोबुधस्यमित्रं तेनतस्यमेषस्थत्वात् यथागतमेवायुर्बुधस्य बृहस्पतेरप्यादित्योमित्रं यस्मादुक्तं गुरोश्चभौमंपरिहृत्यसर्व्वेमित्रंतस्मात्सिंहस्थ
स्यबृहस्पतेर्य्यथागतमेवायुः शुक्रस्य मेषेसचमित्रक्षेत्रे यस्मादुक्तं भृगुनंदनस्यतर्केदुवर्ज्योः सुहृदः प्रदिष्टः तस्मात्तस्यापियथागतमेवायुः शनैश्चरस्या
पिकुंभेस्वक्षेत्रेस्थितत्वाद्यथागतमेवायुः एवमायुर्द्दायवर्षाणि पृथक् पृथक् लिख्यंते वर्ष १७ मास ५ सूर्य्यस्यवर्षे १९ मास ९ चंद्रस्यवर्षे १३ मास ९ भौमस्यवर्षे ७
मास ७ बुधस्यवर्षे १२ मास ९ गुरोः वर्षे १९ मास ३ शुक्रस्यवर्षे १५ मास ३ शनेः वर्षे ९ मास ० लग्नस्य सर्व्वेषांयोगः वर्ष ११५ मास ११ एवंविधेयोगे [illegible]
वर्षशतमप्यायुः संभवंति केमद्रुमाख्यश्चायंयोगः यस्माद्वक्ष्यति हित्वार्कंसुनफानफादुरुधुराख्यान्योभयस्थैर्ग्रहैः शीतांशोः कथितोन्यथातुबहुभिः केम
द्रुमोन्येस्त्वसौ तस्मादेवंविधेयोगेजातोदीर्घमायुः प्राप्नोति केमद्रुमत्वाच्चदरिद्रोभवति वक्ष्यतिच केमद्रुमेमलिनदुःखितनीचनिःस्वाः प्रेष्याः खलाश्चनृपते राम
रपिवंशजाताः केवलंदरिद्रादीर्घायुषोदृश्यंतेनकेनचित्कस्यचिद्दरिद्रस्यायुःप्रमाणंज्ञातंयथायंदरिद्रोविंशत्यधिकेनवर्षशतेनसपंचदिनेनमृतः तस्मात्सो ४४
द्रमेवदूषणंज्ञातव्यं एवमस्यदूषणस्यात्संबद्धत्वंप्रदर्शितमिति असंभाव्यत्वाद्वराहमिहिरकृतछालिनीद्वयंनसंभाव्यते यच्चदर्शिताचार्य्यमतेनायुर्द्दायंत्य
क्त्वासत्यमतायुर्द्दायमंगीकरिष्यत्याचार्य्यस्तत्रचसत्यमतासत्यमतस्यबहुतराणामाचार्य्याणामंगीकरणमेवप्रदर्शितं यस्मात्पूर्व्वमेवाचार्य [illegible]तिज्ञाप्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ख्याता ज्योतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकं स्वयमेव विकल्पयितुं किंतु बहूनां मतं वक्ष्ये अथ कश्चिदाह ननु योयं योगस्त्वया प्रदर्शितः स केमद्रुम
एव न भवति यस्मादाचार्य्य एव वक्ष्यति केंद्रे शीतकरेथवा ग्रहयुते केमद्रुमो नेष्यत इति लग्नात्सप्तमस्थः केंद्रस्थश्चंद्रमास्तस्मादयं केमद्रुमो न भवति अत्र च
क्रमः अत्र चंद्रमा न गण्यते यस्माच्चंद्रमसः सकाशाद्ग्रहणां न्यो न योगः कर्त्तव्य इति यद्येवं तल्लग्नात्केंद्रस्थः कथं करोतीत्यत्रोच्यते चंद्रलग्नयोस्तुल्यत्वात्
तथा च यवनेश्वरः मूर्त्तिश्च होराशशिभं च विंद्यात् अत्र च गार्गिः यथार्थकेंद्रगश्चंद्राद्विनाभावं भवेद्ग्रहः कश्चित्स्याद्वा विना चंद्रं लग्नाकेंद्रमतोथवा योगः केमद्रुमो
नामतदास्याद्यत्र गर्हितः भवंति निंदिताचाराद्दरिद्रामयसंयुता इति तस्माल्लग्नात्सप्तमस्थे चंद्रमस्ययोगस्य केमद्रुमता सिद्धैवेति अथ जीवशर्म्ममतेन सत्याचा
र्य्यमते चायुर्दायमौपच्छंदसिकेनाह ८ स्वमतेनेति जीवशर्म्मा नामाचार्य्यः स्वमतेनात्मीयमतेन परमायुषो विंशत्यधिकस्य वर्षशतस्य सपंचदिनस्य सप्त
मभागं प्रत्येकस्य ग्रहस्यायुर्द्दायमाह कथयति किलशब्दस्तथागमप्रदर्शनार्थः १२०।०।५ तेन तद्यथा परमायुः अस्य सप्तभिर्भागमयद्व्याप्तावान्तं वर्षादि १७।१।

प्रत्यक्षोयं तेषु दोषोपरोपि जीवंत्यायुः पूर्णमर्थैर्विनापि ८ स्वमतेन किलाह जीवशर्म्मा ग्रहदायं परमा

।२२।८।३४। यथान्याचार्य्यैर्नवतिथिविषये न्येवमादीनि परमोच्चगतानामादित्यादीनां वर्षाणि पठितानि तथैतानि प
ऽऽयुषः स्वरांशम् ॥
रमायुषः स्वरांशवर्षाण्येकैकस्य जीवशर्म्मपठितानि नीचे ऽर्द्धं ह्रसतीत्यत्रापि स्थितमेव तद्यथा एतानि परमनीचस्थस्यैकैकस्य ग्रहस्य ८।६।२६।४।१७ एतैः प्रा
ग्वदत्रैराशिकं कृत्वैकैकस्य ग्रहस्यायुर्द्दायः कर्त्तव्यः अत्रापि वक्रं भौमं विना शत्रुक्षेत्रस्थस्य ग्रहस्य त्र्यंशोपहानिः शुक्रशनैश्चरौ विना भौमं विना च बलवद्ग्र
हस्यास्तंगतस्यार्द्धापहानिः सर्वार्द्धं त्रिचरणेत्यादिका चक्रपातोपहानिः क्रूरे विलग्नसहिते साद्धौदितेति हानिः एतत्सर्वं जीवशर्म्मणाप्यन्याचार्य्यैः समानं तथा च
जीवशर्म्मा सप्तदश १७ को १ द्वियमौ २२ वसवो ८ वेदाग्नयो ३४ ग्रहेंद्राणां वर्षाण्युच्चस्थानानीचस्थानां अतोर्द्धं स्यात् मध्येनुपाततः स्यादानयनं शेषमत्रयत्किंचित्
पिंडायुर्वदेव कार्य्यं तत्सर्वं गणिततत्त्वज्ञैरिति अत्रानयनं सुखोपायेन प्रदर्श्यते स्वोच्चशुद्धो ग्रहः शोध्यो षड्भास्यूनो भमंडलात् तद्भागाः कृष्टिषड्भागाः ८६४१
हृता वेदाभ्रसायकैः ५०४ भक्तादिनादियल्लब्धं तदायुर्ज्जीवशर्म्मजं दिनेत्यस्त्रिंशता मासा मासेभ्यो रविभिः समाः न केवलं ग्रहदायं परमायुषः स्वरांशं एतत्तेनोक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ यावत्तुमतेनेति अनेनैतत्प्रतिपादयति यथेतन्मयात्रषिकृतेष्वाचार्य्यकृतेषुवानकेचिच्छास्त्रेषुदृष्टमिति तस्मादस्यायुर्द्दायस्यजीवसर्म्मेण स्वमतकरणमेष
टी०म दोषः एवंसर्व्वाचार्य्यमतेनायुर्द्दायोव्याख्यातः अत्राचार्य्येणयवनमतेनोपन्यस्तं मययवनमणित्थशक्तिपूर्व्वैरिति नचयवनेश्वरकृते शास्त्रेतथाविधश्चा
४५ युर्द्दायोदृष्टः यस्माद्यवनेश्वरेणोक्तं आयुंषिराश्यंशशाकचारयोगादिति अत्रोच्यते यवनेश्वरेणश्रुतिध्वजेनान्यच्छास्त्रंकृतं शाककालस्यार्व्वाक् तथाचश्रुतिध्व
जः गतेनसाध्यर्द्धशतेनयुक्तमेकेनकेषांनगताब्दसंख्या कालःशको१०४४नांशविशोध्यतस्मादतीतवर्षाद्युगतवर्षजातं एवंवेकिल्श्रुतिध्वजकृतं शाकका
लस्यार्व्वाक्ज्ञायते अन्यच्च यवनाचार्य्यैः पूर्व्वैःकृतमिति तदर्थंश्रुतिध्वजोप्याह यवनाऊचुः येस्मिन्ग्रहेद्विजनितानिभेदाःप्रोक्ताःपुराणैःक्रमशोग्रहस्यतदेत
ज्ज्ञायते यथावराहमिहिरेणपूर्व्वयवनाचार्य्यमतमेवोपन्यस्तं अस्माभिस्तन्नदृष्टं श्रुतिध्वजमेवदृष्टं पराशरस्यापीयमेववार्त्तापाराशरीयासंहिताकेवलम
स्माभिर्दृष्टानजातकंश्रूयतेस्कंधत्रयमितिपाराशरस्येतितदर्थंवराहमिहिरः शक्तिपूर्व्वैरित्याह चैवंप्रोह्यपाराशरः कथयतेदौर्भाग्यदंयोषितामित्येवमादि
मयमणित्थयोर्होराशास्त्रेविद्यते तथाचमयः एकोनविंशतिसूर्य्यचंद्रमाःपंचविंशतिः तिथिसंख्याकुजःसौम्योद्वादशोच्चगतोगुरुः कुजवद्दैत्यपूज्यस्तुव
र्षाणामेकविंशतिः एकोनसूर्य्यपुत्रस्यपरमोच्चगतस्यच आयुर्द्दायमिदंप्रोक्तमर्द्धंनीचगतस्यतुअंतरेत्वनुपाताच्चकारयेदायुसंग्रहः तथाचमणित्थः न
वरूपाःशरयमलास्तिथयोर्काःपंचरूपकाःक्रमशः रूपयमाकृतिसंख्याःसूर्य्यादीनांस्वतुंगेषु अब्दानीचेष्वस्माद्दलमंन्यत्रानुपाततःकार्यं आयु राम
र्द्दायविधानंहोराराशितुल्यमपि अथवराहमिहिरस्यस्वमतायुर्द्दायोयवनेश्वरसत्यमतानुसारीव्याख्यायते ग्रहभुक्तनवांशराशितुल्यामाति यत्रतत्ररा ४५
शौयस्मिन्नवांशकेग्रहोव्यवस्थितः सचनवांशकोमेषादेरारभ्ययावत्संख्याराशेःसंबंधीभवति तावंतिएववर्षाणिग्रहः स्वायुर्द्दायंप्रयच्छति एवंभुक्त
नवांशराशितुल्यंभवति यस्मिंश्चनवांशकेवर्त्ततेतस्माद्यद्भुक्तंग्रहेणातेनसह त्रैराशिकंकृत्वामासाद्यानपिकर्त्तव्यंत्रैराशिककरणंवक्ष्यति एवमायुर्द्दा
यानयनंचसत्याचार्य्येणोक्तं तथाचतद्वाक्यं राश्यंशशाकसंयोगादायुरिहसमासतोग्रहादद्युः एतच्चसत्यवाक्यं बहुसाम्यंसमुपैति बहुसंमतंबहूनामा
चार्य्याणांसंमतं तथाचयवनेश्वरः आयुंषिराश्यंशशाकचारयोगादिति अत्रतावत्सत्ययवनेश्वरवाक्यव्याख्यानेकिंचिद्विप्रतिपन्नं [illegible]शरंशाकचार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगादिति व्याचक्ष्यते यथा यस्मिन्राशौ ग्रहो वर्त्तते तत्र तेन यावंतो नवांशका भुक्तास्तावंत्येव वर्षाण्यायुः स ग्रहो ददाति अत्र च व्याख्याने परमं ग्रहादयशोध्यक्षे
पादो विना न वर्षाणि भवंति एतच्च व्याख्यानं बादरायणादिभिरंगीकृतं तथा च बादरायणः राश्यंशकालागुणिता द्वादशनवभिर्ग्रहस्य भागेभ्यः द्वादशाहतं
स्वशेषोब्दमासदिननाडिकाः क्रमशः इयमाचार्य्यवाराहमिहिरेण विनष्टे वस्त्वस्मज्जातके भिहिता एतदनुसारेण सत्ययवनेश्वरेण व्याख्यानं क्रियते आयुर्षिरा
श्यंशकचारयोगादिति राशीनामंशकाः राश्यंशकाः तेषु चारयोगादिति यत्र तत्र राशौ मेषांशकस्थो ग्रहो वर्षं एकं प्रयच्छति वृषनवांशकस्थो ग्रहो वर्षद्वौ प्रयच्छ
ति एवमुत्तरोत्तरांशकवृद्ध्या वर्षवृद्धिर्य्यावन्मीनांते द्वादश इति पूर्वव्याख्यानेन यवनेश्वरसत्यवाक्ययो राशिग्रहणमनर्थकं भवति अवश्यमेव राश्यंशके भ
वितव्यमिति अथानेनैव व्याख्यातानुसारेणाचार्य्य स एवायुर्दायानयनमार्य्ययाह ६ सत्योक्तेति सत्योक्ते सत्यमतायुर्दायकरणे तात्कालिको मिष्टमो भग्र
तं ग्रहं लिप्तीकृत्य लिप्तापिंडं कृत्वा तस्य शतद्वयेन भागमपहृत्य यदावाप्तं तदवाप्तारव्यं स्थाप्यं अवशेषमधः स्थाप्यं अवाप्ते मंडलभागविशुद्धेऽब्दाः स्युः॥

ग्रहभुक्तनवांशराशितुल्यं बहु साम्यं समुपैति सत्यवाक्यम् ६ सत्योक्ते ग्रहमिष्टं लिप्तीकृत्वा शतद्वयेनाप्तम्॥ ६॥ ६ ॥

मंडलशब्देन द्वादश राशय उच्यंते तेनावाप्तस्य द्वादशभिर्भागमपहृत्यावाप्तं त्याज्यं यदवशिष्यते तेऽब्दाः स्युस्तावद्वर्षाणि तेन ग्रहेणायुषो दत्तानि भवंति शेषा
न्मासाद्याः यदवशेषं स्थापितं तस्माद्द्वादशगुणितात्तेनैव च्छेदेन विभक्तान्मासा लभ्यंते तच्छेषात्त्रिंशद्गुणिताद्दिनानि तच्छेषात्षष्टिघ्नाद्घटिकाः पुनरपि षष्टि
घ्नात्तस्माच्च तेनैव भक्ताच्चषकापलाः लभ्यंते इति एवमागतं ग्रहस्यायुर्दायं भवति तत्र उदाहरणं तात्कालिको ग्रहः १।८।४५ लिप्तापिंडीकृतः २३२५ अस्य शतद्वये
न २०० भागमपहृत्यावाप्तं ११ जातं अवशेषं १२५ अवाप्तस्याप्य द्वादशभिर्भागं न यच्छेति इति एतदेवावशेषं तस्माद्ग्रहेणैकादशवर्षाणि दत्तानि भवंति अथ
च शेषं १२५ द्वादशभिर्गुणितं जातं १५०० अस्य शतद्वयेन भागमपहृत्यावाप्तं ७ जातं एवं सप्तमासाः अथ मासशेषं १०० जातं एतत्त्रिंशता ३० गुणितं जातं
३००० अस्य शतद्वयेन भागमपहृत्यावाप्तं १५ दिवसाः पंचदश इति शेषस्याभावात् घटिकाभावः एवमागतमेवं विंशाद्ग्रहाद्वर्षादि वर्ष ११ मास ७ दिन १५
घटिका ० अथैतदेव राश्यंशकलागुणिते त्रिन्यायेन प्रदर्श्यंतेः तद्यथा राश्यादिग्रहः १।८।४५ अस्य राशिभागलिप्ताः पृथक्पृथक् द्वादशाहताः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰
टी॰ भ॰
४६

अथभूयोनवाहताः १२।८६।५४०॥१०८।८६४।४८६०॥ अत्रलिप्तानामेतासां ४८६० षष्ट्याभागेहृतेलब्धं ८१ अवशेषं० एताघटिकालब्धमिदं ८१ भागेथैतेषु८६४ संयोज्यंजातं ८४५ अस्यत्रिंशताभागेहृतेलब्धं ३१ अवशेषं १५ एतेदिवसाः अथलब्धमिदं ३१ राशिष्वेतषु१०८ संयोज्यंजातं १३९ अस्यद्वादशभिर्भागेहृतेलब्धं ११ एतावशेषं ७ एतेमासाः लब्धस्यास्य ११ द्वादशभिर्भागंनप्रयच्छन्तीत्यतएतदेवात्रशेषं ११ एतानिग्रहायुर्दायवर्षाणि एवंवर्ष ११ मास ७ दिन १५ घटी० एतत्पूर्व्वंकृतायुर्दायेसंविदितमिति एवंयवनेश्वरसत्याचार्य्यवादरायणवराहमिहिरेणायुर्दायः प्रदर्शितइति एवमागतस्यायुर्दायस्यसत्याचार्य्यमतेनैवकर्म्मविशेषार्थंवंशस्थेनाह १० स्वतुंगस्थैः स्वोच्चगतैर्ग्रहैः वक्रोपगतैः विपरीतगत्याश्रितैश्चयत्स्वदत्तमायुस्तत्त्रिशात्संगुणंकार्य्यं उत्तमांशोपगतैः वर्गोत्तमांशस्थितैः स्वांशकस्थितैः स्वनवमभागगतैः स्वभस्थैः स्वराश्युपगतैः स्वत्रिभागगैः स्वद्रेष्काणस्थैः एतैः यद्दत्तमायुस्तद्द्विसंगुणंकार्य्यं इत्यान्विशेषइति भदत्तशब्देनसत्याचार्य्योभिधीयते यस्मात्तन्मतमिहप्रमाणीक्रियते पूर्व्वोक्तविधिनामययवनमणित्यादिमतेनायुर्दायः कृतः तस्मात्सत्यभाषितेस

मंडलभागविशुद्धेब्दाःस्युःशेषात्तुमासाद्याः १० स्वतुंगवक्रोपगतैस्त्रिसंगुणंद्विरुत्तमस्वांशकभत्रिभागगैः इत्यान्विशेषस्तुभदत्तभाषितेसमानमन्यत्प्रथमेप्युदीरितम् ११ किंत्वत्रभांशप्रतिमंददातिवीर्य्यान्वितोराशिसमंचहोरा॥

सत्याचार्य्यकृतेइत्यानेतावान्विशेषः यदेतत्स्वतुंगवक्रोपगतैःत्रिसंगुणंतत्सत्योक्तमेव समानमन्यदिति अन्यद्यच्छेषंतत्प्रथमेप्युदीरितं प्रथमेमययवनादिमतेयदुदीरितमुक्तम् [illegible]मानमित्यत्रापितत्तुल्यम् एतदुक्तंभवति सत्याचार्य्यमतेनायुर्दायंकृत्वावक्रवर्ज्यंशत्रुक्षेत्रगतस्यत्र्यंशंपातनीयम् शुक्रसौरीवर्ज्जंअस्तगतस्यार्द्धंपातनीयम् सर्वार्द्धेत्रिचरणेत्यादिचक्रपातोपहानिः कार्य्याएवंसत्याचार्य्यमतेनग्रहायुर्दायमुक्त्वाधुनालग्नायुर्दायकरणंक्रूरोदयेपापोदयेहानिःप्राप्तातदपवादार्थमिंद्रवज्रयाह ११ किमिति अत्रास्मिन्सत्यमतायुर्दायेहोरालग्नंभांशप्रतिमंददाति मेषादेरारभ्ययावत्संख्यस्यराशेःसंबंधीनवांशकोलग्नेनभुक्तस्तावंतिसंख्यानिवर्षाणिलग्नायुर्दायोददाति शेषाद्भागादिकात्त्रैराशिकेनमासाद्यानपिकर्त्तव्यं एतदुक्तंभवति सत्योक्तेग्रहमिष्टंलिप्तीकृ[illegible]तिन्यायेनलग्नायुर्दायःकर्त्तव्यः एवंकृत्वायदिवीर्य्यान्विताहोराभवतितदाराशिसमानानिराशितुल्यानिवर्षाणिप्रयच्छतीति होरास्वामिगुरुज्ञवीक्षि[illegible]ना[illegible]त्येरिति

राम॰
४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यायेनयदिवीर्य्यान्विताबलवतीहोरालग्नंभवतितदाराशिसमंददाति तत्तुल्यानिवर्षाणिप्रयच्छति भागादिकात्त्रैराशिकेनमासाद्यानयितव्यं कथमुच्यतेभाग श्चलिप्ता पिंडीकृत्यद्वादशभिः संगुण्याष्टादशभिःशतैः भागमपहृत्यावाप्तमासाः अतःशेषंत्रिंशता ३० संगुण्यतेनैवच्छेदेनभागमपहृत्यावाप्तंदिवसाः तदव शेषंषष्ट्यासंगुण्यतथैवघटिकाः पुनरपिशेषंषष्ट्यासंगुण्यतथैवचषकाः लब्धंमासादि तत्रैवयोजयेदेवंलग्नायुर्द्दायोभवति वीर्य्यान्वितस्यलग्नस्ययत्कर्म्म तद्वीर्य्यवर्ज्जितस्यचनकर्त्तव्यं अत्रचवादरायणः होरादयोप्येवंबलयुक्तान्यानिराशितुल्यानि वर्षाणिसंप्रयच्छत्यनुपातात्चांशकादिफलं एतच्चाचार्य्ये वराहमिहिरेणस्वल्पजातके ऽविनष्टेवानयार्यपाभिहितं क्रूरोदयइति मयपवनादिमतायुर्द्दायेक्रूरोदयेक्रूरेलग्नगतेसाद्धोदितोदितनवांशाहता समस्ता दितिन्यायेनयदायुषोपचयः क्रियते तदत्रास्मिन्सत्यमतायुर्द्दायेनकर्त्तव्यं अन्मासर्वेकर्त्तव्य कार्य्यंचनाब्देरिति प्रथमोपदिष्टेः पूर्वकथितैरब्दैः नवतिथि विषयेतियेब्दा यवनवादरायणाचार्य्यमतेनपठितास्तैः जीवशर्म्ममतेनचग्रहदायंपरमायुषः स्वरांशमितितैरब्दैः यवनैः यत्त्रैराशिकमुक्तंतदिहनसंभवति

क्रूरोदयेचोपचयः सनात्रकार्य्यंचनाब्दैःप्रथमोपदिष्टैः १२ सत्योपदेशोवरमत्रकिंतुकुर्वन्त्ययोग्यंबहुवर्गणाभिः॥ ९ ॥

यदादित्यस्यद्वादशानामंशानामेकेनविंशत्यब्दाभवंति तदेकस्मिन्नंशकेकिमिति सत्यायुर्द्दायेनकिंचित्कर्त्तव्यं अथमयादिमतमुपन्यस्यजीवशर्म्ममतं चोपन्यस्यसत्यमतस्यैवांगीकरणमिंद्रवज्रयाह १२ सत्योपदेशइति अत्रास्मिन्मतत्रयेसत्योपदेशोवरंश्रेष्ठमित्यर्थः किंतुतदप्यन्येबहुवर्गणाभिः वह्वा भिः गुणनाभिरयोग्यंकुर्वंति विनाशयंति कास्ताःगुणकाः स्वतुंगवक्रोपगतैस्त्रिसंगुणमित्यादिकाः तत्रयदिस्वगृहेग्रहोभवतितदाद्विगुणमायुः कुर्वं ति सएवस्वगृहांशकोयदिभवतितदाभूयोपिद्विगुणंकुर्वंति सएवस्वद्रेष्काणेयदाभवतितदाभूयोपिद्विगुणंवर्गोत्तमांशेपुनरपिद्विगुणंसएववक्रीयदि भवतितदाभूयस्त्रिसंगुणं कुर्वंति सएवस्वोच्चस्थोभवतितदाभूयोपित्रिसंगुणंकुर्वंति एवमनवस्था अनेनानवस्थाप्रसंगेनसत्योक्तमप्यायुर्द्दायमयुक्त मयोग्यंबहुवर्गणाभिः कुर्वंति तथाचयमः वर्गोत्तमेस्वराशौद्रेष्काणेस्वेनवांशके द्विगुणं वक्रोच्चगतेत्रिगुणंत्रिगुणंकार्य्यंतत्यासंख्यं तथाचसारावल्यां बहुताडनसंप्राप्तैर्याकरैन्येकवर्गणा वराहमिहिराचार्य्यैःसानदृष्टाचिरंतनैरिति एतदयुक्तं तदत्रकिंकार्य्यमित्याह॥ ९ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृं॰ टी॰ मे॰ ४७ आचार्य्यकत्वंतु बहुघ्नतायामिति एतदाचार्य्यकत्वमत्रागमः बहुघ्नतायांप्राप्तायामेकतुयद्भूरिबहुतरंगुणनंतदेवकार्य्यमिति बहुषुगुणनाप्राप्तास्वेकैवक्रिय
तइति बहुवारंयत्रद्विगुणयितत्वंप्राप्तंतत्रसकृदेवद्विगुणमायुःकर्त्तव्यं यत्रद्विगुणत्वंत्रिगुणत्वंचप्राप्तंतत्रसकृदेवत्रिगुणंकर्त्तव्यं यत्रवारद्वयंत्रिगुणत्वंप्रा
प्तंतत्रसकृदेवत्रिगुणंकर्त्तव्यं एकंतुयद्भूरितदेवकार्य्यमितिवचनात् स्वल्पजातकेप्युक्तमाचार्य्येण वर्गोत्तमस्वराशिद्रेष्काणनवांशकेस्वकेसकृत् द्विगुणं॥
वक्रोच्चयोस्त्रिगुणितंद्वित्रिगुणत्वेसकृत्त्रिगुणमिति चक्रपातंवर्ज्जयित्वाबहुवर्गणान्यायेनैवापहानावेतदेवकर्म्म शत्रुक्षेत्रस्थोनीचस्थश्चयदाग्रहोभवति अस्तं
गतोवातदासकृदेवार्द्धापहानिःकार्य्या नीचेतोर्द्धंह्रसतीत्यत्रापिअनुवर्त्तनीयं उक्तंचस्वल्पजातके शत्रुक्षेत्रेऽर्द्धंशंनीचेऽर्द्धंसूर्य्यलुप्तकिरणाश्च क्षपयंतिस्वाद्दायान्ना
स्तंयातोरविजशुक्राविति एवंकृतस्यसत्याचार्य्यमतस्यस्पष्टताभवतीत्याचार्य्यस्यमतं यत्रापहानिःप्राप्तागुणनाचप्राप्तातत्रसकृदेवापहानिकृत्वासकृदपिगुणना
कार्य्या किंत्वपहानौकर्त्तव्यांचक्रपातापहानिंकृत्वाततः शत्रुक्षेत्रस्यस्यापहानिंसकृदेवकर्त्तव्या ततःसकृदेवगुणनाकार्य्या अत्रचभगवान्गार्गिः राशितुल्यासुसंख्या
निग्रहावर्षाणिपद्धति लग्नश्चसबलोन्यानिभुक्तराशिसमानितु मासाद्यानयनंकार्य्यमनुपातादतःपरं सर्वार्द्धंत्रिचतुर्थांशान्वामंपंचचतुस्मितं हरंतिपापाः
स्वाद्दायात्तदर्द्धमितरेग्रहाः व्ययाच्चक्रापहानिस्तुकथितेयंतथाध्रुवं एकस्त्वेकर्क्षगेष्वेवकरोतिबलवान्ग्रहः शत्रुक्षेत्रगतः अर्द्धंशंनीचेऽर्द्धंसूर्य्यगस्तथा हंतिस्वा
द्दायाद्रविगावसितादित्यनंदनौ नचावनिसुतअंशंशत्रुक्षेत्रगतस्तथा ध्रुवापहानिःकर्त्तव्याततोन्यासुबहुष्वपिप्राप्तास्वेकैवकर्त्तव्यायास्यान्तासुमहत्तरा ततोपि
गुणनाकार्य्याप्येकैवमहतीसकृत् द्वाभ्यांवर्गोत्तमेस्वांशेस्वद्रेष्काणेस्वकेगृहे त्रिभिर्वक्रगतस्याथस्वोच्चराशिगतस्यच ग्रहदायोभवत्येवंशोध्यक्षेपकृतक्रियः राम॰ ४७
अत्रयद्यप्याचार्य्येणांशायुःप्रमाणीकृतंतथापिलग्नोयदिसम्पग्बलीभवतितदांशायुःकर्त्तव्यं अथार्कोबलवांस्तदापिंडायुः तथाचमणित्थः विलग्न
मेवलोपेनेशुभदृष्टेंशसंभवः रवौपिंडोद्भवंकुर्य्यादितिब्रूमश्चिरंतनाः तथाचसारावल्यांअंशोद्भवंविक्षावीत्पिंडंभानोर्निसर्गजंचंद्रादिति अन्येप्येवमा
युःयथांशायुःपिंडायुषोद्वेअपिकार्य्ये द्वाभ्यामपिदशांतर्दशांविभागपरिकल्पनाकार्य्या तत्रयदल्पंतस्यांतिमांतर्दशासेवयद्यपिमित्रादिकस्यतन्का
लंवर्त्ततेतदाधिकमायुर्ज्जीवति शत्रुदशाचेत्तदातत्रैवमरणं मित्रदशाचेत्तथापिजीवति मध्यदशाचेत्तदापीडाभवतिततोपिजीवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्माकं सत्याचार्य्यमभिमतमपि अथयस्मिन्योगेजातस्यायुः प्रमाणंनज्ञायतेतद्योगज्ञानंपुष्पितास्रयाह १३ कुलीरलग्ने कर्कटोदये गुरुशशिसहिते जीव
चंद्रयुक्ते तथाशशितनयेबुधेभृगुजेचशुक्रे केंद्रयातेकंटकगतेशेषैः परिशिष्टैः रविभौमसौरैः भवरिपुसहजोपगतैः भवस्थानमेकादशं रिपुस्थानंषष्टं सहज
स्थानंतृतीयं एतेषुभवरिपुसहजेषुउपगतैः स्थितैः इहास्मिन्योगेजातस्यानुक्रमाद्विनागणितकर्मांतरेणापिविनामितंअपरिमितमायुः स्याद्भवेत् एवंत
दुक्तंभवन्ति यदाकर्केलग्नेभवतितत्रैवचंद्रजीवौव्यवस्थितौभवतः बुधशुक्रौसहितौपृथक्स्थौवालग्नचतुर्थसप्तमदशमस्थानानामन्यतमेयथासंभवंभवतः
परिशेषाः आदित्यांगारकशनैश्चराः पृथक्सहितावायथासंभवमेकादशषष्टतृतीयगाः भवंतितदाईदृग्योगेयोजातः तस्यामितप्रमाणमायुर्भवतिअनुक्रमा।
द्गणितानीतंविनैवअयमर्थः एवंविधेयोगेदृष्टेआयुर्दायोगणनानकर्त्तव्या यस्मात्तस्यनसंबद्धमिति अतोन्यथाजातस्ययथागतेनायुषउत्पन्नेनभवितव्यं
नायुः पिंडस्यावोकृतस्यमृत्युःभवति नचायुःपिंडमतिक्रम्यतेनजीवितव्यमिति यस्मिन्योगेजातस्याविचारमेवनायुषोद्गसोभवतीनिस्मृतिउक्तं नहीदृशम

आचार्य्यकत्वंबहुघ्नताख्यामेकंतुयद्भूरितदेवकार्य्यं १३ गुरुशशिसहितेकुलीरलग्नेशशितनयेभृगुजेचकेंद्रयाते भवरिपुसहजोप
गैश्चशेषैरमितमिहायुरनुक्रमाद्विनास्यात् १४ उदयरविशशांकप्राणिकेंद्रादिसंस्थाः प्रथमवयसिमध्येंत्येचदद्युः फलानि॥ ॥

नायुष्यंयथांन्यस्त्रीनिषेवणं इत्येवमादिकैर्दोषैर्नजीवितक्षतिरिति एतद्योगेजातस्यायुर्वेदोक्तैः विधिसेवितैरसायनैः प्रयोगैः यथाभिहितैः दीर्घमायुरवाप्नोती
ति १४॥ ॥इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तावायुर्दायाध्यायः सप्तमः ७ अथातोदशांतर्दशायाव्याख्यायते परिज्ञातैः समस्तायुषः पुरुष
स्यजीविताभ्यांतरेस्थितयोः दुःखादुःखयोः परिछेदः क्रियते तत्रचशोध्यक्षेपविशुद्धमायुर्यावत्प्रमाणंयेनग्रहेणदत्तंतावत्प्रमाणैवतत्संबंधिनीदशाभव
ति तत्रदशाक्रमोनज्ञायतेतज्ज्ञानंमालिन्याह उदयोलग्नंतनुः रविरादित्यआत्मा शशांकश्चंद्रोमनः एषामुदयरविशशांकानांमध्याद्यः प्राणीबलवान्तद्बल
वशात्तस्यसंबंधिनीप्रथमादशाभवति प्राणिनांदेहवतां तथाचयवनेश्वरः निशाकरादित्यविलग्नभानांतत्कालयोगादधिकंबलंयः विभर्त्तितस्यादिदशेष्य
तेसाशेषास्ततःशेषबलक्रमेणेति उदयश्चरविश्चशशांकश्चोदयरविशशांकाः उदयरविशशांकानांप्राणीउदयरविशशांकप्राणीउदयरविशशांकप्राणी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृ० टी० भ० ४८

चक्रे केंद्रादिसंस्थाश्चोदयरविशशांकप्राणी केंद्रादिसंस्थाः एवमेषां मध्याद्येन प्रथमादशादन्तातस्यैवकेंद्रादिसंस्थाः केंद्रपणफरापोक्लिमेषुस्थितायहावीर्येणप
वयःक्रमेणदशाददुः एवंलग्नार्कशशांकानामध्यादेकस्यबलवतोदशामादौपरिकल्प्यातनन्तस्ययेकेंद्रस्थास्तेषांदशापरिकल्प्याः तैः केंद्रस्थैः प्रथमेवय
सिफलंदत्तंभवति ततः प्रथमदशापतेरेवयेपणफरस्थास्तेषांदशाः परिकल्प्याः तैः मध्येवयसिफलंदत्तंभवति ततः प्रथमदशापतेरेवापोक्लिमस्थानांदशाः परि
कल्प्याः तैरंत्येवयसिफलंदत्तंभवति युदुक्तं प्रथमवयसिमध्येन्त्येचददुःफलानि तथाचयवनेश्वरः पूर्वंतुकेंद्रोपगताः फलंतिमध्येवयः पणफरं निविष्टाः
आपोक्लिमस्थाः फलदावयोन्त्येयथावलंस्वंसमुपैतिपूर्वं अथयदिकेंद्रस्थाग्रहाः नभवंतितदाकः प्रथमेवयसिफलंप्रयच्छतिइत्याह नहिनफलविपाकइ
त्यादि केंद्रस्थाद्यभावे केंद्रस्थानांग्रहाणामभावेअसंभवतिप्रथमेवयसियः फलविपाकः सनहिनयतोद्वौनभौप्रकृत्यर्थंगमयतः पणफरस्थानामप्यभावेम
ध्येवयसिफलविपाकोनहिन एतदुक्तंभवति यदाकेंद्रस्थाग्रहानभवंतितदापणफरस्थाः पूर्वंफलंप्रयच्छंति तत्रआपोक्लिमस्थाः अथकेंद्रस्थानभवंति पणफरस्था

नहिनफलविपाकः केंद्रसंस्थाद्यभावेभवतिहिफलपंक्तिः पूर्वमापोक्लिमेपि १ ॥ ॥

श्चनभवंति तदासर्वस्मिन्नेववयसिआपोक्लिमस्थाः फलंप्रयच्छंति यतउक्तंभवतिहिफलपंक्तिः पूर्वमापोक्लिमेपिइति एवमापोक्लिमस्थानामभावेप्रथमंकेंद्रस्थाःफ
लंप्रयच्छंति ततःपणफरस्थाः आपोक्लिमस्थानभवंतिनचपणफरस्थास्तदासर्वस्मिन्नेववयसिकेंद्रस्थाः फलंप्रयच्छंति एतदुक्तंभवति लग्नार्कशशांकानांमध्येबलवांस्तस्य
प्रथमादशाकल्पयित्वाततस्तत्केंद्रगानांसर्वेषांकल्पनीयः तेषांपरिकल्प्यपणफरस्थानांततः परिकल्पनीयास्ततः परमापोक्लिमस्थानां केंद्रस्थानामभावेप्रथमंदशा
पतेरनंतरं पणफरस्थानांकल्पनीयास्ततआपोक्लिमस्थानांकेंद्रस्थानामभावेपणफरस्थानामप्यभावेआपोक्लिमस्थानामेवकल्पनीयाः अथकेंद्रस्थाः पणफरस्था
श्चभवंति आपोक्लिमस्थानभवंतितदाकेंद्रस्थानांपरिकल्प्यपणफरस्थानामेवपरिकल्पनीयाः अथकेंद्रस्थाभवंतिपणफरस्थानभवंतिआपोक्लिमस्थाश्चभवंति
तदाकेंद्रस्थानांकल्पयित्वाआपोक्लिमस्थानामेवकल्पनीयाः अथकेंद्रस्थाएवकेवलंभवंतितदातेषामेवकल्पनीयाः अथपणफरस्थाभवंतितदापणफरस्थाएव
कल्पनीयाः अथापोक्लिमस्थाभवंतितदातेषामेवकल्पनीयाः तथाचस्वल्पजातकेउक्तं लग्नार्कशशांकानांयोबलवांस्तद्दशाभवेत्प्रथमातत्केंद्रपणफरापोक्लिमो

एम० ४८

CC-0. In Public Domain. Digitization by eGangotri

आयुर्हृतमिति शोध्यक्षेपविशुद्धमायुर्य्यो वर्षप्रमाणं येन ग्रहेण दत्तं तस्य ग्रहस्य संबंधिनी दशा कल्प्या परिकल्पनीया तत्र लग्नार्कशशांकानां यो बलवान्तद्दशा
भवेत्प्रथमेति न्यायेन तद्दशां प्रथमं कल्पयित्वा ततस्तत्केंद्रगानां परिकल्पनीया यत्तेषां च केंद्रगानां मध्यात्सा च दशा प्रबलस्याति बलस्य पूर्वं प्रथमं कल्प्या अनंत
रं तस्मादूनबलस्य एवं क्रमेण यथा यथा ऊनबला भवंति तथा तथा पश्चात्तदीयदशा कल्पनीयाः एवं केंद्रस्थानां दशा परिकल्प्य ततः पणफरस्थानाम नेनैव क्र
मेण परिकल्प्या ततः आपोक्लिमस्थानामनेनैव क्रमेणेति साम्ये बहूनामिति केंद्रस्थानां बहूनां ग्रहाणां बलसाम्ये सति बहुवर्षदस्य बहूनि वर्षाणि येन दत्तानि
तस्य प्रथमं दशा परिकल्प्या नन्वत्र कथं ग्रहाणां बलसाम्यं भवति यदि द्वावपि स्वसुहृत्त्रिकोणे स्वगतो भवतस्तदा नैसर्गिकेन बलेन यो धिकः स एव बली आस्तां किं
तु स्थानदिक्चेष्टाकालबलग्रहदर्शनादि बलानि यावत्प्रणीतविधिनैकीक्रियंते तावद्बलसाम्यं भवति ग्रहाणां यथा सामान्येनोदाहरणं यदि शनैश्चरो बलत्रये
ण संयुक्तो भवति भौमो बलद्वयेन तदा तत्र भौमस्य निसर्गबलवत्त्वाद्बलसाम्यं भवत्येवं सर्वेषामपि ज्ञेयं तेषां च साम्ये प्रथमोदितस्येति तेषां वर्षाणां साम्ये पि वर्षतु

आयुः कृतं येन हि यत्तदेव कल्प्या दशा सा प्रबलस्य पूर्वम् साम्ये बहूनां बहुवर्षदस्य तेषां च साम्ये प्रथमोदितस्य २ एकर्क्षगोर्द्धमपहृत्य
ददाति तु स्वत्र्यंशं त्रिकोणगृहगः स्मरगः स्वरांशम् ॥

१९ ल्येपि प्रथमोदितस्य दशा परिकल्प्या प्रथमम मादावर्कमंडलाद्य उदित उद्गतस्तस्य यदा बलसाम्यं
न भवति तदा बहुवर्षदेपि ग्रहे स्थिते प्रथमोदितोपि स्थिते बलाधिकस्यैव पूर्वं परिकल्प्येति तेषां च बलसाम्ये प्रथमोदितस्येत्यत्र द्विविध उदयः प्रत्यहं चक्रभ्रमव
शादेकः आदित्यविप्रकर्षेणापरः तत्रेहादित्यविप्रकर्षेण उदयो गणितस्कंधोक्तकालांशकवशाद्ज्ञेयः अत्र च भगवान्गार्गिः बली लग्नेंदुसूर्य्याणां दशामाद्यां प्र
यच्छति तस्मात्ततः प्रयच्छंति केंद्रादिस्थाः क्रमेण तु तत्रापि बलिनः पूर्वं तत्साम्ये बहुदायकाः तत्साम्ये पि प्रयच्छंति ये पूर्वं रविविच्युताः एवं दशाव्यवस्थायां जात
यामंतर्दशायां याचग्रहज्ञानं वसंततिलकेनाह २ एकर्क्षगोर्द्धमिति दशापतिना सहैकर्क्षगो ग्रहः एकस्मिन्राशौ व्यवस्थितः दशापतिः दत्तां तद्दशाकालस्य यद
र्द्धं तदर्द्धमपहृत्य स्वैरात्मीयैर्दशागुणैः परिपाचयति त्र्यंशं त्रिकोणगृहगः दशापतेस्त्रिकोणगृहगो नवपंचमस्थाने स्थितो दशापतिर्दत्तां तद्दशाकालात्त्र्यंशं तृती
यभागमपहृत्य स्वैरात्मीयैः दशागुणैः परिपाचयति स्मरगः स्वरांशमिति दशापतेः स्मरगः सप्तमस्थानस्थः दशापतिः दत्तां तद्दशाकालात्स्वरांशं सप्तमभागमपहृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ. त्यस्वैः दशांगुणैः परिपाचयन्ति पादंफलस्यचतुरस्रगतः दशापतेः चतुरस्रगोष्टमचतुर्थस्थानस्थोदशापतिः दत्तांतर्दशाकालात्पादंचतुर्थभागमपहृत्यस्वैर्दशागु
टी.भ णैः परिपाचयतिसहोराः होरालग्नंतयासहितापरस्परमन्योन्यमनेनप्रकारेणव्यवस्थिताः स्वैःस्वैर्गुणैःपरिपाचयंति एतदुक्तंभवतियथादशापतेः सकाशादेक
४८ र्क्षादिस्थोग्रहोयथास्वंपठितमंशंपरिपाचयंतितथालग्नमपिपाचयति अथदशापतेः प्रथममंशपरिकल्पनांकृत्वापश्चादेकर्क्षादिस्थितानांकर्त्तव्या यस्मादृशापतेर्य्योभागआगच्छतितदनुसारेणाद्धादयोभागाः परिशेषाणांभवंति अथैकस्मिन्स्थानेयदाबहवोग्रहाभवंतितदातेषांमध्याद्योबलवान्सएवैकः परिपाचयतिनान्ये कथमेतद्गम्यते उच्यते एकवचननिर्द्देशात् एकर्क्षगोर्द्धमपहृत्यददातितुस्वमित्यादिकवचनात् नकेवलमिहाचार्य्येणैकवचननिर्द्देशः कृतोयावत्त्वल्पजातकेपि तथाचोक्तं एकर्क्षेअर्द्धंस्वंशंत्रिकोणयोःसप्तमेतुसप्तांशं चतुरस्रयोस्तुपादंपाचयतिगतोग्रहःस्वगुणैरिति नकेवलंयावद्भगवान्गार्गादीनामप्येकवचननिर्द्देशोस्ति तथाचभगवान्गार्गिः एकर्क्षसंस्थितश्चार्द्धंत्रिभागंतुत्रिकोणगः सप्तमस्थःस्वरांशंतुपादंतुचतुरस्रगः लग्नेनसहिताःसर्वेह्य

पादंफलस्यचतुरस्रगतःसहोरास्त्वेवंपरस्परगताःपरिपाचयंति ३ ॥ ६ ॥ ॥

न्योन्यंफलदायकः ; यवनेश्वरश्चाप्येवं कालोर्द्धभागैकगृहाश्रितस्यतदर्द्धभागंलभतेचतुर्थे त्रिभागभागीचत्रिकोणसंस्थस्तदर्द्धभाक्सप्तमपृथक्त्रिकोणे स्यात्सप्तमेसप्तमभागभागीस्थितोग्रहश्चारवशाद्ग्रहस्य एवंसर्वत्रैकवचननिर्द्देशः तस्मादेवंज्ञायते यथैकएवांशहारोभवतिनसर्वेइति तथाचसत्यः अर्द्धंतृतीयमर्द्धंतथार्द्धस्वाच्चसप्तमंभागं एकर्क्षेनवमपंचमचतुर्थनिधनास्तसंस्थानं दद्युर्ग्रहाग्रहाणांस्वदशास्वांतर्दशाख्यानां फलकालान्मित्रविधिक्रमेणभेदाश्चतेप्येवं एकर्क्षगेषुबलवान्भागहारोमित्रतोरिपोर्वापि मित्रंचपुष्कलफलंतस्मिन्कालेरिपुर्नैवं तथाचयमः एकर्क्षोपगतानांयोभवतिबलाधिकोविशेषेण एकः सएवहर्त्तानान्यतत्रस्थिताविहगाइति लग्नेपियत्रांशापहारित्वंप्राप्तस्तत्रचलग्नेयदाग्रहःस्थितोभवति तदालग्नग्रहयोर्य्योबलवान्सएवैकः पठितमंशमपहरतिनेतरइति अन्येसर्वेषामेकादिराशिगानामंतर्दशाभामिच्छंति अन्येपुनः एकमेवभागंगृहीत्वातंभागमेकर्क्षगानांभागीकृत्यतद्भागांशमिच्छंति अथदशापरिकल्पनाज्ञानमिंद्रवज्रयाह ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थानानीति अर्द्धादिकाभागाः स्थानशब्देनोच्यते तेषांचार्द्धादिकानांभागानांसवर्णनाकार्य्या सवर्णनासदृशच्छेदनाततः सवर्णयित्वाच्छेदसादृश्यमुत्पाद्यततस्ता
निसर्वाणिस्थानानि अधःस्थैः छेदैः विवर्जितानिकार्य्याणिछेदाअपास्याइत्यर्थः उपरिस्थिताराशयोयथांशंप्रत्यंशंगुणनाकार्य्याभवंति छेदः तदैक्येनतेषां
राशीनामैक्येनसंक्षयेणछेदोभागहारोभवति कस्मिन्गुणकाराभागहाराइत्याह दशाब्दपिंडेदशावर्षसमूहे तेनैतदुक्तंभवति दशाब्दान्पृथक्पृथग्गुकारैः
संगुण्यछेदेनविभज्यावाप्तंवर्षाद्यंतर्दशाभवति तद्यथोदाहरणं दशापतिर्नैवकेवलंकश्चिद्ग्रहः स्थितः अन्यस्थानेषुनकश्चित्स्थितस्तदासएवार्द्धापहारीतत्रदशा
पतेः रूपस्यैकस्यैवाधोरूपमेकंन्यसेत् एवमर्द्धहारस्यरूपस्याधोरूपद्वयंन्यासः अत्रपरस्परछेदगुणवेतौराशीकर्त्तव्यौकृतौजातौ २ १ एतौसमछेदीभूतौ १ ९
छेदहीनौ २ एतौगुणकारौ अनयोर्य्योगः ३ एषभागापहारः एतद्दशापतिः दत्तायुर्दायः ३।०।०।० एतद्द्वाभ्यांसंगुण्यजातः ६ त्रिभिः विभाज्यावाप्तंफलं २ इयंमेलेद
शापतिनासहैकराशिव्यवस्थितस्यांतर्दशाएवंमूलदशापतिदत्तांतर्दशाकालादेकराशिगेनग्रहणार्द्धापचितोभवतिअस्यांतर्दशाकालः परमयोगः ३।०।०।० जातासे

स्थानान्यथैतानिसवर्णयित्वासर्वाण्यधश्छेदविवर्जितानि दशाब्दपिंडेगुणकाययांशंछेदस्तदैक्येनदशाप्रभेदः ४ ॥ ६ ॥

वमूलदशेति अथदशापतेः नवमपंचमस्थानयोरेकस्मिन्स्थानेकश्चिद्ग्रहः स्थितोभवति द्वितीयेनचदशापतिनासहनचतुरस्रयोः नचसप्तमेनदान्यासः १।१ ३
एतौपरस्परछेदहतौछेदनीनौएतौ ३।१ गुणकारौएकीकृतौ ४।३ ३।४ एषभागहारः मूलदशापतेः दायः अस्यत्रिगुणस्यचतुर्भिर्भागपहृत्यावाप्तंएवंमूलदशापतेरंत
र्दशाकालः अयमूलदशापतिदायेस्यास्य ४।०।०।० एकगुणस्यचतुर्भिः भागमपहृत्यावाप्तं १।०।०।० एषात्रिकोणस्यस्यांतर्दशेति एवंमूलदशापिदत्तांतर्दशाकाला
त्रिकोणस्थेनत्रिभागमपहृत्यभवति अस्यांतर्दशाकालद्वयस्ययोगः जाता ४।०।०।० सैवमूलदशेति अथदशापतेश्चतुर्थाष्टमयोरेकस्मिन्स्थानेकश्चिद्ग्रहोभवति
नद्वितीयेनचदशापतिनासनत्रिकोणयोः नसमेतरान्यासः १।१ ५।१ ४ परस्परछेदहतौ ४।१ ५।४ छेदहीनौ ५ एतौगुणकारौएकीकृतौ ५ एषभागहारः मूलदशापतेः दा
यः ५।०।०।० अस्यचचतुर्गुणस्यपंचभिः भागमपहृत्यावाप्तं ४।०।०।० मूलदशापतेः अंतर्दशाकालः अयमूलदशापतेः दायस्यास्य ५।०।०।० एकगुणस्यपंचभिः भाग
मपहृत्यावाप्तं १।०।०।० एषाचतुरस्रस्यस्यांतर्दशेति एवंमूलदशापतिः दत्तांतर्दशाकालाच्चतुरस्रस्थेनपादमपहृतंभवतिअस्यांतर्दशाकालद्वयस्ययोगः ५।०।०।० जाता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ. अथदशापतेः सप्तमे स्थाने कश्चिद्ग्रहो भवति तदशापतिना सह न त्रिकोणन चतुरस्रयोस्तदान्यासः १।१।१।१।७ परस्परछेदहतावेतौ ७।२।१।७ छेदहीनौ एतौ गुणकारौ ए
टी. भ. कीकृतौ ८ एषभागहारः मूलदशापतेः दायः ८।०।०।० अस्य सप्तगुणस्याष्टभिः भागमपहृत्यावाप्तं इयं मूलदशापतेरंतर्दशा पुनरपि मूलदशापतेः दायः ८।०।०
५० ।० अस्यैकगुणस्याष्टभिः भागः १।०।०।० मपहृत्यावाप्तमियं १।०।०।० मूलदशापतेः सप्तमस्थानस्यांतर्दशा एवं मूलदशापत्यंतर्दशाकालात्सप्तमो भागः सप्तम
स्थेन ग्रहेण पाचितो भवति अस्यांतर्दशाकालद्वयस्य योगः ८।०।०।० जाता सैव मूलदशेति एवमेकस्मिन्नंतर्दशा पाचके विकल्पा अत्रादौ मूलदशापतेरंतर्दशा भव
ति तदनंतरं मंग्रहस्य अथ दशापतिना सहैकस्मिन्राशौ कश्चिद्ग्रहो भवत्यपरस्त्वनवमपंचमयोर्मध्यादेकस्मिन्भवति न द्वितीयेनान्येषु स्थानेषु न चतुरस्रयोः न
सप्तमे तदान्यासः १।१।१।२।१।३ एते राशयः परस्परछेदहता जाता ६।६।३।६।२।६ छेदहीनाः ६।३।२ एते गुणकाराः एकीकृताः ११ एषभागहारः अथदशापतिदायः
११।०।०।० अस्य षड्गुणस्यैकादशभिः भागमपहृत्यावाप्तं ६।०।०।० एवं मूलदशापतेरंतर्दशा पुनरपि मूलदशापतिदायस्यास्य ११।०।०।० त्रिगुणस्यैकादशभिः
भागमपहृत्यावाप्तं ३।०।०।० इयमर्द्धपाचकस्यांतर्दशा पुनरपि मूलदशापतिदायस्यास्य ११।०।०।० द्विगुणस्यैकादशभिः भागमपहृत्यावाप्तं २।०।०।० इयं त्रिको
णावस्थितस्यांतर्दशा अत्र दशापतेः यदर्द्धं तदेकगृहावस्थितस्य पाचयति त्रिभागं च त्रिकोणगः अंतर्दशात्रयस्यास्य योगः ११।०।०।० जाता सैव मूलदशेति अ
थ दशापतिना सहैकस्मिन्राशौ कश्चिद्भवत्यपरश्चतुरस्रयोः मध्यादेकस्मिन्न द्वितीयेन चान्येषु स्थानेषु न त्रिकोणयोः सप्तमे तदान्यासः १।१।१।१।२।१।४ एते परस्पर
छेदहता जाताः ८।८।४।८।२।८ छेदहीनाः ८।४।२ एते गुणकाराः एकीकृताः १४ एषभागहारः अथदशापतिदायस्यास्य १४।०।०।० अष्टगुणस्य चतुर्दशभिः भागम दश ५०
पहृत्यावाप्तं ८।०।०।० इयं मूलदशापतेरंतर्दशा पुनरपि मूलदशापतिदायस्य चतुर्गुणस्य १४।०।०।० चतुर्दशभिः भागमपहृत्यावाप्तं ४।०।०।० इयमर्द्धपाकस्यांतर्दशा पु
नरपि मूलदशापतिदायस्यास्य १४।०।०।० द्विगुणस्य चतुर्दशभिः भागमपहृत्यावाप्तं २।०।०।० इयं चतुर्थभागपाकस्यांतर्दशा अत्र दशापतेः यदर्द्धं तदेकगृहावस्थि
तः पाचयति चतुर्भागं चतुरस्रगतः अंतर्दशात्रयस्यास्य योगः १४।०।०।० जाता सैव मूलदशेति अथ यत्र दशापतिना सहैकस्मिन्राशौ कश्चिद्भवत्यपरश्च सप्तमे नान्ये
षु स्थानेषु तदान्यासः १।१।१। १।७ एते परस्परछेदहता जाताः १४।१४।७।१४।२।१४ छेदहीनाः १४।७।२ एते गुणकाराः एकीकृताः २३ एषभागहारः अथदशापतिदाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यास्य २३।०।०।० चतुर्द्दशगुणस्यत्रयोविंशत्याभागमपहृत्यावाप्तं १४।०।०।० इयंमूलदशापतेरंतर्द्दशा पुनरपिदशापतिदायस्यास्य २३।०।०।० द्विगुणस्यत्रयोविंशत्याभागम
पहृत्यावाप्तं २।०।०।० इयंसप्तमभागपाचकस्यांतर्द्दशा अस्यांतर्द्दशात्रयस्ययोगः जाताः २३।०।०।० सैवमूलदशेति अथदशापतेस्त्रिकोणयोरपिग्रहोव्यवस्थितस्ता
न्येषुस्थानेषुतदान्यासः १।१। १।३।१।३ एतेराशयः परस्परच्छेदहताजाताः ९।९।३।९।३।९ छेदहीनाः ९।३।३ एतेगुणकाराः एकीकृताः १५ एषभागहारः दशापतिय
स्यास्य ५।०।०।० नवगुणस्यपंचदशभिः भागमपहृत्यावाप्तं ३ इयंमूलदशापतेरंतर्द्दशा पुनरपिदशापतिदायस्यास्यत्रिगुणस्यपंचदशभिः ३।०।०।० भागमपहृत्यावाप्तं
इयंत्रिकोणस्यस्यांतर्द्दशाद्वितीयस्यैषैव ५।०।०।०।१।०।०।० अस्यांतर्द्दशात्रयस्ययोगः १।०।०।०।५।०।०।० जाता सैवमूलदशेति अथदशापतेस्त्रिकोणयोः मध्यादेकस्मि
न्कश्चिद्ग्रहोव्यवस्थितश्चतुरस्रयोः मध्यादेकस्मिन्नपिनान्येषुस्थानेषुतदान्यासः १।१२।१।३।१।४ एतेपरस्परच्छेदहताः जाताः १२।१२।४।१२।३।१२ छेदहीनाः १२।४।३ एते
गुणकाराः एकीकृताः १९ एषभागहारः अथदशापतिदायस्यास्य १९।०।०।० द्वादशगुणस्यैकोनविंशत्याभागमपहृत्यावाप्तं १२।०।०।० इयंमूलदशापतेरंतर्द्दशा पुनरपि
दशापतिदायस्यास्य १९।०।०।० चतुर्गुणस्यैकोनविंशत्याभागमपहृत्यावाप्तं ४।०।०।० इयंत्रिकोणभागपाचकस्यांतर्द्दशा पुनरपिदशापतिदायस्यास्य १९।०।०।० त्रिगुणस्यैको
नविंशत्याभागमपहृत्यावाप्तं ३।०।०।० इयंचतुर्भागपाचकस्यांतर्द्दशा अस्यांतर्द्दशात्रयस्ययोगः १९।०।०।० जातासैवमूलदशेति अथयत्रदशापतेस्त्रिकोणयोः
मध्यादेकस्मिन्स्थानेकश्चिद्ग्रहोऽन्यः सप्तमेतदान्यासः १।१।१।३।१।७ एतेराशयः परस्परच्छेदहताजाताछेदहीनाः २१।७।३ एतेगुणकाराः एकीकृताः ३१ एषभा
गहारः २१।२१।७।२१।३।२१ दशापतिदायस्यास्य ३१।०।०।० एकविंशत्यासंगुण्यासैकत्रिंशत्याभागमपहृत्यावाप्तं २१।०।०।० इयंमूलदशापतेरंतर्द्दशा पुनरपि
दशावर्षाणि ३१।०।०।० सप्तभिः संगुण्यैकत्रिंशताभागमपहृत्यावाप्तं ७।०।०।० इयंत्रिभागपाचकस्यांतर्द्दशा पुनरपिदशावर्षाणि ३१।०।०।० त्रिभिः संगुण्यैक
त्रिंशताभागमपहृत्यावाप्तं ३।०।०।० इयंसप्तमभागपाचकस्यांतर्द्दशा अस्यांतर्द्दशात्रयस्ययोगः ३१।०।०।० जातामूलदशेति यत्रदशापतिश्चतुरस्रयोः द्वयोरपि
ग्रहौस्थितौनान्यत्रतदान्यासः १।१।१।४।१।४ एतेराशयः परस्परच्छेदहताजाताः छेद १६।१६।४।१६।४।१६ हीनाः १६।४।४ एतेगुणकाराः एकीकृताः २४ एषभागा
पहारः मूलदशावर्षाण्येतानिषोडशभिः संगुण्यचतुर्विंशत्या २४ भागमपहृत्यावाप्तं ४।०।०।० इयंमूलदशापतेरंतर्द्दशा पुनरपि ६।०।०।० दशापतेः दायस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र स्य ६।०।०।० चतुर्गुणस्य चतुर्विंशत्याभागमपहृत्यावाप्तं १।०।०।० इयं चतुर्थभागपाचकस्यांतर्दशा द्वितीयस्याप्येवं अस्यांतर्दशात्रयस्य योगः जाता ६।०।०।० से
टी.भ वमूलदशेति अथयत्र दशापतेश्चतुरस्रयोः मध्यादेकस्मिन्कश्चिद्ग्रहो भवति सप्तमे न्यस्तदान्यासः १।१।१।४।१।२ एते राशयः परस्परछेदहता जाताः २८।२८।७।२८
५१ ४।२८ छेदहीनाः २८।७।४ एते गुणकाराः एकीकृताः ३९ एष भागापहारः अथ मूलदशावर्षाणि ३६।०।०।० एतान्यष्टाविंशत्या संगुण्यैकोनचत्वारिंशता भागम
पहृत्यावाप्तं २५।१०।४।३६ इयं मूलदशापतेरंतर्दशा पुनरपि दशावर्षाणि ३६ सप्तभिः संगुण्यैकोनचत्वारिंशता भागमपहृत्यावाप्तं ६।५।१५।८ इयं चतुर्भागया
चकस्यांतर्दशा पुनरपि दशावर्षाणि ३६ चतुर्भिः संगुण्यैकोनचत्वारिंशता भागमपहृत्यावाप्तं ३।८।९।२५ इयं सप्तभागपाचकस्यांतर्दशा अस्यांतर्दशात्रयस्ययो
गः ३६।०।०।० जाता सैव मूलदशेति एवं त्रिविकल्पाः अत्र पंचमात्मप्रभृति अस्यैवाथ यत्र दशापतिना सहैकराशौ कश्चिद्व्यवस्थितो द्वयोरपि त्रिकोणयोस्तदान्यासः
१।१।१।२।१।३।१।३ एते राशयः परस्परछेदहता जाता छेदहीनाः १८।१८।८।१८।६।१८।६।१८ एते गुणकाराः १८।८।६।६ एकीकृताः ३८ एष भागापहारः अथमू
लदशापतिवर्षाणि १३।०।०।० अतः प्राग्वच्चतस्रोंतर्दशान्यासः ६।३।२।२ अस्यांतर्दशा चतुष्टयस्य योगः १३।०।०।० जाता सैव मूलदशेति अथ यत्र दशापतिना
सहैकराशौ कश्चिद्व्यवस्थितस्त्रिकोणयोः मध्यादेकस्मिन्व्यवस्थितश्चतुरस्रयोरप्येकस्मिन्नान्यत्र तदान्यासः १।१।१।२।१।३।१।४ एते राशयः परस्परहता जा
ताः छेदहीनाः २४।१२।८।६ एते गुणकाराः एकीकृताः ५० एषा भागापहारः २४।२४।१२।२४।८।२४।६।२४ मूलदशा ३६।०।०।० अतः प्राग्वच्चतस्रोंतर्दशा १७
।३।१९।१४८।।८।७।२०।२४।।५।८।३।३६।।४।३।२४।१२ अस्यांतर्दशा चतुष्टयस्य योगः ३६।०।०।० जाता सैव मूलदशा अथ दशापतिना सहैकस्मिन्राशौ व्यवस्थि
तस्त्रिकोणयोः मध्यादेकस्मिन्नान्यः सप्तमे च व्यवस्थितस्तदान्यासः १।१।१।२।१।३।१।७ एते राशयः परस्परछेदहता जाताः छेदहीनाः ४२।४२।२१।४२।१४।४२ राम
घ।२।४२।१।१४।६ एते गुणकाराः एकीकृताः ८३ एष भागापहारः मूलदशावर्षाणि १६ अतः प्राग्वच्चतस्रोंतर्दशाः आनेतव्याः आनीताः ८।४।२।२ अस्याः अंत ५१
र्दशा चतुष्टयस्य योगः १६ जाता सैव मूलदशेति अथ दशापतिना सहैकस्मिन्राशौ कश्चिद्व्यवस्थितो अन्यो द्वयोश्चतुरस्रयोस्तत्र न्यासः १।१।१।२।१।४।१।४ एते परस्पर
छेदहता ३२।३२।१६।३२।८।३२।८।३२ छेदहीनाः ३२।१६।८।८ एते गुणकाराः एकीकृताः ६४ एषो भागहारः मूलदशा ३६।०।०।० अतः प्राग्वच्चतस्रोंतर्दशा १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

।६।४।४ अस्यांतर्दशात्रयस्ययोगः ३६।०।०।० जाताः सैवमूलदशेति अथयत्र द् शापतिनास्तहैकस्मिन्नाशोकश्चिद्यवस्थितोन्यश्चतुरस्रयोः ५६।२८।१४।८
मध्यादेकस्मिन्नान्यः सप्तमेतदान्यासः १।१।१।२।१।४।१।७ एतेपरस्परछेदहताः जाताछेदहीनाः ५६।२८।१४।८ एतेगुणकाराः एकीकृताः १०६ ए ५६।५६।५६।५६
षभागापहारः मूलदशा ३६।०।०।० अतः प्राग्वच्चतस्रोन्तर्दशाः १९।०।६।४८।९।६।३।२४।४८।१४।२।२।८।१८।६ अस्यांतर्दशाचतुष्टयस्ययोगः जाताः सैवमूलदशे
ति ३६।०।०।०।। अथयत्रत्रिकोणयोः द्वयोः कश्चिद्ग्रहः स्थिता चतुरस्रयोः मध्यादेकस्मिन्नत्रन्यासः १।१।१।१ एतेपरस्परछेदहताजाताः ३६।१२।१२।९ छेदहीनाः
३६।१२।१२।९ एतेगुणकाराः एकीकृताः ६९ एषभागापहारः मूलदशा २३।०।०।० अतः प्राग्वच्चतस्रो ।३।२।४ तर्दशाः १२।०।०।०।४।०।० ३६।३६।३६।३६ ४।४।०।०।०।३।०।०।
।०।० अस्यांतर्दशाचतुष्टयस्ययोगः जाताः २३।०।०।० सैवमूलदशेति अथयत्रदशापतेस्त्रिकोणयोः मध्यादेकस्मिन्स्थितः कश्चिदन्यो चतुरस्रयोश्चतदान्यासः १
।१।१।३।१।४।१।४ एतेपरस्परछेदहताजाताः ४८।४८।।१६।४८।।१२।४८।।१२।४८ छेदहीनाः ४८।१६।१२।१२ एतेगुणकाराः एकीकृताः ८८ एषभागोपहारः
मूलदशा २२।०।०।० अतः प्राग्वच्चतस्रोन्तर्दशाः १२।०।०।०।।४।०।०।०।।३।०।०।०।।३।०।०।० अस्यांतर्दशाचतुष्टयस्ययोगः जातासै २२।०।०।० वमूलदशेति
अथयत्रदशापतेस्त्रिकोणयोः मध्यादेकस्मिन्कश्चित्स्थितश्चतुरस्रयोरप्येकस्मिन्सप्तमेचकश्चित्स्थितः तत्रन्यासः १।१।।१।३।।१।४।।१।७।। एतेराशयः परस्परछेदहताः
जाताः ८४।८४।।२८।८४।।२१।८४।।१२।८४ छेदहीनाः ८४।२८।२१।१२ एतेगुणकाराः एकीकृताः १४५ एषभागापहारः मूलदशा अतः प्राग्वच्चतस्रोन्तर्दशाः २०।६ | ९।९ | ७।१ | ५।३८

| ५।१२ ।। | २।११ | १६।२२ | १८।३८ |

अस्यांतर्दशाचतुष्टयस्ययोगः ३६।०।०।० जातासैव ३६।०।०।० मूलदशेति अथयत्रदशापतेश्चतुरस्रयोः द्वयोरपिग्रहास्थितौ सप्तमेचान्यस्तत्रन्या
सः १।१।१।१ / १।४।४।७ एतेपरस्परछेदहताजाताः ११२।२८।२८।१६ / ११२।११२।११२।११२ छेदहीनाः ११२।२८।२८।१६ एतेगुणकाराः एकीकृताः १८४ एषभागापहारः मूलदशा ३६।०।०।०
अतः प्राग्वच्चतस्रोन्तर्दशाः २१।१०।२८।४२।५।५।२२।४१।५।५।२५।१३।१।१६।५७ अस्यांतर्दशाचतुष्टयस्ययोगः ३६ जातासैवमूलद
शेति एवंचतुर्विकल्पाः अथपंचविकल्पेषुन्यासादेवग्रहवत्स्थानंबोद्धव्यंन्यासः १।१।१।१।१ / १।२।३।३।४ छेदेनानेन २४ हताजाताः गुणकाराः २४।१२।८।८।६ भागापहारः ५८ न्यासः
छेदेनानेन ४२ गुणकाराः १।१।।१।२।।१।३।।१।३।।१।७।। ४२।२१।१४।१४।६ भागहारः १।१।१।१।१ / १।२।३।३।४ ९७ न्यासः १।१।१।१।१ / १।२।३।४।५ छेदेनानेन २५ गुणकाराः २५।१२।८।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृ. टी.अ. ५२

।६।६। भागापहारः ।५६॥ न्यासः [१।१।१।१।१।१ / १।२।४।५।७] छेदेनानेन ५६ गुणकाराः ५६।२८।२४।२४।८ भागापहारः १२१ न्यासः [१।१।१।१।१।१ / १।२।३।५।७] छेदेनानेन ८४ गुणकाराः ८४।४२।२८।२१।१२ भागापहारः १८७। न्यासः [१।१।१।१।१।१ / १।२।३।५।६] छेदेनानेन १४४ गुणकाराः १४४।४८।४८।३६।३६। भागापहारः ३१२ न्यासः ।। [१।१।१।१।१।१ / १।३।३।४।७] छेदेनानेन ८४ गुणकाराः ८४।२८।२८।२१।१२ भागापहारः १९९ एवं पंचविकल्पाः अथ षड्विकल्पाः न्यासः [१।१।१।१।१।१।१ / १।२।३।३।५।७] छेदेनानेन २५२ गुणकाराः २५२।१२६।८४।८४।६३।३६ भागापहारः ६४५ न्यासः [१।१।१।१।१।१।१ / १।२।३।३।५।७] छेदेनानेन १६८ गुणकाराः १६८।८४।५६।४२।४२।२४ भागापहारः ४३० न्यासः [१।१।१।१।१।१।१ / १।२।३।४।५।७] छेदेनानेन १६८ गुणकाराः १६८।८४।५६।४२।४२।२४ भागापहारः ४२६ न्यासः [१।१।१।१।१।१।१ / १।३।३।५।५।७] छेदेनानेन ८४ गुणकाराः ८४।२८।२८।२१।२१।१२ भागापहारः १९४ इति जाताः षड्विकल्पाः अथ सप्तविकल्पाः न्यासः [१।१।१।१।१।१।१।१ / १।२।३।३।५।५।७] छेदेनानेन १६८ गुणकाराः १६८।८४।५६।५६।४२।४२।२४ भागापहारः ४७२ एवं यावंतो दापहारा भवंति।

संम्याबलिनः स्वतुंगभागे संपूर्णा बलवर्जितस्य रिक्ता॥

तावदेव तत्कर्म्मउपपद्यते यावंतो न भवंति तावत्कर्म्म नोपपद्यत इति एकविकल्पो नास्ति द्विविकल्पाश्चत्वारः ४ त्रिविकल्पाः सप्त चतुर्विकल्पा नव ९ पंचविकल्पाः सप्त ७ षड्विकल्पाश्चत्वारः ४ सप्तविकल्प एकः १ एवं द्वात्रिंशद्विकल्पाः ३२ यत्र बहवः पाचका भवंति तत्र प्रथमं मूलदशापतिरेवान्तर्दशापाचको भवति तत्र तः परं यद्वदशाविभागः क्रमः स एवान्तर्दशाविभागक्रमः यस्यादौ दशापाचकत्वं तस्यैवान्तर्दशापाचकत्वं यस्य पश्चात्तस्य पश्चादिति दशाक्रमपाचिनो यस्यांतर्दशा राम ५२
पाचकत्वं न प्राप्तं तस्य न वक्तव्यं तदनंतरं यस्य प्राप्तं तस्यैव वक्तव्यं अत्रान्ये मूलदशापतेरंतर्दशां दत्वा ततः परं एकर्क्षगस्य ददति ततस्त्रिकोणगतस्य ततश्चतुरस्रगतस्य ततः सप्तमगस्य त्रिकोणचतुरस्रयोर्यदा ग्रहौ तदा तयोः बलाधिकस्तस्यादौ तच्चायुक्तं यस्माद्भगवान्गार्गिः आदावंतर्दशापाको भवत्येव दशापतेः ततः परं तु वक्तव्यं दशापाकक्रमेण तु एवं दशांतर्दशाविभागे ज्ञाते कस्य संबंधिनी दशांतर्दशा वा शुभफला भवति कस्याशुभफलेत्येतज्ज्ञायते तदर्थं दशा शुफलानुरूपाः संज्ञा वैतालीयेनाह ४ संम्यग्बलिन इति प्रसूतौ पुरुषस्य जन्मकाले यो ग्रहः सम्यग्बलवान्भवति पूर्वोक्तैः बलैः सर्वैः युक्तो भवति तत्संबंधिनी संपूर्णानाम्नी दशा भवति॥

CC-0. In Public Domain. Digitization by eGangotri

नके वलेयावत्स्वतुंगभागेऽवस्थितस्यपरमोच्चः भागगतस्यैवसंपूर्णानाम्नीदशाभवति सम्यग्वलिनइत्युक्तापुनः स्वतुंगभागइत्यनेनैतज्ज्ञापयति यथापरमोच्चग
तोग्रहोन्यैः बलकारणैः युक्तोनभवतितथापितस्यसंबंधिनीसंपूर्णैवसंपूर्णायांदशायामंतर्दशायांचकालेशरीरारोग्यधनवृद्धिभिः पुरुषोऽभिवर्द्धते अथसमस्त
बलैःयुक्तोनभवतिकिंचिदूनबलस्यभागेयोग्रहोगतःस्थितोभवतियश्चशत्रुभागेशत्रुनवांशेचस्थितस्तस्यदशानिष्टफलात्तेयाज्ञातव्या अनिष्टफलादशांतर्द
शाकालेधनहानिमनारोग्यंचप्राप्नोति अत्रचभावानार्गिः सर्वैःबलेरुपेतस्यपरमोच्चगतस्यचसंपूर्णाख्यादशात्तेयाधनारोग्यविवर्द्धिनी सर्वैर्बलैर्विहीनस्य
नीचराशिगतस्यच रिक्तानामदशात्तेयाधनारोग्यविनाशिनी स्वोच्चराशिगतस्याथकिंचिद्बलगतस्यच पूर्णानामदशात्तेयाधनवृद्धिकरीशुभा यःस्यात्परमनीच
स्थस्तथाचारिनवांशके तस्यानिष्टफलानामव्याध्यमर्थविवर्द्धिनी अथदशांतर्दशासंज्ञापुनरपीन्द्रवज्रयाह ५ भ्रष्टस्येति तुंगात्परमोच्चाद्भ्रष्टस्यच्युतस्यावरोहि
संज्ञादशापरमोच्चभागांतादारभ्ययावत्परमनीचभागादित्यंतरेयद्राशिषट्कंतत्रावस्थितेनग्रहेणयादत्तादशांतर्दशावासावरोहिणीसंज्ञाभवति यस्मात्परमोच्चाद्भ्रष्टः

नीचांशगतस्यशत्रुभागेज्ञेयानिष्टफलादशाप्रसूतौ ५ भ्रष्टस्यतुंगादवरोहिसंज्ञामध्याभवेत्सासुहृदुच्चभागे॥ ॥ ६ ॥ ॥

प्रत्यहमधोवत्मतीतिविकल्प्यतेयावत्परमनीचमिति अवरोहिसंज्ञादशाऽधमफलाभवति यस्माद्दृश्यति संज्ञानुरूपाणिफलान्यर्थेषामिति मध्याभवेत्सासुह
च्चभागइतिसेवारोहिणीयत्रतत्रराशौव्यवस्थितेनसुहृद्भागेनमित्रांशकस्थेनदत्तादशामध्यानाम्नेवभवति एवंयत्रतत्रराशौअर्थादेवस्वांशकस्थेनदशामध्यैव॥
एवयत्रतत्रराशौस्वोच्चनवांशकस्थेनदशामध्यैव आरोहिणीति निम्नान्नीचात्परिच्युतस्यचलितस्यग्रहस्यारोहिणीनाम्नीदशाभवति परमनीचांतभागादारभ्य
यावत्परमोच्चभागादित्यंतरेयद्राशिषट्कंतत्रावस्थितेनग्रहेणयादत्तादशांतर्दशावासारोहिणीनाम्नीदशाभवति यस्मात्परमनीचाद्भ्रष्टःप्रत्यहंतावदारोहिणीति
ग्रहःपरिपरिकल्प्यते यावत्परमोच्चमिति आरोहिणीचश्रेष्ठफलाभवतिनीचारिभांशइतिसेवारोहिणीयत्रतत्रराशौस्वनीचराश्यंशोपगतेनदत्ताधमानाम्नीदशा
भवति एवंयत्रतत्रराशावरिभांशक स्थेनशत्रुनवांशकस्थेनदत्ताऽधमैवदशाभवति पूर्वंशत्रुनवांशकस्थेनदत्तानिष्टफलेत्युक्तमधुनासैवाधमेति तत्किमेत
दित्यत्रोच्यते अवरोहिणीशत्रुनवांशकस्थेनदत्तापिअनिष्टफलात्तेया आरोहिण्यधमा अनयोः कः फलभेदः अत्रोच्यते॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनिष्टफलाफलमशुभंप्रयच्छति अधमाशुभमेवाल्पमिति एवमवरोहिणीसंज्ञायदाधमसंज्ञाभवतितदासैवानिष्टफलसंज्ञांलभतेआरोहिणीयदामध्यसंज्ञाभव
तितदासैवपूर्णेतिसंज्ञाज्ञेया अत्रचभगवान्गार्गिः उच्चनीचांतरस्थस्यदशास्यादवरोहिणी तस्यामल्पमवाप्नोतिफलंक्लेशान्मुभंतरः मित्रोचात्स्वांशकस्थस्यम
ध्यामध्यफलानुसा नीचोच्चमध्यगस्योक्ताश्रेष्टाचारोहिणीदशा सैवाधमाख्याभवतिनीचराश्यंशगस्यतु अवरोहिणीचेदधमाभवेदुष्टफलातदा आरोहि
णीमध्यफलासंपूर्णापरिकीर्त्तितेति अथदशांतर्दशासंज्ञापुनरप्युपजातिकयाह ६ नीचाइति शस्तानिगृहाणिस्वोच्चमूलत्रिकोणात्मक्षेत्रमित्रक्षेत्राणितेषु
ष्ववस्थितेननीचराश्यंशकेरिभांशेशत्रुनवांशकेसमवस्थितेनवाग्रहेणयादत्तादशांतर्दशावासामिश्रफलानाम्न्येवमिश्रफलाशुभमशुभंचफलंप्रयच्छति व्या
धिसमेतमर्थागममेवमादिशेत् अर्थादेवाशस्तराशिगेन अशस्ताशत्रुनीचराशयः ततेथनस्वोच्चमित्रमूलत्रिकोणात्मवर्गोत्तमनवांशकस्थेनापिदत्तामिश्रफले
वभवति संज्ञानुरूपाणिनामसदृशानामानिफलानिदशास्वांतर्दशासुचतत्त्यानि तद्यथा संपूर्णात्यंतश्रेष्टफलप्रदापूर्णाश्रेष्टफलदाऽधमाऽशुभः अल्पफल
आरोहिणीनिम्नपरिच्युतस्यनीचारिभागेष्वधमाभवेत्सा ६ नीचारिभांशेसमवस्थितस्यशस्तेगृहेमिश्रफलाप्रदिष्टा संज्ञानुरूपाणिफला
न्यथैषांदशासुवक्ष्यामियथोपयोगं ७ उभयेधममध्यपूजितात्द्रेष्काणेश्चरभेषुचोत्क्रमात् अशुभेष्टसमाःस्थिरेक्रमाद्धोरायाःपरिकल्पिता
दारिक्तार्थोपहारिणी अनिष्टफलदात्यंतमशुभफलकारी मिश्रफलाशुभमशुभंचफलंप्रयच्छति अथैषांदशास्विति अथशब्दः आनंतर्य्ये एषाऽऽदशा ८
मादित्यपूर्वाणांग्रहाणांदशासुयथोपयोगंउत्तरत्रवक्ष्यामि यथायेनप्रकारेणैवयुज्यतेतथातत्कथयिष्यामि कस्यामंतर्दशायांकिंफलमुपयुज्यतइति अथल
ग्नदशायांशुभाशुभज्ञानंवैतालीयेनाह ७ उभयेति उभयेद्विस्वभावेराशौलग्नगतेद्रेष्काणक्रमेणाधममध्यपूजितादशाज्ञेयाः प्रथमद्रेष्काणेजातस्याधमाऽ
[illegible]भनाऽनिष्टफला द्वितीयेद्रेष्काणेमध्यमामिश्रफला तृतीयेद्रेष्काणेपूजिताश्रेष्टफला चरेभचरराशावुत्क्रमेण वैपरीत्येनतेनप्रथमद्रेष्काणेजातस्यपूजिता
द्वितीयमध्यमा तृतीयेऽधमाऽनिष्टफला अशुभेष्टसमाःस्थिरेक्रमादिति स्थिरेस्थिरराशौप्रथमद्रेष्काणेऽशुभाद्वितीयेद्रेष्काणेइष्टाश्रेष्टा तृतीयेद्रेष्काणेसमा ५३
मध्यफला एवंहोरायाःलग्नस्यदशाःपरिकल्पिताउक्ताइति अथनैसर्गिकदशाकालंग्रहाणांशार्दूलविक्रीडितेनाह ८ ॥ ।;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकमिति एकाद्याः समाः एकादीनि वर्षाणि चंद्रादीनां यथाभिहितानि नैसर्गिकानि तद्यथा जन्मसमयादारभ्यैकं समाः संवत्सराः एकश्चंद्रस्य ततः परं द्वावारस्यांगा
रकस्य एवं त्रयः ततः परं नवेंदुजस्य बुधस्य एवं द्वादश ततः परं विंशतिः शुक्रस्य एवं द्वात्रिंशत् ततः परं धृतयोऽष्टादश जीवस्य गुरोः एवं पंचाशत् ततः परं कृतिसं
ख्या विंशतिर्दिनकृतः सूर्यस्य एवं सप्ततिः ततः परं पंचाशत् दिवाकरस्य सौरस्य एवं विंशत्यधिकं वर्षशतं १२० एतेषु निसर्गदशाधिपेषु ग्रहेषु बलवत्सूपचयस्थितेषु
च तद्दशासु शोभनानि दशाफलानि भवंति हीनबलेष्वनुपचयस्थेष्वशोभनानि एतच्च सर्वथा चिंत्यं यतो निसर्गदशास्तिति संवाद इति तथा च यवनेश्वरः स्तनोपभोगः
शशिनो वयः स्वं भौमस्य विद्याहरणानुजन्म बौधं तु शिक्षापदकालमाहुरमैथुनेच्छालुलितप्रवृत्तिं शौक्रं युवत्वं विधुपूर्वदृष्टमामध्यमादेवगुरोर्वदंति रवेर्वयो ह्यान्यर
मन्यमस्मात्सौरेर्ज्जराडुभंगकालमाहुरिति नैसर्गिकस्य दशाकालस्य प्रयोजनमाह स्वैः स्वैरिति तत्र यस्य ग्रहस्य संबंधिनी पूर्वविधिना कृता दशांतर्दशा वा सा यदि नैस
र्गिकसमाभिः निसर्गकथितवर्षैः स्वैः स्वैः आत्मीयैः युज्यते स्वदशाकालेन समकालं भवति तदा यावत्कालं तस्य दशाद्वयस्यैक्यं भवति तावत्कालं तस्य दशांतर्दशा
वापदा भवति तस्याः पुष्टा परिपूर्णा फलपंक्तिः पाको भवति क्रमात्परिपाद्या यावद्वर्त्तते तावच्छुभफलेत्यर्थः अत्र केचिद्वदंति यथा पूर्वविधिना ज्ञाता शुभा तदा
शुभफलमत्यर्थं प्रयच्छत्यन्यथाशुभा तदाशुभमत्यर्थमिति एतच्चायुक्तं यस्माद्यवनेश्वरः अष्टादशास्वेव यसि ग्रहस्येति तथा च सत्यः एकाब्दिकः शशी त्र्यब्दिकः
कुजो द्वादशाब्दिकः सौम्यः द्वात्रिंशद्भृगुपुत्रो गुरुस्तु कथितः शतस्यार्द्धं ५० सप्तत्यब्दः सूर्यो विंशत्यधिकः शनैश्चरोऽब्दशतः वयसोंतराणि चैषां स्वदशा नैसर्गि
कः कालः स्वं स्वं वयसः सदृशं ग्रहाः समासाद्य देहिनां कालं भक्षणपोषणचेष्टास्वभावदास्तुः यथासंख्यं अथ लग्नदशा नैसर्गिककालं पुराणयवनमतेनाह
अन्ते लग्नदशा इति विंशत्यधिकाद्वर्षशतादूर्द्ध्वं यदि कस्यचिदायुषः कालो भवति तदा स कालः सर्व एव लग्नस्य नैसर्गिको दशाकालो भवति तस्मिन्काले पुरा
णयवनानां मतेन लग्नदशा शोभना भवति विंशत्यधिकाद्वर्षशतादूर्द्ध्वमित्येतत्तु नोपगम्यते उच्यते तदर्वाक्कालस्यान्यग्रहपरिगृहीतत्वात् लग्नस्यानवका
शादेव अथान्यः कश्चिदाह यथा न तु विंशत्यधिकाद्वर्षशतादधिकं यस्यायुः नास्ति किं तस्य लग्ननैसर्गिको दशाकालो नास्ति उच्यते नास्त्येव न केवलं या
वद्वर्षसप्ततेरभ्यधिकं नास्ति यस्यायुर्नास्ति तस्य शनैश्चरसंबंधिनी नैसर्गिको दशाकालो नास्ति यस्य पंचाशतोधिकं नास्ति तस्यादित्यस्य क्रमपि नास्ति ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमन्येषामपियोज्यं ननुविंशत्यधिकंवर्षशतंपरमायुरतऊर्द्ध्वंजीवितानभावात्कोलग्नस्यनैसर्गिकादशाकालः उच्यते पूर्वमेवव्याख्यातं यथाविंशत्यधिकं
वर्षशतंपरमायुस्त्रैराशिकार्थमश्वादीनामायुःज्ञानार्थप्रदर्शितं यतस्तावत्प्रमाणादायुषः परंसंभवतीति तथाच यदामीनलग्नेबलवतिमीनांशकांतेच
कश्चिज्जातोभवतिसर्वेचग्रहाःयत्रतत्रराशौमीनांशकावस्थिताभवंति केचिदुच्चगताः केचिद्वक्रितास्तदामीनलग्नोद्वादशवर्षाणिददाति सएवबलयुत
स्तदान्यानिद्वादशवर्षाणिग्रहश्चैकोमीनांशकांतस्थत्वाद्द्वादशवर्षाणिददाति तानिचवक्रोच्चस्थत्वात्त्रिगुणानिषट्त्रिंशद्भवंति आदित्यवर्ज्जं आदित्यस्यमे
षेधन्वंशकेस्थितस्यसप्तविंशतिवर्षाणिभवंति एवंचंद्रादीनांषण्मांशतद्वयंषोडशाधिकंभवति आदित्यस्यसप्तविंशतिःलग्नस्यचतुर्विंशतिः एवमेकीकृतंश
तद्वयंसप्तषष्ट्याधिकंभवतिनन्वेतावत्प्रमाणंकालंकश्चिज्जीवमानोनदृश्यतेः योगस्यातिदुर्लभत्वात् उच्यते कश्चिद्दृश्यतएवजंत्वादिकः नेच्छंतिकेचित्त
या तांलग्नदशामंतेकेचिदाचार्य्याःश्रुतिकीर्त्तिप्रभृतयः तथानेनैवप्रकारेणशुभामितिनेच्छंतिनोवांछंतीत्यर्थः यस्मादबलत्वेलग्नस्यवयांतेतद्दशाभवति

एकंद्वौनवविंशतिर्धृतिकृती पंचाशदेषांक्रमाच्चंद्रारेंदुजशुक्रजीवदिनकृद्दैवाकरीणांसमाः स्वैःस्वैःपुष्टफलानिसर्गजनितैःपंक्तिर्द्दशायाः
क्रमादंतेलग्नदशाशुभेतियवनानेच्छंतिकेचित्तथा ८ पाकःस्वामिनिलग्नगेसुहृदिवावर्गेस्यसौम्येपिवाप्रारब्धाशुभदादशात्रिदशषड्ला

साशुभा आचार्य्येणलग्नदशायांशुभाशुभत्वंबलवशान्नोक्तंद्रेष्काणवशादुक्तं उभयेऽधममध्यपूजिताइति यस्माद्बलहीन(ऽऽभेषुवापाकपे॥ ९ ॥
स्यापिलग्नस्यवयांतेदशाद्रेष्काणवशाच्छुभाभवति तस्मात्येआचार्य्याअंतेलग्नदशांनेच्छंतितेनिष्कारणमेवनेच्छंति ननुकिमागमग्रंथानांकारणेन उच्यते यएवा
चार्य्याअंतेलग्नदशानेच्छंति तएवागमान्यत्वायथादर्शितकारणमुपन्यस्यनेच्छंति तेनकारणेननदोषउक्तः तथाचश्रुतिकीर्त्तिः अंतेलग्नदशाशुभेतियवनानेत
[illegible]तांमतंतस्मिन्हीनबलेयतोन्यसमयेसाम्यादतोनेष्यते एतच्छ्रुतकीर्त्तिनाकारणमुपन्यस्तंतच्चदुष्टमतेनैसर्गिकेलग्नदशाकालेतद्दशाशुभेत्यवगंतव्यं अ
थदशांतर्दशाशुभाशुभज्ञानंशार्दूलविक्रीडितेनाह ९ पाक स्वामीति सौरसावनचांद्रनाक्षत्राणिचत्वारिमानानि तत्रसौरमानं रविभगणभोगःयावत्तात्का
लेनार्कोभामेकंभुंक्तेतत्सौरंदिनं यावत्तात्कालेनराशिद्वादशकंभुंक्तेतत्सौरंवर्षं तच्चपंचषष्ट्याधिकैस्त्रिभिःशतैःदिनानांघटिकापंचदशकेनसार्द्धेनचभवति"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सावनमुदयादुदयः अर्कोदयात्पुनरेवार्कोदयः सावनमहोरात्रं तच्च षष्टिघटिकामहोरात्रं अहोरात्रैस्त्रिंशन्मासः मासैर्द्वादशवर्षं एवं षष्ट्यधिकैस्त्रिभिः शतैः दिनानां
सावनं वर्षं चांद्रं तिथिभोगः तच्च स्वमानेन षष्ट्यधिकं शतत्रयं भवति सावनेनायं मानं शतत्रयं चतुःपंचाशदधिकं दिनानां तच्च वर्षं भवति एवं सौरसावनचांद्राणि त्री
णि मानानि प्रत्येकं स्वमानेन षष्ट्यधिकं शतत्रयं भवति नाक्षत्रं चंद्रनक्षत्रभोगः तच्च दिनानां सप्तविंशत्या मासो भवति तत्र शतत्रयेण चतुर्विंशत्यधिकेन दिनानां वर्षं
उक्तं च रव्यंशभोगोऽहोरात्रः सौरश्चांद्रमसस्तिथिः चंद्रनक्षत्रभोगस्तु नाक्षत्रः परिकीर्त्तितः खसावनो ग्रहर्क्षाणामुदयादुदयावधि नक्षत्रमानेमासः स्यात्सप्ता
विंशतिवासरः शेषमानेषु निर्दिष्टो मासस्त्रिंशद्दिनात्मक इति तस्मात्सावनमानेनायुर्द्दायगणनाकार्या यस्माच्छोध्यक्षेपविशुद्धमायुः कर्त्तव्यं तच्च सावनमानं सौर
मानेन संक्रांत्यवधिर्मासः सावनस्त्रिंशद्रात्रः चांद्रो मावास्यांतिकः नाक्षत्रो रेवत्यंतिकः सौरमधिमासकयुतं चांद्रं भवति चांद्रमवमरात्रोनं सावनं भवति चांद्रं
सान्नाक्षत्रं उक्तं च युगवर्षमासपिंडं रविमानं साधिमासकचांद्रं अवमविहीनं सावनमैंदवमब्दान्वितं वर्षमिति एवं शोध्यक्षेपविशुद्धं सावनमानेनायुर्द्दाय

मित्रोच्चोपचयस्त्रिकोणमदने पाकेश्वरस्य स्थितश्चंद्रः सत्फलबोधनानि कुरुते पापानि चातोन्यथा १०॥ ६ ॥

विधि तथा च मयूरचित्रके भगवान्गार्गिः आयुर्द्दायविभागश्च प्रायश्चित्तक्रियास्तथा सावनेनैव कर्त्तव्याः सत्राणामप्युपासनं तत्वर्कोदयादारभ्यार्कोदयावधिर्यावद
होरात्रं तत्पुलिशतंत्रे सौरमहोरात्रं पठ्यते अष्टाक्षिवसुसप्तमरूपनवमुनिनगतिथयः शतगुणाश्च सौरेणेति एतच्च पुलिश एव जानाति यस्मात्पुलिशतंत्रं वर्ज्ययि
त्वा सर्वसिद्धांतेषु तंत्रेषु सौरमानेन रविभगणभोगः सौरमानमधिमासयुक्तं चांद्रं भवति चांद्रमवमरात्रोनं सावनं भवति एवं शोध्यक्षेपविशुद्धं सावनमानं सर्वसं
हितासु चार्कोदयादारभ्यार्कोदयं यावद्यदहोरात्रं तत्सावनमहोरात्रमिति संज्ञा तथा च भगवान्पराशरः सावनमहोरात्रं गार्गिश्च सावनेन स्मृतो मासस्त्रिंशदु
त्मकरोदयः तथा च श्रीभट्टब्रह्मगुप्तः सावनमुदयादुदयं इति एवं पुरुषस्य जन्मसमये सावनमहर्गणं कृत्वा तस्मात्तिथिनक्षत्रपरिच्छेदलात्कालिकाग्रहाः सलग्नाय
थाकृतास्तथा दशांतर्दशावसाने कर्त्तव्याः तत्रागामिदशाफलं वक्तव्यं कथमुच्यते प्रथमं जन्मनि अहोरात्रात्तात्कालिकं कृत्वा तत्र नक्षत्रांत दशाकालं व
र्षादिकं दिनाकृत्य योजयेत् वर्षाणि द्वादशभिः संगुण्य तेषु मासान् संयोज्य त्रिंशता पुनः संगुण्य तेषु दिनानि क्षिपेत् एवं कृते दशाकालो दिनरूपो भवति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दै नत्त्वतात्कालिकेजन्माहर्गणेसविकलेसविकलंसंयोज्याहर्गणोभवति तत्राद्योयद्घटिकादिःकालोभवति तस्यातीनाड्राशात्परतोगणनाकार्य्या तस्माद्दिष्टदिन
टी·भ· मानमानयेदनेनाचौर्य्यसूर्य्येण द्युगणोधोभवगुणितोद्विनवरसाप्ताधिकश्चाद्रःचांद्रोधरुद्रतुवेदागाप्ताधिमासदिनैःहीनाइति अथवसुगुणस्त्रिखमुनिगु
५५· णितोद्विनवखरसाप्तंपृथग्पसखदिग्भिः लब्धखरामगुणितंशुद्धाप्तांत्सैककोरविद्युगणः एतत्तवेङखद्यकाणेनैवभवति कोसौरविद्युगणइत्याह शाकोऽग
वसुशरानोर्कगुणःचैत्रादिमासयुक्तस्त्रिंशद्गुणस्तिथियुतइति अस्यषष्ट्यधिकेनशतत्रयेणभागमपहृत्याप्तंकरणाब्दाःशेषास्त्रिंशद्भक्ताश्चैत्रसिताद्यामासाः
शेषावर्त्तमानमासेसिताद्यास्तिथयःकरणाब्देष्वगवसुशरास्संयोज्यातीतशाककालोभवति तस्मिन्शाकेतस्मिन्मासेतस्मिन्दिनेसोऽहर्गणइतितत्रैवदशाप्रवेशः पु
नरप्यन्यमंतर्दशाकालंदिनीकृत्यतस्मिन्योजयेत् एवंयावंत्योंतर्दशाभवंतितावंत्योऽनेनैवप्रकारेणयोजनीयाः एवंततोग्रहान्लग्नंचगणयेत् अथवानेनप्रका
रेणकालानयनं आदित्येक्रियमाणेयावंतोगतभगणाभवंतितावंतःकरणप्रारंभादारभ्यगताब्दाःतेषुकरणप्रणीतंशाककालंसंयोज्यस्पष्टशाककालोभवति व
र्त्तमानेवर्षेयावंतोराशयःस्फुटार्केभवंतितावंतोमासाःसूर्य्यभगणानीतात् शुक्लपक्षंकृष्णपक्षंवातिथिनक्षत्रं चाद्यार्काभ्यांज्ञायतएवपाकस्वामिनीत्यादि यस्य
ग्रहस्यांतर्दशाप्रवेशःसपाकस्वामीनावश्यासौपाकस्वामीयावत्तस्यांतर्दशामेवसचपाकस्वाम्यंतर्दशाप्रवेशेलग्नगोयदिभवतितदातस्यसंबंधिन्यंतर्दशाप्रारब्धा
शुभदाशोभनफलदाभवति अथवातात्कालंपाकस्वामिनोपत्सुहृन्मित्रंतस्मिन्नपिदशाप्रवेशकालेलग्नगेशोभनादशावक्तव्या अथवास्यदशापतेःपूर्व्वेर्व्याख्या
तोयोवर्गःतस्मिन्नपिलग्नगेशोभना अथवान्यस्मिन्सौम्येशुभग्रहेतत्काललग्नगेदशाप्रारब्धाशोभनैव अथवापाकपेदशाधिपतौग्रहेतात्कालिकलग्नात्त्रिद
शमुद्गाभेषु तृतीयषट्दशमैकादशस्थानानामन्यतमस्थेशोभनैवदशावक्तव्या यद्यप्यत्रसामान्येनोक्तंप्रारब्धाशुभदादशा तथापि शत्रुरधिशत्रोःदशांप्राप्नोदु ए·भ·
ष्टानिष्टफलप्रदः अधिमित्रोपिमित्रस्यदशांप्राप्तोऽतिशोभनःसमःसमदशामेत्ययथोक्तफलदोहिसः एतदपिचिंतनीयं अनेनप्रकारेणयदिशुभफलांतर्दशाभव ५५
तितदाशुभैव अन्यथाऽशुभैव अथशुभफलायामंतर्दशायांकिमप्यनवरतमेवसर्व्वकालंशुभफलावाप्तिर्भवति किंवाकस्मिंश्चित्कस्मिंश्चिद्दिवसे एवमशुभाया
मंतर्दशायामशुभफलावाप्तिरित्युभयत्रसंदेहव्युदासार्थमाह मित्रोच्चोपचयेत्यादि पाकेश्वरस्यदशापतेःप्रतिराशौसंचरतस्तत्कालेयोग्रहोमित्रंतत्स्वोच्चस्थितश्चंद्रमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदाभवतितदासत्फलबोधनानिकुरुते नकेवलंयावत्पाकपतेरुपचयस्थानगतोपित्रिषडेकादशमस्थानानामन्यतमस्थानस्थस्त्रिकोणगोपिनवपंचमस्थानगतोपि तयामदनस्थासप्तमेचस्थितःएतेषुनिर्दिष्टस्थानेष्वन्यतमस्थानस्थश्चंद्रमाःशुभफलायांदशायांसत्फलबोधनानिकुरुते नत्वायतेतेषांफलानामित्यत्रोच्यते मित्रोच्चोपचयत्रिकोणमदनेयस्मिन्स्थानेपाकेश्वरस्यचंद्रमाःस्थितःसराशिःजन्मनियोभावश्चासीत्तदुद्भूतंसत्फलंबोधयति विशेषेणतथादशापठितमपि अतोस्मादुक्तप्रकारादन्यप्यास्यःपाकपतेस्तत्कालशत्रुगृहेनीचराशौवादशापतिनासहैकराशौद्वितीयचतुर्थाष्टमद्वादशस्थानानामन्यतमस्थानस्थोभवतितदाशुभफलायांदशायांपापानिफलानिप्रकटीकरोति सचराशिर्योभावश्चासीत्तदुद्भूतंफलंबोधयति विशेषेणदशापठितमपि अनिष्टमप्यष्टकवर्गोद्भूतंचमिश्रदशायांमित्रोच्चोपचयादिषुसत्फलबोधनानिकुरुते शत्रुनीचादिष्वशुभफलानामिति तथाचभगवानार्गिः यद्राशिसंस्थःशीतांशुःशुभकृत्परिकीर्तितःसराशिर्जन्मकालेतुयोभावस्तत्कृतंचतत शरीरादिकृतंसौख्यंवक्तव्यंबलयोगतः अनिष्टराशिसंस्थस्तुतद्भावानामशोभनइति अथांतर्दशाकालेचंद्राक्रांतराशिवशेनशुभज्ञानंशार्दूलविक्रीडितेनाह १० प्रा

प्रारब्धाहिमगोर्दशास्वगृहगेमानार्थसौख्यावहा कौजेदूषयतिस्त्रियंबुधगृहेविद्यासुहृद्वित्तदा दुर्गारण्यपथालयेकृषिकरीसिंहेसितर्क्षेन्नदाकुस्त्री
दामृगकुंभयोर्गुरुगृहेमानार्थसौख्यावहा ११॥

प्रारब्धाहिमगोरिति यस्यतस्यग्रहस्यांतर्दशाप्रवेशसमये हिमगौचंद्रेस्वगृहगेआत्मीयक्षेत्रस्थेकर्कटगेप्रारब्धाप्रविष्टातदासौख्यार्थमानावहाभवतीति सौख्यं सुखभावः अर्थोधनंमानं पूजामावहतिकरोति कौजे भौमक्षेत्रेमेषवृश्चिकयोरन्यतमेव्यवस्थितेचंद्रेप्रवृत्तांतर्दशास्त्रियंदूषयति परपुरुषकृतंस्त्रीदोषमुत्पादयति बुधगृहे मिथुनकन्ययोरन्यतमस्थेचंद्रेप्रवृत्तांतर्दशा विद्यासुहृद्वित्तदा विद्याशास्त्रानुरतिःसुहृदोमित्राणि वित्तंधनंददाति सिंहस्थेचंद्रेदुर्गेघरण्येषुपथिचमार्गेआलयेचगृहसमीपेएतेषुस्थलेषुकृषिंकरोति सितर्क्षेशुक्रराशौ वृषतुलयोरन्यतमस्थेचंद्रेःन्नदा मिष्टभोज्यप्रदाभवति मृगकुंभयोः मकरघटयोरन्यतमस्थेचंद्रेप्रवृत्तांतर्दशाकुस्त्रीदा कुत्सितांस्त्रियंददाति गुरुगृहे जीवक्षेत्रे धन्विमीनयोरन्यतमस्थचंद्रेप्रवृत्तांतर्दशामानार्थसौख्यावहा मानंपूजा अर्थोधनं सौख्यंसुखभावः एतान्यावहतिददाति एवंशुभदशाशुभकालप्रवृत्ताशुभतराभवति एवंशुभाशुभकालप्रवृत्तामध्या अशुभाशुभकालप्रवृत्तामध्या अशुभाशुभकालप्रवृत्ताअशुभतराःमध्याशुभकालप्रवृत्ताशोभनामध्या अशुभकालप्रवृत्ताअशोभना एवंशुभाशुभत्वकरणानियान्युक्तानितान्विख्यातांतर्दशानांशुभाशुभत्वादिमिश्रफलत्वंपरिकल्पनीयमिति अथार्कदशायांशुभाशुभफलप्रदर्शनंशार्दूलविक्रीडितेनाह ११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौर्य्योमिति सूर्य्यस्येयंदशासौरीतस्यांदशायामतर्द्दशायांवानखदंतचर्म्मकनकक्रौर्य्याध्वभूपाहवैः कारणभूतैः स्वंधनंप्राप्नोति नखसुगंधद्रव्यंप्राणिकरजं
वा दंतोहस्तिदंतादिः चर्म्मव्याघ्रादीनां कनकंसुवर्णं क्रौर्य्यंक्रूरता अध्वामार्गः भूपोराजा आहवःसंग्रामः एतैःधनंप्राप्नोति तैक्ष्ण्यंउग्रस्वभावता धैर्य्यंशु
भाशुभफलप्राप्तौहर्षविषादैरनभिभवः अजस्रमनवरतं उद्यमरतिःउत्थानपरत्वं ख्यातिःकीर्त्तिः प्रतापोन्नतिःप्रतापेनाशौर्य्येणोन्नतिः शत्रुणामंन्यशत्रु
निग्रहजनिताभीतिः एतान्यादित्यशुभदशायांपुरुषस्यभवंति अथशुभअशुभदशायांभार्य्यापुत्रेति भार्य्याजायापुत्राःसुताः धनंवित्तं अरिःशत्रुः शस्त्रमायुधादि
हुतभुगग्निः भूपोराजाएभ्यउद्भूताउत्पन्नाव्यापदोविशेषेणापदोदरिद्रताभवंति त्यागीत्यागशीलताभवति शुभदशायांशुभस्थानत्यागी अशुभदशाचाशुभ
त्वादशुभस्थानेत्यागीभवति पापरतिः पापाशक्तश्चभवति स्वभृत्यकलहः आत्मीयैःभृत्यैःसहकलहोभवति हृत्क्रोडपीडनंभवतः हृत्हृदयंक्रोडंउदरं
हृदयोदरपीडा आमयाःरोगाश्चास्यभवंति मिश्रायामुभयमपि इतिसूर्य्यदशांतर्द्दशाभवंति मिश्रायामुभयमपिसूर्य्यदशांतर्द्दशाफलं अथचंद्रदशायांशुभाशुभ

सौर्य्यांस्वंनखदन्तचर्म्मकनकक्रौर्य्याध्वभूपाहवैस्तैक्ष्ण्यंधैर्य्यमजस्रमुद्यमरतिःख्यातिःप्रतापोन्नतिः भार्य्यापुत्रधनारिशस्त्रहुतभु
ग्भूपोद्भवाव्यापदस्त्यागीपापरतिःस्वभृत्यकलहोहृत्क्रोडपीडामयाः १२ इंदोःप्राप्यदशांफलानिलभतेमंत्रद्विजात्युद्भवानीक्षु
क्षीरविकारवस्त्रकुसुमंक्रीडातिलान्नश्रमैः॥

॥फलंशार्द्दूलविक्रीडितेनाह १२ इंदोरिति इंदोःचंद्रमसोदशांवयोवस्थांदशाप्राप्यलब्ध्वामंत्रद्विजा
त्युद्भवानिफलानिलभते मंत्राश्चैववैश्वदिचाणाक्यविहितोवावैदिकोवा द्विजातयोब्राह्मणाःएभ्याउद्भूतानिउत्पन्नानि नकेवलंयावदिक्षुविकारगुडादिका
न्क्षीरविकारदध्यादिकाद्वस्त्रेभ्योंबरेभ्यः कुसुमेभ्यःपुष्पेभ्यः क्रीडायाःक्रीडाभ्यः तिलेभ्यःअन्नात् श्रमाच्चव्यायामात् एतैःशुभदशायांशुभानिफलानि
प्राप्नोति अथाशुभायामशुभदशायांनिद्रालस्यमृदुद्विजामररतिरिति निद्रायांआलस्येचातिराशक्तिर्भवति मृदुःद्विजामररतिःभवति मृदुःक्षमावान्
द्विजानांब्राह्मणानाममराणांदेवानांचारा धनेरतिराशक्तिर्भवति स्त्रीजन्मकंन्याप्रसूतिः मेधावितावुद्धिवृद्धिः कीर्त्तिःयशसः अर्थानांधनानामुपचयक्षयो
शुभदशायामुपचयोप्राप्तिरशुभायांक्षयःनाशः अशुभायांवलवृद्धिः वीर्य्यवृद्धिः स्वपक्षेणात्मीयबंधुवर्गेणचसहवैरंभवति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिश्रायामुभयमपि इतिचंद्रदशांतर्दशाफलं अथभौमदशायांशुभाशुभफलंशार्दूलविक्रीडितेनाह १३ भौमेति भौमस्य क्षितिजस्यदशायां कैः धनंभवति अरिविमर्द्देनेन शत्रुप्रमथनेन भूपोराजासहजाःभ्रातरः क्षितिः भूः आविकजैः उर्णविकारसंभूतैः अजैः छागसंभूतैः एतैः अरिविमर्द्दादिभिः धनंप्राप्नोति एतच्छुभदशायां अथाशुभायांदशायांसुताःपुत्राः मित्राणिसुहृदः दाराकलत्रं सहजाःभ्रातरः एतैःसहप्रद्वेषःवैरं विद्वद्भिःपंडितैःगुरुभिः गौरवसहितैश्च सहवेष्टिताअप्रीतिः तृष्णातृट्पिपासा असृक्शुधिरजं ज्वरः प्रसिद्धोरोगः भंगश्चयवादेःस्फोटनं पित्तंधातुप्रसिद्धं एतैःजनिताउत्पादितारोगाभवंति परस्त्रीणामिष्टतावाल्लभ्यं अन्येरोगाःपरस्त्रीकृताइतिपठंति परस्त्रीकृतारोगाः अन्यस्त्रीप्रसंगेनप्रहारादिकाः अतिप्रसंगाद्धातुक्षयकृतावा अथवानकृतमूलकर्मोद्भवाभवंति तथापापरतैः अघरक्तैः सहप्रीतिर्भवति अधर्मेनिरतिः आसक्तिःभवतियारुष्यं वचनपरुषताकर्कशता तैक्ष्ण्यंउग्रस्वभावता मिश्राया

निद्रालस्यमृदुद्विजामररतिः स्त्रीजन्ममेधावितकीर्त्यर्थोपचयस्सयोचवलिभिर्वैरंस्वपक्षेणच १३ भौमस्यारिविमर्द्दभूपसहजक्षित्याविकाजैर्द्धनंप्रद्वेषः सुतमित्रदारसहजैर्विद्वद्गुरुद्वेष्टिता तृष्णासृग्ज्वरपित्तभंगजनितारोगाःपरस्त्रीकृताः प्रीतिः पापरतैरधर्मेनिरतिः पारुष्यंतैक्ष्ण्यानिच १५ बौध्यांदौत्यसुहृद्गुरुद्विजधनंविद्वत्प्रशंसायशोयुक्तिद्रव्यसुवर्णवेसरमहीसौभाग्यसौख्याप्तयः हास्योपासनकौशलंमतिचयोधर्मक्रियासिद्धयः पारुष्यंश्रमबंधमानसशुचःपीडाचधातुत्रयात् १५॥ मिश्रायामुभयमपिइतिभौमदशांतर्दशाफलं अथबुधदशायांशुभाशुभफलंशार्दूलविक्रीडितेनाह १४ बौध्यामिति बुधस्येयंदशाबौधीतस्यांदौत्येन दूतत्वेन सुहृद्भ्योमित्रेभ्यःगुरुभ्यः पूजार्हेभ्यः द्विजेभ्योब्राह्मणेभ्यःधनंप्राप्नोति विद्वद्भ्यः पंडितेभ्यः प्रशंसास्तुतिः यशश्चकीर्तिःभवति युक्तिद्रव्यं टीरिकांस्यादिति सुवर्णं कनकं वेसरः अश्वविशेषः मही भूः सौभाग्यं सर्वजनवाल्लभ्यं सौख्यं सुखाभावः योगानुसेवनं एषामाप्तयः लाभाभवंति हास्यं परोपहासः उपासना सेवा अनयोःकौशलंतज्ज्ञाता मतिचयः बुद्धिवृद्धिः धर्मक्रियासिद्धयः धर्मयुक्तानांक्रियाणांसिद्धयोभवंति एतच्छुभदशायां अथाशुभदशायांपारुष्यइत्यादि पारुष्यं परुषवचनता श्रमःखेदः बंधः बंधनंमानसशुचःशोकश्चित्तदौस्थ्यंएतेभवंति धातुत्रयात्पीडा वातपित्तश्लेष्माणांत्रयाणांदोषाणांप्रकोपात्पीडाव्याधिश्चजायते मिश्रायामुभयमपिइतिबुधदशांतर्दशाफलं अथजीवदशायांशुभाशुभफलंशार्दूलविक्री-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जेव्यामिति जीवस्येयंदशाजैवीतस्यांजैव्यां मानगुणोदयः मानंपूजागुणोविद्याशौर्य्यादयः एषामुदयः प्रादुर्भावः मतिचयः बुद्धिविवृद्धिः कांतिः कामनीयता॥
प्रतापोन्नतिः प्रतापेनपुरुषार्थेनउन्नतिः प्रभावःशत्रूणांभूतिः माहात्म्यं परोपकारशीलता केचिन्नर्वेमाहुः उद्यम उत्थानशीलता मंत्रः मंत्रैःवैदिकैरन्यैःवा
नीतिनृपतिस्वाध्यायमंत्रैःधनं नीत्याचाणाक्योक्तयान्येननीतिशास्त्रेणवा नृपतीराजातदाराधनेनस्वाध्यायेनपाठेन मंत्रेणमंत्रजाप्येनएतैः धनंवित्तंप्राप्नो
ति हेमं सुवर्णं अश्वः तुरगः आत्मजाःपुत्राः कुंजरःहस्ती अंबराणि वस्त्राणिएषांचयः बाहुल्यं सद्भूमिपैःप्रीतिः गुणवद्भिः नृपैःसहप्रीतिःस्नेहंप्राप्नोतिए
तच्छुभदशायां अथाशुभायां सूक्ष्म्याहेत्यादि सूक्ष्मंवस्तुगहनात्मकंचोहयतस्तर्कयतः श्रमःखेदोभवति यत्सूक्ष्ममतिःखेदसहंगहनंगूढंतदूहयतः इत्यर्थः
श्रवणरुक् कर्णरोगः विधर्म्माश्रितैःवैरं धर्म्मबाह्यैःपुरुषैःसहवैरंमिश्रायामुभयमपिइतिगुरोःदशांतर्दशाफलं अथशुक्रदशायांशुभाशुभफलंशार्दूल

जैव्यांमानगुणोदयोमतिचयःकांतिःप्रतापोन्नति र्माहात्म्योद्यममंत्रनीतिनृपतिस्वाध्यायमंत्रैर्द्धनं हेमाश्वात्मजकुंजरांबरचयःप्री
तिश्चसद्भूमिपैःसूक्ष्म्याहागहनाश्रमःश्रवणरुग्वैरंविधर्म्माश्रितैः १६ शौक्र्यांगीतरतिःप्रमोदसुरभिद्रव्यान्नपानांवरंस्त्रीरत्नद्युतिमन्म
थोपकरणंज्ञानेष्टमित्रागमाः कौशल्यंक्रयविक्रयेकृषिनिधिप्राप्तिर्द्धनस्यागमोवृंदोर्वीशनिषादधर्म्मरहितैर्वैरंशुचःस्नेहतः १७ ॥ ॥

विक्रीडितेनाह १६ शौक्र्यामिति शुक्रस्येयंदशाशौक्रीतस्यांशौक्र्यां गीतरतेःगीतासक्तेःप्रमोदस्यहर्षस्य सुरभिणां सुगंधद्रव्याणांअन्नस्यभोजनस्यपानस्यासवस्यांव
राणांवस्त्राणांयोषितांरत्नानांमणीनांद्युतेःकांतेःमन्मथोपकरणानांकामोपभोग्यानांशय्यादीनांविज्ञानस्ययोगशास्त्रस्येष्टानांप्रियाणांमित्राणांसुहृदागममाल
ब्धयोभवंति कुशलःशिक्षितःकुशलस्यभावःकौशल्यं कुशलःश्रेयोवाकौशल्यमभीष्टक्रियासुश्रेष्ठत्वं क्रयविक्रये क्रयोयदिच्छतिक्रेतुंतत्क्रयः विक्रयोयदि
च्छतिविक्रेतुंतद्विक्रयः कृषिःकर्षणं निधिःनिधानं परैःयद्वित्तंभूमावधः उद्भवाःभवंति एतच्छुभदशायां अथाशुभदशायां वृंदोर्वीशेति वृंदेनबहुभिःसहउ
र्वीशेनराज्ञानिषादेनांन्त्यजीविनांप्राणीनांघातानांधर्मेरहितैःपापाशक्तैः एतैःसहवैरंप्राप्नोतिशुचःस्नेहतःस्नेहाच्छुचःशोकाभवंतियत्रस्नेहस्तदुद्भवान्शो
कान्प्राप्नोति मिश्रायामुभयमपि इतिशुक्रदशांतर्दशाफलमिति अथशनैश्चरदशायांशुभाशुभफलंशार्दूलविक्रीडितेनाह १७ ॥ राम: ५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौरीमिति सौरिं शनैश्चरदशांप्राप्यखरा:गर्द्दभा:उष्ट्रा:करभा: पक्षिण: श्येनादय: महिषीप्रसिद्धा वृद्धांगना वृद्धास्त्री एषामाप्तय:लाभाभवंति बहुसमानजातीयानां समानजातीयानंसंघात:श्रेणीतस्यामधिकारेनियुज्यते ग्रामेपुरेवाश्रेणीग्रामपुराधिकारजनितां तदुत्पन्नांपूजांमानतांप्राप्नोति कुधान्यानांकोद्रवादीनामागम:लाभ:एतच्छुभदशायां अथाशुभदशायां श्लेष्मेर्ष्येति श्लेष्मणाकफेन ईर्ष्ययामत्सरत्वेन अनिलेन वायुनाकोपेनक्रोधेन मोहेन चित्तभ्रमेणमलिनतया अमीमत्वेन व्यापत्ति:विपत् तंद्रा निद्रालस्ययोरंतरेवर्त्ततेयस्यालक्षणं हृदयेव्याकुलीभावोवाचश्चेंद्रियगौरवंमनोवुद्ध्यप्रसादश्चतंद्रायालक्षणंविदु: श्रम:खेद:एतान्प्राप्नोति भृत्येभ्य:कर्म्मकरेभ्य: अपत्येभ्य:पुत्रदुहितृभ्य:कलत्रेभ्योनार्य्योभ्य:भर्त्सनं तर्ज्जनंप्राप्नोति व्यंगतामंगछेदं व्याधिनातद्दर्शनवा।मिश्रायामुभयमपिइतिशनिदशांतर्द्दशाफलमिति अथैकैकस्मिन्नंत्तर्द्दशासुशुभान्यशुभानिचफलानिउक्तानितेषांविषयविभागंलग्नदशाफलंचोपजातिकयाह १९ दशाइति शुभाशुभंव्यामिश्रत्वंदशासुपूर्व्वमेवोक्तं तथाजन्मकालेउपचयराशिस्थानिर्म्मलमूर्त्तय:स्पष्टगतयश्चयेग्रहास्तेषामपिदशाशुभा: येचोपच

सौरींप्राप्यखरोष्ट्रपक्षिमहिषीवृद्धांगनावाप्तय:श्रेणीग्रामपुराधिकारजनितापूजाकुधान्यागम: श्लेष्मेर्ष्यानिलकोपमोहमलिनव्यापत्ति
तंद्राश्रमाद्भृत्यापत्यकलत्रभर्त्सनमपिप्राप्नोतिचव्यंगताम् १९ दशासुशस्तासुशुभानिकुर्व्वंत्यनिष्टसंज्ञास्वशुभानिचैवम्॥ ॥

यस्याहतारूक्षा:स्वल्पमूर्त्तयस्तेषामपिदशाअशुभा: तथाचयवनेश्वर: निशाकरादित्यविलग्नभानांतत्कालयोगादधिकंबलंय: विभर्त्तितस्मादिदशोप्यते साशेषास्त्वत:शेषबलक्रमेण वयोधिकोय:प्रथमोद्गतोवाग्रह:सपूर्व्वंपठितोदशेशा: बलाधिकोत्वेषदिकेंद्रसंस्थ:पूर्व्वंसशेषासुयथाप्रदिष्टा: श्रेष्ठदशास्वेवयस्मिग्रहस्यस्वोच्चेश्रिताकालवलाश्रिताच्च मूलत्रिकोणात्स्वगृहाच्चमध्यामित्राश्रिताज्जन्मगृहाश्रिताद्वा नीचारिभांशोपगताजिताद्वागृहात्परिध्वस्तविवर्णरूक्षा जन्मेशशत्रोर्निधनारिभेशाद्यावाप्यतेसावाहुदोषदास्यात् एवंशस्तासुशोभनासुदशासुग्रहा:शुभान्येवफलानिकुर्वंति दशाफलवृत्तेयानिशुभान्यशुभान्यभिहितानितान्येवभवंति नेतराणिअनिष्टसंज्ञास्वशुभदशासुअशुभान्यनिष्टान्येवभवंति मिश्रासुदशासुमिश्राण्येवदशाफलानिभवंति एतत्त्वप्रतिसूत्रमस्माभिश्चव्याख्यातं तथाचसत्य: जन्मन्युपचयभवनेषुसंस्थिता:स्वगा:सुमूर्त्तिधरा: श्रेष्ठंफलंविदध्युर्ग्रहा:क्रमात्स्वांदशांप्राप्य अन्यै:निहितारूक्षाल्पमूर्त्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰ योहुपचयसंस्थाश्च स्वदशाभिहितंनेष्टंग्रहाः प्रयच्छंतिलोकेषु होराफलंलग्नपतेः समानमिति होरायाः लग्नस्यातद्दशाफलंलग्नपतेः लग्नाधिपस्यसमानंतुल्यं
टी॰भ वक्तव्यं यथामेषलग्नजातस्यभौमदशाफलं वृषलग्नजातस्यशुक्रदशाफलंएवमन्येष्वपिवक्तव्यं किंतुद्रेक्काणवशाच्छुभायांलग्नदशायांशुभफलमशुभायाम
५८ शुभंमिश्रायामुभयमपि अथपूर्वेयेदशारिष्टाउक्तास्तेषामिमेभंगाःप्रोक्ताः तथाचसारावल्यां प्रवेशेबलवान्खेटः शुभैर्वासंनिरीक्षितः सौम्याधिमित्रवर्गस्थो
मृत्युकृन्नभवेत्तदा अंतर्दशाधिनाथस्यविबलस्यदशायदा बलिनःस्यात्तदाभंगोनवाध्यातस्यचध्रुवं युद्धेचविजयीतस्मिन्ग्रहयोगेशुभोयदिदशायांनभ
वेत्कष्टंस्वोच्चादिषुचसंस्थितेइति अथान्येषामपिफलानांदशास्वतिदशमालिन्याह १९ संज्ञाध्येति यस्यग्रहस्यसंज्ञाध्यायेयद्द्रव्यंताम्रंस्यान्मणिहेमेत्यादिना
ग्रंथेनोक्तंकथितंतस्यतद्द्रव्यस्यशुभदशायांप्राप्तिःयोज्या शुभदशायांहानिः यच्चकर्माजीवोयस्यग्रहोपदिष्टोजातकेभिहितः अर्थाप्तिःपितृपितृपत्नीरित्यादि
तस्यग्रहदत्तस्यकर्माजीवस्यतदंतर्दशायामेवाप्तिःभविष्यति भावफलंवक्ष्यति मूर्त्तस्तब्धइत्यादि स्थानफलंराशिफलं प्रथितश्चतुरोटनइत्यादि तथामेषेसस्वलि

मिश्रासुमिश्राणिदशाफलानिहोराफलंलग्नपतेःसमानम् १९ संज्ञाध्यायेयस्ययद्द्रव्यमुक्तंकर्माजीवोयश्चयस्योपदिष्टः भावस्थानालोक
योगोद्भवंचततत्सर्वंतस्ययोज्यंदशायां २० छायामहाभूतकृतांचसर्वेभिव्यंजयंतिस्वदशामवाप्य ॥ ६ ॥ ॥ ॥

मित्नयनइत्यादि आलोकनफलंदृष्टिफलंचंद्रेभूपबुधावित्यादि योगोद्भवंनाभसयोगान्मुक्त्वासर्वयोगेषुयोगकर्तृभ्योग्रहेभ्योमध्याद्योबलीयान्सस्वदशायामेव
फलंददाति नाभसयोगाःसकलदशास्वपिफलप्रदाः वक्ष्यतिच इतिनिगदितायोगाःसार्द्धंफलैरिहनाभसाः नियतफलदाश्चिंत्याह्येतेसमस्तदशास्वपीति ए
वमादिययदुक्तंतत्सर्वंनिरवशेषंतस्यग्रहस्यदशायांयोज्यमिति अथयस्यजातकमथगणितंतस्यशरीरछायांदृष्ट्वाग्रहदशाज्ञानमिदंवक्त्राह २० छायांम टम॰
हाभूतकृतामिति पूर्वमुक्तंशिखिभूखपयोमरुद्गणानांवशिनोभूमिसुतादयः क्रमेणेतितत्रादित्यचंद्रौवर्ज्यौबुधप्रसिद्धावेव यःकश्चिद्ग्रहःस्वदशामात्मीयदशा ५८
मवाप्यमहाभूतकृतांछायांअभिव्यंजयतिप्रकटीकरोति छायाशब्देनशरीरशोभाभिधीयतेशरीरकांतिरित्यर्थः तथाचसच्छायोयं निच्छायोयंवर्ततइत्य
भिधीयते एवमात्मीयदशायांपृथिव्यादिमहाभूतकृतांशरीरछायांव्यंजयतिप्रकटीकरोति साचपंचधाग्निवाय्वंबरजानुगुणान्कुःपृथिवीअंबुवरुणः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्निः हुताशनः वायुः अनिलः अंबरं आकाशं एभ्योजातोत्पन्नाः सा छाया तद्गुणान्करोति तांश्चयथासंख्यं नासास्यदृक्त्वक्श्रवणानुमेयं पार्थिवं गुणं गंधमभिव्यंज
यति नासानुमेयं घ्राणेनोपलभ्यते अथावाप्यं गुणं रसमभिव्यंजयति तच्चास्यानुमेयं आस्यशब्देन हजिह्वाज्ञेयातयारसस्योपलब्धेः आस्यग्रहणं चात्र दन्तानुरो
धीकृतं आग्नेयी आग्नेयं गुणं रूपमभिव्यंजयति दृश्यानुमेयं वायवी वायव्यं स्पर्शगुणमभिव्यंजयति त्वगनुमेयं स्पर्शेनोपलभ्यते नाभसी नाभसं गुणं शब्दमभि
व्यंजयति श्रवणानुमेयं कर्णोपलभ्यं ते एतदुक्तं भवति यदा शुभगंधः पुरुषो भवति तदास्य बुधकृता पार्थवी छाया ज्ञेया यदा मिष्टरसभोजी भवति तदास्य चंद्र शुक्र
कृता छाया ज्ञेया यदातीव रूपवान्सुकांतः पुरुषो भवति तदा सूर्य्यभौमकृता आग्नेयी छाया ज्ञेया यदास्य स्पर्शेन मृदुर्भवति तदा शनैश्चरकृता वायवी छाया ज्ञेया यदा
स्य वचनं कर्णयोः सुखकरं भवति तदा जीवकृता नाभसी छाया ज्ञेया छायाविशेषलक्षणमाचार्य्येण संहितायामभिहितं तथा च छायाः शुभाशुभफलानि निवेदयंती
लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः तेजोगुणान्बहिरपि प्रविकाशयंती दीपप्रभा स्फटिकरत्नघटस्थितेव स्निग्धद्विजत्वङ्नखरोमकेशा छाया सुगंधा च महीसमु

ॐ वह्निवाय्वंबरजान्गुणांश्च नासास्य दृक्त्वक्श्रवणानुमेयान् २१ शुभफलददशायां तादृशी वांतरात्मा बहु जनयति पुंसां सौख्यमर्थागम
त्था तुष्ट्यर्थलाभाभ्युदयान्करोति धर्म्मस्य चाहन्यहनि प्रवृत्तिं स्निग्धासिता च हरितानयनाभिरामा सौभाग्यमार्द्दवसुखाभ्युदयान्करोति सर्वार्थसि २२ मं च॥ ॥
द्धिजननीजननीव चाप्या छायाफलं तनुभृतां शुभमाददाति चंडाधृष्या पद्महेमाग्निवर्णा युक्तं तेजो विक्रमैः सप्रतापैः आग्नेयीति प्राणिनां स्याज्जायायक्षिप्रं
सिद्धिं वांछितार्थस्य धत्ते मलिनपरुषकृष्णा पापगंधा ऽनिलोत्था जनयति वधबंधव्याध्यनर्थार्थनाशं स्फटिकसदृशरूपा भाग्ययुक्तात्युदारा निधिरिव गगनो
त्था श्रेयसां स्वच्छवर्णा अत्र च वायव्यं छायां वर्जयित्वा सर्वास्वेव छायासु अशुभं शुभं फलं तत्कथं शुभफलेयमशुभफलेयमिति तद्दृशाज्ञायते तत्संज्ञानमंतरात्म
नः स्वरूपं मालिन्याह २१ शुभफलमिति शुभफलं ददातीति यश्च शुभफलदः शुभफलदस्य ग्रहस्य या दशा तस्यामंतरात्मा स्वदेहस्थः परमात्मा चित्स्वरूपस्तादृगेव
शुभो भवति पुरुषस्य तस्य च छायादर्शितग्रहदशाकाले बहुविधमनेकप्रकारं सौख्यं सुखभावमर्थागमं धनलाभं च जनयत्युत्पादयति अर्थादेवाशुभदशायां पु
रुषस्यांतरात्मा अशुभो भवति तत्र छायादर्शितग्रहज्ञाताना अस्वेवफलदा सा चासौख्यमनर्थागमं च बहुप्रकारं जनयति मिश्रायां मिश्रा च यात्रायां च वक्ष्यति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह॰ निमित्तानुचरं स्तक्ष्मं देहेन्द्रियमहत्तरं तज्जोह्येनक्षरीरस्थं त्रिकालफलविन्नृणां प्रीतयेनमनोनार्थेनासिद्धावभिनंदति तस्मात्सर्वात्मनायातुरनुमेयंयथामनः शुभाशु
टी॰भ॰ भानिसर्वाणिनिमित्तानिस्फुरेकत्तः एकतश्चमनः शुद्धिस्तद्विशुद्धिर्ज्ञेयावहमिति कथितफलविपाकैरिति ग्रहाणांदशासुयानिफलानिशुभान्यशुभानिवा कथिता
५८९ न्युक्तानितानियः पुरुषोभुंक्ते तस्यपुरुषस्यतद्ग्रहदशावर्त्ततेइतिज्ञेयं एतदुक्तंभवति यादृशंफलंशुभमशुभंवापुरुषस्योपलभ्यतेतत्तचयस्यग्रहस्यदशायांपठितं
सातस्यदशानरस्यवर्त्ततेइतिज्ञेयं एवंवर्त्तमानांदशांतर्कयेल्लक्षयेदित्यर्थः॥ एवंछायावशेनांतरात्मावशेनफलपंक्तिवशेनवागणितस्यजातकस्यवर्त्तमानांदशां
वदेत् अथयसौरदशायामशुभायांव्यंगत्वमुक्तंनचशुभायामथनेकेषांव्यंगत्वंदृष्टंशुक्रदशायांशुभायांनिधिप्राप्तिरुक्तानचसापिदृष्टातदर्थमाह परिणमतिफलोक्ति
रिति अवीर्यैः बलहीनैः ग्रहैः फलानियानिशुभान्यशुभानिवादत्तानितत्फलोक्तिः फलप्राप्तिः स्वप्ने स्वप्नावस्थायांपरिणमत्यनुभूयते चिंतायांमनोराज्येनवेति॥
केचिच्छुभफलददशायांनादृगेवांतरास्याइतिपठंति पठित्वैवंव्याचक्षते यथाशुभायांदशायामंतरास्यांनदशाशुभापियदिभवतितदाबहुजनयतिपुंसांसौख्यमथो

कथितफलविपाकैस्तर्कयेद्वर्त्तमानांपरिणमतिफलोक्तिःस्वप्नचिंतास्ववीर्यैः २२ एकग्रहस्यसदृशेफलयोर्विरोधेनाशंवदेद्यदधिकंपरिप
ऽऽच्यतेतत्॥ ॥

गममिति अर्थादेवाशुभायांदशायामशुभांतर्दशाअसौख्यमनर्थागमंचबहुजनयति अनेनव्याख्यानेनशुभायामशुभायांचशुभायां
भवंतिमिश्रफलंप्रयच्छंतिनचैतदिष्यते यस्मादुक्तं एकक्षेगोर्द्धमपहृत्यददातितुस्वमिति अत्रदशापतेःफलमपहृत्यांतर्दशापतिरेवस्वंफलंददातिइतिज्ञेयं अन्य
थापहृत्येतिनिरर्थकंस्यादिति तस्मात्पूर्वपाठःश्रेयान् द्वितीयःप्रमादपाठः प्रमादपाठेनविनाछायानदृष्टादशायाःशुभाशुभत्वमनुमानैः नशक्यतइति अथैक
ग्रहदत्तयोःफलयोःसदृशयोःनाशोभवतिभिन्नदत्तानांबहूनामपिपंक्तिरेवभवतीत्येतद्वसंततिलकेनाह २२ एकग्रहस्येति सर्वाण्येवफलानिनाभसवर्ज्यंस्व रत्न॰
दशायांग्रहःप्रयच्छतीत्युक्तं तत्रैकेनग्रहेणयदासदृशंविरुद्धंफलद्वयंदत्तंभवतितस्मिन्सदृशेतुल्येद्वयोःफलविरोधेसतिनाशमभवंतितस्यफलद्वयस्यवदेद्भूया ५८९
त् कीदृशंतद्विरुद्धमित्यत्रोच्यतेयथाकश्चिद्ग्रहः कयापियुक्त्यादशाफलादिनासुवर्णदोभवति सएवान्ययायुक्त्याष्टवर्गफलयोगफलदृष्टिफलभावफलानामं
न्यतमेनसुवर्णापहारीभवति तदाफलद्वयापिसुवर्णसंबंधोस्तीतिसादृश्यंस्वर्णदानापहारिणावितिविधः एवमेकस्यग्रहस्यसदृशेफलयोःविरोधेनाशंवदेत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नसुवर्णलाभोनचापहानिरितियदधिकंपरिपच्यतेनतएकेनापिग्रहेणफलद्वयंदत्तमन्यद्रूपंतयोः मध्याद्यदधिकंतत्परिपच्यतेभवति यथाकश्चिद्ग्रहोनिर्दिष्टप्र
कारद्वयेनसुवर्णदः सएवप्रकारेणैकेनसुवर्णापहारीतदाद्वयोरधिकत्वात्तद्दानस्यसुवर्णंददात्येवनापहरति अथवाप्रकारद्वयेनसुवर्णापहारीप्रकारेणैकेनसु
वर्णदस्तदापहरणस्याधिकत्वादपहरत्येव अथवासुवर्णापहारीरूप्यदश्चतथापिद्वे असदृशेऽसदृशत्वादधिकंपरिपच्यते सुवर्णापहारीरूप्यदश्चभवतिइ
तिकेचित् नान्योग्रहइति अन्येनग्रहेणदत्तंसदृशंविरोध्यपिफलंनान्योग्रहोपिहिनस्त्यपहरति यथाकश्चिद्ग्रहः सुवर्णदोभवत्यन्यश्चसुवर्णापहारीतदानत्रसुवर्ण
दः स्वदशायांसुवर्णंददाति स्वदशायांसुवर्णापहारीचापहरति अनेनैवतदुक्तंभवतियथैकग्रहस्यसदृशफलयोः विरोधेसमग्रजन्मांतरेपिफलनाशंवदेत् अ
न्यत्रविरुद्धयोरपि फलयोः नाशंनवदेत् यतः सुवर्णदोग्रहः स्वामात्मीयांदशामुपगतः प्राप्तः सुवर्णलाभंकरोति सुवर्णापहारीस्वदशामुपगतः प्राप्तःसुवर्णम
पहरति एतदष्टकवर्गफलंविनाशंयतस्तत्रैकस्यग्रहस्यफलसदृशयोरपितुल्यसंख्ययोः फलयोः नाशोभविष्यति यथाचभविष्यति तथातत्रैवप्रतिपादयिष्यामः

नान्योग्रहः सदृशमन्यफलंहिनस्ति स्वांस्वांदशामुपगताः स्वफलप्रदाः स्युः २२ स्वादर्कः प्रथमायबंधुनिधनद्व्याज्ञातपोद्यूनगो वक्रात्स्वा
दिवतद्वदेवरविजात्शुक्रात्स्मरांत्यारिगः॥ ॥

ऽऽति॥२३॥ ॥इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृतौदशांतर्दशाध्यायोष्टमः॥८॥ अथाष्टकवर्गा
ध्यायोव्याख्यायते॥तत्रदशाफलंस्थिरमितिपूर्वमेवोक्तंतत्प्रदर्श्याधुनास्थिरस्याष्टकवर्गफलस्यावसरः लग्नाष्टमाः लग्नसहिताष्टसर्वेएवग्रहास्तेभ्यःसकाशा
द्देकैकस्यग्रहस्यचारवशाद्राशौविचरतः शुभाशुभंफलमष्टकवर्गेनिरूप्यते तत्रादावेवार्कोष्टकवर्गंशार्दूलविक्रीडितेनाह स्वादर्कइति यत्रराशौजन्मसमये
पुरुषस्यादित्यः स्थितः सएवतस्यस्वस्थानमुच्यतेएवमन्येषामपिग्रहाणांज्ञेयं योयत्रव्यवस्थितः सएवतस्यस्वस्थानंतस्मात्स्वात्प्रथमायबंधुनिधनद्व्याज्ञातपो
द्यूनगः प्रथमेकादशचतुर्थाष्टमद्वितीयदशमनवमसप्तमेषुएतेषांस्थानानांसंज्ञाप्रागेवव्याख्याताः अतःपुनःनोच्यते एषामंकन्यासएवव्याख्यानमितिसर्वत्र
ज्ञेयं १।११।४।८।२।१०।९।७एतेषुस्थानेषुगतः स्वात्स्थानादात्मीयादर्कःसूर्यःशुभः इष्टफलदः अर्थादेवान्यस्थानेष्वशुभःअनिष्टफलदः यतोवक्ष्यति इतिनि
गदितमिष्टंनेष्टमन्यदित्येवंसर्वत्रज्ञेयं वक्रात्स्वादिव वक्रादंगारकात्स्वादात्मीयस्थानादिवशुभःयेष्वेवस्वस्थानात्तेष्वेवांगारकात् १।११।४।८।२।१०।९।७एतेष्वर्को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ॰ भौमाच्छुभः तद्वदेवरविजात् रविजाच्छनैश्चरात्सूर्यपुत्रात्तद्वदेवयेष्वेवस्थानेषुस्वाच्छुभस्तेष्वेवसौरात् १।११।४।८।२।१०।९।७ एतेषुसौरादर्कः शुभइति सर्वत्रानुवर्त्तते शुक्रा
टी॰ अ त्स्मरांत्यारिषु सएवार्कः शुक्रस्थानात् स्मरांत्यारिषु सप्तमद्वादशषष्ठेषुशुभः ७।१२।६। जीवाद्धर्मसुतायशत्रुषु जीवाद्बृहस्पतिस्थानाद्धर्मसुतायशत्रुषु नवमपं
६० चमैकादशषष्ठेषुशुभः ९।५।११।६। दशत्र्यायारिगः शीतगोः शीतगोश्चंद्रात् दशत्र्यायारिगः दशमतृतीयैकादशषष्ठगः शुभः १०।३।११।६। एतेष्वेवांत्यतपः सु
तेषु च बुधात् शुभः एष्वेवप्रागुक्तेषुचंद्रस्थानेषुदशत्र्यायारिषुच शब्दात्तथांत्यतपः सुतेषुद्वादशनवपंचमेषुबुधाच्छुभः १०।३।११।६।१२।९।५। लग्नात्सबंधुव्ययगः सहशब्देनप्रागुक्तानिचंद्रस्थानान्यनुकृष्यंते नांत्यतपः सुतस्थानानीतिसर्वत्रपरिभाषातः नैतेषुचंद्रस्थानेषुदशत्र्यायारिषुसबंधुव्ययेषु चतुर्थद्वादशसहिते
षुगतोलग्नादुदयाच्छुभः १०।३।११।६।४।१२ तथाचसत्यः स्वात्स्थानादिवसकरस्तृतीयषष्ठांत्यभत्रिकोणानिहित्वेष्टः ३।६।१२।५ एतानिवर्ज्जयित्वातान्येववराह
मिहिरदर्शितानिस्थानानिजातानि १।११।४।८।२।९।१०।९।७ सौरस्यानुसहजारिसुतांत्यसंज्ञानिहित्वेष्टइत्यनुवर्त्तते ३।६।५।१२ एतानिवर्ज्जयित्वातान्येववराहमिहि

जीवाद्धर्मसुतायशत्रुषुदशत्र्यायारिगः शीतगोरेष्वेवांत्यतपः सुतेषुचबुधाल्लग्नात्सबंधुव्ययगः १ लग्नात्षड्त्रिदशायगः सधनधीधर्मेषुचारा
च्छशीस्वात्सास्तादिषुसाष्टसप्तसुरवेः षडन्त्यायधीस्थोयमात्॥ रदर्शितानिस्थानानिजातानि १।११।४।८।२।१०।९।७ चंद्राद्दशमैकादशतृतीयषष्ठोपगः शु
भः सूर्यः १०।११।३।६ जीवात्त्रिकोणयोः षष्ठस्तथैकादशश्चेष्टः ९।५।६।११ प्रथमद्वितीयसप्तमचतुर्थनैधनआतान्विनाशशीन्सौम्यादिष्टः सूर्यः १।२।७।४।८ एतानि
वर्ज्जयित्वातान्येववराहमिहिरप्रदर्शितानिस्थानानिजातानि १०।३।११।६।१२।९।५ कुजस्तुसदृशोर्कपुत्रेण १।११।४।८।२।१०।९।७ दशमैकादशषष्ठतृतीयगोंत्यश्च
तुर्थगोलग्नात् १०।११।६।३।१२।४ शुक्रस्थानात्रविः षट्सप्तमयष्ठिमेतुभवतीष्टः ६।७।१२ तथाचसूक्ष्मजातके केंद्रायाष्टद्विनवस्वर्कः स्वादार्किभौमयोश्चशुभः ष राम
ट्सप्तांत्येषुसितात्षडायधीधर्मगोजीवात् उपचयगोर्केश्चंद्रादुपचयनवमांत्यधीसुतः सौम्याल्लग्नादुपचयबंधुव्ययस्थितः शोभनः प्रोक्तः इतिसूर्यादित्याष्टकवर्गः ६०
अथचंद्राष्टकवर्गंशार्दूलविक्रीडितेनाह १ लग्नात्षडिति लग्नात्षट्त्रिदशायगः शशीचंद्रः लग्नादुदयात्षट्इत्यादिगः षष्ठतृतीयदशमैकादशेषुस्थानेषुशुभः
६।३।१०।११ सधनधीधर्मेषुचाराच्छशी सहशब्देनप्रागुक्तान्येवस्थानान्यनुक्षिप्यंते शशीचंद्रः आराद्भौमादेष्वेवषट्त्रिदशायेषुधनधीधर्मसहितेषुद्वितीय॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचमनवमयुक्तेषु शुभः ६।३।१०।११।२।५।९ स्वात्मात्स्तादिषु आत्मीयस्थानादेष्वेव षट्त्रिदशायेषु सास्तादिषु सप्तमप्रथमसहितेषु शुभः ३।६।३।१०।११।७।१
साष्टसप्तसु रवेः रवेरादित्यादेष्वेव स्थानेषु साष्टसप्तसु अष्टमसप्तमसंयुक्तेषु ६।३।१०।११।८।७ शुभः षट्त्र्यायधीस्थोयमात् यमात्सौरात्षट्त्र्यायधीस्थः षष्ठतृ
तीयैकादशपंचमस्थानस्थः शुभः ६।३।११।५ धीत्र्यायाष्टमकंटकेषु शशिजात् शशी बुधाद्बुधस्थानाद्धीत्र्यायाष्टमकंटकेषु पंचमतृतीयैकादशाष्टमकेंद्रेषु शु
भः शशी ५।३।११।८।१।४।७।१० जीवाद्व्यायाष्टगः केंद्रेषु च जीवाद्गुरुस्थानाद्व्यायाष्टगः केंद्रस्थ द्वादशैकादशाष्टमकेंद्रस्थश्च शुभः चंद्रः १२।११।८।१।४।७
।१० सितात्तु धर्म्मसुखधीत्र्यायास्यदानंगगः सितात्शुक्राद्धर्म्मसुखधीत्र्यायास्यदानंगगेषु नवमचतुर्थपंचमतृतीयैकादशदशमसप्तमेषु शुभः ९।४।५।३।
११।१०।७ तथा च सत्यः षष्टैकादशसप्तमतृतीयदशमादिसंस्थितश्चंद्रस्त्वादिष्टः ६।११।७।३।१०।१ सौरस्य तु सहजारिसुतायसंस्थितश्च शुभः ३।६।५।११ रिपुनिधन
सहजसप्तमदशमैकादशमसंस्थितः चंद्रः सूर्यात् ६।८।३।७।१०।११। लग्नात्तृतीयदशमारिलाभसंस्थितः शुभश्चंद्रः ३।१०।६।११ भ्रातृसुतकर्म्मधनलाभधर्म्मरिपु

धीत्र्यायाष्टमकंटकेषु शशिजाज्जीवाद्व्यायाष्टगः केंद्रस्थश्च सितात्तु धर्म्मसुखधीत्र्यायास्यदानंगगः २ वक्रस्तूपचयेष्विनात्सतनयेष्वा
द्याधिकेष्दयाच्चंद्राद्दिग्विफलेषु केंद्रनिधनप्राप्त्यर्थगः स्वाच्छुभः ॥११ एतिगः कुजाच्चंद्रः शुभः ३।५।१०।२।११।९।६। जीवात्तृतीयषष्ठद्विनवमसुतवर्जि
तेष्विष्टः ३।६।२।९।५। एतानि वर्ज्जयित्वा तान्येव वराहमिहिरपठितानि स्थानानि जातानि १।४।११।८।७।४।७।१० प्रथमद्वितीयषष्ठाष्टमांत्यवर्ज्येषु भार्गवादिष्टः १।२।६
।८।१२ एतानि वर्ज्जयित्वा तान्येव वराहमिहिरपठितानि स्थानानि जातानि ३।४।५।७।९।१०।११ षष्टधननवमपश्चिमवर्ज्येषु बुधात् प्रशस्तश्चंद्रः ६।२।९।१२ एतानि वर्ज्जे
यित्वा तान्येव वराहमिहिरपठितानि स्थानानि जातानि १।३।४।५।७।८।१०।११ तथा च सूक्ष्मजातके शश्युपचयेषु लग्नात्साद्यसुनिः स्वात्कुजात्सनवधीस्वः सूर्य्यात्सा
ष्टस्मराः त्रिषडायसुतेषु सूर्य्यसुतात् ज्ञात्केंद्रत्रिसुतायाष्टमगः गुरोर्व्ययभवाष्टकेंद्रेषु निचतुःसुतनवदशसप्तमायगश्चंद्रमाः शुभैः शुक्रादिति चंद्राष्टकवर्गः
अथ भौमाष्टकवर्गं शार्दूलविक्रीडितेनाह २ वक्रस्तूपचयेष्विनादिति वक्रोंगारकः इनादादित्यादुपचयेषु त्रिषडेकादशदशमेषु सतनयेषु पंचमस्थानसहिते
षु शुभः ३।६।१०।११।५ आद्याधिकेष्दयाद्वक्रः शुभः उदयाल्लग्नादेष्वेवोपचयेष्वाद्याधिकेषु प्रथमस्थानयुतेषु शुभः ३।६।१०।११।१ चंद्राद्दिग्विफलेषु॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰ चंद्रस्थानादेष्वेवोपचयेषु द्विविफलेषुदशमस्थानफलवर्ज्जितेषु तेनदशमस्थानेनस्शुभंनाप्यशुभंफलंकरोतीत्यर्थः ३।६।११ एतेषुशुभः केंद्रनिधनप्राप्त्यर्थगः स्वा।
टी॰भ॰ च्छुभः स्वादात्मीयस्थानात्केंद्रनिधनप्राप्त्यर्थगः केंद्राष्टमैकादशद्वितीयगः शुभः १।४।७।१०।८।११।२ धर्म्मायाष्टमकेंद्रगोर्कतनयात् सौराद्धर्म्मायाष्टमकेंद्रगः न
६१ वमैकादशाष्टमकेंद्रगतः शुभः ९।११।८।१।४।७।१० ज्ञात्षड्व्रिधीलाभगः ज्ञाद्बुधात्षड्व्रिधीलाभगः षष्ठतृतीयपंचमैकादशगतः शुभः ६।३।५।११ शुक्रात्षट्व्यय
लाभमृत्युषुशुक्रस्थानात्षष्ठद्वादशैकादशाष्टमेषुशुभः ६।१२।११।८ गुरोः कर्म्मान्त्यलाभारिषु गुरोः जीवाद्दशमद्वादशैकादशषष्ठेषुशुभः १०।१२।११।६ तथाच
सत्यः द्वादशपंचमनवमतृतीयषष्ठान्विनाकुजस्त्विष्टः स्वस्थानात् १२।५।९।३।६ एतानिवर्ज्जयित्वातान्येववराहमिहिरपठितानिस्थानानिजातानि १।४।७।१०।८।
११।२ सौरस्यतुनवमाभ्यधिकेष्वनर्थेषुएष्वेवद्वितीयंस्थानंविनानवमाभ्यधिकेषु ११।९।८।१।४।७।१० भौमस्तृतीयपंचमदशमैकादशरिपुस्थितः सूर्यादिष्टः ३।५।१०
।११।६ चंद्रान्मध्योदशमस्त्विष्टः सहेलिरिति हेलिः सूर्यः सयेषुस्थानेषुशुभस्तेष्वेवचंद्राद्भौमः किंतुदशमस्थानेतन्यठितेपिमध्यमः ३।६।११ दशमैकादशषष्ठान्त्यगः कु

धर्म्मायाष्टमकेंद्रगोर्कतनयाज्ज्ञात्षड्व्रिधीलाभगः शुक्रात्षड्व्ययलाभमृत्युषुगुरोः कर्म्मान्त्यलाभारिषु ३ द्यायायाष्टतपः सुखेषुभृगुजात्सत्या
त्मजेष्विंदुजः साज्ञास्तेषुयमारयोर्व्ययरिपुप्राप्त्यष्टगोवाक्पतेः॥

५५ जः भूमिजोपूजितो गुरुस्थानात् १०।११।६।१२ षष्ठेकादशपंचमतृतीयगश्चैवसौम्या
त् ६।११।५।३ अंत्यायाष्टमषष्ठगः कुजः पूजितोभृगुस्थानात् १२।११।८।६ प्रथमैकादशादशरिपुसहजोपगतश्चहोरायाः १।११।१०।६।३ तथाचस्वल्पजातके भौ
मः सारायः स्वाष्टकेंद्रगः स्यायषट्सुतेषुबुधाज्जीवाद्दशायशत्रुव्ययेषुइनादुपचयसुतेषूदयाद्दुपचयतनुषुत्रिषडायेष्विंदुतः समोदशमः दशमेचंद्रस्थानात्स
मोमध्यमः भृगुतोंत्यषडष्टायेषु १२।६।८।११ असितात्केंद्रायनववसुषु १।४।७।१०।११।९।८ इतिभौमाष्टकवर्गः अथबुधस्याष्टकवर्गेशार्दूलविक्रीडितेनाह॥३॥ एम॰
द्यायायाष्टतपरिति इंदुजोबुधः भृगुजाच्छुक्रात् द्यायायाष्टतपः सुखेषुद्वितीयप्रथमैकादशाष्टमनवमचतुर्थेषुसत्यात्मजेषुतृतीयपंचमयुक्तेषुशुभः २।१।११। ६१
८।९।४।३।५ साज्ञास्तेषुयमारयोः एष्वेवद्यायायाष्टतपः सुखेषुसाज्ञास्तेषु दशमसप्तमसहितेषुयमारयोः शनैश्चरांगारकयोः यमात् २।१।११।८।९।४।१०।७ अ
राच्छुभः २।१।११।८।९।४।१०।७ व्ययरिपुप्राप्त्यष्टगोवाक्पतेः वाक्पतेः जीवाद्द्वादशषष्ठैकादशाष्टमगतः शुभः १२।६।११।८ धर्म्मायारिसुतव्ययेषुसवितुः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्य्यान्नवमैकादशषष्टपंचमद्वादशेषु शुभः ९।११।६।५।१२। स्वात्साद्यकर्म्मत्रिगः स्वादात्मीयस्थानादेष्वेव धर्म्मादिषु स्थानेषु साद्यकर्म्मत्रिकेषु प्रथमदशमतृतीय
सहितेषु गतः शुभः ९।११।६।५।१२।१।१०।३ षट्स्वायाष्टसुखास्पदेषु हिमगोः हिमगोश्चंद्रात्षष्टद्वितीयैकादशाष्टमचतुर्थदशमेषु शुभः ६।२।११।८।४।१० साद्येषु
लग्नाच्छुभः एष्वेव षष्टादिषु स्थानेषु साद्येषु प्रथमस्थानसहितेषु लग्नाच्छुभः ६।२।११।८।४।१०।१ तथाच सत्यः स्वात्स्थानाच्छशितनयो द्वितीयसप्तमचतुर्थनिधनानिहि
त्वेष्टः [illegible]।४।८ एतानि वर्ज्जयित्वा तान्येव वराहमिहिरपठितानि स्थानानि जातानि १।३।५।६।९।१०।११।१२ सूर्य्यस्य तुलाभारिसुतांत्यनवमस्थः ११।६।५।१२।९ सुतस
हजषष्टपोश्चिमवर्ज्जितेषु मंडलेषु बुधस्त्विष्टः सौराराभ्यां स्थानादविकल्पाण्यत्र नियमेन ५।३।६।१२ एतानि वर्ज्जयित्वा तान्येव वराहमिहिरपठितानि स्थानानि जाता
नि १।११।४।२।८।९।१०।७ लग्नाच्छुभो येषु प्रभाष्यतेषु चंद्रजः तस्य येषु स्थानेषु लग्नाच्छुभस्तेष्वेव स्थानेषु शुक्रस्थानाद्बुधः शुभो भवति शुक्राष्टकवर्गे पठ्यते लग्ना
दिष्टः शुक्रो रिपुसप्तमदशमपश्चिमान् हित्वा ६।७।१०।१२ एतानि स्थानानि वर्ज्जयित्वा तान्येव वराहमिहिरपठितानि स्थानानि जातानि १।२।३।४।५।८।९।११ एतेषु स्थाने

धर्म्मायारिसुतव्ययेषु सवितुः स्वात्साद्यकर्म्मत्रिगः षट्स्वायाष्टसुखास्पदेषु हिमगोः साद्येषु लग्नाच्छुभः ४ दिक्स्वाद्याष्टमदायबंधुषु कुजात्स्वा
त्सत्रिकेष्वंगिराः सूर्य्यात्सत्रिनवेषु धीस्वनवदिग्लाभारिगो भार्गवात् ॥

११ षु शुक्रस्थानाच्छुभो बुधः अंत्यायामयत्नुभेषु जीवाद्बुधः श्रेष्ठः १२।११।८।६ दशमस्व
लाभषष्टाष्टमेषु चंद्राद्बुधश्चतुर्थे च १०।२।११।६।८।४ लग्नाच्चेष्टाद्यूनांत्यनवमसुतसहजवर्ज्येषु ७।१२।९।५।३ एताः वर्ज्जयित्वा तान्येव वराहमिहिरपठितानि स्थाना
निजातानि २।६।१०।११।८।४।१ एतेषु लग्नाच्छुभः तथाच स्वल्पजातके सौम्यांमषट्नवायात्मजेष्विनात्स्वात्त्रितनु दशमयुतेषु चंद्राद्द्विरिपुदशायाष्टसुखगतः सा
दिषु विलग्नात् प्रथमसुखायद्विनिधनधर्म्मेषु सितात्त्रिधीक्षमेनेषु साशास्मरेषु सौरारयोः व्ययायरिपुवसुषु गुरोः इति बुधस्याष्टकवर्गः अथ जीवस्याष्टकवर्गे
शार्दूलविक्रीडितेनाह ४ दिक्स्वाद्याष्टमदायबंधुषु कुजादंगिरा इति अंगिरा जीवः कुजादंगारकाद्दशमद्वितीयप्रथमाष्टमसप्तमैकादशचतुर्थेषु शुभः १०।२
।१।८।७।११।४ स्वात्सत्रिकेष्वंगिराः स्वादात्मीयस्थानादंगिराः गुरुः पूर्वोक्तेषु दिग्स्वाद्यादिषु सत्रिकेषु तृतीयस्थानसहितेषु शुभः १०।२।१।८।७।११।४।३ सूर्य्यात्सत्रिन
वेषु गुरुः शुभः सूर्य्यादादित्यादेष्वेव स्थानेषु प्राक्तेषु सत्तपः तृतीयेषु तृतीयनवमस्थानाधिकेषु शुभः १०।२।१।८।७।११।४।३।९। धीस्वनवदिग्लाभारिगो भार्गवात्ः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृ. दी. भ. ६२

भार्गवाद्बुक्रात्पंचमद्वितीयनवमदशमैकादशषष्ठेषुशुभः ५।२।९।१०।११।६ जायायार्थनवात्मजेषुहि मगोः हिमगोश्चंद्रात्सप्तमैकादशद्वितीयनवमपंचमेषुशुभः ७।११।२।९।५ मंदात्त्रिषट्धीव्यये मंदात्सौरात्तृतीयषष्ठपंचमद्वादशेषुशुभः ३।६।५।१२ दिग्धीषट्स्वसुखायपूर्वनवगोज्ञात्गुरुः ज्ञाद्बुधाद्दशमपंचमषष्ठद्वितीय चतुर्थैकादशप्रथमनवमेषुशुभः १०।५।६।२।४।११।१।९ सस्मरस्त्वोदयात् उदयाल्लग्नादेष्वेवस्थानेषुसस्मरेषुसप्तमस्थानसहितेषुशुभः १०।५।६।२।४।११।१।९।७। तथाचसत्यः येषुबुधस्यरश्मिकलेषुगुरुः पुष्कलसवकात्स्थानात् चंद्राष्टकवयेपश्यते षष्ठधननवमपंचमपश्चिमवर्ज्येषुबुधात्प्रशस्तश्च ६।२।९।१२ एतानिस्था नानिवर्ज्जयित्वाजातानि १।३।४।५।७।८।१०।११। अत्रपंचमद्वितीययोः स्थानयोः वराहमिहिरेणसहभेदः अत्रचवराहमिहिरेणयवनेश्वरमतमंगीकृत्यद्वितीयस्था नस्यशुभत्वमंगीकृतं तथाचयवनेश्वरः स्वस्थानगः स्थानसुवर्णमानप्राप्तिंद्वितीयेचगुरुः करोति एवंद्वितीयेचशुभः विवादतोत्याध्वगतिस्त्रिकोणेतस्मात्पंचमेनशु भः तेष्वेवार्कादिष्टेनवमाभ्यधिकेशुभभवनेषु १।२।४।५।७।८।९।१०।११। अत्रापिपंचमद्वितीययोः वराहमिहिरेणयवनेश्वरमतमंगीकृतं तथाचयवनेश्वरः स्थानेर

जायायार्थनवात्मजेषुहिमगोर्मंदात्त्रिषट्धीव्ययेदिग्धीषट्स्वसुखायपूर्वनवगोज्ञात्सस्मरस्त्वोदयात् ५॥ ॥

वेर्बुद्धिसुहृद्भ्नाप्तिंकरोतिजीवो धनदो द्वितीये एवंद्वितीयेशुभत्वाद्वराहमिहिरेणांगीकृतं हजापीडाध्वदारिद्र्यसूरिः स्यात्पंचमेतस्मात्पंचमेनशुभः आत्मसदृशेषुस हजभवनंविनावाकुजस्यगुरुरिष्टः १।४।५।७।१०।११ अत्रापिसप्तमद्वितीययोः वराहमिहिरेणसहभेदः अत्रापिपवनेश्वरः गुरुःकुजस्थानगतोरिहंताद्वितीयगसम तिहर्षदातातस्माद्वराहमिहिरेणद्वितीयस्थानमंगीकृतंजामित्रगोव्याध्यधिशीककारी एवंसप्तमस्थानमंगीकृतं द्वादशरिपुभवननवमतृतीयसंज्ञेषुसोराद्गुरुःशुभः १२ ।६।११।९।३ धामैकादशनवमद्वितीयषट्पंचमेषुभगोःजीवरिष्टः १०।११।९।२।६।५ चंद्राज्जामित्रनवमसुतलाभकोशर्क्षेषुगुरुःशुभः ७।९।५।११।२ प्रथमद्वितीयपंचमचतुर्थधर्मो दिलाभदशमस्थः सौम्याद्गुरुरिष्टः १।२।५।४।९।६।११।१० जीवोलग्नादेवमिष्टः सजामित्रः १।२।५।४।९।६।११।१०।७ तथाचस्वल्पजातके जीवोभौमाद्व्यायाष्टकेंद्रगः २।११।८।१।४।७। १० अर्कात्तधर्म्मसहजेषु २।११।८।१।४।७।१०।९।३ स्वात्सत्रिकेषु २।११।८।१।४।७।१०।३ शुक्रान्नवदशलाभस्वधीरिपुषु ९।१०।११।२।५।६ शशिनःस्मरत्रिकोणार्थलाभगः ७।९।५। २।११ त्रिरिपुधीव्ययेषुयमाद्गुरुरिष्टः ३।६।५।१२ नवदिक्सुखायधीलायषट्नुषुज्ञाद्गुरुरिष्टः ९।१०।४।११।५।२।१।६ सकामगोलग्नाद्गुरुरिष्टः ९।१०।४।११।५।२।१।६।७ इतिजीवा

CC-0. In Public Domain. Digitization by eGangotri

लग्नादिति सितः शुक्रः लग्नादासुतलाभरंध्रनवगः शुभः लग्नात्प्रभृति सुतस्थानं पंचमं यावत्तथा लाभरंध्रनवगः सितः शुभः तेषु प्रथमद्वितीयतृतीयचतुर्थपंचमैका
दशाष्टनवमेषु लग्नाच्छुक्रः शुभः १।२।३।४।५।११।८।९ सांत्यः शशांकात्सितः शशांकाद्व्ययद्वादशेष्वेवस्थानेषु सांत्येषु सव्ययेषु द्वादशस्थानाधिकेषु शुभः १।२।३।४।५।११।
८।९।१२ स्वात्त्वात्तेषु स्वादात्मीयस्थानादेष्वेवस्थानेषु सान्तेषु दशमस्थानाधिकेषु शुभः १।२।३।४।५।११।८।९।१० सुखत्रिधीनवदशाछिद्राप्तिगः सूर्यजात् सौराच्चतुर्थतृ
तीयपंचमनवमदशमाष्टमैकादशेषु शुभः ४।३।५।८।१०।८।११ रंध्रायव्ययगो रवेः रवेरादित्यादष्टमैकादशे द्वादशेषु शुभः ८।११।१२ नवदशप्राप्त्यष्टधीस्थो गुरोः जीवा
न्नवमदशमैकादशाष्टमपंचमेषु शुभः ९।१०।११।८।५ ज्ञाद्धीत्र्यायनवारिगः शुभः ज्ञाद्बुधात्पंचमतृतीयैकादशनवमषष्ठेषु शुभः ५।३।११।९।६ त्रिनवषट्सुतायसांत्यः
कुजात् शुभः कुजाद्भौमात्तृतीयनवमषष्ठपंचमैकादशेषु सांत्येषु अंत्येन द्वादशेन सहितेषु स्थानेषु शुक्रः शुभः ३।९।६।५।११।१२ तथा च सत्यः स्वस्थानाद्व्ययुतनय
षट्सप्तमपश्चिमेतरेष्विष्टः ६।७।१२ एतानि वर्जयित्वा तान्येव वराहमिहिरपठितानि स्थानानि जातानि १।२।३।४।५।८।९।१०।११ रिपुपत्निकर्म्मवर्जितेषु सितस्त्वं

लग्नादासुतलाभरंध्रनवगः सांत्यः शशांकात्सितः स्वात्त्वात्तेषु सुखत्रिधीनवदशाछिद्राप्तिगः सूर्यजात् रंध्रायव्ययगो रवेर्नवदशप्रा
प्त्यष्टधीस्थो गुरोर्ज्ञाद्धीत्र्यायनवारिगस्त्रिनवषट्पुत्रायसांत्यः कुजात् ॥ ६ ॥

॥ द्युनपुष्कलो नृणां ६।७।१० एतानि वर्ज्जयित्वा तान्येव वरा
हमिहिरपठितानि जातानि १।२।३।४।५।६।८।११।१२ अंत्योपांत्याष्टमगः सूर्यादिष्टस्तु भार्गवः १२।११।८ भौमादंत्योपांत्यात्तृतीयनवमसुतरिपुएशि
गश्चैव १२।११।३।९।६।५।६ दशमैकादशनिधनत्रिकोणसंस्थो भृगुः श्रेष्ठः जीवात् १०।११।८।५।९ सौम्यात्सुतधर्म्मलाभसहजारिसात्तेषु शुभः ५।९।११।३।६।
१० लग्नादिष्टः शुक्रो रिपुसप्तमदशमपश्चिमान् हित्वा ६।७।१०।१२ एतानि वर्ज्जयित्वा तान्येव वराहमिहिरपठितानि स्थानानि जातानि १।२।३।४।५।८।९।११ स्वा
द्यद्वितीयरिपुसप्तमांत्यवर्ज्येषु सौराच्च शुभः १।२।६।७।१२। एतानि वर्ज्जयित्वा तान्येव वराहमिहिरपठितानि स्थानानि जातानि ३।४।५।८।९।१०।११ तथा च स्वल्पजा
तके शुक्रो लग्नादासुतनवमाष्टलाभेषु १।२।३।४।५।९।८।११ सव्ययगश्चंद्रात्स्वात्सात्तेषु रविसुतात्त्रिधीसुखाप्तिनवकर्म्मरंध्रेषु ॥ वस्वंत्याये घर्कोन्त्वविद्गिलाभाष्टधी
स्थितो जीवाद्भात्त्रिसुतनवायारिघायसुतापोक्लिमेषु कुजादिति शुक्राष्टकवर्गः अथ सौरस्याष्टकवर्गं शार्दूलविक्रीडितेनाह ६॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंदः स्वात्त्रिसुतायशत्रुषुशुभरिति मंदः सौरः स्वादात्तृतीयस्थानात्तृतीयपंचमैकादशषष्ठस्थानेषुशुभः साज्ञांत्यगोभूमिजात् भूमिजाद्वौमादेष्वेव प्रागुक्तेषुसाज्ञां
त्येषुगतः दशमद्वादशसहितेषुशुभः ३।५।११।६।१०।१२ केंद्रायाष्टधनेष्विनात् इनात्सूर्यात्केंद्रैकादशाष्टमद्वितीयेषुशुभः १।४।७।१०।११।८।२। उपचयेषाद्येसुखे
चोदयात् उदयाल्लग्नात्तृतीयषष्ठदशमैकादशप्रथमचतुर्थेषुशुभः ३।६।१०।११।१।४। धर्म्मायारिदशांत्यमृत्युषुबुधात् बुधाद्बुधस्थानान्नवमैकादशषष्ठद
शमद्वादशाष्टमेषुशुभः ९।११।६।१०।१२।८ चंद्रात्त्रिषट्लाभगः चंद्रस्थानात्तृतीयषष्ठैकादशेषुशुभः ३।६।११। षष्ठांत्यायगतः सितात् शुक्रस्थानात्षष्ठद्वादशै
कादशेषुशुभः ६।१२।११ सुरगुरोः प्राप्त्यंत्यधीशत्रुषु सुरगुरोः जीवादेकादशद्वादशपंचमषष्ठेषुशुभः ११।१२।५।६। तथाचसत्यः एकादशपंचमषष्ठगोऽर्क
जः स्वाच्छुभस्तृतीयेच ११।५।६।३ स्थानान्निशाकरस्यतुपंचमवर्ज्जं षष्ठेव ११।३।६ येषात्मनोरविस्तेषुभास्करिस्सादशोरविस्थानात् आदित्याष्टकवर्गे पच्यते स्वा
त्स्थानाद्दिवसकरस्तृतीयषष्ठांत्यमेत्रिकोणानिहित्वेष्टः ३।६।१२।५ एतानिहित्वाजातानि १।२।४।७।९।१०।११।८ अत्रवराहमिहिरादभ्यधिकं नवमंस्थानंत

मंदः स्वात्त्रिसुतायशत्रुषुशुभः साज्ञांत्यगोभूमिजात्केंद्रायाष्टधनेष्विनादुपचयेषाद्येसुखेचोदयात् धर्म्मायारिदशांत्यमृत्युषुबुधाच्चं
द्रात्त्रिषड्लाभगः षष्ठायांत्यगतः सितात्सुरगुरोः प्राप्त्यंत्यधीशत्रुषु ७॥ ॥ चयवनेश्वरविरोधित्वाद्वराहमिहिरेणेतिउक्तं तथाचयवनेश्व
रः पापप्रवृत्तिंनवमेविधत्तइति जीवादिष्टः षट्पंचमपश्चिमैकादशस्यश्च ६।५।१२।११ आद्यसुतविजयलाभांत्यकर्म्मगः पुष्कलोनृणांभौमस्थानात्सा
रः ३।५।६।११।१२।१० विजयस्थानमत्रशत्रुस्थानंज्ञेयं षष्ठांत्योपांत्यगः शुक्रात् ६।१२।११ दशमैकादशषष्ठाष्टमांत्यनवमोऽर्कजः सौम्यात् १०।११।६।८।१२।
९ स्थानादिष्टोलग्नाच्छुभः तुलग्नाद्यथासूर्य्यः आदित्याष्टकवर्गेपच्यतेदशमैकादशषष्ठतृतीयगोलग्नगश्चतुर्थश्चलग्नात् १०।११।६।३।१।४ तथाचस्व
त्यजातके स्वात्सौरस्त्रिसुतायारिगः ३।५।११।६ कुजादंत्यकर्म्मसहितेषु ३।५।११।६।१२।१० स्वायाष्टकेंद्रगोर्कात् २।११।८।१।४।७।१० शुक्रात्षष्ठांत्यलाभेषु ६।
१२।११ त्रिषडायगः शशांकात् ३।६।११ उदयात्ससुखाद्यकर्म्मगः ३।६।११।४।१।१० अथगुरोः सुतषट्व्याययगः ५।६।१२।११ ज्ञाद्व्यायारिपुदिग्नवाष्टस्थः
१२।११।६।१०।९।८ इतिसौरस्याष्टकवर्गः अथाष्टकवर्गफलनिरूपणार्थमालिन्याह ७॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिनिगदितमिष्टमिति इत्यनेनोक्तेनप्रकारेणयन्निगदितमुक्तं तदिष्टं शोभनमित्यर्थः नेष्टमंन्यत् यदंन्यन्निगदितंतत्तद्वेमनिष्टमशोभनं एतदुक्तं भवति स्वाद
कैः प्रथमायबंधुनिधनइत्यनेनपाठेनयान्युक्तानिस्थानानितेश्वेष्टंफलं विशेषादधिकफलविपाकं इष्टानिष्टयोःफलयोः विशेषात्तंशोधनाद्यैरधिकमति
रुच्यते तत्फलविपाकंभवति एतज्जन्मभात् जन्मकालेयत्रस्थानेग्रहाः स्थिताः तस्मात्स्थानाच्छुभाशुभानिफलानिप्रयच्छंति तन्नयथातत्कालाक्रांत राशि
तः ए[illegible]दुक्तंभवति यानिशुभस्थानान्याचार्य्येणापठितानितानिबिंदूपलक्षितानिकार्य्याणि यान्यशुभानितानिरेखोपलक्षितानि ततइष्टानिष्टयोः विशेषमं
तरंकृत्वावशिष्टस्यफलस्यपंक्तिरिति यत्रबिंदूष्टकंजातंतत्रशुभफलंसंपूर्णं यत्रचषड्बिंदवस्तत्रपादोनंफलं यत्रचबिंदुचतुष्टयंतत्रार्द्धफलंयत्रबिंदूद्वौतत्र
पादफलं अशुभफलस्यैवंरेखाभिः कल्पनाकार्य्या तत्रचानिमिषपरमांशके विलग्ने इत्यत्रयोगेजातस्यांगारकस्याष्टकवर्गउदाह्रियतेतत्राचार्य्यपठितानि
स्थानानि बिंदूपलक्षितानिकार्य्याणि अपठितानिअशुभानिस्थानानिरेखोपलक्षितानि तद्यथाग्रहसंस्था मीनलग्नगतःशुक्रः मेषेद्वितीयस्थानस्थोऽर्कः

इतिनिगदितमिष्टंनेष्टमंन्यद्विशेषादधिकफविपाकंजन्मभात्तत्रदद्युः उपचयगृहमित्रस्वोच्चगैःपुष्टमिष्टंत्वपचयगृहनी
ऽऽचारातिगैर्नेष्टसंपत्॥८॥

॥तृतीयेवृषेचंद्रबुधौ पंचमस्थानेकर्कटस्थोजीवः अष्टमेतुलायांशनैश्चरः एकादशेमकरस्थोभौमः अनयाग्र
हसंस्थयाप्रदर्श्यतेन्यासः वक्रस्तूपचयेधिनात्ततनयेधाद्याधिकेषूदयाच्चंद्राद्दिग्विफलेषुकेंद्रनिधनप्राप्तर्थगःस्वाच्छुभः धर्म्मायाष्टमकेंद्रगोर्कतनयाद्व्यास्त
द्विधीलाभगःशुक्रात्षड्व्ययः १२ लाभमृत्युषुगुरोः कर्म्मान्त्यलाभारिषु १ अष्टकुंडलिकान्यासः अथशुभाशुभफलंविशेषःक्रियते तत्रमेषेरेखापंचकंबिंदु
त्रयंचजातं रेखात्रयंबिंदुत्रयंचापास्यद्वेरेखेजाते तस्मादेवंविधेयोगेजातस्यसदैवचारवशात्मेषस्थोगारकोष्टभागद्वयेनाशुभः वृषेरेखापंचकंबिंदुत्रयंजा
तं रेखात्रयंबिंदुत्रयंचापा स्यरेखेद्वेजाते तस्माद्वृषस्थोभौमोष्टभागद्वयेनाशुभोभवति मिथुनेरेखापंचकंबिंदुत्रयंचजातं रेखात्रयंबिंदुत्रयंचापास्यद्वेरेखे
जाते तस्मिन्मिथुनस्थोभौमोष्टभागद्वयेनाशुभः कर्कटेबिंदुचतुष्टयंरेखाचतुष्टयंचजातं समत्वान्मध्यमः सिंहेबिंदुपंचकंरेखात्रयंचजातं रेखात्रयंबिंदुत्रयंचा
पास्यबिंदुद्वयंजातंच तस्मात्तस्यसदैवसिंहस्थोभौमोष्टभागद्वयेनशुभोभवति कंन्यायांरेखाषट्कंबिंदुद्वयंचजातं बिंदुद्वयंरेखाद्वयंचापास्यरेखाचतुष्टयंजातं॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu







तस्मात्तस्यकन्यास्थोभौमोष्टभागचतुष्टयेनाशुभः ॥तु
लेरेखात्रयंबिंदुपंचकंचजातं तत्ररेखात्रयंबिंदुत्रयं
चापास्यबिंदुद्वयंजातं तेनतुलस्थोभौमोष्टभागद्वयेन
सदैवशुभः वृश्चिकेरेखासप्तकमेकोबिंदुःजातःतत्र
बिंदुरेखाचापास्यरेखाषट्कंजातं तस्माद्वृश्चिकस्थोभौ
मोष्टभागषट्केनाशुभः धनुषिरेखाषट्कंबिंदुद्वयंचजातं
तत्ररेखाद्वयंबिंदुद्वयंचापास्यरेखाचतुष्टयंचजातं ए
वमष्टभागचतुष्टयेधन्विस्थोभौमोसदैवाशुभः मक
रेरेखात्रयंबिंदुपंचकंचजातं तत्ररेखात्रयंबिंदुत्रयं
चापास्यबिंदुद्वयंजातं तेनमकरस्थोभौमोष्टभागद्वये
नशुभः कुंभेरेखाचतुष्टयंबिंदुचतुष्टयंचजातं स
मत्वात्कुंभस्थोभौमोमध्यमः मीनेरेखापंचकंबिंदुत्रयंचजातं रेखात्रयंबिंदुत्रयंचापास्यरेखाद्वयंचजातं तस्मान्मीनस्थोभौमोष्टभागद्वयेनाशुभः एवंजा
तं एवंशुभाशुभान्येकीकृत्याष्टौफलानिभवंति तेषांसंशोधनंकृत्वायदवशिष्यतेतदादेश्यं यत्ररेखाचतुष्टयंबिंदुचतुष्टयंच भवति तत्रसमंमध्यस्थोग्रहो
भवति यत्ररेखाष्टकंतत्रातीवाऽशुभः यत्रबिंद्वष्टकंतत्रातीवशुभः अत्रजातं एवंजन्मकालाक्रांतराशिवशेनसर्वेग्रहाणांअष्टकवर्गःकार्य्यः तथाचवाद
रायणः एतेनयःशुभःस्यात्षड्भिःस्थानैः सपापदोभवति यस्तुचतुर्भिर्नेष्टः सर्वत्वफलकत्वनाप्येवं ननुपूर्वमुक्तं एकग्रहस्यसदृशोफलयोर्विरोधेनाशंव

दियदधिकंपरिपच्यनेनत् इतिनिगदितमिष्टंनेष्टमन्यद्विशेषादितिपुनरुक्तं उच्यते नैतत्पुनरुक्तंअष्टकवर्गविनायदुक्तमेकग्रहस्यसदृशेफलयोर्विरोधद्
तितत्रसदृशयोः फलयोर्विरोधेनाशोविज्ञेयः यथासएवग्रहः कयापियुक्त्यास्वर्णदोभवति सएवायुक्त्यांतरेणसुवर्णापहारीतदानसुवर्णदोभवति नसुव
र्णापहारीचेति यदधिकंपरिपच्यतेतत्रतत्रापियदिकारणद्वयेनसुवर्णापहारीभवति कारणेनैकेनसुवर्णदस्तथापिसुवर्णापहारीभवति नसुवर्णदः अथका
रणद्वये[illegible]सुवर्णदःकारणेनैकेनसुवर्णापहारीतथापिकारणद्वयस्याधिक्यात्सुवर्णदएव एवंतत्रसदृशेफलयोर्विरोधेनाशंवदेन्नाशसदृशयोः इहतुपुनःसदृशे
पिफलयोर्विरोधेनाशएवेति तद्यथा वादरायणयवनेश्वरादिभिरष्टकवर्गोऽभिहितं अस्यग्रहस्यस्थानादयंग्रहःस्वस्मिन्स्थानेतिष्ठमानइमानिशुभान्यशुभानि
फलानिप्रयच्छतीति तत्रासदृशान्यपियदितानिफलानिभवंतितथापितेषांशुभाशुभविरोधादेवनाशंवदेत् विशेषादधिकफलविपाकंजन्मभात्तद्दद्युरितियथाक
श्चिद्ग्रहःकेनचित्कारणेनसुवर्णदोभवत्यपरेणरूप्यापहारीच तथाप्यसदृशयोरपिफलयोर्विरोधेदानहरणात्मकेनशुभोनाप्यशुभइतिकल्पनीयः एवंस्थाना
ष्टकाद्यत्रस्थानेबहुभिःतथाप्येकैःशुभोभवत्यल्पेनाशुभस्तत्रशुभाशुभफलविशेषंकृत्वाशुभएवकल्पनीयः अनेनैवप्रकारेणस्थानसंज्ञामात्रेणस्थानशुभ
शुभत्वसेवोक्तं नपृथक्फलनिर्देशोयवनेश्वरादियावत् यद्येवचाष्टकवर्गप्रधानंतत्संहितायांगोचरफलेचंद्रस्थानात्किमितिपृथक्फलनिर्देशोवराहमिहिरे
णकृतः जन्मन्यायासदोर्कइत्येवमादि अत्रोच्यतेतस्मादष्टकवर्गफलविशेषाद्यदतिरुच्यतेतदेववक्तव्यमिति तदेवपूर्वप्रत्ययनार्थमतिप्रसिद्धित्वाद्गोचरस्या
न्यमतमेवांगीकृत्वोक्तं तथाचयात्रायांतेनैवोक्तं यस्यगोचरफलप्रमाणतातस्यवेधफलमिष्यतेनवा प्रायसोबहुषुसमतंत्विदंस्थूलमार्गफलदोहिगोचरइ
ति।।यवनेश्वरेणापिपृथक्फलनिर्देशंकृत्वैतदेवाष्टकवर्गमंगीकृतं तथाचतद्वाक्यं फलाष्टकवर्गेषुशुभपापलक्ष्योसमानकल्पावफलौप्रदिष्टौ ज्यायांस्तुय
स्तस्यफलंविधार्य्ययात्राविधानेनसमुद्भवेच पृथक्फलनिर्देशंकृत्वावादरायणोप्यष्टकवर्गएवाह कष्टश्रेष्ठेतुल्यसंख्येफलेचेत्स्यातांनाशःफलयोस्तत्रवाच्यं
वाच्यापंक्तिन्यतिरिक्तस्तयोःस्यात्स्थानेस्थानेकल्पनेयंप्रदिष्टाउपचयगृहमित्रस्वोच्चगैःपुष्टमिष्टमिति लग्नाच्चंद्राद्वायान्युपचयस्थानानितथामित्रक्षेत्राणि।
स्वोच्चंच एतानिशुभस्थानानि शुभस्थानोपलक्षणार्थानि उपलक्षणत्वात्स्वक्षेत्रंमूलत्रिकोणंचगृह्यतेतत्रलग्नाच्चंद्राद्वोपचयतोग्रहःस्वक्षेत्रस्थःस्वोच्चस्थो

CC-0. In Public Domain. Digitization by eGangotri

बृ· मित्रक्षेत्रस्थो मूलत्रिकोणस्थश्च यथाशुभं फलं प्रयच्छति तदतीव पुष्टं फलं प्रयच्छति अत्रच श्रीदेवकीर्त्तिः लग्नादुपचयसंस्थश्चंद्राद्वा स्वगृहमूलतुंगस्थः मित्र
टी·अ· क्षेत्रगतो वा फलमतिशयितंः शुभं दद्यात् अपचयगृहनीचारातिगैरित्यादि लग्नाच्चंद्राद्वा यान्यपचयस्थानानि तथा शत्रुक्षेत्रनीचानि च तानि च तान्यशुभानि
९५ ॥ तेषु स्थितो ग्रहो यदा शुभं फलं प्रयच्छति तदप्यपुष्टं भवति अर्थादेवाशुभं फलं प्रयच्छति एवं काले स्यात् शुभगृहस्थोल्पमशुभं प्रयच्छति अशुभगृहस्थश्च
शुभमल्पं यत्तदुक्तं नेष्टसंपदिति किमेवंविधेषु ग्रहस्य जन्मकाले स्थितिरन्वेष्या किंवा चारवशात्फलकल्पनेति उच्यते जन्मकाले कथमेतत् उच्यते
तत्रांतर्दशायां तथा च देवकीर्त्तिः अपचयराशौ नीचे शत्रुक्षेत्रे च जन्मकाले स्यात् यस्तु सद्द्यान्याल्पं फलमतिशयितो यथाकलं यवनेश्वरश्च यस्तु स्वनीचारिग
होपगोन्यैर्जितो रिदृष्टोल्पतनुर्विवर्णः सूतावभूज्जन्मपतौ बलस्थे स जन्मगोऽबंध्यफलो विभक्तः ईषत्सुहृत्स्वोच्चभदिष्टदृष्टो मित्रर्क्षजन्मोपचये बलीयान् योजा
त्के भूत्तनुजन्मसंस्थो दद्याच्छुभं न त्वशुभोऽप्यनिष्टं तथा च सत्यः जन्मन्युपचयभवनोपगा ग्रहा ह्युपचयेषु पुष्टफलाः अपचयभवनोपेताः पीडास्थाने ह्यपच
याय फलकाले तु पुनश्चंद्रवर्ज्जमन्यो ग्रहो बलवानेव शुभमशुभं वा पुष्टं फलं प्रयच्छतीति चंद्रः शुभोऽपि बलरहितः पापफलो भवति अत्रच श्रीदेवकीर्त्तिः॥ पुष्ट
मपुष्टं स्वफलं दद्यात्सबलो बलेन हीनस्तु ग्रहस्त्वसर्वेश्चंद्रः कष्टफलो बलविहीनश्च तथा च सत्यः अहवपुरंशुबलैर्विवर्ज्जितः शत्रुभैरसंदृष्टः ग्रहस्त्वफलमनु
दद्याच्चंद्रस्तु यदीदृशः कष्टः वराहमिहिरोऽप्यबलानां ग्रहाणां फलदाने असमर्थनां यात्रायामीह नीचस्था ग्रहविजिताः रव्यभिभूता विरश्मयो ह्रस्वाः भुजगा इव मंत्र एम·
हता भवंति कार्याक्षमा लग्ने यात्रायां यवनेश्वरोऽपि स्ववर्गसंस्था बलिनो दिनेशायनुर्व्यथोद्दिष्टफलप्रदाः स्युः नीचे जिताश्चारिगृहेऽल्पवीर्य्या लेघ्नं त्वनिष्टेष्ट ९५
फलेऽप्रवृत्ति तत्र शास्त्रेषु यानि चान्यान्युच्चादिसंस्थानां शुभाशुभफलप्रवृत्तिप्रदर्शकानि नीचारिस्थानामशुभफलप्रदर्शकानि तानि जन्मसमये ज्ञेयानि यानि
चशुभानामशुभानां वा फलानि ग्रहवशेनैव पुष्टिप्रदर्शकानि तानि चारवशात्फलदानकाले ग्रहस्य ज्ञेयानीति ८॥ ॐ ॥ ॥ इति श्री भट्टोत्पलविरचितायां बृह
ज्जातकविवृतावष्टकवर्गोध्यायो नवमः॥९॥ ॥ अथातः कर्माजीवाध्यायो व्याख्यायते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेनपुरुषेणकथंधनमर्ज्जयितव्यमित्यध्यायेस्मिन्निरूप्यते अत्रचप्रकारद्वयेनधनदाताग्रहोभवति लग्नाच्चंद्रभाच्चयोदशमस्थोग्रहः सधनदाताभवति अथल
ग्नचंद्रयोर्दशमस्थानेशून्येभवतस्तदालग्नचंद्रादित्यानांयेयेदशमराशयस्तेषांयेऽधिपतयस्तेषुनवांशकेषुपुरुषस्यजन्मकालेस्थितास्तेषांनवांशकानांयेग्रहाअधि
पतयस्तेग्रहाःधनदातारोभवंति किंतुचंद्राद्वालग्नाद्वायेदशमायग्रहास्तेअनेनप्रकारेणधनदातारोग्रहाभवंति किंतु भेंद्वर्कास्पदपतिगांशनाथाअनेनप्रकारेणेति तत्रा
दावेवलग्नाच्चंद्राच्चदशमस्थोग्रहोयेनप्रकारेणधनंददातितथाभेंद्वर्कास्पदपतिगांशनाथायेनप्रकारेणधनप्रदास्तत्प्रकारद्वयप्रदर्शनंग्रहर्षिण्याह अर्थाप्तिरि
तिहोरेंद्वोः लग्नचंद्रयोः दिवाकराद्यैः सूर्याद्यैः ग्रहैः दशमगतैः दशमस्थानाश्रितैः पित्र्यादिभ्योऽर्थाप्तिःधनप्राप्तिःविकल्पनीयाविचिंत्या तत्रपुरुषस्यजन्मस
मयेलग्नाच्चंद्राद्वायद्यादित्योदशमस्थोभवतितदापितृतोऽर्थाप्तिःभवति एवंचंद्रेलग्नाद्दशमगतेपितृपत्नितःमातुःसकाशात् भौमेलग्नचंद्रयोर्दशमेसतिश
त्रुतःरिपुतः बुधेमित्रात् सुहृत्तः गुरौभ्रातृतःसहजात् शुक्रेस्त्रीतःपोषितः सौरेभृतकजनात्कर्मकरात्सेवकादित्यर्थः अथकश्चिल्लग्नाद्दशमेभवत्यपरश्च

अर्थाप्तिः पितृपितृपत्निशत्रुमित्रभ्रातृस्त्रीभृतकजनाद्दिवाकराद्यैः होरेंद्वोर्दशमगतैर्विकल्पनीयाभेंद्वर्कास्पदपतिगांशनाथवृत्त्या १

द्रात्तदाद्वयस्यापिस्वस्यांस्वस्यामंतर्दशायांद्वावपिस्वाभिहितंफलप्रदौभवतः नकेवलंयावच्चंद्राल्लग्नाच्चबहवोपियदिदशमस्थाभवंतितदासर्वएवस्वस्यांस्वस्यामंतर्दशायांस्वस्वप्रका
रेणधनप्रदाभवंति अथलग्नाच्चंद्राद्वानकश्चिद्दशमोभवति तदार्कोर्थप्रदोभवति अतउक्तं भेंद्वर्कास्पदपतिगांशनाथवृत्त्या भंलग्नं इंदुश्चंद्रः अर्कःआदित्यः
भंचेंदुश्चार्कश्चभेंद्वर्काः तेभ्यः प्रत्येकस्यास्पदाख्योयोराशिःदशमइत्यर्थः तस्ययोऽधिपतिःग्रहःसःयस्मिन्नवांशकेगतःस्थितस्तस्ययोनाथःस्वामीतस्ययाव
त्स्यमाणावृत्तिः तयावृत्त्यातस्यधनप्रदोभवति एवंलग्नाच्चंद्रादर्कादपिवक्तव्यं केचिदेवंव्याचक्ष्यते यथालग्नाच्चंद्राच्चयदादशमस्थाग्रहाभवंति तदालग्नचंद्रयोः
योबलवांस्तस्ययोदशमःसएवाऽर्थप्रदोभवति भेंद्वर्काणांयोबलीतस्यास्पदपतिगांशनाथवृत्त्याएकएवाऽर्थप्रदोभवतीति तदयुक्तं यस्माद्दत्रबलग्रहणंनास्तितस्मा
देवंज्ञायते सर्वेभ्यएवभवतिपुरुषस्यबहुप्रकारधनागमदर्शनादिति तथाचभगवान्गार्गिः उदयाच्छशिनोवापियेग्रहाःदशमस्थिताः तेसर्वेऽर्थप्रदाज्ञेयाः स्वदशासुयत्नो
दिताः १ लग्नार्कशशिनाथेभ्योदशमाधिपतिर्ग्रहः यस्मिन्नवांशेतत्कालंवर्त्ततेतस्यपतिः २ तद्वृत्त्याप्रवदेद्वित्तंजातस्यबहवोयदा भवंतिवित्तदास्तेपिस्वदशासुविनिश्चितात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ·
टी·भ
६६

अर्कांशइति मेंदूर्कास्पदपतिगांशनाथोऽर्कः यदाभवतितदातृणैः सुगंधैः कनकेनसुवर्णेनच ऊर्णयाआविकलोमेनभेषजेन औषधेन आदिशब्दात् भिषक्क्रि
ययारोगिणांपरिचर्य्ययाच धनमाप्नोति अथचंद्रांशेभवतितदाकृष्याकर्षणेनजलजैः शंखमुक्ताप्रवालादिभिः अंगनाभिःस्त्रीभिः जलजानांक्रयविक्रयैः अंगना
नांसमाश्रयणैरेतैः धनमाप्नोति अथकुजांशेभौमनवांशेयदाभवति तदाधातुभिः मृत्तिकादिभिर्योभिः पक्वाभिः सुवर्णरूप्यताम्रादीनिप्राप्नोतितताभिः भवंति
ताभिः अथवाधातुभिः मनःशिलाहरितालहिंगुलूकांजनप्रभृतिभिः अग्निनाऽग्निक्रियया प्रहरणैः खड्गचक्रकुंतचापतोमराद्यैः साहसैः असमीक्षितकार्य्य
करणैरथवास्वबलक्रियारंभैः धनमाप्नोति अथसौम्यांशेबुधनवांशकेयदाभवति तदालिपिगणितादिकाव्यशिल्पैः धनमाप्नोति लिप्यक्षरविन्यासेन गणि
तेन आदिग्रहणाद्व्याख्यानेनयात्रादिप्रयोगैः कार्य्यक्रियया शिल्पैः चित्रपुस्तकपत्रच्छेदबाणमाल्यरचनागंधयुक्तिप्रभृतिभिः धनमाप्नोति अथजीवांशे द्वितीय
प्रहर्षिण्याह २ जीवांशेति जीवांशेद्विजविबुधाकरादिधर्म्मैरिति अथजीवांशकेयदाभवति तदाद्विजेभ्योब्राह्मणेभ्यः विबुधेभ्योदेवेभ्यः पंडितेभ्योवा आकरेभ्यः

अर्कांशेतृणकनकोर्णभेषजाद्यैश्चंद्रांशेकृषिजलजांगनाश्रयाच्च धात्वग्निप्रहरणसाहसैः कुजांशेसौम्यांशेलिपिगणितादिकाव्यशि
ल्पैः २ जीवांशेद्विजविबुधाकरादिधर्म्मैः काव्यांशेमणिरजतादिगोमहिष्यैः॥ ११ सुवर्णादीनांलवणादीनांअंजनादीनांगजादीनांचसमुत्पत्तिस्थाने

भ्यः आदिग्रहणात्क्रियावादेन धर्म्मैः यज्ञदानोद्दिपवासतीर्थगुरुसेवनादिभिः धनमाप्नोति अथशुक्रनवांशकेयदाभवति तदामणिभिः वज्रमरकतपद्म
रागेंद्रनीलप्रभृतिभिः अथवागजतुरगवाराहादिसंभवैः रजतेनरूप्येण आदिग्रहणात्सर्वैर्लोहैः गोभिः तथामहिषकर्म्मणिमहिषेभ्योवासाधुः महिष्यः श्रेष्ठम
हिष्यैः धनमाप्नोति अथसौर्यांशकेयदाभवति तदाश्रमेणअध्वगमनादिकेन वधेनचवध्यघातितया अथवास्वशरीरताडनाद्येन भारवाहेनभारवाहनेन नीच राम· ६६
शिल्पैः स्वकुलादनुचितैः कर्म्मभिः धनमाप्नोति एवंजातककालवशात्पुरुषस्यधनागमंज्ञात्वाकालानुकालंकर्म्मप्रचारवशात्कर्म्मसिद्धिमाह कर्म्मेशाध्युषितनवां
शकर्म्मसिद्धिः कर्म्मणिईशः कर्म्मेशः लग्नाद्दशमराशिः तदधिपः कर्म्मेशः सचारवशाद्यस्मिन्नवांशके अध्युषितोभवतिव्यवस्थितोभवतितत्स्वयंस्वामीतस्यया
निकर्म्माणिअर्कांशेतृणकनकोर्णभेषजाद्यैरित्यादीनितत्समानानांसिद्धिःभवति तानिप्रारब्धानिसिद्ध्यंतीति अत्रकेचित्कर्म्मेशाध्युषितसमानकर्म्मसिद्धिरितिपठंति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र च नवांशग्रहणं नास्ति प्रकृतत्वात्पागनुवृत्तेः नवांशकोव्याख्यायते तथा च भगवान्गार्गिः लग्नकर्म्माधिपो यस्मिन्नवांशे वर्त्तते ग्रहः चारक्रमेण तत्तुल्यां कर्म्मणां सिद्धिमादिशेत् ज्ञातजातकस्येदं क्रियाश्रयं कर्म्म कर्म्मेशाध्युषितनवांशकपतिकर्म्मणां यथा दर्शितानां प्रारब्धानां कालानुकालं सिद्धिः वक्तव्या नान्येषामिति अ थ धनागमज्ञानं प्रहर्षिण्याह ३ मित्रारीति चंद्रलग्नयोः ये दशमगा ग्रहास्तद्भावे च ये मेंद्रकांशस्य पतिर्गांशनाथाः ते च यद्जिन्मकाले मित्रगृहस्थिता भवंतित दाखांतर्दशाकाले ततः तस्मादेव मित्रात् मित्रतः धनप्रदा भवंति अथारिगृहस्थाः शत्रुगृहगा भवंति तदाऽरित एव अथ स्वगृहस्थास्तदा स्वगृहादेव धनप्रदा भवं ति तुंगस्थे बलिनीति यस्य पूर्वविधिवा भास्करः सूर्य्यो धनप्रदो ज्ञातः तस्मिन्तुंगस्थे उच्चगे मेषप्राप्ते तथा तद्बलिन्यन्यैः बलैः त्रिप्रभृतिश्चयाति, स्वविक्रमार्ज्जितधनो भवतीत्यर्थः आयस्थैरिति सौम्यैः शुभग्रहैः जन्मन्यायसंस्थैरेकादशस्थानगतैरुदयधनाश्रितैश्च लग्नगैः द्वितीयस्थानगतैः वातैः च बलसहितैः वीर्य्यवद्भिः जात अनेकधा बहुभिः प्रकारैः स्वं धनं प्राप्नोतीति संचिंत्य निश्चयीकार्य्यो येन येन प्रकारेण धनार्ज्जनमाकांक्षते तेन तेन प्रकारेण यत्नाद्वाप्नोतीत्यर्थः तथा च भगवा

सौरांशे श्रमवधभारनीचशिल्पैः कर्म्मेशाध्युषितनवांशकर्म्मसिद्धिः ३ मित्रारिस्वगृहगतैस्ततोऽर्थो स्तुंगस्थे बलिनि च भास्करे स्ववीर्य्यात्
आयस्थैरुदयधनाश्रितैश्च सौम्यैः संचिंत्यं बलसहितैरनेकधास्वं ४ प्राहुर्य्यवनास्स्वतुंगगैः क्रूरैः क्रूरमतिर्म्महीपतिः ॥ ५ ॥

गार्गिः धनदा जन्मसमये मित्रारिस्वगृहोपगाः यस्य तस्य धनं दद्युर्म्मित्रारिस्वगृहोद्भवं धनदो भास्करो यस्य तुंगे बलसमन्वितः भवेज्जन्मनि यस्यास्य द्वि तमात्मो द्यमार्ज्जितं लाभार्थलग्नगैः सौम्यैर्य्येन येनैव कर्म्मणा धनार्ज्जनं प्रार्थयते तेन तेन यत्नात्समश्नुत इति ४ ॥ इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृत्तौ कर्म्माजीवा ध्यायो दशमः १० अथातो राजयोगाध्यायो व्याख्यायते तत्रादावेव यवनानां जीवशर्म्मणश्च मतं वैतालीयेनाह त्रिप्रभृतिभिरुच्चस्थैः नृपवंशभवा भवंति राजान् इति सर्वजातकेषु प्रसिद्धं तत्रैतावद्यवनानां मतभेदः यस्य जन्मसमये क्रूरैः पापग्रहैः स्वतुंगगैः स्वोच्चस्थैः जातो महीपती राजा भवति किंतु क्रूरमतिः पापबुद्धिरिति ॥ प्रा हुः कथयंति अर्थादेव सौम्यैरुच्चगतैः धर्म्ममतिः धर्म्मात्मा च भवति मिश्रैः मिश्रस्वभावो राजा इति एष एवार्थो मणित्थेनाभिहितः तथा च तद्वाक्यं पापैः पापम तिः स्वोच्चगतैर्द्धर्म्मवांस्तथा सौम्यैः व्यामिश्रैर्म्मिश्रमतिः पृथ्वीशो जायते मनुजः क्रूरैस्त्विति जीवशर्म्मणः पक्षे तन्मते क्रूरैस्तूच्चगतैः क्षित्याधिपो न राजा प्रजायते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंतु राज्ञां तुल्यो धनवांश्च भवति तथा च तद्वाक्यं पापैरुच्चगतैर्जाता न भवंति नृपा नराः किंतु वित्तान्विता स्तेस्युः क्रोधिनः कलहप्रियाइति वराहमिहिरस्य यवनेश्व
रमतमभिप्रेतं यतस्तेन सामान्येनैव स्वल्पजातके भिहितं त्रिप्रभृतिभिरुच्चस्थैर्नृपवंशभवा भवंति राजानः पंचादिभिरन्यकुलोद्भवाश्च तद्वत्त्रिकोणगतैरिति श्र
यद्वात्रिंशद्राजयोगान्वसंततिलकेनाह १ वक्रार्कजाइति वक्रोंगारकः अर्कजः सौरः अर्कः सूर्यः गुरुर्जीवः एतैः वक्रार्कजार्कगुरुभिः भौमशनिसूर्यजीवैः
सकलैः सर्वैश्चतुर्भिरपि स्वोच्चेषुस्थितैः कथितैकलग्ने एषां कथितग्रहाणां चतुर्णां मध्यादेकैकस्मिल्लग्नगते चत्वारो राजयोगा भवंति तथा त्रिभिश्च एषामेव मध्या
त्त्रिभिः स्वोच्चगतैः कथितैकलग्ने द्वादश राजयोगा भवंति एवं षोडश द्येकाश्रितेष्विति शशिनि चंद्रे स्वक्षेत्रगे कर्कटस्थे तेषामेव चक्रार्कजार्कगुरूणां मध्याद्द्व
द्वये स्वोच्चाश्रिते तदेकतमे विलग्नगे द्वादश राजयोगा भवंति एकाश्रितेषु च तेषामेव मध्यादेकस्मिन्नुच्चाश्रिते तस्मिन्नेव विलग्नगे चत्वारो राजयोगा भवंति ए
वं षोडश श्लोकेः पूर्वोक्तैः सह द्वात्रिंशत् तद्यता मेषेर्कः कर्कटे जीवः तुले शौरः मकरे कुजः शेषा यथेष्टं ईदृश्यामन्यग्रहसंस्थायां मेषलग्नगते एको योगः १

क्रूरैस्तु न जीवशर्म्मणः पक्षे क्षित्याधिपः प्रजायते १ वक्रार्कजार्कगुरुभिः सकलैस्त्रिभिश्च स्वोच्चेषु षोडश नृपाः कथितैकलग्ने॥

कर्कटे द्वितीयः २ तुले तृतीयः ३ मकरे चतुर्थः ४ एवं वक्रार्कजार्कगुरुभिः सकलैः स्वोच्चेषु तदेकतमे लग्ने चत्वारो राजयोगाः अथ त्रिभिः तद्यथा मेषेर्कः कर्कटे
जीवः तुले सौरः शेषा यथेष्टं ईदृश्यामपि ग्रहसंस्थायां मेषलग्ने एको योगः कर्कटे द्वितीयः तुले तृतीयः पूर्वैः सह सप्त ७ अथ मेषेऽर्कः कर्कटे जीवः मक
रे भौमः शेषा यथेष्टं ईदृश्यां च ग्रहसंस्थायां मेषलग्ने एको योगः कर्कटे द्वितीयः मकरे तृतीयः पूर्वैः सह दश १० अथ मेषेऽर्कः तुले सौरः मकरे भौमः शेषा
यथेष्टं ईदृश्यां च ग्रहसंस्थायां मेषलग्ने एकः तुले द्वितीयः मकरे तृतीयः ३ एवं त्रयोदश १३ अथ कर्कटे जीवः तुले सौरः मकरे भौमः शेषा यथेष्टं ईदृश्यां
च ग्रहसंस्थायां कर्कटे एकः तुले द्वितीयः मकरे तृतीयः ३ एवं षोडश राजयोगाः १६ त्रिभिः स्वोच्चगतैस्तदेकतमे विलग्ने इति गतं द्येकाश्रितेष्वित्यादि योगे
षु यावत्कर्कटे चंद्रमा न भवति तावद्योगा एव न भवंति तद्यथा द्व्याश्रितेषु ग्रहेषु स्वक्षेत्रगते च चंद्रे द्वादश राजयोगा व्याख्यायते तद्यथा मेषेऽर्कः कर्कटे चंद्र
जीवौ शेषा यथेष्टं ईदृश्यां च ग्रहसंस्थायां मेषलग्ने एको योगः कर्कटे द्वितीयः २ अथ मेषेऽर्कः कर्कटे चंद्रः तुले सौरः शेषा यथेष्टं तदा मेषे तृतीयः ३॥ ॥

Nepal Sahskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुलेचतुर्थः ४ अथमेषेऽर्कः कर्कटेचंद्रः मकरेभौमः शेषायथेष्टं तथामेषेपंचमः ५ मकरेषष्ठः ६ अथकर्कटेचंद्रजीवौ तुलेसौरः शेषाण्यथेष्टं तथाकर्कटेस
प्तमः ७ तुलेऽष्टमः ८ अथकर्कटस्थौचंद्रजीवौ मकरेभौमः शेषाययेष्टं तदाकर्कटेनवमः ९ मकरेदशमः १० अथतुलेसौरः मकरेभौमः कर्कटेचंद्रः शेषा
यथेष्टं तदातुलेएकादश ११ मकरेद्वादश १२ द्व्याश्रितेषितिगतं अथैकाश्रितेषुकर्कटस्थेचंद्रेमेषस्थेऽर्केमेषलग्नेएकः १ कर्कलग्नेतद्गतयोश्चंद्रजीवयोः द्वि
तीयः २ कर्कटस्थेचंद्रेतुलेस्थसौरेतस्मिन्नेवलग्नेतृतीयः ३ कर्कटस्थेचंद्रेमकरस्थेभौमेतस्मिन्नेवलग्नेचतुर्थः ४ एवंपूर्वैः द्वादशभिःसहषोडशश्लोकपूर्वोक्तैः
षोडशभिःसहद्वात्रिंशद्राजयोगाव्याख्याताः ३२ अथचतुश्चत्वारिंशद्राजयोगामनुष्टुभाह २ वर्गोत्तमगतेलग्नेइति लग्नेजन्मकालिकेवर्गोत्तमगतेस्वनवां
शकस्थइत्यर्थः तस्मिंश्चंद्रवर्जितैरन्यग्रहैश्चतुराद्यैः दृष्टेचतुर्भिःपंचभिःषड्भिःवावलोकितेद्वाविंशतयोराजयोगाःस्मृताःउक्ताः अत्रलग्नेचंद्रदृष्टेनयोगभं
गः किंतुपश्यतांमध्येनगण्यते सतुपश्यतुमावापश्यतु अन्यैश्चतुरादिभिःग्रहैःदृष्टेराजयोगोभवति एवंचंद्रेवर्गोत्तमांशकस्थेचतुराद्यैःग्रहैःदृष्टेद्वाविंशतयो

द्व्येकाश्रितेषुचतथैकतमेविलग्नेस्वक्षेत्रगेशशिनिषोडशभूमिपाःस्युः २ वर्गोत्तमगतेलग्नेचंद्रेवाचंद्रवर्जितैः॥ ९ ॥

योगाभवंति एवंचतुश्चत्वारिंशत् ४४ अत्रलग्नेचंद्रेवाचतुर्भिःदृश्यमानेपंचदशविकल्पाभवंति पंचभिःदृश्यमानेषट्विकल्पाभवंति षड्भिरेकः एवंद्वाविं
शतिः तद्यथा लग्नेचंद्रेवारविभौमबुधगुरुभिःदृश्यमानेएकोयोगः रविभौमबुधसितैःद्वितीयः २ रविभौमबुधसौरैःतृतीयः रविभौमजीवसितैश्चतुर्थः ४
रविभौमजीवसौरैःपंचमः ५ रविभौमशुक्रसौरैःषष्ठः ६ रविबुधजीवशुक्रैःसप्तमः ७ रविबुधजीवसौरैरष्टमः ८ रविबुधशुक्रसौरैःनवमः ९ रविजीव
शुक्रसौरैःदशमः १० भौमबुधजीवशुक्रैरेकादशः ११ भौमबुधजीवसौरैःद्वादशः १२ भौमबुधशुक्रसौरैस्त्रयोदशः १३ भौमजीवशुक्रसौरैश्चतुर्दशः १४ बु
धजीवशुक्रसौरैःपंचदशः १५ एवंचतुर्भिरपिविकल्पैःपंचदश अथपंचविकल्पाः रविभौमबुधजीवशुक्रैरेकः १ रविभौमबुधजीवसौरैःद्वितीयः २ रविभौमबु
धशुक्रसौरैस्तृतीयः ३ रविभौमजीवशुक्रसौरैश्चतुर्थः ४ रविबुधजीवशुक्रसौरैःपंचमः ५ भौमबुधजीवशुक्रसौरैःषष्ठः ६ एवंपंचविकल्पैःषट् पूर्वोक्तैःपं
चदशभिःसहैकविंशतिः २१ रविभौमबुधजीवशुक्रसौरैःषड्भिरेकः १ एवंद्वाविंशतिः२२ लग्नाच्चंद्राच्चैवमेवंचतुश्चत्वारिंशत् ४४ परमार्थेनैतद्योगद्वयमेवतद्यथा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ
हो.भ
९९८

वर्गोत्तमगते चंद्रे चतुराद्यैः दृष्टे एकः लग्ने द्वितीयः संख्याप्रदर्शनं गणितप्रदर्शनार्थं अत्रैव चंद्रमसो यदि राशौ वर्गोत्तमावस्थितिं निरूप्य गणितं क्रियते तदा तेषामे
व योगानां चतुः षष्ट्यधिकं शतद्वयं संभवंति एवं चंद्रलग्नयोः योगानां एकीकृतानां पंचशतान्यष्टाविंशत्यधिकानि भवंति तथा च मांडव्यः विलग्नभवनं गते बल
युते च वर्गोत्तमे चतुः प्रभृतिभिर्ग्रहैः शशिनिवासमालोकिते स संभवति पार्थिवः पटुकृपाणपाणीरणे कदाचिदपि वीक्ष्यते रिपुजनो न यस्याननं १ अथ शिख
रिण्या पंच राजयोगानाह ३ यमे इति यमे सौरे कुंभस्थे अर्के सूर्ये ऽजे मेषस्थे सति शशिनि चंद्रे गवि वृषस्थिते तैरेव तत्तुंगैः तेषां ग्रहाणामेकतमेन तुंगे लग्नस्थेन के
वलं यावद्रुशिजगुरुवक्रैः बुधजीवभौमैः नृयुक्सिंहालिस्थैः मिथुनहरिवृश्चिकस्थैः जाता नृपतयो राजानो भवंति चकारोऽत्र लुप्तो द्रष्टव्यः तत्रैतज्जातम् सौरः
कुंभे रविः मेषे चंद्रो वृषे बुधो मिथुने जीवः सिंहे भौमो वृश्चिके ईदृश्यां ग्रहसंस्थायां कुंभलग्ने एको योगः १ मेषे द्वितीयः २ वृषे तृतीयः ३ यमेंदू इति सौरचंद्रौ
तुंगे उच्चेन केवलं यावदंगते नो लग्ने इत्यर्थः सवितृशशिजौ सूर्यबुधौ षष्ठभवने कन्यायां तुलाजेंदुक्षेत्रैः तुला प्रसिद्धः अजो मेषः इंदुक्षेत्रं कर्कटः एतैः यथा

चतुरादैर्ग्रहै दृष्टे नृपा द्वाविंशतिः स्मृताः ३ यमे कुंभेऽर्केऽजे गवि शशिनि तैरेव तत्तुंगैर्नृयुक्सिंहालिस्थैः शशिजगुरुवक्रैर्नृपतयः यमेंदू
तुंगे गे सवितृशशिजौ षष्ठभवने तुलाजेंदुक्षेत्रैः ससितकुजजीवैश्च नरपौ ४ कुजे तुंगेऽर्केंद्वोर्धनुषि यमलग्ने च कुपतिः पतिर्भूमेश्चान्यः क्षि
तिसुतविलग्ने सशशिनि ॥ ५ ससंस्थे ससितकुजजीवैः शुक्रभौमगुरुयुक्तैः नरपौ द्वौ राजयोगाविति तत्रैतज्जातं तुले सौरः वृषे चंद्रः कन्यायामर्कबुधौ तुले शु
क्रः मेषे भौमः कर्कटे जीवः ईदृश्यां ग्रहसंस्थायां तुलालग्ने एको योगः १ वृषे द्वितीयः २ एवं पूर्वैः त्रिभिः सह पंच ५ अत्र षष्ठ भवने षष्ठराशौ लग्नात्केचिद
च्छंति एतदुक्तं यस्मात् तुलस्थे शुक्रे मीनस्थस्यार्कस्याऽसंभवः तथा च बादरायणः तुलालग्ने सितसौरौ मेषे भौमो गुरुः कुलीरगतः कन्यायां रविशशिजौ जातो नृपा
तिर्वृषे सचंद्रेवा १ अथान्यद्राजयोगत्रयं शिखरिण्याह ४ कुजे तुंगेऽर्केंद्वोरिति कुजे भौमे तुंगस्थे उच्चस्थे मकरगते इत्यर्थः अर्केंद्वोः सूर्यशशिनोः धनुषि चापे राम. ९८
स्थितयोः यमलग्ने यत्र तत्र राशौ लग्ने शनैश्चरे लग्नगते मकरस्थ इत्यर्थः एवंविधे योगे जातो कुपतिः भूमीशः नृपती राजा भवति यमलग्ने इति केचित् यत्र तत्र
राशावस्थिते सौरे लग्ने मकरकुंभयोरन्यतमे लग्ने इति व्याख्यातं ॥ यमस्य लग्ने यमलग्ने इति तच्चायुक्तं यस्माद्बादरायणः लग्ने सौरस्तुंगे भौमश्चंद्रादित्यौ चापप्राप्तौ वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्माकं प्रथमाव्याख्यासाध्वीप्रतिभाति यस्मान्मांडव्यः आदित्यश्चनिशाकरश्चभवतोवागीशशशैौयदासार्द्धं भास्करिणास्वराशिसहितः प्राप्तोमृगेमंगलः प्राप्नोति
प्रभवंतदाससुहृतीक्ष्मापालचूडामणिस्तस्यंतिप्रतिपंथिनोरणमुखेयस्मात्कृतांतादिव १ पतिर्भूमेश्चान्यदिति अस्मिन्नेवयोगेक्षितिसुतविलग्नेभौमेसशशिनिचं
द्रयुक्तेलग्नगे अर्थादेवार्केधनुर्द्धरस्थेराजयोगः तत्रैतज्जातं मकरलग्नेचंद्रांगारकयुतेधनुर्द्धरगतेर्केऽन्योद्वितीयोभूमेः पतिः भवतिराजाइत्यर्थः अत्रचवाद
रायणः भानुश्चापेसेंदुर्भौमस्तुंगप्राप्तोलग्नेवास्यात् सचंद्रेसौरेस्तइति सौरेशनैश्चरेसचंद्रेशशिनियुक्तेतथाभूतेऽस्तेसप्तमस्थानगते तथासुरपतिगुरौजीवेचाप
धरगेधनुर्द्धरस्थे भानौआदित्येस्वतुंगस्थेस्वोच्चेमेषप्राप्तेउदयेलग्नमुपयातेप्राप्तेजातः क्षितिपतीराजाभवति तत्रैतज्जातं मेषोलग्नस्तत्रैवार्कः धन्विनिजीवः तुलाग
तोशशिसौरोएवंविधेयोगेजातोराजाभवत्येवंराजयोगात्रयः अथशिखरिण्याराजयोगद्वयमाह ५ वृषेसेंदौलग्नइति वृषेगविसेंदौचंद्रयुक्तेलग्नेस्थिते सवितृगुरु
तीक्ष्णांशुतनयैः सूर्यजीवसौरैः यथासंख्यंसुहृज्जायाखेस्थैः चतुर्थसप्तमदशमस्थितैः नियमात्निश्चयान्मानवपतीराजाभवति तत्रैतज्जातं वृषोलग्नस्तत्रैव

सचंद्रेसौरेस्तेसुरपतिगुरौचापधरगेस्वतुंगस्थेभानावुदयमुपयातेक्षितिपतिः ५ वृषेसेंदौलग्नेसवितृगुरुतीक्ष्णांशुतनयैः सुहृज्जा
यास्वस्थैभवतिनियमान्मानवपतिः मृगेमंदेलग्नेसहजरिपुधर्मव्ययगतैः शशांकाद्यैः ख्यातः पृथुगुणयशाः पुंगलपतिः ६ ॥

चंद्रः सिंहेऽर्कोवृश्चिकेजीवः कुंभेसौरः एवंविधेयोगेजातोऽवश्यंराजाभवति मृगेमंदइति मृगेमकरेलग्नेतत्रस्थेमंदेसौरेसहजरिपुधर्मव्ययगतैः ॥ तृतीयष
ष्ठनवमद्वादशस्थैः शशांकाद्यैः चंद्रांगारकबुधजीवैः एवंविधेयोगेजातः ख्यातः सर्वत्रविदितः पृथुगुणयशाः गुणाः शौर्यादयः विस्तीर्णगुणकीर्तिः पुंगल
पतिः मनुष्यनाथोराजाभवति ननुशशांकाद्यैरित्युक्तेशुक्रः क्वागच्छतु उच्यते यथासंख्यात्पंचमस्थानस्यविद्यमानत्वात् शुक्रस्यादित्यपंचमत्वादनवकाशः त
त्रैतज्जातं मकरोलग्नस्तत्रैवसौरः मीनेचंद्रः मिथुनेभौमः कन्यायांबुधः धन्विनिजीवः शुक्रोऽर्कोयत्रतत्रस्थोएवंविधेयोगेजातोराजाभवति पृथुगुणयशाः
एवमत्रराजयोगौद्वौ तथाचमांडव्यः मृगेलग्नेसौरस्तिमियुगगतः शीतकिरणः कुजोयुग्मेनार्य्यांशशभृत्तासुतश्चापधरगः गुरुर्दैत्येज्याकौवभिमतगतौचार
वशतः प्रसूतोयस्यासौभवतिनरपः शक्रसदृशः १ अथशिखरिण्याराजयोगत्रयमाह ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हयेसेंदाविति हयेधनुषिजीवेगुरौसेंदौसचंद्रेस्थिते भूमितनयेंगारके मृगमुखगतेमकरस्थेमृगाङ्क्पूर्वोमकरोमृगाङ्क इतिवचनात् भृगुजशशिजौ शुक्रबुधौस्वतुंगस्थौसोचप्राप्तौयदिलग्नेभवतस्तदाऽस्मिन्योगद्वयेएतत् तत्रैतज्जातं वृहस्पतौसचंद्रेधन्विगतेमकरगतेभौमे एवंविधायांग्रहसंस्थायांमीनलग्नेसशुक्रेएकोयोगः कन्यालग्नेद्वितीयोयोगः सुतस्थाविति वक्रार्कीभौमसौरौसुतस्थौपंचमस्थानगतौतथागुरुशशिसिता जीवचंद्रशुक्राहिबुकेचतुर्थस्थाने बुधेकंन्यागतेलग्नेजातोऽन्योऽपरोपिनृपोराजागुणवान्भवति तत्रैतज्जातं कंन्यालग्नस्तत्रैवबुधः मकरस्थौशनिभौमौधनुर्द्धरस्थाजीवचंद्रशुक्राः यदाभवंतितदाजातोराजागुणवांश्चभवति एवंराजयोगास्त्रयः अथशिरवरिण्याराजयोगत्रयमाह ७ झषेसेंदाविति झषेमीनेसेंदौसचंद्रेलग्ने मीनलग्नेसचंद्रे घटमृगमृगेंद्रेषुसहितैर्यमारार्कैः घटोकुंभः मृगोमकरः मृगेंद्रोसिंहः तेषुयथासंख्यंयमारार्कैः स्थितैः तत्रैतज्जातं मीनोलग्नस्तत्रैवचंद्रः स्थितः कुंभेसौरः मकरेभौमः सिंहेऽर्कः एवंविधेयोगेजातः यः उत्पन्नः समनुजोमनुष्यःसशास्तिवसुधांभूमिंपरिपालयति राजाभवतीत्यर्थः अजेसारइति अजेमेषेसारेसभौमे मूर्त्तौलग्नेस्थितेतथाचाऽमरगुरौजी

हयेसेंदौजीवेमृगमुखगतेभूमितनयेस्वतुंगस्थौलग्नेभृगुजशशिजावत्रनृपती सुतस्थावक्रार्कीगुरुशशिसिताश्चापिहिबुकेबुधेकंन्यालग्नेभवतिहिनृपोन्योपिगुणवान् ७ झषेसेंदौलग्नेघटमृगमृगेंद्रेषुसहितैर्यमारार्कैर्योभूत्सखलुमनुजः शास्तिवसुधां अजेसारेमूर्त्तौशशिगृहगतेचामरगुरौसुरेज्येवालग्नेधरणिपतिरन्योपिगुणवान् ८ कर्किणिलग्नेतत्स्थेजीवेचंद्रसितज्ञैरायप्राप्तैः मेषगतेऽर्केजातंविंद्याद्विक्रमयुक्तंपृथ्वीनाथं ९ मृगमुखेऽर्कतनयस्तनुसंस्थः क्रियकुलीरहरयोऽधिपयुक्ताः॥ ऽवेशशिगृहगतेकर्कटस्थेजातोनृपोराजावलवान्भवति अथवासुरेज्येवृहस्पतौकर्कटस्थेलग्नगतेभौमेमेषस्थेजातोऽन्योऽपरोराजागुणवांश्चभवति एवमत्रराजयोगास्त्रयः अथराजयोगंविद्युन्मालयाह ८ कर्किणीति कर्किणिलग्नेकर्कटकेलग्नेतत्स्थेतत्रैवव्यवस्थितेजीवेगुरौ चंद्रसितज्ञैः शशिशुक्रबुधैरायप्राप्तैरेकादशस्थानस्थैः मेषगतेऽर्के आदित्येमेषस्थेजातंसंभूतंपृथ्वीनाथं भूमिपतिंविक्रमयुक्तंप्रताप सहितंविंद्याज्जानीयात् अथद्रुतपदेनराजयोगमाह ९ मृगमुखेति अर्कतनयःसौरः मृगमुखेमकरगतःसच तनुसंस्थोलग्नप्राप्तः तथाक्रियकुलीरहरयः मेषकर्किसिंहाः अधिपैःस्वनाथैः युक्ताःसहिताः तथामेषेभौमःकर्कटेचंद्रः सिंहेसूर्य्यइत्यर्थः तथाबुधशुक्रौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्सितौयथासंख्यंमिथुनतौलिसहितौतथामिथुनेबुधःतुलेशुक्रः एवंविधोयदियोगोभवतितदाजातःपृथुयशाःवीस्तीर्णकीर्तिःपृथिवीशोराजाभवति तत्रैतज्जातं
।मकरेलग्नस्तत्रैवसौरः मेषेभौमः कर्कटेचंद्रःसिंहेऽर्कः मिथुनेबुधःतुलेशुक्रः एवंविधायांग्रहसंस्थायांयत्रतत्रस्थेजीवेयदिजातोभवति तदापृथिवीशः पृथुय
शाभवति अथराजयोगमनुष्टुभाह १० स्वोच्चेति बुधेस्वोच्चसंस्थेकन्यागतेलग्नगे भृगौशुक्रेमेषूरणाश्रितेदशमस्थानस्थिते निशानाथेचंद्रेसजीवेबृहस्पतिसं
युक्तेऽस्तेसप्तमस्थानगते मंदारयोःशनिभौमयोः सुतेपंचमेस्थितयोः जातोराजाभवति तत्रैतज्जातं कन्यालग्नेसबुधेमिथुनगतेशुक्रेगुरुसचंद्रेमीनस्थेमकरस्थ
योःशनिभौमयोः जातोराजाभवति एतेराजयोगाःप्रोक्ताः एतेष्वराजवंशजोपिजातोराजाभवतिवक्ष्यमाणेषुतुराजवंशजएवराजाभवतितच्चमालिन्याह ११ अपी
ति अपिशब्दःसंभावनायां प्रोक्तभूपालयोगैःकथितराजयोगैः खलकुलजातानीचवंशोद्भवाऽपिमानवाःपुरुषाःराज्यभाजःनृपाःभवंति किमुत किंपुनःनृ
पकुलोत्थाःराजवंशसंभूताःतेऽवश्यंराजानोभवंति वक्ष्यमाणैःपुनःयोगैःनृपतिकुलसमुत्थाःराजवंशजाःपार्थिवाराजानोभवंति तेषुवक्ष्यमाणेषुअभूपालवंश

मिथुनतौलिसहितौबुधशुक्रौयदितदापृथुयशाःपृथिवीशः १० स्वोच्चसंस्थेबुधेलग्नेभृगौमेषूरणाश्रिते सजीवेऽस्तेनिशानाथेराजामंदार
योःसुते ११ अपिखलकुलजातामानवाःराज्यभाजःकिमुतनृपकुलोत्थाःप्रोक्तभूपालयोगैः नृपतिकुलसमुत्थाःपार्थिवावक्ष्यमाणैर्भ
वतिनृपतितुल्यस्तेष्वभूपालपुत्रः १२ उच्चस्वत्रिकोणगैर्बलस्थैस्त्र्याद्यैर्भूपतिवंशजानरेंद्राः॥

जाः नराजपुत्रः नृपतितुल्योभवति राजसमोइत्यर्थः
नराजाकिंमूलसंभावनायां अथराजयोगमौपच्छंदसिकेनाह १२ उच्चस्वत्रिकोणगैरिति त्र्याद्यैः त्रिभिःग्रहैःस्वोच्चगतैःस्वत्रिकोणगतैः बलस्थैःकालादिबलो
पेतैःजाताभूपतिवंशजाःनृपकुलजातानरेंद्राराजानोभवंति आदिग्रहणाच्चतुर्भिरपि पंचादिभिरन्यवंशजाताइति पंचादिभिःग्रहैःस्वोच्चस्थैःमूलत्रिकोण
गैःवाऽन्यवंशजाताहीनकुलजाअपिराजानोभवंति आदिग्रहणात्षड्भिःसप्तभिरपि हीनैर्वित्तयुताइति त्रिभिरुच्चस्थैःमूलत्रिकोणस्थैःवाहीनबलैःकालादि
बलरहितैःराजकुलजाअपिराजानोनभवंति किंतुराजतुल्याभवंति एतैःयथोक्तैःहीनैःवित्तयुताःसधनाभवंतिनभूमिपालःराजान एतदुक्तंभवति एकेनग्र
हेणद्वाभ्यांवास्वोच्चगाभ्यांमूलत्रिकोणस्थाभ्यांवाराजकुलजोपिराजानभवति किंतुधनवान् एवंत्रिभिश्चतुर्भिःवाऽन्यवंशजातावित्तयुताभवंति॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ टी भ ०

नराजानः अत्रयदिग्रहाः यथाभिहितसंख्याउच्चस्थाः नभवंति स्वोच्चगामूलत्रिकोणस्थैः सहसंख्यासंपादयंति तथापियथोक्तफलदाभवंति अथोच्चगताः॥ केंद्रबलाः स्वत्रिकोणगतावा तथापि अथान्यद्राजयोगंविद्युन्मालिन्याह १३ लेखास्थइति लेखायांतिष्ठतीतिलेखास्थः तस्मिन् लेखाशब्देनोदयमुच्यते अर्के सूर्येतत्स्थेलेखास्थेभूहन्नादेवोदितेनकेवलंयावदजेमेषस्थेतत्रैवमेषलग्नेइंदौचंद्रेस्थिते भौमेकुजेस्वोच्चेमकरस्थे मंदेसौरेकुंभस्थे जीवेगुरौचापप्राप्तेधनुर्द्धरगते एवंविधेयोगेजातोराज्ञः पुत्रोनृपसुतोयदिभवति तदातंभूमेः नाथंभवतिविद्याज्जानीयात् अन्यकुलजोधनवान् अत्रकेचिल्लेयस्थेऽर्केऽजेंदौलग्नइतिपठंति आदित्येलेयस्थेसतिसिंहगतेसूर्येचंद्रेमेषस्थेलग्नेतदपिनकश्चिद्विरोधोराजयोगएवभवति अन्यद्राजयोगंविद्युन्मालिन्याह १४ स्वर्क्षेइति स्वर्क्षेसितेआत्मीयराशौस्थितेवृषतुलयोरन्यतमस्थेनकेवलंयावत्पातालस्थेलग्नाच्चतुर्थे चंद्रेधर्मस्थानप्राप्तेनवमगते शेषैरन्यग्रहैः रविभौमबुधगुरुसौरैः दुश्चिक्यागप्राप्तिप्राप्तैः तृतीयलग्नएकादशस्थानस्थैः जातोभूमेः पृथिव्याः स्वाम्यधिपतिःभवति तत्रैतज्जातंकुंभोलग्नः वृषेशुक्रः तुलेचंद्रःशेषाग्रहायथासंभवंमेषकुंभ

पंचादिभिरन्यवंशजानाहीनैर्वित्तयुतानभूमिपालाः १३ लेखास्थेऽर्केऽजेंदौलग्नेभौमेस्वोच्चेकुंभेमंदे चापप्राप्तेजीवेराज्ञः पुत्रंविद्यात्पृथ्वी।
नाथं १४ स्वर्क्षेशुक्रेपातालस्थेधर्मस्थानंप्राप्तेचंद्रे दुश्चिक्यागप्राप्तिप्राप्तैःशेषैर्जातःस्वामीभूमेः १५ सौम्येवीर्ययुतेतनुयुक्तेवीर्याढ्ये
चशुभेशुभयाते धर्मार्थोपचयेष्ववशेषैर्द्धर्मात्मानृपजः पृथिवीशः १६ वृषोदयेमूर्त्तिधनारिलाभगैःशशांकजीवार्कसुतापरैर्नृपः॥ ॥

धन्विस्थाः एवंविधेयोगेजातोराजपुत्रोराजाभवति अन्यकुलजोधनवान् अथवाकर्कटोलग्नः तुलेशुक्रः मीनेचंद्रः शेषाःग्रहाःयथासंभवंकन्याकर्कटवृषस्थाःएवंविधेयोगेजातोराजपुत्रोराजाभवत्यऽन्यकुलजोपिधनवान् १५ अथान्यद्राजयोगंनवमालिकयाह सौम्येबुधेवीर्ययुक्तेकालादिबलैःयुक्तेतथाभूतेतनुयुक्तेलग्नस्थे शुभेशुभयाते शुभेशुभग्रहेगुरुसितयोरन्यतमेयथासंभवं वीर्याढ्येच सबलेशुभेशुभयाते धर्मस्थानगतेनवमगतइत्यर्थः शुभेसुखयातइतिपठंति॥ चतुर्थस्थानस्थइत्यर्थः अवशेषैः परिशिष्टग्रहैः यथासंभवंधर्मार्थोपचयेषु नवमद्वितीयत्रिषडेकादशदशमानामन्यतमस्थानस्थितैः एवंविधेयोगेजातोनृपजोराजपुत्रोराजाभवति धर्मात्माच अन्यकुलोधनवान् अथान्यद्राजयोगद्रुपवंशस्थेनाह १६ वृषोदयेति वृषोदयेवृषलग्नेतथाशशांकजीवार्कसुतापरैः चंद्रगुरुसौरैर

राम ७०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परेश्वरविकुजबुधसितैः यथासंख्यंमूर्त्तिधनारिलाभगैः लग्नद्वितीयषष्ठेकादशस्थैः जातोनृपेःराजाभवति तत्रैतज्जातं वृषलग्नेसचंद्रे मिथुनस्थेजीवे तुलास्थेसौ
रे मीनस्थेः रविकुजबुधसितैः जातोराजपुत्रोराजाभवति अन्यकुलजोपिधनवान् सुखेगुराविति गुरौजीवेसुखेचतुर्थस्थानस्थे खेदशमेशशितीक्ष्णदीधिती
चंद्रार्कौयमोदये शनैश्चरेलग्नगते अपरैरन्यैर्भौमबुधशुक्रैः लाभगतैरेकादशस्थैः जातोनृपोराजाभवति तत्रैतज्जातं शनैश्चरोलग्ने चतुर्थेजीवः दशमेसू
र्य्येचंद्रौ भौमबुधशुक्राएकादशे एवंविधेयोगेजातोराजपुत्रोराजाभवति अन्यकुलजोपिधनवान्भवति अथान्यद्राजयोगद्वयंवसंततिलकेनाह १७ मेषूरणाय
तनुगाइति शशिमंदजीवाः चंद्रसौरगुरवःयथासंख्यं मेषूरणायतनुगाः दशमैकादशलग्नस्थाः ज्ञारौबुधभौमौधनेद्वितीयस्थाने सितरवीशुक्रार्कौहिबुकेच
तुर्थे ४ एवंविधेयोगेजातोनरेंद्रोनृपोभवति तत्रैतज्जातं दशमेचंद्रः एकादशेसौरः लग्नेजीवः द्वितीयेबुधभौमौ चतुर्थेशुक्रार्कौ एवंविधेयोगेजातोराजपुत्रोरा
जाभवत्यन्यकुलजोधनवान् वक्रासिताविति वक्रासितौभौमसौरौ शशिसुरेज्यसितार्कसौम्याः चंद्रगुरुशुक्रसूर्य्यबुधाः यथासंख्यं होरासुखास्तशुभखाप्तिगताः

सुखेगुरौखेशशितीक्ष्णदीधितीयमोदयेलाभगतैर्नृपोऽपरैः १७ मेषूरणायतनुगाः शशिमंदजीवाः ज्ञारौधनेसितरवीहिबुकेनरेंद्रम् वक्रा
सितौशशिसुरेज्यसितार्कसौम्याहोरासुखाऽस्तशुभखाप्तिगताःप्रजेशं १८ कर्म्मलग्नयुतपाकदशायांराज्यलब्धिरथवाप्रबलस्य॥ ॥

लग्नचतुर्थसप्तमनवमदशमैकादशस्थाः भवंति तदाजातःप्रजेशोराजाभवति तत्रैतज्जातं भौमसौरौलग्नगतौ चतुर्थेचंद्रः सप्तमेजीवः नवमेशुक्रः दश
मेसूर्य्यः एकादशेबुधः एवंविधेयोगेजातोराजपुत्रोराजाभवत्यन्यकुलजोधनवान् अथराजयोगजातस्यकस्मिन्कालेराज्यावाप्तिर्भविष्यतीतितज्ज्ञानंस्वागत
याह १९ कर्म्मलग्नयुतपाकदशायामिति राजयोगकर्त्तॄणांग्रहाणांमध्याद्योग्रहःकर्म्मणिलग्नाद्दशमेस्थितःयश्चराजयोगकर्त्तॄणांग्रहाणांमध्याद्योग्रहः
लग्नेयुतोजन्मलग्नस्थः तत्पाकदशायांतस्यसंबंधिनीयापाकदशांतर्दशाभवति तत्रतस्यराज्यलब्धिर्भवति अथलग्नदशमयोः द्वयोरपिग्रहौभवतः तदात
योःयोबलवांस्तस्यदशायामंतर्दशाकालेराज्यलब्धिः अथतत्रबहवोयदाभवंतितदाप्रबलस्यसर्वोत्तमबलस्यांतर्दशाकाले अथवाप्रबलस्येति अथलग्न
दशमौशून्यौभवतस्तदाजन्मनियःप्रबलःसर्वोत्तमबलस्तस्यांतर्दशाकाले ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ॰ टी॰ भ ८०१

एवंराज्यदासुबहुषंतद्दशासुयस्मिन्नंतर्दशाकालेचारवशादतिबलवत्वंसंभवति तस्यामेवांतर्दशायांराज्यप्रदोभवति शत्रुनीचग्रहेति लब्धराज्यस्यापिजन्मकाले शत्रुक्षेत्रस्थेन नीचक्षेत्रस्थेनचग्रहेणचयांतर्दशादत्तातस्यांतस्मिन् बलवतिराज्यहरणंवाच्यं यतः साछिद्रदशाविबलेपितस्मिन्नापद्भवति साचसंश्रयदशापरि कल्प्या तस्यामंतर्दशायांसंश्रयंकार्य्यदैवयुक्तनृपसश्रयगुणात्तर्म्मोक्षोपि वक्ष्यतिचयात्रायां अरिकोपहतदशायांजन्मोदयनाथशत्रुपाकेच स्वदशेशाकारकद शाः संश्रयणीयोनरेंद्रयतिरिति अत्रचभगवान्गार्गिः लग्नगतः कर्म्मगोवास्याद्ध्यवाप्रबलोपियः यःस्यात्तांतर्दशाकालेराज्यदःप्रबलोप्यदा १ नीचारिग्र हसंस्थस्यदशायांप्रबलस्यच च्युतिबलविहीनस्यतन्मोक्षःपरसंश्रयादिति अथभोगिनांसवरदस्युस्वामिनांचजन्मज्ञानंमालिन्याह १९ गुरुसितबुधलग्नेति गुरुसितबुधाः जीवशुक्रसौम्याः एवमन्यत्रमेषलग्नगते अर्कपुत्रेसौरे सप्तमस्थे दिवसनाथेसूर्य्ये वियतिदशमस्थानगते एवंविधेयोगेभोगिनांभोगवतां जन्मविंद्याज्जानीयात् एवंविधेयोगेजातोसदैवभोगवान्भवति तस्यार्थविहीनस्यापियतःकुतश्चिद्भोगावाप्तिर्भवति रविबुधसितलग्नेइत्यत्रकेचिद्रविबुधसि

शत्रुनीचगृहयातदशायांछिद्रसंश्रयदशापरिकल्प्याः १९ गुरुसितबुधलग्नेसप्तमस्थेऽर्कपुत्रेवियतिदिवसनाथेभोगिनांजन्मविंद्यात्
शुभबलयुतकेंद्रैःक्रूरभस्थैश्चपापैर्व्रजतिशबरदस्युःस्वामितामर्थभाक्च २० ॥ ऽऽ तानांसबंधिलग्नेइतिव्याख्यातं सिंहवृषतुलामिथुनकंन्या लग्नेष्विति यतोदशमस्थेऽर्केलग्नेबुधसितयोःस्वौस्थानंनसंभवति आचार्य्येणव एहमिहिरेणपूर्वशास्त्रानुसारेणाऽयंयोगोकृतः अत्रचभगवान्गार्गिः जीव ज्ञभार्गवैर्लग्नेसप्तमस्थेऽर्कनंदने दशमस्थेरवौजातोभोगवान्पुरुषोभवेत् शुभबलयुतकेंद्रैरिति शुभग्रहसंबंधिनोराशयः तेचसबलायस्यकेंद्रगताभवंतितैः तथाभूतैः तथापापैःक्रूरग्रहैःक्रूरभस्थैः पापराश्याश्रितैःयस्यजन्मभवतिसशबराणांपुलिंदानांदस्यूनांचौराणांस्वामित्वंव्रजतिगच्छति अर्थभाग्भाग्यवान्ध नवांश्चभवति शुभबलयुतकेंद्रैरिति अत्रशुभग्रहैःबलयुतैःकेंद्रगतैरितिकेचिद्व्याख्यातं तच्चायुक्तं यस्माद्भगवान्गार्गिः पापक्षेत्रगतैःकेंद्रस्थैःसौम्यराशि भिः सबलैर्यस्यजन्मस्यात्स्याद्दसौदस्युनायकइति २० ॥ ॥इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौराजयोगाध्यायोएकादशः ११ अथातोनाभसयोगा ध्यायोव्याख्यायते नाभसयोगानांचत्वारोविकल्पाः तत्राकृतियोगाएकोविकल्पः आकृतियोगाःसंख्यायोगाश्चविकल्पद्वयं आकृतियोगाःसंख्यायोगाआश्रय एम ८०१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकृतियोगाः संख्यायोगा आश्रययोगा दलयोगौ चेति विकल्पचतुष्टयं तत्र विंशतिराकृतियोगाः सप्तसंख्यायोगाः त्रय आश्रययोगाः द्वौ दलयोगौ तत्र द्वित्रिचतुर्विकल्पजानां योगानां संख्याज्ञानमौपच्छंदसिकेनाह १ ॥ नवदिगिति नव प्रसिद्धा दिक्शब्देन दश उच्यंते वसवोऽष्टौ एते यथासंख्यं त्रिकाग्निवेदैः गुणिता त्रिकशब्देन त्रय एव उच्यते अग्निशब्देन त्रयः वेदाश्चत्वारः ४ एतैः गुणिताः तद्यथा नवदिग्वसवः ९।१०।८ एते यथासंख्यं त्रिकाग्निवेदैः ३।३।४ एतैर्गुणिता जाताः २७।३०।३२ एते यथासंख्यं द्वित्रिचतुर्विकल्पजा भवंति एतदुक्तं भवति आकृतियोगा विंशतिः संख्यायोगाः सप्त एवमाकृतिसंख्याविकल्पद्वयेन सप्तविंशतियोगाः भवंति आश्रययोगास्त्रयः आकृतिसंख्याआश्रयकृते न विकल्पत्रयेण त्रिंशत् ३० ॥ दलयोगौ द्वौ आकृतिसंख्या आश्रयदलयोगकृतेन विकल्पचतुष्केन द्वात्रिंशत् ३२ ॥ एवं द्वित्रिचतुर्विकल्पजा योगाः स्युः भवेयुरिति यवनैस्त्रिगुणा हीति पुराणयवनैः त्रिगुणा हि षट्शती कथिता षण्णां शतानां समाहारः षट्शती सा च त्रिगुणा अष्टादश योगशतान्यभिहितानीत्यर्थः १८०० ॥ ननु श्रुतिध्वजेन किमुक्तं उच्यते नाभसयोगानामानंत्यं तथा च तद्वाक्यं संख्या

नवदिग्वसवस्त्रिकाग्निवेदैर्गुणिता द्वित्रिचतुर्विकल्पजाः स्युः यवनैस्त्रिगुणा हि षट्शती सा कथिता विस्तरतो त्र समासः १ रज्जुर्मुशलं नलश्चराद्यैः सत्यश्चाश्रयजाजगादयोगान् केंद्रैः सदसद्युतैर्दलाख्यौ स्रक्सर्पौ कथितौ पराशरेण २ ॥ न साहृश्यमनंतकस्याद्व्याणि नानाप्रकृतीनिदृष्टेति कथं पुराणयवनैरष्टादश शतान्यभिहितानि उच्यंते आकृतियोगास्त्र्यो विंशतिस्तैरभिहिताः संख्यायोगानां सप्तविंशत्यधिकं शतं भवति एवं साईशतं भवंति तच्चैकैकं राशिलग्नगतमधिकृत्योक्तं तस्मात्स्वस्वद्वादशकेनाष्टादशयोगशतानि भवंति यस्मात् साईशतं द्वादशहतं अष्टादशशतानि भवंति एतेषामुत्पत्तिरध्यायांते प्रदर्शयिष्यामः विदिताध्यायार्थस्य सुखावबोधत्वात् एवं यवनैस्त्रिगुणा षट्शती विस्तरतः कथिता उक्ता अत्रास्मिन् शास्त्रे तत्समासः संक्षेपः क्रियते विस्तरस्य समासोऽभिधीयत इति पूर्वं प्रदर्शिता द्वात्रिंशदेवाभिधीयंते तत्फलेष्वन्यफलानां समानत्वात् द्वात्रिंशत्स्वेव योगेष्वष्टादशयोगशतान्यंतर्भवंति इति अथाश्रययोगत्रयं दलयोगद्वयं चौपच्छंदसिकेनाह १ रज्जुर्मुशलमिति चराद्यैः चरस्थिरद्विस्वभावराशिः ग्रहसंयुतैः यथासंख्यं रज्जुर्मुशलं नलश्चेति योगत्रयं भवति तद्यथैकस्मिन् चरराशौ चरराशिद्वये चरराशित्रयं चरराशिचतुष्के वा यदा सर्वे ग्रहाः भवंति स्थिरराशयो द्विस्वभावराशयश्च शून्याः भवंति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ तदारज्जुर्नामयोगोभवति एवमेकस्मिन्स्थिरराशौराशिद्वये राशित्रयेराशिचतुष्केवायदासर्व्वेग्रहाः भवंति चरराशयोद्विस्वभावराशयश्चशून्याभवंति तदामुश
टी·भ लंनामयोगोभवति एवमेकस्मिन्द्विस्वभावराशौराशिद्वयेराशित्रयेराशिचतुष्केवासर्व्वेग्रहाः भवंति चरराशयः स्थिरराशयश्चशून्याः भवंति तदानलाख्योयोगोभवति
७२ एतानाश्रयजांस्त्रिन्योयोगान्सत्याचार्योजगादउक्तवान्॥केचित्सत्यस्त्वाश्रयजानिहाहइतियोगानितिपठंतिइहास्मिन्प्रकरणेग्रहोक्तवानिति तथाचसत्यः सर्व्वेचरे
षुराशिषुयदास्थितायोगमाहतंरज्जुमनयप्रियस्यसततंविदेशवासार्थयुक्तस्य सर्व्वेस्थिरेषुराशिषुयदास्थितामुशलमाहतंयोगं जन्मनिकर्म्मकराणांयुक्तानामर्थ
मानाभ्यां द्विशरीरेषुनलइतियोगोहीनाहीनातिरिक्तदेहानां निपुणानांपुरुषाणांतनुसंचयभागिनांभवति अत्रकैश्चिद्व्याख्यातं चरराशिचतुष्केयदासर्वे
ग्रहाभवंति तदारज्जुः स्थिरराशिचतुष्केमुशलं द्विस्वभावराशिचतुष्केनलइति तच्चायुक्तं यस्माद्भगवान्गार्गिः एकोद्वौवात्रयः सर्व्वेसर्व्वैःयुक्तायदाग्रहैः चरयो
गस्तदारज्जुःशीर्ष्योणांजन्मदोभवेत् स्थिरश्चेन्मुशलंनाममानिनांजन्मकृन्नृणां द्विस्वभावोनलाख्यस्तुबलिनांपरिकीर्त्तितः एवमाश्रययोगत्रयंव्याख्यातंसत्यम
तेन तथाचसत्यः चरराशिगैर्ग्रहैर्द्रैरज्जुः स्थिरगशिरास्तथामुशलं द्विशरीरगतैर्य्योगोनलसंज्ञोमुनिभिरुद्दिष्टः अथदलयोगद्वयमुच्यते केंद्रैः सदसद्युतैरिति कें
द्रैः यथासंख्यंसदसद्युतैः सद्ग्रहैः सौम्यैर्युतैः दलाख्योदलोयोगः स्रग्मालानामभवति तथाकेंद्रैरसद्ग्रहैः पापैर्युक्तैः दलयोगः सर्प्पोनामयोगोभवति एतदुक्तं
भवति येषुतेषुत्रिषुकेंद्रेषुसौम्यग्रहाःबुधगुरुशुक्रायदाभवंतिनकस्मिंकश्चित्केंद्रेपापोभवतितदास्रग्नामयोगोभवति अथयेषुतेषुत्रिषुकेंद्रेषुपापाः सूर्य्य
भौमसौराःभवंति नकस्मिंश्चि केंद्रेभवतिसौम्यग्रहाः तदासर्प्पोनामयोगोभवति नन्वत्रयोगद्वये केंद्रैः सदसद्युतैर्द्दलाख्यावित्युक्तान्त्रिषुकिमितिव्याख्यातं॥ एभ
यस्माच्छुक्लपक्षकृष्णपक्षयोश्चंद्रस्यसौम्यत्वंपापत्वंचसंभवति एवंस्थितिः यदासौम्याक्रांतेषुत्रिषुकेंद्रेषुक्षीणश्चंद्रमायदाचतुर्थोभवति अथवापापाक्रांतेषुत्रि ७२
षुकेंद्रेषुक्षीणश्चंद्रमायदाचतुर्थोभवतितदापिस्रक्सर्प्पौयोगौभवतः तच्चतुर्षुकेंद्रेषुकिमितिनव्याख्यातं उच्यतेनैवं यस्मादनेनैवस्वल्पजातकेउक्तं केंद्रत्रय
गैः पापेतरैर्द्दलाख्यावहिमालाच अत्रसौम्याल्लयः पापाल्लयइतिकथंज्ञायंते यथानयोर्द्वयोर्म्मध्येचंद्रमास्तृतीययोः नभवति उच्यते भगवान्गार्गिणोक्तं॥
त्रिकेंद्रगैर्य्यमारार्कैः सर्प्पोदुःखितजन्मदः भोगिजन्मप्रदामालातद्वज्जीवसितेंदुजैः स्रग्योगः पापवर्ज्जितेकेंद्रेषुसर्प्पः सौम्यवर्ज्जितेष्वितिकथंज्ञायते॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उच्यते बादरायणोक्तं केंद्रेष्वपापेषु सितज्ञजीवैः केंद्रत्रिसंस्थैः कथयंति मालां सर्पस्त्वसौम्यैश्चयमारसूर्यैर्योगाविमौ द्वौ कथितौ दलाख्यौ एतौ दलयोगौ द्वौ सूक्ष्मौ कथितौ पराशरेणोक्तौ नत्वन्यैरप्युक्तौ उच्यते अन्यैरुक्तौ अन्यैर्नोक्तौ पराशरेणोक्ताविति स्वशास्त्रे वराहमिहिरेणोक्तौ तथा च मणित्थः केंद्रत्रयगैः पापैः सौम्यैर्वा दलसंज्ञितौ द्वौ योगौ सर्पमालाख्यौ विनिष्टेष्टफलप्रदौ एवमाश्रययोगत्रयमपि योगद्वयमाह अन्यैरुक्तमन्यैर्नोक्तं अन्यैरुक्तत्वाद्वराहमिहिरेणोक्तं गृहीतं

एवं दलयोगद्वयं व्याख्यातं अथाश्रययोगत्रयमन्याचार्यैर्नोक्तं येन कारणेन च नोक्तं तत्कारणमुपजातिकयाह २ योगा व्रजंतीति आश्रयजा योगा रज्जुर्मुशलनलाख्या आकृतियोगैः यवाब्जवज्राण्डजगोलकाद्यैः यवपद्मवज्रविहंगगोलकैरादिग्रहणाद्दाशकटभ्यां च तथा संख्यायोगैः गोलकाद्यैः गोलकयुगशूलकेदारैः संख्यायोगाः आश्रयजायोगाः तुल्यतां समत्वं व्रजंतीत्यतोन्यैः नोक्ताः तद्व्यतिरेकेणाप्याश्रययोगानामवकाशो नास्तीति वराहमिहिरेणोक्ताः येष्वयोगेः समतां यास्यंति यत्र चैतेषामनवकाशस्तदध्यायांते व्याख्यामः केंद्रोपगः प्रोक्तफलाविति दलाख्यौ दलयोगौ द्वौ केंद्रोपगः प्रोक्तफलौ कथितफलौ केंद्रोपगतैः

योगा व्रजंत्याश्रयजाः समत्वं यवाब्जवज्राण्डजगोलकाद्यैः केंद्रोपगः प्रोक्तफलौ दलाख्यावित्याहुरन्ये न पृथक्फलौ तौ ३ आसन्नकें
द्रभवनद्वययोगैर्गदाख्यस्तन्वस्तगेषु शकटं विहगः खबंधौः ॥

५ ग्रहैः प्रोक्तफलेययोः केंद्रत्रयगैः केंद्रस्थानां शुभग्रहाणां शुभं फलमुक्तमशुभानामशुभमिति अत एवेमौ प्रोक्तफलौ कथितफलौ उक्तं च वराहमिहिरेण केंद्रत्रिकोणेषु शुभाः प्रशस्ताः लेषेव पापा न शुभप्रदाः स्युः केंद्रत्रिकोणगैः शुभैः शुभं फलं भवतीति मालानोक्ता एवं केंद्रत्रयगैः पापैः पापफलं भवतीति सर्पोनक्तः एवमन्ये अपरे आहुः अयं यं तितथा तौ न पृथक्फलावुक्तार्थत्वात् यद्येवं तर्हि किमर्थं वराहमिहिरेणोक्ताविति अत्रोच्यते नाभसयोगांतर्भूतत्वात्समस्तदशास्वपि फलदौ भवतः यदा केंद्रोपगानां योगं विना फलमंगीक्रियते तदा स्वदशास्वेव फलं प्रयच्छतीति एतच्च पराशरादीनां मतं तेषां मतं यथा नाभसयोगावेतौ समस्तदशास्वपि फलप्रदौ तेन वराहमिहिरेणोक्तौ अथाकृतियोगान्पंच गदाशकटविहंगशृंगाटकहलाख्यान्वसंततिलकेनाह ३ आसन्नेति आसन्ने निकटवर्त्तिनि केंद्रभवनद्वये कंटकराशियुग्मे यदा सर्वे ग्रहाः भवंति तदा गदाख्यो योगो भवति स च चतुःप्रकारः लग्नचतुर्थस्थैः सर्वग्रहैरेकः चतुर्थसप्तमस्थैर्द्वितीयः सप्तमदशमस्थैस्तृतीयः दशमलग्नस्थैश्चतुर्थः तन्वस्तगेष्विति तुन्वस्तगेषु ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह लग्नसप्तमगेषु सर्वग्रहेषु शकटं भवति खबंध्वोः दशमचतुर्थयोः स्थितेषु सर्वग्रहेषु विहगाख्यो योगः नवमपंचमलग्नस्थैः सर्वग्रहैः शृंगाटकाख्यो योगो भवति

टी.ज. लग्नान्यगेहे हलमिति लग्नं वर्ज्जयित्वा यथासंभवमन्यसर्वग्रहाः परस्परं त्रिकोणगता भवंति तदा हलमिति योगः तज्ज्ञाः होराशास्त्रपंडिताः प्रवदंति कथयंति सच

७३ त्रिः प्रकारः द्वितीयषट्दशमस्थैः सर्वग्रहैरेकः तृतीयसप्तमैकादशस्थैः द्वितीयः प्रकारः चतुर्थाष्टमद्वादशस्थैस्तृतीयः प्रकार इति अथवज्रयवकमलमपि

संज्ञं योगचतुष्टयं वैतालीयेनाह ४ शकटांडमिति शकटवच्छुभैः व्यवस्थितैरंडजवदशुभैश्च वज्रं भवति एतदुक्तं भवति लग्नसप्तमयोः सौम्याश्चतुर्थदश

मयोश्च पापा भवंति नान्यत्र केचित्तदा वज्राख्यो योगो भवति तद्विपरीतगैः यवः त एव ग्रहा यदि विपरीतगता भवंति तदा यवाख्यो योगो भवति शकटवदशुभा

अंडजवच्छुभा एतदुक्तं भवति लग्नसप्तमयोः पापाः स्थिताः चतुर्थदशमयोश्च शुभाः स्थितास्तदा यवाख्यो योगो भवति कमलं त्विति एतैरेव सौम्यपापैः वि

।शृंगाटकं नवमपंचमलग्नसंस्थैर्लग्नान्यगेहे हलमिति प्रवदंति तज्ज्ञाः ४ शकटांडजवच्छुभाशुभैर्वज्रं तद्विपरीतगैर्यवः कम

लं तु विमिश्रसंस्थितैर्वापी तद्यदि केंद्रबाह्यतः ५ पूर्वशास्त्रानुसारेण मया वज्रादयः कृताः चतुर्थे भवने सूर्याज्ज्ञसितौ भवतः क

थम् ६ कंटकादिप्रवृत्तेषु चतुर्गृहगतैर्ग्रहैः ॥५५ मिश्रसंस्थितैश्चतुर्ष्वपि केंद्रेषु समवस्थितैः कमलाख्यो योगो भवति तदेव कमलं यदि केंद्रबाह्यतो

भवति तदा वापीसंज्ञो योगः एतदुक्तं भवति सर्वैरेव केंद्रबाह्यतः स्थितैः केंद्राणि वर्ज्जयित्वाऽन्यत्र पणफरापोक्लिमेषु स्थितैस्तदेव कमलं वापीसंज्ञो भवति।

योगः पणफरेषु चतुर्ष्वापोक्लिमेषु चतुर्षु एवेति अथवज्रयवयोः संभवो न भवति नोच मया पूर्वशास्त्रानुसारेण कृतावित्येतदनुष्टुभाह ५ पूर्वशास्त्रानुसारे

णेति पूर्वशास्त्रानुसारेण पूर्वाचार्यैः मयययवनादिभिः वज्राख्यो योगो कृतः यवाख्यश्च तस्मान्मयापि कृतः वज्रादय इति बहुवचननिर्द्देशोऽन्येषामेवं प्रकाराणां रा.म.

प्रदर्शनार्थः वज्रादयो योगा यद्यपि न संभवंति तथापि पूर्वशास्त्रानुसारेण मया कृताः तान्यनुसृत्य दृष्टेत्यर्थः यतः सूर्यादादित्याच्चतुर्थे भवने चतुर्थराशौ पूर्वेण ७३

पश्चिमेन वा ज्ञसितौ बुधशुक्रौ कथं भवतः न कदाचित् कोदयेऽस्तसमये वा मध्याह्नार्द्धरात्रयोः बुधशुक्रौ भवतः आदित्ये मध्याह्नस्थेऽर्द्धरात्रस्थे वा तयोरुदयेऽस्त

मये वा न भवति अथ यूपेषु शक्तिदंडाख्ययोगचतुष्टयमनुष्टुभाह ६ कंटकादिति होरालग्नं तदाद्यैः केंद्रैः क्रमात्परिपाद्याः लग्नकेंद्रमादितः कृत्वा चतुर्षु गृहेषु॥

CC-0. In Public Domain. Digitization by eGangotri

यथासंभवंसर्वग्रहाणामवस्थानंभवतितदायूपेषु शक्तिदंडाख्याश्चत्वारोयोगाः भवंति तद्यथा लग्नद्वितीयतृतीयचतुर्थेषुचतुर्ष्वपियदासर्वेग्रहाः भवंतितदा
यूपाख्योयोगोभवति अथचतुर्थपंचमषष्ठसप्तमेषुसर्वएवग्रहाः भवंति तदेषुशराख्योयोगः अथसप्तमाष्टमनवमदशमेषुतदाशक्तियोगः अथदशमे
कादशद्वादशलग्नेषुतदादंडयोगइति अथनौकूटछत्रचापार्द्धचंद्राख्ययोगपंचकमनुष्टुभाह ७ नौकूटछत्रेति तद्वत्तेनैवप्रागुक्तेनप्रकारेणलग्नकेंद्रादारभ्यैः
कैकस्मात्केंद्रात्सप्तभिर्ग्रहैः सप्तर्क्षसंस्थितैः नौकूटछत्रचापसंज्ञंचतुष्टयंभवति तद्यथा लग्नद्वितीयतृतीयचतुर्थपंचमषष्ठसप्तमेषुयदासर्वेग्रहाः भवंतित
दानौः नामयोगोभवति एवंचतुर्थपंचमषष्ठसप्तमाष्टमनवमदशमेषुयदाभवंतितदाकूटाख्योयोगोभवति अथसप्तमाष्टमनवमदशमैकादशद्वादशल
ग्नेषुसर्वेग्रहाभवंतितदाछत्राख्ययोगं अथदशमैकादशद्वादशलग्नद्वितीयतृतीयचतुर्थेषुयदासर्वेग्रहाभवंतितदाचापंचापाख्ययोगं अर्द्धचंद्रइति ना
वाद्यैरेवयोगैरन्यर्क्षसंस्थितैरपरराशिव्यवस्थितैरर्द्धचंद्राख्योयोगोभवति नावाद्याः कंटकेषूक्ताः नैश्चान्यर्क्षसंस्थितैः अपरराशिगतैः तेनपणफरेभ्यः आर

यूपेषुशक्तिदंडाख्याहोराद्यैः कंटकैः क्रमात् ७ नौकूटछत्रचापानितद्वत्सप्तर्क्षसंस्थितैः अर्द्धचंद्रस्तुनावाद्यैः प्रोक्तस्त्वन्यर्क्षसंस्थितैः
८ एकांतरगतैरर्थात्समुद्रः षड्गृहाश्रितैः विलग्नादिस्थितैश्चक्रमित्याकृतिजसंग्रहः ९ ॥

ब्धनिरंतरसप्तसुगृहेषुयदासर्वेग्रहाभ
वंत्यापोक्लिमेभ्योवातदार्द्धचंद्राख्यः सचाष्टप्रकारः तद्यथा द्वितीयतृतीयचतुर्थपंचमषष्ठसप्तमाष्टमेषुसप्तसुसर्वेग्रहायदाभवंतितदैकः एवंतृतीयादिनव
मांत्येषुद्वितीयः पंचमादिष्वेकादशान्त्येषुतृतीयः षष्ठादिषुद्वादशान्त्येषुचतुर्थः अष्टमादिषुद्वितीयांतेषुपंचमः नवमादिषुतृतीयांतेषुषष्ठः एकादशादिषुपं
चमांतेषुसप्तमः द्वादशादिषुषष्ठांतेषुयदासर्वेग्रहाभवंतितदाऽष्टमइति अथसमुद्रचक्राख्यौद्वौयोगावनुष्टुभाह ८ अर्थात्द्वितीयस्थानादारभ्यैकांत
रगतैः ग्रहैः षड्गृहाश्रितैः षड्राशिषुव्यवस्थितैः सप्तभिः ग्रहैः समुद्राख्योयोगोभवति विलग्नादिस्थितैरिति अनेनैवप्रकारेणविलग्नाल्लग्नात्प्रभृत्येकां
तरस्थैः षड्गृहेषुसप्तभिर्ग्रहैश्चक्राख्योयोगोभवति तद्यथा लग्नतृतीयपंचमसप्तमनवमैकादशेषुषड्गृहेषुयदासर्वेग्रहाः भवंतितदाचक्राख्योयोगोभवति
इत्येवप्रकारेणआकृतिजानामाकारवशादुत्पन्नानांसंग्रहोव्याख्यातः अथसंख्यायोगसप्तकंमालिन्याह ९ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ संख्यायोगइति सप्तभिर्ग्रहैःसप्तर्क्षसंस्थैः सप्तसुराशिषुगतैरेकापायादेकापगमात्क्रमात्सप्तसंख्यायोगाः स्युःभवेयुः तेचवल्लक्यादयोगोलांताः तद्यथा ये
टी.भ षुतेषुसप्तसुगृहेषुयदासर्वेग्रहाभवंतितदावल्लकीनामयोगोभवति यदाषट्सुगृहेषुसर्वेग्रहाभवति तदादामिनीनामयोगोभवति एवंपंचसुसर्वेग्रहाः पाशः
७४ पाशोयोगः चतुर्षुकेदारः केदारोयोगः त्रिषुशूलःशूलोयोगः द्वयोःयुगःयुगनामयोगः एकस्मिन्राशिषुसर्वेग्रहायदाभवंतितदागोलःगोलनामयोगः अ
न्यान्पूर्वमुक्तान्विहाय पूर्वोक्तानन्यान्योगान्विहायवर्जयित्वाएतेयोगाःभवंति एतदुक्तंभवति यथोक्तानांयोगानांमध्याद्यदिसंख्यायोगस्यसादृश्यंभव
ति तदासंख्यायोगोनांगीकार्य्यः सएवयोगोग्राह्यः इति अथाश्रययोगत्रयजातानांदलयोगद्वयजातानांचफलंवसंततिलकेनाह १० ईर्ष्युः समत्सरः पर
द्धिमत्सरी विदेशनिरतः परदेशाध्यासनशीलः अध्वरुचिः सततमटनः ननुविदेशनिरतएवाध्वरुचिः तत्किमत्रद्वयोःग्रहणं उच्यते विदेशोप्यनेकप्रदे
शाध्यासनशीलोभवतिसततमटनोनभवति एवंविधोरज्ज्वांरज्ज्वाख्येयोगेजातोभवति मानीगर्वितः धनीवित्तवान् बहुषुकृत्येषुकार्य्येष्वासक्तः बहुकर्म्मार

संख्यायोगः सप्तसप्तर्क्षसंस्थैरेकापायाद्वल्लकीदामिनीच पाशःकेदारःशूलयोगोयुगंचगोलश्चान्यान्पूर्वमुक्तान्विहाय १० ईर्ष्युर्विदेश
निरतोऽध्वरुचिश्चरज्ज्वांमानीधनीचमुशलेबहुकृत्यशक्तः व्यंगस्थिराढ्यनिपुणोनलजः स्रगुत्थोभोगान्वितोभुजगजोबहुदुःखभाक्स्या
त् ११ आश्रयोक्तास्तुविफलाभवंत्यन्यैर्विमिश्रिताः॥

भशीलः एवंविधोमुशलाख्येयोगेजातोभवति व्यंगोंगहीनः विगतमंगंयस्य स्थिरोदृढनिश्चयः
आढ्योधनवान् निपुणःकार्य्येषुसूक्ष्मदृष्टिः एवंविधोनलजोनलाख्येयोगेजातोभवति एवमाश्रययोगत्रयजातानांफलंव्याख्यातं स्रगुत्थोभोगान्वितइति स्र राम
गुत्थः स्रग्योगेजातोभोगान्वितोभवति भुजगजोभुजगाख्येसर्प्पयोगेजातोबहुदुःखभाक्स्यात् नानाप्रकाराणांदुःखानांभागीभवति केचिदत्रबहुवचनंपठंति॥ ७४
व्यंगाःस्थिराढ्यानिपुणानलजाःस्रगुत्थाः भोगान्विताभुजगजाबहुदुःखभाजइति नकश्चिद्दोषः एवंदलयोगद्वयजातानांफलंव्याख्यातं अथान्योयोगाश्रययो
गश्चयदासमःकालंयत्रदृश्यतेतत्राश्रययोगस्यनिराकरणार्थमनुष्टुभाह ११ आश्रयोक्ताःत्विति यत्रान्योयोगआश्रययोगश्चभवतितत्राश्रययोगोऽन्येनयवा
दिनामिश्रोभवति मिश्रितत्वाच्चाफलोभवति स्वंफलंनप्रयच्छति एवमन्यैरपरैःविमिश्रितानिःफलाभवंति येश्चमिश्राःसादृश्यंगतास्तेतत्रफलंदद्युः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केचिन्मिश्रायैः तैः फलं तेषामितिपठंति अमिश्राश्चान्ये; यदाभवंति तदास्वफलप्रदा आत्मीयं फलं ददति तत्र चरराशौ लग्नगते स्थिरद्विस्वभावस्थैरमिश्राः॥
स्थिरलग्नेचरद्विस्वभावगतैरमिश्राः द्विस्वभावेलग्नेचरस्थिरगतैरमिश्राइति॥ अथगदाशकटविहगशृंगाटकहलाख्येषुयोगेषुजातानांस्वरूपंवसंततिलकेना
ह॥१२॥ यस्त्वार्थभागिति यक्षोयजनशीलः अर्थभाग्धनानांभाजनः सततंसर्व्वकालमर्थेरुचिः अर्थोर्ज्जनोद्यमशीलः एवंविधोगदाख्ययोगेजातोभवति
तद्वृत्तिभुगिति तदितिशकटपरामर्शः तद्वृत्तिभुक् शकटवृत्तिंभुंक्ते शाकटाजीवीभवतीत्यर्थः सरुजोव्याध्यर्दितः कुदारःकुत्सितभार्य्यः एवंविधोशकटजः
शकटयोगेजातोभवति दूतोटनइति दूतः परसंदेशप्रापणार्थे परस्सकाशगामी अटनः परिभ्रमणशीलः ननुदूतेनाप्यवश्यमटनेनभवितव्यं उच्यते परे
च्छायागन नशीलोदूतः अयंपुनःस्वेच्छयाऽटनः तदुभयभाग्भवति कलहकृत्कलहशीलः एवंविधोविहगाख्ययोगेजातोभवति प्रदिष्टः उक्तः चिरेणसुखीचिर
सुखीवयोंत्यसुखीत्यर्थः एवंविधोशृंगाटकाख्ययोगेजातोभवति अन्यैश्चिरंसुखीचिरसुखीशृंगाटकेव्याख्यातः तच्चाऽयुक्तं यस्माद्भगवान्गार्गिः लग्नपंचमधर्म्मस्थैर्य्यो

मिश्रायेस्तेफलंदद्युरमिश्राः स्वफलप्रदाः १२ यक्षार्थभाक्सततमर्थरुचिर्गदायांतद्वृत्तिभुक् शकटजः सरुजः कुदारः दूतोटनः कलह
कृद्विहगेप्रदिष्टः शृंगाटकेचिरसुखीकृषिकृद्धलाख्ये १३ वज्रेंत्यपूर्व्वसुखिनः शुभगोतिशूरोवीर्य्यान्वितोप्ययसवेसुखिनोवयोंतः॥ ॥

गः शृंगाटकोमतः वयोंतेसुखिनांजन्मतत्रस्यात्कटुभाषिणां कृषिकृद्धलाख्ये हलाख्ययोगेजातः कृषिकृद्भवति कृषिंकरोतीत्यर्थः॥ ॥ अथवज्रयवपद्मवा
पीजातानांस्वरूपंवसंततिलकेनाह १३ वज्रेंत्यपूर्वंसुखिनइति अंतेवयोंतेसुखिनः पूर्वेसुखिनश्च बाल्येसुखीयौवनेदुःखितोवृद्धत्वेपुनरेवसुखीभवतीत्यर्थः
शुभगः सर्व्वजनवल्लभः अतिशूरोऽतीवसंग्रामधीरः एवंविधोवज्राख्ययोगेजातोभवति शौर्य्यान्वितः पराक्रमयुक्तः अथशब्दः पादपूर्णे वयोंतः वयोम
ध्येसुखी अंतः शब्दोऽत्रमध्यपर्य्यायः एवंविधोयवाख्ययोगेजातोभवति विख्यातकीर्त्ति सर्व्वजन प्रसिद्धयशाः ननुकिमत्रविख्यातकीर्त्तिरस्ति उच्यते
अस्तिकश्चित्सायया कीर्त्तिप्रापककर्म्मभिः शनैरपिपरं प्रख्यातकीर्त्तनंप्राप्नोति अमितसौख्यगुणः अपरिमितसौख्योऽपरिमितगुणश्चगुणाः विद्या
शौर्य्योदयः एवंविधः पद्माख्ययोगेजातोभवति तनुस्थिरसुखं तनुस्वल्पंस्थिरंचिरकालस्थायिसुखं यस्यस्वल्पसुखोबहुकालंभवतीत्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ. टी. भ. ७५

निधिकृत् सुमार्वर्थस्थापनशीलः नदाता कदर्य्यः एवंविधोवापीसंज्ञेयोगेजातोभवति अथयूपशरशक्तिदंडाख्येयोगचतुष्टयेजातानांस्वरूपंवसंततिलकेना
ह १४ त्यागात्मवानिति त्यागीदाता आत्मवानप्रमादी क्रतुवरैर्यज्ञश्रेष्ठैश्चयज्ञैः यजते एवंविधोयूपाख्येयोगेजातोभवति हिंस्रेति अतिहिंस्रोअत्यर्थंवधरु
चिः गुप्त्यधिकृतः बंधनपालः शरकृत्शरकारः एवंविधश्चशराख्येयोगेजातोभवति नीचः अधमानामकुलोच्यतानांकर्म्माणांकर्त्ता अलसः क्रियास्वपटुः
सुखधनैर्व्वियुतोभोगवित्तविवर्जितः निःसुखोनिर्द्धनश्च एवंविधः शक्तौयोगेजातोभवति प्रियैः पुत्रादिभिः विरहितः वर्जितः अंत्यवृत्तिः दासवृत्तिः शूद्र
वृत्तिकृदित्यर्थः एवंविधोदंडाख्येयोगेजातोपुरुषोभवति अथनौकूटछत्रकार्म्मुकजातानांस्वरूपंवसंततिलकेनाह १५ कीर्त्यायुतश्चलसुखइति कीर्त्या
युतः कीर्त्यायाः युतः ख्यातयशाः चलसुखः कदाचित्सुखीकदाचिद्दुःखी कृपणः अदाता दानारहितेत्यर्थः चशब्दोत्रसमुच्चयार्थे एवंविधोनौजो नावाख्ये
योगेजातोप्राणिः भवति इति अनृतेप्लवनामतिर्यस्यासावनृतप्लवनः असत्याभिधायीअसत्याभिभाषीच बंधनपः बंधनंपालयतीतितेबंधनपालः केचिन्नृ

विख्यातकीर्त्यमितसौख्यगुणाश्चपद्मेवाप्यांतनुस्थिरसुखीनिधिकृन्नदाता। १४ त्यागात्मवान्क्रतुवरैर्यजतेचयूपेहिंस्रोथगुप्त्यधिकृतः
शरकृच्छराख्ये नीचोलसः सुखधनैर्व्वियुतश्चशक्तौदंडेप्रियैर्विरहितः पुरुषोंत्यवृत्तिः १५ कीर्त्यायुतश्चलसुखः कृपणश्चनौजः कूटेऽनृत
प्लवनबंधनपश्चजातः छत्रोद्भवः स्वजनसौख्यकरोंत्यसौख्यशूरश्चकार्म्मुकभवः प्रथमांत्यसौख्यः १६ अर्द्धेंदुजः सुभगकांतवपुःप्रधान
स्तोयालयेनरपतिप्रतिमस्तुभोगी॥ ऽ। टेऽ नृतकृपणबंधनपश्चजातइतिपठंति एवंविधः कूटाख्येयोगेजातोभवति इतिकूटः छत्रोद्भवइति स्वजनसौ राम. ७५
ख्यकरः स्वजनेषुसुखंकरोतितेस्वजनसौख्यकरः अंत्यसौख्यो वृद्धत्वेसुखितः एवंविधः छत्राख्येयोगेजातोभवति इतिछत्रः अथचापः शूरश्च संग्रामप्रि
यः प्रथमांत्यसौख्यः प्रथमेबाल्येसुखी अंत्येवृद्धत्वेसुखीच एवंविधः कार्मुकंभवश्चापाख्येयोगेजातोभवति इतिचापयोगः अथार्द्धचंद्रसमुद्रचक्रवल्लकीजा
तानांस्वरूपंवसंततिलकेनाह १६ अर्द्धेंदुजइति सुभगः सर्व्वजनप्रियः कांतवपुः कांतावपुःप्रदर्शनीय प्रधानः सर्व्वजनपूज्यः एवंविधोऽर्द्धेंदुजोऽर्द्धचं
द्राख्येयोगेजातोभवति नरपतिप्रतिमः राज्ञातुल्यः भोगी भोगवान् एवंविधस्तोयालये समुद्राख्येयोगेजातोभवति चक्रेति नरेंद्राराजनःतेषांमुकुटाःकिरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चूडामणिरत्नानितेषांद्युतिः कांतिः तयारंजितोछुरितावंघ्री पादौयस्य राजानः तस्यपादयोः पतंति महाराजाधिराजोभवतीत्यर्थः तयोज्ञानादियोगाद्दात्तांपूजनीयो
वा एवंविधश्चक्राख्ययोगेजातोभवति आकृतियोगविंशतिजातानांफलंव्याख्यातंअत्रैवभूपालसंख्यायोगाश्चफलंव्याख्यायते वीणोद्भवश्चेति निपुणःसूक्ष्म
दृष्टिः प्रियगीतनृत्यः गीतप्रियोनृत्यप्रियश्च एवंविधोवीणोद्भवोवीणाख्ययोगेजातोभवति अथदामिनीपाशकेदारशूलजातानांस्वरूपंवसंततिलकेनाह
१७ दाताउदारः अन्यकार्य्येनिरतः परोपकारासक्तः पशुपः पशुरक्षिता बहुपशुभाजोभवति अथवापशुपपाठेपशुनांपालयितारक्षयिता ग्रामाधि
पतिरित्यर्थः एवंविधोदाम्नियोगेजातोभवति पाशइति धनार्ज्जनेविशीलाधनार्ज्जनशीलः धनार्ज्जनविशीलश्चासौसभृत्यबंधुश्च धनार्ज्जनविशीलसभृत्य
बंधुः स्वयमेवधनार्ज्जनेविशीलासन्मार्गेणधनार्ज्जनंकरोति तथाभूताःस्वभृत्याः कर्म्मकराबांधवाश्चभवंति एवंविधःपाशाख्ययोगेजातोभवति केदारजइति
कृषिकरः कृषिंकरोति सुबहूपयोज्यः सुष्ठुशोभनंकृत्वाबहूनामुपयुज्यते उपकरोति एवंविधः केदारजः केदाराख्येयोगेजातोभवति शूरःसमरधीरः स

चक्रेनरेंद्रमुकुटद्युतिरंजितांघ्रीवीणोद्भवश्चनिपुणःप्रियगीतनृत्यः १७ दातान्यकार्य्यनिरतःपशुपश्चदाम्निपाशेधनार्ज्जनविशीलसभृ
त्यबंधुः केदारजःकृषिकरःसुबहूपयोज्यःशूरःक्षतोधनरुचिर्विधनश्चशूले १८ धनविरहितःपाखंडीवायुगेत्वथगोलकेविधनमलि
नोज्ञानोपेतःकुशिल्प्योलसोटनः॥

क्षतः प्रहारितः धनरुचिः अर्थप्रियः केचिद्धनरुचिरितिपठंति विधनश्चदरिद्रिः एवंविधःशूलाख्ययोगेजातोभवति
अथयुगगोलयोः जातस्यस्वरूपंसर्वेषांचनाभसयोगानांसमस्तदशास्वपिफलप्रदर्शनंहरिण्याह १८ धनविरहितइति धनविरहितः अर्थहीनः पाखंडी त्रयी
मार्गच्युपेतः एवंविधोयोगेयुगाख्ययोगेजातोभवति केचिद्धनविरहितःपाखंडीचेतिपठंति वाशब्दोत्रचार्थेअर्थहीनःपाखंडीच अथशब्दआनंतर्थेविधनोऽर्थही
नः मलिनोमलोपेतशरीरः मलिनवासावा अज्ञानोपेतः मूर्खः कुशिल्पीलोकेनिद्यशिल्पकर्त्ता अलसःक्रियास्वसमर्थः अटनोभ्रमणशीलः नन्वत्रालसोऽट
नश्चेतिविरुद्धं उच्यते यद्यपिस्वरूपेणाऽलसस्तथाप्यतिदारिद्र्याद्भोजनक्रियामटनंविनानसंपादयति एवंविधोगोलाख्ययोगेजातोभवति एवंसप्तसुसंख्यायोगे
शुभफलंव्याख्यातं इतिनिगदितायोगाइति इत्येवंप्रकारान्नाभसयोगाः फलैःसार्द्धंसहनिगदिताउक्ताइहास्मिन्नध्याये॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृ. जा. भ. ७६

एतेसमस्तदशास्वपिनियतफलदाः सर्वकालफलप्रदाः चिंत्याविज्ञातव्याः ननुव्रज्जादिषाद्यंनसुखिताप्रदर्शितास्तत्कथंसमस्तदशास्वित्युक्तंउच्यते तेषांवचनाद्य
यादर्शितकालः सुखदुःखयोः भविष्यंति येषांकालविभागोनोक्तस्तेषांसमस्तदशास्वपियथादर्शितसुखदुःखप्रदाभविष्यंति ननुकस्यचित्समग्रंजन्मसुखेनदुः
खेनचैकरूपेणनगच्छति येचभोगिनस्तेपिमानसैःदुःखैरभितप्ताभवंति येपिभिक्षाशिनस्तेपिकदाचित् घर्म्माभितप्ताभवंति शीतलासुद्रुमच्छायासुसुखितामि
त्यात्मानंमन्यंते तस्मादेवमादिसुखंदुःखंसर्वेणसंसारजातेनविपर्य्येणानुभूयते तत्कथंसमस्तदशास्वपियोगाः फलप्रदाभवंति उच्यते नैतेयोगादशाष्टकव
र्गफलहंतारः शुभमशुभंवाफलंददत्यष्टकवर्गाश्रितमपिफलंच अतोयथाकालंयोगाअपिसमग्रजन्मनिफलंददत्येवंमिश्रफलानुभवोभोगिनांदरिद्राणां
चसंभवत्येव एवंतावन्नाभसयोगाध्यायोव्याख्यातः अस्मिन्नध्यायेयद्वक्तव्यंपूर्वंप्रतिज्ञातंतदुच्यते दलयोगाकृतियोगयोःसमकालमुपस्थानंनास्ति तथाद
लयोगैः सहाश्रययोगानांतुल्यकालमुपस्थानंनास्त्येव अथदलयोगैःसहसंख्यायोगायुज्यंते तदादलयोगफलमेवभवति अथाकृतियोगाआश्रययोगैःयु

इतिनिगदितायोगाः सार्द्धंफलैरिहनाभसानियतफलदाश्चिंत्याह्येतेसमस्तदशास्वपि १९

ज्यंतेतदाआकृतियोगफलंभवति अथाकृतियोगाः संख्यायोगैःयुज्यंतेतथाप्याकृतियोगफलंभवति यस्मात्संख्यायोगानामपवादः अन्यान्पूर्वमुक्तान्वि
हाय आश्रययोगानामप्यपवादः आश्रयोक्तास्तुविफलाःभवंत्यन्यैर्विमिश्रिताइति तस्मात्संख्यायोगाआश्रययोगाश्चआकृतियोगैश्चाभिभूयंते अथाश्रय
योगेनसहसंख्यायोगस्योपस्थानभवति तदासंख्यायोगस्यावकाशएवनभवति आश्रययोगेनसंख्यायोगस्यापसमनेकृतेनान्योवकाशः संख्यायोगस्यकिं
त्वेकस्मिन्नाशौयदासर्वेग्रहाःभवंति तदाआश्रययोगएवभवति नत्वाश्रययुगसंख्यायोगानांतुल्येअपवादेआश्रययोगेनसंख्यायोगः कथमभिभूयते॥
उच्यते यदिसंख्यायोगेनाश्रययोगापसमनंभवतितदाआश्रययोगोनभवति संख्यायोगोभवति यत्रयथाआश्रययोगेनसंख्यायोगोभिभूयते तदागोलस्या
वकाशएवनस्यात् परिभाषावेयंनिरवकाशाहिविविधयः सावकाशान्विधीन्वाधंते इति अथैकेकंराशिलग्नगतमधिकृत्यपुराणयवनमतेनयत्सार्द्धयोगश
तमुक्तंतदधुनाप्रदर्श्यंते तेषांतावत्त्रयोविंशतिराकृतियोगाः विंशतयएववराहमिहिरेणाभिहिताः किंतुतेषांमध्याद्गदायोगेनचत्वारोयोगाअभिहिताः॥

राम. ७६

CC-0. In Public Domain. Digitization by eGangotri

लग्नचतुर्थयोः यदा सर्वे ग्रहाः भवंति तदा गदायोगः चतुर्थसप्तमयोः शंखः सप्तमदशमयोः वभुकः दशमलग्नयोः ध्वजः तत्र पूर्वोक्ता विंशतिः शंखवभुक
ध्वजैः सह त्रयोविंशतिः भवति संख्यायोगानां सप्तविंशत्यधिकं शतं एवं सार्द्धं शतं १५०॥ राशिद्वादशकेनाष्टादशशतानि भवंति १८००॥ तत्र सप्तविंशति अधिक
स्य संख्यायोगशतस्योत्पत्तिः प्रदर्श्यते तद्यथैकविकल्पाः सप्त द्विविकल्पाः एकविंशतिः त्रिविकल्पाः पंचत्रिंशत् ३५॥ चतुर्थविकल्पाः पंचाग्निः ३५॥ पंच
विकल्पाः एकविंशति २१॥ षष्टविकल्पाः सप्त॥ सप्तविकल्पाः एकः एतदेकीकृतं सप्तविंशत्यधिकं शतं भवति १२७ एतदेव वराहमिहिरेण विवाहपट
लेप्युक्तं द्वित्र्यादियोगान्परिगृह्य कस्मान्नोक्तं शतं सनिधनं विलग्न इति अथ विकल्पगणितं प्रदर्श्यते तत्राचार्येण विल्पगणितसंहितायामुक्तं पूर्वेण पूर्वेण ग
तेन युक्तं स्थानं विनान्त्यं प्रवदंति संख्या इच्छाविकल्पैः क्रमशोभिनीयनीतेनिवृत्तिः पुनरन्यनीतिरिति अत्र यावत्संख्यानां विकल्पाः क्रियंते तदंकान्तानेकाद्या
नुपर्युपरि स्थापयेत् तद्यथात्र सप्तग्रहैरेकाद्यानां सप्तानांतानां न्यासः १।२।३।४।५।६।७। अत्र पूर्वेण गतेन युक्तं स्थानं विनान्त्यमिति पूर्वश्चासौ गतश्चा
सौ पूर्वगतः तेन पूर्वेण गतेन युक्तमंत्यमुपरिस्थानं विना तद्वर्ज्जयित्वेत्यर्थः प्रथममंकमधः तयोः द्वयोरुपरिस्थयोः क्षिपेत् एवं तत्र त्रीणि जातानि तानि
चत्वोपरि त्रिषु क्षिपेत् एवं तत्र षड्जातानि तानि स्वोपरि चतुर्षु क्षिपेत् एवं तत्र दशरूपाणि जातानि तानि स्वोपरि पंचसु क्षिपेत् तत्र पंचदश जातानि तानि स्वोपरि
षट्सु क्षिपेत् तत्रैकविंशतिर्ज्जातानि अतः पंचकर्म्मणोऽभावात्तदुपरि सप्तैव स्थिताः यदुक्तं स्थानं विनान्त्यं पुनरप्यधःप्रभृत्येवं कृत्वा पंचमे स्थाने पंचत्रिं
शज्जाताः पुनरपि चतुर्थे पंचत्रिंशत् पुनस्तृतीये एकविंशत् पुनः द्वितीये सप्त प्रथमे एकैव॥१।२१।३५।३५।२१।१।१। अथवान्येन प्रकारेण संख्यानय
नं प्रतिलोमं विनिक्षिप्य चानुलोममधः क्षिपेत् अनुलोमं समाहन्यादधस्थेन विभाजयेत् न्यासः अत्र सप्ता नामधोरूपं छेदः॥

७	६	५	४	३	२	१	०
१	२	३	४	५	६	७	०

अनेन भागमपहृत्य लब्धं सप्त ७ एतैः द्वितीयस्थाने षट् संगुण्याधः स्थिताभ्यां द्वाभ्यां भागमपहरेत् लब्धमे कविंशतिः २१॥ एतै
स्तृतीयस्थाः पंचसंगुण्य त्रिभिः भजेल्लब्धं पंचत्रिंशत् ३५ एतैश्चतुर्थस्थानस्थाश्चत्वारि संगुण्य चतुर्भिः भजेल्लब्धं पंचत्रिंशत् ३५॥ एभिः त्रीणि संगुण्य पंचभिः
विभाज्यावाप्तमेकविंशतिः २१ एभिः द्वे संगुण्य षड्भिः विभज्यावाप्तं सप्त ७ एभिरेकं संगुण्य सप्तभिः विभज्यावाप्तमेक एव एवमेकद्वित्रिचतुःपंचषट्सप्तविकल्पाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविकल्पगणितंकृत्वायथेष्टसंख्यानांप्रस्तारेयं अथैतेषांविकल्पानांलोष्टकप्रस्तारेणोद्धारःकर्त्तव्यः इच्छाविकल्पैःक्रमशोभिनीयनीतेनिवृत्तिः पुनरन्त्यनीतिरि
ति यथेष्टसंख्यानांविकल्पानामाद्याद्यारणिलिखेत् तत्रैकविकल्पेकैकंलोष्टचिह्नंकृत्वाविकल्पानुत्पादयेत् द्विविकल्पेष्वाद्यंस्थिरंलोष्टचिन्हंकृत्वाद्वितीयेनलोष्टचि
न्हितेनसहविकल्पा नुत्पादयेत् एवंत्र्यादिषुविकल्पेष्वाद्यं स्थिरलोष्टचिन्हितं कृत्वान्यैश्चरलोष्टचिन्हितैः सहान्यस्त्वाविकल्पाद्येत् एवंकृत्वाप्रथमस्यापस
मनंकार्यं नीतेनिवृत्तिरितिवचनात् ततोन्यस्थिरचिह्नंतंकृत्वान्यसेत्पुनरन्त्यनीतिरितिवचनात् उक्तंच भट्टश्रीशंकरेणवर्णसंख्याककोष्टाख्याक्षेपोक्षेत्तेयसं
ख्यकः क्षेपोक्षेपान्यत्रतत्पूर्वहान्पूर्वोऽप्यनुक्रमात् नयेद्वामाद्यमंत्याक्षाद्येपूर्वेतानिरंतरं ज्ञेयोन्त्यःपुनराद्याश्चकोष्टनिष्टावंधिर्विधिरिति तद्यथैकविकल्पाः रविः
।चंद्रः।भौमः।बुधः।गुरुः।शुक्रः।शनिः एवमेकविकल्पाः सप्त॥७॥ अथद्विविकल्पना रविचंद्रौ रविभौमौ रविबुधौ रविजीवौ रविशुक्रौ रविसौरौ एवमादित्ये
नसहषट् अथतृतीयःविकल्पः शशिभौमौ शशिबुधौ शशिजीवौ शशिशुक्रौ शशिसौरौ एवंचंद्रेणसहपंच भौमबुधौ भौमजीवौ भौमशुक्रौ भौमसौरौ॥
एवंभौमेनसहचत्वारः बुधजीवौ बुधशुक्रौ बुधसौरौ एवंबुधेनसहत्रयःजीवशुक्रौ जीवसौरौ एवंजीवेनसहद्वौ शुक्रसौरौ एवंशुक्रेणसहएकः एवंद्विविकल्पः
एकविंशतिः अथत्रिविकल्पाः रविचंद्रभौमाः रविचंद्रबुधाः रविचंद्रजवाः रविचंद्रशुक्राः रविचंद्रसौराः एवमादित्यचंद्रयोः पंच रविभौमबुधाः रविभौमजीवाः
रविभौमशुक्राः रविभौमसौराः एवमादित्यांगारकयोश्चत्वारः रविबुधजीवाः रविबुधशुक्राः रविबुधसौराः एवमादित्यबुधयोस्त्रयः रविजीवशुक्राः रविजीवसौराः
एवंद्वौ रविशुक्रसौराः एवमेकः एवमादित्येनसहत्रिविकल्पाः पंचदश चंद्रभौमबुधा चंद्रभौमजीवाःचंद्रभौमशुक्राः चंद्रभौमसौराः एवंचंद्रभौमयोश्चत्वारः चंद्रबु
धजीवाः चंद्रबुधशुक्राः चंद्रबुधसौराः एवंत्रयः चंद्रजीवशुक्राः चंद्रजीवसौराः एवंद्वौ चंद्रशुक्रसौराः एकः एवंचंद्रेणसहदश १० भौम बुधजीवाः॥ भौमबुध
शुक्राः भौमबुधसौराः एवंत्रयः भौमजीवशुक्राः भौमजीवसौराः एवंद्वौ भौमशुक्रसौराः एवंभौमेनसहषट् बुधजीवशुक्राःबुधजीवसौराः एवंद्वौ जीवशु
क्रसौरैः एकः एवंत्रिविकल्पाः पंचत्रिंशत् ३५ अथचतुर्विकल्पाः रविचंद्रभौमबुधाः रविचंद्रभौमजीवाः रविचंद्रभौमशुक्राः रविचंद्रभौमसौराः एवंचत्वा
रः रविचंद्रबुधजीवाः रविचंद्रबुधशुक्राः रविचंद्रबुधसौराः एवंत्रयः रविचंद्रजीवशुक्राः रविचंद्रजीवसौराः एवंद्वौ रविचंद्रशुक्रसौराः एवमेकः रविभौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मवुधजीवाः रविभौमवुधशुक्राः रविभौमवुधसौराः एवंत्रयः रविभौमजीवशुक्राः रविभौमजीवसौराः एवंद्वौ रविभौमशुक्रसौराः एवमेकः रविवुधजीवशुक्राः र
विवुधजीवसौराः द्वौ रविवुधशुक्रसौराः रविजीवशुक्रसौराः एवमादित्येनसहविंशतिः चंद्रभौमवुधजीवाः चंद्रभौमवुधशुक्राः चंद्रभौमवुधसौराः एवंत्रयः चंद्र
भौमजीवशुक्राः चंद्रभौमजीवसौराः एवंद्वौचंद्रभौमशुक्रसौराः चंद्रवुधजीवशुक्राः चंद्रवुधजीवसौराः चंद्रवुधशुक्रसौराः चंद्रजीवशुक्रसौराः एवंचंद्रेणसहदश भौ
मवुधजीवशुक्राः भौमवुधजीवसौराः भौमवुधशुक्रसौराः भौमजीवशुक्रसौराः एवंभौमेनसहचत्वारः वुधजीवशुक्रसौराः वुधेनसहएकः एवंचतुर्विकल्पाः
पंचत्रिंशत् ३५ अथपंचविकल्पाः रविचंद्रभौमवुधजीवाः रविचंद्रभौमवुधशुक्राः रविचंद्रभौमवुधसौराः रविचंद्रभौमजीवशुक्राः रविचंद्रभौमजीवसौराः र
विचंद्रभौमशुक्रसौराः रविचंद्रवुधजीवशुक्राः रविचंद्रवुधजीवसौराः रविचंद्रवुधशुक्रसौराः रविचंद्रजीवशुक्रसौराः रविभौमवुधजीवशुक्राः रविभौमवुधजी
वसौराः रविभौमवुधशुक्रसौराः रविभौमजीवशुक्रसौराः रविवुधजीवशुक्रसौराः एवमादित्येनसहपंचदश १५॥ चंद्रभौमवुधजीवशुक्राः चंद्रभौमवुधजीवसौ

अधमसमवरिष्टान्यर्ककेंद्रादिसंस्थशशिनि विनयवित्तज्ञानधीनैपुणानि अहनिनिशिचचंद्रेस्वाधिमित्रांशकेवासुरगुरुसितदृष्टेवित्तवान्स्यात्सु

राः चंद्रभौमवुधशुक्रसौराः चंद्रभौमजीवशुक्रसौराः चंद्रवुधजीवशुक्रसौराः एवंचंद्रमसासहषट् ६ भौमवुधजीवशुक्रसौराः एवंपंचविकल्पाः ॥खीच १
एकविंशतिः २१ अथषड्विकल्पाः आदित्यचंद्रभौमवुधजीवशुक्राः रविचंद्रभौमवुधजीवसौराः रविभौमवुधजीवशुक्रसौराः चंद्रवुधभौमजीवशुक्रसौराः
एवंषड्विकल्पाः अथसप्तविकल्पाः रविचंद्रभौमवुधजीवशुक्रसौराः सप्तविकल्पेएकैव एवंसप्तविंशत्यधिकंविकल्पशतं १२७ व्याख्यातं॥ ॥इतिश्रीभट्टोत्प
लविरचितायां बृहज्जातकविवृतौनाभसयोगाध्यायोद्वादशोध्यायः १२ अथातश्चंद्रयोगाध्यायोव्याख्यायते तत्रादावेवार्कात्केंद्रपणफरापोक्लिमस्थेचंद्रेजात
स्यस्वरूपज्ञानंमालिन्याह॥ अधमसमवरिष्टानीति विनयोनीतिःसुशीलता वित्तंधनं ज्ञानं विज्ञानंशास्त्रावयवबोधः धीःवुद्धिः नैपुण्यंकार्येषुसूक्ष्मदर्शित्वं
अर्कादादित्यात्केंद्रादिसंस्थे केंद्रपणफरापोक्लिमसंस्थेशशिनिचंद्रेजातस्यविनयवित्तज्ञानधीनैपुणान्यधमसमवरिष्टानि निकृष्टमध्यमप्रधानानिभवंति एत
दुक्तंभवति यस्यादित्याज्जन्मनिकेंद्रस्थचंद्रमाभवति तस्यैतानिविनयादीन्यधमानिभवंति अधमत्वमेतेषामभावः यस्माद्यवनेश्वरः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ. टी. भ. ७८

मूर्त्तीन्दरिद्रांश्च पलान्विशीलांश्चंद्रः प्रसूते ऽर्कचतुष्टयस्थः यस्य जन्मसमये पणफरस्थचंद्रः सूर्य्याद्भवति तस्यैतानि मध्यमानि भवंति ॥ नभवनं चासिभवंतीन्य र्थः उत्तमाधमानि मिश्रितानीत्यर्थः यस्यापोक्लिमस्थश्चंद्रो भवति तस्य विनयादीनि वरिष्टानि भवंति तथाच कुर्य्यो द्वितीये धनिनां प्रसूतिमापोक्लिमस्थास्व कुलान्म जानामिति अहनीत्यादी चंद्रे शशिनि स्वे धिमित्रांशकस्थे अहनिनिशि च यथासंख्यं सुरगुरुसितदृष्टे जीवशुक्राभ्यामवलोकिते जातो वित्तवान्धनी सुखी च भोगवां स्याद्भवेत् एतदुक्तं भवति यस्याहनि दिवाजन्म भवति चंद्रश्च यस्मिन्तस्मिन्वांशे स्वनवांशकस्थो भवति स्वस्याधिमित्रांशके स्थितो वा सुरगुरुणा जीवेन दृश्यते तदा पुरुषो वित्तवान्सुखी च भवति अथ यस्य निशि रात्रौ जन्म भवति चंद्रमा स्वनवांशकस्थोऽधिमित्रनवांशकस्थो वा भवति शुक्रेण दृश्यते तदा जातो वित्तवान्सुखी च भव ति अत्राऽहनिनिशि च चंद्रे स्वाधिमित्रांशके वा स्थिते यथासंख्यं सुरगुरुसितदृष्टे केचिद्व्याचक्षते अयुक्तमेतत् यस्माद्भगवान्गार्गिः स्वांशे धिमित्रस्यांशे वा संस्थि तो दिवसे सुखी गुरुणा दृश्यते तत्र जातो वित्तसुखान्वितः निश्येवं भृगुणा दृष्टः शशी जन्मनि शस्यते विपर्य्ययस्थे शीतांशौ जायतेऽल्पधना नराः इति तथाच य

सौम्यैः स्मरारिनिधनेष्वधियोग इंदोस्तस्मिंश्च मूपसचिवक्षितिपालजन्म ॥

वनेश्वरः स्वांशे शशी भार्गवदृष्टमूर्त्तिर्निशीश्वरोत्यंतकरः प्रदिष्टः तदुत्तमोद्भूतिकरः सतु स्याद्दृष्टे दिवा देवपुरोहितेन अथाधियोगाख्यं योगसफलं वसंततिलकेनाह ॥ ८ ॥ सौम्यैरिति इंदोश्चंद्रात्सौम्यैः बुधगुरुसितैः स्मरारिनिधनेषु सप्तमषष्ठाष्टमेषु त्रिषु स्थानेषु द्वयोः वा स्थानयोः एकस्मिन्वा स्थाने सर्वे एव भवंति तदाऽधियोगा ख्यो योगो व्याख्यायते भवति अत्र केचित्षष्ठसप्तमाष्टमानां स्थानानां सौम्यग्रहत्रयस्यावस्थानादन्यूनतायामभियोगो व्याख्यातः तथा चोक्तं यस्माच्छ्रुतकीर्त्तिः निधनं द्यूनं षष्ठं चंद्रस्थानाद्यथा शुभैर्युक्तं अधियोगः सप्रोक्तो व्यासकृतौ सप्तधा पूर्वैः व्यासकृतौ विस्तरकृतौ पूर्वैराचार्य्यैश्चिरंतनैः तस्य सप्तप्रकाराः प्रोक्ताः क थिताः तद्यथा षष्ठे राशौ यदा सर्वे सौम्यग्रहाः भवंति तदैकः सप्तमे द्वितीयः अष्टमे तृतीयः षष्ठसप्तमयोश्चतुर्थः षष्ठाष्टमयोः पंचमः सप्तमाष्टमयोः षष्ठः षष्ठसप्तमाष्टमेषु सप्तम इति एवमेवं स्थितेषु सौम्येष्वधियोगः अर्थादेवमेवं स्थितेषु पापैः पापः मिश्रैः मिश्रः तथा च श्रुतकीर्त्तिः षट्सप्ताष्टमसंस्थैश्चंद्रात्सौम्यैः शुभोऽधियोगः स्यात् पापः पापैरेवं मिश्रैर्मिश्रस्तथैवोक्तः अधियोगजातानां फलमाह तस्मिंश्च मूपतिसचिवक्षितिपालजन्मेति तस्मिन्नधियोगे जातो चमूपः सेनाप ७८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सचिवो मंत्री भवति क्षितिपालो राजा वा भवति तेषां युगपत्संभवात्कथं व्याख्यातं तथा च वादरायणः शशिनः सौम्याः षष्ठे द्यूने वा निधनसंस्थिता वा स्युः जातो नृपति
र्ज्ञेयो मंत्री वा सेनानायको वापि तेनैतदुक्तं भवति बुधगुरुसितैरुत्कृष्टैः वीर्यैः नृपो मध्यमवीर्यैः सचिवः हीनवीर्यैः सेनापतिः एषामन्यतमा अपि संपन्नसौख्यवि
भवाः अतिसौख्यैश्वर्यसंपन्नाः हतशत्रवः नष्टरिपवः दीर्घायुषश्चिरंजीविनः विगतरोगभयाः स्वस्थदेहा निर्भयाश्च भवंति केषांचिन्मते राजयोग एव तथा
च सारावल्यां द्यूनं षष्ठमथाष्टमं शिशिरगोः प्राप्ताः समस्ताः शुभाः क्रूराणां यदि गोचरेण पतिताः सूर्यान्निलयाद्दूरतः भूपालः प्रभवेत्स यस्य जलधेर्वेलावनांतोद्भवैः
सेनामत्तकरींद्रदानसलिलं भृंगैर्मुहुः पीयते १ तथा च मांडव्यः अमित्रया मित्रनिधनमयवाशीतरुचितो गताः सर्वे सौम्यास्तमिह जनयेयुर्नरपतिं धृतेनैवासेकं
गतवति विषादास्तु पायसाम्रतापाग्निर्यस्याज्वलति हृदये शत्रुसुहृदां २ अथ सुनफानफादुरुधराकेमद्रुमाख्ययोगचतुष्टयं शार्दूलविक्रीडितेनाह ॥२॥ हित्वा
र्कमिति अथाऽर्कमादित्यं हित्वा त्यक्त्वा यदाऽन्यः कश्चिद्ग्रहो भौमादिकः शीतांशोः चंद्रात्स्वांत्योभयस्थो भवति द्वितीयस्थो द्वादशस्थो वा द्वितीयद्वादशस्थो वा द्वौ भव

संपन्नसौख्यविभवा हतशत्रवश्च दीर्घायुषो विगतरोगभयाश्च जाताः २ हित्वार्कं सुनफानफादुरुधुराः स्वांत्योभयस्थैर्ग्रहैः शीतांशोः क-
थितोऽन्यथा तु बहुभिः केमद्रुमोऽन्यैस्त्वसौ ॥ ११

तत्र तदा सुनफा अनफा दुरुधुराख्यं योगत्रयं भवति एतदुक्तं भवति अर्कं हित्वा यदाऽन्यो ग्रहः कश्चिच्चंद्रा
त् द्वितीयस्थाने भवति तदा सुनफानामयोगो भवति अथाऽर्कं वर्जयित्वा चंद्रात् द्वादशे भवति कश्चित्तदा अनफानामयोगो भवति एवं चंद्रात् द्वितीयद्वादश
गौ ग्रहौ भवतस्तदा दुरुधुरानामयोगो भवति अत्र योगत्रये व्यादित्यो द्वितीये द्वादशे वा स्थाने भवति तदा न योगभंगकृद्भवति किंतु योगकर्तॄणां मध्ये न गण्यते ए
ते योगाः बहुभिराचार्यैः कथिताः अन्यथा तु बहुभिः केमद्रुमः उक्तः अन्यथाऽस्य योगत्रयस्याऽभावे बहुभिराचार्यैः केमद्रुमाख्यो योगोऽभिहितः एतदुक्तं भव
ति चंद्रात् द्वितीये न द्वादशे कश्चिद्ग्रहो भवति तदा केमद्रुमाख्यो योगो भवति अन्ये त्वसावित्ति अन्येषां गर्गादीनामेवं मतं केंद्रे जन्मलग्नकेंद्रे शीतकरे चंद्रे
वा भौमादिग्रहयुते भौमादिग्रहविरहितयोरपि चंद्राद्द्वितीयद्वादशस्थानयोः केमद्रुमो न भवति केंद्रे ग्रहयुत इत्यत्र कैश्चिच्चंद्रकेंद्रमेव केवलं व्याख्यातं तथा
युक्तं चंद्रकेंद्रे ग्रहयुते चंद्रमसोऽपि योगांतर्भवति शीतकरे ग्रहयुत इत्येतदपार्थकं स्यात् अत्र च भगवान्गार्गिः व्ययार्थे केंद्रगश्चंद्रद्विनाभानुं न चेद्ग्रहः ॥

CC-0. In Public Domain. Digitization by eGangotri

कश्चित्स्याद्वा विना चंद्रं लग्नात्केंद्रगतोऽथवा योगः केमद्रुमो नाम तदास्याद्यत्रगर्हिताः भवंति निंदिताचारा दारिद्र्याप्तचसंयुताः तथाच सारावल्यां सुनफा-
नफादुरुधुराः क्रमेणयोगाः भवंतिरविरहितैः विर्त्ताऽत्योभयसंस्थैः केरववनवांधवाद्विहगैः॥ एतेनयदायोगाः कैंद्रेग्रहवर्जितंशशांकश्च केमद्रुमोतिकष्टः
शशिनिचसर्वग्रहादृष्टे अन्येआचार्य्यानेच्छंति वराहमिहिरस्तुपुनरिच्छत्येव यस्मिन्नर्थेतस्यैवतद्वाक्यं अन्यथाकेमद्रुमइतिएवमुक्तापरमतमुक्तं अन्यैर
सौएवकेंद्रेशीतकरेऽथवाग्रहयुतेकेमद्रुमोनेष्यते खल्पजातकेपि तेनसुनफानफादुरुधुराऽभावेकेमद्रुमोक्रमम् तथाच रविवर्ज्यंद्वादशगैरनफाचंद्रा
द्वितीयगैःसुनफा उभयस्थितैर्दुरुधुराकेमद्रुमसंज्ञिकोतोन्यः सत्यस्यापि सुनफानफादुरुधुराऽभावेकेमद्रुमः तथाच सुनफात्वनफायोगौदौरुधुरश्च
द्रसेस्थितःसेत्रात् प्राक्रुएष्टतोग्रहेंद्रेरुभयगतेस्तेषुरविवर्ज्यं केमद्रुमोन्ययोयोगोन्यथाभवेघत्रगर्हितंजन्म केचित्केंद्रनवांशकेषिति केचिद्राचार्य्याःकें
द्रेषुकेचिच्चनवांशकेष्वेतद्योगत्रयंवदंति यथाचंद्राद्वितीयद्वादशोभयस्थैःग्रहैः सुनफाद्यायोगाव्याख्याताः तथाकेचिच्छ्रुतकीर्त्तिजीवशर्म्माप्रभृतिभिः

केंद्रेशीतकरेऽथवाग्रहयुतेकेमद्रुमोनेष्यतेकेचित्केंद्रनवांशकेषुचवदंत्युक्तंप्रसिद्धानते ३॥

केंद्रवशान्नवांशकवशाच्चव्याख्याताः एतदुक्तंभवति ताराग्रहैश्चंद्राच्चतुर्थस्थानस्थैःसुनफा दशमस्थानस्थैरनफा चतुर्थदशमस्थितैःदुरुधुरा अ-
तोऽन्यथाकेमद्रुमः तथाचश्रुतकीर्त्तिः चंद्राच्चतुर्थैःसुनफादशमस्थितैःकीर्त्तितोऽनफाविहगैः उभयस्थितैर्दुरुधुराकेमद्रुमसंज्ञितो न्यः केचिन्नवां- राम॰ ७८
शकेषुतुवदंति यत्रतत्रराशौयद्राशिसंबंधिनवांशकेचंद्रमाभवति तस्माद्राशेः योद्वितीयोराशिः स्तत्रयदिताराग्रहोभवतितदासुनफा अथचंद्रनवां
शकराशेः द्वादशेताराग्रहोभवतितदाऽनफा अथचंद्रनवांशकराशेः द्वितीयेद्वादशेचयदाग्रहोभवतःतदादुरुधुरा अतोन्यथाकेमद्रुमः तथाच
चंद्रनवांशकराशितोःद्विद्वादशराशौयदिग्रहरहितोभवतःतदाकेमद्रुमः तथाचजीवशर्म्मा यद्राशिसंज्ञेशीतांशुर्नवांशेजन्मनिस्थितः तद्द्वितीयस्थि
तैर्योगः सुनफाख्यःप्रकीर्त्तितः द्वादशैरनफाज्ञेयोग्रहैर्द्विद्वादशस्थितैः प्रोक्तोदुरुधुरायोगोन्यथाकेमद्रुमःस्मृतः उक्तिःप्रसिद्धानतेयेषामेवंविधंम
तंतेषांउक्तिःलोकेनप्रसिद्धा तन्मतंवृद्धज्योतिषिकैःनांगीकृतमित्यर्थः अथसुनफानफादुरुधुराख्यंप्रकारज्ञानमिंद्रवज्रयाह ३॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिंशत्सरूपाइति सरूपाः त्रिंशदेकत्रिंशत् एकत्रिंशत्सुनफाख्यायोगाः तावंतएवानफाख्याः षष्टित्रयमशीतिरधिकं शतंदुरुधुराप्रभेदानां एषांपूर्ववद्विकल्पगणितं
इच्छाविकल्पैरित्यादि एतत्श्लोकेषुक प्रस्तारं पूर्वमेवनाभसयोगाध्याये व्याख्यातं इच्छाविकल्पैः क्रमशः परिपाद्यान्यत्रलोष्टुकमभिनीयनीतेनिवृत्तिः कार्य्या पुनःभू
योन्यनीतिरित्यत्रस्यानांतरेचालनं अथसुनफादयोभौमवुधगुरुसितासितैः पंचभिनिः पाद्यंते तस्मादिच्छाविकल्पाः पंच तेषांन्यासः अत्रप्राग्वत्पूर्वेणपूर्वेणगणि
तेनयुक्तस्यानंविनांत्यंप्रवदंतिसंख्यामितिकृत्वाजातं ५।४।३।२।१ अथवाप्राग्वत्सैवसंख्याजाता

५	४	३	२	१
१	२	३	४	५

एकमेकविकल्पाः पंच द्विविकल्पादश त्रिविकल्पा
दश चतुर्विकल्पापंच पंचविकल्पाएकः एवमेकत्रिंशत् ५।१०।१०।५।१।।तद्यथाद्वितीयेचंद्रा द्भौमः बुधः बृहस्पतिःशुक्रः सौरः एवमेकविकल्पाः पं
च अथद्विविकल्पाः भौमवुधौ भौमजीवौ भौमशुक्रौ भौमसौरौ वुधजीवौ वुधशुक्रौ वुधसौरौ जीवशुक्रौ जीवसौरौ शुक्रसौरौ एवंद्विविकल्पाः दश १०।।अथत्रिवि
कल्पाः भौमवुधजीवाः भौमवुधशुक्राः भौमवुधसौराः भौमजीवशुक्राः भौमजीवसौराः भौमशुक्रसौराः वुधजीवशुक्राः बुधजीवसौराः वुधशुक्रसौराः जीवशुक्र

त्रिंशत्सरूपाःसुनफानफाख्याःषष्टित्रयंदौरुधुरेप्रभेदः इच्छाविकल्पैःक्रमशोभिनीयनीतेनिवृत्तिःपुनरन्यनीतिः ५ ॥ ६ ॥

सौराः एवंत्रिविकल्पादश १० अथचतुर्विकल्पाः भौमवुधजीवशुक्राः भौमवुधजीवसौराः भौमजीवशुक्रसौराः भौमवुधशुक्रसौराः वुधजीवशुक्रसौराः एवंचतु
र्विकल्पाः पंच ५ अथपंचविकल्पाः भौमवुधजीवशुक्रसौराःएवंपंचविकल्पमेकः १ एवमेकत्रिंशत् ३१ सुनफायोगाः उत्पादिताः अनेनैवप्रकारेणद्वादशस्थैःअ
नफाभेदाएकत्रिंशत् अथदुरुधुराविकल्पाः एषांलोष्टुकप्रस्ताराभावात्स्वबुध्येच्छाविकल्पैःक्रमशोभिनीयत्तिन्यायेनव्युत्पत्तिः एको द्वितीये द्वितीयोद्वादशे एको
द्वादशेद्वितीया द्वितीये तद्यथा भौमवुधौ १।। वुधभौमौ ।।२।। भौमजीवौ ३ जीवभौमौ ४ भौमशुक्रौ ५ शुक्रभौमौ ६।।भौमसौरौ ७ सौरभौमौ ८।। वुधजीवौ ९ जीववुधौ
१०।।वुधशुक्रौ ११ शुक्रवुधौ १२।।वुधसौरौ १३ सौरवुधौ १४ जीवशुक्रौ १५ शुक्रजीवौ १६ जीवसौरौ १७ सौरजीवौ १८।।शुक्रसौरौ १९ सौरशुक्रौ २०।। अथैको द्वितीयेद्वा
दशेद्वौ द्वितीयेद्वौद्वादशेचैकः तद्यथा भौमः वुधजीवौ १ वुधजीवभौमौ २ जीवः शुक्रवुधौ ३ वुधशुक्रौभौमः ४।।भौमः वुधसौरौ ५ वुधसौरौभौमः ६।। भौमः जी
वशुक्रौ ७ जीवशुक्रौभौमः ८ ।।भौमःजीवसौरौ ९ जीवसौरौभौमः १०।।भौमः शुक्रसौरौ ११ शुक्रसौरौभौमः १२।।वुधः भौमजीवौ १३ भौमजीवौवुधः १४ ।।वुधःभौम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुधः जीवसौरौ २२ जीवसौरौ बुधः २३
बृ. शुक्रौ: १५ भौमशुक्रौ बुधः १६ बुधः भौमशुक्रौ १७ बुधः भौमसौरौ १८ भौमसौरौ बुधः १९ बुधः जीवशुक्रौ २० जीवशुक्रौ बुधः २१॥ जीवः भौमसौरौ ३० भौमसौरौ जीवः ३१ जीवः बु
टी.भ बुधः शुक्रसौरौ २४ शुक्रसौरौ बुधः २५ जीवः भौमबुधौ २६ भौमबुधौ जीवः २७ जीवः भौमशुक्रौ २८ भौमशुक्रौ जीवः २९ शुक्रः भौमबुधौ ३८ भौमबुधौ शुक्रः ३९ शुक्रः भौमजी
८० धशुक्रौ ३२ बुधशुक्रौ जीवः ३३ जीवः बुधसौरौ ३४ बुधसौरौ जीवः ३५ जीवः शुक्रसौरौ ३६ शुक्रसौरौ जीवः ३७ शुक्रः बुधसौरौ ४६ बुधसौरौ शुक्रः ४७ शुक्रः जीवसौरौ
वौ ४० भौमजीवौ शुक्रः ४१ शुक्रः भौमसौरौ ४२ भौमसौरौ शुक्रः ४३ शुक्रः बुधजीवौ ४४ बुधजीवौ शुक्रः ४५ शुक्रः भौमशुक्रौ ५४ भौमशुक्रौ सौरः ५५ सौरः बुधजीवौ ५६ बु
४८ जीवसौरौ शुक्रः ४९ सौरः भौमबुधौ ५० भौमबुधौ सौरः ५१ सौरः भौमजीवौ ५२ भौमजीवौ सौरः ५३ सौरः भौमशुक्रौ ५४ भौमशुक्रौ सौरः ५५ सौरः बुधजीवौ ५६ बु
धजीवौ सौरः ५७ सौरः बुधशुक्रौ ५८ बुधशुक्रौ सौरः ५९ सौरः जीवशुक्रौ ६० जीवशुक्रौ सौरः ६१ एवमेकत्र जाताः ८० अथैको द्वितीये द्वादशे त्रयः त्रयो द्वितीये द्वाद
शे चैकः तद्यथा भौमः बुधजीवशुक्राः १ बुधजीवशुक्राः भौमः २ भौमः बुधजीवसौराः ३ बुधजीवसौराः भौमाः ४ भौमः बुधशुक्रसौराः ५ बुधशुक्रसौराः भौमः ६
भौमः जीवशुक्रसौराः ७ जीवशुक्रसौराः भौमः ८ बुधः भौमजीवशुक्राः ९ भौमजीवशुक्राः बुधः १० बुधः भौमजीवसौराः ११ भौमजीवसौराः बुधः १२ बुधः भौम
शुक्रसौराः १३ भौमशुक्रसौराः बुधः १४ बुधः जीवशुक्रसौराः १५ जीवशुक्रसौराः बुधः १६ जीवः भौमबुधशुक्राः १७ भौमबुधशुक्राः जीवः १८ जीवः भौमबुधसौराः
१९ भौमबुधसौराः जीवः २० एकत्र १०० जीवः भौमशुक्रसौराः १ भौमशुक्रसौराः जीवः २ जीवः बुधशुक्रसौराः ३ बुधशुक्रसौराः जीवः ४ शुक्रः भौमबुधजीवाः ५
भौमबुधजीवाः शुक्रः ६ शुक्रः भौमबुधसौराः ७ भौमबुधसौराः शुक्रः ८ शुक्रः भौमजीवसौराः ९ भौमजीवसौराः शुक्रः १० शुक्रः बुधजीवसौराः ११ बुधजीवसौ
राः शुक्रः १२ सौरः भौमबुधजीवाः १३ भौमबुधजीवाः सौरः १४ सौरः भौमबुधशुक्राः १५ भौमबुधशुक्राः सौरः १६ सौरः भौमजीवशुक्राः १७ भौमजीवशुक्राः एम.
सौरः १८ सौरः बुधजीवशुक्राः १९ बुधजीवशुक्राः सौरः २० एवमेकत्र १२० अथ द्वितीये एको द्वादशे चत्वारः चत्वारो द्वितीये द्वादशे चैकः तद्यथा भौमः बुधजीवशु ८०
क्रसौराः १ बुधजीवशुक्रसौराः भौमः २ बुधः भौमजीवशुक्रसौराः ३ भौमजीवशुक्रसौराः बुधः ४ जीवः भौमबुधशुक्रसौराः ५ भौमबुधशुक्रसौराः जीवः ६ शुक्रः
भौमबुधजीवसौराः ७ भौमबुधजीवसौराः शुक्रः ८ सौरः भौमबुधजीवशुक्राः ९ भौमबुधजीवशुक्राः सौरः १० एवमेकत्र १२० अथ द्वौ द्वादशे द्वावेव द्वितीये तद्यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भौमवुधौजीवशुक्रौ १ जीवशुक्रौभौमवुधौ २ भौमवुधौजीवसौरी ३ जीवसौरीभौमवुधौ ४ भौमवुधौशुक्रसौरी ५ शुक्रसौरीभौमवुधौ ६ भौमजीवौशुक्रवुधौ ७ शु
क्रवुधौभौमजीवौ ८ भौमजीवौवुधसौरी ९ वुधसौरीभौमजीवौ १० भौमजीवौशुक्रसौरी ११ शुक्रसौरीभौमजीवौ १२ भौमशुक्रौवुधजीवौ १३ वुधजीवौभौमशुक्रौ १४
भौमशुक्रौवुधसौरी १५ वुधसौरीभौमशुक्रौ १६ भौमशुक्रौजीवसौरी १७ जीवसौरीभौमशुक्रौ १८ वुधजीवौभौमसौरी १९ भौमसौरीवुधजीवौ २० एवमेकत्र १५०॥
भौमसौरी। वुधशुक्रौ १ वुधशुक्रौ। भौमसौरी २ भौमसौरी। जीवशुक्रौ ३ जीवशुक्रौ। भौमसौरी ४ वुधजीवौ। शुक्रसौरी ५ शुक्रसौरी। वुधजीवौ ६ वुधशुक्रौ जीवसौरी
७ जीवसौरी वुधशुक्रौ ८ जीवशुक्रौ। वुधसौरी ९ वुधसौरी। जीवशुक्रौ १० एवमेकत्र १६० द्वौ द्वितीये त्रयो द्वादशे द्वादशे द्वौ त्रयो द्वितीये च तद्यथा भौमवुधौ जीवशु
क्रसौराः १ जीवशुक्रसौराः भौमवुधौ २ भौमजीवौ वुधशुक्रसौराः ३ वुधशुक्रसौराः। भौमजीवौ ४ भौमशुक्रौ। वुधजीवसौराः ५ वुधजीवसौराः भौमशुक्रौ ६ भौ
मसौरी। वुधजीवशुक्राः ७ वुधजीवशुक्राः भौमसौरी ८ वुधजीवौ। भौमशुक्रसौराः ९ भौमशुक्रसौराः वुधजीवौ १० एवमेकत्र १७० वुधशुक्रौ। भौमजीवसौराः

स्वयमधिगतवित्तः पार्थिवस्तत्समो वा भवति हि सुनफायां धीधनख्यातिमांश्च प्रभुरगदशरीरः शीलवान्ख्यातकीर्त्तिर्विषयसुखसुवेषो निर्वृ

१ भौमजीवसौराः। वुधशुक्रौ २ वुधसौरी। भौमजीवशुक्राः ३ भौमजीवशुक्राः। वुधसौरी ४ जीवशुक्रौ। भौमवुधसौराः ५ भौमवुधसौ ऽऽ तश्चानफायां ५
राः। जीवशुक्रौ ६ जीवसौरी। भौमवुधशुक्राः ७ भौमवुधशुक्राः। जीवसौरी ८ शुक्रसौरी। भौमवुधजीवाः ९ भौमवुधजीवाः। शुक्रसौरी १० एवमेकत्र १८०॥ एवं दु
रुधुरायोगभेदाः शतमशीत्यधिकं प्रदर्शितं अथ सुनफानफयोः योगजातस्य स्वरूपविज्ञानं मालिन्याह ॥४॥ स यमिति स्वयमात्मनाऽधिगतमर्ज्जितं वित्तं येन स बा
हूर्जितधनः पार्थिवो राजा भवति तत्समो वा यदि राजा न भवति तदा राजतुल्यः धीधनख्यातिमान् बुद्धिवित्तकीर्त्तिभिः युक्तः एवंविधः सुनफायां योगे जातो भव
ति प्रभुरिति प्रभुरप्रतिहताज्ञः अगदशरीरो निरुजदेहः अविद्यमाना गदा रोगा यस्य शीलवान् दमविनयादिभिः गुणैः युक्तः ख्यातकीर्त्तिः प्रथितयशाः जनविदि
तसद्गुणः शब्दस्पर्शरसरूपगंधा विषयाः तत्सुखैः युक्तः ननु किं विषयव्यतिरिक्तं सुखमप्यस्ति उच्यते अस्ति यद्योगिनां मनःसुखं सुवेषः अनुलेपनालंकार
णमाल्यसद्वस्त्रधारणशीलः निर्वृतः मनोदुःखविनिर्मुक्तः एवंविधोऽनफायां योगे जातो भवति अथ दुरुधुराकेमद्रुमयोगे जातयोः स्वरूपं वसंततिलकेनाह ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ. उत्पन्नभोगसुखभुगिति यत्रतत्र यथातथोत्पन्नैः भोगैः सुखानि भुंक्ते धनेन वित्तेन वाहनैरश्वादिभिराढ्यो बाहुल्यः त्यागान्वितो दाता सुभृत्यः शोभनभृत्यः ए
टी. प. वंविधो दुरुधुराप्रभवो दुरुधुरायोगे जातो भवति केमद्रुमइति मलिनः मलवासाः स्नानालस्यश्च दुःखितः शरीराद्यैः मानसाद्यैः दुःखैरन्वितः नीचः स्वकुलानु
८१ चितः धर्मकर्मकरः निःस्वः दरिद्रः प्रेष्यः दासकर्मकरः खलः दुर्जनस्वभावः एषामुक्तार्थानामन्यतमेन युक्तो यदि नृपतेः राज्ञोपि वंशे कुले जातः तथा
प्येवंविधः केमद्रुमजातो भवति केचिदत्र बहुवचनं पठंति केमद्रुमे मलिनदुःखितनीचनिःस्वाः प्रेष्याः खलाश्च नृपतेरपि वंशजाताः तथापि न कश्चिद्दोषः ६
एवं तावत्सुनफानफादिषु सामान्येन फलमभिधायेदानीं ग्रहवशाद्विशेषफलं वसंततिलकेनाह ६ उत्साहवान्बली नित्योद्यमशीलः शौर्यवान् रणप्रियः धन
वान् वित्तान्वितः साहसवान् समीक्षितकार्यकरः यद्यत्कार्यं यदाकालेत्वविचार्य करोति यः स साहसिकः एवंविधो महीजोंगारको यदि योगकर्त्ता भवति तदा जा

उत्पन्नभोगसुखभुग्धनवाहनाढ्यस्त्यागान्वितो दुरुधुराप्रभवः सुभृत्यः केमद्रुमे मलिनदुःखितनीचनिःस्वाः प्रेष्याः खलाश्च नृपतेरपि
वंशजाताः ६ उत्साहशौर्यधनसाहसवान्महीजः सौम्यः पटुः सुवचनो निपुणः कलासु जीवोर्थधर्मसुखभुग्नृपपूजितश्च कामी भृगुर्ब
हुधनो विषयोपभोक्ता ७ परविभवपरिच्छदोपभोक्ता रवितनयो बहुकार्यकृद्गणेशः ॥

तो भवति पटुः दक्षः सुवचनः शोभनवाक् कलासु निपु
णः गीतवाद्यनृत्तचित्रपुस्तककर्मादिषु सुदृष्टिः यदि सौम्यो बुधो योगकरस्तदैवंविधो जातो भवति अर्थभाक् धनानां भाजनः धर्मभाक् धर्मक्रियास्वनु
रक्तः सुखभाक् नित्यसुखितः नृपपूजितः राज्ञां मान्यः यदि जीवो बृहस्पतिः योगकरः तदैवंविधो जातो भवति कामी कामुकः स्त्रीलोलः बहुधनः प्रभू
तार्थः विषयोपभोक्ता विषयानामिंद्रियार्थानामुपभोक्ता उपभोगशीलः तत्सुखान्वितः यदि भृगुः शुक्रो योगकरस्तदैवंविधो जातो भवति ७ अथ शनैश्चरे
योगकर्त्तरि पुरुषस्य स्वरूपं चंद्रमसि च द्वयाद्द्वयेजातस्य स्वरूपज्ञानं प्रचिताक्षयाह ॥७॥ पर अर्जितानां विभवानां मैश्वर्याणां परिच्छदानां गृहवस्त्रवाहनपरि एम. ८१
वाराणां उपभोक्ता भवति बहुकार्यकृत् नानाविधानां कार्याणां कर्त्ता गणेशः बहुगणस्वामी गणाः संघाः तेषां प्रभुः एवंविधो रवितनयः शनैश्चरो योगक
रो यदि भवति तदा जातो भवति अत्र योगत्रये सुनफानफादुरुधुराख्ये एकैकस्य ग्रहस्य फलमुक्तं द्व्यादिसंभवि फलं द्व्यादिकं वाच्यं अस्माभिरिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उडुपश्चंद्रोऽह्नि दिने दृश्यमूर्त्तिः दृश्यमानशरीरः अशुभकृदनिष्टफलकर्त्ता एतदुक्तं भवति दिवाजन्मनि चंद्रमा दृश्ये चक्रार्द्धे स्थितः अशुभं फलं करोति सपुरु
षोदारिद्र्यादियुक्तो भवतीत्यर्थः गलिततनुरदृश्यमूर्त्तिः शुभः एतदुक्तं भवत्यदृश्ये चक्रार्द्धे स्थितः अशुभकृज्जातऐश्वर्यादियुक्तो भवति अन्यथान्यदूह्यं ॥
उक्तप्रकारादन्यथास्थे चंद्रमसि फलमन्यदूह्यं स्वबुद्ध्या विकल्पनीयं एतदुक्तं भवति रात्रौ जन्मन्यदृश्ये चक्रार्द्धे यस्य चंद्रो भवति तस्याऽशुभं जन्म यस्य दृश्ये चक्रा
र्द्धे चंद्रो भवति तस्य शुभं जन्म यस्य दृश्ये भवति तस्याशुभं जन्म भवतीत्यर्थः अथ लग्नाच्चंद्राद्वा यस्योपचये सौम्यग्रहाः भवंति तस्य फलं वसंततिलकेनाह ८
लग्नादिति यस्य जन्मनि लग्नात्सौम्यग्रहाः बुधजीवसिताः उपचयगताः भवंति सर्व्वे एव स पुरुषोऽतीव वसुमानत्यर्थं धनवान्भवति यस्य शशांकाच्चंद्रादप्युप
चये सर्व्वे एव सौम्यग्रहाः भवंति सोपि धनवान्भवति एवं समस्तैः त्रिभिरेतत्फलं द्वाभ्यां समः यस्य लग्नाच्चंद्राद्वा द्वौ ग्रहौ सौम्यावुपचयगतौ भवतः समो मध्यधनो
भवति नातिबहुधनो भवतीत्यर्थः तदूनतायामिति तदूनतायां लग्नाच्चंद्राद्वा यस्यैकः सौम्यग्रहः उपचयगतो भवति सोऽल्पवसुमान्किंचिद्धनान्वितो भवति अर्थो

अशुभकृदुडुपोऽह्नि दृश्यमूर्त्तिर्गलिततनुश्च शुभोऽन्यथान्यदूह्यं ८ लग्नादतीव वसुमान्वसुमांश्च शशांकात्सौम्यग्रहैरुपचयोपगतैः समस्तैः
द्वाभ्यां समोऽल्पवसुमांश्च तदूनतायामन्येष्वसत्स्वपि फलेष्विदमुत्कटेन ९ ॥ तिग्मांशुर्ज्जनयत्युषेशसहितो यंत्राश्मकारं नरं भौमेनाघरतं बु
धेन निपुणं धीकीर्त्तिसौख्यान्वितम् ॥ ३ ॥ ५ देवलग्नाच्चंद्राद्वा यस्योपचयेन कश्चित्सौम्यग्रहो भवति स दरिद्रो भवति यस्य लग्नचंद्रयोः द्वयोरपि सौम्यग्र
हाः उपचयस्थाः कयापि युक्त्या भवंति सोऽप्यऽतीव वसुमान्भवति अन्येष्वसत्स्वपि फलेष्विति अन्येष्वपरेष्वसत्स्वशोभनेष्वपि फलेषु सत्स्विदं फलमुत्कटेन बा
हुल्येन भवति एतदुक्तं भवति यस्य लग्नाच्चंद्राद्वा उपचयस्थाः सौम्यग्रहाः भवंति तस्याऽन्ययोगमशुभमपि केमद्रुमादिफलमभिभूयेदं शुभमेव फलमुत्कटत्वेन प्रा
बल्येन भवतीति ॥ ९ ॥ ॥ इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृत्तौ चंद्रयोगाध्यायस्त्रयोदशः १३ ॥ ॥ अथ द्विग्रहयोगाध्यायो व्याख्यायते तत्रा दित्ये
चंद्रादियुक्ते जातस्य स्वरूपं शार्दूलविक्रीडितेनाह ॥ १ ॥ तिग्मांशुरिति तिग्मांशुरादित्यः उषेशेन चंद्रमसा सहितो युक्तः उषा रात्रिः उषायाः ईशः उषेशः रात्रिनाथः
नरं मनुष्यं यंत्राश्मकारं जनयति यंत्राणि सहस्रघातिप्रभृतीन्यश्मनः पाषाणाः तत्क्रियासु तत्कर्म्मसु निरंतं सक्तं तं करोति एवं भौमेन सहैकराशिगतोऽर्कोऽघर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृ· तंपापासक्तंजनयति बुधेनक्रियासुनिपुणंसूक्ष्मदृष्टिंधीकीर्त्तिसौख्यान्वितम् धीबुद्धिः कीर्त्तिःयशः सौख्यंसुखंसुखभावः एतैरन्वितंसयुक्तं वाक्पतिनागुरु
टी·भ णाक्रूरं विषमस्वभावमन्यकार्य्यनिरतंपरकर्म्मतत्परंजनयति शुक्रेणरंगायुधैः रंगोऽवतरणक्रिययामल्लादिकयायुधैःखड्गादिभिश्चलब्धस्वंप्राप्तार्थंजनय
८२ ति रविजेनशनैश्चरेणधातुषुताम्राद्युत्पत्तिमृत्तिकासुगैरिकाद्यासुवाधातुसुकुशलंनिपुणं भांडप्रकारेषुसमुद्गकादिकुशलोवा अथभौमादियुक्तेचंद्रेजात
स्यस्वरूपंशार्दूलविक्रीडितेनाह १ कूटइति कूटंपाण्यंद्रव्याणांप्रतिरूपविक्रियासक्तं स्त्रीपण्यं।।नारीविक्रयकं आसवपण्यंपानविक्रयकं कुंभपण्यंघट
विक्रयकं अशिवंअश्रेयस्करंमातुःजनन्याः एवंविधंशशीचंद्रमासवक्रोवक्रेणांगारकेनयुक्तोनरंजनयति प्रसृतवाक्यंप्रियंवदं अर्थेनिपुणमर्थेषुसूक्ष्मदृष्टिं
सौभाग्येनसर्व्वजनवल्लभेनकीर्त्त्यायशसान्वितंसंयुक्तं सज्ञोबुधसहितःशशीनरंजनयति विक्रांतंशत्रुजेतारं कुलमुख्यंबंधुप्रधानं अस्थिरमतिंचपलं वित्ते

क्रूरंवाक्पतिनान्यकार्य्यनिरतंशुक्रेणरंगायुधैर्लब्धस्वंरविजेनधातुकुशलंभांडप्रकारेषुवा १ कूटस्त्र्यासवकुंभपण्यमशिवंमातुः
सवक्रःशशीसज्ञःप्रसृतवाक्यमर्थनिपुणंसौभाग्यकीर्त्यान्वितं विक्रांतंकुलमुख्यमस्थिरमतिंवित्तेश्वरंसाङ्गिराःवस्त्राणांससितः
क्रियादिकुशलंसार्किःपुनर्भूसुतं २ मूलादिस्नेहकूटैर्व्यवहरतिवणिग्बाहुयोद्धाससौम्येपुर्य्यध्यक्षःसजीवेभवतिनरपतिःप्राप्तवि

श्वरं धनस्वामिनं सांगिराःअंगिरसागुरुणासंयुक्तःशशीनरंजनयति वस्त्राणांक्रियादिकुशलंतंतुवायः आदिग्रहणात्सीवनरंजनक ऽऽत्तोद्विजोवा।।
यविक्रयेऽपिकुशलं ससितःशुक्रेणसंयुक्तःशशीनरंजनयति द्विःसंस्कृतापुनर्भूः तस्याःसुतंपुत्रंसार्किःआर्किणाशनैश्चरेणयुक्तःशशीनरंजनयति पुनर्भू
लक्षणं परिणीतापतिंहित्वासवर्णकामतःश्रयेत् अक्षताच क्षताचैवपुनर्भूःसंस्कृतापुनः २ अथांगारकेबुधादियुक्तेजातस्यस्वरूपंस्रग्धरयाह २ मूलादी
ति सौम्येभूमिजेबुधयुक्तेंगारकेजातोवणिग्भवति सचवणिग्मूलादिभिःव्यवहरति मूलादीनिमूलपुष्पवल्कलसारफलानि स्नेहास्तैलादयःएतैःव्यवहरति दृ·भ ८२
कूटैश्चद्रव्यप्रतिरूपैःकृत्रिमैःव्यवहरति बाहुयोद्धानियुद्धकुशलश्चभवति एवंविधःससौम्यःसौम्येनबुधेनयुक्तेभूमिजेजातोभवति पुर्य्यध्यक्षःनगराधि
कृतःपुरस्याध्यक्षःपुर्य्यध्यक्षःस्वामी अथवानरपतिःराजाभवति अथवाद्विजोब्राह्मणःप्राप्तवित्तोलब्धधनः केचित्प्राप्तविद्यइतिपठंति सजीवेगुरुसंयुक्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भौमेजातोभवति गोपः गोपालकः मल्लः बाहुयोद्धा अथशब्दः पादपूर्णे दक्षः चतुरः परयुवतिरतः परस्त्रीसक्तः द्यूतकृत्कितवः सासुरेज्ये असुरेज्येन शुक्रेण
युक्ते भूमिजे जातो भवति असुरेज्यः पूज्यः असुरेज्यः दुःखार्त्तः दुःखपीडितः असत्यसंधः असत्येनसंधाप्रतिज्ञायस्य अनृतभाषी निंदितः कुत्सितोऽसूक्ष्ममायुक्तः॥
ससवित्तनये सवितृतनयेन सौरेण युक्ते भूमिजे जातो भवति ३ अथबुधे जीवादियुक्ते जातस्यस्वरूपं शार्दूलविक्रीडितेनाह ३ सौम्येरंगचर इति रंगचरो मल्लादिकः॥
गीतप्रियः गीतवल्लभः नृत्तविन्नृत्तज्ञः एवंविधः सौम्ये बुधे बृहस्पतिनायुक्ते जातो भवति प्रशस्तावाग्यस्य सवाग्मी वचनक्रियया परिप्रत्यायनसमर्थः भूगणपः भुव
श्चगणानां संघानामधिपतिः एवंविधो बुधे सितेन शुक्रेण सहिते जातो भवति मायापटुः परवंचनदक्षः लंघकः गुरुवचनातिक्रामी एवंविधो मृदुनाशनैश्चरेण सहि
ते बुधे जातो भवति सद्विद्य इति सद्विद्यः शोभनविद्यः धनदारवान् वित्तकलत्रसंयुक्तः बहुगुणः प्रभूतगुणैः शौर्यादिभिः युक्तः एवंविधो गुरौ जीवे शुक्रेण युक्ते जातो

गोपोमल्लोथदक्षः परयुवतिरतो द्यूतकृत्सासुरेज्ये दुःखार्त्तोऽसत्यसंधः ससवितृनये भूमिजे निंदितश्च ३ सौम्ये रंगचरो बृहस्पतियुते गीतप्रि
यो नृत्यविद्वाग्मी भूगणपः सितेन मृदुना मायापटुर्लंघकः सद्विद्यो धनदारवान्बहुगुणः शुक्रेणायुक्ते गुरौ ज्ञेयः श्मश्रुकरोऽसितेन घटकृ
ज्जातोऽन्नकारोपि वा ४ असितसितसमागमेऽल्पचक्षुर्युवतिसमाश्रयसंप्रवृद्धवित्तः॥ ऽऽभवति श्मश्रुकरो नापितः अथवा घटकृत्कुंभकारः अथवा
ऽन्नकारो भक्तकरः एवंविधोऽसितेन सौरेण युक्ते गुरौ जातो ज्ञेयो विज्ञातव्यः अथ शुक्र शनैश्चरयुक्ते जातस्य स्वरूपं त्रिग्रहयोगफलं च पुष्पिताग्रयाह ४
॥ असित इति अल्पचक्षुरल्पदृष्टिः युवतिसमाश्रयेण स्त्रीसंश्रयणेन संप्यक्प्रवृद्धं वित्तं धनं यस्य स युवतिसमाश्रयसंप्रवृद्धवित्तः लिपिरक्षरविन्यासः
॥ पुस्तकलेखककर्मचित्रमालेख्यं एषांवेत्तातज्ज्ञः एवंविधः असितसितसमागमे शनैश्चरे शुक्रेण संयोगे जातः पुरुषो भवति यदि राशिद्वये द्वौ ग्र
हयोगौ भवतः तच्च द्विग्रहयोगद्वयस्यापि फलं वक्तव्यं अथ राशित्रये द्विग्रहयोगत्रयं भवति तदा द्विग्रहयोगत्रयस्यापि फलं वाच्यं कथितफलैरिति॥ द्वा
भ्यां परतोऽपरेऽन्ये त्रयो ग्रहाः यदैकगताः भवंति तदा कथितफलैरुक्तफलैरेवं विकल्पनीयाः तदा द्विग्रहयोगत्रयस्य फलं वाच्यं यथाऽर्कचंद्रभौमा एक
राशिस्था भवंति तदाऽर्कचंद्रयोगे यत्फलमुक्तं यच्चादित्यांगारकयोगे यच्चचंद्रांगारकयोगे फलं तत्फलत्रयमपि वाच्यं॥ एवं यथासंभवमन्यत्रापि ग्रहत्रयस्यैकरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ शिगतस्यफलंवक्तव्यं यद्येकराशौद्विग्रहयोगोऽन्यत्रत्रिग्रहयोगोवाभवतस्तदासर्वाण्यपिफलानिवाच्यानीति ५ ॥इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृ
टी.भ. तौद्विग्रहयोगाध्यायश्चतुर्दशः १४ अथातोप्रव्रज्यायोगाध्यायोव्याख्यायते तत्रादावेवचतुरादिभिरेकस्थैःग्रहैःजातस्यप्रव्रज्यायोगंशार्दूलविक्रीडितेनाह॥०॥
६३ एकस्थैरिति एकस्मिन्यत्रतत्रराशौचतुरादयोग्रहाभवंति चत्वारःपंचषट्सप्तवाभवंति तैरेकस्थैश्चतुरादिभिः बलयुतैः वीर्यवद्भिःमाहेयादिभिः जाताःसंभू
ताःशाक्यादिकाःप्रव्राजकाःभवंति किंतुचतुरादिभिःबलयुतैरेकाप्रव्रज्याभवति तदर्थमाह पृथग्वीर्यगैःतैश्चबलिभिःवीर्य्यगैःसबलैःपृथक्पृथक्प्रव्रज्या
भवंति एतदुक्तंभवति चतुरादीनामेकस्थानांमध्याद्यद्येकोबलवान्भवतितदाजातस्यैकैवप्रव्रज्याभवति अथचतुरादीनामेकस्थानांमध्यान्नकश्चिद्बलीभवति त
दाजातस्यप्रव्रज्यानभवति अथद्वौबलिनौभवतस्तदाजातस्यप्रव्रज्याद्वयमेवभवति यदाबहवोबलिनस्तदाबहुःप्रव्रज्याभवंति एवमेकस्थैश्चतुरादिभिर्बलयुतैः
जाताःप्रव्रज्याभाजोभवंति यस्मादुक्तं प्रव्रज्याःबलिभिःसमाःताश्चपृथग्वीर्य्यगैःमाहेयादिभिःभौमाद्यैःशाक्याद्याःभवंति तद्यथा चतुरादीनामेकस्थानांमध्याद्य

भवतिचलिपिपुस्तकचित्रवेत्ताकथितफलैःपरतोविकल्पनीयाः ५ एकस्थैश्चतुरादिभिर्बलयुतैर्ज्जाताःपृथग्वीर्य्यगैःशाक्याजीविक
भिक्षुवृद्धचरकानिर्ग्रंथवन्याशनाः माहेयज्ञगुरुक्षपाकरसितप्राभाकरीनैःक्रमात्प्रव्रज्याबलिभिःसमाःपरजितैस्तत्स्वामिभिःप्रच्युतिः १

दामाहेयोभौमोबलवान्भवतितदाजातःशाक्योरक्तपटोभवति एवंज्ञेबुधेबलवतिभिक्षुःपतिर्भवति क्षपाकरेचंद्रेयदावृद्धःवृद्धश्रावकः कापालिकःवृत्तभं
गभयाच्छ्रावकशब्दोत्रलुप्तोद्रष्टव्यःसितेशुक्रेबलवतिचरकःचक्रधरः प्राभाकरिःसौरःतस्मिन्बलवतिनिर्ग्रंथः नग्नःप्रावर्णरहितइत्यर्थः इनेऽर्कादित्येबलव
तिवन्याशनः मूलफलाशनस्तपस्वीभवति एवंक्रमात्क्रमशःपरिपाट्याएताप्रव्रज्याः एतेएवंकलिमताद्व्याख्याताः तथाचवंकलाचार्य्यः तावसिउंदिनणाहो
चंद्रोकावालिऊंतहाभणिऊंरत्तवदोविभ्रभुम्मोमोम्मसुतोएकदंडीश्रा १ देवगुरुशुक्रकोणाक्रमेणजेइनरश्रखवणाइ अत्रवृद्धश्रावकग्रहणंमाहेश्वराश्रि राम
तानांप्रव्रज्यानामुपलक्षणार्थं आजीविकग्रहणंचनारायणाश्रितानांच तथाचवंकलकेसंहितांतरेपठ्यते जलनजलहरभ्रकेसवसइवइखवणमध्येसुदिरव ६३
णाणांश्रवकणवारतेगहानाह एवंचतुरादीनामेकस्थानांमध्याद्यावंतोबलिनस्तावंत्यएवप्रव्रज्याभवंति तत्रापिवीर्य्याधिकस्यप्रथमासंबंधिनीप्रव्रज्याभवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मात्तस्य जातके उक्तं चतुरादिभिरेकस्थैः प्रव्रज्यां तां ग्रहः करोति बली बहुवीर्य्यैस्तावद्यः प्रथमा वीर्य्याधिकस्यैव तापसत्वं वृद्धश्रावकरक्तपटाजीविभिक्षु चरकाणां निर्ग्रन्थानां चेति वीर्य्योपचयक्रमेणान्यासां क्रमः एवं बलिभिः समाः प्रव्रज्याः बलिनो ग्रहस्य याः दृश्येव तद्बलानुसारेण प्राप्नोति परिपालयति ऊनबला स्समनाऽनात्रो पालयति पराजितैस्तत्स्वामिभिः प्रच्युतिरिति शाक्यादि प्रव्रज्यास्वामिभिर्ग्रहैः पराजितैरन्यैर्ग्रहैः ग्रहयुद्धे विजितैः प्रच्युतिः॥ प्रव्रज्यात्यागः त त्प्रव्रज्यां गृहीत्वा पुनस्त्यजति एतदुक्तं भवति चतुरादीनां मध्याद्यद्येको बलवान् भवति स च ग्रहयुद्धे जातककाले न पराजितस्तदा प्रव्रज्यां गृहीत्वा पुनस्त्यजति त्यक्त्वा च प्रव्रज्यामनाश्रित्यैव तिष्ठति अथ चतुरादीनां मध्यात् द्वौ बहवो वा बलिनो भवन्ति ते च पराजितास्तदाऽन्यस्य सर्वाभ्यः प्रव्रज्याभ्यः च्युतिः भवति यस्माद्बलवन्त्ग्र हसंख्यास्तेन प्रव्रज्याः कर्त्तव्याः अन्त्यप्रव्रज्याधिपतिर्य्यद्यन्येन ग्रहेण जितो न भवति तदा तामेव प्रव्रज्यामाश्रितो म्रियते अथ प्रव्रज्यादायको ग्रह एक एव जितो न भवति तदा यावज्जीवं तामेव प्रव्रज्यामाश्रयति अथ द्वौ ग्रहौ प्रव्रज्यादायकौ तौ चापराजितौ तदा प्रथमप्रव्रज्यादायकां तद्दशायां प्रथमां प्रव्रज्यां गृहीत्वा ता

रविलुप्तकरैरदीक्षिता बलिभिस्तद्गतभक्तयो नराः अभियाचितमात्रदीक्षिता निहतैरन्यनिरीक्षितैरपि २॥ ६॥

मेवाश्रित्य तावत्तिष्ठति यावद्द्वितीयप्रव्रज्यादायकग्रहां तद्दशाप्रवेशः तत्र प्रथमां त्यक्त्वा द्वितीयामाश्रयति एवं बहुषु प्रव्रज्यासु संभवे योज्यं अत्र च सत्याचार्य्यैः ते ष्वधिकबली जीवः त्रिदंडिनं भार्गवः चरकमुख्यं नग्नश्रवणं सौरो वुधस्तदाजीविकाचार्य्ये वृद्धश्रावकमिंदुर्द्दिवाकरस्तापसं तपोयुक्तं वक्रः शाक्यः श्रवणं सेत्राश्रयजं गुणाश्चैतान् वीर्योपेतैस्यतनावदीक्षिताभक्तिवादिनस्तेषां अन्यैः पराजितश्चेत्प्रव्रज्याप्रच्युतिं कुर्य्यात् यावंतो वीर्य्ययुताः प्रव्रज्याः भवंति तावंत्यः एकसर्गेषु नियमात्तेषामाद्याबलोपेतान् अथास्तमितान्यजितान्यदृष्टानां ग्रहाणामपवादं वैतालियेनाह १ रविलुप्तकरैरिति चतुरादीनामेकस्थानां मध्या द्यावंतो ग्रहा बलिनस्तावंतः प्रव्रज्यादायकास्तत्रापि बलिनां मध्ये यावंतो रविलुप्तकराः सूर्य्यमंडलगा अस्तमिता भवंति तैरदीक्षिता जाता भवंति तावंतः स्वप्रव्र ज्यां न प्रयच्छंतीत्यर्थः किंतु जाता नराः तद्गतभक्तयः तद्गतानां तत्प्रव्रज्याप्रदेष्टजितानां मध्ये भक्ता भवंति अत्र रविलुप्तकरत्वमुदयास्तमयं गणयितोऽन्वेष्यं शुक्रगु रुसार्किकुजाः कलांशैः हुतरैस्तैः नवभिः दृश्यादृश्याद्यकर्म्मणा रवेः द्वादशभिरिंदुरित्येवमादिकर्म्मणि क्रतेकश्चिदादित्येन सह एकराशिगतैरपि नास्तमितो भवति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदाचित्द्वितीयराशिस्थोप्यस्तमितो भवति एवमुदयास्तमयमन्विष्यास्तमितफलंवाच्यं अभियाचितमात्रदीक्षिताः इति बलिभिरित्यनुवर्त्तते बलिभिः निहतैः ग्रहयुद्धेन्यग्रहविजितैरन्यैश्चग्रहैः निरीक्षितैः दृष्टैः अभियाचितमात्रदीक्षिताः दीक्षाप्रार्थनपराभवंति नचतांप्राप्नुवंति पूर्वमुक्तंपराजितैस्तत्स्वामिभिःप्रच्युतिरित्यस्यायमपवादः तेनैतदुक्तंभवति बलीग्रहोग्रहयुद्धेन्येनविजितोभवतिनकेनचिद्दृश्यतेतदातत्प्रव्रज्यांगृहीत्वापुनस्त्यजति अथबलीग्रहः समागमनेनग्रहेणविजितोभवत्यन्येनचदृश्यतेतदाप्रव्रज्यांप्रार्थ्यमानोपिनप्राप्नोति यस्यचप्रव्रज्याप्रच्युतिः जातातस्यतदवसानेबहुधनंदशासुचारवशाद्यस्मिन्नंतर्दशाकालेबलवान्भविष्यतितस्मिन्कालेप्रव्रज्यांदास्यति तथाचोक्तं दीक्षादानसमर्थोयोभवतितदाबलेनसंयुक्तः तस्यैवदशाकालेदीक्षांलभतेनरोऽवश्यं यस्यचदीक्षाच्यवनंतस्यैवदशावसानेस्यात् एवमेवंजातककालेसंचिंत्यबलाबलंवाच्यं अथचतुरादिभिरेकस्थैर्विनाप्रव्रज्यायोगमालिन्याह ॥२॥ जन्मेशाविति जन्मनियस्मिन्राशौचंद्रः स्थितस्तस्ययोधिपतिर्ग्रहः सजन्मेशः सचयद्यन्यैः ग्रहैरदृष्टोनावलोकितः नकेनचिद्ग्रहेणदृश्यतेतथाभूतो

जन्मेशोन्यैर्यद्यदृष्टोर्कपुत्रंपश्यत्यार्किर्जन्मपंबाबलोनं दीक्षांप्राप्नोत्यार्किद्रेष्काणसंस्थेभौमार्क्यंशेसौरदृष्टेचचंद्रे ॥३॥ ६ ॥

सावर्कपुत्रंशनैश्चरंपश्यतितदाजातस्यप्रव्रज्याभवति साचशनैश्चरकृताशनैश्चरजन्मेशयोः योबलवांस्तदीयांतर्दशाकाले उक्तंच यस्येक्षतेऽर्कपुत्रंजन्मभनाथोग्रहैर्नसंदृष्टः तस्यहिदीक्षालाभोतद्बलयोगाद्दशाकाले पश्यत्यार्किमिति अथवार्किः सौरः सबलोजन्मराश्यधिपंबलोनवीर्यरहितंपश्यति तथापिशनैश्चरोक्तंप्रव्रज्यावदति उक्तंच शनिदृष्टेबलहीनेजन्मनिनाथेवदेच्चनिर्ग्रंथं दीक्षांप्राप्नोतीति यत्रतत्रराशौचंद्रेशशिन्यार्किद्रेष्काणसंस्थेसौरद्रेष्काणव्यवस्थितेनकेवलं यावद्भौमार्क्यंशेकुजसौरयोरन्यतमनवांशकस्थेतस्मिंश्चसर्वग्रहादृष्टेशनैश्चरेणेक्ष्यमाणेदीक्षांप्राप्नोति शनैश्चरोक्तेप्रव्रज्यांव्रजति तथाच सौरद्रेष्काणसंस्थोयदिभवतिशशीतदंशसंस्थश्च वक्रांशेवादृष्टः सौरेणतुसर्वदर्शनविमुक्तः निर्ग्रंथसंज्ञोयोर्कपुत्रवीर्यानुसारेणजन्माधिपतिः पापैरपिनिरीक्षितःत्वेकऋक्षतेसौरः यस्यपुरुषस्यमूर्त्तौनियतादीक्षिताभवति तस्यजन्माधिपतिंविबलंनिरीक्षतेयस्यसूर्यजोबलः सोपिखलुभाग्यहीनः प्रव्रज्यांप्राप्नुयाज्जातः मांदेकौजेवांशेशशीस्थितःकृष्णेद्रेष्काणेवास्वंशाधिपानुरूपेकालेदीक्षाप्रदोभवति अत्रयोगत्रयेपिपूर्वपदानुवर्त्तनीयाः अथयेनयोगेनजातः शास्त्रकरोभवतियेनचराजापिदीक्षितोभवतितद्योग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरगुरुइति सुरगुरुः जीवः शशीचंद्रः होरालग्नं एतासुसुरगुरुशशीहोरासु आर्किणाशनैश्चरेणदृष्टासु अवलोकितासुधर्म्मेनवमेस्थानेगुरुः जीवोयदिभवति अथश
द्रः पादपूर्णे नृपतीनांयोगजः कश्चिद्राजयोगोजातस्यभवतितदासपुरुषः तीर्थकृच्छास्त्रकृत्स्याद्भवेत् कणादबुद्धपांचशिखवराहमिहिरब्रह्मगुप्तप्रतिमइति सु
रगुरुशशिहोरास्विति धन्विमीनकर्कटलग्नेकश्चिद्व्याख्यातं तच्चायुक्तं यस्मान्मांडव्यः गतेमंदालोकंगुरुशशिविलग्नेनवमगेगुरौनिष्पद्यतेनइहनृपयोगेनृपतयः
विजन्नंतेयेषांलटभरचनारंभसुभगाजगत्यायोविद्वद्गुणकथनपाषाणसदृशाः तथाचोक्तं गुरुशशिलग्नादृष्टाकोणेननुनवमगोयदिगुरुः नरनाथजन्मजातः शा
स्त्रकरोभवतिनचनृपः अथद्वितीयोराजयोगस्तत्रोपस्थानंकरोति तदाराजाभवतितीर्थकरश्चाजनककाशिराजश्चशुचिध्वजप्रतिमइति उक्तंच अस्मिन्योगेचान्योनृ
पयोगोभवतितत्रयोजातः सभवतिजिनेंद्रतुल्योनरनाथः शास्त्रकर्त्ताच नवमभवनसंस्थे मंदगच्छतीतिमंदगः सौरः तस्मिन्मंदगे लग्नान्नवमभवनसंस्थेधर्म्मेस्था
नाश्रितेऽन्यैः सर्वैर्ग्रहैरदृष्टेनावलोकितेतथानरपयोगेराजयोगानांमध्यादन्यतमेराजयोगेसतिजातोदीक्षितः प्रव्रजितः पार्थिवेंद्रश्चराजाधिराजोभवतियश्चानत्का

सुरगुरुशशिहोरास्वार्किदृष्टासुधर्म्मेगुरुरथनृपतीनांयोगजस्तीर्थकृत्स्यात् नवमभवनसंस्थेमंदगेन्यैरदृष्टेभवतिनरपयोगेदीक्षितः पार्थिवें
द्रः ४ प्रियभूषणः सुरूपः सुभगोदक्षोश्विनीषुमतिमांश्च कृतनिश्चयः सत्याहृग्दक्षः सुखितश्चभरणीषु॥१॥ लंसर्वबलीनद्दीक्षायांदीक्षितश्चभवति रा
जयोगंविनायमपिप्रव्रज्यायोगः योगेस्मिन्राजयोगजश्चोज्जातोराजादीक्षितश्चभवति अन्यथादीक्षितएव उक्तंच नवमस्थानेसौरोयदिस्थितः सर्वैर्दर्शनविमुक्तः
नरनाथयोगजातोनृपोपिदीक्षान्वितोभवति नृपयोगस्याभावेयोगेऽस्मिन्दीक्षितोनरोजातः निःसंदिग्धंप्रवदेद्योगस्यास्यप्रभावेनेति ५॥इतिश्रीभट्टोत्पलविरचितायांबृ
हज्जातकविवृतौप्रव्रज्यायोगाध्यायः पंचदशः १५॥अथऋक्षशीलाध्यायोः व्याख्यायते ऋक्षंनक्षत्रंराशिश्च तत्रादावेवचंद्रभुज्यमाननक्षत्रशीलंभवति तत्रा
श्विनीभरण्योः जातयोः शीलविज्ञानमार्य्ययाह॥०॥प्रियभूषणइति प्रियभूषणः अलंकरणवल्लभः सुरूपः शोभनरूपः वपुष्मान्सुभगः सर्वजनप्रियः द
क्षः सर्वकार्य्यकरपटुः मतिमान्बुद्धियुक्तः एवंविधोऽश्विनीषुजातोभवति तारकापेक्षयात्रसर्वत्रबहुवचननिर्देशःकृतः कृतनिश्चयइति कृतनिश्चयः प्रार
ब्धानांकर्म्मणामंतगः सत्यः सत्यवाक् अरुक् निरुजः दक्षः चतुरः सुखितः दुःखनिर्मुक्तः एवंविधोभरणीषुजातोभवति अथकृत्तिकारोहिण्योः जातस्यस्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हे
दो·भे
८५

बहुभुक्प्रभूताहारः परदाररतः परस्त्रीष्वासक्तः तेजस्वी असहिष्णुः विख्यातः सर्व्वत्रप्रसिद्धकीर्त्तिः एवंविधः कृत्तिकसुजातोभवति सत्यः अवितथ्यभाषी शुचिः
परस्वाद्यलुब्धः शास्त्रोक्तशौचानुष्ठाता प्रियंवदः मधुरवाक् स्थिरमतिः एकमतिः सुरूपश्चवपुष्मान् एवंविधःरोहिण्यांजातोभवतिइति २ अथमृगशीर्षा
द्रयोःजातस्यस्वरूपमार्य्ययाह २ चपलइति चपलःक्रियास्वनवस्थितः चतुरःदक्षः भीरुःभयानकः पटुःप्रवक्ता उत्साहीसोद्यमः धनीवित्तवान् भोगीचसं
भोगशीलः एवंविधोमृगेमृगशिरसिजातोभवति शठःपरकार्य्यविमुखः उक्तंचग्रंथांतरेशठलक्षणं मनसावचसायश्चदृश्यतेकार्य्यतत्परः कर्म्मणाविपरीत
श्चसशठःसद्भिरिष्यते गर्व्वितःमानी कृतघ्नःखलःकृतमुपकृतंहंतीयःसकृतघ्नः हिंस्रःवधकः पापःपापकर्म्मकर्त्ता एवंविधोरौद्रर्क्षेआर्द्रायांजातोभवतीति
अथपुनर्व्वसौजातस्यस्वरूपमार्य्ययाह३ दांतःशमपदःलयःक्लेशसहः सुखीसुखितः सुशीलःशोभनशीलः विनयवान् दुर्म्मेधाजडप्रायः रोगभाक्पीडितदे

बहुभुक्परदाररतस्तेजस्वीकृत्तिकासुविख्यातः रोहिण्यांसत्यःशुचिःप्रियंवदःस्थिरमतिःसुरूपश्च २ चपलश्चतुरोभीरुःपटुरुत्साहीध
नीमृगेभोगी शठगर्वितःकृतघ्नोहिंस्रःपापश्चरौद्रर्क्षे ३ दांतःसुखीसुशीलोदुर्म्मेधारोगभाक्पिपासुश्च अल्पेनचसंतुष्टःपुनर्व्वसौजा
यतेमनुजः ४ शांतात्मासुभगःपंडितोधनीधर्म्मसंसृतःपुष्ये शठःसर्व्वभक्षःपापःकृतघ्नधूर्त्तश्चभौजंगे ५ बहुभृत्यधनोभोगीसुर
पितृभक्तोमहोद्यमःपित्र्ये प्रियवाग्दाताद्युतिमानटनोनृपसेवकोभाग्ये ६॥ ॥ ॥हः पिपासःतृषार्त्तः॥ अल्पेनस्तोकेनैवार्थेनसंतुष्टः॥

एवंविधोमनुजोमनुष्यःपुनर्व्वसौजायतेउत्पद्यते अथपुष्याऽश्लेषयोःजातस्यस्वरूपमार्य्ययाह ४ शांतात्माइति शांतात्माशमदमपराजितेंद्रियः सुभगः
सर्व्वजनप्रियः पंडितःशास्त्रार्थवित् धनीवित्तवान् धर्म्मसंसृतः धर्म्मरतः एवंविधःपुष्यजोभवति शठःपरकार्य्यविमुखः सर्व्वभक्षःसंचयनशीलः पापःपापक
र्म्मरतः कृतघ्नः कृतमुपकृतंहंतिसकृतघ्नः धूर्त्तःपरवंचनदक्षः एवंविधोभौजंगेऽश्लेषायांजातोभवति अथमघापूर्व्वाफाल्गुन्योःजातस्यस्वरूपमार्य्ययाह ५
बहुभृत्यइति बहुभृत्यधनःप्रभूतपरिवारवित्तान्वितः भोगीभोग्यान्वितः सुरपितृभक्तःदेवानांपितृणांचभक्तः महोद्यमःमहोत्साही एवंविधःपित्र्येमघायांजातोभवति
प्रियवाक्अभिमतवक्ता दाताद्मनशीलः द्युतिमान्सुकांतिः अटनःपरिभ्रमणशीलः नृपसेवकःराजसेवानुरतः एवंविधोभाग्येपूर्व्वाफाल्गुण्यांजातोभवति इतिषष्ठः६

पूर्व्वाफाल्गुनीहस्तयोःजातस्यस्वरूपमार्य्ययाह ६

राम·
८५

CC-0. In Public Domain. Digitization by eGangotri

सुभगइति सुभगः सर्व्वजनप्रियः विद्यात्तधनः विद्यायात्तंधनंयेन भोगीभोगान्वितः सुखभागाधिरहितः सुखान्भोगयतिते एवंविधोद्वितीयफाल्गुन्यामुत्तराफा
ल्गुन्याजातोभवति उत्साही सोद्यमः धृष्टः पानपः धृष्टः प्रतिभायुक्तः निर्ल्लजः पानपः पानप्रियः आसवानुरक्तः अघृणीनिर्दयः तस्करः चौरः एवंविधोहस्ते
जातोभवति अथचित्रास्वात्ययोः जातस्यस्वरूपमार्य्ययाह ७ चित्रांबरमाल्यधरः चित्राणिनानाप्रकाराणिअंबराणिवस्त्राणिमाल्यानिचधारयति सुलोचनांगः
शोभनेनेत्रावयवायस्य एवंविधश्चित्रायांजातोभवति दांतोविनयान्वितः जितेंद्रियः वणिक् क्रयविक्रयज्ञः कृपालुः दयालुः केचित्तृषालुरितिपठंति तृषालुः
तृषांनसहते प्रियवाक् अभिमतवक्ता धर्म्माश्रितः धर्म्मरतः एवंविधः स्वातोजातोभवति अथविशाखाऽनुराधयोः जातस्यस्वरूपमार्य्ययाह ८ ईर्ष्युरिति ईर्ष्युः
परद्विमत्सरी लुब्धः लोलाभिभूतः द्युतिमान्सुकांतिः वचनपटुः संभाषणदक्षः केचिदर्थपटुरितिपठंति अर्थार्ज्जनेपटुः प्रवीणः कलहकृद्विरोधशीलः एवंवि

सुभगोविद्यात्तधनोभोगीसुखभाक्द्वितीयफाल्गुन्यां उत्साहीधृष्टःपानपोघृणीतस्करोहस्ते ७ चित्रांबरमाल्यधरः सुलोचनांगश्चभवतिचि ४
त्रायां दांतोवणिक्कृपालुःप्रियवाग्धर्म्माश्रितः स्वातौ ८ ईर्ष्युर्लुब्धोद्युतिमान्वचनपटुः कलहकृद्विशाखासु आढ्योविदेशवासीक्षुधालुरटनो
ऽनुराधासु ९ ज्येष्ठासुनबहुमित्रः संतुष्टोधर्म्मकृत्प्रचुरकोपः मूलेमानीधनवान्सुखीनहिंस्रः स्थिरोभोगी १० इष्टानंदकलत्रोमानीदृढसौह
दश्चजलदैवे वैश्वेविनीतधार्म्मिकबहुमित्रः कृतज्ञःसुभगश्च ११ ॥ धोविशाखासुजातोभवति आढ्यः ईश्वरः विदेशवासीपरदेशनिवसनशीलः
क्षुधालुः क्षुधांनसहते अटनः परिभ्रमणशीलः एवंविधोऽनुराधासुजातोभवति अथज्येष्ठामूलयोः जातस्यस्वरूपमार्य्ययाह ९ नबहुमित्रः स्वल्पसुहृत्
संतुष्टः संतोषशीलः धर्म्मकृद्धर्म्मानुरतः प्रचुरकोपः अतिक्रोधी एवंविधोज्येष्ठासुजातोभवति मानीगर्व्वितः धनवान्प्रभूतवित्तः सुखीसुखितः नहिंस्रः सौम्य
प्रकृतिः परविघातंनकरोति स्थिरः एकमतिः भोगीभोगान्वितः एवंविधोमूलेजातोभवति १० अथपूर्वोत्तराषाढयोः जातस्यस्वरूपमार्य्ययाह १० इष्टानंद
कलत्रः इष्टोभिमतः सुलभः सानंद तुष्टिकरः कलत्रोभार्यायस्य मानीगर्व्वितः दृढसौहृदः स्थिरसुहृत् एवंविधोजलदैवेपूर्वाषाढायांजातोभवति विनीतः विन
यसंयुक्तः धार्म्मिकः धर्म्मज्ञः बहुमित्रः प्रभूतसुहृत् कृतज्ञः उपकारशीलः सुभगश्चसर्व्वजनप्रियः एवंविधोवैश्वेवैश्वदैवेउत्तराषाढायांजातोभवति अथश्रवणधनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ
दी०भ
८६

श्रीमान् श्रियायुक्तः श्रुतवान् पंडितः उदारदारः उदारादारायस्य अथवादारेषुउदारः उदारोदाताशोभनस्त्रीकः धनान्वितः वित्तवान् ख्यातः जनविदितकीर्त्तिः एवंविधः श्रवणेजातोभवति दातादानशीलः आढ्यः ईश्वरः शूरः रणप्रियः गीतप्रियः गीतवल्लभः धनलुब्धः अर्थेरुचिः एवंविधो धनिष्ठासुजातोभवति अथ शतभिषक्पूर्वाभाद्रपदयोः जातस्यस्वरूपमार्य्ययाह १२ स्फुटवाक् निष्ठुरभाषी सत्यवादी व्यसनीस्त्र्यादिव्यसनोपहतः रिपुहाशत्रुघातकः साहसिकः असमीक्षितकार्य्येकृत् दुर्ग्राह्यः दुराराध्यः एवंविधः शतभिषजिजातोभवति उद्विग्नः दुःखितमनाः स्त्रीजितः स्त्रीभिरभिभूतः धनीधनवान् अथवास्त्रियाजितंधनंयस्य पटुः प्रवक्ता अथवाधनपटुः धनार्ज्जनेचतुरः अदाताकदर्य्यः एवंविधः पूर्वाभाद्रपदासुजातोभवति अथोत्तरभाद्रपदारेवत्योः जातस्यस्वरूपमार्य्ययाह॥ १३॥ वक्तावचनपटुः संभाषणेदक्षः सुखीविद्यमानसुखः प्रजावान् बहुपुत्रपौत्रः जितशत्रुः जितारिः धार्म्मिकः धर्म्मशीलः एवंविधोद्वितीयासुउत्तराभाद्रपदा

श्रीमान् श्रवणेश्रुतवानुदारदारोधनान्वितः ख्यातः दाताढ्यः शूरोगीतप्रियोधनिष्ठासुधनलुब्धः १२ स्फुटवाग्व्यसनीरिपुहासाहसिकः शतभिषजिदुर्ग्राह्यः भाद्रपदासूद्विग्नः स्त्रीजितधनीपटुरदाताच १३ वक्तासुखीप्रजावाञ्जितशत्रुर्द्धार्म्मिकोद्वितीयासु संपूर्णांगः शुभगः शूरः शुचिरर्थवान्पौष्णे १४ वृत्तातांम्रदृगुष्णशाकलघुभुक्क्षिप्रप्रसादोटनः कामीदुर्ब्बलजानुरस्थिरधनः शूरोंगनावल्लभः सेवाज्ञः कुनखी व्रणांकितशिरोमानीसहोत्थाग्रजः शक्यापाणितलेंकितोत्तिचपलस्तोयेचभीरुः क्रियि॥१॥ ऽऽसुजातोभवति संपूर्णांगः परिपूर्णाऽवयवः शुभगः सर्व्वजनप्रियः शूरः संग्रामधीरः शुचिः परधनादिष्वलुब्धः अर्थवान् धनान्वितः एवंविधः पौष्णेरेवत्यांजातोभवति एतेयथोक्तानक्षत्रस्वभावाश्चंद्रस्यसबलत्वात्परिपूर्णाभवंति १४ इतिबृहज्जातकविवृत्तेनक्षत्रजातकं॥ अथमेषस्थेचंद्रमसिजातस्यस्वरूपंशार्दूलविक्रीडितेनाह १५ वृत्तेति वृत्तापरिवर्त्तुलाआताम्रालोहितवर्णादृष्टिः चक्षुर्षीयस्यसवृत्तातांम्रदृक् परिवर्त्तुललोहितनेत्रः उष्णंशाकंलघुचस्वल्पंभुंक्तेसउष्णशाकलघुभुक् उष्णभोजीशाकभोजीलघुभोजीक्षिप्रप्रसादः आश्वेवप्रसीदति अटनः परिभ्रमणशीलः कामीसुरतिप्रियः दुर्ब्बलजानुः निर्म्मांसलजंघसंधिः अस्थिरधनः अचिरवित्तः शूरः रणप्रियः अंगनावल्लभः स्त्रीप्रियः अंगनानांवल्लभोअंगनावल्लभायस्य सेवाज्ञः पराराधनकुशलः कुनखीकुत्सितनखः व्रणांकितशिरः सच्छिद्रमूर्द्धामानीगर्वितः सहोत्थाग्रजः रम. ८६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहोत्थानांसहजानामग्रग्रणीगुणप्रधानः पाणितलेहस्ततलेशक्याचिन्हविशेषेणांकितः चिन्हितः अतिचपलः क्रियास्वनवस्थितः तोयेचजलेभीरुः सभयः एवं
विधः क्रियेमेषस्थितेचंद्रमसिजातोभवति १ अथवृषस्थेचंद्रमसिजातस्यस्वरूपंशार्दूलविक्रीडितेनाह १ कांतरिति कांतः दर्शनीयः खेलगतिः सविलासगा
मी पृथूरुवदनी पृथुः विस्तीर्णावूरूवदनंमुखंयस्य पृष्टंपश्चिमभागः आस्यंवक्त्रं पार्श्वेप्रसिद्धेएषामन्यतमस्थानेंकितश्चिह्नितः त्यागीदाता क्लेशसहः कद
र्थनाक्षमर्थः प्रभुरप्रतिहताज्ञः ककुद्वान् कुदसंयुक्तः कप्रजा कंन्याप्रजायस्यस्त्रीजनकः श्लेष्मलः कफाधिकः पूर्वैः प्रथमैः बंधुभिः कुटुंबैः धनैः वित्तैः आ
त्मजैः पुत्रैश्चविरहितः वियुक्तः सौभाग्ययुक्तः सर्वजनवल्लभः क्षमीक्षमावान् सहिष्णुरित्यर्थः दीप्ताग्निः बह्वाशी प्रमदाप्रियः स्त्रीवल्लभः स्थिरसुहृत् दृढमि
त्रः मध्यान्तसौख्यो मध्येयौवनेंत्येवृद्धत्वेचसुखितो अथोदेवबाल्येदुःखितः एवंविधोगविवृषस्थेचंद्रेजातोभवति २ अथमिथुनस्थेचंद्रमसिजातस्यस्वरूपंशा

कांतः खेलगतिः पृथूरुवदनः पृष्टास्यपार्श्वेकितस्त्यागीक्लेशसहः प्रभुः ककुद्वान् कंन्याप्रजः श्लेष्मलः पूर्वैर्बन्धुधनात्मजैर्विरहि
तः सौभाग्ययुक्तः क्षमीदीप्ताग्निः प्रमदाप्रियः स्थिरसुहृन्मध्यान्त्यसौख्योगवि २ स्त्रीलोलः सुरतोपचारकुशलस्ताम्रेक्षणः शास्त्रविद्दूतः
कुंचितमूर्द्धजः पटुमतिर्हास्येंगितद्यूतवित् चार्वंगः प्रियवाक्प्रभक्षणरुचिर्गीतप्रियोनृत्यवि त्क्लीबैर्यातिरतिंसमुन्नतनसश्चंद्रेतृतीयर्क्षगे ३
आवक्रद्रुतगः समुन्नतकटिः स्त्रीनिर्जितः सत्सुहृद्दैवज्ञः प्रचुरालयः क्षयधनैः संयुज्यतेचंद्रवत्॥ ५ ईलविक्रीडितेनाह २ स्त्रीलोलः स्त्रीषुमिला

षकरः सुरतोपचारकुशलः सुरतोपचारेसुरतकर्म्मणिकामशास्त्रेषुकुशलः क्षिक्षितः ताम्रेक्षणः लोहितनेत्रः शास्त्रेविद्यास्वज्ञः पंडितः दूतः परः सकाशात
संदेशप्रापी कुंचितमूर्द्धजः कुटिलशिरोरुहः पटुमतिश्चतुरधीः अतीवप्राज्ञः हास्यमुपहासंइंगितंपरचित्तज्ञानंद्यूतंयूपः एतान्वेत्तिजानाति चार्वंगः शोभनावय
वः प्रियवाकभिमतवक्ता प्रभक्षणरुचिः बहुभुक् गीतप्रियः गीतरतिः नृत्यवित्नृत्तज्ञः क्लीबैः षंडैः सहरतिंयातिगच्छति समुन्नतनसरुच्चनसः एवंविधः चंद्रेतृ
तीयर्क्षगेतृतीयराशौस्थितेमिथुनगेजातोभवतीत्यर्थः ३ अथकर्कटस्थेचंद्रमसिजातस्यस्वरूपंशार्दूलविक्रीडितेनाह ३ आवक्रंकुटिलंद्रुतंसत्वरंगच्छतिते
आवक्रद्रुतगः कुटिलसत्वरगामी समुन्नतकटिः उच्चजघनः स्त्रीनिर्जितः प्रमदाजितः सत्सुहृत्शोभनमित्रः दैवज्ञः ज्योतिःशास्त्रार्थवेत्ता प्रचुरालयः प्रभूतगृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हकर्त्ता क्षयधनैरपचयोपचयैश्चंद्रवच्छशिवत्संयुज्यते कदाचिद्धिधनइत्यर्थः चंद्रस्यवृद्धिवत् ह्रस्वः अदीर्घः पीनगलः समांसलकंठः साम्ना प्रीत्या वशं वश्यतां
यातिसमेत्यानयति सुहृद्वत्सलः मित्रवल्लभः तोयोद्यानरतः जलोपवनशक्तः तोयेनजलेनउपवनेनचरतः एवंविधः स्ववेश्मनिसहितेकर्कटस्थेशशांकेचंद्रे नरः
पुरुषोजातोभवति अथसिंहस्थेचंद्रमसिजातस्यस्वरूपंशार्दूलविक्रीडितेनाह ४ तीक्ष्णः अमर्षशीलः स्थूलहनुः बृहद्धनुः बृहत्कपोलः विशालवदनोविस्तीर्णव
क्त्रः पिंगेक्षणः कपिलनेत्रः अल्पात्मजः स्वल्पापत्यः स्त्रीद्वेषी प्रमदाद्विष्टः स्त्रीदृष्टइतिकेचित्पठंति प्रियमांसकाननगः मांसमामिषंकाननमरण्योनगपर्वतः ए
तेप्रियायस्य आमिषवनपर्वतानुरतः अकार्ये अकार्णीयेयेकुप्यतिक्रुध्यति चिरंबहुकालंकेचिदकांडेइतिपठंति अकांडे अकाले क्षुत्प्रसिद्धा तृष्णापिपासाः उद
रंजठरंदंतादसनाः मनश्चित्तंएभ्योजाहृजः पीडावक्ताभिः संपीडितउपतप्तः त्यागवान्दाता विक्रांतः पराक्रमशीलः स्थिरधीरेकमतिः सुगर्वितमना अभिमानसंयु

ह्रस्वः पीनगलः समेतिचवशंसाम्नासुहृद्वत्सलस्तोयोद्यानरतः स्ववेश्मसहितेजातः शशांकेनरः ४ तीक्ष्णः स्थूल हनुर्विशालवदनः पिं
गेक्षणोल्पात्मजः स्त्रीद्वेषीप्रियमांसकाननगकुप्यत्यकार्येचिरं क्षुत्तृष्णोदरदंतमानसरुजासंपीडितस्त्यागवान्विक्रांतः स्थिरधीः सुग
र्वितमनामातुर्विधेयोऽर्कभे ५ व्रीडामंथरचारुवीक्षणगतिः स्रस्तांसबाहुः सुखीश्लक्ष्णः सत्यरतः कलासुनिपुणः शास्त्रार्थविद्धार्म्मिकः
मेधावीसुरतप्रियः परगृहैर्वित्तैश्चसंयुज्यतेकन्यायांपरदेशगः प्रियवचाः कन्याप्रजोल्पात्मजः ६ ॥क्तः मातुर्विधेयोजननीवश्यः भक्तइत्यर्थः विधेयो
वचनग्राहीइत्यर्थः एवंविधोऽर्कभेसूर्यराशौसिंहस्थेचंद्रेजातोभवति अथकन्यागतेचंद्रमसिजातस्यस्वरूपंशार्दूलविक्रीडितेनाह ५ व्रीडामंथरचारुवीक्षणगतिरिति
व्रीडालज्जातयायन्मंथरत्वमलसत्वंतेनचारुशोभनंवीक्षणंदृष्टिपातोगतिः गमनंयस्य स्रस्तावधः पतितौशिथिलौवंसौस्कंधौबाहुभुजौयस्य सुखीसुखितः श्लक्ष्ण
मृदुत्वंतनूकायश्च सत्यरतः सत्यभाषी धार्मिकश्च परमार्थवादी कलासुनिपुणः कलासुनृत्यगीतवाद्यपुस्तकचित्रकर्मसुनिपुणः सुतः शास्त्रार्थवित्पंडितः धा
र्म्मिकः धर्म्मानुरतः मेधावीबुद्धिमान् सुरतप्रियः कामलोलुपः परगृहैः परवेश्मनिभिः वित्तैः धनैः चसंयुज्यते ससम्प्रयुक्तोभवति परदेशगः अन्यदेशनिवासशीलः
प्रियवचाः प्रियभाषी कन्याप्रजः कन्याप्रजायस्यस्त्रीजनकः अल्पात्मजः स्वल्पपुत्रः एवंविधः कन्यायांस्थितेचंद्रेजातोभवति ६ अथतुलस्थेचंद्रमसिजातस्यस्वरू

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवब्राह्मणसाधुपूजनरतः देवानांसुराणांब्राह्मणानांद्विजानांसाधूनांसज्जनानांचपूजनेनिरतःसक्तः प्राज्ञःमेधावी अत्रमेधावुद्धिः प्राज्ञनाःलक्षणं अतीतानुस्मृ
तिःमेधावुद्धिस्तत्कालग्राहिणी शुभाशुभविचारज्ञाप्रज्ञाधीरेहदाहता शुचिःपरधनाद्यलुब्धःश्रोत्रियोवा स्त्रीजितःयोषितांवशगः प्रांशुरत्युच्चः उन्नतना
सिकःअत्युन्नतनासः कृशाचपलगात्रःदुर्बलशिथिलावयवः कृशंदुर्बलंचपलंबलहीनंगात्रंशरीरंयस्य अटनःपरिभ्रमणशीलः अर्थान्वितःसधनः हीनांगः
अपरिपूर्णाऽवयवः क्रयेषुविक्रयेषुचकुशलःशक्तः देवद्विनामासम्यपर्य्यायद्वितीयाभिधानः द्वितीयनामदेवाख्यंचास्यभवति सरुकूपीडितदेहः वंधूनांस्व
कुटुंबानामुपकारकृद्धितकारी तैश्चबंधुभिः विरुषितःभर्त्सितः पराभूतःत्यक्तःत्यजितश्च एवंविधःसप्तमेतुलस्थेचंद्रमसिजातोभवति ७ अथवृश्चिक
स्थेचंद्रमसिजातस्यस्वरूपंमालिन्याह पृथुलनयनवक्षाःपृथुलेविस्तीर्णेनयनेनेत्रेवक्षउरोयस्य वृत्तपरिवर्त्तुलेजंघेऊरूजानुनीचयस्य जनकैःमातापितृभिः

देवब्राह्मणसाधुपूजनरतःप्राज्ञःशुचिःस्त्रीजितःप्रांशुश्चोन्नतनासिकःकृशचलद्गात्रोटनोर्थान्वितः हीनांगःक्रयविक्रयेषुकुशलो
देवद्विनामासरुग्वंधूनामुपकारकृद्विरुषितस्त्यक्तस्तुलैःसप्तमे ७ पृथुलनयनवक्षावृत्तजंघोरुजानुर्जनकगुरुवियुक्तःशैशवेव्याधि
तश्च नरपतिकुलपूज्यःपिंगलःक्रूरचेष्टोझषकुलिशखगांकश्छन्नपापोऽलिजातः ८ व्यादीर्घास्यशिरोधरःपितृधनस्त्यागीकविर्वी
र्य्यवान्वक्तास्थूलरदश्चवाधरनसःकर्म्मोद्यतःशिल्पवित्॥ ,,गुरुभिश्चोपदेशकारिभिःगौरवयुक्तैश्चवियुक्तोरहितः शैशवेबाल्येव्याधितःपीडितःन

रपतिकुलेराजावंशेपूज्यः आराध्यःपिंगलःक्रूरचेष्टः विषमस्वभावः झषकुलिशखगांकःझषोमीनःकुलिशंवज्रंखगःपक्षीएतैःमत्स्यवज्रपक्षि[illegible]मानैरंकैश्चि
न्हैरंकितश्चिन्हितः छन्नपापःगुप्ताऽशुभकृत एवंविधोऽलिनिवृश्चिकस्थेचंद्रेजातोभवति ८ अथधनुर्द्धरस्थेचंद्रेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह व्यादीर्घं
स्यशिरोधरःव्यादीर्घमतिदीर्घमास्यंमुखंशिरोधराग्रीवायस्य पितृधनःजनकवित्तान्वितः त्यागीदाता कविःकाव्यज्ञः वीर्य्यवानवली वक्तासंभाषणेदक्षः स्थूलर
दश्चवाधरनसः स्थूलामहत्प्रमाणारदादंताःश्रवणौकर्णौअधरओष्ठःनसःनासिकाघ्राणःएतेसर्वेएवस्थूलायस्य कर्म्मोद्यतःसर्वकार्य्याणामुद्यमशीलः शि
ल्पवित्शिल्पज्ञः लपिपुस्तकचित्रज्ञः कुब्जासः अस्पष्टस्कंधः कुनखीकुत्सितनखः समांसलभुजःपीनबाहुः प्रागल्भवान् अतिप्रतिभायुक्तः धर्म्मवित्धर्म्मज्ञः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वंधुहितृ्दू वधूनामप्रीतिभाक् द्वेष्टावलात् हठात् आक्रमणादसंविधेयतावर्श्यं चवश्यतां नसमेतिनायाति सामाप्रीत्याएकेनैवगुणेनसाध्यः स्त्रीक्रियते एवंविधोऽ
श्वजो धनुषिस्थितेचंद्रेजातोभवति ९ अथमकरस्थेचंद्रेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह नित्यंलालयति स्वदारतनयान् स्वकलत्रंतनयांश्चपुत्रान् लालयत्या
राधयति प्रीत्याभजते धर्मध्वजः दांभिकः मिथ्याधार्मिक अधः कृशः अधोभागादतिदुर्बलः स्वक्षः शोभननेत्रः क्षामकटिः कृशजघनः ग्रहीतवचनः उ
क्तग्राहकः यदुच्यतेतत्सकृदेवग्रन्हाति सौभाग्ययुक्तः सर्वजनप्रियः अलसः क्रियास्वपटुः शीतालुः शीतंनसहते अटनः परिभ्रमणशीलः सत्वाधिकः उदा
रचेष्टः बलाधिकोवा काव्यकृत् विद्वान् लुब्धः लोलाभिभूतः अगम्यास्वगमनीयासुनिकृष्टजातिषुजरांगनासुवृद्धस्त्रीषुनिरतः संसक्तः संत्यक्तलज्जः विमु
क्तव्रीडः अघृणः निर्दयः एवंविधोमनुजोमनुष्योमकरस्थेचंद्रमसिजातोभवति १० अथकुंभस्थेचंद्रेजातस्यस्वरूपंश्लोकेनाह करभगलइति करभगलः

कुजांसः कुनखीसमांसलभुजः प्रागल्भवान्धर्मविद्बंधुद्विट्नबलात्समेतिचवशंसाम्नैकसाध्योश्वजः ९ नित्यंलालयतिस्वदारतनया
न्धर्मध्वजोऽधः कृशः स्वक्षः क्षामकटिर्गृहीतवचनः सौभाग्ययुक्तोलसः शीतालुर्मनुजोटनश्चमकरेसत्वाधिकः काव्यकृल्लुब्धोगम्यजरां
गनासुनिरतः संत्यक्तलज्जोघृणः १० करभगलः शिरालुः खरलोमशः दीर्घतनुः पृथुचरणोरुपृष्ठजघनास्यकटिर्ज्जठरः परवनितार्थपाप
निरतः क्षयवृद्धियुतः प्रियकुसुमानुलेपनसुहृत् घटजोध्वसहः ११ जलपरधनभोक्तादारवासोनुरक्तः समरुचिरशरीरस्तुंगनासोवृहत्कः॥

उष्ट्रसमग्रीवः॥ शिरालुः शिरालवती खराः कर्कशालोमान्यस्यलोमबहुलाः सलोमशः दीर्घतनुः दीर्घाः स्तुचोतनुः शरीरंयस्य पृथूविस्तीर्णौचरणौ पादौतथाऊरू
जानुउपरिभागौपृष्ठंदेहपश्चिमभागोजघनंनितंबस्थानमास्यंमुखंकटिश्चवस्तिः यस्यसः पृथुचरणोरुपृष्ठजघनास्यकटिः तथाजठरः मूर्खः परवनितासुपरस्त्री
षुपरार्थेषुपापेचनिरतः सक्तः क्षयवृद्धियुतः उपचयोऽपचयैः युक्तः प्रियकुसुमानुलेपनसुहृत् कुसुमानिपुष्पाणिअनुलेपनंसमालंभनंसुहृदोमित्राणिप्रियाणि
यस्य अध्वसहः पथिक्षमः एवंविधोघटजः कुंभस्थेचंद्रमसिजातोभवति अथमीनस्थेचंद्रमसिजातस्यस्वरूपंमालिन्याह ११ जलपरधनभोक्ता जलधनानासु
दकोत्पन्नवितानांमुक्ताफलानांक्रयविक्रयजातानांपरधनानांचभोक्तास्वामी दारवासोनुरक्तः दारेषुकलत्रेषुविषयेषुवाससांवस्त्राणांचानुरक्तः समरुचिरशरीरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समंतुल्यंसर्व्वावयवपरिपूर्णंरुचिरंदीप्तिमच्छरीरंयस्य तुंगनासः अत्युच्चनासिकः दृढहन्कः विस्तीर्णमूर्द्धा अभिभवतिसपत्नान् सपत्नान्शत्रून् अभिभवतिपराभवति स्त्रीजितः प्रमदावशगः चारुदृष्टिः शोभनाक्षः द्युतिनिधिधनभोगी द्युतिः कांतिः निधिः भूमावधः स्थापितमर्थंनिधिशब्देनोच्यते धनंवित्तं एषांभोगी भोक्ता पंडितश्चशास्त्रार्थवित् एवंविधोंत्यराशोमीनस्थेचंद्रमसिजातोभवति १२ अथोक्तराशिस्वरूपमपवादंचभ्रमरविलसितयाह॥ बलवतिराशाविति पुरुषस्यजन्मसमयेयस्मिन्राशौचंद्रमाव्यवस्थितस्तस्मिन्बलवतिसबलेतथातस्यराशेःयोधिपतिस्तस्मिन्तदधिपतौचबलवति तथातुहिनांशुश्चंद्रमासचयदिस्वबलेनात्मीयेनवीर्य्येणपूर्वोक्तेनसंयुतोऽन्वितःस्यात् भवेत् एवमेतेषुत्रिषुयदिसबलत्वंविद्यतेतदा यथोक्तराशिस्वरूपंवानजातः पुरुषोभवतियतउक्तं कथितफलानामविकलदातेति अनयासामग्र्याम्चंद्रः कथितफलानामुक्तस्वरूपाणामविकलानांपरिपूर्णानांदाताभवति एषांमध्याद्द्वयोः बलतोःमध्येयुक्तंस्वरूपं

अभिभवतिसपत्नान्स्त्रीजितश्चारुदृष्टिर्द्युतिनिधिधनभोगीपंडितश्चांत्यराशौ १२ बलवतिराशौतदधिपतौचस्वबलयुतःस्याद्यदितुहिनांशुः कथितफलानामविकलदाताशशिवदतोन्येप्यनुपरिचिंत्याः १३ प्रथितश्चतुरोऽटनोऽल्पवित्तः क्रियगेत्वायुध

प्राप्नोति एकस्मिन्बलवतिहीनंकिंचित् नकस्मिंश्चिद्बलवतितदुक्तंस्वरूपंनकिंचिद्भवति शशिवदतःइति अतोऽस्माच्चंद्रात् ऽऽभृद्द्वितुंगभागे॥
न्येपरिशिष्टायेग्रहाःरविभौमज्ञगुरुसितसौराः शशिवच्चंद्रवत्परिकल्प्याः यत्रराशौस्थिताभवंतितदाश्रयेणवक्ष्यमाणंस्वरूपंदास्यतितदपिचंद्रवत् एतदुक्तंभवति बलवतिराशौतदधिपतौच बलवतियस्यग्रहस्यराशिस्वरूपंपठ्यतेतस्मिनपिबलवति तदधिपतौचसंपूर्णंतत्पठितंराशिस्वरूपंभवति यद्येकयोश्चबलवतोमध्यमोनमितिनकस्मिंश्चिद्बलवति नैतत्किंचिदिति चंद्रराशिस्वभावरिति १३ इतिबृहज्जातकेराशीशीलःचंद्रस्यषोडशः १६ ॥ अथमेषव्रुषगतेर्विधः क्रियगेमेषस्थेभानावादित्येजातोभवति एतच्चफलंवितुंगभागेपरमोच्चांशकवर्जिते परमोच्चेतुपुनःपठितदोषभाग्जातोनभवति तद्यथा अल्पवित्तोबहुवित्तोभवति अटनोनभवति॥ आयुधभृन्नभवति तस्मान्येआयुधभृतोनुपायिनोभवंति अन्येतुपुनःपूर्वोक्तागुणाः प्रथितश्चतुरोभवति गवीत्यादि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ
टी.भू.
८८

वस्त्रैरंबरैः सुगंधद्रव्यैः पण्यैश्चजीवति वनिताहिद्स्त्रीपुद्दिष्टः गेयेगीतेवाद्येचवादनविधौकुशलः शिक्षितः एवंविधोगविद्दषस्थेसूर्य्येजातोभवति अथमिथुन
कर्केसिंहकंन्यास्थेसूर्य्येजातस्यस्वरूपंशार्द्दूलविक्रीडितेनाह १ विद्याज्योतिषवित्तवान् विद्यावान्व्याकरणज्ञः ज्योतिषवान्ज्योतिषशास्त्रज्ञः वित्तवान्धनी
एवंविधोमिथुनस्थेभानौजातोभवति तीक्ष्णः निरपेक्षः उग्रः अस्वः दरिद्रः परकार्य्यकृदन्येषांकर्म्मकर्त्ता श्रमेणखेदेनपंथाऽध्वेनक्लेशैः दुःखैश्चसर्वकालंसं
युज्यते एवंविधः कुलीरस्थेभानौजातोभवति॥सिंहस्थइति वनमरण्यं शैलःपर्वतः गोकुलः गोवाटः एतेषुस्थानेषुरतिः निवासशीलः यस्य तदाशक्तइत्यर्थः
॥वीर्य्यान्वितः बली अज्ञःमूर्खः एवंविधःपुमान्पुरुषः सिंहस्थेऽर्केजातोभवति लिपिरक्षरविन्यासः लेख्यंचित्रकर्म्म काव्यंकवेःकर्म्म गणितंग्रहगणितादि ज्ञा
नंविज्ञानं एतैरन्वितोनियुक्तः स्त्रीवपुः स्त्रीतुल्यशरीरः एवंविधः कंन्यास्थेऽर्केजातोभवति अथतुलवृश्चिकधन्विमकरस्थेऽर्केजातस्यस्वरूपंशार्द्दूलविक्रीडितेना

गविवस्त्रसुगंधपण्यजीवीवनिताहिट्कुशलश्चगेयवाद्ये १ विद्याज्योतिषवित्तवान्मिथुनगेभानौकुलीरस्थितेतीक्ष्णोऽस्वःपरकार्य्यकृ
त्क्रमपथःक्लेशैश्चसंयुज्यते॥सिंहस्थेवनशैलगोकुलरतिर्वीर्य्यान्वितोऽज्ञःपुमान्कंन्यास्थेलिपिलेख्यकाव्यगणितः ज्ञानान्वितः स्त्रीव
पुः २ जातस्तौलिनिशौंडिकोध्वनिरतोहैरण्यकोनीचकृत्क्रूरः साहसिकोविषार्जितधनः शस्त्रांतगोलिस्थिते सत्पूज्योधनवान्धनु
र्द्धरगतेतीक्ष्णोभिषक्कारुकोनीचोऽज्ञः कुवणिग्मृगेल्पधनवान्लुब्धोन्यभाग्यैःरतः ३॥ १६ २ शौंडिकोमद्यपानशक्तः मद्यकरोपानकेचित् अ

ध्वनिरतःपथिप्रशक्तः हैरण्यकः स्वर्णकारः नीचकृदनुचितकर्म्मकर्त्ता एवविधः तौलिनितुलस्थेऽर्केजातोभवति क्रूरःउग्रस्वभावः साहसिकःअसमीक्षि
तकार्य्यकृत् तथाच असमीक्षितकार्य्याणांकर्त्तासाहसिकःस्मृतः विषार्जितधनः विषप्रयोगैरर्जितंधनंसंचितंवित्तंयेन प्रत्यंतरेवृथार्जितधनःयद्धन
मर्ज्जतितदस्यवृथानिःफलंभवति चौरादयोऽपहरंति शस्त्रांतगः शस्त्रनैपुण्यकः शस्त्रस्यायुधस्यांगतः एवंविधोऽलिस्थितेवृश्चिकगतेऽर्केजातोभवति सत्पू
ज्यःसतामर्च्चनीयः धनवान्वित्तयुक्तः तीक्ष्णःनिरपेक्षः भिषक्वैद्यः प्रयोगज्ञः कारुकःशिल्पिकर्म्मज्ञः एवंविधोधनुर्द्धरस्थेऽर्केजातोभवति नीचःकुलानुचिता
धमकर्म्मकृत् अज्ञःमूर्खः कुवणिक्कुत्सितवणिक् अल्पधनवान्स्तोकार्थः लुब्धःलोलाभिभूतः अन्यभाग्यैःरतःपरकार्यैर्भाग्यैः वित्तादिभिःरतः पराथोंपर

राम
८८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथकुंभमीनगतेऽर्के जातस्यस्वरूपंचंद्रार्कयोरेकराशिगतयोस्तुलस्मज्ञानंवसंततिलकेनाह नीचइति नीचः कुलानुचिताधमकर्मकृत् तनयैः पुत्रैः भाग्यैश्च
परिच्युतः त्यक्तः पुत्रैःजनचाल्पभ्येनचविरहितः अस्वः निर्द्धनः एवंविधोघटेकुंभस्थेऽर्केजातोभवति तोयोत्थंजलोत्पन्नंमुक्ताफलादिनातत्पण्येनतद्विक्रयेण
विभवमैश्वर्यंयस्य वनिताहृतःस्त्रीपूज्यः एवंविधोऽन्त्येमीनस्थेऽर्केजातोभवति नक्षत्रमानवतनुरित्यादि नक्षत्रमानवकोराशिपुरुषः कालांगानीत्यादिनाप्रद
र्शितः तुहिनरश्मिश्चंद्रः हिमरश्मिरादित्यः एतौसमेतौयस्मिन्राशौस्थितौसराशिनक्षत्रपुरुषस्ययस्मिन्नंगस्थितस्तत्रपुरुषस्यजातस्यलक्ष्मचिह्नंमशकादिसमादिशे
त् वदेत् यथामेषस्थयोःशिरसिवृषस्थयोःमुखइत्येवमुह्यं आदित्यराशिस्वभावः अथमेषवृश्चिकवृषतुलस्थेकुजेजातस्यस्वरूपंत्रुटकेनाह ४ नरपतिसत्कृ
तःराज्यपूजितः अटनःपरिभ्रमणशीलः चमूपःसेनापतिःवणिक्क्रयविक्रयज्ञः सधनःवित्तान्वितः क्षततनुःविक्षतदेहः व्रणितशरीरः चोरस्तस्करः भूरि

नीचोघटेतनयभाग्यपरिच्युतोऽस्वस्तोयोत्थपण्यविभवोवनिताहृतोंऽत्ये नक्षत्रमानवतनुः प्रतिमेविभागेलक्ष्मादिशेत्तुहिनरश्मिदिने
शयुक्ते ४ नरपतिसत्कृतोऽटनश्चमूपवणिक्सधनाःक्षततनुश्चौरभूरि विषयांश्चकुजःस्वगृहे युवतिजितोन्सुहृत्सुविषमान्यरदारर
तान्कुहकसुवेषभीरुपरुषान्सितभेजनयेत् ५ बौधेऽसहस्तनयवान्विसुहृत्कृतज्ञोगांधर्वयुद्धकुशलःकृपणोऽभयोर्थी चांद्रेऽर्थवान्सलिल
यानसमर्ज्जितस्वःप्राज्ञश्चभूमितनयेविकलःखलश्च ६ ॥ विषयःविप्रकीर्णेंद्रियः एवंविधानस्वगृहेमेषवृश्चिकस्थःकुजःभौमःजनयेत् युवतिजितःस्त्रीवि
धेयःसुहृत्सुमित्रेषुविषमःदुर्विधेयः सक्रूरःस्वभावः परदाररतःपरयोषितप्रसक्तः कुहकज्ञःऐंद्रजालिकः सुवेषःशोभनालंकारः भीरुःसभयःपरुषःकर्कशः
निस्नेहः एवंविधान्पुरुषान्सितभेशुक्रक्षेत्रेवृषतुलेचस्थितोभौमोजनयेदुत्पादयेत् अथमिथुनकंन्याकर्कटस्थेभौमेजातस्यस्वरूपंवसंततिलकेनाह ५ अथमिथुनकं
न्यागतेभौमेजातस्यस्वरूपमाह बौधेति असहःतेजस्वी सतनयवान्पुत्रयुक्तः विसुहृत्मित्ररहितः कृतज्ञःपरोपकारशीलः गांधर्वयुद्धकुशलः गांधर्वेगीतेयुद्धेचसं
ग्रामेप्रवेशनिर्गमनव्यूहरचनादिषुचकुशलःतज्ज्ञः कृपणःअदाता अभयःनिर्भयः अर्थीयाचापरः एवंविधोबौधेमिथुनकंन्यास्थेकुजेभौमेजातोभवति अथक
र्कटस्थेभौमेजातस्यस्वरूपमाह अर्थवान्सधनः सलिलयानसमर्ज्जितस्वःसलिलयानेनयवादिनासम्यगर्ज्जितंस्वंधनंयेन अथवासलिलेनजलेनयानेनगमनेना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वनासमर्ज्जितः स्वः धनोयेनप्राप्तः मेधावी विकलोंगहीनः खलःदुर्जनः एवंविधश्चांद्रेकर्कटगते भौमेजातो भवति ६॥ अथसिंहधन्विमीनकुंभमकरस्थेभौमे जातस्यस्वरूपंशार्दूलविक्रीडितेनाह निस्वः निर्द्धनः क्लेशसहः आपद्धीरः कदर्थनाक्षमः वनांतरचरः वनांतरोरण्यमध्यचारी केचिदभयोवनचरइतिपठंति अभयोभयरहितः वनानांतरचरोऽरण्यचारी अल्पदारात्मजः अल्पकलत्रजः स्वल्पापत्यजः एवंविधः सिंहस्थेभौमेजातोभवति अनेकरिपुः बह्वरिः नरेंद्रसचिवः मंत्री ख्यातः विदितकीर्त्तिः अभयः निर्भयः अल्पात्मजः स्वल्पापत्यः एवंविधोधन्विमीनस्थेभौमेजातोभवति दुःखार्त्तः नित्यंदुःखसंतप्तः विधनः दरिद्रः अटनः परिभ्रमणशीलः अनृतरतः असत्यभाषी तीक्ष्णः निरपेक्षः क्रूरः एवंविधः कुंभस्थेभौमेजातोभवति भूरिधनात्मजः भूरिप्रभूतधनः आत्मजश्चप्रभूतपुत्रः भूपः राजा अथवातत्समः राजतुल्यः एवंविधोमृगगेतेमकरस्थे भौमेजातोभवति ७ अथमेषवृश्चिकवृषतुलगतेबुधेजातस्यस्वरूपंवसंततिलके

निस्वः क्लेशसहोवनांतरचरः सिंहेल्पदारात्मजोजैवेनेकरिपुर्नरेंद्रसचिवः ख्यातोभयोल्पात्मजः दुःखार्त्तोविधनोऽटनोनृतरतस्तीक्ष्णश्च
कुंभस्थितेभौमेभूरिधनात्मजोमृगगतेभूपोथवातत्समः ७ द्यूतर्णपानरतनास्तिकचौरनिःस्वाः कुस्त्रीककूटकृदसत्यरताः कुजर्क्षे
आचार्य्यभूरिसुतदारधनार्ज्जनेष्टाः शौक्रेवदान्यगुरुभक्तिरताश्चसौम्ये ८ विकत्थनः शास्त्रकलाविदग्धः प्रियंवदः सौख्यरतस्तृतीये।
जलार्ज्जितस्वः स्वजनस्यशत्रुः शशांकजेशीतकरर्क्षयुक्ते ९

॥ नाह द्यूतेति द्यूतेऽक्षरज्ञानेऋणेपरस्वहरणेपानेचनिरतः सक्तः नास्तिकः शास्त्रार्थोदपेतः तार्किकः नास्तिपरलोकेमतिरस्य चौरस्तस्करः निःस्वोदरिद्रः कुस्त्रीकः कुत्सितभार्य्यः कूटकृत्कूटकर्त्ता दांभिकः असत्यनिरतः धर्म्मादपेतः अनृतभाषी एवंविधो जाताः सौम्येबुधेभौमर्क्षेमेषवृश्चिकस्थेभवंति आचार्य्यः उपदेशकर्त्ता भूरिसुतः प्रभूतापत्यः भूरिदारोबहुकलत्रः धनार्ज्जनेष्टः धनार्ज्जनमिष्टंयस्य अर्थार्ज्जनेनित्यमुद्यतः वदान्यः दाता गुरुभक्तिरताः मातृपितृगुरूणांभक्ताः एवंविधापुरुषाः शौक्रेवृषतुलस्थेबुधेजाताभवंति अथमिथुनककर्कस्थेबुधेजातस्यस्वरूपंउपेंद्रवज्रयाह ८ विकत्थनइति विकत्थनः वाचालः असत्यवादी शास्त्रकलाविदग्धः शास्त्रेषुविद्यासुकलासुचगीतवाद्यनृत्तगीतलेखचित्रकर्म्मसुविदग्धः शिक्षितः प्रियंवदोऽभिमतवक्ता सौख्यरतः सुखासक्तः एवंविधः शशांकजेबुधेतृतीयेमिथुनस्थेजातोभवति जलार्ज्जितः स्वः जलेनोदकेनार्ज्जितंस्वंधनंयेनसः केचिद्बलार्ज्जितस्वइतिबलेनवीर्य्येणार्ज्जितंस्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनं येन स्वजनस्यात्मीयजनस्य च बंधुजनस्य शत्रुः रिपुः एवंविधः शशांकजे बुधे शीतकरक्षेत्रे चंद्रराशौ कर्कटयुक्ते जातो भवति अथ सिंहकन्यागते बुधे जातस्य स्व
रूपं प्रहर्षिण्याह ७ स्त्रीद्वेष्य इति योषितामनभिमतः विधनसुखात्मजः विधनो धनरहितः विसुखो विगतसुखः विगतात्मजः पुत्ररहितः अटनः परिभ्रमण
शीलः अज्ञः मूर्खः स्त्रीलोलः वनिताभिलाषी सुपरिभवः अत्यर्थं पराभिभूतः एवंविधो ज्ञे बुधेऽर्कराशिगे सिंहस्थे जातो भवति त्यागी दाता ज्ञः पंडितः प्रचुरगु
णः प्रभूतगुणैर्युतः गुणाः विद्याशौर्यादयः सुखी सुखितः क्षमावान् सहिष्णुः युक्तिज्ञः प्रयोगवेत्ता विगतभयः निर्भयः एवंविधः षष्ठराशौ कन्यास्थे बुधे जातो
भवति अथ मकरधन्विमीनगते बुधे जातस्य स्वरूपमौपच्छंदसिकेनाह ९ परकर्मकृत् परप्रेष्यः अस्वः दरिद्रः शिल्पबुद्धिः शिल्पकर्मस्वनुरतमतिः ऋणवा
न् परस्वग्रहणशीलः विष्टिकरः भारकरः आज्ञाकरः एवंविधोऽर्कजक्षेत्रे मकरकुंभस्थे बुधे जातो भवति नृपसत्कृतः राजपूजितः नृपसंमतो वा राजवल्लभः पं

स्त्रीद्वेष्यो विधनसुखात्मजोऽटनोऽज्ञः स्त्रीलोलः सुपरिभवोऽर्कराशिगे ज्ञे त्यागी ज्ञः प्रचुरगुणः सुखी क्षमावान् युक्तिज्ञो विगतभयश्च षष्ठराशौ ९
परकर्मकृदस्वः शिल्पबुद्धिऋणवान्विष्टिकरो बुधेऽर्कजर्क्षे नृपसत्कृतपंडिताप्तवाक्यो नवमेंत्ये जितसेवकोंऽत्यशिल्पः ११ सेनानी बहुवित्तदा
रतनयो दाता सुभृत्यः क्षमी तेजोदारगुणान्वितः सुरगुरौ ख्यातः पुमान्कौजभे कल्याणः ससुखार्थमित्रतनयस्त्यागी प्रियः शीतगुभे बोधे भूरिपरिच्छदात्म
जसुहृत्साचिव्ययुक्तः सुखी १२

डितः विद्वान् आप्तवाक्यः व्यवहारसमर्थवक्ता आप्तमनुकूलं वाक्यं यस्य एवंविधो नवमे धन्विस्थिते बुधे जातो भवति जितसेवकः जिता
सेवका येन परराधनदक्षः पराभिप्रायज्ञः अंत्यशिल्पः एवंविधोंत्ये मीनस्थे बुधे जातो भवति इति बुधराशिस्वभावः ९ अथ मेषवृश्चिककर्कटतुलमिथुनकन्यागते जीवे जात
स्य स्वरूपं शार्दूलविक्रीडितेनाह ११ सेनानी सेनानायकः बहुवित्तः प्रभूतधनः बहुदारः प्रभूतकलत्रः बहुतनयः प्रभूतापत्यः दाता दानशीलः सुभृत्यः शोभनभृत्यः क्षमी स
मावान् तेजस्वी कांत्यादारगुणैः कलत्रशौर्यैरन्वितो युक्तः ख्यातः प्रख्यातकीर्तिः एवंविधः सुरगुरौ जीवे कौजे कुजभे भौमक्षेत्रे मेषवृश्चिकस्थे जातो भवति कल्याणः स्वस्थदे
हः ससुखः सुखयुक्तः सार्थः सधनः समित्रः ससुहृत् सतनयः पुत्रान्वितः सुखधनमित्रपुत्रयुक्तः त्यागी दाता प्रियः सर्वजनवल्लभः एवंविधः शीतगुभे शुक्रक्षेत्रस्थे
वृषतुलस्थे जीवे जातो भवति भूरिपरिच्छदः बहुवस्त्रगृहपरिवारः भूर्यात्मजः बहुपुत्रः भूरिसुहृत् प्रभूतमित्रः साचिव्येन मंत्रित्वेन नियुक्तः सचिवस्य भावः साचिव्यं सुखी सु
खितः एवंविधो बोधे बुधक्षेत्रे मिथुनकन्यास्थे जीवे जातो भ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ. टी.भ. ८१

अथकर्कटसिंहधन्विमीनकुंभमकरस्थेजीवेजातस्यस्वरूपंशार्दूलविक्रीडितेनाह चांद्रइति रत्नानिमणयः सुताःपुत्राःस्वंधनंदाराः कलत्रंविभवमैश्वर्य्यं प्रज्ञा
मेधा सुखंसुखभावः एतैरन्वितःसंयुक्तः एवंविधः चांद्रे चंद्रक्षेत्रेकर्कटस्थेसुरगुरौजीवेजातोभवति बलनायकः सेनाप्रधानतमः अन्यच्चयचंद्रभेकर्कटस्थे
उक्तं रत्नसुतस्वदारविभवः प्रज्ञासुखैरन्वितः एवंविधःसिंहस्थेजीवेस्याद्भवेत् मांडलिकः मंडलाधिपतिः सेनानाथोवा अथवाधनीवित्तवान् एवंविधःस्वर्क्षे
स्वराशौधन्विमीनस्थेजीवेजातोभवति कुंभेकर्कटवदिति यानिकर्कटस्थेजीवेफलान्यभिहितानिरत्नसुतस्वदारविभवःप्रज्ञासुखैरन्वितइत्येतानिकुंभस्थेगुरौभ
वंति अत्रान्येनसहमतभेदः तेनात्रनिर्दिष्टंफलमभिहितं तथाच नीचःकुंभेजनयतिकर्म्माणितोयाश्रयेसक्तं नीचःकुलानुचिताधमकर्म्मकृत् अल्पवित्तःतोका
र्थैः असुखीदुःखितः एवंविधोमकरस्थेजीवेजातोभवति इतिबृहस्पतिराशिस्वभावः १३ अथशुक्रराशिः॥ अथमेषवृश्चिकवृषतुलगतेशुक्रेजातस्यस्वरूपंपुष्पि

चांद्रेरत्नसुतस्वदारविभवःप्रज्ञासुखैरन्वितःसिंहेस्याद्बलनायकःसुरगुरौप्रोक्तंचयचंद्रभे स्वर्क्षेमांडलिकोनरेंद्रसचिवःसेनापतिर्वाधनी
कुंभेकर्कटवत्फलानिमकरेनीचोल्पवित्तोऽसुखी १३ परयुवतिरतस्तदर्थवादैर्हृतविभवःकुलपांसुनःकुजर्क्षे स्वबलमतिधनोनरेंद्रपू
ज्यःस्वजनविभुःप्रथितोभयःसितेस्वे १४ नृपकृत्यकरोर्थवान्कलाविन्मिथुनेषष्ठगतेतिनीचकर्म्मा॥रविजर्क्षगतेमरारिपूज्येसुभगः
स्त्रीविजितोरतःकुनार्य्यां १५॥ पुष्पिताग्रयाह परयुवतिरतः परस्त्रीषुसक्तः तदर्थवादैस्तासांपरस्त्रीणामर्थवादैरपराधानुवचनैः हृतविभवोऽपहृतार्थः कुल
पांशनःकुलकलंकभूतः एवंविधःसितेशुक्रेकुजर्क्षेभौमक्षेत्रेमेषवृश्चिकस्थेजातोभवति स्वबलेनात्मीयवीर्य्येणस्वमत्याआत्मीयबुध्याचधनंयस्यासोस्वबलमति
धनः नरेंद्रपूज्यः राजवल्लभः स्वजनविभुःबंधुप्रधानः प्रथितःविख्यातः अभयःनिर्भयः एवंविधःस्वेस्वक्षेत्रेवृषतुलस्थेसितेशुक्रेजातोभवति अथमिथुनकं
न्यामकरकुंभस्थेशुक्रेजातस्यस्वरूपंपुष्पिताग्रयाह १४ नृपकृत्यकरःराज्यकर्म्मकर्त्ता अर्थवान्धनी कलावित्कलाज्ञः गीतवाद्यादिकंवेत्ता एवंविधोऽमरारि
पूज्येदैत्यगुरौशुक्रेमिथुनस्थेजातोभवति षष्ठगतेकन्यास्थेशुक्रेऽतिनीचकर्म्माणिकृष्टकार्य्यकरोजातोभवति सुभगःसर्वजनप्रियः स्त्रीविजितःप्रमदावश
गः कुनार्य्यांकुत्सितस्त्रियांरतःसक्तः एवंविधःशुक्रेरविजर्क्षगतेमकरकुंभस्थेजातोभवति अथकर्कटसिंहधन्विमीनस्थेशुक्रेजातस्यस्वरूपंशिखरिण्याह १५॥

राम ८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विभार्यः द्विस्त्रीकः अर्थी द्रव्यापरः भीरुः सभयः प्रवरमदोतिदप्तः प्रवरशोकोतिदुःखितः एवंविधोदानवगुरौदैत्यपूज्येशुक्रेशशिभेकर्कटस्थेजातोभवति योषा न्नार्थः स्त्रीप्राप्तधनः प्रवरयुवतिः प्रधानस्त्रीकः मंदतनयः अल्पापत्यः एवंविधोहरौसिंहस्थेशुक्रेजातोभवति गुणैः वृद्धैः पूज्यः मान्यः सस्वः सधनः एवंविधसुर गसहितेधन्विस्थेशुक्रेजातोभवति विद्वान् पंडितः आढ्यः ईश्वरः नृपजनितपूज्यः नृपेणराज्ञाजनितोत्पादितापूजोऽर्हणंयस्य अतिशुभगः सर्वजनानामतिव ल्लभः एवंविधोफषेमीनस्थेशुक्रेजातोभवति इतिशुक्रराशिस्वभावः १६ अथशनिः॥ अथमेषवृश्चिकमिथुनकन्यागतेसौरेजातस्यस्वरूपंवसंततिलकेनाह॥ मूर्खो ऽज्ञानोपेतः अटनः परिभ्रमणशीलः कपटवान्दांभिकः विसुहृत्मित्ररहितः एवंविधोयमेसौरे अजेमेषस्थेजातोभवति बंधवधभाक् बधस्ताडनंबंधोर्बंधनं व धबंधौभजते चपलः क्रियास्वनवस्थितः अघृणः निर्दयः एवंविधः कीटेवृश्चिकस्थेजातोभवति निर्ह्रीसुखार्थतनयः निर्गताह्रीलज्जायस्यसनिर्लज्जः निःसुखो

द्विभार्य्योर्थीभीरुः प्रवलमदशोकश्चशशिभेहरौयोषान्नार्थः प्रवरयुवतिर्मंदतनयः गुणैः पूज्यः सस्वसुरगसहितेदानवगुरौफषेविद्वाना
ढ्योनृपजनितपूज्योतिसुभगः १६ मूर्खोटनःकपटवान्विसुहृद्यमेऽजेकीटेतुबंधवधभाक्चपलोघृणश्च निर्ह्रीसुखार्थतनयःस्खलित
श्चलेख्येरक्षापतिर्भवतिमुख्यपतिश्चबौधे १७ वर्ज्यस्त्रीष्टोनवहुविभवोभूरिभार्य्योवृषस्थेख्यातःस्वोच्चेगणपुरबलग्रामपूज्योर्थवांश्च

दुःखितः निरर्थोदरिद्रः निस्तनयः पुत्ररहितः लेख्येआलेख्यकर्म्मणिस्खलितः अतः रक्षापतिर्भवत्यारक्षिकः मुख्यपतिः प्रधाननाथः एवंविधोबौ धेबुधक्षेत्रेमिथुनकन्यास्थेसौरेजातोभवति अथवृषतुलाकर्कटसिंहस्थेसौरेजातस्यस्वरूपंमंदाक्रांतयाह १७ वर्ज्यस्त्वगम्यासुस्त्रीषुयोषित्सुइष्टः व ल्लभः नवहुविभवः नप्रभूतैश्वर्य्ययुक्तः अल्पैश्वर्य्ययुक्तः भूरिभार्य्यः प्रभूतदारः एवंविधोवृषस्थेसूर्य्यपुत्रेशनैश्चरेजातोभवति ख्यातः विदितकीर्त्तिः ग णानांसमूहानांपुराणांनगराणांबलानांसैन्यानांग्रामाणांचपूज्योमान्यः अर्थवान्सधनः एवंविधोस्वोच्चेआत्मीयस्वोच्चराशौतुलस्थेसौरेजातोभवति अ स्वःदरिद्रः विकलदशनः अल्पदंतः मातृहीनः जननीवियुक्तः असुतः पुत्ररहितः अज्ञः मूर्खः एवंविधः कर्कटस्थेसौरेजातोभवति अनार्य्यः मूर्खः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰ दी॰ भ॰ ९२

विसुखोद्वेगः खिन्नः वितनयः पुत्ररहितः विष्टिकृद्भारवाहकः एवंविधः सिंहस्थे सूर्य्यपुत्रे शनैश्चरे जातो भवति अथ धन्विमीनमकरकुंभगते सौरे जातस्य स्वरूपं प्र
दर्शयविक्रीडितेनाह १८ स्वतः शोभनो नः पर्य्यंतो यस्य स स्वंतः शुभेन कर्म्मणा गतस्य मृत्युर्भवति अथवा अंते शोभनं सुखादिकं यस्य नरेंद्रभवने राजगृहे प्रत्ययितः सं
जातप्रत्ययः सत्पुत्रः शोभनापत्यः सुजायः शोभनभार्य्यः सद्धनः सद्वित्तः पुरबलग्रामाग्रनेता पुराणां नगराणां बलस्य सेनायाः ग्रामाणां च अग्रनेता प्रधानो
नायकः एवंविधोऽर्कजे सौरे जीवक्षेत्रे धन्विमीनस्थे जातो भवति॥ अन्यस्त्रीधनसंवृतः परयोषिद्भिः परधनैश्च संवृतो संयुक्तः पुरबलग्रामाग्रणी पुराणां बलानां
ग्रामाणां च अग्रणी प्रधाननायकः मंददृक् मंदचक्षुः मलिनः मलोपेतः स्थानालसः स्थिरार्थः स्थिरवित्तः स्थिरविभवः स्थिरैश्वर्य्यः भोक्ता असंचयशीलः एवंवि
धः पुमान् पुरुषः स्वक्षेत्रे मकरकुंभस्थे सौरे जातो भवति इति शनैश्चरराशिस्वभावः एतेषु सर्वेषु ग्रहराशिस्वभावेषु बलवति राशौ तदधिपतौ च तस्मिन् ग्रहे बल

कर्किण्यस्वो विकलदशनो मातृहीनोऽसुतोऽज्ञः सिंहे नार्य्यो विसुखतनयो विष्टिकृत्सूर्य्यपुत्रे १८ स्वंतः प्रत्ययितो नरेंद्रभवने सत्पुत्रजायाधनो जीवक्षेत्रगतेऽर्कजे पुरबलग्रामाग्रनेताथवा अन्यस्त्रीधनसंवृतः पुरबलग्रामाग्रणीर्म्मंददृक् स्वक्षेत्रे मलिनः स्थिरार्थविभवो भोक्ता च जातः पुमान् १९ शिशिरकरसमागमेक्षणानां सदृशफलं प्रवदंति लग्नजातम्॥ फलमधिकमिदं यदत्र भावाद्भवनभनाथगुणैर्विचिंतनीयाः २०

वति जातस्य यथोक्तं राशिस्वरूपं भवति द्वयोर्बलवतोर्म्मध्ये मानमिति न कस्मिंश्चिद्बलवति न किंचिदिति अथ मेषादिषु लग्नेषु चंद्र
क्रांतराशियुक्तस्वरूपातिदेशं पुष्पिताग्रयाह १९ शिशिरकरश्चंद्रमा तस्य राशिभिः सह समागमेयत्स्वरूपमुक्तं दृग्जाता मन्त्रदृगित्यादिकं तन्मेषलग्नजातस्यापि व
क्तव्यं एवमन्येष्वपि राशिषु वृषादिषु स्थिते चंद्रमसि यदुक्तं तल्लग्नजातस्यापि वक्तव्यं यतो मुनयः सदृशं फलं वदंति कथयंति स्वरूपभेदाभावात् तथा च सत्यः
मेषविलग्ने कुनखी सुरोषणो भेददक्षस्त्वलितवाक्यः पित्तानिलभूयिष्ठः कृपणोऽतिबहुव्ययश्चैव रहितो बाल्ये गुरुभिर्म्मंदसुतः स्वजनसहजहितकर्त्ता धर्म्मे स्थितो
विदेशी पापगश्च कर्म्मारंभेऽल्पफलं नीचां वा पिशुनां वा विकलां लभते न्यपूर्विकां भार्य्यां सहजसमान्यपि मित्राणि चास्य बंधुत्वमुपयांति शस्त्रेण वा विषैर्वा मरणं पि
त्तोद्भवैर्विकारैर्वा स्यात् पक्षाज्ज्वलनाद्वा वर्षात् दुर्गात्प्रपतनाद्वा वृषभविलग्ने स्थूलो छगंडनासो महाललाटश्च श्लेष्मानिलभूयिष्ठस्त्यागी बहुशोव्ययरतश्च॥ राम ९२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कंन्याप्रजोल्पपुत्रः पितुर्ज्जनन्याश्चदोषकृद्बहुशः कर्म्मणिसततंसक्तोविधर्म्मयुक्तोर्थभाक्चैव नित्यंकलत्रकांक्षीशास्त्रविद्यानीसदास्वजनहन्ता मृत्युःशस्त्रैःपापैर्म्मृ
गैश्चलभतेन्यदेशेषु देहश्रमैर्ज्जलैर्वाश्मूलैर्वाप्यटननिरसनैश्चैव पुरुषश्चतुष्पदैर्वाबलान्वितान्मृत्युमुपयाति पूर्वविलग्नेमिथुनेहीनांगःसूयतेधिकांगोवा प्रियवा
क्विशिष्टकर्म्मामिश्रप्रकृतिर्द्विजननीकः अल्पमतिरल्पकायः सतांचमहितोगुरूणांच अल्पसहजोल्पचेष्टःपरावमर्दीगुणयुतश्च कर्म्मसुबहुषभिरतोधर्म्मसा
धयतिनचापधर्म्मेण। प्राप्नंलाभान्वितविधान्दोषैस्तैस्तैश्च नाप्नायति बह्वीःपत्नीर्लभतेरोगांश्चदारुणान्जयति व्यालाद्विपान्मृगाद्वाप्युदकाद्वामृत्युमुपयाति
कर्किणिपूर्वविलग्नेनैकाग्रोगुह्यरोगवान्भीरुः उरसिकृताभिज्ञानःकफानिलात्माद्दृढग्राही पापानृतान्भजतेपरस्वमपिनिक्षिपेत्व्ययेनसक्तत स्वजनाद्गम्रः
स्वजनैर्व्विभक्तितोह्यस्थिरप्रसवः नीस्तांकर्म्मविदेशेनित्यंधर्म्मोद्दितःपरस्वामी असद्दृशाद्दारोरिपुर्निर्ज्जितश्चपूज्यःसमूहानां कंठपीडाद्रुज्वाकफोदयादस्थिभंज
नाद्भेदात् देहच्छेदादथवाजलोदरान्मृत्युमाप्नोति सिंहविलग्नेकठिनःप्रियामिषःपैत्तिकोवितत/ग्रः बह्वारंभकुटुंबः कृपणस्त्वयसंमतःख्यातःसहजविषा
दीस्वजनस्यघातकोविक्रमैःस्वकैर्य्युक्तः अविषादीकर्म्मकरोविविधोपायैस्त्वधर्म्मिष्टः भार्य्योविद्वीर्लभतेविद्याद्विविधाःकुलैरुपेताश्च कल्याहजश्चबहुरोजा
न्वोर्दशनेषुचाप्नोति मृत्युःशस्त्रैःपापैर्व्विषैश्चकाष्टैरथामयैश्चापि अंबुचरैर्व्वासत्वैर्बुबुक्षयाहृसमुपयाति षष्टविलग्नेप्रियवाक्तनुच्छविर्दीर्घकरचरणः मिश्रप्रकृ
तिश्चाप्यीकृतिर्द्दृणीचार्थवान्कृपणः स्वजनस्येष्टः कंन्याबहुप्रजोभ्रातृभिर्व्विरुद्धश्च धर्म्मप्रियोल्पलाभःकर्म्मणिनिपुणःसमाचरति विविधाच्चतुष्पदगणाद्धल्ला
त्पितोद्भवाद्रोगात् शोकात्संपानाद्वामृत्युंचाप्नोतिपाशाद्वा सप्तमराशौलग्नेविषमांगःसूयतेविषमशीलः कफवातिकःसुचपलोह्रस्वग्रीवःकृतज्ञश्च अर्थान्विपु
लान्लभतेव्ययश्चसंपूज्यतेयशःप्रायः गुरुसेवायांनिरतःपितान्यजनसहजपूज्यः अध्वरुचिर्द्धर्म्मिष्टोविनाशमायातिपीडनैःस्वैःस्वैः मृतभार्य्यःकलहरुचिबे
हुशःशोकादिभिःक्लिष्टः मृत्युःस्यातात्पुरुषात्स्वजनात्सौम्याच्चतुष्पदाद्वापि स्वेदाच्चविप्रयोगादुपवासान्मार्गयोगाद्वा अष्टमराशौलग्ने विशालरुग्वाननोदरः
क्रूरःपित्तप्रकृतिःपिंगेक्षणोमृदुद्रुतगतिः परस्वामीस्फीतकुटुंबस्वजनांतकश्चबहुव्ययोबहुप्रसवः सुखरहितोभ्रातृव्योदृषसेवीधर्म्महीनश्च भार्य्यानिमित्तविमु
खीशत्रोरथोनददातिबहुशश्च स्वकुलोद्भूतांशत्रून्लभतेरोगांश्चनेकविधान् गात्रच्छेदैःशत्रोर्व्वैराग्नतोवंधनैः प्रहारैश्च रोगैर्व्वापापकृतैर्ज्वलनाद्वामृत्युमुपयाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ट
टी. भ
९३

स्थूलोष्ठदशननासानवमेलग्नेकफानिलप्रकृतिः मांसलयुह्योरुभुजः कुनखीकर्म्मोद्यतः शूरः सुदानी चाम्भजतेचौर्य्यादनलान्नृपाच्चनष्टधनः विज्ञानानांप्रसवो
बहुपूज्योभ्रातृघातरुचिः कर्म्मविदेशेष्विष्टः कुरुतेचिन्नानिचार्हेतिनृपेभ्यः धर्म्मेतुमध्यममतिर्द्विरैश्चविरोधमुपयाति रोगान्वदनेलभतेचतुष्पदाद्वात्मनः समाप्नो
ति मृत्युविलेशयाद्वा नृपाच्चबंधाज्जनाद्वापि दशमविलग्नेतनुनासिकापुटोदीर्घवक्त्रः कारचारणः वाग्वात्मकोमृगास्योभीरुश्चपलोथबंधनभाक् क्षुद्रकुटुंबोल्प
धनः कृपणः कन्याप्रजोमनस्वजनः सहजसमृद्धः शौर्य्यान्नृपादरण्याच्चलब्धधनः॥ उपवासव्रतशीलोनीचामिष्टामवाप्नुयाद्भार्य्यां बहुविग्रहोल्पकेशोदुर्बल
जानुश्चरोगार्त्तः बालादनिलाद्धस्मान्नृपाद्विषात्प्रपतनाद्भजाहुतात् पित्तोदर्यार्त्तजीर्णोम्रियतेवामार्गविभ्रष्टः एकादशेविलग्नेलब्धः क्रूरः कुलाग्रजः पुरुषः
पित्तानिलभूपिष्टस्तिलपुष्पसमाननासश्च प्राप्तान्नाशयतेर्थान्बहुभृत्यः साध्यतेव्ययैश्चापि क्षीणः स्वगोत्रगुरुजनपरपक्षसुहृत्स्वजनशत्रुः कर्म्मणिपापेर
क्तः तनुश्चकांतानवाप्नुयाद्व्राभात् धर्म्मध्वजप्रवृत्तोदैवतपूजश्चकारयतिभार्य्या विग्रहशीलांलभतेविविधान्रोगान्कफोद्भवानुरसि म्रियतेचजठरेरोगाद्रम
नास्त्रीणांप्रयोगाद्वा द्वादशगेप्राग्लग्नेस्थूलोष्ठोमीनदृग्महानासः कफवानिकोमहात्मात्वग्देषीनैकमतिचेष्टः शिष्टाव्ययव्ययभृत्यैः स्वजनस्त्रीपूजितः सहजना
यः कर्म्मणिधर्म्मयुक्तः पित्रोपचयः सुदारश्च नीचाचारांभार्य्यालभतेचरिपून् सुदारुणान्क्रूरान् रोगान्सशोणितादाप्नुयाद्भयंव्यालसिंहेभ्यः मृत्युंपुरुषैर्गण
वृंदपूजितैर्गुहजैर्विकारैर्वा विद्यौषधप्रयोगादुपवासान्मार्गदोषाद्वा एवंशिशिरकरसमागमसदृशंलग्नयातंफलं तथाचशिशिरकराश्रितराशेरीक्षणंदृष्टि
फलंवक्ष्यमाणंतथातद्दैवतग्रहजातस्यापिवक्तव्यं चंद्रेभूपबुधावित्यादि किंतुलग्नेफलमपिकिमिदं यदत्रभावइति चंद्रराशितद्दमत्रलग्नादिषुभावेष्वधि
कफलंयद्भावास्तन्वादयः भवनगुणैः राशिगुणैर्भवननाथगुणैस्तत्स्वामिगुणैः विचिंतनीयाः विचार्य्याः भवनभनाथयोः गुणः सबलत्वं एतदुक्तंभवति लग्नेबल राम
वतिलग्नपतौचबलवतिजातस्यशरीरपुष्टिर्वक्तव्या लग्नाद्द्वितीयराशौबलवतितदधिपतौचबलवतिजातस्यधनसमृद्धिर्वक्तव्या एवंशेषराशिबलेतदधिपबलेच ९३
जातस्यभ्रात्रादीनांवृद्धिर्वक्तव्या तथापिकिंचिद्विशेषः कथयति विपरीतंरिष्फषष्ठाष्टमेष्वित्यादि एवंतन्वादिस्थेषुराशिष्वबलवत्सुतदधिपेष्वबलवत्सुचभाव
हानिर्वक्तव्या भवनभनाथयोः यद्येकोबलवान्भवतितदामध्यस्याभाववृद्धिः वाच्येति तथाचयवनेश्वरः भावेशभाववशिभस्वभावप्रधानमध्याधमदर्शनाद्यैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्भावसंपत्तिविपत्युपायैर्नैर्य्याणिकं पाकमुपैति पुंसां २० ॥ इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृतौ राशिशीलाध्यायः षोडशः १६ ॥ अथातो दृष्टिफला-
ध्यायो व्याख्यायते ॥ तत्र मेषवृषमिथुनकर्कटस्थे चंद्रे भौमाद्यैः ग्रहैः दृश्यमाने जातस्य स्वरूपं शार्दूलविक्रीडितेनाह चंद्रे भूपबुधाविति कुजाद्या भौमादयः भौम
बुधबृहस्पतिशुक्रशनैश्चराख्याः तत्राजगे मेषस्थे चंद्रमसि भौमदृष्टे जातो भूपो राजा भवति बुधदृष्टे बुधः पंडितः जीवदृष्टे नृपोपमः राजतुल्यः शुक्रदृष्टे गुणी गु-
णवान् भवति केचिद्वणिक् इति पठंति शनैश्चरदृष्टे स्तेनश्चौरः सूर्य्यदृष्टेऽधनः दरिद्र इति एवमपि मेषलग्ने भौमादिदृष्टे फलं वाच्यं गविस्थेति गवि वृषस्थे चंद्र-
मसि भौमदृष्टे जातो निःस्वः दरिद्रः भवति बुधदृष्टे स्तेनः चौरः जीवदृष्टे नृमान्यः नृणां मान्यः पूज्यः कश्चिन्नृपाढ्यः पठंति नृपाढ्यः नृपो राजा सचाढ्यः ईश्वरः
शुक्रदृष्टे भूपः राजा सौरदृष्टे धनिनः धनवान् सूर्य्यदृष्टे प्रेष्यः दासः एवं वृषलग्नेपि नृस्थे मिथुनस्थे चंद्रमसि भौमदृष्टेऽयोव्यवहारी शस्त्रविक्रयकः बुधदृष्टे पार्थि-
वः राजा जीवदृष्टे बुधः पंडितः शुक्रदृष्टेऽभीः निर्भयः धीरः भयरहितः सौरदृष्टे तंतुवायः रविदृष्टेऽधनः दरिद्रः एवं मिथुनलग्नेपि स्वर्क्षे कर्कटस्थे चंद्रमसि भौमदृ-

चंद्रे भूपबुधौ नृपोपमगुणी स्तेनोऽधनश्चाजगे निःस्वस्तेन नृमान्यभूपधनिनः प्रेष्यः कुजाद्यैर्गवि नृस्थेऽयोव्यवहारि पार्थिवबुधाभीः तं-
तुवायो धनी स्वर्क्षे योद्धृक वित्तभूमिपतयोऽयोजीविदृग्रोगिणौ १ ज्योतिर्ज्ञाढ्यनरेंद्रनापितनृपक्ष्मेशा बुधाद्यैर्हरौ तद्वद्भूपचमूपनैपुणयु-

ष्टे योद्धा भवति युद्धकुशलः बुधदृष्टे कविः काव्यकर्त्ता जीवदृष्टे वित्तः पंडितः शुक्रदृष्टे भूमिपती राजा सौरदृष्टेऽयोजीवी आयुधजी(वि)ता रविदृष्टेऽशुभैस्त्र्याश्रयः
वी शस्त्रोपजीवी सूर्य्यदृष्टे दृग्रोगी चक्षुर्व्याध्यर्दितः एवं कर्कटलग्नेपि अथ सिंहकन्यातुलावृश्चिकस्थे चंद्रे बुधादिदृष्टे जातस्य स्वरूपं शार्दूलविक्रीडितेनाह
१ ज्योतिरिति बुधादयः बुधगुरुशुक्रशनिसूर्य्यभौमाः हरिः सिंहस्तस्मिन् हरौ सिंहस्थे चंद्रे बुधदृष्टे ज्योतिर्ज्ञः ज्योतिःशास्त्रार्थवेत्ता जीवदृष्टे आढ्यः ईश्वरः शु-
क्रदृष्टे नरेंद्रः राजा सौरदृष्टे नापितः रविदृष्टे नृपः राजा भौमदृष्टे क्ष्मेशः भूपतिः एवं सिंहलग्नेपि तद्वदित्यादि तद्वद्बुधादिभिः दृष्टे स्त्र्यनुवर्त्ततेसर्वत्र षष्ठे कन्या-
गते चंद्रे बुधदृष्टे भूपः राजा जीवदृष्टे चमूपतिः सेनापतिः शुक्रदृष्टे नैपुणयुतः सर्वकार्य्येषु सूक्ष्मदृष्टिः अशुभैः सौररविभौमैः दृष्टे स्त्र्याश्रयो भवति स्त्रियमा-
श्रित्य जीवतीत्यर्थः एवं कन्यालग्नेपि जूके तुलास्थे चंद्रमसि बुधदृष्टे भूपो राजा भवति जीवदृष्टे सुवर्णकारः शुक्रदृष्टे वणिजः क्रयविक्रयज्ञः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषाः सौरसूर्य्यभौमाः एतैः दृष्टे नैकृतीनिकृतः प्राणिघातकः एवंतुललग्नेपि कीटेवृश्चिकस्थेचंद्रमसिबुधदृष्टेयुग्मपितायुग्मस्यजनकः द्वयोपिताजातोभवति
जातएवयुग्मपिता द्विपितृकइतिकेचित्पठंति जीवदृष्टेनतः प्रहृः शुक्रदृष्टेरजकः वस्त्ररागकृत् सौरदृष्टेव्यंगोंगहीनः सूर्य्यदृष्टेऽधनः दरिद्रः भौमदृष्टेभूपतिः रा
जा एवमेतेरेवदृष्टेवृश्चिकेपि अथधन्विमकरकुंभमीनस्थेचंद्रमसिबुधादिदृष्टे जातस्यस्वरूपंशार्दूलविक्रीडितेनाह २ ज्ञात्युर्वीशेति तुरगोधन्वीतत्रस्थेचंद्रेबु
धदृष्टेज्ञातीशः स्वजनभर्त्ता जीवदृष्टेउर्व्वीशोराजा शुक्रदृष्टेजनाश्रयः जनानां माश्रयः स्थानः पापैः शनिरविभौमैः दृष्टेसदंभा दांभिकाः मिथ्याधर्म्मध्वजी
शठः परकार्य्यविमुखाश्चभवंति एवंधन्विलग्नेपि मृगोमकरः तत्रस्थेचंद्रेबुधदृष्टेऽत्युर्वीशोराजाधिराजोभवति जीवदृष्टेनरेंद्रोराजा शुक्रदृष्टेपंडितः शनिदृ
ष्टेधनीवित्तवान् सूर्य्यदृष्टेद्रव्योनः दरिद्रः भौमदृष्टेभूपोराजा एवंमकरलग्नेपि कुंभस्थेचंद्रमसिबुधदृष्टेभूपः राजाभवति जीवदृष्टेभूपसमः राजातुल्यः शुक्र
दृष्टेऽन्यदारनिरतः परस्त्रीसक्तः चशब्दाच्छेषैः शनिसूर्य्यभौमैस्त्रिभिरप्यन्यदारनिरतएव एवंकुंभलग्नेपि झषगेमीनस्थेचंद्रमसिबुधदृष्टेहास्यज्ञः उपहास

जूके भूपसुवर्णकारवणिजः शेषेक्षितेनैकृतीकीटेयुग्मपितानतश्चरजकोव्यंगोधनो भूपतिः २ ज्ञात्युर्वीशजनाश्रयश्चतुरगेपापैः स
दंभः शठश्चात्युर्वीशनरेंद्रपंडितधनीद्रव्योनभूपोमृगे भूपोभूपसमोऽन्यदारनिरतः शेषैश्चकुंभस्थितेहास्यज्ञोनृपतिर्बुधश्चझषगेपाप
श्चपापेक्षिते ३ होरेशर्क्षदलाश्रितैः शुभकरो दृष्टः शशी तद्गतः त्र्यंशेतत्पतिभिः सुहृद्भवनगैर्व्वावीक्षितः शस्यते॥ ॥ ॥

कर्त्तुंजानाति जीवदृष्टेनृपतिः राजा शुक्रदृष्टेबुधः पंडितः पापाः शनिसूर्य्यभौमाः एतैः दृष्टेचपापएवभवति एवंमीनलग्नेपि लग्नदृष्टिफलंचंद्रदृष्टिफलातिदेशे
नोक्तं शिशिरकरसमागमेक्षणानांसदृशफलंप्रवदंतिलग्नजातमिति तत्रचंद्रमसादृष्टेलग्नेफलंनोक्तंतस्मात्नोच्यते उक्तमेवयस्मादुक्तं होरास्वामिगुरुज्ञवीक्षि
तयुतानान्येश्चवीर्य्योत्कटा तत्रकर्कटवर्ज्जमन्योलग्नः चंद्रदृष्टोहीनबलोभवति हीनबलत्वादशोभनफलः उक्तंच मुक्त्वातुचंद्रभवनंलग्नगतशिशिरकिरणसंदृष्टं
अशुभफलंनिर्दिष्टं छायांजन्मसमयेवा अथहोराद्रेक्काणव्यवस्थितस्यचंद्रस्यग्रहदृष्टिफलंशार्दूलविक्रीडितेनाह ३ होरेशेति होराशब्देनराश्यर्द्धमुच्यते होरेति
लग्नंभवनस्यचार्द्धमितिवचनात् होरायाः ईशोहोरेशः तस्यऋक्षदलंहोरेऋक्षदलंहोरेर्क्षदलंतत्राश्रितोहोरेशर्क्षदलाश्रिताः तेग्रहैः होरेशर्क्षदलाश्रितैः शशी चंद्रमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतस्तद्धोरास्थोदृष्टः शुभकरोभवति एतदुक्तंभवति यत्रतत्रराशौयस्यांहोरायांचंद्रमाः स्थितस्तद्धोरास्थैः सर्वैर्ग्रहैः यदिदृश्यतेतदाजन्मनिशुभकरोभवति तेना
र्कहोरास्थश्चंद्रोयत्रतत्रराश्याश्रितैरर्कहोराश्रितैर्ग्रहैः दृष्टश्चशुभकरोभवति अर्थादेवचंद्रहोरास्थैर्दृष्टोऽशुभकरः एवंयत्रतत्रराशौस्वहोरास्थश्चंद्रहोरास्थैर्ग्रहैः
यत्रतत्रावस्थैर्दृष्टः शुभकरोभवति अर्थादेवार्कहोरास्थैर्दृष्टोऽशुभकरः एवंलग्नेपिहोरांशेनफलंयोज्यं त्र्यंशेनतत्पतिभिरिति यत्रतत्रराशौयस्मिन्द्रेष्काणेस्थितश्चं
द्रस्तस्यः पतिस्तेनद्रेष्काणपतिनादृष्टश्चंद्रः शस्यते स्तूयते शुभकरइत्यर्थः पतिभिरिति बहुवचननिर्देशान्नवांशद्वादशांशत्रिंशांशकाधिपतयोगृह्यंते तैर
पिदृष्टः चंद्रः शुभकरोभवति एवंलग्नेपि यद्यपिसामान्येनोक्तंतथापिशुभग्रहैः द्रेष्काणपतिभिर्दृष्टः शस्यते पापग्रहैः मध्यमः यस्मादनेनैवस्वल्पजातकेउक्तं
क्षेत्राधिपसंदृष्टेशशिनिनृपस्तत्सुहृद्भिरपिधनवान् द्रेष्काणांशकपैर्वाप्रायः सौम्यैः शुभंनान्यैरिति सुहृद्भवनगैरित्यादि सुहृद्भवनगैः मित्रक्षेत्रस्थैः ग्रहैः वीक्षि
तः दृष्टः चंद्रः शस्यते स्तूयतेशुभकरएव अर्थादेवस्वभवनगतैः दृष्टः शस्यते अर्थादेवारिभवनगतैः दृष्टः नशस्यते अशुभफलोभवति एवंलग्नेपियोज्यं यत्रो

यत्रोक्तंप्रतिराशिवीक्षणफलंतद्द्वादशांशेस्मृतंसूर्याद्यैरवलोकितेपिशशिनिज्ञेयंनवांशेघतः ४ आरक्षिकोवधरुचिः कुशलोनियुद्धेभू
पोर्थवान्कलहकृत्क्षितिजांशसंस्थे॥ ॥५५ उक्तंप्रतिराशिवीक्षणफलंतत्द्वादशांशेस्मृतमिति प्रतिराशिंराशौराशौमेषादिस्थेचंद्रमसियद्वीक्षणफलंप्रो
क्तंकथितंतदेवमेषादिद्वादशांशकस्थेचंद्रमसिस्मृतमुक्तं तदेवंवाच्यमिति चंद्रेभूपबुधावित्यादियदुक्तं एवंलग्नेपि तत्रापिकर्कटद्वादशांशंविनाचंद्रदृष्टि
रशोभना सूर्याद्यैरित्यादि अतोऽस्मात्परंशशिनिचंद्रेसूर्याद्यैरर्कादिभिरवलोकितेदृष्टेनवांशेशुभफलंज्ञेयंज्ञातव्यमिति॥ अथमेषवृश्चिकवृषतुलांशक
स्थेचंद्रमसिसूर्यादिदृष्टेफलंवसंततिलकेनाह ४ आरक्षिकविति॥ क्षितिजोभौमः तन्नवांशकस्थेमेषनवांशकस्थेवृश्चिकनवांशकस्थेचंद्रमसिसूर्ये
दृष्टेआरक्षिकोभवति आरक्षिकः नगररक्षाधिकृतः भौमदृष्टेवधरुचिः प्राणिघातकः बुधदृष्टेनियुद्धेकुशलः नियुद्धेबाहुयुद्धेकुशलः शिक्षितः प्रवीणः
॥जीवदृष्टेभूपः राजा शुक्रदृष्टेऽर्थवानीश्वरः सौरदृष्टेकलहकृदिति मूर्खइत्यादि सितांशेशुक्रनवांशकेवृषनवांशकेतुलनवांशकेवास्थितेचंद्रमसिर
विदृष्टेमूर्खोभवति भौमदृष्टेऽन्यदारनिरतः परदारसक्तः बुधदृष्टेकाव्यकृत्काव्यज्ञः केचिद्याद्यविदितिपठंति जीवदृष्टेसत्काव्यकृत्शोभनकाव्यकर्त्ता॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृ शुक्रदृष्टे सुखपरः सुखासक्तः सौरदृष्टे परदारगः परकलत्राभिगामी अथमिथुनकंन्याकर्कटनवांशकस्थे चंद्रेऽर्कादिदृष्टे फलं वसंततिलकेनाह ५॥ बौधगि
टीने ति शशिनि चंद्रे बौधे बुधनवांशकस्थे मिथुननवांशकस्थे कंन्यानवांशकस्थे वाऽर्केण निरीक्ष्यमाणे दृष्टे रंगचरः मल्लादिको भवति भौमदृष्टे चौरः तस्करः
९५ बुधदृष्टे कवींद्रः कविराजः जीवदृष्टे मंत्री सचिवः शुक्रदृष्टे गेयज्ञः सौरदृष्टे शिल्पनिपुणः स्वांशेति स्वांशे आत्मीयनवांशकस्थे कर्कटनवांशस्थे शशिनि
चंद्रे सूर्य्यदृष्टेऽल्पगात्रः कृशदेहो भवति भौमदृष्टे धनलुब्धः कृपणः अल्पधनो वा बुधदृष्टे तपस्वी जीवदृष्टे मुख्यः प्रधानः सितदृष्टे स्त्रीपोष्टः स्त्रीभिरभि
वर्द्धनीयः सौरदृष्टे कृत्यनिरतः कार्य्यासक्तः अथ सिंहधन्विमीननवांशस्थे चंद्रे सूर्य्यादिदृष्टे फलं प्रहर्षिण्याह ६ सक्रोधवदिति सिंहांशकस्थे चंद्रमस्यर्कदृष्टे स
क्रोधः क्रोधयुक्तो भवति भौमदृष्टे नरपतिसंमतः राजवल्लभः बुधदृष्टे निधीशः निधीनां प्राप्तार्थः गुरुदृष्टे प्रभुरप्रतिहताज्ञः शुक्रदृष्टेऽसुतः पुत्ररहितः सौरदृष्टे

मूर्खोन्यदारनिरतः सुकविः सितांशे सत्काव्यकृत्सुखपरोन्यकलत्रगश्च ५ बौधे हि रंगचरचौरकवींद्रमंत्रीगेयज्ञशिल्पनिपुणः शशिनि स्थि
तेंशे स्वांशेल्पगात्रधनलुब्धतपस्विमुख्यः स्त्रीपोष्टकृत्यनिरतश्च निरीक्ष्यमाणे ६ सक्रोधो नरपतिसंमतो निधीशः सिंहांशे प्रभुरसु
तोतिहिंस्रकर्म्मा जैवांशे प्रथितबलो रणोपदेष्टा हास्यज्ञः सचिवविकामवृद्धशीलः ७ अल्पापत्यो दुःखितः सत्यपि स्वे मानासक्तः क

ऽतिहिंस्रकर्म्मा क्रूरकर्म्मणि रतः जैवांश इत्यादि जैवांशे बार्हस्पत्ये नवांशके धन्व्यंशके मीनांशके वा स्थिते चंद्रमसि सूर्य्यदृष्टे प्रथि ऽऽर्म्मणि स्वेनुरक्तः॥
तबलः प्रख्यातवीर्य्यो भवति भौमदृष्टे रणोपदेष्टा संग्रामदेशकालव्यूहरचनाभिज्ञः बुधदृष्टे हास्यज्ञः उपहासवक्ता जीवदृष्टे सचिवः मंत्री शुक्रदृष्टे विका
मः कामहीनः पुंस्त्वहीनः सौरदृष्टे वृद्धशीलः धर्म्ममतिरिति अथ मकरनवांशकस्थे कुंभनवांशकस्थे वा चंद्रे सूर्य्यादिदृष्टे जातस्य फलं शालिन्याह ७ अ ९५
ल्पापत्य इति आर्किः अर्कस्यापत्यम् आर्किः तस्य भागे शनैश्चरनवांशके मकरनवांशकस्थे कुंभनवांशकस्थे वा चंद्रे सूर्य्यदृष्टेऽल्पापत्योऽल्पप्रसवो भवति॥
भौमदृष्टे सत्यपि स्वे दुःखितः सत्यपि विद्यमानेपि स्वे धने दुःखितो भवति बुधदृष्टे मानासक्तः गर्वितः जीवदृष्टे स्वे आत्मीये कर्म्मण्यनुरक्तः कुलानुरूपकर्म्म
कृत् शुक्रदृष्टे दुष्टस्त्रीद्विष्टः वल्लभः॥ सौरदृष्टे कृपणः अदाता एवं तत्कालनवांशकवशात् ग्रहदृष्ट्या लग्नेपि वक्तव्यं किंतु तत्रापि कर्कटनवांशकं विना चंद्रदृष्टि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भानौनहृदिंहादिदृष्टे भानावादित्येंहादिदृष्टेचंद्राद्यैः ग्रहैरवलोकितेतद्वत्तेनैवप्रकारेणदृष्टिफलं यत्रतत्रराशौयत्रतत्रनवांशकस्थेचंद्रमस्यर्कादिदृष्टेयत्फल
मुक्तंतद्वत्यत्रतत्रराशौयत्रतत्रनवांशकेव्यवस्थितेऽर्केचंद्रदृष्टेतदेवफलंवाच्यं एतदुक्तंभवति नवांशकव्यवस्थितस्यादित्यस्यचंद्रस्यचताराग्रहदृष्टिफलंतु
त्यंकिंतुयदादित्यदृष्टाच्चंद्रस्योक्तंनचंद्रदृष्टयासूर्यस्यवक्तव्यं तद्यथामेषवृश्चिकनवांशकस्थेऽर्केचंद्रदृष्टेआरक्षिकोभवति वृषतुलनवांशकस्थेमूर्खः मिथु
नकंन्यानवांशकस्थेरंगचरः सिंहनवांशकस्थेसक्रोधः धन्विमीननवांशकस्थेप्रथितबलः मकरकुंभनवांशकस्थेअल्पापत्यः कर्कटनवांशकस्थेऽस्वगात्रः
एवमादित्यस्यनवांशकस्थावस्थितस्यग्रहदृष्टाच्चंद्रेणफलसमानमिति अथास्यैवनवांशकदृष्टिफलस्यविशेषंवसंततिलकेनाह ८ वर्गोत्तमेति नवांशकव्यवस्थि
तेचंद्रेनवांशकदृष्टिफलंद्विप्रकारमुक्तंशुभमशुभंच यथाआरक्षकइतिशुभं वधरुचिरित्यशुभंच तत्रवर्गोत्तमांशकगतेचंद्रेयत् ग्रहदृष्टिजंफलंशुभमुक्तंतत्पु
ष्टमतीवशुभंभवति स्वांशकस्थेतुयच्छुभमुक्तंतन्मध्यमं परनवांशकव्यवस्थितेयच्छुभंतल्लघुःस्तोकंविज्ञेयं एवंशुभफलस्यपुष्टतामध्यतालघुताच अशुभमुक्त

दुष्टस्त्रीष्टः कृपणोश्वाकिंभागेचंद्रे भानौनहृदिंहादिदृष्टेवर्गोत्तमस्वपरगेषुशुभंयदुक्तंतत्पुष्टमध्यलघुताशुभमुक्तक्रमेण वीर्यान्वितोंश
कपतिर्न्निरुणद्धिपूर्वंराशीक्षणस्यफलमंशफलंददाति ९ ॥ मेण अशुभमनिष्टयत्फलंतदुक्तक्रमेणविपरीतंज्ञेयं परनवांशकस्थस्यचंद्रस्ययदशुभंद
शेनफलमुक्तंतदतीवाशुभंभवति स्वनवांशकस्थस्यमध्यमं वर्गोत्तमांशकस्थस्यलघुता एवंलग्नादित्ययोरपिदृष्टिफलंयोज्यं जातकेसर्वाण्येवफलानिभवंती
तिप्राप्त यस्माद्यवनेश्वरः अन्योन्यराश्यंशकसंप्रयोगैरन्योन्यसंदर्शनसंगमैश्च अन्योन्यसंयोगविकल्पनाभिरिदंसमुद्रांबुवदप्रमेयमिति अतः सदेवराशिदृष्टि
नवांशकदृष्टिफलयोरपिसदैवपंक्तिप्राप्नोति तत्रनवांशकपतौबलवतिराशिदर्शनफलबाधनार्थमाह वीर्यान्वितइति यस्मिन्नवांशकेव्यवस्थितश्चंद्रोलग्नंवा
भवतितस्यनवांशकस्ययोधिपतिः सचेद्वीर्यान्वितोबलवान्भवतितदानिरुणद्धिपूर्वंप्रथमंनिवारयति किंसर्वमेव नहिराशीक्षणस्यफलं नहोराद्रेष्काणद्वार
शभागेक्षणस्य तंचहित्वांशेक्षणफलमेवददाति अथांशकेपतिर्बलवान्नभवति तदाराशीक्षणांशकेक्षणफलेउभेअपिवाच्ये एवंचंद्रलग्नयोरुभयोरपि॥
आदित्यस्यतुनवांशकेक्षणफलमेववक्तव्यं यस्मात्तस्यराशीक्षणफलमिहनोक्तमिति ९ ॥इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृतौदृष्टिफलाध्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ
टी भ
९६

अथातो भावाध्यायो व्याख्यायते तत्रादित्यस्य लग्नगतस्य द्वितीयस्यस्य च फलं मदाक्रांतयाह ॥ ० ॥ शूर इति शूरः संग्रामप्रियः स्तब्धः चिरकार्यकृत् विकलनय
नः हीनदृष्टिः निर्घृणः निर्दयः एवंविधोऽर्के रवौ तनुस्थे लग्नस्थे जातो भवति एतत्तावत्सर्वलग्नेषु सामान्यफलं भवति अथ मेषसिंहतुलाकर्कटनामन्वतमेल
ग्नगतेऽर्के च पूर्वोक्तं फलं न भवति वक्ष्यमाणं चोक्तराशीनां प्रतिराशिफलं भवति मेषे सस्व इति मेषलग्ने तत्रस्थे चार्के सस्वः सार्थः तिमिरनयनः चक्षुरोगी भवति
तिमिरश्चक्षुरोगीति प्रसिद्धः सिंहलग्ने तत्रस्थे चार्के निशांधः रात्र्यंधो भवति आदित्यस्य नीचः तुला तस्मिल्लग्नगते तत्रस्थे चाऽर्के सूर्येऽधः नेत्रहीनोऽस्वः दरिद्र
श्च भवति शशिगृहे कर्कटलग्ने तत्रस्थे पतंगे चार्के बुद्बुदेक्षणः पुष्पिताक्षो भवति भूरिद्रव्य इति लग्नात् द्वितीयेऽर्के भूरिद्रव्यः प्रभूतार्थो नृपहृतधनो राज्ञा हृतस्ते
वक्त्ररोगी मुखपीडान्वितश्च भवति अथ लग्नात् तृतीयचतुर्थपंचषष्ठस्थानस्थाऽर्कफलमौपच्छंदसिकेनाह १ मतिरिति मतिः बुद्धिः विक्रमः पराक्रमः एतौ विद्यते यस्या
स्य तथाविधस्तृतीयगेऽर्के रवौ भवति विसुखो दुःखितः पीडितमानसः नित्योद्विग्नः एवंविधश्चतुर्थगोऽर्के जातो भवति असुतः विपुत्रः धनवर्ज्जितो दरिद्रः एवं

शूरस्तब्धो विकलनयनो निर्घृणोऽर्के तनुस्थे मेषे सस्वस्तिमिरनयनः सिंहसंस्थे निशांधः नीचेंऽधोऽस्वः शशिगृहगते बुद्बुदाक्षः पतंगे भूरि
द्रव्यो नृपहृतधनो वक्त्ररोगी द्वितीये १ मतिविक्रमवांस्तृतीयगेऽर्के विसुखः पीडितमानसश्चतुर्थे असुतो धनवर्ज्जितस्त्रिकोणे बलवांश्च
त्रुजितश्च शत्रुयाते २ स्त्रीभिर्गतः परिभवं मदगे पतंगे स्वल्पात्मजो निधनगे विकलेक्षणश्च ॥ विधस्त्रिकोणे पंचमस्थे रवौ जातो भवति बलवान् प्राणी
शत्रुजितश्च शत्रुभिररिभिः जितः एवंविधः शत्रुयाते षष्ठस्थानस्थेऽर्के जातो भवति केचिद्बलवान्नष्टरिपुश्च शत्रुयात इति पठंति तथा च सत्यः षष्ठेरिपुरोगशो
कघ्नः आचार्येणात्र यवनेश्वरमतमंगीकृतं यतः षष्ठस्थानस्थितानां पापानां यवनेश्वरेणानिष्टं फलमभिहितं तथा च श्रुतिध्वजः षष्ठाश्रितो कोविषशस्त्रदा
हक्षुद्रोगशत्रुव्यसनोपपन्नं काष्ठाश्मपातोच्चविशीर्णदन्तान्यूनेटविदंष्ट्रिनखक्षतांश्च कुजोगप्रसक्तत्रपरिक्षतांगं दद्यात् व्याधितं द्विगुणर्यकर्शितं च सोरः शिरोश्मा
सनिपातवातद्विसुष्टिघातोपहतं च कुर्यात् अनेनैवातिदेशं पापानामाचार्यः करिष्यत्यर्कवत् अथ लग्नात्सप्तमाष्टमनवमदशमैकादशद्वादशस्थेऽर्के जा
तस्य स्वरूपं वसंततिलकेनाह २ स्त्रीभिर्गत इति पतंगे आदित्ये मदनगे सप्तमस्थानस्थे जातः स्त्रीभिः योषिद्भिः परिभवं गतः प्राप्तः केचिन्महते पतंग इति पठंति ॥

एम
९६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निधनगे अष्टमस्थे पतंगे सूर्ये स्खल्यात्मजः अल्पापत्यः विकलेक्षणश्च विकले अक्षणे अदृढचक्षुर्भवति हीनदृष्टिः भवति धर्मे नवमस्थे सुतार्थसुखभाक् सुताः पुत्राः अर्थो धनं सुखं सुखभावः एषां भागी भवति केचिद्धर्मे सुतार्थरहित इति पठंति तथा च सत्यः साध्वाचारविरोधरुजः प्रदो दैन्यकृन्नवमसंस्थः खे दशमे सुखशौर्यभाक् सुखितो बली च भवति लाभे एकादशे प्रभूतधनवान् बहुवित्तो भवति रिष्फे द्वादशे पतितः स्वकर्मपरिभ्रष्टो भवति आदित्यचारः अथ चंद्रे लग्नद्वितीयतृतीयचतुर्थपंचमषष्ठस्थे जातस्य स्वरूपं शार्दूलविक्रीडितेनाह ३ मूक इति मूको वाग्घीनः उन्मत्तः धातुवैषम्याद्यथेष्टकारी जडः अप्रतिपन्नः अंधः नेत्रहीनः हीनः अनुचितकर्मकृत् बधिरः श्रोत्रेंद्रियहीनः प्रेष्यो दासः एषामन्यतमो जातः शशांकोदये शशांके चंद्रे उदयगे लग्नस्थे जातो भवति एतन्मेषवृषकर्कटवर्ज्यं तेषां विशेषमाह स्वर्क्षाजोच्चगत इति स्वर्क्षः कर्कटकः तस्मिंल्लग्ने तत्स्थे चंद्रमसि धनी वित्तवान् भवति अजे मेषे लग्ने तत्स्थे चंद्रमसि बहुसुतः प्रभूतपुत्रो भवति चंद्रस्योच्चो वृषः तस्मिंल्लग्ने तत्स्थे चंद्रे सस्वः अर्थवान् भवति धने लग्नात् द्वितीये चंद्रे कुटुंबी बहुकुटुंबो भवति भ्रातृगते तृतीयस्थानस्थे हिंस्रः क्रूरो भवति प्राणि

धर्मे सुतार्थसुखभाक् सुखशौर्यभाक् खे लाभे प्रभूतधनवान् पतितस्तु रिष्फे ३ मूकोन्मत्तजडांधहीनबधिरप्रेष्याः शशांकोदये स्वर्क्षाजोच्चगते धनी बहुसुतः सस्वः कुटुंबी धने हिंस्रो भ्रातृगते सुखे सतनये तत्प्रोक्तभावान्वितो नैकारिर्मृदुकायवन्हिमदनस्तीक्ष्णोलसश्चारिगे ४ ईर्ष्युस्तीव्रमदो मदे बहुमतिर्व्याध्यर्दितश्चाष्टमे सौभाग्यात्मजमित्रबंधुधनभाक् धर्मस्थिते शीतगौ ॥ ११ वधको वा सुखे चतुर्थे सतनये तनयेन पंचमेन स्थानेन युक्ते तत्प्रोक्तभावान्वितस्तेन प्रोक्तेन कथितेन भावेनान्वितो युक्तो भवति तेन सुखे सुखितस्तनये पुत्रान्वित इति नैकारिरित्यादि नैकारिः बहुशत्रुः मृदुकायः सुकुमारशरीरः मृदुवन्हिः नातिप्रदीप्ताग्निः मृदुमदनः मैथुनशीघ्रगः तीक्ष्णः उग्रस्वभावः अलसः क्रियास्वपटुः एवंविधोऽरिगे लग्नात् षष्ठस्थे चंद्रे जातो भवति अथ लग्नात्सप्तमाष्टमनवमदशमैकादशद्वादशस्थे चंद्रे जातस्य स्वरूपं शार्दूलविक्रीडितेनाह ४ ईर्ष्युरिति ईर्ष्युः परद्धिमत्सरः तीव्रमदः अतिमदनः एवंविधो मदे सप्तमस्थे चंद्रे जातो भवति बहुमतिः बहुप्रज्ञः चपलबुद्धिरित्यर्थः व्याध्यर्दितः रोगपीडितः एवंविधोष्टमेऽष्टमस्थे चंद्रे जातो भवति सौभाग्यं सर्वजनवाल्लभ्यं आत्मजाः पुत्राः मित्राणि सुहृदः बांधवाः स्वजनाः वित्तं धनं एषां भागी भवति शीतगौ चंद्रे धर्मस्थे नवमस्थानाश्रिते जातो भवति निष्पत्तिः निष्पा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰ टी॰ न॰ ९७ दनंसर्वत्रसमुपैतिगच्छति धर्म्मधनधीशौर्य्यैर्युतः धर्म्मेणधनेनवित्तेनधियाबुध्याशौर्य्येणबलेनयुतः एवंविधःकर्म्मगेदशमस्थानस्थेचंद्रेजातोभवंति ख्या
तइति ख्यातः सर्वत्रप्रसिद्धः भावगुणान्वितः भावोएकादशोलाभस्थानंतेनान्वितः सलाभइत्यर्थः एवंविधोभवगतेएकादशस्थेचंद्रेजातोभवति क्षुद्रोहिंसास्व
भावः अंगहीनः अवयवरहितः एवंविधोव्ययेद्वादशस्थेचंद्रेजातोभवति चंद्रचारइति अथलग्नादिस्थयोर्भौमबुधयोः जातस्यस्वरूपंवसंततिलकेनाह ५
लग्नस्थेकुजेप्रहारादिनाक्षततनुः विक्षतशरीरः धनगेद्वितीयस्थेकदन्नः कुत्सितान्नाशीभवति धर्म्मेनवमेऽघवान् पापरतोभवति अन्यसंस्थोदिनकरप्रतिमः
अन्येषुपरिशिष्टस्थानेषुस्थितोदिनकरप्रतिमोऽर्कतुल्यफलः तृतीयचतुर्थपंचमषष्ठसप्तमाष्टमदशमैकादशद्वादशेषु यान्येवादित्यस्यफलाभिहितानितान्ये
वभौमस्यवाच्यानि तद्यथा तृतीयेमतिविक्रमान् चतुर्थेविसुखःपीडितमानसः पंचमेअसुतोधनवर्जितः षष्ठेबलवान्शत्रुजितः सप्तमेस्त्रीभिःपरिभवंगतः॥

निष्पत्तिंसमुपैति धर्म्मधनधीशौर्य्यैर्युतः कर्म्मगेख्यातोभावगुणान्वितोभवगते क्षुद्रोंगहीनोव्यये ५ लग्नेकुजेक्षततनुर्द्दनगेकद
न्नोधर्म्मेऽघवान्दिनकरप्रतिमोन्यसंस्थः॥विद्वान्धनीप्रखलपंडितमंत्र्यशत्रुर्द्धर्मज्ञविश्रुतगुणाःपरतोऽर्कवद्ज्ञे ६ विद्वान्सुवाक्यःकृ
पणःसुखीचधीमानशत्रुःपितृतोधिकश्च॥नीचस्तपस्वीसधनःसलाभःखलश्चजीवेक्रमशोविलग्नात् ७॥ ॥ ॥
५ अष्टमेस्वल्यात्मजोनवमेविकले
क्षणः दशमेसुखशौर्य्यवान् एकादशेप्रभूतधनवान् द्वादशेपतितःइतिभौमचारः अथबुधचारः विद्वेद्धनीत्यादि ज्ञेबुधेलग्नगतेविद्वान्पंडितोभवति द्वितीयेधन
वान् तृतीयेप्रखलःप्रकर्षेणखलोदुर्ज्जनः चतुर्थेपंडितः पंचमेमंत्री षष्ठेऽशत्रुःविगतरिपुः सप्तमेधर्म्मज्ञः अष्टमेविश्रुतगुणाःप्रख्यातगुणाः परतोऽनंतरा
न्यस्थानेऽर्कवत्सूर्य्यवत् नवमदशमैकादशद्वादशेषुयान्यर्कस्यफलान्यभिहितानितान्येवबुधस्यवाच्यानि तद्यथा नवमेसुतार्थसुखभाक् दशमेसुखशौर्य्यभाक्
एकादशेप्रभूतधनवान् द्वादशेपतितइति इतिबुधचारः अथलग्नादिस्थस्यजीवस्यफलमिंद्रवज्रयाह ६ विद्वानिति जीवेगुरौविलग्नात्प्रभृतिस्थितेषुद्वादश राम ९७
सुस्थानेषुक्रमशःपरिपाट्येनानिफलानि तद्यथा लग्नस्थेगुरौविद्वान्पंडितोभवति द्वितीयेसुवाक्यःशोभनवचनः तृतीयेकृपणःअदाता चतुर्थेसुखी पंचमेधी
मान्बुद्धिमान् षष्ठेऽशत्रुःविगतरिपुः सप्तमेपितृतोधिकःपितुस्सकाशाद्गुणाधिकः अष्टमेनीचःस्वकुलानुचितकर्म्मकृत् नवमेतपस्वीविद्यमानतपाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशमेसधनः सवित्तः एकादशेसलाभः लाभयुक्तः द्वादशेखलः क्रूरचेष्टः इतिबृहस्पतिचारः अथलग्नादिस्थस्यशुक्रस्यफलंचित्रतयाह ७ स्मरनिपुणः
इति॥स्मरनिपुणःकामकुशलः सुखितःसंजातसुखः एवंविधोविलग्नस्थेभृगुपुत्रेशुक्रेजातोभवति प्रियकलहःकलहवल्लभः सुरतेप्सुःसुरताभिलाषी एवंवि
धोऽस्तगतेसप्तमस्थेशुक्रेजातोभवति तनयगतेपंचमस्थेशुक्रेसुखितोभवति गुरुवदतोन्यदन्यगृहे अतोस्मात्स्थानत्रयादन्यस्मिन्गृहेस्थानेगुरुवत् जीवव
त्फलानिवक्तव्यानि द्वितीयतृतीयचतुर्थषष्ठाष्टमनवमदशमैकादशद्वादशेषुयान्येवगुरोःबृहस्पतेःफलान्यभिहितानितान्येवशुक्रस्यवक्तव्यानि तद्यथा
द्वितीयेसुवाक्योभवति तृतीयेकृपणः चतुर्थेसुखी षष्ठेऽशत्रुः अष्टमेनीचः नवमेतपस्वी दशमेसधनः एकादशेसलाभः द्वादशेखलः सधनोंत्ये अंत्येमी
नेयत्रतत्रभावस्थेसधनःवित्तवान्भवति स्थानोक्तंतत्फलंनभवति केचिद्गुरुवदन्यतस्तुझषेद्रविणीस्यादितिपठंति अतोनंतरंपरिशेषस्थानेषुगुरुवत् झषेमीने
द्रविणीस्यात्भवेदिति इतिशुक्रचारः ८ अथलग्नादिस्थस्यसौरस्यफलंशिखरिण्याह अदृष्टार्थोरोगीति अदृष्टार्थःनित्यदरिद्रः रोगीव्याधितः मदनवश

स्मरनिपुणःसुखितश्चविलग्नेप्रियकलहोस्तगतेसुरतेप्सुः तनयगतेसुखितोभृगुपुत्रेगुरुवदतोन्यदृझषेद्रविणीस्यात् ८ अदृष्टार्थोरो
गीमदनवशगोत्यंतमलिनःशिशुत्वेपीडार्त्तःसवितृसुतलग्नेत्यलसभाक्॥ ५,गःकामाधीनः अत्यंतमलिनःअतीवमलोपेतः शिशुत्वेबाल्ये

पीडार्त्तोव्याध्यर्दितः अलसवाक्अव्यक्तभाषी एवंविधःसवितृसुतेसौरेलग्नस्थितेजातोभवति यदितुलधन्विमकरकुंभमीनानामन्यतमोराशिःलग्नगतो
नभवतितदा तदेतदुक्तंफलंभवति एषामन्यतमेलग्नगतस्यसौरस्यफलमाह गुरुस्वसौचस्यइति गुरुक्षेत्रेधन्विमीनौशनैश्चरस्यस्वर्क्षंस्वक्षेत्रेमकरकुंभौ
तस्यैवोच्चस्तुला एषामन्यतमोराशिःयदिलग्नगतोभवति तत्रस्थितेचसौरेनृपतिसदृशःराजतुल्योभवति ग्रामपुरपः ग्रामाणांपुराणांचाधिपतिः सुविद्वा
न्पंडितः चार्वंगःशोभनावयवश्चभवति केचित्सुहृत्स्वर्क्षोच्चस्थइतिपठंति तदयुक्तं यस्मात्सारावल्यामुक्तं स्वोच्चेसजीवभवनेक्षितिपालतुल्योलग्नेऽर्कजे
भवतिदेशनराधिनाथः शेषेषुदुःखगदपीडितएवबाल्येदारिद्र्यकामवशगोमलिनोलसश्च १ दिनकरसमोन्यत्रकथितइति अन्यत्रद्वितीयादिषुस्थाने
षुदिनकरसमोऽर्केतुल्यःकथितःउक्तः यान्यादित्यस्यफलान्यभिहितानितान्येवसौरस्यवाच्यानि तद्यथा द्वितीयेभूरिद्रव्योनृपहृतधनोवक्त्ररोगीचभवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ. दी. भ. ९८ तृतीयेमतिविक्रमवान् चतुर्थेविसुखपीडितमानसः पंचमेऽसुतोधनवर्जितः षष्ठेबलवांछत्रुनिर्जितः सप्तमेस्त्रीभिःपरिभवंगतः अष्टमेस्वल्पात्मजोविक
लेक्षणश्च नवमेसुतार्थसुखभाक् दशमेसुखशौर्य्यभाक् एकादशेप्रभूतधनवान् द्वादशेपतितइति इतिशनैश्चरचारः अथलग्नादारभ्ययेतन्वादयोभावा
स्तेषुभावेषुव्ययेस्थितानांसर्वेषामेवग्रहाणांफलविशेषणमालिन्याह ९ सुहृदिति यदेतत्प्रतिगृहंलग्नात्प्रभृतिद्वादशसुस्थानेषुफलमनुपरिचिंत्यं भावाः
तनुकुटुंबसहोत्थादयः लग्नदेहादिभावेरिति लग्नंदेहःशरीरंपरिकल्प्यं लग्नादारभ्यस्तनुकुटुंबसहोत्थादयोभावाःपरिकल्प्याः अत्रकाभ्रांतिः तत्रउच्यतेऽत्र
स्यैवयस्माद्यवनेश्वरः मूर्तिंचहोरांशशिभंचविंद्यादिति अत्रशशिभान्नपरिकल्प्यालग्नात्परिकल्प्याः तेषुशरीरादिभावेषुयोग्रहोव्यवस्थितःसतस्यभाव
स्यपुष्टिंकृशतांवाकरोति कथमित्याह सुहृदरिपरकीयःस्वर्क्षतुंगस्थितानांफलमनुपरिचिंत्यमिति सुहृत्क्षेत्रंमित्रर्क्षं अरिक्षेत्रंशत्रुभं परकीयमुदासीनभं
स्वर्क्षमात्मीयक्षेत्रं तुंगमुच्चभं एतेषुस्थानेषुस्थितानांफलमनुपरिचिंत्यं परिकल्प्यं भावस्थोग्रहोयादृशेक्षेत्रेभवतितादृशंफलंप्रयच्छति नन्वत्रसुहृदादिक्षे

गुरुस्वर्क्षोच्चस्थेनृपतिसदृशोग्रामपुरपः सुविद्वांश्चार्वंगोदिनकरसमोन्यत्रकथितः ९ सुहृदरिपरकीयस्वर्क्षतुंगस्थितानांफलम
नुपरिचिंत्यंलग्नदेहादिभावैः॥ ९ त्राणांपरिगणनाकृता तत्रनशुभाशुभफलविभागोक्तः उच्यते अर्थादेवैतद्गम्यते यथामित्रक्षेत्रस्थोभाववृद्धिंक
रोति शत्रुक्षेत्रादिस्थश्चतद्धानिं तत्रचयेशुभाशुभक्षेत्रेनोक्तेत्रिकोणनीचभेतेऽपिग्राह्यो मित्रादिक्षेत्रान्यत्रोपलक्षणानिज्ञेयानि कःपुनरपिअरिपरकीये
विशेषः उच्यते उदासीनोत्रपरोभिप्रेतः अरिःशत्रुःपरउदासीनः तत्रैतदुक्तंभवति पापःसौम्योवा नीचस्थःशत्रुक्षेत्रस्थोवायस्मिन्भावेव्यवस्थितस्तस्यभा
वस्यहानिंकरोति उदासीनक्षेत्रस्थोनहानिंनचवृद्धिं मित्रक्षेत्रेस्वक्षेत्रेमूलत्रिकोणेस्वोच्चेव्यवस्थितोभावस्यवृद्धिमिति एतत्केषांचिन्मते तथाचभगवान्गा
र्गिः नीचर्क्षरिपुगेहस्थोग्रहोभावविनाशकृत् उदासीनगृहेमध्योमित्रर्क्षस्वत्रिकोणगः स्वोच्चगश्चग्रहोवश्यंभाववृद्धिकरःस्मृतइति सत्याचार्य्यस्तुपुनः स राम ९८
मुपचयविपत्तीसौम्यपापेषुकथयति यस्मिन्भावेसौम्याःस्थितास्तस्यभावस्यसमुपचयंवृद्धिंकुर्वंति यस्मिन्भावेपापाःस्थितास्तस्यभावस्यविपत्तिंहानिंकुर्वं
ति किंतुरिष्फषष्ठाष्टमेष्वेतद्विपरीतंकथयति रिष्फेद्वादशेस्थानेसौम्याःभावहानिंकुर्वंति पापाःवृद्धिं तेनरिष्फेसौम्याव्ययहानिंकुर्वंति पापाःव्ययवृद्धिं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठेसौम्याः शत्रुहानिंकुर्वंति पापाः शत्रुवृद्धिं अष्टमेसौम्याः मृत्युहानिंकुर्वंति पापाः मृत्युवृद्धिमिति तथाचसत्यः सौम्याः पुष्टिंपापास्तद्धानिंसंश्रितागृहाः कुर्य्युः मू
र्त्यादिषुनिधनेत्येषष्ठेचविपर्य्ययात्फलदाः ननुपूर्वंसौम्यानांपापानांचोपचयस्थानावस्थितानांशुभंफलंव्याख्यातंतत्कथं षष्ठस्थाः पापाः शत्रुवृद्धिंकुर्वंति॥
अत्रोच्यते पूर्वंसामान्येनोक्तं यत्रचवाचनिकीबाधाभवति तत्रसामान्यंभावफलंत्यक्त्वायथोक्तफलंवक्तव्यं यद्येवंकथंस्वल्पजातके उक्तं पुष्णतिशुभाभावा
न्मूर्त्यादीन्घ्नंतिसंस्थिताःपापाः सौम्याः षष्ठेरिघ्नाः सर्वेनेष्टाव्ययाष्टमगाइति. अत्रोच्यते वृहज्जातके आचार्य्येणोक्तंस्वल्पजातकेऽन्याचार्यमतेन प्रतिज्ञे
यमाचार्य्येण ज्योतिषमागमशास्त्रंविप्रतिपत्तौनयोग्यमस्माकं स्वयमेवविकल्पयितुंकिंतुबहूनांमतंवक्ष्ये यत्राचार्य्याणांसमसंख्यानांमतभेदः समत्वंभवति
तत्रवराहमिहिरोमतद्वयमपिदर्शयति तथाचवृहद्यात्रायामन्यरूपांग्रहकुंडलिकांस्वल्पयात्रायांसामान्यरूपांपठंति एवंवृहद्स्वल्पयोः विवाहपटलयोरपि अ
थग्रहकुंडलिकाफलविशेषमनुष्टुभाह १० उच्चेतिग्रहकुंडलिकायांफलंद्विविधमुक्तंशुभमशुभंच तत्रयच्छुभंफलंतदुच्चत्रिकोणस्वसुहृच्छत्रुनीचगृहार्क
समुपचयविपत्तीसौम्यपापेषुसत्यः कथयतिविपरीतंरिष्फषष्टाष्टमेषु १० उच्चत्रिकोणस्वसुहृच्छत्रुनीचगृहार्कगैः शुभंसंपूर्णपा
दोनदलपादाल्पनिःफलं ११ इतिभावः॥ ऽऽगैः यहैः दत्तंयथाक्रमंपादोनदलपापाल्पनिः फलंभवति॥ तेनोच्चस्थेग्रहः संपूर्णंप्रयच्छति मूलत्रिको
णस्थः पादोनं स्वक्षेत्रस्थोऽर्द्धं मित्रक्षेत्रस्थः पादफलं शत्रुक्षेत्रस्थः पादादप्यल्पं नीचस्थोऽस्तमितश्चनकिंचिदपि एवंशुभफलं शुभग्रहणादेवाशुभस्यग्र
हस्यव्युत्क्रमोव्याख्येयः तत्रास्तमितोनीचस्थश्चाशुभंफलंसंपूर्णंप्रयच्छति शत्रुक्षेत्रस्थः पादोनंमित्रक्षेत्रस्थोर्द्धं स्वक्षेत्रस्थः पादं त्रिकोणस्थः पादादप्यल्पं
उच्चस्थोनकिंचिदपि एवंजातककालेग्रहस्यावस्थानात्फलंवाच्यं दशाष्टकवर्गादिफलपंक्तिकालेशुभमशुभंवापुष्टफलंबलवानेवप्रयच्छति एतच्चपूर्वमे
वव्याख्यातं उक्तंच तत्कालंबलंयुक्तोभवति यदिदशाधिपस्तस्यशुभमशुभंवापिफलंवक्तव्यंनित्यमेवपरिपूर्णं ११ इतिश्रीभट्टोत्पलविरचितायांवृहज्जा
तकविवृत्तौभावाध्यायोष्टादशः १८ ॥ अथातः आश्रययोगाध्यायोव्याख्यायते॥ ॥तत्रादावेवैकादिसंख्यान्तरद्वात्रिंशद्गृहगतानांग्रहाणांमित्रक्षेत्रगतानांचफलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ. टी. भ. ९९

कुलसमकुलेति स्वभेषुस्वराशिष्वेक द्व्याद्यास्थितैः ग्रहैः जाताः कुलसमकुलमुख्य बंधुपूज्याधनिसुखिभोगिनृपाः पुरुषाभवंतियस्मिन्नस्मिन्ग्रहे स्वक्षेत्रगतेजा तः कुलसमः स्वकुलतुल्योभवति एवंद्वयोः स्वक्षेत्रस्थयोः कुलमुख्यः स्वकुलमुख्यः स्वकुलप्रधानः स्वकुलाधिकः त्रिषुबंधूनांपूज्यः चतुर्षुधनीवित्तवान् पंचसुसुखी षट्सुभोगीनृपतुल्यः केचिद्वृपद् तिपठंति सचोपमानाद्भूपतिरिवभूपस्तत्समत्वमेवमुक्तं स्वल्पजातकेप्युक्तं कुलतुल्यकुलाधिकबंधुमान्यध निभोगिनृपसमनरेंद्राः एवंषट्सुनृपसमः सप्तसुनृपोराजा एवंगुणः एकोत्तरवृद्ध्यासक्षेत्रगेषुजातोभवति परविभवेत्यादि एकवृद्ध्याइत्यनुवर्त्तते मित्र भेष्वेक द्व्याद्यास्थितेषुपरविभवसुहृत्स्वबंधुपोष्यागणपबलेशनृपाश्चजाताः भवंति तेनैकस्मिन्मित्रक्षेत्रस्थेग्रहेजातः परविभवपोष्योभवति पराजीवीत्यर्थः द्वयोः सुहृत्पोष्यः त्रिषुस्वपोष्योज्ञातिपोष्योभवति चतुर्षुबंधुपोष्यः भ्रातृपोष्यइत्यर्थः पंचसुगणपः गणस्वामी षट्सुबलेशःसेनापती सप्तसुनृपोराजा अथोच्चगत स्यैकस्यापिमित्रदृष्टस्यफलमेकोत्तरवृद्ध्यानीचशत्रुस्थानांचमालिन्याह १ जनयतिइति एकोप्युच्चगतोग्रहोमित्रदृष्टः सुहृद्दवलोकितः नृपंराजानंजनयतिउत्पा

कुलसमकुलमुख्यबंधुपूज्याधनिसुखिभोगिनृपास्व भैकवृद्ध्या परविभवसुहृत्स्वबंधुपोष्यागणपबलेशनृपाश्चमित्रभेषु १ जनयतिनृप मेकोप्युच्चगोमित्रदृष्टः प्रचुरधनसमेतंमित्रयोगाच्चसिद्धं विधनविसुखमूढव्याधितोबंधतप्तोवधदुरितसमेतः शत्रुनीचर्क्षगेषु २ नकुंभल लग्नंशुभमाहसत्योनभागभेदाद्यवनावदंति॥३॥दयति एवमेकोप्युच्चगतोमित्रयोगान्मित्रयुक्तत्वात्प्रचुरधनसमेतंसिद्धंचजनयति प्रचुरधनसमेतंपर्या प्तवित्तयुक्तंसिद्धंचसर्वत्रावाप्तपूजांजनयति विधनसुखमूढेत्यादि एकवृद्ध्येत्यनुवर्त्तते एकवृद्ध्याशत्रुनीचर्क्षगेषुशत्रुक्षेत्रस्थेषुनीचगेषुवाग्रहेषुविधनविसुख मूढव्याधिताबंधतप्तावधदुरितसमेताजाताः भवंति तेनयस्यजन्मन्येकोग्रहः शत्रुक्षेत्रगोनीचगोवाभवतिसविधनः विगतधनोभवति दरिद्रः यस्यद्वौसविसुखो दुःखितः यस्यत्रयःसमूढः विचित्तः यस्यचत्वारःसव्याधितःपीडितः यस्यपंचसबंधुनेतप्तोभवति यस्यषट्सतप्तोभवति बहुदुःखसंतप्तः यस्यसप्तसवधदुरितसमेतो भवति वधवध्योदुरितंदुष्कृतं वधएवदुरितंतेनसमेतंयुक्तंवा नीचेयद्यपिसंपन्नसंभवंतितथापिवज्रादिवत्पूर्वशास्त्रानुसारेणतत्फलोपदेशः अथकुंभलग्नजातस्याःशुभंफलमुपजातिकयाह २ नकुंभलग्नमिति सत्याचार्य्यः कुंभलग्नंजन्मनिनशुभमाह नशोभनमुक्तवान् तथाचसत्यः जन्मनिचंद्रःस्वेष्टःप्रवरेद्धोरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिनिधनवर्ज्यः स्यात् होराश्च भवेद्दिश्याद्विपदेष्विह कुंभवर्ज्यैर्हि कुंभविलग्नेजातोभवतिनरोदुःखशोकसंतप्तरिति नभागभेदादिति पुराणयवनाभागभेदाद्द्वाद
शभागभेदाज्जन्मनिकुंभलग्नमशुभमिति यस्यतस्यलग्नस्यकुंभद्वादशभागेजन्मनिनशुभमितितेषांमतंनकुंभलग्ने तथाचतन्मतानुसारिणाश्रुतकीर्त्तिनाप्यु
क्तं सर्वस्मिंल्लग्नगतेकुंभद्विरसांशकोयदाभवति राशौनतदासुखितः परान्नभोजीभवेत्पुरुषइति अत्रविष्णुगुप्तश्चाणाक्याह कस्यांशभेदइति यदुक्तंभागभे
दात्कुंभलग्नंजन्मनिनशुभम् तत्कस्यराशेर्लग्नगतस्यकुंभद्वादशभागोनास्त्यपितुसर्वस्यैवास्तिविद्यते यस्माद्यदिकुंभस्यद्वादशभागोनशुभस्तदासर्वाण्येव
लग्नोक्तानिफलानिनिरर्थकानिभवंति तस्मादतिप्रसंगः तेनकुंभलग्नमेवाशुभंनतद्भागभेदइति तथाचतद्वाक्यं कुंभद्वादशभागोलग्नगतोनप्रशस्यतेयव
नैः यद्येवंसर्वेषांलग्नगतानामनिष्टफलनस्यात् घटयोगाद्राशीनांनचतत्सर्वशास्त्रकारणां तस्मात्कुंभविलग्नोजन्मन्यशुभोनतद्भागइति अधुनाहोरा
स्थानांग्रहाणांफलंवसंततिलकेनाह ३ यातेष्विति असद्ग्रहाःपापाःतेषसत्सुअसमभेषुविषमराश्यवस्थितेषुनकेवलंयावद्दिनेशहोरामादित्यहोरांयानेषुप्रा

कस्यांशभेदोनतथास्तिराशेरतिप्रसंगस्त्विति विष्णुगुप्तः ३ यातेष्वसत्स्वसमभेषु दिनेशहोरांख्यातोमहोद्यमबलार्थयुतोऽतितेजाः चां
द्रीशुभेषुयुजिमार्दवकांतिसौख्यसौभाग्यधीमधुरवाक्ययुतःप्रजातः ४ तास्वेवहोरास्वपरर्क्षगेषुज्ञेयानराःपूर्वगुणेषुमध्याः॥ ॥

तेषुविषमराशिषुपापाःप्रथमार्द्धस्थायदाभवंति तदाजातःस्यातःसर्वत्रप्रसिद्धः महोद्यमबलार्थयुतः महत्सुकार्य्येषूद्यमरतोवलवान्वीर्य्यवान् अर्थयुतो
धनवान् अतितेजः अतितेजस्वीभवति॥चांद्रीशुभेष्विति युजियुग्माशेष्वशुभेषुसौम्यग्रहेषुचांद्रीहोरांयातेषुसमराशिषुप्रथमार्द्धस्थाःसौम्याःभवंति तदाजातो
मार्दवयुतोमृदुस्वभावः कांतियुतोद्युतिमान् सौख्ययुतःसुखान्वितः सौभाग्ययुतःसर्वजनप्रियः धीयुतःमतिमान् मधुरवाक्ययुतःप्रियंवदः एतैःगुणैःयुक्तो
जातोभवति अथपुनरपिहोरागतंफलमिंद्रवज्रयाह ५ तास्वेवइति तास्वेवपूर्वोक्तासुहोरास्वपरर्क्षगेषुऽन्यराश्याश्रितेषुजातानराःसर्वेषुपूर्वोक्तगुणेषुमध्याः
भवंति एतदुक्तंभवति समराशिषुरविहोरायांपापग्रहाणामवस्थानंभवति तदाजातानांपूर्वोक्तंगुणामध्याभवंति एवंविषमराशिषुचंद्रहोरायांसौम्यग्रहाणाम
वस्थानंभवति तदाजातानांपूर्वोक्तगुणामध्याभवंति व्यत्यस्तहोराभवनस्थितेष्विति व्यत्यस्तासुविपरीतस्थासुहोरासुव्यत्यस्तेषुचभवनेषुराशिषुस्थितेषुग्रहेषुजाता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ. मर्त्यामनुष्याउक्तगुणैः प्रागुद्दिष्टैःगुणैःविहीनावर्जितामवंति एतदुक्तंभवति समराशिषुचंद्रहोरायांपापानमवस्थानंभवंति तदाजातामहोद्यमबलार्थहीना
टी.भ. भवंतिवितेजश्च एवंविषमराशिषुआदित्यहोरायामवस्थानंसौम्यानामवस्थानंभवंतितदाजातोमार्दवकांतिसौख्यसौभाग्यधीमधुरवाक्यविहीनजाताभवंति
१०० अत्रचदर्शितेग्रहावस्थानेयथायथाग्रहबाहुत्वंभवति तथातथागुणबहुत्वंवक्तव्यं अथद्रेष्काणावस्थानाच्चंद्रस्यफलंवसंततिलकेनाह ५ कल्याणरूपगु
णमिति आत्मीयद्रेष्काणेयदाचंद्रोस्थितोभवतिअथवासुहृद्द्रेष्काणेतत्कालमित्रद्रेष्काणेस्थितस्तदाजातःकल्याणरूपगुणःप्रशस्तरूपःप्रशस्तगुणश्चभव
ति आत्मीयद्रेष्काणमित्रद्रेष्काणावस्थानंविनान्यद्रेष्काणावस्थितेचंद्रमसिविचारः यस्मादुक्तमन्यगस्तदधिनाथगुणंकरोति यस्मिन्द्रेष्काणेचंद्रमाव्यवस्थितस्त
स्ययोऽधिपतिःसहयदिचंद्रस्यतत्कालमध्यस्थस्तदाजातस्यमध्यमोरूपगुणोभवतः अथद्रेष्काणाधिपतिश्चंद्रस्यतत्कालमरिस्तदाजातोरूपगुणहीनोभव
ति व्यालोद्यतायुधेति व्यालद्रेष्काणःसर्पद्रेष्काणस्तत्रस्थेचंद्रेजातः तीक्ष्णउग्रोभवति उद्यतायुध द्रेष्काणःसायुधस्तस्थेचंद्रेजातोऽतिहिंस्रोमारणात्मकोभव

व्यत्यस्तहोराभवनस्थितेषुमर्त्याभवंत्युक्तगुणैर्विहीनाः ५ कल्याणरूपगुणमात्मसुहृद्दकाणेचंद्रोन्यगस्तदधिनाथगुणंकरोति व्यालोद्यता
युधचतुश्चरणांडजेषुतीक्ष्णोतिहिंस्रगुरुतल्परतोटनश्च ६ स्तेनोभोक्तापंडिताढ्योनरेंद्रःक्लीबःशूरोविष्टिकृद्दासवृत्तिः ॥ ॥ ॥

ति प्राणिघातरतइत्यर्थः चतुश्चरणःचतुष्पदद्रेष्काणःतत्रस्थेचंद्रेगुरुतल्परतोगुरुदाराभिगामीभवति अंडजद्रेष्काणःपक्षिद्रेष्काणस्तत्रस्थेचंद्रेऽटनःपरिभ्रमण
शीलोभवति आत्मीयादिद्रेष्काणस्थेचंद्रमसिव्यालद्रेष्काणस्थेचंद्रेसंभवतःफलद्वयमपिवक्तव्यं अत्रव्यालद्रेष्काणाःकर्कटद्वितीयःवृश्चिकाद्यःमीनस्तृतीयः
उद्यतायुधद्रेष्काणाःमेषाद्यःमेषतृतीयःमिथुनद्वितीयःसिंहाद्यःतुलद्वितीयःकुंभाद्यश्च अत्रापिगुणद्वयांतर्भूतद्रेष्काणस्थेचंद्रेफलद्वयंवक्तव्यमिति ६ ॥
अधुनामेषादिनवांशकजातस्यस्वरूपंशालिन्याह स्तेनइति मेषवर्ज्जमन्यस्मिन्राशौलग्नगतेमेषनवांशकेजातस्तेनश्चौरोभवति वृषवर्ज्जेवृषनवांशकेजा
तोभोक्ताअसंचयशीलः एवंमिथुननवांशकेजातः पंडितोविद्वान् भवति कर्कटनवांशकेजातआढ्यःईश्वरः सिंहांशकेनरेंद्रोराजा कंन्यांशकेक्लीबःपुरु
षाकाररहितः तुलांशकेशूरःसंग्रामप्रियः वृश्चिकांशकस्थेविष्टिकृद्भारजीवी धन्वंशकेदासवृत्तिः मकरांशकेपापः कुंभांशकेहिंस्रःक्रूरः मीनांशकेऽभीः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्भयः केचिद्धीरितिपठंति अधीर्बुद्धिरहितः आचार्य्यस्यचाधीरभिमतं तथाचस्वल्पजातके तस्करभोक्तृविचक्षणधनिनृपतिनपुंसकाभयदरिद्राः स्वलपापे
ऽत्रहृष्टा मेषाद्यानांनवांशभावाइति वर्गोत्तमांशेष्वेषामीशाः एष्वेवराशिषुवर्गोत्तमांशेषुजाताएषामेवपूर्वोक्तानामीशाः स्वामिनोभवंति एतदुक्तंभवति मेषलग्ने
मेषनवांशकेजातश्चौरस्वामीभवति वृषलग्नेवृषनवांशकेजातोऽसंचयशीलानांस्वामीभवति एवंमिथुनेपंडितस्वामी कर्कटलग्नेईश्वराणांस्वामीमहाधनिकः
सिंहेनृपस्वामीमहाराजाधिराजः कन्यायांक्लीबस्वामी तुलेशूराणांस्वामी वृश्चिकेभारवाहानांस्वामी धन्विनिदासानांस्वामी मकरेपापानांस्वामी कुंभेक्रूराणां
स्वामी मीनेशर्केऽभयानांस्वामी राशिवद्द्वाद शांशैरिति द्वादशांशैःराशिवत्फलानिवाच्यानि यानिमेषादिस्थेचंद्रमसिफलान्यभिहितानिदृत्तानताम्रहणि

त्येवमादीनिनान्येवमेषादिद्वादशांशकेजातस्यवक्तव्यानिइति अथभौमसौरयोः स्वत्रिंशांशकस्थयोः फलंवसंततितिलकेनाह ७ जायान्वित
इति जायान्वितोभार्य्यायुक्तः बलंवीर्य्यंविभूषणान्यलंकारणानि सत्वमौदार्य्यंएतैःयुक्तः तथातितेजःअतिसाहसेनासमीक्षितकार्य्यकरणेनचयुक्तः ए

पापोहिंस्रोऽभीश्चवर्गोत्तमांशेष्वेषामीशाराशिवद्द्वादशांशैः ७ जायान्वितोबलविभूषणसत्वयुक्तस्तेजोतिसाहसयुतश्चकुजेस्वभागे॥
रोगीमृतस्वयुवतिर्विषमोन्यदारोदुःखीपरिच्छदयुतोमलिनोर्कपुत्रे ८ स्वांशेगुरोधनयशःसुखबुद्धियुक्तस्तेजस्विपूज्यनिरुगुद्यमभोगवं

वंविधः कुजेभौमेस्वभागेस्वत्रिंशांशकस्थेजातोभवति॥रोगीव्याधितःमृतस्वयुवतिः मृतास्वाआत्मीयायुवतिर्भार्य्यायस्य विषमःक्रूरः अन्यदारोऽ स्तः॥
न्यसंबंधिनोदारायस्य परदारसक्तः दुःखीनिःसुखः परिच्छदयुक्तः गृहवस्त्रपरिवारोपेतः मलिनःमलोपेतः एवंविधोऽर्कपुत्रेसौरेस्वत्रिंशांशकस्थेजातोभ
वति नन्वत्रत्रिंशांशग्रहणंनास्ति तत्कथं ज्ञायतेत्रिंशांशकफलमेतत् उच्यते शुक्रफलाभिधानेत्रिंशांशकग्रहणंभविष्यति अथजीवबुधयोःस्वत्रिंशांश
कस्थयोःजातस्यस्वरूपंवसंततिलकेनाह ८ स्वांशइति धनेनवित्तेनयशसाकीर्त्यासुखेननिर्दुःखत्वेनबुद्ध्याप्रज्ञयायुक्तः तेजस्वीसोत्साहः पूज्यःलोकव
द्यः निरुक्स्वस्थदेहः उद्यमवान् उत्थानशीलः भोगवान्भोगसंयुक्तः एवंविधोगुरौजीवेस्वत्रिंशांशकस्थेजातोभवति मेधाबुद्धिः कलागीतवाद्यनृत्य
पुस्तकचित्रकर्म्मादि कपटःदांभिकत्वंकाव्यंकवेःकर्म्मविवादःवाक्पटुत्वं शिल्पंतक्षकर्म्मादि शास्त्रार्थःसतामाचारानुष्ठानं साहसमसमीक्षितकार्य्यकरण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰
टी॰न॰
१०१

शीलता अतिमान्योऽतिपूजितः एवंविधाः शशिजेबुधेस्वत्रिंशांशकस्थेजाताः भवंति केचिदत्रसर्व्वत्रैकवचनमेवेछंति तथापिनकश्चिद्दोषः अथशुक्रस्य स्वत्रिंशांशकस्यस्यभौमादित्रिंशांशकस्थयोश्चंद्रार्केश्चजातस्यस्वरूपंमंदाक्रांतयाह ९ स्वेत्रिंशांशेति बहुसुतः प्रभूतपुत्रः बहुसुखोऽपरिमितसुखः आरोग्ये ननिरोगतया भाग्यैःजनप्रियत्वेन अर्थेनधनेन रूपेणसुचारुतयासंयुक्तः केचिद्भार्य्यार्थरूपइतिपठंति भार्य्ययाकलत्रेण तथातीक्ष्णःक्रूरः सुललितवपुः शोभनशरीरः सुप्रकीर्णेंद्रियःविक्षिप्तेंद्रियार्थः सुप्रकीर्णानिविक्षिप्तानींद्रियानियस्य बहुस्त्रीगमनशीलः एवंविधःशुक्रेस्वत्रिंशांशकस्थेजातोभवति॥शूरस्त ब्धावित्यादि आरपूर्व्वांशकेषु भौमप्रथमेषुभागेरविशशियुतेष्वऽर्केचंद्रसंयुक्तेषु यथासंख्यंफलानि तद्यथा भौमत्रिंशांशकस्थेऽर्केशूरःसंग्रामप्रियः चंद्रेस्त ब्धश्चिरकारी सौरत्रिंशांशकस्थेऽर्केविषमः क्रूरोभवति चंद्रमसिवधकः जीवत्रिंशांशकस्थेऽर्केसद्गुणोभवति चंद्रमस्याढ्यः ईश्वरः बुधत्रिंशांशकस्थे ऽर्केसुखीभवति चंद्रेज्ञःपंडितः शुक्रत्रिंशांशकस्थेऽर्केचार्व्वंगः शोभनशरीरः चंद्रमसीष्टःसर्व्वजनप्रियः एवमारपूर्व्वेष्वंशेषु आरोंगारकः पूर्व्वः प्रथमोयेषांमंश

मेधाकलाकपटकाव्यविवादशिल्पशास्त्रार्थसाहसयुताशशिजेतिमान्यः ९ स्वेत्रिंशांशेबहुसुतसुखारोग्यभार्य्यार्थरूपः शुक्रेतीक्ष्णः सुल लितवपुःसुप्रकीर्णेंद्रियश्च शूरस्तब्धौविषमवधकौसद्गुणाढ्यौसुखिज्ञौचार्व्वंगेष्टौरविशशियुतेष्वारपूर्व्वांशकेषु १० स्वक्षेतुंगमूलत्रिको णगाः कंटकेषुयावंतआश्रिताः सर्व्वएवतेन्योन्यकारकाःकर्म्मगस्तुतेषांविशेषतः १ कर्कटोदयगतेयथोडुपेस्वोच्चगाःकुजयमार्कसूरयः

कानांत्रिंशद्भागानांतेष्वितिं १०॥इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौआश्रययोगाध्यायएकोनविंशतिमः १९ अथातोप्रकीर्णकाध्यायोव्याख्यायते॥मि श्रः प्रकीर्णकइत्युच्यते तत्रग्रहाणांपरस्परंकारकसंज्ञांवैतालीयेनाह स्वर्क्षेति स्वर्क्षेस्वक्षेत्रेयोग्र॒ःस्थितः यश्चतुंगेस्वोच्चे यश्चमूलत्रिकोणेस्थितः सचयदिलग्न कंटकेषुकेंद्रेष्वाश्रितःस्थितोभवति एवंविधस्यग्रहस्यान्योप्येवंविधःकेंद्रगोयदिभवति तदातौग्रहावन्योन्यंपरस्परंकारकाख्याभवतः अनेनप्रकारेणयःक र्म्मगःयोयस्माद्ग्रहाद्दशमस्थानस्थःसविशेषतःविशेषेणतेषांग्रहाणांमध्यात्कारकसंज्ञांलभते अतउक्तं कर्म्मगस्तुतेषांविशेषतइति अथास्यैवोदाहरणप्र दर्शनार्थंरथोद्धतयाह १ कर्कटेति यथाकर्कटोदयेकुलीरलग्नेतत्स्थेचोडुपेचंद्रे कुजोंगारकः यमःसौरः अर्कः आदित्यः सूरिःबृहस्पतिः एतेकुजयमार्कसूरयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्वोच्चगाः आत्मीयतुंगस्था यदि भवंति कुजो मकरे यमस्तुले अर्को मेषे सूरिः कर्कटे तदा ते परस्परमन्योन्यं कारका निगदिता उक्ताः॥ अनेन प्रकारेण यावंतो भवंति तावंतः परस्परं कारकाख्याः अनेनोदाहरणेनैतत्प्रतिपादितं भवति यथा पुरुषस्य जन्मलग्नकेंद्रं विना स्वक्षेत्र उच्चत्रिकोणगाः अपि संतः न परस्परं केंद्रकगास्तदा कारकसंज्ञाम् अपि लभंते लग्नगस्येति लग्नगस्य ग्रहस्य प्राग्लग्ने स्थितस्य सकलः सर्वोऽपि ग्रहो वरः दशमस्थानस्थश्चांबुगश्चतुर्थस्थानस्थश्च कारकसंज्ञो भवति अनेनैतदुक्तं भवति लग्नगो ग्रहः स्वक्षेत्र गोच्चत्रिकोणेषु यद्यपि भवति तस्माद्योदशमस्थश्चतुर्थो वा सो वाप्युच्चत्रिकोणस्वक्षेत्राणामन्यतमे न भवति तथापि लग्नगतस्य स कारकाख्यो भवति न तस्य लग्नगत इति अत उक्तं लग्नगस्य सकलोंबरांबुग इति अथ पुनरपि अन्यत्कारकलक्षणमनुष्टुभाह २ स्वत्रिकोणोच्चग इति स्वत्रिकोणोच्चगो ग्रहः कारकत्वे हेतुः कारणं न केंद्रस्थः यातोऽन्योऽन्यस्य ग्रहस्य लग्ने केंद्रं विनाप्यवस्थितस्य यदि कारका निगदिताः परस्परं लग्नगस्य सकलोंबरांबुगः २ स्वत्रिकोणोच्चगो हेतुरन्योन्यं यदि कर्मगः सुहृत्तद्गुणसंपन्नः कारकश्चापि सस्मृ तः ३ शुभं वर्गोत्तमे जन्म वेशिस्थाने च सद्ग्रहे॥ पूर्वश्लोकं ग्रहः कर्मगो दशमस्थानस्थो भवति स च स्वक्षेत्रोच्चमूलत्रिकोणानामन्यतमे न भवति तस्माच्च दशमस्थस्य यदि सुहृन्मित्रं निसर्गतो न केवलं यावत्तद्गुणसंपन्नस्तेन मित्रगुणेन संयुक्तस्तात्कालिकमित्रामित्रविधिनाधिमित्रतां प्राप्तस्तथाविधः सर्वग्रहः कारकाख्यो भवति यस्य च दशमः स तस्य कारकाख्यो न भवति कारकसंज्ञा च यात्रायामुपयुज्यते यतस्तत्रोक्तं रिक्तोपहतदशायां जन्मोदयनाथशत्रुपाके च स्वदशे शकारक दशासंश्रयणीयो नरेंद्रपतिरिति तथा ससखिवेशिगृहयुक्तः कारकः क्षेपि चंद्रः जयसुखधनदाता तत्र हर्तान्यथा इति अथ कारकसंज्ञाप्रयोजनमनुष्टुभाह २ शुभमिति यस्य लग्ननवांशे वर्गोत्तमाख्ये जन्म भवति चंद्रोपि वा वर्गोत्तमांशगतो भवति॥ तस्य शुभं जन्म यस्मिन्राशौ पुरुषस्य जन्मसमये ऽर्कोऽस्थित स्तस्माद्राशेः यो द्वितीयो राशिः स वेशिसंज्ञः यस्य च प्रागुक्ते वेशिस्थाने सद्ग्रहः सौम्यग्रहो गुरुसितानामन्यतमो भवति तस्यापि शुभं जन्म यस्य जन्मलग्नकेंद्रचतुष्टयादेकमप्यशून्यं केंद्रं भवति तस्यापि शुभं जन्म अत्र सौम्यग्रहाधिष्ठिते केंद्रे विशेषेण शुभं जन्म यस्मादुक्तमनेनैव एकस्मिन्नपि केंद्रे यदि सौम्यो न ग्रहोऽस्ति यात्रायां॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ
टी·भ
१०२

जन्मन्यथवाकर्म्मणि नतच्छुभंप्राहुराचार्य्याः यस्यजन्मनिकारकाख्याः कारकसंज्ञाग्रहाभवंति तस्यापिशुभंजन्म अत्रयथागुणाधिक्यंतथाशुभतरमेवजन्म ॥
अथयेनयोगेनजातोयौवनेसुखीभवति तथादशापतिफलयाकंचवैतालीयेनाह ४ मध्येवयसरिति गुरुः जीवः जन्मनियत्रराशौचंद्रमास्थितः तदधिपतिः ज
न्मपः यस्मिन्लग्नेजातः तदधिपोलग्नपः एषामन्यतमोयस्यलग्नकेंद्रेभवति तस्यवयोमध्येसुखप्रदोभवति यौवनेसुखीभवतीत्यर्थः अत्रचयवनेश्वरः लग्ना
धिपोलग्नपतिश्चयेषांचतुष्टयेस्याद्बलवान्गुरुर्वा चतुर्षुहोरादिषुसंगतः स्याच्चतुर्थेवयः कालफलप्रदः स्यात् पृष्ठोभयेत्यादिदशापतिर्दशाप्रवेशकालेपृष्ठोदय
राशिगोमेषवृषधन्विमकराणामन्यतमस्थितोयदाभवति तदास्वदशांतेफलप्रदोभवति अथोभयोदयेमीनेभवतितदांतः दशामध्येफलप्रदोभवति अथको
दयेशीर्षोदयेमिथुनसिंहकन्यातुलावृश्चिककुंभानामन्यतमोयदाभवति तदाप्रथमेप्रवेशसमयेफलप्रदोभवति एवंशुभस्याप्यशुभस्यवापंक्तिः वाच्या दशा
कालंत्रिधापरिकल्प्ययस्मिन्कालेतस्यफलपंक्तिः ज्ञापते आद्येमध्येंत्येवातत्रचंद्रः सत्फलबोधनानिकुरुतेपापानिचातोन्ययेति एतत्त्रिधाविभक्तेदशाकालेत्ते

अभ्यूत्येषुचकेंद्रेषुकारकाख्यग्रहेषुच ४ मध्येवयसः सुखप्रदाः केंद्रस्थागुरुजन्मलग्नपाः पृष्ठोभयकोदयर्क्षगास्त्वांतेंतः प्रथमेषु
पाकदाः ५ दिनकररुधिरौप्रवेशकालेगुरुभृगुजौभवनस्यमध्ययातौ रविसुतशशिनौविनिर्गमस्थौशशितनयः फलदस्तुसर्वकाले ६

यं पूर्वोक्तंसर्वंदशाफलंयोज्यं दशापतिप्रवेशकालेतिष्ठन्नेवतत्फलंददातीत्येतत्कथंगम्यते यवनेश्वरादिभिः सामान्येनचोक्तं उच्यते भगवतोगर्गवचनात् त
थाचभगवान्गार्गिः आद्यंतमध्यफलदाः शिरःपृष्ठोभयोदये दशाप्रवेशसमयेतिष्ठन्वाच्योदशापतिरिति ५ अथाष्टकवर्गफलस्यकालंपुष्पिताग्रयाह दिन राम
करेति चारवशात्पंक्तिकालेयस्मिन्राशौशुभमशुभंवाऽष्टकवर्गफलंदिनकरआदित्यः प्रयच्छति तस्मिन्राशौप्रवेशकालेआद्येत्रिभागेतिष्ठन्नेवफलंप्रयच्छ १०२
ति एवमेवरुधिरोभौमः गुरुः जीवः भृगुः शुक्रः एतौगुरुभृगुजौभवनस्यराशेः मध्यगतौमध्यत्रिभागगतौफलप्रदौभवतः रविसुतः सौरः शशीचंद्रः एतौरविसु
तशशिनौविनिर्गमस्थौराश्यंतत्रिभागस्थौफलप्रदौभवतः शशितनयोबुधः सर्वकालंफलदः सर्वभागस्थोफलप्रदोभवति सर्वस्मिन्नेवराशौयावत्तिष्ठतितावत्फ
लंशुभमशुभंवायथाप्राप्तंददातीति ६ ॥ इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृत्तौप्रकीर्णकाध्यायोविंशतिमः २०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥अथातोऽनिष्टाध्यायो व्याख्यायते॥ तत्रादावेव दारसुतहीनजन्मज्ञानं शार्दूलविक्रीडितेनाह॥०॥लग्नादिति यस्य जन्मनि लग्नात् पुत्रभं पंचमस्थानं शुभग्रहेण
स्वपतिना च प्राप्तं संयुक्तं भवत्यथवा आलोकितं दृष्टं भवति तस्यापि पुत्रसंपत् अस्तीति वक्तव्यं चंद्राद्वा पंचमस्थानं यस्य शुभग्रहेण स्वपतिना वा युतं दृष्टं भवति॥
तस्यापि पुत्रसंपदस्ति यस्य लग्नचंद्रयोरुभयोरपि पंचमस्थानं शुभग्रहेण स्वपतिना वा युतं दृष्टं न भवति तस्य पुत्रासंभवः अपुत्रत्वं वक्तव्यं अत्र केचिद्द्वादश
प्रकारं पुत्रं वर्णयंति औरसः क्षेत्रजः दत्तः कृत्रिमः अधमप्रभवः गूढोत्पन्नः अपविद्धः पौनर्भवः कानीनः सहोढः दासीप्रभवश्च इति तथा च सारावल्यां शुभभ
वनमथ शुभयुतं शुभदृष्टं वा सुतर्क्षमिह येषां तेषां प्रभवः पुंसां भवत्यवश्यं न विपरीतं १ एकतमे गुरुवर्गे शुभराशावौरसो भवेत् पुत्रः लग्नाच्चंद्रादथवा बलयु
क्ताद्वीक्षितोपि वा सौम्यैः २ संख्यानवांशतुल्या सौम्यांशेतावतीसदा दृष्टा शुभदृष्टे तद्द्विगुणा क्लिष्टा पापांशके तथा दृष्टा ३ सौरर्क्षे सौरगणो बुधदृष्टो गुरुकुजा
र्कदृग्घीनः क्षेत्रजपुत्रं जनयति वो धे पि गणो रविजदृष्टः ४ मांदसुतर्क्षमिंदुनिरीक्षिते यदि शनैश्चरेण युतं दत्तकपुत्रोत्पत्तिः क्रीतश्च बुधस्य चैवं स्यात् ५ सप्त

लग्नात् पुत्रकलत्रभे शुभपतिप्राप्तेथवालोकिते चंद्राद्वा यदि संपदस्ति हि तयोर्ज्ञेयोन्यथा संभवः पाथेनोदयगे रवौ रविसुतो
मीनस्थितो दारहा पुत्रस्थानगतश्च पुत्रमरणं पुत्रोवनेर्य्यच्छति १॥

शुभभागे कौजे सौरयुते पंचमे सदा भवने कृत्रिमपुत्रं विंद्याच्छेषग्रहदर्शना
मुक्ते ६ वर्गे पंचमराशौ सौरे सूर्य्ये च तत्र संयुक्ते लोहितदृष्टे वाप्यो जातस्य सुतोऽधमप्रभवः ७ चंद्रे भौमांशगते धीस्थे मंदावलोकिते भवति गूढोत्पत्तिर्भवे
त्पुत्रः शेषग्रहदर्शनी याते ८ तस्मिन्नेव च भौमे शनिवर्गस्थे निरीक्षिते रविणा पुरुषस्य भवति पुत्रोऽपविद्ध इति चरकमुनिवचनात् ९ शनिवर्गस्थे चंद्रे शनियुक्ते
पंचमे सदा सौरे शुक्ररविभ्यां दृष्टे पुत्रः पौनर्भवो भवति १० चूडायदार्केस्तत्काकलादत्तसे व पंचमे भवने रविदृष्टेप्यथ सहिते कानीनः संभवति पुत्रः ११ वर्गे रवि
चंद्रमसोः सुतगेहे चंद्रसूर्य्ये संयुक्ते शुक्रेण दृष्टमात्रे पुत्रः कथितः सहोढश्च १२ पापैर्बलिभिर्युक्ते पापर्क्षे पंचमे सदा राशौ जातोऽपुत्रः पुरुषः सौम्यग्रहदर्शनाती
ते १३ शुक्रनवांशे तस्मिन् शुक्रेण निरीक्षिते त्वपत्यानि दासीप्रभवानि वदेच्चंद्रेपि केचिदाचार्य्याः १४ सितशशिवर्गे धीस्थे ताभ्यां दृष्टेथवापि संयुक्ते प्रायेण
दारिकाः स्युस्तद्राशिगणोपि वान्यथा पुत्रा इति १५ एवं लग्नाच्चंद्राद्वा कलत्रभे सप्तमस्थानं यस्य शुभेन स्वपतिना वा युतदृष्टं भवति तस्य कलत्रसंपदस्तीति वक्तव्यं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ
टी·भ
१०३

एवंलग्नाच्चंद्राद्वायस्यसप्तमस्थानंशुभग्रहेण स्वपतिनावायुतदृष्टं नभवतितस्यकलत्रसंपन्नभवतीतिवक्तव्यं भार्य्यातस्यनभवतीत्यर्थः यतउक्तं ह्ययोन्यथासं
भवः अन्यथातयोःपुत्रकलत्रयोरसंभवः अभावोज्ञेयोज्ञातव्यः अत्रपुत्रकलत्रग्रहणमुपलक्षणार्थंसर्व्वेषामपितन्वादीनांभावानांलग्नाच्चंद्राद्वास्थितिर
न्वेष्य यतोद्वावेतोमूर्त्तिसंज्ञौ तथाचयवनेश्वरः मूर्त्तिंचहोराशशिभंचविंद्यादिति अत्रकलत्रस्थानेपिकेचिद्विशेषंवर्णयंति शुक्रेंदुजीवक्षाधिजैःसकलैस्त्रि
भिश्चद्वाभ्यांकलत्रभवनेचतथैकेकेन एषांगृहेष्विवगणेथविलोकितेवासतिस्त्रियोभवनवर्गस्वगस्वभावाः १ एवंक्रूरैनाशोलग्नाच्चंद्राद्दूदेवकलयोगात् शशि
रविजयोःकलत्रेभार्य्यापुंसांपुनर्भूःस्यात् २ भवनाधिपांशतुल्याभवंति नार्य्योनिरीक्षणाद्वापि एकैवरविकुजांशेगुरुबुधयोश्चापियामित्रे ३ प्रायेणचंद्र
सितयोर्बलसंयुक्तेथवापियामित्रे दृष्टेवाबहुपत्न्योभवंतिशुक्रेविशेषेण ४ गुरुशुक्रयोःस्ववर्णारविकुजशशिभानुजैर्भवंत्यूनाः शुक्रेवेश्याप्राप्याश्चंद्रेपि
वदंतिकेतुमालाख्या ५ पाथेनेत्यादि पाथेनःकंन्यातस्मिन्नुदयगतेलग्नस्थेतत्रचरवार्क्केस्थितेरविसुतः सौरःमीनस्थोयदिभवतितदादारहाभवति दा

उग्रग्रहैःसितचतुरस्रसंस्थितैर्मध्यस्थितेभृगुतनयेथवोग्रयोः सौम्यग्रहैरसहितसंनिरीक्षितेजायावधोदहननिपातपाशजः ॥२॥

रान्कलत्रान्हंति घातयति तस्यपुरुषस्यजीवतएवभार्य्यामरणंवक्तव्यं अस्मिन्नेवयोगेपाथोनोदयगेरवौ अवनेःभूमेःपुत्रोभौमःपुत्रस्थानेगतःपं
चमेस्थानेगतोमकरेस्थितोभवतितदापुत्रमरणंसुतविपत्तिंयच्छति ददाति तस्यजीवतएवपुत्रमरणंवक्तव्यं अथजीवतएवभार्य्यामरणयोगत्रयरुचिरयाह
॥१॥उग्रग्रहैरिति उग्रग्रहाः आदित्यभौमसौराःतैःसिताच्छुक्राद्यथासंभवंचतुरस्रसंस्थितैःचतुर्थाष्टमगतैः यस्यजन्मभवति तस्यजायावधोभार्य्याविप रा·म
त्तिः दहनेनाग्निनाभवति तस्यजीवतएवभार्य्याग्निनात्मानंव्यापादयति अथवोग्रयोःपापयोःद्वयोःमध्येशुक्रादेकोद्वादशेऽन्योद्वितीयेभृगुतनयेशुक्रेस्थि १०३
तेजातस्यनिपातेनोच्छ्रितपतनाज्जायावधोभवति तस्यजातस्यजीवतएवपतनान्निपतिताभार्य्याम्रियतइति अथवैकस्मिन्राशावेकेनभुक्तंस्थानमतिक्र
म्यान्येनभुज्यमानमप्राप्ययदिशुक्रस्यावस्थानंतदापिपापद्वयमध्यस्थोभवति अथयस्यजन्मनिसौम्यग्रहयोरन्यतमेनसहितःसंयुक्तःशुक्रोनभवतिनचा
पितन्निरीक्षितोदृष्टस्तस्यपाशजोजायावधोभवति जीवतएवभार्योद्बंधनेनात्मानंव्यापादयति केश्चिद्योगद्वयमेतद्व्याख्यातंउग्रग्रहैःसितचतुरस्रसंस्थिते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्यस्थिते भृगुतनयेथवा वोग्रयोः द्वितीयः सौम्यग्रहैरसहितसन्निरीक्षितइति योगद्वयविशेषभूतं जायावधोदहननिपातपाशजइति योगद्वयेपि विकल्पः तथा युक्तं यस्माद्भगवान्गार्गिः चतुर्थाष्टमगैः शुक्रात्सौराराकैर्हुताशनात् तेषां द्वयोस्तु मध्यस्थेनथा शुक्रे निपातजः शुक्रेसद्योगदग्धीनेपाशाद्भार्य्यावधोभवेत्॥ अधुना विकलनयनदारजन्मयोगज्ञानं वसंततिलकेनाह २ लग्नादिति शशीचंद्रः तिग्मरश्मिः सूर्यः एतयोः लग्नाद्व्यायरिगतयोः एकोव्ययेद्वादशेस्थाने द्वितीयोऽरिस्थाने षष्ठे पत्न्या सहैकनयनस्य एकाक्षस्य जन्म वदंति कथयंति जातः काणो भवति न केवलं यावत् तद्भार्य्या काणी भवतीत्यर्थः द्यूनस्थयोरिति। शुक्रसूर्य्ययोर्द्यूनस्थयोः लग्नाद्द्वयोरपि सप्तमस्थयोः नवमयोः पंचमयोर्वा जातं विकलदारमुशंति कथयंति भार्य्या हीनांगा भवतीत्यर्थः अत्रद्यूनस्थयोर्न्नवमपंचमसंस्थयोर्वा शुक्रार्कयोः कैश्चिद्यथासंभवमेव योगोव्याख्यातः तथा युक्तं यस्माद्भगवान्गार्गिः पंचमेनवमेद्यूनेसमेतौ सितभास्करौ यस्यस्यातां भवेद्भार्य्या तस्यैकांगविवर्जिता अथा सुतकलत्रवंध्यापतिजन्मज्ञानं मालिन्याह ३ कोणोदयइति कोणः शनैश्चरस्तस्मिन्नुदयेलग्नगते भृगुतनये शुक्रे अस्तचक्रसं

लग्नाद्व्यायारिगतयोः शशितिग्मरश्म्योः पत्न्या सहैकनयनस्य वदंति जन्म॥ द्यूनस्थयोर्न्नवमपंचमसंस्थयोर्वा शुक्रार्कयोर्विकलदार

मुशंति जातं ३ कोणोदये भृगुतनयेऽस्तचक्रसंधौ वंध्यापतिर्यदि न सुतर्क्षमिष्टयुक्तं पापग्रहैर्व्ययमदलग्नराशिसंस्थैः क्षीणे शशिन्य

सुतकलत्रजन्म धीस्थे ४ असितकुजयोर्वर्गेस्तस्थे सिते तेन दृष्टे वेक्षितेपरयुवतिगस्तौ चेत्सेंदूस्त्रिया सह पुंश्चलः॥ ॥

धौ वृश्चिककर्कटमीनानामन्यतमांत्यनवांशकस्थे न केवलं यावदस्ते लग्नात्सप्तमस्थानस्थे एवमस्तस्थ चक्रसंधौ यदि भवति तदा जातो वंध्यापतिर्भवति वंध्या निःफलस्त्री वा एतन्मकरवृषकन्यालग्नेषु संभवति अपुत्रइति वक्तव्ये वंध्यापतिग्रहणेनैतद्ज्ञापयति यथा कौमारेश्चोदारेभ्यः पुत्रोत्पत्तिर्भवत्यविरुद्धकाभ्यो भवति पापग्रहैरिति॥ पापग्रहैः व्ययस्थानं द्वादशं मदस्थानं सप्तमं लग्नराशिहृदयः एतेषु द्वयोरेकस्मिन् वा पापग्रहैः यथासंभवं स्थितैः शशिनि चंद्रे क्षीणे धीस्थे लग्नपंचमगे असुतस्या पुत्रस्य अकलत्रस्य च स्त्रीवर्जितस्य पुत्रभार्य्यावर्जितस्य जन्म भवति जातस्य न भार्य्या न पुत्रो भवतीत्यर्थः अथ परयुवतिगजन्मज्ञानं हरिण्याह ४ असितेति असितकुजयोः सौरभौमयोरन्यतमस्य वर्गे सिते शुक्रे स्थिते तेनास्मिंश्चास्तस्थे लग्नात्सप्तमगे तद्वेक्षिते तयोरेव सौरारयोरन्यतमेनावेक्षिते दृष्टे जातः परयुवतिगः परदार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰ टी॰ भ १०४

गामीभवति तौचेदित्यादि तौसौरारावस्तेसप्तमेस्थानेएकराशिस्थितौसेंदूचंद्रसहितौभवतोऽसितकुजयोः वर्गः तस्थः सितः तदवेक्षितः तदाजातः स्त्रियासहपुंश्चलोभवति सपुरुषःपरदारेषुगच्छति तद्भार्य्यापरपुरुषेषुगच्छति भृगुजशशिनोरित्यादि भृगुजः शुक्रः शशीचंद्रः तयोः भृगुजशशिनोः एकराशिगतयोः यत्रतत्रावस्थितयोः तावे वसितकुजावस्तेसप्तमेस्थानेभवतः तदाजातोनरः अभार्य्योभवति विसुतोवा वाशब्दोऽत्रचार्य्येनविकल्पने अभार्योभवत्यपुत्रश्च परिणततनूइति स्त्रीचन्द्राचस्ली न्नौ स्त्रीनरग्रहयोरेकराशिगयोरस्तेसप्तमेतावेवासितकुजौभवतः तौचनोशुभदृष्टौसौम्यग्रहेणकेनचिन्नोदृश्यतेतदापरिणततनूप्रमदापतीभवतः परिणतेततनूय योः एतदुक्तंभवति तस्यवृद्धत्वेवृद्धाभार्य्योपतिष्टतेइति ५ अथान्यानप्यनिष्टयोगान्मंदाक्रांतयाह वंशच्छेत्तेति चंद्रः शशीदैत्येज्यः शुक्रः पापाः क्रूरग्रहाः आदित्य भौमसौराः एतैःखमदसुखगैः खसंज्ञंदशमं मदस्थानंसप्तमं सुखसंज्ञंचतुर्थं एतेषुस्थानेषुचंद्रदैत्येज्यपापैःगतैः समवस्थितैः जातोवंशच्छेत्ताभवति एतदुक्तंभव ति यस्यजन्मनिचंद्रमादशमःशुक्रः सप्तमः पापाश्चतुर्थस्थाः सवंशच्छेत्तातत्कृतेवंशोच्छिद्यते कुलविच्छित्तिर्भवति दुर्योधनप्रायः शिल्पीत्र्यंशइति शशिसुतेनबु

भृगुजशशिनोरस्तेऽभार्य्योनरोविसुतोपिवापरिणततनूनृस्त्र्योर्दृष्टौशुभैःप्रमदापती ५ वंशच्छेत्ताखमदसुखगैश्चंद्रदैत्येज्यपापैःशि
ल्पीत्र्यंशेशशिसुतयुतेकेंद्रसंस्थार्किदृष्टे दास्यांजातोदितिसुतगुरोरिष्फगेसौरभागेनीचोर्केद्वोर्म्मदनगतयोर्दृष्टयोः सूर्य्यजेन ६ ॥ ॥

धेनयुक्तोयः त्र्यंशोद्रेक्काणःसयस्यराशेःसंबंधीतस्मिन्राशिः लग्नकेंद्रस्थेनार्किणासौरेणदृष्टेजातःशिल्पीभवति चित्रकर्म्मादिनाकर्म्मणाजीवतीत्यर्थः अत्र केचिद्बुधयुक्तराशेःशनैश्चरदृष्टिंवर्णयंति यथाराशौदृष्टेद्रेक्काणोपिदृष्टःस्यात् यद्येषःपक्षः आचार्य्याभिप्रेतःस्यात् तदाबुधेकेंद्रस्थेनसौरेणदृष्टेशिल्पीभवत्ये तदेवाचार्य्योवक्ष्यत् त्र्यंशग्रहणंनकरिष्यतिकृतवांश्चातोवसीयतेनैतदाचार्य्यस्याभिप्रेतमिति तेनत्र्यंशग्रहणंकृतं तस्माद्रेक्काणराशेर्दृष्टिविचारः नकेवलंया वद्विलग्नांशःस्वनाथेनेत्यत्रैवोदाहार्य्य दास्यांजातइत्यादि दितिसुतगुरौशुक्रेरिष्फगेलग्नाद्द्वादशस्थेनकेवलंयावत्सौरभागेशनैश्चरनवांशकव्यवस्थितेदा स्यांजातःदासीपुत्रोजातइतिवक्तव्यं नीचेऽर्केद्वोरिति अर्केद्वोःरविशशिनोः द्वयोरपिलग्नान्मदनगतयोः सप्तमस्थानस्थयोः सूर्य्यजेनसौरेणदृष्टयोरवलोकि तयोःजातोनीचोभवति स्वकुलानुचिताधमकर्म्मकृदित्यर्थः अथान्यानप्यनिष्टयोगान् शार्दूलविक्रीडितेनाह ६ पापालोकितयोरिति॥ राम १०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापालोकितयोरिति सितः शुक्रः अवनिजोंगारकः एतयोरस्तयोः लग्नात्सप्तमगतयोरपि पापालोकितयोः पापग्रहदृष्टयोः जातस्त्ववाध्यरुक्भवति सच प्रसिद्धः
यत्र तत्र राशौ चंद्रे शशिनि कर्कटवृश्चिकांशकयोरन्यतमस्थे तत्र चान्येन पापेन युते जातो गुह्यरुग्भवति गुह्यरुक् पुरुषव्याधिः श्वित्रीत्यादि अशुभयोः सौरारयोः रिष्फ
धनस्थयोः द्वादशद्वितीयगतयो चंद्रे लग्ने उदयस्थे रवावादित्येऽस्ते सप्तमस्थे जातः श्वित्री श्वेतकुष्ठयुक्तो भवति चंद्रे खे दशमस्थेऽवनिजे भौमे स्तगे सप्तमस्थे अस्मिन्
योगे यद्यर्कजः सौरो वेशिस्थानस्थो भवति तदा जातो विकलांगहीनो भवति ७ अथान्यानप्यनिष्टयोगान्वसंततिलकेनाह अंतरिति यत्र तत्रस्थे शशिनि चंद्रे अ
शुभयोः सौरभौमयोरंतर्मध्ये स्थिते पतंगे सूर्ये च मृगगते मकरस्थे जाताः स्वासक्षयप्लिहकविद्रधिगुल्मभाजो भवंति स्वासः प्रसिद्धः क्षयः शरीरक्षयः प्लीहः प्रसि
द्धः वामकुक्षिसंस्थो मांसखंडः विद्रधिगुल्मौ रोगौ प्रसिद्धौ एषामन्यतमेन रोगेणार्दिता भवंति इत्यर्थः केचिदत्रैकवचनं पठंति स्वासक्षयप्लीहकविद्रधिगुल्मभा
क्स्यादिति शोषीति रवींद्वोश्चंद्रार्कयोः परस्परमन्योन्यगृहांशगयोः आदित्यः कर्कटे सिंहे चंद्रो यथा यत्र तत्र राशौ सिंहांशके चंद्रः कर्कटांशे सूर्यस्तदा जातः शोषीभ

पापालोकितयोः सितावनिजयोरस्तस्थयोर्वाध्यरुक् चंद्रे कर्कटवृश्चिकांशकगते पापैर्युते गुह्यरुक् श्वित्री रिष्फधनस्थयोरशुभयोश्चंद्रोदये
स्ते रवौ चंद्रे खेऽवनिजेऽस्तगे च विकलोयद्यर्कजो वेशिगः ७ अंतः शशिन्यशुभयोर्मृगगे पतंगे स्वासक्षयप्लिहकविद्रधिगुल्मभाजः शोषीपर
स्परगृहांशगयो रवींद्वोः क्षेत्रेऽथवा युगपदेकगयोः कृशो वा ८ चंद्रेश्विमध्यझषकर्किमृगाजभागे कुष्ठी समंदरुधिरे तदवेक्षिते वा॥ ॥

वति अत्र केचित् परस्परगृहांशगयो रवींद्वोरिति सिंहे सिंहांशके स्थिते चंद्रे कर्कटे कर्कटांशस्थे सूर्ये च जातः शोषी क्षयी भवतीति वर्णयंति तच्चायुक्तं यस्माद्भगवा
न् गार्गिः परस्परगृहे यातौ यदि वापि तदंशगौ भवेतामर्कशीतांशू तदा शोषी प्रजायते १ क्षेत्रेऽथवेति युगपत्तुल्यकालं तयोरेव परस्परक्षेत्रे यदा द्वावपि भवतः सिं
हे यदा भावपि अर्कचंद्रौ स्थितौ कर्कटे वा भवतस्तदा जातः शोषी भवति कृशो वा कृशो दुर्बलः अथान्यानप्यनिष्टयोगान्वसंततिलकेनाह ८ चंद्रे इति अश्वि
मध्ये धन्विपंचमनवांशके चंद्रे स्थिते तत्र च समंदरुधिरे मंदेन सौरेण रुधिरेणांगारकेन युक्ते यथासंभवमन्यतमेन तदवेक्षिते वा ताभ्यामन्यतमेन दृष्टे जातः कुष्ठी भ
वति अथवा यत्र तत्र राशौ झषकर्किमृगाजभागे झषो मीनः कर्की कुलीरः मृगो मकरः अजो मेषः एषामन्यतमेन वांशकस्थे चंद्रे तत्र मंदरुधिरयोरन्यतमेन यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ
टी॰ न॰
९५

न्तेदृष्टे वा जातः कुष्ठी भवति अत्र चंद्रो यदा शुभग्रहदृष्टो भवति तदा कंडूविकारी भवति न कुष्ठी यस्माद्यवनेश्वरः मीनांशके मेषमृगांशके वा चंद्रः स्थितो नैव हि पाप
दृष्टः किलासकुष्ठादिविनष्टदेहमिष्टेक्षितः कंडूविकारिणं च १ यातैस्त्रिकोणमिति अलिकर्किवृषैः वृश्चिककुलीरवृषभैः मृगे च मकरे एतैश्च त्रिकोणयातैः प्राप्तैः
तथाविधो लग्नो भवति यस्यैषामन्यतमेन नवमे पंचमे वा स्थाने भवति स च पापानामन्यतमेन युक्तो दृष्टो वा भवति तदा जातः कुष्ठी भवति अथान्यानप्यनिष्टयोगानर्थवसं
ततिलकेनाह ९ निधनेति रविरादित्यः चंद्रः शशी अंगारो ऽङ्गारकः यमः सौरः एते रविचंद्रार यमाः यथा तथा येन तेन प्रकारेण निधनारिधनव्ययस्थिताः अष्टमष
ष्ठद्वितीयद्वादशगाः जातानां मनुजानां मनुष्याणाम नेत्रतामाध्यं जनयंत्युत्पादयंति यथा तथेति क्रमनिवारणार्थः तां चानेत्रतां बलवद्ग्रहदोषकारणैः तेषां चतुर्णां
ग्रहाणां मध्याद्यो बलवान्तस्य यो वातपित्तश्लेष्माणां मध्याद्दोष उक्तः तेन दोषकारणेन तत्प्रकोपेण तस्याक्षिविनाशो भवति अथान्यानप्यनिष्टयोगानर्थवैतालीयेनाह
१० नवमेति अशुभाः पापाः नवमायतृतीयधीयुताः नवमे एकादशे तृतीये धीस्थाने पंचमे एतेषु यथासंभवं युताः समवस्थिताः ते च सौम्यैः शुभग्रहैरनिरी

यातैस्त्रिकोणमलिकर्किवृषैर्मृगे च कुष्ठं च पापसहितैरवलोकितैर्वा ९ निधनारिधनव्ययस्थितार विचंद्रारयमा यथा तथा बलवद्ग्रहदो
षकारणैर्मनुजानां जनयंत्यनेत्रतां १० नवमायतृतीयधीयुता न च सौम्यैरशुभा निरीक्षिताः नियमाच्छ्रवणोपघातदा रदवैकृत्यकराश्च
सप्तमे ११ उदयत्युडुपे ऽसुरास्यगे सपिशाचो ऽशुभयोस्त्रिकोणयोः सोपप्लवमंडले रवावुदयस्थे नयनापवर्जितः १२ १२ ॥

क्षिता न दृष्टाः तदा बलवद्ग्रहादोषकारणेनैव पुरुषस्य नियमान्निश्चयाच्छ्रवणोपघातदाः श्रोत्रयोः कर्णयोरुपघातदा बाधिर्य्यकराः अत्राशुभग्रहणेनार्कचं
द्रारसौराः प्रागुक्ता एव ज्ञेयाः रदवैकृत्यकराश्च सप्तमे इति त एवार्कचंद्रारसौराः लग्नात्सप्तमे स्थाने स्थिताः सौम्यैरदृष्टा रदानां दंतानां वैकृत्यकराः स्युः अथान्य
नप्यनिष्टयोगानर्थवैतालीयेनाह ११ उदयतीति उडुपे चंद्रे उदयति लग्नगते तस्मिंश्चासुरास्यगे राहुग्रस्ते तस्माच्च लग्नादशुभयोः सौरभौमयोः त्रिकोणयोः न
वमपंचमस्थयोः जातः सपिशाचो भवति तस्य पिशाचाधिष्ठितो भवति इत्यर्थः एवं रवावादित्ये मंडले सोपप्लवे च असुरास्यगे अर्के राहुग्रस्ते तस्मिंश्चोदयस्थे ल
ग्नगे लग्नादशुभयोः सौरभौमयोः त्रिकोणगतयोः जातो नयनापवर्जितो भवति अंध इत्यर्थः अथान्यानप्यनिष्टयोगान्शार्दूलविक्रीडितेनाह १२ ॥ ः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्पृष्टइति यस्यजन्मनिमंदगः सौरोद्यूनेसप्तमेयुतः स्थितोभवति विलग्नेचगुरुः बृहस्पतिः सपवनेनवायुनासंस्पृष्टोभवति वातरोगोभवतीत्यर्थः अवनिःभूः त
नोजातोऽवनिजः तस्मिन्नस्तभवनेसप्तमेस्थानेस्थिते विलग्नाश्रितेप्राग्लग्नगेचजीवेगुरौजातः सोन्मादोभवतिविक्षिप्तइति तद्वदिति सूर्य्यसुतःसौरस्तस्मिन्नुदयेल
ग्नेस्थिते अवनिसुतेभौमेधर्म्मात्मजद्यूनगे नवमपंचमसप्तमस्थानानामन्यतमस्थानस्थेजातस्तद्वत्सोन्मादएवभवति केचित्तद्वच्चाह यमोदयइतिपठंति अथ
वाक्षीणेशीतगौचंद्रेसहस्ररश्मितनयेनशनैश्चरेणसंयुक्तेव्ययंद्वादशस्थानंयातेप्राप्ते वाग्रहणात्सोन्मादएवभवति अथान्यानप्यनिष्टयोगान्वसंततिलकेना
ह १३ राश्यंशपेति यस्मिन्नवांशकेचंद्रोवर्त्ततेसराश्यंशकःतस्यपःपतिःस राश्यंशपतिः उष्णकरःसूर्य्यःशीतकरश्चंद्रः अमरेज्योजीवः एतैःराश्यंशपोष्णक
रशीतकरामरेज्यैः आत्मीयादुच्चात्सप्तमराश्यधिपोनीचाधिपस्तदीयेनीचाधिपतिनवांशकेव्यवस्थितैः अरिभागगैःशत्रुनवांशगतैर्व्वाजातादासाभवंति एभ्यो
ऽल्पमध्यबहुभिरिति एभ्योग्रहेभ्यः एकोऽल्पः द्वौमध्यमौ त्रयश्चत्वारोवाबहवः एभ्यःप्रसूताःक्रमशोदासाभवंति यस्यैकोनीचाधिपांशकेशत्रुनवांशकेवा

संस्पृष्टःपवनेनमंदगयुतेद्यूनेविलग्नेगुरौसोन्मादोऽवनिजोस्थितेस्तभवनेजीवेविलग्नाश्रिते तद्वत्सूर्य्यसुतोदयेवनिसुतेधर्म्मात्मजद्यून
गेजातेवास्रसहस्ररश्मितनयेक्षीणेव्ययेशीतगौ १३ राश्यंशपोष्णकरशीतकरामरेज्यैर्नीचाधिपांशकगतैररिभागगैर्व्वा एभ्योल्पमध्यबहुभिः
क्रमशः प्रसूताःज्ञेयाःस्युरभ्युपगमक्रयगर्भदासाः १४ विकृतदशनःपापैर्दृष्टेवृषाजहयोदयेखलतिरशुभक्षेत्रेलग्नेहयेवृषभेपिवा॥

गतोभवति सोभ्युपगमेनात्मनाजीवितार्थीदासत्वमुपपद्यते यस्यद्वौसोन्येनक्रीतोविक्रीतः येनक्रीतस्तस्यदासोभवति यस्यत्रयश्चत्वारोवासगर्भदा
सोदासस्यपुत्रोदास्यां वापुत्रोलोकेगृहदासइतिप्रसिद्धः अथान्येषामनिष्टयोगानांज्ञानंहरिण्याह १४ ।विकृतदशनइति वृषः
प्रसिद्धः अजोमेषः हयोधन्वी एषामुदयेअन्यतमेलग्नेपापैर्दृष्टेऽवलोकिते विकृतदशनोविरूपदंतोभवति अशुभक्षेत्राणि पापग्रहराशयः मेषसिंह
वृश्चिकमकरकुंभाः एषामन्यतमेलग्ने हयेधन्विनिवावृषभेपिवालग्नेपापदृष्टेजातःखलइलइतिखल्वाटोभवति रवावादित्येनवमसुतगेलग्नान्नवमपं
चमयोरन्यतमस्थानस्थेपापग्रहदृष्टेजातः अदृढेक्षणोभवत्यसारनयनःएवंदिनकरसुतेसौरेलग्नान्नवमपंचमस्थेपापैःदृष्टेनैकव्याधिःबहुरोगोभवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेलग्नेनिगडैःवध्यते कर्कटमकरमीनानामन्यतमेलग्नेवंधनंविनादुर्गेस्थितोरक्ष्यते वृश्चिकलग्नेभूगृहेवध्यते भुजगनिगडपाशभृदिति यस्मिन्द्रेक्काणेपुरुषोजा
एवमेवकुजेभौमेलग्नान्नवमपंचमस्थेपापदृष्टेपुमान्पुरुषोजातोविकलांगहीनोभवति अथान्यानप्यनिष्टयोगान्पुष्पिताग्रयाह १५ व्ययसुतेति असौम्यैःपापैःव्य
बृ॰ यसुतधनधर्मगैः द्वादशपंचद्वितीयनवमस्थानानांयथासंभवमन्यतमस्थावस्थैः जातस्यनिबंधनंभवति सवध्यतइत्यर्थः तच्चनिबंधनंभवनसमानराशिसदृशंस
जा॰ भ॰ प्राणीयेनप्रकारेणसराशिःवध्यतेतेनप्रकारेणेत्यर्थः तद्यथा मेषवृषधनुर्द्धराणामन्यतमेलग्नेतस्यरज्ज्वादिनावंधनंभवतिमिथुनकन्यातुलाकुंभानामन्यत
१०६ मेलग्नेनिगडैःवध्यते कर्कटमकरमीनानामन्यतमेलग्नेवंधनंविनादुर्गेस्थितोरक्ष्यते वृश्चिकलग्नेभूगृहेवध्यते भुजगनिगडपाशभृदिति यस्मिन्द्रेक्काणेपुरुषोजा
तःसचेद्भुजगपाशभृद्भवति सर्पद्रेक्काणोनिगडपाशभृद्वाद्रेक्काणःसचप्रथमपंचमनवमानामित्यनयागणनयायस्यराशेःसंबंधीभवति सचेद्राशिःबलवतान्यव
स्थितासौम्येनपापग्रहेणान्यतमेनदृश्यतेतथाजातस्यतद्वचनसमानंनिबंधनंतद्भवेनैवप्रकारेणविकल्प्यं भुजगद्रेक्काणःकर्कटाद्यःवृश्चिकाद्यःवृश्चिकद्विती
यःमीनांत्यश्च निगडस्यद्रेक्काणेमकराद्यः भुजगनिगडपाशभृदिनिकैश्चिद्व्याख्यातं तत्रपाशभृदनेनद्रेक्काणोनपठितः तस्माद्भुजगनिगडपाशभृन्निगडपाश
नवमसुतगेपापैर्दृष्टेरवावदृढेक्षणोदिनकरसुतेऽनैकव्याधिःकुजेविकलःपुमान् १५ व्ययसुतधनधर्मगैरसौम्यैर्भवनसमाननिबंधनं
विकल्प्यभुजगनिगडपाशभृद्द्रेक्काणैर्बलवदसौम्यनिरीक्षितैश्चतद्वत् १६ परुषवचनोपस्मारार्त्तःक्षयीचनिशापतौसरवितनयेवक्रालोकं
गतेपरिवेषगे॥१६॥ भृदितिव्याख्येयं भुजगपाशभृन्निगडपाशभृद्भुजंगादिभागैर्बलवदसौम्यनिरीक्षितैश्चतद्वत्इतिस्पष्टोभवेदित्यर्थः अस्मिन्श्लो
केपठितइति १६ अथान्यानप्यनिष्टयोगान्हरिण्याह परुषवचनइति निशापतौचंद्रेसरवितनयेसौरसहितेवक्रालोकगतेभौमेनदृष्टेपरिवेषगेतत्कालंपरिवेष राम॰
युक्तेजातःपरुषःपरुषवचनः सदाप्रियाभिधायीअपस्मारार्त्तःक्षयीचभवति अत्रचंद्रमसस्त्रयःप्रकाराव्याख्याताः त्रयश्चदोषाः यस्यैकप्रकारश्चंद्रमाभवति १०६
तस्यैकोदोषोभवति यस्यप्रकारद्वयं तेनचंद्रेसौ रेणयुक्तेपरुषवचनःसदैवाप्रियाभिधायीभवति सरवितनयेभामदृष्टेअपस्मारार्त्तोऽपस्मारमृत्युः सरवि
तनयेभौमदृष्टेतत्कालंपरिवेषगेक्षयीभवति रवियमकुजेरिति रविरादित्यःयमःसौरःकुजोंगारकःएतैःनभस्थलमाश्रितैःदशमस्थानस्थैःसौम्यादृष्टैःशु
भग्रहाणामध्यावकेनचिद्दृष्टैरवलोकितैःजातोमनुजोमनुष्योभृतकोभवति तैःपूर्वोद्दिष्टैःग्रहैःरवियमकुजैःवराधममध्यमोभृतकोभवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषांग्रहाणामेवंविधेनैकेनभृतेकोपिवरः श्रेष्ठोभवति अजुगुप्सितांभृतिंकरोति द्वाभ्यांमध्यमोभवतिमध्यमांभृतिंकरोति त्रिभिरधमोजुगुप्सितांभृतिंकरोतीति १७
॥ इतिश्रीभट्टोत्पलविरचितायां बृहज्जातकविवृत्तौ अनिष्टाध्यायएकविंशतिमः २१ अथातः स्त्रीजातकाध्यायोव्याख्यायते तत्रादावेवपुरुषजन्मोक्तफलातिदे
शंतदधिकंचवसंततिलकेनाह॥०॥ यद्यत्फलमिति नरभवेपुंजन्मनियद्यत्फलमंगनानांस्त्रीणामक्षममसंभाव्यंतत्पतिषुतद्भर्तृषुवदेद्ब्रूयात् पुंजन्मोक्तंफलंयद्वृत्ता
ताम्रदृगित्यादि तत्रपतिस्त्रीणांक्षमयोग्यंतत्तासामेववक्तव्यं यच्चाक्षमंनसंभवति राज्यादि तत्पतिषुतज्जातककालेभर्तृषुसंभवति सुनफादियोगानांफलंत
दखिलंसकलमुभयोरेववक्तव्यं तानिचत्रिविधानिफलानिकानिचित्स्त्रीणांवक्तव्यानि कानिचित्पतिषु कानिचिद्द्वयोरपि वृत्ताताम्रदृगित्याकारप्रदर्शना
निस्त्रीणामेववक्तव्यानिराजयोगादिफलानितत्पतिषु तत्पत्नीनां सुनफादियोगफलानिसुखदुःखप्रदर्शकान्युभयोरपि अथवासकलंसमग्रंस्त्रीजातकं
फलंतत्पतिषुविधेयंवक्तव्यं तासामित्यादितासांस्त्रीणांनिधनेऽष्टमेस्थानेभर्तृमरणंयथावक्तव्यं तथोपरिष्टाद्वक्ष्यति वपुस्तुशरीरंलग्नेंदुगं लग्नचंद्रयोर्ग

रवियमकुजैः सौम्यादृष्टैर्नभस्थलमाश्रितैर्मृतकमनुजः पूर्वोदिष्टैर्वराधममध्यमाः १७ यद्यत्फलंनरभवेक्षममंगनानांतत्तद्वदेत्पतिषुवा
सकलंविधेयं तासांतुभर्तृमरणंनिधनेवपुस्तुलग्नेंदुगंशुभगतात्समयेपतिश्च १ युग्मेषुलग्नशशिनोःप्रकृतिस्थितास्त्रीसच्छीलभूषणयु

तं तच्चापितासांयथावक्तव्यं तथावक्ष्यति तासांशुभगतासौभाग्यंयादृग्भाविपतिर्वा तादृगात्समयेसम्प्रमस्थानाद्वक्तव्यं तदपिव ऽऽताशुभदृष्टयोश्च॥
क्ष्यति यदुक्तं वपुस्तुलग्नेंदुगंतत्पतिदर्शनंवसंततिलकेनाह १ युग्मेत्यादि लग्नेशशिनोरुदयचंद्रयोरपियुग्मेषुसमराशिषुस्थितयोःस्त्रीयोषित्प्रकृतिस्थिता
स्त्रीस्वभावाभवतिप्रकृतौस्वभावेतिष्ठति तयोरेवलग्नेंद्वोःशुभदृष्टयोःसौम्यग्रहावलोकितयोःसच्छीलभूषणयुताभवति सच्छीलंशोभनचारित्रं तदेवभूषण
मलंकरणंतेनयुता अथवाशोभनेनशीलेनभूषणैश्चयुता ओजस्थयोरिति तयोरेवलग्नेंद्वोरोजस्थयोर्विषमराशिगतयोःमनुजाकृतिशीलयुक्ता पुरुषा
कारापुरुषशीलाचभवति तयोःलग्नेंद्वोःपापयुतवीक्षितयोःपापसंयुतयोःअवलोकितयोर्वापापापापशीलाऽगुणोनासर्वगुणरहिताचभवति अथादेवैकस्मि
न्समराशिगेअन्यस्मिन्विषमराशिगेपुंस्त्रियोर्मध्यस्वरूपाकाराभवति एवमेकस्मिन्शुभग्रहयुतोअन्यस्मिन्पापयुतेसच्छीलोभवतिअसच्छीलाचमिश्रेस्थे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ॰ एवमेकस्मिन्शुभग्रहदृष्टेऽन्यस्मिन्पापदृष्टेपि एवमुभयोरपिसौम्यासौम्ययुतदृष्टयोश्च अनयादशाधेयकल्पनाकार्य्या अथभौमर्क्षेलग्नगेचंद्रगेवाभौमादि
टी॰भ॰ त्रिंशां कजातायाःस्वरूपमिंद्रवज्रयाह २ कंन्येवेति भूम्यात्मजर्क्षेभौमक्षेत्रेमेषवृश्चिकयोरन्यतमेलग्नगतेचंद्रगतेवातत्रचवक्रार्किजीवेंदुजभार्गवानांकु
१०७ जयमजीवज्ञसितानामंशकेषुत्रिंशांशगेषुक्रमेणफलनिर्देशोवक्तव्यः तद्यथा भौमलग्नेभौमत्रिंशांशकेलग्नगतेचंद्रगतेवाजाताकंन्यैवदुष्टाभवत्यनूढापि
सापुरुषसंप्रयोगेचव्रजतिगच्छतीत्यर्थः सौरत्रिंशांशकजाताकंन्यैवदास्यंदासभावंव्रजतिजनयति इहास्मिन्भौमक्षेत्रेजीवत्रिंशांशकेसाध्वीसच्छीलाभवति
बुधत्रिंशांशकेजातासामायायुक्ताभवति शुक्रत्रिंशांशकेजाताकुचरित्रयुक्ताभवति दुर्वृत्ताइति एवंत्रिंशांशकफलंसर्वदागुणनयापरीक्षितव्यं अथबुधशु
क्रक्षेत्रयोरन्यतमेलग्नगेचंद्रगेवाभौमादित्रिंशांशकजातायाःस्वरूपमिंद्रवज्रयाह ३ दुष्टेति अंशकेषुवक्रार्किजीवेंदुजभार्गवानांइतिसर्वत्रानुवर्त्तते॥

ओजस्थयोश्चपुरुषाकृतिशीलयुक्तापापाचपापयुतवीक्षितयोर्गुणोना २ कंन्यैवदुष्टाव्रजतीहदास्यंसाध्वीसमायाकुचरित्रयुक्ता
भूस्यात्मजर्क्षेक्रमशोंशकेषुवक्रार्किजीवेंदुजभार्गवानां ३ दुष्टापुनर्भूःसगुणाकलाज्ञाख्यातागुणैश्चासुरपूजितर्क्षे स्यात्कापटीक्ली
बसमासतीचवोढ्गुणाढ्याप्रविकीर्णकामा ४ स्वच्छंदापतिघातिनीबहुगुणाशिल्पिन्यसाध्वीदुमेन्त्राचाराकुलटार्कभेनृपवधूपुंचेष्टि
ताऽगम्यगा॥

असुरपूजितःशुक्रःतस्यर्क्षेवृषतुलयोरन्यतमेलग्नगेचंद्रगेवा भौमत्रिंशांशकेजातादुष्टादुष्टशीलाभवति शनित्रिंशांशकेजातापुनः
र्भूःपाणिग्रहणादनंतरंअन्यस्यभार्य्याभवति जीवत्रिंशांशकेजातासगुणागुणवतीभवति बुधत्रिंशांशकेजाताकलाज्ञाभवति गीतवाद्यनृत्यचित्रादिषुकुश
ला शुक्रत्रिंशांशकेजातागुणैःशीलादिभिःख्याताभवति स्यात्कापटीत्यादिबोधे मिथुनकंन्ययोरन्यतमेलग्नगेचंद्रगेवाभौमत्रिंशांशकेजाताकापटीकपटा
सक्ताभवति सौरत्रिंशांशकेजाताक्लीबसमानपुंसकतुल्याभवति गुरुःबृहस्पतित्रिंशांशकजातासाध्वीभवतिबुधत्रिंशांशकजातागुणाढ्यागुणबहुलाभव
ति शुक्रत्रिंशांशकजाताप्रविकीर्णकामाविक्षिप्तमन्मथासर्व्वपुरुषगामिनीभवतीति ४ अथचंद्रार्कजीवसौरक्षेत्राणामन्यतमेलग्नगेचंद्रगेवाभौमत्रिंशांश
कजातायाःस्वरूपंशार्दूलविक्रीडितेनाह ४ स्वच्छंदेति इंदुभेकर्कटेलग्नेतद्गतेवाचंद्रेभौमत्रिंशांशकजातास्वच्छंदास्वैरिणीयथेष्टव्यवहारिणीभवति॥

राम॰ १०७

२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौरत्रिंशांशकजातापतिघातिनी भवति जीवत्रिंशांशकजाता बहुगुणा भवति बुधत्रिंशांशकजाता शिल्पिनी शिल्पकर्म्मनिरता भवति शुक्रत्रिंशांशकजाता असा
ध्वीदुःशीला भवति न्याचारेति अर्कभेसिंहेलग्नेतद्गतेवाचंद्रेभौमत्रिंशांशकेजाताऽन्याचारापुरुषाचाराभवति नृरिवाचारोयस्या केचिद्वाचाटाइतिपठंति बहुभाषिणी॥
सौरत्रिंशांशकेजाताकुलटाऽसाध्वीभवति जीवत्रिंशांशकेजाताऽन्यपवधूराजभार्य्याभवति बुधत्रिंशांशकेजातापुंचेष्टितापुरुषस्वभावाभवति शुक्रत्रिंशांशकेजा
ताऽगम्यागम्यपुरुषगामिनीभवति जीवक्षेत्रेधन्विमीनयोरन्यतमेलग्नगतेतद्गतेवाचंद्रेभौमत्रिंशांशकजातानेकगुणाबहुगुणाभवति सौरत्रिंशांकजाताऽल्पर
तीशीघ्रवेगाभवति बृहस्पतित्रिंशांशकजाताऽतिगुणाबहुगुणवतीभवति बुधत्रिंशांशकेजाताविज्ञानयुक्ताऽऽश्वर्य्ययुक्ताभवति शुक्रत्रिंशांशकेजाताऽसती
असाध्वीभवति दासीति आर्किभेसौरक्षेत्रेमकरकुंभयोरन्यतमेलग्नगेचंद्रगेवाभौमत्रिंशांशकजातादासीभवति सौरत्रिंशांशकजातानीचरतानीचपुरुषसक्ता
भवति जीवत्रिंशांशकजातापतिरताभर्तृभक्ताभवति बुधत्रिंशांशकेजातादुष्टाभवति शुक्रत्रिंशांशकेजाताऽप्रजाभवति वंध्या एतदंशकेरितितदर्थमनुष्टुभा

जैवेनैकगुणाल्परन्यतिगुणाविज्ञानयुक्तासतीदासीनीचरताकिंभेपतिरतादुष्टाप्रजास्वांशकेः ५ शशिलग्नसमायुक्तैःफलंत्रिंशांशकैरिदं ब
लाबलविकल्पेनतयोरुक्तंविचिंतयेत् ६ दृक्संस्थावसितसितौपरस्परांशेशौक्रेवायदिघटराशिसंभवोंशः॥ ६ ॥ ॥ ॥

हृ ५ शशीति राशिंराशिमधिकृत्ययदेतत्त्रिंशांशकेयुक्तंफलं ततपद्यशिलग्नसमायुक्तैः चंद्रलग्नयुक्तैस्त्रिंशांशकैः यस्मिन्राशौयद्ग्रहः त्रिंशांशकचंद्रमाभवति
तद्दत्फलंवाच्यं योवालग्नेभवतितस्यय‍ःत्रिंशांशःतद्दशाद्वाकथमुच्यते बलाबलविकल्पेनेत्यादि चंद्रलग्नयोः योबलवान्स्यतत्रराशौयत्रत्रिंशांशकेभवतिव्यव
स्थितःतस्ययदुक्तंफलंतदेवंविचिंतयेत् एतदुक्तंभवति अन्यस्मिन्राशावन्यस्मिंत्रिंशांशकेचंद्रमाभवति अन्यस्मिन्राशौअन्यस्मिंत्रिंशांशकेलग्नात्तदातयोःयो
बलवान्स्यस्मिंत्रिंशांशकेभवतितस्यैवफलंवदेत् योबलरहितस्तस्यफलंनभवतीति अथयस्मिन्योगेजातास्त्रीभिःपुरुषाकारसंस्थाभिःसहमदनंशमयतित
द्योगद्वयज्ञानंप्रहर्षिण्याह ६ दृक्संस्थाविति असितःसौरःसितःशुक्रःएतावसितसितौपरस्परांशे अन्योन्यांशगतौ सौरःशुक्रांशगतेशुक्रःसौरांशगतेतौचप
रस्परंदृक्संस्थौअन्योन्यपश्यत‍ःएकोयोगः अथवाशौक्रेराशौवृषतुलयोरन्यतमेलग्नगतेतत्कालंयदिघटराशिसंभवोंशः कुंभनवांशकोदयोभवतितदाह्रिती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृ. अस्मिन्योगद्वये जातास्त्री अन्याभिरपराभिः स्त्रीभिः योषिद्भिः नराकृतिस्थिताभिः पुरुषसंस्थानाभिः पुरुषाकारयुताभिः मदनविषानलंप्रदीप्तकामविषाग्निं प्रज्वालि
टी. अ तं शांतिं नयति शमयति एतदुक्तं भवति अन्यास्त्री स्वजघनेन पुरुषरूपेण चर्म्ममयं लिंगं बध्वा पुंवत् तस्या रतिमभिजनयति यतो ऽतिक्रामार्त्तत्वात् पुरुषो योगं तुं नश
१०८ क्नोति अथास्तमये पतिश्चेति यदुक्तं तद्विज्ञानं शार्दूलविक्रीडितेनाह ७ शून्येति लग्नाच्चंद्राद्वा यः सप्तमो राशिः स यदि शून्यः सर्वग्रहवियुक्तो भवति अबले बलही
नश्च तस्मिन्नस्तभवने शून्ये अबले च बलरहिते तथा सौम्यः शुभग्रहै रनिरीक्षितेन केनचिच्छुभग्रहेन दृश्यमानेन केनचित्सौम्यग्रहेण युते जाताया भर्त्ता कापुरुषः कु
त्सितपुरुषो भवति अथवा लग्नाच्चंद्राद्वा यः सप्तमो राशिस्तत्र बुधमंदयोः ज्ञसौरयोरन्यतमे स्थिते जातायाः भर्त्ता क्लीबः पुरुषाकारहीनो भवति यस्या श्चरगृहं चररा
शिः सप्तमे भवति॥ तस्याः नित्यं सर्वकालं भर्त्ता प्रवासान्वितः प्रवासशीलो भवति अर्थादेवं स्थिरे सप्तमे नित्यं गृहे स्थितो भवति द्विस्वभावे किंचित्प्रवासात्किंचिद्गृहे
स्थितो भवति उत्सृष्टा रविणा कुजेन विधवेति तरणेरवावस्तस्थिते सप्तमगे जाता पतिनोत्सृष्टा भर्त्रा त्यक्ता भवति एवं कुजे न सप्तमगते तस्मिंश्चाशुभैः पापैः वीक्षि

स्त्रीभिः स्त्रीमदनविषानलप्रदीप्तंसंशांतिं नयति नराकृतिस्थिताभिः ७ शून्ये कापुरुषो बलेस्तभवने सौम्यग्रहावीक्षिते क्लीबोस्ते बुधमंदयोश्चर
गृहे नित्यं प्रवासान्वितः उत्सृष्टा रविणा कुजेन विधवा बाल्ये ऽस्तराशिस्थिते कन्यैवाशुभवीक्षिते ऽर्कतनये द्यूने जरां गच्छति ८ आग्नेयैर्व्विधवास्त
राशिसहितैर्म्मिश्रैः पुनर्भूः भवेत्क्रूरे हीनबलेस्तगे स्वपतिना सौम्येक्षिते प्रोज्झिता॥९॥ ते बाल्ये विधवा रंडा विगतभर्त्तिका भवति अर्कतनये सौरे द्यूने सप्तमगे तस्मिं

श्चाशुभैः पापैः वीक्षिते दृष्टे कन्यैव जरामुपगच्छति कुमार्य्येव वृद्धा भवति वृद्धत्वं प्राप्नोतीति विवाहं न करोति इत्यर्थः अत्र चंद्रलग्नयोः बलवशादेवैतद्वक्तव्यं न एम:
तु चंद्रात्सप्तमस्थानाद्व्ये तत्फलं कथमवगम्यते उच्यते सप्तमे स्थाने चंद्रमसः फलदर्शनाभावात् पुनरपि जाता कीदृशी भविष्यतीति तद्विज्ञानं शार्दूलविक्रीडितेना १०८
ह ८ आग्नेयैरिति एकैकस्मिन् पापग्रहे सप्तमे फलमुक्तं यत्र यदि बहवः आग्नेयाः क्रूराः सप्तमस्था भवंति तदा प्रतिग्रहोक्तं फलं त्यक्त्वा ते राग्नेयैरस्तराशिसहितैः
विधवैव भवति मिश्रैः क्रूरैः सौम्यैश्च सप्तमस्थैः पुनर्भूः भवेत् स्वपाणिग्रहिणं त्यक्त्वा अन्यस्य भार्य्या भवतीत्यर्थः द्विसंस्कृताः तथा च ग्रंथांतरे पुनर्भूलक्षण
मुक्तं स्वैरिणी पापहित्वा सवर्णं कामतः श्रयेत् अक्षतं च क्षताद्वारं पुनर्भूः संस्कृता पुनः क्रूर इति क्रूरे आदित्यांगारकशनैश्चराणामन्यतमे स्तगे लग्नात्सप्तमस्थे तस्मिं

CC-0. In Public Domain. Digitization by eGangotri

श्वहीनबलेसर्व्वबलरहितेनथाभूतेसौम्येक्षितेशुभग्रहाणांबुधगुरुसितानामन्यतमेनदृष्टेजातास्वपतिनाऽऽत्मीयेनैवभर्त्तृणाप्रोज्झितात्यक्ताभवति॥ अन्योन्यांश
गयोरिति सितःशुक्रः अवनिजोंगारकः एतयोः सितावनिजयोरन्योन्यांशगयोः परस्परनवांशकस्थितयोः यत्रतत्रराशौ सितनवांशकेभौमोभौमनवांशकेशुक्रः
तदासांगनास्त्री अन्यप्रसक्तापरपुरुषरताभवति अथवाद्यूनेलग्नात्सप्तमेस्थानेतावेवयद्यंगारकशुक्रौशीतरश्मिसहितौचंद्रसहितौभवतस्तथाप्यन्यपुरुषस
क्ताभवति किंतुभर्त्तुरनुज्ञयापत्युराज्ञयेति नतुस्वातंत्र्येणेति अथयेनयोगेनजातामात्रासहबंधकीभवतियेनचकुगर्हितयोनिर्य्येनचशुभतातद्योगत्रयंमालि
न्याह ९ सौरारर्क्षेइति सौरः शनैश्चरः तदृक्षेमकरकुंभौ आरोभौमस्तदृक्षेमेषवृश्चिकौएषामन्यतमेलग्नगते तस्मिंश्चसेंदुशुक्रेइंदुनाचंद्रेणशुक्रेणचसंयुक्तेतथा
भूतेपापदृष्टेपापग्रहावलोकितेजाताबंधकीपरपुरुषगामिनीभवति नकेवलंयावन्मात्रासार्द्धंजनन्यासह बंधकीजातातन्मातापिबंधकीपरपुरुषगामिनीभवति
अस्ताशेलग्नात्सप्तमेस्थानेयाराशिस्तत्कालंकोजोभौमनवांशकोभवति तस्मिंश्चकौजेऽस्तांशेसौरिणारविजेनदृष्टेजाताव्याधियोनिः सरोगभगाभवति यदुक्तं

अन्योन्यांशगयोः सितावनिजयोरन्यप्रसक्तांगनाद्यूनेवायदिशीतरश्मिसहितौभर्तुस्तदानुज्ञया ९ सौरारर्क्षेलग्नगेसेंदुशुक्रेमात्रासार्द्धंबंधकी
पापदृष्टे कौजेस्तांशेसौरिणाव्याधियोनिश्चारुश्रोणीवल्लभासद्ग्रहांशे १० वृद्धोमूर्खः सूर्यजर्क्षेंशकेवास्त्रीलोलः स्यात्क्रोधनश्चावनेये शौक्रे
कांतोतीवसौभाग्ययुक्तोविद्वान्भर्त्तानैपुणज्ञश्चबौधे ११॥ शुभगतास्तत्समयेतदर्थमाह चारुश्रोणीवल्लभासद्ग्रहांशइति लग्नात्सप्तमेस्थानेसद्ग्रहस्यशुभ

ग्रहस्यनवांशकोदयोभवतितदा चारुश्रोणीशोभनभगावल्लभापत्युःप्रियाचभवति अथयस्याःसप्तमंस्थानंशून्यंभवतितस्याःशनैश्चरांगारकशुक्रक्षेत्रेतदंशे
वासप्तमेयादृशीभवतितद्विज्ञानंमालिन्याह १० वृद्धइति यस्यजन्मनिलग्नात्सप्तमेस्थानेसूर्य्यजस्यसौरस्यर्क्षेमकरकुंभयोरन्यतमरन्यतमसंबंधीनवांशको
वासप्तमेभवति तस्याः वृद्धः मूर्खश्चभर्त्ताभवति यस्याःआवनेयस्यांगारकस्यर्क्षेमेषवृश्चिकयोरन्यतमस्तदंशकोवासप्तमेभवति तस्याः स्त्रीलोलः स्त्रीषुस्पृहयालुः
क्रोधनः क्रोधशीलश्चभर्त्ताभवति एवंशौक्रेराशौवृषतुलयोरन्यतमेतदंशकेवासप्तमस्थेकांतोतीवदर्शनीयोऽतीवसौभाग्ययुक्तोवल्लभश्चभर्त्ताभवति बौधेमिथु
नकन्ययोरन्यतमेतदंशकेवासप्तमस्थेजातायाःभर्त्ताविद्वान्पंडितोनैपुणज्ञश्चसर्व्वत्रसूक्ष्मदृष्टिर्भवति अथचंद्रराशौसप्तमेतन्नवांशकेजीवराशौवादित्यराशौचतत्र

ज्ञानदि ज्ञानकुलितागमयाह ११५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ई० मदनेति यस्याः जातायाः सप्तमेस्थानेचांद्रोराशिः कर्कटस्तदंशकोवाभवतितस्याः भर्त्ताभदनवशगतः कामातुरोमृदुश्चाकठिनश्चभवति त्रिदशगुरोः जीवस्यराशौ
टी० भ० धन्विमीनयोरन्यतमेसप्तमस्थेतदंशकेवाजातायाः भर्त्तागुणवांछौर्य्यादिभिःगुणैःयुक्तोजितेंद्रियोदांतश्चभवति सौर्य्यराशौसिंहेतदंशकेवासप्तमस्थेजातायाः भर्त्ता
१०९ ऽतिमृदुरतीवाकठिनः अतिकर्म्मकृदतीवव्यापारकृद्भवति व्यापारकरणशीलः केचिद्वदंतिकर्म्मकृद्रतिकामातुरो कामसक्तोभवति एवमस्तमयस्थितेसप्तमस्थानस्थे
गृहेराशौवंशकेवाफलमभिहितंयत्रान्यसंबंधीराशिःसप्तमेभवतिअन्यसंबंधीनवांशश्चतत्रायंयशापयोःयोवलवांस्तदीयंफलंवाच्यंइति १२ अथचंद्रशुक्रबुधानां
द्वौत्रयोवालग्नगतायस्याःभवंतितस्याःस्वरूपंवसंततिलकेनाह ईर्ष्येति यस्याः जन्मलग्नेशशिशुक्रौचंद्रसितौसमेतौभवतः साईर्ष्यान्विताभात्सर्य्ययुक्तासुखपरा
सुखासक्ताचभवति ज्ञेंद्वोःबुधचंद्रयोःलग्नगतयोः कलासुनिपुणाततज्ञासुखितासंजातसुखाभवति गुणाढ्यागुणबहुलाच शुक्रज्ञयोःसितबुधयोःलग्नगतयोः

मदनवशगतोमृदुश्चचांद्रेत्रिदशगुरौगुणवान्जितेंद्रियश्च अतिमृदुरतिकर्म्मकृच्चसौर्य्येभवतिगृहेस्तमयस्थितेंशकेवा १२ ईर्ष्यान्विता
सुखपराशशिशुक्रलग्नेज्ञेंद्वोःकलासुनिपुणासुखितागुणाढ्या शुक्रज्ञयोःसुरुचिरासुभगाकलाज्ञात्रिष्वप्यनेकवसुसौख्यगुणाशुभेषु
॥१३॥ क्रूरेष्टमेविधवतानिधनेश्वरोंशेयस्यस्थितोवयसितस्यसमेप्रदिष्टा॥ ११ रुचिरादर्शनीयासुकांतासुभगाभर्त्तृवल्लभाकलाज्ञाचभवति त्रिष्वपीति
यस्यास्त्रयोपिचंद्रबुधशुक्रालग्नगताभवंतिसाऽनेकवसुसौख्यगुणा अनेकैःवसुभिःधनैःसौख्यैरनेकैः बहुभिश्चगुणैःयुक्ताभवति अपिशब्दात्त्रिषुशुभेषुबुध
गुरुसितेषुलग्नगतेषुजाता अनेकवसुसौख्यगुणाभवति अत्रपूर्वेतासांभर्त्तृमरणमितियदुक्तंतद्विज्ञानंवसंततिलकेनाह १३ क्रूरेष्टइति यस्याः क्रूरग्रहोष्टमेस्था
नेभवति तस्याविधवताभवति कस्मिन्कालइत्याह निधनेश्वरोंशेयस्येति निधनेश्वरोष्टमस्थानाधिपतिर्य्यस्यग्रहस्यनवांशकेभवति तस्ययद्वयस्तस्मिन्वयसिवि राम: १०९
वाहात्परतस्तस्याः वैधव्यंवक्तव्यं एकंद्वौनवविंशतिरित्यादिग्रहवयः एवंकेचिद्वदंति वयंपुनर्दशान्तर्दशाकालंवयःशब्देनब्रूमः यत्रनिधनेश्वरश्चंद्रभौमयो
रन्यतमेंशेभवति तत्रचंद्रभौमयोःवयःप्रमाणंवर्षेत्रितयं तत्रप्रायः कुमारीणांविवाहासंभवः तस्मादष्टमस्थानाधिपतिःयस्यांशकेव्यवस्थितःतस्यांतर्दशा
धिपतिःतस्याविवाहात्परंविधवताप्रदिष्टोक्ता सत्स्विति यस्यांजन्मनिक्रूरग्रहोऽष्टमगोभवतिसद्ग्रहःशुभग्रहःकश्चिदर्थगोद्वितीयस्थानगतोभवति ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याः भर्तुः परस्तात् स्वयमेव मरणं भवति यस्यां जन्मनि कन्यायाममलिनिवृश्चिके गवि वृषे हरौ सिंहे वा इंदुः स्थितो भवति तस्या अल्पसुतत्वं स्वल्पपुत्रत्वं वक्तव्यं कन्यालिगो
हरिणामन्यतमश्चंद्रराशिः यस्यास्तस्याः अल्पपुत्रा भवतीति १४ अथ यस्मिन् योगे जाता पुरुषिणी भवति यस्मिंश्च ब्रह्मवादिनी भवति तद्योगद्वयं शार्दूलविक्रीडितेना
ह १४ सौरिइति सौरे शनैश्चरे मध्यबलेनातिबलवति न चातिबलहीने तथा शीतांशुशुक्रेंदुजैः शशिसितबुधैः बलेन वीर्येण रहितैः विवर्जितैः शेषैरादित्यभौमजी
वैः वीर्यसमन्वितैः सबलैः यत्र तत्रावस्थितैः यद्योजराशिः विषमराशिः रुद्गमः उद्गमे उदये लग्ने भवति विषमराशिः लग्ने जाता भवतीत्यर्थः तदा जाता मेषमिथु
नसिंहतुलाधन्विकुंभानामन्यतमे सा पुरुषिणी भवति बहुपुरुषेत्यर्थः जीवारास्फुजिदैंदवेष्विति जीवो बृहस्पतिः आरो भौमः आस्फुजिच्छुक्रः ऐंदवो बुधः एतेषु
यत्र तत्रावस्थितेषु बलिषु वीर्यवत्सु तथा प्राग्लग्ने यदि समराशिः भवति तदा जाता स्त्री भुवि भूमौ विख्याता सर्वत्र प्रथिताऽनेकशास्त्रकुशला अनेकेषु बहुषु शास्त्रे

सत्स्वर्थगेषु मरणं स्वयमेव तस्याः कन्यालिगोहरिषु चाल्पसुतत्वमिंदौ ।१४ सौरे मध्यबले बलेन रहितैः शीतांशुशुक्रेंदुजैः शेषैर्वीर्यसमन्वि
तैः पुरुषिणी यद्योजराश्युद्गमः जीवारास्फुजिदैंदवेषु बलिषु प्राग्लग्नराशौ समे विख्याता भुवि नैकशास्त्रनिपुणा स्त्री ब्रह्मवादिन्यपि १५ पा
पेऽस्तनवमगतग्रहस्य तुल्यां प्रव्रज्यां युवतिरुपैत्यसंशयेन उद्वाहे वरणविधौ प्रदानकाले चिंतायामपि सकलं विधेयमेतत् १६ ॥ ॥

षु कुशला तत्त्वज्ञा ब्रह्मवादिन्यपि मोक्षशास्त्रे कुशला भवति १५ अथ यद्योगजाता प्रव्रज्यामाश्रयति तद्द्विज्ञानं प्रहर्षिण्याह १५ पापेति पूर्वं सप्तमस्थस्य ग्रहस्य पृथ
क्पृथक्फलमुक्तं तत्र लग्नात् पापे क्रूरग्रहेऽस्ते सप्तमस्थे यद्यन्यः कश्चिद्ग्रहो लग्नान्नवमगतो भवति तदा सा स्त्री प्रागुक्तं फलं न प्राप्नोति नवमगतस्य ग्रहस्य तु
ल्यां तत्कथितां प्रव्रज्यां युवतिः स्त्री असंशयेन निःसंशयेनोपैति प्राप्नोति एवं स्त्रीजातकं व्याख्यातं उद्वाहे इति अत्र ये योगा व्याख्यातास्ते चेदुद्वाहे विवाहका
ले भवंति तदा योगोक्तफलं वाच्यं तथा तस्या वरणविधौ कन्यामार्गणकाले प्रदानकाले कन्यादानकाले च चिंतायां प्रश्नकालेप्येवं सकलं सर्वं विधेयं वक्तव्यं॥
स्त्रीजातकेषु ये शुभाशुभयोगा उक्तास्तेऽत्रापि शुभाशुभं वक्तव्याः न सकलजातकोक्ताः ते च यथा प्रदर्शितकाले नैव ज्ञेयाः येषां च वक्ष्यमाणविवाहपटलोक्तयो
गैर्वाधो भविष्यति तेऽत्र न वक्तव्याः युक्तये तद्विवाहपटलमुक्तमिति १६ ॥ इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृतौ स्त्रीजातकाध्यायो द्वाविंशः २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ० अथोतोनैर्याणिकाध्यायोव्याख्यायते तत्रादावेवाष्टमेस्थानेग्रहदृष्टे वियुक्तेयुतेवायथाम्रियतेतद्विज्ञानंशार्दूलविक्रीडितेनाह॥ ०॥ मृत्युरिति बलिभिर्ग्रहैःमृ
भ० टी० त्युगृहेक्षणेनमृत्युर्भवति यस्यजन्मलग्नान्मृत्युगृहमष्टमंस्थानंभूत्संयोग्रहोबलवान्पश्यतितस्यग्रहस्ययोधातुरुक्तस्तद्धातुकोपोद्भवस्तेन धातुनाप्रकुपितेनस
११० म्रियते तद्यथाऽर्कस्यपित्तं चंद्रस्यवातकफौ भौमस्यपित्तं बुधस्यत्रयोपिवातपित्तश्लेष्माणः बृहस्पतेःकफः शुक्रस्यवातकफौ सौरस्यवातइति तत्संयुक्तभगा
त्रजइति तदित्यनेनलग्नादष्टमस्थानस्यपरामर्शः तेनाष्टमेनयुक्तंयत्तद्गात्रंतत्संयुक्तभगात्रं तज्जातस्तत्संभूतः लग्नादष्टमोराशिः यस्मिन्नंगेकालाख्यपुरुषस्य
वर्त्ततेतस्मिन्नंगेदृष्टग्रहोक्तदोषजाम्रियते भूरिभिर्बहुभिःवीर्य्यान्वितैःसबलैःबहुभवोमृत्युः यदाबहवोपिवीर्य्यान्वितास्तच्छून्यमष्टमस्थानंपश्यंतितदाया
वंतःपश्यंतितावतांग्रहाणामुक्तदोषप्रकोपेन तेचबहवोदोषायस्मिन्कालपुरुषांगेलग्नादष्टमराशिर्वर्त्ततेतस्मिन्नंगेप्रकुप्यनिधनंकुर्वंतीति अग्न्यंबायुधज
इति सूर्य्यादिभिरष्टमेस्थानेस्थितैरग्न्यादिभिःमृत्युर्भवति तद्यथा यस्यलग्नादष्टमेस्थानेऽर्कोभवतितस्याग्निहेतुकोमृत्युर्भवति एवंचंद्रेष्टमेंबुहेतुकः भौमेश्र

मृत्युर्मृत्युगृहेक्षणेनबलिभिस्तद्धातुकोपोद्भवस्तत्संयुक्तभगात्रजोबहुभवोवीर्य्यान्वितैर्भूरिभिः अग्न्यंबायुधजोज्वरामयकृतस्तृट्क्षुत्कृत
श्चाष्टमेसूर्य्याद्यैर्निधनेचरादिषुपरस्वाध्वप्रदेशेष्वपि १ शैलाग्राभिहतस्यसूर्य्यकुजयोर्मृत्युःखबंधुस्थयोःकूपेमंदशशांकभूमितनयैर्बंधवस्त

युधहेतुकः बुधेज्वरहेतुकः जीवेआमयकृतः अविज्ञातव्याधिहेतुकः शुक्रेतृड्हेतुकः सौरेक्षुद्धेतुकः इति एतैःग्रहैःबलिभिःय '' कर्म्मस्थितैः॥
थोक्तएवमृत्युःशुभेनकर्म्मणाभवति बलहीनैरशुभेन मध्यबलैःमध्यमेनेति विज्ञातमरणप्रकारस्यमरणदेशज्ञानार्थमाह निधनेचरादिष्विति यस्यनिध राम:
नेऽष्टमेस्थानेचरराशिःभवतिसपरदेशेम्रियते यस्यस्थिरःसस्वदेशे यस्यद्विस्वभावःसोऽध्वप्रदेशेपथिम्रियतइति अथशैलाग्राभिघातस्वयस्वजनतोयेषु ११०
येर्य्योगैःम्रियतेतांशार्दूलविक्रीडितेनाह १ शैलाग्राभिहतस्येति सूर्य्यकुजयोःरविभौमयोःयुगपत्तुल्यकालंखबंधुस्थयोःदशमयोश्चतुर्थयोर्वाजातस्यशैला
ग्राभिहतस्यशिलाप्रहारेणहतस्यमृत्युर्भवति कूपइति मंदशशांकभूमितनयैःसौरेंदुभौमैःयथासंख्यंबंधवस्तकर्म्मस्थितैश्चतुर्थसप्तमदशमैः तद्यथा सौरे
चतुर्थगेचंद्रेसप्तमगेभौमेदशमगेजातःकूपेपतितोम्रियते कंन्यायामिति हिमोष्णकरयोश्चंद्रार्कयोःकंन्यायांस्थितयोश्चपापग्रहदृष्टयोःजातःस्वजनेनम्रियते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वजनेनन्यापाद्यते उभयोदये द्विस्वभावराश्योरुदये लग्नगते तत्र चार्कशशिनो रविचंद्रौ यदि स्यातां भवेतां तदा तोये जले मज्जतो मग्नो मृयते अथान्यानपि मृत्युयोगान्शा
र्दूलविक्रीडितेनाह २ मंदे इति मंदे शनैश्चरे कर्कटगे कुलीरस्थे मृगांके चंद्रे मृगे मकरे स्थिते जातस्य जलोदरकृतो जलोदरेण मृत्युर्भवति शस्त्राग्निप्रभव इति शशिनि
चंद्रे कुजर्क्षे मेषवृश्चिकयोरन्यतमस्थे तत्र चाशुभयोर्द्वयोः पापयोः मध्यस्थे जातस्य शस्त्राग्निप्रभवः शस्त्रेणाग्निना वा प्रभवति तत्कृतो मृत्युः कन्यायामिति शी
तगौ चंद्रे कन्यायां तद्वत्स्थिते पापद्वयमध्यगते जातस्य रुधिरोत्थशोषजनितो मृत्युः मरणं भवति दुष्टेन रक्तेन शोषेण वा उत्थितः जनितः उत्पन्नः सौरर्क्षे इति हिमगौ
चंद्रे सौरर्क्षे मकरकुंभयोरन्यतमस्थे तद्वत्स्मिंश्च पापद्वयमध्यगते यदि चेज्जातस्तदा रज्ज्वाग्निपातैः रज्ज्वाग्निना पाताद्वा मृयत इति अथान्यानपि मृत्युयोगाञ्छार्दू
लविक्रीडितेनाह ३ वंधाद्धीनवमस्थयोरिति अशुभयोर्द्वयोः पापयोर्द्धीनवमस्थयोः पंचमनवमस्थानस्थयोः तयोश्च सौम्यग्रहैरदृष्टयोरनवलोकितयोः जातः बं

कन्यायां स्वजनाद्धिमोष्णकरयोः पापग्रहैर्दृष्टयोः स्यातां यद्युभयोदये ऽर्कशशिनौ तोयेन्तदा मज्जतः २ मंदे कर्कटगे जलोदरकृतो मृत्युर्मृ
गांके मृगे शस्त्राग्निप्रभवः शशिन्यशुभयोर्मध्ये कुजर्क्षे स्थिते कन्यायां रुधिरोत्थशोषजनितस्तद्वत्स्थिते शीतगौ सौरर्क्षे यदि तद्वदेव हिम
गौ रज्ज्वग्निपातैः कृतः ३ वंधाद्धीनवमस्थयोरशुभयोः सौम्यग्रहादृष्टयोर्द्रेक्काणैश्च ससर्प्पपाशनिगडैः छिद्रस्थितैर्बंधनः कन्यायामशुभा
न्विते स्तमयगे चंद्रे सिते मेषगे सूर्य्ये लग्नगते च विद्धि मरणं स्त्रीहेतुकं मंदिरे ४ शूलोद्भिन्नतनुः सुखे ऽवनिसुते सूर्य्येपि वा खे यमे सप्रक्षीणहिमांशु
भिश्च युगपत्पापैस्त्रिकोणाद्यगैः धाद्वंधनेन म्रियते द्रेक्काणैरिति येन लग्नेन पुमान् जातस्तस्मादष्टमे स्थाने यो राशिः तत्कालं वर्त्तते तत्र यदि सपाशसर्प्पद्रे
क्काणो भवति निगडो वा तदा जातः वंधनेन म्रियते तत्र भुजगपाशभृद्द्रेक्काणः कर्कटाद्यः वृषद्वितीयः कन्यांतिमश्च कन्यायामिति मीनलग्नजातः कन्यायामस्तगे स
प्तमस्थे चंद्रे तस्मिंश्चाशुभान्विते केनचित् पापेन सहिते सिते शुक्रे मेषगे सूर्य्ये रवौ लग्नगते जातस्य मरणं मंदिरे गृहे स्त्रीहेतुकं स्त्रीनिमित्तं मरणं विद्धि जानीहि अ
थान्यानपि मृत्युयोगाञ्छार्दूलविक्रीडितेनाह ४ शूलोद्भिन्नतनुरिति सुखे चतुर्थे स्थाने ऽवनिसुते भौमे स्थिते सूर्य्येपि वा इतरथा चतुर्थस्थे खे दशमे स्थाने यदि यमः
सौरो भवति तदा जातः शूलोद्भिन्नतनुः म्रियते शूलेनोद्भिन्ना तनुः यस्य शूलप्रोतस्य तस्य मरणं भवति सप्रक्षीणेति पापैः रविभौमसौरैः सप्रक्षीणहिमांशुभिरिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षीणचंद्रसंयुक्तेऽश्वयुगपत्तुल्यकालं त्रिकोणाद्यगैः पंचमनवमलग्नस्थैः एतदुक्तं भवति सक्षीणचंद्राणां पापानामेतत्स्थानत्रयमुक्त्वाऽन्यत्रावस्थितिर्न भवति तदा
अश्वकाराच्छूलोद्भिन्नतनुर्म्रियते बंधुस्थेचेति रवौसूर्य्येबंधुस्थेलग्नाच्चतुर्थगे वियतिदशमेऽवनिसुतेभौमेस्थितेतस्मिंश्च क्षीणेंदुनाक्षीणचंद्रेणसंवीक्षितेतदाजात
श्वकाराच्छूलाभिन्नतनुर्म्रियते अस्मिन्नेवयोगेचतुर्थगेरवौदशमस्थेभौमेतस्मिंश्चसूर्य्यात्मजेनशनैश्चरेणेक्षिते दृष्टेजातः काष्ठेनाभिहतः काष्ठघातेनताडितो
मरणंप्रयाति प्राप्नोतीत्यर्थः अथान्यानपिमृत्युयोगान्वसंततिलकेनाह ५ रंध्रास्पदेति रंध्रमष्टमंस्थानं आस्पदंदशमं अंगंलग्नं हिबुकस्थानंचतुर्थं एतैरं
ध्रास्पदांगहिबुकैः यथासंख्यंप्रक्षीणचंद्ररुधिरार्कदिनेशयुक्तैः एतदुक्तं भवति अतिक्षीणचंद्रोऽष्टमेरुधिरोभौमः दशमे आर्किःसौरोंऽगेलग्ने दिनेशोरविश्चतुर्थे
एवंविधेयोगेजातोलगुडाहतांगोलगुडताडितोवयवोम्रियते केचित्पठंतिलगुडाहतांतइति लगुडाहतोभवति नैरवेति नैरवग्रहैः प्रक्षीणचंद्ररुधिरार्कदिनेशै

बंधुस्थेचरवौवियत्यवनिजेक्षीणेंदुसंवीक्षितेकाष्ठेनाभिहतः प्रयातिमरणंसूर्य्यात्मजेनेक्षिते ५ रंध्रास्पदांगहिबुकैर्लगुडाहतांगः प्रक्षीणचं
द्ररुधिरार्कदिनेशयुक्तैः नैरववकर्म्मनवमोदयपुत्रसंस्थैर्धूमाग्निबंधनशरीरनिकुट्टनांतः ६ बंध्वस्तकर्म्मसहितैः कुजसूर्य्यमंदैर्निर्य्या
णमायुधशिखिक्षितिपालकोपात् सौरेंदुभूमितनयैः स्वसुखास्पदस्थैर्ज्ञेयः क्षतकृमिकृतश्चशरीरपातः ७ ॥ ६ ॥ ॥

र्य्यथासंख्यंकर्मनवमोदयपुत्रसंस्थैः दशमनवमलग्नपंचमस्थैः क्षीणचंद्रमादशमे भौमोनवमे सौरोलग्ने अर्कः पंचमेयदिभवतितदाजातस्यधूमेनाग्निना
बंधनेनशरीरनिकुट्टनेनकाष्ठादिनाप्रहरणेनवातस्यमृत्युर्भवति अथान्यानपिमृत्युयोगान्वसंततिलकेनाह ६ बंध्वस्तकर्म्मसहितैरिति कुजोंगारकः सूर्यो
रविः मंदः सौरः एतैः यथासंख्यंबंध्वस्तकर्म्मसहितैश्चतुर्थसप्तमदशमस्थैः चतुर्थेभौमः सप्तमेसूर्य्यः दशमेसौरः यस्यजन्मनिभवंतितस्यायुधेनखड्गादिनाशि
खिनाऽग्निनाक्षितिपालकोपेननृपक्रोधेनवाएषामन्यतमेननैर्य्याणंमृत्युः भवति सौरेंदुभूमितनयैः शनिशशिभौमैः यथासंख्यंस्वसुखास्पदस्थैः द्वितीयच
तुर्थदशमैः द्वितीयेसौरः चतुर्थेचंद्रः दशमेभौमः यस्यजन्मनिभवति तस्यक्षतकृमिकृतः क्षतेद्विछेकृमयः कीटाउत्पद्यंतेतत्कृतश्चशरीरपातोभवति क्षतकृ
मिभिः पतितैः मृत्युर्भवति अथान्यानपिमृत्युयोगान् शार्दूलविक्रीडितेनाह ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खस्थ इति अर्के रवौ खस्थे दशमस्थानगते कुजे रसातलगते चतुर्थस्थे जातस्य यानप्रपाताद्वाहनात् पतितस्य वधो मृत्युर्भवति यंत्रोत्पीडनज इति कुजेंगारके ऽस्त
मयगे सप्तमस्थे सौरे ह्निनाभ्युद्गमे सौरश्चंदुश्चेनश्चतस्रोरे ह्निनाः शनिचंद्ररविभिरभ्युद्गमे लग्ने स्थितैः जातस्य यंत्रोत्पीडनजो वधः यंत्रपीडितो म्रियते केचित्क्षीणेंदु
नाभ्युद्गमे इति पठंति क्षीणेंदुः क्षीणचंद्रमा इन आदित्यः आर्किः सौरः एतैः लग्नेस्थितैः जातस्य यंत्रोत्पीडनयोः वधः विप्रमध्य इति रुधिरोंगारकः आर्किः सौरः
शीतकिरणः चंद्रः एतैः यथासंख्यं नृकाजसौरर्क्षगैः नृकः तुलः अजो मेषः सौरर्क्षे मकरकुंभौ तेन तुले कुजो भौमः मेषे सौरः मकरकुंभयोरन्यतमे चंद्रः एवं यस्य जन्म
नि भवति स विप्रमध्येऽमेध्यमध्ये म्रियते यातैर्वेति गलितेंदुः क्षीणचंद्रः सूर्य्यः आदित्यः रुधिरोंगारकः एतैः यथासंख्यं व्योमास्तबंध्वाह्वयान् यातैः प्राप्तैः व्योम्नि दश
मे क्षीणचंद्रः अस्तमये सप्तमे सूर्य्यः बंध्वाह्वये बधुसंज्ञिके चतुर्थे भौमः बंधित्याह्वयसंज्ञा यस्य एवं यस्य जन्मनि भवति स वा ग्रहणात् विप्रमध्ये म्रियते अथान्या

खस्थेर्के वनिजे रसातलगते यानप्रपाताद्वधो यंत्रोत्पीडनजः कुजेस्तमयगे सौरे ह्निनाभ्युद्गमे विप्रमध्ये रुधिरार्किशीतकिरणैर्नृकाजसौरर्क्षगै
र्यातैर्वा गलितेंदुसूर्यरुधिरैर्व्योमास्तबंध्वाह्वयान् ८ वीर्य्यान्वितवक्रवीक्षिते क्षीणेंदौ निधनस्थितेऽर्कजे गुह्योद्भवरोगपीडया मृत्युः स्या
त्कृमिशस्त्रदाहजः ९ अस्तेरवौ सरुधिरे निधनेऽर्कपुत्रे क्षीणे रसातलगते हिमगौ खगांतः लग्नात्मजाष्टमतपस्विनभौममंदचंद्रैस्तु शैलशि

न्यपि दुष्टयोगान्वैतालीयेनाह ८ वीर्य्यान्वितेति क्षीणेंदौ क्षीणचंद्रे वीर्य्यान्वितेन सबलेन वक्रेण भौमेन दृष्टे वा वीक्षिते ऽर्कजे सौरे ॥खराशनिकुड्यपातैः १०
निधनस्थिते ऽष्टमे जातस्य गुह्योद्भवरोगपीडया गुह्ये यदुद्भूतरुत्पन्नरोगो गदस्तत्पीडया ऽर्शोभगंदरान्यो कृमिशस्त्रदाहजः कृमिजः शस्त्रजः दाहजः अर्शोभगंद
रो वदंशादो कृमिपातेन शस्त्रकर्म्मणा वा दाहेन वा क्रियमाणेन तस्य मृत्युः भवति अथान्यानपि मृत्युयोगान्वसंततिलकेनाह ९ अस्त इति अस्ते सप्तमे रवावादित्ये स
रुधिरेण भौमेन संयुक्ते स्थिते ऽर्कपुत्रे सौरे निधने ऽष्टमे क्षीणे हिमगौ चंद्रे रसातलगते चतुर्थस्थानस्थे जातः खगांतो भवति खगः पक्षी तत्कृतो मृत्युर्भवति तस्य मृतस्याग्निसं
स्कारो न भवतीत्यर्थः लग्नात्मजाष्टमेति इनः सूर्य्यः भौमः कुजः मंदः सौरः चंद्रः शशांकः एतैः यथासंख्यं लग्नात्मजाष्टमतपस्सु स्थितैः लग्नपंचाष्टमनवमस्थैः तेन लग्ने
ऽर्कः पंचमे भौमः अष्टमे सौरः नवमे चंद्रो यस्य जन्मनि भवति तस्य शैलशिखरात्पर्वतमस्तकात् पतितस्य शनिपातेन चोल्कया वज्रपातेन कुड्यपातेन भित्तिपातेन वा मृत्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृ० अथयस्य जन्मन्येतेषांयोगानां मध्यादन्यतमोयोगोनभवतिनचाष्टमेस्थानेकश्चित्ग्रहोभवतिनचाष्टमंस्थानंमृत्युंपश्यतितन्मृत्युकारणंवैतालीयेनाह १०॥
जा० द्वाविंशइति येनद्रेष्काणेनपुमान् जातस्तस्माद्योद्वाविंशोद्रेष्काणोभवति सद्भूरिभिः पंडितैः निधनस्यमृत्योः कारणंनिमित्तंकथितः कथमित्याह तस्याधिपतिरि
११२ त्यादि तस्यद्वाविंशस्यद्रेष्काणस्ययोधिपतिःग्रहस्तस्याग्न्यंबाायुधजइत्यादि स्वगुणैःयोहेतुःपठितस्तेननिर्य्याणंमरणंप्रयच्छतिददाति अथवायस्मिन्राशौसद्वा
विंशोद्रेष्काणोभवतितस्यराशेःयःस्वामीसभवोभवति सवास्वगुणेरात्मीयहेतुभिः निर्य्याणंमरणंप्रयाति सचद्वाविंशोद्रेष्काणोलग्नादष्टमराशौभवतिसकथंज्ञा
यतेउत्पद्यते यदिलग्नस्यप्रथमोद्रेष्काणस्तदाऽष्टमस्यापिप्रथमोऽथलग्नस्यद्वितीयस्तदाऽष्टमस्यापिद्वितीयोऽथलग्नस्यतृतीयस्तदाऽष्टमस्यापितृतीयः नकेवलं
यावत्सर्वेराशीनामेषैवव्यवस्थाअनेनक्रमेणप्रकारेणयोऽष्टमराशिःद्रेष्काणःसएवद्वाविंशोद्रेष्काणइति तत्रैतज्जातं यस्योक्तयोगानामन्यतमोयोगोनभव
तिनचाष्टमंस्थानंग्रहयुतवीक्षितंतत्स्यद्वाविंशद्रेष्काणाधिपाऽष्टमराश्यधिपयोःयोबलवान्सतदुक्तदोषेणमृत्युरिति ११ अथयादृग्भूमौम्रियतेतद्विज्ञानंवसंततिल

द्वाविंशःकथितस्तुकारणंद्रेष्काणोनिधनस्यसूरिभिः तस्याधिपतिर्भवोपिवानिर्य्याणंस्वगुणैःप्रयच्छति ११ होरानवांशकपयुक्तसमानभू
मौयोगेक्षणादिभिरतःपरिकल्प्यमेतत् मोहस्तुमृत्युसमयेऽनुदितांशतुल्यःस्वेशेक्षितेद्विगुणितस्त्रिगुणःशुभैश्च १२ ॥

केनाह ११ होरानवांशेति पुरुषस्यजन्मसमयेहोरायांलग्नेयोनवांशकोभवतितस्ययोधिपतिःग्रहस्तेनयोयुक्तोराशिःसराशिःयत्रस्थितइत्यर्थः तस्यराशेः
यायोग्याभूमिस्तस्यांभूमौसम्रियते तद्यथा सचेद्राशिर्द्वयेभवतितदाऽधिकसंचारभूमौ सचेद्राशिःमेषोभवतितदाऽजाविकल्पसंज्ञेभूमौ वृषभश्चेत्तदावृषभ राम
प्रचारभूमौ मिथुनश्चेत्तदागृहे कर्कटश्चेत्तदाकूपे सिंहश्चेत्तदारण्ये कन्याचेत्तदाकूपे तुलाचेत्तदापणगृहे वृश्चिकश्चेत्तदाऽश्वभ्रे धन्वीचेत्तदाऽश्वप्रचारभूमौ ११२
मकरश्चेत्तदाऽनूपे कुंभश्चेत्तदागृहे मीनश्चेत्तदाऽनूपइति येषांतुपुनर्मृत्युयोगेजलादौमरणमुक्तंतेषांतत्रैव नकेवलंदर्शितराशिवशेनभूप्रदेशोवक्तव्यः॥
अपितुयोगेक्षणादिभिरिति सलग्ननवांशकाधिपतिर्य्यस्मिन्राशौव्यवस्थितः तत्रयद्यनेनग्रहेणतस्ययोगोभवति तदातस्यचयाभूमिः ईक्षणादियोवात
स्यपश्यति आदित्यहणाद्यस्यनवांशकेस्थितस्तस्यापियाभूमिरुक्तातस्यांसम्रियतइति अत्रचबहुभूमिसंभवेग्रहबलाद्वक्तव्याः ननुचग्रहस्यकाभूमिः उच्यते॥

CC-0. In Public Domain. Digitization by eGangotri

ग्रहस्यात्मीयराशेः याभूमिः सैवेति ननुयस्यराशिद्वयंतस्यकाभूमिरित्युच्यते तत्रत्रिकोणराशेः संबंधिनीभूमिः तद्यथा आदित्यस्यसिंहभूमिः अरण्यं चन्द्रमसः कर्क
टभूमिरनूपं भौमस्यमेषभूमिरजाविकसंचारप्रदेशः बुधस्यकन्याभूमिरनूपः जीवस्यधनुर्भूमिरश्वप्रचारः शुक्रस्यतुलाभूमिः विपणिः शनैश्चरस्यकुंभभूमिःगृ
हमिति केचिदत्रदेवालये अग्निविहारकोशशयनक्षितुत्कराः स्युरित्यादिकंस्थानमिच्छंति एतच्चयोभनं यतः एतेषुस्थानेषुक्रियमाणाहर्ष्यंतइति एवमतोस्माद
न्यतपरिकल्पचिंत्यं मोहकालिति यावंतोलग्नस्यनवांशका अनुदिताः शेषास्तेषामंशानांसं पीडितानांयावत्कालोभवति एतदुक्तं भवति यावत्कालोलग्नादवशि
ष्टः पुरुषस्यजन्मविषयेभवति तावंतस्तावत्कालमिति सचेल्लग्नराशिः यदिस्वेस्वेशेनस्वपतिनेक्षितोदृष्टस्तदासएवकालोद्विगुणोवक्तव्यः अर्थादेवस्वामिनासौम्य
ग्रहेणचदृष्टस्तदाषड्गुणकालोवक्तव्यः अथमृतस्यशरीरपरिणामाज्ञानंमालिन्याह १२ दहनेति निधनभवनेऽष्टमेस्थानेयोद्रेष्काणोव्यवस्थितस्तद्वशाच्छवप
रिणामश्चिंतनीयः सचगणनयाद्वाविंशोद्रेष्काणोभवति सचयदिदहनद्रेष्काणोऽग्निद्रेष्काणोभवतितदाभस्मत्वेनपरिणमत्यग्निनादह्यते पापद्रेष्काणोऽग्नि

दहनजलविमिश्रैर्भस्मसंक्लेदशोषैर्निधनभवनसंस्थैर्व्यालवर्गैर्विडंतः इतिशवपरिणामश्चिंतनीयोयथोक्तः पृथुविरचितशास्त्राज्जन्यनूका

द्रेष्काणः अथजलद्रेष्काणोभवतितदासक्लिद्यते जलमध्येक्षिप्यते सौम्यग्रहद्रेष्काणोजलद्रेष्काणः अथमिश्रद्रेष्काणोभवतितदाशुष्यति नद्यादिचिंत्यं १३
ह्यतेनचापिजलमध्येक्षिप्यते सौम्यग्रहद्रेष्काणः पापयुक्तोभवति पापग्रहद्रेष्काणोवासौम्ययुक्तस्तदामिश्रद्रेष्काणः तथानिधनभवनसंस्थैरष्टमराश्याश्रितैर्व्या
लवर्गैः सर्पद्रेष्काणैःविडंतोभवति तदाश्वशृगालकाकादिभिःभुज्यतेभक्षितेइत्यर्थः अत्रव्यालद्रेष्काणाःकर्कटाद्यःकर्कटद्वितीयः वृश्चिकाद्यःवृश्चिकद्वितीयःमी
नान्त्यश्च उक्तं च शशिगृहपूर्वापरगोकीटस्यचमीनपश्चिमोपगतः निधनेयस्यभवंतिद्रेष्काणास्तस्यचमृतस्य भुंजंतिवायसाद्याःप्राणिसमूहा नचास्तिसंदेहः पापग्रहद्रेष्का
णोयस्याष्टमराशिसंस्थितोभवति दहनंप्राप्नोतिनरोमृतमात्रोनिश्चयात्प्रवदेत् एवंसौम्यद्रेष्काणोजलमध्येक्षिप्यतेनरोत्रमृतः सौम्यद्रेष्काणः पापैःपापद्रेष्काणोपिसौ
म्ययुक्तः यस्याष्टमभवनगतःशोषंप्राप्नोतिसोपिमृतः इति एवंप्रकारःशवानांमृतानांपरिणामोविपत्तिश्चिंतनीयोविचार्य्यः पृथुविरचितशास्त्राद्विलीनोद्यास्त्राज्जन्य
र्थकादिमरणादिचिंत्यं मृतस्यकागतिर्भविष्यतिकस्माल्लोकादयमागतः आदिग्रहणात्तत्रकीदृगासीदिति अनूकशब्देनहातीतजन्मोच्यते अथयथायंजातोजंतुःस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ· टी·अ· ११३ गुरुरिति गुरुः जीवः उडुपतिशुक्रौ चंद्रसितौ सूर्य्यभौमौ रविकुजौ यमज्ञौ सौरबुधौ एते विबुधपितृतिरश्चो नारकीयांश्च जातान्कुर्युः विबुधलोको देवलोकः पि
तृलोकः प्रसिद्धः तिरश्चतिर्य्यग्लोकः नरकः नरकलोकः प्रसिद्धः एभ्यः आगतान्वदेत् कथमिति तदर्थमाह दिनकरशशीवीर्य्याधिष्ठितात्र्यंशनाथादिति दि
नकरः सूर्य्यः शशी चंद्रः अनयोः दिनकरशशिनोः मध्याद्यो बली वीर्य्यवान्तेनाधिष्ठितो युक्तो यस्त्र्यंशो द्रेष्काणः तस्य यो नाथः स्वामी तस्य वो वलोकस्तस्मादागत इति
वक्तव्यं तत्र सयदि द्रेष्काणो गुरोः जीवस्य संबंधी भवति तदा विबुधलोकादागत इति वक्तव्यं अथ चंद्रशुक्रयोरन्यतमसंबंधी भवति तदा पितृलोकादागत इति वक्त
व्यं अथ सूर्य्यभौमयोरन्यतमसंबंधी भवति तदा तिर्य्यग्लोकादागत इति वक्तव्यं अथ शनैश्चरबुधयोरन्यतमसंबंधी भवति तदा नरलोकादागत इति वक्तव्यं यस्माल्लो
कादागतस्तत्रापि श्रेष्ठमध्यमहीनत्वज्ञानमाह प्रवरेत्यादि यस्य ग्रहस्य प्रदर्शितलोकात्तस्य जन्मज्ञानमाह ग्रहस्तुंगस्थः स्वोच्चराशिगतो भवति तदा तत्र प्रवरः प्र
धानमासीदिति विज्ञेयं अथोच्चराशिच्युतो नीचमप्राप्य तदा तत्रासौ मध्यमासीदिति विज्ञेयं नीचस्थः निकृष्टः हीनः एतदनूके प्राग्जन्मनि ज्ञेयं अथ मृतस्य कागति

गुरुरुडुपतिशुक्रौ सूर्य्यभौमौ यमज्ञौ विबुधपितृतिरश्चो नारकीयांश्च कुर्युः दिनकरशशिवीर्य्याधिष्ठितात्र्यंशनाथात्प्रवरसमनिकृष्टा
स्तुंगह्रासादनूके १४ गतिरपि रिपुरंध्रत्र्यंशपो ऽस्तस्थितो वा गुरुरथ रिपुकेंद्रच्छिद्रगः स्वोच्चसंस्थः॥ भविष्यतितद्विज्ञानं मालिन्याह १४ गतिरि
ति यस्य जन्मनि लग्नात्षष्ठसप्तमाष्टमस्थानानि शून्यानि भवंति तस्य तत्कालं रिपुस्थाने त्र्यंशो द्रेष्काणो वर्त्तते तयोर्य्यो वाधिपती तयोर्मध्ये यो बलवांस्तस्यार्थ के यो लो
को भिहतः स एव गतिः एवं रिपुरंध्रत्र्यंशप इति तत्र तेन मृतेन गंतव्यमिति अस्तस्थितो वा अथ लग्नात्षष्ठसप्तमाष्टमस्थानानामन्यतमे स्थाने कश्चिद्ग्रहो भवति
तदा तस्य दर्शितलोको तेन गंतव्यं अथ लग्नाषष्ठसप्तमाष्टमस्थानानां द्वे स्थाने त्रीणि वा सग्रहाणि भवंति सोप्येकस्मिन्नपि द्वादयो ग्रहा भवंति तदा तेषां ग्रहाणां यो
बलवांस्तस्य यः प्रदर्शितो लोकस्तेन गंतव्यमिति नन्वस्तस्थितो वेति केचिद्दलमुक्तं तत्र सप्तमस्य ग्रहणं कृतं तत्षष्ठाष्टमस्थोपि स्वागतिं नयतीति किं व्याख्यातं उच्यते
अस्तस्थितो वेति वाशब्दश्चशब्दस्यार्थे ज्ञेयः न केवलमस्तस्थितश्चकाराद्रिपुरंध्रगश्चेति केचिदस्तस्थितश्चेति पठंति तथा च स्वल्पजातके उक्तं सुरपितृतिर्य्यङ्नरका
न्गुरुरुडुपसितावसृग्रवीज्ञयमौ रिपुरंध्रत्र्यंशकपा नयंति चास्तारिनिधनस्थाः गुरुरथेति अथशब्दः पादपूर्णार्थे यस्य जन्मनि गुरुः बृहस्पतिः लग्नाद्रिपुस्थाने॥ राम· ११३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठेभवति केंद्रेषुवा छिद्रेऽष्टमेवास्मचखोचस्थः कर्कटेभवति तदैकोयोगः अथवांत्येभवनेमीनराशावुदयतिविलग्नगतेतत्रचगुरुर्बलैर्विशेषाग्रहा अन्येग्रहा बलेनवीर्य्येणप्राक्तितावर्ज्जिताभवंति तदाद्वितीयोयोगः अस्मिन्योगद्वयेजातस्यमोक्षोभविष्यतिवक्तव्यं उदयतिभवनेंत्येसौम्यभागेचमोक्षइत्यत्रचकारोवाशब्दस्यार्थे यथापुरुषस्यजन्मकालग्रहवशाद्गतिर्ज्ञातथामरणकाललग्नवशाद्दपिगतिर्वक्तव्या यस्मात्स्वल्पजातकेउक्तं षष्ठाष्टमकंटकगोगुरुश्चेद्भवतिमीनलग्नेवा शेषैर्बलैर्ज्जन्मनिमरणेवामोक्षगतिमाहुरिति १५॥इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृतौनैर्य्याणाध्यायस्त्रयोविंशः २३ ॥अथातोनष्टजातकाध्यायोव्याख्यायते तत्रादावेवप्रसूतिकालज्ञानमिंद्रवज्रयाह॥०॥आधानेति यस्याधानकालोज्ञायतेतस्याधानकालात् पूर्वमेवजन्मव्याख्यातं तत्कालमिंदुसहितइत्यादिना जन्मकालंचव्याख्यातमेव एवमाधानजन्मकालयोरपरिबोधेअज्ञानेसतिसंपृच्छतःप्रष्टुःविलग्नात्प्रश्नलग्नाज्जन्मवदेद्ब्रूयात् येन लग्नेनपृष्टापृच्छतितस्ययदिपूर्वार्द्धंप्रथमहोराभवति तदापृष्टुःभानावादित्येउदग्गतेउत्तरायणस्थेजन्मवक्तव्यं मकरादिराशिषट्कस्थेजातइत्यर्थः अथ

उदयतिभवनेंत्येसौम्यभागेचमोक्षोभवतियदिबलेनप्रोक्तितास्तत्रशेषाः १५ आधानजन्मापरिबोधकालेसंपृच्छतोजन्मवदेद्विलग्नात्
पूर्वापरार्द्धेभवनस्यविंद्याद्भानावुदग्दक्षिणगेप्रसूतिम् १ लग्नत्रिकोणेषुगुरुस्त्रिभागैर्विकल्प्यवर्षाणिवयोनुमानात्॥ ॥ ॥

लग्नस्यापरार्द्धेद्वितीयाहोराभवति तदाभानौदक्षिणगतेदक्षिणायनस्थेजन्मवक्तव्यं कर्कटादिराशिषट्कस्थेजातइत्यर्थः तथाच आधानजन्मनीयस्यनविज्ञायतदेहिनः जन्मसंपृच्छतस्तस्यप्रश्नलग्नाद्विनिर्दिशेत् अथवर्षर्तुज्ञानमुपजातिकयाह १ लग्नत्रिकोणेष्विति त्रिभागैःद्रेष्काणैःलग्नत्रिकोणेषुप्रथमपंचमनवमस्थानेषुगुरुःजीवोज्ञेयः तद्यथा प्रश्नलग्नस्ययदिप्रथमद्रेष्काणोभवति तदायएवलग्नराशिस्तत्रस्थेगुरौजन्मवक्तव्यं अथलग्नस्यद्वितीयोद्रेष्काणस्तदालग्नाद्यःपंचमोराशिस्तत्रस्थेगुरौजन्मवक्तव्यं अथलग्नस्यतृतीयोद्रेष्काणस्तदालग्नाद्योनवमोराशिस्तत्रस्थेगुरौजन्मवक्तव्यं एवंकेषांचिन्मतं अन्येषांमतंतद्यथाप्रश्नलग्नस्ययदाप्रथमोद्रेष्काणोदयोभवतितदालग्नराशितोयावत्संख्येराशौबृहस्पतिस्तिष्ठतितावत्संख्यानिपृष्टुःवर्षाणिवक्तव्यानि अथलग्नेद्वितीयोद्रेष्काणस्तदालग्नात्पंचमराशितोयावत्संख्येराशौबृहस्पतिर्भवति तावत्संख्यानिपृष्टुःवर्षाणिवक्तव्यानि अथलग्नस्यतृतीयोद्रेष्काणोभवति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ. तदालग्नान्नवमराशितोयावत्तंस्थेराशौबृहस्पतिर्भवतितावत्संख्यानिप्रष्टुःवर्षाणिवक्तव्यानि एतद्व्याख्यानंनशोभनं पूर्वमेवव्याख्यानंश्रेयान् यस्माद्यक्तो
टी. भ. श्वरः द्रेष्काणलग्नेत्रमतस्सुराशेगुरुर्विलग्नादित्रिकोणगोभूत् समुद्भवेतद्भवनक्रमेणसाचारमाद्वगतिप्रमण्यात् यद्यप्यत्रसामान्येनोक्तंबृहस्पतेरवस्थानं त
११४ यार्थद्वादशभागक्रमेणप्रतिराशौराशौसंचार्य्यः तद्यथा यदिप्रश्नलग्नस्यप्रथमद्वादशभागोदयोभवति तदालग्नस्थेजीवेजातःद्वितीयद्वादशभागश्चेत्तदालग्ना
द्वितीयेगुरौजातः एवंतृतीयादिद्वादशभागोदयेतृतीयादिषुस्थानेषुऊह्य विकल्प्यवर्षाणिवयोनुमानादेवंबृहस्पतेरवस्थानंज्ञात्वातस्यएववयोनुमानात्तस्याकृति
शरीरमवेक्ष्यवर्षाणिविकल्प्यवयः प्रमाणबुध्वाद्वादशसुद्वादशसुवर्षेषुविकल्पनाकार्य्या किमस्मिन्नेवभगणपरिवर्त्तेजातराशेःबृहस्पतेरवस्थानमभूदुतद्वि
तीयउततृतीयादिषु एवंतस्याकृतिमवेक्ष्यवयोनुमानंवक्तव्य यत्रद्वादशसुवर्षेषुभ्रांतिर्भवति तत्रपुरुषलक्षणोक्तेनदशाविभागेनद्वादशवार्षिकीदशांक्षेत्रेषु
परिकल्प्ययत्तस्मिन्नंगसंस्पर्शोदूर्ध्वज्ञानं तथाचपुरुषलक्षणेपठ्यते पादौसगुल्फौप्रथमंप्रदिष्टंजंघेद्वितीयंतुसजानवक्रे मेढ्रोरुमुष्काश्चततस्तृतीयंनाभिकटि

ग्रीष्मोर्कलग्नेकथितास्तुशेषैरन्यायनर्तौऋतुरर्कचारात् २ ॥

चेतिचतुर्थमाहुः उदरंकथयंतिपंचमंहृदयंषष्ठमथस्तनान्वितं अथसप्तममंशजत्रुणीकथयंत्यष्टममोष्ठकंधरे नवमंनयनेचसभ्रुणीसललाटंदशमंशिरस्त
चेतिचतुर्थमाहुः उदरंकथयंतिपंचमंहृदयंषष्ठमथस्तनान्वितं अथसप्तममंशजत्रुणीकथयंत्यष्टममोष्ठकंधरे नवमंनयनेचसभ्रुणीसललाटंदशमंशिरस्त
था अशुभेषुशुभंदशाफलंचरणाद्येषुशुभेषुशोभनमिति किंत्वत्रविंशत्यधिकंवर्षशतंयस्यजन्मनोतीतंतस्यनष्टजातकवर्षज्ञानोपायएवनास्ति एवंवर्षेषु
ज्ञातेसऋतुज्ञानमाह ग्रीष्मोर्कलग्नइति येनलग्नेनप्रष्टाप्रच्छति तत्रचेदर्कःसूर्यःस्थितस्तद्द्रेष्काणोवालग्नेतदाग्रीष्मेजातइतिवक्तव्य कथितास्तुशेषैरिति शेषै
रन्यैश्चंद्रादयैर्ग्रहैर्लग्नस्थैःऋतुःपूर्वमेवकथितउक्तः द्रेष्काणैःशिशिरादयइत्यादिनाग्रंथेनोक्तः तत्रयदाशनैश्चरोलग्नेभवतितद्द्रेष्काणोवातदाशिशिरेजात
रितिवक्तव्य एवंशुक्रेलग्नगतेसातद्द्रेष्काणेवातदावसंतेजातः एवंभौमेग्रीष्मे एवमेववर्षावपि चंद्रेलग्नगतेतद्द्रेष्काणेवावर्षासु बुधेशरदि जीवेहेमंतइति य एन
दावहवोलग्नगताःभवंति तदातेषांमध्येयोबलवान्तदुक्तर्तौजातइतिवक्तव्यं अथनकश्चिद्ग्रहोलग्नगतोभवति तदातस्यसंबंधीद्रेष्काणोदयोभवति तदात ११४
दुक्तर्तौजातइत्येवंवक्तव्यं अन्यायनर्तौऋतुरर्कचारान्निति अन्यस्मिन्नयनेऽन्यस्मिन्नृतावर्कचारादृतुः अन्यस्मिन्नयनेतदयनासंभवश्चेदृतुरव्याभवति तदर्तुरर्कचा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रवशेनवक्तव्यं एतदुक्तंभवति सौरेणमानेनऋतुर्वक्तव्यः नतुचांद्रेण यथाशिशिरेज्ञातेमकरकुंभयोरन्यतमेराशौसूर्य्यस्यावस्थानंज्ञेयं एवंशेषराशिष्वपू ह्यं अनेनलौकिकश्चांद्रामासोनिराकृतोभवतीति अथायनेविलोमेग्रहपरिज्ञानादृतुपरिज्ञानंमासपरिज्ञानंचेंद्रवज्रयाह २ चंद्रज्ञेति अयनेविलोमेसति चंद्रज्ञजीवाःशुक्रारमंदैःपरिवर्त्तनीयाः शशिबुधगुरवः सितभौमशनैश्वरैः अयनव्यत्ययेप्राप्तेसतिपरिवर्त्तनीयाः व्यत्ययेनव्यवस्थाप्याः एतदुक्तंभवति यद्युत्त रायणेज्ञातेप्रावृट्काले ज्ञातस्तदावसंतेजातइतिवक्तव्यं चंद्रात्तुक्रमेणात्रपरिवर्तितः अथोत्तरायणेशरदिप्राप्तायांग्रीष्मेजातःदक्षिणायनेग्रीष्मेज्ञातेशरदिजातः अथबुधोरविभौमयोरपवर्तितौ रविभौमौबुधेनच उत्तरायणेहेमंतेज्ञातेशिशिरेजातः दक्षिणायनेशिशिरेप्राप्तेहेमंतेजातः इतिवक्तव्यं अत्रजीवमंदौपरस्पर मपवर्तितौ एवमृतौज्ञातेमासज्ञानमाह द्रेष्काणभागइति प्रश्नलग्नेयोद्रेष्काणोवर्त्ततेतस्यचद्रेष्काणस्ययदिप्रथमभागोवर्ततेतदाज्ञातर्तौप्रथमेमासिजातः इतिवक्तव्यं अथलग्नेद्रेष्काणस्यद्वितीयोभागोवर्ततेतदाज्ञातर्तौद्वितीयेमासिजातः तृतीयद्रेष्काणेद्वौविभागःपूर्वपरावऽत्राप्यर्कावस्थानतएवमासज्ञानं॥

चंद्रज्ञजीवाःपरिवर्त्तनीयाःशुक्रारमंदैरयनेविलोमे द्रेष्काणभागेप्रथमेतुपूर्वोमासोनुपाताच्चतिथिर्विकल्प्या ३ अत्रापिहोरापटवोद्विजें द्राःसूर्य्यांशतुल्यांतिथिमुद्दिशंति॥ ५ अथएवंमासंज्ञात्वातिथिज्ञानार्थमाह अनुपाताच्चतिथिर्विकल्प्यः अनुपातात्त्रैराशिकात्तिथिर्विकल्प्योविकल्प नीयः लग्नस्यषट्लिप्ताशतानिद्रेष्काणः द्रेष्काणेनचज्ञातर्तुऋतुज्ञानं तदर्द्धलिप्ताशतत्रयं लिप्ताशतत्रयेणमासज्ञानं अत्रानुपातात्तिथिर्लिप्तादशकेनैके कोज्ञेयः एषश्चतिथिरादित्यभागाः एवमादित्यस्यराशयोभागाज्ञेयाः मासाराशयस्तिथयोभागाः यस्मिंश्चतिथौज्ञातवर्षेयथाप्रदर्शितादित्योभवति तस्मिंति थौतस्यजन्मइतिवक्तव्यं अथचंद्रमानतिथिज्ञानोपायमिंद्रवज्रयाह ३ अत्रापीति अत्रास्मिन्तिथिज्ञानेद्विजेंद्रामुनयोहोराशास्त्रज्ञाः सूर्य्यांशतुल्यांऽश स्यानेस्फुटाऽर्कभागसमांतिथिमुद्दिशंतिकथयंति प्रश्नकालेतात्कालिकेनादित्येनयावंतोभागाभुक्तास्तावंतः शुक्लप्रतिपत्प्रभृतिज्ञातमासस्यतिथयोव्यती ताः अत्रचांद्रमानेमकरमासेजातेमाघमासोज्ञेयः एवमन्येष्वपिमासकल्पनाकार्य्या तथाचमणित्थः एष्टाकालेरविणायावंतोंशाःस्फुटेनसंभुक्ताः राशेस्ता स्तिथयःस्युःशुक्लादावर्कमासस्य एवंदिनेज्ञातेकिमयंरात्रौजातोदिवावेतितदर्थमाह रात्रिद्युसंज्ञेष्विति रात्रिद्युसंज्ञापूर्वेव्याख्याताःगोजाश्विकर्किमिथुनाख्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बृ० भ० टी १९५

दिना तत्रप्रश्नकालेयदिरात्रिसंज्ञोलग्नोभवति तदातस्यविलोमतादिवाजन्मवक्तव्यं अथद्युसंज्ञोलग्नोभवतितदारात्रौजन्मवक्तव्यं एवंदिनरात्रिविभानेज्ञातेवे
लाज्ञानमाह भागैश्चवेलाःक्रमशोविकल्प्याः यस्मिन्दिनेपुरुषस्यजन्मज्ञानंतस्मिन्दिनेअंशादित्योपिज्ञातः ततस्तस्यपुरुषस्ययदिदिवाजन्मतदातस्माद
दित्यादिनप्रमाणंकार्य्यं अथरात्रौजन्मतदारात्रिप्रमाणं तत्रप्रश्नलग्नस्यतस्मिन्कालेयावंतश्चषकाभुक्तास्तैरनुपातःकार्य्यः यदिपुरुषस्यदिवाजन्मता

मेषादिराशीनां चषकाः॥

मे	२००	मी
वृ	२४०	कुं
मि	२८०	म
क	३२०	ध
सिं	३६०	वृ
कं	४००	तु

दादिनप्रमाणेन यदारात्रौतदारात्रिप्रमाणेन तात्काललग्नभुक्तचषकानांगुणनांकृत्वातस्यैवलग्नस्यस्वदेशराश्युदयप्रमाणेनभागमपहृत्यावा
प्तावेला तावत्ताकालेनगतेनदिनस्यरात्रेर्वाजन्मवक्तव्यं एवंलग्नभागैःक्रमशःपरिपाट्यावेलासमयःविकल्प्याविकल्पनीया अतोनंतरंमास
ज्ञानमिंद्रवज्रयाह ४ केचिदिति केचिदाचार्य्याः शशांकाध्युषितात्चंद्रयुक्तान्नवांशाच्छुक्लांतसंज्ञंमासंकथयंति प्रश्नकालेयस्मिन्नवांशकेन
वमेंशेचंद्रमाभवतितमपिनवांशकंत्रिधापरिकल्प्यतस्मिन्नवांशकेनवमेंशेचंद्रमाव्यवस्थितइति चंद्रनवांशकगतंनक्षत्रमन्वेष्यं तन्नक्षत्र

रात्रिद्युसंज्ञेषुविलोमजन्मभागैश्चवेलाक्रमशोविकल्प्याः ४ केचिच्छशांकाध्युषितान्नवांशाच्छुक्लांत्यसंज्ञंकथयंतिमासं
लग्नत्रिकोणोत्तमवीर्य्ययुक्तंसंप्रोच्यतेंगालभनादिभिर्वा ५॥ ॥ शुक्लांत्यसंज्ञकेमासितस्यजन्मवक्तव्यं अत्रयस्यनक्षत्रस्यशुक्लां
तसंज्ञोमासोनास्तितस्यबृहस्पतिचारोक्तविधिनाशुक्लांतसंज्ञोमासःपरिकल्प्यः तत्रोक्तं नक्षत्रेणसहोदयमस्तंवायेनयातिसुरमंत्री तत्संज्ञंवक्त
व्यंवर्षमासंक्रमेणैव वर्षाणिकार्त्तिकादीन्याग्नेयाद्भद्वयानियोग्यानि क्रमशस्त्रिभंतुपंचममुपांत्यमंत्यंचयद्वर्षमिति तत्रचंद्रमायदिवृषनवांश
केतन्नवांशकसप्तकस्याद्योभवतितदाकार्त्तिकेमासिजातइतिवक्तव्यं अथवृषनवांशकस्योर्द्ध्वंभवति मिथुननवांशकेतन्नवांशकषट्कस्याद्योय
दाचंद्रमाभवति तदामार्गशीर्षेमासिजातइतिवक्तव्यं अथमिथुननवांशकेतन्नवांशकषट्कस्योर्द्ध्वंकर्कटनवांशकेतन्नवांशकपंचकस्याद्योयदाचंद्रमाभ
वति तदापौषेमासिजातइतिवक्तव्यं अथकर्कटेतन्नवांशकपंचकस्योर्द्ध्वंसिंहनवांशकेतन्नवांशचतुष्टयस्याद्योयदाचंद्रमाभवति तदामाघेमासिजन्मइतिव
क्तव्यं अथसिंहनवांशकेतन्नवांशकचतुष्टयस्योर्द्ध्वंकन्यानवांशकेतन्नवांशकसप्तकस्याद्योयदाचंद्रमाभवतितदाफाल्गुनेमासिजातइतिवक्तव्यं॥ ० ॥

राम १९५

CC-0. In Public Domain. Digitization by eGangotri

अथकन्यानवांशकसप्तस्योर्द्धं तुलनवांशकेतन्नवांशकषट्कस्यार्व्वाग्यदाचंद्रमाभवति तदाचैत्रेमासिजातइतिवक्तव्यं अथतुलनवांशकेतन्नवांशकषट्कस्यो
र्द्धं वृश्चिकनवांशकेतन्नवांशकपंचकस्यार्व्वाग्यदाचंद्रमाभवति तदावैशाखेमासिजातइतिवक्तव्यं अथवृश्चिकेतन्नवांशकपंचकस्योर्द्धं धन्विनवांशकेतन्नवां
शकचतुष्टयस्यार्व्वाग्यदाचंद्रमाभवति तदाज्येष्ठेमासिजातइत्यवगंतव्यं अथधन्विनवांशकेचतुष्टयस्योर्द्धं मकरनवांशकत्रयस्यार्व्वाग्यदाचंद्रमाभवति त
दाआषाढेमासिजातइतिवक्तव्यं अथमकरनवांशकेतन्नवांशकत्रयस्योर्द्धं कुंभनवांशकेतन्नवांशकद्वयस्यार्व्वाग्यदाचंद्रमाभवतितदाश्रावणेमासिजा
तइतिवक्तव्यं अथकुंभनवांशकद्वयस्योर्द्धं मीननवांशेतन्नवांशेपंचकस्यार्व्वाग्यदाचंद्रमाभवति तदाभाद्रपदेमासिजातइतिवक्तव्यं अथमीननवांशके
तन्नवांशकपंचकस्योर्द्धं मेषनवांशेतन्नवांशषट्कत्रयस्यार्व्वाग्यदाचंद्रमाभवति तदाऽश्वयुजिमासिजातइतिवक्तव्यं अथमेषनवांशकेतन्नवांशाष्टकस्यो
र्द्धं यदिचंद्रमाभवति तदाकार्त्तिकेमासिजातइत्यवगंतव्यं यस्मिन्कृत्तिकारोहिणीसकार्त्तिकः मृगशिरार्द्राचमार्गशीर्षः पुनर्वसुपुष्यश्चपौषः अश्लेषाम
घाचमाघः पूर्वाफाल्गुन्युत्तराफाल्गुनीहस्तश्चफाल्गुणः चित्रास्वातीचचैत्रः विशाखाऽनुराधाचवैशाखः ज्येष्ठामूलेज्येष्ठः पूर्वाषाढोत्तराषाढश्चाषाढः
श्रवणधनिष्ठाचश्रावणः शतभिषक्पूर्वाभाद्रपदोत्तराभाद्रपदाश्वभाद्रपदः रेवत्यश्विनिभरण्यश्चाश्वयुजः यस्मादुक्तं त्रिभं तु पंचममुपान्त्यमन्त्यंचयद्
र्वमिति एवंशुक्लांतस्यमासस्यनिश्चयः शुक्लांतग्रहणेनेतत्प्रतिपादयतियत्तथा शुक्लपक्षांतेयेननक्षत्रेणयुक्तस्तदुपलक्षितोमासोवक्तव्यः यथा कार्त्ति
कशुक्लपक्षांतेकृत्तिकारोहिणीभ्यामन्यतमेनयुश्चंद्रमाभवति तेनकार्त्तिकामासउच्यते एवमन्येषामपियोज्यते तदेतद्ब्रुवते एतदुक्तंभवति नशुक्लांतोमा
सइत्यतोमासः कृष्णांतएव तथाचयवनेश्वरः मासेतुशुक्लप्रतिपत्प्रवृत्ते पूर्वेशशीमध्यबलोदशाहे तथाच यद्राशिसंज्ञेशीतांशुः प्रश्नकालेनवांशके स्थि
तस्तद्राशिगः पूर्णोयस्मिन्भवतिचंद्रमाः जन्ममासः सनिर्दिष्टः पुरुषस्यतुरुच्यतेः कृष्णपक्षांतिकोमासोज्ञेयोत्रविपश्चिता लग्नत्रिकोणेत्यादि लग्नस्यप्र
थमलग्नस्यत्रिकोणयोश्चनवमपंचमयोर्म्मध्याद्यस्तत्कालमुत्तमेणप्रधानवीर्य्येणबलेनयुक्तस्तद्गराशिः प्रोच्यतेकथ्यते यस्मिन्राशौगतेचंद्रमसिजातइति
वक्तव्यं तथाचयवनेश्वरः होरादिवीर्य्याधिकलग्नभाजिस्थानंत्रिकोणेशशिनोविधार्य्यः अंगालभनादिभिर्व्वा कालांगानीन्यनेनप्रदर्शितोयः कालपुरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ॰ टी॰ज ११६ षस्यांगविभागास्तदालभनात्त्वाऽनेनविधिना प्रष्टुः स्पृशतः यदैवकालपुरुषस्यांगस्पृशतितस्यैचंद्रमसिजातइतिवक्तव्यं आदिग्रहणात्प्राण्युक्तसत्वदर्शनप्रव
णेगृह्यते अथप्रकारांतरेणजन्मराशिज्ञानमिंद्रवज्रयाह ५ यावानिति विलग्नात्पृच्छालग्नाच्छीतकरश्चंद्रोयावान्गतोजन्मराशौव्यवस्थितस्तस्माद्यावति
थिःराशिस्तत्रस्थेचंद्रमसिजातइतिवक्तव्यं मीनोदयेयदिमीनलग्नगतोभवति तदामीनयुगमेवप्रदिष्टमुक्तं मीनस्थचंद्रमा जातव्यं ननुदर्शितविधिनाराशिर
नेकप्रकारोयत्रप्रश्नोभिन्नरूपस्तत्रकोवक्तव्यइत्याशंक्याह भस्याहृताकारकृतैरिति यस्यराशेःसंबंधिभस्यद्रव्यंतस्मिन्कालेकृत्रिममानीयतेतदाकारस्वरू
श्चिद्दृश्यते यथामार्ज्जारादिदर्शनेसिंहोमहिषादिदर्शनेवृषइत्यादि अथवाराश्युक्तरूपंपुरुषस्यदृष्ट्वाथवाकृतेमयस्यराशिसदृशप्राणिनोरुतंशब्दःश्रूयतेत
त्रस्थेचंद्रमसिजातइतिवक्तव्यं एवंजन्मराशौज्ञातेलग्नज्ञानमिंद्रवज्रयाह ६ होरेति होरायांप्रश्नलग्नेयस्यराशेर्नवांशकस्तत्कालेवर्त्ततेतस्मात्तावतितमं
तमतिमंतमेवांशकराशिंतस्यजन्मलग्नंवक्तव्यं अथवालग्नाल्लग्नद्रेष्काणादारभ्यरविःसूर्य्योयावतियावत्संख्येद्रेष्काणेव्यवस्थितस्तस्माल्लग्नादारभ्यताव

यावान्गतःशीतकरोविलग्नाच्चंद्राद्वदेत्तावतिजन्मराशिः मीनोदयेमीनयुगंप्रदिष्टंभस्याहृताकारकृतैश्चचिंत्यं ६ होरानवांशप्रतिमंविल
ग्नंलग्नाद्रविर्यावतिचद्रेकाणे तस्माद्वदेत्तावतिवाविलग्नंप्रष्टुःप्रसूताविति शास्त्रमाह ७ जन्मादिशेल्लग्नगेवीर्य्ययुगेवाच्छायांगुलघ्नेऽर्के

तियेराशौलग्नगतेतस्यजन्मवक्तव्यं अत्रचद्वादशेभ्योधिकेद्रेष्काणेद्वादशकमपास्यसंख्यानिर्देशःचतुर्विंशतेरधिकेचतुर्विंशतिरपहृतेवशिष्टम् ॥
पास्यशेषंवदेत् एवंशास्त्रमाह शास्त्रंकथयति नस्वमनीषिकयोक्तमित्येतत्प्रतिपादयति शास्त्रग्रहणेनैतत्प्रतिपाद्यते उक्तंच पृच्छालग्ननवांशस्ययोराशिः
संत्वयासमस्तस्मिन्लग्नगतेराशौजन्मवक्तव्यं पृच्छतःयावत्संख्योपगतेलग्नाद्द्रेकाणेदिनकृत् ततःप्रश्नलग्नात्तावत्संख्येकृतेलग्नराशौप्रष्टुर्ज्जन्मविनिर्दिशे
त् अन्यप्रकारांतरेणलग्ननयनमिंद्रवज्रयाह ७ जन्मादिशेदिति लग्नगेग्रहेजन्मादिशेत् प्रश्नलग्नेयोग्रहोव्यवस्थितस्तंतात्कालिकंकृत्वालिप्तापिंडीकार्य्यो
अथवहवोलग्नगताभवंति तदातेषांयोबलवान्तंतात्कालिकंकृत्वालिप्तापिंडीकार्य्यो ततःसलिलसमयामवनौद्वादशांगुलेनशंकुनातात्कालिकानिच्छायांगुला
निगृहीत्वातैरंगुलैरर्कैकंग्रहंयदर्शितकालेलिप्तापिंडीकृतंगुणयेत् अथवासर्वग्रहेभ्योयो बलवान्ग्रहस्तंतात्कालिकंकृत्वालिप्तापिंडंकृत्वाछायांगुलाहतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चार्कशुद्धं कारयेत् द्वादशभिर्विभजेत्तत्र यावत्संख्यमवशिष्टं तावत्संख्यो मेषादेर्दारभ्य यो राशिर्भवति तस्मिन्राशौ लग्नगते तस्य जन्म वक्तव्यं अथ प्रकारांतरेणाह आसीनेत्यादि आसीनोपविष्टो यदा पृच्छति तदा लग्नाद्यज्जायास्थानं सप्तमराशिस्तस्मिन् लग्नगते तस्य जन्म वक्तव्यं अथ सुप्तः सुप्तोत्र शयनपतितो विहितः लग्नं निद्रस्य प्रश्नाभावात् तत्र पतितो यदा पृच्छति तदा लग्नाद्यत्सुखस्थानं चतुर्थराशिस्तस्मिन् लग्नगते तस्य जन्म वक्तव्यं अथोत्थितो पृच्छति तदा तस्माल्लग्नाद्दशमो राशिस्तस्मिन् लग्नगते तस्य जन्म वक्तव्यं अथ शयनादासनाच्चोत्थितस्तिष्ठतः पृच्छति तदोदयलग्नराशौ तस्मिन्नेव जन्म वक्तव्यं उक्तं च उत्तिष्ठतो विलग्नात्प्रष्टुः सुप्तस्य बंधुलग्नाच्च उपविष्टस्यास्तमये व्रजतो मेषूरणस्थानादिति अथ प्रकारांतरेण सद्यमेव नष्टजातकं वक्ति ततः प्रश्नकालेतात्कालिकं लग्नं कृत्वा लिप्तापिंडी कार्य्या ततस्तस्य लिप्तापिंडीकृतस्य गुणकारविज्ञानार्थं शार्दूलविक्रीडितेनाह ८ गोसिंहवित्ति गोसिंहादयो राशयो यथाक्रमं दशादिभिर्गुणकारैः संवर्ग्या गुणनीयाः तद्यथा गोसिंहौ वृषसिंहौ दशभि १० र्गुणयेत् वृषलग्नं लिप्तापिंडीकृतं दशभिर्गुणयेत् एवं सिंहं दशभिरेव जितुमाष्टमो मिथुनवृश्चिकौ लग्नग

आसीनसुप्तोत्थिततिष्ठताभं जायासुखाज्ञोदयगं प्रदिष्टं ८ गोसिंहौ जितुमाष्टमौ क्रियतुले कन्यामृगौ च क्रमात् संवर्ग्या दशकाष्टसप्तविषयैः शेषाः स्वसंख्यागुणाः जीवारास्फुजिदैंदवाः प्रथमवच्छेषा ग्रहाः सौम्यवद्राशीनां नियतो विधिर्ग्रहयुतैः कार्या च तद्गुणाः ९॥

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
७	१०	८	४	१०	५	७	८	९	५	११	१२

तावदष्टभि ८ र्गुणयेत् क्रियतुले मेषतुले एतौ सप्तभि ७ र्गुणयेत् कन्यामृगौ कन्यामकरौ एतौ लग्नगतौ विषयैः पंचभि ५ र्गुणयेत् एवमेते यथाक्रमं संवर्ग्या गुणनीयाः शेषा अनुक्ता राशयः स्वसंख्यागुणा आत्मीयसंख्यया गुणनीयाः तत्र गणनया कर्कटं चतुर्भि ४ र्गुणयेत् एवं धन्वीनवभिः ९ कुंभमेकादशभिः ११ एवं मीनो द्वादशभिः १२ एवं तावल्लग्नं स्वगुणकारेणावश्यमेव गुणयेत् दशकाष्टसप्तविषयैः ततस्तत्र यदि ग्रहो भवति तदा ग्रहगुणकारेणावश्यमेव गुणयेत् तत्र ग्रहगुणकारविधिः जीवारास्फुजिदैंदवाः प्रथमवद्दशकाष्टसप्तविषयैरिति जीवे गुरौ लग्नगते तमेव लग्नं स्वगुणकारैराह तं दशभिर्गुणयेत् आरे

सू	च	मं	बु	बृ	शु	श	रा	के
५	५	८	५	१०	७	५	०	०

भौमे लग्नगते अष्टभिः आस्फुजित् शुक्रः तस्मिन् लग्नगते सप्तभिः ऐंदवे बुधे पंचभिः शेषा रविशशिसौरास्ते च सौम्यवद्बुधवत् पंचभिर्गुणनीया इत्यर्थः एवं तात्कालिकं लग्नं अवश्यं राशिगुणकारेण गुणयेत् ततः सग्रहो ग्रहगुणकारैरपि तत्र च यदा ग्रहो भवति तदा ग्रहगुण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ नक्षत्रानयनं वसंततिलकेनाह ९ सप्ताहतमिति स

बृ. कारेणगुणयेत् यदावहवोग्रहाः भवंति तदासर्व्वेषांगुणकारैर्गुणयेत् एवंचतद्गुणितमेकांतेस्थापयेत् अथनक्षत्रानयनंवसंततिलकेनाह ९ सप्ताहतमिति स
दी. भ. प्ताहतंसप्तभिर्गुणयेत् दत्वाथवेति ततस्तत्रनवदेयाः शोध्यावा नकिंविद्वाउदेत्युच्यते यदिसचरराशिर्लग्नगतोभवति तदानवदेयाः स्थिरेनदेयानापिशोध्याः द्वि
११० स्वभावेविलग्नेनवशोध्याः एवंकेचिद्व्याचक्षते वयंपुनर्ब्रूमः यदिप्रश्नलग्नेप्रथमोद्रेष्काणोभवति तत्रनदेयाः द्वितीयेनदेयानापिशोध्याः तृतीयेनवशोध्याः एवं
कृत्वातस्यराशेस्त्रिघनेनसप्तविंशत्याभागमपहृत्यावाप्तंत्याज्यंतत्रयावत्संख्योंकोऽवशेषोभवतितावत्संख्यमश्विन्यादितोयन्नक्षत्रंतन्नक्षत्रंतस्यपृष्टुर्व्वक्तव्यं के
चिद्वदंति यथास्थितस्यराशेः सप्तविंशत्याभागमपहृत्यावशेषांकनवकदानेनविशोधनेनवायथास्थितेनांकेनसंवादउत्पद्यतेतथानक्षत्रंवक्तव्यं एवमिन्या
दि कलत्रसहजात्मजशत्रुभेभ्यइति भार्य्याभर्तृपुत्ररिपुषुनष्टजातकंयदापृच्छतितदातद्वेभ्यस्तद्भावेभ्यः एवंप्रष्टुः पृच्छकस्यवदेद्ब्रूयात् तमेवोदयराशिंपरिक
ल्पयेदित्यर्थः एतदुक्तंभवति यदिपुरुषः स्वपत्न्यानक्षत्रंपृच्छतितदातात्कालिकेलग्नेराशिषट्कंदेयमथभ्रातुः पृच्छतितदाराशिद्वयंदेयमथपुत्रस्यपृच्छतितदा

सप्ताहतंत्रिघनभाजितशेषमृक्षंदत्वाथवानवविशोध्यनवाथवास्मात् एवंकलत्रसहजात्मजशत्रुभेभ्यः प्रष्टुर्व्वदेदुदयराशिवशेनतेषाम् १० व
र्षर्त्तुमासतिथयोद्युनिशंह्युडूनिवेलोदयर्क्षनवभागविकल्पनास्युः भूयोदशादिगुणितास्वविकल्पभक्तावर्षादयोनवकदानविशोधनाभ्यां ११

राशिचतुष्कंदेयमथशत्रोः पृच्छतितदाराशिपंचकंदेयं एवंकृत्वायद्भवतितदेवोदयराशिंप्रकल्प्यतद्गुणकारेणगुणयेत् तत्स्थग्रहगुणकारेणच ततस्तत्रप्राग्वन्नवकदान
विशोधनेकृत्वासप्तविंशत्याभागमपहृत्यावशेषांकसमंयस्यप्रष्टापृच्छतितस्यनक्षत्रंवक्तव्यं एतदप्युपलक्षणार्थमेवत्रिराशिसहितात्तात्कालिकाद्यग्नान्मित्रस्यवक्त
व्यमेतन्नक्षत्रानयनमप्युपलक्षणमेवंसकलमपिनष्टजातकंवक्तव्यं अथवर्षाद्यानयनंवसंततिलकेनाह १० वर्षर्त्तुमासेति वर्षादीनिसर्व्वाणिस्वविकल्पेनभागेहृ
तेयथापाठक्रमेणानयितव्यानि तद्यथा तात्कालिकंलग्नंलिप्तापिंडीकृतंराशिगुणकाराहतंग्रहसंयुक्तंचेद्ग्रहगुणकाराहतमपियदेकांतेस्थापितंतत्पुनरपिदशादिगु
णंकार्य्यं एतदुक्तंभवति सराशिः स्थानचतुष्टयेधार्य्यः एकत्रदशगुणोऽन्यत्रद्वितीयेऽष्टगुणोऽन्यत्रतृतीयेसप्तगुणः चतुर्थेपंचगुणः कार्य्यः यतउक्तं भूयोद राम ११८
शादिगुणितान्भूयः पुनरपिदशाष्टसप्तविषयैर्गुणनीयाः ततस्तस्मिन्राशिचतुष्टयेप्राग्वन्नवकदानविशोधनेकृत्वास्वविकल्पैर्भागमपहृत्यावाप्तंवर्षादयोज्ञेयाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विज्ञेयादशकेष्वब्दाइति अत्रबहुवचनबहुधोपयोगित्वात्कृतं यदुक्तं स्वविकल्पभक्ताद्दर्षोदयस्तद्व्याख्यायते एतेचत्वारोराशयः स्थापितास्तेषांनवकदानविशो
धनंकृत्वाकर्म्मयोग्याः सर्व्वेभवंति ततोदशगुणस्यपृथक्स्थस्यपरमायुषाविंशत्यधिकेवर्षशतेनभागमपहृत्ययोंकोवशिष्यतेतदंकसमंतस्यवर्षसंख्यांकंवक्त
ते तस्यैववषड्भिर्भागमपहृत्यऋतुसंख्ययातत्रयोंकोवशिष्यतेतदंकसमेशिशिरादारभ्यर्त्तौजातइतिवक्तव्यं तस्यैवतुमाससंख्ययाद्वाभ्यांभागमपहृत्य यद्येको
वशिष्यतेतदाज्ञातर्त्तौप्रथमेमासिजातइतिवक्तव्यं अथशून्यमवशिष्यतेतदाद्वितीयेमासिजातः एवंकृत्वादशगुणः कर्म्मयोग्योराशिरपास्यः यस्यविंशत्यधि
काद्वर्षशतात्प्यधिकंजन्मनोऽतीतंतस्यनष्टजातकज्ञानोपायएवनास्ति अष्टकेष्वित्यादि योसावष्टहतोराशिस्तस्यपृथक्स्थस्यकर्म्मयोग्यस्यपक्षसंख्ययाद्वा
भ्यांभागमपहृत्ययद्येकोवशिष्यते तदाशुक्लपक्षेजातइतिवक्तव्यं नकिंचिदवशिष्यतेतदाकृष्णपक्षे तस्यैवतिथिसंख्ययापंचदशभिर्भागमपहृत्ययोंकोव
शिष्यतेतदंकसमानेतिथौजातइतिवक्तव्यं एवंकृत्वाऽष्टगुणः कर्म्मयोग्योराशिरपास्यः १दिवेत्यादि योसौसप्तहतोराशिस्तत्रप्राग्वदेवनवकादानविशोधने

विज्ञेयादशकेष्वब्दाऋतुमासास्तथैवच अष्टकेष्वपिमासार्द्धास्तिथयश्चतथास्मृताः १२ दिवारात्रिप्रसूतिंचनक्षत्रानयनंतथा सप्तकेष्व
पिवर्गेषुनित्यमेवोपलक्षयेत् १३ वेलामथविलग्नंचहोरामंशकमेवच पंचकेषुविजानीयान्नष्टजातकसिद्धये १४ ॥ ॥

कृत्वातत्कर्म्मयोग्यंराशिंस्थापयेत् तस्यदिवारात्रिसंख्ययाद्वाभ्यांभागमपहृत्ययद्येकोवशिष्यतेतदादिवसेजातोऽथनकिंचिदवशिष्यतेतदारात्रौजातइतिवक्त
व्यं योसौसप्तहतोराशिस्तस्यनक्षत्रसंख्ययासप्तविंशत्याभागमपहृत्ययोंकोवशिष्यतेतदंकसंख्येनक्षत्रेऽश्विन्यादितआरभ्यजातनक्षत्रंइतिवक्तव्यं अस्यक
र्म्मणः पुनरभिधानंनक्षत्रानयनस्यबाहुल्योपयोगित्वात् वेलेत्यादि यस्मिन्दिनेपुरुषस्यजन्मज्ञानंतद्दिनप्रमाणंघटिकादिकंकर्त्तव्यंरात्रौचेत्तदारा
त्रिप्रमाणं ततः पंचगुणस्यराशेस्तेनदिनप्रमाणेनरात्रिप्रमाणेनभागमपहृत्ययोंकोवशिष्यतेतस्मिन्कालेदिनगतेरात्रिगतेवातस्यजन्मवक्तव्यं अथविलग्न
मित्यादि अथशब्दः पादपूर्णार्थे कालेज्ञातेराश्यादिलग्नंकर्त्तव्यं ततस्तस्यहोराद्रेष्काणनवांशद्वादशांशत्रिंशांशभागाः कर्त्तव्याः तात्कालिकाग्रहाश्चकर्त्तव्याः
ततोयथाभिहितेनविधिनादशांतर्दशाष्टकवर्गादेरभिहितस्यफलस्यनिर्द्देशः कार्यः एवंनष्टजातकंसाधयेत् अथप्रकारांतरेणनक्षत्रानयनार्थमाह १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संस्कारनामेति संस्कारेण नाम संस्कारनाम तस्य मात्राः संस्कारेणागतस्य नाम्नो मात्राः संस्कारनाममात्राः संस्कारग्रहणेनैतत्प्रतिपादितं भवति संस्कारेण यत्पुरुषस्य नाम कृतं तस्य मात्रा ग्राह्याः नान्यस्य कस्यचित्तु नामादेः मात्राश्चेह गृह्यन्ते हल् अर्द्धमात्रिकः अचो मात्रिकः इत्यनया स्थित्या ताः संस्कारनाममात्राः संगृह्य द्विगुणीकार्य्याः ततस्तात्कालिकानि शंकुच्छायांगुलानि गृहीत्वा ताद्द्विगुणमात्रास्तैरंगुलैः संयुक्ताः कार्य्याः एवं कृते यद्भवति तस्य त्रिनवके न सप्तविंशत्या भागमपहृत्य यः शेषो भवति तदंकसमं तस्य धनिष्ठादित आरभ्य नक्षत्रं वक्तव्यं अथ नक्षत्रानयनेन प्रकारांतरेणार्य्ययाह १५ द्वित्रिचतुर्दशेति पूर्वाभिमुखो यदा पृष्टा पृष्ठेति तदा द्वयोरंकाः स्थाप्याः अथाग्नेयाभिमुखस्तदा त्रयाणां अथ दक्षिणाभिमुखस्तदा चतुर्दशानां अथ नैरृत्याभिमुखस्तदा दशानां अथ पश्चिमाभिमुखस्तदा तिथिसंख्यानां पंचदशानां अथ वायव्याभिमुखस्तदा सप्तत्रिगुणा एकविंशतिः उत्तराभिमुखस्तदा नवानां ऐशान्याभिमुखस्तदाष्टानां तद्यथा एवं दिगभिमुखवशेनांकं गृहीत्वा ततः पंचदशगुणः कार्य्यः ततस्तस्मिन्प्रदेशे यावंतः पुरुषास्तदभिमुखाः स्थितास्तत्संख्यया न्वितो युक्तः कार्य्यः एवं कृते यद्भवति तस्य

संस्कारमात्राद्विगुणाच्छायांगुलैः समायुक्ता शेषं त्रिनवकभक्तान्नक्षत्रं स्याद्धनिष्ठादि १५ द्वित्रिचतुर्दशदशतिथिसप्तत्रिगुणनवाष्टचैं द्राद्याः पंचदशघ्नास्तद्दिग्मुखान्विता न धनिष्ठादि १६ इति नष्टजातकमिदं बहुप्रकारं मया विनिर्दिष्टं ग्राह्यमतः सच्छिष्यैः परीक्ष्य यत्नाद्यथा भवति १७ इति नष्टः जातकाध्यायः॥ ॥

सप्तविंशत्या भागमपहृत्य योंको वशिष्यते तदंकसमं तस्य धनिष्ठाद्यारभ्य नक्षत्रं वक्तव्यं अथ नष्टजातकोपसंहारमार्य्ययाह १८ इति नष्टजातकमिति इतिशब्दः उपसंहारे मया वराहमिहिराचार्य्येण नष्टजातकं बहुप्रकारं बहुभेदं विनिर्दिष्टं उक्तमिदं अतःस्माद्धेतोः सच्छिष्यैः शोभनसच्छास्त्रैः ग्राह्यं यत्नात्परीक्ष्य विचार्य्य यथा येन प्रकारेण संभवति सत्यरूपं तथा ग्राह्यमिति येन प्रकारेण संभवति तेन गृहीतव्यमित्यर्थः बहुभिरागमैर्म्मया विचार्य्य पराशरवशिष्ठयवनसत्यमणित्थादीनां मतानि आलोक्य कृतं तदेव भूयो निर्म्मलगुणनिपुणबुध्या विचार्य्य संविदया कार्य्यं येन स्फुटसिद्धो सौ संपद्यते १७॥ ॥ इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृत्तौ नष्टजातकाध्यायश्चतुर्विंशतितमः २४॥ ॥ ॥ रामः ११८

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥अथद्रेष्काणाध्यायोव्याख्यायते तत्रादौमेषाद्यद्रेष्काणस्यस्वरूपज्ञानंवैतालीयेनाह॥ ०॥कन्यामिति कन्यांजघनेसितेश्वेतंवस्त्रमंबरंवेष्टितंयेन कृष्णःअ
सितवर्णः शक्तइवअभिरक्षितुमाभिमुख्येनरक्षांकर्त्तुंशक्तःसमर्थइव रौद्रोभीषणःयःपरशुंकुठारंसमुद्यतंधत्तेधारयति रक्तविलोचनेलोहिताक्षः सचपुमान्
पुरुषःएषपुरुषद्रेष्काणःसायुधोभौमासक्तश्च अथमेषद्वितीयद्रेष्काणस्यस्वरूपमिदंवज्रयाह १ रक्तांबरेति रक्तांबरालोहितवस्त्रा भूषणमलंकरणं भक्ष्यं
भोज्यंतत्रचिंतयस्याः कुंभाकृतिःघटोदरी वाजिमुखीअश्ववक्त्रा तृषार्त्तापिपासार्त्ता एकेनपादेनचरणेनोपलक्षिताइदंद्रेष्काणरूपंमेषमध्येमेषद्वितीयं य
वनोपदिष्टंयवनाचार्य्यैः कथितं एषचतुष्पदद्रेष्काणःस्त्रीद्रेष्काणोऽर्कशक्तश्च॥ यस्मादाचार्य्यैश्चतुष्पान्मुखाच्चतुष्पदद्रेष्काणइतिव्याख्यातस्तथाखगमुखो
द्रेष्काणश्च अथमेषतृतीयद्रेष्काणस्यस्वरूपमिंद्रवज्रयाह २ क्रूरइति क्रूरोविषमस्वभावः कलाज्ञःकलावित् कपिलःपिंगः क्रियार्थीकर्मस्वभिलाषुकः

कन्यांसितवस्त्रवेष्टितःकृष्णःशक्तइवाभिरक्षितुं रौद्रःपरशुंसमुद्यतंधत्तेरक्तविलोचनःपुमान् १ रक्तांवराभूषणभक्ष्यचिन्ताकुंभाकृति
र्वाजिमुखीतृषार्त्ता एकेनपादेनचमेषमध्येद्रेष्काणरूपंयवनोपदिष्टं २ क्रूरःकलाज्ञःकपिलःक्रियार्थीभग्नव्रतोभ्युद्यतदंडहस्तः रक्तानि
वस्त्राणिविभर्त्तिचंडोमेषेतृतीयकथितस्त्रिभागः ३ कुंचितलूनकचाघटदेहादग्धपटातृषिताशनचिंता आभरणान्यभिवांछतिनारीरूप
मिदंवृषभेप्रथमस्य ४ क्षेत्रधान्यगृहधेनुकलाज्ञोलांगलेचशकटेकुशलश्च॥

१ भग्नव्रतःस्खलितनियमः आमुखुख्येनोद्यतोदंडःहस्तेपाणौय
स्य रक्तानिलोहितानिवस्त्राण्यंवराणिविभर्त्तिधारयति चंडःक्रोधशीलः अयंमेषःतृतीयस्त्रिभागोद्रेष्काणःकथितःउक्तः एषनरद्रेष्काणःसायुधोजीवसा
क्तश्च अथवृषप्रथमद्रेष्काणजातस्यस्वरूपंदोधकेनाह ३ कुंचितेति कुंचिताः कुटिलाःलूनाःकल्पिताःकचाःकेशायस्याः कुटिलछिन्नकेशाः घटदेहाकुं
भसदृशोदरी दग्धपटादग्धवस्त्रा तृषितापिपासार्त्ता अशनेभोजनेचिंतयस्याः आभरणानिभूषणान्यभिवांछति साचनारीस्त्री इदंवृषभप्रथमद्रेष्काणस्य
स्वरूपं एषःस्त्रीद्रेष्काणःसाग्निकःशुक्रसक्तश्च अथवृषद्वितीयद्रेष्काणस्यस्वरूपंस्वागतयाह ४ क्षेत्रधान्येति क्षेत्रंकेरः धान्यानिशालयः गृहंवेश्म
धेनुःगौः कलाःगीतवाद्यनृत्यलेखचित्रकर्म्मादि एतासांज्ञःपंडितः लांगलेहलेसशाकटेशकटे[illegible]हितेकुशलःशिक्षितः गोपतितुल्यंवृषभसदृशंस्कंधंक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ.
टी.अ.
११९

कुटम्बुद्वहति धारयति क्षुत्परः पिपासार्त्तः अजवदनः छागवक्त्रः मलवासा मलिनांबरः एषो नरद्रेक्काणश्चतुष्पाद्द्रेक्काणो बुधसत्कश्च अथ वृषतृतीयस्य स्वरू
पं प्राकटेनाह ५ द्विपसमकाय इति द्विपसमकायो महाशरीरो हस्तितुल्यदेहः न पुनः हस्तिशरीरः पांडुरदंष्ट्रः श्वेतदंतः सरभसमांघ्रिः वृहत्पादो न पुनः शरभ
सदृशपादः पिंगलमूर्तिः कपिलदेहः अविः प्रसिद्धः मृगश्चारण्यपशुः अविमृगलोभार्थव्याकुलं चित्तं यस्याः अयं वृषभवनस्य वृषराशेः प्रांतगतस्तृतीयद्रेक्का
णः एषः नरद्रेक्काणः चतुष्पादः सौरसत्कश्च अथ मिथुनस्य प्रथमद्रेक्काणस्य स्वरूपज्ज्ञानं वसंततिलकेनाह ६ सूच्याश्रयमिति नारी स्त्री सूच्याश्रयं कर्म्म सी
वनक्रियां सम्यगभिवांछति इति रूपान्विता सरूपा आभरणकार्य्ये भूषणकर्म्मणि कृतस्मादरा साभिलाषा अप्रदा यया हीनप्रजा अपत्यरहिता उच्छ्रितभुजो वा
द्वाहुकी ऋतुमती सार्त्तवा कामार्त्ता वा तृतीयभवनस्य मिथुनस्याद्यं प्रथमं त्रिभागं द्रेक्काणं तज्ज्ञाः पंडिताः प्रवदंति कथयंति एष स्त्रीद्रेक्काणो बुधसत्कश्च अथ

स्कंधमुद्वहति गोपतितुल्यं क्षुत्परो ऽजवदनो मलवासाः ५ द्विपसमकायः पांडुरदंष्ट्रः शरभसमांघ्रिः पिंगलमूर्त्तिः अविमृगलोभव्याकुल
चित्तो वृषभवनस्य प्रांतगतो ऽयं ६ सूच्याश्रयं समभिवांछति कर्म्म नारी रूपान्विताभरणकार्य्यकृतादरा च हीनप्रजोच्छ्रितभुजार्त्तुमती त्रि
भागमाद्यं तृतीयभवनस्य वदंति तज्ज्ञाः ७ उद्यनसंस्थः कवची धनुष्मान् शूरो ऽस्त्रधारी गरुडाननश्च क्रीडात्मजालंकरणार्थचिंतां करोति
मध्ये मिथुनस्य राशेः ८ भूषितो वरुणवद्बहुरत्नो बद्धतूणकवचः सधनुष्कः नृत्तवादितकलासु च विद्वान्काव्यकृन्मिथुनराश्यवसाने ९ ॥ ॥

मिथुनद्वितीयस्य स्वरूपमुपजातिकयाह ७ उद्यानसंस्थ इति उद्यानसंस्थ उपवने तिष्ठति कवची सन्नाहप्रावृत्तशरीरः धनुष्मान् चापहस्तः शूरो रणप्रियः शरास्त्रधारी
वा पाठः शराः कांडानि तान्येवास्त्राणि तद्धारणे शीलं यस्येति गरुडाननो यस्य सदृशवक्त्रः क्रीडनं क्रीडा आत्मजा पुत्राः अलंकरणमाभरणं अर्थो वित्तं एषां संबंधिनी चिं
तां करोति अथ मिथुनस्य राशेर्मध्ये द्वितीयद्रेक्काण इत्यर्थः एष नरद्रेक्काणः सायुधः स्वगद्रेक्काणः शुक्रसत्कश्च ८ अथ मिथुनस्य तृतीयद्रेक्काणस्वरूपं स्वागतया
ह भूषित इति भूषितो ऽलंकृतः वरुणवत्समुद्रवद्बहुरत्नः प्रभूतमणिः तूणं शराधानं कवचः सन्नाहः एतौ बद्धौ पंथितौ येन सधनुष्कश्चापयुक्तः नृत्ते वादिते वाद्य राम
विषये कलासु च निःशेषासु विद्वांस्तज्ज्ञः काव्यकृत् पंडितः काव्यकर्म्म कार्य्यं तत्करोति एषः मिथुनस्य राशेरवसाने तृतीयद्रेक्काण इत्यर्थः एषः नरद्रेक्काणः सायुधः ११९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्रेति पत्राणिमूलानिफलानिचविभर्तिधारयति द्विपकायोहस्तिसदृशशरीरः काननेमलयगः मलयश्चंदनवृक्षः तत्रोपगतःस्थितः शरभांघ्रिः शरभसदृशपा
दः क्रोडः शूकरः तत्तुल्यवदनः तत्सदृशवक्त्रः हयकंठोऽश्वग्रीवः कर्कटेकर्कटराशौप्रथमेद्रेष्काणस्यस्वरूपमुशंतिकथयति एषद्रेष्काणश्चतुष्पाच्चंद्रसक्तश्च
अथकर्कटद्वितीयद्रेष्काणस्यस्वरूपमिंद्रवज्रयाह १० पद्मार्चितेति स्त्रीयोषिन्मूर्द्धनिशिरसिपद्मैः कमलैरर्चितापूजिता भोगियुक्ताः समर्प्पा कर्कशाकठि
नयौवनोपेता अरण्यगताएकांतस्थिता विरौतिआक्रोशयति पलाशवृक्षस्यशाखांलतांसमाश्रितातत्रासक्तास्थिता कर्कटस्यराशेर्मध्येस्थिताद्वितीयद्रेष्का
णेसमवस्थिता एषस्त्रीद्रेष्काणोभौमसक्तश्च अथकर्कटस्यतृतीयद्रेष्काणस्यस्वरूपंवैतालीयेनाह ११ भार्येति भार्य्याजायातस्याआभरणार्थमलंकार
णानिनिमित्तमर्णवंसमुद्रंनौस्थोवेडकारूढः सर्प्पवेष्टितांगोगच्छतियाति हैमैः सुवर्णनिर्मितैर्विभूषणैरलंकरणैर्युतः चिपिटास्यः चर्प्पटमुखः कर्के

पत्रमूलफलभृद्द्विपकायः काननेमलयगः शरभांघ्रिः क्रोडतुल्यवदनोहयकंठः कर्कटेप्रथमरूपमुशंति १० पद्मार्चितामूर्द्धनिभोगियुक्ता
स्त्रीकर्कशाऽरण्यगताविरौति शाखांपलाशस्यसमाश्रिताचमध्यस्थिताकर्कटकस्यराशेः ११ भार्य्याभरणार्थमर्णवंनौस्थोगच्छतिसर्प्प
वेष्टितः हैमैश्चयुतोविभूषणैश्चिपिटास्योंत्यगतश्चकर्कटे १२ शाल्मलेरुपरिगृध्रजंबुकोश्वानरश्चमलिनांबरान्वितः रौतिमातृपितृ
विप्रयोजितः सिंहरूपमिदमाद्यमुच्यते १३ हयाकृतिः पांडुरमाल्यशेखरोविभर्तिकृष्णाजिनकंबलंनरः॥ ६ ॥ ॥

टेंत्यगतः तृतीयद्रेष्काणइत्यर्थः एषनरद्रेष्काणोव्यालद्रेष्काणोजीवशक्तश्च अथसिंहपूर्वस्यस्वरूपज्ञानंरथोद्धतयाह १२ शाल्मलेरिति शाल्मलिवृक्षस्यो
पर्य्यग्रेगृध्रः पक्षी जंबुकः शृगालः एतौस्थितौतथाश्वासारमेयः नरोमनुष्यः सचमलिनैः मलोपेतैरंबरैर्वस्त्रैरन्वितोयुक्तः मातृपितृविप्रयोजितोजननीजन
कविरहितो रौत्याक्रोशयति इदमाद्यप्रथमंरूपंसिंहस्योच्यते कथ्यते सिंहप्रथमद्रेष्काणइत्यर्थः एषनरद्रेष्काणश्चतुष्पदद्रेष्काणःखगद्रेष्काणोऽर्कसक्त
श्च अथसिंहद्वितीयस्यस्वरूपंवंशस्थेनाह १३ हयाकृतिरिति हयाकृतिःअश्वाकारः पांडुरमीषच्छुक्लायुक्तं माल्यंपुष्पनिचयंशेखरोशिरसियस्य कृष्णाजि
नंकृष्णमृगचर्म्म कंबलमौर्णिकं विभर्तिधारयति केचित्कृष्णाजिनचीवरमिति पठंतिचीवरंजिनवासः नरोमनुष्योदुरासदोदुर्ज्ञेयः दुःसाध्यः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ सिंहइवआत्तकार्म्मुकः गृहीतचापः नताग्रनास नताग्रानासायस्य मृगराजस्यसिंहस्यमध्यमो द्वितीयोद्रेष्काणः हयाकृतिः पुरुषएवायंनचतुष्पदद्रेष्काणः
टी·भ एषनरद्रेष्काणः सायुधोजीवसक्तश्च १४ अथसिंहतृतीयस्यस्वरूपमुपजातिकयाह ऋक्षाननइति ऋक्षः प्राणीऋक्षाननः ऋक्षसदृशवक्त्रः वानरतुल्य
१२० चेष्टः वानरेणकपिनातुल्यासदृशाचेष्टास्वभावोयस्य आयुधंदंडंफलंआम्रादिआमिषंमांसंचबिभर्त्तिधारयति कूर्चीदीर्घश्मश्रुः मनुष्यःपुरुषः कुटिलैः
कैशैर्मूर्द्धजैर्युक्तः मृगेश्वरस्यसिंहस्यांत्यगस्त्रिभागः एषनरद्रेष्काणः चतुष्पदद्रेष्काणः सायुधोभौमसक्तश्च अथकंन्यापूर्वस्यस्वरूपमुपजातिकयाह १५
कंन्याकुमारीपुष्पप्रपूर्णेनकुसुमपरिपूरितेनकुंभेनउपलक्षितामलप्रदिग्धैरतिमलोपेतैरंबरैर्वस्त्रैः संवृत्तांगीसंवृत्तावयवावस्त्राण्यंबराणि अर्थोधनं एषां
संयोगमभीप्समानावांछमानागुरोःकुलंगच्छतिव्रजति कंन्यकाद्यः प्रथमद्रेष्काणः एषस्त्रीद्रेष्काणोबुधसक्तश्च अथकंन्याद्वितीयस्यस्वरूपंवैतालीयेनाह १६

दुरासदःसिंहइवात्तकार्मुकोनताग्रनासोमृगराजमध्यमः १४ ऋक्षाननोवानरतुल्यचेष्टोविभर्त्तिदंडंफलमामिषंच कूर्चीमनुष्यःकुटि
लैश्चकैशैर्मृगेश्वरस्यांत्यगतस्त्रिभागः १५ पुष्पप्रपूर्णेनघटेनकंन्यामलप्रदिग्धांबरसंवृत्तांगी वस्त्रार्थसंयोगमभीप्समानागुरोःकुलं
वांछतिकंन्यकाद्याः १६ पुरुषःप्रगृहीतलेखनिःश्यामोवस्त्रशिराव्ययायकृत् विपुलंचविभर्त्तिकार्म्मुकंरोमव्याप्ततनुश्चमध्यमः १७॥
गौरीसुधौताग्रदुकूलगुप्तासमुच्छ्रिताकुंभकटच्छुहस्ता देवालयंस्त्रीप्रयताप्रवृत्तावदंतिकंन्यांत्यगतस्त्रिभागः १८ ॥ ६ ॥ ॥

पुरुषोनरः प्रगृहीतलेखनिः येनाक्षराणिलिख्यंतेसालेखनिः श्यामोश्यामवर्णः वस्त्रशिराः कर्प्पटसंयमितमूर्द्धा केचिद्दृढशिराइतिपठंति संयमितशिराः
व्ययंव्ययीकृत् आयंप्रवेशंचकरोति गणपतिविपुलंविस्तीर्णकार्म्मुकंधनुर्बिभर्त्तिधारयति रोमव्याप्ततनुःरोमशरीरः एषमध्यमोद्वितीयद्रेष्काणः एषनरद्रेष्का
णःसायुधःसौरसक्तश्च अथकंन्यातृतीयस्यज्ञानमुपजातिकयाह १७ गौरीगौरवर्णा सुधौताग्राणियस्मिन्दुकूलेपट्टविशेषेतेनगुप्ताछादिता केचित्तुदुकूल राम
हस्ताइतिपठंति समुच्छ्रिताअत्युच्चा कुंभोघटकटच्छुर्दर्वीप्रसिद्धंगृहोपयोगिकंलोहभांडंनेकरेहस्तेयस्याः देवालयंसुरगृहंस्त्रीयुवतिःप्रयतासमाहिता प्रवृत्ता १२०
गंतुमुद्यतावदंतिकथयंतिमुनयः कंन्यांत्यगतस्त्रिभागः तृतीयद्रेष्काणः एषस्त्रीद्रेष्काणःशुक्रसक्तश्च अथतुलाद्यस्वरूपंवसंततिलकेनाह १८ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीथ्यंतरेति वीथ्यंतरे मार्गमध्येयत्तदापणंप्रसारकः समवस्थितस्तत्रगतः हट्टं पुरुषोनरस्तुलावानतुलाहस्तः विद्यमानतुलः उन्मानेउद्धमानेतुलादिकेमाने मान
शब्देनकुडवादौचतस्मिन्कुशलस्तद्ज्ञः प्रतिमानंयेनद्रव्याणिसुवर्णरत्नानिपरिछिद्यंतेतेतुहस्तेयस्याः भांडंक्रयद्रव्यंतद्विद्यतेयस्याचिंतयतिध्यायति तस्यभांड
स्यैतन्मूल्यमति तस्यचभांडस्यचमूल्यंविचिंतयति एतद्यवनास्तुलायाःप्रथमद्रेक्काणस्वरूपंवदंतिकथयंति एषःनरद्रेक्काणःशुक्रसंज्ञश्च अथतुलाद्वितीय
स्यत्रोटकेनाह १९ कलशमिति गृध्रःपक्षी गृध्रमुखोगृध्राननःपुरुषः कलशंकुंभंगृहीत्वाविनिःपतितुंनिर्विशेषपतितुमभीप्सतिवांछतियतःक्षुधितोबुभु
क्षितः तृषितःपिवासितोतःकलत्रंभार्य्यांसुतान्पुत्रान्मनसाचित्तेनैतिगच्छति अभीप्सतिअभिलषतिस्मरतीत्यर्थः इत्येवंप्रकारःतुलाधरमध्यगतःतुला
द्वितीयद्रेक्काणः एषनरद्रेक्काणःखगद्रेक्काणःशनैश्चरसंज्ञश्च अथतुलातृतीयस्वरूपंवंशस्थेनाह २० विभीषयमिति रत्नचित्रितोमणिभिर्विभूषितः व

वीथ्यंतरापणगतः पुरुषस्तुलावानुन्मानुमानकुशलःप्रतिमानहस्तः भांडंविचिंतयतितस्यचमूल्यमेतद्रूपंवदंतियवनाःप्रथमंतुलायाः
१९ कलशंपरिगृह्यविनिःपतितुंसमभीप्सतिगृध्रमुखःपुरुषः क्षुधितस्तृषितश्चकलत्रसुतान्मनसैतितुलाधरमध्यगतः २० वि
भीषयंतिष्ठतिरत्नचित्रितोवनेमृगान्कांचनतूणवर्म्मभृत् फलामिषंवानररूपभृन्नरस्तुलाऽवसानेयवनैरुदाहृतः २१ वस्त्रैर्विही
नाभरणैश्चनारीमहासमुद्रात्समुपैतिकूलं स्थानच्युतासर्प्पनिबद्धपादामनोरमावृश्चिकराशिपूर्वः २२

ऽ॥ नेऽरण्येमृगान्हरिणान्विभीषयंभीषां
कुर्वन्तिष्ठति कीदृशः कांचनंसौवर्णंतूणंशराधानवर्म्मसन्नाहंतेचविभर्त्तिधारयति फलान्यामिषंचमांसंविभर्त्तिनरोमनुष्योवानररूपभृत् वानरस्यकपेरिव
रूपंविभर्त्तिधारयति फलान्याम्रादीनि केचिद्धनुर्द्धरःकिंनररूपभृन्नरइतिपठंति धनुर्द्धरःचापहस्तःकिंनरोदेवयोनिरश्वमुखपुरुषः तुलावसानेतुलस्यतृ
तीयद्रेक्काणेयवनैःपुराणयवनैरुदाहृतःकथितः नरोमनुष्योवानराकारोऽयंचतुष्पदेद्रेक्काणोबुधसंज्ञश्च २१ अथवृश्चिकप्रथमस्यस्वरूपमुपजातिकयाह
॥नारीस्त्रीवस्त्रैरंबरैस्तथाभरणैरलंकरणैश्चविहीनावर्जिता महासमुद्रान्महासागरात्कूलंसमुपैत्यागच्छतिस्थानच्युतास्वस्थानभ्रष्टा सर्प्पनिबद्धपादोभुज
गनियमितचरणा मनोरमाचित्तानंदविधायिनीचित्ताह्लादकरी वृश्चिकराशेःपूर्वःप्रथमद्रेक्काणः एषस्त्रीद्रेक्काणोव्यालद्रेक्काणोभौमसंज्ञश्च अथवृश्चिकद्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ. नारीस्त्रीस्थानसुखानि अभिवांछति भर्तृकृते पतिनिमित्तं भुजगावृतदेहासर्पव्याप्तशरीरा कच्छपः कूर्म्मः कुंभोघटः तत्समानशरीरा तत्तुल्यदेहा वृश्चिके मध्यम
टी.भ. रूपं द्वितीयंद्रेष्काणमुशंतिकथयंति एषस्त्रीद्रेष्काणोव्यालद्रेष्काणः जीवशक्तश्च अथवृश्चिकतृतीयस्यस्वरूपज्ञानंपुष्पिताग्रयाह २३ पृथुलचिपिटमिति
१२९ पृथुलंविस्तीर्णं चिपिटं चप्पेटं कूर्मतुल्यं कच्छपसदृशं वक्त्रं मुखं यस्य श्वासारमेयः मृगोहरिणः शृगालः क्रोष्टा वराहः शूकरः एषांभीषकारीभयकारी॥
मलयस्य चंदनस्याकरस्यप्रदेशमुत्पत्तिस्थानमवतिरक्षति सचमृगपतिः सिंहः अन्त्यगतोवृश्चिकस्यतृतीयद्रेष्काणः एषः कूर्म्माननः सिंहोद्रेष्काणः
चतुष्पदद्रेष्काणः चंद्रसक्तश्च अथधन्विपूर्वस्यस्वरूपज्ञानमिंद्रवज्रयाह २४ मनुष्यवदिति मनुष्यवक्त्रोनरवदनः अश्वसमानकायस्तुरगसदृशदेहः
अयतंदीर्घं धनुश्चापंगृहीत्वाआश्रमस्थः तत्राश्रमेतिष्ठति॥क्रतूप ज्यानियज्ञोपकरणादीनियज्ञभांडानिश्रुक्स्रुवादीनितपस्विनस्तापसान्रक्षति अव

स्थानसुखान्यभिवांछतिनारीभर्तृकृतेभुजगावृतदेहा कच्छपकुंभसमानशरीरावृश्चिकमध्यमरूपमुशंति २३ पृथुलचिपिटकूर्म्मतुल्यवृ
क्त्रःश्वमृगवराहशृगालभीषकारी अवतिचमलयाकरप्रदेशंमृगपतिरन्त्यगतस्यवृश्चिकस्य २४ मनुष्यवक्त्रोऽश्वसमानकायोधनुर्वि
गृह्यायतमाश्रमस्थः क्रतूपयोज्यानितपस्विनश्चरक्षपूर्वोधनुषस्त्रिभागः २५ मनोरमाचंपकहेमवर्णाभद्रासनेतिष्ठतिमध्यरूपा
समुद्ररत्नानिविघट्टयंतीमध्यत्रिभागोधनुषःप्रदिष्टः २६ कूर्चीनरोहाटकचंपकाभोवरासनेदंडधरोनिषण्णः॥ ॥ ॥

तिरक्षितवान् अथशब्दःपादपूर्णे आद्यःप्रथमोधनुषस्त्रिभागोधन्विद्रेष्काणः केचिच्चरक्षपूर्वेतिपठंति धनुषःपूर्वस्त्रिभागःप्रथमद्रेष्काणः एषोऽश्वसमा
नकायःनरद्रेष्काणः चतुष्पात्सायुधद्रेष्काणःजीवसक्तश्च अथधन्विद्वितीयस्यस्वरूपज्ञानमुपजातिकयाह २५ मनोरमाचित्ताह्लादकरी चंपकंपुष्पविशेषः
हेमंसुवर्णंतत्सदृशावर्णातत्समकांतिः भद्रासनेआसनविशेषेतिष्ठति तत्रउपविष्टा मध्यमरूपानचातिशोभनानाप्यशोभना समुद्ररत्नानिसागररमणीनूवि राम
घट्टयंतीस्त्रीतिष्ठति धनुषोमध्यत्रिभागोद्वितीयद्रेष्काणोमुनिभिःप्रदिष्टःउक्तः एषस्त्रीद्रेष्काणोभौमशक्तश्च अथधन्वितृतीयस्यस्वरूपमुपजातिकयाह १२९
२६ कूर्चीनरइति नरोमनुष्यःकूर्चीदीर्घश्मश्रुः हाटकंसुवर्णंचंपकःपुष्पविशेषः तदाभोतत्सदृशकांतिः तत्समानद्युतिः वरासनेप्रधानासनेनिषण्णः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपविष्टः दंडधरोदंडहस्तः कौशेयकानि पट्टविशेषाणि उद्वहते धारयति अजिनं मृगचर्म्म नवमस्यराशेर्द्धनुषस्त्रितीयद्रेष्काणस्यस्वरूपं एषनरद्रेष्काणः सायु
धः अर्कसक्तश्च अथमकरप्रथमस्यस्वरूपं दोधकेनाह २७ रोमचितोरोमसः मकरोपमदंष्ट्रः मकरतुल्यदंष्ट्रः मकरोजलप्राणी शूकरस्यवराहस्यकायोदेहः तत्स
मानशरीरः तत्तुल्यतनुः योक्त्रकंयेनबलीवर्द्दायोज्यंते जालकः प्रसिद्धः येनपक्षिणोबध्यंते बंधनंनिगडादि एतानितानिधारयति तच्छीलः रौद्रमुखोविकृता
ननः मकरप्रथमः प्रथमद्रेष्काणः एषः पुरुषद्रेष्काणोबंधनधारित्वात्सनिगडः शूकरसमानशरीरः नशूकरः तस्मान्नचतुष्पात् शनैश्चरशक्तश्च अथमक
रद्वितीयस्यस्वरूपमुपजातिकयाह २८ कलास्वभिज्ञाब्जदलायताक्षीति कलास्वभिज्ञाअभिमुख्येनजानाति अब्जदलायताक्षी अब्जदलंपद्मपत्रंतद्वदायतेदीर्घे
अक्षिणीयस्याःसादीर्घनेत्राचश्यामाश्यामवर्णा विचित्राणिनानाप्रकाराणिवस्तुनिचमार्गमाणा अभीप्समाना विभूषणैरलंकरणैरलंकृता लोहकर्णालो

कौशेयकान्युद्वहतेऽजिनंचतृतीयरूपंनवमस्यराशेः २७ रोमचितोमकरोपमदंष्ट्रः शूकरकायसमानशरीरः योक्त्रकजालकबंधनधा
रीरौद्रमुखोमकरप्रथमस्तु २८ कलास्वभिज्ञाब्जदलायताक्षीश्यामाविचित्राणिचमार्गमाणा विभूषणालंकृतलोहकर्णायोषाप्रदिष्टामक
रस्यमध्ये २९ किन्नरोपमतनुःसकंबलस्तूणचापकवचैः समन्वितः कुंभमुद्वहतिरत्नचित्रितंस्कंधगंमकरराशिपश्चिमः ३० स्नेहमद्यज
लभोजनागमव्याकुलीकृतमनाःसकंबलः केशकारवसनोजिनान्वितोगृध्रतुल्यवदनोघटादिगः ३१

ह्युक्तश्रोत्रा लोहाभरणंकर्णयोःयस्याः
सायोषास्त्री मकरस्यमध्येद्वितीयद्रेष्काणेप्रदिष्टाउक्ता एषः स्त्रीद्रेष्काणः शुक्रशक्तश्च अथमकरतृतीयस्यस्वरूपंरथोद्धतयाह २९ किन्नरोपमतनुःकिन्नरस्येव
योनयः अश्वमुखाःपुरुषास्तत्सदृशीतनुः सकंबलःकंबलेनसहितः तूणंशराधारंचापंधनुःकवचःसन्नाहः एतैः तूणचापकवचैःशराधारधनुसन्नाहैःसमन्वि
तोयुक्तः कुंभंघटंरत्नविचित्रितंमणिविचितंस्कंधगंअंसासक्तंउद्वहतिधारयति मकरराशेःपश्चिमः तृतीयद्रेष्काणः एषःपुरुषद्रेष्काणःसायुधःबुधशक्तश्च अथ
कुंभप्रथमद्रेष्काणस्यस्वरूपंदोधकेनाह ३० स्नेहमद्यजलभोजनाद्गमिति स्नेहस्तैलादि मद्यंपानविशेषः जलमुदकं भोजनमशनं एतेषांयाआगमः तेनव्याकुलितंमनः
चित्तंयस्य सकंबलःकंबलसहितः केशकारवसनःपट्टवासाः अजिनान्वितः कृष्णमृगचर्म्मयुक्तः गृध्रःपक्षीतत्तुल्यवदनःतत्समवक्त्रःघटादिगःकुंभप्रथमद्रेष्काणः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ. शकटेगत्यांदग्धे अग्निना भस्मीकृते सशाल्मले शाल्मलवृक्षैः सहिते अंगना स्त्री लोहान्याहरते गृह्णाति वने आरण्ये मलिनेन पट्टेन समलेन वाससा संवृता प्राट
टी.अ. ता भांडैः भांडप्रकारैः मूर्द्धिगतैः मस्तकारोपितैः उपलक्षिता केचिद्भांडैरारोपितैः परिपूर्णा इति पठंति मध्यमो द्वितीयद्रेष्काणः एषस्त्रीद्रेष्काणः साग्निको बुधसक्त
१२२. श्च अथ कुंभतृतीयस्य स्वरूपज्ञानमिंद्रवज्रयाह ३२ श्यामइति॥ श्यामः श्यामवर्णः सरोमश्रवणः लोमसकर्णः किरीटी मौलियुक्तः त्वक्चर्मपत्रं पर्णं निर्यो
सो वृक्षनिर्यासः यथा गुग्गुलुः स्नेहः फलं च सुप्रसिद्धमेवाम्रादि एतैः सह भांडानि लोहव्यतिमिश्रितानि लोहसंयुक्तानि विभर्त्ति धारयति तानि च संचारयति स्था
नात्स्थानांतरं नयति घटस्य कुंभस्यांतगतः तृतीयद्रेष्काणः एषनरद्रेष्काणः शुक्रसक्तश्च अथ मीनाद्यस्य स्वरूपमिंद्रवज्रयाह ३३ स्रुग्भांडानि यज्ञोपकरण
भांडानि मुक्तामौक्तिकं मणयः प्रसिद्धाः शंखः प्रसिद्ध एव एतैर्मिश्रैरेकीकृतैर्व्याक्षिप्तो हस्तो यस्य आकुलकरः सविभूषणः साभरणः भार्य्या जाया तद्भूषा

दग्धे शकटे सशाल्मले लोहान्याहरतेंगना वने मलिनेन पटेन संवृता भांडैर्मूर्द्धिगतैश्च मध्यमः ३२ श्यामः सरोमश्रवणः किरीटी त्वक्पत्र
निर्यासफलैर्विभर्त्ति भांडानि लोहव्यतिमिश्रितानि संचारयंत्यत्यगतो घटस्य ३३ स्रुग्भांड मुक्तामणि शंखमिश्रैर्व्याक्षिप्तहस्तः सविभू
षणश्च भार्य्या विभूषार्थमपांनिधानं नावाप्लवत्यादिगतो झषस्य ३४ अत्युच्छ्रितध्वजपताकमुपैति पोतं कूलं प्रयाति जलधेः परिवारयु
क्ता वर्णेन चंपकमुखा प्रमदा त्रिभागो मीनस्य चैष कथितो मुनिभिर्द्वितीयः ३५ श्वभ्रांतिके सर्प्पनिवेष्टितांगो वस्त्रैर्विहीनः पुरुषस्त्वटव्यां॥

र्थमलंकरणार्थमपांनिधानं समुद्रं नावा प्लवति नौस्थो गच्छति केचिन्महार्णवं च नावाप्लवतीति पठंति झषस्य मीनस्यादिगतः प्रथमद्रेष्काणः एषनरद्रेष्काणो जी
वसक्तश्च ३४ अथ मीन द्वितीयस्य स्वरूपज्ञानं वसंततिलकेनाह अत्युच्छ्रिता अतीवोच्चा ध्वजापताका यस्मिन् पोते तमुपैति आरोहति जलधेः समुद्रस्य कूलं त राम
टं प्रयाति प्रमदा स्त्री कीदृशी परिवारयुक्ता सखिजनेनावृता चंपकं पुष्पविशेषः चंपककांतिः मुखावर्णेन कांतिं मुष्णाति अपहरति एषः मीनस्य द्वितीयत्रिभा १२२
गो मुनिभिर्गदित उक्तः एषः स्त्रीद्रेष्काणः चंद्रसक्तश्च अथ मीनस्य तृतीयद्रेष्काणस्वरूपज्ञानमिंद्रवज्रयाह ३५ श्वभ्रांतिके गर्तसमीपे सर्प्पवेष्टितांगो भुजगा
वृत्तावयवः वस्त्रैरंबरैर्विहीनो रहितः पुरुषो नरः अटव्यां आरण्ये चौरैस्तस्करैः अनलेनाग्निना व्याकुलितः क्षुभितोंतरात्मा यस्य विक्रोशतेरोदिति झषस्य मीन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यांत्योपगतः तृतीयद्रेष्काणः एवः व्यालद्रेष्काणः भौमसक्तश्च द्रेष्काणस्वरूपस्य प्रयोजनं प्रदेशेषु व्याख्यातं तथा चयात्रायां वक्ष्यति द्रेष्काणाकारचेष्टागुणसदृ
शफलं योजयेद्बुद्धिहेतोर्द्रेष्काणे सौम्यरूपे कुसुमफलयुते रत्नभांडान्विते च सौम्यैर्दृष्टे जयः स्यात्प्रहरणसदृशे पापदृष्टे च भंगः संमोहो वाथ बंधः सभुजगनिगडे पा
पमुक्तिर्पियासु रिति अन्य च्च अस्य प्रयोजनं चौररूपस्थानादिज्ञानं उक्तं च षट्पंचाशिकायां पृथ्वीयशेन अंशकाज्ज्ञायते द्रव्यं द्रेष्काणैस्तस्कराः स्मृताः राशिभ्यः
कालदिग्देशो वयो ज्ञातिश्च लग्नपात् एवं वृत्तानि ३६ ॥ इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृत्तौ द्रेष्काणस्वरूपाध्यायः पंचविंशतितमः २५॥ ॥ अथा
न उपसंहाराध्यायो व्याख्यायते अथाध्यायसंग्रह मुपजातिकयाह॥०॥ राशिप्रभेदः प्रथमोध्यायः ग्रहयोनिभेदो द्वितीयः वियोनिजन्म तृतीयः अथ शब्दो
आनंतर्ये निषेककालश्चतुर्थः जन्मविधिः पंचमः ५ अथ सद्योमरणमरिष्टाध्यायो षष्ठः ६ आयुर्विभागः सप्तमः ७ दशाविभागोऽष्टम ८ अष्टकवर्गसं

चौरानलव्याकुलितां नराणां विक्रोशनेंत्योपगतो क्रमस्य ३६ राशिप्रभेदो ग्रहयोनिभेदो वियोनिजन्माथ निषेककालः जन्माथ सद्योमर
णं तथायुर्दशाविपाकोऽष्टकवर्गसंज्ञः १ कर्म्माजीवो राजयोगा खयोगाश्चांद्रयोगा द्विग्रहाद्याश्च योगाः प्रव्रज्याथो राशिशीलानि दृष्टि
र्भावस्तस्मादाश्रयोथ प्रकीर्णः २ नेष्टा योगा जातकं कामिनीनां निर्य्याणं स्यान्नष्टजन्मद्रकाणाः अध्यायानां विंशतिः पंचयुक्ता जन्म
न्येतद्यात्रिकं चाभिधास्ये ३॥ ञ्ज्ञो नवमः ९ अथ शेषाध्यायसंग्रहं शालिन्याह १ कर्म्माजीवो दशमः १० राजयोगाध्याय एकादशः १० खयोगाः
नाभसयोगाध्यायो द्वादशः १२ चांद्रयोगाः सुनफाद्याश्चंद्रयोगाध्यायस्त्रयोदशः १३ द्विग्रहत्रिग्रहयोगाध्यायश्चतुर्दशः १४ प्रव्रज्यायोगाध्यायः पंचदशमः
१५॥ अथोनंतरं राशिशीलाध्यायः षोडशः १६ दृष्टिफलाध्यायः सप्तदशः १७ तस्मात् परो भावाध्यायोष्टादशः १८ अथातः परमाश्रयाध्याय एकोनविंशतितमः
१९ प्रकीर्णाध्यायो विंशः २० अथ शेषाध्यायसंग्रहं शालिन्याह २ अनिष्टयोगा इति अनिष्टयोगाध्याय एकविंशतिः २१ कामिनीनां स्त्रीणां जातकाध्यायो द्वा
विंशतिः २२॥ निर्य्याणं मरणं तन्नानाध्यायस्त्रयोविंशतिः २३ नष्टजातकाध्यायश्चतुर्विंशः २४ द्रेष्काणस्वरूपाध्यायः पंचविंशतिः २५ एवं पंचयुक्ताध्यायानां
विंशतिः जन्मनि जातके उक्ता का यत्ना एतज्जातके एवमिदानीं यात्रिके यात्रायां निबद्धमध्यायसंग्रहमभिधास्ये कथयिष्ये तच्चोपजातिकयाह ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृ· प्रश्नाःप्रश्नप्रभेदाध्यायः तिथिस्तिथिबलाध्यायः भंनक्षत्रभिधानं दिवसोदिवसाभिधानः वारफलं क्षणोमुहूर्त्तनिर्देशः चंद्रश्चंद्रबलाध्यायः लग्नंचलग्न
टी·प विनिश्चयः अथानंतरं लग्नभेदोहोराद्रेष्काणनवांशकद्वादशभागत्रिंशद्भागानांलक्षणं सफलं ग्रहाणांशुद्धिःसफलं समस्तग्रहाणांकुंडलिकाफलं
१२३ अथअनंतरं अपवादाध्यायः विमिश्रकार्य्यमिश्रकाध्यायः तनुवेपनंदेहास्पंदनं शेषाध्यायस्यसंग्रहकथनंतरमुपजातिकयाह ४ अतोऽस्मात्परंगु
ह्यकपूजनंस्याद्भवेत् स्वप्नंस्वप्नाध्यायः ततोऽनंतरंस्नानविधिःप्रदिष्टःउक्तः ग्रहाणांयज्ञोग्रहयज्ञः अथानंतरंनिर्गमःप्रस्थानिकंक्रमात्परिपाट्याद्दिष्टउक्तः
शकुनोपदेशःशकुनरुतज्ञानं एषोयात्रायांसंग्रहः अथशेषवस्तुसंग्रहमुपजातिकयाह ५ विवाहकालोविवाहपटलं ग्रहाणांकरणंपंचसिद्धांतिकायांप्रोक्तं
कथितं पृथग्विभज्यतद्विपुलातस्यकरणस्यशुभाशुभज्ञानायविपुलाविस्तीर्णाशाखाकथिता त्रिभिःस्कंधैस्तैर्गणितहोरासंहिताख्यैस्त्यंज्योतिःशास्त्रसंग्र

प्रश्नास्तिथिर्भंदिवसःक्षणाश्चचन्द्रोविलग्नंत्वथलग्नभेदः शुद्धिर्ग्रहाणामथचापवादोविमिश्रकाख्यंतनुवेपनंच ४ अतःपरंगुह्यक
पूजनंस्यात्स्वप्नंततःस्नानविधिःप्रदिष्टः यज्ञोग्रहाणामथनिर्गमश्चक्रमाच्चदिष्टःशाकुनोपदेशः ५ विवाहकालःकरणंग्रहाणांप्रोक्तं
पृथक्तद्विपुलाचशाखा स्कंधैस्त्रिभिर्ज्योतिषसंग्रहोयंमयाकृतोदैववदांहिताय ६ पृथुविरचितमन्यैःशास्त्रमेतत्समस्तंतदनुलघुमये
दंतत्प्रदेशार्थमेव कृतमिहहिसमर्थंधीविषाणामलत्वेममयदिहयदुक्तंसज्जनैःक्षम्यतांतत् ७ ग्रंथस्ययत्प्रचरतोस्यविनाशमेतिलेख्या
द्बहुश्रुतमुखाधिगमक्रमेण॥ ८॥ होमयावराह मिहिराचार्य्येणदैवविदांसांवत्सरिकाणांहितायहितार्थंकृतोविरचितः विस्तीर्णशास्त्राण्यालोच्यसंक्षेपतः रा·म·
मयाकृतमेतत्मालिन्याह ६ पृथुविरचितमंन्यैरिति एतत्समस्तंसकलशास्त्रमंन्यैराचार्य्यैर्यवनेश्वरादिभिःपृथुविस्तीर्णंविरचितंकथितं तदनुतदेवशोभनतरं १२३
मयातत्प्रदेशार्थंतदुपदिष्टार्थेलघुस्वल्पंकृतं तत्प्रदेशेपियोर्थःसोस्मिन्तात्पर्य्यार्थः हियस्मादर्थे इहास्मिन्शास्त्रेकृतंधीविषाणामलत्वेबुद्धिशृंगनिर्म्मलीकर
णविषयेसमर्थमुक्तमेतत्कृतंमयोचेहसंग्रहेयदुक्तमशोभनमुक्तंकथितं तत्सज्जनैःपंडितैर्ममक्षम्यतांसंतव्यमित्यर्थः अथकालविशेषेणकुकृतात्यकृतयोश्च
पुनकरणेसतांप्रार्थनायवसंततिलकेनाह ७ ग्रंथस्येति अस्यग्रंथस्ययत्प्रचरतोविचरणमानस्ययद्विनाशमेतियाति लेख्याल्लेखकदोषात् ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततःबहुश्रुतमुखाधिगमक्रमेण बहुश्रुतानांपंडितानांमुखादधिगम्यज्ञात्वाक्रमेणपरिपाट्या विदुषा विदुषापंडितेनरागंमात्सर्य्यमपहृत्यविहायकर्त्तव्यं॥
तेचशास्त्रार्थोपेक्षयासंस्कारेणसमर्थाः यद्वामयाकुकृतंकुत्सितंकृतंतथाऽस्यमपरिपूर्णंतद्विचार्य्यविचारंकर्त्तव्यमित्यर्थः तत्रादित्यदासाख्यस्यपितुर्नाम
कापित्थाख्येग्रामेवरदनामादित्यदासाच्चवित्ताज्ञानागमंस्वनिवासमुज्जयिनींचवामहोराशास्त्रनामचवसंततितिलकेनाह ८ आदित्यदासाख्योब्राह्मणस्तस्यत
नयःपुत्रस्तस्मादेवपितुरादित्यदासादवाप्तबोधंज्ञानंयेन कापित्थाख्येग्रामेयोसौभगवान्सवितासूर्य्यस्तस्माल्लब्धः प्राप्तोवरःप्रसादोयेन आवंतकः आवंतकेदे
शेउज्जयिन्यांवास्तव्यः कोसौवराहमिहरः अयंमुनिमतानिऋषिप्रणीतानिशास्त्राण्यवलोक्यविचार्य्यसम्यग्यथावस्तुकृत्वाहोरांजातकशास्त्रंरुचिरंशोभ
नंसुगमं चकारकृतवानिति ९ अथसतांप्रणामपूर्वकानिशास्त्राणिप्रणामांतानिकृत्वाततःशास्त्रावसानेपूर्वप्रणेतॄणांनमस्कारमार्य्ययाह ९ दिनक
रोऽर्केसरादिकाःसर्वएवग्रहाःमुनयोवशिष्ठाद्याःगुरुरादित्यदासःतेषांचरणप्रणिपातकरष्ठेनपादनमस्कारकरणेनकृतोयःप्रसादोऽनुकंपस्तेनानुनयेनम

यद्वामयाकुकृतमल्पमिहाकृतंवाकार्य्यंतदत्रविदुषापरिहृत्यरागं ८ आदित्यदासतनयस्तदवाप्तबोधःकापित्थकेसवितृलब्धवरप्रसादः आ
वंतकोमुनिमतान्यवलोक्यसम्यग्घोरांवराहमिहिरोरुचिरांचकार ९ दिनकरमुनिगुरुचरणप्रणिपातकृतप्रसादमतिनेदम् शास्त्रमुपसंगृहीतं

तिर्वुद्धिर्य्यस्यतेन दिनकरमुनिगुरुचरणप्रणिपातकृतप्रसादमतिना मयेदंशास्त्रमुपसंगृहीतमस्तिसीकृतं तस्मात्पूर्वप्रणेतृभ्यः पूर्वशा ऽऽनमोस्तुपूर्वप्रणेतृभ्यः १०
स्त्रकारेभ्योनमोस्तुनमस्करणेनयःकृतप्रसादःनमइतिभद्रम् १०॥इतिश्रीभट्टोत्पलविरचितायांबृहज्जातकविवृतावुपसंहाराध्यायःषड्विंशः २६ वराहमिहिराचा
र्य्यकृतेहोरामहोदधौ अर्थिनामुत्पलश्चक्रेऽर्थाप्त्यैविवृतिंध्रुवं १ चिंतामणिरितिख्याताटीकाशास्त्रज्ञवल्लभा सप्तसार्द्धसहस्राणि ७५०० मानमस्यामनुष्टुभां २
प्रीतिदोषंपरित्यज्यटीकांसम्यग्विचार्य्यच उपयोग्यात्रशास्त्रेचेत्संग्राह्यानोपराधतः ३ व्याख्येयंयन्मयायुक्तंयच्चयुक्तिविवर्जितं भ्रांत्याविलिखितंयच्चतत्सर्वं
स्फुटतानयेत् ४ चैत्रमासस्यपंचम्यांसितायांगुरुवासरे वसुष्टाष्टमितेशाके ८८८ कृतेयंविवृतिर्म्मया ५ विधायटीकाशास्त्रेस्मिंयत्किंचित्पुण्यमर्जितंतेनसोरवीभ
वत्सूर्य्यःसौजन्यालंकृतोजनः ६ दीर्घस्वरोष्ठ्यादिविधेयतांताहाष्टादशेद्यांजनसप्तकेन स्वार्थेचवेद्यासमवस्थितेनभाष्योत्पलेचैवलिखापितस्तु ७॥ ॥इति
भट्टोत्पलकृताबृहज्जातकविवृतिःसमाप्तः शुभंभूयात्॥संवत् १९११ मीतीश्रावणशुक्लत्रयोदस्यां १३ चंद्रवासरेतद्दिनेसमाप्तम् शुभम्॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृ.
दी.अ.
२४

राम.
२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu